Barcode : 4990010095923
Title - Shabdartha Chintamani vol. 4
Author - N. A.
Language - sanskrit
Pages - 1100
Publication Year - 0
Barcode EAN.UCC-13
4 990010 095923

S
491.23
S113n
v.4

[illegible]

श्लोकः

कोशं शब्दार्थ चिन्तामणि मथ रहितं पूर्णभावेन ।
कृत्वा श्रीसज्जनेश स्त्रिदिवपथ गत स्तत्प्रचाराय लोके
तत्सूनु स्तातभक्तो नरपति फतह : सिंह भूपैकवीर
विद्वत्कंठैकशोभा भरण विधिरुचिः प्रेषयत्येक कोशम् ॥ १

श्रीम त्फतह सिंहस्य नृपतेः परमा कृपा ॥
कविराजः श्यामलाख्यः कोशं प्रेषयति ध्रुवम् ॥ २ ॥

By order of H.H. Maha Rana Fateh
Presented to the Library Asiatic Soc
Oodeypore
July 2/90

Vol

NOTICE

THE SHABDARTH CHINTAMANI

A NEW SANSKRIT LEXICON.

—*‡**‡*—

This new and valuable work, in the compilation of which Brahmâvadhûta Shri Sukhânand Nâtha of Delhi, spent more than thirty years of his life, contains (as its name implies) the meanings of all words in general and colloquial use.

The following is a resumè—of the plân on which this most useful work has been arranged:—

1st. The word-forms have been tested by the process suggested in the Grammatical Sutras of Panini:—

2nd. The meanings of the words are derived from their roots, by which means not only correctness, but clearness of conception are secured. The Primary meaning is given first, and others are described according to their logical order.

The utmost care has been taken to express the meanings of the words in the best and simplest language – a feature in the construction of this work, which cannot fail to recommend it above all others for practical use.

3rd. Another point is well worthy of notice in the work, viz; that words which have special reference to Aryan Literature, whether the Smritis, Purâns or Vedas, are clearly and briefly explained.

4th. Special attention has been paid to the full definition of Scientific and Technical terms, whether these occur in the Vedas, Vedangas, Shastras, Chemistry, Mechanics or Music.

5th. The descriptions of weapons of warfare, metals, precious stones; and the directions for preparing the different kinds of soil for planting garden – and forest-trees are fully given.

6th. The officinal and non-officinal properties of drugs and the immediate causes of those diseases for which they may be given, have been fully described according to the best Medical Treatises on the subject.

7th. The author has specially adapted his work for Educational purposes in explaining ... Figure ... f

excite, and by describing the di Metres.

8th. In the arrangement words the Alphabetical order is preserved.

From these points it will be seen that this excellent work will unerring guide to those who seek mation on Political as well as Pr matters.

Fully convinced of the usef of such a Lexicon, Adi Gaur, Pt. -Râm (late Gumasta of Govt. C Agr.) resolved to undertake the -cation of the first 2Vols. as far letter [म] but on account of the wa pecuniary assistance, he could not the remaining portion of the Dicti

About 16 years ago, the first volumes were published, and are n the libraries of many of the Nobles and Pandits of India, who regret that the remaining 2vols not in their possession.

However, no one seemed willin undertake this arduous and impo task until H. H. the late Mahâ Sajjan Singh, G. C. S. I. of Mey who during his life-time was the Pat of Art and Literature, on hear through Kavi Râja Shyâmal Dâs of unfinished Dictionary, issued or that the remaining 2vols [3rd &. should be printed in the Râj Press all possible rapidity. So minute H. H. the late Mahâ Rânâ's direc that he expressed the desire tha same kind of paper be used and t equal clearness and legibility em as in the first two volumes.

In fulfilment of His Hi wishes, the work has been compl

It is therefore requested that who are desirous of obtainin Lexicon send their names an address to the undersigned.

Oodeypore, } Pundit B...

June 1...

श्रीः रैवाही ।

शब्दार्थचिंतामणिः

(*——॥*॥——*)

श्रीमत्सज्जन सिंहवीर पतिभिः संमुद्रितः पूर्तिं भाक् श्रीमन्मय
बाधं [illegible] श्रीसच्चिदेशाद्यं कीर्तिं गायतिगापयत्यखिलसत्कार्येषु
कर [illegible] रानां निधिरेष योविजयतेशब्दार्थचिन्तामणिः
तु सुखार्थं सततं संस्कृत विवेक रसिकानाम् ।
काशी गोर्शाख गिरस्थिता मणि रिवसमस्तशब्दार्थः ॥
श्री सुखानन्द नाथेन रचितो मुद्रितः पुरं ॥
उदये कविराज श्री श्यामल प्रेरणावशात् ॥१॥

—||—*

चतुर्थभाग यवर्गादि:

श्रीमन्महाराजाधिराज रविकुलावतंस महामहेन्द्र यादवार्य कुलकमल
दिवाकरमेदपाटदेशेश श्री १०८ श्रीमत्सज्जनभूपशिरोमण्याज्ञया कविराज
राजप्रेरणया मुद्रणारब्ध, श्रीमत्सज्जन सिंहासना धिरूढसर्वाधि
कार सम्पन्न श्री १०८ श्री फतहसिंह महीप मुकुटेन
[illegible] संवत्यधिकचत्वारिंशत्तमे१९४२वैक्रमेब्देराजधान्युदयपुरे
श्रीसज्जन यन्त्रालये त्राजपेयवंशीयरप्रबन्धतः श्रीमे
दपाटेश्वरकोशधनव्ययतः पूर्णतांनीतः

—‡*‡—

S10
491.23
S113R
V.4

श्रीमदेकलिंगोविजयते

य : । पुं॰ वायौ ॥ यवने ॥ गन्तरि । यशसि योगे ॥ याने ॥ सर्वनाम यदर्थे ॥ यकारे ॥ आदिलघौ । ऽऽ ॥

यकृत् । न॰ कुक्षेर्दक्षिणभागस्थमांसखण्डे । कालखण्डे । अधोदक्षिण तथापि हृदयाद्यकृतःस्थितिः । तत्र रक्तपित्तस्थ नशांविततजंमत म् रोगविशेषे ॥ यथा । प्लीहाम यस्य इत्यादि समस्तं यकृदामये । किन्तुस्थितिस्तयोर्ज्ञेया वामदक्षिण पार्श्वयो : । यमनम् । यमउपरमे । सम्पदादित्वात्क्विप् । गमादीना मितिमलोपः आगमानित्यत्वान्न तुक् । यं॰ संयम॰ कृन्तति । कृतौ । क्विप् । तुक् ॥

... र्णात्मिका । स्त्री॰ परोष्ण्याम् । ...यिकायाम् ॥

... पुं॰ प्लीहन् । रो...

कुबेरे ॥ शक्रसद्मनि ॥ त्रि॰ पूज्ये ॥ यक्ष्यते॰ पूज्यते । यक्षपूजायाम् । अकर्तरिचकारके संज्ञायामिति॰ कर्मणिघञ् । पुं॰मा॰तद्धो... द्वा । ईलक्ष्मीमक्ष्णोतिव्याप्नोति अक्षूव्याप्तौ । कर्मण्यण् ॥ यद्वा । । इः कामस्तस्यैवाक्षिणीअस्य । इ रक्षिपुयस्यवा । बहुव्रीहौसक्थ्यक्ष्णो रितिषच् ॥

यक्षकर्दम : । पुं॰ कर्पूराद्यैः समैः कृतेऽनुलेपनविशेषे ॥ यथा । क रागुरुकस्तूरीकक्कोलघुसृणानिच । एकीकृत्यमिदंसर्वंयक्षकर्दमउच्यते ॥ अपिच । कुङ्कुमागुरुकस्तूरीकर्पूरंच न्दनंतथा महासुगन्धमित्युक्तं नाम तोयक्षकर्दमः ॥ यक्षांगतकर्...

यक्षतरु : ...

सि । सरलद्रवे । तरपम
गौ० दे० भाषा० ॥
पुं० मध्वासवे । पुष्पमद्ये
रस : ॥
। पुं० गुह्यकेश्वरे । कुबेरे ॥
गुराजते । राजृ० । सत्सूद्विषेति
क्विप् ॥ मक्षाणांराङ्क्षत्वरे ॥
क्षराज : । पुं० कुबेरे ॥ यक्षाणां
राजा । राजाह : सखिभ्यष्टच् ॥
यक्षराट्पुरी । स्त्री० अलकायाम् ॥
यक्षरात्रि: । स्त्री० दीपान्वितायाम् ।
यक्षाणांरात्रि : ॥
यक्षाधिप : । पुं० कुबेरे ॥
यक्षसाधनम् न० यक्षोपासनायाम्
यक्षाभिकर्मम् । न० पिण्डखर्जूरफले ।
यक्षवास : । पुं० वटवृक्षे ॥
यक्षिणी । स्त्री० अलकायाम् ॥ यक्षा:
सन्त्यत्राम् । इनि : । ङीप् ॥
कुबेरपत्न्याम् ॥ यक्षभार्यायाम् ।
यक्षी । स्त्री० कुबेरपत्न्याम् ॥
यक्षोदुम्बरकम् । न० अश्वत्थफले ।
यक्ष्म : । पुं० रोगराजे ॥ यक्षते
यक्ष० । यो र्त्तस्तुद्खितिमन् ॥
...। स्त्री० द्राक्षायाम् ॥
...। राजयक्ष्म-

तांयस्माद्व्याधेर्यक्ष्म नयक्ष्यते । स्व
स्मात्प्रोच्यतेलोकै यक्ष्माराजविशार
दै : ॥ यक्षते० यक्ष्यतेवा । यक्ष०
मनिन् ॥
यक्ष्मी । त्रि० क्षयरोगिणि ॥
यज्य : । त्रि० पूज्ये ॥
यजन् । न० यागकर्त्तरि । यजति ।
यज० । शतृ० ॥
यजत : । पुं० ऋत्विजि ॥ यजति ।
यज० । भृमृदृशियजीत्यादिनाऽतच्
॥ यजत : ०. यष्टव्यइतिवेदभाष्य-
म् ॥
यजति : । पुं० यागे ॥
यजथ : । पुं० अग्निहोत्रे । यज्यन्तेऽ
त्रदेवा : । यज० । अमिनक्षियजि.
वधिपतिभ्योऽत्रन् ॥ यज्ञोवे ॥
यजनम् । न० सनन्लकहवि : प्रक्षेप-
णादिक्रियायाम् । यागे ॥ अस्यलक्ष
णं यथा । पशुसोमाज्यपुरोडाशसो-
मौषधिचरुप्रभृतिभिर्विभि : ख-
दिरपलाशाश्वत्थन्यग्रोधोदुम्बरप्रभृ
तिभि : समिद्भि : स्रुक्स्रुवौदूख-
लमुसलकुठारखनित्रयूपदारुदर्भ-
चर्मग्रावपवित्रभाजनादिभिर्व्यो
पकरणैरुद्गातृहोत्रध्वर्युब्रह्मादि-
भिश्चर्त्विग्भि : साध्यनेयि
...पर्यकाणांयथोक्त...

यजनकर्त्ता । पुं॰ यजनव्यापारवति॰ ऋत्विजि । ब्रीह्मादित्वादिनिः ॥

यजमानः । पुं॰ अध्वरे॰ आदेष्टरि । तिमित्र । यष्टरि ॥ यजते । यज-देवपूजासङ्गतिकरणदानेषु । पुंस् यजोः शानच् । शानश्वा । आने मुक् ॥

यजाकः । त्रि॰ दानकर्त्तरि ॥

यजिः । पुं॰ यागकर्त्तरि । यजमाने ॥ यजते । यज॰ । सर्वधातुभ्य इन् ॥

यजुर्वेदः । पुं॰ [illegible] शाखात्मकीयया । सर्वः [illegible] [illegible] अप्[illegible] ॥ [illegible] ॥ [illegible] [illegible] मा । [illegible] [illegible] स्वाप्यथर्वभिः ॥

यजुर्वेदाधिपः । पुं॰ भृगौ । शुक्रे ॥

यजुः । न॰ वेदविशेषे । गीतिरहिताऽनियताक्षरपादवेदभागे ॥ इज्यतेऽनेन । यज॰ । अर्त्तिपृवपियजितनिधनितपिभ्यो नित् इत्युसिः ॥

यज्ञः । पुं॰ आत्मनि । नारायणे । विष्णौ ॥ हुताशने ॥ सवे । अध्वरे । यागे सप्ततन्तौ । मखे । क्रतौ । विताने ॥ दक्षिणादौ वाचयज्ञस्यपत्नौ ॥ अयूपे ॥ अग्निष्टोमादौ । अग्निहोत्रदर्शपूर्णमासादौ श्रौतयागे ॥ स्मार्त्ते वैश्वदेवादौ । महायज्ञत्वेन श्रुतिस्मृतिप्रसिद्धे । देवयज्ञः पितृयज्ञः भूतयज्ञः मनुष्ययज्ञ इति चतुर्विधे स्मार्त्तयज्ञे ॥ अध्यापनादिपञ्चविधमहायज्ञे ॥ यथा । अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनमिति ॥ यज्ञ- [illegible] [illegible] [illegible] ॥ [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] व्याख्याताः ॥ अग्निहोत्रदर्शपूर्णमास- चातुर्मास्य[illegible]ज्योतिष्टोमादिः । सप्तविधः [illegible] ॥ अ- दृष्टार्थं । आश्रमोचितधर्मे॰ अती- न्द्रिये॰ ॥ समाध्यवस्थायां सर्वेन्द्रिय- वृत्तिनिरोधः श्रोत्रादीनीन्द्रिया- ण्यन्ये॰ जुह्वतीत्युक्तत्वात् संयमो यज्ञः । व्युत्थानावस्थायां रागद्वेषराहित्ये विषयभोगोऽपरो यज्ञः । शब्दादीन्विषयानन्ये इन्द्रियाग्निषु जुह्वतीत्युक्तत्वात् ॥ अन्ये व्युत्थितावस्थाः श्रोत्रादिभिरविरुद्ध

त्रिकयग्रहणंस्पृहाशून्यत्वेनानन्य-
साधारणंकुर्वन्ति॰सएवतेषांहोमः
॥ सर्वैर्दिक्षणीय : साधनरूपे ॥
यज्ञः सात्त्विकादिभेदेनत्रिविधः।
यथा। अफलाकाङ्क्षिभिर्यज्ञोवि
धिदृष्टोयइज्यते । यष्टव्यमेवेति-
मन : समाधायससात्त्विक : ॥
अभिसन्धायतुफलंदम्भार्थमपिचैव
यत् । इज्यतेभरतश्रेष्ठतंयज्ञंविद्धि
राजसम् ॥ विधिहीनमसृष्टान्नं
मंत्रहीनमदक्षिणम् । श्रद्धाविरहि
तंयज्ञंतामसंपरिचक्षते ॥ सच्चा
नेकविधोयथा । द्रव्ययज्ञास्तपो
यज्ञायोगयज्ञास्तथापरे । स्वाध्याय
ज्ञानयज्ञाश्चयतय : संशितव्रताः ॥
यज्ञानांजपयज्ञोस्मीतिभगवतोविभू
तिस्वरूपेजपयज्ञे ॥ जप्येनैवतुसं
सिद्ध्येद्ब्राह्मणोनात्रसंशयः। कुर्यादन्यन्नवाकुर्यान्मैत्रोब्राह्मणउच्यते ।
इज्यते॰ अनेनवा॰ अत्रवा । यज
याचेतिनङ् ॥ वर्णानांस्वधर्मयज्ञा
यथा। आरम्भयज्ञा : क्षत्रा : स्युर्ह
विर्यज्ञाविशः स्मृता : । परिचार
यज्ञाश्शूद्रास्तुजपयज्ञास्तुब्राह्मणा-
इति ॥ यजनीये । पूज्ये ।
यज्ञकृत् । पुं॰ यागकर्त्तरि ॥ यज्ञं
करोति । क्विप् तुक् ॥
यज्ञपशु : । पुं॰ घोटके छागे ॥
यज्ञपुरुष : । पुं॰ विष्णौ ॥ यज्ञधारा

हे ॥
यज्ञभाजनम् । न॰ यागपात्रे ॥
यज्ञभूदर्भ : । पुं॰ श्वेतदर्भे
यज्ञयोग्य: । पुं॰ उदुम्बरवृक्षे ॥ त्रि॰
यागार्हे ॥
यज्ञवल्ली । स्त्री॰ सोमलतायाम् ॥
यज्ञवाट : । पुं॰ यागस्थाने ॥
यज्ञवित् । पुं॰ यज्ञानांज्ञातरि ॥
यज्ञानांकर्त्तरि ॥ तेचबोधायनाद
य : । तेहिज्योतिष्टोमादयोयज्ञाव
स्तुभूताभवन्तीतिमन्यंते॰ तच्चतेषां
भ्रान्तिमात्रम् । यज्ञंव्याख्यास्यामो
द्रव्यंदेवतात्यागइति । अन्येकेच
स्मिन्॰ य[illegible]गनाभावात्॰ स
मुदायस्यावस्तुत्वात् ॥ यज्ञान्वे-
त्ति॰ जानाति॰ विन्दतिलभतेवा
। विद॰ । विदभूगा[illegible]क्विप् ॥
यज्ञ[illegible] : । पुं॰ [illegible]ते । सुवाद्य-
[illegible] ॥ [illegible] ॥
यज्ञशाला । स्त्री॰ [illegible] ॥
यज्ञशिष्टाशी । पुं॰ वैश्वदेवादियज्ञा
वशिष्टान्नभोजिनि
यज्ञशेष : । पुं॰ होमावशिष्टाज्यपुरो
डाशादौ ॥
यज्ञश्रेष्ठा । स्त्री॰ सोमवल्ल्याम् ॥
यज्ञसार : । पुं॰ यज्ञोदुम्बरे ॥
यज्ञसूत्रम् । न॰ उपवीते । यज्ञोप
वीते ॥ अस्यप्रमाणंयथा ॥ ऊर्द्ध्वन्तु
त्रिवृतंसूत्रंसधवानिर्मितंशनै : ।

तन्तुत्रयमधोवृत्तं यज्ञसूत्रं विदुर्बुधाः । त्रिगुणं तद्ग्रन्थियुक्तं वेदप्रवरसम्मितम् ॥ शिरोधरान्नाभिमध्यात् पृष्ठार्द्धपरिमाणकम् ॥ यजुर्विदां नाभिमितं सामगानामयं विधिः । वामस्कन्धेन विधृतं यज्ञसूत्रं बलप्रदम् ॥ इति कल्किपुराणे ४ अध्यायः यज्ञसूत्रम् । यज्ञार्थं धृतं सूत्रं वा । शाकपार्थिवादिः ॥

यज्ञसेनः । पुं० द्रुपदे ॥

यज्ञस्थानम् । न० यज्ञवाटे ॥

यज्ञाङ्गः । पुं० हेमदुग्धके । उदुम्बरे । यज्ञमङ्कृति । मृगगतौ । अमंश्यच् । खदिरवृक्षे । ब्राह्मणयष्टिकायाम् ॥ वराहमूर्त्तौ । यज्ञाङ्गान्यस्य ॥ यज्ञवराहस्याङ्गान्युक्तानि हरिवंशे । वेदपादो यूपदंष्ट्रः क्रतुहस्तश्चितीमुखः । अग्निजिह्वो दर्भरोमा० ब्रह्मशीर्षो महातपाः ॥ अहोरात्रेक्षणो दिव्यो वेदाङ्गश्रुतिभूषणः । आज्यनासः स्रुवतुण्डः सामघोषस्वनो महान् ॥ धर्मसत्यमयः श्रीमान् क्रमविक्रमसत्क्रियः । प्रायश्चित्तनखो घोरः पशुजानुर्महाभुजः । उद्गात्रान्त्रो होमलिङ्गः फलबीजमहौषधिः । वाय्वन्तरात्मा मन्त्रस्फिग्विकृतः सोमशोणितः ॥ वेदिस्कन्धो हविर्गन्धो हव्यकव्यातिवेगवान् । प्राग्वंशकायो द्युतिमान्नानादीक्षाभिरर्चितः । दक्षिणाहृदयो योगी महासत्रमयो महान् । उपाकर्मोष्ठरुचकः प्रवर्ग्यावर्त्तभूषणः ॥ नानाछन्दोगतिपथो गुह्योपनिषदासनः । छायापत्नीसहायो वै मेरुशृङ्गमिवोच्छ्रितः इति ॥ न० प्रयाजादौ ॥ यज्ञे हि द्विविधमङ्गं भवति । सिद्धरूपं० साध्यरूपञ्च । तत्र सिद्धरूपं जातिद्रव्यसंख्यादि० साध्यरूपन्तु क्रियैव । तच्च द्विविधम् । सन्निपत्योपकारकमारादुपकारकञ्च । तत्र द्रव्यादिसंस्कारकत्वेन विधीयमानं यागस्वरूपान्तर्भूतं कर्म सन्निपत्योपकारकम्० व्रीहीनवहन्यात्० व्रीहीन् प्रोक्षतीत्येवं विहितावघातप्रोक्षणादि । तद्विपरीतञ्च फलजननसामर्थ्यजनकत्वादिना यागेऽन्वितं कर्मारादुपकारकम् ॥

यज्ञाङ्गा । स्त्री० सोमवल्ल्याम् ॥

यज्ञान्तः । पुं० अवभृथे । यागशेषे ॥

यज्ञायज्ञीयम् । न० सामविशेषे ॥ यज्ञायज्ञापदयुक्तं साम० यज्ञायज्ञीयम्० इति व्याख्यातारः । यज्ञायज्ञाशब्दोऽस्मिन्नस्ति । मतौच्छः सूक्तसाम्नोरिति छः ॥

यज्ञायुधम् । न० स्फ्यकपालादिदशसु । तानि यथा । स्फ्यश्च कपालानि चाग्निहोत्रहवणी च शूर्पं च कृष्णाजिनञ्च शम्या चोलूखलञ्च मुसलञ्च

यज्ञोपलाचेतानिवेदयज्ञायुधानी तिदर्शपूर्णमासयोः श्रुतानि ॥
यज्ञायुधी । पुं॰ यजमाने ॥
यज्ञारिः । पुं॰ शिवे ॥ राक्षसे ॥
यज्ञियः । पुं॰ किंशुकद्रुमे । पलाशवृक्षे द्वापरयुगे ॥ त्रि॰ यज्ञकर्मार्हे । यज्ञानांपात्रे । क्रतुक्रियासम्पादनयोग्ये द्विजद्रव्यादौ ॥ यज्ञमर्हति यज्ञर्त्विग्भ्यामित्यत्र॰ तत्कर्मार्हत्युपसङ्ख्यानात्॰ घः ॥ यजनीये ॥
यज्ञियदेशः । पुं॰ यागकरणोपयुक्तकुरुपञ्चालादौ ॥ कृष्णसारस्तुचरतिमृगोयत्रस्वभावतः सज्ञेयोयज्ञियोदेशोम्लेच्छदेशस्त्वतः परः ॥ यज्ञियस्यासौदेशश्च ॥
यज्ञियशाला । स्त्री॰ यज्ञार्थशालायाम् । यागमण्डपे ॥
यज्ञीयः । पुं॰ उदुम्बरवृक्षे ॥ त्रि॰ यागसम्बन्धिनि ॥
यज्ञीयब्रह्मपादपः । पुं॰ विकङ्कतवृक्षे ।
यज्ञेश्वरः । पुं॰ शिवे ॥ विष्णौ ॥
यज्ञेष्टम् । न॰ दीर्घरोहिषकतृणे ।
यज्ञोदुम्बरः । पुं॰ उदुम्बरे । जन्तुफले ॥
यज्ञोपवीतम् । न॰ यज्ञसूत्रे । यज्ञार्थंधृतमुपवीतम् । शाकपार्थिवादिः । यज्ञस्योपवीतम्वा । यज्ञस्य श्रौतस्यस्मार्तस्यचविविधस्यद्व्यतपोयोगस्वाध्यायज्ञानादेरुपसामीप्येनविशेषेणनित्यसंयोगेन॰ वृतं प्रापितमित्यर्थः ॥ ब्राह्मणेनयदादेवाच्छिन्नंयज्ञोपवीतकम् । मनस्तापेनशुद्धिः स्यादापस्तम्बोऽब्रवीन्मुनिः ॥
यज्युः । पुं॰ यजुर्वेदविदि । अध्वर्यौ ॥ यजति । यज । यजिमनीतियुच् ।
यज्वा । पुं॰ विधिविधानतः कृतयागे । इष्टवान्॰ यजतेस्मवा । यज देवपूजासङ्गतिकरणदानेषु । सुयजोर्ङ्वनिप् ।
यज्वनांपतिः । पुं॰ चन्द्रे ॥
यत् । अ॰ हेतौ । यस्मात्यद्॰ अव्ययम् ॥
यत् । त्रि॰ यद्यर्थे । गच्छति । एति । इण् गतौ । शतृप्रत्ययः ॥ यच्छब्देनोच्यतेयोऽर्थस्तच्छब्दस्तस्यवाचकः ॥
यतम् । न॰ हस्तिप्रेरणाय॰ पादाघाते ॥ पादकर्मयतंप्रोक्तं यातमङ्कुशवारणम् । त्रि॰ संयते ॥ नियते ॥
यतचेताः । त्रि॰ संयतचित्ते ॥ यतं चेतोयस्य ॥
यतन् । त्रि॰ प्रयत्नवति ॥ यथा । नाहंनमामिदेवान्देवानतोऽयनसेवते देवः । मतदनुकरोतिविधामंतस्मैयतमेनमोनमोमह्यम् । इतिपूज्य

पादाभ्यामार्ध्यं ।। अहंदेवान्नमामि॰ ननमस्करामि॰योदेवानतीत्य॰ अतिक्रम्यस्थित : सदेवोदेवान्नमेवतै॰तदनुतदनन्तरं विधानंविध्युक्तं कर्मनकरोति॰ तस्मैसर्वात्मभूताय यततेप्रयत्नवतेमह्यं नमोनमङ्गल्याददार्थैहितः ।।

यतमः । त्रि॰ बहूनांमध्येनिर्द्धारिते॰ एकस्मिन् ॥ वाबहूनांजातिपरिप्रश्नेडतमच् ॥

यतमान : । त्रि॰ व्याप्रियमाणे । प्रयतमाने ॥ यतीप्रयत्ने । शानच् । मुक् ॥ प्रार्थयमाने ॥

यतमानसंज्ञा । स्त्री॰ वैराग्यविशेषे ॥ यथा । रागादय : कषायाश्चित्तवर्त्तिन : तैरिन्द्रियाणियथास्वविषयेषुप्रवर्त्यन्ते॰तन्माप्रवर्त्तिषतविषयेष्विन्द्रियाणीति॰तत्परिपाचना यथारम्भ: प्रयत्नोयतमानसंज्ञावैराग्यम् । अत्रजगतिकिंसारंकिमसारमितिगुरुशास्त्राभ्यांज्ञास्यामीत्युद्योगे ।

यतर : । त्रि॰ द्वयोर्मध्येनिर्द्धारिते॰एकस्मिन् ।

यत : । अ॰ यदर्थे ॥ हेतौ ॥ यस्मात् । पञ्चम्यास्तसिल् । अव्ययम् ।

यतात्मा । त्रि॰ संयतचित्ते । संयतशरीरेन्द्रियादिसङ्घाते ॥ निदिध्यासनपरिपाकेणपरमात्मन्येवैकाग्रचित्ते ।

यति : । पुं॰ यमिनि । निर्जितेन्द्रियव्यूहे ॥ कुटीचरबहूदकहंसपरमहंसेषुसन्यासिषु ॥ विदितात्मनि॰अवधूते ॥ यत्नशीले । मुनौ । यतते । यतीप्रयत्ने । सर्वधातुभ्यइन् ॥ नहुषस्यराज्ञोज्येष्ठापत्ये ॥ निकारे ॥

यति : । स्त्री॰ विरतौ । पाठविच्छेदे । द्रुतमध्यविलम्बितरूपायांपरिपाट्याम् ॥ विधवायाम् ॥ यमे : स्त्रियांक्तिन् । मलोप : ॥ रागे ॥ सन्धौ । वाद्याङ्गप्रबन्धविशेषे ॥

यतिचान्द्रायणम् । न॰ व्रतविशेषे । यथा : अष्टावष्टौसमश्नीयात्पिण्डान्मध्यन्दिनेस्थिते । नियतात्माहविष्याशीयतिचान्द्रायणंचरन् ॥ इतिमनु : । यतिचान्द्रायणेपादोनधेनुचतुष्टयंतदशक्तौसपादैकादशकार्षापणाइतिप्रायश्चित्तविवेक : ।

यती । पुं॰ यती । निर्जितेन्द्रियग्रामे ॥ यमनम् । यमउपरमे । भावेक्त : । मलोप : । यतमुपरमणमस्तिनित्यंयस्य । अतइनिठनाविती-नि : । वशिष्ठादौ ॥

यतिनी । स्त्री॰ विधवायां ॥

यतिपात्रम् । न॰ अलाब्वादिपात्रे ॥ अलाबुंदारुपात्रञ्चमृन्मयंवैदलंतथा

। एतानियतिपाशानिमनुः स्वाय म्भुवोब्रवीत् ।

यतिमैथुनम् न० स्त्रस्नरते यतिगोप्यरतौ ।

यती । स्त्री० गच्छन्त्याम् । इण : शत रि० ङीप् । विधवायाम् ॥

यतुका । स्त्री० ⎫
यतूका । स्त्री० ⎭ वृक्षविशेषे ।

यत्तः । त्रि० यत्नवति ॥

यत्न : । पुं० प्रयत्ने ॥ उत्साहे । उद्योगे । यतनम् ॰यत्यतेऽनेनावा । यती० । यजयाचयतेतिनङ् ॥ रूपादिचतुर्विंशतिगुणान्तर्गतगुणविशेषे ॥ सचत्रिविध : । प्रवृत्ति : निवृत्ति : जीवनयोनिश्चेति ॥

यत्नवान् । त्रि० प्रयत्नविशिष्टे । यत्नमन्तरेणनकिञ्चिल्लभ्यते॰एवंज्ञात्वायत्नतत्परे ॥ यत्नोऽस्यास्ति । मतुप् ॥

यत्र । अ० अनवक्लृप्तौ । अमर्षे । गर्हायाम् ॥ आश्चर्ये यस्मिन् सप्तम्यास्त्रल् ।

यथा । अ० तुल्यार्थे साम्ये । प्रशंसायाम् ॥ निदर्शने दृष्टान्ते ॥ निर्देशे ॥ हेतूपपत्तौ । योग्यतायाम् ॥ वीप्सायाम् ॥ पदार्थानतिवृत्तौ ॥ येनप्रकारेण । प्रकारवचनेथाल् ॥ विभक्तित्वात्॰अव्ययत्वम् ।

यथाकथञ्चित् । अ० येनकेनप्रकारेणेत्यर्थे ॥ यथाच॰कथञ्च ॥

यथाकथाच । अ० अनादरे ॥

यथाकामी । त्रि० स्वेच्छाचारिणि । स्वतन्त्रे । स्वरुचौ । स्वच्छन्दे । स्वैरिणि । निर्यन्त्रणे ॥

यथाकालम् । अ० विहितकाले ॥

यथाक्रमम् । अ० क्रमानुरूपे परिपाट्याम् । मूलाद्यधिक्रमे ॥ क्रममनतिक्रम्यवर्ततइत्यर्थे पदार्थानतिवृत्तावव्ययीभावेऽव्ययम् ॥

यथाजात : । त्रि० मूर्खे ॥ जातंजन्मकालविशेषमनतिक्रम्यवर्तते । पदार्थानतिवृत्तावव्ययीभाव : । तदस्यास्ति । अर्शआद्यच् ॥ नीचे ॥

यथाजातरूपधर : । त्रि० दिगम्बरे ॥ परमहंसे ॥ यथा । यादृशंजातमात्रस्वरूपंधारयतीतितथा ॥

यथातथम् । अ० न० यथावर्ततेतथेत्यर्थे ॥ यथार्थे । सत्यार्थे । सत्यमनतिक्रम्य । पदार्थानतिवृत्तावव्ययीभाव : यथाशब्दस्तथाशब्दोवासत्यार्थः । यथार्थेव्ययीभावोवा । सनपुंसकमितिनपुंसकत्वम् । ह्रस्वोनपुंसक इतिह्रस्वत्वम् ॥

यथापूर्वम् । अ० पूर्वदिग्देशकालानुरूपे ॥ यथा । अक्षतायांप्रतिष्ठायांप्राणानांप्रतिमासुच यथापूर्वतयाभाव : स्वर्णादीनामविप्लुता ।

यथामुखम् । अ॰ प्रतिबिम्बे ॥ मुखस्य सदृशम्॰ यथामुखम् । निपातनादव्ययीभाव : । पदार्थानतिवृत्तौयथाशब्दोवा ॥

यथामुखीन : । त्रि॰ मुखप्रतिबिम्बाश्रये । दर्पणे ॥ यथामुखंदर्शन : यथामुखसम्मुखस्यदर्शन : ख-वृत्तिश्च : ॥

यथायथम् । अ॰ यथार्थे ॥ अनतिलङ्घनेनेत्यर्थे ॥

यथायथम् । अ॰ यथास्वमित्यर्थे ॥ यथास्वार्थे॰ यथाशब्दस्यद्वित्वंनपुंसकत्वञ्चनिपात्यते॰ यथास्वेयथायथमितिसूत्रेण ॥ योयमात्मा॰ यश्चात्मीयं॰ तद्यथास्वम् । आत्मनि ज्ञाता : सर्वपदार्थाद्यथायथम्॰ यथास्वभावमित्यर्थ : ॥ आत्मीये । सर्वेषान्तुयथायथम् । यद्यदात्मीय-मित्यर्थ : ॥

यथायोग्यम् । अ॰ यथोचिते ॥

यथार्थम् । अ॰ सत्यार्थे ॥ अर्थमनतिक्रम्य । पदार्थानतिवृत्तावव्ययीभाव : ॥

यथार्थ : । त्रि॰ युक्ते ॥

यथार्थानुभाव : । पुं॰ तद्वतितत्प्रकाराऽनुभवे ॥ सएवप्रमेत्युच्यते । यथार्थानुभवश्चतुर्विध : । प्रत्यक्षानुमित्युपमितिशाब्दभेदात् । तत्करणमपिचतुर्विधम् । प्रत्यक्षानुमानोपमानशब्दभेदात् ॥

यथार्हम् । अ॰ यथायोग्ये ॥

यथार्हवर्ण : । पुं॰ चरे । प्रणिधौ ॥ अर्हति । अर्ह॰ । अच् योग्योऽर्ह यथार्हंवर्णोरूपमस्य ॥

यथाविधि । अ॰ यै: सदृयथोचितमित्यर्थे ॥ यथाविधानमित्यर्थे ॥

यथावृत्त : । त्रि॰ यथाचारे ॥

यथाशक्ति । अ॰ साध्यानुसारे ॥ शक्तिमनतिक्रम्य । यथार्थेपदार्थानतिवृत्तावव्ययीभाव : । अव्ययीभावस्यत्व्ययत्वम् ॥

यथाशास्त्रम् । अ॰ शास्त्रसम्मते ॥ शास्त्रमनतिक्रम्य । यथार्थेऽव्ययीभाव ॥

यथास्थित : । त्रि॰ सत्ये ॥

यथास्वम् । अ॰ यथार्थे ॥ यथायथमित्यर्थे । स्वात्मीये ॥ यथास्वमिति वीप्सायामव्ययीभाव: । योयश्चात्मा यद्यश्चात्मीयंतद्यथास्वमित्युच्यते ॥

यथेप्सितम् । अ॰ कामम् । प्रकाम-मित्यर्थे ॥ इच्छानतिक्रमे । निकामे ॥ आप्तुमिष्टम् । आप्तृव्याप्तौ । सन् । क्त : । आप्त्तुमीप्सितम् । अव्ययंविभक्तीत्यव्ययीभाव : ॥

यथेष्टम् । न॰ इष्टमनतिक्रम्यस्थिते ॥

यथेष्टचारी । पुं॰ पक्षिणि ॥

यथेष्टाचरण : । त्रि॰ यथेष्टाचारिणि ॥ यथा । क्रियाहीनस्यमूर्खस्यमहारोगिणएवच । यथेष्टाचरणस्याहु-

मंरणात्मशीघकम् ॥

यथेष्टाचारी । त्रि॰ स्वेच्छाचारिणि ॥ यथेष्टमाचरितुंशीलमस्य । णिनिः॥

यथोक्तकारी । त्रि॰ काम्यनिषिद्धवर्ज्जमपुरस्सरंनित्याद्यनुष्ठानलक्षे श्वरप्रीतौ ॥ यथाज्ञाकारिणि ।

यथोचित : । त्रि॰ यथायोग्ये । यथाप्राप्ते ॥

यथोत्तरम् । अ॰ उत्तरमुत्तरंप्रतीत्यर्थे ॥

यथोदितम् । न॰ यथोक्ते ॥

यथोपजोषम् । अ॰ यथासुखमित्यर्थे ॥

यद् । अ॰ हेतौ ॥ यच्छति । यम॰ । क्विप् । अनुदात्तोपदेशे त्यनुनासिकलोप : ॥ यदर्थे ॥

यत्॰द् । त्रि॰ यदर्थे ॥ बुद्धिस्थत्वोपलक्षितधर्म्मावच्छिन्ने । जो॰ द्रुतिभाषा ॥ यत्तदोर्नित्यसम्बन्ध : यच्छब्देनोच्यतेयोर्थस्तच्छब्दस्तस्यवाचक : ॥ अपिच । तच्छब्देनतु यच्छब्दोवोद्धव्य : सततंबुधै : । उदाहृतेतुयच्छब्देतच्छब्द : स्यादुदाहृत: ॥ ग्रंजेस्त्यजितनियजिभ्योडिदित्यदि : ॥

यदा । अ॰ यस्मिन्काले ॥ यथा । यदायदासतांहानिर्वेदमार्गानुसारिणाम् । तदातदाकलेर्वृद्धिरनुमेयाविचक्षणै : ॥ सर्वैकान्यक्यादि-

मा॰ दा ॥

यदि । अ॰ पक्षान्तरे ॥ सम्भावनायाम् । चेदर्थे । असन्देहेसन्देहवचने ॥ यदिवेदा : प्रमाणंस्यु : । वेदा : प्रमाणंहिचेत्इत्यादियथा- ॥ यतनम् । यती॰ । इन् । पृषोदरादित्वात्तस्यद : ॥

यदीय : । त्रि॰ यत्सम्बन्धिनि ॥

यदु । पुं॰ देवयान्यांययातेर्जातेज्येष्ठपुत्रे ॥ दशार्हदेशे ॥ तद्देशवासिनि॰ यदव : ॥

यदुतुङ्गम् । न॰ तीर्थविशेषे ॥

यदुदेव : । पुं॰ वसुदेवे ॥

यदुनाथ : । पुं॰ श्रीकृष्णे ॥

यदुपति : । पुं॰ श्रीकृष्णे ॥ यदूमापति : ॥

यदुवंश : । पुं॰ यदो:सन्ताने ।

यदृच्छा । स्त्री॰ स्वातन्त्र्ये । स्वैरितायाम् ॥ स्वारसिक्यामिच्छायाम् । शास्त्रानुमतप्रयत्नव्यतिरेके । ऋच्छममृच्छा । ऋच्छगत्यादौ । गुरोश्च : । याऋच्छा । विशेषणमिति समास : ॥ सहसार्थे । निर्निमित्ते ॥ यथायदृच्छाशब्द : । अयमतंप्रवृत्ति निमित्तमनपेक्ष्यय : शब्द : प्रयोक्त्रभिप्रायेणैवप्रवर्ततेसयदृच्छाशब्दोडित्थादिरिति ॥ देवमतौ ॥

यदृच्छालाभ : । पुं॰ अप्रार्थितोपस्थितेलाभे ॥

यदृच्छालाभसन्तुष्टः । पुं० तत्त्वज्ञे ॥ शास्त्रानुमतप्रयत्नव्यतिरेकात् ० यदृच्छा० तयैवयोलाभोऽन्नाच्छादनादेः शास्त्रानुमतस्य० सयदृच्छालाभः तेनसन्तुष्टः ० तदधिकतृष्णारहितः ॥ यतयोभिक्षार्थं ग्रामंप्रविशन्तीतिशास्त्रानुमतस्तु प्रयत्नः कर्त्तव्य एव ॥

यद्भविष्यः । त्रि० मूर्खे ॥ दैष्टिके ॥ यद्भविष्योविनश्यति ॥

यद्यपि । अ० अवधारणे ॥ अप्यर्थे ॥

यद्युत । अ० यदि ॥

यद्वत् । अ० प्रश्ने ॥ वितर्के ॥

यद्वा । अ० पक्षान्तरे ॥

यन्ता । पुं० मेठे । हस्तिपके ॥ सूते ॥ सारथौ ॥ यच्छति । यम० । तृच् ॥

यन्त्रम् । न० देवाद्यधिष्ठाने ॥ पात्रभेदे ॥ नियन्त्रणे । चन्द्रा० ताला इ० भा० ॥ बन्धने ॥ मृगबन्धनविशेषे ॥ यच्छति । यम० । गुधृवीपचियमीतित्रः । यन्त्र्यतेनियम्यते० निगृह्णाति० असाधून० त्रायते० असाधून्० अनुगृह्णाति साधून् इतिचयन्त्रमितिचतुर्द्धरनीलकण्ठः ॥ तोप० । अगनइत्यादि भाषाप्रसिद्धेमहत्यग्नियन्त्रे ॥ बन्दूकइतिप्रथितेसौसगुलिकोत्क्षेपणार्थे लघ्वग्नियन्त्रे ॥ इतिमहाभारतटीकायांनीलकण्ठः ॥ वाद्ये ॥ यथा । यन्त्रस्यगुणदोषौनविचार्यौ मधुसूदन । अहंयन्त्रं भवान्यन्त्री नमेदोषानमेगुणाः ॥ दारुयन्त्रादौ ॥ कल० इ० भा० ॥ यथा । ईश्वरः सर्वभूतानांहृद्देशेर्जुनतिष्ठति । भ्रामयन्सर्वभूतानियन्त्रारूढानिमायया ॥ औषधस्यचपाकार्थं यानियन्त्राणिसन्तिहि । तानिभावप्रकाशादौद्रष्टव्यानिमनीषिभिः ॥ तत्रकेषाञ्चिन्नामानि लिख्यन्ते । जलकच्छपपाताल दोलाभूधरवालुकाः । वकाद्यायन्त्रभेदाः स्युर्वच्चान्यायाश्चमूषिका इतिशब्दचन्द्रिका ॥

यन्त्रकम् । न० यन्त्रकाष्ठे । कुंद० इ० गौ० दे० भा० प्रसिद्धे ॥ यम्यते काष्ठमनेन । यम० पूर्ववत्च: । स्वार्थेकः ॥

यन्त्रगृहम् । न० तैलशालायाम् ॥ यन्त्राणांस्थाने ॥

यन्त्रगोलः । पुं० मटरइतिप्रसिद्धेकलाये ॥

यन्त्रणम् । न० रक्षणे ॥ बन्धने ॥ नियमने ॥

यंत्रणा । स्त्री० पीडायाम् ॥

यंत्रपेषणी । स्त्री० पेषणार्थयंत्रे । जांता० चाकी० इतिभाषाप्रसिद्धे ॥

यन्त्रिका । स्त्री० पत्न्याः कनिष्ठभ

गिन्याम् ॥ यथा । कनिष्ठाश्यालिकाद्यालोयन्त्रिकाकीलिकुश्चिकेतिहेमचन्द्र : ॥

यन्त्रित : । त्रि॰ यथिते ॥ बद्धे ॥ नियमिते ॥ वशीकृते ॥

यन्त्री । त्रि॰ यन्त्रवति ॥ अस्त्यर्थे॰ इनि : ॥

यन्मूल : । त्रि॰ यदाश्रयभूते । यत्सत्तातिरिक्तसत्ताशून्ये ॥

यम : । पुं॰ दक्षिणाशापतौ । शमने । काले । धर्मराजे । पितृपतौ । समवर्त्तिनि ॥ यम: संयमतामहम् । संयमतांधर्माधर्मफलदानेन॰ निग्रहानुग्रहंकुर्वतांमध्ये॰ यमोवैवस्वतोभगवद्विभूति : ॥ अस्यानुशानंयथा । केवलंयेजगद्धाममनन्तंसमुपाश्रिता: । भवद्भि: परिहार्यास्तेतेषांनास्तीहसंस्थिति : ॥ नम: कृष्णाऽच्युतानन्तवासुदेवेत्युदीरितम् । यैर्भावैर्भाविततैर्दूरतास्तेवत्याज्या: सुदूरतद्दूतिवाक्यपुराणम् ॥ सर्वेषां संयमनात्यम: यच्छति॰ उपरमयतिप्रारब्धेक्षीणे प्राणैर्वियोजयतिद्रुतियम : ॥ आदित्ये ॥ शनौ काके । ध्वाङ्क्षे ॥ संयमे ॥ शरीरसाधनापेक्षनित्यकर्मणि ॥ उपायान्तरनिरपेक्षशरीरमात्रेणसाध्यंनित्यंयावज्जीवमवश्यकार्यंयत्कर्म॰ अहिंसादि॰ तद्यमइत्यर्थ : ॥ अहिंसासत्यवचनंब्रह्मचर्यमकल्कता । अस्तेयमितिपञ्चैतेयमावैपरिकीर्त्तिता : ॥ निषिद्धानाचरणे ॥ इन्द्रियाणांविषयेभ्योनिवारणे ॥ यमान्सेवेतसततंननित्यंनियमान्बुध : । यमान्पतत्यकुर्वाणोनियमान्केवलान्भजन् ॥ अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहायमाइतिपातञ्जलसूत्रम् ॥ सर्वंब्रह्मेतिविज्ञानादिन्द्रियग्रामसंयम : । यमोयमितिसम्प्रोक्तोभ्यसनीयोमुहुर्मुहु: ॥ यम : यति । यमउपरमे । विकल्पादच् यच्छति॰ अनेनवा॰ यमनंवा । यम॰ । पचाद्यच्॰यम : समुपनिविषुवेत्यप्॰ वा ॥ उपरमे । उपरतिमात्रे ॥ ब्रह्मचर्यादिदशसु ॥ यथा । ब्रह्मचर्यंदयाक्षान्तिर्ध्यानंसत्यमकल्कता । अहिंसास्तेयमाधुर्येयमश्चेतियमा : स्मृता : ॥

यमौ । पुं॰ द्विवचनान्त : ॰॰ एकयोस्यानकुलसहदेवयो : ॥

यमौ । त्रि॰ यमजे ॥ वीर्यकाल[illegible]युगाभिन्नेद्वौजीवौकुक्षिमागतौ । यमाविल्यभिधीयेतेधर्मेतरपुर : सरौ ॥ धर्मस्तदितरोऽधर्म : ॰ तौपुर : सरौययो : । तेनयमौधर्मादधर्माच्चभवत: इत्यर्थ : ॥ तयोर्ज्येष्ठत्वनिरूपणंयथा । यस्त्विहवैपुचारित्याद्यमयो : पूर्वंजात : । यस्यजातस्य

यमयो: पश्यन्तिप्रथमंमुखम् ॥ तस्मा न : पितरस्वैवतस्मिन्ज्येष्ठंप्रतिष्ठितम् । जन्मप्राथम्यात्। ज्येष्ठंयमयो: । नतुनिषेकप्राथम्यात्। जन्मप्राथम्यसन्देहेसुखदर्शनप्राथम्यात्। मृत्युहाहतत्त्वम् ॥

यमक : । पुं॰ संयमे । व्रते ॥ न॰ शब्दालङ्कारे । तल्लक्षणंयथा । सत्यर्थेसत्यर्थेभिन्नानांवर्णानांसापुन : श्रुति:। यमकंपादतद्भागवृत्तितद्यात्यनेकताम् ॥ वर्णवृत्तविशेषे । यथा । नगणमनुद्विलघुकुरु । फणिभणितयमकमिति । यथा । विषमतरविषमशर । प्रहरमपिनचिरमपि ॥ त्रि॰ यमजे ॥

यमकालिन्दी । स्त्री॰ संज्ञायाम् । सूर्यपत्न्याम् ॥

यमकीट: । पुं॰ कीटविशेषे । घुर्घुरे ॥

यमकोटि : । स्त्री॰ पुरीविशेषे । सा चभद्राश्ववर्षस्थनिरक्षदेशेलङ्कायाः पूर्वंपृथिव्यास्तुर्यभागेवर्त्तते ॥ यथा । लङ्काकुमध्येयमकोटिरस्याः प्राक्पश्चिमेरोमकपत्तनञ्च । अधस्ततः सिद्धपुरंसुमेरुः सौम्येऽथयाम्येवडवानलश्च ॥ कुवृत्तपादान्तरितानितानिस्थानानिषड्गोलविदोवदन्ति । इति ॥

यमघण्ट : । पुं॰ अशुभयोगविशेषे ॥ यथा । रवौमघाचन्द्रदिनेविशाखाचाद्राकुजेचन्द्रसुतेचमूला । जीवेऽनलर्क्षंभृगुजेविधिश्चहस्ताशनौस्या-द्यमघण्टयोग : ॥

यमज : । त्रि॰ समकालीनैकगर्भजा-तसन्तानद्वये ॥

यमदग्नि: पुं॰ ऋचीकमुनिपुत्रे । परशुरामपितरिमुनिविशेषे ॥

यमदूतक : । पुं॰ कृतान्तचरे ॥ काके ॥

यमदूतक : । पुं॰ वायसे ॥ यमस्यचरे ॥

यमदूतिका । स्त्री॰ अम्लिकायाम् । तिन्तिडीवृक्षे ॥ विशेषत : चारभूमौप्राणदायमदूतिका ॥

यमदेवता । स्त्री॰ भरणीनक्षत्रे ॥

यमद्रुम : । पुं॰ शाल्मलिवृक्षे ॥

यमद्वितीया । स्त्री॰ कार्त्तिकशुक्लद्वितीयायाम् ।

यमधार : । पुं॰ पार्श्वद्वयधारयुक्तास्त्र-विशेषोद्विधाराखाण्डा॰ इ॰ भा॰ ॥

यमन : । पुं॰ यमे ॥ न॰ बंधने ॥ उपरतौ ॥

यमनिका । स्त्री॰ जवनिकायाम् । व्यवधायकवाससि । तिरस्करिण्याम् ॥ यमयति । दम॰ । ल्युट् । स्वार्थेकन् ॥

यमपत्नी । स्त्री॰ धूमोर्णायाम् विवस्वत्याम् ।

यमप्रिय : । पुं॰ वटवृक्षे ।

यमभगिनी । स्त्री॰ यमुनायाम् ॥

यमभट : । पुं॰ यमदूते ॥ धरेयमभटा: शठा: । कपटविषवेषूत्कटानिवे इवतवीक्ष्यधनाधिकारीमयि । अवस्तुषिमसुन्दरीचरणचारुपल्लवरूपस्थलमधुसुधासवंसमपिवन्मनागीतरे ।

यमराट् । पुं॰ शमने । यमे ॥ यमेनसंयमेनराजते । राज॰ । क्विप् ।

यमराज : । पुं॰ यमे ।

यमलम् । न॰ युग्मे । युगले ॥ द्वितिये ।

यमलच्छद : । पुं॰ अश्मन्तकवृक्षे ॥ कोविदारवृक्षे ॥

यमलार्जुनहा । पुं॰ श्रीकृष्णे ॥

यमली । स्त्री॰ चोटीवस्त्रे । घाटीवस्त्रे ।

यमलेखक : । पुं॰ चित्रगुप्ते ॥ यमस्य लेखक : ।

यमवान् । त्रि॰ संयमिनि ।

यमवाहन : । पुं॰ महिषे ॥

यमव्रतम् । न॰ पृथ्वीपतेर्धर्मविशेषे ॥ यथा । यथायम: प्रियद्वेष्यौप्राप्ते कालेनियच्छति । तथाराज्ञानियन्तव्या : प्रजास्तद्धियमव्रतम् ।

यमस्वसा । स्त्री॰ यमुनायाम् । कालिन्द्याम् ॥ दुर्गायाम् । यमस्यस्वसा ॥

यमानिका । स्त्री॰ यवानीयाम् ॥

महत्दर्भायाम् ॥ यमेनयमितिं । यम॰ । ण्वुल् ॥

यमानी । स्त्री॰ यमानिकायाम् ।

यमान्तक : । पुं॰ शिवे ॥ यमस्यान्तक : ।

यमी । त्रि॰ संयमविशिष्टे ॥ यमवति ।

यमी । स्त्री॰ यमुनायाम् ॥

यमुना । स्त्री॰ कालिन्द्याम् । सूर्यतनयायाम् । यमनस्वसरि ॥ यच्छति । यमउपरमे । अजियमिशीङ्भ्यश्च युनम् ॥ दुर्गायाम् ।

यथोक्तं देवीपुराणे । सक्रमाद्यमना द्वाक्षीकैर्देवीविभाव्यते । यमस्य भगिनीयातायमुनातेनसामतेति ।

यमुनाजनक : । पुं॰ सूर्ये ।

यमुनाप्रभव : । पुं॰ तीर्थविशेषे ।

यमुनाभिद्॰ दृ॰ । पुं॰ बलभद्रे ।

यमुनाभ्राता । पुं॰ कृतान्ते । शमने । यमे । यमुनाया : भ्राता ॥

यमेरुका । स्त्री॰ दण्डढक्कायाम् ॥

ययाति: । पुं॰ नहुषात्मजे पुराणप्रसिद्धे नृपतेनाहुषौ ॥ यस्यायंश्लोक : । यत्पृथिव्यांव्रीहियवंहिरण्यं पशव: स्त्रिय : । नदुह्यन्तिमन : प्रीतिंपुंस : कामहतस्यमे ।

ययातिपतनम् । न॰ भौमतीर्थविशेषे ।

ययी : । पुं॰ महादेवे । मोक्षमार्गे ॥ यात्यनेनया॰ । याधु :[illegible]

तिष्ठ : ॥

ययु : पुं॰ अश्वमेधीयतुरगे ॥ तुरङ्गमे । हये । याति । याप्रापणे यो-हिंचेत्यु : ॥ यर्हि । अ॰ यस्मिन्-काले । यदार्थे ॥ यस्मिन्काले । अनद्यतनेर्हिलन्यतरस्यां ।

यव : । पुं॰ स्वनामख्यातप्रसिद्धे शूकधान्ये । सितशूके । यवस्तु सितशूक : स्या न्निःशूकोतियव : स्मृत : । तो क्मस्तद्वत्सदृशस्ततः स्वल्पयक्तो त्तित : ॥ यव : कषायोमधुर : शीतलोलेखनोमृदु : । व्रणेषु ति-लवत्पथ्योरूक्ष मेधाग्निवर्द्धन : ॥ कटुपाकोऽनभिष्यन्दीस्वर्योबलकरो गुरु : । बहुवातमलोवर्ण्य : स्थे-र्यकारोचपिच्छिल : ॥ कण्ठत्वगा मयश्लेष्मपित्तमेद : प्रणाशन : । पीनसश्वासकासोरुस्तम्भलोहिततृ ट्प्रणुत् ॥ अस्मादतियवोन्यूनस्तो क्मोन्यूनतर : स्मृत : ॥ षड्भि र्गौरसर्षपै : परिमितेपरिमाणवि शेषे ॥ सर्षपा : षड्यवोमध्यस्तित मनूक्ते : । मध्यानस्थूलोनापिसू-क्ष्मोयवोभवतीत्यर्थ : ॥ अपिच । जालान्तरगतेभानौयत्ताणुदृश्यते-रज : । तैश्चतुर्भिर्भवेल्लिक्षालि-क्षाषड्भिस्तुसर्षप : ॥ षट्सर्षपै र्यवस्त्वेकोगुञ्जैकातुयवैस्त्रिभि : ॥ यौति॰ युयतेवा । युमिश्रणे । अ-

च्॰ अप्वा । यद्वा यवस्य फलंय व : अवयवेषप्राणोत्यच् । फलपा कशुषामितिज्ञ्य् । लुप्युक्तव-त् । पुंयवक्तते ॥ इन्द्रयवे ॥ यव सदृशबीजत्वात् ॥ अङ्गुलिस्थयवा-कारेखाविशेषे ॥ यथा । तर्ज्ज-नीमूलसम्भूतौयवौपुत्रार्थदौकमा त् । मध्यमायांयस्यैषाङ्गुष्ठे ऽपूर्व धनप्रद : ॥ अपिच । मध्यमायांय-दियवोदृश्यतेचसुशोभन : । तदा-न्यसञ्चितंद्रव्यंप्राप्नोत्यङ्गुष्ठकेयवे । अस्यापिचक्रमङ्गुष्ठे यवपूर्णस्तुदृश्य-ते । तदाजितामरादीनामर्जितं-लभतेधनम् ॥

यवक : । पुं॰ शूकशून्ययवे ॥

यवक्यम् । त्रि॰ यवभवनोचितक्षे-त्रे ॥ यवानांभवनंक्षेत्रम् । यवय वकेतियत् ॥

यवक्षार : । पुं॰ यवाग्रजे । पाक्ये । यवानांक्षार : ॥ यवक्षारोलघु : स्निग्ध : सुसूक्ष्मो [illegible] : । [illegible] सगला मयान् ॥ पाण्डु [illegible] [illegible] मयान् ॥ [illegible] भा॰ प्रचारे ॥

यवक्षोद : । पुं॰ [illegible] ॥

यवगण्ड : । पुं॰ यूना [illegible] शि-शिषे । युवगण्डे [illegible]

यवज : । पुं॰ य [illegible] ग्राम् ।

यवक्षोद्भवम् । न॰ यवक्षारे ।

यवतिक्ता । स्त्री॰ लताप्रभेदे । महातिक्तायाम् । दृढपादविसर्पिण्याम् । सूक्ष्मपुष्पायाम् ।

यवतैलम् । न॰ यवचूर्णादियुक्तपक्वतैलविशेषे । यथा । यवचूर्णार्द्धकुडवं मञ्जिष्ठार्द्धपलेनतु । तैलप्रस्थशतगुणीकाञ्जिकेसाधितोजयेत् । ज्वरदाहमहारोगमङ्गानाञ्चाप्रहर्षणम् ॥

यवद्वीप : । पुं॰ सप्तखण्डात्मके॰उपद्वीपविशेषे ॥

यवन : । पुं॰ देशविशेषे । वेगाधिकाश्वे ॥ गोधूमे ॥ गर्जरहर्णे ॥ तुरुष्के ॥ सुदाम्न : पितरिनृपान्तरे ॥ जातिविशेषे । ययातेःपुत्रस्य तुर्वसोर्वंशे । यथोक्तंमात्स्ये । यदोस्तुजातायदवस्तुर्वसोर्यवनाः सुताः । द्रुह्योस्तुतनयाभोजाश्चानोस्तुम्लेच्छजातयः । पुरोस्तुपौरवोवंशोयत्रजातोसिपार्थिवइति ॥ मुनिविशेषे । यथा । आतंदिनंदूषयतेवसिष्ठस्याष्टौचगर्गोयवनोदशाहम् । जन्माख्यमामंकिलभागुरिश्चनौरेविवाहेपिचकर्णवेधे ॥ त्रि॰ वेगिनि ॥

यवनद्विष्ट : । पुं॰ गुग्गुलौ ॥

यवनप्रियम् । न॰ मरिचे ।

यवनाचार्य्य : । पुं॰ ज्योतिःशास्त्रकर्त्तरिमुनिविशेषे ॥

यवनानी । स्त्री॰ यवनानांलिप्याम् ॥ इन्द्रवरुणेत्यादिना॰ नुगागमोङीष् च ॥

यवनारि : पुं॰ श्रीकृष्णे ॥

यवनाल : । पुं॰ देवधान्ये । जूर्णाव्हये । बीजपुष्पिकायाम् । जुवार॰ बाजरा॰इ॰भा॰ ।

यवनालज : । पुं॰ यवक्षारे ।

यवनिका । स्त्री॰ जवनिकायाम् ।

यवनी । स्त्री॰ यवनस्त्रियाम् । यवनस्यस्त्रीजातेरितिङीष् ।

यवनेष्ट : । पुं॰ लशुने । राजपलाण्डौ । निम्बे । पलाण्डौ ॥ न॰ सीसके ॥ मरीचे ॥ गृञ्जने । सलगम॰इ॰भा॰प्र॰ ।

यवनेष्टा । स्त्री॰ खर्ज्जूर्याम् ॥

यवफल : । पुं॰ वेणौत्वक्सारे । यवइवफलान्यस्यां । मांस्याम् । कुटजे । प्लक्षवृक्षे ॥

यवमध्यम् । न॰ चान्द्रायणप्रभेदे ॥

यवमय : । त्रि॰ यवस्यविकारे ॥ चर्मणायामितिमयट् ॥

यवक्षार : । पुं॰ यवक्षारे ॥

यवशाकम् । न॰ वास्तूकशाके । बथुआ॰इ॰भा॰प्र॰ । प्रायशोयवमध्येस्यादयवशाकमिदंततः ॥

यवशूक : । पुं॰)
यवशूकज : । पुं॰) यवक्षारे ॥

यवसम् । न॰ घासे । गवाद्यदनीयतृणे ।

॥ यौति० यूयतेवा । युमिश्रणेऽ
मिश्रणेच । वहियुभ्यांणिदित्यसच्
। संज्ञापूर्वकत्वान्नवृद्धि : ॥

यवसुरम् । न० यवजातसुरायाम् ॥

यवागू : । स्त्री० यवद्रव्यविशेषे ॥ ष
ड्गुणजलपक्वघनद्रवद्रव्यविशेषे ।
श्राणायाम् ॥ यथा । यवागूः षड्
गुणे तोयेसंसिद्धाघनसिक्थिका ।
पृथग्द्रव्यैस्तुविरजै : संयुक्ताज्वरि-
णेहिता ॥ यवागूर्दीपनीलघ्वीट
ष्णाग्नीवस्तिशोधनी ॥ श्रमग्लानिह
रीपथ्याज्वरेचैवातिसारके ॥ यौ
ति० यूयतेवा । यु० । सृयुवचिभ्यो
ऽन्युजागूजक्नुपद्भ्यागूच् ॥

यवाग्रज : । पुं० यवक्षारे । यवाग्रा
ज्जायतेस्म । जनी० । पञ्चम्यामि
तिड : ॥

यवान : । त्रि० वेगिनि ॥

यवानिका । स्त्री० ब्रह्मदर्भायाम् ।
अजमोदायन० इ० भा० । यवान्याम् ॥
दुष्टोयव :। इन्द्रवरुणेति० ङीषा
नुकौ । हृस्वार्थे० स्वार्थेवाकन् ॥

यवानी । स्त्री० यमान्यामोषधौ । य
वानिकायाम् ॥ अस्यानामानिगु
णाश्च । यवानिकोग्रगन्धाचब्रह्मदर्भा
जमोदिका । सैवोक्तादीप्यकोदीप्यं
तथास्याद्यवसाह्वया ॥ यवानीपाच
नीरुच्यातीक्ष्णोष्णाकटुकालघु : ।
दीपनीचतथातिक्तापित्तलाशुक्रशूल
हृत् ॥ वातश्लेष्मोदरानाहगुल्मप्ली-
हकृमिप्रणुत् ॥ दुष्टोयवइत्यर्थे० इ
न्द्रवरुणेतिसूत्रस्ययवाद्दोषइतिवा
र्त्तिकात्० यवशब्दस्यानुगागमस्त
तोङीप्च । अयमेवास्यदोषोयदुत
यत्त्वजातेरभावेपितदाकारानुकृ-
तिरिति ॥

यवानीशाकम् । न० यवान्या : शाके
॥ यवानीशाकमाग्नेयंरुच्यंवातक
फप्रणुत् । उष्णंकटुचतिक्तञ्चपित्त
लंलघुशूलहृत् ॥

यवापत्यम् । न० यवक्षारे ॥

यवाम्लजम् । न० सौवीरके ॥

यवास : । पुं० यासे । दुस्पर्शायाम् ।
रोदन्याम् । दुरालभायाम् । जवा
सा० इ० भा० ॥ खदिरे ॥ यौति
। यु० क्ततन्यश्नीति० आस : ॥

यवासक : । पुं० यवासे ॥ स्वार्थेक: ॥

यवासशर्करा । स्त्री० यवासरसघटित
शर्करायाम् । सुधामोदके । तव-
राजे ॥

यवासा । स्त्री० गुण्डासनीतृणे ॥

यवाह्व : । पुं० यवक्षारे ॥

यविष्ठ : । त्रि० कनिष्ठे ॥ अयमेषा
मतिशयेनयुवा । अतिशायनइतीष्ठन् । स्थूलदूरेति० यणादिपरलोप
गुणौ ।

यवीयान् । त्रि० अतितरुणे ॥ कनि
ष्ठे ॥ अयमनयोरतिशयेनयुवा ।

3984

द्विवचनविभज्योपपदेतरबीयसुना-
वितीयसुन् । स्थूलदूरयुवेत्यादि
नायणादिलोपगुणौ ॥

यवोत्थम् । न० सौवीरके ॥

यव्यम । त्रि० यवक्ये ॥ यवानांभव
नंक्षेत्रम् । यवयवकषष्टिकाद्यत् ॥
यवेभ्योहितंवा । खलयवेतियत् ॥
पुं० मासे ॥ वैशाखे ॥

यश:पटह: । पुं० ढक्कायाम् । महा-
राजप्रयाणसमयेवाद्यस्य० यशो :
सकाशात्पापराज्यस्थस्वकीयस्वसु-
चनायताड्यमानवाद्यस्यचढोल०इ
तिख्यातस्यकर्तैवात्मीयस्यनाम्नि
॥ यश : ख्यापक : पटह : । शाक
पार्थिवादि : ॥

यश:शेष: । पुं० मरणे ॥ त्रि०
मृते ॥

यशटम् । न० यशदे ॥

यश : । न० सुख्यातौ । कीर्त्तौ । सम
ज्ञायाम् ॥ दानादिप्रभवाकीर्त्ति:
शौर्यादिप्रभवंयश : । इतिमाधवी-
। अतएवयश: कीर्त्योर्भेदोदृश्यते ।
यश : कीर्त्तिपरिभ्रष्टोजीवन्नपिन-
जीवतीतिकस्यचित्प्रयोग: धर्मनि
मित्ताजीवतोलोकश्लाघारूपाप्रसि-
द्धिर्यश : । मृतस्यख्याति: कीर्त्ति
रितिकेचित् । तन्नसाधु । कीर्त्ति
र्यशपदृतिवेतिप्रयोगदर्शनात् ॥
अश्नुते० व्याप्नोति । अशूव्याप्तौस

ष्वातेच । अशेर्देवनेयुट्चेत्यसुन्०
प्रकृतेर्युडागमश्च ॥ विम्रतत्त्वे ॥०

यशस्कर : । त्रि० कीर्त्तिकारके । सु
ख्यातिजनके ॥ यश : करोति ।
डुकृञ्० । कृञोहेत्विति ट: ॥

यशस्करी । स्त्री० विद्यायाम् । टित्वा
न्ङीप् ॥

यशस्य : । त्रि० यशस्करे ॥ यशसेहि
तं ॥ यशसोनिमित्तं ॥ यशसोनि
मित्तंसंयोगउत्पातोवा । गोद्व्यच-
इत्यादिनायत् ॥

यशस्या । स्त्री० जीवन्त्याम् ॥ ऋद्धि
नामौषधौ ॥

यशस्वान् । त्रि० यशस्विनि ॥

यशस्वी । त्रि० यशोविशिष्टे । कीर्त्ति
मति । यशोऽस्यास्ति । अस्मायामेधा
स्रजोविनिरितिविनि : ॥

यशस्विनी । स्त्री० वनकार्पास्याम् ॥
यवतिक्तायाम् । महाज्योतिष्मत्या
म् । कीर्त्तिमत्याम् । पलङ्कषापु-
र : स्यायांनाडारि ॥ यथा । यश
स्विनीमध्यवर्णापिङ्गलापृष्ठदेश-
गा । याम्यभागश्रमूर्धादिपादाङ्गुष्ठा
न्तमाश्रिता ॥

यशोद : । पुं० पारदे ॥ त्रि० यशोदा
तरि ॥

यशोदा । स्त्री० नन्दपत्न्याम् ॥ यशो
ददाति । देङ्पालने । आतइतिक:
। यशोददातिवा । डुदाञ्० ।

वातद्रूतिक : ॥

यशोधन : । त्रि० स्वयशोरक्षके । यशोधनानामपियशोगरीयः ॥

यशोधरेय : । पुं० राहुले । शाक्यमुनेः पुत्रे ॥

यशोवती । स्त्री० मेरोरुत्तरशाटाख्योपमेखलायामैशानदिशि० ईशानपुर्य्याम् ॥ यथोक्तं श्रीमृगेन्द्रसंहितायाम् । ज्वलल्ललाटदृग्दग्धस्मरस्मृत् यशोभृतः । पुरीयशोवतीसर्वरत्नप्राकारसेविता ॥ ज्वलल्ललाटतीयेनाक्ष्णादग्धोकामकालोयेन० यतएवतयाविधसकलजगद्वैरिविनाशात्० यशोभृतईशाननामयस्यसर्वरत्नमिर्मिताकारै : सेविताच० यशोवतीनाम पुरीत्यर्थ : ॥ (*)

यष्टव्य : । त्रि० यज्ञेष् यजनीये ॥

यष्टि : । पुं० ध्वजदण्डे । पुं० स्त्री० हारलतायाम् ॥ भार्ग्याम् ॥ मधुयष्ट्याम् ॥ शस्त्रभेदे । दण्डे । लगुडे ॥ तन्तौ ॥ यजे : क्तिन् ० त्रिज्वा ॥

यष्टिक : । पुं० जलकुक्कुटे । दण्डे ॥

यष्टिका । स्त्री० मीनगोधिकायाम् । वाप्याम् । लगुडे । यष्ट्याम् । लट्ठी० इ० भा० ॥ हारभेदे मधुयष्ट्याम् ॥ स्वार्थेक : । ह्रस्व : ।

यष्टिप्रद : । पुं० लगुडयाष्टिधि । यष्टिधारके । छडीबरदार० इ० भा०

। लठैत० इतिच ॥

यष्ठिमधु । न० यष्टिमधुकायाम् ॥

यष्टिमधुका । स्त्री० क्लीतके । मधुयष्टिकायाम् । मुलहठी० इतिख्यातौषधौ ॥ यष्टि : मध्विशाखा : । कप् ॥

यष्टिहेतिक : । त्रि० याष्टीके । लठैत० इ० भा० । यष्टिर्हेतिर्यस्यस : ॥

यष्टी । स्त्री० यष्टिमधुनि ॥ यष्टीहिमागुरु : स्वाद्वीचक्षुष्या : बलवर्णकृत् । सुस्निग्धाशुक्रलाकेश्यास्वर्य्यापित्तानिलास्रजित् ॥ व्रणशोथविषच्छर्दितृष्णाग्लानिक्षयापहा ॥ बह्वादित्वात्पक्षे ङीष् ॥

यष्टीकम् । न० यष्टिमधुनि ॥

यष्टीपुष्प : । पुं० पुत्रजीववृक्षे ॥

यष्टीमधु । न०
यष्टीमधुकम् । न०
यष्टीमधूकम् । न०
} यष्ट्याम् । मधुयष्टिकायाम् ॥

यष्टा । पुं० यजमाने । यागकर्त्तरि ॥ यजते । यजदेवपूजासङ्गतिकरणदानेषु । तृच् ॥

यष्ट्याह्वयम् । न० मधुयष्ट्याम् ।

यसदम् । न० रङ्गसदृशे । रीतिहेतौ जस्तइतिभाषा ॥ यसदंतुवरंतिक्तं शीतलंकफपित्तहृत् । चक्षुष्यंपरमं मेहान्पाण्डुंश्वासञ्चनाशयेत् ॥

यस्क : । पुं० मुनिविशेषे ।

यह्व : । त्रि० महति । यास्यनेन ।

या० । शेवयज्ञविशेति० वन्०धा तोर्ह्रस्वोहुगागमश्च॥ अन्येतु०यज तेर्जकारस्ययकारोनिपात्यतइत्याहुः ॥ यजमाने ॥

या । स्त्री० याचायाम् ॥ आप्तौ ॥ धू मिते ॥ त्यागे ॥ वारणे ॥ योगे ॥ स मञ्जायाम् ॥ याने ॥ यानम् । या० सम्पदादित्वात्क्विप् ॥

याघ : । पुं० देवसर्गविशेषे ॥

यागः । पुं० देवतोद्देशेनद्रव्यत्यागे । यज्ञे ॥ तत्रश्रौताग्निकृत्यहविर्यज्ञा : सप्त यथा । अग्न्याधानम् ० तदेवाग्निहो त्रम् । १ । दर्शपौर्णमासौ । २ । पिण्डपितृयज्ञः । ३ । आग्रयणम् । ४ । चातुर्मास्य : । ५ । निरूढ पशुबन्धः । ६ । सौत्रामणिः । ७ । स्मार्त्ताग्निकृत्यपाकयज्ञा : सप्तय था । औपासनम् । १ । वैश्वदेव: । २ । स्थालीपाक :। ३ आग्रयण म् । ४ । सर्वबलि : । ५ । ईशान बलि : । ६ । अष्टकान्वष्टका । ७ श्रौताग्निसप्तसंस्थायथा । सोमया ग :० सएवाग्निष्टोम : । १ । अत्य ग्निष्टोम : । २ । उक्थ्य : । ३ । षोडशी । ४ । वाजपेय : । ५ । स द्विविधः ० संस्था० कुत्र च । अतिरा त्र : । ६ । अप्तूर्यामः । ७ । उत्त रक्रमतोवहवोयथा । महाव्रतम् । १ । सर्वतोमुखम् । २ । राजसूयः । ३ । पौण्डरीकम् । ४ । अभि जित् । ५ । विश्वजित् ६ । अश्व मेध : । ७ । बृहस्पतिसव : । ८ । आङ्गिरस : । ९ । अमनान्यष्टादश । २७ । इत्यादिश्रौतसूत्रम् ॥ गन्धादिनादेवपूजायाम् ॥ गन्ध पुष्पादिनादेवपूजायागोभिधीयते ॥ इज्यतेऽनेनाचवा । यजदेवपूजास ङ्गतिकरणदानेषु । घञ् ॥ यजनंवा । भाववचनाश्चेतिभावेघञ् ॥

यागमण्डपः । पुं० न०यजनगृहे ॥ या गायमण्डप : ॥

याचक : । त्रि० वनीयके । याचनके । मार्गणे । अर्थिनि । याञ्चाकर्त्तरि ॥ याचति । टुयाचृयाञ्चायाम् । ण्वुल्तृचाविति ण्वुल् ॥ तृणादपिल घुस्तूलस्तूलादपिचयाचक : । वायु नाकिन्ननीतोऽसौकिंस्वित्प्रार्थनश ङ्कया ॥ जगत्पतिर्हियाचित्वाविष्णु र्वामनतांगत : । कोन्योऽधिकतरस्त स्येयोर्थीयातिनलाघवम् ॥

याचन् । त्रि० याचके ॥ याचति । टु याचृ० । लटःशतृ ॥ मुखभङ्गःस्वरोदी नोगात्रस्वेदोमहद्भयम् । मरणेयानि- चिन्हानितानिचिह्नानियाचत: ॥

याचनम् । न० याञ्चायाम् ॥ याचे र्भावेल्युट् ॥

याचनक : । त्रि० याचके ॥ याचति । टुयाचृ० । ल्यु : । स्वार्थेकन् ॥

याचना । स्त्री॰ याञ्चायाम् ॥ याचे युरादित्वण्यन्तात्॰ ण्यासश्रन्थोयुच् । टाप् ॥

याचमानः । त्रि॰ याचके ॥ यथा । नवीनदीनभावस्य याचमानस्यमानिनः । यचोजीवितयोरासीत्पुरो निःसरणेरणः ॥ इतिशरुचिः ॥

याचितः । त्रि॰ प्रार्थिते । टुयाचृ॰ । क्तः । न॰ याचनवृत्तौ । स्मृतिः मृतन्तुयाचितं प्रोक्तमितिमनुः ॥

याचितकम् । न॰ याञ्चालब्धे ॥ याचितेनानिर्वृत्तम् । अपमित्ययाचिताभ्यांकक्कनाविति कन् ॥ तच्च परकीयत्वेनयाञ्चयायत्प्राप्तमलङ्कारादिवस्तुतत्याचितकम् । कार्यानन्तरं वस्तुस्वामीयत्पुनर्गृह्णाति॰ तदित्यर्थः । मंगनीकी॰ इ॰ भा॰ ॥

याचिष्णुः । त्रि॰ याचके ॥

याच्यम् । त्रि॰ याचितुं योग्ये ॥ टुयाचृ॰ । ऋहलोर्ण्यत् । यजयाचेति कुत्वनिषेधः ॥

याञ्चा । स्त्री॰ याचने । अभिशस्तौ । याचनायाम् । अर्थनायाम् । भिक्षायाम् । अर्दनायाम् । मांगना इ॰ भा॰ ॥ याचनम् । टुयाचृ॰ । यजयाचेतिनङ् ॥

याजः । पुं॰ याजी । प्रसादने । अन्ने । भक्ते ॥

याजकः । पुं॰ याज्ञिके ॥ राजकुञ्जरे ॥ ऋत्विजि ॥ यथा । याज्ञोभ्रा याधनैर्यार्ऋत्विजोयाजकाश्चते इत्यमरः । यजनानिधनैर्वार्याः धनानिदत्त्वा॰ इष्टसम्पादनायत्रिय न्तेप्रार्थ्यन्तेयेयाज्ञोयाजकाश्चऋत्विजोयाजकाश्च... ॥ बहुयाजकयाम... । ब्राह्मणाः... दृश्यभिः । ... द्वितीयः क्रय... क्रयी ॥ तृतीयो-बहुयाज्यः ... चतुर्थोग्रामयाजकः । पञ्चमस्तुभृतस्तपां ग्रामस्य नगरस्यच ॥ अनादिश्याश्रयः पूर्वा-सादिश्याश्चैवपश्चिमाम् । नोपासीतद्विजः सन्ध्यांसषष्ठोऽब्राह्मणः स्मृतः ॥ यजति । यज॰ । ण्वुल् । पुरोहिते ॥

याजनम् न॰ ब्राह्मणस्यकर्मविशेषे । यागक्रियाकारणायाम् । यागकराना इ॰ भा॰ ॥ अविदित्वातुयः कुर्याद्याजनाध्यापनंजपम् । होममन्तर्जलादीनितस्यचाल्पंफलंभवेदितियाज्ञवल्क्यः ॥

याजमानम् । न॰ यजमानस्यभावकर्मणोः ॥ युवादित्वादण् ॥

याजिः । पुं॰ यष्टरि ॥ यागकर्त्तरि ॥ यागे । यजति । यज॰ ब-

सिवपियजिराओत्यादिना•इञ् ।

प्रार्थनायाम् ।

याजुष : । त्रि• यजुर्वेदसम्बन्धिनि ॥

याज्ञवल्क्य : । पुं• यजुश्शाखावि

शेषप्रवर्त्तके•मुनिविशेषे । ब्र-

ह्मराशौ । योगिनि । योगीश्वरे ॥

यज्ञस्यवल्का : वल्का•यज्ञवल्का : ।

यज्ञवल्कस्यगोत्रापत्यम् । गर्गादि-

भ्योयञ् ॥

याज्ञसेनी । स्त्री• द्रौपद्याम् ॥ याज्ञ-

सेनस्यापत्यंस्त्री । अण् । ङीप् ॥

याज्ञिक : । पुं• याजके । आध्वर्यवा

दियज्ञकर्मकुशले ॥ यज्ञकाण्डद्रष्ट

रिकर्त्तरियज्ञमधीते•वेत्तिवा । क्र-

तूक्थादेरितिठक् ॥ कुशे । रक्तखदि-

रे ॥ पलाशे अश्वत्थे ॥

याज्ञिक्यम् । न• याज्ञिकानां•धर्मे•

आम्नायेच । छन्दोगौक्थिकेति•-

ञ्य : ॥

याज्य : । त्रि• याजनीये । यजमाने ।

यष्टुंयोग्य : । यज• । ऋहलोर्ण्य

त् । यजयाचेतिकुत्वनिषेध : ।

याजयितुंयोग्योवा ॥ न• यागल-

ब्धधनादौ ।

याज्या । स्त्री• यज्ञाङ्गसाधने । होतृ-

पाठ्यायामृचि ॥ इज्यतेऽनया । य-

ज• । ऋहलोर्ण्यत् । यजयाचरुच

प्रवचर्चयेतिकुत्वाभाव : ।

यात : । त्रि• गते ॥ याप्रापणे ।

क्त : ॥ न• अङ्कुशवारणे ॥ पाद-

कर्मयत्प्रोक्तंयातमङ्कुशवारणमि

तिहलायुध : ॥

यातना । स्त्री• प्रगाढायांवेदनाया-

म् । कारणायाम् । तीव्रवेदनाया

म् ॥ यतनिकारोपस्कारयो : । च

ण्यासश्रन्थोयुच् ॥

यातयाम : । त्रि• जीर्णे । पक्वे स-

तिप्रहरादिव्यवहिते•ओदनादौ•

ग्रस्थप्रापे ॥ यथा । यातयाम-

गतरसंपूतिपर्य्युषितञ्चयदिति ॥

यातोगतोयामउपभोगकालोयस्य ।

परिभुक्तोज्झिते । भुक्तसमुज्झिते ॥

यथा । दर्भा : कृष्णाजिनंमन्त्रा-

ब्राह्मणाहविरग्नय : । अयातया-

मान्येतानिनियोज्यानिपुन : पु-

न : ॥

यातायातम् । न• गमनागमने ॥

यातु । न• राक्षसे ॥ पुं• काले ।

याति । या• । कमिमनिजनिगा-

भायाहिभ्यश्चेतितु : । अर्चरादि :

त्रि•गन्तरि । पथिके ॥

यातुघ्न : । पुं• गुग्गुलौ ॥

यातुधान : । पुं• राक्षसे । यातुनिर

न्तरितोदधाति•पुष्णाति•स्वजाति

पोषकत्वात् । डुधाञ्• । बहुल-

मन्यत्रापीतियुच् । कृत्यल्युटोऽिति

ल्युड्वा ।

याता । पुं• सारथ्यादौ । स्त्री• प•

तिथ्यादितत्त्वम् ॥ भार्य्यास्तु भ्रातृ
वर्गस्य यातरः स्युः परस्परम् ।
त्रि० गमनकर्त्तरि ॥ यतते । यती
प्रयत्ने । यतेर्द्विश्चेति क्तन् ॥
यात्रव्यः । पुं० पान्थे ॥
यात्रव्यः । त्रि० यतितव्ये । यतनीये ।
यात्रा । स्त्री० यापने । भोजनादि
भिर्वर्त्तने । वृत्तौ । यथा० शरी-
रयात्रापि च ते न प्रसिद्ध्येदकर्म्मण इ-
ति गीता । अपि च येनोपायेन म-
र्त्त्यानां लोकयात्रा प्रसिध्यति । तदे
व कार्य्यं ब्रह्मज्ञैरिदं धर्म्मं सनातनमि
ति श्रीमहाभि निर्णयतन्त्रम् ॥ उत्सवे
। उपाये ॥ अञ्जयायाम् । अभिनि
र्याणे । प्रस्थाने । गमने । गमे ।
यात्रालक्षणं यथा । यत्किञ्चित्कार्य्य
मुद्दिश्य देशान्तरगमनं यात्रेति ज्यो-
तिर्व्विदः । सा द्विधा । सङ्ग्राम
विजयाख्या० सामान्या चेति भेदा
त् । तत्र वशिष्ठः । परविषये विज
यार्थं गन्तुर्यात्रा तु समरविजयाख्या ।
निखिलापरयात्रा या सामान्या सा च
द्विविधा स्यात् ॥ अन्यच्च । कथित
तिथिवासरर्क्षेष्वभिमतफलदा भवे-
त्सामान्या । समरविजयाख्या यात्रा
योगविलग्नविनिश्चययोगेषु । सा या
त्रा० लग्नग्रहबलवशेन० नवधा य
था । उत्तमा० मध्यमा० अधमा०
उत्तमोत्तमा० उत्तममध्यमा० म
ध्यममध्यमा० मध्यमाधमा० अध
माधमा चेति । आसां लक्षणान्याह
० वशिष्ठः । सबलो लग्नपो यस्यां
भास्करस्य सुहृद्यदि । सा यात्रा चोत्त
मोत्तमा या० यातुरिष्टफलप्रदा ॥ १ ॥
लग्नेशो मध्यबलो यस्यां सूर्यस्य मध्य
मः । सा यात्रा मध्यमाख्या या यातुर्म
ध्यफलप्रदा ॥ २ ॥ होरेशो दुर्ब्बलो य
स्यां प्रतिकूलो रवेर्यदि । सा तु यात्रा
ऽधमाख्या या सर्व्वदा फलवर्जिता ॥ ३ ॥
वर्गोत्तमे स्वतुङ्गे वा लग्नेशः सूर्यबा
न्धवः । उत्तमोत्तमयात्रायामिष्टाधि
कफलप्रदा ॥ ४ ॥ उदयेशो बली यस्या
मनुक्तस्थो रवेः सुहृत् । कृच्छ्रेण फ
लदा यातुर्यात्रा सोत्तममध्यमा ॥ ५ ॥
होरेशो बलवान् यस्यां शत्रुगः सूर्य
बान्धवः । उत्तमाधमयात्रा सा शत्रु
पुष्टफलप्रदा ॥ ६ ॥ उक्तलक्षण एवा
सावनुक्तस्थानगो यदि । यातुः सा
मध्यमा यात्रा दुःखाधिकफलप्रदा
॥ ७ ॥ उक्तलग्नाधिपो यस्यामनुक्त-
स्थानगो यदि । प्राप्यार्थहानिदा नि
त्यं सा यात्राऽधममध्यमा ॥ ८ ॥
उक्तलग्नाधिपो यस्यां शत्रुस्थानगतो
यदि । अधमाधमयात्रा सा मृत्यु
दाऽनर्थकारिणी ॥ ९ ॥ यानम् ।-
अनयात्रा । या० । त्रियामा शुभसि
ध्यर्थम् । प्राच्यां शुक्रशनी च सौरि-
शशिनौ त्याज्यौ नवाद्यातिथिः ।

याम्यांविष्कम्भकदासभं गुरुर्दिनं पंचम
योऽप्यपि । पुष्यारोहिणिकारवि-
भं गुरुणीषष्ठीमनु : पश्चिमे॰सौम्ये
विस्कुम्भानवीयमकरोदिग्वैहिती
यातिथि॰रितिकश्चित् ॥

याथातथ्यम् । न॰ यथातथभावे ॥ ब्रा
ह्मणादित्वात्ष्यञ् । यथातथा ॥
स्वार्थे ष्यञ् ॥

याथार्थ्यम् । न॰ सत्यार्थतायाम् ।
वास्तवार्थे ॥ यथा अजस्य गृह्णतो-
जन्मनिरीहस्य हतद्विषः । स्वप-
तोजागरूकस्ययाथार्थ्यंवेदकस्तवे-
तिसुरैः कृताक्षिणौ : स्तुति : ।
कोवेदकोवेत्ति । विदोलटोवेतिण-
लादेश :

याद : पति : । पुं॰ समुद्रे । वरु
णे ॥ यादसांपति : ॥

यादईश : । पुं॰ समुद्रे ।

यादव : । पुं॰ केशवे । श्रीकृष्णे व-
ष्णौ ॥ न॰ गोमहिष्यादौ । पाद
बन्धने ॥ यदोरपत्यम् । अण् ॥
यदूनामिदम् । तस्येदमित्यण् ।

यादवी । स्त्री॰ दुर्गायाम् ॥ यदूना
मियम् । अण् ॥

याद : । न॰ जलजन्तौ यातिवेगेन
। या॰ । असुन् बाहुलकात्॰
दुक् ॥ यद्वा । याति । क्विप् । या
मत्तिअद॰ । असुन् । यांदस्यतिवा
। हसुपपदे । क्विप्

यादसांनाथ : । पुं॰ वरुणे ॥

यादसांपति : । पुं॰ समुद्रे ॥ वरुणे
॥ तत्पुरुषेकृतीत्यलुक् ॥

यादृश : । त्रि॰ यादृशि । जैसा॰ पु॰
भा॰ ॥ यद्वत्दृश्यते॰ यमिवपश्य
ति॰ । दृशिर्॰ । त्यदादिष्विवच
कोपिवाच्यइतिक्स: । आसर्वनाम्न:
। दृग्दृशवतुषु : ॥

यादृच्छिक : त्रि॰ यदृच्छयाप्राप्ते ।
स्वप्रयोजनसङ्कल्पशून्ये ॥

यादृक् । त्रि॰ यथाविधे । यादृशे ॥
यमिवपश्यति॰ यद्वायंदृश्यते ।
दृशिर्॰ । त्यदादिषुदृशइतिक्विन्
। आसर्वनाम्नइत्यात्वम् ।

यादृश : । त्रि॰ यादृशि । त्यदादिषु
दृशोनालोचनेकञ्चेतिकञ् । पू
र्ववदियत्तादिकम् ।

यादोनाथ : । पुं॰ समुद्रे ॥

यादोनिवास : । न॰ जले ॥

यानम् । न॰ युग्ये । पत्रे । रथादिवाह
ने ॥ गतौ । यशोरास्कन्दने । वि-
जिगीषोररिंप्रति यात्रायाम् ॥
यथा । परस्यचस्वयंज्ञात्वास्वस्यवृद्धिं
निरीक्ष्यच । यात्रायामनुकर्तव्य
मित्याहुर्नयकोविदा : । याधात
। या॰ ल्युट् ॥ यान्त्यनेनवा ।
करणेतिल्युट् ।

यानपात्रम् । न॰ निष्पद्यानविशे-
षे । वहित्रके । बोहित्थे । [illegible]

पीते । अक्षालद्युतिमामाप्यजनमा याप्रसिद्धे । समुद्रयाने ॥
यानपात्रकम् । न॰ यानपात्रे ॥
यानमुखम् । न॰ रथादेः पुरोभागे । धुरि । बोढृबन्धनस्थाने ॥ यानस्य मुखम्॰ पुरोभागः ॥
यापकम् । त्रि॰ प्रापके ॥
यापनम् । न॰ वर्तने ॥ कालक्षेपे ॥ निरसने । निरासे ॥ यातेर्ण्यन्तात् ल्युट् । अर्तिह्रीत्यादिनापुगागमः ॥
यापितः । त्रि॰ अपसारिते ॥ प्रस्थापिते ॥
यामा । स्त्री॰ जटायाम् ॥
याप्यः । त्रि॰ यापनीये । क्षेपणीय कालादौ ॥ निन्दिते । गर्हिते ॥ याप्यतेऽस्य । या॰ । ण्यन्तात् । अचोयत् ॥ क्वाचित्के ॥ व्याधिविशेषे ॥ यथा । साध्यायाप्याअसाध्याश्च व्याधयस्त्रिविधाः स्मृताः । सुखसाध्यः कष्टसाध्यो द्विविधः साध्यउच्यते ॥ यापनीयन्तुतंविद्यात् क्रियांधारयतेहिताम् । क्रियायान्तु निवृत्तायांसद्योयश्चविनश्यति । प्राप्ताक्रियाधारयतिसुखिनंयाप्यमातुरम् । प्रपतिष्यदिवागारंस्तम्भोयत्नेनयोजितः ॥ साध्यायाप्यत्वमायान्तियाप्याचासाध्यतांतथा । घ्नन्ति प्राणानसाध्यास्तु नराणामक्रियावताम् ॥ अक्रियावतांचिकित्सारहितानाम् ॥
याप्ययानम् । न॰ शिबिकायाम् । पालकी॰ इ॰ भा॰ । महापाया॰ इ॰ गौ॰ दे॰ भा॰ ॥ याप्यैरधमैर्यानम् । याप्यस्याधमस्ययायानम् ॥
याभः । पुं॰ न॰ मैथुने ॥
यामः । पुं॰ दिवसस्य॰ रात्रेश्च॰ चतुर्थभागैकभागे । प्रहरे । याति । या॰ । अर्तिस्तुसुहुस्रुतिमन् ॥ संयमे । उपरतिमात्रे । यमे ॥ यमनम् । यमः समुपनिविषुचेतिपक्षेघञ् ॥
यामकौ । पुं॰ २ पुनर्वसौ ॥
यामघोषः । पुं॰ कुक्कुटे । यामेघोषोस्य ॥
यामघोषा । स्त्री॰ यन्त्रविशेषे । यामनाल्याम् । घट्याम् । घडी॰ इ॰ भा॰ ॥
यामतूर्य्यः । प्रहरावसानसूचकेवाद्यनीययन्त्रे ॥ यामस्यतूर्यः ॥
यामदग्न्यः । पुं॰ परशुरामे ॥
यामनादी । पुं॰ कुक्कुटे ॥
यामनाली । स्त्री॰ नाल्याम् । यामघोषायाम् ॥
यामनेमिः । पुं॰ शचीपतौ । इन्द्रे ॥
यामलम् । न॰ युगले ॥ तन्त्रशास्त्रविशेषे ॥ तल्लक्षणंयथा । सृष्टिश्चज्योतिषाख्यानंनित्यकृत्य प्रदीपनम् । क्रमसूत्रं वर्ण भेदोजातिभेदस्तथैवच ॥

। युगधर्मप्रसङ्ख्यातो यामलस्या
तुलक्षणम् ॥ तत्तद्बहुविधम् यथा
। आदित्यविष्णुरुद्रगणेशादिप्रभे
दतः । षड्विधं यामलं प्रोक्तं धारा
शीतमसम्मतम् ॥ तथाहि । याम
लाः षट् प्रसङ्ख्याता ब्रह्माद्यादि
यामले । द्वाविंशच्च सहस्राणि त्रयस्त्रिं
शच्छतानि च ॥ द्वितीये ब्रह्म संज्ञे
तु द्वाविंशतिसंख्यया । सहस्राणि श
तान्यत्र तान्येव कथितानि च ॥ २ ॥
तावत्संख्यासहस्राणि शतानि परि
संख्यया । विंशतिस्तथा संख्याश्लो
कानि विष्णुयामले ॥ ३ ॥ त्रयोदश सं
ख्यासहस्राणि वेदसंख्याशतानि च ।
पञ्चाशीतिस्तथा श्लोकाः कथिते रुद्र
यामले ॥ ४ ॥ नवश्लोकसहस्राणि
षष्ट्यधिकशतानि च । द्वाविंशतिस
माश्लोकाः गणेशयामलेऽत्तमे ॥ ५ ॥
रविसंख्यासहस्राणि आदित्याख्येतु
यामले ॥ ६ ॥

यामवती । स्त्री॰ रात्रौ ।

यामाता । पुं॰ जामातरि ॥

यामार्द्धम् । न॰ प्रहरार्द्धे ।

यामिः । स्त्री॰ स्वसरि । भगिन्याम्
। कुलस्त्रियाम् । याति । या॰ ।
बाहुलकान्मिः । यामाम् ।
रात्रौ ॥

यामिकभटः । पुं॰ प्रहरिके । चौकी
दार॰ इतिभाषा ॥

यामित्रम् । न॰ लग्नात्सप्तमेभवने ।

यामित्रवेधः । पुं॰ विवाहादौ वर्जनी
यवेधविशेषे । यथा । लग्नाच्चन्द्रा
द्वा दशः सौम्याश्च सप्तमे यदि ।
तदा यामित्रवेधः स्यात् विवाहं तत्र
वर्जयेत् । मुहूर्त्तचिन्तामणौ तु ।
लग्नाच्चन्द्रान्मदनभवनगे खेटेन स्या
द्विवाहपरिणयनम् । किम्बाणाशुग
५५ मितलवगे यामित्रं स्याद्शुभकर
मिदम् ॥ किन्त्वेति । यदाधिष्ठित
राशेर्नवमांशमारभ्य० बाणाशुग५५
मितलवगे० पञ्चपञ्चाशन्मितनवां-
शगे चन्द्रे लग्ने वा यामित्रं सूक्ष्मं स्या
त् । यथा । मेषे पञ्चमनवांशे भौमो
स्ति० तस्मात्तुलायां सप्तमनवमांशे
स्यचन्द्रो निषिद्धः । अन्येष्टौ नवांशा
स्तुलायां शुभाः एवंविधं सूक्ष्मया
मित्रमशुभकरं स्यादिति । विशेषमा
ह गुरुः । चन्द्रात्सप्तमराशिस्था
ख्याश्च्या : सूर्यादयो ग्रहाः । हानि
दास्तत्र वक्तव्येद्भ लग्नेनानताहशाः ॥

यामिनी । स्त्री॰ रात्रौ ॥ भीतिहेतु
त्वाद्विन्दितायामा यस्याः । इंनद्यो
पतापगर्ह्यादितिनिंदायामिनिः ।
ङीप् ॥ हरिद्रायाम् ॥

यामिनीपतिः पुं॰ चन्द्रमसि ॥ या
मिन्याः पतिः ॥ कर्पूरे ।

यामी । स्त्री॰ याम्याम् । यमस्त्र
भिन्याम् । दक्षिणदिशि ।

यामुनम् । न॰ अञ्जने । सौवीराञ्जने ॥ यमुनायांभवम् । अण् ॥ यद्वा । यमुनाया इदम्॰तदागतत्वात् ॥ देशविशेषे ॥ कुलत्थाकारे प्रस्तरे ॥ यमुनाजले ॥ यथा । त्रिभिःसारस्वतं तोयं सप्तभिस्त्वथयामुनम् । नार्मदं दशभिर्मासैर्गाङ्गंवर्षेण जीर्यति ॥ त्रि॰ यमुनातीरवासिनि ॥ यमुनासम्बन्धिनि ॥

यामुनेष्टकम् । न॰ सीसके ॥

यामेय : । पुं॰ भागिनेये ॥

याम्य : । पुं॰ अगस्त्यमुनौ ॥ चन्दने ॥ यमदैवतम् । यमाच्चेतिण्य : ॥ न॰ भरणीनक्षत्रे ॥

याम्या । स्त्री॰ अपाच्याम् । दक्षिणस्यांदिशि ॥ भरणीनक्षत्रे ॥

याम्यायनम् । न॰ दक्षिणायने ॥ याम्यायनेहरौसुप्ते सर्वकर्माणिवर्जयेत् ॥ याम्यमयनम् ॥

याम्योद्भूत : । पुं॰ श्रीतालवृक्षे ॥

यायजूक : । पुं॰ इज्याशीले । भूयो भूयोयागकर्त्तरि । पुन : पुनः भृशंवायजते । यजदेवपूजायाम् । क्रियासमभिहारे॰ इतियङ् । यजजप दशांयङ इत्यूक : ॥

यायावर : । पुं॰ अश्वमेधीयाश्वे ॥ जरत्कारुमुनौ त्रि॰ अस्थिरगमनशीले ॥ पुनःपुनरतिशयेनयाति॰त च्छील : । या॰ । यश्चयङ इतियाते संज्ञायांवरच् ॥

यावी । पुं॰ वैरिणमुद्दिश्यजिगमिषौ राज्ञि ॥ याति । या॰ । यश्वादि भ्यश्चिनि: । यातीयुक् ॥ विजयार्थे ॥

याव : । पुं॰ अलक्ते । लाक्षारसे ॥ यौति॰ युयतेवा । यु॰ । अच्॰ कहैदा रश्वा । यवएव ॥ प्रज्ञादित्वाण् ॥ पाक प्रभेदे ॥

यावक : । पुं॰ कुल्माषे अलक्तके । यौति । यु॰ । शृस्वादिभ्योवुन् । तत : प्रज्ञादित्वाण् ॥ यद्वा । यवस्य विकार : । अण् । यवादिभ्यइतिस्वार्थे कन् ॥ यावान्ने ॥

यावज्जीवम् । न॰ यावदायुषि । जीवमवयत्ने ॥

यावत् । अ॰ साकल्ये ॥ अवधारणे ॥ प्रशंसायाम् ॥ परिच्छेदे ॥ माने ॥ अधिकारे ॥ सम्भ्रमे । पक्षान्तरे ॥ अवधौ ॥ यत्परिमाणमस्य । तद्दिभ्यश्चेतिडावतुः वगेनान्त्येऽनुनासिकपित्वेऽपि तावापिता : । तेन॰डावतु : ।

यावान् । त्रि॰ परिमाणविशेषे । जितना॰ इतिभा॰ ॥ यत्परिमाणमस्य । यत्तदेतेभ्य : परिमाणेवतुप् । आसर्वनाम्न इत्यात्वम् ॥

यावतिथ : । त्रि॰ यावतांपूरणे ॥ तस्यपूरणेडट् । वतोरियुक् ॥

यावदर्थ : । त्रि॰ देहनिर्वाहाधिकस्य शून्ये ॥ यावदर्थमेवार्थोयस्य । म

ध्यमपदलोपीसमासः। यावताच
यौ दिहनिर्वाहोयेन॰ इत्यथा॥

यावनः। सिह्लके। नागौरीगं इति
प्रसिद्धेधूपे॥ यवनदेशभवः। तत्र
भवइत्यण्॥ याव्यसेवा। यौतैर्यं
कालव्य तुषार॰ योनहरोइति
ख्यातेधान्यप्रभेदे॥ यावनीलोहि
तः स्वादुर्लोहितः श्लेष्मपित्तजि
त्। चक्षुष्यस्तुबरोरुच्यः कदृक्तत्क
थितोलघुः॥

यावनालः। पुं॰ धान्यभेदे। इक्षत
गडुके। दीर्घनाले। दीर्घशरे। चेचे
घौ। इक्षुपत्रके। यावके। तुषार॰
इ॰भा॰॥

यावनालशरः। पुं॰ शरविशेषे। म
दौजे। दृढत्वचि। वारिसम्भवे। ख
रपत्रे। जोन्हरली॰इतिभाषा॥

यावनाली। स्त्री॰ यावनालशर्करायां
म्। हिमोत्पन्नायाम्। हिमशर्क
रायाम्॥

यावशूकः। पुं॰ यवक्षारे॥ इतिरत्न
माला॥

यावसः। पुं॰ न॰घ॰सौ॥ तृणसङ्घा
ते॥ यूयते। यु॰। वहियुभ्यांणि
दित्यसच्॥

याव्यः। त्रि॰ मिश्रणीये॥

याशोधरेयः। शाक्यमुनिपुत्रे॥

याष्टीकः। त्रि॰ यष्ट्यायोधिनि। य-
ष्टिरेतिनी॥ यष्टिः प्रहरणमस्य।
यष्टिकयच्छोरीकक्। स्त्रियांङीपि॰
याष्टीकी॥

यासः। पुं॰ दुरालभायाम्। यवासे।
यासः स्वादुः सरस्तिक्तस्तुवरः शौ
तलोलघुः। कफमेदोमदभ्रान्ति
पित्तासृक्कुष्ठकासनुत्॥ तृष्णाविसर्प
वातास्रवमिज्वरहरः स्मृतः। ये
वासगुणैस्तुल्या बुधैरुक्तादुराल
भा॥ यसनम्। यसुप्रयत्ने। भावे
घञ्॥ यासोस्त्यस्य। अर्श आद्यच्
॥ याति। बाहुलकाद्सच्

यासा। स्त्री॰ मदनशलाकापक्षिणि॥

यासापद्मम्। न॰ विकसितोत्पले॥
सद्योविकसितंपद्मं यासापद्मं प्रचक्ष
ते॥

यास्कः। पुं॰ मुनिविशेषे॥ यस्क-
स्यापत्यम्। शिवादिभ्योण्। बहु
त्वे॰ यस्काः॥

यियक्षमाणः। त्रि॰ यष्टुमिच्छति॥
यजतेः सन्नन्ताल्लटः शानच्॥

यियक्षुः। त्रि॰ यष्टुमिच्छौ॥ यजेः
सन्नन्तादुप्रत्ययः॥

यियासन्। त्रि॰ यातुमिच्छति॥ या
तेसन्नन्ताल्लटः शत्रादेशः॥

यियासितः। त्रि॰ जिगमिषिते। या
तुमिष्टे॥ यातेः सन्नन्तात्कर्मणि
क्तः॥

यियासुः। त्रि॰ यातुमिच्छौ॥ या-
तेः सन्नन्तादुप्रत्ययः॥

युक्तम् । न० हस्तचतुष्टये ॥ चि० युते । अपृथगभूते । मिलिते । औपयिके । न्यायगतद्रव्ये ॥ युक्तिसिद्धे । यथार्थे ॥ स्थिते ॥ नियुक्ते । अवहिते । अप्रमत्ते । निगृहीतमनसि । समाहितचित्ते । ईश्वरार्थे वैतानिककर्माणि ममफलार्थेष्वेवमभिप्रायवति ॥ परिमिते ॥ पुं० अभ्यस्तयोगे ॥ यथा । योगी तु द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः । युक्तस्य सर्वदा भानं चिन्तासहकृतोपरः ॥ युज्यते स्म । युजिर् योगे० क्तः ।

युक्तदण्डः । पुं० यथापराधदण्डे० नृपे । उद्वेजयति तीक्ष्णेन मृदुना परिभूयते । दण्डेन नृपतिस्तस्माद्युक्तदण्डः प्रशस्यते ।

युक्तरसा । स्त्री० रास्नायाम् । काटाचाम् रत्नौ० कू० गौ० दे० भा० । पता पर्णीम् ॥ युक्तो रसो यस्याः ।

युक्ता । स्त्री० एलानी० कू० गौ० दे० भा० ० प्र० वृत्तविशेषे ॥

युक्तिः । स्त्री० न्याये । कार्यकारणयोरभेदसाधने० न्यायो यथा । मृदि मृदात्मना घटं प्रागस्ति० मृद्धर्मो नष्टात्० तस्मात्० कार्यकारणयोरभेद एव । कार्यकारणयोरनन्यत्वे० एककारणज्ञानात्० सर्वकार्यज्ञानमित्यादि : । योगे । योजना-

याम् ॥ लोकव्यवहारे ॥ धर्मशास्त्रविरोधे तु युक्तियुक्तो विधिः स्मृतः । अनुमाने ॥ अपूर्वार्थप्राप्तौ । सन्धिविग्रहयानासनद्वैधीभावसमाश्रयाख्येषु षड्गुणेषु ॥ शास्त्रदीपिकायां युक्तिशब्दस्य० प्रमाणपरतया व्याख्यानात्० प्रत्यक्षादिषट्सु प्रमाणेषु ॥ योजनम् । युजेः स्त्रियां क्तिन् ।। नाट्यालङ्कारविशेषे ॥ तल्लक्षणं यथा । युक्तिरर्थावधारणमिति ॥ उदाहरणं यथा । यदि समरमपास्य नास्ति मृत्योर्भयमिति युक्तमितोऽन्यतः प्रयातुम् । अथ मरणमवश्यमेव जन्तोः किमिति मुधा मलिनं यशः कुरुध्वमिति ॥

युगः । पुं० रथहलाद्यङ्गे । जूया० इति भाषा ॥

युगम् । न० युग्मे ॥ हस्तचतुष्के । वृद्धिनामौषधे ॥ कृतादिषु चतुर्षु ॥ देवानां द्वादशसहस्रवत्सरेण० चतुर्युगं भवति । मनुष्यमानेन चतुर्युगपरिमाणं विंशतिसहस्राधिकत्रिचत्वारिंशल्लक्षम् । ४३२०००० ॥ तत्र सत्ययुगस्य मानम् १७२८००० वर्षाः । त्रेतायुगस्य मानम् । १२९६००० वर्षाः । द्वापरयुगस्य मानम् । ८६४००० वर्षाः । कलियुगस्य मानम् । ४३२००० वर्षाः । तेषां भारतवर्षवर्तित्वं यथा । चत्वारि

भारतेवर्षेयुगानिमुनयोऽब्रुवन् । कृतंच त्रेताद्वापरञ्चकलिश्चेतिचतुर्युगम् । चत्वार्याहुः सहस्राणिवर्षाणान्तु कृतंयुगम् । तस्यतावतच्छतीसन्ध्यासन्ध्यांशश्चतथाविधः । इतरेषु ससन्ध्येषु ससन्ध्यांशेषु च त्रिषु । एकापायेनवर्त्तन्ते सहस्राणिशतानिच । यदेतत्परिसङ्ख्यातमादावेवचतुर्युगम् । एतद्द्वादशसहस्रं देवानांयुगमुच्यते ॥ इतिमनुः । तथाविष्णुपुराणे । चत्वारित्रीणिद्वे चैकं कृतादिषुयथाक्रमम् । दिव्याब्दानांसहस्राणि युगमाहुः पुराविदः ॥ तत्प्रमाणैः शतैः सन्ध्यापूर्वातत्राभिधीयते । सन्ध्यांशकस्तुतत्तुल्योयुगस्यानन्तरोद्विजः ॥ सन्ध्यासन्ध्यांशयोरन्तर्यः कालोमुनिसत्तम । युगाख्यः सतुविज्ञेयः कृतत्रेतादिसंज्ञितः ॥ इति ॥ योजनम्० युज्यतेवा । युजिर्योगे । घञ् । कुत्वम् । संज्ञापूर्वकत्वान्नगुणः । रथयुगेतिनिपातनाद्वा ॥

युगकीलः । पुं० युगकीलके ।

युगकीलकः । पुं० युगकाष्ठस्यकीलके । शम्यायाम् । जुएकीकील० इ० भाषा ॥ स्वार्थेकन् ॥

युगक्षयः । पुं० महाप्रलये ॥ युगानांक्षयोयस्मिन् ।

युगन्धरः । पुं० यत्ररथयुगकाष्ठमासज्यतेतस्मिन्काष्ठे । कूबरे । युगंवोढृबन्धनकाष्ठम्धारयति । संज्ञायांभृतृवृजिधारीतिखच् । अरुर्द्विषदजन्तस्येतिमुम् ॥ पर्वतविशेषे ॥

युगपत् । अ० एकदा । एकस्मिन्नेव काले । युवन्त्यस्मिन्काले । यु० । गपतक्प्रत्ययः ॥ यद्वा । युगंपद्यतेस्मिन् । पद्गतौ । डत्प्रत्ययः ॥

युगपत्रः । पुं० कोविदारे । रक्तकाञ्चनारवृक्षे ॥ युगंपत्रमस्य ॥ युग्मपर्णवृक्षमात्रे ॥

युगपत्रकः । पुं० कोविदारे । रक्तकाञ्चनद्रुमे । युगंयुग्मंपत्रमस्य ॥

युगपत्रिका । स्त्री० शिंशपावृक्षे ॥

युगपार्श्वगः । पुं० दमनकालेकण्ठारोपितकाष्ठवाहे । प्रष्ठौहि ॥ युगस्यस्कन्धकाष्ठस्यपार्श्वंगच्छति । पन्येष्वपीतिडः ॥

युगलम् । न० युगे । युग्मे ॥ युज्यते । युजिर्योगे । वृषादिभ्यः कलच् । न्यङ्क्वादित्वात्कुत्वम् ॥ युगंलातिवा । आतइतिकः ॥ युगंयुग्ममस्त्यस्यवा । सिध्मादित्वाल्लच् ।

युगलाख्यः । पुं० वर्वुरवृक्षे । त्रि० युग्मनामके ॥

युगांशकः । पुं० वत्सरे ॥ युगविभागके ॥

युगादिः । स्त्री० तिथिविशेषेषु ॥ यथा । वैशाखमासस्यसितातृतीया० नवम्यसौकार्त्तिकशुक्लपचे । नभस्यमासस्यचकृष्णपच्चे त्रयोदशीपञ्चदशीचमाघे ॥ एतायुगाद्यः प्रोक्ताः स्वाध्यायंवर्ज्जयेद्बुधः । महापुण्यप्रदाश्चेतादत्तस्याक्षयकारिकाः ॥ विशेषमाहनारदः । कार्त्तिकेशुक्लनवमीत्वादिः कृतयुगस्यच । त्रेतादिर्माधवेशुक्लतृतीयापुण्यसम्मिता- ॥ कृष्णापञ्चदशीमाघेद्वापरादिरुदीरिता । कल्पादिः स्यात्कृष्णपक्षे नभस्येचत्रयोदशीति ॥ कालविशेषे ।। युगस्यआदिः ॥

युगान्तः । पुं० प्रलये ॥ युगशेषे ॥

युग्मम् । न० द्वन्द्वे । युगले । युगे । जोडा० जोडी० इ० भा० ॥ युज्यते । युजिर्योगे । युजिरुजितिजांकुश्चेतिमक् ।। द्वयोः श्लोकयोरन्वये ।।

युग्मपत्रः । पुं० रक्तकाञ्चने कोविदारे ॥ न० युगलपर्णे ॥ युग्मंपत्रमस्य ।

युग्मपत्रिका । स्त्री० शिंशपावृक्षे ।।

युग्मपर्णः । पुं० कोविदारे ।। सप्तपर्णवृक्षे ॥

युग्मफला स्त्री० इन्द्रवर्भिण्याम् ॥ वृश्चिकाल्याम् ॥ गन्धिकायाम् ॥

युग्मादरणम् । न० युग्मतिविपूज्यता-याम् ॥ द्वयोर्मान्यत्वे ॥

युग्यः । पुं० प्रासङ्ग्ये । शाकटे । युगादीनांवोढरि ॥ युगंरथाद्यङ्गंवहतितद्वहतिरथयुगप्रासङ्गमितियत् ॥ न० याने ॥ हस्त्यश्वादिवाहने ॥ युज्यते । युजिर्० । युग्यञ्चपत्रइतिक्यबन्तोनिपातितः ॥ युगायहितो वा । उगवादिभ्योयत् युगमर्हतिवा । दण्डादित्वाद्यत् ॥

युङ्गी । पुं० वर्णसङ्करजातिविशेषे । यथा । गङ्गापुत्रस्यकन्यायांवीर्येणवेशधारिणः । बभूववेशधारीचपुत्रो युङ्गीप्रकीर्तितः। इ० ब्र० वै०पु० ॥

युक्०ग्० । त्रि० समाधिमति । युग्मे ॥ युज्यतेसमाधत्ते । युजसमाधौदैवादिकः। क्विप्चेतिक्विप्॥

युङ्। पुं० योगकर्तरि । मेलनकर्त्तरि ॥ युनक्ति । युजिर्योगे । ऋत्विगादिनाक्विन् । युजेरसमासे० इ० नुम् । क्विन्प्रत्ययस्यकुः । इतिनस्यकुत्वेन० सानुनासिकोङकारः ॥

युजौ । पुं० नित्यद्विवचनान्तः ० अश्विनीकुमारयोः ॥

युजानः । पुं० सारथौ ॥

युञ्जानः । पुं० सारथौ ॥ विप्रे ॥ भावनासहकारेणसर्वज्ञेयोगिविशेषे ॥ यथा । योगीतुद्विविधः प्रोक्तोयुक्तयुञ्जानभेदतः । युक्तस्यसर्वदाभानंचिन्तासहकृतोऽपरः ॥ इ०

भा० प० ॥ युक्तस्येति० योगाभ्यासावगत्यावशीकृत समाधिसमासादितोविविधसिद्धियुक्तइत्युच्यते ० अयमेव विशिष्टयोगवत्वात्युक्तइत्युच्यते । सर्वंदेतिचिन्तासहकारंविनेत्यर्थ: । ज्ञानंसर्वविषयाणांप्रत्यक्षम् अपरोयुञ्जान: । विषयव्यावृत्यामानससमाधिस्थ: । अयञ्च । युञ्जान उच्यते । चिन्ताध्यानम्० तदेवकारणम्० तत्सहकारात्स्थूलसूक्ष्मव्यवहितविप्रकृष्टानर्थान्मन: प्रत्यक्षीकरोतीत्यर्थ: । इतिसिद्धान्तमुक्तावली ॥

युत् । अ० कुत्सायाम् ।

युतम् । न० हस्तचतुष्टये । त्रि० युक्ते । अपृथग्भूते ॥ पृथग्योगी ॥

युतकम् । न० संशये । युगे । युग्मे ॥ नारीवस्त्राञ्चले । पटाञ्चले ॥ चलनार्थे । दानार्थे ॥ युक्ते ॥ यौतके ॥ स्त्रीवस्त्रप्रभेदे । सूर्पार्थे । मैत्रीकरणे ॥ योनिसम्बन्धे ॥

युतयामित्रवेध: । पुं० वेधविशेषे ॥ सयथा । पापात्सप्तमग: शशीयदि भवेत्पापेनयुक्तोथवायत्ननाशुविवर्जयेत्मुनिभिर्नदोषोप्ययंकथ्यते । यात्रायांविपदोऽस्मिन्युतवध: चौरैश्चरोगागमोवैधव्यंविवाहकेऽतेमरणंशुभस्यकर्मणि । अस्यापवादोयथा । तुङ्गस्थितोवामित्रमन्दिरगोथवापूर्णो मित्रर्क्षसौम्यग्रहगोथवादौ स्थितो वायामित्रवेधविहितामपहन्त्यदोषाम् दोषाकर: सुखमनेकविधं विधत्ते वृषकर्कटसिंहकन्यामिथुनधनुर्मीनतुलाख्ये चन्द्रे शुभग्रहयोर्स्थितो वा ० युतयामित्रदोषोनास्ति ॥

युतवेध: । पुं० वेधविशेषे । सयथा । चन्द्र: करोतिरविणासहितोवनाशंभौमान्वित: पतिविनाशकरस्तु चन्द्र: । स्वर्भानुकेतुशनिभिस्तिमात्धातिनाना सुखानिकविनागुरुणाबुधेन ।

युधम् । न० आयोधने । जन्ये प्रधने मृधे । रणे युद्ध० ज्ञात्ये० द्व० भा० ॥ योधनम् । युसम्प्रहारे । भावेक्त: ॥

युधङ्ग: । पुं० कार्त्तिकेये ।

युधसार: । पुं० घोटके ॥

युधाचार्य: । पुं० युद्धार्थमायुधविद्योपदेशके ॥

युत् स्त्री० समिति । आजौ । सङ्ग्रामे । युद्धे ॥ योधनम् युध० । सम्पदादित्वात्क्विप् ॥

युधाजित: । पुं० केकय्याभ्रातरि । भरतमातुले ॥

युधान: । पुं० क्षत्रिये ॥ युध्यते । युध० । युधियुधिहश: किच्चानच् ।

युधामन्यु: । पुं० नृपतिविशेषे ।

युधिष्ठिर : । धर्म्मात्मजे । कुन्त्यागर्भे-धर्म्मादुत्पन्ने • अर्जुनाग्रजे • प्रथमपाण्डवे । अजातशत्रौ । शल्यारौ । अजमीढे ॥ युधिरणे जयभागित्वेन स्थिर : । हलदन्तादित्यलुक् । गवियुधिभ्यांस्थिरइतिषत्वम् ॥

युध्म : । पुं॰ धनुषि । संयुगे ॥ युध्यते । युध॰ । इषियुधीत्यादिनामक् ॥ बाणे ॥

युयुक्खुर : । पुं॰ क्षुद्रव्याघ्रे ॥

युयुत्सु : । त्रि॰ युद्धेच्छौ ॥ युध : सन्नन्तादुप्रत्यय : ॥ धृतराष्ट्राद्वैश्यायांजाते ॥

युयुधान : । पुं॰ सात्यकौ । शिनेर्नप्तरि ॥ इन्द्रे ॥ क्षत्रिये ॥ योद्धरि ॥

युवगण्ड : । पुं॰ यूनोगण्डस्थव्रणविशेषे । यवगण्डे । वयस्फोटे ॥

युवति : । स्त्री॰ प्राप्तयौवनायांस्त्रियाम् । तरुण्याम् ॥ यौति॰ नित्यनैमित्तकाम्येषुसर्वंषुकर्मसुमिश्रीभवतिपाणिग्रहणेनसहाधिकारात् । युमिश्रणे । कनिन्युवृषितक्षीतिकनिन् । यूनस्ति : ॥ हरिद्रायाम् ॥ स्त्रीसामान्ये ॥

युवती । स्त्री॰ तरुण्याम् । द्वितीयायाम् । वर्यायाम् । युवती ॥ तस्या लक्षणादियथा । षोडशाब्दविहायावालाप्रोक्ताप्रियंवदा । पञ्चपञ्चा-शत : प्रौढाहद्धाभवतितत्परम् ॥ वालातुप्राणदाप्रोक्तायुवतीप्राणहारिणी । प्रौढाकरोतिवृद्धत्वंवृद्धामरणमादिशेत् ॥ निदाघशरदोर्वालाप्रौढावर्षावसन्तयो : । हेमन्तशिशिरेयोग्यामहद्धाक्वापिशस्यते ॥ ग्रीष्मा॰ युवती ॥ हरिद्रायाम् ॥ यौति॰ शास्त्रविहितसर्वकर्मसुमिश्रीभवति॰ दम्पत्यो : सहाधिकारात् । युमिश्रणे । लट : शत । उगितश्चेतिङीप् ॥ यद्वा । युवतिशब्दात् सर्वतोक्तिन्नर्थादित्तिङीष् ॥ स्त्रीसामान्ये ॥

युवतीष्टा । स्त्री॰ स्वर्णयूथिकायाम् ॥

युवा । पुं॰ वयस्थे । तरुणे । षोडशवर्षमारभ्यत्रिंशद्वर्षपर्यन्तावस्थावति । मतान्तरेणषोडशवर्षादारभ्यसप्ततिवर्षपर्यन्तवयस्के ॥ यथा । षाषोडशाद्भवेद्बालस्तरुणस्तत उच्यते । वृद्ध स्यात्सप्ततेरूर्ध्वं वर्षीयान्नवते:परमितिस्मृते : यौति । यु॰ । कनिन्युवृषीतिकनिन् ॥ त्रि॰ अल्पवयसि ॥ श्रेष्ठे ॥ निसर्गबलशालिनि ॥ षष्टिवत्सरान्तर्गतनवमवत्सरे ॥ तत्फलं यथा । महार्घंजायतेसर्वंघृततैलरसादिकम् । प्रजानाश्चभवेद्वृद्धिर्युवनिसंवत्सरेशुभे ॥

युवनाश्व : । पुं॰ सूर्यवंशीयराजविशेषे ॥ मान्धातृपितरि ॥

युवराजक : । पुं॰ मान्धातरि नृपे ।

युवराज : । पुं॰ नाम्नोक्त्या॰ राजपुत्रे । कुमारे । भट्टारके । पितरि राज्यं कुर्वत्येव सर्वं निर्वाहकत्वेनाभिषिक्तपुत्रे ॥ युवा चासौ राजा च । राजाहःसखिभ्यष्टच् ॥ भाविबुधविशेषे । मेषेये । चजिते ॥ त्वम् त्रि॰ भवति । त्वत्पदवाच्ये ॥ युष्यति । युषसौचोधातुर्भजने । युष्यसिभ्यां मदिक् ॥

यू : । स्त्री॰ यूषे ॥

यूकः । पुं॰ केशकीटे । खेदजे । षट्पदे ॥ यौति । यु॰ । चजियुधूनीभ्योदीर्घश्चेतिकन् ॥ तुलाराशौ ॥

यूका । स्त्री॰ यूके । केशकीटे । जूँ॰ इ॰ भाषा ॥ लिङ्गाद्यर्थे । टाप् ॥

यूतिः । स्त्री॰ मिश्रणे । मिश्रीभावे ॥ युवनम् । यु॰ । ऊतियूतीत्यादिनाक्तिन्॰ निपातनाद्दीर्घः ॥

यूथ : । पुं॰ न॰ सजातीयसमूहे । तिरश्चाङ्गणे ॥ गणे । समूहे ॥ यौति॰ यूयतिवा । यु॰ । तिथपृष्ठगूथयूथप्रोथाइतिसाधुः ॥

यूथचर : । पुं॰ हस्तिशूकरादौ ॥

यूथनाथ : । पुं॰ यूथपे । वन्यहस्तिमांससमूहेश्वरे । यूथमुख्यद्विपे ॥ यूथस्यहस्तिवृन्दस्यनाथः ॥

यूथप : । पुं॰ यूथनाथे ॥ यूथं हस्तिवृन्दं पाति । पा॰ । आतोनुपेति

क : ॥

यूथभ्रष्ट : । पुं॰ यूथात्पत्नादिभिर्भ्रष्टे ।

यूथिका । स्त्री॰ यम्यानके ॥ जूही॰ इति ख्याते॰ पुष्पे । यूथ्या म । यूथमस्त्यस्याः । अतइनिठनाविति ठन् ॥ यद्वा । यूथिकायाः पुष्पम् पुष्पमूलेषु बहुलमित्यनुदात्तादेरञो ऽस्य लुप् । लुपियुक्तवद्भावः ॥

यूथी । स्त्री॰ प्रसन्नाम् । मागध्याम् । जूहीतिप्रसिद्धपुष्पे ॥ श्वेतपीतप्रभेदेन प्रोक्तं यूथीयुगं बुधैः ॥ यूथीयुगं हिमं तिक्तं कटुपाकं सरं लघु मधुरं तुवरं हृद्यं पित्तघ्नं कफवातलम् ॥ व्रणास्रमुखदन्ताक्षिशिरोरोगविषापहम् ॥ यूथ्याः पुष्पम् । पुष्पमूलेषु बहुलमित्यनुदात्तादेरञो ऽस्य लुप् । लुपियुक्तवद्युक्तवत् । गौरादिः ॥ कुरण्टके ॥

यूथेन : । पुं॰ यूथपे ॥

यूथ्य : । त्रि॰ यूथ भवे ॥ दिगादित्वाद्यत् ॥

यूनि : । स्त्री॰ योगे । मिश्रणे ॥

यूनी । स्त्री॰ युवत्याम् ॥

यूप : । पुं॰ जयस्तम्भे ॥ यज्ञस्तम्भे ॥ ब्रह्मदारुणि । जूटे ॥ पुं॰ न॰ यज्ञसंस्कृतपशुबन्धनकाष्ठे ॥ वेदे वैल्वः खादिरो वा यूपः स्यादित्युच्यते । तस्य परिमाणादिकं [illegible] ॥ [illegible]

वर्त्तुलः शोभनः स्थूलः कार्य्यो-
ऽयमीलितः ॥ भविष्ये । बिल्व-
खदिरपालाशवकुलोयूपःप्रशस्यते ॥
वृतिसामवेदिनोहयोत्सर्गतत्वम् ॥
यूपमूलेन । यू॰ । कुवद्भ्यास्थि-
ति॰योटीचेव ॥ यूपमितमन्त्य-
स्मिन् पशुमितिवा ॥

यूपकटकः । पुं॰ चषाले ॥ यूपस्या
ये कृतः कटकाकारः । यूपमूर्ध्नि
निहितेलोहवलये ॥

यूपकर्णः । पुं॰ यूपैकदेशे । घृता
क्तौ ॥

यूपखण्डः । पुं॰ तक्ष्यमाणस्य यूप-
स्य प्रथमपतितेशकले ॥

यूपद्रुः पुं॰ खदिरवृक्षे ॥

यूपद्रुमः । पुं॰ खदिरवृक्षे ॥ यूप
स्य द्रुमः॰ तत्रोपयुक्तत्वात् ॥ रक्त
खदिरे ॥

यूपलक्ष्यः । पुं॰ पतत्रिणिपक्षिणि ॥

यूपाग्रम् । न॰ तक्मणि । यूपस्याग्र
भागे । यूपस्य अग्रम् ॥

यूषः । पुं॰ न॰ मुद्गादिक्वाथरसे ।
जूस॰ इ॰ भा॰ ॥ मुद्गामलकयू
षस्तुभेदीदीपनपाचनः । यद्वायु
ष्मोगिखड्यूषं यथा । मुद्गयूषं र-
सं तक्रं धान्यजीरकसंयुतम् । सै
न्धवेनान्वितंहृद्यात्खड्यूषमिति-
कीर्त्तितम् । रस॰ जघयोविमांसभव
म ॥ मखदारुवर्षे ॥ यूषति । यू

य॰ । अच् ॥ इगुपधेतिकोशः ॥

येयः । त्रि॰ यातव्ये ॥ यातुंयोग्यः ।
या॰ । अघोयत् । ईयति ।
गुणः ॥

योक्ता । त्रि॰ योगकर्त्तरि ॥ युजेः
कर्त्तरितृन् ॥

योक्त्रम् । न॰ मन्थनरज्जौ । आब
न्धे ॥ योत्रे ॥ युज्यतेऽनेन । यु
जिर्॰ । दाम्नीशसयुयुजेतिष्ट्रन् ॥

योगः । पुं॰ सन्नहने । कवचादिधा
रणे ॥ उपाये ॥ ध्याने ॥ सङ्गत्या
म् ॥ युक्तौ ॥ अपूर्वार्थसम्प्राप्तौ ।
अलब्धलाभे ॥ वपुःस्थैर्ये ॥ प्र
योगे ॥ भेषजे ॥ विस्रब्धघातके ।
द्रव्ये । धने ॥ कार्मणे ॥ नैया
यिके ॥ चारे ॥ सूत्रे ॥ विष्कम्भा
दिषु ॥ तेयथा । विष्कम्भः प्रीति
रायुष्मान्सौभाग्यः शोभनस्तथा-
अतिगण्डः सुकर्माधृतिः शूलस्त-
थैवच ॥ गण्डोवृद्धिर्ध्रुवश्चैव व्याघातो
हर्षणस्तथा । वज्रसिद्धिर्व्यतीपा
तोवरीयान्परिघः शिवः ॥ सि
द्धः साध्यः शुभः शुक्लोब्रह्मैन्द्रा
वैधृतिस्तथेति ॥ संयोगमात्रे ॥ प
रस्परसमागमे । चित्तवृत्तिनिरोधे
॥ सम्यग्दर्शनोपाये । निष्कामक
र्मणि ॥ समाधौ ॥ दुःखसंयोग-
वियोगे । अन्तःकरणशुद्धिविरूपवै
राग्ये ॥ अघटनघटनाकामख्याति

गये ॥ प्रभावे ॥ निरतिशयस्या
नैश्वर्यादिशक्तौ ॥ चित्तैकाग्रत-
यात्मतत्त्वस्य स्वानुभवारूढत्वे ॥
मनोनाशवासनाक्षयानुकूले पुरु-
षप्रयत्ने । चित्तस्यात्माकारप्र
त्ययेननिर्वृत्तिकतापादने ॥ सि
द्ध्यसिद्ध्योः समत्वे ॥ ध्या-
नार्थं वीरासनादिनामनिशरीरब-
न्धे ॥ जीवात्मपरमात्मैक्ये ॥ सं
योगोयोगइत्युक्तो जीवात्मपरमात्म
नोरित्युक्तेः ॥ जीवात्मपरमात्मैक्य
लक्षणे॰ तत्त्वमस्यादिवाक्यजनिते॰
अखण्डसाक्षात्कारे॰ सर्वयोगफल
भूते ॥ योजनम् । युजसमाधौ॰ यु-
जिर्योगेवा । घञ् ॥ अवयवार्थे ॥
परमात्मचिन्तने ॥ योगिनि ॥ भग
वदर्पणबुद्ध्याफलाभिसन्धिराहित्ये
न॰ कृतानि शास्त्रीयाणि कर्मा
णि योगाः • तेविद्यन्तेयस्यस
योगः । अर्शआदित्वान्मत्वर्थीयोच्
ईश्वरसङ्कल्पे ॥ योगोजीवात्मनो
रैक्यंपूजनंशिवकेशयोः । सर्वंब्रह्मे
तिविदुषोनयोगोनचपूजनमितिम
हानिर्वाणतन्त्रम् ॥ ज्योतिर्योगविशे
षे ॥ यथा । बुधगुरुशुक्राणांमध्ये॰
एकोयदि केन्द्रे॰ अथवापञ्चमे॰
नवमेवास्थितस्ते तदायोगः स्यात्
तस्ययातायमंलभते ॥ युज्यतेजीवो
[illegible] । युक्तिर्योगे । करणे

अ ॥

योगचर : । पुं॰ अञ्जनानन्दने । महा
वीरे । हनुमति ।

योगज : । अलौकिकसन्निकर्षविशेषे ॥
न॰ अगुरुणि । योगोत्पन्ने ॥

योगतारा । स्त्री॰ दीप्तिमत्तरायांतारा
याम् ॥ यथा । स्वतारागणमध्ये तु
यातारादीप्तिमत्तरा । योगतारेति
साप्रोक्तामनीषिभिःपुरातनैः ॥

योगदानम् । न॰ छलेनदानम् ॥

योगनाविक : । पुं॰ मत्स्यविशेषे ।
गर्गटे ॥

योगनिद्रा । स्त्री॰ हरेः परमानन्दम
य्यांशक्तौ ॥ योगः स्वात्मनिष्ठैव॰
निद्रेवनिद्रा ॥॰ योगः समाधिः॰
तद्रूपानिद्रावा ॥ दुर्गायाम् ॥ यथा
। यानिद्रान्तः स्थिताधस्याजगद्रक्ष
कपालकः । विभज्यपुरुषंयातियोग
निद्रेतिसोच्यते ॥

योगपट्टकम् । न॰ पृष्ठादौधार्ये॰ उत्त
रीयविशेषे । योगपटा॰ इ॰ गौ॰
दे॰ भा॰ ॥ यथा । त्रिविधंयोगपट्ट
कमाद्यंव्याघ्राजिनोद्भवम् । द्वितीयं
मृगचर्माख्यं तृतीयंतन्तुनिर्मितम् ॥
चतुर्मासप्रविस्तारंदैर्घ्येचाचरणसूक्ष्म
त् । चतुर्मासम्॰ चतुरङ्गुलमानम्

योगपीठम् । न॰ देवानांयोगासने ॥

योगप्रतिपक्ष : । पुं॰ योगभङ्गे ॥ योग
स्यप्रतिपक्षः ॥

योगमल : । पुं॰ अन्तरायशब्दवाच्येषुव्याधिस्त्यानादिषु । चित्तविक्षेपे ॥

योगमाया । स्त्री॰ सर्वसङ्कल्पाधिष्ठानभूतायांभवगत्यांचिच्छक्तौ । ईश्वरसङ्कल्पवशवर्त्तिन्यांमायायाम् ॥ सत्त्वरजस्तमसांत्रयाणांगुणानांयोगोयुक्तिर्घटनंमाया । योगस्यमाया ॥

योगयज्ञ : । यमनियमादियोगाङ्गानुष्ठाने । योगएवयज्ञ : ॥ त्रि॰तत्परे ॥

योगरूढ: । पुं॰ योगार्थसहभावेनरूढ्यर्थबोधकशब्दे ॥ यथा । योगरूढाश्चरूढाश्चयौगिकाश्चेतितेत्रिधा । तेशब्दास्त्रिधाभवन्ति । योगरूढा : पङ्कजादय : । पङ्कजनिडप्रत्ययै : पङ्कजनिकर्त्तृभिधायकेनयोगेनापिपद्मार्थएवप्रतिपाद्यतेनकुसुमाद्यर्थ : इति । योगार्थपुरस्कारेणापिरूढ्यर्थएवेति॰योगरूढ : । एवमीश्वरसङ्केतमहिम्नाभटितिपद्मस्यैवस्मृतै : ॥

योगवाही । त्रि॰ मध्वादौ । संसर्गगुणग्राहके ।

योगवाही । स्त्री॰ क्षारविशेषे । सर्जिकायाम् ॥

योगविद् त्रि॰ प्राप्तयोगेयोगं विन्दतिलभते । विद्ल॰ । सत्सुद्विषेष्य

दिनाक्षिप् ॥

योग : । न॰ समाधौ ॥ युनक्ति । युजिर्॰ । अञ्च्यञ्जियुजिभृजिभ्य : कुश्च त्यसुन्॰कवर्गश्चान्तादेश : । योगसी॰योगांसि ॥

योगसार : । पुं॰ तन्त्रविशेषे ॥ सर्वरोगहरोपाये ॥

योगाङ्गम् । न॰ यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधिषु ॥

योगात्मा । पुं॰ निरस्तसमस्तप्रपञ्चे परमात्मनि । यंविनिद्राजितश्वासा : संतुष्टा : संयतेन्द्रिया : ज्योति : पश्यन्तियुञ्जानास्तस्मै योगात्मनेनम : ॥

योगाधमनम् । न॰ छलेनबन्धके ॥

योगाधियोग : । पुं॰ यात्रायोगान्तरे ॥ यथा । एकोऽपिज्यसितेषुपञ्चमतप : केन्द्रेषुयोगस्तथा॰द्वौचेत्तेष्वधियोगएषुसकलायोगाधियोग :॰स्मृत : ॥ योगेऽपिममथाधियोगगमनेऽपिमंरिपूणांवधस्त्वायोगे यशोऽवनीश्वलभतेयोगाधियोगेन्नजन् ॥

योगान्तराय : । पुं॰ योगमले । योगस्य॰योगेवाअन्तराय : ॥

योगारङ्ग : । पुं॰ नारङ्गे ॥

योगारूढ : । त्रि॰ इन्द्रियार्थतत्साधनकर्मानासक्ते ॥ यथा । यदाहिने

न्द्रियार्थेषु नकर्मस्वनुषज्जते । सर्वसङ्कल्पसंन्यासी योगारूढस्तदोच्यते ॥

योगासनम् । न० ब्रह्मासने । ध्यानासने ॥

योगिदण्ड : । पुं० वेत्रे ॥

योगी । त्रि० वसुरुद्रादित्यादिदेवताभक्ते ॥ दरिद्रब्राह्मणे ॥ ध्याननिष्ठे ॥ निरतिशयज्ञानैश्वर्यादिशालिनि ॥ समाधिनिष्ठेऽन्तर्दृष्टौ ॥ परमहंसपरिव्राजके ॥ परवैराग्ययुक्ते ॥ योगयुक्ते ॥ योगेननित्यसम्बन्धिनि ॥ योगारूढे ॥ सद्विविधोऽपरम : परमश्च । तत्रोत्पन्नतत्त्वज्ञानोऽनुत्पन्नजीवन्मुक्तिरपरम : उत्पन्नतत्त्वज्ञानउत्पन्नजीवन्मुक्तिस्तुपरमोयोगीति ॥ स्वर्णे लोष्टे गृहेरण्ये सुस्निग्धे चन्दनेतथा । समताभावनायस्यसयोगीपरिकीर्त्तित : ॥ आत्मौपम्येनसर्व्वंत्रसमंपश्यतियोऽर्जुन । सुखंवायदिवादु : खंसयोगीपरमोमत : ॥ योगीऽस्यास्ति । अतद्गुनिठमावितीनि : कर्मयोगिणि ॥ यथा । योगिन : कर्मकुर्वन्तिसङ्गंत्यक्त्वात्मशुद्धये इति ॥

योगिनी । स्त्री० योगयुक्तायांनार्याम् ॥ भगवत्या: सखीरूपाश्चावरणदेवतासु ॥ ता: कोटिविधा । तासांच तु : षष्टि : प्रधाना : । तास्वष्टयोगिन्यो यथा । ततोऽष्टपत्रेष्वष्टसु पूजयेदष्टयोगिनी : । शैलपुत्रीचण्डघण्टास्कन्दमातरमेवच । कालरात्रिञ्चपूर्वादिचतुर्दिक्षुप्रपूजयेत् ॥ चण्डिकामथकूष्माण्डींतथाकात्यायनींशुभाम् । महागौरीञ्चाग्निकोणे नैरृत्यादिषुपूजयेत् ॥ कृत्स्नादयोगिन : स्त्रीत्वविवक्षायामृन्नेभ्योङी बितिनान्तलक्षणोङीप् ॥ पञ्चात्र योगिनीचक्रम् । मङ्गलादिषु । यथा मङ्गलापिङ्गलाधन्याभ्रामरीभद्रिका तथा । उल्कासिद्धि : सङ्कटाचयोगिन्योष्टौप्रकीर्तिता : ॥

योगिनीचक्रम् । न० तिथिविशेषे दिग्विशेषा वस्थिति योगिनीषु ॥ यथा । ब्रह्माणीसंस्थितापूर्वे प्रतिपन्नवमीतिथौ । माहेश्वरीचोत्तरेच द्वितीयादशमीतिथौ । स्थिताग्नेयेचकौमारीतृतीयैकादशीतिथौ । नारायणीचनैरृत्येचतुर्थीद्वादशीतिथौ ॥ पञ्चम्यास्त्रयोदश्यांवाराही दक्षिणे तथा । षष्ठ्यांच्चैवचयोदश्यामिन्द्राणीपश्चिमेस्थिता ॥ सप्तम्यांपौर्णिमास्यांचचामुण्डावायुगोचरे । अष्टम्यमावास्ययोश्चमहालक्ष्मीशगोचरे ॥ योगिनीसम्मुखेनैवगमनादि प्रकारयेत् ॥ अपिच । नवमीप्रतिपत्पूर्वे० वह्निरुद्रेग्निकोणके ।

अथोदशशरेयास्य॰ वेदादित्येचमे ऊर्द्ध्वेते । चतुर्दशरसे ऽस्वात्॰ पृथिं मासुनिमाहते । दशपञ्चोत्तरे दर्शाष्टमीशानेचयोगिनी ॥ वामेशुभप्रदापृष्ठे वांछितार्थप्रदायियिनी ॥ दक्षिणे धनहन्त्रीचसम्मुखेमृत्युदायिनी ॥

योगीन्द्रः । पुं॰ शिवे ॥ योगः परमात्मचिन्तनम्॰ तद्युक्तश्रेष्ठः ॥

योगीशः । पुं॰ शिवे ॥ विष्णौ ॥ अन्ये योगिनोयोगान्तरायैर्हन्यन्ते॰ स्वस्वरूपात्प्रमाद्यन्ति॰ अयन्तुतद्रहितत्वात्तेषामीशः ॥ याज्ञवल्क्यमुनौ ॥

योगीश्वरः । पुं॰ शिवे ॥ योगिनामीश्वरः ॥ याज्ञवल्क्यमुनौ ॥

योगीश्वरी । स्त्री॰ दुर्गायाम् । यथा । योगिशक्रादयोदेवाः सनकाद्यास्तपोधनाः । तेषांस्वामीतथायोगीईश्वरीप्रभुपालना ॥ आत्मेन्द्रियमनादीनांसंधेयोगगउच्यते । तेषांवायोजनाद्योगी योगैश्वर्यविबोधने तिदेवीपुराणम्

योगेशः । पुं॰ याज्ञवल्क्ये ॥

योगेश्वरः । पुं॰ सदाशिवे ॥ सर्वज्ञे सर्वशक्तौभगवति । श्रीकृष्णे ॥ सर्वेषामणिमादिसिद्धिशालिनां योगिनामीश्वरः । सर्वयोगसिद्धीनामीश्वरः ॥

योगेश्वरी । स्त्री॰ वराटदेशस्थितायामदुर्गायाम् ॥ वन्ध्याकर्कोटिक्याम् ॥

योगेष्टम् । न॰ सीसके । नागे । सीसाङ्कितप्रसिद्धधातौ ॥ योगेधातुसम्बन्धे इष्टम् । सप्तमीतिसमासः ॥

योग्यम् । न॰ ऋद्धिनामौषधौ ॥ वृद्धिनामौषधौ ॥ पुं॰ पुष्यनक्षत्रे ॥ त्रि॰ प्रवीणे ॥ योगार्हे ॥ उपाये योग्ये नार्थः कस्यमस्यात्मनस्य ॥ शक्ते ॥ युज्यते । युजिर्॰ । ऋहलोर्ण्यत् ॥ यद्वा । योगायप्रभवति । योगाद्यच्च ॥ अभ्यासे ॥ यथा । अथरः प्रणिधानयोग्ययामरुतः पञ्चशरीरगोचरानितिरघुः । प्रणिधानयोग्ययासमाध्यभ्यासेनवशमनयदितिसम्बन्धः ॥

योग्यता । स्त्री॰ वाक्यार्थज्ञानहेतौ । अर्थाबाधे ॥ अग्निनासिञ्चेदितिनप्रमाणम्॰ योग्यताविरहात् ॥ भावेतल् ॥ शाब्दबोधकारणविशेषे ॥ सतुपदार्थानांपरस्परसम्बंधबाधाभावः । इतिसाहित्यदर्पणः ॥ न्यायमते॰ तत्पदार्थेतत्पदार्थवत्ता । यथा । पदार्थेतत्रतद्वत्ता योग्यतापरिकीर्तिता । एकपदार्थेऽपरपदार्थसंबंधोयोग्यताइत्यर्थः । तज्ज्ञानाभावाच्चवह्निनासिञ्चतीत्यादौनशाब्दबोधः ॥ क्षमतायामितिलोकप्रसिद्धिः ।

योग्यरथ: । पुं॰ वैनयिके ॥

योग्या । स्त्री॰ अभ्यासे । अर्कयोषिति । शस्त्राभ्यासे । खुरल्याम् । श्रमे ॥ टाप् ॥

योजक: । त्रि॰ नियोगकर्त्तरि ॥ योजयति । यु॰ । ण्वुल् ॥

योजनम् । न॰ परमात्मनि । योगे ॥ चतुष्क्रोश्याम् । क्रोशचतुष्टये ॥ यथा । द्वादशाङ्गुलिक: शङ्कुस्तद्द्वयन्तु शय: स्मृत: । तच्चतुष्कं धनु: प्रोक्तं क्रोशो धनु:सहस्रिक: ॥ तच्चतुष्कं योजनं स्यादित्यादिमानशास्त्रम् ॥ एतन्मतेऽष्टसहस्रहस्तैर्योजनं भवति ॥ द्वात्रिंशत्सहस्रहस्तैर्योजनमुक्तं लीलावत्यां यथा । यवोदरैरङ्गुलमष्टसङ्ख्यैर्हस्तोऽङ्गुलै: षड्गुणितैश्चतुर्भि: । हस्तैश्चतुर्भिर्भवतीह दण्ड: क्रोश: सहस्रद्वितयेन तेषाम् । स्याद्योजनं क्रोशचतुष्टयेन तथा कराणां दशकेन वंश: ॥ इति ॥ युजे ल्युट् ॥

योजनगन्धा । स्त्री॰ कस्तूर्याम् । सीतायाम् । व्यासमातरि । सत्यवत्याम् ॥ योजनाद्गन्धो यस्या: ॥

योजनगन्धिका । स्त्री॰ योजनगन्धार्थे ॥ स्वार्थे क: । प्रत्ययस्थादितीत्वम् ॥

योजनपर्णी । स्त्री॰)

योजनवल्लिका । स्त्री॰) मञ्जिष्ठायाम् ॥

योजनवल्ली । स्त्री॰ मञ्जिष्ठायाम् । योजनगामिनीवल्ली ॥

योजना । स्त्री॰ युक्तौ । योगकारणायाम् ॥

योजित: । त्रि॰ नियुक्ते ॥ प्रवर्त्तिते । सम्पादिते । युज्यते स्म । युजे: कर्मणि क्त: ॥

योटक: । पुं॰ विवाहोपयोगिविचारविशेषे ॥ स च॰ वर्णवश्यादिकूटभेदादष्टधा । तदुक्तम् । वर्णो वश्यं तथा तारा योनिश्च ग्रहमैत्रकम् । गणमैत्रं भकूटञ्च नाडी चैते गुणाधिका: ॥ एते वर्णादिमैत्र्यां सत्याङ्गुणाधिका: स्यु: । यथा वर्णमैत्र्यामेकोगुण: । वश्ये द्वावित्यादि ॥

योतु: । पुं॰ परिमाणे ॥

योत्रम् न॰ योक्त्रे । हलादेर्गवायुगबन्धने ॥ यूयतेऽनेन । यु॰ । दाम्नीतिष्ट्रन् ॥

योद्धा । पुं॰ योधे । भटे । युद्धकर्त्तरि ॥ युध्यते । युधसम्प्रहारे । तृच् ॥

योध: । पुं॰ योद्धरि । युध्यते । युध॰ । पचाद्यच् । सात्यकौ ॥

योधनम् । न॰ यत्ने । युद्धे ॥

योधसंराव: । पुं॰ क्रन्दने । अन्योन्यस्पर्द्धया योधानामाह्वाने । योधानां संरावम् । समब्दे । उपसर्गे रुव इति घञ् ॥

योनाल : । पुं० यवनाले । जूर्णाह्वये । देवधान्ये । जुन्हरी० जुवार० इ० प्र० धान्ये ॥

योनि : । पुं० स्त्री० आकारे ॥ कारणे ॥ तोये ॥ स्मरमन्दिरे । भगे । वराङ्गे । उपस्थे । रतिगृहे । जन्मवर्त्मनि । गर्भाधानस्थाने : तस्यलक्षणंयथा । शुभ : कमठपृष्ठाभोगजस्कन्धोपमोभग : । वामोन्नतश्चेत्कन्याज : पुत्रजोदक्षिणोन्नत : ॥ आखुरोमागूढमणि : सुश्लिष्ट : संवृत : पृथु : । तुङ्ग : कमलवर्णाभ : शुभो ऽश्वत्थदलाकृति : ॥ कुरङ्गखुररूपोयस्तुल्लिकोदरसन्निभ : । रोमशोविवृतास्यश्च दृश्यनासोतिदुर्भग : ॥ शङ्खावर्त्तो भगोयस्या : सागर्भंनिहनेच्छति । चिपिट : कर्पराकार : किङ्करीपददोभग : ॥ वंशवेतसपत्राभोगजरोमोच्चनासिक : । विकट : कुटिलाकारोलम्बगल्लस्तथाशुभ : ॥ अपिच । शङ्खनाभ्याकृतिर्योनि स्त्र्यावर्त्तासाप्रकीर्तिता । तस्यास्तु तोयेत्वावर्तेगर्भशय्या प्रतिष्ठिता ॥ यौति । युमिश्रणे । वह्निश्रीतिनि : ॥ प्रकृतौ ॥

योनिकन्द : । पुं० योनिरोगविशेषे ॥

योनिकूट : । पुं० वैवाहिकविचारो पयोगिनि० योटकविशेषे । तद्यथा । तोयेशाश्विभयोस्तुरङ्गउदितोवा तार्क्ययो : कासर : पूर्वाभाद्रधनिष्ठयोर्मृगपतिर्यमान्त्ययो : कुञ्जर : । मेषोग्नीज्यभयोर्जलश्रवणयो : कीशोऽभिजिन्नैर्ऋतयोर्वैभ्रन्नाह्मशशाङ्कयोरहिरर्पिज्येष्ठानुराधर्क्षयो : ॥ वातायु : शिवमूलयोस्तुसरमागौरर्य मोयान्तयोर्व्याघ्रश्चित्रविशाखयो : फणिपुनर्वस्वोस्तुमार्जारक : । आखु : पितृभगर्क्षयोस्तु कथितायोनिस्तुभानामियंवैरञ्चापितयोर्द्वयोरपि महत्पाणिग्रहंवर्जयेत् ॥ गोव्याघ्रं गजसिंहमश्वमहिषं श्वैणस्तुबभ्रूरगं वैरंवानरमेषकंसुमहत्तद्वद्विडालोन्दुरम् । लोकानां व्यवहारतो न्यदपिचज्ञात्वाप्रयत्नादिदंदम्पत्योर्नृपभृत्ययोरपिसदावर्ज्यंशुभस्यार्थिभि : ॥ एकयोनिषुसम्पत्तिर्दम्पत्योसङ्गम : सदा । भिन्नयोनिषुमध्या स्यादरिभावेनचेत्तयो : ॥ अपवादश्च । योनेरभावेनोद्वाह : कार्य:सतु वियोगद : । राशिवश्यस्वग्रहजि-कारयेन्नतुदोषभाग् इति ॥

योनिज : । त्रि० योनिनि : सृतंशरीरे ॥

योनिदेवता । स्त्री० पूर्वफल्गुनीनक्षत्रे ॥

योनिमुद्रा । स्त्री० देवतापूजायांप्रदर्शनीयाङ्गुलीरचितयोन्याकारमुद्रा

कारविशेषे ॥

योनिरोग: । पुं॰ भगन्दरे ॥

योन्यर्श: । न॰ भगजातरोगविशेषे । कन्दसंज्ञे ॥

योषा । स्त्री॰ अबलायाम् । नार्याम् ॥ योषति॰ योषयतिवा । युषसौच: सेवायाम् । पचाद्यच् । युष्यते॰ योष्यतेवा । घञ् ॥

योषित् । स्त्री॰ स्त्रीमात्रे । योषायाम् ॥ सात्रिविधा । यथा । योषितस्त्रि विधाब्रह्मन्पृथिव्यां मूढचेतसाम् । साध्वीभोग्याच कुलटातास्ता: सर्वा: स्वार्थतत्परा: ॥ परलोकभयात्साध्वीतथैवच्चयशसात्मन: । कामस्तेहा न्वकुरुतेभर्तु: स्नेहस्सन्ततम् १ ॥ भोग्याभोग्यार्थिनीशश्वत्कामस्तेहे ऽप्यकेवलम् । कुरुतेरतिसेवाञ्चनच भोग्यादृतेऽच्युतम् ॥ वस्त्रालङ्कारसम्भोगंसुस्निग्धाहारमुत्तमम् । यावत् प्राप्नोतिसाभोग्यातावच्चवशगाप्रिया ॥ २ ॥ कुलाङ्गारसमानारीकुलटा कुलनाशिनी । कपटात्कुरुतेसेवां स्वामिनोमचभक्तित: ॥ सदापुंयोगमांसंसुमत्तसामदनातुरा । आहारा दधिकंजारंप्रार्थयन्तीनवंनवम् ॥ नारायैस्वपतिंनातहन्तुमिच्छतिपुंश्चली । तस्यायै विश्वसेन्मूढोजीवनं तस्यनिष्फलम् ॥ कथितायोषित: सर्वाउत्तमाधममध्यमा: । स्वात्मा

रामाविज्ञान्तिमनसातानपरिस्हता ॥ योषते युष्यतेवा । युष॰ । इग् रुहियुषिभ्यइति: ॥ अवध्या: सर्वभूतानांयोषित: अभ्यतामिति ॥

योषिता । स्त्री॰ योषिति ॥ युषेर्विंञ्चात्कर्मणिक्त: ॥

योषित्प्रिया । स्त्री॰ हरिद्रायाम् ॥

यौक्तिक: । पुं॰ नर्मसचिवे । त्रि॰ युक्तियोग्ये ॥

यौगपद्यम् । न॰ एककालायाम् ॥

यौगिक: । त्रि॰ योग्ये ॥ योगंनित्यमर्हति छेदादित्वाट्ठञ् ॥ प्रकृतिप्रत्यययोगलभ्यार्थशाब्दके ॥ योगाद्यप्रभवति । योगाद्यश्चेति॰ ठञ् ॥ योगरूढाश्चरूढाश्चयौगिकाश्चेतितेत्रिधा आदितेयादिशब्दायौगिका: । अदित्याअपत्यमिति॰ कृदिकारादक्तिनइतिङीषन्तात्स्त्रीभ्योढगितिढक् प्रत्ययेनकेवलंयोगार्थएव ॥

यौजनशतिक: । त्रि॰ शतयोजनयायिनि ॥ योजनानांशतम्॰ योजनशतम् । योजनशतंगच्छति । ठञ् । पुं॰ आचार्ये । योजनशतादभिगमनमर्हति । ततोभिगमनमर्हतीति अवक्तव्यमितिठञ् ॥

यौजनिक: । त्रि॰ योजनमात्रयायिनि ॥ योजनंगच्छति । योजनंगच्छतीतिठञ् ॥

यौतकम् । न॰ यौतुके । परिणयनका

ख्येऽयोधनी । युतकंयोनिसम्बन्ध : । तत्रभवम् । तत्रभवइत्यण् ॥ युत योर्वधूवरयोर्वा॰ इदम् । तस्येदमि त्यण् ॥

यौतवम् । न॰ द्रवये । परिमाणे । यौतेर्बाहुलकाद्भावे॰ कर्त्तरिवातुन् । योतु : योधनम्॰ योधकोवा । तस्येदम् । अण् ॥

यौतुकम् । न॰ यौतके ॥

यौध : । पुं॰ योधे । योधएव । स्वार्थिक : प्रज्ञाद्यण् ॥

यौधिष्ठिर : । त्रि॰ युधिष्ठिरसम्बन्धिनि ॥ साचयौधिष्ठिरीसेनागाङ्गेयशरैस्ताडिता । प्रतिपत्पाठशीलानां विद्येवतनुतांगता ॥ युधिष्ठिरस्यायम् । तस्येदमित्यण् ॥

यौधिष्ठिरि : । पुं॰ युधिष्ठिरात्मजे ॥ कुर्वादिगणं बाधित्वा॰ बाह्वादित्वादिञ् । बहुत्वे॰ युधिष्ठिरा : । यञ्जञोश्चेतिलुक् ॥

यौन : । पुं॰ कन्यादानादिसम्बन्धे ॥ न॰ योनिसंबन्धाधीनपापे ॥

यौवतम् । न॰ युवतीनांवृन्दे ॥ परिमाणे॰ । युवतीनांसमूह : । यौति : शवन्तादुगितश्चेतिङीपि॰ अनुदात्तादेरञित्यञ् ॥ लास्यप्रभेदे ॥

यौवनम् । न॰ अवस्थाविशेषे । तारुण्ये ॥ यूनोभाव : । हायनान्तेत्यण्

अन्नितिप्रकृतिभाव : ॥ कौमारंपञ्चमाब्दान्तंपौगण्डंदशमावधि । कैशोरमापञ्चदशाद्यौवनन्तुतत : परम् ॥ नवयौवनलक्षणंयथा । दरोद्भिन्नस्तनंकिंचिच्चलाक्षंमे दुरस्मितम् । मनागभिस्फुरद्भावंनव्यं यौवनमुच्यते ॥ नव्ययौवनकारकमौषधं यथा अश्वगन्धानागबलागुडमांसविशेषिणाम् । रूपंभवेद्यथातद्वन्नवयौवनचारिणाम् ॥ इति ॥ युवतिवृन्दे ॥ युवतीनांसमूह : । अथहियूनस्तिरिति॰ व्युत्पन्नोयुवतिशब्द : । तस्मात्भिक्षादित्वादणिविवक्षिते॰ पुंवद्भावेऽन्नितिप्रकृतिभाव : ॥

यौवनकण्टक : । पुं॰ न॰ युवगण्डे । वयस्फोटे ॥

यौवनलक्षणम् । न॰ लावण्ये ॥ कुचे ॥

यौवनाश्व : । पुं॰ मांधातरिनृपे ॥ यौवनाश्वोथमांधाताचक्रवर्त्त्यवनीप्रभु : । सप्तद्वीपवतीमेक : शशासाच्युततेजसा ॥ यावत्सूर्य उदेतिस्म यावच्चप्रतितिष्ठति । सर्वंतद्यौवनाश्वस्यमांधातु : क्षेत्रमुच्यते ॥ इति वह्निपुराणम् ॥

यौवनाश्वक : । पुं॰ मांधातृनृपे ॥

यौष्माक : । त्रि॰ युष्मदीये ॥ युवयोर्युष्माकंवाऽयम् । युष्मदस्मदोरन्यतरस्यांखञ्चेत्युभाभ्याम् : पक्षेऽण् । प्रकृतेर्युष्माकादेश : ॥

यौष्माकीण : । त्रि॰ युष्मत्सम्बन्धिनि । युष्मदीये । यौष्माके ॥ युवयोर्युष्माकंवाऽयम् । युष्मदस्मदोरितिखञ्तस्मिन्नणिचयुष्माकास्माकौ ॥

॰ : ❋ : ॰

र : । पुं॰ पावके । दहने ॥ तीक्ष्णे ॥ कामाग्नौ ॥ रेफे ॥ लघुमध्ये ऽ।ऽ पुं॰ न॰ ॥

रंहन् । त्रि॰ रममाणे ॥

रंह : । न॰ वेगे ॥ रमतेऽनेन । रमतेर्ह्रायाम् । रमेर्हुक्चेत्यसुन् । हुगागमश्च ॥ रंहत्यनेनवा । रंहयंवा । रंहिगतौ । असुन् । अथैवंवदन्ति रंहेरसुनासिद्धे॰ रङ्हेरसुनि॰ रङ्हुतिमाभूदिति॰रमेरितिसूत्रम् । तथाच । स्यान्मध्यौ अचतुष्टत्वमंहसोरंहसस्तथेतिद्विरूपकोष : । एवञ्च॰ रङ्हु : सङ्क्ऽसुराणां जगदुपकृतये नित्ययुक्तस्ययस्येतिप्रीतिप्रसन्नो न्वहमहिमरुचे : सोऽवतात्स्यन्दनोऽङ्घ्रिपाठोऽनुप्रासरसिकानांप्रामादिकइति ॥ सवेगगतिवचनोऽस्य प्रयोग : ॥ वेगाख्यगुणे ॥

रकार : । पुं॰ रेफाख्यवर्णे । वासदृपविधिना॰ रात्कारप्रत्ययोपिभवति । रकारादीनिनामानिशृण्वतो

ममपार्वतीतिलिङ्गात् ॥

रक्त : । पुं॰ बन्धूके ॥ लोहितवर्णौ यथा । पाणिपादतलौरक्तौनेत्रान्तानिनखानिच । जिह्वाताल्वधरोष्ठौचसप्तरक्तोधनीभवेदितिसामुद्रिकम् ॥ कुसुम्भे । हिङ्गुले ॥ न॰ कुङ्कुमे ॥ ताम्रे ॥ प्राचीनामलके ॥ पद्मके ॥ सिन्दूरे ॥ हिङ्गुले ॥ रक्तचन्दने ॥ शरीरस्थसप्तधातुमध्यगतधातुविशेषे ॥ रुधिरे ॥ पर्य्यायाः लोहिते । अस्रे । क्षतजे । शोणिते । कीलाले । त्वग्जे । रक्तम्॰ इ॰ भा॰ प्र॰ ॥ रक्तस्यस्वरूपमाह । यदारसोयकृद्यातितत्ररंजकपित्तत ॥ । रागंपाकञ्चसम्प्राप्यसभवेद्रक्तसंज्ञक : ॥ रक्तंसर्वशरीरस्थंजीवस्याधारउत्तम : ॥ स्निग्धंगुरुचलंस्वादुविदग्धंपित्तवद्भवेत् ॥ जीवस्याधारउत्तमइति । यतआह । जीवोवसति सर्वस्मिन्देहेतत्रविशेषत : । वीर्येरक्तेमलेयस्मिन्क्षीणेयातिक्षयंचयात् इति ॥ वीर्येरक्तेमलेचशरीरारम्भके । वाग्भटोक्तपरिमाणविशेषे जीवोवसति॰ नतुहृदिप्रभृते रक्तस्यवर्णोपदेशस्यवैयर्थ्यप्रसङ्गात् । पित्तवद्भवेत्॰ अम्लंभवेदित्यर्थ : ॥ रक्तस्यस्थानमाह । । यकृत्प्लीहा वरक्तस्यमुखंस्थानंतयो : स्थितम् । अन्यत्रापिस्थितंरक्तंतन्नामापोच

कभवेत् ॥ इति ॥ रक्तदोषनाशक मौषधं यथा । ब्रह्मयष्टिफलं पिष्टं वारिणातनुलेपनः । तेनचूर्णरक्त दोषः प्रथमतिनसंशयः ॥ रक्त-त्रि॰ रज्यतेस्म । रञ्जरागे । कर्त्तरि क्तः । कर्म्मणिक्तोवा ॥ त्रि॰ अनुरक्ते ॥ नील्यादिरञ्जिते ॥ लोहिते ॥ क्रीडारते ॥

रक्तकः । पुं॰ बन्धूके ॥ बन्धूके ॥ रक्तवर्णे ॥ रक्तशिग्रौ ॥ रक्तैरण्डे ॥ न॰ हिङ्गुले ॥ त्रि॰ अनुरागिणि ॥ विनोदिनि ॥ रक्तपुष्पत्वात्॰ रक्तः । स्वार्थे कन् ॥

रक्तकन्दः । पुं॰ विद्रुमे ॥ राजपलाण्डौ ॥ रक्तालौ ॥

रक्तकन्दलः । पुं॰ प्रवाले ॥

रक्तकमलम् । न॰ रक्तोत्पले ॥ कोकनदे ॥

रक्तकम्बलम् । न॰ रक्तोत्पले ॥ यथा पाद्मे । रक्तकमलैः कुमुदैः पुष्पैः कल्हारै रक्तकम्बलैरिति ॥

रक्तकरवीरकः । पुं॰ रक्तप्रसवे । गणेशकुसुमे । चण्डीकुसुमे । भूतद्राविणि । रविप्रिये । लालकनेर॰ इतिभाषाप्रसिद्धे ॥

रक्तकाञ्चनः । पुं॰ रक्तकोविदारद्रुमे । चमरिके ॥

रक्तकाण्डा । स्त्री॰ रक्तपुनर्नवायाम् ॥

रक्तकाष्ठम् । न॰ पतङ्गे ॥

रक्तकुमुदम् । न॰ रक्तकैरवे ॥

रक्तकुसुमः । पुं॰ पारिभद्रे ॥ धन्वनवृक्षे ॥

रक्तकेशरः । पुं॰ पारिभद्रे ॥ पुन्नागवृक्षे ॥

रक्तकैरवम् । न॰ रक्तकुमुदे ॥

रक्तकोकनदम् । न॰ रक्तोत्पले ॥

रक्तखदिरः । पुं॰ रक्तसारे । बहुशल्ये । याज्ञिके ॥

रक्तगन्धकम् । न॰ बोले ॥

रक्तगुल्मः । स्त्रीणां रक्तजगुल्मरोगे ॥ तस्यौषधं यथा । द्विजयष्टीत्रिकटुकं चूर्णं पीतं हरेत्स्त्रिय । तिलक्वाथेन-संयुक्तं रक्तगुल्मं स्त्रियाहर ॥

रक्तघ्नः । पुं॰ रोहितकवृक्षे ॥

रक्तघ्नी । स्त्री॰ दूर्वाविशेषे । गांठियादूर्वा इ॰ गौ॰ दे॰ भा॰ प्र॰ ॥

रक्तचन्दनम् । न॰ स्वनामाप्रसिद्धचन्दने । पत्राङ्गे । कुचन्दने । ताम्रसारे ॥ रक्तंशीतं गुरु स्वादुच्छर्दितृष्णास्रपित्तहृत् । पित्तनेत्रहितं वृष्यं ज्वरव्रणविषापहम् ॥ रक्तञ्चतत्चन्दनञ्च ॥ रक्तसारे ॥ रक्तचन्दनमिव । रक्तसारत्वात् ॥

रक्तचित्रकः । पुं॰ क्षुपविशेषे । कालि । कालमूले । दारुके । चित्राङ्गे । रातचिता॰ इ॰ गौ॰ दे॰ भाषाप्र॰ ॥

रक्तचूर्णम् । न० सिन्दूरे ॥ रक्तवर्णचूर्णमात्रे ॥

रक्तजन्तुकः । पुं० भूनागे ॥ रक्तवर्णजन्तुमात्रे ॥

रक्तजिह्वः । पुं० सिंहे ॥ त्रि० रक्तवर्णजिह्वायुक्ते ॥

रक्तझिण्टी । स्त्री० कुरुबके ॥

रक्ततुण्डः । पुं० शुकपक्षिणि ॥ त्रि० लोहितमुखयुक्ते ॥

रक्ततुण्डकः । पुं० भूनागे ॥

रक्ततृणा । स्त्री० गोमूत्रिकायाम् ॥

रक्तत्रिवृत् । स्त्री० रक्तवर्णत्रिवृतायाम् त्रिपुटायाम् । ताम्रपुष्पिकायाम् ॥

रक्तदन्तिका । स्त्री० चण्डिकायाम् ॥ तत्स्थाने ॥

रक्तदला । स्त्री० नलिकायाम् ॥ चिविल्लिकायाम् ॥

रक्तधातुः । पुं० गैरिके ॥ ताम्रे ॥

रक्तनालः । पुं० जीवशाके ॥

रक्तनासिकः । पुं० पेचके ॥ त्रि० लोहितनासिकाविशिष्टे ॥

रक्तपः । पुं० यातुधाने । राक्षसे ॥ रक्तंपिबति । पा० । धातोनुपितिकः त्रि० रक्तपानकर्त्तरि ।

रक्तपटः । पुं० वैनाशिकविशेषे ॥ साङ्ख्यभिक्षौ ॥

रक्तपत्रिका । स्त्री० नाकुल्याम् ॥ रक्तपुनर्नवायाम् ॥

रक्तपदी । स्त्री० समङ्गायाम् । क्षुद्रक्षुपविशेषे ॥

रक्तपद्मः । पुं० न० रक्तोत्पले । कोकनदे ॥

रक्तपल्लवः । पुं० अशोकवृक्षे ॥ लोहितपत्रे ।

रक्तपा । स्त्री० जलौकायाम् ॥ डाकिन्याम् ॥ रक्तंपिबति । पा० धातोनुपसर्गकः ॥

रक्तपाकी । स्त्री० बृहत्याम् ॥

रक्तपाता । स्त्री० जलौकायाम् ॥

रक्तपादः । पुं० शुकपक्षिणि ॥

रक्तपादी । स्त्री० लज्जालौ ॥ हंसपद्याम् ॥

रक्तपायी स्त्री० रक्तपानशीले ॥

रक्तपायिनी । स्त्री० जलौकायाम् ॥

रक्तपारदः । पुं० न० हिङ्गुले ॥

रक्तपिण्डम् । न० जवापुष्पे ॥ इ० शब्दरत्नावली ॥

रक्तपिण्डकः । पुं० रक्तालौ । रतालू० इ० भा० ॥

रक्तपित्तम् । न० रोगविशेषे ॥

रक्तपित्तहा पुं० रक्तयव्याम् ॥

रक्तपुच्छिका । स्त्री० ब्राह्मण्याम् । ब्राह्मनीतिप्रसिद्धजन्तुविशेषे ॥

रक्तपुनर्नवा । स्त्री० रक्तपुनर्नवाशाके । मण्डलपत्रिकायाम् । रक्तकाण्डायाम् । रक्तपुष्पिकाया

म् शोणपत्रे ॥
रक्तपुष्प : । रक्तकरवीरे ॥ रक्तार्के ॥ बन्धूकवृक्षे ॥ पुन्नागवृक्षे ॥ बकवृक्षे ॥ दाडिमे ॥ रोहितकवृक्षे ॥ रक्तकाञ्चनवृक्षे ॥
रक्तपुष्पक : । पुं॰ रोहितकद्रुमे ॥ पलाशवृक्षे ॥ पर्पटे ॥ शाल्मलिवृक्षे ॥
रक्तपुष्पा । स्त्री॰ शाल्मलिवृक्षे ॥ रक्तपुनर्नवायाम् । सिन्दूर्याम् रक्ताग्निलोहितानिपुष्पाण्यस्या : ॥
रक्तपुष्पिका । स्त्री॰ लज्जालौ ॥ रक्तपुनर्नवायाम् ॥ भूपाटलौ ॥
रक्तपुष्पी । स्त्री॰ पाटलिवृक्षे ॥ जवायाम् ॥ आवर्तकीलतायाम् ॥ नागदमन्याम् ॥ करुणीवृक्षे ॥ उष्ट्रकाण्डाम् ॥
रक्तपूरकम् । न॰ वृक्षाम्ले ॥
रक्तप्रसव : । पुं॰ रक्तकरवीरे ॥ रक्ताम्लाने ॥
रक्तफल : पुं॰ वटवृक्षे ॥
रक्तफला । स्त्री॰ पीलुपर्ण्याम् । बिम्बिकायाम् । कुंदुरु॰ कुंदूरी॰ इतिख्यातौषधौ ॥ रक्तानिफलान्यस्या : । अजादित्वाट्टाप् ॥
रक्तफेनज : । पुं॰ वामपार्श्वस्थक्लोम्नि । पुप्फुसे ॥
रक्तवालुकम् न॰ सिन्दूरे ॥
रक्तभ्रमर : । पुं॰ निचुलवृक्षे ॥
रक्तमत्स्य : । पुं॰ रक्तवर्णमत्स्यविशेषे

॥ यथा । योरक्तश्चोनातिदीर्घोनिह्रस्वो नातिस्थूलोरक्तमत्स्य : सतूक्त : । शीतोवृष्य: पुष्टिकृद्दीपनो सौनाशंधत्ते किञ्चदोषत्रयस्य ॥
रक्तमाल : । पुं॰ चिरबिल्वे । करञ्जके ॥
रक्तमूलक : । पुं॰ देवसर्षपवृक्षे ॥
रक्तमेह : । पुं॰ प्रमेहरोगविशेषे ॥
रक्तमोक्षणम् न॰ शोणितस्रावे ॥ वेदनोपशमार्थायतथापाकशमायच । अचिरोत्पतितेशोथेशोणितस्रवणं चरेत् ॥ चरेत्॰ कुर्यात् । एकतस्तु क्रिया : सर्वारक्तमोक्षणमेकत : । रक्तंहिवेदनामूलंतच्चेन्नास्तिनचापिरुक् ॥ विवर्णकठिनेश्यावेव्रणे चात्यन्तवेदने । सविशेषेविशेषेणजलौकाभि : पदैरपि ॥ शोणितस्रावणंचरेदित्यनेनान्वय : ॥
रक्तयष्टि : । स्त्री॰)
रक्तयष्टिका स्त्री॰) मञ्जिष्ठायाम् ॥
रक्तयावनाल : । पुं॰ तुवरयावनाले ॥
रक्तराजतम् । न॰ शोणमुक्ताफले ॥
रक्तरेणु : । पुं॰ सिन्दूरे ॥ पलाशकोरके ॥ पुन्नागे ॥ रक्तारेणवोऽस्य ॥
रक्तरेणुका । स्त्री॰ पलाशकलिकायाम् ॥
रक्तरैवतकम् । न॰ महापारेवते ॥
रक्तलशुन : । पुं॰ महाकन्दे । गृञ्जने । दीर्घपत्रके । पृथुपत्रे । स्थूल

[illegible] । यवनेष्टे ॥ गृञ्जनस्य मधुरं कटुकन्दं नालमप्युपदिशन्ति कषायम् । पत्रमप्ययमुशन्ति सतिक्तं सूरयो लवणमस्थि वदन्तीति राजनिर्घण्टः ॥

रक्तला । स्त्री॰ काकतुण्ड्याम् ॥

रक्तलोचनः । पुं॰ कपोते ॥ त्रि॰ लोहितलोचनयुक्ते ॥ रक्ते लोचने यस्य सः ॥

रक्तवटी । स्त्री॰ मसूरिकायाम् ॥

रक्तवर्गः । पुं॰ किंशुके ॥ दाडिमे बन्धूके । लाक्षायाम् ॥ निशाद्वये कुसुम्भपुष्पे । मञ्जिष्ठायाम् ॥

रक्तवर्णः । पुं॰ इन्द्रगोपे ॥

रक्तवृन्तः । पुं॰ वार्त्ताकौ ॥

रक्तवर्षाभूः । स्त्री॰ रक्तपुनर्नवायाम् ॥

रक्तवसनः । पुं॰ सन्न्यासिनि ॥ त्रि॰ लोहितवस्त्रवति ॥ न॰ रक्तवर्णवस्त्रे ॥

रक्तवातः । पुं॰ रोगविशेषे ॥ नारिकेलस्यैव मूलं छागीक्षीरेण संयुतम् । पिवेच्च त्रिविधस्यास्य रक्तवातोऽपि नश्यति ॥

रक्तवालुका । स्त्री॰ सिन्दूरे ॥

रक्तबिन्दुः । पुं॰ रुधिरकणे ॥

रक्तबीजः । पुं॰ दाडिमे । शुम्भनिशुम्भयोः सेनापतावसुरविशेषे ॥

रक्तबीजका । स्त्री॰ तरदीवृक्षे ॥

रक्तवृन्ता । स्त्री॰ शेफालिकायाम् ॥

रक्तवृष्टिः । स्त्री॰ रुधिरवर्षणरूपे उत्पातविशेषे ॥ तत्फलं यथा । गोधया रक्तैश्चोद्यैर्गोमांसास्थिवसादिभिर्नरकः । धान्यहिरण्यत्वक्फलकुसुमाद्यैर्वर्षितैर्भयं विद्यात् ॥

रक्तशालिः । पुं॰ रक्तवर्णधान्यविशेषे ॥ ताम्रशालौ । शोणशालौ ॥

रक्तशासनम् । न॰ सिन्दूरे ॥

रक्तशिग्रुः । पुं॰ रक्तशोभाञ्जनवृक्षे । रक्तके । मधुरे ॥ रक्तो मधुरः । रक्तकण्ठानामितिदर्शनात् । स चासौ शिग्रुः । रक्तो वर्णो यस्य पुष्पे वा ॥

रक्तशीर्षकः । पुं॰ सरलद्रवे ॥

रक्तशृङ्गिकम् । न॰ विषे ॥

रक्तसंज्ञः । पुं॰ कुङ्कुमे ॥

रक्तसन्दंशिका । स्त्री॰ जलौकायाम् ॥

रक्तसन्ध्यकम् । न॰ रक्तकह्लारे । उत्पले ॥ रक्तं सन्ध्यं व । इवार्थे कन् । कैश्च ॥ रक्तां सन्ध्यां सन्धीनकति । वक्रकुटिलायां गतौ । मूलविभुजादित्वात् कः वा ॥

रक्तसरोरुहम् । न॰ रक्तपद्मे ॥ रक्तञ्च तत् सरोरुहञ्च ॥

रक्तसर्षपः । पुं॰ राजिकायाम् ॥

रक्तसहा। स्त्री॰ रक्तम्लाने॥

रक्तसारः। पुं॰ रक्तखदिरे॥ अम्लवेतसे॥ न॰ रक्तचन्दने॥ पत्तङ्गे। बकम॰ इतिख्याते॥

रक्तसौगन्धिकम्। न॰ रक्तकह्लारे। रक्तसौंधी॰ इ॰भा॰प्र॰॥ रक्तवर्णविकालविकाशिपुष्पवृन्ते॥ रक्तञ्चतत्सौगन्धिकञ्च॥

रक्तस्रावः। पुं॰ रक्तपतने॥

रक्तहंसा। स्त्री॰ रागिणीविशेषे॥

रक्ता। स्त्री॰ गुञ्जायाम्॥ लाक्षायाम्॥ मञ्जिष्ठायाम्॥ उष्ट्रकाण्डाम्॥

रक्ताकारः। पुं॰ प्रवाले॥

रक्ताक्तम्। न॰ रक्तचन्दने॥ त्रि॰ शोणितमिश्रिते॥

रक्ताक्षः। पुं॰ कासरे। महिषे॥ क्रूरे॥ पारावते॥ चकोरे॥ सारसे॥ षष्टिवत्सरान्तर्गतवत्सरविशेषे॥ दुर्भिक्षं मरणं रोगो धान्यौषधिप्रपीडनम्। पापरोगा भवेद्दे वि- रक्ताक्षेऽमरवन्दिते॥ ५८॥ त्रि॰ रक्तनेत्रवति॥ रक्ते अक्षिणी यस्य सः। अक्ष्णोदर्शनादित्यच्॥

रक्ताङ्गः। पुं॰ भौमग्रहे॥ कम्पिल्ले॥ प्रवाले। मत्कुणे॥ मण्डले॥ कुक्कुरासे॥ न॰ विद्रुमे॥ धीरे। रक्तचन्दने॥ कुङ्कुमे॥

रक्ताङ्गा। स्त्री॰ जीवन्तिकायाम्॥

रक्ताङ्गी। स्त्री॰ मञ्जिष्ठायाम्॥

रक्तातिसारः। पुं॰ रोगविशेषे॥ पित्तकृन्ति यदा त्वर्थं द्रव्यमश्नाति पैत्तिके। तद्दोषाज्जायते शीघ्रं रक्तातीसार उल्बणः॥ वत्सकातरुत्वगार्द्रादाडिमफलसम्भवा त्वक्च। त्वग्युगलं पलमानं विपचेदष्टाङ्गसम्मिते तोये॥ अष्टमभागं शेषं क्वाथं मधुना पिबेत्पुरुषः। रक्तातिसारमुल्बणमतिशयितं नाशयेन्नियतम्॥ कुटजदाडिमक्वाथः॥ गोदुग्धनवनीतन्तु मधुना सितया सह। लीढं रक्तातिसारे तु ग्राहकं परमं महत्॥ नवनीतावलेहः॥ पीतं मधुसितायुक्तं चन्दनं तण्डुलाम्बुना। रक्तातिसारजिद्रक्तपित्ततृड्दाहमेहनुत्॥ चन्दनमत्र श्वेतम्। चन्दनकल्कः।

रक्ताधारः। पुं॰ चर्मणि॥

रक्तापहम्। न॰ बोले॥

रक्तापामार्गः। पुं॰ क्षुद्रापामार्गे। आघट्टके॥

रक्ताम्बरम्। न॰ वह्निशिखाख्यकुसुमरञ्जितवस्त्रे॥ काषायवस्त्रे॥ त्रि॰ तद्वति॥

रक्ताम्रः। पुं॰ कोशाम्रे॥

रक्ताम्लानः। पुं॰ कुरुवके॥

रक्तार्कः। पुं॰ अर्कपर्णे। विकीरणे॥ रक्तार्कपुष्पं मधुरं सतिक्तं कु

। यवनेष्टे ॥ गृञ्जनस्य मधुरं कटुकन्दं नालमप्युपदिशन्ति कषायम् । पत्रमस्य मुशन्ति सतिक्तं सरयोलवणमस्थि वदन्तीति राजनिर्घण्टः ॥

रक्तला । स्त्री० काकतुण्डाम् ॥

रक्तलोचनः । पुं० कपोते ॥ त्रि० लोहितलोचनयुक्ते ॥ रक्ते लोचने यस्य सः ॥

रक्तवटी । स्त्री० मसूरिकायाम् ॥

रक्तवर्गः । पुं० किंशुके ॥ दाडिमे बन्धूके ॥ लाक्षायाम् ॥ निशाद्वये कुसुम्भपुष्पे ॥ मञ्जिष्ठायाम् ॥

रक्तवर्णः । पुं० इन्द्रगोपे ॥

रक्तवृन्तः । पुं० वार्त्ताकौ ॥

रक्तवर्षाभूः । स्त्री० रक्तपुनर्नवायाम् ॥

रक्तवसनः । पुं० सन्न्यासिनि । त्रि० लोहितवस्त्रवति ॥ न० रक्तवस्त्रे ॥

रक्तवातः । पुं० रोगविशेषे ॥ नारिकेलस्य वैमूलं छागीक्षीरेण संयुतम् । पिबेच्चिरविधस्तस्य रक्तवातोऽपि नश्यति ॥

रक्तवालुका । स्त्री० सिन्दूरे ॥

रक्तविन्दुः । पुं० रुधिरस्य कणे ॥

रक्तबीजः । पुं० दाडिमे ॥ शुम्भनिशुम्भयोः सेनापतावसुरविशेषे ॥

रक्तबीजका । स्त्री० तरदीवृक्षे ॥

रक्तवृन्ता । स्त्री० शेफालिकायाम् ॥

रक्तवृष्टिः । स्त्री० रुधिरवर्षणरूपे उत्पातविशेषे ॥ तत्फलं शस्त्रोद्योगो यथा रक्ते शस्त्रोद्योगो मांसास्थिवसादिभिर्मरकः । धान्यहिरण्यत्वक्फलकुसुमाद्यैर्वर्षितैर्भयं विद्यात् ॥

रक्तशालिः । पुं० रक्तवर्णधान्यविशेषे ॥ ताम्रशालौ । शोणशालौ ॥

रक्तशासनम् । न० सिन्दूरे ॥

रक्तशिग्रुः । पुं० रक्तशोभाञ्जनवृक्षे । रक्तके । मधुरे ॥ रक्तो मधुरः ० रक्तकण्ठानामिति रुर्गनात् । स चासौ शिग्रुः । रक्तो वर्णेन पुष्पेण वा ॥

रक्तशीर्षकः । पुं० सरलद्रवे ।

रक्तशृङ्गिकम् । न० विषे ॥

रक्तसंज्ञः । पुं० कुङ्कुमे ॥

रक्तसन्दंशिका । स्त्री० जलौकायाम् ॥

रक्तसन्ध्यकम् । न० रक्तकह्लारे । हल्लके । रक्ता सन्ध्येव इवार्थे कन् । कैरवः ॥ रक्तान् सन्ध्यौ न कति । वक्रकुटिलायां गतौ । मूलविभुजादित्वात् को वा ॥

रक्तसरोरुहम् । न० रक्तपद्मे ॥ रक्तञ्च तत्सरोरुहञ्च ॥

रक्तसर्षपः । पुं० राजिकायाम् ॥

रक्तसहा । स्त्री० रक्तम्लाने ॥

रक्तसारः । पुं० रक्तखदिरे ॥ अम्लवेतसे ॥ न० रक्तचन्दने ॥ पतङ्गे । बकम० इति ख्याते ॥

रक्तसौगन्धिकम् । न० रक्तकह्लारे । रक्तसौं धी० इ० भा० प्र० ॥ रक्तवर्णत्रिकालविकाशिपुष्पवृक्षे ॥ रक्तञ्च तत् सौगन्धिकञ्च ॥

रक्तस्रावः । पुं० रक्तपतने ॥

रक्तहंसा । स्त्री० रागिणीविशेषे ॥

रक्ता । स्त्री० गुञ्जायाम् ॥ लाक्षायाम् ॥ मञ्जिष्ठायाम् ॥ उप्रकाण्डाम् ॥

रक्ताकारः । पुं० प्रवाले ॥

रक्ताक्तम् । न० रक्तचन्दने ॥ त्रि० शोणितमिश्रिते ॥

रक्ताक्षः । पुं० कासरे । महिषे ॥ क्रूरे ॥ पारावते ॥ चकोरे ॥ सारसे ॥ षष्टिवत्सरान्तर्गतवत्सरविशेषे ॥ दुर्भिक्षं मरणं रोगो धान्यौषधिप्रपीडनम् । पादरोगो भवेद्देवि रक्ताक्षेऽमरवन्दिते ॥ ५८ ॥ त्रि० रक्तनेत्रवति ॥ रक्ते अक्षिणी यस्य सः । अक्ष्णोर्दर्शनादित्यच् ॥

रक्ताङ्गः । पुं० भौमग्रहे ॥ काम्पिल्ले ॥ प्रवाले । मत्कुणे ॥ मण्डले ॥ कृकलासे ॥ न० विद्रुमे । धीरे । रक्तचन्दने ॥ कुङ्कुमे ॥

रक्ताङ्गा । स्त्री० जीवन्तिकायाम् ॥

रक्ताङ्गी । स्त्री० मञ्जिष्ठायाम् ॥

रक्तातिसारः । पुं० रोगविशेषे ॥ पित्तकृद्यदा त्वर्थं द्रव्यमश्नाति पैत्तिके । तद्दोषाज्जायते शीघ्रं रक्तातीसार उल्वणः ॥ वत्सकतरुत्वगार्द्रा दाडिमफलरसभावात्कं च । त्वग्युगलं पलमानं विपचेदष्टाङ्गसम्मिते तोये ॥ अष्टमभागं शेषं क्वाथं मधुना पिबेत् पुरुषः । रक्तातिसारमुल्वणमतिशयितं नाशयेन्नियतम् ॥ कुटजदाडिमकषायः ॥ गोदुग्धनवनीतन्तु मधुना सितया सह । लीढं रक्तातिसारे तु ग्राहकं परमं महत् ॥ नवनीतावलेहः ॥ पीतं मधुसितायुक्तं चन्दनं तण्डुलाम्बुना । रक्तातिसारजिद्रक्तपित्ततृड्दाहमेहनुत् ॥ चन्दनमचक्षेतम् । चन्दनकल्कः ।

रक्ताधारः । पुं० चर्मणि ॥

रक्तादहम् । न० बोले ॥

रक्तापामार्गः । पुं० क्षुद्रापामार्गे । आघट्टके ॥

रक्ताम्बरम् । न० वह्निशिखाख्यकुसुम्भरञ्जितवस्त्रे ॥ काषायवस्त्रे ॥ त्रि० तद्वति ॥

रक्ताम्रः । पुं० कोशाम्रे ॥

रक्ताम्लानः । पुं० कुरुबके ॥

रक्तार्कः । पुं० अर्कपर्णे । विकीरणे ॥ रक्तार्कपुष्पं मधुरं सतिक्तं कु

उक्तमिदं कफनाशनम्च । आद्योर्वि
षंहन्ति चरक्तपित्तं सङ्ग्राहिगुल्म-
श्वयथौ हितं तत् ॥

रक्ताम्लम् । न० नेत्ररोगविशेषे ॥ तल्ल
क्षणं यथा । पद्माभं मृदुरक्ताम्लं य-
न्मांसं चीयते सिते ॥

रक्तार्बुदः । पुं० उपपापोद्भवरोगविशेषे ॥

रक्तार्शः । न० अर्शोरोगविशेषे ॥

रक्तालुः । पुं० रक्तपिण्डालौ । रक्त-
कन्दे । लोहितालौ । रतालु० रत
गडा० इ० भा० प्र० कन्दे ॥

रक्ताशोकः । पुं० वृक्षविशेषे ॥

रक्तिका । स्त्री० गुञ्जायाम् । रत्ती० घुं
घची० चिरमिठी० इ० भा० प्र० भिल्ल
भूषणायाम् ॥ राजिकायाम् ॥ र-
क्तिकापरिमाणे ॥

रक्तिमा ॥ पुं० लोहितत्वे ॥

रक्तेक्षुः । पुं० रक्तवर्णेक्षौ । सूक्ष्मपत्रे ॥

रक्तैरण्डः । पुं० व्याघ्रे । हस्तिक-
र्णे । रुबौ ॥

रक्तैर्वारुः । पुं० इन्द्रवारुण्याम् ॥

रक्तोत्पलः । पुं० शाल्मलिवृक्षे ॥
न० कोकनदे । रक्तसरोरुहे ॥

रक्तोत्पलाभः । पुं० शोणवर्णे । त्रि०
तद्वति ॥

रक्तोत्पलम् । न० गैरिके ॥

रक्षः । पुं० संरक्षणसमर्थे ॥ रक्षति
। रक्षपालने । पचाद्यच् ॥

रक्षःसभम् । न० रक्षःसमूहे ॥

रक्षकः । त्रि० रक्षितरि ॥ अनाथवा
लवृद्धानां रक्षकाः सर्वदेवताः ॥
रक्षति । रक्ष० । ण्वुल् ॥

रक्षणम् । न० पालने ॥ रक्षल्युट् ॥
आपदर्थे धनं रक्षेद्दारान्रक्षेद्धनैर
पि । आत्मानं सततं रक्षेद्दारैर
पि धनैरपि ॥ त्रि० रक्षके । पाल
के ॥ रक्षति० पालयति । रक्ष०
। नन्द्यादित्वाल्ल्युः ॥

रक्षणिः । स्त्री० त्रायमाणायां लता
याम् ॥

रक्षणीयः । त्रि० रक्ष्ये । रक्ष० । अ
नीयर् ॥

रक्षन् । त्रि० रक्षितरि ॥ रक्षति । र
क्ष० । शतृ ॥

रक्षः । न० राक्षसे । निरृतिप्रभृतौ
। रावणादौ । रक्षन्त्यस्मात् । रक्ष०
। सर्वधातुभ्यऽसुन् ॥ निर्दये ॥
यथा । दृष्ट्वा तु विकलान्व्यङ्गानना
थान्रोगिणस्तथा । दयां न जायते य
स्य स रक्षइति मे मतिः ॥

रक्षा । स्त्री० भस्मनि । रक्षणे । बा
धानिवृत्तौ ॥ योगयुक्तो जनार्दनं
चिन्तयेदिति यत्तस्य चिन्तकस्य प
रा रक्षा त्वहं मन्ये । यथोक्तं सहस्र
नामभाष्ये । नित्यं संचिन्तयेदेव
योगयुक्तो जनार्दनम् । सा स्य रक्षा
परा मन्ये को हि नस्यच्युताश्रयमि
ति ॥ रक्षणम् । रक्ष० । गुरोश्च हल

कृत्य:। टाप्॥ भस्मनि॥ श्रावण्यांपौर्णमास्यान्तुरक्षाबन्धनमिष्यते। यथा। पौर्णमास्यांहरेरक्षाबन्धनं विधिपूर्वकम्। व्रजराजकुमारस्तात्केचिदिच्छन्तिसाधव:॥ तत्रभद्रासङ्गवेलामतिक्रम्यैवकुर्य्यात्। तथाचस्मृति:। भद्रायांद्वेनकर्त्तव्ये श्रावणीफाल्गुनीतथा। श्रावणीन्नृपतिंहन्तिग्रामान्दहतिफाल्गुनीति॥ विधिश्चभविष्योत्तरे। उपाकर्मदिनेप्रोक्तमृषीणांचैवतर्पणम्। ततोऽपराह्णसमयेरक्षापोटलिकांशुभाम्॥ कारयेदक्षतै:शस्तै: सिद्धार्थैर्हेमभूषिताम्। वस्त्रैर्विचित्रै:कार्पासै:क्षौमैर्वामलवर्ज्जितै:॥ विचित्रंग्रथितंसूत्रंस्थापयेद्भाजनोपरि। उपलिप्तेगृहमध्ये दत्तचतुष्के न्यसेच्छुभंपीठम्। तत्रोपविशेद्राजासामात्य:सपुरोहित:ससुहृत्॥ तदनुपुरोधान्नृपतेरक्षांबध्नीतमन्त्रेण। येनबद्धोबलीराजादानवेन्द्रोमहाबल:। तेनत्वांप्रतिबध्नामिरक्षे माचलमाचल॥ यदाबध्नंदाक्षायणा इत्यादिर्वैदिकोप्यत्रमन्त्र:पठनीय:॥ ब्राह्मणै:क्षत्रियैर्वैश्यै:शूद्रैश्चान्यैश्चमानवै:। कर्त्तव्योरक्षणाचारोविप्रान्सम्पूज्यशक्तित:। अनेनविधिनायस्तुरक्षिकाबन्धमाचरेत्। ससर्व्वदोषरहित:सुखंसम्वत्सरंवसेत्। इति॥

रक्षापत्र:। पुं० भूर्जवृक्षे॥ न० भूर्जत्वचि॥

रक्षिका। स्त्री० रक्षायाम्। रखडी० इ० भा०॥

रक्षित:। त्रि० त्राते। गोपायिते। गुप्ते॥ रक्ष्यतेस्म। रक्ष०। क्त०॥

रक्षिता। त्रि० रक्षाकर्त्तरि। रक्षके॥ यथा। आयव्ययज्ञोलोकज्ञोदेशोत्पत्तिविशारद:। कृताकृतज्ञोभृत्यानांज्ञेय:स्याद्देषरक्षिता॥

रक्षी। त्रि० रक्षके॥ अवश्यंरक्षति। रक्ष०। णिनि:॥

रक्षिवर्ग:। पुं० अनीकस्थे। राजरक्षकगणे॥ अवश्यंरक्षन्ति। रक्षपालने। आवश्यकेतिणिनि:। रक्षिणांवर्ग:॥

रक्षोघ्न:। पुं० सिद्धार्थे। सितसर्षपे॥ भल्लातकवृक्षे॥ न० काञ्जिके॥ हिङ्गुनि॥

रक्षोघ्नधूपं:। पुं० गुग्गुल्वगुरुसर्जरसवचागौरसर्षपचूर्णलवणनिम्बपत्रव्यामिश्रे घृतसंयुक्ते॥

रक्षोघ्नी। स्त्री० वचायाम्॥ दुर्गायाम्॥

रक्षोजननी। स्त्री० रात्र्याम्॥ राक्षसमातरि॥

रक्षोहा। त्रि० रक्षसांहन्तरि॥ पुं०

गुग्गुलौ ।

रघ्ण : । पुं॰ चाणे ॥ रघ॰ । यज याचेति नङ् ॥

रघु : । पुं॰ सूर्य्यवंशीयदिलीपराजपुत्रे । श्रीरामचन्द्रस्य प्रपितामहे । लङ्घते । लघिगतौ । लघिवंह्योर्नलोपश्चेति कुर्नलोपश्च । बालमूललघ्वलमङ्गुलीनां वा लो रत्वमापद्यते॰ इति रत्वम् ॥ रङ्घतिनाशं गच्छतीति व्युत्पत्त्या॰ व्यष्टिसमष्टिरूपेऽन्नमयकोषे ॥

रघुकार : । पुं॰ कालिदासकवौ ॥ रघुं काव्यविशेषं करोति । कृञ्॰ । कर्म्मण्यण् ॥

रघुनन्दन : । } रामचन्द्रे ॥
रघुनाथ : । }

रघुपति : । पुं॰ श्रीरामे ॥ यथा । यदुपते : क्व गता मथुरापुरी रघुपते : क्व गतोत्तरकोशला । इति विचिन्त्य कुरुष्व मन : स्थिरं न सदिदं जगदित्यवधारयेति रूपगोस्वामी ।

रघुवंश : । पुं॰ रघो : सन्ततौ ॥ रघोर्वंश : ॥ कालिदासकृते काव्यविशेषे ॥

रघुवंशवितु : । }
रघुवंशतिलक : । पुं॰ } श्रीरामे ॥
रघुवर : । }

रघूद्वह : । पुं॰ श्रीरामे ॥ उद्वहति । वह॰ । पचाद्यच् । रघूनामुद्वहो नायक : ॥

रङ्क : । त्रि॰ कृपणे ॥ मन्दे ॥ रमते । रमेर्बाहुलकात्क : ॥

रङ्कु : । पुं॰ शबलपृष्ठे । मृगविशेषे । रमते॰ रज्यते वा । मृगव्वादित्वात् साधु : ॥ जनपदविशेषे ॥

रङ्ग : । पुं॰ रागे ॥ नृत्ये ॥ नृत्यस्थाने ॥ रणाचितौ ॥ टङ्कणे ॥ खादिरसारे । पुं॰ न॰ त्रपुणि । आपूषे । वङ्गे । कुरूप्ये । पिच्चटे । पूतिगन्धे । रांग॰ इ॰ भा॰ ॥ तद्विशेषो यथा । श्वेतं मृदु लघु स्वच्छं स्निग्धमुष्णासहं हिमम् । सूत्रपत्रकरं कान्तं च पुष्टमुद्राहतम् ॥ खुरकं मिश्रकञ्चापि द्विविधं रङ्गमुच्यते । उत्तमं खुरकं तत्र मिश्रकं त्वहितं मतम् ॥ तस्याशुद्धस्य दोषो यथा । रङ्गो विधत्ते खलु शुद्धिहीनस्तथा ह्यपक्वश्च किलाशु गुल्मौ । कुष्ठानि शूलं किलवातरोगं पाण्डुप्रमेहञ्च भगन्दरञ्च ॥ विषोपमं रक्तविकारवृन्दं क्षयं हृदाच्छादविषज्वरञ्च । मेहाश्मरीविद्रधिरुग्ज्वरांगान्नागो विदध्यात् कथितान्विकारान् ॥ तच्छोधनं यथा । वङ्गनागौ प्रतप्तौ च गालितौ तौ निषेचयेत् । त्रिधा त्रिधा विशुद्धि : स्याद्रविदुग्धे पि च त्रिधा ॥ तैलतक्रकाञ्जिकगोमूत्रकुलत्थक्काथे पृथक् त्रिधा त्रिधा । ततोऽर्कदुग्धे त्रिधा ॥ अथ मारणविधि : । मृत्पात्रे द्राविते रङ्गे

चिञ्चाश्वत्थत्वचोरजः । क्षिप्त्वाव
ङ्गं चतुर्थांशमयोदर्व्या प्रचालयेत् ॥
चिञ्चा अमिली । रजः चूर्णम् । अ-
योदर्वी लौहदर्वी० करच्छुली ॥ ततो
द्वियाममात्रेण तद्वङ्गं भस्म प्रजायते । अ-
थ भस्मसमं तालं क्षिप्त्वाम्लेन विमर्द-
येत् ॥ ततो गजपुटे पक्त्वा पुनरम्लेन
मर्दयेत् । तालेन दशमांशेन याममे
कं ततः पुटेत् ॥ एवं दशपुटैः पक्वं
वङ्गं भवति मारितम् ॥ अस्य गुणा यथा
। रङ्गं लघु सरं रूक्षं कुष्ठमेहकफक्रिमी
न् । निहन्ति पाण्डुं सश्वासं चक्षुष्यं पि
त्तलं मनाक् ॥ सिंहो गजौघन्तु यथा
निहन्ति तथैव रङ्गोऽखिलमेहवर्गम् ।
देहस्य सौख्यं प्रबलेन्द्रियत्वं नरस्य पु
ष्टिं विदधाति नूनम् ॥ रङ्गति । रगि
गतौ । पचाद्यच् ॥ रज्यत्यस्मिन् ।
रज्यतेऽनेन वा । रञ्ज रागे । अकर्त्त
रि च इति घञ् । कुत्वम् ॥

रङ्गकारः । त्रि० वस्त्रादीनां रङ्गकर्त्तरि
। रंगरेज० इ० भा० ॥

रङ्गकाष्ठम् । न० पतङ्गे ॥

रङ्गजम् । न० सिन्दूरे ॥

रङ्गजीवकः । पुं० चित्रकरे ॥

रङ्गदः । पुं० टङ्कणे ॥ खादिरसा
रे ॥

रङ्गदा । स्त्री० स्फटिकायाम् ॥

रङ्गदायकम् । न० कङ्कुष्ठे ॥

रङ्गदृढा । स्त्री० स्फटिकायाम् ॥

रङ्गपत्री । स्त्री०)

रङ्गपुष्पी । स्त्री०) नीलीवृक्षे ॥

रङ्गभूतिः । स्त्री० कोजागरपूर्णि
मायाम् ॥

रङ्गभूमिः । स्त्री० मल्लभूमौ ॥ ना
ट्यभूमौ ॥

रङ्गमल्ली । स्त्री० वीणायां ॥

रङ्गमाणिक्यम् । न० माणिक्यरत्ने ॥

रङ्गमाता । स्त्री० कुट्टन्याम् ॥ मतु
नि । लाक्षायाम् ॥ वृत्त्याम् ॥

रङ्गमातृका । स्त्री० लाक्षायाम् ॥

रङ्गलासिनी । स्त्री० शेफालिका
याम् ॥

रङ्गवीजम् । न० रूप्ये ॥

रङ्गशाला । स्त्री० नाट्यगृहे । नाच
घर० इति भाषाप्र० ॥

रङ्गसन्दशम् । न० यसदे । जस्त०
इ० भा० ॥

रङ्गाङ्गा । स्त्री० स्फटिकायाम् ॥

रङ्गाजीवः । पुं० चित्रकारे ॥ रङ्गे
ण आजीवति । जीव० । इगुपधेति कः
॥ रङ्गः आजीवोऽस्येति वा ॥

रङ्गारिः । पुं० करवीरे ॥

रङ्गावतारकः । पुं० रङ्गावतारि
णि । शैलूषे । भरते । नटे ॥ नृत्य
गीतस्थानेगीतवाद्यादिना तदनुगु
णतया प्रसङ्गिनि ॥ इ० प्रायश्चि
त्तविवेकः । नटगायनव्यतिरिक्तोर
ङ्गावतरणजीवि निर्दिष्टतकुञ्चुक-

भट्ट: ॥

रङ्गावतारी । पुं॰ नटे ॥

रङ्गिणी । स्त्री॰ कैवर्त्तिकायाम् ॥ शतमूल्यां ॥

रङ्गोपजीवी । पुं॰ नटमल्लादिहस्तो ॥ रङ्गोपजीविप्रभृतीनामन्नादानां नरकप्राप्तिरुक्ता विष्णुपुराणे २ अंशे ॥ यथा । रङ्गोपजीवीकैवर्त्त: कुण्डाशीगरदस्तथा । सूचीमाहिषिकश्चैवपर्वकारोचयोद्विज: ॥ आगारदाहीमित्रघ्न: शाकुनिर्ग्रामयाजक: । रुधिरान्धेपतन्त्येतेसोमंविक्रीणतेचये इति ॥

रङ्घ: न॰ रंहसि ॥ इतिभरतद्विरूपकोष: ॥

रचनम् । न॰ ग्रन्थने । निर्म्माणे ॥

रचना । स्त्री॰ कुसुमप्रकारादे: पत्रवल्यादेश्चरचने । परिस्पन्दे ॥ रचप्रतियत्ने । चुरादिरदन्त: । ण्यासश्रन्थोयुच् । रच्यते॰ इतिशा ॥ यथाक्रमेणस्थापने । निवेशे । स्थितौ ॥ निर्मितौ ॥ यथा । असाधारणचमत्कारकारिणीरचनाहि निर्मिति: तत्पर्याया: सन्दर्भ: । गुम्फ: । सन्यनम् ॥ ग्रन्थनम् ॥

रचित: । त्रि॰ कल्पिते । कृते ॥ स्थापिते ॥ रच॰ । कर्मणिक्त: ॥

रज: । पुं॰ रेणौ । धूलौ ॥ परागे ॥ आर्त्तवे ॥ गुणान्तरे । रज्यति । रञ्जरागे । घञर्थकप्रत्यय: ॥ न॰ स्त्रीकुसुमे ॥

रज:शय: । पुं॰ शुनि । रजसिशेते । शीङ्॰ । अधिकरणेशेतेरित्यच् ॥

रज:सारथि: । पुं॰ वायौ ॥

रजक: । पुं॰ निर्णेजके । वस्त्रधावके ॥ अयञ्चतीवरपत्न्यांधीवराज्जात: सङ्करजाति: वासांसिफलकै: श्लक्ष्णैर्निर्णिज्याद्रजक: शनै: । अतोऽन्यथाहिकुर्वीतदण्ड्य: स्याद्रुक्ममाषकम् ॥ रज्यति । रञ्ज॰ । नृतिखनिरञ्जिभ्यइति॰ ष्वुन् । असि॰ अक्रो॰ अनेचरञ्जेर्नलोप: । षित्वान्ङीप्॰ रजकी । भाष्यमते॰ क्वुन् । टाप् रजिका ॥ शुके ॥ रजकोधातकशुकावितिहैम: ॥

रजतम् । न॰ दुर्वर्णे । रूप्ये ॥ अस्योत्पत्तिर्यथा । त्रिपुरस्यवधार्थाय- निर्निमेषैर्विलोचनै: । निरीक्षयामासशिव: क्रोधेनपरिपूरित: ॥ ततस्तस्मात्समपतत्तस्यैकस्माद्धि लोचनात् । ततोरुद्र: समभवद्वैश्वानरमिवज्वलन् ॥ द्वितीयादपतन्नेत्रादश्रुबिन्दुस्तुवामकात् ॥ तस्माद्रजतमुत्पन्नमुक्तकर्मसुयोजयेत् । अक्षिप्रमञ्चभवेत्तत्रिरङ्गादिरसयोगत: । पञ्चाश्रगुणान्रूप्ये ॥ हारे दन्तिदन्तयो: ॥ शोणिते ॥ ह्रदे

। शैले ॥ स्वर्णे । रजतिरज्यतेऽनेनवा । रञ्ज० । पृषिरञ्जिभ्यांकिदित्यतच् ॥ त्रि० शुक्ले ॥

रजतद्युति : । पुं० हनुमति ॥

रजतप्रस्थ : । पुं० कैलासाचले ॥

रजताचल : । पुं० रौप्यपर्वते ॥

रजताद्रि : । पुं० कैलासपर्वते ॥

रजनम् । न० स्वर्णे । सुवर्णे । कुसुमादिरागे ॥ रज्यतेनेन । रञ्ज : क्युन् ।

रजनि : । स्त्री० निशि । रात्रौ ॥ रंजन्ति०अनुरक्ताभवन्ति०रागिणोस्याम् बाहुलकाद्रञ्जेरनिनलोपश्च ।

रजनिकर : । पुं० चंद्रे ॥

रजनी । स्त्री० नीलिन्याम् ॥ रात्रौ ॥ हरिद्रायाम् ॥ जतुकायाम् । लाक्षायाम् रंजन्त्यनुरक्ताभवन्त्यस्यां रागिण : । रञ्ज० । क्षिपे : किच्चेतिचकारादनि : । कित्त्वान्नलोप : । बाहुलकाद्वा०रजनि : । गौरादित्वान्ङीष् ॥

रजनीकर : । पुं० हिमांशौ ॥

रजनीगन्धा । स्त्री० पुष्पविशेषे ॥

रजनीचर : । पुं० राक्षसे । रात्रिचरे ॥ रजन्यांचरति । चरेष्ट : ॥ चौरे ॥ यामिकभटे ॥

रजनीजलम् न० नीहारे । ओस० हिं०भा० । रजन्याजलम् ॥

रजनीपुष्प : । पुं० पूतिकरञ्जे ॥

रजनीमुखम् । न० प्रदोषे ॥ रजन्यामुखमिव ॥

रजनीहासा । स्त्री० शेफालिकापुष्पे हारसृङ्गार०पारिजात० हिं० लोक प्रसिद्धे ॥ रजन्यांहासोयस्या : ॥

रज : । न० गुणान्तरे । प्रकृतिगुणविशेषे । रागद्वेषात्मकेदु : खहेतौ ॥ रजोरागात्मकंविद्धितृष्णासङ्गसमुद्भवम् । तन्निबध्नातिकौन्तेयकर्मसङ्गेनदेहिनम् । आर्त्तवे । स्त्रीपुष्पे ॥ परागे । सुमनोरजसि ॥ रेणुमात्रे । धूलिमात्रे ॥ निषिद्धाऽनिषिद्धरजोयथा । आयुष्कामोनसेवेततथासम्मार्जनीरज : । तथाश्वरथधान्यानांगवाञ्चैवरज: शुभम् ॥ अशुभञ्चविजानीयात्खरोष्ट्राजाविकेषु च । गवांरजोधान्यरज : पुत्रस्याङ्गभवंरज : ॥ एतद्रजो महाशस्तंमहापातकनाशनम् ॥ अजारज : खररजस्तथासम्मार्जनीरज : । स्त्रिय : पादरजोराजन्शक्रादपिहरेच्छ्रियम् हि०ल०चं० ॥ रञ्जयति०रजनम्०रज्यतेऽनेनवा । रञ्जरागे । भूरंजिभ्यांकिदित्यसुन् । नलोप : ॥ अस्त्रि ॥ दिवसे ॥ अस्यगहनीरजसीउच्येते०इतिनिरुक्तोक्ते : ॥ स्त्रियोनंरजोहीनंशि

रोणामतिवर्जितम् । सुद्राहीनंहस्त
दत्तंपत्रंसिद्धिकरंनहीतिलच्यम् ॥

रजसानु : । पुं० मेघे ॥ चित्ते ॥

रजस्वल : । पुं० महिषे । सैरिभे ॥ त्रि०
सरजस्के ॥ रजोऽस्त्यस्य । रज :
कृषीतिवलच् ॥

रजस्वला । स्त्री० स्त्रीधर्मिण्याम् । अ
व्याम् । आत्रेय्याम् । पुष्पवत्यां-
स्त्रियाम् । उदक्यायाम् । द्वादशा
द्वत्सरादूर्ध्वमापञ्चाशत्समा : स्त्रि
य : । मासिमासिभगद्वाराप्रकृत्यै
वार्त्तवंस्रवेत् ॥ तत्र । प्रथमेऽहनि
चण्डालीद्वितीयेब्रह्मघातिनी । तृ-
तीयेरजकीप्रोक्तासाचथार्थ्यातथाङ्ग-
ना ॥ शुद्धाभर्त्तुश्चतुर्थेऽन्हिस्नशुद्धादै
वपैत्रयो : । दैवेकर्मणिपैत्रेचप-
ञ्चमेहनिशुद्ध्यति । रजोस्त्यस्या : ।
रज : कृष्यासुतिपरिषदोवलच् ।
तसोमत्वर्थइतिभत्वम् ॥ सिंहक-
र्कटस्थेऽर्केनद्याम् । यथा । सिंहक-
र्कटयोर्मध्ये सर्वानद्योरजस्वला : ।
तासुस्नानंनकुर्वीतवर्जयित्वासमु-
द्रगा : ॥ उपाकर्मणिचोत्सर्गेप्रेत-
स्नानेतथैवच । चन्द्रसूर्योपरागेचर
जोदोषोनविद्यते ॥ दशवर्षाधिका
यांनार्याम् ॥

रजि : । पुं० चन्द्रवंशीयराजविशे-
षे

रञ्जित : । पत्रि० आकृष्टे ॥ रञ्जिण-

: । आर्त-

न्तात्कर्मणिक्त : । रञ्जेर्णौमृगरम-
णइत्युपधानकारलोप : ॥

रजोगुण : । पुं० अप्रीत्यात्मकेप्रकृते-
र्गुणे ॥ अप्रीतिरात्मभावोयस्य । उ
पष्टम्भकंचलञ्चरज : । सत्त्वतमसो
स्वयमक्रियत्वात्स्वकार्यप्रवृत्तिंप्रत्य
वसीदन्तीरजसोपष्टभ्येते०उत्साहंप्र
यत्नंकार्येते । तदिदमुक्तमुपष्टम्भकं
रजइति । कस्मादित्यतउक्तं०चलमि
ति । तदनेन०रजस : प्रवृत्त्यर्थत्वं
दर्शितम् । यद्दु : खहेतुस्तद्दु : खा
त्मकंरज : । रज:कार्येहास्यहर्षादौ ॥

रजोनिमीलित : । त्रि० रजोगुणाभ्र
त्ते ॥ अपथेपदमर्पयन्तिहिश्रुतव-
न्तोपिरजोनिमीलिता : ॥

रजोबलम् ।)
रजोरसम् ।) न० अन्धकारे ॥

रजोविशाल : । पुं० भूर्लोके । मध्ये
रजोविशाल : सदधर्माधर्मानुष्ठा-
नपरत्वात्०दु : खबहुलत्वाच्च०रजो
विशालइतिसाङ्ख्याचार्या : ॥

रजोहर : पुं० रजके ॥

रज्जु : । स्त्री० वेण्याम् । बन्धनसाध
नवस्तुनि । शुल्वे । वराटके । गुणे
। डोरी०रस्सी०इ०भा० । सृज्यते ।
सृजविसर्गे । सृजेरसुमच । आत्
सलोपउप्रत्ययश्च । सत्सुस्त्वेनश:०
जश्त्वेनज : ॥ मध्यगुरौ० । उ । ० ॥

रज्यमान : त्रि० लोहितायमाने ॥

रञ्ज दैवादिकात्कर्त्तरिशानच् । अनिदितामितिनलोपः ॥
रञ्जकः । पुं॰ कुसुम्भादिना वस्त्रादि रागकर्त्तरि ॥ कम्पिल्लके ॥ प्रीतिजनके ॥ न॰ हिङ्गुलि ॥
रञ्जनः । पुं॰ रागजनके ॥ मुञ्जतृणे ॥ न॰ रक्तचन्दने ॥ हिङ्गुलि ॥ पतङ्गे । वकम्॰इ॰भा॰ ॥ वर्णान्तरापादने ॥ रञ्जयति । रञ्जरागे । ण्यन्तः । युच्॰ल्युड्वा ॥
रञ्जनकः । पुं॰ कट्फले ॥
रञ्जनी । स्त्री॰ गुण्डारोचनिकायाम् ॥ नील्याम् ॥ मञ्जिष्ठायाम् ॥ शेफालिकायाम् ॥ हरिद्रायाम् ॥ पर्प्याम् । रञ्जयति । रञ्ज॰ । ल्युट् । षिल्गौरादिभ्यश्चेति ङीष् । रज्यतेऽनयेतिवियहेतु॰करणे तिल्युटिभवत्येव । रञ्जः कच्चिन्नितिवा ॥
रञ्जनीयः । त्रि॰ रागोत्पादनयोग्ये ॥
रटितः । त्रि॰ कथिते ॥ रटेः कर्मणिक्तः ॥ न॰कथनमात्रे ॥
रणः । पुं॰ क्वाणे । वीणादिवादने ॥ क्षये । पुं॰न॰युधि । समरे । युद्धे ॥ रणनम्॰रणन्ति॰शब्दायन्तेऽस्मिन्निति वा । रणशब्दे । बशिरण्योरित्यप् ॥ रणति । रणः : पचाद्यच्वा ॥
रणन् । पुं॰ ध्वनति ॥
रणतूर्य्यम् । न॰ सङ्ग्रामपटहे । अभयडिण्डिमे । युद्धवाद्ये ॥
रणप्रियः । पुं॰ श्येनविहगे ॥ न॰उशीरे । वीरणमूले ॥
रणमत्तः । पुं॰ हस्तिनि । द्विपे ॥
रणमुष्टिः । पुं॰ विषमुष्टिक्षुपे ॥
रणरङ्गः । पुं॰ रणकातरहस्तिनि । प्रतिमे ॥
रणरणः । पुं॰ मशके ॥ न॰उद्वेगे ॥
रणरणकः । पुं॰ उत्कण्ठायाम् ॥ कामे ॥
रणसङ्कुलम् न॰ तुमुले । व्याकुलरणे ॥ रणसङ्कुलम् ॥
रणसमुद्यमः । पुं॰ युद्धोद्योगे ॥
रणाङ्गनम् । न॰ युद्धस्थले ॥
रणालङ्कारः । पुं॰ कङ्कपक्षिणि ॥
रण्डः । त्रि॰ अवचर्मावच्छिन्नावयवे ॥ धूर्त्ते ॥
रण्डकः । पुं॰ अफलद्रुमे ॥
रण्डा । स्त्री॰ मूषिकपर्ण्याम् ॥ विधवायाम् ॥ रमन्तेऽत्र । रमक्रीडायाम् । अमन्ताड्डः । टाप् ॥
रण्डाश्रमी । पुं॰ अष्टचत्वारिंशद्वर्षेऽपरिभार्याविहीने ॥ यथा । चत्वारिंशद्वत्सराणांसाष्टानांचपरेयदि । स्त्रियावियुज्यतेकश्चित्सतुरण्डाश्रमीमतः ॥
रतम् । न॰ मैथुने । सुरते ॥ तद्द्विविधम् । यथाहवात्स्यायनः । बाह्यमाभ्यन्तरञ्चेतिद्विविधंरतम्

च्यते । तत्राद्यं चुम्बनाश्लेषनखद
न्तक्षतादिकम् । द्वितीयं सुरतं
साक्षान्नानाकारैर्विकल्पितमिति ॥
त्रि० गुह्ये ॥ अभिरते । अनुरक्ते
रमणम् । रम० । नपुंसके भावे क्तः
। अनुदात्तोपदेशेति नलोपः ॥
रतकील: । पुं० कुक्कुरे ॥
रतकूजितम् । न० रतिकालकथाया
म् । मणिते ॥
रतगुरु: । पुं० भर्त्तरि हृदयेशे ॥
रतज्वर: । पुं० काके ॥
रततालो । पुं० षिड्गे ॥
रतताली । स्त्री० कुट्टन्याम् ॥
रतनाराच: । पुं० नारीणां शीत्कारे
॥ स्मरे ॥ शुनि ॥ षिड्गे ॥
रतनिधि: । पुं० खञ्जने ॥
रतराग: । पुं० सुरताभिलाषे ॥
रतर्द्धिकम् । न० दिवसे ॥ सुखस्ना-
ने ॥ अष्टमङ्गले ॥
रतव्रण: ।)
रतशायी ।) पुं० कुक्कुरे । शुनि ॥
रतहिण्डक: । पुं० स्त्रीचौरे ॥ लम्प-
टे ॥
रतान्दुक: । पुं० कुक्कुरे ॥
रताम्बी । स्त्री० कुज्झट्यां ॥
रतामर्द्द: । पुं० कुक्कुरे ॥
रतायनी । स्त्री० वेश्यायाम् ॥
रतार्थिनी । स्त्री० मैथुनाभिलाषिण्या
म् ॥ कामुक्याम् ॥

रति: । स्त्री० स्मरदारेषु । कामदेव-
स्यपत्न्याम् ॥ आषाढिस्थानस्था-
यांदेव्याम् ॥ सुरते ॥ गुह्ये ॥ रा-
गे ॥ अनुरागे ॥ यथा । भगवान्०
ब्रह्म०कार्त्स्न्येनत्रिरन्वीक्ष्यमनीष
या । तदध्यवस्यत्कूटस्थोरतिरात्म
न्यतोभवेत्इति ॥ रम्यतेऽनया
रम० । क्तिन् । अनुदात्तोपदेशवन
तितनोत्यादीनामनुनासिकलोपो-
झलिक्ङिति० इतिमलोप:॥ चेत:
परितोषे ॥ इष्टार्थसंयोगजनितायां
क्रीडायाम् ॥ इच्छाविशेषे ॥ य-
था । यूनोरन्योन्यविषयस्थायिनी-
च्छारति: स्मृतेतिरसार्णवसुधा-
कर: ॥
रतिकुहरम् । न० भगे । योनौ ॥
रतिकूजितम् । न० मणिते । मैथुनश
ब्दे ॥ रते: कूजितम् ॥
रतिक्रिया । स्त्री० संवेशने । मैथुने ॥
रतिगृहम् । न० योनौ ॥ रमणम-
न्दिरे ॥
रतिचक्रम् । न० कामिन्यासहक्रीड-
ने ॥ यथा । शास्त्रस्यविषयस्तावद्या
वन्मन्दरसोनर: । रतिचक्रेप्रवृत्ते
तुनशास्त्रंनापिचक्रम: ॥
रतिनाग: । पुं० षोडशबन्धान्तर्गतप
ञ्चदशेबन्धे ॥ तल्लक्षणंयथा ॥ पीड
येदूरुयुग्मेनकामुकंकामिनीयदि ।
रतिनाग: समाख्यात: कामिनी

नांमनोरम : ॥

रतिपति : । पुं० कामदेवे ॥ रते : पति : ॥ देशविशेषस्थस्त्रीणांस्था-नविशेषितस्याविर्भावोयथा । वाचि श्रीमाथुरीणांजनकजनगदस्थायिनी नांकटाक्षे ० दन्तेगौडाङ्गनानां० सुललितजघनेचोत्कलप्रेयसीनाम् । तैलङ्गीनांनितंबे० सजलघनरुचौके रलीकेशपाशे० कार्णाटीनांकटौच-स्फुरतिरतिपतिर्गुर्ज्जरीणांस्तनेषु ॥

रतिपाशक: । पुं० रतिबन्धविशेषे ॥ यथा । पीडयेदूरुयुग्मेनकामुकोयदिसुन्दरीम् । रतिपाशस्तथाख्यात : कामिनीनांसुखावह : ॥

रतिप्रिय : । पुं० कामदेवे ॥ रति : प्रियायस्य । सुरतप्रिये ॥

रतिबन्ध : । पुं० पद्मासनादिषोडशसु ॥ तेयथा । पद्मासनोनागपाशोलतावेष्टोऽर्द्धसम्पुटम् । कुलिशंसुन्दरञ्चैवतथाकेशरएवच ॥ हिल्लोलोनरसिंहोपिविपरीतस्तथापर : । क्षुब्धोवैधेनुकश्चैवमुत्कंठस्तुतत: परम् ॥ सिंहासनोरतिर्नागोविद्याधरस्तुषोडश : ॥

रतिमदा । स्त्री० अप्सरसि । स्वर्वेश्यायाम् ॥

रतिमन्दिरम् । न० योनौ ॥ मैथुनगृहे ॥

रतिमित्र : । पुं० रतिबन्धविशेषे ॥ यथा । पातयेदूरुयुग्मेचकामुकंयदिकामुकी । रतिमित्रस्तथाख्यात: कामिनीनांसुखावह : ॥

रतिरमण : । पुं० कामदेवे ॥

रतिलक्षम् । न० निधुवने ॥

रतिलाभ : । पुं० सुरतसुखप्राप्तौ ॥ यथोक्तंरतिरहस्ये । स्रस्ततावपुषिमीलनंदृशोर्मूर्च्छनाचरतिलाभलक्षणम् । श्लेषयेत्स्वजघनंमुहुर्मुहु: सीत्करोतिगलगद्गदाकुलेति ॥

रतिसत्त्वरा । स्त्री० चिरञ्जीवायाम् । पिडिङ्गशाक० द्रू० गौ० दे० भा० ॥

रतिसुन्दर : । पुं० रतिबन्धविशेषे ॥ यथा । नारीपदद्वयंकामीधारयेद्धृदयेयदि धृतकंठोरमेत्कामीबन्ध: स्याद्रतिसुन्दर : ॥

रतू : । स्त्री० देवनद्याम् सत्यवाचि ॥ ऋदितिसौत्रोधातु : । तत : ऋतेरमञ्चेतिकू : समागमस्य ॥

रतोद्वह : । पुं० कोकिले ॥

रत्यङ्गम् । न० भगे । योनौ ॥ रते : सुरतस्यअङ्गम् ॥

रत्नम् । नं० स्वजातिश्रेष्ठे । जातौजातौयदुत्कृष्टंतद्रत्नमभिधीयते ॥ मणौ ॥ धनार्थिनोजना : सर्वेरमन्तेस्मिन्नतीवयत् । ततोरत्नमितिप्रोक्तंशब्दशास्त्रविशारदै : ॥ तत्तुपाषाणभेदोस्मिन्मुक्तादिचतदुच्यते तानिनवधानिरूपितानियथा । व

अंगारुत्मतं पुष्परागो माणिक्यमेव
च । इन्द्रनीलश्च गोमेदस्तथा वैदूर्य
मित्यपि ॥ मौक्तिकं विद्रुमश्चेति र
त्नान्युक्तानि वै नव । रत्नैरभ्यर्चितानि
सुमणीराणि सराणि च । चतुष्याणि
चशीला निविषघ्नानि धृतानि तु ॥ म
ल्यानि नीचानि ग्रहदोषहराणि च ।
माणिक्यं तरणेः सुजातममलं मु
क्ताफलं शीतगोर्माहेयस्य तु विद्रुमो
निगदितः सौम्यस्य गारुत्मतम् ।
देवेज्यस्य च पुष्परागमसुराचार्यस्य व
ज्रं शनेर्नीलं निर्मलमन्ययोर्निगदि
ते गोमेदवैदूर्यके ॥ रत्नानां शोधन
मारणविधिर्वज्रशोध्या । रमयति
। रम क्रीडायाम् । रमतेऽस्मिन्वा
। रमेस्त्नः । मेट् । माणि
क्ये ॥ वज्रे ॥ सगणे ॥ ६० ॥

रत्नकन्दलः । पुं॰ प्रवाले ॥

रत्नकूटः । पुं॰ पर्वतविशेषे ॥

रत्नगर्भः । पुं॰ समुद्रे ॥ रत्नानि गर्भेऽस्य ॥ कुबेरे ॥

रत्नगर्भा । स्त्री॰ भूमौ ॥ रत्नानि गर्भेऽस्याः ॥ उपचाराद्गुणवत्पुत्रायाम् ॥

रत्नचषकः । पुं॰ न॰ स्फटिकादिमणिपात्रे ॥

रत्नद्वीपः । पुं॰ न॰ रत्नप्रचुरद्वीपविशेषे ॥

रत्नधेनुः । स्त्री॰ महादानविशेषे ॥

रत्ननिधिः । पुं॰ खञ्जनपक्षिणि ॥

रत्नपञ्चकम् । न॰ सुवर्णादिपञ्चसु ॥ यथा । सुवर्णं रजतं मुक्ता लाजावर्तं प्रवालकम् । रत्नपञ्चकमाख्यातं मुनिभिः कर्मवेदिभिः ॥

रत्नपरीक्षा । स्त्री॰ मणिविचारे । तत्र मणीनां तावद्गुणप्रधानार्थमाह । रत्नेन शुभेन शुभं भवति नृपाणामनिष्टमशुभेन । यस्मादतः परीक्ष्यं दैवं रत्नाश्रितं तज्ज्ञैः ॥ द्विपहयवनितादीनां स्वगुणविशेषेण रत्नशब्दोऽस्ति । इहतूपलरत्नानामधिकारो वज्रपूर्वाणाम् ॥ रत्नानामुत्पत्तिप्रदर्शनार्थम् मतभेदमाचार्याणामाह । रत्नानि बलाद्दैत्याद्दधीचितोऽन्ये वदन्ति जातानि । केचिद्भुवः स्वभावाद्वैचित्र्यं प्राहुरुपलानाम् ॥ वज्रेन्द्रनीलमरकतकर्केतनपद्मरागरुधिराख्याः । वैदूर्यपुलकविमलकराजमणिस्फटिकशशिकान्ताः ॥ सौगन्धिकगोमेदकशङ्खमहानीलपुष्परागाख्याः । ब्रह्ममणिज्योतीरससस्यकमुक्ताप्रवालानि ॥ वेणातटे विशुद्धं शिरीषकुसुमोपमञ्च कौशलकम् । सौराष्ट्रकमाताम्रं कृष्णं शूर्पारसम्भूतम् ॥ ईषत्ताम्रं हिमवति मतङ्गजं वल्लपुष्पसङ्काशम् । आपीतं कालिङ्गं श्यावं पौण्ड्रेषु सम्भूतम् ॥ ऐन्द्रं षडश्रियुक्तं याम्यं सर्पास्यरूपमसितञ्च । कदलीकाण्डनिकाशं वैष्णवमिति सर्वसंस्थानम् ॥ वारुणमब-

लागुच्छोपमंभवेत्कर्णिकारपुष्पनि-
भम् । शृङ्गाटकसंस्थानंव्याघ्राक्षि
निभस्वहीतभुजम् ॥ वायव्यस्वयवो
पममशोककुसुमप्रभंसमुद्दिष्टम् ।
स्रोत : खनिप्रकीर्णकमित्याकरस
म्भवस्त्रिविध : ॥ १० ॥ रक्तंपीतञ्च
शुभंराजन्यानांसितंद्विजातीनाम्
। शैरीषंवैश्यानांशूद्राणांशस्त्रतेऽ
सिनिभम् ॥ ११ ॥ वज्रमणेर्मू
ल्यपरिज्ञानार्थमाह । सितसर्ष
पाष्टकंतण्डुलोभवेत् तण्डुलैस्तुविं
शत्या । तुलितस्यद्विलक्षेद्रून्द्वि
द्रूनितेचैतत् ॥ पादत्र्यंशार्द्धोनं
त्रिभागपञ्चांशषोडशांशश्च । भाग
श्चपञ्चविंशतिक : स्यात्साहस्रिक
श्चैव ॥ १३ ॥ शुभवज्रलक्षणान्या
ह । सर्वद्रव्याभेद्यंलघ्वम्भसितरति
रश्मिवत्स्निग्धम् तडिदनलश
क्रचापोपमञ्चवज्रंहितायोक्तम् ॥
अथाशुभलक्षणम् । काकपदमक्षि
काकेशधातुयुक्तानिशार्करंविद्धम् ।
द्विगुणाश्रिदग्धकलुषत्रस्तविशीर्णा
निनशुभानि । यानिचबुद्बुददलि
ताग्रचिपिटवाशीफलप्रदीर्घाणि ।
सर्वेषाञ्चैतेषांमूल्याद्भागोऽष्टमोहा
नि : ॥ १६ ॥ वज्रंनकिञ्चिदपि
धारयितव्यमेकेपुत्रार्थिनीभिरबला
भिरशंतितज्ज्ञा : । शृङ्गाटकत्रि
पुटधान्यकवत्स्थितंयच्छ्रोणीनिभ

ञ्चशुभदंतनयार्थिनीनाम् । स्वज
नविभवजीवितक्षयंजनयतिवज्रम
निष्टलक्षणम् । अशनिभयविषारि
नाशनंशुभमुपभोगकरञ्चभूभृताम्
। इतिशारङ्गधरपद्धति : ॥
रत्नपारायणम् । न० सर्वरत्नस्थाने
॥ यथा । समुद्रोपत्यकाहैमीपर्वता
धित्यकापुरी । रत्नपारायणंनाम्ना
लङ्केतिममैथिली ॥
रत्नप्रभा । स्त्री० जिनानांनरकविशे
षे ॥
रत्नभू : । स्त्री० मणिप्रधानभूमौ ॥
रत्नमुख्यम् । न० हीरके ।
रत्नमुट् । त्रि० मणिचौरे ॥ रत्नं
मुष्णाति । मुषस्तेये । क्विप् ॥
रत्नराट् । पुं० माणिक्ये ॥ रत्न
श्रेष्ठे ॥
रत्नवती । स्त्री० भूमौ ॥ रत्नानि
विद्यन्तेयस्याम् । मतुप् । उगि
त्वात्० ङीप् ।
रत्नवर्षुकम् । न० पुष्पकरथे ॥ त्रि०
रत्नवर्षणशीले ॥
रत्नसानु : । पुं० सुरालये । सुमेरु
पर्वते ॥ रत्नानिसानौशिखरे
ऽस्य ॥
रत्नसू : । स्त्री० भूमौ ॥
रत्नाकर : । पुं० जलनिधौ । रत्ना
नांमाणिक्यमुक्तादीनामाकर : ॥
रत्नाङ्क : । पुं० विष्णुरथे ॥ रत्नचि

ष्टे ॥

रत्नाचलः । पुं० दानार्थमणिमय पर्वते ॥

रत्नाभरणम् । न० मणिमयालङ्करणे । जडाजगहना० इ० भा० ॥ तस्य धारणगुणाः । धन्यं यशस्यमायुष्यं श्रीमद्व्यसनसूदनम् । हर्षणंकाम्यमोजस्यं रत्नाभरणधारणम् ॥

रत्निः । पुं० बद्धमुष्टिकरे ॥ ऋच्छति० पर्यंतेऽनेनवा । ऋगतौ । ऋतन्यञ्जीत्यर्त्तेः क्तनिच् । यण् ॥

रथः । पुं० शताङ्गे । स्यंदने ॥ पादे । चरणे ॥ वेतसे ॥ देहे । शरीरे ॥ रथवहयस्थानीयैरिन्द्रियैराकृष्यमाणत्वाच्छरीरस्य ॥ रम्यतेऽत्र० रमन्तेऽनेनवा । रम० । हनिकुषीतिक्थन् । अनुनासिकलोपः ॥ एकेनसहयोहरि ॥ सगणे० ॥ ऽ० ॥ पौरुषे ॥

रथकड्या । स्त्री० रथवृन्दे ॥ रथानांसमूहः । इनित्रकट्यचश्चेतिकड्यच् ॥

रथकरः । पुं० रथकारे ॥ रथस्यकरः ॥

रथकारः । पुं० तक्षणि । वर्द्धकौ । रथनिर्माणकर्त्तरि । माहिष्यात् करण्यामुत्पन्ने जातिविशेषे । रढ ई० तखाण० इतिभाषाप्रसिद्धे ॥ माहिष्येणकरण्यान्तुरथकारः प्रजायते० इ० याज्ञवल्क्यः ॥ रथं करोति । डुकृञ्० । कर्मण्यण् ॥

रथकुटुंबी । पुं० सारथौ ॥ रथंकुटुम्बयितुंशीलमस्य । कुटुम्बधारणे । सुपीतिणिनिः ॥ यद्वा । रथएवकुटुम्बम् । रथकुटुम्बमस्यास्ति । इनिः ॥

रथगर्भकः । पुं० स्कन्धवाह्ययाने । नररथे । कर्णीरथे । प्रवहणे । डयने ॥

रथगुप्तिः । स्त्री० वरूथे । परप्रहरणाभिघातरक्षार्थंरथस्यसन्नाहवदावरणे ॥ रथस्यगुप्तिरावरणम् ॥

रथगोपनम् । न० रथगुप्तौ ॥

रथचरणः । पुं० कोकपक्षिणि । चक्रवाके ॥ रथचक्रे । पैया० इ०-भाषा ॥

रथद्रुः । पुं० तिनिशवृक्षे ॥ रथस्यद्रुः । तत्रोपयुक्तत्वात् ॥

रथद्वितीया । स्त्री० आषाढशुक्लद्वितीयायाम् ॥ यथा । आषाढस्यसितेपक्षेद्वितीयापुष्यसंयुता । तस्यांरथेसमारोप्यरामंमांभद्रयासह ॥ यात्रोत्सवंप्रवृत्याथप्रीणयेच्चद्विजान्बहून् । ऋक्षाभावेतिथौकार्यासदासाप्रीतयेममेतिस्कन्दपुराणम् । सायाना । मांजगन्नाथम् ॥

रथन्तरम् । न० सामविशेषे ॥ रथेनतरति । तृन्नवनसन्तरणयोः ।

संज्ञायांभृतृवृजीतिखच् । व्युत्पत्ति मात्रंनत्ववयवार्थानुगमः ॥
रथपर्य्यायः । पुं० वेतसवृक्षे ॥ रथः पर्य्यायोऽस्य ॥
रथपादः । पुं० चक्रे ॥
रथव्रजः । पुं० रथकक्ष्यायाम् ॥ रथानांव्रजः ॥
रथपुष्पा । स्त्री० नदीविशेषे ॥ रथंपिबति । पा० । कः । पारस्करादित्वात्सुट्षत्वंनिपातसिद्धं ॥
रथसाधकः । पुं० तिनिशे ॥ रथस्य साधकः ॥
रथाङ्गः । पुं० कोकपक्षिणि ॥ अपस्करे । चक्रभिन्नरथारम्भके ॥ न०- चक्रे ॥ रथस्यअङ्गम् ॥
रथाङ्गपाणिः । पुं० विष्णौ ॥ रथाङ्गं पाणौयस्य । प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौभवतः ॥
रथाङ्गाह्वयः । पुं० चक्रवाके ॥ रथाङ्गस्याह्वयोनामयस्य ॥
रथाङ्गी । पुं० श्रीहरौ ॥ रथाङ्गंचक्रमस्यास्ति । इनिः ॥
रथाङ्गी । स्त्री० ऋद्धिनामौषधौ ॥
रथान्तरः । पुं० कल्पभेदे ॥
रथाभ्रः । पुं० वेतसवृक्षे ॥
रथारोही । पुं० रथस्थयुद्धकर्त्तरि । रथिनि ॥
रथावर्त्तः । पुं० धूमावतीदक्षिणार्द्धे तीर्थविशेषे ॥

रथिकः । त्रि० रथिनि । रथस्वामिनि । रथोऽस्यास्ति । अतइनिठनौ इतिठन् ॥ रथंचरतिवा पर्पादिभ्यष्ठन् ॥ षिद्गौरादिभ्यश्चेतिङीषि० रथिकी ॥
रथिका । स्त्री० क्षुद्ररथे । त्वाष्ट्राम् ॥
रथी । पुं० स्यन्दनारोहे । रथारोहिणि । रथस्वामिनि । रथिके ॥ रथोऽस्यास्ति । इनिः ॥
रथिनः । पुं० रथिनि । रथस्य इनः । शकन्ध्वादिः ॥
रथिनी । स्त्री० रथकक्ष्यायाम् ॥ रथानांसमूहः । खलादिभ्यइनिर्वक्तव्यः ॥
रथिरः । पुं० रथिके रथोऽस्यास्ति । मेधारथाभ्यामिरन्निरचौवक्तव्याविति रच् ॥
रथी । स्त्री० शकट्याम् । मजभूतोली इ० भा० । वह्वादिभ्यश्चेतिङीष् ।
रथोद्धता । स्त्री० त्रिष्टुप् ११ प्रभेदे ॥ रात्परैर्नरलगै रथोद्धता । यथा । राधिकादधिविलोडनस्थिताकृष्णवेणुनिनदैरथोद्धता । यामुनंतटनिकुञ्जमञ्जसा सा जगाम सलिलाहृतिच्छलात् ॥ रथउद्धता ॥
रथ्यः । पुं० रथवाहकाश्वे । रथवोढरि ॥ रथंवहति । तद्वहतिरथयुगप्रासङ्गमितियत् ॥ रथांसे । चक्रे

॥ रथस्याङ्गम् । रथाद्यत् ॥

रथ्या । स्त्री० रथौघे । रथानांसमूह : । खलगोरथादितियत् ॥ प्रतोल्याम् । विशिखायाम् । राजमार्गेतरमार्गे । जनसञ्चारिणिमार्गे । वर्त्तन्याम् । पथि ॥ चत्वरे ॥ रथाय हिता । यत्प्रकरणे : रथाच्चेति यत् ॥ रथंवहतिरा । तद्वहतीति यत् ॥

रद : । पुं० विलेखने ॥ दंते ॥ पुरुषदन्तलक्षणंयथा । विवर्णैर्धनहीना स्युर्दन्ता : स्निग्धघना : शुभा : । तीक्ष्णादंष्ट्रा : समा : श्रेष्ठा । जिह्वारक्तासमाशुभा ॥ अपिच । कुन्दकुड्मलसङ्काशै : सूक्ष्मैर्दशनैर्नृप : । भक्षवान्नरदन्ता स्निग्धाच्चुपरिपीडिता : । हरिदन्ता : खरदा : स्निग्धदन्तागुणान्विता : । करालैर्विषमैर्दीर्घैर्दशनैर्दु : खजीविन : ॥ द्वात्रिंशद्दंताराजानएकोनोत्त्वभोगवान् । त्रिंशद्दंतानरायेहि सुखदु : खस्यभागिन : ॥ एकोनत्रिंशद्दशना : पुरुषादु : खजीविन : । अष्टाविंशद्दशायेषांतेतुदु : खभाजना : ॥ स्त्रीदन्तलक्षणंयथा । कुन्दपुष्पसमादन्ताभाषितंकोकिलासमम् । दाक्षिण्ययुक्तमशठंहंसशब्दसुखावहम् ॥ नासासमासमपुटास्त्रीणान्तुरुचिराशुभा । करालविषमादन्ता : क्लेशायचभयायच ॥ चौर्यापकृष्टमांसाश्चदीर्घाभर्तुश्चमृत्यवे । इति ॥ दन्तस्थलग्नशुचित्वंयथा । दन्तवद्दन्तलग्नेषुजिह्वास्पर्शेशुचिर्भवेत् ॥ अपिच । दन्तलग्नसमंहार्यंलेपंमन्येतदन्तवत् । नतत्रबहुश : कुर्याद्यत्नमुद्धरणेपुन : ॥ भवेदशौचमत्यर्थंतृणवेधाद्व्रणेकृते ॥ रदति । रदविलेखने । पचाद्यच् ॥

रदच्छद : । पुं० ओष्ठे ॥

रदन : । पुं० रदे । दन्ते ॥ रद्यतेनेन । रद० । करणेतिल्युट् ॥ न० उत्खनने ॥

रदनच्छद : । पुं० ओष्ठे ॥ अधरे ॥ रदनाश्छाद्यन्तेऽनेन । छदसंवरणे० चुरादि : । पुंसीतिघ : । छादेर्घेद्व्युपसर्गस्य : ॥ अस्यशुभाशुभलक्षणंयथा । मांसलैश्चघनोपेताश्चवक्रैरधरैर्नृपा : । विम्बोपमैश्चस्फुटितैरोष्ठैरूक्षैश्चखण्डितै : । विवर्णैर्धनहीना श्चदन्ता : स्निग्धाघना : शुभा : ॥

रदनी ।) पुं० हस्तिनि ॥

रदी ।)

रन्तव्य : । त्रि० रन्तुंयोग्ये ॥ रम० । तव्य : ॥

रन्तिदेव : । पुं० साङ्कृतिपुत्रेभरतान्वयोत्पन्ने० चन्द्रवंशीयनृपतिश्रेष्ठे ॥ यस्ययश : पुराणेप्रसिद्धम् । यस्यकरुणावतोयंश्लोक : । नकामयेहंग

तिमीश्वरात्परामष्टश्रियुक्तामपुनर्भवस्य । प्राप्तिं प्रपद्ये खिलदेहभाजामन्तःस्थितो येन भवन्त्यदुःखाः ॥ गरुडध्वजे । विष्णौ ॥ कुक्कुरे ॥

रन्तुः । पुं० वर्त्मनि ॥ स्त्री० नद्याम् ॥

रंधनम् । न० पाके । छदने ॥

रन्ध्रम् । न० दूषणे ॥ छिद्रे ॥ रमणम् । सम्पदादित्वात्क्विप् । संज्ञापूर्वकत्वान्नदीर्घः । रमं क्रीडां धरति । मूलविभुजादित्वात्कः ॥ यद्वा । रंधयति । रधिर्हिंसासंराध्योः । बाहुलकाद्रक् ॥ अष्टमभवने ॥ अश्वस्य कुक्षिनाभिमध्यभागे ॥ यथोक्तम् । कुक्षिनाभ्यन्तरे रन्ध्रमुपरन्ध्रं तथोपरीति ॥

रन्ध्रकपाट : । पुं० जालवर्वुरके ॥

रन्ध्रकर : त्रि० छिद्रस्य कारके । रन्ध्रहितौ विघेरा० इ० भाषा० प्र० ॥ रन्ध्रं करोति । कृञो हेतुताच्छील्यानुलोम्येष्विति कृञः टः प्रत्ययः ॥

रन्ध्रवभ्रुः । पुं० उंदुरौ ॥

रन्ध्रवंश : । पुं० सच्छिद्रवंशे । कीचकाह्वये । मस्करे । सुषिरासे ॥ अस्य गुणा यथा । वंशौ त्वम्लौ कषायौ च किञ्चित्तिक्तौ च शीतलौ । मूत्रकृच्छ्रप्रमेहार्शः पित्तदाहास्रनाशनौ ॥ विशेषो रन्ध्रवंशस्तु दीपनो जीर्णनाशकः । रुचिकृत्पाचनो हृद्यः शूलशोगुल्मनाशनः ॥

रन्ध्र : । न० पापे ॥

रभस : । पुं० हर्षे ॥ यथा । शुचापाचंधाञ्चीपरिणतिरमेध्यप्रभवभूरयंभूतावासो विमृशकिं यतीयानिनदृशाम् । तदस्मिन्धीराणां स्वमपि किमास्थातुमुचितं फलीकारः कोयं यदहमहमेवेति रभसः इति शिल्हणमिश्राः ॥ पुं० अभिधानविशेषे ॥ पौर्वापर्यविचारे ॥ त्रि० तद्वति ॥ रभते । रभ राभस्ये । अत्यविचमीत्यादिनाऽसच् ॥ तद्वत्यर्श आद्यच् ॥

रम : । पुं० कान्ते ॥ रक्ताशोकद्रुमे ॥ स्मरे ॥ रमते । रम० । पचाद्यच् ॥ रमणे ॥

रमक : । पुं० विलासिनि । कान्ते ॥ रमते । रम० । रमेरस्थलोपे इति क्वुन् ॥ केनापि कर्मणापररञ्जके ॥ रमयति । क्वुन् ॥

रमठम् । न०) हिङ्गुनि ॥
रमठध्वनिः । पुं०)

रमण : । पुं० धवे । प्रिये । पत्यौ ॥ स्मरे । कामदेवे ॥ रमयति । रम० । नन्द्यादित्वाल्ल्युः ॥ वर्णवृत्तान्तरे ॥ सगणो रमणः । कविना कथितः ॥ यथा । धनदो धनदः । भवतां भवतात् ॥ रासभे ॥ वृषणे ॥ महारिष्टे ॥ न० पटोलमूले ॥ जघने ॥ जम्भने । ग्राम्यधर्मे । सुरते । मैथुने । क्रीडारत्ने ॥ मत्ता

सुखे ॥ क्रीडने ॥

रमणकम् । न० जम्बुद्वीपस्योपद्वीपविशेषे । रम्यकवर्षे ॥ यथा । एवमेवोत्तरेऽपीणि वर्षाणि च तपोधन । कुरुवर्षं सिन्धुकूलाच्च शृङ्गवानवधिः स्मृतः ॥ हिरण्मयं ततो वर्षं श्वेतावधि निगद्यते । रम्यकस्तु ततो वर्षं नीलस्तस्यावधिः स्मृतः ॥ अपिच । दक्षिणेन तु श्वेतस्य निषधस्योत्तरेण तु । वर्षं रमणकं नाम जायन्ते तत्र मानवाः ॥ शुक्लाभिजनसम्पन्नाः सर्वे सुप्रियदर्शनाः । दशवर्षसहस्राणि गतानि दशपञ्च च ॥ जीवन्ति ते महाभागनित्यं मुदितमानसाः ॥ इति पाद्मे भूखण्डः ॥

रमणा । स्त्री० रमण्याम् ॥

रमणी । स्त्री० विशेषाङ्गनायाम् । नार्याम् ॥ रमयति० रम्यते वास्याम् । रम० । ल्युट् ॥ बालाख्यवृक्षे ॥ वेदिकायाम् ॥ ० (*) ०

रमणीय : । त्रि० सुन्दरे । शोभने ॥ रम० । अनीयर् ॥

रमणीयकम् । न० छन्दोविशेषे । राज्ञभहितयरैरुदितं रमणीयकम् । इति लक्षिते ॥

रमणीयचरण : । त्रि० सुकृतिनि । पुण्यकर्मणि ॥ रमणीयं शोभनं चरणं शीलं यस्य ॥

रमण्य : । त्रि० रमणीये ॥ रमतेऽस्मिन् । रम० । शृरम्योर्श्च्यन्य : ॥

रमति : । पुं० नायके ॥ नाके ॥ कामदेवे ॥ काले ॥ रमतेऽस्मिन् । रम० । रमेर्निंदिश्यति : ॥

रमा । स्त्री० लक्ष्म्याम् । पद्मालयायाम् । सर्वं च रमसे यस्माद्रमा तस्माद्भविष्यसीति विष्णुशापोक्त हेतुरुक्त : श्रीदेवीभागवते ॥ हालाहलेनैव विषं विषं रमापरं जनाव्ययमेवमन्वते । योगेन जागर्त्ति निपीय तं शिव : स्मरन्रमां मुह्यति निद्रया हरि : ॥ रमयति । रमक्रीडायाम् । पचाद्यच् ० टाप् ॥ शशिधृजराजकन्यायाम् । कल्किदेवपत्न्याम् ॥ शोभायाम् ॥ ०

रमाधव : । पुं०)

रमानाथ : । पुं०)

रमापति : । पुं०) विष्णौ ॥ रमाया धव : ॥ नाथ : पतिर्वा ॥ *

रमाप्रियम् । न० पद्मे ॥

रमावेष्ट : । पुं० श्रीवासे ॥

रमित : । त्रि० रतिप्रापिते ॥

रमेश्वर : । पुं० विष्णौ ॥

रम्भ : । पुं० वेणौ ॥ वैणवदण्डे ॥ वानरविशेषे ॥ महिषासुरस्य पितरि रभते । रभराभस्ये । पचाद्यच् । रभेरशबलिटोरिति नुम् ॥

रम्भा । स्त्री० कदल्याम् ॥ अपसरोभेदे ॥ दुर्गायाम् ॥ गोध्वनौ ॥ वे

म्भायाम् ॥ रभते । रभ० अच् । टाप् ॥ रभ्यतेवा । घञ् ॥

रम्भातृतीया । स्त्री० व्रतविशेषकाले ॥

रम्भोरू : । स्त्री० स्त्रीविशेषे ॥ रम्भ० कदलीस्तम्भाविवऊरूयस्या : सा । ऊरूत्तरपदादौपम्यइत्यूङ् ॥

रम्य : । पुं० चम्पके ॥ बम्पकवृक्षे ॥ न० पटोलमूले ॥ प्रधानधातौ ॥ त्रि० मनोज्ञे । हृद्ये । स्वभाव सुन्दरे ॥ रम्याणांविकृतिरपिश्रियं तनोति ॥ रम्यतेक्रीडार्तेयच । रम० । पोरदुपधादितियत् ॥ बलकरे ॥

रम्यकम् । न० पटोलमूले । नीलगिरेरुदग्दशिवर्त्तमाने० वर्षविशेषे ॥ नीलनीरजरम्यस्यरम्यकेहा दशस्थिति : । जनस्याब्दसहस्राणि न्यग्रोधफलमश्नत : ॥

रम्यपदपाठ : पुं० देवतापदस्तोभै : कालेपूरणे ॥

रम्यपुष्प : । पुं० शाल्मलिपादपे ॥

रम्यफल : । पुं० कारस्करवृक्षे ॥

रम्या । स्त्री० रात्रौ ॥ स्थलपद्मिन्याम् ॥

रम्र : । पुं० अरुणवर्णे ॥ शोभायाम् ॥

रय : । पुं० वेगे । वेगाख्यगुणे ॥ स वेगगतिवचनस्यप्रयोग : ॥ प्रवाहे ॥ रयत्यनेन । रयणंवा । रयगतौ । पुंसीतिघ : । रीणात्यनेनवा । रीगतिरेषणयो : । पुंसीतिघ : ॥ हलश्चेतिघञितु० संज्ञापूर्वकत्वा

. द्वृद्ध्यभाव : ।

रयि : । पुं० अन्ने । जले ॥

रराटी । स्त्री० ललाटे ॥

रल्लक : । पुं० कम्बले ॥ कम्बलमृगे ॥ पक्ष्मणि ॥ रमते । रम० । क्विप् । गमादीनांक्वावितिमलोप : । तुक् । लाति । ला० । क्विप् । रत्वासौलाश्च । स्वार्थेकन् । केऽण इतिह्रस्व : ॥ यद्वा । रमणम् । रमे : सम्पदादिक्विप् । रत्क्रीडा लक्ष्यतेऽनेन । लक आस्वादने । घ : ॥ रतंलातिवाक्वुन् ॥ स्त्रीणां सिंदूरमरण्याम् ॥

रल्लकभल्लकम् । न० सिन्दूरमरणे । मांगद० भा० ॥ शिर : सिन्दूरमरणि : स्त्रीणांरल्लकभल्लकमित्युक्ता : ॥ सीतारल्लकभल्लभग्नहृदय : स्वस्थानलङ्कश्वरइतिलच्यम् ॥ रल्लकोभल्लकमिव ॥

रव : । पुं० ध्वानि । स्वने । शब्दे ॥ रवणम् । रुशब्दे । ऋदोरप् ॥ लघुवर्णे० ॥

रवण : । पुं० उष्ट्रे ॥ कोकिले ॥ खरे ॥ न० कांस्ये ॥ रवे । त्रि० शब्दने ॥ तीक्ष्णे ॥ भण्डके ॥ चञ्चले ॥ रौति० तच्छील : । रु० । चलनशब्दार्थादकर्मकाद्युच् । युवोरनाका युजितियुज्वा ॥

रवथ : । पुं० कोकिले ॥ रौति ।

रु॰ शीङ्शपिरुगमीत्यादिना ऽथप्रत्यय : ॥

रवि : । पुं॰ सूर्ये । आदित्ये । दिवाकरे ॥ रसान् आदत्ते॰ इतिरवि : । अत्ररसशब्दस्यलोप: वीत्यस्यादानमर्थ : । वीगत्यादावितिधातोरर्थानुरूपम्॰ पृषोदरादित्वात्साधुत्वम् । पृषोदरादित्वकल्पनामूलन्तु विष्णुधर्मोत्तरवचनम् । तद्यथा । रसानाञ्चतथादानाद्रविरित्यभिधीयतेइति ॥ प्रकाशानांमध्येरविर्विष्णोर्विभूति: ॥ रूयते॰ स्तूयते । रुशब्दे । अचइ: ॥

रविकान्त : । पुं॰ सूर्यकान्तमणौ ॥

रविचक्रम् । न॰ नराकारसूर्यचक्रविशेषे ॥

रविज : । पुं॰ शनैश्चरे ।

रवितनय : । पुं॰ सावर्णिकेमनौ ॥ शनौ ॥ यमे ॥

रविनन्दन : । पुं॰ सुग्रीवाख्यवानरे ॥ वैवस्वतमनौ ॥ सावर्णिमनौ ॥ शनौ ॥ यमे ॥

रविनाथम् । न॰ बन्धुजीवके ॥ पद्मे ॥

रविपत्र : । पुं॰ आदित्यपत्रक्षुपे ॥

रविपार्श्वग : । पुं॰ चण्डांशो : पार्श्वकेषु ॥ तेयथा । माठर : पिङ्गलोदण्डश्चण्डांशो : पारिपार्श्विका: ॥ अपिच । वाहु : शोष : खर: पश्चाद्द्वारकोऽजानुकारक : । पिंगी यक्षस्थपुरुष : प्राग्ययातप्रतापकौ ॥ आश्विनेयौतथादण्डीकुल्माष: पार्श्वगारवे : ॥

रविप्रिय : । पुं॰ आदित्यपत्रे ॥ रक्तकरवीरे ॥ लकुचे ॥ न॰ ताम्रे ॥ रक्तकमले ।

रविप्रीता । स्त्री॰ सुवर्चलायाम् ॥

रविरत्नकम् । न॰ माणिक्ये ॥

रविलोचन : । पुं॰ विष्णौ ॥ रविर्लोचनमस्यविराडात्मनइतिरविलोचन : ॥

रविलोहम् । न॰ ताम्रे ॥

रविसंज्ञकम् । न॰ ताम्रे ॥

रविसुत : । पुं॰ सुग्रीवे ॥

रविसूनु : । पुं॰ शनौ ।

रवीन्दम् । न॰ पद्मे ।

रवीषु : । पुं॰ कामे ॥

रशना । स्त्री॰ काञ्च्याम् । कटिभूषणे ॥ अश्नुते । अशूङ्व्याप्तौसङ्घातेच । अशेर्नित् ॥ अशेरशचेति युच्॰ धातोरशादेश : । यद्वा । रशति । रशशब्देसौत्र: । बहुलमन्यत्रापीतियुच् ॥ जिह्वायाम् ।

रश्मि : । पुं । दीधितौ ॥ पक्ष्मणि । नेत्रपत्रे ॥ अश्वरज्जौ । प्रग्रहे । रथादियुक्ताश्वादीनांसंयमनरज्जौ । अश्नुतेऽनेनवा । अशू॰ । अश्नोते रशचेतिमि : ॥ सूर्यस्यरश्मिना

जलादानादानेयथा । तेजोभिः सर्वलोकेभ्य आदत्ते रश्मिभिर्जलम् । समुद्राद्वायुसंयोगाद्वहन्त्यापो गभस्तयः ॥ ततस्तु पयसां काले परिवर्त्तन् दिवाकरः । नियच्छत्यपो मेघेभ्यः शुक्लाः शुक्लैस्तु रश्मिभिरिति ॥ अजयादवः । तासां शतानि चत्वारि रश्मीनां वृष्टिसर्ज्जने । शतत्रयं हिमोत्सर्गे तावद्गर्भस्य सर्जने ॥ आनन्दाश्च हिमेध्याश्च नूतनाः पूतनाइति । चतुःशतं वृष्टिवाहास्ताः सर्वाश्चामृतास्त्रय इति ॥

रश्मिपतिः । पुं॰ आदित्यपर्य्याये ॥

रसः । पुं॰ गन्धरसे ॥ जले ॥ विषे ॥ वीर्य्ये ॥ द्रवे ॥ रोगे ॥ स्वादे ॥ रसनायाह्यगुणे ॥ सचकालस्वभावभूमिवियदनिलानलसंसर्गेणपरिणामान्तरंगतः षड्विधोभवति । तत्र पृथिव्यम्बुगुणबाहुल्यान्मधुरः १ । तोयाग्निगुणबाहुल्यादम्लः २ । पृथिव्यग्निगुणबाहुल्याल्लवणः ३ । वाय्वग्निगुणबाहुल्यात्कटुकः ४ । वाय्वाकाशगुणबाहुल्यात्तिक्तः ५ । पृथिव्यनिलगुणबाहुल्यात्कषायः ६ । आपोरसानामाधारकारणम् ॰ अतआप्योनाम । अपांपृथिव्यामनुप्रवेशात्पृथिव्यप्याधारकारणमेव । तेनजलक्षितीअपितदाधारतयारसानामभिव्यक्तौकारणं । अभिव्यक्तेश्चमधुरादिरूपमन्तरेणासत्त्वात् ॰ मधुरादिविशेषेपिजलक्षितीकारणं । अग्न्यादयस्तुत्रयोमीरसतयामधुरादिविशेषप्राधान्येननिमित्तकारणम् । तद्व्यतिरेकेणाम्लादिरसाभावात् । रसाभिव्यक्तेश्च ॰ अग्न्यादिभूतत्रयसन्निधानंविनानुपलब्धेरभिव्यक्तावपि ॰ अग्न्यादीनांकारणत्वम् । अत्राहमाधवाचार्य्यः । कफवातौवातकफौवातः पित्तञ्चवृद्धिशमौ । त्रिभिराद्यैस्त्रिभिरन्त्यैस्त्रिभिराद्यपरैस्तदन्यैश्च १ ॥ अन्त्याद्यावाद्यमाद्यान्त्यावन्त्यं कोपशमं मलम् । मध्यमध्यतरौमध्यं प्रयोगान्नयतस्त्रिकौ ॥ २ ॥ आद्यमध्यं नयन्त्यन्त्यं मधुराद्याः शमेतरौ । आद्यं मध्यान्त्यमाद्यश्चमध्यमान्तिममन्तिमम् ॥ ३ ॥ आद्यं मध्यश्चमध्यान्त्यमाद्यमध्यान्तिमं क्रमात् । आद्यैर्दोषं रसाः प्रायः प्रयोगपरिशीलिता इति ॥ ४ ॥ मधुराम्ललवणकटुतिक्तकषायाः षड्रसाः, तत्रत्रिभिराद्यैर्मधुराम्ललवणैः कफवातौ यथाक्रमम् वृद्धिशमौ वातः । यातइत्यर्थः । कफवृद्धिं यातिवातःशमंयातीत्यर्थः । वातइतिवागतिगन्धनयोरित्यस्यधातोरूपम् । वातइतिसर्वत्रसम्बध्यते । अन्त्यैस्त्रिभिः कटुतिक्तकषायैः वातकफौवृद्धिशमौ

वातः वातौ हन्ति वातिकफः शमं
यातीत्यर्थः॥ आद्यपरैस्तदन्यैरेवं पि
त्तं हन्ति वातिपर्थवशाद्वचनविपरि
णामः। आद्यो मधुरः तस्मात्परैरम्ल
लवणकटुकैस्त्रिभिः पित्तं हन्ति याति त
दन्यैस्तेभ्योऽन्यैर्मधुरतिक्तकषायैः शमं
याति। केचित्तु तदन्यैरित्येवमपठित्वा
सपन्त्यैरेवेति विग्रहं कृत्वा समधुरः प
न्त्यौ तिक्तकषायौ तैर्मधुरतिक्तकषा
यैरिति व्याख्यानयन्ति॥ पिण्डार्थस्तु
कफवातौ वातकफौ त्रिभिरा
स्त्रिभिरन्त्यैश्च यथासङ्ख्यं [illegible]शमौ
वातः। पित्तश्च त्रि[illegible]स्तद
न्यैर्वृद्धिशमौ यातीत्यर्थः॥ १
अन्त्येति। अन्त्यस्त्रिकः कटुतिक्त
कषायाख्यः। त्रयाणां सङ्घः त्रि
कः। आद्यस्त्रिको मधुराम्ललवणा
ख्यः, एतौ द्वौ त्रिकौ आद्यं मरुतं
वातं कोपशमौ नयतः। मध्यमध्येत
रौ त्रिकौ मध्यश्च मध्यौ च विद्यन्ते यस्मि
न्नसौ मध्यः इतरश्च तौ त्रिकौ मधु
राम्ललवणाः आद्यत्रिकः तत्र म
ध्योऽम्लः प्रथमातिरिक्तकारणाऽभा
वात् स्वाद्वम्ललवणकटुतिक्तकषाये
षु षट्सु मध्यौ लवणकटू स मध्यस्त्रि
कः इतरोऽस्मादन्यो मधुरतिक्तक
षायाख्यः एतौ मध्यं वातपित्तक
फेषु पित्ताख्यं क्रमेण कोपशमौ नयतः
। अन्त्यं कफमाद्यान्त्यौ आद्यस्त्रिको

मधुराम्ललवणाख्यः। अन्त्यस्त्रि
कः कटुतिक्तकषायाख्यः क्रमे-
ण कोपशमौ नयतः॥ २॥ (+)
मधुराद्याः षड्रसाः प्रयोगेण भ-
क्षणादिना परिशीलिता अभ्यस्ताः
क्रमेण आद्यमध्यमन्त्यमित्यादीन् प्रा
येण बाहुल्येन शमेतरौ शमं प्रशममि
तरं कोपं ते नयन्ति प्रापयन्ति। तत्र
मधुरः आद्यमध्यम् आद्यश्च मध्यश्चेति
द्वन्द्वैक्यम्। आद्यं वायुम् मध्यं-
पित्तं शमं नयति। अन्ते भवमन्त्यं
कफं कोपं नयति॥ अम्लः आद्यं
वायुं शमं नयति मध्यान्त्यम् पित्तक-
फौ कोपं नयति॥ लवणः आद्यं
वायुं शमं नयति मध्यमान्तिमं पित्तं
कफौ कोपं नयति॥ कटुरन्तिमं कफं
शमं नयति आद्यं मध्यञ्च वातपित्तौ
कोपं नयति। तिक्तः मध्यान्त्यं-
पित्तकफौ शमं नयति आद्यं वायुं को
पं नयति॥ कषायः मध्यान्तिमं-
पित्तकफौ शमं नयति आद्यं वायुं को
पं नयति प्रायइति व्यभिचारात्।
यथा मधुरशीतापि जीवन्ती कफं शम
यति। मधुरो रसो वायुं कोपयति।
एवं कटुकोऽपि रसो नो वायुं शमं नय-
ति। एवमम्लादिष्वपि क्वचिद्व्यभि
चारः॥ ३॥ ४॥ तदुक्तं चरके।
रसनार्थो रसस्तस्य द्रव्यमापः क्षिति
स्तथा; निर्वृत्तौ च विशेषे च प्रत्ययाः

स्वादयस्तथ: ॥ एतेचरसा: परस्य रसंयोगात्सप्तपञ्चाशच्छतमितिचक्रपाणिदत्त: ॥ अपिच । स्वादम्ललवणास्तिक्त: कटुकश्चकषायक: । अमीतुषड्रसा: ख्याता: निर्बलोपर: पर: ॥ न्यायमतेतु । रसस्तुरसनाग्राह्योमधुरादिरनेकधा । सहकारीरसज्ञायानित्यत्वादिचपूर्ववत् ॥ सहकारीति॰रासनज्ञानेरसकारणमित्यर्थ: । पूर्ववदिति । जलपरमाणोरसोनित्य: अन्य: सर्वोपिरसोऽनित्यइत्यर्थ: ॥ शृङ्गारादौ ॥ तद्यथा । शृङ्गारहास्यकरुणारौद्रवीरभयानका: । वीभत्साद्भुतसंज्ञौचेत्यष्टौनाट्ये रसा: स्मृता: ॥ चशब्दात्॰शान्तोपिनवम: रि तोवात्सल्यं दशम: स्मृत: । अष्टाविदप्रसिद्धत्वादित्यस्यान्यत्रविस्तर: ॥ देहस्थधातुप्रभेदे । रसिकायाम् । स्वेदमातरि । चर्मसारे । रक्तसारे ॥ भुक्तस्यपक्वस्यसारभूतोयोद्रव: सरस: सोपिपच्यते । इतिभिषण: ॥ अस्यस्वरूपमाहु: । यथा । सम्यक्पक्वस्यभुक्तस्यसारोनिगदितोरस: । सतुद्रव: सित: शीत: स्वादु: स्निग्धश्चलोभवेत् ॥ तस्य स्थानमाह । सर्वदेहचरस्यापिरसस्यहृदयंस्थलम् । समानमरुतापूर्वंयदयंहृदयेधृत: ॥ तस्यकर्माण्याह । व्यानस्थधमनीर्गत्वाधातून् सर्वानयंरस: । पुष्णातितदनुस्वीयैर्व्याप्नोतिचतनुंगुणै: ॥ गुणै: शीतस्निग्धपोषकत्वै: ॥ मन्दवह्निविदग्धस्तुकटुर्वाम्लोभवेद्रस: । सकुर्याद्बहुलान्रोगान्विषकृत्यंकरोत्यपि ॥ पारदे ॥ रसायनार्थिभिर्लोकै: पारदोरस्यतेयत: । ततो रसइतिप्रोक्त: सचधातुरपिस्मृत: ॥ रागे ॥ तृष्णायाम् ॥ क्षुद्रमुखरागे ॥ सविकल्पकानन्दे । रसयति॰आस्वाद्यते । रसआस्वादने । चुरादिरदन्त: । एरच् ॥ रस्यते॰ आस्वाद्यतेऽनेनवा । कर्मणिघञ् । अल्लोपस्यस्थानिवत्वान्नवृद्धि: ॥ अपांसारोरसइत्यन्यत्र ॥ षष्ठाङ्के ॥ लघ्वादित्रिकले ॰ । ऽ ॥ मात्रामाने । न॰ बोले ॥

रसक: । पुं॰ पिष्कार्थमांसे ॥ न॰ खर्परीतुत्थे ॥ येगुणास्तुत्थकेप्रोक्तास्तेगुणारसकेस्मृता: ॥

रसकर्पूर: । पुं॰ न॰ कर्पूररसे । रसकपूर इतिख्याते ॥

रसकेशरम् । न॰ कर्पूरे । सिताभ्रे ॥

रसगन्ध: । पुं॰ गन्धरसे । बोले ॥ गन्धवान् रसोऽस्य । राजदन्तादि: ॥

रसगन्धक: । पुं॰ गन्धरसे । बोले

॥ स्वार्थे कङ्कतिक : ॥ गन्धके ॥

रसगर्भम् । न० रसाञ्जने ॥ रसोग र्भोऽस्य ॥ हिङ्गुले ॥

रसघ्न : । पुं० टङ्कणे ॥

रसजम् । न० रक्ते ॥ रसाञ्जने ॥ मद्यकीटे ॥ गुडे ॥

रसज्ञ : । त्रि० रसिके ॥ रसं जानाति । ज्ञा० । आतोनुपेतिक : ॥

रसज्ञा । स्त्री० जिह्वायाम् ॥ टाप् ॥

रसज्ञेष्ट : । पुं० मधुररसे ॥ रसज्ञानामिष्ट : ॥

रसज्येष्ठ : । पुं० मधुररसे ॥ शृङ्गाररसे ॥

रसत् । त्रि० गर्जति ॥ रसति । रसशब्दे । लट : शतृ ॥

रसतेज : । न० रक्ते ॥

रसशब्द : । पुं० सशब्दमेघे ॥

रसदालिका । स्त्री० पुंड्रकेक्षौ ॥

रसद्रावी । पुं० मधुरजम्बीरे ॥

रसधातु : । पुं० पारदे ॥

रसधेनु : । स्त्री० दानार्थेक्षुरसनिर्मितधेनौ ॥

रसनम् । न० स्वदने । स्वादे ॥ ध्वनौ ॥ रसग्रहणलिङ्गेन्द्रिये । जिह्वायाम् ॥

रसना । स्त्री० रास्नायाम् ॥ काञ्च्याम् ॥ रज्जौ ॥ गन्धालिकायाम् ॥ जिह्वायाम् ॥ अस्या : शुभाशुभलक्षणं यथा । कृष्णाजिह्वाभवेद्य स्यसमलाग्रदिवाभवेत् । नघापवान् भवेन्मर्त्यः उष्णांस्थूलांयथाभवेत् ॥ श्वेतजिह्वानरा : ज्ञेया : शौचाचारविवर्ज्जिता : । पद्मपत्रसमाजिह्वासूक्ष्मादीर्घासुशोभना ॥ नस्थूलानातिविस्तीर्णायेषांतेमनुजाधिपा : । निम्नदीर्घाचक्रस्वाचरक्ताग्रारसनायदि ॥ सर्वविद्याप्रवक्तासौभवेन्नास्त्यत्रसंशय : ॥ रसयति । रसआस्वादने । नन्द्यादित्वाल्ल्यु : ॥ रसयन्त्यनया । ण्यासश्रन्थेतियुच्वा ॥ रसति । रसशब्दे । बहुलमन्यत्रापीतिवायुच् ॥

रसनाथ : । पुं० पारदे ॥

रसनायक : । पुं० शिवे ॥

रसनालिट् । पुं० कुक्कुरे ॥

रसनेत्रिका । स्त्री० मन : शिलायाम् ॥

रसपाकज : । पुं० गुडे ॥

रसफल : । पुं० नारिकेलवृक्षे ॥

रसभवम् । न० रक्ते ॥

रसमर्द्दनम् । न० पारदचूर्णीकरणे ॥

रसमान : । त्रि० कूजनशीले ॥ रसते : परस्मैपदित्वात् । ताच्छील्यवयोवचनशक्तिषुचानश् प्रत्यये । नशानच् ॥

रसमारणम् । न० पारदस्यमारणे ॥

रसमूर्च्छनम् । न० पारदस्यमूर्छाकरणे ॥

रसराजः। पुं॰ पारदे ॥ रसाञ्जने ॥

रसवान्। त्रि॰ सरसे ॥

रसवती। स्त्री॰ पाकस्थाने। महानसे ॥ रसाः सन्त्यस्याम्। रसादिभ्यश्चेतिमतुप्। उगितश्चेतिङीप् ॥

रसशेष्ठः। पुं॰ पारदे ॥

रसविक्रयी। त्रि॰ इक्ष्वादिरसविक्रेतरि ॥

रसवित्। त्रि॰ रसज्ञे ॥

रसशेषः। पुं॰ अपक्वरसे ॥ भुक्तस्यपक्वस्यसारभूतोयोद्रवः सरसः। सचापक्वः सरसशेषइत्युच्यते ॥

रसशोधनम्। न॰ टङ्कणे ॥ पारदशुद्धौ ॥

रससिन्दूरम्। न॰ सिन्दूररसाख्यौषधे ॥

रसस्थानम्। न॰ हिङ्गुले ॥ हृदये ॥

रसा। स्त्री॰ रसनायाम्। रास्नायाम् ॥ पाठायाम् ॥ शल्लक्यामोषधौ ॥ कङ्ग्वाम् ॥ भूमौ ॥ द्राक्षायाम् ॥ काकोल्याम् ॥ रसोऽस्यामस्ति। अर्शआद्यच् ॥ रस्यतेवारसआस्वादनेचुरादावदन्तः। घञ्॰अज्वा ॥

रसाखनः। पुं॰ कुक्कुटे ॥

रसाग्रजम्। न॰ रसाञ्जने ॥

रसाञ्जनम्। न॰ रसजाताञ्जनविशेषे। रसगर्भे। तार्क्ष्यशैले। रसवत्॰रसौत इतिभाषा ॥ रीत्यान्तुअभावमानायांतत्किट्टन्तुरसाञ्जनम्। तदभावेतुकर्त्तव्यंदार्व्वीक्वाथसमुद्भवम् ॥ इतिराजनिर्घण्टः। अपिच। दार्व्वीक्वाथसमंक्षीरंपाकंनीत्वायथाघनम्। तदारसाञ्जनाख्यंतन्नेत्रयोः परमंहितम् ॥ रसाञ्जनंतार्क्ष्यशैलंरसगर्भञ्चतार्क्ष्यजम्। रसाञ्जनंकटुश्लेष्मविषनेत्रविकारनुत् ॥ उष्णंरसाञ्जनंतिक्तंछेदनंव्रणदोषहृत्। इति ॥ रसयुक्तमञ्जनम्। शाकपार्थिवादि ॥

रसाढ्यः। पुं॰ आम्रातके ॥ त्रि॰ सरसे ॥

रसातलम्। न॰ पाताले ॥ रसायाभुवस्तलमधः ॥

रसात्मकः। त्रि॰ रसस्वभावे ॥ रसआत्मायस्य ॥

रसादानम्। न॰ शोषणे ॥ रसानामादानम् ॥ भूमिदाने ॥

रसाधारः। पुं॰ सूर्ये ॥ रसस्याधारे ॥

रसाधिकः। पुं॰ टङ्कणे ॥ अधिकरसे ॥

रसाधिका। स्त्री॰ काकोलीद्राक्षायाम्।

रसाभासः। पुं॰ अनौचित्यविशिष्टरसे ॥

रसाम्लः। पुं॰ अम्लवेतसे ॥ न॰ वृक्षाम्ले ॥ चुक्रे ॥

रसायकः। पुं॰ तृणविशेषे ॥

रसायनम्। न॰ जराव्याधिजिदौषधे

॥ नसूतेनविनाकान्तंनकान्तेनविनारसः। सूतकान्तसमायोगाद्रसायनमुदीरितमितिराजनिर्घण्टः॥ भावप्रकाशेतल्लक्षणादिर्यथा। यज्जराव्याधिविध्वंसिवयसस्तम्भकंतथा। चक्षुष्यंबृंहणंवृष्यंभेषजंतद्रसायनम्॥ दीर्घमायुः स्मृतिंमेधामारोग्यंतरुणंवयः। देहेन्द्रियबलंकान्तिंनरोविन्देद्रसायनात्॥ विशेषोस्यभावप्रकाशादिषुद्रष्टव्यः॥ विषे॥ कटौ॥ तक्रे॥ पुं॰ पक्षिराजे। गरुडे॥ विडङ्गे॥

रसायनफला। स्त्री॰ हरीतक्याम्॥ रसायनानिफलान्यस्याः॥

रसायनश्रेष्ठः। पुं॰ पारदे॥

रसायनी। स्त्री मञ्जिष्ठायाम्॥ गुडूच्याम्। काकमाच्याम्॥ महाकरञ्जे॥ गोरक्षदुग्धायाम्॥ मांसच्छदायाम्॥

रसालः। पुं॰ आम्रे॥ इक्षौ॥ रसमलति। अल॰। कर्मण्यण्॥ यद्वा। रसेनअलति॰ अल्यतेवा॰ पूर्यते॰ पूरयतिवा। अनेरव॰अ-श्रा॥ पनसे॥ कुन्दरुष्णे॥ गोधूमे॥ पुण्ड्रकनामेक्षौ॥ न॰बोले॥ सिह्लके॥

रसालवटः। पुं॰ यमपुर्यांवटयक्षिणीस्थाने॥

रसालसा। स्त्री॰ नाड्यां॥

रसाला। स्त्री॰ रसनायाम्। जिह्वायाम्॥ दूर्वायाम्॥ विदार्याम्॥ द्राक्षायाम्॥ शिखरिणीतिप्रसिद्धायाम्। मार्जितायाम्॥ अस्याः करणप्रकारोयथा। अर्द्धाढकंसुचिरपर्युषितस्यदध्नः खण्डस्यषोडशपलानिशशिप्रभस्य। सर्पिष्पलंमधुपलंमरिचंद्विकर्षंशुण्ठ्याः पलार्द्धमपिचार्द्धपलंचतुर्णाम्॥ सूक्ष्मपटेललनयामृदुपाणिघृ

(अन्यत्र पाठः) आढकमाहिषमम्लमनम्लरहितंदध्याढकंशर्कराशुभ्रांप्रस्थयुगोन्मितांशुचिपटेकिञ्चित्किञ्चित्क्षिपेत्। दुग्धेनार्द्धघनेनमृन्मयनवस्थाल्यांदृढंस्रावयेदेलाबीज-लवङ्गचन्द्रमरिचैर्योग्यैस्ततोयोजयेत्॥ भीमेनप्रियभोजनेनरचितानाम्नारसालास्वयंश्रीकृष्णेनपुरापुनः पुनरियंप्रीत्यासमास्वादिता। एषायेनवसन्तवर्जितदिनेसंसेव्यतेनित्यशस्तस्यस्यादतिवीर्यवृद्धिरनिशंसर्वेन्द्रियाणांबलम्॥ ग्रीष्मेतथाशरदियेरविशोषिताङ्गायेचप्रमत्तवनितासुरतातिखिन्नाः। येचापिमार्गपरिसर्पणशीर्णगात्रास्तेषामियंवपुषिपोषणमाशुकुर्यात्॥ रसालाशुक्रलाबल्यारोचनीवातपित्तजित्। दीपनीबृंहणीस्निग्धामधुराशिशिरासरा॥ रक्तपित्ततृषादाहप्रतिश्यायंविनाशयेदिति॥ अपिच।

ष्टाकपूरधूलिसुरभीकृतपात्रसंस्था एषाह्यकोऽटरकृतासरसारसालाया स्वादिताभगवतामधुसूदनेनेति ॥

रसान् आलाति । ला० । मूलविभुजादित्वात्कः । टाप् ॥

रसालिका । स्त्री० शीर्णमालायाम् । पृथक्पर्य्याम् । चाकुलिया० इ० गौ० दे० भाषा ॥

रसाली । स्त्री० पुंड्रेक्षौ ॥

रसाश्वासा । स्त्री० पलाशीलतायाम् ॥

रसास्वादः । पुं० चखण्डइस्त्ववलम्ब्येनारिविसह्रृत्तः सविकल्पकानन्दास्वादने । धन्योऽहमित्याद्यानन्दाकारवृत्तौ ॥

रसास्वादी । पुं० भ्रमरे ॥ त्रि० रसास्वादविशिष्टे ॥ रसानामास्वादी ॥

रसाढ्यः । पुं० सरलद्रुमरसे ॥

रसिकः । पुं० सारसखगे । तुरंगे । हस्तिनि ॥ त्रि० सरसे । रसज्ञे । रसिया० इ० भा० रसोऽस्त्यस्यास्मिन्नाठन् ॥

रसिका । स्त्री० रसालायाम् ॥ इक्षुरसे ॥ कटिसूत्रे । काञ्च्याम् ॥ रसनायाम् ॥ रागवत्याम् । रसीली० इ० भा० ॥ टाप् ॥

रसिकेश्वरः । पुं० श्रीकृष्णे ॥ वृन्दावनान्तररम्यरासोत्सवसमुत्सुकम् । रासमण्डलमध्यस्थं नमामि रसिकेश्वरम् ॥

रसिकेश्वरी । स्त्री० श्रीराधिकायाम् ॥

रसितम् । न० रुते ॥ स्तनिते । मेघनिर्घोषे ॥ त्रि० स्वर्णादिखचिते । स्वर्णादिलिप्ते ॥ रसशब्दे । भावे क्तः ॥

रसितवान् । त्रि० आस्वादितवति ॥ रसआस्वादने । क्तवतुप्रत्ययः ॥ उगितश्चेति ङीपि० रसितवती ॥

रसुनः । पुं० कन्दविशेषे । लशुने ॥

रसेन्द्रः पुं० पारदे । रसानामिन्द्रः ॥

रसोत्तमः । पुं० मुद्गे । श्रेष्ठरसे ॥ त्रि० तद्वति ॥

रसोद्भवम् न० हिङ्गुले ॥ त्रि० रसजाते ॥

रसोनः । पुं० लशुने । रसानके ॥ रसआस्वादने० चुरादिरदन्तः । ऊनः । पातकहेतुत्वात् । ऊन परिहाणे । चुरादिरदन्तः । एरच् । घञ् वा ॥ लशुनस्तु रसोनः स्यादुग्रगन्धो महौषधम् । अरिष्टो म्लेच्छकन्दश्च यवनेष्टो रसोनकः ॥ अस्योत्पत्तिर्यथा । यदामृतं वैनतेयो जहार सुरसत्तमात् । तदा ततोऽपतद्विन्दुः स रसोनोऽभवद्भुवि ॥ पञ्चभिश्च रसैर्युक्तो रसेनाम्लेन वर्जितः । तस्माद्रसोन इत्युक्तो द्रव्याणां गुणवेदिभिः ॥ कटुकश्चापि मूलेषु तिक्तः पत्रेषु संस्थितः ।

नालिकषायउद्दिष्टोनालाग्रेलवणः स्मृतः ॥ बीजेतुमधुरः प्रोक्तोर सस्तद्गुणवेदिभिः ॥ तस्यभक्तगुणाः । रसोनोवृंहणोवृष्यः स्निग्धोष्णः पाचनः सरः । रसेपाकेचकटुकस्तीक्ष्णोमधुरकोमतः ॥ भग्नसन्धानकृत्कण्ठ्योगुरुः पित्तास्त्रवृद्धिदः । बलवर्णकरोमेधाहितोनेत्र्योरसायनः ॥ हृद्रोगजीर्णज्वरकुक्षिशूलविबन्धगुल्मारुचिकासशोफान् । दुर्नामकुष्ठानलसादजन्तुसमीरणश्वासकफांश्चहन्ति ॥ मद्यंमांसंतथाम्लञ्चहितंलशुनसेविनाम् । व्यायाममातपंरोषमतिनीरपयोगुडम् । रसोनमश्नन्पुरुषस्त्यजेदेतन्निरन्तरं ॥

रसोनकः । पुं० रसोने । स्वार्थेकन् ॥

रसोपलम् । न० मौक्तिके ॥

रसौदनम् । न० पुं० मांसरसेनसिक्तौदने । रसौदनोगुरुर्वृष्योबल्योवातज्वरापहः ॥

रस्नम् । न० द्रव्ये ॥ रस्यते०आस्वाद्यते, रस० । रुचिशुषिरसिभ्यः कित् ॥

रस्यम् । न० रक्ते । त्रि० आस्वाद्ये । मधुररसप्रधाने ॥

रस्या । स्त्री० पाठायाम् । रास्नायाम् ॥

रहः । अ० विजने । विविक्ते ॥ रहते । रहेरसुन् ॥ रमन्तेऽत्रवा, रमेर्हश्चेत्यसुन्०हान्तादेशश्च ॥

रहः । न० तत्त्वे ॥ रते, गुह्ये ॥ रहते, रहत्यागे । असुन् ॥ यद्वा, रमन्तेऽत्र । रमेर्हश्चेत्यसुन्हान्तादेशश्च ॥

रहस्यम् । त्रि० अभिप्राये०। उपनिषदि ॥ उपासने ॥ अतिगोप्ये ॥ गोपनीयत्वंसर्वत्रसमानम् ॥ रहस्यरोमस्पर्शनिषेधायथा । नसर्पशस्त्रैः क्रीडेन्नस्पृशेत्खानिचनस्पृशेत् । रोमाणिचरहस्यानिनाशिष्टेनसहव्रजेत् ॥ रु० रहोभवम् दिगादित्वाद्यत् ॥

रहस्या । स्त्री० सरिद्विशेषे ॥ पाठायाम् ॥ रास्नायाम् । टाप् ॥

रहितः । त्रि० वर्ज्जिते ॥

रहूगणः । पुं० पुराणप्रसिद्धेसिन्धुसौवीरदेशयोर्नृपतिविशेषे ॥

रा । स्त्री० दाने ॥ काञ्चने । विभवे ॥

राका । स्त्री० पूर्णेन्दुपूर्णिमायाम् ॥ नदीविशेषे ॥ कच्छुरोगे ॥ नवजातरजः स्त्रियाम् ॥ रातिशुभम्, रा दाने । कृदाधारार्चिकलिभ्यः कः । दुर्ग्योणादिकः कप्रत्ययः । बाहुलकात्प्रत्ययस्थात्संज्ञा । संज्ञापूर्वकविधेरनित्यत्वात्केणइतिह्रस्वोन ॥

राकिनी । स्त्री० दुर्गायाअनुचरीविशेषे ॥

राक्षसः । पुं॰ कौणपे । क्रव्यादे । आशरे । रात्रिचरे । यातुधाने ॥ रक्षन्त्यस्मात् । रक्षपालने । असुन् । प्रज्ञाद्यण्॰ राक्षसः । सुधियः प्रकृतितो लिङ्गवचनान्यतिवर्त्तन्त इति पुंस्त्वम् ॥ विवाहविशेषे । यथा । हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात् । प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते ॥ रक्षस इवायम् । अण् । षष्टिवत्सरान्तर्गतवत्सरविशेषे ॥ यथा । कोद्रवाः शालिमुद्गाद्यपीड्यन्ते वरवर्णिनि । सर्वौषधानि धान्यानि राक्षसे निष्ठुराः प्रजाः ॥

राक्षसिका । स्त्री॰ राक्षसीसङ्क्रान्तौ ॥

राक्षसी । स्त्री॰ चण्डायाम् । धनहर्यामौषधौ ॥ कौणप्याम् । राक्षसस्त्रियाम् । दंष्ट्रायाम् । डाढ दाढ॰ इ॰ भा॰ ॥ सायाह्नवेलायाम् ॥ सूर्यसंक्रान्तिविशेषे ॥ यथा । शनौ तीक्ष्णसंज्ञा भवेद्राक्षसी सा सुखायान्त्यजानां तदा मासमेकम् ॥ तामस्यां प्रकृतौ ॥ अविहितहिंसाहेतुद्वेषप्रधाना राक्षसी प्रकृतिः । वैदिकनिषेधातिक्रमेण स्वभावसिद्धरागद्वेषानुसारिसर्वानर्थहेतुप्रवृत्तिहेतुभूता तामसी हिंसाप्राधान्येन द्वेषप्राबल्याद्राक्षसीत्वमस्याः ॥ रक्षस इयम् । तस्येदमित्यण् । ङीप् ॥

राक्षसेन्द्रः । पुं॰ रावणे ॥

राक्षा । स्त्री॰ लाक्षायाम् ॥ रक्ष्यतेऽनया । रक्ष॰ । गुरोश्च हलः इत्यः । प्रज्ञाद्यण् । अजादित्वाट्टाप् ॥

रागः । पुं॰ मात्सर्ये ॥ लोहितादिषु ॥ जपाकुसुमादिद्रव्ये ॥ क्लेशादौ ॥ अनुरागे । परस्परप्रीतौ । स्नेहे ॥ तल्लक्षणं यथा । सुखमप्यधिकं चित्ते सुखत्वे नैव रज्यते । यतस्तु प्रणयोत्कर्षात् स राग इति कीर्त्यते ॥ इति ॥ सुखानुशयिनि । साधनरहितस्यापि॰ सर्वं सुखजातीयं मे भूयादिति विपर्ययविशेषे । महामोहे ॥ मोहादनुभूयमानं सुखमनुशेते कश्चिच्चित्तवृत्तिविशेषो रागः स सर्वं सुखजातीयं मे भूयादिति । तच्च दृष्टादृष्टसामग्र्यभावात् सम्पादयितुमशक्यम्॰ अतः स चित्तं कलुषीकरोति । यदा तु॰ सुखिषु प्राणिष्वयं मैत्रीं भावयेत्॰ सर्वेऽप्येते सुखिनो मदीया इति॰ तदा तत्सुखं स्वकीयमेव सम्पन्नमिति भावयतस्तस्य रागो निवर्त्तते । यथा स्वस्य राज्यनिवृत्तावपि पुत्रादिराज्यमेव स्वकीयं राज्यं तद्वत् । निवृत्ते च रागे॰ वर्षाव्यपाये जलमिव चित्तं प्रसीदति ॥ रज्यते विषयेषु पुरुषोऽनेनेति व्युत्पत्त्या॰ कामे । गर्वे । ततत्फलतृष्णायाम् ॥ प्राप्तो विषयः क्षयकारणे सत्यपि न क्षीयतामित्येवमा

कारश्चित्तवृत्तिविशेषोरञ्जनात्मारा
ग: ॥ सदाकामाभिनिविष्टस्वरूपो
भिष्वङ्गोराग: ॥ शोभनाध्यासनि
बन्धनोविषयेषुरञ्जनात्मकश्चित्तवृ-
त्तिविशेषोऽत्यन्ताभिनिवेशरूपोरा-
ग: ॥ रागोलिङ्गमबोधस्यचित्तव्या
यामभूमिषु । कुत: शाद्वलतातस्य
यस्याग्नि: कोटरेतरो: ॥ रागाद
य: सन्तुकामंनतद्भावोपराध्यति ।
उत्खातदंष्ट्रोरगवदविद्याकिंकरिष्य
तीतिचाचार्य: ॥ सितादीनांवि-
कारविशेषे ॥ यथा । सितामध्वा-
दिमधुरोद्राक्षादाडिमजोरस: ।
बिरलश्चेत्कृतोरागइति ॥ गान्धा-
रादौ ॥ नृपे ॥ चन्द्रे ॥ सूर्ये ॥ लाक्षा
दौ ॥ रक्तिमस्त्विषि ॥ रञ्जने ॥ गा
नशास्त्रीयरागेषु ॥ यथा । भरतम-
ते॰हनुमन्मतेचराग: षड्विध: ।
तेषांनामानियथा । भैरव: १ कौ
शिक: २ हिन्दोल: ३ दीप-
क: ४ श्रीराग: ५ मेघ: । हनु-
मद्भरतयोर्मतेप्रत्येकमेषांपञ्चरागि-
ण्य: सोमेश्वरकलानाथयोर्मतेप्र-
त्येकमेतेषांषड्रागिण्य: । एतेषांप्र-
त्येकमष्टौपुत्रा: एकैकापुत्रभार्या-
च ॥ कलानाथसोमेश्वरमतेषड्रागा
यथा । श्रीराग: १ बसन्त: २ पं
चम: ३ भैरव: ४ मेघ: ५ नट
नारायण: ६ । इतिनानासङ्गीत

शास्त्रम् ॥ अथरागस्यव्युत्पत्तिसङ्
ख्यास्थानानि । येस्तुचेतांसिरञ्ज्य-
न्ते जगत्त्रितयवर्त्तिनाम् । तेराग
इतिकथ्यन्ते मुनिभिर्भरतादिभि:
॥ गोपीभिर्गीतमारब्धमेकैकंकृष्ण
सन्निधौ । तेनजातानिरागाणांस-
हस्राणितुषोडश ॥ तासुतेषुषड्
त्रिंशद्रागाजगतिविश्रुता: ॥ काल
क्रमेणतत्राविज्ञासएवतुदृश्यते ॥
केचिदद्यन्तिरागा: सर्वेसम्मीति
निश्चितम् । मेरोरुत्तरत: पू-
र्वपश्चिमेदक्षिणे तथा ॥ समु-
द्रकण्ठेयेदेशास्तत्रामीषांप्रचारणा
। तथाच । अङ्गवङ्गकलिङ्गते
लिङ्गभूलिङ्गहावङ्गसुरङ्गपूपलङ्गखिल
ङ्गसौबीरकोरकाश्मीरनाभीरनाहो
रसिन्धुजालन्धरमगमगधनिषधम
लयहोहयगजाह्वयमालवजालवम
रुमरुचोलोत्कलकुन्तलसिंहलहरि
केलकेरलकोशलमल्लिवालमल्लभद्र
सौविदल्लबातकिञ्जातगुर्जरातगुञ्ज
रकांजरगौडद्रविडोड्राम्बर्वेदिका
स्त्रीपाञ्चालसौराष्ट्रशबरलोहाबरख
शकोकशबरूपकामरूपहरिगर्भवि
दर्भदुर्मटबाटकोकटदेवेङ्गमटङ्गन
नाटभोटकबाटकरहाटकर्णाटकुन्ति
कावन्तिकृकनकाञ्चकान्यकुब्जभोज
काम्बोजतोजतुखारबिहारबलिहा
रराजगेहविदेहबाह्लीकचञ्चरीकचो

गन्तामिन्तांदिदेशेषु रागाः प्रचरन्ती
ति ॥ यस्यश्रवणमात्रेणरज्यन्ते स
कलाः प्रजाः । सर्वाचरञ्जनाद्धेतो
स्तेनरागइतिस्मृतः ॥ अथरागाः
। षाड्रौमालवरागेन्द्रस्ततोमल्लारसं
ज्ञितः । श्रीरामश्चततः पश्चाद्वस
न्तस्तदनन्तरम् ॥ हिल्लोलश्चाथक
र्णाटएतेरागाः षडेवतु । षट्त्रिं
शद्रागिणीतश्चक्रमशः कथितामया
॥ धानसीमामसीचैवरामकौरीच
सिन्धुडा । आशावरीभैरवीचमाल
वस्यप्रियाइमाः ६ ॥ वेलावलीपू
रवीचकानडामाधवीतथा । कोडा
केदारिकाचापिमल्लारदयिताइमाः
६ ॥ गान्धारीशुभगाचैवगौरीकौमा
रिकातथा । वेलायारीचवैरागीश्री
रागस्यप्रियाइमाः ॥ ६ ॥ तुडीचप
ञ्चमीचैवललितापठमञ्जरी । गुर्ज्ज
रीचविभाषाचवसंतस्यप्रियाइमाः
६ ॥ मायूरीदीपिकाचैवदेशकारीचपा
हिडा । वराडीमोरहाटीचहिल्लोल
स्यप्रियाइमाः ६ ॥ नाटिकाचाथभू
पालीरामकेलीगडातथा । कामो
दाचापिकल्याणीकर्णाटस्यप्रियाइ
माः ६ ॥ ३६ ॥ अथकालनियमः
। विभाषाललिताचैवकामोदीपठ
मंजरी । रामकौरीरामकेलीवेलोया
रीचगुर्ज्जरी देशकारीचशुभगा
पञ्चमीचगडातुडी । भैरवीचाथकौ

मारीरागिण्योदशपञ्चच ॥ एताः
पूर्वाह्णकालेतुगीयन्ते गायनोत्तमैः
। वराडीमायूरीकोडावैरागीचाथ-
धानुषी ॥ वेलावलीमोरहाटीसप्तै
तारागयोषितः । गेयामध्याह्नका-
लेतुयथाभरतभाषितम् ॥ गान्धारी
दीपिकाचैवकल्याणीपूरवीतथा ।
कानडाशावरीचैवगौरीकेदारपाहि
डा ॥ मायूरीमालसीनाटीभूपाली
सिन्धुडातथा । सायाह्ने ताश्चरा-
गिण्यः प्रगायन्तिचतुर्द्दश ॥ पुरु-
षास्तुभूषाद्यारागास्ते मालवादयः
। प्रदोषेचापराह्णेचरजन्यांगान-
गोचराः ॥ दशदण्डात्परंरात्रौस
र्वेषांगानमीरितम् । मेघमल्लाररा-
गस्यगानंवर्षासुसर्वदा ॥ श्रीपञ्च-
मींसमारभ्ययावज्जन्मोत्सवंहरेः ।
तावद्वसन्तरागस्यगानमुक्तंमनीषि
भिः ॥ शक्रोत्थानंसमारभ्ययावद्दु
र्गामहोत्सवम् । गीयतेतद्बुधैर्नित्यं
मालसीसामनोहरा ॥ सर्वेषामिह
रागाणांरागिणीनाञ्चसर्वशः । र-
ङ्गभूमौनृपाज्ञायांकालदोषोनविद्य
ते ॥ रागश्चालापायेदादौतत्पली
स्तदनन्तरम् । नान्यपलीप्रगातव्या
नृपाज्ञायांनदूषणम् ॥ रागाः षडथ
रागिण्यः षट्त्रिंशच्चारुविग्रहाः
आगताब्रह्मसदनात्ब्रह्माणंसमुपास
ते ॥ अथध्यानम् । नितम्बिनीचु ।

म्बितवक्त्रपद्म : शुकद्युति ' कुण्ड
लवान्प्रमत्त : । सङ्गीतशालीप्रविश
न्प्रदेषिमालाधरोमालवरागराज :
॥ १ ॥ नीलोत्पलंकर्णयुगेवहन्ती-
श्यामासुकेशीचसुमध्यभागा । ईष-
त्सहासाम्बुजरम्यवक्त्रासाधानसीप-
ह्ममुखारुणेच । ॥ १ ॥ करेयुताचा
म्बुजयुग्मरम्याद्रुतस्ततस्चारुविलोक
यन्ती । कण्ठस्फुरन्मौक्तिकरत्नहा
रामामालसोसङ्कथिताविचित्रा ॥२॥
प्रतप्तचामीकरचारुवक्त्राकर्णा : तंसं
कमलंवहन्ती । पौष्पंधनु : पुष्पश
रैर्दधानाचन्द्राननारामकिरीप्रदि-
ष्टा ॥ ३ ॥ महेन्द्रनीलद्युतिर
म्बुजाचीप्रवादयन्तीकपिलाशयन्त-
म् । विचित्ररत्नाभरणासुकेशी-
सासिन्धुडाकान्तसमीपसंस्था ॥ ४
॥ जवाप्रसूनद्युतिविम्बवक्त्रास
कञ्जुपद्मंकरयोर्दधाना । चीमां
शुकाच्छादितगात्रयष्टिराशावरीरङ्ग
कलाविदग्धा ॥ ५ ॥ सरोवरस्था
स्फटिकस्थमन्दिरोसरोरुहै : शङ्कर
मर्चयन्ती । तालप्रयोगप्रतिरङ्गगी
तै र्गौरीतनुभैरविकासतीयम् ॥
६ ॥ अथमल्लार : । विहारशीलो
तिसुकान्तिदेह : कान्ताप्रियोधार्मि
कशीलयुक्त : । कामातुर : पिङ्गल
नेत्रयुग्मोमल्लारराग : प्रियकृत्सु
वेश : ॥ २ ॥ सङ्केतितोत्फुल्ल
तानिकुञ्जे कृतस्थिति : कान्तसमा
गमाय । वेलावलीचम्पकमौलिनी
सावालाविचित्राभरणानिरुक्ता ॥
१ ॥ रहः : सुकान्तहृियमाणपत्रं
रम्यंवहन्तीकुचकुम्भयुग्मे । दूर्वाद
लश्यामतनु : सकामापुरातनै :
सापुरवीनिरुक्ता ॥ २ ॥ अशोक
वृक्षस्यतलेविषण्णावियोगिनीवाष्प
कणाश्चिताङ्गी । विभूषिताङ्गीजटि
लेववालासाकानडाहेमलतेवतन्वी
॥ ३ ॥ सद्गुध्यसङ्गुध्यगलेदधानाप्र
सूनमालादयितेनबाला । गौरीस्व
कान्ता ननचुम्बितास्यात्सासुन्दरी
माधविकानिकुञ्जे ॥ ४ ॥ सुकच्छ
पीवादयतिस्वभर्तुर्गानार्थमभ्यस्य
तिसम्मुखेन । सदैवतालाविष्ट
ताचमाला कोडाकलातानवतीम
तासा ॥ ५ ॥ स्नात्त्वासमुत्तीर्णव
तीमुदेहाकेशप्रणिस्यन्दितवारिवि
न्दु : । निष्पीडयन्तीतिमिरांशु
कान्तंकेदारिकारक्तपयोधरश्री : ॥
६ ॥ अथश्रीराग : । लीलावतारेण
वनान्तराणिचिन्वन्प्रसूनानिवधूस
हाय : । विलासवेशोद्युतिदिव्यमू
र्त्ति : श्रीरागएषप्रथित : पृथिव्या
म् ॥ ३ ॥ संध्यामुकालेगृहमध्यदे
शेप्रवादयन्तीहपिनाकयन्त्रम् । धा
राधराधातुविचित्रिताङ्गीगान्धारि
कागन्धसुबंनिधत्ते ॥ १ ॥ रस

नयासुविचारितकौतुकं विदधतीक
विकोविदकौतुकम् । सुकवितामृ
तभावनतत्परा भगवतीसुभगासमु
दाहृता ॥ २ ॥ पुष्पोद्यानेसार्द्धमा
लीकलापैः क्रीडन्त्येवं कोकिला
काकलीषु । रामाश्यामासद्गुणा
नाम्नसीमा गौरीगौरीगौरवालोक
दिष्टा ॥ ३ ॥ अट्टालिकायांस्फुट
कौमुदीभिः प्रकाशितायांरजनीवि
हारम् । चक्रायकान्तेनसमंवसन्ती
कौमारिकाकामकलांवहन्ती ॥ ४ ॥
गौरीपादाम्भोजमभ्यर्चयन्तीगन्धोद्भू
तंगन्धमाल्यंदधाना । नानारत्नो
पायनैर्भक्तिभावैर्वेलोयारीकथ्य
तेवालिकेयम् ॥ ५ ॥ उल्लासयन्ती
धम्मिल्लरत्नैः स्थानप्राणवन्धुना ।
मालतीकुसुमस्रग्भिर्वैरागौरागि
णीस्मृता ॥ ६ ॥ अथवसन्तः ।
चूताङ्कुरेणैवकृतावतंसोविघूर्ण
मानारुणनेत्रपद्मः । पीताम्बरः
काञ्चनचारुदेहोवसन्तरागोयुवती
प्रियश्च ॥ ४ ॥ सुनृत्यमानातिसुशी
लयुक्तामुक्तालताकल्पितहारयष्टिः
। चूताङ्कुरंपाणियुगेवहन्तीजवा
रुणाङ्गीतुडिकेरितीयम् ॥ १ ॥ स
ङ्गीतगोष्ठीषु गरिष्ठभावंसमाश्रिता
गायनसम्प्रदायैः । खर्व्वाङ्गिनीनू
पुरपादपद्मासापञ्चमीपञ्चमवेदवेत्री
॥ २ ॥ उरसिकेशचयश्चसुसारंविद

धतीशयनोत्थितचारुवेशम् । विलु
लितालकवल्लिकशाङ्गीभासुराललि
ताकथितावुधैः ॥ ३ ॥ सखीक
लापैः परिहास्यमानावियोगिनी
कान्तवियोगदेहा । पीनस्तनीचैव
धराप्रसुप्ताश्यामासुकेशीपठमञ्ज
रीयम् ॥ ४ कर्णोत्पलालम्बिमधु
व्रतालीशृणोतिसामञ्जुलकूजिता
नि । कान्तान्तिकंगन्तुमनाः प्रदो
षे सागुर्ज्जरीवेशकलोचिताङ्गी ॥
५ ॥ अध्यापयन्तीनिजशिष्यवृन्दं
संगीतशास्त्राणिविवेचनाभिः ॥ म
नोहराहारलताभिरामासमस्तभा
षाकुशलाविशेषा ॥ ६ ॥ अथहिन्दो
लः । हासाभिलासेनपतन्पृथि
व्यामुत्थापितस्तत्चरणमालिवृन्दैः
। उल्लोलसंगीतरसैर्विदग्धोहिन्दो
लरागः कथितोरसज्ञैः ॥ ५ मयूरके
काश्रवणोल्लसन्तीमयूरिकानृत्यततं
किरन्ती । मयूरकांतीवसितिंदधा
नामायूरिकासङ्कथितागुणज्ञैः ॥ १ ॥
प्रदोषकालेगृहसम्प्रविष्टाप्रदीपह-
स्तारुणगात्रवस्त्रा । सीमन्तसिन्दू-
रविराजमानासुरक्तमालाकिलदी-
पिकेयम् ॥ २ ॥ सार्द्धंसखीभिर्वि
जनेवसन्तीविचित्रवर्त्ताजनितप्रस
ङ्गा । निरीक्ष्यमाणाननदर्प्पणाया
सादेशकारीकथितागुणज्ञैः ॥ ३ ॥
भर्त्तुर्दधानाचरणारविन्दंनिषेधय

राग :

न्तीपरदेशयानम् । प्रकामदाम्पत्य
सुखेनिमग्नासापाहिडासङ्कथिता-
कवीन्द्रै : ॥ ४ ॥ कर्णे दधानासुर-
पुष्पयुग्मं स्फुरत्सुवर्णोजमनोहरा-
ङ्गी । स्मेराननाचारुविलोलनेत्रा
वराङ्गनेयंकथितावडारी ॥ ५ ॥ उ
त्पन्नमात्रे प्रथमापराधेमानंपुन: क
र्तुं मनास्विरेण । ऋजुस्वभावान्नि-
यतंरुदन्तीसामोरहाटीहठकेलिरु-
ष्टा ॥ ६ ॥ अथकर्णाट : । कृपाण-
पाणिस्तुरगाधिरूढोमयूरकण्ठाति-
सुकण्ठकान्ति : । स्फुरत्सितस्नि-
ग्धरस : प्रशान्त : कर्णाटरागोहृ-
रितालवर्ण : ॥ ६ ॥ चिरंनटन्ती-
शुभरङ्गमध्ये संप्रार्थयन्तीनटिनंवस
न्तम् । सुगीततालेषुकृतावधाना-
नटीषुनाटीपरिधानदेहा ॥ १ ॥
स्वनायकंपुष्पलतादिरूढाहसन्मुखी
सर्वमुदंवहन्ती । स्वनानिशम्यहित
नोतिमुग्धाभूपालिकासास्खलदु-
त्तरीया ॥ २ ॥ अध्यापयन्तीशुक
सारसारी : श्रीराममामेतिसुवेशल
क्ष्मी: । वामस्तनार्द्धस्खलितांशुक
श्री : श्रीरामकेलीकथिताकवीन्द्रै :
॥ ३ ॥ विशेषवैदग्ध्यवतीसमस्ता
न्कलाविलासैनविमोहयन्ती । वृ
हन्नितम्बापरिपुष्टदेहावडाप्रलम्बस्त
नभारभग्ना ॥ ४ ॥ भर्त्तु : सम
पार्श्वसितम्भरन्तीपयेविहारेणसरो

राग :

रुहाणि । विचिन्वतीसौरभमोद
मानाकामोदरागिण्युदितागुणज्ञै:
॥ ५ व्याधूतानटनृत्यपरिश्रमेण
बालालीलाभि : मुदलीकृतादरा
। नटीनांकल्याणीकलयतिमतह
स्तीएणप्रस्थानंमुखरिताकिङ्कणीक
लापम् ॥ ६ ॥ अथरागरागिणीनां
भावनिरूपणम् । मालव : श्रीव
हिन्दोलोमल्लारस्तदनन्तरम् । गाय
न्तिगायकाधीरसानन्देनचतुष्टय-
म् । वसन्तराग: कर्णाटोहौवीरीभव
त : क्रमात् ॥ धामसीमालसीचै
वभैरवीमाधवीतथा ॥ सुभगापञ्चमी
नाटीवेलोयारीचगुर्ज्जरी । कामो
दाचापिकल्याणीकेडाकेदारिका
तुडी ॥ कौमारीमायुरीचैवदेशका
रीचसिन्धुडा । रामकेलीचभूपाली
रागिण्यस्त्वेतिविंशति : ॥ आनन्दां-
शाद्रुतिप्रोक्तागीयन्तेगानकोविदै :
। पूरवीकानडागौरीरामकौरी-
चदीपिका ॥ आशावरीविभाषाच
वडारीचगडातथा । एताश्चनवरा
गिण्योवीरांशेगानमुत्तमम् ॥ वेला
वलीचगाम्भारीललितापठमञ्जरी ।
वैरागिरागिणीचापिमोरहाटीच-
पाहिडा ॥ करुणांशाविज्ञानीया
नृपत्तैतारागयेोषित : ॥ रागेण
रसभागेनषट्त्रिंशत्रागिणीषु च
। करुणानन्दवीरेषुञापनार्थंमत

थयम् ॥ इतिसंगीतदामोदरेशिव नारदसंवादे १।३ अध्यायो॥ रञ्जन म्। रञ्ज॰ भावेघञ् ॥ रज्यतेऽने नेतिवा। अकर्त्तरिचकारकेसंज्ञाया मितिघञ्। घञिचभावकरणयो रितिरञ्जेर्नलोपः॥

रागचूर्णः। पुं॰ दन्तधावने। खदिरे ॥ मकरध्वजे। कन्दर्पे॥ लाक्षारसे॥ फल्गुचूर्णे गुलाल॰इं॰भा॰॥ सिन्दूरे॥

रागच्छन्नः। पुं॰ कामदेवे॥ त्रि॰रागेणच्छन्ने॥

रागदः। पुं॰ तेरणीक्षुपे॥ त्रि॰रागदातरि॥

रागदालिः। पुं॰ मसूरे॥

रागपत्रः। पुं॰ कामादिषु॥ कामश्चमत्सरश्चैवस्पृहातृष्णातथैवच।लोभोमायाचदम्भश्चरागपत्रइतीरित॥

रागपुष्पः। पुं॰ बन्धूके रक्ताम्लाने॥

रागपुष्पी। स्त्री॰ जवायाम्॥

रागप्रसवः। पुं॰ बन्धूके॥ रक्ताम्लाने॥

रागबन्धी। त्रि॰ रागप्रवर्त्तके॥

रागयुक्। पुं॰ माणिक्ये॥

रागरज्जुः। पुं॰ कामदेवे॥

रागलता। स्त्री॰ रत्याम्। कामप्रियायाम्॥

रागवृन्तः। पुं॰ कामदेवे॥

रागषाडवः। पुं॰ दाडिमद्राक्षायुक्तमुद्गयूषे॥

रागसूत्रम् न॰ तुलासूत्रे॥ पट्टसूत्रे॥

रागाङ्गी। स्त्री॰)

रागाढ्या। स्त्री॰) मञ्जिष्ठायाम्॥

रागात्। त्रि॰ आशादत्त्वादानशीले॥

रागाशनिः। पुं॰ बुद्धे॥

रागिणी। स्त्री॰ विदग्धायांनार्याम्॥ मेनकायाज्येष्ठकन्यायाम्॥ जयश्रीनाम्न्यांलक्ष्म्याम्॥ षड्रागाणांत्रिषु॥ तास्वहनुमन्मतेभरतमतेचत्रिंशत्प्रकाराः॥ सोमेश्वरमतेकल्लानाथमतेचषट्त्रिंशत्प्रकाराः। आसांविवरणंरागशब्देद्रष्टव्यम्॥

रागी। त्रि॰कामाद्याकुलचित्ते। कामुके। रक्तरि। अनुरक्ते॥ रागिणोदेवकन्तोहिसदेवासुरमानुषाः॥ यथोक्तभागवतेव्यासेन। रागीविष्णुः शिवोरागी ब्रह्मापिरागसंयुतः। रागज्ञनविचातुर्याद्विदेहइवलक्ष्यतइति॥ रञ्जेः सम्पृचानुरुधं तित्क्षीलादिषुघिनुण्॥ तृणधान्यविशेषे। लाङ्कने। बहुतरकणिशे। गुच्छकणिशे॥

राक्॰ग्॰। त्रि॰ समर्थे॥ राघति। राघृसामर्थ्येक्विप्॥

राघवः। पुं॰ रघुवंशजे। श्रीरामे।

पुराणप्रसिद्धेमत्स्येमहामीने ॥ यथा । अस्तिमत्स्यस्तिमिर्नामशतयोजनविस्तृतः । तिमिङ्गिलस्तद्गिलोपितद्गिलोप्यस्तिराघवः ॥ इति ॥ ब्रह्माण्डाभिमानिनि ॥ रङ्कतिनाशंगच्छतीतिरघुरन्नमयः कोशः । तत्रभिदितः । अण् ॥

राघवायणः । पुं॰ रामायणे ॥ यथा । सेतिहासपुराणानिराघवायणभारतम् । समाप्तिरक्षितान्यैवसन्तितानिश्रुतानिते ॥ इत्यग्निपुराणम् ॥

राङ्कलः । पुं॰ द्रुमकण्टके ॥

राङ्कवम् । न॰ मृगरोमजेवस्त्रे ॥ रङ्कौभवम् । रङ्कोरमनुष्येण्चेत्यण् । मृगरोमजइत्यत्रमृगशब्देनपशुमात्रंग्राह्यम् । तेनकम्बलाद्यपिराङ्कवम् ॥ पुं॰ गवि ॥ रङ्कौ॰देशविशेषेभवः । पूर्वेणाण् ॥

राङ्कवकः । पुं॰ मनुष्ये ॥ रङ्कौभवः । मनुष्यतत्स्थयोर्वुञ् ॥

राङ्कवायणः । त्रि॰ राङ्कवार्थे ॥ रङ्कौभवः । रङ्कोरमनुष्येण्चेतिष्फक् ॥

राङ्गणम् । न॰ रङ्गन्॰इ॰गौ॰भा॰प्र॰ पुष्पविशेषे ॥

राट्॰ड् । पुं॰ राजनि ॥ राजते । राजृदीप्तौ ॥ सत्सूद्विषेतिक्विप् ।

राजकम् । न॰ नृपवृन्दे ॥ राज्ञांसमूहः । गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्समनुष्याजाद्वुञ् ॥ पुं॰ राजनि ।

राजकदम्बः । पुं॰ कदम्बविशेषे ॥

राजकन्या । स्त्री॰ केविकापुष्पे ॥ भूपसुतायाम् ॥

राजकर्कटी । स्त्री॰ चीनाकर्कव्याम् ॥

राजकशेरुः । पुं॰ न॰ जलजकंदविशेषे ॥ भद्रमुस्तायाम् ॥

राजकीयः । त्रि॰ राजसम्बन्धिवस्तुनि ॥ राज्ञइदम् । राज्ञः कचेतिच्छः ककारोन्तादेशः ॥

राजकुमारः । पुं॰ राजपुत्रे ॥

राजकूष्माण्डः । पुं॰ वार्त्ताक्याम् ॥

राजकोशातकी ॥ स्त्री॰ धामार्गवे । तोरञो॰इ॰ भा॰प्र॰ फलशाकेराजकोशातकीशीतामधुराकफवातला । पित्तघ्नीदीपनीश्वासज्वरकासकृमिनाशनुत् ॥

राजक्षवकः । पुं॰ सर्षपे ॥

राजखर्जूरी । स्त्री॰ श्रेष्ठखर्जूर्य्याम् । पिण्डखर्जूरिकायाम् । राजपिण्डायाम् । नृपप्रियायाम् ॥

राजगामि । त्रि॰ राजसम्बन्धिनि ॥

राजगिरिः । पुं॰ शाकप्रभेदे । राजाद्रौ । राजशाकिन्याम् ॥

राजगुह्यम् । न॰ सर्वेषांगुह्यानांराज्ञि ॥ गुह्यानांराजा । राजदन्तादिः ॥

राजगृहम् । न॰ । तीर्थविशेषे ॥

राजग्रीवः । पुं॰ मत्स्यविशेषे ॥ मद्गुरभेदे ॥

राजघः । त्रि॰ तीक्ष्णे ॥ राजहन्तरि ।

राजानं हन्ति । हन० । राजघ उपसङ्ख्यानाट्टक् ॥ टिलोपो घत्वञ्च निपात्यते ।

राजचिह्नम् । न० नृपाज्ञासूचकेलक्ष्मविशेषे ॥ चिह्नानां राजा । राजदन्तादि ॥

राजचिह्नकम् । न० उपस्थे ॥ चिह्नानां स्त्रीपुंविभाजकानां राजा ॥

राजजम्बूः । स्त्री० पिण्डखर्जूरे ॥ जम्बूप्रभेदे । फलेन्द्रे । फरेंदा० इ० भा० । राजजम्बूफलं स्वादु विष्टम्भि गुरु रोचनम् ॥ जम्बूनां राजा ॥ राजदन्तादिः ॥

राजतम् । न० रजते ॥ त्रि० रजतनिर्मिते । रूप्यमये ॥ रजतस्य विकारः । प्राणिरजतादिभ्योऽञ् ॥

राजतरुः । पुं० कर्णिकारवृक्षे ॥ आरग्वधे ॥

राजतरुणी । स्त्री० पुष्पविशेषे । महासहायाम् । वर्णपुष्पे । अम्लाने । सुपुष्पे । सुवर्णपुष्पे ॥

राजता । स्त्री० राजत्वे ॥

राजतालः । पुं० स्वनामख्यातपादपे ॥ गुवाके ॥

राजतेमिषः । पुं० नाटाम्रे ॥ सुखाशे ॥ इ० त्रिकाण्डशेषः ॥

राजदण्डः । पुं० राजशासने ॥

राजदन्तः । पुं० अधोदन्तपङ्क्तिस्थमध्यदन्तयुग्मे ॥ दन्तानां राजा । राजदन्तादिषु परम् ॥ उपरिश्रेणीस्थमध्यवर्त्तिदन्तद्वये ॥ यथा । राजदन्तौ तु मध्यस्थावुपरिश्रेणिकौ क्वचिदिति हेमचन्द्रः ॥

राजदेशीयः । पुं० राजकल्पे । राजदेश्ये ॥ ईषदूनो राजा । ईषदसमाप्तौ कल्पप्देश्यदेशीयरः ॥

राजधत्तूरकः । पुं० वृहद्धत्तूरके । राजधूर्त्ते । महाशठे ॥

राजधर्म्मः । पुं० राज्ञां कर्त्तव्ये कर्म्मणि ॥ स च मनुस्मृतेः सप्तमाध्याये० कालीपुराणस्य ॥ ८५ ॥ ८६ ॥ अध्याययोः महाभारतस्य शान्तिपर्व्वणि पद्मपुराणस्य स्वर्गखण्डे ॥ १३८ ॥ अध्याये च द्रष्टव्यः ॥

राजधानकम् । न० राजपुरे ॥ (*) ॥

राजधानी । स्त्री० कोट्टे । राजपुरे । स्कन्धावारे ॥ धीयतेऽस्याम् । इति धानी । करणाधिकरणयोश्चेत्यधिकरणे ल्युट् । ङीप् । राज्ञां धानी ॥

राजधान्यम् । न० श्यामाके ॥

राजधुस्तूरकः । पुं० वृहद्धुस्तूरे ॥ राजधूर्त्ते । महाशठे । निस्त्रैणपुष्पके । भ्रान्ते । राजस्वर्णे ॥

राजा । पुं० प्रभौ ॥ क्षत्रिये ॥ मृगाङ्के । रजनीपतौ ॥ यक्षे । शक्रे ॥ नृपे । पार्थिवे । राज्याभिषिक्ते क्षत्रिये ॥ अभिषिक्तजनपदपुरपाल-

यिष्टपुरुषश्रेष्ठे । क्ष्माभृति । भूपे । प्रणताशेषसामन्ते ॥ अराजके हि लोकेऽस्मिन् सर्व्वतो विद्रुते भयात् । रक्षार्थमस्य सर्व्वस्य राजानमसृजत्प्रभुः ॥ अस्य व्युत्पत्तिर्विष्णुपुराणे यथा । महता राजराज्येन पृथुर्वैण्यः प्रतापवान् । सोऽभिषिक्तो महातेजा विधिवद्धर्म्मकोविदैः ॥ पित्राऽपरञ्जितास्तस्य प्रजास्तेनानुरञ्जिताः । अनुरागात्ततस्तस्य नाम राजेत्यभाषतेति ॥ राजकर्त्तव्यकर्म्माणि यथा मदालसोवाच । वत्स राज्याभिषिक्तेन प्रजारञ्जनमादितः । कर्त्तव्यमविरोधेन स्वधर्म्मस्य महीभृता ॥ अविरोधेन० धर्म्मशास्त्राविरोधेन । व्यसनानि परित्यज्य सप्त मूलहराणि वै । आत्मा रिपुभ्यः संरक्ष्यो वहिर्म्मन्त्रविनिर्गमात् ॥ अष्टधा नाशमाप्नोति स्वचक्रस्यन्दनाद्यथा । तथा राजाप्यसन्दिग्धं वहिर्म्मन्त्रविनिर्गमात् ॥ दुष्टादुष्टांश्च जानीयादमात्यानरिदोषतः । चरैश्चरास्तथा शत्रोरन्वेष्टव्याः प्रयत्नतः ॥ विश्वासो न तु कर्त्तव्यो राज्ञा मित्राप्तबन्धुषु । कार्य्ययोगादमित्रेषु विश्वसीत नराधिपः ॥ स्थानवृद्धिक्षयज्ञेन षाड्गुण्यविदितात्मना । भवितव्यं नरेन्द्रेण न कामवशवर्त्तिना ॥ प्रागात्मा मन्त्रिणश्चैव ततो भृत्या महीभृता । जेयाश्चानन्तरं पौरा विरुध्येत ततोऽरिभिः ॥ यस्त्वेतानविजित्यैव वैरिणो विजिगीषते । सोऽजितात्माजितामात्यः शत्रुवर्गेण बाध्यते ॥ तस्मात् कामादयः पूर्व्वं जेयाः पुत्र महीभृता । तज्जये हि जयो राज्ञो राजा नश्यति तैर्ज्जितः ॥ कामः क्रोधश्च लोभश्च मदो मानस्तथैव च । हर्षश्च शत्रवो ह्येते नाशाय० कुमहीभृताम् ॥ कामप्रसक्तमात्मानं स्मृत्वा पाण्डुं निपातितम् । निवर्त्तयेत्तथा क्रोधादनुह्रादं हतात्मजम् ॥ हतमैलं तथा लोभान्मदाद्वेनं द्विजैर्हतम् । मानादनायुषः पुत्रं हतं हर्षात् पुरञ्जयम् ॥ एभिर्जितैर्जितं सर्व्वं मरुत्तेन महात्मना । स्मृत्वा विवर्ज्जयेदेतान् षड्दोषांश्च महीपतिः ॥ काककोकिलभृङ्गाणां वकव्यालशिखण्डिनाम् । हंसानां लोहकुट्टानां शिक्षेत चरितं नृपः ॥ काकात्० सर्व्वशङ्किता । कोकिलात्० माधुर्य्यम् । भृङ्गात्० अपीडयाऽर्थादानम् । वकात्० शत्रुग्रहणे एकाग्रताम् । व्यालात्० दुरुपसर्पित्वम् । शिखण्डिनः चित्रताम्० सर्पग्रहणाय मूकताम्० राज्ञा वात्मगोपनञ्च । हंसात्० सारग्राहित्वम् । लोहकुट्टात्० संधानम् ॥ कौशिकस्य क्रियां कुर्य्याद्विपक्षे मनुजेश्वरः । चेष्टां पिपीलिकानाञ्च काले भू

पः प्रदर्शयेत् ॥ कौशिकस्य० उलू-
कस्य रात्रौ काकावस्कन्दनम् पिपी-
लिकानाम्० सेनाबहुत्वं सर्पभक्ष-
णञ्च ॥ यथाग्निविस्फुलिङ्गानां बी-
जचेष्टा च शाल्मलेः। चन्द्रसूर्यस्व-
रूपस्य नीत्यर्थे पृथिवीक्षिता ॥ अ-
ग्निविस्फुलिङ्गात्० दूराद्दाहः। बी-
जात्० महद्द्रव्यनिष्पादनम्। उष्ण-
काले० चन्द्रः सुखदायी० शीतका-
लेन। एवं सूर्यः शीते सुखदायी उ-
ष्णकालेन एवं कालानुसारेण सुखदुः-
खदातृत्वम् ॥ बधकात् पद्मसरभशू-
लिन्या गुर्विणीस्तनात्। प्रजानृपे-
णचादेया तथा चण्डालयोषितः ॥
बधकात् निर्घृणत्वम्। पद्मात्०
कण्टकगोपनम् स्मितमुखता च।
सरभात्० हत्वापि शत्रून् नोद्रेकः
। यथ सरभोऽष्टापदः परोन्नतिं न
सहते। शूलिन्याः आर्त्तित्रापनम्।
गुर्विण्याः स्तनात् कालेर्थादानम्।
चण्डालयोषित् शौनिकी० छागशि-
रो दर्शयित्वा अन्यद्विक्रीणाति ॥
शक्रार्कयमसोमानां तद्वद्वायोर्महीपतिः।
रूपाणि पञ्च कुर्वीत महीपा-
लनकर्मणि ॥ यथेन्द्रश्चतुरो मासान्
वार्यौघेण विभूतलम्। आप्याययेत्
तथा लोकान् परिचारैर्महीपतिः
॥ परिचारैरर्थदानादिभिः ॥ मा-
सानष्टौ यथा सूर्यस्तोयं हरति रश्मि-

राजा

भिः। सूक्ष्मेणैवाभ्युपायेन तथा शु-
ल्कादिना नृपः ॥ यथा यमः प्रिय-
द्वेष्यौ प्राप्ते काले नियच्छति। तथा
प्रियाप्रियौ राजा दुष्टादुष्टे समो भवेत्
॥ पूर्णेन्दुमालोक्य यथा प्रीतिमान्
जायते नरः। एवं यत्र प्रजाः सर्वा
निर्वृतास्तच्छशिव्रतम् ॥ मरुतः
सर्वभूतेषु निगूढश्चरते यथा। एवं
चरेन्नृपश्चारैः पौरामात्यारिबन्धु-
षु ॥ न लोभार्थैर्न कामार्थैर्नार्थार्थै-
र्यस्य मानसम्। पदार्थैः क्षिप्यते
धर्मात् स राजा स्वर्गमृच्छति ॥ लो-
भादिप्रयोजनैः उत्पथग्राहिणो
मूढान् स्वधर्माच्चलितान्नरान्। यः
करोति निजे धर्मे स राजा स्वर्गमृच्छ-
ति ॥ उत्पथग्राहिणः पापिनः ॥
वर्णधर्मा न सीदन्ति यस्य राष्ट्रे तथाश्र-
माः। राजंस्तस्य सुखं तात परत्रेह
च शाश्वतम् ॥ एतद्राज्ञः परं कृत्यं
तथैतद्वृद्धिकारणम्। स्वधर्मे स्था-
पनं नॄणां चाल्यते न कुबुद्धिभिः ॥ पा-
लनेनैव भूतानां कृतकृत्यो महीप-
तिः। सम्यक् पालयिता भागं धर्म-
स्याप्नोति वै यतः ॥ एवमाचरते रा-
जा चातुर्वर्ण्यस्य रक्षणैः। स सु-
खी विहरत्येष शक्रस्यैति सलोकता-
म् ॥ इति मार्कण्डेयपुराणे मदाल-
सोपाख्यानाध्यायः ॥ राजते। रा-
जृ०। कनिन्युवृषेति कनिन् ॥

दौप्तिमति ॥ समासपदे चेत् श्रेष्ठार्थ वाचक : ॥

राजनम् । न० सामविशेषे ॥ त्रि० राज्ञ : शूद्रायामुत्पन्ने ॥ राज्ञोऽपत्यम् । राजश्वशुराद्यत् । राज्ञो जाताविवेतिवार्त्तिकात् शूद्रायामुत्पन्ने चत्रियजातित्वाभावादण् । अन्नितिप्रकृतिभाव : ॥

राजनामा । पुं० पटोले ॥

राजनीति : । स्त्री० नीतिशास्त्रे । राजवर्त्ती ॥ षष्ठ्यान्यवनीतिंराजनीतिस्व ॥

राजनीलम् । न० मरकतमणौ ॥

राजन्य : । पुं० चत्रिये ॥ अत्यविधिबोधितानिकर्माणियथा । राजन्यानाञ्चमदृष्टसङ्ग्रामेभूमिशासनम् । अत्राशक्तौवणिग्वृत्तं शूद्रवृत्तमथापिवेदिति ॥ अत्यनिषिद्धकर्माणियथा । राजन्यानांकरादानंविनाविवाहिकाश्रय : । प्रतिग्रह : सर्निदोचपरत्रचासुखप्रद : ॥ युद्धेपलायनञ्चैवतथाकातरतार्थिषु । अपालनंप्रजानाञ्चदानेधर्मेविरक्तता । अनवेचाखराष्ट्रस्य स्वगणानामनादर : । अनाख्यानामसन्मानंतेषांकर्मानवेचणाम् ॥ भृत्यानाञ्चपरीहासोनिषिद्ध : चत्रजन्मनामिति ॥ राज्ञापत्यम् । राजश्वशुराद्यत् । राज्ञोजाताविव । येचाभावकर्मणो

रितिप्रकृत्या ॥ राजपुत्रे ॥ वर्क्ष्मी ॥ क्षीरिकाद्रुमे ॥ राजति । राज० । राजेरन्य : ॥

राजन्यकम् । न० चत्रियसमूहे ॥ राजन्यानांचत्रियाणांसमूह : । गोत्रोचोष्ट्रोरभ्रराजराजन्येतिवुञ् । प्रकृत्याअकेराजन्यमनुष्ययुवान: ॥ पुं० राजन्यादिदेशे । राजन्यानांविषयोदेश : । राजन्यादिभ्योवुञ् ॥

राजन्यबन्धु : । पुं० दुर्वृत्तनृपतौ । राजाभासे ॥ राजन्यावन्धवोऽस्य ॥

राजन्वान् । त्रि० सुराज्ञिदेशे । यत्र देशेखधर्म्मशीलोराजा० तत्रदेशे । राजास्मिन्नस्त्यात्रवा । प्रशंसायां मतुप् । राजन्वान्सौराज्ये० इतिनिपातनान्नलोपाभाव : ॥ राजन्वती० भूमि : ।

राजपटोल : । पुं० पटोले ॥

राजपटोली । स्त्री० मधुपटोल्याम् ॥

राजपट्ट : । पुं० मणिविशेषे । विराजते ॥

राजपट्टिका । स्त्री० चातकखगे ॥

राजपथ : । पुं० राजमार्गे ॥ राज्ञ : पन्था : । ऋक्पूरितिसमासांत: ॥ तल्लक्षणंयथा धनूंषिदशविस्तीर्ण : श्रीमान्राजपथ : स्मृत : । नृवाजिरथनागानामसम्बाध: सुसञ्चर: इति ॥

राजपर्णी । स्त्री० प्रसारिणीलतायाम् ॥

राजपलाण्डुः। पुं॰ रक्तवर्णपलाण्डौ। यवनेष्टे। राजप्रिये। महामूले। दीर्घपत्रे। रक्तकन्दे। लालकांदा॰ लालप्याज॰ इ॰ भा॰॥

राजपीलुः। पुं॰ महापीलुवृक्षे॥

राजपुत्रः। पुं॰ बुधग्रहे॥ महाराजात्मजे॥ राजनन्दने। युवराजे। राजकुमारे। भट्टारके॥ कुमाररक्षाकर्त्तव्या राज्ञा यत्नेन सर्वदा॥ तथाहि। राजपुत्रस्य रक्षा च कर्त्तव्या पृथिवीक्षिता। आचार्यैश्चास्य कर्त्तव्यं नित्यमुक्तैस्सुरक्षणम्॥ धर्मकामार्थशास्त्राणि धनुर्वेदञ्च शिक्षयेत्। रथे च कुञ्जरे चैनं व्यायामं कारयेत्सदा॥ शिल्पानि शिक्षयेच्चैवं नाप्तैर्मिथ्याप्रियं वदेत्। गुणाधानमशक्यन्तु यस्य कर्त्तुं स्वभावतः॥ बन्धनं तस्य कर्त्तव्यं गुप्ते देशे सुखान्वितम्। अविनीतकुमारं हि कुलमाशु विशीर्यते॥ अधिकारेषु सर्वेषु विनीतं हि नियोजयेत्। आदौ स्वल्पेषु तत्पश्चात्क्रमेणाथ महत्स्वपि॥ मृगयापानमक्षांश्च वर्जयेत् पृथिवीपतिः। एतान्यासेवमानास्तु विनष्टाः पृथिवीक्षितः॥ बहवो नृपशार्दूला येषां सङ्ख्या न विद्यते। वृथाटनं दिवास्वप्नं विशेषेण विवर्ज्जयेत्॥ वाक्पारुष्यं न कर्त्तव्यं दण्डपारुष्यमेव च। परोक्षनिन्दा च तथा वर्ज्जनीया महीक्षिता॥ अर्थस्य दूषणं राजा हि प्रकारं विवर्ज्जयेत्। अर्थानां दूषणञ्चैव तथा चार्थेषु दूषणम्॥ अकारणात् समुच्छेदं दुर्गादीनामसत्क्रिया। अर्थानां दूषणं प्रोक्तं विप्रकीर्णत्वमेव च॥ अदेशकाले यद्दानमपात्रे दानमेव च। अर्थस्य दूषणं प्रोक्तमसत्कर्मप्रवर्त्तनम्॥ कामं क्रोधं मदं मानं लोभं हर्षन्तथैव च। जेतव्यमरिषड्वर्गं सादरं पृथिवीक्षिता॥ एतेषां विजयं कृत्वा कार्यं भृत्यजयं ततः। कृत्वा भृत्यजयं सर्वं राजा जनपदं जयेत्॥ कृत्वा तु विजयं तेषां शत्रून् बाह्यांस्ततो जयेत्। बाह्याश्च विविधा ज्ञेयास्तुल्याभ्यन्तरकृत्रिमाः॥ गुरवस्ते यथापूर्वं तेषु यत्नपरो भवेत्। पितृपैतामहं मित्रं सामन्तञ्च तथा रिपोः॥ कृत्रिमञ्च महाभाग मित्रं त्रिविधमुच्यते। तथापि च गुरुः पूर्वं भवेत्तत्रापि चादृतः॥ स्वाम्यमात्यो जनपदो दुर्गं सैन्यं तथैव च। कोषो मित्रञ्च धर्मज्ञ सप्ताङ्गं राज्यमुच्यते॥ सप्ताङ्गस्यापि राज्यस्य मूलं स्वामी प्रकीर्त्तितः। तन्मूलत्वात्तथाङ्गानां राजा रक्ष्यः प्रयत्नतः॥ षडङ्गरक्षा कर्त्तव्या तथा तेन प्रयत्नतः। अङ्गेभ्यो यस्तथैकस्य द्रोहमाचरतेऽल्पधीः॥ वधस्त

स्यतुकर्त्तव्यःशीघ्रमेवमहीक्षिता।
नराज्ञामृदुनाभाव्यंमृदुर्हिपरिभू-
यते ॥ नभाव्यंदारुणेनापितीक्ष्णा
दुद्विजतेजनः। कालेमृदुर्योभवति
कालेभवतिदारुणः ॥ राजालोक
द्वयापेक्षीतस्यलोकद्वयंभवेत्। भृ-
त्यैः सहमहीपालः परिहासंवि
वर्जयेत् ॥ भृत्याः परिभवन्तीहनृ
पंहर्षवशङ्गतम्। व्यसनानिचस-
र्वाणिभूपतिः परिवर्ज्जयेत् ॥ लो
कसङ्ग्रहणार्थायकृतकव्यसनोभवेत्।
शौटीरस्यनरेन्द्रस्यनित्यमुद्रिक्तचेत
सः ॥ जनाविरागमायान्तिसदा-
दुःसेव्यभावतः। स्मितपूर्वाभि-
भाषीस्यात्सर्वस्यैवमहीपतिः ॥ म
ध्येष्वपिमहाभागभृकुटिंनसमाच
रेत्। भाव्यंधर्मभृतांश्रेष्ठस्थूललक्षे
णभूभृता। स्थूललक्षस्यवशगासर्वा
भवतिमेदिनी। अदीर्घसूत्रस्सभवे-
त्सर्वकर्मसुपार्थिवः ॥ दीर्घसूत्र-
स्यनृपतेः कर्महानिर्ध्रुवंभवेत्। रा
गेदर्पेचमानेचद्रोहेपापेचकर्मणि ॥
अप्रियेचैवकर्त्तव्येदीर्घसूत्रः प्रश-
स्यते। राज्ञासम्भृतमन्त्रेणसदाभा-
व्यंद्विजोत्तम ॥ तस्यासम्भृतमन्त्रस्य
रक्षयाः सर्वापदोध्रुवाः। कृत्या-
न्येवतुकर्माणिजायन्तेयस्यभूपतेः ॥
नारब्धानिमहाभागतस्यस्याद्वसुधा
वशे। मन्त्रमूलंसदाराज्यंतस्मा-

न्मूलंसुरक्षितम् ॥ कर्त्तव्यंपृथिवी
पालैर्मन्त्रभेदभयात्सदा। मन्त्रवि
त्साधितोमन्त्रः संपदांमुखाव-
हः ॥ मन्त्रच्छलेनबहवोविनष्टाः
पृथिवीक्षितः। आकारैरिङ्गितैर्ग-
त्याचेष्टयाभाषितेनच ॥ नेत्रवक्त्रा
विकारैश्चगृह्यतेऽन्तर्गतंमनः। न-
यस्यकुशलैस्तस्यवशेसर्वावसुन्धरा।
भवतीहमहीभर्त्तुः सदापार्थिवन
न्दन। नैकस्तुमन्त्रयेन्मन्त्रंनराजा
बहुभिः सह ॥ नारोहेद्विषमांना
वंनापरीक्षितनाविकाम्। येचा
स्यभूमिंजयतोभवेयुः परिपन्थिनः
॥ तानानयेद्वशेसर्वान्सामादिभि-
रुपक्रमैः। यथानस्यात्कृशोभावः
प्रजानामनवेक्षया ॥ तथाराज्ञाप्रक
र्त्तव्यंस्वराष्ट्रंपरिरक्षता। मोहाद्रा
जास्वराष्ट्रंयः कर्षयत्यनवेक्षया ॥
सोचिराद्भ्रश्यतेराज्याज्जीविताच्चस
बान्धवः ॥ भृतोवत्सोजातबलः
कर्म्मयोग्योयथाभवेत्। तथाराष्ट्रं
महाभागभृतंकर्मसमंभवेत्। योरा
ष्ट्रमनुगृह्णातिराजास्वंपरिरक्षति-
॥ सङ्घातमुपयाचेत्तुविन्दतेसुमह
त्फलम्। राष्ट्राद्धिरण्यंधान्यञ्चमही
राज्ञामुरक्षिता ॥ नित्यंस्वेभ्यः
परेभ्यश्चयथामातायथापिता। नि
त्यंराजास्वराष्ट्रंयः कर्षत्यन्यस्वे
च्छया ॥ गोपितानिसदाकुर्यात्-

स्वविभागी प्रियाश्च । अजस्रमुपयोक्तव्यं फलं तेभ्यस्तथैव च ॥ धर्मकर्म्मदमायत्तं विधाने दैवमानुषे । तयोर्दैवमचिन्त्यं हि पौरुषे विद्यते क्रिया ॥ एवं महीं पालयतोऽस्य भर्त्तुर्लोकानुराग: परमो भवेच्च । लोकानुरागप्रभवा च लक्ष्मीर्लक्ष्मीवतश्चैव परा च कीर्त्ति: ॥ इति मात्स्ये १९४ अध्याय:॥ रज० तद्गुतिलोकप्रसिद्धवर्णसङ्करजातिविशेषे ॥ यथा । वैश्यादम्बष्ठकन्यायां राजपुत्रस्य सम्भव: इति पराशरपद्धति: ॥ करणकन्यायां चित्रियाज्जातश्चेति पुराणम् ॥

राजपुत्रकम् । न० राज्ञ: पुत्राणां समूहे ॥ राजपुत्राणां समूह: । गोत्रोक्षोष्ट्रोरभ्रेत्यादिना वुञ् ॥ पुं० राजाम्रे ॥

राजपुत्रिका । स्त्री० राजकन्यायाम्॥ शरारिपक्षिणि ॥ जात्याम् ॥ राज्ञ: पुत्रिकेव ॥

राजपुत्री । स्त्री० राजकन्यायाम् । मालात्याम् ॥ रेणुकाख्यौषधौ ॥ ॥ कटुतुम्ब्याम् ॥ राजरीतौ ॥ छुच्छुन्दर्याम् ॥

राजपुष्प: । पुं० नागकेशरवृक्षे ॥

राजपुष्पी । स्त्री०)

राजप्रिया । स्त्री०) करुणीवृक्षे ॥

राजफणिज्झक: । पुं० नागरङ्गवृक्षे ॥

राजफलम् । न० पटोले ॥

राजमाता । स्त्री० जम्ब्वां ॥

राजवदर: । पुं० उत्तमकोली । नृपश्रेष्ठ । नृपवदरे । राजवल्लभे । पृथुकोले । तनुबीजे । मधुरफले । राजकोले ॥ न० रक्तामलके ॥ लवणे ॥ लवण्याम् ॥

राजवला । स्त्री० गंधालिकायाम् । प्रसारण्यामोषधौ ॥ वलानां वलप्रदानां राजेव । राजदन्तादि: ॥

राजभद्रिका । स्त्री० शालुचीपक्षिणि ॥

राजभूयम् । न० राजत्वे ॥

राजभोगीणम् । न० राज्ञ: शरीरायहिते ॥ राज्ञो भोग: शरीरम् तस्मै हितम् । आत्मन्विश्वजनभोगोत्तरपदात्ख: ॥

राजभोग्य: । पुं० पियालवृक्षे ॥ न० जातीकोषे । जातीफले ॥

राजभोजी । पुं० वाजपेययज्ञे ॥

राजमण्डूक: । पुं० वृहद्भेके । महामण्डूके । पीताङ्गे । वर्षाघोषे ॥

राजमल्ल: । पुं० नृपमल्ले । उत्मिर्क्त । उद्धर्ते ॥ राज्ञां मल्ल: । मल्लानां राजा वा ॥

राजमार्ग: । पुं० राजपथे ॥

राजमाष: । पुं० वर्वटे । नीलमाषे । महामाषे । चौं रा० लोबियाबडा इ० भा० ॥ राजमाषो गुरु: स्वादुस्तुवरस्तर्पण: सर: । रूक्षो वातकरो रुच्य: स्तन्यो भूरिमलप्रद: ॥

श्वेतोरक्तस्तथाकृष्णा त्रिविध : स प्रकीर्त्तित: । योमहांस्तेषु भवति सएवोक्तागुणाधिक : ॥ अपिच । राजमाषं परं हृद्यं कफपित्तहरं परम् । आध्मानवातकृद्रूक्षोतत्पचं तद्गुणावहम् ॥ माषाणांराजा । राजदन्तादि : ॥

राजमुद्ग : । पुं० मकुष्ठके ॥

राजयक्ष्मा । पुं० क्षयरोगे । यक्ष्मणि ॥ राज्ञश्चन्द्रमसोयस्मादभूदेषकिलामय : । तस्मात् तं राजयक्ष्मेति केचिदाहुर्मनीषिण : ॥ षष्ठीतत्पुरुष : कर्मधारयोवा । तथाहवाग्भट : । अनेकरोगानुगतोबहुरोगपुर : सर : । राजयक्ष्माक्षय : शोषोरोगराडितिचस्मृत : ॥ नक्षत्राणांद्विजानाञ्चराज्ञोभूद्यदयं पुरा । यच्चराजाचयक्ष्माचराजयक्ष्माततोमत : ॥ इति । महापातकजचिह्नमप्ययम् । यथाहविष्णु : । अथनरकानुभूतदु : खानांतिर्यक्त्वमुत्तीर्णानांमानुष्येलक्षणानिभवन्ति । कुष्ठ्यतिपातकी० ब्रह्महायक्ष्मी०सुराप : श्यावदन्तक : सुवर्णहारीकुनखीगुरुतल्पगोदुश्चर्मेत्यादिकूर्मपुराणम् ॥

राजयज्ञ : । पुं० अश्वमेधे ॥ राज्ञएवतत्राधिकारात् ॥ राज्ञोयज्ञ : ॥

राजयोग : । पुं० ज्ञानपरिपाके । व्यवहारेप्यविक्षिप्तचित्ततालक्षणे योगविशेषे ॥ राजत्वात्सर्वयोगानांराजयोगइतिस्मृत : । राजवत्तोप्यमानं तंपरब्रह्माणमव्ययम् ॥ देहिनं प्रापयेद्यस्तुराजयोग : सउच्यते-इत्युक्ते : ॥ राज्ञउपयुक्तोयोग : । योगानांराजेतिवा ॥ हठयोगोदेहआयासकर : । अयंगुरोरवाप्तसन्निरायासेनमोक्षरूपपुरुषार्थप्रद : । हठवदस्याप्यष्टाङ्गानिसन्ति ॥

राजयोगी । त्रि० ज्ञानपरिपाकयुक्ते । व्यवहारेप्यविक्षिप्तचित्ततालक्षणयोगश्चेष्टवति ॥

राजयोग्य : । त्रि० राजार्हे ॥

राजरङ्गम् । न० रजते ॥

राजराज : । पुं० धनाधिपे । कुवेरे ॥ राज्ञांयक्षाणांराजा । राजाह : सखिभ्यष्टच् ॥ नृपेशे । सार्वभौमे ॥ सुधाकरे । चन्द्रे ॥

राजरीति : । स्त्री० पित्तलविशेषे । पाकतुण्डाम् ॥ महेश्वर्याम् । कपिलायाम् ॥

राजर्षि : । पुं० प्रभुत्वे सतिसूक्ष्मार्थनिरीक्षणक्षमे०प्रजापालनाधिकारिण्यकृतपर्ण निमिप्रमुखे ॥ राजाचासौऋषिश्च ॥

राजलक्ष्मा । पुं० युधिष्ठिरे ॥

राजवंश्य : । त्रि० राजवीजिनि । राजवंशोद्भवे ॥ वंशेभव : । दिगादि-

स्यादयत्। राज्ञोवंश्यः॥ राजवंशे साधुर्वा। तत्रसाधुरितियत्॥

राजवान्। त्रि॰ राजमात्रयुक्तदेशे॥ सुराष्ट्रदेशेराजन्वान्स्यात्ततोन्यत्र राजवान्। राजास्त्यस्यास्मिन्वा। मतुप्॥

राजवर्त्म। न॰ घण्टापथे। राजपथे॥

राजवला। स्त्री॰ भद्रबलायाम्॥

राजवल्लभः। पुं॰ राजादन्याम्॥ राजाम्रे॥ राजबदरे॥ नारायणदासकविराजकृतद्रव्यगुणग्रन्थविशेषे॥ त्रि॰ नृपतिप्रिये॥

राजवल्ली। स्त्री॰ तोयवल्ल्याम्। उक्ता॰ इ॰ गौ॰ दे॰ भा॰॥

राजवारुणी। स्त्री॰ सुराप्रभेदे॥

राजवाहः। पुं॰ घोटके॥ वाहानां राजा। राजदन्तादिः॥

राजवाह्यः। पुं॰ राजवाहकहस्तिनि। उपवाह्ये। विजयकुञ्जरे॥ त्रि॰ राजवहनीये।

राजवीजी। त्रि॰ राजवंश्ये। राज्ञोवीजयितुंशीलमस्य। वीजव्यजनेऽदन्तः। सुपीतिणिनिः॥ यद्वा। राज्ञोवीजम्॰ राजवीजम्। तदस्यास्ति। अतइनिः॥

राजवृक्षः। पुं॰ गिरिमाल॰ इतिप्रसिद्धसुवर्णके। आरग्वधे॥ राजा चासौवृक्षश्च॥ वृक्षाणांराजावा॥

राजदन्तादिः॥ रोगाणांराजानं वृक्षतिवा। वोव्रश्चूच्छेदने। वाहुलकात्सुक्॥ पियाले॥ लङ्कास्थायिनिवृक्षे। लङ्काथृहर॰ इ॰ भा॰॥

राजवृत्तम्। न॰ नृपचारित्रे। तच्चतुर्विधम्। यथाहकामन्दकः। न्यायेनार्जनमर्थस्यवर्द्धनंपालनंतथा। सत्पात्रेप्रतिपत्तिश्चराज्ञोवृत्तंचतुर्विधमिति॥

राजशणः। पुं॰ पट्टवृक्षे। पाटसन॰ इ॰ भा॰॥

राजशफरः। पुं॰ इलिशमत्स्ये॥

राजशय्या। स्त्री॰ राज्ञः शयनीये। महाशय्यायाम्॥

राजशाकः। पुं॰ वास्तूके॥

राजशास्त्रम्। न॰ नीतिशास्त्रे॥ राज्ञांशास्त्रम्॥

राजशिम्बः। पुं॰ निष्पावे॥

राजशुकः। पुं॰ प्राज्ञे। शतपत्रे। नृपप्रिये। राजसुआ॰ इ॰ भा॰ प्र॰ पक्षिविशे॥

राजशृङ्गः। पुं॰ मद्गुरमत्स्ये॥ न॰ राजच्छत्रे। कनकदण्डके॥

राजसः। पुं॰ राजसाहङ्कारे। इन्द्रियाणांकारणे। तैजसे॥ त्रि॰ रजोगुणोद्भवे। रजोगुणप्रधाने॥ तल्लक्षणंयथा। आरम्भरुचिताधैर्यमसत्कार्यपरिग्रहः। विषयोपसे-

वाचाजस्रं राजसं गुणलक्षणम् ॥ आरम्भरुचिताफलार्थं कर्मानुष्ठान शीलता ॥ अपिच । येनास्मिन् कर्मणालोकेख्यातिमिच्छति पुष्कलाम् । नचशोचत्यसम्पत्तौतद्विज्ञेयन्तुराजसमिति ॥ रजसोयम् । अण् ॥

राजसदनम् । न० राजगृहे । सौधे ॥ राज्ञः सदनम् । योग्यत्वात् ॥ यद्वा । सदनानांराजा । राजदन्तादिः ॥ तत्र्पर्यायः ॥ सौधाऽस्त्री राजसदनमुपकार्योपकारिका । स्वस्तिकः सर्वतोभद्रोनन्द्यावर्तादयोपिच । विच्छन्दकः प्रभेदाहिभवन्तीश्वरसद्मनाम् ॥

राजसधनम् । न० धनविशेषे ॥ यथा । कुसीदकृषिवाणिज्यशुल्कागानानुवृत्तिभिः । कृतोपकारादाप्तश्चराजसंसमुदाहृतम् ॥ अनुवृत्त्याशिष्यया ॥

राजसभा । स्त्री० नृपतिसमाजे ॥ राज्ञः सभा । सभाराजेत्यत्रराजपर्यायस्यैवग्रहणान्नक्लीवत्वम् ॥

राजसयज्ञः । पुं० सकामानांयज्ञे ॥ अभिसन्धायतुफलं दम्भार्थमपिचैवयत् । इज्यतेभरतश्रेष्ठतं यज्ञं विद्धि राजसम् ॥

राजसर्प्पः । पुं० सर्पविशेषे । भुजङ्गभोजिनि ॥

राजसर्षपः । पुं० राजिकायाम् । आसुर्याम् ॥ तिसृभिर्लिक्षाभिः परिमिते ॥

राजसायुज्यम् । न० राजत्वे ॥ राज्ञः सायुज्यम् ॥

राजसारसः । पुं० मयूरे ॥

राजसाहङ्कारः । पुं० तैजसाहङ्कारे । इन्द्रियाणांकारणे ॥

राजसाहारः । पुं० रजोगुणिनाम्भोजने ॥ यथा । कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः । आहाराराजसस्येष्टा दुःखशोकामयप्रदाः ॥

राजसी । स्त्री० दुर्गायाम् ॥ रजोगुणसम्बन्धिन्याम् ॥

राजसूयः । पुं० राज्ञाकर्त्तव्ये यज्ञविशेषे । नृपाध्वरे । क्रतुराजे । क्रतूत्तमे ॥ राज्ञासोतव्योऽभिषवद्वारानिष्पादयितव्यः । षुञ् अभिषवे । यद्वा । लतात्मकः सोमोराजासस्यूयते० कण्डातेऽत्रेत्यधिकरणे क्यप् । राजसूयसूर्येत्यादिना निपातनाद्दीर्घः ॥

राजसूयकी । स्त्री० राजसूयस्य दक्षिणायाम् ॥

राजस्कन्धः । पुं० घोटके ॥

राजस्वम् । न० करे । राजग्राह्यभागे ॥

राजस्वर्णः । पुं० राजधूस्तूरके ॥

राजहंसः। पुं० कलहंसे ॥ चरणै-
श्चञ्चुसहितैर्लोहितायैश्च सिताः
। ते राजहंसा विख्याता इत्याहुः
कोषकोविदाः ॥ हंसानां राजा ।
राजदन्तादिः ॥ कादम्बे । बालि
हांस० इति गौडदेशप्रसिद्धे । नील
हंसोऽयम् ॥ नृपोत्तमे ॥

राजहंसिनी । स्त्री० रसालायाः प्रभे
दे । राजहंस्याम् ॥ निर्नीरं पाचि
तं क्षीरं माहिषं तत्र दधि । शुभ्रश
र्करयैलाढ्यं गालितं राजहंसिनी
॥ राजहंसी सुमधुरा बल्या हृष्यतरा
हिमा । अत्यर्थं पित्तशमनी किञ्चित्
कफकरी स्मृता ॥

राजहर्षणम् । न० तगरपुष्पे ॥

राजहस्ती । पुं० राजगजे । मारीचे ।
याजकगजे । मदोत्कटे ॥

राजहासकः। पुं० मत्स्यविशेषे । का
तरे । कतले । राजीवे ॥

राजातनः। पुं० पियालवृक्षे ॥ रा-
जानमतति । अत० । कर्त्तरि०-
ल्युट् ॥

राजादनः। पुं० फलाध्यक्षे । क्षीरि-
कायाम् । न० पियाले ॥ राजभि-
रद्यते । अद० । कर्म्मणि ल्युट् ॥
किंशुके । चिपचके ॥

राजादनी । स्त्री० क्षीरिकायाम् ।
खिर्नी० इ० भा० ॥

राजानुजीवी । त्रि० राजोपजीविनि ॥

तस्य कर्माणि यथा । मत्स्यपुराणे ।
यथानुवर्त्तितव्यं स्यान्मनो राजोपजी
विना । तथा ते कथयिष्यामि निबो-
ध गदितो मम । आज्ञा सर्वात्मना-
कार्या स्वशक्त्या रविनन्दन । आचि-
न्त्यं वचनं तस्य न वक्तव्यं तथा वचः ॥
अनुकूलं प्रियं तस्य वक्तव्यं जनसंसदि ।
रहोगतस्य वक्तव्यमप्रियं यद्धितं भवे-
त् ॥ परार्थमस्य वक्तव्यं स्वस्थे चेत-
सि भार्गव । स्वार्थः सुहृद्भिर्वक्तव्यो
न स्वयन्तु कदाचन ॥ कार्याभिघातः
सर्व्वेषु रक्षितव्यः प्रयत्नतः । न-
च हिंस्यं धनं किञ्चिन्नियुक्तेन च कर्म-
णि ॥ नोपेक्ष्यं भाष्यमाणस्तु तथा रा-
ज्ञः प्रियो भवेत् । राज्ञश्च न तथा-
कार्यं वेषभाषितचेष्टितम् ॥ राज-
लीला न कर्त्तव्या तद्विद्विष्टं विवर्जये
त् । राज्ञः समोऽधिको वा न कार्यो-
वेशो विजानता ॥ द्यूतादिषु तथै-
वास्य कौशलन्न प्रदर्शयेत् । प्रदर्श्य-
कौशलं चास्य राजानन्तु विशेषयेत् ॥
अन्तःपुरधनाध्यक्षैर्वैरदूतैः समा
गतैः । संसर्गं न व्रजेद्राजन् विना पा
र्थिवशासनम् ॥ निःस्नेहतां चाव-
मानं प्रयत्नेन च गोपयेत् । यच्च गुह्यं
भवेद्राज्ञो न तल्लोके प्रकाशयेत् ॥ नृपे
णाश्रावितं यत्स्याद्वाच्यावाच्यं नृपो-
त्तम । न तत् संश्रावयेल्लोके तदा रा-
ज्ञः प्रियो भवेत् । आज्ञाप्यमाने-

परित्याज्यं नित्यं राजानुजीविना ॥ श्रु
तेनविद्याशिल्पैश्चसंयोज्यात्मानमा
त्मना । राजसेवांततः कुर्याद्भूत
येभूतिवर्द्धिनीम् ॥ नमस्कार्याः
सदाचास्यपुत्रवल्लभमन्त्रिणः । स
चिवैश्चास्यविश्वासोनतुकार्यः क
थञ्चन ॥ अपृष्टश्चास्यनब्रूयात्का
मंब्रूयात्तथापदि । हितंपथ्यञ्च
वचनंहितैः सहसुनिश्चितम् ॥
चित्तञ्चैवास्यविज्ञेयंनित्यमेवोप-
जीविना । भर्त्तुराराधनंकुर्याच्चित्त
ज्ञोमानवः सुखम् ॥ रागापरागौ
चैवास्यविज्ञेयौभूतिमिच्छता । त्यजे
द्विरक्तंरक्तोहवृत्तिन्तुकारयेत् ।
विरक्तःकारयेन्नाशंविपक्षाभ्युदयन्तथा
। आशावर्द्धनकंकृत्वाफलनाशंकरो
तिच । अकोपोपिसकोपाभःप्रसन्नो
ऽपिचनिष्फलः । वाक्यंसमन्दंच
दातिवृत्तिच्छेदंकरोतिच । प्रदेश
वाक्यमुदितोनसम्भावयतेन्यथा ।
आराधनासुसर्वासुसुप्तवच्चविचेष्टते ।
कथासुदोषंक्षिपतिवाक्यभङ्गंकरो-
तिच । लक्ष्यतेविमुखश्चैवगुणस-
ङ्कीर्त्तनेकृते । दृष्टिंक्षिपत्यथान्य
चक्रियमाणेचकर्मणि । विरक्तलक्ष
णंह्येतच्छृणुरक्तस्यलक्षणम् ॥ दृ
ष्ट्वाप्रसन्नोभवति वाक्यंगृह्णाति
चादरात् । कुशलादिपरिप्रश्नो-
संप्रयच्छतिचासनम् । बिरक्तदर्शने

चान्यस्मिन् समुत्थायस्वरान्वितः ।
अहंकिंकरवाणीतिवाच्योराजाविजा-
जानता ॥ कार्य्यावस्थाञ्चविज्ञाय-
कार्य्यमेवतथाभवेत् । सततंक्रियमा
णेस्मिन्लाघवन्तुब्रजेद्ध्रुवम् ॥ रा
ज्ञः प्रियाणिवाक्यानिनचात्यर्थंपु
नः पुनः । नहास्यशीलश्चभवेन्न-
चापिभृकुटीमुखः । नातिवक्तान-
निर्वक्तानचमत्सरिकस्तथा । आ
त्मसम्भाबितश्चैवनभवेत्तुकथञ्चन ।
दुष्कृतानिनरेन्द्रस्यनतुसङ्कीर्त्तयेत्
क्वचित् । वस्त्रंशस्त्रमलङ्कारंराज्ञा
दत्तञ्चधारयेत् औदार्य्येणनतद्दे
यमन्यस्मैभूतिमिच्छता । नचैवो
पासनंकार्य्यंदिवास्वप्नंविवर्ज्जयेत् ॥
नानिर्दिष्टे तथाद्वारेप्रविशेतकदाच
न । नच पश्येतराजानमयोग्यासु-
चभूमिषु राज्ञस्तुदक्षिणेपार्श्वेवा
मेचोपविशेत्तथा । पुरस्ताच्चतथाप-
श्चादासनन्तुविगर्हितम् ॥ जृम्भानि
ष्ठीवनंकासंकोपंपर्य्यस्तिकाश्रयम् ।
भृकुटींवान्तमुद्गारंतत्समीपेविव-
र्ज्जयेत् ॥ स्वयंतत्रनकुर्वीतस्वगुणा
ख्यापनंतथा । स्वगुणाख्यापनेचैव
परमेवप्रयोजयेत् ॥ हृदयंनिर्मलं
कृत्वापरांभक्तिमुपाश्रितैः । अनु
जीविगणैर्भाव्यंनित्यंराज्ञामतन्द्रि
तैः ॥ शाठ्यंलौल्यञ्चपैशुन्यंना-
स्तिक्यंच्युद्रतांतथा । चापल्यञ्च

चाश्चरहस्ये चनशङ्कते । जायते- हृष्टवदनः श्रुत्वातस्यतुतत्कथाम् ॥ अप्रियाण्यपिवाक्यानि तदुक्तान्यभिनन्दते । उपायनञ्चगृह्णाति स्तोकमप्यादरात्तथा ॥ कथान्तरेषुस्मरतिप्रहृष्टवदनस्तथा । इतिरक्तस्यकर्त्तव्यासेवारविकुलोद्वह ॥ आपत्सुनत्यजेत्पूर्वं विरक्तमपि सेवितम् । मित्रंनचापत्सुतथाच भृत्यंत्यजन्तियेनिर्गुणमप्रमेयम् । प्रभुंविशेषेणचतेव्रजन्तिसुरेन्द्रधामामरवृन्दजुष्टम् ॥ इतिमत्स्यपुराणे राजधर्मेऽनुजीविवृत्तिनामाध्यायः ॥ १९० ॥

राजान्नम् । न० आन्ध्रदेशोद्भवशालिविशेषे । राजार्हे । दीर्घशूकके । धान्यश्रेष्ठे ॥ राजस्वामिकभक्ते ॥

राजाम्र: । पुं० न० आम्रविशेषे । राजफले । मधुरे । कामाङ्गे । टङ्के ॥ राजाम्रंतुवरंस्वादुविशदं शीतलंगुरु । ग्राहिरूक्षंविबन्धाध्मवातकृत्कफपित्तनुत् ॥

राजाम्ल: । पुं० अम्लवेतसे ॥

राजार्कः । पुं० सितार्कवृक्षे । वसुके । मन्दारे । सदापुष्पे । अलर्के ॥

राजार्हम् । न० जोङ्गके । अगुरुणि । त्रि० राजयोग्ये ॥ राजानमर्हति । अच् ॥

राजार्हा । स्त्री० जम्ब्वाम् ॥

राजालाबु: । स्त्री० स्वादुतुम्ब्याम् । महातुम्ब्याम् । शाकालाब्वां ॥

राजालुक: । पुं० महाकन्दे । मूलके ॥

राजावर्त्त: । पुं० उपरत्नभेदे । आवर्त्तमणौ । रेवटी० इ० भा० प्र० ॥ राजावर्त्तः प्रमेहघ्नश्छर्दिहिक्कानिवारणः ॥ विराटदेशजहीरके । विराटजे ॥ राजपट्टे ॥

राजाहि: । पुं० द्विमुखसर्पे । विषायुधे । अहीरणौ ॥ अहीनांराजा । राजदन्तादिः ।

राजि: । स्त्री० वीथ्याम् । पङ्क्तौ ॥ रेखायाम् । निरन्तरपङ्क्तिसाधारणे ॥ राजति । राज० । इन् । वसिवपियजिराजीत्यादिना० इञ् वा ॥

राजिका । स्त्री० आसुर्य्याम् । क्षवे । क्षुधाभिजनने । राजसर्षपे । राई० इ० भा० ॥ राजिकाकफपित्तघ्नीतीक्ष्णोष्णारक्तपित्तकृत् । किञ्चिद्रूक्षाग्निदाकण्डूकुष्ठकोष्ठक्रिमीन्हरेत् । अतितीक्ष्णाविशेषेणतद्वत्कृष्णापिराजिका ॥ केदारे ॥ रेखायाम् । पङ्क्तौ ॥ राजति० राजयतिवा । राज० । क्वुन् ॥

राजिकाफल: । पुं० गौरसर्षपे ॥

राजिफला । स्त्री० चीनाकर्कट्याम् ॥

राजिमत्फला । स्त्री० राजकोशात-

श्यामम् ॥

राजिलः । पुं० डुण्डुभसर्पे ॥ राजिलोमनिर्विषसर्पः ॥ राजिः रेखाऽस्यास्ति । सिध्मादित्वाल्लच् ॥ यद्वा । राजिं लाति । लाऽऽदाने । आतोनुपसर्गे कः ॥

राजी । स्त्री० निश्छिद्रपङ्क्तौ ॥ कृदिकारादिति ङीष् ॥

राजीफलः । पुं० पटोले ॥

राजीवः । पुं० हरिणप्रभेदे ॥ राजीवस्तु मृगो ज्ञेयो राजीभिः परितावृतः । राजीवस्तु गुणैर्ज्ञेयः पृषतेन समो जनैः ॥ राइखड इति ख्याते वृहन्मत्स्यविशेषे ॥ हस्तिनि ॥ सारसपक्षिणि ॥ न० नलिने । पद्मे ॥ राजी रेखाऽस्यास्ति । अन्येभ्योऽपि दृश्यत इति शार्त्तिकाद्वः ॥ केशरस्य राज्यस्यास्तीति वा ॥ त्रि० राजोपजीविनि ॥

राजीवलोचनः । त्रि० कमलनयने ॥

राजेन्द्रः । पुं० श्रीरामचन्द्रे ॥ मण्डलेश्वरादृशगुणे राजनि ॥ यथा । चतुर्थांशजनपर्यन्तमधिकारो नृपस्य च । यो राजा तच्छतगुणः स एव मण्डलेश्वरः ॥ तस्माद्दशगुणो राजा राजेन्द्रः परिकीर्त्तितः ॥ इ० ब्र० वैवर्त्तपुराणे ॥

राजोद्वेजनसंज्ञकः । पुं० भूताङ्कुशवृक्षे ॥

राज्ञी । स्त्री० राजप्रियायाम् । नृपतेः पत्न्याम् । राणी० इ० भा० ॥ भास्करस्य भार्य्यायाम् ॥ कांस्ये ॥ नील्याम् ॥ त्रैलोक्यात्मनः कोशस्य पश्चिमदिग्भागे ॥ राज्ञा वरुणेनाधिष्ठितत्वात् । सन्ध्यारागयोगाद्वा ॥

राज्यम् । न० नीवृति । जनपदे । देशे । विषये । उपवर्तने ॥ तल्लक्षणमुक्तं वरदातन्त्रे । यथा । लक्षाधिपत्यं राज्यं स्यात्साम्राज्यं दशलक्षके । शतलक्षे महेशानि महासाम्राज्यमुच्यते ॥ इति ॥ अपि च ॥ स्वाम्यमात्यौ पुरं राष्ट्रं कोशदण्डौ सुहृत्तथा । सप्तप्रकृतयो ह्येताः सप्ताङ्गं राज्यमुच्यते ॥ इति ॥ राज्ञः कर्म भावो वा ॥ पत्यन्तपुरोहितादिभ्यो यक् ॥ राज्यं नेच्छति पिचादत्तं तत्परिणामवित् । यत्र प्रविष्टः पुरुष आत्मानं नावबुध्यते ॥

राज्यका । स्त्री० पिष्टराजिकादधिलवणमिश्रितवास्तूकादौ । रायता० इ० भा० ॥ राज्यकया तिरोचन्यापाचन्यातांस्तु भक्षयेत् ॥ तान् वटकान् ॥

राज्यमूलम् । न० मन्त्रसंरक्षणे ॥

राज्याङ्गम् । न० राज्यस्योपाये । प्रकृतौ । स्वाम्यमात्यसुहृत्कोषराष्ट्रदुर्गबलेषु ॥ राज्यस्य राजकर्म्मणोङ्गं साधनम् । स्वामी० राजा० पुरो

ष्ठितइतिश्रीधर :। अमात्योमन्त्री। सुहृत्० मित्रम्। कोशोभाण्डागार :। राष्ट्रंदेश :। पर्व्वतादीनिदुर्गाणि। बलंसैन्यम्। उक्तञ्चकामन्दकीये। स्वाम्यमात्यश्चराष्ट्रञ्चदुर्गं-कोशोबलंसुहृत्। परस्परोपकारीदंसप्ताङ्गंराज्यमुच्यते। पौरश्रेण्यासहाष्टाङ्गमपिराज्यंप्रकीर्त्तितमिति॥ सप्ताङ्गस्यापिराज्यस्यमूलंस्वामी-प्रकीर्त्तित :। तन्मूलत्वात्तथाङ्गानांराजारक्ष्य : प्रयत्नत :॥ षडङ्गरक्षाकर्त्तव्यातथातेनप्रयत्नत :। अङ्गेभ्योयस्त्वथैकस्यद्रोहमाचरतेऽल्पधी :॥ वधस्तस्यतुकर्त्तव्य : शीघ्रमेवमहोक्षिता॥

राटि :। स्त्री॰ युद्धे। राड॰ इ॰भा॰प्र॰॥

राडि :। स्त्री॰ शरारिखगे॥

राढ :। पुं॰ मदनद्रुमे। मयनफलाख्ये॥

राढक :। पुं॰ स्वनामाख्यातदेशे॥ यथा। प्राच्यांमागधशोणौचवारेन्द्रोगौडराढका :। इतिज्योतिषतत्त्वम्॥

राढा। स्त्री॰ जनपदविशेषे। सुह्मेषु॥ शोभायाम्॥ गौडदेशपुरीविशेषे॥

राढि :। स्त्री॰ युद्धे॥

राढीय :। त्रि॰ राढदेशोद्भवे॥

रात :। त्रि॰ दत्ते॥

रात्रम्। न॰ ज्ञाने॥ यथा। रात्रञ्चज्ञानवचनंज्ञानंपञ्चविधंस्मृतम्। तेनेदंपञ्चरात्रञ्चप्रवदन्तिमनीषिण :॥

रात्रक :। पुं॰ पञ्चमश्चक्रवर्षैर्वासिति। संवत्सरमभिव्याप्यवेश्यावेश्मनिवासिनि॥ न॰ पञ्चरात्रे॥

रात्रि :। स्त्री॰ सूर्य्यकिरणाभावच्छिन्नकाले। निशाकाल। निशीथिन्याम्। निशामायाम्। रात॰ इ॰ भा॰॥ तस्या : कारणंयथा। यदास्तमुपयातोऽसौरश्मिभिःसोऽग्निकोणगः। कायञ्चनित्यदारात्रि :स्यात्ततःक्रिवलाद्दिनन्॥ इतिवह्निपुराणम्॥ इन्द्रकालस्यपत्नी। पश्चिमसन्ध्यायाम्॥ रातिसुखम्। रा॰। राशब्दस्त्रियांत्रिप्॥ रात्रे : पूर्व्वौत्तरौयामौविद्यात्वासिनतौजयेत्॥ हरिद्रायाम्॥

रात्रिचर :। पुं॰ राक्षसे॥ रात्रौचरति। चरेष्ट :। रात्रे : कृतिविभाषेतिपचेमुमभाव :॥ त्रि॰ रात्रौगमनकर्त्तरि॥

रात्रिचरी। स्त्री॰ राक्षस्याम्॥ टित्वान्ङीप्॥

रात्रिजलम्। न॰ कुज्झटिकायाम्। रात्रेर्जलम्॥

रात्रिजागर :। पुं॰ कुक्कुरे॥ त्रि॰

रात्रौजागरणकर्त्तरि ॥

रात्रिजागरदः । पुं॰ मशके ॥

रात्रिचरः । पुं॰ यातुधाने । राक्षसे ॥ रात्रौचरति । चरेष्टः । रात्रेः कृतिविभाषेतिपक्षेमुम् । त्रि॰ रात्रौगमनकर्त्तरि ॥

रात्रिचरी । स्त्री॰ राक्षस्याम् ॥

रात्रिन्दिवम् । अ॰ अहोरात्रयोः ॥ रात्रौचदिवाच । अचतुरेत्यादिना ऽधिकरणार्थयोर्द्वन्द्वेसमासान्तो- निपातितः । अव्ययान्तत्वादव्य- यम् ॥

रात्रिपुष्पम् । न॰ उत्पले ॥

रात्रिमटः । पुं॰ राक्षसे ॥ अ- टति । अटगतौ । पचाद्यच् । स प्तमीतियोगविभागात्समासः ॥ रात्रौअटतिवा । रात्रेःकृतिविभा षेतिमुम् ॥

रात्रिमणिः । पुं॰ चन्द्रे ॥ रात्रेर्म- णिरिव ॥

रात्रिवासः । पुं॰ अन्धकारे ॥ रात्रौ वासोऽस्य ॥

रात्रिवासः । न॰ रात्रौशयनकाली नपरिधेयेवस्त्रे ॥ यथाशयनस्यान्ध कारेषुरात्रिवासोदिनेतथा । स्नाना म्बरंकुवेशश्च वर्जयेच्छ्लक्ष्णभोजन म् ।

रात्रिविगमः । पुं॰ प्रभाते ॥ रात्रे विंगमोऽत्र

रात्रिविश्लेषगामी । पुं॰ चक्रवाके ॥

रात्रिवेदः । पुं॰ कुक्कुटे ॥

रात्रिवेदी । पुं॰ कुक्कुटे ॥

रात्रिहासः । पुं॰ श्वेतोत्पले ॥

रात्रिहिण्डकः । पुं॰ अन्तःपुरर- क्षके ॥

रात्री । स्त्री॰ निशायाम् । रात्रौ ॥ कृदिकारादितिपाक्षिकोङीष् ॥

रात्रौ । अ॰ निशि ॥

रात्र्यन्धः । त्रि॰ रात्रौदृष्टिहीननरे । रतन्धा॰वृ॰भा॰ ॥ तन्नाशकौषधंय था । देवदारोश्चवेचूर्णमजामूत्रेण- भावयेत् । एकविंशतिवारमक्षिणी तेनचाञ्जयेत् ॥ रात्र्यन्धनापटलता नश्येदितिविनिश्चयः ॥ इतिगारु- डे ॥ १८८ ॥ अध्यायः ॥ का- कान्दी ॥

राद्ध । त्रि॰ पक्वे । सिद्धे ॥ ल- ब्धे ॥ राध्यति । राध॰ ॥ राधे रनिटःक्तः ॥

राद्धान्तः । पुं॰ सिद्धान्ते ॥ राद्धः सिद्धोन्तोनिश्चयोयस्मिन् ॥

राधः । पुं॰ वैशाखमासे । माधवे ॥ राधा॰विशाखा॰तद्युतोपौर्णमासी॰ राधी । साऽस्मिन्नस्ति । साऽस्मिन्पौ र्णमासीत्यण् ॥

राधनम् । न॰ साधने ॥ प्राप्तौ ॥ तोषे ॥

राधना । स्त्री॰ भाषणे ॥

राधरङ्कः। पुं॰ सुनासीरे॥ सीरके॥ घनोपले॥ शीकरे॥ इ॰ मेदिनी॥

राधरङ्कुः। पुं॰ राधरङ्कार्थे॥ इति हेमचन्द्रः॥ *

राधः। न॰ ऐश्वर्ये॥

राधा। स्त्री॰ गोपीविशेषे। तस्यानामानि यथा। राधारासेश्वरीरासवासिनीरसिकेश्वरी। कृष्णप्राणाधिका कृष्णप्रिया कृष्णस्वरूपिणी। कृष्णवामांशसम्भूता परमानन्दरूपिणी। कृष्णा वृन्दावनी वृन्दा वृन्दावनविनोदिनी॥ चन्द्रावती चन्द्रकान्ता शतचन्द्रनिभानना। नामान्येतानि साराणि तेषामभ्यन्तराणि चेति॥ राधेत्येवञ्च संसिद्धा राकारो दानवाचकः। स्वयं निर्वाणदात्री या सा राधा परिकीर्त्तिता इति ब्रह्मवैवर्त्तपुराणम्। राध्नोति सकलान् कामान् तस्मात् राधेति कीर्त्तितेति देवीभागवतम्। राध्नोति साधयतीत्यर्थः॥ महालक्ष्म्याम्॥ यथा। यन्माययामोहिताश्च ब्रह्मविष्णुशिवादयः। वैष्णवास्तां महालक्ष्मीं परां राधां वदन्ति ते॥ यदर्द्धाङ्गा महालक्ष्मीः प्रिया नारायणस्य च॥ धन्विनांचिचभेदे। वेधविशेषे॥ विशाखानक्षत्रे॥ आमलक्याम्॥ विष्णुक्रान्तायाम्॥ विद्युति॥ राध्नोति कार्यमनया। राध संसिद्धौ। गुरोश्च हलः इत्यकारः॥ यद्वा। राधयति। अच्। टाप्॥

राधाकान्तः। पुं॰ श्रीकृष्णे॥

राधाकृष्णः। पुं॰ राधाऽविनाभूतकृष्णे। श्रीकृष्णे। द्विभुजे। मुरलीधरे॥ राधानामोच्चारणानन्तरं कृष्णनामोच्चारणे विधिर्यथा। नारद उवाच। आदौ राधां समुच्चार्य पश्चात् कृष्णं विदुर्बुधाः॥ निमित्तममां भक्त वद भक्तजनप्रिय॥ श्रीनारायण उवाच। निमित्तमस्य त्रिविधं कथयामि निशामय। जगन्माता च प्रकृतिः पुरुषश्च जगत्पिता॥ गरीयसी त्रिजगतां माता शतगुणैः पितुः। राधाकृष्णेति गौरीशेत्येवं शब्दः श्रुतौ श्रुतः॥ कृष्णराधेशगौरीति लोकेन च कदा श्रुतः। प्रसीद रोहिणीचन्द्र गृहाणार्घ्यमिदं मम। गृहाणार्घ्यं मया दत्तं संज्ञया सह भास्कर। प्रसीद कमलाकान्त गृहाण मम पूजनम्॥ इति दृष्टं सर्ववेदे कौथुमे मुनिसत्तम। राशब्दोच्चारणादेव स्फीतो भवति माधवः। धाशब्दोच्चारतः पश्चाद्धावत्येवससम्भ्रमः। आदौ पुरुषमुच्चार्य पश्चात् प्रकृतिमुच्चरेत्। स भवेन्मातृगामी च वेदातिक्रमणे मुने॥ इ॰ ब्र॰ वै॰ पु॰॥

राधातनय : । पुं० कर्णनामनि ॥ राधायास्तनय : ॥

राधावल्लभ : । पुं० श्रीकृष्णे ॥

राधावल्लभी । पुं० सम्प्रदायविशेषे ॥

राधावल्लभीय : । त्रि० सम्प्रदायविशेषयुक्तवैष्णवे ॥ न । तत्तिलकविशेषे ॥ यथा ॥ आनासामूलमाश्रित्यशिरोमध्यगतंमुने । हरिपादाकृतंनासा मूलमाश्रित्ययत्नत: । हरिमन्दिरवत्सर्वंतद्राधावल्लभीयकम् । श्रीराधावल्लभीयंयत्तिलकंसुमनोहरम् । यौगुलंतत्तुविज्ञेयंयदिमध्येसुरंगितम् इतिपद्मपुराणम् ॥

राधाभेदी । पुं अर्जुने ॥

राधावेधी । पुं० अर्जुने ॥

राधासुत : । पुं० कर्णे । चम्पाधिपे । अंगराजि । अर्कतनये ॥

राधेय : । पु० राधासुते । कर्णे ॥ राधाया : अपत्यम् । स्त्रीभ्योढक् ॥

राभस्यम् । न० उपक्रमे ॥

राम : । पुं० राघवे दशरथतनये । श्रीरामचन्द्रे ॥ राम : शस्त्रभृतामहम् । युद्धकुशलानांमध्येरामोऽखिलराक्षसक्षयकर : परमवीरोभगवद्विभूति : ॥ अयमवतारस्त्रेतायुगान्तेरावणादिवधार्थ : ॥ रैणुकेये । परशुरामे ॥ हलायुधे । बलभद्रे ॥ भार्गवोराघवोगोपस्त्रयोरामा : प्रकीर्त्तिता : ॥ राशक्तिरितिविख्याताम : शिव : परिकीर्त्तित : । शिवशक्त्यात्मकंब्रह्मरामरामेतिगीयते । राशब्दोविश्ववचनोमश्चापीश्वरवाचक : । विश्वेषामीश्वरोयोहितेनराम : प्रकीर्त्तित: ॥ रमतेरमयासार्द्धंतेनरामंविदुर्बुधा: । रमायारमणस्थानंरामंरामविदोविदु: । राचेतिलक्ष्मीवचनोमश्चापीश्वरवाचक: । लक्ष्मीपतिंगतिंरामंप्रवदन्तिमनीषिण : ॥ नाम्नासहस्रंदिव्यानांस्मरणेयत्फलंभवेत् । तत्फलंलभतेनूनंरामोच्चारणमात्रत: ॥ वरुणे । हये ॥ पशुभेदे ॥ न०वास्तुके ॥ कुष्ठौषधौ ॥ तमालपत्रे ॥ त्रि०चारौ । मनोरमे ॥ सिते ॥ असिते । श्यामे ॥ परमात्मनि ॥ रमन्तेयोगिनोनन्तेनित्यानन्देचिदात्मनि । इतिरामपदेनासौपरंब्रह्माभिधीयते ॥ इतिपद्मपुराणम् ॥ रमते । रमक्रीडायाम् । ज्वलितिकसन्तेभ्योण: ॥ यद्वारमन्तेस्वयस्मानानन्दलक्षणेयोगिनोऽस्मिन्ननेनवा । हलश्चेतिघञ् ॥ रमयतीतिवा ॥ मथुराचविलोमेनमध्यमोनंयदक्षरम् । योनस्मरतिलोकेस्मिन्स्तस्मध्यंतस्यमुखोपरि ॥ रामोपासकस्यतिलकंयथा । श्रीरामोपासनायस्यतिलकंतूर्द्ध्वपुण्ड्रकम् । भ्रुवोर्मध्ये

सविन्दु:स्यात्यदिविप्रमनोहरम् ॥

रामकरी । स्त्री० रामकलीरागिण्याम् ॥

रामकर्पूरक : । पुं० स्वनाम्नाख्याते-तृणे ॥

रामगिरि : । पुं० स्वनाम्नाप्रसिद्धे०पर्वते ॥ चित्रकूटपर्वते॰इतिकश्चित् ॥

रामचन्द्र : । पुं० श्रीरामे । रावणारी ॥

रामजननी । स्त्री० रेणुकायाम् ॥ कौशल्यायाम् ॥ रोहिण्याम् ॥

रामठ : । पुं० अङ्कोठवृक्षे ॥ न० हिङ्गुनि ॥ रामठदेशोद्भवत्वादुपचार : । रमन्तेऽनेनवा । रम० । रमेर्बृंहिस्वेत्यठ : ॥ रमयतिवा ॥

रामठी । स्त्री० नाडीहिङ्गुनि ॥

रामण : । पुं० गिरिनिम्बे ॥ तिन्दुके ॥

रामणीयकम् । न० मनोहरत्वे । रमणीयत्वे ॥ रमणीयस्यभाव: । योपधाद्गुरूपोत्तमाद्वुञ् ॥

रामण्यकम् । न० रमणीयतायाम् ॥

रामतरणी । स्त्री० लताविशेषे ॥

रामतरुणी । स्त्री० तरुणीपुष्पे । सेवती॰इ॰भाषाप्र० ॥

रामतीर्थम् । न० गोमत्याम्प्रसिद्धे- ॥ सूर्य्यारके ॥

रामदूत : । पुं० हनूमति ॥ यथा । मनोजवंमारुततुल्यवेगंजितेन्द्रि बुद्धिमतांवरिष्ठम् । वातात्मजंवानरयूथमुख्यंश्रीरामदूतंमनसास्मरामीतिरामायणं ॥ रामस्यदूत : ॥

रामदूति : । स्त्री० तुलसीविशेषे । विशल्यायाम् ॥

रामदूतिका । स्त्री० नागिन्याम् । नागपुष्प्याम् ॥

रामदूती । स्त्री० पर्वपुष्प्याम् । विशल्यायाम् ॥

रामनवमी । स्त्री० चैत्रशुक्लनवम्याम् ॥ रामनवमीव्रतेपारणकालस्तु । नवमीचाष्टमीविद्धात्याज्याविष्णुपरायणै: । उपोषणंनवम्यांवैदशम्यामेवपारणमिति ॥

रामपद्म् । न० तीर्थविशेषे ॥

रामपूग : । पुं० पूगभेदे । कामीने । मुनिपूगे । सुरेवटे ॥

रामभद्र : । पुं० श्रीरामे ॥

रामलवणम् । न० रामके । सांभर० इ० भा० ॥

रामवल्लभम् । न० त्वचे ॥ त्रि० रामप्रिये ॥

रामबाण : । पुं० औषधविशेषे ॥ यथा । पारदामृतलवङ्गगंधकंभागयुग्ममरिचेनमिश्रितम् । तत्रजातिफलमर्द्धभागिकंतिन्तिडीफलरसेन-मर्द्दितम् ॥ वह्निमान्द्यदशवक्त्रनाशनोरामबाणइतिविश्रुतोरस : । सङ्ग्रहग्रहणिकुम्भकर्णकमामवा-

तखरदूषणं जयेत् ॥ दीयतेतुशा णकानुमानतः सद्यएवजठराग्नि-दीपनः। रोचकः कफकुलान्तकारकः श्वासकासवमिजन्तुनाशनः ॥ पारदभागः १ विषभागः १ लवङ्गभागः १ गन्धकभागः १ मरिचभागाः ८ जातीफलभागौ २ रामबाणोरसोऽजीर्णे ॥ रामस्यशरे। रामशरे ॥

रामवीणा। स्त्री॰ वीणाप्रभेदे ॥

रामशरः। पुं॰ शरतृणभेदे । रामकाण्डे ॥

रामशीतला। स्त्री॰ आरामशीतलायाम् ॥

रामसखः। पुं॰ सुग्रीवे ॥ रामकृस खा। तत्र ॥

रामसेनकः। पुं॰ भूनिम्बे ॥ कट्फले ॥

रामह्रदः। पुं॰ तीर्थविशेषे ॥

रामा। स्त्री॰ उत्कृष्टयोषिति। रमते गीतकलाभिरिति॰ रमयतिपुरुष मितिवापुरुषरमणकारिण्यामबलायाम् ॥ रम॰। ज्वलादित्वाण्‌ः ॥ हिंगुलिन्याम्। वाराटकायाम् ॥ गृहकन्यायाम् ॥ आरामशीतलायाम् ॥ अशोके ॥ गोरोचनायाम् ॥ गैरिके ॥ हिंगुले ॥

रामानुजः। पुं॰ लक्ष्मणे ॥ श्रीकृष्णे ॥ आधुनिकवैष्णवसंप्रदाये ॥ न॰ तिलकविशेषे ॥ यदूर्ध्वपुण्ड्रंतिलकं शोभनंतन्मनोहरम्। तन्मध्यपीत रेखंचश्रीमद्रामानुजंविदुः ॥

रामायणम्। न॰ वाल्मीकीयेमहाकाव्ये। इक्ष्वाकुवंशउत्पन्ने महदाख्याने। रामेणरावणवधकाव्ये। कुशलवोपदिष्टचतुर्विंशतिसहस्रश्लोकसङ्ख्याकआदिकाव्ये ॥ यथा। प्राप्तराज्यस्यरामस्यवाल्मीकिर्भगवानृषिः। चकारचरितंकृत्स्नं विचित्रपदमर्थवत् ॥ चतुर्विंशत्सहस्राणिश्लोकानामुक्तवानृषिः। तथासर्गशतान्‌ पंचषट्काण्डानितथोत्तरम् ॥ तच्चशतकोटिसङ्ख्यकमपि। चरितंरघुनाथस्यशतकोटिप्रविस्तरम्। एकैकमक्षरंपुंसांमहापातकनाशनम् ॥ तत्तु सम्पूर्णं ब्रह्मलोकेस्थितमित्यैतिह्यम् ॥ रामस्यअयनंचरितम्। पूर्वपदादितिणत्वम् ॥

रामालिङ्गनकामः। पुं॰ रक्ताम्लाने ॥

रामावरजोपमः। पुं॰ चक्रवाके ॥

रामावरजः। पुं॰ लक्ष्मणे ॥ श्रीकृष्णे ॥

रामिलः। पुं॰ रमणे ॥ कामे ॥

राम्भः। पुं॰ व्रतिनोवैणवेदण्डे ॥ रम्भस्यवेणोर्विकारः। पलाशादिभ्योवेत्यञ् ॥

रायभाटी। स्त्री॰ चाणोउ॰ कृ॰ गौ॰ प्र॰। नदीवीचीविशेषे ॥

रायस्पोषः । पुं० धनपुष्टौ ॥ रायो धनस्यपोषः । अलुक्समासः । छान्दसोविसर्गस्यसकारः ॥

रालः । पुं० स्वनामप्रसिद्धे० यक्ष धूपे ॥ अस्यनामानिगुणाश्चयथा । रालस्तुसालनिर्यासस्तथासर्जरसः स्मृतः । देवधूपोयक्षधूपस्तथासर्वरसश्चसः ॥ रालोहिमोगुरुस्तिक्तः कषायोग्राहकोहरेत् । दोषास्रस्वेदवीसर्पज्वरव्रणविपादिकाः ॥ ग्रहभग्नाग्निदग्धांश्चमूलातीसारनाशनः ॥

रालकार्य्यः । पुं० सालवृक्षे ॥

रावः । पुं० शब्दे । ध्वनौ ॥ रवणम् । रुशब्दे । भावेघञ् ॥

रावणः । पुं० लङ्केश्वरे । दशग्रीवे । पौलस्त्ये । पङ्क्तिग्रीवे ॥ रावणोलोकरावणइतिन्यायात्० रावयति । रु० । नन्द्यादित्वाल्ल्युः । तदुक्तमुत्तरकाण्डे । यस्माल्लोकत्रयंचैतद्रावितंभयमागतम् । तस्मात्त्वंरावणोनामनाम्नावीरो भविष्यसीति ॥ यद्वा । विश्रवसोपत्यम् । शिवादिषु० विश्रवसोविश्रवणरवणावादेशौनिपातितौ० अण्च ॥

रावणगङ्गा । स्त्री० सिंहलदेशस्थनदीविशेषे । येतुरावणगङ्गायांजायन्ते कुरुविन्दकाः । पद्मरागाघनंरागंबिभ्राणाः स्फुटार्चिषः ॥

रावणारिः । पुं० श्रीरामे ॥ रावणस्यअरिः ॥

रावणिः । पुं० रावणस्यज्येष्ठपुत्रे । इन्द्रजिति ॥ अक्षाख्येरावणकुमारे ॥ रावणस्यापत्यम् । अतइञ् ॥

राशिः । पुं० पुञ्जे । उत्करे । कूटे । धान्यादिसमूहे ॥ मेषादिस्वरूपेज्योतिश्चक्रस्यद्वादशांशे ॥ तस्यसंस्थानंयथा । विषुवत्क्रान्तिवृत्तैक्यात्पूर्वभागस्थितास्थिराः । मेषाद्याः राशयः क्रान्तिवृत्तयः पूर्वदिक्क्रमात् ॥ तेयथा । मेषोवृषोथमिथुनंकर्कटः सिंहएवच ॥ कन्यातुलावृश्चिकश्च धनुर्मकरएवच ॥ कुम्भोमीनश्चविज्ञेयाराशयोद्वादशैवते ॥ रश्यते० रशतिवा । रशइतिसौत्रोधातुः स्वनार्थः । बाहुलकादिण् । णिजन्तादच्चूर्वा ॥ यद्वा । अश्नुते । अशूव्याप्तौ । अशिपणाय्योरुडायलुकौचेति० इण्० धातोरुडागमश्च ॥ गणिते ॥

राशिचक्रम् । न० मेषादिद्वादशराश्यादियुक्तवृत्ते । भचक्रे । ज्योतिषचक्रे ॥ सप्तविंशतिभैर्ज्योतिश्चक्रंस्तिमितवायुगम् । तदर्कांशोभवेद्राशिर्नवर्क्षचरणाङ्कितः ॥ तद्विवरणंयथा । भचक्रंध्रुवयोर्बद्धमाक्षिप्तंप्रवहानिलैः । पर्य्येत्यजस्रंतन्नद्धाग्रहकक्षायथाक्रमम् ॥ उप

रिस्थस्थमहतीकक्षाल्याधः स्थित
श्च। महत्याकक्षयाभागामहान्तो
ल्पास्तथाल्पया ॥ कालेनाल्पेनभ
गणंभुङ्क्तेऽल्पभ्रमणाश्रितः। ग्र
हः कालेनमहतामण्डलेमहतिभ्र
मन् ॥ स्वऽल्पयातुबहून्भुङ्क्ते
भगणान्शीतदीधितिः। महत्या
कक्षयागच्छन् ततः स्वल्पंशनैश्च
रः ॥ मन्दादधः क्रमेणस्युश्चतुर्था
दिवसाधिपाः। वर्षाधिपतयस्तद्व
त्तृतीयाः परिकीर्त्तिताः ॥ ऊ
र्द्ध्वक्रमेणशशिनोमासानामधिपाः
स्मृताः ॥ होरेशाः सूर्यतनयाद
धोधः क्रमशस्तथा। भवेत्कक्षा
तिग्मांशोर्भ्रमणंषष्टिताडितम्।
सर्वोपरिष्टाद्भ्रमति योजनैस्तैर्भ
मण्डलम् ॥ तत्कक्षाक्रममाह।
ब्रह्माण्डमध्ये परिधिर्व्योमकक्षाभि
धीयते। तन्मध्येभ्रमणंभानामधो
धः क्रमशस्तथा ॥ मन्दामरेज्यभू
पुत्रसूर्यशुक्रेन्दुजेन्दवः। परिभ्रम
न्त्यधोधः स्थाः सिद्धविद्याधराघ
नाः ॥ रविर्मासंनिशानाथः सपा
ददिवसद्वयम्। पक्षत्रयंभूमिपुत्रो
बुधोऽष्टादशवासरान् ॥ वर्षमेकंसु
राचार्यश्चाष्टाविंशद्दिनंभृगुः।
शनिः सार्द्धद्वयंवर्षंस्वर्भानुः सार्द्ध
वत्सरम् ॥ एवंप्रमाणात्सकलाः
स्वराशिंभुञ्जतेग्रहाः ॥ इतिराशि
भोगः ॥

राशिविभागः। पुं॰ अश्विन्यादिन
क्षत्रैर्मेषादीनांविभजने ॥ यथा।
सपादद्वयनक्षत्रैरश्विन्यादिभिरेव च
। राशयः कथितास्ते तेमेषादिद्वाद
शक्रमात् ॥ तथाहि। अश्विनीभर
णीकृत्तिकापादोमेषः १। कृत्ति
काशेषपादत्रयंरोहिणीमृगशिरोर्द्धं-
वृषः २। मृगशिरःशेषार्द्धमार्द्रा
पुनर्वसुपादत्रयंमिथुनम् ३। पुन-
र्वसुशेषपादैकंपुष्याश्लेषाकर्कटः ४
। मघापूर्वफल्गुन्युत्तरफल्गुनीप्र-
थमपादः सिंहः ५। उत्तरफल्गुनी
शेषपादत्रयंहस्ताचित्रार्द्धञ्चकन्या ६
। चित्राशेषार्द्धंस्वातीविशाखापाद
त्रयंतुला ७। विशाखाशेषैकपादो
ऽनुराधाज्येष्ठावृश्चिकः ८। मूलं
पूर्वाषाढोत्तराषाढाप्रथमपादोधनुः
९। उत्तराषाढाशेषपादत्रयश्रवणा
धनिष्ठार्द्धंमकरः १०। धनि
ष्ठाशेषार्द्धंशतभिषापूर्वभाद्रपाद
त्रयंकुम्भः ११। पूर्वभाद्रशेषपाद
उत्तरभाद्ररेवतीमीनराशिः १२।
रिति। उक्तञ्च। सप्तविंशतिभै
र्ज्योतिश्चक्रंस्तिमितवायुगम्। तद
र्कांशोभवेद्राशिर्नवर्क्षचरणाङ्कितङ्-
ति ॥

राष्ट्रः। पुं॰ न॰ उपद्रवे। चक्रे।
नीवृति। देशे। विषये ॥ उपद्रवे

। राजति । राज्० । ष्ट्रन् । वृषे तिष : ॥

राष्ट्रनिवासी । त्रि० जानपदे । देश वासिनि ॥

राष्ट्रिका । स्त्री० कण्टकारिकायाम् ॥ राष्ट्रमस्त्यस्या : । अतइनिठनौ बितिठन् ॥

राष्ट्रिय : । पुं० नाट्योक्त्या राजश्याले ॥ राष्ट्रेऽधिकृत : । राष्ट्रावारपारा द्घखाविति घ : । घस्येयादेश : ॥

राष्ट्रीय : । पुं० राष्ट्रिये ॥ त्रि० राष्ट्र सम्बन्धिनि ॥

रास : । पुं० कोलाहले ॥ ध्वनौ ॥ भाषाशृङ्खलके ॥ विलासे । गोपानां गोपीभि: सहक्रीडाविशेषे ॥ रासते । रासृ शब्दे । घञ् ॥ गर्ज्जिते ॥

रासगोष्ठी । स्त्री० हल्लीषके ॥ तल्लक्षणं यथा । पृथुंसुवृत्तं मसृणं वितस्तिमात्रोन्नतं कौ विनिखन्य शङ्कुकम् । आक्रम्य पद्भ्यामितरेतरन्तु हस्तैर्भ्रमो यं खलु रासगोष्ठीति हरिवंशटीकायां नीलकण्ठ : ॥

रासन : । पुं० रसे ॥ रसनया रस्यते । शेषइत्यण् ॥

रासभ : । पुं० गर्द्दभे । रासते । रासृ० । रासियल्लिभ्याञ्च इत्यभच् ।

रासभवन्दिनी । स्त्री० मल्लिकायाम् ॥

रासभी । स्त्री० गर्द्दभ्याम् । गधी० इ० भा० ॥ जातिलक्षणोङीष् ॥

रासमण्डलम् । न० श्रीकृष्णस्य रासक्रीडास्थले ॥

रासेरस : । पुं० रासगोष्ठ्याम् ॥ रासे ॥ शृङ्गारे ॥ रससिद्धौ ॥ रसावासे ॥ षष्ठीजागरके ॥ उत्सवे ॥ परिहासे ॥

रासेश्वरी । स्त्री० राधायाम् ॥

रास्ना । स्त्री० स्वनामख्यातलताविशेषे । नाकुल्याम् । सुरसायाम् । भुजङ्गाख्याम् । राइसन० जैत० इ० भा० प्र० ॥ रास्नातु त्रिविधा प्रोक्ता मूलं पत्रं तृणं तथा । ज्ञेयौ मूलदलौ श्रेष्ठौ तृणरास्नातु मध्यमा ॥ इ० रा० नि० ॥ अपिच । नाकुली तुरा तिक्ता कटुका पाके न नाशयेत् । भोगिलूताखुवृश्चिकाखुविषज्वरकृमि व्रणान् ॥ इ० भा० प्र० ॥ रास्नागन्धामसातम्नोति राजवल्लभ : ॥ एला वसी० ५० इ० भा० प्र० औषधिविशेषे । एलापर्ण्याम् । सुवहायाम् । युक्तरसायाम् । कांटाआमरूली० इ० गौ० इ० भा० प्र० ॥ अस्या गुणा यथा । रास्ना गणाचनी तिक्ता गुरूष्णा कफवातजित् । शोथश्वाससमीरासृग्वातशूलोदरापहा ॥ कामज्वरविषाशीतिवातिकामयहिध्माहृत् ॥ राति० रायतेवा । रासते० रस्यतेवा । रादाने । रसश्च आस्वादने० रासृ शब्दे वा । रास्नासास्नेति साधु : ।

राहु : । पुं॰ तमोग्रहे । स्वर्भानौ । सैंहिकेये ॥ रहति॰गृहीत्वात्यजति चन्द्रार्कौ । रहत्यागे । बाहुलकादुण् ॥

राहुगृहम् । न॰ कन्याराशौ ॥ राहोर्गृहम् ॥

राहुग्रह : । पुं॰)

राहुग्राह : । पुं॰) उपरागेचन्द्रसूर्ययोर्ग्रहणे ॥

राहुच्छत्रम् । न॰ आर्द्रके ॥

राहुदर्शनम् । न॰ राहोश्चाक्षुषज्ञाने । ग्रहणे ॥

राहुभेदी । पुं॰ विष्णौ ॥

राहुमूर्द्धभित् । पुं॰ केशवे ॥

राहुरत्नम् । न॰ गोमेदके ॥

राहुलसू : । पुं॰ बुद्धे । सुगते ॥

राहुस्पर्श : पुं॰ उपरागे ॥

राहुहा । पुं॰ विष्णौ ॥

राहूच्छिष्ट : । पुं॰)

राहूत्सृष्ट : । पुं॰) लशुने ॥

रिक्त : । त्रि॰ शून्ये ॥ यथा । रिक्तहस्तो नगेपियाद्राजानंदैवतांगुरुमिति ॥ निर्द्धने ॥ न॰ वने ॥ रिच्यतेस्म । रिचवियोजनसम्पर्चनयो : । क्त : ।

रिक्तकम् । त्रि॰ शून्ये ॥ स्वार्थे कन् ॥

रिक्ता । स्त्री॰ चतुर्थीनवमीचतुर्द्दशीषुतिथिषु ॥

रिक्थम् । न॰ धनमात्रे । वसुनि ॥ रिच्यते । रिचिर्विरेचने । पातृतुदिवचिरिचीतिथक् ॥

रिक्थहारी । त्रि॰ दायादे ॥

रिक्थाद : । पुं॰ पुत्रे ॥

रिक्थी । त्रि॰ धनहारिणि ।

रिखा । स्त्री॰ लिखायाम् । लेख॰ इ॰ भा॰ इतिहेमचन्द्र : ॥ लख्यते । लक्षणालोचने । घञ् । पृषोदरादि : ॥

रिङ्खणम् । न॰ स्खलने ॥ धर्मादिस्खलने ॥ बालानांहस्तपादाभ्यांचलने । रिखिगतौ । भावेल्युट् ॥

रिङ्गणम् । न॰ स्खलने ॥ धर्मादिस्खलने ॥ बालानांहस्तपादाभ्यांचलने । रींगणा॰ इ॰ भा॰ प्र॰ ॥ औचित्यात्पिच्छिलादेश्चस्खलनंरिङ्गणंक्वचित् ॥ रिगिगतौ । भावेल्युट् ॥

रिङ्गन् । त्रि॰ जानुभ्यांगच्छति ॥ गच्छति ॥

रिधम : । पुं॰ कामे ॥ वसन्ते ॥

रिपु : । पुं॰ शत्रौ । अहितकारिणि ॥ आभ्यन्तरारिपवोयथा । कामक्रोधौलोभमोहौमदोमात्सर्यएवच । आभ्यन्तराद्यमीप्रोक्तारिपवस्तत्त्ववेदिभि : ॥ अनित्या : शत्रवोबाह्याविप्रकृष्टाश्चतेयत : । अत : सोभ्यन्तरान्नित्यान्षट्पूर्व्वमजयद्रिपून् ॥ अनिष्टंरपति । रपव्य

न्यायांबाचि । रपेरिश्चोपधायाश्चेति कु : ॥ लग्नात् षष्ठभवने ॥ चोरक नामगन्धद्रव्ये ॥

रिपुघातिनी । स्त्री० लताविशेषे । कुचिकायाम् । कुचुइ० गौ० दे० भा० प्र० ॥ शत्रुनाशकारिण्याम् ॥

रिपुट : । पुं० दक्षिणोत्तरद्वारगृहे ॥

रिपुभम् । न० षष्ठराशौ ॥

रिप्फम् । न० व्ययभवने ॥

रिप्र : । त्रि० अधमे । कुत्सिते ॥ रीयते । रीङ् स्रवणे । लीरीङोर्ह्र स्व : पुट् चतरौश्ल षणकुत्सनयोरि तिरप्रत्ययोधातोर्ह्र स्व : प्रत्ययस्य पुट् च ॥

रिभेद : । पुं० अरिभेदे ॥

रिरंसा । स्त्री० रन्तुमिच्छायाम् ॥ रमे : सन् ॥ अप्रत्ययात् । टाप् ॥

रिरंसु : । त्रि० रन्तुमिच्छौ ॥ रमे : सन्नन्तादुप्रत्यय : ॥

रिरक्षा । स्त्री० रक्षितुमिच्छायाम् ॥

रिरक्षिषु : । त्रि० रक्षितुमिच्छौ ॥

रिरी । स्त्री० पित्तले ॥

रिश्य : । पुं० मृगे ॥

रिष्ट : । पुं० खड्गे ॥ फेनिले । रीठा० इ० भा० ॥ न० एनसि । पापे ॥ क्षेमे । कुशले ॥ अशुभे । अकल्याणे ॥ अभावे । नाशे ॥ क्षेमाशुभाभावेषु ॥ रेषणम्० रिष्यतेर्म्न तिवा । रिषहिंसायाम् । क्त : ॥

रिष्टक : । पुं० फेनिले । रीठा० इ० भा० ॥

रिष्टि : । पुं० खड्गे । असौ ॥ स्त्री० शुभे ॥ रेषति । रिष० क्तिच् ॥

रिष्फम् : । न० व्ययभवने ॥

रिष्य : । पुं० मृगप्रभेदे ॥ रिष्यति । रिष० । अघ्न्यादित्वात्साधु : ॥

रिष्व : । त्रि० हिंस्रे ॥ न० शस्त्रे ॥ रिष्यतेऽनेन । रिष० । सर्वनिघृष्व रिष्वेतिसाधु : ॥

री । स्त्री० गतौ ॥

रीठा । स्त्री० रीठाकरञ्जे ॥

रीठाकरञ्ज : । पुं० स्वनामख्यातवृक्षे । गुच्छके । गुच्छपुष्पके । गुच्छफले । फेनिले ॥

रीढक : । पुं० पृष्ठवंशे ॥

रीढा । स्त्री० अवमाननायाम् । अवज्ञायाम् ॥ रेहणम् । रिहवधे । औणादिक : क्त : । स्त्रीत्वं लोकात् ॥

रीण : । त्रि० स्रुतजलादौ । क्षरिते । स्रुते ॥ रीयतेस्म । रीङ् स्रवणे । क्त : । स्वादयश्चोदित : । ओदित श्चेतिनत्वम् ॥ क्षीणे ॥

रीति : । स्त्री० स्पन्दे । गतौ ॥ प्रचारे ॥ लोहकिट्टे ॥ दग्धस्वर्णादिमले ॥ सीमनि ॥ स्रवणे ॥ स्वभावे । रूपे । लक्षणे । भावे । आत्म

मि । प्रकृतौ । सहजे । पित्तले ॥ पित्तलन्त्वारकूटं स्यादारोरीतिश्च कथ्यते । राजरीतिर्ब्रह्मरीति : कपिलापिङ्गलापि च ॥ रीतिरप्युपधातु : स्यात्ताम्रस्यस्य च । पित्तलस्यगुणाज्ञेया : स्वयोनिसदृशा जनै : संयोगजप्रभावेण तस्यान्ये पिगुणा : स्मृता : रीतिकायुगलं रूक्षं तिक्तं चलवणं रसे ॥ शोधनं पाण्डुरोगघ्नं कृमिघ्नं नातिलेखनम् । कांस्यशब्दे स्वैवाव्य : शोधनेमारणे विधि : ॥ वैद्यकादौ ॥ रीतिरात्माकाव्यस्य । विशिष्टापदरचना रीतिरितिवामनसूत्रे । गुणभेदेनतद्विभागमाह । ओज : प्रसादमाधुर्यगुणत्रितयभेदत : । गौडवैदर्भपाञ्चालीरीतय : परिकीर्त्तिता : प्रत्येकमेषांलक्षणानि यथा । ओज : समासभूयस्त्वं मांसलं पदडम्बरम् । व्यक्तार्थपदमग्राम्यं प्रसाद : परिकीर्त्तित : शब्दार्थयोस्सुरसवन्मधुरं परिकीर्त्तितम् । सर्वलोकावगम्यंयद्ग्राम्यंतदभिधीयते ॥ सुश्राव्यमपिगम्भीरं प्रसन्नमुपनागरम् । ग्राम्यं यथा । कन्येमन्येऽप्यसौधन्यायस्त्वामद्यविवाहयेत् । नाल्पेनतपसालभ्य : सुन्दरस्त्रीसमागम : ॥ उपनागरं यथा । तन्वित्वदधरं माधुर्यादिदं नविदो

सना : वसुधायांसुधाभावान्मृषासुरं पियासव : ॥ शब्दालङ्करणं तत्स्याद्यदनुप्रासभासुरम् । वर्णावृत्तिरनुप्रास : पादेपादेविधीयते पदावृत्तिस्तुयमकमादिमध्यान्तसर्वगम् । क्रमेणरीतित्रयाणामुदाहरणानि । गंगोत्तुंगतरंगसंगतजटाजूटाग्रजाग्रत्फणिस्फूर्जत्फूत्कृतिभीतिसम्भृतिचमत्कारस्फुरत्सम्भ्रमा । आनन्दामृतवापिकां विदधतोचित्ते गिरीशप्रभोस्त्वांपायान्नवसंगमेभगवतीलज्जावतीपार्वती ॥ भवतोविरहव्याधिमधिगम्यससम्भ्रमा । कामिनीयामिनीकान्तं कृतान्तमिवपश्यति ॥ इन्दालिसन्तायनिवृत्तयेऽस्या : किन्तालवृन्तंतरलीकरोषि । उत्तापएषोन्तरतापहेतुर्नतन्नवेनव्यजनापनेय : ॥ इतिकाव्यचन्द्रिका ॥ अपि च । वैदर्भीसायपाञ्चालीगौडीयावन्तिकातथा । लाटीयामागधीचेतिषोढारीतिर्निगद्यते ॥ रीयते॰ रीणातिवा॰ रयणंवा । रीङ्स्रवणे॰ रीगतिरेषणयो : । क्तिच्॰ क्तिन्वा ॥

रितिकम् । न॰ पुष्पाञ्जने ॥

रीतिका । स्त्री॰ कुसुमाञ्जनेपित्तले ॥

रीतिपुष्पम् । न॰ कुसुमाञ्जनेरीतिकायांध्मायमानायांजातेमले ॥ रीति : पित्तलस्यपुष्पमिव॰ तन्मल-

स्वाम् ॥

रोतिहेतुः । पुं॰ रङ्गे । वङ्गे ॥ रीतेर्हेतुः ॥

रुः । पुं॰ शब्दे ॥

रुकः । त्रि॰ वस्तुप्रभेदे ॥

रुक्प्रतिक्रिया । स्त्री॰ रोगनिवारणे । चिकित्सायाम् ॥ रुजः प्रतिक्रियानिरसनम् ॥

रुक्मम् । न॰ काञ्चने ॥ धूस्तूरे ॥ लौहे ॥ नागकेशरे ॥ रोचते । रुचदीप्तौ । युजिरुजितिजांकुश्चेति मक् ॥

रुक्मकारः । पुं॰ स्वर्णकारे ॥ रुक्मं करोति । डुकृञ्॰ । कर्मण्यण् ॥

रुक्मकारकः । पुं॰ स्वर्णकारे ॥ रुक्मकारएव । स्वार्थेकः ॥

रुक्मवती । स्त्री॰ पङ्क्तिच्छन्दः १॰ प्रभेदे ॥ तल्लक्षणं यथा । रुक्मवती सायत्रभमसगौ ॥ यथा । कायमनोवाक्यैःपरिशुद्धैर्यस्सदाकंसद्विषिभक्तिः । राज्यपदेहर्म्यालिरुदारा रुक्मवतीविप्रःखलुतस्य ॥ इयमेव॰ चम्पकमाला॰ रूपवतीचबोध्या ॥ त्रि॰ स्वर्णवति ॥

रुक्मवेदी । स्त्री॰ काञ्चनवेदिकायाम् ॥ रुक्मंहिरण्यंतन्मयाभिरिष्टकाभिश्चितावेदी॰ रुक्मवेदी ॥

रुक्माङ्गदः । पुं॰ परमभागवतेनृपतितिलके ॥

रुक्मिणी । स्त्री॰ कृष्णस्यप्रधानमहिष्याम् । लक्ष्म्याम् । हरिप्रियायाम् ॥

रुक्मिणीव्रतम् । न॰ व्रतविशेषे ॥

रुक्मिदर्प्पः । पुं॰)

रुक्मिदारी । पुं॰) बलरामे । बलभद्रे ॥

रुक्मी । पुं॰ भीष्मकात्मजे । रुक्मिणीभ्रातरि ॥

रुक्मिभित् । पुं॰ बलदेवे ॥

रुक्षः । त्रि॰ अप्रेमणि । परुषे ॥ अचिक्कणे । अस्निग्धे ॥ रूक्षा॰ द्व्यभयोर्भाषा ॥ रुक्षयति । रुक्षपारुष्ये । पचाद्यच् ॥ यद्वा । रुहेरौणादिकः सः ॥

रुग्णः । त्रि॰ रोगादिनाकुटिलीकृतेभुग्ने । वक्रे ॥ रुज्यतेस्म । रुजोभङ्गे । क्तः । ओदितश्चेतिनत्वम् ॥ रोगिणि

रुच्॰ग्॰ । स्त्री॰ शोभायाम् ॥ तेजसि ॥ द्युतौ ॥ इच्छायाम् ॥ रोचते । रुचदीप्तौ । क्विप् । शारिकाशुकवाचि ॥

रुचः । त्रि॰ शोभमाने ॥ रुचेरिगुपधेतिकः ॥

रुचकः । पुं॰ बीजपूरे ॥ निष्के ॥ दन्ते ॥ कपोते ॥ एरण्डे ॥ न॰ सर्जिकाक्षारे ॥ अश्वस्याभरणे ॥ माल्ये ॥ सौवर्चले ॥ यथा । रु-

सक्तं रोचनं भेदि दीपनं पाचनं परम् । सन्नेहं वातनुद्गाति पित्तलं विशदं लघु ॥ उद्गारशुद्धिदं सूक्ष्मं विबन्धानाहशूलहृत् ॥ माङ्गल्यद्रव्ये ॥ उत्कटे ॥ रोचनायाम् ॥ विडङ्गे ॥ लवणे ॥ पुं॰ न॰ राजवेश्मविशेषे ॥ वनान्तरे॰ । रोचतेऽनेन । रुचदीप्तावभिप्रीतौच । अन्तर्भावितण्यर्थः । क्नुन् शिल्पिसंज्ञयोरितिक्नुन् ॥

रुचा । स्त्री॰ इच्छायाम् । दीप्तौ ॥ शोभायाम् ॥ शारिकाशुकवाचि ॥

रुचिः । पुं॰ प्रजापतिविशेषे । आकूतीपतौ रौच्यमनोः पितरि ॥

रुचिः । स्त्री॰ दीप्तौ ॥ शोभायाम् ॥ अभिष्वङ्गे । उत्कटानुरागे ॥ अभिलाषे ॥ रोचते । रुच॰ । इगुपधात्किदितीन् ॥ बुभुक्षायाम् ॥ गोरोचनायाम् ॥ आलिङ्गनविशेषे ॥ तल्लक्षणं यथा नायिकायानायकस्यसम्मुखिनान्वोरुपर्य्युपविश्यवक्षसिवक्षोदत्त्वायदवस्थानमितिकामशास्त्रं ॥

रुचिकरः । त्रि॰ रोचने ॥

रुचितः । त्रि॰ इष्टतमद्रव्ये ॥ रुचेः कर्त्तरिक्तः ॥ यद्वा । रोचते । रुच॰ । रुचिवचीतिकितच् ॥

रुचिफलम् । न॰ अमृताह्वे । अमृतफले ॥

रुचिरम् । न॰ मूलके ॥ कुङ्कुमे । लवङ्गे । त्रि॰ सुन्दरे ॥ सौम्ये ॥ मिष्टे । रोचते । रुच॰ । इषिमदिमुदीतिकिरच् ।

रुचिरा । स्त्री॰ गोरोचनायाम् ॥ अतिजगतीछन्दः १३ प्रभेदे ॥ तल्लक्षणादियथा । जभौसजौगितिरुचिराचतुर्ग्रहैः । यथा । पुनातुवोहरिरतिरासविभ्रमी॰ परिभ्रमन्व्रजरुचिराङ्गनान्तरे समीरणोल्लसितलतान्तरालगोयथामरुत्तरलतमालभूरुहः ॥ इतिमात्रावृत्तान्तरेपियथा । सप्तचतुष्कलकलितसकलदलसंशोभितकुण्डलरुचिरा । नकुरुपयोधरमिहफणिपतिशरभणितमिदंवृत्तंरुचिरा ॥ यथा । कलयतनुमनुजस्यसितासितसङ्गममधिविधितः पतिता । यस्य कृतेकरभोरुविषीदसिमिहिरातपनिहतेवलता ॥

रुचिराञ्जनः । पुं॰ शोभाञ्जने ॥

रुचिराश्वः । पुं॰ नृपतिविशेषे ॥ शोभनतुरगे ॥ त्रि॰ तद्वति ॥

रुचिष्यः । त्रि॰ इष्टवस्तुनि ॥ रोचते॰ रुच्यतेवा । रुच॰ । रुचिभुजिभ्यां किष्यन् ॥ अभिप्रेते ॥

रुचि । स्त्री॰ दीप्तौ ॥ रुक्रुचौरुचयः समाहृत्यैकार्थसङ्ग्रहः । कृदिकारादितिङीष् ॥

रुच्यः । पुं॰ कतकवृक्षे ॥ शालिधा॰

न्य ॥ पर्थ्यौ॥ न॰ सौवर्चले ॥ त्रि॰ मनोज्ञे । सुन्दरे ॥ रोचते॰ रुच्यते वा । रुच॰ । राजसूयेतिसाधु: ॥

रुच्यकन्द: । पुं॰ सूरणे ॥

रुग् । स्त्री॰ रोगे ॥ रुजतिदेहम् । रुजोभङ्गे । क्विप् ॥ रोजनंवा सम्पदादिक्विप् ॥ कुष्ठौषधौ ॥

रुजा । स्त्री॰ रोगे ॥ भङ्गे ॥ रुजति । रुजो॰ । भिदादिपाठात्॰ रुजार्थानामितिनिर्देशाद्वाऽङिटाप् ॥ रुगुरुधेतिकोशः ॥ कुष्ठे ॥ मेष्याम् ॥

रुजाकर: । पुं॰ व्याधौ । न॰ कर्मरङ्गफले ॥ त्रि॰ पीडाकारिणि ॥

रुजासह: । पुं॰ धन्वनवृक्षे ॥

रुणस्करा । स्त्री॰ सुव्रतायाम् । सुखसन्दोह्यायांगवि ॥

रुण्ड: । पुं॰ कबन्धे ॥

रुण्डिका । स्त्री॰ द्वारपिण्डयाम् । देहल्याम् ॥ दूतिकायाम् ॥ रणभूमौ ।

रुतम् । न॰ वाशिते । तिरश्चांशब्दे । कूजिते ॥

रुदथ: पुं॰ कुक्कुटे ॥ शुनि ॥ शिशौ ॥ रोदिति । रुदिर्‌अश्रुविमोचने । रुदिविदिभ्यांङिदित्यथ: ॥

रुदन्तिका ।) स्त्री॰

रुदन्ती ।) स्त्री॰ क्षुद्रक्षुपविशेषे । स्रवत्तोयायाम् । सञ्जीवन्याम् । रोमाञ्चिकायाम् । चणपत्र्याम् ॥ अस्या: स्वरूपंयथा । चणपत्रसमं पत्रं सुपत्रैस्तथाकृति: । शैशिरेजलबिन्दूनांस्रवन्तीतिरुदन्तिका ॥ रुदन्तीवह्निकृत्कुष्ठापित्तघ्नीचरसायनी ॥

रुदितम् । न॰ क्रन्दिते । क्रुष्टे ॥ रुदिर्॰ । भावेक्त: ॥ त्रि॰ तद्वति ॥

रुद्ध: । त्रि॰ नद्योप्राकारादिनाकृतवेष्टने । वेष्टिते । वलयिते । संवीते । आवृते ॥ रुध्यतेस्म । रुधिर्‌आवरणे । क्त: ॥

रुद्र: । पुं॰ गणदेवताविशेषे ॥ एकादशरुद्रेषु ॥ तेषांनामानियथा । अजैकपादहिर्बुध्नोविरूपाक्षोथरैवत: । हरश्चबहुरूपश्चत्र्यम्बकश्चसुरेश्वर: ॥ सावित्रश्चजयन्तश्चपिनाकीचापराजित: । एतेरुद्रा: समाख्याताएकादशगणेश्वरा: । एतेषांमानसानान्तु त्रिशूलवरधारिणाम् । कोटयश्चतुरशीतिस्तत्पुत्राश्चाक्षयामता: ॥ दिक्षुसर्वासुयेरक्षांप्रकुर्वन्तिगणेश्वरा: पुत्रपौत्रसुतास्त्वेतेसुरभीगर्भसम्भवा: ॥ इतिमात्स्ये ५ ध्याय: ॥ शिवे । शम्भौ । ईशे ॥ रोदयत्यसुरान् । संहारकालेप्रजा: संहरन्रोदयतिवा । रुदिर्॰ । रोदेर्णिलुक्चेतिरक्णिलुक् ॥ सर्वगतरुजांद्रावणात्॰ रोदनहननाद्वारुद्र: । तथाचस्कान्दे । रुज: सर्वगता

यस्माद्द्रावयामि जगत्यहम् । रोदनं
हन्मि यस्माच्च रुद्रस्तस्मादहं प्रिये ॥
यद्वा । रुतं वेदात्मकं शब्दं कल्पादौ
ब्रह्मणे राति॰ददाति । रादाने ।
आतोनुपसर्गे कः ॥ यद्वा । रुता
नादेन सकलं जगदिदं द्रावयति रञ्ज
यतीति॰नादात्मकत्वाद्रुद्रः ॥ यद्वा ।
रुतानादेन॰प्रणवरूपेण॰वेदरूपेण
वा॰ द्रावयति॰॰ इष्टमर्थमिति रु
द्रः । यद्वा । रुतं संसारदुःखं तद्वन्तं
वा द्रावयतीति रुद्रः : तदुक्तं रुतं दुः
खं तत्तु विद्रावयति यः प्रभुः
। रुद्र इत्युच्यते तस्माच्छिवः परम
कारणमिति ॥ विष्णुरुद्रयोरभेदो
यथा कौर्मे । स एव देवो भगवान् म
हादेवो न संशयः । मन्यन्ते ये जग
द्योनिं विभिन्नं विष्णुमीश्वरात् ॥
मोहादवेदनिष्ठाद्वा ते यान्ति नरकं
नराः । वेदानुवर्त्तिनं रुद्रं देवं ना
रायणं तथा । एकीभावेन पश्यन्ति
मुक्तिभाजो भवन्ति ते । श्रीमद्भागवते
देव्या द्वौ रुद्रौ परिकीर्त्तितौ । यथा ।
इच्छया ब्रह्मणो वक्त्राद्रुदनार्थमुद्
भौ । मूलरुद्रस्यांशभूतो रुद्रनामा
द्वितीयकः इति ॥ आदित्यपत्रवृक्षे
॥ एकादशाङ्के ॥ न॰ रौद्ररसे ॥

रुद्रकोटी । स्त्री॰ तीर्थविशेषे ॥

रुद्रगणः । पुं॰ शिवपार्षदसमूहे ॥

रुद्रचण्डी । स्त्री॰ रुद्रयामलोक्तदेवी
माहात्म्ये ॥

रुद्रजः । पुं॰ पारदे ॥

रुद्रजटा । स्त्री॰ लताविशेषे । रौद्र्याम् ।
सौम्यायाम् । सुगन्धायाम् । सुपत्रा
याम् । सुगन्धपत्रायाम् । पत्रवल्ल्या
म् जटावल्ल्याम् ॥ अस्या गुणाः । क
टुरसत्वम्॰ श्वासकासहृद्रोगभूत
रक्षोनाशित्वञ्चेति ॥

रुद्रपत्नी । स्त्री॰ चण्ड्याम् । दुर्गा
याम् ॥ अतस्याम् ॥

रुद्रप्रिया । स्त्री॰ हरीतक्याम् ॥ रुद्रा
ण्याम् ॥

रुद्रवीणा । स्त्री॰ सङ्गीतनारायणो
क्ते वीणाविशेषे । रुद्र्याम् ॥

रुद्रसर्गः । पुं॰ रुद्रकर्तृकभूतवेता
लादिसृष्टौ ॥

रुद्रसावर्णिः । पुं॰ द्वादशेमनौ ॥

रुद्रसूः । स्त्री॰ एकादशपुत्रप्रसवाम् ॥

रुद्राक्रीडः । पुं॰ श्मशाने ॥

रुद्राक्षः । पुं॰ स्वनामाप्रसिद्धवृक्षे ।
तृणमेरौ । अमरे । पुष्पचामरे ।
अस्रफले । शिवाक्षे । सर्पाक्षे । भू
तनाशने ॥ विनाभस्मत्रिपुण्ड्रेण-
विनारुद्राक्षमालया । पूजितोपि
महादेवो न स्यात्तस्य फलप्रदः ॥ वि
नामन्त्रेणयो धत्ते रुद्राक्षं भुविमान
वः । स याति नरकान् घोरान् या
वदिन्द्राश्चतुर्दश इति पद्मपुराणम् ॥
रुद्राक्षान्कण्ठदेशे दशन ३२ परि

मितान्॰ मस्तके विंशतिद्वे ४० ष ट् ६ षट् ६ कर्णप्रदेशे॰ करयुगलकृते द्वादश १२ द्वादशे १२ व । बाहोरिन्दो : कलाभि १६ र्नयनयुगकृते त्वेक १ मेकं १ शिखायाम्॰ वक्षस्यष्टाधिकं य : कलयति शतकं १०८ सस्वयं नीलकण्ठ : इति देवीभागवतम् ॥ मन्त्रेणेति द्विजेतरविषयम् । सर्वाश्रमाणां वर्णानां रुद्राक्षस्य च धारणम् । कर्त्तव्यं मन्त्रत : प्रोक्तं द्विजानां नान्यवर्णिनामिति नारायणवचनात् ॥

रुद्राणी । स्त्री॰ शिवायाम् । भवान्याम् । सर्वमङ्गलायाम् । रुद्रस्य स्त्री॰ इन्द्रवरुणभवसर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुगिति॰ ङीषानुकौ ॥

रुद्रावर्त्त : । पुं॰ तीर्थविशेषे ॥ अद्रिकूटस्थानस्थायां परमेश्वर्याम् । रुद्रजटायाम् ॥

रुद्रास्पदम् । न॰ तीर्थविशेषे ॥

रुद्री । स्त्री॰ रुद्रवीणायां ॥

रुधिर : । पुं॰ अङ्गारके । कुजे । भौमे । मङ्गलग्रहे ॥ न॰ कुङ्कुमे ॥ शरीरस्थरसभवधातौ । रक्ते । असे । त्वगजे । शोणिते । असृजि । लोहू॰ इ॰ भा॰ ॥ रुणद्धि॰ रुध्यते वा । रुधिर्॰ । इषिमदिमुदीति किरच् ॥

रुधिराख्यम् । न॰ मणिप्रभेदे । यथोक्तं गरुडपुराणे । हुतभुगरूपमादाय दानवस्य यथेप्सितम् । नर्मदायां निचिक्षेप किञ्चिद्दीनादिभूतले ॥ तत्रेन्द्रगोपकलितं शुकवक्त्रवर्णसंस्थानत : प्रकटपीलुसमानमात्रम् । नानाप्रकारविहितं रुधिराख्यरत्नमुद्भूयतस्य खलु सर्वसमानमेव ॥ मध्येन्दुपाण्डरमतीव विशुद्धवर्णं तच्चेन्द्रनीलसदृशं पटलं तु लेख्यात् । ऐश्वर्यभृत्यजननं कथितं तदेव पक्वस्य तत्किल भवेत्सुरवज्ररत्नम् । इति गारुडे ॥ ७८ ॥ अध्याय : ॥

रुधिरोद्गारी । पुं॰ षष्ठिसंवत्सराणां मध्ये वत्सरविशेषे ॥ तत्फलं यथा । महिषीगोहिरण्यादितास्रकांस्यादाशेषत : । तत्सर्वं देवि विक्रीय कर्त्तव्यो धान्यसञ्चय : ॥ रक्ते संवत्सरे देवि क्रूरबुद्धिर्नराधिप: । मानवा : क्रूरचेष्टाश्च सङ्ग्रामे न जयो भवेत् ॥ ५८ ॥

रुमण्वान् । पुं॰ लवणाचले ॥ लवणमस्त्यस्मिन् । मतुप् । आसन्दीवदिति॰ लवणस्य रुमण् भाव : ॥ लवणाकरवाचक रुमन् शब्दस्यैतन्निपातनं नलोपाभावार्थं णत्वार्थञ्चेत्यपि मतम् ॥

रुमा । पुं॰ लवणाकरे ॥

रुमा । स्त्री॰ सुग्रीवदारेषु ॥ विशिष्टलवणाकरे ॥

रुम्र : । पुं० रमणे ॥ अरुणे ॥ रम्यतेऽस्मिन् । रमक्रीडायाम् । चकि रम्योरुच्चोपधायाइतिरक् ॥

रुरु : । पुं० मृगविशेषे । हरिणजात्यन्तरे । भारशृङ्गाख्ये ॥ रुरुर्महान् कृष्णसारइतियादव : ॥ व्याघ्रे ॥ यथा । गोगोपीगोपवीतोरुरुनखविलसत्कण्ठभूषश्चिरं वइति ॥ दैत्यभेदे ॥ रौति । रुशब्दे । जम्बादयश्चेतिसाधु : ॥ रुशातिभ्यांक्रुन्वा ॥

रुवु : ।) पुं०

रुवुक : ।) पुं० एरण्डे ॥ इतिरत्नमाला ॥ रक्तैरण्डे ॥ इतिराजनिर्घण्ट : ॥

रुशन् । त्रि० निन्द्यार्थायांवाचि ॥ रुशति । रुशहिंसायाम्तालव्यान्तस्तौदादिकस्तस्माच्छतृप्रत्यय : । रुशन् शब्द : । रुशतीहिंसा । रुशद्वचनम् ॥

रुशती । स्त्री० निन्द्यार्थायांवाचि ॥ शत्रन्तान्ङीप् । आच्छीनद्योरितिनुम्विकल्पान्नुमभाव : । स्त्रियांवाहल्यन्तास्तदर्शनम् ॥ .

रुट् । स्त्री० क्रोधे ॥ रुशहिंसायाम् । सम्पदादित्वात्क्विप् ॥

रुषा । स्त्री० अमर्षे । कोपे । मन्यौ । क्रोधे ॥ क्विबन्ताद्गुरिमतेनटाप् ॥

रुषित : । त्रि० रुष्टे । क्रोधयुक्ते ॥ रुष्यतेस्म । रुषरोषे । क्त : । रुष्यम्त्वरेतिपक्षे ०इड्विकल्प : ।

रुष्ट : । त्रि० रुषिते ॥ शिवेरुष्टे गुरुस्त्रातागुरौरुष्टे नकश्चन । रुष्यतेस्म । रुष० । क्त : । रुष्यमत्वरसङ्घुषास्वनामितिपक्षेइडभाव : ॥

रुह : । त्रि० जाते ॥ आरूढे ॥ रुहे : कर्त्तरिक : ॥

रुहकम् । न० छिद्रे ॥

रुहा । स्त्री० दूर्वायाम् ॥ छिन्नापिरोहति । हबीजरुजन्मनिप्रादुर्भावे इगुपधज्ञाप्रीकिर : क : । टाप् ॥ महासमङ्गायाम् ॥

रुहिरुहिका । स्त्री० उत्कण्ठायाम् ॥ इतिपुराणम् ॥

रुह्वा । पुं० वृक्षे ॥ रोहति । रुह० शीङ्क्रुशिरुहीत्यादिना०क्वनिप् ॥

रूक्ष : । पुं० वृक्षे ॥ वरकाटले ॥ त्रि० अप्रेमणि । परुषे ॥ अचिक्कणे । अस्निग्धे । रूखा० इतिभाषायाम् ॥ रूक्षयति । रूक्षपारुष्ये । पचाद्यच् ॥

रूक्षगन्धक : । पुं० गुग्गुलौ ॥

रूक्षणात्मिका । स्त्री० लङ्काधान्ये ॥

रूक्षदर्भ : । पुं० हरिदर्भे ॥

रूक्षपत्र : । पुं० शाखोटवृक्षे ॥

रूक्षप्रिय : । पुं० ऋषभौषधे ॥

रूक्षस्वादुफल : । पुं० धन्वनवृक्षे ॥

रूक्षा । स्त्री० दन्तीवृक्षे ॥ क्रूरायाम् ॥ अस्निग्धायाम् ॥

रूढः । पुं० प्रकृतिप्रत्ययार्थमनपे-
क्ष्यशाब्दबोधजनकेशब्दे ॥ यथा । मु
ख्योलाक्षणिकोगौणः शब्दः स्या-
दौपचारिकः । यौगिकोयोगरूढो
वारूढोत्रामुख्यएवसः ॥ इतिशा-
ब्दि[illegible]ः ॥ अपिच । रूढमालक्षय-
ति० विभजतेच । रूढंसङ्केतवन्नाम
सैवसंज्ञेतिकीर्त्त्यते । नैमित्तिकीपा
रिभाषिक्यौपाधिक्यपितद्भिदा ॥ य
न्नामयादृशार्थेसङ्केतितमेव० नतुयौ
गिकमपि० तद्रूढम् । योगरूढन्तुप-
ङ्कजादिकंनतथा । रूढानामेवचसंज्ञाप
देनाभिलप्यते । नतुरूढादिवत्सं-
ज्ञानाम्नोऽवान्तरभेदः । येनविभा
गव्याघातः स्यात् । संज्ञायास्त्रयो
भेदाः नैमित्तिकीपारिभाषिकी० औ
पाधिकीचेति । पाचकपाठकादय-
स्तुनसंज्ञाः सङ्केतशून्यत्वात् ॥ ये-
तुरूढस्यनाम्नश्चतुर्विधत्वमाहुस्तन्म
०तमुपन्यस्यति । जातिद्रव्यगुणस्प-
न्दैर्धर्म्मैः सङ्केतवत्तया । जाति
शब्दादिभेदेनचातुर्विध्यंपरेजगुः ॥
गोगवयादीनांगोत्वादिजात्या । प
श्वात्थादीनांलाङ्गूलधनादिद्रव्ये-
ण । धन्यपिशुनादीनांपुण्यत्वादि
गुणेन । चलचपलादीनाञ्चशब्दानां
कर्म्मणाऽवच्छिन्नशक्तिमत्त्वाच्चातुर्वि
ध्यमेवरूढानामिति । यदुक्तंदण्डया-
चार्यैः । शब्दैरेवप्रतीयन्तेजाति-
द्रव्यगुणक्रियाः । चातुर्विध्यादमी
षान्तुशब्दउक्तश्चतुर्विधइति ॥ तदे-
तज्जडमूर्खादीनामन्यशून्यादीना-
ञ्चशब्दानामपरिग्रहापत्त्यापरित्य-
क्तमस्माभिः ॥ नैमित्तिकसंज्ञांल-
क्षयति । जात्यवच्छिन्नसङ्केतवती
नैमित्तिकीमता । जातिमात्रेहिस
ङ्केतादृव्यक्तेर्भानंसुदुष्करम् ॥ यन्ना
मजात्यवच्छिन्नसङ्केतवत्सानैमि-
त्तिकीसंज्ञा । यथागोचैत्रादिः ।
साहिगोत्वचैत्रादिजात्यवच्छिन्नमे
वगवादिकमभिधत्ते नतुगोत्वादि-
जातिमात्रम् । गोपदंगोत्वेसङ्केति
तमित्याकारकग्रहाद्गामानयेत्यादौ
गोत्वादिनागवादेरन्वयानुपपत्तेः
एकशक्तत्वग्रहस्यान्यानुभावकत्वेऽ
तिप्रसङ्गात् ॥ पारिभाषिकीमौ-
पाधिकीञ्चसंज्ञांक्रमेणलक्षयति । उ
भयावृत्तिधर्मेणसंज्ञास्यात्पारिभा
षिकी । औपाधिकीत्वनुगतोपाधि
नायाप्रवर्त्तते ॥ उभयावृत्तिधर्माव
च्छिन्नसङ्केतवतीसंज्ञापारिभाषि-
की । यथाकाशडित्यादिः ॥ याचा
नुगतोपाध्यवच्छिन्नसङ्केतवतीसं-
ज्ञासात्वौपाधिकी । यथाभूतदूता
दि । साहिसचेतनवृत्तविशेषगुणव
त्त्ववार्त्ताहारकत्वाद्यनुगतोपाधिपुर
स्कारेणैवप्रवर्त्तते । इतिशब्दशक्ति
प्रकाशिकाचि० जाते ॥ प्रसिद्धे ॥

रुहेर्गत्यर्थेतिक्तः । ढत्वधत्वष्टुत्वढलोपदीर्घाः ॥

रूढपद: । त्रि० बद्धमूले ।

रूढि: । स्त्री० शिष्टप्रयोगे ॥ प्रसिद्धौ ॥ अनादिव्यवहारसिद्धसम्बन्धविशेषे ॥ मुख्यशब्दवृत्तिभेदे ॥ सा चस्वरूपेणजात्यागुणेन वानिर्देशार्हवस्तुनिसंज्ञासंज्ञिसङ्केतेनप्रवर्त्तते । यथा । डित्थ: डवित्थ: गौ:शुक्लइति ॥ रूढशब्दनिष्ठशक्तौ ॥

रूपम् । न० वाच्याकारे । स्वभावे ॥ सौन्दर्ये । मनोहराकृतौ । तल्लक्षणं यथा । अङ्गान्यभूषितान्येव केनचिद्भूषणादिना । येनभूषितवद्भान्तितद्रूपमितिकथ्यते ॥ इत्युज्ज्वलनीलमणि । : नाणके । प्रशस्ते ॥ पशौ ॥ शब्दे ॥ ग्रन्थावृत्तौ नाटकादौ ॥ आकारे ॥ श्लोके ॥ अवकाशादिहिपदार्थे नानाविकारविशेषे ॥ रूपन्तुषोडशविधंमोक्षधर्मेप्रकीर्त्तितम् । यथा । ह्रस्वम् १ दीर्घम् २ स्थूलम् ३ चतुरस्रम् ४ वृत्तम् ५ शुक्लम् ६ कृष्णम् ७ नीलारुणम् ८ रक्तम् ९ पीतम् १० कठिनम् ११ चिक्कणम् १२ श्लक्ष्णम् १३ पिच्छलम् १४ मृदु १५ दारुण १६ मिति ॥ चक्षुर्मात्रग्राह्यगुणे ॥ तच्चशुक्लनीलपीत

रक्तहरितकपिशचित्रभेदात्सप्तविधम् । पृथिवीजलतेजोवृत्ति । तत्र पृथिव्यांसप्तविधम् । अभास्वरंशुक्लंजले । शुक्लंभास्वरंतेजसि ॥ मा त्रामात्रे ०।० ॥ त्रि० उत्तरपदस्थिस्यास्वसदृशे ॥ यथापितृरूपःपुत्र:मातृरूपाकन्या ॥ प्रापके ॥ रोपयतिविमोहयति । रूपविमोहने । अच् ॥ यद्वा। रूप्यतेऽनेन । खष्पशिल्पशष्पेतिसाधु ॥ रौतिवा । रुशब्दे । खष्पशिल्पेतिप: रौतेर्दीर्घश्च ॥ अतिरूपन्तुनिन्दितम् ॥

रूपकम् । न० नाटके ॥ मूर्त्ते ॥ रूप्ये ॥ काव्यालङ्कारे ॥ तल्लक्षणादि यथा । विषय्यभेदताद्रूप्यरञ्जनंविषयस्ययत् । रूपकंतत्त्रिधाधिक्यन्यूनत्वानुभयोक्तिभि: ॥ अयंहि धूर्जटि: साक्षाद्येनदग्धा: पुर: क्षणात् । अयमास्तेविनाशम्भुस्तार्त्तीयीकंविलोचनम् ॥ शम्भुर्विश्वमवत्वद्यस्वीकृत्यसमदृष्टिताम् । अस्यामुखेन्दुनालञ्चेनेन्दुनामन्दकिमिन्दुना ॥ साध्वीयमपरालक्ष्मीरसुधासागरोदिता । अयंकलङ्किनश्चन्द्रान्मुखचन्द्रोतिरिच्यते ॥ सङ्ख्याविशेषे ॥ यथा । सप्तालीप्रोच्यतेगुञ्जासातिस्त्रोरूपकंभवेत् । रूपकैर्दशभि: प्रोक्त: कलञ्जोनामनामत: ॥ त्रि० । मूर्त्तिमति ॥ पुं० । हठादिसप्तसु ॥

न्तियथा । दृढ : प्रौढोऽथखर्वो विभ वचतुरक्रम : । निशारुक्च : प्रतिता ल : कथिता : सप्तरूपकोद्भूतिदामो दर : ॥

रूपकभेद : । पुं॰ अभिनेयप्रकारे ॥

रूपतत्त्वम् । न॰ शीले ॥

रूपधारी । त्रि॰ सौन्दर्यविशिष्टे ॥

रूपधेयम् । न॰ रूपे ॥ रूपमेव । भाग रूपनामभ्यो धेय : ॥

रूपनाशन : । पुं॰ पेचके

रूपवान् । त्रि॰ आकारविशिष्टे ॥ सौन्दर्ययुक्ते ॥

रूपस्कन्ध : । पुं॰ विषयप्रपञ्चे । वास नामयचित्तेमनिरूप्यमाणे शुशब्दस्य र्शादिषु । पञ्चेन्द्रियेषुच ॥ रूप्यन्ते एभिर्वाविषयाद्भूतिकर्म करणव्युत्प त्तिभ्यांसविषयाणीन्द्रियाणिरूपस्क न्ध : । रूप्यमाणपृथिव्यादीनांवाह्य त्वेपिदेहस्थत्वादिन्द्रियसम्बन्धाच्चा ध्यात्मिकत्वम् ॥

रूपाजीवा । स्त्री॰ वारस्त्रियाम् । वेश्या याम् ॥ रूपमाजीवोस्या : ॥

रूपामाली । स्त्री॰ वर्णवृत्तविशेषे ॥ यथा । चत्वारोस्यांकर्णाआयन्तेछन्दस्ये वंहारंकुर्वन्ते । भव्यावर्णापादेराजन्ते रूपामालीवृत्तं तत्कान्ते ॥ यथा । हत्वाशत्रून्त्यान्तीचण्डंसाचण्डी व : कल्याणं कुर्यात् । देवेन्द्राद्या : प्रीत्यासम्प्राप्ता : संसेवन्ते तत्पादा

म्भोजम् ॥

रूपास्त्र : । पुं॰ कामदेवे ॥ रूपमस्त्रम स्य ॥

रूपिका । स्त्री॰ श्वेतार्कवृक्षे ॥ श्वेतार्क पुष्पे ॥

रूपी । त्रि॰ रूपवति ॥ मूर्तिमति ॥

रूपेश्वरी । स्त्री॰ देवीविशेषे ॥

रूप्यम् । न॰ आहतरजते ॥ आहतहे मनि ॥ तारे । चन्द्रहासे । रजते चन्द्रलोहके । चांदी॰इ॰भा॰ ॥ अस्यलक्षणंगुणादयश्चयथा । गुरु स्निग्धंमृदुश्वेतं दाहच्छेदघनक्षमम् । स्वर्णाद्यंचन्द्रवत्स्वच्छंरूप्यंनवगु णं शुभम् ॥ मारणाययोग्यम् ॥ कठिनं कृत्रिमंरूक्षंरक्तं पीतं दलं ल घु । दाहच्छेदघनैर्नष्टं रूप्यं दुष्टं प्र कीर्तितम् ॥ मारणायायोग्यम् रू प्यशीतं कषायाम्लं स्वादुपाकरसंसर म् । वयस : स्थापनंस्निग्धं लेखनंवा तपित्तजित् ॥ प्रमेहादिकरोगांश्च नाशयत्यचिराद्ध्रुवम् ॥ तारं शरी रस्यकरोतितापंविड्बन्धनंयच्छति शुक्रनाशम् । वीर्यंबलंहन्तितनोश्च पुष्टिं महागदान्पोषयतिह्यशुद्धम् ॥ अथशोधनविधि : । पत्तलीकृत्यप त्राणितारस्याग्नौप्रतापयेत् । निषि ञ्चेत्तप्ततप्तानितैलेतक्रे चकाञ्जिके ॥ गोमूत्रेचकुलत्थानांकषायेचत्रिधा त्रिधा । एवं रजतपत्राणांविशुद्धि : स

म्प्रजायते ॥ अथास्यमारणविधिः ।
भागैकंतालकंमर्द्यं याममम्लेनकेन
चित् । तेनभागत्रयंतारपत्राणिप-
रिलेपयेत् ॥धृत्वामूषापुटेरुद्ध्वापुटे
त्त्रिंशद्वनोपलैः । समुद्धृत्यपुन
स्तालंदत्वारुद्ध्वापुटेपचेत् ॥एवंच
तुर्द्दशपुटैस्तारभस्मप्रजायते ॥ अ
न्योऽपिप्रकारोयथा । स्नुहीक्षीरेणस
म्पिष्टंमाक्षिकंतेनलेपयेत् । तालक
स्यप्रकारेणतारपत्राणिबुद्धिमान् ।
पुटेच्चतुर्द्दशपुटैस्तारभस्मप्रजाय-
यते ॥ इति ॥ अथरूप्यकरणम् ।
मध्वाज्यंगुडताम्रंचकरेणामाक्षि-
कंरसम् । धमनाच्चभवेद्रौप्यंसुवर्ण
करणंशृणु ॥ इतिगारुडे १८८
अध्यायः ॥ कार्षापणे ॥ त्रि० रूप
वति । सुन्दरे ॥ आहतं० प्रशस्तं
वा० रूपमस्यास्ति । रूपादाहतप्र
शंसयोरितियत् ॥ रूप्यते । रूप
रूपक्रियायाम् । ण्यन्तः ॥ अच् ०
वा ॥

रूप्यकः । पुं० लङ्कादिद्वीपवत्समुद्रा
न्तर्वर्त्तिनिद्वीपविशेषे ॥

रूप्यमाषकः । पुं० कृष्णलाद्वयमि
तेरूप्यमाने ॥द्विकृष्णलेसमधृतेविज्ञे
योरूप्यमाषकः ॥

रूप्यशाला । स्त्री० टकसाल० इति
प्रसिद्धेरजतादिमुद्रागृहे ॥

रूप्याध्यक्षः । पुं० नैष्किके ॥ रूप्यस्य
अध्यक्षः ॥

रूबुकः । पुं० एरण्डे ॥

रूमः । पुं० शकदेशे । यथा । योरू
मदेशाधिपतिंशकेश्वरंजित्वागृही-
त्वोज्जयिनीमहाहवे । आनीयसम्
भ्राम्यमुमोचतन्त्वहोश्रीविक्रमार्कः
समसह्यविक्रमः ॥

रूषकः । पुं० वासके ॥

रूषणम् । न० मिश्रणे ॥ रूष० ।
ल्युट् ॥

रूषितः त्रि० गुण्ठिते । गुण्डिते ॥
रूष्यतेस्म । रूषिर्वेष्टनार्थोऽपठि
तोऽपि भ्वादौद्रष्टव्योभ्वादेरवृत्कृत
त्वात् । क्तः । रूक्षीकृते ॥ लिप्ते
॥ लग्ने । लग्ना० इ० भा० ॥ रूष
त० क० विस्फुरणे० इतिकविक
ल्पद्रुमः । अरुरूषत् ॥

रे । अ० सम्बोधनविशेषे ॥ यथा ।
सम्बोधनेऽङ्गभोःपाट्प्याटहेहैहंहो
ऽरेरेपिचेतिहेमचन्द्रः ॥ अनादरे ॥

रेकः । पुं० शंकायाम् ॥ नीचे ।
हीने ॥ विरेचने ॥ भेके । गूढव-
र्च्चसि ॥

रेका । स्त्री० सन्देहे ॥

रेक्णः । न० सुवर्णे । स्वर्णे । रिणक्ति ।
रिचिर्विरेचने । रिचेर्धनेचिच्चेत्य
ऽसुन् । चात्प्रत्ययस्यनुट् । चित्वा
त्कुत्वम् ।

रेखा । स्त्री० अल्पके ॥ छद्मनि ॥

आभोगे । उल्लेखे ॥ उल्लेखस्त्वत्र दण्डाकारलिपिविशेषः । डंडी० लकीर० रेख० इ० भा० ॥ राज्याम् । लिख्यते । लिख अक्षरविन्यासे । भिदादित्वादङ् गौरलयोरैकत्वम् ॥

रेखाभूमिः । स्त्री० वारप्रवृत्तिस्थले । लङ्कासुमेर्वोर्मध्यसूत्रगतदेशे ॥ यथा । यल्लङ्काज्जयिनीपुरोपरिकुरुक्षेत्रादिदेशान् स्पृशन् सूत्रं मेरुगतं बुधैर्निगदिता सा मध्यरेखा भुवः । आदौ प्रागुदयोऽपरत्र विषयेपश्चाद्धिरेखोदयात् स्यात्तस्मात् क्रियते तदन्तरभवं खेटेष्वृणं स्वं फलमिति सिद्धान्तशिरोमणिः ॥

रेचकः । पुं० यवक्षारे ॥ जयपालवृक्षे ॥ तिलकवृक्षे ॥ क्रीडार्थं जलनिक्षेपयन्त्रे । पिचकारी० इ० भा० प्र० ॥ प्राणवायोः शनैर्वामनासापुटाद्दक्षिणनासापुटाद्वा० सव्यापसव्यन्यायेन बहिर्निःसारणे ॥ मुच्यमानस्तु रेचकइतियाज्ञवल्क्यः । श्वासइतिशेषः ॥ अनात्मोपेक्षायाम् ॥ निषेधनं प्रपंचस्य रेचकाख्यः समीरणः ॥ न० कङ्कुष्ठमृत्तिकायाम् ॥

रेचनम् । न० मलभेदने । प्रस्कन्दने । विरेके । विरेचने ॥

रेचनकः । पुं० कम्पिल्लके ॥

रेचना । स्त्री० काम्पिल्ले ॥

रेचनी । स्त्री० त्रिवृतायाम् ॥ दन्त्याम् ॥ गुन्द्रायाम् ॥ रोचनकायाम् ॥ रिचिर्० । ल्युट् । ङीप् कालाञ्जन्याम् ॥ काम्पिल्ले ॥

रेचितम् । न० उत्तेजिताख्ये । यथा । उत्तेजितं मध्यवेगं योजनं श्लथवलायेति ॥ रेचनम् । रिचिर्० । क्तः । त्रि० रिक्तीकृते ॥ अश्वगतिविशेषे ॥

रेची । स्त्री० अङ्कोठे । काम्पिल्लके ॥

रेजः । त्रि० तेजिते ॥ रेजति । रेजतेवा । रेजृदीप्तौ । पचाद्यच् ॥

रेणुः । पुं० पर्पटे ॥ रेणुकायाम् ॥ पांशौ । पुं० स्त्री० धूलौ ॥ दीपखट्वाजच्छायाच्छिन्नकेशनखादिकम् । अजमार्जाररेणुश्च हन्ति पुण्यं पुराकृतम् ० इ० क० लो० ॥ रिणाति० रीयतेवा । रीगतिरेषणयोः । अजिवृरीभ्योनिच्चेति णुः ॥

रेणुकम् । न० कङ्कुष्ठभेदे ॥

रेणुका । स्त्री० मरिचाकृतसुगन्धिद्रव्यविशेषे । द्विजायाम् । हरेणौ । भस्मगन्धिन्यामौषधौ ॥ अस्यागुणाः रेणुकाकटुकापाकेतिक्तानुष्णाकटुर्लघुः । पित्तलादीपनी

मेध्यापावनीगर्भपातनी ॥ बलासवातवैकव्यत्वट्कण्डूविषदाहनुत् ॥ परशुराममातरि ॥ रेणुरस्यास्ति । ब्रीह्यादित्वादिन् । कुसुमकान्तात्कः ॥ रेणुरिव वा । संज्ञायामितिकन् ॥

रेणुकातीर्थम् । न० तीर्थविशेषे ॥

रेणुकासुतः । पुं० परशुरामे ॥

रेणुरूषितः । पुं० गर्द्दभे ॥ त्रि० धूलिम्रक्षिते ॥

रेणुवासः । पुं० भ्रमरे ॥

रेणुसारः । पुं० कर्पूरे ॥

रेणुसारकः । पुं० कर्पूरे ॥

रेतजा । स्त्री० बालुकायाम् ॥

रेतनम् । न० वीर्ये । शुक्रे ॥

रेतः । न० वीर्ये । शुक्रे ॥ अप्सुरेतःपातनिषेधो यथा । नवामस्वस्तेनोऽत्यपिवैद्यक्षेणवाजलम् । नोत्सरेदनुपस्पृश्यनाप्सुरेतः समुत्सृजेत् ॥ पारदे ॥ रिणाति । रीगतिरेषणयोः । स्रुरीभ्यां तुट् चेत्यसुन् ॥ पुं० । कार्ये ॥ अथातोरेतसः सृष्टिरित्यादौ रेतः शब्दस्य कार्यपरत्वेन व्याख्यानात् ॥

रेत्रम् । न० रेतसि ॥ पीयूषे ॥ पटवासे ॥ सूतके । पारदे ॥

रेपः । त्रि० निन्दिते । विगर्हिते ॥ क्रूरे ॥ री० बाहुलकात्पः ॥

रेपाः । त्रि० अधमे ॥ क्रूरे ॥ कृपणे ॥ रपति । रपव्यक्तायां वाचि । रपेरत एच्चेत्यसुन् ॥

रेफः । पुं० रवर्णे ॥ रादिफः ॥ रिफ्यते० रिफतिवा । रिफेर्घञ्० पचाद्यज्वा । रागे ॥ त्रि० अवद्ये । कुत्सिते ॥ रिफति । रिफ कत्थनयुद्धनिन्दाहिंसादानेषु । अकर्त्तरिचेतिघञ् ॥ यद्वा । रिफते । अवद्यावमाधमेतिअप्रत्ययान्तो निपातः ॥

रेभणम् । न० हम्भायाम् । गोध्वनौ ॥

रेरिहाणः । पुं० वृषाङ्के । महादेवे । सदाशिवे ॥ अम्बरे ॥

रेवटः । पुं० शूकरे ॥ वेणौ ॥ वातुले ॥ विषवैद्ये ॥ न० दक्षिणावर्त्तशङ्खे ॥

रेवतः । पुं० जम्बीरे ॥ आरग्वधे ॥ रेवतीपितरि० नृपतिविशेषे । बलरामश्वशुरे ॥

रेवतकम् । न० पारेवते ॥

रेवती । स्त्री० ककुद्मिकन्यायाम् । बलदेवपत्न्याम् ॥ मातृभेदे ॥ अन्त्यनक्षत्रे ॥ अस्मिन्नक्षत्रे जातस्य फलं यथा । चारुशीलविभवो जितेन्द्रियः सत्कुले समभवन्नेकमानसः । मानवो ननु भवेन्महीपती रेवतीभवति यस्य जन्मभम् ॥ वाल

ग्रहविशेषे ॥ रैवतमनुमातरि ॥ धेनौ । दुर्गायाम् ॥ रेवतीनक्षत्रे ॰ इतिगौरादिषुपाठान्ङीष् ॥ रेवत्यांजातायाम् ॥ चित्रारेवतीतिनक्षत्राणोलुक् ॥ पिप्पल्यादित्वान्ङीष् ॥

रेवत्य : । स्त्री॰ सामविशेषे ॥ नित्यबहुवचनान्तोयरेवतीशब्द : ॥

रेवतीजानिः : । पुं॰ रेवतीरमणे ॥ रेवतीजायायस्य । जायायानिङितिसमासान्तोनिङादेश : । लोपोव्योर्वलीतियलोप : ॥

रेवतीभव : । पुं॰ शनैश्चरे ॥

रेवतीरमण : । पुं॰ रामे । हलायुधे । बलदेवे ॥ रेवत्यारमण : ॥

रेवतीश : । पुं॰ बलभद्रे । रेवतीरमणे ॥

रेवन्त : । पुं॰ सूर्यात्मजविशेषे ॥ गुह्यकाधिपतौ ॥

रेवन्तप्रसू : । स्त्री॰ संज्ञायाम् । सूर्यपत्न्याम् ॥

रेवा । स्त्री॰ नदीविशेषे ॥ नर्मदायाम् । मेकलकन्यायाम् ॥ रत्याम् । मन्मथयोषिति ॥ नीलीवृक्षे ॥ दुर्गायाम् ॥ रेवते । रेवृप्लवगतौ । पचाद्यच् । टाप् ॥

रेषणम् । न॰ वृकशब्दे ॥ हिंसायाम् । रिषहिंसायाम् । ल्युट् ॥

रै । अ॰ दाने ॥ अनादरे ॥

रा : । पुं॰ स्वर्णे ॥ वित्ते । धने ॥ जलदे ॥ ध्वनौ । शब्दे ॥ रातिसुखम्॰ रायतेवा । रादाने । रातेडैः ॥

रैक्व : । पुं॰ संवर्गविद्याविदिमुनिविशेषे ॥

रैणुकेय : । पुं॰ परशुरामे ॥ रेणुकायाअपत्यम् । स्त्रीभ्योढक् ॥

रैभ्य : । पुं॰ ऋषिविशेषे ॥ रेभस्यगोत्राऽपत्यम् । गर्गादित्वाद्यञ् ॥

रैवत : । पुं॰ सुवर्णालौ ॥ शैलभेदे ॥ शङ्करे ॥ जयन्ते ॥ दैत्यविशेषे ॥ वर्त्तमानकल्पीयेपंचमेमनौ ॥

रैवतक : । पुं॰ द्वारकासमीपस्थेपर्वतविशेषे । उज्जयन्ते ॥ श्रुतिपुराणप्रसिद्धपरमहंसे ॥ न॰ पारेवतवृक्षे ॥

रोक : । पुं॰ क्रयभेदे ॥ दीप्तौ ॥ न॰ नावि ॥ चरे ॥ बिले । छिद्रे ॥ त्रि॰ चंचले ॥ रोचतेऽत्र । रुचदीप्तौ । हलश्चेतिघञ् ॥ निष्ठासेट्त्वान्न्यङ्क्वादित्वात्कुत्वम् ॥

रोग : । पुं॰ कुष्ठौषधौ । दोषवैषम्ये । व्याधौ आमये । गदे ॥ दुष्कर्मजानृणांरोगायान्तिचैवक्रमात्क्षमम् । जपैः सुरार्चनैर्होमैर्दानैस्तेषांशमोभवेत् इतिकर्मविपाक : ॥ रोजनम् । भावेघञ् । रुजतिवा । रुजोभङ्गे । पदरुजेतिघञ् ॥

रुज्यतेपीडातेदेहोऽनेनेतिवारोगः॥

रोगघ्नम्। न॰ औषधे। त्रि॰ रोगनाशके॥

रोगभूः। स्त्री॰ शरीरे॥

रोगराजः। पुं॰ पापरोगे। राजयक्ष्मणि॥ रोगाणांराजे। टच्॥

रोगलक्षणम्। न॰ निदाने॥

रोगशान्तकः। पुं॰ वैद्ये॥

रोगशिला। स्त्री॰ मनःशिलायाम्॥

रोगशिल्पी पुं॰ शरालु॰ इ॰ गौ॰ दे॰ भा॰ प्र॰ वृक्षविशेषे॥

रोगश्रेष्ठः। पुं॰ ज्वरे॥ रोगेषुश्रेष्ठः॥

रोगहम्। न॰ औषधे। भैषज्ये॥

रोगहारी। पुं॰ चिकित्सके। वैद्ये॥ रोगंहरतितच्छीलः। सुपीतिणिनिः॥ त्रि॰ रोगनाशके॥

रोगितरुः। पुं॰ अशोकवृक्षे॥

रोगी। त्रि॰ रोगयुक्ते। व्याधिते। आतुरे। अभ्यमिते। रोगार्त्ते॥ रोगमस्यास्ति। इनिः॥ अथवच्चिकित्सार्थंपरीक्षांरोगितंस्यह्हि॥ तत्राहवाग्भटः। दर्शनस्पर्शनप्रश्नैः परीक्षेतथरोगिणम्। आयुरादिदृशास्पर्शाच्छीतादेः प्रश्नतोऽपरम्॥ आयुरारोग्यत्वादिशब्दात् साध्यत्वाऽसाध्यत्वादिवोध्यम्। दृशा॰दर्शनेन। अत्रसम्पदादिभ्यश्च तिभावेक्विप्। स्पर्शात्॰ शीतादेः। शीतोष्णमृदुकठिनत्वादिनापरीक्षणाच्च। प्रश्नतः। उदरलाघवगौरवतृषाऽतृषा॰बुभुक्षाऽबुभुक्षावलाऽबलादिना। मिथ्यादृष्टाविकाराहि दुराख्यातास्तथैवच। तथादुष्परिपृष्टाश्चमोहयेयुश्चिकित्सकान्॥ तत्रदर्शनंनेत्रजिह्वामूत्रादेः कर्त्तव्यम्॥

रोगिवल्लभम्। न॰ भैषज्ये। औषधे त्रि॰ रोगिप्रिये॥

रोग्यम्। त्रि॰ अपथ्ये। अहिते॥ रोगायहितम्। यत्॥ रोगसम्बन्धिनि॥

रोचकः। पुं॰ बुभुक्षायाम्। अशनायाम्। जिघत्सायाम्। कदल्याम्॥ राजपलाण्डौ॥ अश्मदंशे॥ ग्रन्थिपर्णभेदे। निशाचरे। धनहरे। कितवे। गणहासके। नैपालदेशेभण्डउर॰इतिप्रसिद्धे॥ अस्यगुणाः। रोचकोमधुरस्तिक्तः कटुपाकः कटुर्लघुः। तीक्ष्णोहृद्योहिमोहन्तिकुष्ठकण्डूकफानिलान्॥ रक्षोऽश्रोस्वेदमेदोस्र ज्वरगंधविषव्रणान्॥ त्रि॰रुचिकारके॥

रोचनः। पुं॰ कूटशाल्मलौ॥ श्वेतशिग्रौ॥ पलाण्डौ॥ आरग्वधे॥ करञ्जे॥ अङ्कोठे॥ दाडिमे॥ त्रि॰ रोचके। रुचिकरे॥ रोचते। रुचदीप्तौ। अनुदात्तेतश्चेतियुच्॥

रोचयति । नन्द्यादित्वाल्ल्युर्वा बहुलमन्यत्रापीतियुज्वा ॥

रोचनकः । पुं॰ जम्बीरे ॥

रोचनफलः । पुं॰ बीजपूरके ॥

रोचनफला । स्त्री॰ चिर्भिटायाम् ॥

रोचना । स्त्री॰ रक्तकह्लारे ॥ गोपित्ते ॥ वरयोषिति ॥ रोचते । रुच॰ । बहुलमन्यत्रापीतियुच् । टाप् ॥

रोचनिका । स्त्री॰ वंशरोचनायाम् ॥ शुण्डारोचन्याम् ॥

रोचनी । स्त्री॰ आमलक्याम् ॥ गोरोचनायाम् ॥ मनःशिलायाम् ॥ श्वेतत्रिवृतायाम् ॥ काम्पिल्यौषधौ ॥ रोचते । रुच दीप्तावभिप्रीतौ च । कृत्यल्युटइतिल्युट् ॥

रोचमानः । पुं॰ अश्वस्य ग्रीवास्थरोमावर्त्ते ॥ यथा । ग्रीवोत्थोहृदयावर्त्तौ रोचमानोगलोद्भव इति त्रिकाण्डशेषः ॥ अपिच । कण्ठजोरोचमानस्तु स्वामिसौभाग्यवर्द्धन इति वैजयन्ती ॥ त्रि॰ अत्यन्तं दीप्यमाने ॥ रोचते । रुच॰ । लटः शानच् । आनेमुक् ॥

रोचितः । त्रि॰ प्रकाशिते ॥

रोची । त्रि॰ रोचिष्णौ ॥

रोचिष्णुः । त्रि॰ अलङ्कारादिनाशोभमाने । विभाजि । भाजिष्णौ ॥ रोचतेतच्छीलः । रुच॰ । अलङ्कृञिति॰ इष्णुच् ॥

रोचिः । न॰ शोचिषि । त्विषि । प्रभायाम् । दीप्तौ ॥ रोचतेऽनेन । रुच॰ । बाहुलकादिसिः ॥

रोची । स्त्री॰ हिलमोचिकायाम् ॥

रोच्यः । त्रि॰ प्रकाश्ये ॥ प्रीतिविषये ॥

रोटिका । स्त्री॰ रोटी॰ इतिभाषाप्रसिद्धेपिष्टकविशेषे ॥ अस्याः करणप्रकारोयथा । शुष्कगोधूमचूर्णेन किञ्चित्पुष्टामपोलिकाम् । तप्तकेस्वेदयेत्कृत्वा भूयोऽङ्गारेपितांपचेत् । सिद्धैषारोटिकाप्रोक्तागुणानस्याः प्रचक्ष्महे । रोटिकाबलकृद्रुच्याबृंहणीधातुवर्द्धनी ॥ वातघ्नी कफकृद्गुर्वीदीप्ताग्नीनां प्रपूजिता । यवजारोटिकारुच्यामधुराविशदालघुः । मलशुक्रानिलकरीबल्याहन्तिकफामयान् ॥ पीनसश्वासकासांश्चमेदोमेहगलामयान् ॥

रोडः । पुं॰ चोदे ॥ त्रि॰ तृप्ते ॥

रोदनम् । न॰ क्रन्दने । शोकादिनाश्रुपतने । रोना॰ इ॰ भा॰ ॥ अस्रे । अश्रुणि । आंसू॰ इ॰भा॰ रुद्यते । रुदिर् अश्रुविमोचने । बाहुलकात्कर्म्मणिल्युट् । तस्यशुभाशुभं यथा । अनश्रुस्निग्धरुदितमदीनं शुभदं नृणाम् । प्रचुराश्रुदीनं रूक्षस्वरुदितं नसुखावहम्

॥ रोदनाश्रुपतनेनमृतानांनरकं यथा ॥ स्नानिनोमारुदन्त्येवमारोदी: पुत्रसाम्प्रतम् ॥ रोदनाश्रुप्रपतनान्मृतानांनरकंध्रुवम् ॥ मृतमुद्दिश्यरोदननिषेधोयथा ॥ श्लेष्माश्रुबान्धवैर्मुक्तं प्रेतोभुङ्क्तेयतोऽवश: । अतोनरोदितव्यंहिक्रियाकार्याविधानत: इति ॥

रोदनिका । स्त्री॰ यवासे ॥

रोदनी । स्त्री॰ कच्छुरायाम् । दुरालभायाम् । यवासे ॥ रोदयति । रुदिर्॰ । ल्युट् । ङीप् ॥

रोद : न॰ दिवि । भूमौ । द्यावापृथिव्यो: ॥ रोदितिसर्वमस्मिन् । रुदिर्॰ । असुन् ॥

रोदसी । अ॰ द्यावापृथिव्यो: ॥ दिवि ॥ भूमौ ॥

रोदसी । स्त्री॰ स्वर्गे । भूमौ ॥ द्यावाभूम्यो: ॥ गौरादित्वात्पक्षेङीष् ॥

रोदस्यौ । स्त्री॰ द्विवचनान्त: । भूमिस्वर्गयो: ॥

रोध : । पुं॰ नदीतीरे । कूले ॥ रुणद्धि । रुधिरावरणे । पचाद्यच् ॥ प्रतिबन्धे ॥

रोधक : । त्रि॰ रोधिनि । रुधिर्॰ । ण्वुल् ॥

रोधन : । त्रि॰ रोधकर्त्तरि । न॰ रोधे ॥

रोधवक्रा । स्त्री॰ सरिति ॥ रोधेन-वक्रा ॥

रोध : । न॰ तीरे ॥ रुणद्धि । रुधिर्॰ । सर्वधातुभ्योसुन्निति॰ असुन् ॥

रोधोवक्रा । स्त्री॰ नद्याम् ॥ रोधसावक्रा ॥

रोधोवती । स्त्री॰ नद्याम् ॥

रोध्र : । पुं॰ गालवे । लोध्रे । न॰ अपराधे ॥ किल्बिषे ॥ रुणद्धि । रुधिर्॰ । बाहुलकाद्रन् ॥

रोध्रपुष्प : । पुं॰ मधूकवृक्षे ॥

रोध्रपुष्पिणी । स्त्री॰ धातकीवृक्षे ॥

रोप: । पुं॰ रोपणे ॥ इषौ । बाणे । न॰ लोध्रे ॥ रोप्यतेऽनेनवा । रूपविमोहने । ण्यन्त: । घञ् । यद्वा । रूप्यतेऽनेन । हलश्चेतिघञ् ॥

रोपक : । पुं॰ सुवर्णसप्ततितमेभागे । यथाहविश्वगुप्त: । दीनाराद्रोपकैरष्टाविंशत्यापरिकीर्त्तित: । सुवर्णसप्ततितमोभागोरोपकउच्यतइति ॥

रोपणम् । न॰ विमोहने ॥ जनने ॥ प्रादुर्भावे ॥ रुपेर्भावेल्युट् ॥ अञ्जनविशेषे ॥ यथा । रोपणंरसकंपिष्ट्वासम्यक्सम्प्लाव्यवारिणा । गृह्णीयात्तज्जलंसर्वंत्यजेच्चूर्णमधोगतम् ॥ शुष्कन्तज्जलंसर्वंपर्पटीसन्निभंभवेत् । विचूर्ण्यभावयेत्सम्यक्त्रिवेलंत्रिफलारसै: । कर्पूरस्यरसंतद्वद्दशमांशेनमि : क्षिपेत् ।

अञ्जयेन्नयनेतेननेत्राखिलगदच्छि-
द : ॥

रोपणचूर्णम् । न० नयनाञ्जनविशे-
षे ॥ यथा । शिलायांरसकंपिष्ट्वास
म्यगाप्लाव्यवारिणा । गृह्णीयात्त
ज्जलंसर्वंत्यजेच्चूर्णमधोगतम् । शु
ष्कंतच्चजलंसर्वंपर्पटीसन्निभंभवेत्
। विचूर्ण्यभावयेत्सम्यक्त्रिवेलं-
त्रिफलारसै : ॥ कर्पूरस्यरजस्तच्च
दष्टमांशेननि : क्षिपेत् । अञ्जयेन्नय
नंतेनसर्वदोषोपशान्तये ॥ समस्त
नेत्ररोगघ्नंचूर्णमेतन्नसंशय : ॥

रोपणवर्त्तिः । स्त्री० नेत्राञ्जनप्रभेदे ॥
यथा । अशीतिस्तिलपुष्पाणिषष्टिः
पिप्पलितण्डुला : । जातीपुष्पाणि
पञ्चाशन्मरिचानिचषोडश ॥ सू-
क्ष्मंपिष्ट्वाम्बुनावर्त्ति : कृताकुसु-
मिकाभिधा । तिमिरार्जुनशुक्रा
णांनाशिनीमांसवृद्धिनुत् ॥ एतस्या
अञ्जनेप्रोक्तामात्रासार्द्धहरेणुका ।
कुसुमिकावटी० रोपणी ॥

रोप्यातिरोप्यः । पुं० धान्यविशेषे ॥ य
था । रोप्यातिरोप्यालघव : शीघ्रपा
काग्गुणोत्तरा : । अदाहिनोदोषहृ-
रावल्यामूत्रविवर्द्धना : ॥

रोमम् । न० जले ।

रोमकम् । न० पांशुलवणे । अयस्कां
तप्रभेदे । पुं० रूमाभिधेनगरे ॥

रोमकन्द : । पुं० पिण्डालौ ॥

रोमकपत्तनम् । न० पश्चिमेकेतुमाल-
वर्षस्यनिरक्षदेशेविद्यमानेपत्तने ॥
रूमे ॥ तच्चाधुनारूमश्याम्० इति
नाम्नाप्रसिद्धम् ॥

रोमकूप : । पुं० रोममूले ॥

रोमकेशरम् । रोमगुच्छम् । रोमगुच्छकम् रोमगुल्मम् ।	न०	चामरे । अव चूलके ॥

रोम: । न० लोम्नि । अङ्गजे । तनूरु
हे ॥ तस्यफलंयथा । अल्परोमयुता
श्रेष्ठाजङ्घाहस्तिकरोपमा । रोमै
कैकंकूपकेस्यात्नृपाणान्तुमहात्म-
नाम् ॥ द्वेद्वेरोमेपण्डितानांश्रोत्रि
याणांतथैवच । रोमत्रयंदरिद्राणां
रोगीनिर्मांसजानुक : ॥ अपिच ।
रोमैकैकंकूपकेपार्थिवानांद्वेद्वेज्ञेये
पण्डितश्रोत्रियाणाम् । त्र्याद्यैर्निः
स्वामानवादु : स्वभाजः केशास्त्वेवं
निन्दिता : पूजिताश्चेति ॥ रोह
ति । रुह० । नामन्सीमन्व्योम-
न्रोमन्नित्यादिनासाधु । यद्वा ।
रूयते । रुशब्दे० रुङ्गतौ० भा
वणेवा मनिन् ॥

रोमन्थः पुं० उद्गीर्यचर्वणे । पशूनांच
र्वितस्याकृष्यपुनश्चर्वणे । जुगार०
इ० भा० ॥

रोमभूमि : स्त्री० चर्मणि ॥

रोमलता । स्त्री० रोमावल्याम् ॥

रोमवान् । त्रि॰ रोमशे, लोमविशिष्टे ॥

रोमविकार : ।) पुं॰ रोमाञ्चे ।
रोमविक्रिया ।) स्त्री॰ रोमहर्षणे ।

रोमश : । पुं॰ पिण्डालौ । मेषे । कुम्भिनि ॥ शूकरे । त्रि॰ अतिशय लोमविशिष्टे ॥ रोमाण्यस्यसन्त्यस्य । लोमादित्वात्॰ श : । रलयोरभेद : ॥

रोमशफल : । पुं॰ डिण्डिशे । मुनिनिर्मिते । डिण्डसो॰ टिण्डा॰ इ॰ भा॰

रोमशा । स्त्री॰ दग्धावृक्षे ॥

रोमशूकम् । न॰ स्थौणेयके ॥

रोमहर्ष : । पुं॰ पुलकितत्वे । रोमाञ्चे ॥

रोमहर्षण : । पुं॰ सूते । इतिहासपुराणानांधारकेव्यासशिष्ये ॥ अस्यतेसर्वेरोमाणिवचसाहर्षितानियत् । द्वैपायनस्यभगवंस्ततोवैरोमहर्षण: ॥ भवन्तमेवभगवान्व्याजहारस्वयंप्रभु : ॥ विभीतकवृक्षे ॥ न॰रोमाञ्चे ॥ रोम्णांहर्षणम् ॥

रोमाञ्च : । पुं॰ रोमहर्षणे । रोमोद्गमे ॥ रोम्णामञ्चनंपूजनम् । भावेघञ् ॥

रोमाञ्चिका । स्त्री॰ रुदन्तीवृक्षे ॥

रोमाञ्चित : । त्रि॰ जातपुलके । हृष्टरोमणि ॥ रोमाञ्च : सञ्जातोस्य । तारकादित्वादितच् ॥

रोमाली । स्त्री॰ वय : सन्धौ ॥ रोमावल्याम् ॥

रोमालु : । पुं॰ पिण्डालौ ॥

रोमालुविटपी । पुं॰ कुम्भीवृक्षे ॥

रोमावली । स्त्री॰ नाभेरुपरिलोमश्रेण्याम् ॥

रोमाश्रयफला । स्त्री॰ भिञ्भिरिष्टाक्षुपे ॥

रोमोद्गम : ।) पुं॰ रोमहर्षणे ।
रोमोद्भेद: ।) पुं॰ रोमाञ्चे ॥

रोल: । पुं॰ पानीयामलके ॥

रोलम्ब : । पुं॰ भमरे ॥

रोला । स्त्री॰ मात्रावृत्तान्तरे ॥ यथा । रोलावृत्तमवेहिनागपतिपिङ्गलभणितंप्रतिपदमिहचतुरधिककला विंशतिपरिगणितम् । एकादशमधिविरतिरखिलजनचित्ताहरणं सुललितपदमदकारिविमलकविकण्ठाभरणम् । यथा । तरतिपयोधिसलिलमयतिगिरिशिखरशिखोपरि॰ विशतिरसातलमटतियशस्तवसकलदिशोपरि । गगनगमनमभिनयतिसमंशशिनाश्रमसहतिचित्रमिदंनतथापिभवन्तंभूपविसुञ्चति ॥

रोट । त्रि॰ बधके । हिंस्रे ॥ रोषति । रुष॰ । विच् ॥

रोष: । पुं॰ कोपे । क्रोधे ॥ अपमे

यमुदेतुमिच्छतातिमिरं रोषमयं धियापुर : । अविभिद्यनिशाकृतं तम : प्रभयानांशुमताप्युदीयते ॥ रोषणम् । रुषहिंसायाम् । भावे घञ् ॥

रोषण : । पुं॰ पारदे ॥ हैमकषर्षे ॥ उषरे ॥ ऊषरे ॥ त्रि॰ क्रोधने । अमर्षणे ॥ रोषतितच्छील : । रुष॰ । क्रुधमण्डार्थेभ्यश्चेतियुच् ॥

रोषमय : । त्रि॰ रोषाद्रागते । मयड्वेतिमयट् ॥

रोषित : । त्रि॰ रोषंप्रापिते । रुष्टे ॥

रोह : । पुं॰ अङ्कुरे ॥ सादिनि ॥

रोहक : । पुं॰ प्रेतविशेषे ॥ त्रि॰ रोढरि । रोहकारे ॥ रुहबीजजन्मनिप्रादुर्भावे । ण्वुल् ॥

रोहण : । पुं॰ गिरिप्रभेदे । विदूराद्रौ ॥ न॰ शुक्रे ॥ जन्मनि ॥ प्रादुर्भावे ॥

रोहन्त : । पुं॰ द्रुमविशेषे । वृक्षात् । रुह॰ । रुहिनन्दिजीविप्राणिभ्य : षिदाशिषीतिझच् ॥ हषमार्ष ॥

रोहन्ती । स्त्री॰ लतान्तरे ॥ षित्वात् ङीष् ॥

रोहि : । पुं॰ बीजे ॥ वृक्षे ॥ धार्मिके ॥ व्रतत्याम् ॥ रोहति । रुह॰ । इपिमिरुहिवृतिविदिच्छिदिकीर्तिभ्यश्चेतीन् ॥ गन्धमृगे ॥

रोहिष : । पुं॰ भूतृणे ॥ वटवृक्षे ॥

रोहितकवृक्षे ॥ न॰ कालभेदे । रौहिणे । दिनस्यनवमेमुहूर्त्ते ॥ सचपूर्वाह्णश्राद्धस्यगौणकालत्वेनोत्तरावधि : । अपराह्णश्राद्धस्यपूर्वावधि : । एकोद्दिष्टश्राद्धस्यसमानकाल : ॥ रोहति । रुह॰ । रुहेर्वृद्धिश्चेति॰ इन् ॥ त्रि॰ रोहिण्यांजाते । नक्षत्रेभ्योबहुलमितिलुक् । लुक्तद्धितलुकि ॥

रोहिणि : । स्त्री॰ रोहिणीनक्षत्रे ॥

रोहिणिका । स्त्री॰ रागादिनारक्तवर्णायांस्त्रियाम् ॥

रोहिणी । स्त्री॰ अश्विन्यादिषुचतुर्थनक्षत्रे । ब्राह्म्याम् ॥ तत्रजातस्यफलंयथा । स्याद्धर्मकार्यकुशल: कुलीन : सुचारुदेहोविलसत्कलेवर : । स्मराग्निनाचाकुलिताखिलाशयोयोरोहिणीज : सघनीसमानो ॥ इति ॥ रोहिणीनक्षत्रे इति गौरादिषुपाठात्ङीष् ॥ कण्ठरोगविशेषे ॥ अस्यनामानिसङ्ख्याचयथा । रोहिणीपञ्चधाप्रोक्ताकण्ठशालूकएवच । अधिजिह्वस्वलयोऽलासनामकवृन्दक : ॥ ततोवृन्द : शतघ्नीचगिलायु : कण्ठविद्रधि : । गलौघ : प्रसरन्नस्वमांसतालस्तथैवच ॥ विदाहीकण्ठ

देशेतुरोगाश्चाष्टादशस्मृता: । इति ॥ धेनौ । सौरभेय्याम् ॥ रोहितवर्णयोगात्० ङीब् नौ ॥ लोहितायाम् ॥ रोहितशब्दात्स्त्रीत्वेच्छायां०वर्णादनुदात्तात् तोपधात्तोनेतिङीप् तकारस्यनकारादेशश्च ॥ तडिति ॥ कटम्भरायाम् । कटुरोहिण्याम् ॥ सोमवल्के ॥ जिनानांविद्यादेवीविशेषे ॥ बलदेवस्य मातरि ॥ सुरभिकन्यायाम् ॥ नववर्षीयायांकन्यायाम् ॥ हरीतक्याम् ॥ वृत्तासारोहिणीस्मृतेति लक्षणात् । कपिलवर्णावर्त्तुलाकाराविरेचनेप्रशस्ता ॥ काश्मर्याम् ॥ रागाद्यैरञ्जितस्त्रियाम् ॥ रोहिण्यां जातायाम् ॥ चिचारेवतीरोहिणीभ्य: स्त्रियामितिनक्षत्राणोलुक् । गौरादित्वान्ङीष् ॥

रोहिणीपति: । पुं० इन्दौ ॥ रोहिण्या: पति: ॥ इन्दुभे ॥

रोहिणीरमण: । पुं० वृषभे ॥ वसुदेवे ॥ चन्द्रे ॥

रोहिणीवल्लभ: ।)
रोहिणीश: ।) पुं० चन्द्रमसि वसुदेवे ॥

रोहिण्यष्टमी । स्त्री० रोहिणीयुक्तभाद्रकृष्णाष्टम्याम् ॥

रोहित् । पुं० अर्के । भानौ ॥ स्त्री० मृग्याम् ॥ लताप्रभेदे ॥ रोहति ।

रुह० । इरुहियुषिभ्यइति: ॥

रोहित: । पुं० मीनविशेषे । रोहू० इतिभाषाप्रसिद्धे ॥ अस्यलक्षणंगुणाश्चयथा । कृष्णा:शल्कीश्वेतकुक्षिस्तुमत्स्योय: श्रेष्ठोसौलोहितोवृत्तवक्त्र: । कोष्णंवल्यंरोहितस्यापिमांसंवातंहन्तिस्निग्धमत्यातिवीर्यम् ॥ अपिच । रक्तोदरोरक्तमुखोरक्ताक्षोरक्तपक्षति: । कृष्णपक्षोभश्रेष्ठोरोहित: कथितोबुधै: ॥ रोहित: सर्वमत्स्यानांवरोवृष्योर्दितार्त्तिजित् । कषायानुरस: स्वादुर्वातघ्नोनातिपित्तकृत् ॥ ऊर्द्ध्वजत्रुगतान्रोगान्हन्याद्रोहितमुण्डकम् ॥ अस्यपाकप्रकारोयथा । रोहितोदरखण्डाश्चकासमर्देनमर्दिता: । कटुतैलपरिभ्रष्टाहिङ्गुसैन्धवसंयुता: ॥ शकलंपृष्ठसम्भूतंरोहितंदधिमर्दितम् । वेसवारान्वितंपाच्यंप्रलेहविधिनाभृशम् ॥ तन्मुण्डस्यतु । रोहितस्योत्तमंदेहंप्रलेहेनावलेपितम् । योश्नातीह नर: पूर्वंभवेत्सस्मररूपभृत् ॥ रोहित: प्रवरोमत्स्योनातिपित्तकरोगुरु: । वातघ्नापुष्टिदोहृद्य:स्निग्ध: पथ्य: समीरिण: ॥ इति ॥ मृगविशेषे ॥ रोहितकद्रुमे ॥ हारभेदे ॥ रक्तवर्णे ॥ ऋषभादिषासिगन्धर्वविशेषाणांसंज्ञायाम् ॥ न० कु

द्रुमे ॥ रक्ते ॥ ऋजुशक्रशरासने ।
दण्डाकारे नानावर्णे दिविदृश्यमा
नेज्योतिर्विशेषे । इन्द्रधनुरेवा-
खातादिनाऋज्वक्रं सद्रोहितंस्या
त् ॥ त्रि०रक्तवर्णविशिष्टे ॥ रोह
ति । रुह० । रुहेरश्चलोवेतीतन् ॥
यद्वा । रोहणं रोह : । सञ्जातोऽ-
स्य । तारकादित्वादितच् ॥

रोहितक : । पुं० वृक्षविशेषे । रोहि
णि । प्लीहशत्रौ । दाडिमपुष्पके ।
सदाप्रसूने । रोहिडा०इ०भा०-
प्र० ॥ रोहितोवर्णोस्यास्ति । अ-
च् । स्वार्थेकन् ॥

रोहितगिरि : । पुं० पर्वतान्तरे । रो
हितासइ०भा०प्र० ॥

रोहितगिरीय : । पुं० आयुधजीविवि
शेषे ॥ रोहितगिरिरभिजनो -
स्यायुधजीविन : । छ : ॥

रोहिता । स्त्री० रागादिनारक्तवर्णा-
यांस्त्रियाम् ॥ वर्णादनुदात्तादिति
पाक्षिकोङीप्तकारस्यनकारादेश
श्च ॥

रोहिताश्व : । पुं० अग्नौ । वैश्वानरे
॥ लोहिताश्वश्चायस्य । वरुणस्त्व
सितानश्वान्० कुबेर : कुमुदोप
मान् । हुताशन: किंशुकाभान्०
वायुर्वर्भूस्तथावर्णोदितिशालिहो-
त्रात् ॥ रलयो : सावर्ण्यात्रोहि
ताश्व : ॥ रोहितोमृगोवाहनमस्ये
तिवा ॥ हरिश्चन्द्रनृपात्मजे ॥

रोहितिका । स्त्री० कोपादिनारक्तव
र्णायांस्त्रियाम् ॥

रोहितेय : । पुं० रोहितके ॥ प्लीहा
रीरोहितेय : स्याद्रक्तपुष्पश्चरोहित
इतिरत्नकोष : ॥

रोही । पुं० रोहितके ॥ अश्वत्थे ॥
वटद्रुमे ॥ अवश्यं रोहति । रुह०
आवश्यकेणिनि : ॥

रोहिष : । पुं० रौहिषे ॥ न० तृणा
न्तरे ॥

रोहीतक : । पुं० रोहितकद्रुमे ॥ रो
हीतक : प्लीहघातीरुच्योरक्तप्रसा-
दन : रोहीतकोयकृत्प्लीहगुल्मोद
रहर : स्मृत : ॥

रौक्ष्यम् । न० रूक्षतायाम् ॥ पारुष्ये
॥ रूक्षस्यभाव : । ष्यञ् ॥

रौच्य : । पुं० मनुविशेषे ॥ ॥ रुचे :
प्रजापते : पुत्रोरौच्योनामभविष्य
ति ॥ बिल्वकाष्ठदण्डे । वैल्व ॥

रौद्र : । पुं० घर्मे । सूर्यतेजसि । आ
तपे ॥ अस्यगुणायथा । आतप :
कटुकोरूक्ष: स्वेदमूर्च्छातृषावह :
दाहवैवर्ण्यजननोनेत्ररोगप्रकोपण:
॥ रसविशेषे ॥ षष्टिवत्सरान्तर्गतव
त्सरविशेषे ॥ तत्फलंयथा । अल्प
तोयाघनाश्चैवकीटका : प्रबला :
स्मृता: विरुजा: पार्थिवादेविरौद्रे सं
वत्सरेप्रिये ॥ ५४ ॥ शृङ्गाराद्यष्टर

सान्तर्गतविशेषरसे । उग्रे । त्रि० तीव्रे ॥ भीषणे ॥ रुद्रसम्बन्धिनि ॥ रुद्रदैवत्ये । रुद्रस्येदम् । अण् ॥

रौद्री । स्त्री० चण्ड्याम् ॥ ङीप् ॥ रुद्रजटायाम् ॥

रौप्यम् । न० रूप्ये ॥

रौप्यमाक्षिकम् न० तारमाक्षिके ॥

रौमम् । न० रौमके ॥ रुमायांभवम् । अण् ॥

रौमकम् । न० सांभरि० इ० भा० प्र० लवणे । रौमे । वसुके ॥ रुमायांभवम् । तत्रभवइत्यण् । संज्ञायांकन् त्रि० रौमकेभवस्तत्रागतोवा । पलद्यादित्वादण् ॥

रौमहर्षणि: । पुं० उग्रश्रवसि । सूते । रोमहर्षणस्यापत्यम् । अत इञ् ॥

रौरव: । पुं० नरकविशेषे । घोरे । त्रि० चञ्चले ॥ घोरे । धूर्त्ते । रुरुसम्बन्धिनि ॥ रुरुर्भयंकरशृङ्गाढ्य: प्राणिविशेष: । तस्यायम् । तस्येदमित्यण् ॥

रौहिण: । पुं० चन्दनवृक्षे ॥ न० दिनस्यनवमेमुहूर्त्ते । यथा । अत्र पूर्वाह्णे श्राद्धमभिधायरौहिणन्तु-नलङ्घयेदित्यभिधानेनपूर्वाह्ण श्राद्धस्यसङ्गवात्परोरौहिणपर्य्यन्तगौणपूर्वाह्णकाल: प्रतीयते । तेन रौहिणंपूर्वाह्ण श्राद्धस्यगौणका-लस्तेनोत्तरावधि: अपराह्णश्राद्धस्यपूर्वावधिरित्यवगम्यते । ततश्च पूर्वदिनेसङ्गवात्परंरौहिणपर्य्यन्तं तिथेर्लाभेपरदिनेमुहूर्त्तत्रयमात्र-तत्तिथिलाभेपूर्वदिनेश्राद्धम् । रौहिणान्तरूपगौणपूर्वाह्णलाभान् नपरदिनेतथात्वभावात् । उभयदिने सङ्गवलाभेपरदिने । शुक्लपक्षे तिथिर्ग्राह्या तिवचनात् । रौहिनस्तुदिव-सस्यनवममुहूर्त्तस्तस्यज्योतिषोक्त-रोहिणीदैवतत्त्वात्रौहिणत्वमिति इतिश्राद्धतत्त्वम् ॥ त्रि० रोहिण्यांजाते ॥ सन्धिवेलादीत्यनेनाण् ॥

रौहिणेय: । पुं० बुधग्रहे ॥ हलायुधे । बलदेवे ॥ न० मरकतमणौ त्रि० गोवत्से ॥ रोहिण्या अपत्यम् । शुभ्रादित्वाड्ढक् ॥

रौहिष: पुं० मृगविशेषे । रोहिषंतृणभेदमस्ति । शेषइत्यण् ॥ रोहित मत्स्ये । न० कत्तृणे । रोहितइति० रोहिसइतिचख्याते तृणे ॥ रोहिषंतुवरंतिक्तंकटुपाकंव्यपोहति । हृत्कण्ठव्याधिपित्तास्रशूलकासकफज्वरान् । रोहति । रुह० । रुहेर्वृद्धिश्चेतिटिषच् ॥

रौहिषी । स्त्री० मृग्याम् ॥ दूर्वायाम् ॥

॥ रकारसमाप्त: ॥

लकारस्यप्रारम्भः

लः । पुं॰ इन्द्रे । शक्रे ॥ लकारे ॥ लघूच्चारे ॰ । ॰ ॥ न॰ पृथ्वीवीजे ॥ लीयते । लीङ् ॰ । अन्येभ्योपिदृश्यन्तइतिडः ॥

लकचः । पुं॰ डहौ । लकुचे । इतिशब्दरत्नावली ॥

लकुचः । पुं॰ लिकुचे । डहौ । हृढवल्कले । स्थूलस्कन्धे । क्षुद्रपनसे । वडहल॰ इ॰ भा॰ प्र॰ ॥ अस्यगुणाः । आमंलकुचमुष्णञ्चगुरुविष्टम्भकृत्तथा । मधुराम्लतथाम्लञ्चदोषत्रितयरक्तकृत् ॥ शुक्राग्निनाशनञ्चापिनेत्रयोरहितंस्मृतम् । सुपक्कंतत्तुमधुरमम्लंचानिलपित्तकृत् ॥ कफवह्निकरंरुच्यंवृष्यंविष्टम्भकञ्चतत् ॥ लक्यते । लकआस्वादने । वाहुलकादुचः ॥

लक्तकः । पुं॰ जीर्णवस्त्रखण्डे । कर्पटे । लत्ता॰ इ॰ भ॰ प्र॰ ॥ द्रवद्रव्यंयेनपूयतेतत्ररूढोयमितिस्वामी ॥ तत्तुल्येवस्त्रेपिवर्त्तते । मलिनत्वादिदुष्टजीर्णवस्त्रखण्डे॰ इतिमुकुटः ॥ प्रस्वेदादिमार्जनार्थंहस्तस्थवस्त्रखण्डस्यसंज्ञेयमितिनव्याश्चाहुः ॥ लक्तते आलजीक्रीडे । वाहुलकात्तन् । स्वार्थेकन् । यद्वा । लक्ष्यतेस्म । लक्ष॰ । क्तः । स्वार्थेकन् ॥

लक्तकर्म्मा । पुं॰ पट्टिकाख्ये । रक्तवर्णलोध्रे ॥

लक्षम् । न॰ व्याजे । अपदेशे । परद्रोहफलकातिरिक्तव्याजे ॥ शरव्ये ॥ न॰ स्त्री॰ दशायुतसङ्ख्यायाम् १००००० लाख इ॰ भा॰ ॥ लक्षणम् । लक्षआलोचने । घञ् ॥ लक्ष्यतेवा ॥

लक्षकः । त्रि॰ लक्षयितरि । लक्षयतियस्तस्मिन् ॥ यथा ॥ लक्षकंनामलक्षयति । यादृशार्थस्यसम्बन्धवतिशक्तन्तुयद्भवेत् । तत्रतल्लक्षकंनामतच्छक्तिविधुरंयदि ॥ यादृशार्थसम्बन्धवतियन्नामसङ्केतितंतदेवतादृशार्थेलक्षकम्॰ यदितादृशार्थेशक्तिशून्यंभवेत् । सैन्धवादयस्तुशब्दास्तुरगादिसम्बन्धिनि॰ लवणादाविवतुरगादावपिशक्ताएव । गङ्गादयस्तुतीरादावसङ्केतिताः । तत्सम्बन्धिनीरादिमत्त्वेनगृहीताएवतीरादान्वयंवोधयन्तितत्रलक्षकाएव ॥

लक्षणम् । न॰ नाम्नि ॥ चिह्ने ॥ स्वरूपे ॥ फले ॥ लक्ष्यतेज्ञायतेपदार्थोनेन । लक्षदर्शनाङ्कनयोः । करणेल्युट् ॥ तद्द्विविधम् । इतरभेदानुमापकम्॰ व्यवहारप्रयोजकञ्चेतिन्यायमतम् ॥ व्याकरणमतन्तु । कृत्तद्धितसमासानामभिधानंनियामकम् । लक्षणन्त्वनभिज्ञानांतदभिज्ञानसूचकमिति ॥ सजाती

यविजातीयव्यावर्त्तकोलक्ष्यगतः कश्चिल्लोकप्रसिद्धआकारोलक्षणमिति मीमांसकाः ॥ कृषयोऽपि पदार्थानां नान्तर्यातिपृथक्त्वशः । लक्षणेन तु सिद्धानामन्तं यान्ति विपश्चित इति पूर्व्वाचार्य्याः ॥ स्वरूपं तटस्थं द्विधालक्षणं स्यात् स्वरूपस्यबोधोयतोलक्षणाभ्याम् । स्वरूपेप्रविष्टात् स्वरूपेऽप्रविष्टाद्यथाकाकवन्तोगृहाः खं बिलञ्च ॥ शास्त्रे ॥ इति वैयाकरणाः ॥ पुं० रामभ्रातरि । सौमित्रौ ॥ सारसखगे ॥ लक्षेस्तुरादित्यन्तात् लक्षेरट् चेति नप्रत्ययस्तस्याडागमश्च ॥

लक्षणा । पुं० वृत्तिविशेषे ॥ यथा । अभिधेयाविनाभूतप्रवृत्तिर्लक्षणेष्यते ॥ साच त्रिविधा । जहल्लक्षणा० अजहल्लक्षणा० जहदजहल्लक्षणेति । यथास्थानमासां लक्षणमनुसन्धेयम् ॥ शक्यसम्बन्धे ॥ यथा । लक्षणाशक्यसम्बन्धस्तात्पर्य्यानुपपत्तितः ॥ अस्यार्थः । गङ्गायां घोष इत्यादौ० गङ्गापदस्य शक्यार्थे प्रवाहरूपे० घोषस्यान्वयानुपपत्तिस्तात्पर्य्यानुपपत्तिर्वा यत्र प्रतिसन्धीयते तत्र लक्षणया तीरस्य बोधः । साच शक्यसम्बन्धरूपा । तथाहि प्रवाहरूपशक्यार्थसम्बन्धस्य तीरे गृहीतत्वात् तीरस्य स्मरणं ततः शाब्दबोध इति सिद्धान्तमुक्तावली ॥ शब्दानामौपचारिकीषु प्रवृत्तिषु ॥ यथा । आधारे कारणे कार्य्ये समीपे चोपकारके । धर्म्माद्यनुकृतौ चेति लक्षणां सूरयो जगुः ॥ मुख्यार्थानुगमानुपपत्तेर्गुणार्थं प्रतिप्रतीतिकारिणीं लक्षणां सूरयस्तद्विदोजगुः ऊचुः । कुत्र कुत्रेत्याह । आधारइत्यादि । तत्र तावदाधारे यथा । मञ्चाः क्रोशन्तीति । अत्र हि मञ्चानामधिकरणभूतानामचैतन्यात् ० रोदनलक्षणक्रोशनार्थेनाननुगमादानर्थक्यात् ० तत्स्थानां बालानां सम्बन्धि यत् क्रोशनं तत्तेषु तात्स्थ्यात्मलक्षणयोक्तम् ॥ कारणेतु लक्षणा यथा । शालीन् वृष्टोदेव इति । अत्र हि मुख्यया वृत्त्या शालिवर्षणस्यार्थोनन्वित इति लक्षणया० कालोचितायां वृष्टौ शालिकारणभूतायां प्रतिबन्धवैकल्ययोरसम्भावनात्० सम्पन्नमेव शालिलक्षणं कार्य्यमुपचर्य्यते । अथवा आयुर्घृतमिति । आयुष्कारणे घृते० आयुषस्तत्कार्य्यस्योपचारः ॥ एवं कार्य्येऽपि लक्षणा सम्भवति० यथा । ऊर्णाः प्रावरणाः केचिदपरे तूलावास इति । अत्र किल सूत्रभावं विनाभाविना कम्बलपटादिभाविना परिणतयोरूर्णातूलयोर्मुख्ययावृ

त्याप्रावरणत्वमसम्भावितम् । तत्
कार्य्यञ्च कम्बलपटात्मनएवतदुपपत्तेः
। ततश्च कम्बलपटादौ च तयोः कार
णभूतयोरूर्णाकार्पासयोरुपचारः
कृतः ॥ समीपार्थलक्षणा यथा ।
गङ्गायां घोषइति । अत्र हि मुख्यया
वृत्त्या प्रवहज्जलरूपस्रोतः गुणवृ
त्त्या वा तद्विशेषं यदि किञ्चित् गङ्गाश
ब्दः कथयेत् तदा घोषासम्भाव्येव ग्रा
माधिकरणतेति सामर्थ्यात् तत्सा
मीप्यलक्षणत्वेन तत्रावतिष्ठते ॥
उपकारकेऽपि लक्षणा दृश्यते यथा ।
भिक्षा वासयन्ति कारीषोऽध्यापयती
ति । अत्र हि किल न भिक्षास्तत्प्राव
रणां चलंकरेण गृहीत्वा गमननिषेधं-
कुर्वन्ति । नापि सर्वथाऽस्मात् स्था
नान्न गन्तव्यमिति प्रणयवचनैरवस्था-
पयन्ति । अपि तु प्रचुरां व्यञ्जनञ्च
पश्यन्तस्मिन् हेतुत्वान्निरसनक्रियामुपका
रकत्वेन सम्भाव्यमानाः प्रयोजक-
त्वेनोपचर्य्यन्ते । एवं च न कारीषोऽङ्ग
पुत्राधीष्वेति ब्रुवन् माणवकमध्याप
यति । नापि तच्छरीरमनुप्रविश्य भू
तवेतालादिभिरिवैनं पाठयति ।
किन्तर्हि शीतापनुत्तिहेतुतयाध्यय-
नविध्युपकारकत्वेनानुकूल्यं भज
ंस्तत्प्रयोजकत्वेनोपचरितः ॥ किं
च धर्माद्यनुकृताविति । आदिग्रह
णादाकारानुकृतौ वा । तत्र धर्मानु

कृतौ यथा । सिंहो माणवकः । गौ
र्वाहीक इति । अत्र किल लक्षणया
सिंहधर्माणां शौर्यादीनामनुकृत्यर्थं
माणवके सामानाधिकरण्येन सिंह
शब्दः प्रवृत्तः । मुख्यया वृत्त्या तस्य
सिंहत्वस्यासम्भवात् । वाहीकेति
पृष्ठवहनत्वासम्भवात् तिष्ठल्लक्षणाग
च्छन्तृणादिवलीवर्द्दगतधर्मानुक
रणाय गोशब्दः सामानाधिकरण्ये-
नोपचरितवृत्तिरेव प्रवृत्तः । मुख्यया-
वृत्त्या तथाऽनन्वयात् ॥ एवमाकारा
नुकृतौ यथा । सूचिभेद्यैस्तमोभिरि
ति । अत्र हि तमसोऽमूर्त्तत्वात् सूचि
भेद्यत्वं मुख्यया वृत्त्या न सङ्गतमतो ल
क्षणयातिनिविडत्वं वस्तुमाकृतिः सू
चिभेद्यत्वेनानुकृता । एवं नामघ
नानि तमांसि यद्वस्त्रादिवत् सूच्यादि-
नाभेदमप्येषां वक्तुं शक्यमित्यर्थः ॥
मानान्तरोपरोधिमुख्यार्थस्यापरिग्रहे
जाते । मुख्याविनाकृतेर्थे या वृत्तिः
सैव लक्षणा प्रोक्तेति पूज्यपादाचा-
र्य्याः हंसयोषायाम् ॥ प्रमाणे ॥
लक्ष्यतेऽनयेति लक्षणा । टाप् ॥
सारस्यां लक्षणा क्वचिदिति मेदिनि-
करः ॥

लक्षणार्थः । पुं । लक्षणस्य प्रयोजने ॥
समानासमानजातीयव्यवच्छेदे ॥
लक्षणस्यार्थः ॥

लक्षणीयः । त्रि । लक्ष्ये ॥ भाव

नीये ॥

लक्षसूम् । न० लक्षणावृत्त्याज्ञाप्यत्वे ॥

लक्षा । स्त्री० दशायुतसङ्ख्यायाम् ॥

लक्षितः । त्रि० ज्ञापिते ॥ आलोचिते ॥ दृष्टे ॥ अङ्किते ॥ लक्षः कर्मणि क्तः ॥ लक्षणाश्रये ॥

लक्षितलक्षणा । स्त्री० लक्षितेलक्षणायाम् ॥

लक्षिता । स्त्री० परकीयान्तर्गतनायिकाभेदे ॥

लक्ष्मणः । पुं० सौमित्रौ । श्रीरामभ्रातरि ॥ सारसे ॥ यक्षे । न० चिह्ने ॥ नामनि ॥ लक्षयति । लक्ष० । चुरादित्वात्तत्वे रट् चतिनप्रत्ययस्त स्यमुडागमो पीर्थ्ये के ॥ त्रि० श्रीयुक्तसश्रीके ॥ लक्ष्मीरस्त्यस्य । पामादित्वान्नः । लक्ष्म्याणश्चं तिगणसूत्रेणात्वंबोध्यं ॥

लक्ष्मणप्रसूः । स्त्री० सुमित्रायाम् ॥

लक्ष्मणा । स्त्री० सारसस्त्रियाम् ॥ श्वेतकण्टकार्य्याम् । क्षुद्रवार्त्ताकिन्याम् । कटुवार्त्ताक्याम् नि । स्नेहफलायाम् । चन्द्रपुष्पायाम् ॥ औषधीभेदे । पुत्रकन्दायाम् । पुत्रदायाम् । नागपत्राम् । अस्रविन्दुच्छदायाम् । लक्ष्मणाकन्दइतिनाम्ना गौडदेशेप्रसिद्धे ॥ गुणास्तुयथा । पुत्रकाकाररक्ताल्पविन्दुभिर्लाञ्छितासदा । लक्ष्मणापुत्रजननी

वस्तगन्धाकृतिर्भवेत् ॥ कथितापुत्रदावश्यं लक्ष्मणामुनिपुङ्गवैः ॥ घ- ट्टकत्वाट्टाप् ॥ दुर्य्योधनकन्यायाम् । साम्बपत्न्यां ॥

लक्ष्म । न० चिह्ने ॥ प्रधाने ॥ लक्षयति० लक्ष्यतेवा । लक्ष० । मनिन् ॥

लक्ष्मीः । स्त्री० विष्णुपत्न्याम् । पद्मालयायाम् ॥ पद्मायाम् । लोकमातरि । मायाम् ॥ सम्पत्तौ ॥ शोभायाम् ॥ ऋद्ध्यौषधे ॥ वृद्धिनामौषधे ॥ फलनौवृक्षे ॥ सीतायाम् ॥ वीरभार्य्यायाम् ॥ स्थलपद्मिन्याम् ॥ हरिद्रायाम् ॥ शम्याम् द्रव्ये ॥ मुक्तायाम् ॥ मोक्षप्राप्तौ ॥ लक्षयति० पश्यतिनीतिञ्चम् । लक्ष० । लक्षेर्मुट् चेति० ईप्रत्ययस्तस्यमुट् ॥ लक्षते० लक्ष्यतेवा दुर्गायाम् ॥

लक्ष्मी । स्त्री० लक्ष्मयर्थे तु ॥ कृदिकि ङीष् ॥ लक्ष्मीर्लक्ष्मीर्हरिप्रिया मितिद्विरूपाभिधानम् ॥

लक्ष्मीकान्तः । पुं० नारायणे ॥

लक्ष्मीगृहम् । न० रक्तोत्पले ॥ लक्ष्म्यागृहमिवगृहम् ॥ लक्ष्म्यावेश्मनि ॥

लक्ष्मीजनार्द्दनः । पुं० शालग्रामविशेषे ॥ तल्लक्षणंयथा । एकद्वारेचतुश्चक्रं नवीननीरदोपमम् । लक्ष्मी

अनाहतं च यं रहितं वनमालया ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

लक्ष्मीताल: । पुं॰ श्रीतालवृक्षे ॥ तीर्थविकल्पपरिच्छेदविशेषे ॥

लक्ष्मीनारायण: । पुं॰ शालिग्रामविशेषे ॥ तल्लक्षणं यथा । एकद्वारे चतुश्चक्रं वनमालाविभूषितम् । नवीननीरदाकारं लक्ष्मीनारायणाभिधम् ॥

लक्ष्मीनृसिंह: । पुं॰ शालिग्रामविशेषे ॥ तल्लक्षणन्तु । द्विचक्रं विस्तृतास्यञ्च वनमालासमन्वितम् । लक्ष्मीनृसिंहं विख्यातं गृहिणाञ्च सुखप्रदम् ॥

लक्ष्मीपति: । पुं॰ वासुदेवे । नारायणे ॥ लक्ष्म्या: पति: नरपतौ ॥ पूगे ॥ लवङ्गवृक्षे ॥ सम्पत्तियुक्ते ॥

लक्ष्मीपुत्र: । पुं॰ कामदेवे तुरङ्गमे ॥ लवे ॥ कुशे ॥

लक्ष्मीपुष्प: । पुं॰ पद्मरागमणौ ॥

लक्ष्मीफल: । पुं॰ विल्ववृक्षे ॥ लक्ष्मीप्रदं प्रियं वा फलमस्य । शाकपार्थिवादि: ॥

लक्ष्मीवान् । पुं॰ पनसवृक्षे ॥ श्वेतरोहितवृक्षे ॥ त्रि॰ श्रीले । श्रीमति । श्रीसमन्विते ॥ लक्ष्मीरस्यास्ति । मतुप् । मादुपधायाइतिवत्वं ॥

लक्ष्मीवेष्ट: । पुं॰ श्रीवेष्टे ॥

लक्ष्मीश: । पुं॰ श्रीशे । विष्णौ ॥

लक्ष्मीसमाह्वया । स्त्री॰ रामपत्न्याम् । सीतायाम् ॥ लक्ष्मीसमआह्वयोयस्या: ॥

लक्ष्मीसहज: । पुं॰ चन्द्रे ॥

लक्ष्म्याराम: । पुं॰ वनविशेषे ॥ लक्ष्म्या: आराम: ॥

लक्ष्यम् न॰ शरवेध्ये । शरव्ये ॥ व्याजे । अपदेशे ॥ त्रि॰ अनुमेये ॥ लक्षणयाबोध्ये । दर्शनीये ॥ लक्षणम्॰ लक्ष्यतेऽश । लक्ष आलोचने । ण्यत् ॥

लक्षीकृत: । त्रि॰ वेद्धुमिष्टे ॥

लगडम् । त्रि॰ चारुणि । बन्धुरे । मनोज्ञे ॥

लगित: । त्रि॰ सङ्गयुक्ते । लगाइ॰ भा॰ ॥ लगेसङ्गे । क्त: ॥

लगुड: । पुं॰ दण्डे । दण्डकाष्ठे । लाठी॰ इ॰ भा॰ ॥

लग्न: । पुं॰ स्तुतिपाठके । प्रातर्गाये ॥ न॰ मेषादिराशीनामुदये । त्रि॰ शङ्गाणात्मके ॥ त्रि॰ लज्जितसक्ते । सङ्गतिफले । लगे॰ । क्षुब्धस्वान्तेतिक्तस्य डभावोनिष्ठानत्वमपि निपात्यते ॥

लग्नक: । पुं॰ प्रतिभुवियोहिदायं विनाऽन्यकृतऋणस्य परिशोधं कर्त्तुमात्मानं स्वीकरोति॰ यथा । यथ

यत्तृषापनयनं न करिष्यति। तत्त्वं करिष्यामीति तस्मिन्। जामन॰ इ॰ भा॰ ॥ लङ्गतेस्म। चोलङ्गौ ब्रीडने। गत्यर्थे तिक्तः। स्वार्थे कः ॥

लघट्। पुं॰ पवने, वायौ ॥ लङ्घते। लघिगतौ। लङ्घे नलोपश्च त्यटिः ॥

लघटिः। पुं॰ वायौ ॥

लघिमा। पुं॰ शिवैश्वर्यप्रभेदे ॥ येन लघुर्भवति। यतः सूर्यरश्मीनालम्ब्यादित्यलोकं याति। लघुतायाम् ॥ लघोर्भावः। इमनिच् ॥

लघिष्ठः। त्रि॰ अत्यल्पके अयमेषामतिशयेन लघुः। अतिशायने॰ इष्ठन् ॥ भले ॥

लघीयान्। त्रि॰ अतिशयेन लघौ। लघुतरे ॥ यथा लघीयान् शब्दोपदेशो गरीयानपशब्दोपदेश इति ॥ अयमनयोरतिशयेन लघुः। ईयसुन् ॥

लघुः। पुं॰ एकमात्रवर्णे ॥ यथा। गुरोर्विभिन्नो लघुरेकमात्रो ह्रस्वादिपूर्वोऽपि लघुर्विकल्पात्। क्वचित् सबिन्दुः क्वचिदर्धबिन्दुरोकारयुक्तोऽपि लघुः क्वचित्स्यात्। उच्चार्यमाणास्त्वरितप्रयत्नात् द्वित्राश्च वर्णाः क्वचिदेकभावम्। भजन्ति भाषास्वयसंक्रुतेषु विनाशमित्थं वहुधानयोऽयम्। स्त्री॰ पृक्कानामौषधौ ॥ न॰ शीघ्रे ॥ कृष्णागुरुणि ॥ लामज्जके ॥ सत्वगुणे ॥ विशेषनक्षत्रादौ। यथा। पुष्याश्विन्यभिजिद्धस्ता लघु क्षिप्रं गुरुस्तथा। अत्र पण्यरतिज्ञानं भूषाशिल्पकलादिकम् ॥ त्रि॰ अगुरौ। मनोज्ञे ॥ निःसारे। ह्रस्वे। लङ्घते। लघि॰ लंघिश्च्योर्नलोपश्चेति कुर्नलोपश्च। लङ्घतेवा ॥

लघुकामः। त्रि॰ अल्पयाचके ॥

लघुकायः। पुं॰ अल्पायुषि। छागे। वर्करे। त्रि॰ क्षुद्रशरीरे ॥

लघुकाश्मर्यः। पुं॰ कट्फलवृक्षे ॥

लघुक्रियः। त्रि॰ क्षिप्रव्यापारे ॥

लघुखट्टिका। स्त्री॰ आसन्द्याम्। क्षुद्रखट्वायाम् ॥

लघुगर्गः। पुं॰ त्रिकण्टकमत्स्ये ॥

लघुचर्भिटा। स्त्री॰ मृगेर्वारौ ॥

लघुजङ्गलः। पुं॰ लावकपक्षिणि ॥

लघुतमः। त्रि॰ लघिष्ठे ॥ अतिशयेनतमप् ॥

लघुदन्ती। स्त्री॰ क्षुद्रदन्तीवृक्षे ॥

लघुदुन्दुभिः। पुं॰ ढगडवाद्ये ॥

लघुद्राक्षा। स्त्री॰ काकलीद्राक्षायाम्। निर्बीजायाम् ॥

लघुनाम। न॰ अगुरुणि ॥

लघुपञ्चमूलम्। न॰ क्षुद्रपञ्चमूल.

पाचने । तद्यथा । शालपर्णीपृश्निपर्णीवार्ताकीकण्टकारिका । गोक्षुरः पञ्चभिश्चैतैः कनिष्ठं पञ्चमूलकम् ॥ अस्य गुणाः । पञ्चमूलं लघु स्वादु बल्यं पित्तानिलापहम् । नात्युष्णं बृंहणं ग्राहि ज्वरश्वासाश्मरीप्रणुत् ॥

लघुपञ्चमूली । स्त्री० लघुपञ्चमूले । शालपर्ण्यादौ ॥ पञ्चानां मूलानां समाहारः पञ्चमूली । लघ्वी चासौ पञ्चमूली चेति विग्रहः ॥

लघुपत्रिका । स्त्री० रोचन्याम् ॥ गुडारोचन्याम् ॥

लघुपर्णी । स्त्री० अश्वत्थीवृक्षे ॥

लघुपिच्छिलः । पुं० भूकर्बुदारके ।

लघुपुष्पः । पुं० भूमिकदम्बे ॥

लघुबदरः । पुं० क्षुद्रकोली । सूक्ष्मफले ॥

लघुबदरी । स्त्री० भूबदर्याम् ॥

लघुब्राह्मी । स्त्री० क्षुद्रब्राह्म्याम् । जलोद्भवायाम् । सूक्ष्मपत्रायाम् ॥

लघुमन्थः । पुं० क्षुद्राग्निमन्थे ।

लघुमांसः । पुं० तित्तिरिपक्षिणि ॥

लघुमांसी । स्त्री० गन्धमांस्याम् । भूतकेश्याम् ॥

लघुराजमृगाङ्कः । पुं० औषधिविशेषे ॥ यथा । घृततोयायुतः सुरसास्वरसो लघुराजमृगाङ्क इति प्रथितः । अपहन्त्यनिलान् सबलान् बहुलान्निजभक्तरिपून् निवचक्रधर इति लोलिम्बराजः ॥ *

लघुलयम् । न० वीरणमूले । नलदे ॥ लङ्घते रोगान् । लङ्घ्यते वाभूष्यत्वात् । लघि० । लङ्घि वंश्योरिति कुः । लीयते । लीङ् श्लेषणे । अच् । लघु चतत् लयञ्च ॥

लघुसदाफला । स्त्री० क्षुद्रोदुम्बरे ॥

लघुहस्तः । पुं० शीघ्रवेधिनि ॥

लघुहस्तकः । पुं० कृतहस्ते ॥

लघुहेमदुग्धा । स्त्री० लघूदुम्बरिकायाम् ।

लघूदुम्बरिका । स्त्री० क्षुद्रोदुम्बरिकायाम् । लघुसदाफलायाम् ॥

लघूच्चरम् । न० मात्राकाले ॥ निमेषोन्मेषणे मात्राकालो लघ्वक्षरं तथेति पुराणम् ॥

लघ्वाशी । त्रि० परिमितमेध्याशिनि लघु परिमितं मेध्यञ्चाशितुं शीलं यस्य ॥ निद्रालस्यादिचित्तलयकारिरहिते ॥

लघ्वी । स्त्री० लाघवयुक्तायाम् ॥ स्यन्दनस्य प्रभेदे ॥ पृक्कायाम् ॥ दन्त्याम् ॥ लघुस्त्रियाम् ॥

लङ्का । स्त्री० दक्षिणभारतवर्षस्य सिंहलदेशे विद्यमानायां रक्षःपुर्याम् । अधुनाशैलम् इति ख्यातायाम् । जम्बूद्वीपस्योपद्वीपविशेषे शाखायाम् ॥ शाकिन्याम् ॥

कुलटायाम् ॥ धान्यविशेषे । करालत्रिपुटायाम् ॥ लक्यतेमुख मस्याम् । लकभास्वादने । चुरादि : । एरच् । घञ्वा । पृषोदरादित्वान्नुम् । नुम्यनुपधत्वान्नवृत्ति : ॥ यद्वा । रमन्तेस्याम् । बाहुलकात्कोलत्वञ्च ॥

लङ्कादाही । पुं॰ हनूमति ॥

लङ्काधिपति : ।
लङ्कापति : । पुं॰ रावणे ॥

लङ्कापिका । स्त्री॰ पृक्कायाम् । पिण्डिङ्शाक॰ इ॰ गौ॰ दे॰ भा॰ प्र॰ ॥

लङ्कामलय : । पुं॰ लङ्काद्वीपस्थमलयशैले ।

लङ्कायिका । स्त्री॰)
लङ्कारिका । स्त्री॰ लङ्कायिकायाम् ॥

लङ्कास्थायी । पुं॰ वृक्षविशेषे । लङ्कास्नुह्याम् । लङ्कासिज॰ इ॰ गौ॰ दे॰ भा॰ प्र॰ ॥

लङ्केश : । पुं॰ रावणे ॥

लङ्कोपिका । स्त्री॰ पृक्कौषधौ ॥ लङ्कायामुप्यते । टुवप्बीजसन्ताने । कुन् । वचिस्वपीतिवस्यउ : ॥

लङ्कोयिका । स्त्री॰ पृक्कायाम् ॥ लङ्कायामूयते । ऊयीतन्तुसन्ताने । कुन् ॥

लङ्ग : । पुं॰ लङ्गे ॥ पिङ्गे । नाङ्गः॰ गौ॰ भा॰ प्र॰ विटे ॥

लङ्गूलम् । न॰ लाङ्गूले । पुच्छे ॥

लङ्घनम् । न॰ उपवासे ॥ कर्षणे ॥ चतुष्प्रकारासंशुद्धि : पिपासामारुतातपौ । पाचनान्युपवासश्च व्यायामश्चेतिलङ्घनमितिचरकोक्तौ यथानिर्णीतत्वात् ॥ अनशने ॥ लङ्घनेनक्षयंनीतेदोषेसन्धुक्षितेऽनले । विज्वरत्वंलघुत्वञ्चक्षुच्चैवास्योपजायते ॥ इत्यनशनरूपस्य लङ्घनस्यफलकथनात् ॥ त्रिरात्रं पञ्चरात्रंवाद्दशरात्रमथापिवा । लङ्घनंसन्निपातेषुकुर्याद्वारोग्यदर्शनादितिचक्रपाणिदत्त : ॥ क्रमणे । प्लवने ॥ अश्वस्तृतीयगतौ ॥ प्लुतन्तुलङ्घनंपक्षिमृगगत्यनुकारकमितिहेमचन्द्रोक्त : ॥ क्रमणे । यथा । नचाग्निंलङ्घयेद्धीमान् नोपदध्यादध : क्वचित् । नचैनंपादत: कुर्यान्मुखेननधमेद्बुध : ॥

लजकारिका । स्त्री॰ लज्जालौ । वराहक्रान्तायाम् । समङ्गायाम् । तिक्तगन्धायाम् । नमस्कार्याम् ॥

लज्जा । स्त्री॰ मन्दाक्षे । त्रपायाम् सुशीलस्यभार्येयम् । पश्यशान्तिम् ॥ कृतेऽकरणीयेपरज्ञानसशङ्कयादु : खे ॥ अकरणीयाप्रवृत्तिजनकोऽन्त : करणस्यवृत्तिविशेषे ॥ लज्जनम् । ओलस्जीव्रीडने ।

गुरोश्चहलश्चत्य : । भर्त्सनश्रश्-
शि । टाप् । लज्जालौ ॥

लज्जालु : । पुं० स्त्री० वराहक्रान्तायाम् । नमस्कार्याम् । खदिरपत्रिकायाम् । सङ्कोचिन्याम् ॥ लज्जालु : शीतलातिक्ताकषायाकफपित्तनुत् । रक्तपित्तमतीसारंयोनिरोगान्विनाशयेत् ॥

लज्जाशील : । त्रि० अपत्रपिष्णौ । लज्जिते ॥

लज्जित : । त्रि० लज्जायुक्ते । सलज्जे । ह्रीणे । ह्रीते ॥ लज्जासञ्जातास्य । तारकादिस्वादितच् ॥

लज्जिरी । स्त्री० लज्जालौ ॥

लज्या । स्त्री० लज्जायाम् ॥ इतिशब्दरत्नावली ॥

लञ्ज : । पुं० पदे ॥ कच्छे ॥ पुच्छे ॥

लञ्जिका । स्त्री० वेश्यायाम् ॥

लट : । पुं० प्रमादवचने । दोषे । लटति । लटबाल्ये । अच् ॥

लटक : पुं० दुर्जने ॥ संज्ञायांकन् ॥

लटपर्णम् । न० त्वचे ॥

लट : । पुं० दुर्ज्जने ॥

लट्व : । जातिविशेषे । नट० इ० भा० ॥ रागभेदे ॥ तुरङ्गमे ॥ इत्युणादिकोष : ॥

लट्वा । स्त्री० करञ्जप्रभेदे । फले ॥ चवये ॥ पक्षिविशेषे ॥ कुसुम्भे ॥ लटति । लट० । अशूप्रुषिलटीति

क्वन् । टाप् ॥

लडह : । त्रि० मनोज्ञे ॥ इतिचिकाण्डशेष : ॥

लड्ड : । त्रि० दुर्जने ॥ इतिशब्दरत्नावली ॥

लड्डुक : । पुं० मोदके । लड्डू० लाडू० इ० भा ॥ लड्डुकोदुर्ज्जरोगुरुरितिराजवल्लभ : ॥ दधिशाल्यंतथादुग्धकानिक्यामाषपर्पटा : । गुरवाद्र्ककूष्माण्डशालूकामिषमत्स्यका : ॥ नालिकेरप्रियालश्चमज्जाकूष्माण्डकादय : । एतेषांलड्डुका : प्रोक्ता : सम्भवन्त्यन्यतोपिच ॥

लण्ड : । पुं० लण्डनइतिख्यातेइङ्गलण्डजपुरे ॥

लण्डन : । पुं० लिण्डने । इङ्गरेजे ॥

लता । स्त्री० प्रियङ्गौ ॥ शाखायाम् ॥ पृक्कायाम् ॥ ज्योतिष्मत्याम् ॥ लताकस्तूरिकायाम् ॥ माधव्याम् ॥ दूर्वायाम् ॥ शाखिशाखायाम् ॥ अशनपर्य्याम् ॥ कैवर्त्तिकायाम् । सारिवायाम् ॥ वल्ल्याम् । व्रतती ॥ लतति । लति : सौत्रोवेष्टनार्थ : । लतआघातेवा । पचाद्यच्टाप् ॥

लताकस्तूरिका । स्त्री० लताकस्तूर्याम् । दक्षिणदेशजायाम् । मुष्कदाना० इतिख्यातायाम् ॥ लताकस्तूरिकातिक्तोस्वाद्वीवृष्याहिमालघु : ।

चक्षुष्याक्ते दनीघ्नं प्रलम्बावस्थास्य रोगहृत् ॥

लताजिह्व : । पुं० सर्पे ॥ लतेवजिह्वाऽस्य ॥

लतातरु : पुं० तालवृक्षे ॥ नारङ्गवृक्षे ॥ शालवृक्षे ॥

लताद्रुम : । पुं० लताशाले । अश्वकर्णाह्वये । तार्क्ष्ये ॥

लतापनस : । पुं० चंलाले । चित्रफले । सुखाशि । नाटाम्रे । तरमुझेति० तरबुजइ० चख्याते ॥

लतापूका । स्त्री० समुद्रान्तायाम् । पिण्डिङ्गशाक० इ० गौ० दे० भा० प्र० ॥

लताफलम् । न० पटोले । लताया : फले ॥

लताभद्रा । स्त्री० भद्रालीवृक्षे ॥

लतामणि : । पुं० विद्रुमे । प्रवाले ॥

लतामरुत् । स्त्री० पृक्कायाम् ॥

लतायष्टि : स्त्री० भण्डीर्याम् । मञ्जिष्ठायाम् ॥

लतायावकम् । न० प्रवाले ॥

लतारसन : । पुं० सर्पे ॥

लतार्क : । पुं० दुद्रुमे । हरिद्वर्णपलाण्डौ ॥ लतासुचक्र तैरच्य तेवावि कृष्णलक्षणयानिन्दाते । अर्कास्तरुमे० अर्चपूजायां घञ् ॥

लतार्कक : । पुं० दुद्रुमे ॥ स्वार्थे कन् ॥

लतालक: । पुं० गजे । हस्तिनि ॥

लतावेष्ट : । पुं० देशविशेषे ॥ रतिबन्धप्रभेदे ॥ यथा ॥ बाहुभ्यांपादयुग्माभ्यांवेष्टयित्वास्थियंभवेत् । लघुलिङ्गताडनंयोनौलतावेष्टोयमुच्यते ॥

लतावेष्टितकम् । पुं० आलिङ्गनभेदे ॥

लताशङ्कु : । पुं० शालवृक्षे ॥

लताश्रम : । पुं० लतामण्डपे ॥ लताविशिष्ट : आश्रम : ॥

लतिका । स्त्री० लतायाम् । स्वार्थेकन् । प्रत्ययस्थादितीत्वम् ॥

लत्ता । स्त्री० योगविशेषे ॥ यथा । चराहुपूर्णेन्दुसिता : स्वपृष्ठेभंसप्तगोजातिशरे ७ । ६ । २२ । ५ मितंहि । संलत्तयन्त्यर्कशनीज्यभौमा: सूर्याष्टतर्काग्निमितं १२८। ६३ पुरस्तात् ॥ अस्या : फलंयथा । रवेर्लत्ताविच्छहरीनिघ्नं कोजीविनिर्दिशेन्मरणम् । चान्द्रीनाशं कुर्याद्वौधीनाशंवदन्त्येवम् ॥ सौरीमरणंकरोतिबन्धुविनाशं हृहस्य तेर्लत्ता । मरणंलत्ताराहो : कार्यविनाशंभृगोर्वदति ॥

लत्तिका । स्त्री० गोधायाम् । लति : सौत्र : । क्रदिभिदिलतिभ्य : कित् दितिनिकन् ॥ लत्तायाम् ॥

लपनम् । न० आनने । मुखे ॥ लप्यतेनेन । लपव्यक्तायांवाचि । करणे ल्युट् ॥ भाषणे ॥

लपितम् । न॰ वचने ॥ लप॰ । भावेक्त : । त्रि॰ उक्ते । कथिते ॥ लप्यतेस्म । लप॰ । क्तः ॥

लप्सिका । स्त्री॰ सर्पि : पयोभ्यांपक्व खाद्यवस्तुनि । लपसी॰ इतिख्यातायाम् ॥ सायथा । समितांसर्पिषाभृष्टांशर्करांपयसिक्षिपेत् । तस्मिन्घनीकृतेन्यस्येल्लवङ्गमरिचादिकम् ॥ सिद्धैषालप्सिकाख्यातागुणानस्यावदाम्यहम् ॥ लप्सिकाबृंहणीवृष्याबल्यापित्तानिलापहा । स्निग्धाश्लेष्मकरीगुर्वीरोचनीतर्पणीपरम् ॥

लब्ध : । त्रि॰ प्राप्ते ॥ सातेभवतुसुप्रीतादेवीशिखरवासिनी । उग्रेणतपसालब्धोययापशुपति : पतिरिति ॥ लभ्यतेस्म । डुलभष् प्राप्तौ ॥ क्तः ॥

लब्धप्रशमनम् । न॰ न्यायलब्धधनस्य सत्पात्रेप्रतिपादने ॥ राज्यस्यचिरलब्धस्यशमनंपरिपन्थिनाम् । रञ्जनप्रतिकाराभ्यांलब्धप्रशमनंविदु : ॥

लब्धलक्ष : । त्रि॰ आयुधविदि । लक्षादप्रच्युतशरे ॥ लब्धंलक्षंयेन ॥

लब्धवर्ण : । पुं॰ विचक्षणे ॥ विदुषि । पण्डिते ॥ लब्धोवर्ण : स्तुतिर्येन ॥

लब्धव्य : । त्रि॰ प्राप्तव्ये । लभ्ये ॥

लब्धस्पर्श : । त्रि॰ प्राप्तप्रवेशे ॥

लब्धा । स्त्री॰ नायिकाभेदे ॥

लब्धि : । स्त्री॰ प्राप्तौ ॥ डुलभष्॰ । स्त्रियांक्तिन्नाबादिभ्य : ॥

लभस : । पुं॰ धने ॥ याचके ॥ वाजिबन्धनरज्जौ ॥ लभते । डुलभष्॰ । अत्यविचमितमौत्यादिना॰ असच् ।

लभ्य : । त्रि॰ युक्ते ॥ लब्धव्ये ॥ लभ्यते । डुलभष्॰ । पोरदुपधादितियत् ॥ लाभे ॥

लमक : । पुं॰ ऋषिविशेषे ॥ रमते । रम॰ । रमेरश्चलोवेतिक्वुन् ॥

लम्पट : । पुं॰ षिड्गे ॥ मूर्खे ॥ यथा श्रीभागवते । यथैहिकामुष्मिककामलम्पट: सुतेषुदारेषुधनेषुचिन्तयन् । शङ्कत॰ विद्वान्कुकलेवरात्ययात्॰ यस्तस्ययत्न श्रमएवकेवलमिति ॥ ऐहिकामुष्मिककामेषु॰ लम्पटोमूर्ख: सुतादिषुयोगक्षेमंचिन्तयन्॰ कुत्सितस्यकलेवरस्य॰ अत्ययात् मृत्यो : शङ्कत । तथाविद्वानपि सन्य : शङ्कत॰ तस्ययत्न: श्रमएवेत्यर्थ : ॥ लोलुपे ॥

लम्पाक : । पुं॰ लम्पटे ॥ देशविशेषे ॥

लम्पापटह : । पुं॰ वाद्यप्रभेदे । पटहे ॥

लंफ : । पुं॰ प्लुतगतौ । लांफ॰ इ॰ भा॰ ॥

लम्ब : । पुं॰ नर्त्तके ॥ अङ्गे । कान्ते उत्कोचे ॥ अवभेदे ॥ क्षेत्रादौ लम्बमानरेखासूत्रे ॥ त्रि॰ दीर्घे ॥ लम्बते । लबिअवस्रंसने । अच् ॥

लम्बकर्ण : । पुं॰ अङ्कोठपादपे ॥

छगले । राक्षसे । हस्तिनि ॥ श्ये नपक्षिणि ॥ दीर्घग्रीवे ॥ त्रि० दीर्घग्रीववति ॥

लम्बकर्णी । स्त्री० गोविशेषे ॥

लम्बकेश: । पुं० विष्टरे ॥ सतु विवाह कालेवरोपवेशनार्थं सार्द्धहितयवा- मावर्त्तवलिताधोमुखाषसङ्ख्यातार्द्द र्भा: । यथा । ऊर्द्ध्वकेशोभवेद्‌ब्रह्मा लम्बकेशस्तु विष्टर: । दक्षिणावर्त्त कोब्रह्मावामावर्त्तस्तुविष्टर: ॥ केशो ऽस्याग्रम् । त्रि० दीर्घकेशयुक्ते ॥

लम्बदन्ता । स्त्री० सैंहलीपिप्पल्या म् । त्रि० वृहद्दशनविशिष्टे ॥

लम्बन: । पुं० कफे ॥ लम्बते । लवि० । नन्द्यादित्वाल्ल्यु: ॥ न० नाभिलम्बितकण्ठिकादौ । ललन्तिकायाम् ॥

लम्बमान: । त्रि० लम्बायमानेवस्तु नि ॥

लम्बबीजा । स्त्री० सैंहल्यांपिप्पल्या म् ॥

लम्बा । स्त्री० पद्मालयायाम् । गौ र्याम् ॥ तिक्ततुम्ब्याम् ॥ दक्षदुहि तृविशेषे ॥ हिमालयकन्याविशे षे ॥

लम्बिका । स्त्री० घण्टिकायाम् । उपजिह्वायाम् । तालूर्द्ध्वसूक्ष्मजिह्वा याम् ॥

लम्बित: । त्रि० लम्बमानेमाल्यादौ ॥ शब्दिते ॥ स्रंसिते ॥ लम्बते । लवि० । क्त: । इट् ॥

लम्बोदर: । पुं० श्रीगणेशे । गजान ने ॥ उड्डाने ॥ त्रि० बाढ्‌ने । औदरिके ॥ लम्बमुदरं यस्य स: ॥

लम्बोष्ठ: । पुं०)
लम्बौष्ठ: । पुं०) उष्ट्रे त्रि० लम्बितौ ष्ठे ॥ लम्बावोष्ठौयस्य स: । ओत्वो ष्ठयो: समासे वा ॥

लम्भनम् । न० प्रतिलम्भे । लाभे ॥ ध्वनौ ॥

लम्भनीय: । त्रि० प्रापणीये ॥

लम्भा । स्त्री० वाटशृङ्खलायाम् ॥

लम्भित: । त्रि० प्रयुक्ते ॥ प्रापिते ग्राहिते ॥ लभेर्ण्यन्तात्कर्मणि क्त: । रभेरशब्लिटोरितिनुमाग म: ॥

लम्भुक: । त्रि० लम्भनशीले । लब्ध रि ॥

लय: । पुं० विनाशे ॥ संश्लेषे ॥ तौर्यत्रिकस्यसाम्ये । गीतवा द्यपादादिन्यासानांक्रियाकालयो: साम्ये ॥ लयनम् । लीङ् श्लेषणे । एरच् ॥ लीयन्तेऽस्मिन्ध्यं तेयनेन वा । प्रलये ॥ मोक्षे ॥ लीयतेऽस्या नइयमस्मिन्निति० सुषुप्तौ ॥ अख ण्डवस्त्वनवलम्बनेनचित्तवृत्ति नि द्रायाम् ॥ न० उशीरे । लीयते ॥ लीङ् । पचाद्यच्

लयनम् । न० गृहे । वेश्मनि ॥ लीयतेऽस्मिन् । लीङ् । ल्युट् ॥

लयपुत्री । स्त्री० नर्त्तक्याम् ॥

लयारम्भः ।) लयालम्बः ।) पुं० सर्व्ववेशिनि नटे ॥

ललः । पुं० विलासे ॥ लडति । लड विलासे । ललतेवा । लल ईप्सायाम् । पचाद्यच् । पूर्व्ववडलयोरैक्यम् ॥ ईप्सायाम् ॥

ललज्जिह्वः । पुं० क्रमेलके । उष्ट्रे ॥ शुनि ॥ त्रि० हिंस्रे ॥

ललत् । त्रि० विलासयुक्ते ॥ उन्मन्यनविशिष्टे ॥ जिह्वाक्रियाविशिष्टे ॥ सर्पे ॥ ललतेः कर्त्तरि शतृ ॥ ईप्साविशिष्टे ॥ उपसेवायुक्ते ॥ भाषणविशिष्टे ॥

ललदम्बुः । पुं० लिम्पाके ॥

ललनः । पुं० बाले ॥ साले ॥ प्रियाले ॥ न० केलौ ॥ चालने ॥ "अतिविस्तारवदना जिह्वाललनभीषणा" ॥

ललना । स्त्री० विशेषाङ्गनायाम् । कामिन्याम् । नारीभेदे ॥ जिह्वायाम् ॥ ललते । लल० चुरादीनां णिजितिपक्षे० ल्युर्युज्वा ॥ लडति । लडविलासे । बहुलमन्यत्रापीतियुच् । डलयोरैक्यम् । टाप् ॥

ललनाप्रियः । पुं० कदम्बे । कामिनीवल्लभे ॥ न० ह्रीवेरे ॥

ललन्तिका । स्त्री० लम्बने । नाभिलम्बिकण्ठिकायाम् ॥ किञ्चिदवलम्बमानकण्ठभूषणे ॥ लडति । लड० । लटः शतृ । उगितश्चेति ङीप् । डलयोरैकत्वम् । ललन्त्येव । स्वार्थे कन् ॥ गोधायाम् ॥

ललाकः । पुं० मेहने ॥

ललाटम् । न० अलिके । गोधौ ॥ भाले ॥ ललं भ्रूविक्षेपरिस्थाने । विलासमीप्सां वा० अटति० । अट गतौ । कर्म्मण्यण् ॥ लडति ललते वा । लडललधातुभ्यां बाहुलकाट्टाटच् ॥ अस्य शुभाशुभलक्षणमुक्तं गारुडे यथा । उन्नतैर्विपुलैः शङ्खैर्ललाटैर्विषमैस्तथा । निर्द्धना धनवन्तश्चार्द्धेन्दुसदृशैर्नराः ॥ आचार्य्याः शुक्तिविशालैः शिरालैः पापकारिणः । उन्नताभिः शिराभिस्तु स्वस्तिकाभिर्नरेश्वराः ॥ निम्नैर्ललाटैर्बधार्हाः क्रूरकर्म्मरतास्तथा । संवृत्तैश्च ललाटैश्च कृपणा उन्नतैर्नृपाः ॥ ललाटोपसृतास्तिस्रो रेखाः स्युः शतवर्षिणाम् । नृपत्वं स्याच्चतसृभिरायुः पञ्चनवत्यथ ॥ अरेखेणायुर्नवतिर्विच्छिन्नाभिश्च पुंश्चलाः । केशान्तोपगताभिश्च अशीत्यायुर्नरो भवेत् ॥ पञ्चभिः सप्तभिः षड्भिः पञ्चाशद्बहुभिस्तथा । चत्वारिंशच्च वक्राभिस्त्रिंशद्भ्रूलग्न

गामिभि : ॥ विंशतिर्वामवक्राभि राधु : चुद्राभिरल्पकम् । नपृथू बालेन्दुनिभे भ्रुवौयाथललाटकम् ॥ शुभमर्द्धेन्दुसंस्थानमतुङ्गंस्याद शोभशम् । इति ६५ अध्याय : ॥

ललाटकम् । न० प्रशस्तललाटे ॥ ललाटमात्रे ॥

ललाटन्तप : । पुं० सूर्य्ये ॥ ललाटं तपति । तपसन्तापे । असूर्य्यलला टयोरितिखश् । मुम् ॥

ललाटिका । स्त्री० स्वर्णादिकृतेभाल भूषणे । पत्रपाश्यायाम् । पानेपा टी० बिन्दीवेना० टौकाटीकी० इ तिख्याते ॥ ललाटस्यालङ्कार: । ललटेभवोऽलङ्कारोवा । कर्णल लाटात्कनलङ्कारे ।

ललामम् । न० पुं० लाञ्छने । ध्वजे ॥ शृङ्गे ॥ प्रधाने ॥ भूषाया म् ॥ रम्ये ॥ बालधौ ॥ पुण्ड्रे । अश्वादीनांभालेऽन्यवर्णचिह्ने ॥ तुरङ्गे ॥ प्रभावे । अश्वस्यभूषाया म् ॥ लडनम् । लडकान्त्ये० ल डविलासेवा । सम्पदादित्वात्क्विप् । डलयोरेकता । ललममतिअमग त्यादौ । कर्मण्यण् ॥

ललामकम् । न० पुरोभागेन्यस्ते ललाटपर्य्यन्तमागतेशिखालंबिमा- ल्ये ॥ ललाममिव । इवार्थेकन् ॥ मुण्डमालायाम् ।

ललाम । न० अश्वे ॥ चिह्ने ॥ शृ- ङ्गे ॥ पताकायाम् ॥ रम्ये ॥ प्रधा ने ॥ भूषायाम् ॥ पुण्ड्रे ॥ पुच्छे ॥ प्रभावे लडनम्० लल् । लल माअमति । अम० । बाहुलकात् कनिन् ॥

ललामी । स्त्री० उत्थितिमिकायाम् । कर्णाभरणविशेषे ॥

ललित : । पुं० प्रातर्गेयेरागविशेषे ॥ यथा । प्रातर्गेयास्तुदेशागेलुलि त : पठमञ्जरी । विभाषभैरवीचै वकामोदेगेगौडकौर्य्यपि ॥ अस्यस्व रूपंयथा । प्रफुल्लसप्तच्छदमाल्यधा रीयुवातिगौरोऽलसलोचनश्री : । त्रिनि : सरन्वासगृहात्प्रभातेवि लासिवेशोललित: प्रदिष्ट: ॥ न० स्त्रीणांशृङ्गारभावजक्रियाविशेषरू- पेहावविशेषे ॥ सुकुमारविधानेनभ्रू नेत्रादिक्रियासचिवकरचरणाङ्गवि न्यासोललितम् । तथाच । सुकु माराङ्गविन्यासेमसृणाललितंभवेत् । यथा । सभ्रूभङ्गंकरकिशलयाव- र्त्तनैरापतन्तीसालिम्यन्तीललित- ललितालोचनस्याञ्चलेन । विन्य स्यन्तीचरणकमलेलीलयास्वैरयाते- नि : शङ्काचप्रथमवयसानर्त्तिताप ङ्कजाक्षी ॥ भ्रूनेत्रादिक्रियाशालि सुकुमारविधानत : । हस्तपादाङ्ग विन्यासस्तरुण्याललितंविदुरित्यन्ये

पि ॥ अनाचार्य्योपदिष्टं स्याल्ललितं रतिचेष्टितमित्यन्ये । अपिच । विन्यासभङ्गिरङ्गानां भ्रूविलासमनोहरा । सुकुमाराभवेद्यच्चललितं तदुदीरितम् ॥ विषमवृत्तप्रभेदे । यथा । नयुगसकारयुगलञ्चभवतियदिचेत्तृतीयकं । तदुदितमुरुमतिभिर्ललितंयदिशेषमस्यसकलंयथोक्तता ॥ यथा । व्रजसुन्दरीसमुदयेनमुदितमनसास्मपीयते । हिमकरगलितमिवामृतकंललितंमुरारिमुखचन्द्रविच्युतम् ॥ चि० ईप्सिते ॥ कोमले ॥ ललिते । मधुरे० ॥ लडेर्ललैर्वाभावेक्त : । डलयोरभेद : ॥ सुन्दरे ॥

ललितकान्ता । स्त्री० मङ्गलचण्डिकायाम् ॥

ललिता । स्त्री० देवीविशेषे ॥ गोपीविशेषे ॥ नदीविशेषे ॥ सागरादक्षिणात्पूर्वंमहादेवावतारिता । वैशाखशुक्लपक्षस्यतृतीयायांनरस्तु य : । कुर्य्याद्दै ललितास्नानंसशम्भुसदनंव्रजेत् ॥ कस्तूर्याम् ॥ लघ्सिकाभेदे ॥ मेघरागस्यरागिण्याम् ॥

ललितासप्तमी । स्त्री० भाद्रशुक्लसप्तम्याम् ॥

ललितिका । स्त्री० शान्तनुतीर्थे ॥

लल्ल : । पुं० आचार्य्यविशेषे । वराहमिहिरसुते ॥

लव : । पुं० लेशे ॥ विनाशे । छेदने कालभेदे । अष्टादशनिमेषास्तुकाष्ठाद्वयंलवइतिहेमचन्द्रोक्ते ॥ पक्षिविशेषे । लवा० इ० भा० प्र० गोपुच्छलोमसु ॥ रामनन्दने ॥ लवोमृष्टोलव : । वाल्मीकिना० लवैर्गोपुच्छलोमभिरुन्मृष्टोगर्भक्लेदो-यस्य ॥ नवांशे ॥ लवनम्० लूयते वा । लूञ् छेदने । अदोरप् ॥ विलासे । इतिविनाशस्थानेपाठो विश्वहेमचन्द्रयो : सम्मत : ॥ न० लामज्जके ॥ जातीफले ॥ लवङ्गे ।

लवङ्गम् । न० देवकुसुमे । श्रीसंज्ञे । श्रीपुष्पे । वारिसम्भवे । भृङ्गारे । लौंग० इ० भा० प्र० ॥ गुणास्तु । लवङ्गंकटुकंतिक्तंलघुनेत्रहितंमतम् । दीपनंपाचनंरुच्यंकफपित्तास्रनाशकृत् ॥ तृष्णांछर्दिंतथाध्मानंशूलमाशुविनाशयेत् । कासंश्वासञ्चहिक्काञ्चक्षयंक्षपयति ध्रुवम् ॥ लुनाति० लूयतेवा । लूञ्० । तरत्यादिभ्यश्चेत्यङ्गच् ॥

लवङ्गकम् । न०) लवंगे
लवंगकलिका । स्त्री०)

लवंगलता । स्त्री० पुष्पविशेषे । गन्धराजइतिकथित ॥

लवण : । पुं० समुद्रविशेषे ॥ राक्षसभेदे । लवणासुरे ॥ रसविशेषे । पटौ ॥ पृथ्व्यग्निगुणबाहुल्याल्लव

णस्य चसम्भव : । चस्य गुणा यथा ।
लवण : शोधनो रुच्यः पाचनः क
फपित्तद : । पुंस्त्ववातहर :
कायशैथिल्यमृदुताकर : ॥ सोऽति
युक्तोऽक्षिपाकास्रपित्तकोष्ठक्षयापं-
कृत् ॥ अपिच । लवणो रुचिकृद्र
सोऽग्निदायीपचनः स्वादुकरश्च । र
सितोनितरां जरास्त्रपित्तं शितिमा
नश्च ददातिकुष्ठकारी ॥ पुनश्च ।
लवण : क्लेदनस्तीक्ष्ण पाचनो दी
पन : सर : स्निग्धो रुचिकर : स्य-
न्दीदृष्टिशुक्रहरो लघुरिति ॥ पु
नश्च । चस्थिभेदं ॥ न० सैन्धवादौ ॥
तथाहि । सामुद्रं यत्तु लवणमक्षीवं
वशिरश्चतत् । सैन्धवोस्त्रीशीतशि
वं माणिमन्थश्चसिन्धुजे ॥ रौमकं
वसुकं पाक्यं विडश्चकृतकेद्वयम् ।
सौवर्चलेऽक्षरुचके० तिलकं तचमे
चके इत्यमर : । लवणनेत्रयोर्ह्वि
षिप्रायश : सैन्धवं विनेतिविशेष :
पूर्वाह्णकालेचाश्वानां प्रायशो लव
णं हितम् । शालानाह विवन्धघ्नं ल
वणं सैन्धवं वरमिति सिद्धयोगीश्वर
सङ्ग्रह : ॥ त्रि० लवणरसयुक्ते ।
सलवणे । सलूणा० इ० भा० ॥
लुनातिजाड्यम् । लूञ्० । न
न्द्यादित्वाल्ल्युः । लवणाल्लुगिति
लिंगात्सत्त्वम् ॥ लवणेन संसृष्ट :
। लवण : सूपः० लवणायवागूः०

लवणं शाकम् । संसृष्टेर्थे जातस्य
ठकोलवणाल्लुगिति लुक् ॥ लवणो
सन्त्यस्मिन्वा । अर्शआद्यच् ॥
लवणकिंशुका । स्त्री० महाज्योतिष्म
त्याम् ॥
लवणक्षार : । पुं० क्षारविशेषे । लो
णारे ॥
लवणखानि : । स्त्री० रुमायाम् । सांभ
रलवणोत्पत्तिस्थाने ॥ लवणाकर
मात्रे ॥
लवणतृणम् । न० लोणतृणे । तृणा
म्ले । पटुतृणके । अम्लकाण्डे ॥
लवणत्रयम् । न० विडरुचकसैन्धवे
षु ॥
लवणधेनु : । स्त्री० दानार्थं लवणा
दिनिर्मितधेनौ ॥
लवणपञ्चकम् । न० सैन्धवादिषु ॥
सैन्धवं रुचकञ्चैव विडं सामुद्रकं ग
डम् ॥
लवणमद : । पुं० लोणारे । लवण
क्षारे ॥
लवणा । स्त्री० नदीविशेषे । त्विषि
महाज्योतिष्मत्याम् ॥ लोनाख्यव
र्त्ते० इतिकश्चित् ॥
लवणाकर : । पुं० लवणोत्पत्तिस्थले
॥ रुमायाम् ॥
लवणाकरजम् । न० लोणारे ॥
लवणाचल : । पुं० दानार्थं लवणादि
कृतपर्वते ॥

लवणाब्धि: । पुं॰ लवणोदे । क्षाराब्धौ ॥

लवणाब्धिजम् । न॰ सामुद्रलवणे ॥

लवणाम्भा: । पुं॰ लवणाब्धौ ॥ लवणं क्षारमम्भोयस्य ॥

लवणासुरजम् । न॰ लोणारक्षारे ॥

लवणाष्टकम् । न॰ सैन्धवादिषु ॥ तेयथा । लवणाष्टकमेतत्तुसैन्धवञ्चसुवर्चलम् । विडं समुद्रसञ्जातमुद्भिदं रोमकं गडम् ॥

लवणोत्तमम् । न॰ सैंधवे ॥

लवणोत्थम् । न॰ लोणारक्षारे ॥

लवणोद: । पुं॰ लवणार्णवे ॥ लवणमुदकं यस्य । उत्तरपदस्यचोदकस्योदादेश: ॥

लवनम् । न॰ छेदने । अभिलावे । लूणनाइति भाषाप्रसिद्धे ॥ लूञ्॰ ल्युट् ॥

लवनी । स्त्री॰ फलवृक्षविशेषे । यौभजायाम् । अयिमायाम् । लोना॰ इ॰ गौ॰ दे॰ भा॰ प्र॰ ॥

लवपति: । पुं॰ नवांशेशे ॥

लवली । स्त्री॰ सुगन्धमूलायाम् । कोमलवल्कलायाम् । नोयाडि॰ इ॰ गौ॰ दे॰ भा॰ प्र॰ फलवृक्षे ॥ अस्यफलगुणायथा । लवलीफलमर्शोघ्नं: कफपित्तहरं गुरु । विशदं रोचनं रूक्षं स्वाद्वम्लं तुवरं रसे ॥

लवाक: । पुं॰ छेदनद्रव्ये ॥

लवाणक: । पुं॰ दात्रादौ ॥ लूयतेऽनेन । लूञ्॰ । आणकोलूधूशिङ्धिधाञ्भ्यइत्याणक: ॥

लवि: । त्रि॰ छिदुरे ॥

लवित्रम् । न॰ दात्रे ॥ लूयतेऽनेन । अर्त्तिलूधूस्वित्यादिना॰ इत्र: ॥

लशुन: । पुं॰ न॰ रसोने ॥ अस्यपर्यायादयोयथा । रसोनोलशुनोरिष्टोम्लेच्छकन्दोमहौषधम् । महाकन्दोरसोनोऽन्योगृञ्जनोदीर्घपत्रक: ॥ गन्धाकृतिरसैस्तुल्योगृञ्जनस्तुपलाण्डुना । दीर्घनालाग्रपत्रत्वाद्भिद्यतेसोपलाण्डुत: ॥ अश्नाति॰ अश्नुतेवा । अशभोजने॰ अशूव्याप्तौवा । अशेर्लश्चेत्युनन् ॥

लष्व: । पुं॰ नर्तके ॥ लष्यते, लषकान्तौ । सर्वनिघृष्वेतिसाधु: ॥

लसत् । त्रि॰ उल्लसति ॥ प्रकाशमाने ॥

लसमान: । त्रि॰ दीप्यमाने ॥

लसा । स्त्री॰ हरिद्रायाम् ॥

लसिका । स्त्री॰ लालायाम् ॥

लसितम् । न॰ चेष्टिते ॥

लसीका । स्त्री॰ इक्षुरसे ॥ त्वङ्मांसमध्यगेरसे ॥

लस्त: । त्रि॰ श्लिष्टे ॥ क्रीडिते ॥ शिल्पयुक्ते ॥ लस्तेस्म । लसश्लेषणक्रीडनयो: । क्त: ॥

लस्तक: । पुं॰ धनुर्मध्यभागे ॥

स्वार्थे कन् ॥
लस्तकी । पुं० शार्ङ्गे । धनुषि ॥
लहरिः । स्त्री०)
लहरी । स्त्री०) तरङ्गे ॥ महातरङ्गे । उल्लोले ॥ कल्लोले ॥
ला । स्त्री० दाने । ग्रहणे ॥ लातेः क्विप् ॥
लाक्षकी । स्त्री० सीतायाम् ॥
लाक्षणिकः । त्रि० लक्षणाभिज्ञे ॥ लक्षणमधीते० वेदवा । क्रतूक्थादिसूत्रान्ताट्ठक् ॥ लक्षणयाप्रतिपादके । लक्षणागम्येर्थे ॥
लाक्षा स्त्री० राक्षायाम् । जतुनि । यावे । अलक्ते । द्रुमामये । लाक्षा वर्ण्याहिमावल्यास्निग्धाचतुवराल घुः । अनुष्णाकफपित्तास्रहिक्काकासज्वरप्रणुत् । व्रणोरःक्षतवीसर्पकृमिकुष्ठगदापहा । अलक्तकोगुणैस्तद्विशेषाद्व्यङ्गनाशनः ॥ लाक्ष्यते । लक्षमिल्यर्थोगेचुरादिः । बाहुलकात्सः । यद्वा लक्ष्यते । लक्ष आलोचने । घञ् । पृषोदरादित्वात् । लाक्षारोचनेतिनिर्देशाद्वादीर्घः ॥ लक्ष्यतेऽनयावा । गुरोश्च हलद्दत्य । प्रत्ययाणः । अजादित्वाट्टाप् ॥
लाक्षातरुः । पुं० पलाशवृक्षे ॥
लाक्षातैलम् । न० लाक्षादितैलमिति प्रसिद्धे पक्वतैलविशेषे ॥ तद्विधिं सत्यंतरइच्चति ॥
लाक्षापुष्पा । स्त्री० गुलाबाख्यशतपत्र्याम् ॥
लाक्षाप्रसादः । पुं० पट्टिकालोध्रे ॥
लाक्षाप्रसादनः । पुं० रक्तलोध्रे । क्रमुके । पट्टिकायाम् ॥ लाक्षाप्रसोदत्यनेन । षद्लृ० । करणे तिल्युट् ॥
लाक्षावृक्षः । पुं० कोशाम्रे ॥ पलाशवृक्षे ॥
लाक्षिकः । पुं० लक्षाभिज्ञे ॥
लाक्ष्यिकः । पुं० लक्ष्याभिज्ञे । अध्येतरिवेदितरि च० क्रतूक्थादिसूत्रान्तसूत्राणुलक्षणे० इतिकार्त्तिकाट्ठक् ॥
लाघवम् । न० आरोग्ये ॥ अप्रभुत्वे अनादरविशये । लघिमनि ॥ कार्यक्षमनेहेतुर्भौतिकघवम्० गौरवप्रतिद्वन्द्विशतोऽनिक्लृप्तज्वलनम्भवति । तदेव लाघवंकश्चित् तिर्यग्गमनहेतुः यथावायोः । यथा कारणानांस्तिपटत्वहेतुर्लाघवम्० गुरुत्वं मन्दाग्निरित्यिति ॥ सत्वगुणे । लघोर्भावः । इगन्ताच्चलघुपूर्वादित्यण् ॥
लाङ्गलम् । न० कुसुमविशेषे । भूमिकर्षणयन्त्रविशेषे । गोदारणे

। सीरे । हले । दृषराजे । ताले ॥ गृहदारुविशेषे । लिङ्गे ॥ लङ्गति । लगिगतौ । बाहुलकात्कलच् । दीर्घश्च ॥

लाङ्गलग्रह : । पुं॰ कृषके ॥

लाङ्गलचक्रम् । न॰ कृषिकर्मचिह्नलाकारेचक्रविशेषे ॥

लाङ्गलदण्ड: पुं॰ ईषायाम् । हलयुगयोर्मध्यकाष्ठ ॥ लाङ्गलस्य दण्ड : ।

लाङ्गलपद्धति:।स्त्री॰सीतायाम्। हलरेखायाम् ॥ लाङ्गलस्यपद्धति:।

लाङ्गलिक : पुं॰ स्थावरविषभेदे ॥

लाङ्गलिका।स्त्री॰ लाङ्गलीवृक्षे ॥

लाङ्गलिकी । स्त्री॰ अग्निशिखौषधौ ॥ लाङ्गलंपुष्पविशेषोऽस्त्यस्या: । अतइनिठनाविति ठन् । जातेरितिगौरादित्वाद्वाङीष् ॥

लाङ्गली । पुं॰ बलदेवे ॥ हलिनि ॥ नारिकेले ॥ सर्पे ॥ लाङ्गलमस्त्यस्य । इनि : ॥

लाङ्गली । स्त्री॰ लाङ्गलाकारपुष्पजलशाकविशेषे । शारद्याम् । तोयपिप्पल्याम् ॥ कांचडा॰ इ॰ गौ॰ दे॰ भा॰ लाङ्गलाकारोस्त्यस्या:। अच् । गौरादि : ।

लाङ्गुलम् । न॰ पुच्छे ॥

लाङ्गुली । पुं॰ कपिकच्छ्वाम् ॥

लाङ्गूलम् । न॰ पुच्छे । लूने । बालहस्ते । बालधौ ॥ लङ्गति । लगि॰ । खर्जपिञ्जादिभ्यऊरोलचाविस्यूलच्॰ लङ्गेर्वृद्धिश्च ॥ शेफसि । शिश्ने ॥ कुसूले ॥

लाङ्गूलिका । स्त्री॰ पृश्निपर्ण्याम् ॥

लाङ्गूली । पुं॰ वानरे ॥ ऋषभनामौषधौ ॥

लाज : । पुं॰ आर्द्रतण्डुले ॥

लाजा: । पुं॰ भृज्जिभक्तते । भृष्टधान्ये ॥ एतेचव्रीहयोभृष्टास्तेलाजाइतिसंज्ञिता : । यवाश्चयवभृष्टास्त धाना: परिकीर्त्तिता : ॥ लाजाश्चयवधानाश्चतर्पणा : पित्तनाशना : । गोधूमयावनालेत्थ: किंचिदुष्णाश्चदीपना : । तृष्णातीसारशमनोधातुसाम्यकर : पर : मन्दाग्निविषमाग्नीनांबालस्थविरयो:पिताम् ॥ देयश्चसुकुमाराणांलाजमण्ड: सुसंस्कृत : ॥ अपिच । येषांस्युस्तण्डुलास्तानिधान्यानिसतुषाणिच । भृष्टानिस्फुटितान्याहुर्लाजाइतिमनीषिण : लाजा : स्युर्मधुरा: शीतालघ्वोदीपनास्तथा स्वल्पमूत्रमलारूक्षाबल्या : पित्तकफच्छिद: ॥ छर्दतीसारदाहास्रमेहमेदस्तृषापहा: ॥ न॰ उशीरे ॥ लज्यन्ते । लज भर्जने ॥ घञ् ॥

लाजा । स्त्री॰ अक्षते ।

लाञ्छन : । पुं॰ रागीधान्ये ॥ न॰

नामनि ॥ चिह्ने ॥ लाञ्छ्यते । लाञ्छिलक्षणे ल्युट् ॥

लाटः । पुं॰ देशविशेषे ॥ यथा । अवन्तीतः पश्चिमेतु वैदर्भाद्दक्षिणोत्तरे । लाटदेशः समाख्यातस्तंत्रेशोऽशक्तिसङ्गमे ॥ अंशुके । वस्त्रे ॥ जीर्णभूषणादिषु ॥

लाटानुप्रासः । पुं॰ शब्दालङ्कारेषु वृत्तिप्रभेदे ॥ यथा । शाब्दस्तु लाटानुप्रासोभेदेतात्पर्यमात्रतः ॥ शब्दगतोनुप्रासः । शब्दार्थयोरभेदेप्यन्वयमात्रभेदाल्लाटजनवल्लभत्वाच्च लाटानुप्रासः ॥ एषपदानुप्रासइत्यन्ये । पदानांसः । सइति लाटानुप्रासः उदाहरणम् । यस्य नसविधे दयितादवदहनस्तुहिनदीधितिस्तस्य । यस्यचसविधेदयितादवदहनस्तुहिनदीधितिस्तस्य ॥ पदस्यापि ॥ अपिशब्देनसइतिसमुच्चीयते । उदाहरणम् । वदनंवरवर्णिन्यास्तस्याः सत्यंसुधाकरः । सुधाकरः क्वनुपुनः कलङ्कविकलीभवेत् ॥

लापः । पुं॰ कथने ॥ लपनम् । लप॰ । घञ् ॥

लाभः । पुं॰ मूलधनादधिकार्जिते । विक्रेयापटादीनांमूल्यादधिकयाप्ये द्रव्ये । फले । इष्टप्राप्तौ ॥ आत्मलाभात्परोलाभो नास्तीति विदुषांमतम् ॥ प्राप्तौ ॥ लग्नादेकादशेस्थाने ॥ लभ्यते । डुलभष् प्राप्तौ । अकर्त्तरीतिघञ् । सं ज्ञायामित्यस्यप्रायिकत्वात् ॥ उत्कृष्टपुरुषार्थलाभेसम्भवत्यधमंकाममयमानोमूर्खः ॥

लामज्जकम् । न॰ वीरणमूले । नलदे । उशीरवत्पीतच्छविसुगन्धविशेषे ॥ लामज्जकंहिमंतिक्तंलघु दोषत्रयास्रजित् । त्वगामयस्वेदकृच्छ्रदाहपित्तास्ररोगनुत् ॥

लालनम् । न॰ अत्यन्तस्नेहकरणे । प्रेमपूर्वकबालकादरणे ॥ यथा । लालनेबहवोदोषास्ताडनेबहवोगुणाः । तस्मात्पुत्रञ्चशिष्यञ्चताडयेन्नतुलालयेत् ॥ चतुर्वर्षावधिसुतान्लालयेत्पालयेत्पिता । ततः षोडशपर्यन्तंगुणान्विद्याश्चशिक्षयेत् ॥ विंशत्यब्दाधिकान्पुत्रान्प्रेरयेद्गृहकर्मसु । ततस्तांस्तुल्यभावेनमत्त्वास्नेहंप्रदर्शयेत् ॥

लालसः । पुं॰ लालसायामर्थेषु ॥ त्रि॰ उत्सुके ॥ भृशंलसनमित्यर्थेयङन्ताद्अच् ॥

लालसा । स्त्री॰ औत्सुक्ये ॥ तृष्णातिरेके ॥ महाभिलाषे ॥ याञ्चायाम् । लौल्ये ॥ दोहदे ॥ लज्जायाम् । चौरादिकोयम् ॥ यथा । लसकान्तौ । भृशंलसन

मित्यर्थे यङ्लुगन्तात् : । टाप् ॥ यद्वा । ललसनम् । लसदीप्तौ । यगन्त : । अप्रत्ययात् । टाप् ॥

लालसीकम् । न॰ पिच्छिले ॥ विजिले ॥

लाला । स्त्री॰ सृणिकायाम् । स्यन्दिन्याम् । मुखस्रावे । लाल॰ इ॰ भा॰ ॥ लालयते । लल॰ । चुरादि : । पचाद्यच् ॥

लालाटिक : । पुं॰ यात्रेषणविशेषे ॥ मौहूर्त्तिकानांयोगविशेषे ॥ यथा । लग्ने १ऽर्के व्ययलाभयो १२ । ११ भृगुसुतेकर्मस्थिते १० भूमिजे॰ राहौधर्मविनाशयो ९ । ८ रविसुते । द्यूने ७ऽ रिसून्वो ६ । ५ विधौ । बन्धौ ४ज्ञे॰ सहजार्थयो : ३ । २ सुरगुरावेवंललाटोद्भवेयोगेनाशमुपैतिमानवपति : पूर्वादिकाष्ठांगत : ॥ यात्रालग्ने सूर्ये स्थितेसतिपूर्वस्यांलालाटिकोयोग : स्यात् । एवंद्वादशैकादशस्थानस्थितेशुक्रे॰ आग्नेय्याम् । दशमस्थिते कुजे दक्षिणस्याम् । नवमाष्टमस्थानस्थे राहौनैरृत्याम् । सप्तमस्थे शनौपश्चिमायाम् । षष्ठपञ्चमस्थानस्थितेविधौवायव्याम् । चतुर्थस्थानस्थितेबुधे उत्तरस्याम् । तृतीयद्वितीयस्थानस्थितेगुरावैशान्यांलालाटिकोयोग : इति । एवंललाटोद्भवेयोगेपूर्वादिदिशाक्रान्तोनृपोनाशमुपैतीत्यर्थ : ॥ प्रकारान्तरञ्च यथा । दिनेशाधिष्ठितोराशिर्यदा लग्नगतस्तदा । यातुर्मृत्युप्रद : प्राच्यांदिशिसूर्योललाटग : ॥ सूर्यस्यराशितस्तस्माद्द्वादशेलग्नगेगृहे । एकादशेवाआग्नेय्यांदिशिशुक्रोललाटग : ॥ ललाटग : कुजोयाम्ये दशमेलग्नगेगृहे ॥ लग्नगेनवमे राशावष्टमेवापिनैरृते । ललाटग : सैंहिकेयोयातुर्द्राङ्निधनप्रद : ॥ लग्नगेसप्तमेराशौशनि : प्रत्यग्ललाटग : । षष्ठराशौलग्नगतेपञ्चमे वापिचन्द्रमा : । ललाटगोवायुदिशियातुर्मृत्युप्रदस्तदा ॥ चतुर्थराशौलग्नस्थेबुध : सौम्येललाटग : राशौतृतीयेलग्नस्थेद्वितीयेचन्द्रपूजित : । ललाटगश्चन्द्रमौलिदिंशियातुर्विनाशद : । लालाटिनिर्दिगधीशेदिग्बलिविहगेललाटगेवापि । प्रतिभृगुजेप्रतिशशिजे कालाशुद्धौचसन्त्यजेद्यात्राम् ॥ स्पष्टमाह मार्त्तण्डे । लग्नऽर्केन्दुजशुक्रसौरिगुरव : प्राग्व्ययेविद्भृगूखेशुक्रार्ककुजेन्दुजा अथतपो मृत्यो : सितञ्चासुरा : । द्यूनेशुक्रकुजार्कजारिपुसुतेचन्द्रज्ञशुक्रा : सुखेचैतेस्वविक्रयो : सितज्ञगुरव : प्राच्यादिलालाटिन : ॥ चि॰ प्रभोर्भा

लदर्शिनि सेवके । प्रभुभावनिदर्शिनि ॥ ललाटं कोपप्रसादचिह्नं ललाटमेव वा पश्यति । संज्ञायां ललाटकुक्कुट्यौ पश्यतीति ठक् ॥ कार्य्यक्षमे सेवके ॥ दूरेस्थित्वा प्रभोर्ललाटं पश्यति न तु कार्य्येषूपतिष्ठत इत्यर्थः ॥ त्रि॰ ललाटसम्बन्धिनि ॥

लालाभक्ष: । पुं॰ नरकविशेषे ॥

लालामिक: । त्रि॰ ललामग्राहिणि ॥ ललामं गृह्णाति । प्रतिकण्ठार्थललामञ्चेति ठक् ॥

लालामेह: । पुं॰ प्रमेहविशेषे ॥ यथा । लालातन्तुयुतं मूत्रं लालामेहेन पिच्छिलम् । प्रमेहतीति शेषः । औषधन्तु । गुडूच्याः स्वरसः पेयो मधुना सर्वमेहजित् । हरिद्राचूर्णयुक्तो वा रसो धात्र्याः समाक्षिकः ॥

लालाविष: । पुं॰ लूतादौ ॥

लालास्राव: । पुं॰ ऊर्णनाभे ॥

लालिक: । पुं॰ महिषे ॥

लालित: त्रि॰ पालिते ॥ उपस्कृते ॥

लालित्यम् । न॰ ललितस्य भावे ॥ ष्यञ् ॥

लाव: । पुं॰ पक्षिविशेषे । लवा॰ इ॰ भा॰ प्र॰ ॥ अस्य प्रभेदा मांसगुणाश्च यथा । लावा विष्किरवर्गे स्युस्ते चतुर्द्धा मता बुधैः । पांशुलो गौरकोन्योस्ति पौण्ड्रको दर्भकस्तथा ॥ लावा विष्किरकाः स्निग्धा ज्वरघ्ना ग्राहिणो हिमाः । पांशुलः श्लेष्मलस्तेषु वीर्योष्णो निलनाशनः ॥ गौरो लघुतरो रूक्षो वह्निकारी त्रिदोषजित् । पौण्ड्रकः पित्तकृत् किञ्चिल्लघुर्वातकफापहः ॥ दर्भको रक्तपित्तघ्नो हृद्यामयहरो हिमः पौण्ड्रकः किञ्चिदुक्तः ॥ लावयति । लूञ् ॰ । स्वार्थे ण्यन्तः । अच् । छेदे ॥

लावक: । पुं॰ लावपक्षिणि । लघुजङ्घे ॥

लावणम् । न॰ लवणे ॥ नस्ये ॥ इति रत्नमाला ॥ त्रि॰ लवणेन संस्कृते ॥ इति हेमचन्द्रः ॥ लवणसम्बन्धिनि ॥

लावणिक: । पुं॰ लवणवणिजि ॥ लवणं पण्यमस्य । लवणाट्ठञ् ॥ त्रि॰ लावण्यवति ॥ लावण्यं कान्तिविशेषोस्यास्ति । अतइनिठनौ इति ठन् । ठस्येकः । यस्येति चेत्यलोपे हलस्तद्धितस्येति यलोपः ॥ लवणेन संस्कृते ॥

लावण्यम् । न॰ कान्तिविशेषे ॥ तस्य लक्षणं यथा । मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा । प्रतिभाति यदङ्गेषु लावण्यं तदिहोच्यते ॥ लवणात्विट् विद्यते यस्य तल्लवणम्

। वर्णादिभ्योऽच् । लवणस्यभाव: । दृढादित्वात्ष्यञ् ॥ यद्वा । लवणात्थिट्० सैव । चतुर्वर्णादित्वात्स्वार्थेष्यञ् ॥ रूपे ॥

लावण्यार्जितम् । न० विवाहकाले भिश्वश्रुराभ्यांदत्तधने ॥ यथा । प्रीत्यादत्तञ्चयत्किञ्चित्० श्वश्र्वावाश्वशुरेणवा । पादवन्दनिकंयत् तत्लावण्यार्जितमुच्यते ॥ लावण्यंशीलनंपुण्यादि० तथाचपादप्रणतायैशीलादिमत्यैवास्त्रियैश्वशुरादिनादत्तंतृतीयं स्त्रीधनमित्यर्थ: ॥

लावा । स्त्री० लावपक्षिणि ।

लावु: ।) स्त्री० तुम्ब्याम् ।
लावुकम् ।) न०

लावुका । स्त्री० तुम्बिकाभेदे ॥

लावुकी० सूक्ष्मवीणायाम् ॥ इ० हा० ली० ॥

लावू । स्त्री० तुम्ब्याम् ॥

लाषुक: । त्रि० लषनशीले ॥ लष्यति० लषतिशातच्छील: । लषकान्तौ ॥ लषपतपदेत्युकञ् ॥

लास: । पुं० नृत्यमात्रे ॥ स्त्रीणांनृत्ये । यूषे ॥ लसनम् । लसश्लेषणक्रीडनयो: । घञ् ॥

लासक: । पुं० लास्यकारिणि । नर्त्तके ॥ केकिनि । मयूरे ॥ वेष्टके ॥ लसति । लस० ण्वुल् ॥

लासिका । स्त्री० नृत्यकारिण्याम् ॥ नर्तक्याम् । लसति । लस० ण्वुल् । प्रत्ययस्थादितीत्वम् ॥

लास्फोटनी । स्त्री० आस्फोटन्याम् । वेधनिकायाम् ॥

लास्यम् । न० नृत्ये । सुकुमारनृत्ये । ताललयाश्रये ॥ पुंनृत्यंताण्डवं प्राहु: स्त्रीनृत्यंलास्यमुच्यते ॥ अपिच । छुरितंयौवतञ्चेतिलास्यंद्विविधमुच्यते । यत्राभिनयाद्यैर्भावैरसैराश्लेषचुम्बनै: ॥ नायिकानायकौरङ्गे नृत्यतश्छुरितंहितम् । मधुरंबद्धलीलाभिर्नटीभिर्यत्रनृत्यते ॥ वशीकरणविद्याभं तल्लास्यंयौवतंमतमिति ॥ लस० । ऋहलोर्ण्यत् ॥ तौर्यत्रिके ॥ पुं० नर्त्तके ॥

लास्यकम् । न० नृत्ये ॥

लास्या । स्त्री० नर्त्तक्याम् ॥

लिकुच: । पुं० लकुचे । डहौ । वडहलइ० भा० प्र० ॥ लक्यते । लक आस्वादने । बाहुलकादुचप्रत्यय: । पृषोदरादि: ॥ न० चुक्रे ॥

लिक्षा । स्त्री० लिक्षायाम् ॥

लिक्षा । स्त्री० यूकाण्डे । लिक्षिकायाम् । लीक० लीख० इ० भा० प्र० केशकीटे । यूकाभेदे ॥ लक्ष्यते । लक्षआलोचने । घञ् । पृषोदरादित्वादस्येत्वम् ॥ परि

मानविशेषे । कचायामष्टके ॥ यथा । त्रसरेणवोऽष्टौ विज्ञेया लिक्षैका परिमाणतः । इति मनुः ॥ अपि च । जालान्तरगते भानौ यच्चाणु दृश्यते रजः । तैश्चतुर्भिर्भवेल्लिक्षा लिक्षाषड्भिस्सर्षप इति ॥

लिक्षिका । स्त्री॰ लिक्षायाम् ॥

लिखनम् । न॰ लेखने ॥ अखण्डनीयायां विधिलिपौ ॥ यथा । यस्य यल्लिखनं पूर्वं यत्र काले निरूपितम् । तदेवाखण्डितं राधे त्वन्यैर्नाहं स्वको विधिः ॥ विधातुश्च विधाताहं येषां यल्लिखनं कृतम् । ब्रह्मादीनाञ्च रुद्राणां न तत्खण्ड्यं कदाचन ॥ इ॰ ब्र॰ वै॰ पु॰ ॥

लिखितः । पुं॰ धर्मशास्त्रप्रवर्त्तके मुनिविशेषे ॥ न॰ वर्णसंस्थाने, लिपौ ॥ लिख्यते स्म । लिख अक्षरविन्यासे । क्तः ॥ त्रि॰ लिखितपत्रादौ ॥ यथा । प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्त्तितम् ॥ इति मिताक्षरायां याज्ञवल्क्यः ॥

लिखिताक्षरविन्यासः । पुं॰ लिपौ ॥

लिगुः । पुं॰ मूर्खे ॥ भूप्रदेशे ॥ मृगे ॥ न॰ चित्ते ॥ लिगति । लगि सङ्गे । खरुशङ्कीति कुप्रत्ययान्तः साधुः ॥

लिङ्गम् । न॰ चिह्ने ॥ शिवमूर्त्तिविशेषे ॥ यथा । नेह लिङ्गार्चनात् किञ्चित्पुण्यमभ्यधिकं क्वचित् । इति विज्ञाय यत्नेन पूजनीयः सदाशिवः ॥ तथा । दुर्गार्च्चनरतो नित्यं महापातकसम्भवैः । दोषैर्न लिप्यते वीर पद्मपत्रमिवाम्भसा ॥ इत्याचारादर्शे भविष्यपुराणम् ॥ साङ्ख्योक्तप्रकृतौ ॥ हेतौ ॥ धर्म्मे ॥ व्याप्ये । व्यापकस्य स्मारके ॥ व्यक्ते ॥ तत्त्वलिङ्गं प्रधानस्य । महदादि सूक्ष्मपर्य्यन्ते ॥ लिङ्गनात् ज्ञापनात् बुद्ध्यादिषु, लयं गच्छतीति॰ सूक्ष्मशरीरे । पञ्चज्ञानेन्द्रियाणि॰ पञ्चकर्मेन्द्रियाणि॰ पञ्चप्राणाः मनोबुद्धिश्चेति सप्तदशात्मके ॥ यथा । बुद्धिकर्मेन्द्रियप्राणपञ्चकैर्मनसा धिया । शरीरं सप्तदशभिः सूक्ष्मं तल्लिङ्गमुच्यते ॥ लिङ्ग्यते गम्यते येनेति॰ बुद्ध्यादौ ॥ अनुमाने ॥ तत् त्रिविधम् । अन्वयव्यतिरेकिकेवलान्वयिकेवलव्यतिरेकि चेति ॥ उपक्रमादिषट्सु ॥ यथा । उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम् । अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥ प्रमाणविशेषे । शब्दसामर्थ्यं लिङ्गम् । यथाहुः । सामर्थ्यं सर्वभावानां लिङ्गमित्यभिधीयते॰ इति॰ । सामर्थ्यं रूढिरेव॰ समाख्यातो भेदः । तेन बर्हिर्देवसदनं दा

मीतिमन्त्रस्य कुशलवनाङ्गत्वं नतु॰ उलपादिलवनाङ्गत्वम् । तस्य बर्हिर्दामीति लिङ्गात् तल्लवनं प्रकाशयितुं समर्थत्वात् । एवमन्यत्रापि लिङ्गाद्विनियोगो द्रष्टव्यः । तदिदं लिङ्गं वाक्यादिभ्यो बलवत् । अतएव स्योनं ते सदनं कृणोमीति मन्त्रस्य पुरोडाशसदनकरणाङ्गत्वं सदनं कृणोमीति लिङ्गात्॰ नतु वाक्यात् ॥ मनसि । अवगम्यते ज्ञायतेऽवगच्छति येन तल्लिङ्गमिति पूज्यपादाः ॥ पुंस्त्वादौ ॥ शेफसि । मेहने । अस्य शुभाशुभलक्षणं यथा । दीर्घलिङ्गेन दारिद्र्यं स्थूललिङ्गेन निर्धनः । कृशलिङ्गेन सौभाग्यं ह्रस्वलिङ्गेन भूपतिः ॥ कर्कशैः कठिनैर्लिङ्गैः परदाररतः सदा । रमते च सदा दासीं निर्धनो भवति ध्रुवम् ॥ कृशलिङ्गेन सूक्ष्मेण रक्तलिङ्गेन भूपतिः परस्त्रीं रमते नित्यं नारीणां वल्लभो भवेत् ॥ कृशलिङ्गेन रक्तेन लभते चोत्तमाङ्गनाम् । राज्यं सुखं स्वदिव्याङ्ग्याः कन्यकायाः पतिर्भवेत् ॥ इति सामुद्रकम् ॥ अपिच । दक्षिणावर्त्तलिङ्गीयः स भवेत् पुत्रवान्नरः वामावर्त्तं तथा कन्याः सुश्लाघ्यभान्ति च । स्थूलैः सिरालैः कठिनैर्नरा दारिद्र्यभाजनाः । ऋजुभिर्वर्त्तुलैर्लिङ्गैः पुरुषाः सुखभागिनः ॥ यस्य पादोपविष्टस्य भूमिं स्पृशति मेहनम् । भोगवान् स तु विज्ञेयो नरो दारिद्र्यभाजनः ॥ भूमौ पादोपविष्टस्य यस्य स्पृशति मेहनम् । भोगवान् स तु विज्ञेयस्तथा तु रगमेहनः ॥ स्थूलग्रन्थियुते लिङ्गे नरोऽतिसुखभाग्भवेत् । लिङ्गेन मृदुना मर्त्यो म्रियते कृच्छ्रपीडित इति ॥ लिङ्ग्यतेऽनेन । लिगि गतौ । हलश्चेति घञ् । वेषे ॥

लिङ्गकः । पुं॰ दन्तशठे । कपित्थे ॥

लिङ्गधारिणी । स्त्री॰ देवीविशेषे । नैमिषे तु महास्थाने देवी सा लिङ्गधारिणीति देवीगीता ॥

लिङ्गपुराणम् । न॰ लैङ्गे महापुराणे । तच्छ्लोकसंख्या यथा । एकादशसहस्राणि लिङ्गाख्यं चातिविस्तृतमिति ॥

लिङ्गवर्द्धनः । पुं॰ कपित्थवृक्षे ।

लिङ्गवर्द्धिनी । स्त्री॰ अपामार्गे ॥

लिङ्गवृत्तिः । पुं॰ धर्म्मध्वजिनि । जीविकार्थं जटादिचिह्नधारिणि ॥ जीविकादिनिमित्तं तु यो बिभर्त्ति जटादिकम् । धर्मध्वजी लिङ्गवृत्तिर्द्वयं तत्र निगद्यते ॥ लिंगमाश्रमादिचिह्नधारणं वृत्तिर्जीविका हेतुर्यस्य सः ॥

लिङ्गशरीरम् । न॰ सप्तदशावयवे

सूक्ष्मशरीरे ॥ सप्तदशावयवास्तु । ज्ञानेन्द्रियपंचकम् कर्म्मेन्द्रियपंचकं प्राणादिवायुपंचकं बुद्धिमनसी चेति ॥ लिङ्ग्यते ज्ञायते प्रत्यगात्मसद्भावो येन • तल्लिङ्गम् । लिगि• हलश्चेति घञ् । लिङ्गञ्च तत् शरीरञ्चेति विग्रहः ॥

लिङ्गस्थः । पुं॰ ब्रह्मचारिणि । वर्णिनि ॥

लिङ्गानुशासनम् । न॰ वररुच्यादिकृते नाम्नां लिङ्गबोधके ग्रन्थे ॥ तत्र शासनानर्हम् । लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति समासान्तादिति सूत्रभाष्योक्तेः लिङ्गानुवदनं लोकादेव सिद्धमिति निर्णयात् ॥

लिङ्गालिका । स्त्री॰ दीनायाम् । क्षुद्रमूषिके ॥

लिङ्गी । पुं॰ प्रव्रजितादिषु । ब्रह्मचार्य्यादिषु ॥ धर्म्मध्वजिनि ॥ वेशधरे ॥ गजे ॥ आत्मनि ॥ लिङ्गमस्यास्ति । इनिः ॥ न॰ व्यापके ॥

लिङ्गिनी । स्त्री॰ लताविशेषे । वहुरल्याम् । शिवमल्लिकायाम् । चित्रफलायाम् । चाण्डाल्याम् । आपस्तम्भिन्याम् । पंचगुरिया॰ इ॰ भाषाप्रसिद्धे ॥

लिन्दुः । त्रि॰ पिच्छिले अशुद्धे ॥ वैदिकोयम् ॥

लिपिः । स्त्री॰ लिखिताक्षरे । लिपौ ॥ सा पञ्चविधा यथा । मुद्रालिपिः शिल्पलिपिर्लिपिर्लेखनिसम्भवा । गुण्डिका घुणसम्भूता लिपयः पञ्चधा स्मृताः ॥ एताभिर्लिपिभिर्व्याप्ता धरित्री शुभदा हरेरिति वाराहीतन्त्रोक्तेः ॥ लेखन्या लिखितं विप्रे मुद्राभिरङ्कितञ्च यत् । शिल्पादिनिर्म्मितं यच्च पाठ्यं प्रायश्च सर्वदेति मुण्डमालातन्त्रोक्तेश्च ॥ लिप्यते । लिप उपलेपे । इगुपधात् किदितीन् ॥ लिपिः प्रमाणं सर्व्वेषां सर्व्वैव प्रशस्यते । विशेषाद्व्यवहारेषु न विनश्येच्चिरं यत इति श्रीमहानिर्वाणतन्त्रम् ॥

लिपिकरः । पुं॰ लेखके ॥ लिपिं करोति । डुकृञ्॰ । दिवाविभेति टः ॥

लिपिका । स्त्री॰ लिपौ ॥

लिपिकारः । पुं॰ लेखके ॥ लिपिं करोति । कर्म्मण्यण् ॥

लिपी । स्त्री॰ लिपौ ॥ लिप्यते लिपेरिगन्तात् कृदिकारादिति ङीष् ॥

लिप्तः । त्रि॰ कृतलेपने । विलिप्ते ॥ विषदिग्धे विषाक्ते । भुक्ते । भक्षिते ॥ दिग्धे ॥ लिप्यते स्म । लिप॰ । क्तः ॥ यद्वा । लिनाति । लीश्लेषणे । लीयते वा । लिङ् श्लेषणे । लीरीङोर्ह्रस्वः पुट् च तरौ श्लेषणकुत्सनयोरिति सप्र-

ण्यधेधातोर्ञ्च :प्रत्ययस्यपुट् ।। मिलिते ॥

लिप्तक : । त्रि० विषाक्तबाणे । दिग्धे ॥ स्वार्थे कन् ॥

लिप्ता । स्त्री० घटिकायाम् । दण्डे ॥

लिप्तिका । स्त्री० दण्ड ॥ लिप्तैव । स्वार्थे कन् ॥

लिप्सा । स्त्री० इच्छायाम् । वाञ्छायाम् ॥ लभे : सन्नन्तादप्रत्यया-दिति०अ : ॥ लाभेच्छायाम् ॥ यथा । अर्थिनिविलसतिलिप्सादात रिदिप्सातुदूरतोपास्ता । आस्तांक्रपणकथेयंरमापतेनोचिताभवती-ति ॥

लिप्सु : । त्रि० लब्धुमिच्छौ । गृध्नौ ॥ लुब्ध । अभिलाषुके ॥ लभे : सन्नन्तादु : ॥

लिवि : । स्त्री० लिपौ । लिखितवर्णे ॥ लिप्यते । लिप० । इगुपधात्लि-दितीन् । बाहुलकात्पस्यवत्वम् ॥ लिबि : सौत्रोधातुर्वा ॥

लिविकर : । पुं० लिपिकरे । लिविं करोति । डुकृञ्० । दिशाविभितट : ॥

लिम्प : । पुं० लेपनकर्त्तरि ॥

लिम्पट : । पुं० षिड्गे ॥ इतिहारावली ।

लिम्पाक : । पुं० जम्बीरे ॥ खरे ॥ न० निम्बूके । पातनीवू० इ०

भा० ॥

लष्व : । पुं० नर्त्तके ॥ लष्यते । लषकान्तौ । सर्वनिघृष्वेतिसाधु : उपधेत्वम् ॥

ली : । पुं० श्लेषणे ॥ चपले ॥ लीङ् : क्विप् ॥

लीक्षा ।)
लीचा ।) स्त्री० लिक्षायाम् । इतिशब्दरत्नावली ॥

लीढ : । त्रि० आस्वादिते । भक्षिते ॥ लिह्यतेस्म । लिहआस्वादने । क्त : ढत्वधत्वष्टुत्वलोपदीर्घा: ॥

लीन : । त्रि० प्राप्तलये । विलीने ॥ छन्ने ॥ लीयतेस्म । लीङ्श्लेषणे । क्त : । स्वादयओदितइतिनत्वम् ॥

लीला । स्त्री० केलौ ॥ विलासे ॥ शृङ्गारभावचेष्टायाम् । गतिहास्येक्षणादिभि : शृङ्गारभावतो-जातक्रियानुकरणे ॥ प्रियस्यानुकृतिर्लीलाश्लिष्टावाग्वेषचेष्टितै: । अलब्धप्रियसमागमयास्वचित्तविनोदार्थंप्रियस्ययावेशगतिहष्टिहसितभणितैरनुकृति. क्रियतेसालीलेत्यर्थ: तथाहि । अप्राप्तवल्लभसमागमनायिकाया : सख्या . पुरोचनिजचित्तविनोदवुद्ध्या । आलापवेशगतिहास्यविलोकनाद्यै : प्राणेश्वरा-नुकृतिमाकथयन्तिलीलामितिभरत : ॥ शोभायाम् । लयनंली :

लीङ्० । सम्पदादित्वात् क्विप् । लियं लाति । ला० । आतोऽनुपेति कः । यद्वा । लीलायनम् । लेला दीप्तौ० कण्ड्वादिः । भिदाद्यङ् । अप्रत्ययादिति वा । पृषोदरादिः ॥ यद्वा । लयनम् । लीङो वाहुलकात् गुणाभावश्च ॥

लीलाखेलः । पुं० अतिशर्करीछन्दः १५ प्रभेदे । तल्लक्षणोदाहरणे यथा एकन्यूनौ विद्युन्मालापादौ चेल्लीलाखेलः । यथा । पायाद्गोगोविन्दः कालिन्दीकूलक्षोणीचक्रे० रासोल्लासः क्रीडद्गोपीभिः सार्द्धं लीलाखेलः । मन्दाकिन्यास्तीरोपान्ते स्वैरक्रीडाभिर्लीला० यद्वद्देवानामीशः स्वर्वेश्याभिः खेलन्तीभिः ॥ त्रि० विलाससुभगे ॥

लीलावती । स्त्री० केलियुक्तायाम् ॥ विलासवत्याम् ॥ शृङ्गारभावचेष्टाऽन्वितायाम् । खेलाविशिष्टायाम् ॥ भास्कराचार्यस्य पत्न्याम् ॥ भास्कराचार्यकृतपाटीगणितग्रन्थे ॥ न्यायग्रन्थविशेषे ॥ वेश्याविशेषे ॥ मात्रावृत्तविशेषे ॥ तल्लक्षणोदाहरणे यथा । लघुगुरुवर्णनियमविरहितमिह हि सुकलय चतुष्कलमष्टगणम् । द्वात्रिंशत्कलविरचितमिदमतिशयसहृदयहृदयदुःखहरणम् । लीलावतिका भवति चकारकर्ण द्विजगणजगणभगणकलिता० फणिनायकपिङ्गलविरचितमङ्गु तद्वत्समलगुम्फनललिता ॥ यथा । गोकोटिं प्रतिदिनमिह वितरन् द्विजवरनिवहे मुदमातनुषे रिपुतिमिरदलनकरहस्तकुशेशयमपि लक्ष्मीवसतिं तनुषे ॥ दुरितविलयमिलितस्वजनोदयनृपराजवलयमवलयसि रणे त्वयि चलति चलति वसुधा वसुधाधिपकीर्त्तिसिंह धरणीरमणे ॥ लीलाशोभाऽस्त्यस्याम् । मतुप् । ङीप् ॥

लीलोद्यानम् । न० देववने ॥

लुक्कायितः । त्रि० अन्तर्हिते ॥

लुङ्गः । पुं० मातुलुङ्गे । वीजपूरे ॥ लुञ्ज्यते । लुजि भाषार्थः । घञ् । अजोरिति कुत्वम् । न्यङ्क्वादित्वाद्वा ॥

लुङ्गुषः । पुं० छोलङ्गे ॥

लुठनम् । न० वेल्लने । अश्वस्य भूमौ पुनः पुनः श्रमापहनने । लोट न० इ० भा० प्र० ॥

लुठितः । त्रि० श्रमशान्त्यर्थं मुहुर्मुहुः परावृत्तपूर्वे । उपावृत्ते ॥ वेल्लिते । अपावृत्ते । परावृत्ते ॥ लुठति स्म । लुठ प्रतिघाते । अकर्मकत्वात् क्तः ॥

लुण्टकः । पुं० शाकविशेषे । नच्या० इ० गौ० भा० प्रसिद्धे ॥

लुण्टाकः । पुं० चौरे ॥

लुण्टाकी । स्त्री॰ चौरायांस्त्रियाम् ॥

लुण्ठक : । त्रि॰ स्तेयकारके ॥

लुण्ठनम् । न॰ हयलुठिते ॥ लूटइति प्रसिद्धे साहसे ॥ लुठिस्तेये । ल्युट् ॥

लुण्ठाक : । पुं॰ परभृत्यौ । द्विके । काके ॥

लुण्डिका । स्त्री॰)
लुण्डी । स्त्री॰) न्यायसारिण्याम् ।

लौण्डी॰ इ॰ भा॰ प्र॰ ।

लुप्तम् । न॰ चौर्यधने । त्रि॰ विलुप्ते । लोपवति ॥

लुप्तवर्णपदम् । न॰ ग्रस्ते ॥ लुप्तोवर्ण : पदं वायत्रवाक्ये पदेवा तत् ॥

लुप्तसंवत्सर : । पुं॰ विलुप्ताब्दे ॥ यथा । अतिचारगतोजीवस्तं राशिं नैतिचेत्पुन : । लुप्तसंवत्सरोज्ञेयोगर्हित : सर्वकर्मसु ॥ अस्यापवादश्च वृषिमेषिभषकुम्भे यद्यतीचारगोगुरु : । नतत्रकाललोप : स्यादित्याहभगवान्यम : ॥ अन्यच्च । मासान्दशैकादशवाप्रभुज्यराशेर्यदाराशिमुपैतिजीव : भुङ्क्तेनपूर्वंचपुनस्तथापिन लुप्तसंवत्सरमाहुरार्या . । लुप्ताब्ददोषोऽत्रिमतेनमध्येसीमोऽङ्गवाया : सुरनिम्नगाया : ॥

लुप्ताब्द : । पुं॰ लुप्तसम्वत्सरे ॥

लुब्ध : । पुं॰ व्याधे ॥ लम्पटे ॥ त्रि॰ आकाङ्क्षिणि । गृध्नौ । परधनाभिलाषुके ॥ धर्मार्थस्वद्रव्यत्यागासमर्थे ॥ मातरंपितरंभ्रातॄन्सर्वांश्चसुहृदस्तथा । घ्नन्तिह्यसुतृपोलुब्धाराजान : प्रायशोभुवि । लुभ्यतिस्म । लुभगार्द्ध्ये । गत्यर्थेतिक्त : ॥

लुब्धक : । पुं॰ व्याधे ॥ स्वार्थे॰ सं ज्ञायांवाकन् । आर्द्रायाम् ॥

लुलाय: । पुं॰ महिषे ॥ लुडति । लुडसंश्लेषणे । इगुपधेतिक : । डलयोरैकत्वम् । अप्राति । आप्नु॰ । अच् । लुलश्चासावायश्च । यद्वा । लुडाते । लुडलोडने । भिदाद्यङ् । लुलाविलोडिताआपोयेन । लुलविमर्दनेसौत्रोधातुर्वा ॥

लुलायकन्द : । पुं॰ महिषकन्दे ॥

लुलायकान्ता । स्त्री॰ महिष्याम् ॥

लुलाय : । पुं॰ महिषे ॥ लुडति । लुड॰ । क : । डलयोरभेद : ॥ यद्वा । लुडाते । लुडविलोडने । भिदाद्यङ् । लुलविमर्दनेसौत्रोधातुर्वा । बाहुलकादायप्रत्यय : ॥ यद्वा । अयते । अय॰ । अच् । लुलश्चासौअयश्च ॥

लुलित : । त्रि॰ आन्दोलिते । तरलिते ॥ उत्सृष्टे ॥ लिप्ते यथा । वात्यैदु: खातिरेकोमललुलितवपुरिति ॥

लुषभः। पुं॰ मत्तमातङ्गे। मत्तगजे॥ रोषति। रुषहिंसायाम्। रुषेर्निल्लुष् चेत्यभच्॰ इतिरुषेरभच् नित्किञ्चातोलुषादेशश्च॥

लूः। स्त्री॰ लवने॥ लवनम्। लूञ् भावेक्विप्॥ लुनातिवा। अन्यवाच्यलिङ्गः॥

लूता। स्त्री॰ ऊर्णनाभे। मर्कटके॥ पिपीलिकायाम्॥ रोगविशेषे। मर्म्मव्रणे॥ लुनाति। लूञ्॰। हसिमृग्रिण्वामीतितन्। संज्ञापूर्वकत्वाद्गुणाभावः॥

लूतातन्तुः। पुं॰ मर्कटकजाले। मकडीकाजाला॰ इ॰ भा॰ लूताया न्तुः॥

लूतामर्कटकः। पुं॰ लूतामर्कटकः पुंस्त्री॰ नवमालिकयोः कपाविति- हेमचन्द्रः॥

लूतारिः। पुं॰ दुग्धफेनीक्षुपे॥

लूतिका। स्त्री॰ ऊर्णनाभी। मर्कटके। मकडी॰इ॰भा॰॥ लूतैव। स्वार्थेकः॥

लूनः। त्रि॰ छिन्ने॥ लूयतेस्म। लूञ्॰। क्तः। ल्वादिभ्यश्चेतिनत्वम्॥

लूनकः। पुं॰ भिन्ने। भेदिते॥ पशौ॥ यावादिषु॰ पशौलूनविपात- इतिस्वार्थेकन्॥

लूनिः। स्त्री॰ छेदे॥

लूमम्। न॰ पुच्छे। लाङ्गूले॥ लूयते। लूञ्॰। बाहुलकान्मक्॥

लेखः। पुं॰ अदितिनन्दने। देवे सुरे॥ ख्यानार्थंचित्रादौलिख्यते। लिखअक्षरविन्यासे। अकर्त्तरिचकारकेसंज्ञायामितिकर्म्मणिघञ्। ग्रीवाहस्तपादेषुतिस्रोलेखाः सन्तियस्येतिवा। अर्शआद्यच्॥ लेख्ये॥

लेखकः। पुं॰ लिपिकरे। अक्षरचुञ्चौ। लेखनकर्त्तरि। लिखारी॰ इ॰भा॰॥ लिखति। लिख॰। शिल्पिनिष्वुन्। ण्वुल्वा॥ अस्यलक्षणानियथा। सर्वदेशाक्षराभिज्ञः सर्वशास्त्रविशारदः। लेखकः कथितोराज्ञः सर्वाधिकरणेषुवै॥ शीर्षोपेतान्सुसम्पूर्णान्समश्रेणिगतान्समान्। अक्षरान्वैलिखेद्यस्तुलेखकः सवरः स्मृतः॥ उपायवाक्यकुशलः सर्वशास्त्रविशारदः। बह्वर्थवक्ताचाल्पेनलेखकः स्यान्नृपोत्तम॥ वाक्याभिप्रायतत्त्वज्ञोदेशकालविभागवित्। अनाहार्य्योनृपेभक्तोलेखकः स्यान्नृपोत्तम॥ इति मात्स्ये १८९ अध्यायः॥ अपिच। सकृदुक्तगृहीतार्थोलघुहस्तोजिताक्षरः। सर्वशास्त्रसमालोकीप्रकृष्टोनामलेखकः॥ राजलेखकलक्षणंयथा। ब्राह्मणोमन्त्रणाभिज्ञो राजनीतिविशारदः। नानालिपि

ज्ञोमेधावीनानाभाषासमन्वितः ॥ मन्त्रणाचतुरोधीमान्नीतिशास्त्रार्थकोविदः । सन्धिविग्रहभेदज्ञोराजकार्येविचक्षणः ॥ सदाराजहितान्वेषीराजसन्निधिसंस्थितः । कार्याकार्यविचारज्ञः सत्यवादीजितेन्द्रियः ॥ स्वरूपवादीशुद्धात्माधर्मज्ञोराजधर्मवित् । एवमादिगुणैर्युक्तः सएवराजलेखकः ॥ नृपानुवर्त्तीसततंनृपविश्वासरक्षकः । नृपतेर्हितकान्वेषीसएवराजलेखकः ॥ इतिपत्रकौमुदी ॥

लेखनः । पुं॰ काशे । न॰च्छर्द्दने ॥ भूर्ज्जे । लिपिन्यासे ॥ लिख॰ । ल्युट् ॥

लेखनाञ्जनं । न॰ अञ्जनविशेषे ॥ यथा । दग्धागडत्वक्शिलाकाचशङ्खचन्दनसैन्धवैः । चूर्णितैरञ्जनंप्रोक्तंपुष्पार्मादिनिकृन्तनम् ॥ कुक्कुटागडस्यत्वक् । शिलामनःशिला ॥

लेखनिकः । पुं॰ लेखहारे ॥ लिखिपुपरहस्तेनस्वहस्तस्यचलेखके । यः स्वहस्तं परहस्तेनलिखितेपुविलेखयेत्॰तत्र ॥

लेखनी । स्त्री॰ कलमे । वर्णतूलिकायाम् ॥

लेखनीयः । त्रि॰ लेख्ये ॥

लेखर्षभः । पुं॰ जिष्णौ । शक्रे । इन्द्रे ॥ लेखेषुऋषभः । सप्तमीतियोगविभागात्समासः ॥ लेखंऋषभइवेतिवा । उपमितसमासः ॥

लेखहारः) पुं॰ पत्रवाहके ॥ लेख
लेखहारकः) हरति । हञ् । कर्म्मण्यण् ॥

लेखा । स्त्री॰ लिपौ ॥ राजिकायाम् । रेखायाम् ॥ लिख्यते । लिख॰ । भिदादिपाठादङ्गुणौ ॥ ज्यायाम् ॥

लेखार्हः । पुं॰ श्रीतालवृक्षे । मृदुच्छदे ॥

लेख्यम् । न॰ भागदानादिव्यवहारकरणे । पत्रे ॥ त्रि॰ लेखितव्ये । लेखनीये ॥ व्यवहाराङ्ककक्रियापादाङ्गे । यथा । षण्मासिकेपिसमयेभ्रान्तिः सञ्जायतेयतः । धात्राक्षराणिसृष्टानिपत्रारूढन्यतः पुरा ॥ लेख्यन्तुद्विविधंप्रोक्तं स्वहस्तान्यकृतंतथा असाक्षिकंसाक्षिमच्चसिद्धिर्देशस्थितेस्तयोः ॥ स्मृतास्तुसाक्षिणोयश्चधनिकर्णिकलेखकाः तदप्यपार्थंकरणस्मृतेल्वाधेः स्थिराश्रयात् ॥ दर्शितंप्रतिकालञ्चपठितंश्रावितञ्चयत् । लेख्यसिद्धयतिसर्वत्रमृतेष्वपिचसाक्षिषु ॥

लेख्यचूर्णिका । स्त्री॰ तूलिकायाम् ॥

लेख्यपत्रः । पुं॰ तालद्रुमे ॥ न॰ लिखनीयपत्रे ॥

लेख्यस्थानम् । न॰ मन्यकुप्याम् ।

दृफ्तरहूतीतरजनभा० प्र०

लेण्डम् । न० गूथे । शकृति । लेण्ड इ० भा० प्र० ॥

लेण्डुज: । पुं० इङ्ग्रेजे ॥ इङ्ग्रेजानवषट्पञ्चलेण्डुजास्तापिभाविनइत्यागमात् ॥

लेप: । पुं० लेपने ॥ अशने ॥ अनुशये । अनुबन्धे ॥ सच० इदमहमकार्षमेतत्फलंभोक्ष्ये० इत्यनुसन्धानकर्तृत्ववासनानिमित्त: । सचपुण्ये कर्मणिपुण्यरूप: ० पापेचपश्चात्तापरूपे भवति ॥ लेपनम् । लिप० घञ् ॥ सुधायाम् । चूना० इ० भा० प्र० ॥

लेपक: । पुं० पलगण्डे । राज इ० प्र० जातौ ॥ त्रि० लेपकर्त्तरि ॥ लिंपति । लिप० ण्वुल् ॥

लेपनम् । न० लेपे । चन्दनागुर्वादिनाङ्गविलेपने ॥ देवगृहादिलेपने । लीपना० इ० भा० लिपेर्ल्युट् ॥ पुं० तुरुष्कनामगन्धद्रव्ये ॥

लेपभुक् । पुं० पितामहपित्रादिषु ।

लेपी । पुं० लेपके । पलगण्डे । थैकर० इ० गौ० दे० भा० । राज० इ० दे० भा० ॥

लेप्य: । त्रि० लेपनीये ॥

लेप्यकृत् । पुं० लेपके ॥

लेप्यमयी । स्त्री० काष्ठादिघटितपुत्तलिकायाम् । अञ्जलिकारिकायाम् ।

लेभिरम् । न० उलूखले ॥

लेय: । पुं० सिंहराशौ ॥

लेलायनम् । न० चलने ॥

लेलायमान: । त्रि० अतिशयचलनविशिष्टे । यथाग्निर्हविर्यंहणायलेलायमानोभवति ॥

लेलिह: । पुं० सर्पे ।

लेलिहा । स्त्री० जीवन्यासमुद्रायाम् ॥ यथा । तर्जनीमध्यमानामा:समा: कुर्यादधो मुखा: । अनामायांक्षिपेद्वामृजूंकृत्वाकनिष्ठिकाम् । लेलिहानाममुद्रेयंजीवन्यासेप्रकीर्त्तिता ॥

लेलिहान: । पुं० शिवे ॥ सर्पे ॥ त्रि० ललज्जिह्वे ॥ लेहातिशयकारके । पुन: पुनर्लेहनकर्त्तरि ॥ लिहेर्यङ्लुगन्तात्ताच्छील्ये चानश्प्रत्यये० गुणोयङ्लुकोरित्यभ्यासस्यगुण: ॥

लेलिहाना । स्त्री० लेलिहायांमुद्रायाम् ।

लेश: । पुं० अल्पे कणे ॥ लिशति । लिशगतौ । पचाद्यच् ॥ लिश्यतेवा । घञ् ॥

लेशेज: । त्रि० अतिकम्पने ॥ लेशेनाल्पेनापिएजति । एजृ० । पचाद्यच् ॥

लेष्टु: । पुं० दृढमृत्पिण्डे । लोष्टे । ढीम० ढेला० डला इ० भा० प्र० ।

लिख्यते॰लिखतिवा। लिख॰। बा हुलकात्तुन् ॥

लेष्टुघ्नः। पुं॰ लोष्टभेदने ।

लेष्टुभेदनः। पुं॰ कोटिशे। लोष्टभेदनमुद्गरे ॥

लेसिकः। पुं॰ कटिरोहके। हस्त्यारोहके ॥

लेहः। पुं॰ आहारे। भोजने, स्वादने ॥ लेहने ॥ लेहनम् लिह आस्वादने। घञ् ॥ लेढि। आस्वादयतिवा ॥

लेहनम्। न॰ जिह्वास्वादे। जिह्वया रसग्रहणे। चाटना॰इ॰भा॰ ॥ लिहेर्ल्युट् ॥

लेह्यम्। न॰ अमृते। सुधायाम् ॥ त्रि॰लेहयोग्ये। आस्वाद्ये। यज्जिह्वायांनिःक्षिप्यरसास्वादेननिगीर्यतेकिञ्चिद्द्रवीभूतगुडरसालादितच ॥

लैङ्गः। पुं॰ वैयाकरणे ॥ वैयाकरणाहिस्त्रीपुंनपुंसकंशब्दजातंतत्त्वमितिवर्णयंतितदयुक्तम्। स्त्र्यादेः शब्दस्वभावत्वे सर्वादीनांत्रिलिङ्गत्वायोगादेकस्यानेकभावत्वायोगात्, औपाधिकधर्मत्वेचतस्यावस्तुत्वात् ॥ न॰लिङ्गपुराणे ॥ त्रि॰ लिङ्गसम्बन्धिनि ॥ लिङ्गस्येदम्। तस्येदमित्यण् ॥

लैङ्गी। स्त्री॰ लिङ्गिन्यामोषधौ ॥

लोकः। पुं॰ जने आत्मनि ॥ लोक्यतेअनुभूयतेशास्त्रोपदेशशीलितबुद्ध्यायमितिव्युत्पादनात् ॥ दर्शने ॥ लोकमार्गेविषये ॥ प्राणिनिकाये। भुवने ॥ त्रयोलोकाः स्वर्गमर्त्त्यपातालानि ॥ अत्रसप्तलोकनामानियथा। भूर्भुवःस्वर्महश्चैवजनश्चतपएवच। सत्यलोकश्चसप्तैतेलोकास्तुपरिकीर्त्तिताः ॥ इत्यमरे ॥ ग्राह्यग्राहकविषयेस्मिन्शरीरे ॥ लोकोद्विविधः प्रोक्तआत्मानात्मविभेदतः। मनुष्यपितृदेवाख्योऽनात्मलोकस्त्रिधामतः ॥ आत्मलोकस्तस्वरूपमित्याहुः शास्त्रदर्शिनः ॥ मनुष्यलोकः पुत्रेणपितृलोकस्तुकर्मणा। विद्ययादेवलोकश्चेत्यब्रवीत्सङ्ग्रहंश्रुतिः ॥ लोक्यतेऽनुभूयते॰दृश्यते॰भुज्यतेवा। लोकृदर्शने। घञ् ॥ कर्मफले ॥ प्रसिद्धिमागम्यप्राप्तोलोकश्चब्दमभिधीयते ॥ चतुर्दशविद्यास्थानानिलोकाइतिव्याख्यातारः। लोक्यतेज्ञायतेधर्मब्रह्मादिरूपोऽर्थएभिरितिनिरुक्तेः ॥ चिदानन्दस्वरूपब्रह्मातिरिक्तस्यसर्वस्यलोकपदार्थत्वाद्देहस्यापिलोकान्तर्गतत्वम् ॥

लोककान्ता। स्त्री॰ ऋद्धिनामौषधे ॥

लोकचक्षुः। पुं॰ सूर्ये ॥ जनलोचने ॥

लोकजित् । पुं॰ जिने । लोकं जयति । जि॰ । सत्सूद्विषेत्यादिना क्विप् । तुक् । लोकान् जयत्युपरमयतीति वा । त्रि॰ लोकजेतरि ॥

लोकतुषार : । पुं॰ कर्पूरे ॥

लोकत्रयम् । न॰ सर्वस्मिन् जगति ॥ लोकानां त्रयम् ॥

लोकदम्भक : । पुं॰ नि : क्षेपापहारादिना जनवञ्चके ॥

लोकधातु : । जम्बुद्वीपे ॥

लोकनाथ : । पुं॰ शिवे । ब्रह्मणि ॥ विष्णौ ॥ बुद्धे ॥ लोकानां नाथ : ॥ लोकैर्नाथ्यते याच्यते वा कर्म्मणि घञ् ॥

लोकपाल : । इन्द्रादिषु ॥ ते यथा । इन्द्रो वह्नि : पितृपतिर्नैऋतिर्वरुणोऽनिल : । धनद : शङ्करश्चैव लोकपाला : पुरातना : ॥ राजनि ॥

लोकबान्धव : । पुं॰ रवौ । सूर्य्ये ॥

लोकभावन : । पुं॰ लोककर्त्तरि ॥

लोकमाता । स्त्री॰ लक्ष्म्याम् ॥ लोकानां माता ॥

लोकयात्रा । स्त्री॰ लोकनिर्वाहे ॥ लोकाचारे । येनोपायेन मर्त्यानां लोकयात्रा प्रसिध्यति । तदेव कार्य्यं ब्रह्मज्ञैरिदं धर्मं सनातनम् ॥ लोकानां यात्रा ॥

लोकलोचन : । पुं॰ सूर्य्ये ॥

लोकवाह्य : । त्रि॰ सर्वाचारविवर्ज्जिते ॥ लोकाद्वाह्य : ॥

लोकवित् । पुं॰ पौराणिके भूर्भुव : स्वरिति त्रयो लोका : वस्तुभूता : सन्तीति सङ्कल्पयति ॥

लोकविनायक : । पुं॰ ग्रहविशेषे ॥

लोकविश्रुति : । स्त्री॰ जनश्रुतौ ।

लोकवृत्तम् । न॰ विचित्रपरिहासकथादिके॰ असत्प्रियाख्याने । न लोकवृत्तं वर्त्तेत वृत्तिहेतो : कथञ्चन । अजिह्मामशठां शुद्धां जीवेद्ब्राह्मणजीविकाम् ॥ लोकानाम् वृत्तम् ॥

लोकसङ्ग्रह : । पुं॰ लोकानां स्वस्वधर्मे प्रवर्त्तने ॥ उन्मार्गान्निवर्त्तने च ॥ सङ्ग्रहणं सङ्ग्रह : । लोकानां सङ्ग्रहो ग्रहणम् ॥

लोकसार : । पुं॰ प्रणवे ॥

लोकाकाशास्तिकाय : । पुं॰ लोकानामन्तराकाशे ॥

लोकात्मा । पुं॰ परमेश्वरे ॥ यथा । यस्याग्निरास्यं द्यौर्मूर्द्धा खं नाभिश्चरणौ क्षिति : । सूर्यश्चक्षुर्दिश : श्रोत्रे तस्मै लोकात्मने नम : ॥

लोकादि : । पुं॰ ब्रह्मणि लोकानामादि : प्रथमशरीरत्वात् ॥

लोकाध्यक्ष : । पुं॰ परमेश्वरे ॥ लोकं दृश्यवर्गं स्वाभाविकेनबोधेन साक्षात् पश्यतीति॰ लोकाध्यक्ष: । लोका

नामध्यक्ष : । लोकाध्यक्षायस्य तिवा । लोकानध्यक्षयतीतिकर्म्म ण्य श्चिउपपदसमासोवा ॥

लोकापवाद : । पुं॰ लोककर्त्तृकायां निन्दायाम् ॥ लोकापवादाद्भयम् ॥

लोकायतम् । न॰ तर्कभेदे । चार्वाकदर्शने ॥ लौकायतम् ॥

लोकायतिक : । पुं॰ चार्वाके ॥

लोकालोक : । पुं॰ परमेश्वरे ॥ लोकयाब्रह्मस्तम्बपर्यन्त : आलोक्यते प्रकाश्यतेयेनस : ॥ चक्रवालेऽद्रिविशेषे ॥ लोकालोकौवहिस्तस्या लोकालोकनियामक : । योजनायुतविष्कम्भस्तुङ्गशृङ्गपरिच्छद : ॥ अन्त : स्थितंलोकंवहि : स्थितञ्चालोकंनियमयतीति॰ लोकालोकनियामक : । तद्वाश्लेलोकाभावादित्यर्थ : ॥ लोकदर्शने । भावेघञ् । नलोक : अलोक : । लोकश्चालोकश्च॰लोकालोकौ॰ प्रकाशान्धकारावनस्त : अन्तर्वहि : सूर्यकिरणानांस्पर्शास्पर्शाभ्याम् ॥

लोकालोकी । त्रि॰ लोकदर्शिनि ॥ लोकानालोकते॰तच्छील : । णिनि : ॥

लोकेश : । पुं॰ हिरण्यगर्भे । ब्रह्मणि ॥ लोकानामीश : ॥ बुद्धभेदे ॥ पारदे ॥

लोकेशाधिष्ठित : । पुं॰ राजनि ॥

लोकेश्वर : । पुं॰ शिवे ॥ लोकानांजनानामीश्वर : प्रभु : ॥ बुद्धभेदे ॥

लोकेश्वरात्मजा । स्त्री॰ बुद्धशक्तिविशेषे । तारायाम् । श्रियि । मनोरमायाम् ॥

लोकैषणा । स्त्री॰ देवलोकादिकामनायाम् ॥ लोकैषणेतिदेवादिलोकार्थोपासनार्थिता ॥

लोकोत्तर : । त्रि॰ लोकातीते ॥

लोकोद्धार : । पुं॰ तीर्थविशेषे ॥

लोक्य : । त्रि॰ परलोकादिसाधने । लोकायहिते ॥

लोचनम् । न॰ चक्षुषि । वास्ये ॥

लोचक : । पुं॰ मांसपिण्डे ॥ अक्षितारकायाम् ॥ कज्जले ॥ स्त्रीभालभूषणे ॥ कदल्याम् ॥ नीलवस्त्रे ॥ कर्णपूरे । कर्णिकायाम् । कर्णाभरणे ॥ ज्यायाम् । मौर्व्याम् ॥ भ्रूलग्रचर्म्मणि ॥ निर्मोके ॥ त्रि॰ निर्बुद्धौ ॥

लोचनम् । न॰ अक्षिणिचक्षुषि ॥ अस्यशुभाशुभलक्षणंयथा । कर्णान्तै : पद्मपत्राभैर्लोचनै : सुखभागिन : । मार्जारलोचनै : पापोमहात्मामधुपिङ्गलै : ॥ क्रूरा : केकरनेत्राश्चहरिणाक्षा : सकल्मषा : । जिह्मैश्चलोचनै : क्रूरा : सेनान्योगजलोचना : ॥ गम्भीराक्षाईश्वरा : स्युर्

लोणा | **लोध्रः**

न्विषः स्थूलचक्षुषः। नीलोत्पला
क्षा विद्वांसः सौभाग्यं श्यावचक्षुषा
म्॥ श्यामत्कृष्णतारकाक्षाणाम-
क्ष्णामुत्पाटनं किल। मण्डलाक्षा
श्च पापाः स्युर्निःस्वाः स्युर्दीर्घलो
चनाः॥ हक्स्निग्धाविपुलाभोगे
ऽल्पायुर्यातिचोन्नता। विशालोन्न
तासुखिनिर्दरिद्राविषमभ्रुवः॥ इ
तिगारुडे ६६॥ लोच्यतेऽनेन।
लोचृ दर्शने। ल्युट्॥ आलोचने॥

लोचनहिता। स्त्री॰ तुत्थाञ्जने॥

लोचना। स्त्री॰ बुद्धशक्तिविशेषे॥

लोचनामयः। पुं॰ चक्षूरोगविशेषे।
अभिमन्थे॥

लोचनी। स्त्री॰ महाश्रावणिका-
याम्॥

लोचमर्कटः। पुं॰ लोचमस्तके॥

लोचमस्तकः। पुं॰ खराश्वायाम्।
कारव्याम्। दीप्ये। मयूरे। म
यूरशिखौषधे। रुद्रजटादू॰ गौ॰
दे॰ प्र॰॥ लोच्यते। लोचृ दर्शने
घञ्॥ यद्वा। लोचयति। लोचृ
भासार्थः। पचाद्यच्। लोचो दर्श
नीयो भासमानो वा॰ मस्तकोऽस्य॥

लोठनम्। न॰ हृतस्तनचालने॥

लोडनम्। न॰ प्रतिघाते॥

लोटणम्। न॰ लवणतृणे॥

लोणा। स्त्री॰ क्षुद्राम्लिकायाम्। चा
ङ्गेर्याम्॥ लोणीशाके। लोनिआ॰
लोनी॰ दू॰ भा॰ श्रुते॥ अस्य गु
णाः। लोणाहृद्यागुरुः कट्वीवात
श्लेष्महरीपटुः। अर्शोघ्नीदीपनीक्षा
र्या मन्दाग्निविषनाशिनी॥

लोणाम्ला। स्त्री॰ क्षुद्राम्लिकायाम्
। चाङ्गेर्याम्॥

लोणारम्। न॰ क्षारविशेषे। लवणो
त्थे। ल[?]णाकारके। लवणक्षारे।
लवणमदे॥

लोणितम्। न॰ लोनियाख्यशाके॥
शाकं लोणितसंज्ञकं सुदलितं तप्ते घृते
तापितं हिंग्वार्द्रेणविमिश्रितं सलवणं
तक्रेणसंपाचितम्। नीवास्त्वेथमि
दं सुहिङ्गुसहितं तैलेनवावासितं
छिन्नं तण्डुलसंयुतं सलवणं तक्रं वि-
नापाचितम्॥ लोणितं शुभशोतो
ष्णं रूक्षं विष्टम्भकारकम्। दोषघ्नं
मधुरं पाके वातघ्नं चामलपित्तकृत्॥

लोणी। स्त्री॰ लोणायाम्॥

लोतः। पुं॰ न॰ वाष्पे। अश्रुणि।
नेत्राम्बुनि॥ न॰ लोप्त्रे॥ लुना
ति। लूञ्॰। हसिमृग्रिण्वामिदमि
लूपूधुर्विभ्य इत्यादिना
तन्। लोतो मेषद्रुतिक्तक्तवत्नि
ष्ठितिसूत्रे कैयटः॥

लोत्रम्। न॰ लोप्त्रे॥ नेत्रजले॥
लूञः सर्वधातुभ्यष्ट्रन्॥

लोध्रः। पुं॰ गालवे। शाबरे। ति
रीटे। तिल्वे। मार्जने। लोध॰
दू॰ भा॰ प्र॰॥ लोध्रोग्राहीलघुः

शीतस्तक्तुष्य : कफपित्तनुत् । क
षायो रक्तपित्तास्रग्ज्वरातीसारशो
थहृत् ॥ क्लाघ्नि । रुधिर० । वा
हुलकात् ट्रन् । कपिलकादि : ॥

लोध्रवृक्ष : । पुं० गालवे ॥

लोध्रपुष्पक : । पुं० शालिप्रभेदे ॥

लोप : । पुं० अदर्शने ॥ गम्यमाना
र्थस्याप्रयोग एव लोप : । यथा विभक्त
धनेषु० विभक्ता भ्रातर : अत्रोत्तर
पदस्य धनस्य लोप : ॥ लुप्यते । लु
प्लृ च्छेदने । कर्म्मणि घञ् ॥ छेदे ॥

लोपा । स्त्री० लोपामुद्रायां ॥

लोपाक :) पुं० शृगाले । फेरौ ॥
लोपापक :)

लोपायिका । स्त्री० शृगाल्याम् ॥

लोपामुद्रा । स्त्री० अगस्त्यमुने : पत्
न्याम् ॥ न मुदं राति अमुद्रा आतो
नुपेति क : । लोपे धर्मलोपा अमुद्रा
हर्षं न लभत इत्यर्थ : ॥

लोपामुद्रापति : । पुं० अगस्त्यमुनौ ॥

लोपाशक : । पुं० शृगाले ॥

लोपाशिका । स्त्री० शृगाल्याम् ॥

लोप्त्रम् । न० चोरिते । चौरधने ॥
लुप् लृ० । ष्ट्रन् ॥

लोप्त्री । स्त्री० हस्तलालनया कृते०
वारिमिश्रिते धूमादिचूर्णपिण्डे ।
लोयी० पेडी० इति वलोकभाषा
यां प्रसिद्धे ॥ पिस्त्वानृडीष् ॥ लो
प्त्री ॥

लोभ : । पुं० धनतृष्णायाम् । सत्य
पि धनागमे जायमाने प्यनुवर्त्तमा
माने तदभिलाषे । स्वविषयप्राप्त
निवर्त्य० इच्छाविशेषे ॥ आत्मनो
ऽनुकूलेषु सुखहेतुषु दृश्यमानेषु श्रूय
माणेषु स्मर्य्यमाणेषु वा तद्गुणानु
सन्धानाभ्यासेन योऽयमात्मकोऽगर्द्धा
भिलाषस्तृष्णा० लोभ : ॥ धर्म
विरोधेन परद्रव्येच्छायाम् ॥ यथा
। परवित्तादिकं दृष्ट्वा नेतुं यो हृदि
जायते । अभिलाषो द्विजश्रेष्ठ स लो
भ : परिकीर्त्तित इति ॥ स तु नाश
कारणम् । यथा । लोभप्रमादवि
श्वासै : पुरुषो नश्यते त्रिभि : ।
तस्माल्लोभो न कर्त्तव्य : प्रमादो न न
विश्वसेत् ॥ अपि च । त्रिविधं नर
कस्येदं द्वारं नाशनमात्मन : । का
म : क्रोधस्तथा लोभस्तस्मादेतत्त्र
यं त्यजेदिति ॥ अस्य स्वरूपं यथा ।
सन्त्यते मदद‌न्तिनो मदजलप्रम्लान
गण्डस्थला वातव्यायतपातिनश्च तुर
गा भूयोऽपि लप्स्ये परान् । एतल्लब्ध
मिदं लभे पुनरिदं लब्ध्वाधिकं ध्या
यतां चिन्ताजर्जरचेतसामहह नृणां
कानाम शान्ते : कथा ॥ अपि च ।
क्षेत्रग्रामवनाद्रिपत्तनपुरीद्वीपक्षमा
मण्डलप्रत्याशा तनसूत्रबद्धमनसां
लब्ध्वाधिकं ध्यायताम् । तृष्णे दे
वि यदि प्रसीदसि तनोप्यङ्गानि तुङ्गा

निर्घेत् तस्मो : प्राणभृतांकुत : शमकथाब्रह्माण्डलक्षैरपीति ॥ लोभएवमनुष्याणांदेहस्थोमहारिपु: । सर्वदु: खाकर: प्रोक्तोदु: खद : प्राणनाशक : ॥ सर्वपापस्यमूलंहि सर्वदातृष्णयान्वित : । विरोधकृत्त्विवर्णानांसर्वार्त्तं : कारणंतथा ॥ लोभात्त्यजन्तिधर्मंवैकुलधर्मंतथैवहि । मातरंभ्रातरंहन्तिपितरंबान्धवंतथा ॥ गुरुंमित्रंतथाभामंपुत्रञ्चभगिनींतथा । लोभाविष्टो नकिंकुर्यादकृत्यंपापमोहित : ॥ क्रोधात्कामादहङ्काराल्लोभएव महारिपु : । प्राणांस्त्यजतिलोभेनकिंपुन : स्यादनाहतम् ॥ तस्माल्लोभाभिभूतस्तुकिंनकुर्यान्नर : किलेतिदेवीभागवतम् ॥

लोभनी । स्त्री॰ महाश्रावणिकायाम् ॥

लोभनीय : । त्रि॰ तृष्णोत्पादके ॥

लोभी । त्रि॰ गृध्नौ । लुब्धे । लोभयुक्ते ॥ लोभोस्त्यस्य । इनि : ॥

लोभ्य : । पुं॰ मुद्गे ॥ त्रि॰ लोभनीये ॥

लोमम् । न॰ पुच्छे । लाङ्गूले ॥

लोमकरणी । स्त्री॰ मांसच्छदायाम् ॥

लोमकर्ण : । पुं॰ शशके ॥ त्रि॰ लोमयुक्तकर्णविशिष्टे ॥

लोमघ्न : । पुं॰ इन्द्रलुप्तकेरोगे ॥ त्रि॰ लोमघातके ॥ लोमानिहन्ति । हन॰ । अमनुष्यकर्त्तकेचेतिटक् ॥

लोम । न॰ तनूरुहे । रोमणि ॥ रौतिइति । रुह॰ । नामन्सीमन्व्योमन् रोमन्लोमन्निति साधु ॥ यद्वा । रूयते । रुशब्दे॰ रुञ्तौभावर्णेवा । मनिन् । कपिलकादित्वाल्लत्वम् लूयतेवा ॥

लोमपाद : । पुं॰ ऋष्यशृङ्गमुने : पुर्वे । अङ्गदेशीयराजविशेषे ।

लोमपादपू : । स्त्री॰ चम्पापुर्याम् । मालिन्याम् । कर्णपुरि ॥

लोमफलम् । न॰ भव्ये ॥

लोमवान् । त्रि॰ लोमशे ॥ लोमानिसन्त्यस्य । मतुप् ॥

लोमविष : । पुं॰ व्याघ्रादौ ॥

लोमश : । पुं॰ मुनिविशेषे ॥ मेषे ॥ त्रि॰ अतिशयलोमान्विते ॥ यथा । कदाचिद्दन्तुरोमूर्ख : कदाचिल्लोमश: सुखी । कदाचित्तुन्दिलोदु : खीकदाचित्स्वल्पमती ॥ लोमानिसन्त्यस्य । लोमादिभ्य : श : ॥

लोमशकान्ता । स्त्री॰ कर्कट्याम् ॥

लोमशपर्णिनी । स्त्री॰ माषपर्ण्याम् ॥

लोमशपुष्पक : । पुं॰ शिरीषवृक्षे ॥

लोमशमार्ज्जार : । पुं॰ पूतिके । मार्जातके । सुगन्धिनि । मूत्रपतने । गन्धमार्ज्जारकेगन्धगोकुला॰ इ॰ गौ॰ दे॰ भा॰ प्र॰ ॥ गन्धमार्ज्जार

वीर्यं तुवीर्यं मृत्कफवातहृत् । क गडूकोठदरं भेल्यं सुगन्धं स्वेदगन्धनुत् ॥

लोमशा । स्त्री० काकजङ्घायाम् ॥ मांस्याम् ॥ वचायाम् ॥ शूकशिम्ब्याम् ॥ महामेदायाम् ॥ काशीशे ॥ शाकिनीभेदे ॥ शृगाल्याम् ॥ अतिबलायाम् ॥ घण्टारवायाम् । शणपुष्प्याम् ॥ एर्वारौ ॥ गन्धमांस्याम् ॥ लोमानिसन्त्यस्याः । लोमादित्वाच्छः । टाप् ॥

लोमशातनम् । न० लोमपातने ॥

लोमहर्षः । पुं० रोमहर्षे रोमाञ्चे ॥

लोमहर्षणः । पुं० सूते । व्यासशिष्ये ॥ न० रोमाञ्चे ॥

लोमहृत् । पुं० हरिताले ॥

लोमालिका । स्त्री० शृगालिकायाम् । दीप्तजिह्वायाम् । उल्कामुख्यां ॥

लोमावली । स्त्री० रोमावल्याम् ॥

लोलः । त्रि० सतृष्णे ॥ चञ्चले ॥ लोडति । लुडविलोडने । क्वचिदपवादविषयेप्युत्सर्ग प्रवृत्तेरच् । डलयोरेकत्वम् ॥ यद्वा । लोडति । लोडृउन्मादे । पचाद्यच् ॥ देशविशेषे ॥

लोलमानः । त्रि० चलनशीले ॥ ताच्छील्ये तिचानश् ॥ लुण्ठमाने ॥

लोला । स्त्री० जिह्वायाम् ॥ कमलायाम् । श्रियि ॥ चञ्चलायांनार्यां म् ॥ कामनायाम् ॥ शर्करीछन्दः १४ प्रभेदे ॥ तल्लक्षणं यथा । द्विःसप्तच्छिदिलोलाम्सौम्भौगौचरणौचेत् ॥ यथा । मुग्धे यौवनलक्ष्मीर्विद्युद्विभ्रमलोला । त्रैलोक्याद्भुतरूपोगोविन्दोतिदुरापः तद्वृन्दावनकुञ्जे गुञ्जद्भृङ्गसनाथे श्रीनाथेनसमेतास्वच्छन्दं कुरुकेलिम् । लोलाट्टाप् ॥

लोलार्कः । पुं० सूर्ये । काशिस्थे रवौ ॥ लोलार्क केशवौ कोटीगङ्गा व्यानगरं धनुः । कलिलं च शरीधर्म्मः शिवोधन्वीपुनातुमाम् ॥

लोलिका । स्त्री० चाङ्गेर्य्याम् ॥

लोलितः । त्रि० वर्त्तुलीकृते ॥ चालिते ॥ श्लथे ॥ लोलः सञ्जातोऽस्य । इतच् ॥

लोलुपः । त्रि० अतिलुब्धे ॥ गर्हितं लुम्पति । लुप्लृच्छेदने । लुपसदेतियङन्तादच् ॥

लोलुभः । त्रि० लोलुपे ॥ भृशं लुभ्यति । लुभगार्द्ध्ये । धातोरेकाचइतियङन्तादच् ॥

लोष्टः । पुं० न० मृत्खण्डे । पांशुपिण्डे । लोष्टौ । ढीम० ढेला० इ० भा० ॥ लोष्टति । लोष्टसङ्घाते । पचाद्यच् ॥ यद्वा । लुनाति । लूञ्० लोष्टपलितादिति क्तः तस्युट्० धातोर्गुणश्चनिपातनात्

॥ न० लोहमलि ॥

लोष्टघ्नः। पुं० लोष्टुभेदने ॥

लोष्टभेदनः। पुं० कोटिशे। लोष्टभङ्गसाधनकाष्ठे ॥

लोष्टमर्द्दी। स्त्रि० लोष्टुमर्द्दनशीले ॥

लोष्टुः। पुं० लोष्टे। दृढमृत्पिण्डे ॥

लोहः। पुं० सर्व्वलोहितच्छागे ॥ पुं० न० लौहे। लोहविकारे ॥ जोङ्गके। अगुरुणि ॥ सर्व्वतैजसे रुधिरे ॥ कृष्णायसे। दृषत्सारे। शस्त्रके। कालायसे। लोहा०द्र० भा० प्र० अथलोहस्योत्पत्त्यादयो यथा। पुरा लोमिनदैत्यानां निहतानां सुरैर्युधि। उत्पन्नानि शरीरेभ्यो लोहानि विविधानि च॥ लोहोऽस्त्रीशस्त्रकं तीक्ष्णं पिण्डं कालायसायसी। गुरुतादृढतोत्क्लेदकश्मलदाहकारिता॥ अश्मदोषः सुदुर्गन्धो दोषाः सप्तायसस्य तु। लोहं तिक्तं सरं शीतं मधुरं तुवरं गुरु॥ रूक्षं वयस्यं चक्षुष्यं लेखनं चानिलं जयेत्। कफं पित्तं गरं शूलं शोथार्शः प्लीहपाण्डुताः॥ मेदो मेहक्रिमीन्कुष्ठं तत्किट्टं तद्वदेव हि। षण्ढत्वकुष्ठामयमृत्युद भवेद्धृद्रोगशूलौ कुरुतेऽश्मरीञ्च। नानारुजानाञ्च तथा प्रकोपं करोति हृल्लासमशुद्धलोहम्॥ जोङ्गाहारिमदकारि चायसं

चेदशुद्धिमदसंस्कृतं ध्रुवम्॥ पाटवं न तनुते शरीरके दारुणां हृदि रुजाञ्च यच्छति॥ अथलोहदोषप्रशान्तये शोधनमभिधीयते। पत्त्रीकृतपत्त्राणि लोहस्याग्नौ प्रतापयेत्। निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके॥ गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा। एवं लोहस्य पत्त्राणां विशुद्धिः सम्प्रजायते॥ अथास्य मारणविधिः। शुद्धलोहभवं चूर्णं पातालगरुडीरसैः मर्द्दयित्वा पुटेद्वह्नौ दद्यादेवं पुटत्रयम्॥ पुटत्रयं कुमार्य्याश्च कुठारच्छिन्निकारसैः। पुटषट्कं ततो दद्यादेवं तीक्ष्णमृतिर्भवेत्॥ अन्यच्च। त्रिपेद्द्वादशमांशेन दरदं तीक्ष्णचूर्णतः। मर्द्दयेत्कन्यकाद्रावैर्यामयुग्मं ततः पुटेत्॥ एवं सप्तपुटैर्मृत्युं लोहचूर्णमवाप्नुयात्। सत्यानुभूतो योगीन्द्रैः क्रमोऽयं लोहमारणे॥ कथ्यते रामराजेन कौतूहलधियाधुना। सूतकाद्द्विगुणं गन्धं दत्त्वा कुर्य्याच्च कज्जलीम्। द्वयोः समं लोहचूर्णं मर्द्दयेत्कन्यकाद्रवैः॥ यामयुग्मं ततः पिण्डं कृत्वा ताम्रस्य पात्रके। घर्म्मे धृत्वा रुवूकस्य पत्त्रैराच्छादयेद्बुधः॥ यामद्वयाद्भवेदुष्णं धान्यराशौ न्यसेत्ततः। दत्त्वा परिशरावञ्च दिनान्ते समुद्धरेत्॥

पिष्ट्वाचगालयेद्वस्त्रा देवं वारितरं भवेत् । दाडिमच्छदलं पिष्ट्वातच्चतुर्गुणवारिणा ॥ तद्रसेनायसश्चूर्णं सन्नीयात्प्लावयेदपि आतपेशोषयेत्तत्वपुटे देवं पुनः पुनः ॥ एकविंशतिरात्रैस्तन्म्रियतेनात्र संशयः एवं सर्वाणि लोहानि स्वर्णादीन्यपिमारयेत् ॥ एवंमारितस्य लोहस्य मात्रा । गुञ्जामेकां समारभ्ययावत् स्युर्नवरत्तिकाः । तावल्लोहं समश्नीयाद्यथादोषानलं नरः ॥ कूष्माण्डं तिलतैलञ्च माषान्नं राजिकांतथा । मद्यमम्लरसञ्चैव वर्जयेल्लोहसेवकः ॥ लुह्यते । लुहगार्ध्ये । घञ् ॥ लोहितवा । अच् ॥ यद्वा । रोहति । रुह० । अच् । रलयोरैक्यम् ॥ रुह्यतेवा । घञ् । कपिलकादिः ॥ लूयतेऽनेनवा । लूञ्० । बाहुलकात् ० हः वा ॥ यदातु आयसे पात्रे पक्वमश्नातिवै द्विजः । सपापिष्ठोपि भुङ्क्तेऽन्नं रौरवे परिपच्यते इति मत्स्यसूक्ततन्त्रे लोहपात्रे भक्षणनिषेधः ॥ ब्रह्मवैवर्तेपि । यथा । अग्रः पात्रेपयः पानं गव्यं सितान्नमेवच । भृष्टादिकं मधुगुडं नारिकेलोदकं तथा । फलं मूलं चयत्किञ्चिदभक्ष्यं मुनिरब्रवीदिति ॥

लोहकपाटकः । पुं० मदनद्रुमे ॥ लोहमयकपाटके ॥

लोहकान्तः । पुं० अयस्कान्ते ॥ लोहः कान्तोऽस्य ॥

लोहकारः । पुं० लोहकारके । व्योकारे ॥ लोहं करोति । डुकृञ् ० । कर्मण्यण् ॥

लोहकारकः । पुं० लोहकृति । व्योकारे । लोहार० इ० भा० । कर्मकारे ॥ सङ्करजातिरयं यथा । गोपालात्तन्तुवाय्यां वै कर्मकारोप्यभूत्सुतः । इ० प० पु० ॥

लोहकिट्टम् । न० लोहमले । किट्टे ॥ यल्लोहं यद्गुणं प्रोक्तं तत्किट्टमपि तद्गुणम् ॥ लोहस्य किट्टम् ॥

लोहचूर्णम् । न० लोहकिट्टे ॥

लोहजम् । न० कांस्ये ॥ लोहकिट्टे ॥

लोहद्रावी । पुं० टङ्कणे ॥

लोहधमनी । स्त्री० भस्त्रायाम् ॥

लोहनालः । पुं० नाराचे ॥

लोहपृष्ठः । पुं० कङ्कपक्षिणि ॥ लोहमिवपृष्ठमस्य ॥

लोहप्रतिमा । स्त्री० लोहमय्यांप्रतिमायाम् । सूर्म्याम् ॥

लोहमयः । त्रि० लोहात्मके ॥

लोहमारकः । पुं० शाल्मिंचशाके ॥

लोहराजकम् । न० कलधौते । रूप्ये ॥

लोहलः । पुं० शृङ्खलाधार्ये ॥ त्रि०

अव्यक्तशाचिनि ॥ लोहनं लोहः
लुहकल्पनादाविति स्वामी । लुह
लौगार्ष्ये इति वोपदेवः । भावे घञ्
। लोहं लाति । आतोऽनुपेति कः ॥
यद्वा । रोहयतेर्बाहुलकात् डलच् ।
कपिलकादित्वात् लत्वं ॥

लोहवरम् । न० स्वर्णे ॥

लोहशिङ्घाणिका । स्त्री० लोहमले ।
मण्डूरे ॥

लोहश्लेषणः । पुं० टङ्कने ॥

लोहसङ्करम् । न० वर्त्तलोहे ॥

लोहसारः । पुं० साराख्यलोहे ॥ यथा
भृष्टिखराकारान्यङ्गान्यस्मिन्नले पि
ते । लोहस्य ये च सूक्ष्माणि तत्सारम
भिधीयते ॥ लोहसारात्क्षयं हन्यात्
ग्रहणीमतिसारकम् । अर्शसर्वाङ्ग
जं वातं शूलञ्च परिणामजम् । छर्दिं
सपीनसं पित्तं श्वासमाशुव्यपोहति ॥

लोहाख्यम् । न० अगुरुणि ॥

लोहाभिसारः । पुं० भूपानां नीराज
नाविधौ । महानवम्यां प्राक्प्रस्था
नाच्छस्त्रवाहनादिपूजनविधौ । लो
हाभिहारे । लोहस्य शस्त्रस्य अभितः
सरणम् । सृगतौ । भावे घञ् ॥
लोहाभिसारोऽस्त्रभृतां राज्ञां नीरा-
जनाविधिः ॥

लोहाभिहारः । पुं० लोहाभिसारे ।
लोहस्य शस्त्रस्य अभितो हरणम् । हृ
ञ भावे घञ् । लोहाभिहारस्तु
स्त्राविधिर्नीराजनोत्तरः ॥

लोहार्गलः । पुं० तीर्थविशेषे ॥ न०
स्त्री० लोहकीलके ॥

लोहि । न० श्वेतटङ्कणे ॥

लोहिका । स्त्री० खरसीन्दे । खर
पार्श्वे । लौहपार्श्वे ॥

लोहितः । पुं० नदविशेषे ॥ भौमे
। मङ्गले । रक्तवर्णे । रोहितम
त्स्ये ॥ मृगविशेषे ॥ सर्पे । सुरा
न्तरे । मसूरे ॥ रक्ताली ॥ रक्त-
शाली ॥ बलभेदे । न० रक्तगोशीर्षे
कुङ्कुमे । रक्तचन्दने ॥ पद्मरागे पतंगे
॥ हरिचन्दने । हयाकुङ्कुमे । रु
धिरे ॥ युद्धे ॥ त्रि० रक्तवर्णान्वि
ते ॥ रोहति० रुहतेर्वा । रुह० ।
रुहेरश्च लोवेतीतन् ।

लोहितकः । पुं० पद्मरागमणौ ।
भौमग्रहे ॥ लोहितएवमणिः लो
हितान्मणाविति कन् । न० रीतौ०

लोहितचन्दनम् । न० कुङ्कुमे ॥ लो
हितञ्चतच्चन्दनञ्च । रक्तचन्दने ॥

लोहितपुष्पः) पुं० दाडिमवृक्षे ।
लोहितपुष्पकः)

लोहितमृत्तिका । स्त्री० गैरिके रक्तवर्ण
मृत्तिकायाम् । लोहिता चासौ
मृत्तिका च ।

लोहिता । स्त्री० रागादिरक्तायाम् ।
वराहक्रान्तायाम् ॥ रक्तपुनर्नव
याम् ॥ वर्णादनुदात्तादिति पाक्षि

क्री।ङीबभावस्तकारस्यनकारादेश-
श्चन ।
लोहिताक्षः । पुं॰ विष्णौ ॥ प्रति
ष्ठायामग्निशेषे ॥ कोकिले ॥ त्रि॰
रक्तवर्णचक्षुर्युक्ते ॥ लोहितेअक्षि
णीयस्यसः । बहुव्रीहौसक्थ्यक्ष्णोः
स्वाङ्गात्षच् ॥
लोहिताङ्गः । पुं॰ कुजे ॥ कम्पिल्ल
के ॥ लोहितान्यङ्गान्यस्य ॥
लोहिताननः । पुं॰ नकुले ॥ त्रि॰
रक्तवर्णमुखे ॥
लोहितायः । न॰ ताम्रे ॥
लोहितायसम् । न॰ रक्तवर्णलोहजा
तौ ॥
लोहितिका । स्त्री॰ लोहितायाम् ॥
लोहितैव । लोहितान्मणावित्यत्र
॰लोहितालिङ्गबाधनंवेतिकन् ॥
लोहित्यः । पुं॰ अब्धौ ॥ नदे ॥
व्रीहौ ।
लोहिनिका । स्त्री॰ लोहिन्याम् ॥
लोहिन्येव । लोहितालिङ्गबाधनंवे
तिकन् ॥
लोहिनी । स्त्री॰ लोहितायाम् ॥ वर्णा
दनुदात्तादितिङीप् ॰ तकारस्यच
नकारादेशः ॥ गुञ्जायाम् ॥
लोहोत्तमम् । न॰ स्वर्णे काञ्चने ॥
लोहेषुसर्वतैजसेषुउत्तमम् ॥
लौकायतिकः । पुं॰ चार्वाकदर्शना
भिज्ञे ॥ लोकायतमधीतेवेदवा ।

उक्थादित्वात् ॰ क्रतूक्थादिसूत्रा
न्ताट्ठक् ॥ तार्किकभेदे ॥
लौकिकः । त्रि॰ अप्रामाणिकशास्त्रपरिशी
लनजन्यबुद्धिप्रकर्षे । प्रतिपाद्ये ॥
लोकप्रसिद्धे ॥ लोकव्यवहारमात्र
परे । लोकानुरञ्जनमेवतत्त्वमिति
लौकिकानांभ्रान्तिमात्रमेव । लोक
स्यभिन्नरुचित्वात् ॰ तदनुरञ्जनस्ये
श्वरेणापिकर्त्तुमशक्यत्वात् ॥ यथा
हुः । विद्यतेनखलुकश्चिदुपायः
सर्वलोकपरितोषकरोयः । सर्व
थास्वहितमाचरणीयंकिंकरिष्यति
जनोबहुजल्पइति ॥ लोकेविदि
तः । अर्थशास्त्रादिज्ञाने ॥ लो
कसर्वलोकाट्ठञ् । भवार्थेत्वध्या
त्मादित्वाट्ठञ् ॥ स्मृत्युपनिबद्धे
धर्मादौ । न॰ जागरिते ॥
लौकिकाग्निः । पुं॰ असंस्कृताग्नौ ॥
लौल्यम् । न॰ चापल्ये । लोलस्यभा
वः ष्यञ् ॥
लौहः । पुं॰ न॰ लोहे ॥ लोहएव
। प्रज्ञाद्यण् ॥ लोहस्यविकारः ।
रजतादित्वादञ् ॥
लौहद्वारकः । पुं॰ नरकभेदे ॥
लौहजम् । न॰ मण्डूरे ॥
लौहभाण्डः । पुं॰ अश्मभाले । हि
मामदिस्ता इति साधारणभाषा
प्रसिद्धे ॥ न॰ लोहनिर्मितभा
ण्डे ॥

लोहभू : । स्त्री॰ काठिन्याम् ॥

लोहशङ्कु : । पुं॰ नरकविशेषे ॥ लोहनिर्मितकीलके ॥

लोहा ।) स्त्री॰
लोहात्मा ।) स्त्री॰ काठिन्याम् ॥

लौहित : । पुं॰ लोहिते ॥ त्रि॰ लोहितसम्बन्धिनि ॥

लौहितीक : । पुं॰ स्फटिके ॥ त्रि॰ लोहितवर्णतुल्ये ॥ लोहितद्रव । कर्कलोहिताटीकक् ॥

लौहित्य : । पुं॰ नदविशेषे । ब्रह्मपुत्रइतिप्रसिद्धे । अब्धौ । सागरे ॥ व्रीहौ ॥ न॰ लोहितत्वे । रक्तिमनि ॥ तीर्थविशेषे ॥ †✻†

लकारस्समाप्त :

•†—†•

वकारस्य प्रारंभ :

व॰ । अ॰ इवार्थे । औपम्ये ॥ पादपूरणे ॥

व : । पुं॰ वकारे ॥ सान्त्वने ॥ वाते ॥ वरुणे ॥ वातिज्ञानंवा ॥ वागतिगन्धनयो : । ड : ॥ वाहौ ॥ मन्त्रणे ॥ कल्याणे ॥ वलवति ॥ शार्दूले ॥ वस्त्रे ॥ शालूके ॥ वन्दने ॥ न॰ प्रचेतसि ॥ वरुणबीजे ॥

वंश : पुं॰ पितृपितामहाद्युत्पादकप्रबन्धे । सन्ततौ । गोत्रे । जनने । कुले । जन्मनैकलक्षणे । सन्ताने ॥ शिष्याचार्यसन्तानाविच्छेदे ॥ त्वक्सारे । कर्मारे । त्वचिसारे । तृणध्वजे । बांस॰ इ॰ भा॰ प्र॰ ॥ अस्य गुणायथा । वंश : सरोहिम : स्वादु : कषायोवस्तिशोधन : । छेदन : कफपित्तघ्न : कुष्ठास्रव्रणशोथजित् ॥ तत्करीर : कटु : पाकेरसेरूक्षोगुरु : सर : । कषाय : कफकृत्स्वादुर्विदाहीवातपित्तल : ॥ तद्यवास्तुसराकृता : कषाया : कटुपाकिन: । वातपित्तकराउष्णावद्धमूत्रा : कफापहा : ॥ पृष्ठावयवे ॥ वर्गे । सङ्घे ॥ वाद्यविशेषे । वंसी॰ बांसी॰ इ॰ भा॰ ॥ इक्षुविशेषे । वंशके ॥ सालवृक्षे ॥ वनति॰ वन्यतेवा । टूवमउद्गिरणे । वृभृवमिभ्य : शक्॰ इतितुन । उणसूत्रस्योज्ज्वलदत्तादिसूत्रवृत्तिध्वदर्शनात्॰ अनुनासिकस्य्युपधादीर्घप्रसङ्गाच्च ॥ वनति॰ वन्यतेवा । वनशब्दे॰ वनसम्भक्तौवा । वाहुलकात्॰ श :॥ उश्यते॰ वष्टिवा ॥ वशकान्तौ । घञ्॰ अच्‌वा । सङ्ख्यावंशेनेतिनिर्देशान्नुम् । आच्छोत्यनुमितियोगविभागाद्वा ॥

वंशक : पुं॰ इक्षुविशेषे । वडोखा॰ इ॰ देशभा॰ प्र॰ । वांशा॰ सोमसाडा॰ इ॰ प॰ गौ॰ दे॰ भा॰ प्र॰ ॥ दीर्घ

पोर: सुकठिन: सचारोवंशक: स्मृत:॥ वंशकस्तु नभिष्यन्दीलघु-दोषचयापह:॥ वंशदूष। इवेप्रतिकृतःविनिकन्॥ वांशपातामा-च०दू०गौ०दे०भा०प्र०मत्स्ये॥ न० अगुरुणि॥

वंशकठिन:। पुं० देशविशेषे॥ वंशा: वेणव: कठिनायस्मिन्-स:॥

वंशकफम्। न० इन्द्रतूले। वृद्धसूत्रके। यीपसहासे। बुढियाकासूत० दू०भा०प्र०॥

वंशकर्पूररोचना। स्त्री० वंशरोचनायाम्॥

वंशक्षीरी। स्त्री० वंशरोचनायाम्॥ वंशात्क्षीरमस्या:। गौरादि:॥

वंशगुल्म:। पुं० तीर्थविशेषे॥

वंशज:। पुं० वेणुयवे। वंशबीजे॥ त्रि० वंश्ये। सद्वंशजाते॥ वीज्ये॥ वंशेजात:। जनी०। ड:॥

वंशजा। स्त्री० वंशरोचनायाम्॥ वंशात्०जायते। जनी०। पञ्चम्यामितिड:॥

वंशतण्डुल:।) पुं०
वंशधान्यम्।) न० वेणुयवे। वंशयवे॥

वंशनालिका। स्त्री० वंशीवाद्ये॥

वंशनेत्रम्। न० इक्षुमूले॥

वंशपत्र:। पुं० नले। न० वंशस्यदले॥

वंशपत्रक:। पुं० श्वेतेक्षौ॥ वांशपातामाच०दू०गौ०दे०भा०प्र०चतुद्रमत्स्ये। नले॥ न० हरिताले॥

वंशपत्रपतितम्। न० अत्यष्टिच्छन्द: १७ प्रभेदे॥ यथा। दिङ्मुनिवंशपत्रपतितंभरनभनलगै:॥ यथा। नूतनवंशपत्रपतितंरजनिजललवं०पश्यमुकुन्दमौक्तिकमिवोत्तममरकतगम्। एषचतंचकोरनिकर: प्रपिबतिमुदितो०बान्तमवेत्य-चन्द्रकिरणैरमृतकणमिव॥

वंशपत्री। स्त्री० वेणुपत्र्याम्। हिङ्गुपर्य्याम्॥ हिङ्गुपत्रीगुणाविज्ञैर्वंशपत्रीचकीर्त्तिता॥ नाडीहिङ्गुनि। तृणविशेषे। वंशदलायाम्॥ अस्यागुणा:। सुमधुरत्वशिशिरत्वपित्तरक्तदोषनाशित्वरुच्यत्वानि०पशुमांदुग्धदायित्वञ्चेतिराजनिर्घण्ट:॥

वंशपीत:। पुं० कणगुग्गुलौ॥

वंशपुष्पा। स्त्री० सहदेवीलतायाम्॥

वंशपूरकम्। न० इक्षुमूले॥

वंशमूलकम्। न० तीर्थविशेषे॥

वंशयव:। पुं० वंशधान्ये॥ यवावंशभवारूक्षा: कषाया: कटुपाकिन:। बद्धमूत्रा: कफघ्नाश्चवातपित्तकरा: सरा:॥

वंशरोचना। स्त्री० त्वक्क्षीर्याम् वं

णव्याम् । श्वेतायाम् ॥ गुणाय-
था । वंशजाबृंहणीवृष्याबल्यास्वा
द्वीचशीतला । तृष्णाकासज्वरश्वा
सक्षयपित्तास्रकामलाः । हरेत्कु
ष्ठंव्रणंपाण्डुंकषायावातकृच्छ्रजि-
त् ॥ रोचते । रुच० । नन्द्यादिः ।
वंशरोचना ॥

वंशरोचनिका । स्त्री० वंशरोचनाया
म् ॥

वंशलोचना । स्त्री०) वंशरोचना
वंशशर्करा । स्त्री०) याम् ॥

वंशशलाका । स्त्री० वीणामूले ॥

वंशस्तनितम् । न० वंशस्थविले ॥

वंशस्थम् । न० जगती १२ प्रभेदे ॥
यथा । पुरोजकारः परतस्तसंज्ञ-
कौगणौजकारोरगणस्ततः परम् ।
निवेशितस्यद्यशवन्तभूपतेव्रजीतिवं
शस्थमदस्तदाफणी ॥ जतौतुवंश-
स्थमुदीरितंजराविति चास्यलक्षण-
म् ॥ त्रि० वंशेस्थिते ॥

वंशस्थविलम् । न० जगति १२ प्रभे
दे । वंशस्थेवृत्ते ॥ यथा । वदन्ति
वंशस्थविलंजतौजरौ । यथा । वि
लासवंशस्थविलंमुखानिलैः प्रपू-
र्य्य: पञ्चमरागमुद्गिरम् । व्रजाङ्ग
नानामपिगानशालिनांजहारमानं
सहरिः पुनातुनः ॥

वंशाग्रम् । न० वंशाङ्कुरे ॥

वंशाङ्कुरः । पुं० करीरे । वंशाग्रे ।
यवफलाङ्कुरे ॥

वंशानुचरितम् । न० वंशचरितव-
र्णने ॥

वंशिकम् । न० अगुरुणि ॥ वंशोस्त्य-
स्य । अतइनिठनाविति ठन् ॥

वंशिका । स्त्री० वंश्याम् । वेणौ ॥ अ
गुरुणि ॥

वंशी । स्त्री० मुरलीवाद्ये । बंसरी०
इ० भा० ॥ कर्षचतुष्टये ॥

वंशीधरः । पुं० श्रीकृष्णे ॥ धरतीति
धरः । वंश्याधरः ॥ त्रि० वंश्याधा-
रके ॥

वंश्यः । त्रि० सद्वंशजाते । कुल्ये ।
बीज्ये ॥ वंशेभवः । दिगादित्वा
द्यत् ॥

वंहिष्ठः । त्रि० अत्यन्तबहुले ॥ अय-
मेषामतिशयेनबहुलः । अतिशाय
नेतमबिष्ठनाविति इष्ठन् ॥ प्रियस्थि-
रस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृ-
न्दारकाणांप्रस्थस्फवर्बंहिगर्वर्षित्र-
प्द्राघिवृन्दाइतिबंह्यादेशेनसाधुः ।

वंहीयान् । त्रि० बहुलतरे ॥ अयमन
योरतिशयेनबहुलः । द्विवचनवि
भज्योपपदेतरबीयसुनाविति ईयसुनि
प्रियस्थिरेत्यादिनाबंह्यादेशः ॥

वकः । पुं० बकार्थेषु ॥ यन्त्रविशेषे ॥
यथा । जलकच्छपपातालदोलाभूध
रवालुकाः । बकाद्यायन्त्रभेदाश्चुर्व
ह्यास्याद्याश्चमूषिकाः ॥ दीर्घक-

शठश्चाचकुप्यागिलयेत्स्वल्पभाण्ड-
कम् । तिर्यक्कृत्वापचेस्तत्र्याव-
कयन्त्रमिदंस्मृतम् ॥ असुरवि-
शेषे ॥

वकवृत्तिः । पुं॰ वकवृत्तौ ॥ तल्लक्ष
णंयथा । अधोदृष्टिर्नैकृतिकः
स्वार्थसाधनतत्परः । शठोमिथ्या
विनीतश्चवकव्रतिकदाहृतः ॥

वकुलः । पुं॰ वकुले ॥ न॰ अस्यफ
ले ॥ अस्यगुणाः । वकुलंमधुरं
ग्राहिदन्तस्थैर्यकरंपरम् ॥ पुष्पगु
णास्तु । पक्वंकषायंमधुरंशीतं
पित्तकफास्रनुत् । तद्वद्वकुलपुन्ना
गकह्लारोत्पलपाटलम् ॥

वक्तव्यः । त्रि॰ कुत्सिते । विहितक
र्मत्यागाल्लोकविगर्हिते ॥ हीने
वचनार्हे । अधीने ॥ वचनार्हः ।
वचपरिभाषणे॰ ब्रूञ् आदेशोवा
तव्यः ॥ न॰ वचने ॥

वक्ता । त्रि॰ पण्डिते॰ वदे । वदावदे
। योहिवक्तुंजानातितस्मिन् औ
चित्याद्बहुविशिष्टंयोवदतितत्रैत्य
र्थः ॥ सुष्ठुवक्तरि ॥ बहुभाषिणि
। वाचोयुक्तिपटौ । वाग्मिनि ।
वावदूके ॥ वक्ति । वचपरिभाषणे
। तृन् ॥

वक्त्रम् । न॰ आस्ये । मुखे ॥ यथा ।
सौम्यस्वसंवृतंवक्त्रममलंयस्यदेहि
नः । महाराजाभवेन्नित्यंविपरीते
तुनिर्धनइति ॥ उच्यतेऽनेन । वच
॰ । ब्रूञोवचिर्वा । गुधृवीपचिव
चियमिसदिक्षदिभ्यस्त्रः ॥ वस्त्रभेदे
तगरमूले । विषमवृत्तान्तरे ॥ तस्य
लक्षणादियथा । भवत्यर्धसमंवक्त्रं
विषमञ्चकदाचन । तयोर्द्वयोःपा
न्तेचच्छन्दस्तदधुनोच्यते ॥ वक्त्रंयुग्भ्या
मगौस्यातामब्धेर्योऽनुष्टुभिख्यात
म् ॥ अवहिरादत्याश्लोकः पूरयि
तव्यः ॥ वक्त्राम्भोजंसदास्मेरंच
क्षुर्नीलोत्पलंफुल्लम् । अल्लवीनां
मुरारातेश्चेतोभृङ्गंजहारोच्चैः ॥

वक्त्रखुरः । पुं॰ दन्ते ॥

वक्त्रजः । पुं॰ ब्राह्मणे ॥ त्रि॰ मुख
जाते ॥

वक्त्रतालम् । न॰ मुखवाद्ये ॥

वक्त्रपट्टः । पुं॰ अश्वान्नभोजनपात्रे
। तोबड़ा॰ इ॰ भा॰ प्र॰ ॥

वक्त्रभेदी । पुं॰ तिक्तरसे ॥ त्रि॰ मु
खभेदके ॥

वक्त्रवासः । पुं॰ नागरङ्गे ॥ मुखग
न्धे ॥

वक्त्रशोधनम् । न॰ भव्ये ॥ मुखशु
द्धिकरणे ॥

वक्त्रशोधी । पुं॰ जम्बीरे । त्रि॰ आस्य
शोधके ॥

वक्त्रासवः । पुं॰ अधरमधुनि ॥

वक्रः । पुं॰ शनैश्चरे ॥ मङ्गलग्रहे ॥
रुद्रे ॥ त्रिपुरासुरे ॥ पर्पटे ॥ वक्र

गतिविशिष्टेग्रहे ॥ न० सरिद्वङ्के पुटभेदे ॥ त्रि० अनृजौ । अराले । कुटिले । क्रूरे ॥ वञ्चतिस्म । वञ्चु गतौ । स्फायितञ्चीतिरक् । न्यङ्क्वादित्वात्कुत्वम् ।

वक्रकण्टः । पुं० बदरवृक्षे ॥

वक्रकण्टकः । पुं० खदिरवृक्षे ॥

वक्रखड्गः । पुं० करवाले ॥

वक्रग्रीवः । पुं० उष्ट्रे ॥

वक्रचञ्चुः । पुं० शुके । कीरे ॥

वक्रतालम् । न०) मुखवाद्ये ॥
वक्रताली । स्त्री०)

वक्रतुण्डः । पुं० गणेशे ॥ शुकखगे ॥

वक्रदंष्ट्रः । पुं० शूकरे ॥

वक्रनक्रः । त्रि० खले । पिशुने ॥ पुं० शुकखगे ॥

वक्रनालम् । न० मुखवाद्ये ॥

वक्रनासिकः । पुं० पेचके ॥ त्रि० कुटिलनासायुक्ते ॥

वक्रपट्टः । पुं० तलसारके । तङ्ग० इ० भा० प्र० ॥

वक्रपुच्छः । पुं० कुक्कुरे ॥

वक्रपुष्पः । पुं० पलाशद्रुमे ॥ बकवृक्षे ॥

वक्रवालधिः । पुं० शुनि ॥

वक्रभणितम् । न० वक्रोक्तौ । कुटिलवाक्ये ॥

वक्रमः । पुं० पलायने

वक्रलाङ्गूलः । पुं० कुक्कुरे ॥

वक्रवक्त्रः । पुं० शूकरे ॥

वक्रशल्या । स्त्री० कुटुम्बिनीक्षुपे ।

वक्रशृङ्गी । स्त्री० गोविशेषे ॥

वक्रा । स्त्री० शृङ्ग्याम् । अजशृङ्ग्याम् ॥

वक्राग्रम् । न० कवाटवक्रवृक्षे ॥

वक्राङ्गः । पुं० हंसे । न० कुटिलावयवे ॥

वक्री । पुं० बुद्धे ॥ त्रि० वक्रगतिविशिष्टे ॥

वक्रोक्तिः । स्त्री० काकूक्तौ ॥ शब्दालङ्कारभेदे । यथा । यदुक्तमन्यथावाक्यमन्यथान्येन योज्यते । श्लेषेण काक्वा वा ज्ञेया सा वक्रोक्तिस्तथा द्विधा ॥ तत्र श्लेषवक्रोक्तिः काकुवक्रोक्तिश्च ॥ पदभङ्गश्लेषेण यथा । नारीणामनुकूलमाचरसि चेज्जानासि कश्चेतनो वामानां प्रियमादधासि हितकृन्नैवाऽबलानां भवान् । युक्तं किं हितकर्त्तनं ननु बलाभावप्रसिद्धात्मनः सामर्थ्यं भवतः पुरन्दरमतच्छेदं विधातुं कुतः ॥ अभङ्गश्लेषेण यथा । वह्नीके नेदृशी बुद्धिर्दारुणा त्वं निर्मिता । त्रिगुणा श्रूयते बुद्धिर्न तु दारुमयी क्वचित् ॥ काक्वा यथा । गुरुजनपरतन्त्रतया दूरतरं देशमुद्यतो गन्तुम् । अलिकुलकोकिलललिते नैष्यति सखि सुरभि

समयेसौ ॥ कुटिलोक्तौ ॥ यथा ।
वादीव्याकरणं विनैवविदुषांधृष्टः
प्रविष्टः सभांजल्पन्नल्पमतिः स्म
यात्पटुवटुभ्रूभङ्गवक्रोक्तिभिः ।
ह्रीतः सन्नुपहासमेतिगणकोगोला
नभिज्ञस्तथाज्योतिर्वित्सदसिप्रग
ल्भगणकप्रश्नप्रपञ्चोक्तिभिः ॥
वक्रोष्ठिका । स्त्री॰ स्मिते । अदृष्टिर
दहासे । ईषद्धास्ये ॥
वक्षणम् । पुं॰ वक्षसि ॥
वक्षाः । पुं॰ अनडुहि ॥ वहति ।
वह॰ । वहिहाधाञ्भ्यश्छन्दसीत्य
सुन्॰प्रत्ययस्यचसुट्इतिवृत्तिकृ
त् ॥
वक्षः । न॰ अवयवविशेषे । हृदयादु
परिकंठादधोभागे । क्रोडे । भु
जान्तरे । उरसि । वत्से ॥ अस्यशु
भाशुभलक्षणं यथा । अन्नवान्सम
वक्षाः स्यात्पीनैर्वक्षोभिरूर्जितः
। वक्षोभिर्विषमैर्निस्वः शस्त्रेण
निधनस्तथेतिगारुडे ६६ ॥ अर्थ
वान्समवक्षाः स्यात्पीनैः शूरा
धनान्विताः । अल्पैश्चविकलादी
नाविषमैः शस्त्रमृत्यवइतिसमुद्रः
॥ वक्षति । वक्षसङ्घाते । असुन् ॥
उच्यतेऽनेनवा । वच॰ । पचिवचि
भ्यांसुड्वेत्यसुन् ॥
वक्षोजः । पुं॰) कुचे । स्तने ॥
वक्षोरुहम् । न॰)

बगला । स्त्री॰ देवीविशेषे ॥ यथा ।
वैद्यनाथेतुबगलास्थानंसर्वोत्तमंम
तमिति ॥
बगलामुखी । स्त्री॰ महाविद्याविशे
षे । पीतांबरायाम् । बगलायाम् ॥
बगाहः । पुं॰ अवगाहे ॥ भागुरीमत
याल्लोपः ॥
वग्नुः । पुं॰ वक्तरि ॥ वक्ति । वच॰
। वचेर्गश्चेतिनुः ॥
वङ्कः । पुं॰ पर्याणभागे । पर्याणको
टौ ॥ नदीपार्श्वे ॥ भङ्गुरे । व
क्रे । इतिमेदिनिकरः ॥
वङ्कसेनः । पुं॰ अगस्तिद्रुमे ॥
वङ्का । स्त्री॰ वल्गाग्रभागे ॥
वङ्किलः । पुं॰ कण्टके । द्रुमनखे॰
इ॰ त्रि॰ शेषः ॥
वङ्क्यः । त्रि॰ वक्रे ॥
वङ्क्रिः । पुं॰ न॰ वाद्यप्रभेदे ॥
वङ्कते । वकिकौटिल्ये । वङ्क्याद
यश्चेतिक्रिन्नन्तः साधुः ॥ गृहदा
रुणि ॥ पार्श्वास्थनि । पर्शुके ॥
वङ्क्रिमः । त्रि॰ कुटिले ॥
वङ्क्षणः । पुं॰ वस्त्यधऊरुमेढ्रयो
रन्तरालसन्धौ ॥ वाङ्क्षति॰ वाङ्
क्ष्यतेवा । वाक्षिकाङ्क्षायाम् ।
ल्युट् बाहुलकान्नातोह्रस्वः ॥
वङ्क्षतेवङ्क्षणइतिस्वामी ॥ यद्वा
। वक्षति । वक्षरोषसंहत्योः ।
ल्युट् । आक्षीनद्यानुमित्यत्र॰

नुमितियोगविभागान्नुम् ॥

वङ्क्षुः । स्त्री॰ गङ्गास्रोतोविशेषे ॥ यथा । तस्याः स्रोतसि सीता चवङ्क्षुर्भद्रा च कीर्तितेति शब्दमाला ॥ सा तत्र पर्वतताद्विश्च तुर्धा प्रतिपद्यते । सीता चालकनन्दा च वङ्क्षुर्भद्रा च वै क्रमात् ॥ सा गङ्गा ॥ वंक्षुश्च पश्चिमगिरीनतीत्य सकलं ततः । पश्चिमं केतुमालाख्यं वर्षमन्वेति सार्णवम् ॥

वङ्गः । पुं॰ कार्पासे । वृन्ताके । चन्द्रवंशीयबलिराजपुत्रे ॥ वङ्गाः पुं॰ भूम्नि॰ जनपदविशेषे ॥ रत्नाकरं समारभ्य ब्रह्मपुत्रान्तगं शिवे । वङ्गदेशो मया प्रोक्तः सर्वसिद्धिप्रदर्शकः ॥ वङ्गानां निवासो जनपदः वङ्गाः । निवासिनो जनपदे लुप् । लुपि युक्तवद्भावः ॥ न॰ रङ्गे । त्रपुणि । स्वर्णजे । नागजीवने । मृदङ्गे । रङ्गे । सिंहजे । रांगइ॰ भा॰ प्र॰ धातुविशेषे ॥ खुरकं मिश्रकं चापि द्विविधं वङ्गमुच्यते । उत्तमं खुरकं तत्र मिश्रकन्त्वहितं मतम् ॥ पथ्या चरङ्गम् ॥ सीसके ॥ वङ्गति । वगिगतौ । पचाद्यच् ॥

वङ्गजम् । न॰ सिन्दूरे ॥ त्रि॰ वङ्गदेशजाते ॥

वङ्गनः । पुं॰ वार्त्ताकौ ॥

वङ्गशुल्वजम् । न॰ कांस्ये ॥

वङ्गसेनः) पुं॰ वकद्रुमे । अगवङ्गसेनकः ।) स्तिवृक्षे । मुनिद्रुमे ॥ अस्य पुष्पगुणाः । वासकस्य च पुष्पाणि वङ्गसेनस्य चैव हि । कटुपाकानि तिक्तानि कासक्षयकराणि च ॥

वङ्गला । स्त्री॰ रागिणीविशेषे ॥

वङ्गारिः । पुं॰ हरिताले ॥

वङ्गालः । पुं॰ भैरवरागपुत्रे ॥

वङ्गाली । स्त्री॰ भैरवरागस्य रागिण्याम् ॥

वचः । पुं॰ कीरे । शुकपक्षिणि ॥ वक्ति । वच परिभाषणे । पचाद्यच् ॥

वचक्नुः । पुं॰ विप्रे । ब्राह्मणे ॥ ऋषिविशेषे ॥ त्रि॰ वावदूके ॥ वक्ति । वच॰ । सृयुवचिभ्योन्युजागूजक्नुचवइत्यक्नुच् ॥

वचण्डा । स्त्री॰ वरिण्डार्थे ॥

वचण्डी । स्त्री॰ शारिकायाम् ॥ वर्त्तौ ॥ शस्त्रप्रभेदे । छुरिकायाम् ॥

वचनम् । न॰ दूरायाम् । उक्तौ । वाचि । भाषणे ॥ श्रुतिमात्रात्सुधातुल्यं सर्वकालसुखावहम् । सत्यं सारं हितकरं वचनं श्रेष्ठमीप्सितम् ॥ वचेर्भावे ल्युट् उच्यतेऽनेन वा ॥ शुण्ठ्याम् ॥ वाचोयुक्तौ ॥

वचनग्राही । त्रि॰ वचने स्थिते ॥

वचनीयः । त्रि॰ वक्तव्ये ॥ वचेरनीयर् ॥

वचनीयता । स्त्री० निंदायाम् । लोकापवादे ॥ भावेतल् ॥

वचनेस्थितः । त्रि० विधेये । विनयग्राहिणि । आश्रवे । प्रवृत्तिनिवृत्त्योर्विधातुंशक्ये ॥ वचनेतिष्ठतिस्म । ष्ठा० । गत्यर्थेतिक्तः । तत्पुरुषेकृतीत्यलुक् ॥

वचनोपक्रमः । पुं० वाक्यारम्भे । उपन्यासे ॥

वचरः । पुं० कुक्कुटे ॥ शठे ॥

वचलुः । पुं० वैरिणि ॥ शत्रौ ॥

वचः । न० वाक्ये । वाचि । वचने ॥ वच० । सर्वधातुभ्योऽसुन्नित्यसुन् ॥

वचसाम्पतिः । पुं० सुरगुरौ । बृहस्पतौ ॥

वचा । स्त्री० शारिकायाम् ॥ उग्रगन्धौषधौ । षड्ग्रन्थायाम् । गोलोम्याम् । शतपर्विकायाम् । अस्या गुणायथा । वचोग्रगन्धाकटुकातिक्तोष्णावान्तिवह्निकृत् । विबन्धाध्मानशूलघ्नीशकृन्मूत्रविशोधनी ॥ अपस्मारकफोन्मादभूतजन्त्वनिलान्हरेत् ॥ अपिच । अग्निर्वापयसाज्येनमासमेकंतुसेविता । वचाकुर्यान्नरंप्राज्ञंश्रुतिधारणसंयुतम् ॥ चन्द्रसूर्यग्रहेपीतंपलमेकंपयोन्वितम् । वचायास्तत्क्षणंकुर्यान्महाप्रज्ञान्वितंनरम् ॥ अथवचाभेदाः । पारसीकवचाशुक्लाप्रोक्ताहैमवतीतिसाहैमवत्युदितातद्वच्छ्संहन्तिविशेषतः ॥ अथमहाभरीवचा० यस्याः कुलञ्जन० इतिभाषायांनामान्तरम् । सुगन्धाप्युग्रगन्धाचविशेषात्कफकासनुत् । सुस्वरत्वकरीरुच्याहृत्कण्ठमुखशोधनी ॥ अपरासुगन्धास्थूलग्रन्थिर्यंस्यालोकेमहाभरीइतिनाम । स्थूलग्रन्थिः सुगन्धान्यातत्तोहीनगुणास्मृता ॥ द्वीपांतरवचा ० याचोपचीनीतिनाम्नालोकेविख्याता । द्वीपान्तरवचाकट्वीतिक्तोष्णावह्निदीप्तिकृत् । विबन्धाध्मानशूलघ्नीशकृन्मूत्रविशोधनी ॥ वातव्याधिमपस्मारमुन्मादंतनुवेदनाम्व्यपोहतिविशेषणफिरङ्गामयमुद्धतम् ॥ वक्ति । वचेरन्तर्भावितण्यर्थात्पचाद्यच् । टाप् ।

वचोग्रहः । पुं० कर्णे ॥

वचोहरः । त्रि० दूते ॥ वचोहरति । हरतेरनुद्यमनेऽच् ॥

वज्रः । पुं० श्रीकृष्णस्यप्रपौत्रे ॥ अनिरुद्धात्सुभद्रायांवज्रोनामनृपोऽभवत् इतिगारुडे १४४ ऽध्यायः ॥ विष्कम्भादिषुपञ्चदशेयोगे ॥ अत्रजातस्यफलंयथा । गुणीगुणज्ञोबलवान्महौजाः सद्रत्नवस्त्रादिपरीक्षकः स्यात् । वज्राभिधानेयदि

चेत्प्रसूतो वज्रोपमः स्याद्रिपुकामिनीनाम् ॥ कोकिलाक्षवृक्षे ॥ श्वेतकुशे ॥ सेहुण्डवृक्षे ॥ न० बालके ॥ धान्याम्ले ॥ काञ्जिके ॥ वज्रपुष्पे ॥ लोहविशेषे ॥ स च बहुविधो यथा । नीलपिण्डम्० अरुणाभम्० सीरकम्० नागकेशरम्० तित्तिराङ्गम्० स्वर्णवज्रम्० शैवालवज्रम्० लोणवज्रम्० रोहिणीकाङ्कालम्० ग्रन्थिवज्रकम्० मदनाख्यमित्यादि एतेषां नामानुरूपं चिह्नमिति पुराणम् ॥ अभ्रविशेषे ॥ अस्योत्पत्त्यादिर्यथा । पुरा वधाय वृत्रस्य वज्रिणा वज्रमुद्धृतम् । विस्फुलिङ्गास्ततस्तस्य गगने परिसर्पिताः ॥ ते निपेतुर्घनध्वाना शिखरेषु महीभृताम् । तेभ्य एव समुत्पन्नं तत्तद्गिरिषु चाभ्रकम् । तच्च वज्रं वज्रजातत्वादभ्रमभ्ररवोद्भवात् । गगनात्स्खलितं यस्माद्गगनञ्च ततो मतम् ॥ पिनाकं दर्दुरं नागं वज्रं चेति चतुर्विधम् । वज्रन्तु वज्रवत्तिष्ठेत् तन्नाग्नौ विकृतिं व्रजेत् ॥ सर्वाभ्रेषु वरं वज्रं व्याधिवार्द्धक्यमृत्युहृत् ॥ पुं० न० इन्द्रास्त्रविशेषे । ह्रादिन्याम् । कुलिशे । भिदुरे । पवौ । शतकोटौ । स्वरौ । शम्बे । दम्भोलौ । अशनौ । दधीचेरस्थिसम्भवेऽस्त्रे । आयुधानां मध्ये भगवतो विभूतौ ॥ वज्रधारकविधिर्यथा मुनेः कल्याणमित्रस्य जैमिनेश्चापि कीर्त्तनात् ॥ विद्युदग्निभयं नास्ति पठिते च गृहोदरे । लिखिते च गृहद्वारे० इति पाठः ॥ जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च । पुलस्त्यः पुलहश्चैव पञ्चैते वज्रवारकाः ॥ रत्नविशेषे । अभेद्ये । हीरके । हीरा० इ० भा० प्र० अस्य विशेषो यथा । स्वच्छं विद्युत्प्रभं स्निग्धं सौन्दर्यं लघु लेखनम् । षडारं तीक्ष्णधारञ्च सुशाम्यारं श्रियं दिशेत् ॥ भस्माभं काकपादञ्च रेखाक्रान्तञ्च वर्त्तुलम् । आधारमलिनं बिन्दुसन्त्रासे स्फुटितं तथा ॥ नीलाभं चिपिटं रूक्षं तद्वज्रं दोषलं त्यजेत् ॥ वज्रस्य चतुर्वर्णलक्षणं यथा । श्वेतरक्तासितपीतमेचकनयाच्छायास्ततः क्रमाद्विप्रादित्वमिहास्य यत्सुमनसः शंसन्ति सत्यं ततः । स्फीतां कीर्त्तिमनुत्तमां श्रियमिदं दत्ते यथासन्धृतं मर्त्यानामयथायथन्तु कुलिशं पथ्यं हितं जायते ॥ तस्य परीक्षा यथा । यत्पाषाणतले निकाषनिकरैर्नोद्घृष्यते निष्ठुरैर्यच्चान्योपलतो हसुद्गरमुखैर्लेखान्न यात्याहनम् । यच्चान्यं निजलीलयैव दलयेद्वज्रं न वा भिद्यते तज्जात्यं कुलिशं वदन्ति कुशलाः श्लाघ्यं महार्घ्यं स्मृतम् ॥ तस्य

वर्णगुणो यथा । विप्र : सोऽपि रसाय
नेषु बलवानष्टाङ्गसिद्धिप्रदो राजन्य
स्तु नृणां वलीपलितजिन्मृत्युं जयेद
ञ्जसा । द्रव्याकर्षणसिद्धिदस्तु सुत
रां वैश्योऽथ शूद्रो भवेत्सर्वव्याधिहर
स्तदेष कथितो वज्रस्य वर्णो गुण: ॥ अ
पि च । वज्रस्य नामलक्षणगुणा यथा
। हीरक : पुंसि वज्रोऽस्त्री चन्द्रोम
णिवरश्च स : । स तु श्वेत : स्मृतो
विप्रो लोहित : क्षत्रियो मत : ॥
पीतो वैश्योऽसित : शूद्रश्चतुर्वर्णा
त्मकश्च स : । रसायने मतो विप्र :
सर्वसिद्धिप्रदायक : ॥ क्षत्रियो व्या
धिविध्वंसी जरामृत्युहर: पर : ।
वैश्यो धनप्रद : प्रोक्तस्तथा देहस्य दा
र्ढ्यकृत् ॥ शूद्रो नाशयति व्याधीन्
वयस्तम्भं करोति च । पुंस्त्रीनपुंस
काश्चैते लक्षणीया: स्वलक्षणै : ॥ सु
वृत्ता : फलसम्पूर्णास्तेजोयुक्ता बृह
त्तरा: । पुरुषास्ते समाख्याता रेखा
बिन्दुविवर्जिता : ॥ रेखाबिन्दु
समायुक्ता : षडस्रास्ते स्त्रिय : स्मृ
ता : । षडस्रा : षट्कोणा : ॥
त्रिकोणाश्च सुदीर्घाश्च ते विज्ञेया न
पुंसका : ॥ तेषु स्यु : पुरुषा :
श्रेष्ठा रसबन्धनकारिण : । स्त्रिय :
कुर्वन्ति कायस्य कान्तिं स्त्रीणां सुख
प्रदा : ॥ नपुंसकास्त्ववीर्या : स्यु
रकामा : सत्त्ववर्जिता: । स्त्रिय:

स्त्रीभ्य : प्रदातव्या : क्लीबा : क्लीवे
ष्वयोजयेत् । सर्वेभ्य: सर्वदा देया:
पुरुषा वीर्यवर्द्धना : ॥ अशुद्धं कुरु-
ते वज्रं कुष्ठं पार्श्वव्यथां तथा । पा
ण्डुतापं गुरुत्वञ्च तस्मात्संशोध्य
मारयेत् ॥ शोधनविधिस्तु । कुलत्थ
कोद्रवक्वाथे दोलायन्त्रे विपाचयेत्
। व्याघ्रीकन्दगतं वज्रं त्रिदिनं तद्वि
शुध्यति ॥ व्याघ्रीकण्टकारिका ।
अन्य : शोधनविधिर्यथा । गृहीत्वा
क्षिशुभं वज्रं व्याघ्रीकन्दोदरे क्षिपे
त् । महिषीविष्ठयालिप्त्वा करी
षाग्नौ विपाचयेत् ॥ त्रियामायां चतु
र्यामं यामिन्यन्ते श्वमूत्रके । सेचये
त्पाचयेदेवं सप्तरात्रे णशुद्ध्यति ॥
अथास्य मारणविधि: ॥ हिङ्गुसैन्ध
वसंयुक्ते क्षिपेत् क्वाथे कुलत्थजे ।
तप्तं तप्तं पुनर्वज्रं भवेत्भस्म त्रिसप्त
धा ॥ अन्यो मारणप्रकारो यथा ।
मेषशृङ्गं भुजङ्गास्थि कूर्मपृष्ठाम्लवेत
सम् । शशदन्तं समं पिष्ट्वा वज्रीक्षीरे
ण गोलकम् ॥ कृत्वा तन्मध्यगं वज्रं
म्रियते ध्मातमेव हि ॥ मारितस्य
वज्रस्य गुणा यथा । आयु : पुष्टिं ब
लं वीर्यं वर्णं सौख्यं करोति च । से
वितं सर्वरोगघ्नं मृतं वज्रं न संशय :
॥ शेषरत्नानां शोधनमारणविधि :
॥ वज्रवत्सर्वरत्नानि शोधयेन्मारये
त्तथा । शुद्धानां मारितानाञ्च

तेषांशृणु गुणानपि ॥ मणयोवीर्य्यतः शीतामधुरास्तुवरारसाम् । चत्तुष्याःलेखनाश्चापि सारकाविषहारकाः ॥ धारणात्तेतुमङ्गल्याग्रहदृष्टिहराअपि ॥ वज्रगणनांलक्ष्मोत्पत्तिपरीक्षामूल्यानिचपद्मान्यत्र युक्तिकल्पतरुप्रभृतिषु ॥ मणिवेधकेरत्नविशेषे । मणिवेधकसूच्याम् ॥ वजतिगच्छतिपर्व्वतादौ । वजगतौ । ऋजेन्द्रेतिरन् ॥ सगणे ०॥८०॥

वज्रकम् । न० वज्रक्षारे ॥ दुग्धपाचणे ॥ वज्रकंदुग्धपाचनमिति हारावली ॥

वज्रकङ्कट : । पुं० हनुमति ॥

वज्रकण्टक : । पुं० कोकिलाक्षवृक्षे ॥ स्नुहीवृक्षे ॥

वज्रकण्टकशाल्मली । स्त्री० नरकविशेषे ॥

वज्रकन्द : । पुं० वज्रकर्णे । सकरकन्द इ० भा० प्र० ॥

वज्रकन्दा । स्त्री० स्नुह्यां ॥

वज्रकपाली । पुं० बुद्धविशेषे । हेरुके ॥

वज्रकालिका । स्त्री० मायादेव्याम् ॥

वज्रकूट: । पुं० शकद्वीपस्थाद्रिप्रभेदे ॥

वज्रकेतु : । पुं० नरकराजे ॥

वज्रक्षारम् । न० क्षारभेदे । वज्रकेधूमोत्थे । क्षारश्रेष्ठे ॥

वज्रचर्म्मा । पुं० खड्गिनि । गण्डके

वज्रजित् । पुं० गरुडे ॥

वज्रज्वाला । स्त्री० वज्राग्नौ ॥

वज्रटीक : । पुं० बुद्धविशेषे । चक्रसंवरे । वज्रकपालिनि ।

वज्रतुण्ड : पुं० गणेशे ॥ गरुडे गृध्रे । मशके ॥

वज्रदन्त : । पुं० शूकरे ॥ मूषिके ॥

वज्रदशन : । पुं० मूषिके ॥

वज्रद्रु : । पुं० स्नुहीवृक्षे ॥ वज्रनामाद्रु : ॥

वज्रद्रुम : । पुं० स्नुहीवृक्षे ॥

वज्रधर : । पुं० इन्द्रे ॥ जिनविशेषे ॥

वज्रध्वनि : । पुं० वज्रनिष्पेषे ॥

वज्रनिर्घोष : । पुं० अशनिशब्दे ॥ वज्रस्यनिर्घोष : ॥

वज्रनिष्पेष : । पुं० स्फूर्जथौ । वज्रनिर्घोषे ॥ निष्पेषणम् । पिष्लृसञ्चूर्णने । घञ् । इदुदुपधस्येति ष : ॥ निष्पेषशब्दस्तदुत्थशब्दपर: । सङ्घट्टमात्रपरइत्यन्ये । वज्रस्यनिष्पेष : ॥

वज्रपञ्जर : । पुं० याचायोगान्तरे ॥ यथा । उत्तमूलचिकोणषुभवनेषुशनैश्चर: । वज्रपञ्जरयोगोयं हन्तिक्रूरानरीन्प्रति ॥

वज्रपाणि : । पुं० पुरन्दरे । इन्द्रे ॥ वज्रंपाणौयस्यस : ॥

वज्रपुष्पम् । न० तिलपुष्पे ॥ वज्र

मिषपुष्पं ॥

वज्रपुष्पा । स्त्री॰ शतपुष्पायाम् ॥

वज्रबाहु: । पुं॰ इन्द्रे ॥

वज्रमूली । स्त्री॰ माषपर्ण्याम् ॥

वज्ररथ: । पुं॰ क्षत्रिये ॥

वज्ररद: । पुं॰ शूकरे ॥

वज्रलेप: । पुं॰ कल्कविशेषे ॥ स चोक्तो वाराहीयथा । आमं तिन्दुकमामं कपित्थकं पुष्पमपि च शाल्मल्या: । बीजानि सल्लकीनां धन्वनकल्कस्त्वचा चेति ॥ एतै: सलिलद्रोण: क्वाथयितव्योऽष्टभागशेषश्च । अवतार्योऽस्य च कल्को द्रव्यैरेतै: समनुयोज्य: ॥ श्रीवासकरसगुग्गुलुभल्लातककुन्दुरूकसर्जरसै: । अतसीबिल्वैश्च युत: कल्कोऽयं वज्रलेपाख्य: ॥ ३ ॥ अस्य गुणानाह । प्रासादहर्म्यवलभीलिङ्गप्रतिमासु कुड्यकूपेषु । सन्तप्तो दातव्यो वर्षसहस्रायुतस्थायी ॥ ४ ॥ अन्यमप्याह । लाक्षाकुन्दुरुगुग्गुलुगृहधूमकपित्थबिल्वमध्यानि । नागफलनिम्बतिन्दुकमदनफलमधूकमञ्जिष्ठा: ॥ सर्जरससालकानि चेति कल्क: कृतो द्वितीयोऽयम् । वज्राख्य: प्रथमगुणैरयमपि तेष्वेव कार्येषु ॥ ६ अपि च । गोमहिषाजविषाणै: खररोम्णा महिषचर्मगव्यैश्च । निम्बकपित्थरसै: सह वज्रतलो नाम कल्को-न्य: ॥ ७ ॥ अपि च । अष्टौ सीसकभागा: कांस्यस्य द्वौ तु रीतिकाभाग: । मयकथितो योगोऽयं विज्ञेयो वज्रसङ्घात: ॥ ८ ॥ इति ॥

वज्रवल्ली । स्त्री॰ अस्थिसंहारलतायाम् ॥

वज्रवारक: । पुं॰ जैमिन्यादौ ॥ यथा । जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च । पुलस्त्य: पुलहश्चैव पञ्चैते वज्रवारका: ॥

वज्रवाराही । स्त्री॰ मायादेव्याम् । मारीच्याम् । त्रिमुखायाम् ॥

वज्रबीजक: । पुं॰ लताकरञ्जे ॥

वज्रवृक्ष: । पुं॰ सेहुण्डवृक्षे ॥

वज्रव्यूह: । पुं॰ वज्राकाररचनया त्रिधाव्यवस्थितबले ॥

वज्रशल्य: । पुं॰ शल्यकनामजन्तौ ॥

वज्रशृङ्खला । स्त्री॰ विद्यादेव्याम् ॥

वज्रसार: । त्रि॰ वज्रवत्कठिने ॥

वज्रसूर्य: । पुं॰ बुद्धविशेषे ॥

वज्रा । स्त्री॰ स्नुह्याम् । गुडूच्याम् ॥ दुर्गायाम् ॥ वज्राङ्कुशकरी देवी वज्राते नोपगीयते इति देवीपुराणम् ॥

वज्राङ्ग: । पुं॰ भुजङ्गमे ॥ त्रि॰ वज्रतुल्याङ्गयुक्ते ॥

वज्राङ्गी । स्त्री॰ अस्थिसंहारिणि । हाडजोडा इ॰ भा॰ प्र॰ ॥ गवेधुकायाम् ॥

वज्राभ: । पुं॰ दुग्धपाषाणे ॥ त्रि॰

वज्रसमानदीप्तिमति ॥

वज्रायुधः । पुं० इन्द्रे ॥

वज्राशनिः । पुं० स्त्री० वज्रे ॥

वज्रासनम् । न० अष्टाङ्गयोगस्यतृतीयाङ्गविशेषे ॥ यथा । ऊर्वोः पादौक्रमान्न्यस्यकृत्वाप्रत्यङ्मुखाङ्गुली । करौनिदध्यादाख्यातंवज्रासनमनुत्तममिति ॥

वज्रास्थिशृङ्खला । स्त्री० कोकिलावृक्षे ॥

वज्री । पुं० देवाधिपे । शक्रे ॥ वज्रोऽस्यास्ति अतइनिठनाविति इनिः । बुद्धे ॥

वज्री । स्त्री० स्नुहीप्रभेदे ॥

वञ्चकः । पुं० जम्बुके । शृगाले । गृहबभ्रौ ॥ त्रि० खले । धूर्ते । परप्रतारणस्वभावे । सुवर्णादिद्रव्यंगृहीत्वाऽपद्रव्यप्रदर्शनेनवञ्चनशीले ॥ वञ्चयति । वञ्चुगतौ । ण्यन्तः । ण्वुल् । वञ्चयतेर्वा । वञ्चुप्रलम्भने । आकुस्मीयः । ण्वुल् ॥

वञ्चथः । पुं० धूर्ते ॥ वञ्चति । वञ्चु० । शीङ्शपीत्यादिनाऽथप्रत्ययः ॥ कोकिले । वञ्चनायाम् ॥

वञ्चनम् । न० प्रतारणे ॥ शाठ्ये ॥ वञ्चुप्रलम्भने । ल्युट् ॥

वञ्चना । स्त्री० प्रतारणायाम् । प्रमादे । यथा । मन्यतेस्मपिबतांविशिखनैः पक्षपातमपिवञ्चनांमनइ० ११ सर्गेरघुः ॥ ३६ ॥

वञ्चनीयः । त्रि० प्रतारणीये ॥ वञ्चितुमर्हः । अर्हेकृत्यतृचश्चेतिवञ्चेरनीयर् ।

वञ्चितः । त्रि० प्रतारिते । विप्रलब्धे । वञ्चनाविशिष्टे ॥ वञ्च्यतेस्म । वञ्चु० । ण्यन्तः । क्तः ॥

वञ्जुलः । पुं० तिनिशे ॥ अशोकवृक्षे । वानीरे । वेतसे ॥ वञ्च्यते । बाहुलकादुलोजत्वञ्च ॥ वञ्चतिवा । वञ्चगतौ । बाहुलकादुलच् नुम्च ॥ दीर्घपत्रेवेतसे ॥ स्थलपद्मे ॥ पक्षिविशेषे ॥

वञ्जुलकः । पुं० कर्णशालखगे ॥

वञ्जुलद्रुमः । पुं० अशोकवृक्षे ॥

वञ्जुलप्रियः । पुं० वानीरे । वेतसे ॥

वञ्जुला । स्त्री० बहुक्षीरायांगवि ॥

वटः । पुं० वृक्षविशेषे । न्यग्रोधे । बहुपादि । पादरोहणे । यक्षावासे । अस्यगुणाः । वटः शीतोगुरुर्ग्राहीकफपित्तव्रणापहः । वर्ण्योविसर्पदाहघ्नः कषायोयोनिदोषहृदिति ॥ कपर्दे । वराटके ॥ मौले । गुणे । रज्जौ ॥ भक्ष्ये । वडा० इ० भा० प्र० ॥ साम्ये ॥ पिशाचविशेषे ॥ पश्यवरफम् ॥ वटति । वटवेष्टने । अच् ॥

बटकः । पुं॰ तोलके ॥ पिष्टकप्रभेदे । बडा॰ भल्ला॰ इ॰भा॰ प्र॰भक्ष्ये ॥ तस्यनिर्माणादिर्यथा । माषाणां पिष्टिकांयुक्तांलवणार्द्रकहिङ्गुभिः । कृत्वाविदध्याद्वटकांस्तांस्तैलेषुपचेच्छनैः ॥ विशुष्कावटकाबल्याबृंहणावीर्यवर्द्धनाः । वातामयहराकच्याविशेषाद्र्दितापहाः ॥ विबन्धभेदिनः श्लेष्मकारिणोत्यग्निपूजिता । सम्पूर्णंनिषिञ्चेत्तक्रे भृष्टंजीरकहिङ्गु च ॥ लवणंतत्रवटकान्सकलानपिमज्जयेत् । शुक्रलस्त्वबटकोबलकृद्रोचनोगुरुः ॥ विबन्धहृद्दाहीचश्लेष्मलः पवनापहः । राज्यक्तयातिरोचन्यापाचन्यातांस्तुभक्षयेत् ॥ बटति । बट॰ । क्वुन् ॥

बटपत्रः । पुं॰ बर्बराप्रभेदे । सितार्जके । न॰ न्यग्रोधपर्णे ॥

बटपत्रा । स्त्री॰ त्रिपुरमालीपुष्पवृक्षे ।

बटपत्री । स्त्री॰ मोहिन्याख्यलतायाम् । ऐरावत्याम् ॥ बटपत्रीकषायोष्णायोनिमूत्रगदापहा ॥

बटवासी । पुं॰ यक्षे ॥ त्रि॰ बटवृक्षवासकर्त्तरि ॥

बटाकरः । पुं॰ शुल्वे । रज्जौ ॥ बाकरोति । पचाद्यच् ॥ बटस्याकरः ॥

बटारका । स्त्री॰ रज्जौ ।

बटाबीकः । पुं॰ नामचौरे ॥

बटिः । स्त्री॰ उपजिह्विकायाम् ॥ बटिकायाम् ॥ बटति । बट॰ । सर्वधातुभ्यइन् ॥

बटिका । स्त्री॰ बट्याम् । मोदके गुटिकायाम् । पिण्डायाम् ॥ व्यञ्जनोपयोगिमाषादिद्रव्ये । बडी॰ इत्युभयोर्भाषायांप्रसिद्धिः अस्यानिर्माणविधिर्यथा । माषाणांपिष्टिकाहिङ्गुलवणार्द्रकसंयुता । तयाविरचितावस्त्रे बटिकाः साधुशोषिताः ॥ तलितास्तप्ततैलाऽथवासुप्रलेहिताः । बटकस्यगुणैर्युक्तास्तास्तव्यारुचिदाभृशम् ॥ कुष्माण्डकबटीज्ञेया पूर्वोक्तबटिकागुणा । विशेषात्पित्तरक्तघ्नीलघ्वीचकथिताबुधैः ॥ मुद्गानांबटिकातद्वद्रचितासाधितातथा । पथ्यारुच्यातथोलघ्वीमुद्गसूपगुणास्मृतेति ॥

बटितम् । न॰ शिलापिष्टमांसे ॥ त्रि॰ शिलापिष्टद्रव्ये ॥

बटी । स्त्री॰ बटिकायाम् ॥ वृक्षविशेषे । नदीबटे । यक्षवृक्षे ॥ त्रि॰ रज्जौ । गुणे ॥ बटति । बट॰ । अच् ॥ बट्यतेवा ॥ खनोघचेतिघः । गौरादिः । यथा । सिताचतुर्गुणादेयाबटीषुद्विगुणोगुडइति ॥

बटुः । पुं॰ ब्रह्मचारिणि ॥ ब्राह्मणमाणवके ॥ बालके ॥ कुटन्नटवृक्षे ।

श्येनाख्ये । वटति । वट० । अण
स्येतिसूत्रेणादुः ॥

वटुकः । पुं० बालके । माणवके ।
भैरवविशेषे ॥

वटुकरणम् । न० उपनयने ॥

वटेश्वरपुरम् । न० तीर्थविशेषे ॥

वठरः । पुं० मूर्खे । अम्बष्ठे । शब्द
कारे । वक्रे ॥ त्रि० शठे । मन्दे
वक्ति । वच० । वचिमर्चिभ्यां किच्चे
त्यरष्टोन्तादेशश्च ॥

वडभी । स्त्री० सुदनी० गृहचूडा०
इ० गौ० दे० भा० प्र० । कुड्य
पुच्छादनार्थं दत्ते वक्रकाष्ठे । गोपा
नस्याम् ॥ बलते । बलसंवरणे ।
बाहुलकादभच् । गौरादित्वान्
ङीष् । चन्द्रशालायाम् ॥ चन्द्र
शालाच्च वडभीस्यातां प्रासादमूर्द्धनी
ति श्रीधरः ॥

वडवा । स्त्री० द्विजयोषिति । ब्राह्म
ण्याम् । अश्वायाम् । घोटक्याम् ।
कुम्भदास्याम् ॥ नारीजात्यन्तरे ॥
बलं सामर्थ्यमतिशयितमस्याः । अ
न्येभ्योपीति वः । डलयोरैकता ।
बलं वातीति वा । आतोनुपेति कः ॥ ब
लेन वजतीति वा । अन्येभ्योपीति डः ॥

वडवाकृतः । पुं० पञ्चदशदासान्तर्ग-
तदासविशेषे ॥ यथा । भक्तदासश्च
विज्ञेयस्तथैव वडवाकृतः ॥ वडवा
दासीतल्लोभादङ्गीकृतदास इत्य
र्थः ॥

वाडवाग्निः । पुं० समुद्राग्नौ सलि
लेन्धने । वडवाग्नौ ॥

वडवादुग्धम् । न० अश्वाक्षीरे । अस्य
गुणाः ॥ रूक्षोष्णं वडवाक्षीरं बल्यं
शोषानिलापहम् । अम्लं पटु लघु
स्वादु सर्वमैकशफं तथा ॥

वडवानलः । पुं० और्वे । वाडवे ।
वडवाग्नौ ॥ वडवाया अनलः ।
आधाराधेयभावएवसम्बन्धस्त्वेनष-
ष्ठ्यर्थः । पुराकिल और्वेण मुनिना०
अयोनिजं पुत्रमिच्छता ऊरोर्मथितं
तत्र ज्वालामयः पुरुषो जातः० सच स
मुद्रे वडवामुखेऽवस्थापित इति पौरा
णिकाः ॥

वडवामुखः । पुं० और्वे । अब्ध्यग्नौ
वडवानले ॥ न० पाताले ॥

वडवासुतौ । पुं० २ अश्विनीकुमार
योः स्वर्वैद्ययोः ।

वडवाहृतः । पुं० वडवाकृते । दा
सविशेषे ॥ वडवागृहदासीतयाहृ
तस्तल्लोभेन तामुद्वाह्य दासत्वं नप्र-
विष्टः ॥

वडा । स्त्री० वटके ॥

वडिशम् । न० मत्स्यधरणार्थं वक्रलौ
हकण्टकविशेषे । मत्स्यवेधने ॥
वडिनो मत्स्यान् श्यति । शोतनू
करणे । आतोनुपेति कः । डल
योरैकता ॥

वडिशी । स्त्री० वडिशि ॥
वड्ड: । त्रि० वृहति । वडा० वडी० इ० भा० ॥ वलते । वलसंवरणे सञ्चरणे च । बहुलमन्यत्रापीति र-क् । डलयोरैकत्वस्मरणात् लस्य डः ॥
वण: । पुं० शब्दे ॥
वणिक्पथ: । पुं० हट्टे । आपणे ॥ स्थलवाणिज्यायाम् ॥ स्थलजलादि नानावाणिज्यमिति कुल्लूकभट्टः ॥
वणिक् । पुं० क्रयविक्रयकर्त्तरि । वाणिज्यकारके । वैदेहके । सार्थवाहे । नैगमे । पण्याजीवे । क्रयविक्रयिके ॥ करणान्तरे ॥ स्त्री० वणिज्यायाम् ॥ पणते । पण० । पणेरिज्यादेश्च वः ॥
वणिज्या । स्त्री० विपणे ॥ न० वणिज : कर्मभावयोः ॥ दूतवणिग्भ्यां च इति यः । माधवस्तु० वणिज्याशब्दः स्वभावात् स्त्रीलिङ्गो भावप्रधानप्रत्ययो न तु कर्मणीत्याह ॥ भाष्ये तु० वार्त्तिकमेव नास्ति ॥
वण्ट: । पुं० अंशे । भागे । वाण्टा० इ० भा० ॥ दात्रमुष्टौ । बेण्टा० इ० भा० ॥ अनूढपुरुषे ॥
वण्टक: । पुं० अंशे । भागे ॥ वण्टते । वटि विभाजने । कर्मणि घञ् । स्वार्थे कः ॥
वण्टाल: । पुं० युद्धभेदे । शूरयुद्धे ॥ नौकायाम् ॥ खनित्रे ॥

वण्ठ: । पुं० अकृतोद्वाहे ॥ खर्वे । कुन्तायुधे ॥ भृत्ये । बांठ० इ० प० भा० प्र० वण्ठते । वठि एकचर्यायाम् । अच् ॥
वण्ठर: । पुं० स्थगिकायाम् ॥ रज्जौ कुक्कुरस्य लाङ्गूले ॥ करीरकोषे । तालस्य पल्लवे ॥ पयोधरे ॥ वण्ठरच् ॥
वण्ड: । पुं० अनावृतमेढ्रे । दुश्चर्मणि ॥ त्रि० हस्तादिवर्जिते ॥ छिन्नलाङ्गूले । बांडा० इ० भा० प्र० ॥ छिन्नहस्ते ॥ वनुते । वनुयाचने । वनति वा । वनसम्भक्तौ । अमन्ताड्डः ॥
वण्डा । स्त्री० पांशुलायाम् ॥ अजादित्वाट्टाप् ॥
वत् । अ० सादृश्ये ॥ तेनतुल्यमित्यादिभिर्विहितो वतिप्रत्ययः । यस्तूपसर्गाद्वात्वर्थे इति विहितः स नगृह्यते ॥
वत । अ० आमन्त्रणे । सन्तोषे ॥ खेदे । अनुकम्पे ॥ विस्मये ॥ वयतेस्म । वयगतौ । गत्यर्थेतिक्तः । नेटयलोपः ॥ वन्यते स्म वा । वनु याचने । क्तः अनुदात्तोपदेशेति-नलोपः ॥
वतंस: । पुं० कर्णपूरे । कर्णाभरणे ॥ शिरोभूषणे । शेखरे ॥ अवतंस पति० अवतंसयते ऽनेन वा । तसि :

सौम्योभूषार्थः। पचाद्यच्० इल
श्चेतिघञ्वा। भागुरिमतेनाका
रलोपः॥

वतण्डः। पुं० मुनिविशेषे॥

वतोका स्त्री० अवतोकायाम्। स्ख
लितगर्भायाम्॥

वत्सः। पुं० पुत्रादौ। अम्रा०टी०भा०
॥ तर्णके। शक्रत्करौ॥ वदत्यभी-
ष्टां मातरम्। वदव्यक्तायांवाचि०
वदस्त्येयेवा। वृतृवदीतिसः॥ ऋ
षिविशेषे॥ वर्षे॥ न०। उरसि।
वक्षसि॥

वत्सकः। पुं० कुटजवृक्षे॥ न०पुष्प
कासीसे॥ संज्ञायांकन्॥ अनुक-
म्पितेवत्से अनुकम्पितोवत्सः।
अनुकम्पायामितिकः॥

वत्सकबीजम्। न० इन्द्रयवे।

वत्सकामा। स्त्री० वत्साभिलाषिण्यां
गवि। वत्सलायाम्॥ पुत्रादिका
मनाविशिष्टायांनार्याम्॥

वत्सतरः। पुं० दम्ये। वत्सभावमती
त्यद्वितीयंवयः प्राप्ते॥ तनुर्वत्सः
वत्सोक्षाश्वर्षभेभ्यश्चतनुत्वइति-
ष्टरच्॥

वत्सतरी। स्त्री० वत्साभावमतीत्यद्वि
तीयंवयः प्राप्तायाम्। त्रिहायण्यां
गवि॥ तन्वीवत्सा। ष्टरच्।
ङीप्॥

वत्सनाभः। पुं० विषवृक्षविशेषे। अ
मृते। उग्रे। महौषधे। मारणे।
माहुरा बं० भा०प्र०॥ अस्यस्वरूप
निरूपणंयथा। सिन्धुवारसदृक्प
त्रोवत्सनाभ्याकृतिस्तथा। यत्पा
र्श्वेनतरोर्वृद्धिर्वत्सनाभःसभाषित
इति॥ अस्यगुणाः। अतिमधुर
त्वम्० वातकफकण्ठरुक्सन्निपात-
नाशित्वम्० पित्तसन्तापकारकत्व-
ञ्चेतिराजनिर्घण्टः॥ वत्सान्न
भ्नातिहिनस्ति। णभहिंसायाम्।
कर्मण्यण्॥ वत्सस्यनाभिरिवनाभि
रस्येतिवा॥

वत्सपः। पुं० वत्सचारकबालके॥

वत्सपत्तनम्। न० भारतवर्षस्थोत्तरे
देशविशेषे। कौशाम्ब्याम्॥

वत्सपालः। पुं० बलदेवे॥ श्रीकृ-
ष्णे॥ वत्सपे॥

वत्सरः। पुं० द्वादशमासात्मकेका-
ले। संवत्सरे। अब्दे। हायने। श
रदि। समायाम्। वर्षे। सचसं
वत्सरादिभेदेनपञ्चधाभवति। त
थाहि। शकाब्दात्पञ्चभिःशे-
षात्समाद्यादिषुवत्सराः। सम्परी
दनुपूर्वास्तथेदापूर्वकामताः॥
अथषष्टिसंवत्सराणांगणना। माने
गुरोरगभिदः परिवत्सराणांषष्टिः
स्मृतामुनिवरैः प्रभवादिकाना-
म्। एकैकवत्सरमितिगुरुमध्यमे-
कराशिस्तुभोगमितिरेवसदातथाहि॥

प्रभवो विभवः शुक्लः प्रमोदोऽथ प्रजापतिः । अङ्गिराः श्रीमुखो भावो युवा धातेश्वराभिधौ ॥ बहुधान्यः प्रमाथी च विक्रमो वृषसंज्ञकः । चित्रभानुः सुभानुश्च तारणः पार्थिवो व्ययः सर्वजित् सर्वधारी च विरोधी विकृतस्ततः । खर नन्दनसंज्ञौ च विजयो जय मन्मथौ ॥ दुर्मुखस्तदनु प्रोक्तो हेमलम्बकसंज्ञकः । विलम्बाख्यो विकारी स्याच् छर्वरीप्लवसंज्ञकौ ॥ उक्तः शुभकृतस्तस्मादब्दः शोभनकृत्स्मृतः । क्रोधी विश्वावसुर्ज्ञेयो वत्सरोऽथ पराभवः । प्लवङ्गः कीलकाख्योऽथ सौम्यः साधारणाह्वयः ततो विरोधकृन्नामा परिधावि प्रमाथिनौ ॥ आनन्दो राक्षसः प्रोक्तोऽनलः पिङ्गलसंज्ञकः । कालयुक्ताख्यसिद्धार्थौ रौद्रो दुर्मतिदुन्दुभी । रुधिरोद्गारिरक्ताक्षौ क्रोधनः क्षयकन्मतः । वत्सराणां गुरोर्मानैरेषष्टिरियमुदाहृता ॥ वत्सरानयनं यथा । नगैर्नखैः सन्निहतो द्विधाशकः सखश्चिशक्रोऽक्षयमाङ्गभाजितः । गताः समब्धशकोऽभवद्दृतोऽशेषकैश्च : प्रभवादिवत्सराः । अत्र आद्यातु विंशतिर्ब्राह्मी द्वितीया वैष्णवी स्मृता तृतीया रुद्रदे

वत्याश्रेष्ठा मध्याधमा भवेत् । वसन्त्यस्मिन्नयनर्तुमासपक्षादयः । वस निवासे । वसेश्चेति सरप्रत्ययः । सस्यार्धधातुक इति सस्य तः ॥

वत्सरान्तकः । पुं॰ फाल्गुने मासि ॥

वत्सलः । पुं॰ शृङ्गारादिरसान्तर्गतरसविशेषे । वात्सल्ये । तृणाग्नौ । त्रि॰ स्नेहयुक्ते । स्निग्धे । वत्सेपुत्रादिस्नेहपात्रेऽभिलाषोऽस्यास्ति वत्सांसाभ्यां कामबले इति लच् ॥

वत्सला । स्त्री॰ वत्सकामायां धेनौ ।

वत्सशालम् । न॰)

वत्सशाला । स्त्री॰) वत्सानां गृहे ।

वत्सानां शाला पुं॰ । विभाषा सेनेति पक्षे क्लीवता ॥ त्रि॰ वत्सशालोत्पन्ने ॥ वत्सशाले जातः । जातार्थे स्य वालुक् ॥ पक्षे वात्सशालोऽपि ।

वत्सा । स्त्री॰ पुत्र्याम् ॥ वयसि प्रथम इति ङीपं बाधित्वा अजादित्वाट्टप् ।

वत्साक्षी । स्त्री॰ गोडुम्बायाम् । चित्रायाम् ॥

वत्सादनः । पुं॰ वृके ॥

वत्सादनी । स्त्री॰ छिन्नरुहायाम् । गुडूच्याम् । वत्सैरद्यते । अद॰ । ल्युट् ॥

वदः । त्रि॰ वक्तरि ॥ वदति । वद-

व्यक्तार्यावचि । पचाद्यच् ॥

वदनम् । न॰ आनने । मुखे । वद-त्यनेन । वद॰ । करणेल्युट् ॥

वदनासव : । पुं॰ अधरमधुनि । वक्त्रासवे ॥ वदनस्यासव : ॥

वदन्ति : ।) स्त्री॰ कथायाम् ॥
वदन्ती ।)

वदन्य : । त्रि॰ वदान्ये ॥

वदान्य : । त्रि॰ अत्युदारे । दानशौण्डे । वहुप्रदे ॥ मांयाचस्वेतिवदति । वद॰ । वदेरान्य : ॥ चारुवादिनि । प्रियवादिनि ॥

वदामम् । न॰ फलविशेषे । सुफले । वातवैरिणि । वातादे ॥

वदाल : । पुं॰ पाठीनमत्स्ये वोआलि॰इ॰गौ॰दे॰भा॰प्रा॰ ॥

वदावद : । त्रि॰ वक्तरि ॥ वदति । वद॰ । पचाद्यचि॰चरिचलीतिद्वित्वादि ॥

वदि । अ॰ कृष्णपक्षे ॥

वध : । पुं॰ हिंसके ॥ हिंसायाम् ॥

वधुका । स्त्री॰ वध्वाम् ॥

वधू : । स्त्री॰ स्नुषायाम् । ब्रह्म॰इ॰भा॰प्रसिद्धे ॥ वहति॰उह्यतेवा । वहप्रापणे । वहेधश्च स्थू : ॥ शारिवौषधौ ॥ शट्याम् ॥ नवोढायाम् ॥ भार्यायाम् ॥ पृक्कायाम् ॥ अङ्गनायाम् ॥

वधूजन : । पुं॰ योषिति ॥

वधूट : । पुं॰ यौवने ॥

वधूटशयनम् । न॰ गवाक्षे ॥

वधूटी । स्त्री॰ स्वल्पवध्वाम् ॥ स्नुषायाम् ॥ सुवासिन्याम् ॥ युवती ॥ वयस्यचरमइतिङीप् ॥

वधूत्सवप्रसव : । पुं॰ रक्ताम्लाने ॥

वध्रम् । न॰ चर्मरज्जौ ॥ वध्यतेऽनेन । वधेरौणादिक : ष्ट्रन् ॥

वध्रि : । स्त्री॰ वध्रे ॥

वध्री । स्त्री॰ वध्रे ॥ षित्त्वान्ङीष् । चश्चा : पद्मवध्रिका : पद्मेतिभाष्यम् ॥ .

वनम् । न॰ नीरे । जले ॥ निवासे ॥ आलये ॥ प्रस्रवणे ॥ कानने । स्वत : सिद्धवृक्षसमूहे । गहने । घना॰इ॰भा॰ ॥ प्रवासे । वन्यते॰ सम्भज्यते॰सेव्यते॰याच्यतेवा वनसम्भक्तौ॰वनुयाचनेवा । हलश्चेति कर्म्मणिघञ् । संज्ञापूर्वकत्वाद्वृद्ध्यभाव: ॥ कर्त्तरिपचाद्यच्वा ॥ त्रि॰वननीये ॥ सम्भजनीये ॥

वनकदली । स्त्री॰ काष्ठकदल्याम् ॥

वनकन्द : । पुं॰ सितशूरणे ॥ धरणीकन्दे ॥

वनकार्पासी । स्त्री॰ त्रिपर्णायाम् । भारद्वाज्याम् । वनकपास॰ इ॰भा॰ ॥

वनकुलत्थ : । पुं॰ कुलत्थायाम् ॥

वनकोद्रव : । पुं॰ उद्दाले ॥

वनकोलि: । पुं॰ वनबदर्य्याम् । काकशिकायाम् ॥

वनगो: । पुं॰ स्त्री॰ गवये ॥

वनगोचर: । पुं॰ नारायणे ॥ वनं जलं गोचरो निवासस्थानं यस्य स: ॥ व्याधे ॥

वनचन्दनम् । न॰ अगुरुणि ॥ देवदारुणि ॥

वनचन्द्रिका । स्त्री॰ मल्लिकायाम् ॥

वनचम्पक: । पुं॰ वनदीपे । हेमाह्ने ॥

वनचर: । पुं॰ किराते ॥ वनमृगे ॥ वने चरति । चर॰ । चरेष्ट: ॥

वनच्छाग: । पुं॰ वनच्छगले । एडके । शिशुवाह्यके ॥ शूकरे ॥

वनज: । पुं॰ मुस्तके ॥ स्तम्बेरमे ॥ वनशृङ्गाटे । अम्बुजे ॥ त्रि॰ वनोत्पन्ने ॥ वने जायते । जनी॰ । ड: ॥

वनजा । स्त्री॰ मुद्गपर्ण्याम् ॥ वनकार्पास्याम् ॥ वन्योपोदक्याम् ॥ अश्वगन्धायाम् ॥ गन्धपत्रायाम् ॥ मिश्रेयायाम् ॥ ऐन्द्रे । वनार्द्रकायाम् ॥

वनजायतेक्षण: त्रि॰ पद्मलोचने ॥

वनजीर: । पुं॰ सूक्ष्मपत्रे । अरण्यजीरे ॥

वनतिक्त: । पुं॰ रोहितकद्रुमे ॥

वनतिक्ता । स्त्री॰ वनतिक्तिकायाम् ॥

वनतिक्तिका । स्त्री॰ पाठायाम् ॥ हरीतक्यां ॥

वनद: । पुं॰ घने । मेघे ॥ वनं जलं ददाति । डुदाञ्॰ । क: ॥ त्रि॰ वनदातरि ॥

वनदमन: । पुं॰ अरण्यदमने ॥

वनदीप: । पुं॰ वनचम्पके ॥

वनधेनु: । स्त्री॰ गवय्यां ॥

वननीय: । त्रि॰ सम्भजनीये ॥

वनपल्लव: । पुं॰ शोभाञ्जनवृक्षे ॥ अरण्यजपत्रे ॥

वनपांशुल: । पुं॰ व्याधे ॥

वनपिप्पली । स्त्री॰ क्षुद्रपिप्पल्याम् ॥

वनपुष्पा । स्त्री॰ शतपुष्पायाम् ॥

वनपूरक: । पुं॰ वनबीजपूरे ॥

वनप्रिय: । पुं॰ परभृते । कोकिले ॥ न॰ त्वचे । गुडत्वचि ॥ त्रि॰ अरण्यप्रियमात्रे ॥

वनभुक् । पुं॰ ऋषभौषधे ॥

वनमक्षिका । स्त्री॰ दंशे ॥ वनस्थमक्षिका ॥

वनमल्लिका ।) स्त्री॰ वनोद्भवमल्लिकायाम् ॥
वनमल्ली ।)

वनमाला । स्त्री॰ श्रीकृष्णस्रजि सपल्लवपुष्पग्रथितायामाजानुलम्बिन्यां स्रजि । तस्या: स्वरूपं यथा । आजानुलम्बिनी माला सर्वर्तुकुसुमोज्ज्वला । मध्ये स्थूलकदम्बाढ्या वन

मालेतिकीर्त्तिता ॥ वनपुष्पस्र
जि ॥

वनमाली । पुं॰ हरौ । श्रीकृष्णे ॥
वनं वनपुष्पं तन्मालास्येति॰ वन
माली । व्रीह्यादित्वादिनिः । सप
त्रपुष्पग्रथितास्रक् वनमालेत्यन्ये
॥ आपादपद्मं यामाला वनमालेति
सामतेतितुकलिङ्ग: । सास्य स्ती
ति वा ॥ वनं मलितुं शीलमस्ये ति
वा । मलधारणे । सुपीतिणिनि:
। यद्वा भूतनम्मास्वरूपां वैजयन्त्या
ख्यां वनमालां वहन् वनमाली । व
नमालापरिच्छिन्नं धन्याः पश्यंतिते
मुखमिति हरिवंशोक्तिः ॥

वनमालिनी । स्त्री॰ वाराह्याम् ॥ द्वा
रकापुर्य्याम् ॥

वनमुक् । पुं॰ जलदे । मेघे ॥ वनंनी
रमुञ्चति मुच्लृ॰ । क्विप् ॥

वनमुद्ग: । पुं॰ मकुष्ठके ॥

वनमुद्गा । स्त्री॰ मुद्गपर्ण्याम् ॥

वनमूर्द्धजा । स्त्री॰ कर्कटशृङ्ग्याम् ॥

वनमेथिका । स्त्री॰ मेथिकाप्रभेदे ॥

वनमोचा । स्त्री॰ काष्ठकदल्याम् ॥

वनर: । पुं॰ वानरे ॥

वनराज: । पुं॰ मृगेन्द्रे ॥ वनस्यरा
जनि ॥

वनराजक: । पुं॰ सिंहे ॥

वनराजि: । स्त्री॰ वनवृक्षाणांपङ्
क्तौ ॥

वनरुहम् । न॰ पद्मे ॥ वनेरोहति ।
रुह॰ । इगुपधेतिक: ॥

वनलक्ष्मी: । स्त्री॰ कदल्याम् ॥

वनवर्व्वर: । पुं॰ कृष्णार्जके ॥

वनवर्व्वरिका । स्त्री॰ अरण्यजवर्वर्या
म् । सुप्रसन्नके । विषघ्ने । सूक्ष्मप
त्रके । निद्राली ॥

वनवल्लरी । स्त्री॰ निःश्रेणिकातृणे ॥

वनवह्नि: । पुं॰ दवानले ॥

वनवासन: । पुं॰ गन्धोतौ । खट्टा
शे ॥

वनवासी । पुं॰ नीलमहिषकन्दे ।
शाल्मलिकन्दे ॥ पाटल्याम् । मु
ष्ककवृक्षे ॥ शृङ्ग्याम् । ऋषभौ
षधे ॥ शूकरकन्दे । वाराहीकन्दे
॥ त्रि॰ वनवासकर्त्तरि ॥

वनबीज: । वनबीजक: । वनबीजपूरक: । पुं॰ मातुलुङ्गिकायाम् ॥ अरण्यजातबीजपू
रे । अत्यम्लायाम् ॥

वनवृन्ताकी । स्त्री॰ वृहत्याम् ॥

वनव्रीहि: । पुं॰ नीवारे ॥

वनशूकरी । स्त्री॰ शूकशिम्ब्याम् ॥
अरण्यवाराह्याम् ॥

वनशूरण: । पुं॰ वनोद्भवोले । सित
शूरणे । वनकन्दे ॥

वनशृङ्गाट: । पुं॰ गोक्षुरके ॥ वनस्य
शृङ्गाटइव ॥

वनशृङ्गाटक: । पुं॰ गोक्षुरके ॥

वनशोभनम् । न० पद्मे ॥ त्रि० वनस्यशोभाकर्त्तरि ॥

वनश्वा । पुं० गन्धमार्ज्जारे ॥ वृके । गोमायौ ॥ व्याघ्रे ॥

वनसङ्कट : । पुं० मसूरे ॥

वनसद् । त्रि० वनेचरे ॥

वनसमूह : । पुं० वन्यायाम् ॥ वनानांसमूह : ॥

वनसरोजिनी । स्त्री० वनकार्पास्याम् ॥

वनस्थ : । पुं० मृगे ॥ त्रि० वनवासिनि ॥

वनस्था । स्त्री० अश्वत्थीवृक्षे ॥

वनस्पति : । पुं० द्रुममात्रे ॥ विनापुष्पंफलशालिनिवृक्षे ॥ अपुष्पाफलवन्तोये तेवनस्पतय : स्मृताइति मनु : ॥ स्थालीवृक्षे । नन्दीवृक्षे ॥ वनस्यपति : । पारस्करादित्त्वात् सुट् ॥ वटे ॥

वनहरिद्रा । स्त्री० काननोत्पन्नहरिद्रायाम् । शोलिकायाम् ॥

वनहास : । पुं० अश्ववाले । काशतृणे ॥ कुन्दवृक्षे ॥

वनहासक : । पुं० काशतृणे ॥

वनाखु : । पुं० शशके ॥

वनाखुक : । पुं० मुद्गे ॥

वनाज : । पुं० वनच्छागे । दुर्भिक्षे ॥

वनाटु : । पुं० स्त्री० बर्वणायाम् । नीलमक्षिकायाम् ॥

वनाधिवासी । त्रि० वनस्थे ॥ वनमधिवसतितच्छील : । णिनि : ॥

वनामल : । पुं० करमर्द्दे । कृष्णपाकफले ॥

वनाम्र : । पुं० कोषाम्रे ॥

वनायु : । पुं० हरिणे ॥ देशविशेषे ॥

वनायव : । पुं० बहुवचनान्तोयम् । देशविशेषे ॥

वनायुज : । पुं० हयविशेषे । वनायुजे ॥ वनायुषुदेशेजात : । सप्तम्यामजनेर्ड : ॥

वनारिष्टा । स्त्री० वनहरिद्रायाम् ॥

वनार्च्चक : । पुं० पुष्पजीविनि । मालाकारे ॥

वनार्द्रका । स्त्री० ऐन्द्रे । वनभवार्द्रके ॥

वनालिका । स्त्री० वज्रवल्ल्याम् । हस्तिशुण्डाम् ॥

वनाश्रय : । पुं० द्रोणकाके ॥

वनाहिर : । पुं० दन्तायुधे । शूकरे ॥

वनि : । पुं० अग्नौ ॥ वन्यतेयाचते । वनुयाचने । खनिकष्यज्यसिवसिवनिसनिध्वनिग्रन्थिचलिचरिभ्यश्चेति० इप्रत्यय : ॥

वनित : । त्रि० याचिते ॥ सेविते ॥

वनिता । स्त्री० उत्पादितात्यर्थानुरागनार्याम् ॥ योषिन्मात्रे ॥ वन्यतेस्म । वनुयाचने० वनसम्भक्तौवा । क्त : । यस्यविभाषेत्यस्यानित्यत्वा

दिट् ॥ यद्वा । वनतेर्बाहुलकादि तन् ॥

वनी । पुं॰ कन्दमूलफलाद्याहारेणसा ग्निहोत्रे॰निरग्निहोत्रे॰वाणप्रस्थे । तृतीयाश्रमे ॥ वनं निवासस्थानमस्यास्ति । अतइनिठनाविती निः ॥

वनी । स्त्री॰ विपिने । गहने ॥ वनति । वन॰ । पचाद्यच् । गौरादिः ॥

वनीपकः । त्रि॰ याचके ॥ वनींपाति । आतइतिकः । ततः संज्ञायांकन् ॥

वनीयकः । त्रि॰ याचके ॥ वननम् । वनु॰ । सर्वधातुभ्यइन् । वनिर्याञ्चा॰तामिच्छति । सुपआत्मनः क्यच् । ण्वुल् ॥

वनेक्षुद्रा । स्त्री॰ करञ्जे ॥

वनेचरः । पुं॰ किराते ॥ त्रि॰ अरण्यचारिणि ॥ वनेचरति । चरेष्टइतिटः ॥ तत्पुरुषेकृतीत्यलुक् ॥

वनेज्यः । पुं॰ वरसाले ॥

वनेसद् । पुं॰ वनेचरे ॥ वनेसीदति । षद्लृ॰ । क्विप् । तत्पुरुषइत्यादिनाऽलुक् ॥

वनेसर्ज्जः । पुं॰ असनवृक्षे ॥

वनोद्भवा । स्त्री॰ वनकार्पास्याम् ॥ त्रि॰ वनजे ॥

वनोपलः । पुं॰ आरण्यगोमये ॥

वनौकाः । पुं॰ वानरे ॥ वनस्थिते । पुलिन्दे ॥ वनमोकोऽस्य ॥

वनौषधी । स्त्री॰ वनोद्भवौषधिमात्रे ॥ प्रायोजना : सन्निवनेचराद्यागोपाद्य : प्राकृतनामतज्ज्ञा : । प्रयोजनार्थविचन प्रवृत्तिर्यतस्तत : प्राकृतइत्यदोष : ॥ किञ्च । रसवीर्य विपाकेभ्योमूलात्पत्रात्फलादृलात् । आकारादृशकालादिर्वनौषध्यर्थमुन्नयेत् ॥

वन्दकः । पुं॰ नीलवल्ल्याम् । वन्दायाम् ॥ त्रि॰ वन्दनकृति ॥

वन्दका । स्त्री॰ वृक्षादन्याम् । वन्दायाम् ॥

वन्दथः । त्रि॰ स्तोतरि ॥ स्तुत्ये ॥ वन्दते॰ वन्द्यतेवा । वदि अभिवादनस्तुत्यो : शीङ्शपिरुगमिवञ्चिजीविप्राणिभ्योऽथइत्यत्र वश्चीत्यस्यस्थानेवन्दोतिपाठोपिबहुश्रुतिर्निर्हारितइतिवन्देरथ : ॥

वन्दनम् । न॰ नतौ । प्रणामे ॥ वन्दे ल्युट् ॥ मुखे ॥

वन्दनमाला । स्त्री॰ तोरणे । रम्भास्तम्भचतुष्टयवेष्टितास्रपत्ररचितमालायाम् ॥ यथा । कुर्याद्वन्दनमालांयोरम्भास्तम्भै : सुशोभनै : । चूतवृक्षोद्भवै : पत्रैर्नागरेचक्रपाणिन : । युगानिपत्रसङ्ख्यानांस्वर्गेतस्योत्सवोभवेत् । पूज्यतेवासवाद्यैश्च क्रीडतेचाप्सरोवृत : ॥

वन्दनमालिका । स्त्री॰ बहिर्द्वारोपरि शुभदार्थमालायाम् ॥ यथा । तोरणोर्द्धेतुमङ्गल्यं दामवन्दनमालिका ॥

वन्दना । स्त्री॰ समीच्याम् । स्तुतौ ॥ छौमभस्मनातिलके ॥ यथा । ऐशान्यामाहरेद्भस्मशुचावाथशुचेण वा । वन्दनांकारयेत्तेनशिर : कण्ठांसकेषुच ॥ काश्यपस्येतिमन्त्रेण यथानुक्रमयोगतइतिवशिष्ठ : ॥

वन्दनी । स्त्री॰ नतौ ॥ जीवातौ ॥ वश्याम् ॥ पाचनकर्म्मणि ॥

वन्दनीय: । पुं॰ पीतभृङ्गराजे ॥ त्रि॰ नमस्ये । वन्द्ये । स्तवनीये ॥ वन्दितुमर्ह : । वदि॰ । अनीयर् ॥

वन्दनीया । स्त्री॰ गोरोचनायाम् ॥ अजादित्त्वाट्टाप् ॥

वन्दा । स्त्री॰ वृक्षोपरिजातवृक्षे । वृक्षादन्याम् । वृक्षरुहायाम् । जीवन्तिकायाम् । वन्दाके ॥ वृक्षे विजातीयप्ररोहोवन्दा । वन्द्यते । वदि॰ । गुरोश्च हल : ॥ भिक्षुक्याम् । वन्द्यां ॥

वन्दाक : । पुं॰ द्रुमरुहायाम् । वन्दायाम् ॥ यथा । वन्दाक : स्याद्धिमस्तिक्त : कषायोमधुरोरसे । मङ्गल्य : कफवातास्रक्षोब्रणविषापह : ॥ † * †

वन्दाका ।) स्त्री॰ वन्दायाम् ।
वन्दाकी ।) वृक्षादन्याम् ॥

वन्दारु : । त्रि॰ वन्दनशीले । अभिवादके ॥ वन्दते । वदि॰ । शृवन्द्योरारु : ॥

वन्दि : । स्त्री॰ निबद्धमनुजादौ । प्रग्रहे । उपग्रहे । वन्दी॰ इ॰ लोक॰ प्र॰ ॥ सोपानके ॥

वन्दिग्राह : । पुं॰ अग्न्यायुधदेवतागारभेदके ॥

वन्दिचौर : । पुं॰ माचले । सन्धिचौरे ॥

वन्दित : । त्रि॰ पूजिते ॥

वन्दी । पुं॰ राजादे : स्तुतिपाठिनि । स्तुतिपाठके । भाट॰ इ॰ प्र॰ ॥ प्रस्तावानुवक्तरि ॥ वन्दिनस्त्वमलप्रज्ञा : प्रस्तावसदृशोक्तय : ॥ वन्दते । वदि॰ । ग्रह्यादित्त्वादावश्यके तिथाणिनि : ॥ पणमध्यस्थे ।

वन्दिपाठ : । पुं॰ भोगावल्याम् । स्तुतिग्रन्थे ॥

वन्दी । स्त्री॰ आहृतस्त्रियाम् ॥ पणमध्यस्थायाम् । वन्द्यते॰ वन्दते वा । वदि॰ इन् । ङीष् ॥ शूद्रायांक्षत्रियेणोत्पादितायाम् ॥

वन्दीकार : । पुं॰ वन्दिग्राहे । प्रसह्यचौरे । माचले ॥

वन्द्य : । त्रि॰ स्तव्ये । वन्दनीये ॥

वन्द्या । स्त्री॰ स्तव्यायाम् । वन्दनीयाया

म । गोरोचनायाम् ॥ वन्दायाम् ॥
वन्द्रः । त्रि० पूजके ॥ पुं० गुरौ ॥ वन्दते० वन्द्यतेवा । वदि० । स्फायितञ्चीत्यादिनारक् ॥ न० कल्याणे ॥
वन्य : । पुं वनौले । वनशूरणे ॥ वाराहीकन्दे ॥ देवनले ॥ न० कैवर्तीमुस्तके ॥ त्वचे ॥ त्रि० वनोद्भूते । वनेभव : । यत् ॥
वन्या । स्त्री० वनसमूहे ॥ अम्बुसमूहे । वनानांसमूह : । पाशादिभ्याय : ॥ गोपालकर्कव्याम् ॥ मुद्गपर्ण्याम् ॥ गुञ्जायाम् ॥ भद्रमुस्तायाम् ॥ गन्धपत्रायाम् ॥ सिंश पायाम् ॥
वन्योपोदकी । स्त्री० लताप्रभेदे वनजायाम् । वनसाह्वयायाम् ॥ इतिराजनिर्घण्ट : ॥
वन्न : । त्रि० सं भजनि । भागिनि ॥ वनति । वनसम्भक्तौ । ऋज्रेन्द्राग्रत्यादिनारन् ॥
वप : । पुं० मेदसि ॥ केशमुण्डने ॥ बीजवपने ॥ वपति । टुवप् ० । पचाद्यच् ॥ वपतियद्दिक्षाण : क्षेत्रमासाद्यबीजम् ॥
वपनम् । न० बीजाधाने ॥ मुण्डने ॥ यथा । गङ्गायांभास्करक्षेत्रे मातापित्रोर्गुरोर्मृतौ । आधानेसोमपानेच वपनंसप्तसुस्मृतम् ॥

टुवप् ० । ल्युट् ॥ अन्यत्रनिधनात्पत्यु : पत्नीकेशान्नवापयेत् ॥ क्षौर्ये ॥
वपनी । स्त्री० नापितशालायाम् ॥
वपा । स्त्री० विवरे । छिद्रे ॥ मेदसि ॥ उप्यतेऽत्र । टुवप् ० । भिदाद्यङ् ॥ यद्वा । वपति । पचाद्यच् । टाप् ॥
वपिल : । पुं० पितरि ॥
वपुस्नव : । पुं० शरीरस्थरसधातौ ॥
वपुन : । पु० देवे । सुरे ॥
वपुषा । स्त्री० हवुषायाम् । हीवेर० इ० भा ॥
वपुष्टमा । स्त्री० पद्मचारिण्याम् ॥
वपु : । न० तनौ । शरीरे ॥ प्रशस्ताकृतौ ॥ वपति० उप्यतेवा । टुवंप् बीजसन्ताने । अर्तिपृवपीत्युसि : ॥
वप्तव्य : । त्रि० वपनीये ॥ भूमौबीजं हिवप्तव्य० मुर्वरायांनचोषरे ॥
वप्ता । पुं० जनके ॥ त्रि० वापके । वपति । टुवप् ० । ण्वुल्तृचाविति तृच् ॥ कवौ ॥
वप्र : । पुं० ताते ॥ प्रकारे ॥ न० सीसके ॥ पुं० न० प्राकाराधारवेदिकायाम् । चये ॥ तथाचार्थशास्त्रम् । खातादुद्धृतमृदावप्रंकारयेत् ० तस्योपरिप्राकारमिति ॥ महावप्रोयथा । महीद्यानांमहावप्रां

तङागशतशोभिताम् । प्राकारगृह
सम्वाधामिन्द्रस्येवामरावतीम् ॥
महान्वप्रोयस्याः । प्राकाराधार
भूताकृत्रिमोच्छ्रिताभूमिर्वप्रसंज्ञ
तिवि॰ पु॰ ॥ रोधसि । तटे ॥
रेणौ ॥ क्षेत्रे । केदारे । सानुनि ॥
उप्यतेऽत्र । टुवप॰ । वृधिवपिभ्यां
रन् ॥

वप्रक्रीडा । स्त्री॰ वृषभादीनांवप्रक्रि-
यायाम् ॥ यथा । उत्खातकेलिःशृ
ङ्गाद्यैर्वप्रक्रीडानिगद्यतेइतिशब्दा-
र्णव : ॥

वप्रा । स्त्री॰ मञ्जिष्ठायाम् ॥

वप्रि : । स्त्री॰ क्षेत्रे ॥ वपति । टुव
प॰ । वङ्क्र्यादित्वात्साधु : ॥

वप्री । स्त्री॰ वल्मीके ॥

वम : । पुं॰ स्त्री॰ वमने ॥

वमथु : । पुं॰ वमने । गजस्यकरशी-
करे ॥ वमनं॰ वम्यतेवा टुवमउ
द्गिरणे । ट्वितोथुच् ॥

वमन : । पुं॰ शणे ॥ न॰ छर्द्दने ।
अर्द्दने ॥ आहुतौ । आहरणे ॥

वमनी । स्त्री॰ जलौकायाम् ॥

वमनीया । स्त्री॰ मक्षिकायाम् ॥
त्रि॰ वमनयोग्ये ॥

वमि : । पुं॰ हुताशने । अग्नौ ॥
धूर्त्ते ॥ स्त्री॰ वान्तौ । छर्द्दने ॥
वमनम् । टुवम॰ । इक्कृष्या
दिभ्य : ॥

वमित : । त्रि॰ कृतवमने ॥ यथा ।
वमितंलङ्घयेत्प्राज्ञोलङ्घितंन
तुवामयेत् । वमनेक्लेशवाहुल्याद
न्याललङ्घनकर्षितम् ॥

वमी । स्त्री॰ वमने ॥ कृदिकारादिति
ङीष् ॥

वम्भ : । पुं॰ वंशे ॥

वम्री । स्त्री॰ उपजिह्वायाम् । सोम
क॰ वृ॰ दे॰ भा॰ । वालवी॰ वृ॰
महाराष्ट्रभाषा ॥ वृ॰ हे॰ न्द्र : ॥

वम्रीकूट : । पुं॰ वल्मीके ॥

वय : । पुं॰ पक्षिणि । खगे ॥ तारु
ण्ये । यौवने ॥ कालकृतायांयौव
नादिरूपायांशरीरावस्थायाम् । वा
ल्यादौ ॥ अत्रहित्रय : पक्षा : ।
यथा । कौमारयौवनमध्यत्वस्थवि-
रत्वानिचत्वारिवयांसीत्येक : प
क्ष : । तथाचाहु : । आद्येवयसि
नाधीतंद्वितीयेनार्जितंधनम् । तृती
येनतपस्तप्तंचतुर्थेकिंकरिष्यतीति ॥
त्रीणिवयांसीत्यन्ये । यदाहु : ।
पितारक्षतिकौमारेभर्त्तारक्षतियौ-
वने । पुत्रास्तुस्थाविरेभावेनस्त्रीस्वा
तन्त्र्यमर्हतीति ॥ अन्ये तु॰कौमार
यौवनस्थविरत्वानि॰त्रीणीच्छन्ति ।
आहुश्चते । आषोडशाद्भवेद्बालोयावत्
क्षीरनिवर्त्तक : । मध्यम : सप्तति
र्यावत्परतोवृद्धउच्यतइति ॥ के-
चित्तुउपचयापचयलक्षणे द्वे वयसी

इत्युक्तिर्यस्मिन्प्रवृत्ते यौवनस्य प्रथम
वयो वा चिरस्थायि प्रथमवयसि प्रथमवयसीति वधू-
टी चिरण्टी त्यत्रडीपि सिद्धे । वय
स्यचरमइतिनवक्तव्यमितिस्थितम् ॥
यस्त्वर्थप्रकरणादिकमनपेक्ष्य श्रवण
मात्रेणवयः प्रतिपादयति । स व
योवाचीत्युच्यते । अन्तरङ्गत्वात् ।
तेनेह न । उत्तानशया । लोहित
पादा । इहप्रकरणादिना वयसः
प्रतीतावपि । शब्दादप्रतीतेः । अ
वालापिह्व्याध्यादिवशादुत्तानाशे
ते । अलक्तकेनचरक्तचरणा भवति
॥ वयते । वेति । अजतिवा । वय
गतौ । वीगत्यादौ । अजगतौ वा
असुन् ॥ वयस्तु त्रिविधं वाल्यं मध्य-
मं वार्द्धकं तथेति सुश्रुतः ॥

वयस्थः । त्रि । मध्यमवयसि । तरु
णे ॥ वयसि तिष्ठति । सुपीति यो
गविभागात्कः ॥

वयःस्था ।) स्त्री । ब्राह्म्याम् ॥ गुडू
वयस्था ।)

च्याम् ॥ आमलक्याम् ॥ सूक्ष्मैला
याम् ॥ काकोल्याम् । पथ्याया
म् । पूतनायाम् । हरीतक्याम् ॥
सोमलतायाम् ॥ शाल्मलौ ॥ क्षी
रकाकोल्याम् ॥ मत्स्यपर्ण्याम् ॥
मत्स्याक्ष्याम् ॥ वयो यौवनं तिष्ठ
त्यनया । ष्ठा । घञर्थे कः । युवतौ ।
तरुण्याम् । सख्याम् । आर्य्या

म् ॥ खर्परे शरिवाविसर्गलोपः ॥

वयस्यः । पुं । समानवयस्के । स्नि
ग्धे । सवयसि ॥ वयसा तुल्यः
। नौवयोधर्मेत्यादिना यत् ॥ स
ख्यौ ॥

वयस्या । स्त्री । सख्याम् ॥ टाप् ॥

वयस्वी । पुं । तरुणे ॥

वयुनः । पुं । देवतालये ॥ न । प्रज्ञा
ने ॥ कर्मणि ॥ अजति । अज । ।
अजियमिशीङ्भ्यश्चेत्युनन् चित्
। अजेर्वी गुणायादेशौ ॥

वयोधाः । पुं । यूनि । तरुणे ॥ वयो
दधाति । डुधाञ् । । वयसि धाञ
इत्यसि डित् ॥

वयोवङ्गम् । न । सीसके ॥

वयोवाची । पुं । अर्थप्रकरणादिकम
नपेक्ष्य श्रवणमात्रेण वयसः प्रतिपा
दके कुमारादिशब्दे ॥

वरः । पुं । देवाहृते । देवतादेरभी
प्सिते ॥ तपोभिरिष्यते यस्तु देवेभ्यः
स वरो मत इति भरतः ॥ भर्त्तरि ॥
जामातरि ॥ वृत्तौ । वरणे ॥ वि
टे । षिड्गे ॥ गुग्गुलौ ॥ कन्या
र्थिनि ॥ वरं परीक्ष्य कन्या देया ।
तथाहि विद्यां प्रभावं ज्ञानञ्च परीक्ष्य
कृणुयाद्वरम् । अत्रोक्तं देवीभागवते
। वराय गुणहीनाय वृद्धायाज्ञानिने
तथा । दरिद्राय च मूर्खाय रोगिणे
कुत्सिताय च ॥ अत्यन्तकोपयुक्ताय

बाऽत्यन्तदुर्मुखायच । पङ्गवेपङ्क्ति
हीनायचान्धायबधिरायच ॥ जडा
यचैवमूकायक्लीबतुल्यायपापिने
। ब्रह्महत्यांलभेत्सोपिय:स्वकन्यां
प्रयच्छति. ॥ शान्तायगुणिनेचैवयूने
चविदुषेपिच । साधकायसुतांदत्त्वा
दशयज्ञफलंलभेदितिनवम : स्क-
न्ध : ॥ न० कुङ्कुमे ॥ किञ्चिदिष्टे
। मनाक्प्रिये ॥ तथाहि । वरंप्रा
णास्त्यागोनचशिशुविनाशैश्वभिर
तिवरंमौनंकार्यंनचवचनमुक्तंय
दनृतम् । वरंक्लीबंभाव्यंनचपरक
लत्राभिगमनंवरंभिक्षाशित्वंनच
परधनानांहिहरणम् ॥ त्रि० श्रेष्ठे
॥ साधुनि ॥ व्रियते० वरणंवा ।
वृञ्वरणे । ग्रहवृद्रित्यप् ॥ यद्वा
। वृणोति० वरतिवा । पचाद्यच् ॥

वरक : । पुं० वनमुद्गे ॥ पर्पटे ॥
तृणधान्यप्रभेदे । स्थूलकङ्गौ । चौ
णा० इ० भा० प्र० ॥ मधुरोवर
कोरूक्ष : कषायोवातपित्तकृत् ॥
न० पत्रोर्णे । धौताधौतसाधार
णवस्त्रे ॥ पोताच्छादने ॥

वरक्रतु : । पुं० इन्द्रे । मरुत्वति ॥

वरचन्दनम् । न० कालीये ॥ देव
दारुणि । वरश्चतच्चन्दनञ्च ॥

वरट : । पुं० हंसे ॥ गन्धोल्याम् ।
वरडे० इ० प्र० कीटे ॥ म्लेच्छ
जातिविभेदे ॥ न० कुन्दपुष्पे ॥

वृणोतेसेवतेसर : । वृङ्सम्भक्तौ ।
वृणोतिवा । वृञ्आवरणे । शका
दिभ्योटन् ॥

वरटा । स्त्री० हंसस्ययोषिति । हंस्या
म् ॥ गन्धोल्याम् । वरडे० इ०
भा० प्र० कीटे ॥ कुसुम्भबीजे ।
वरट्टिकायाम् ॥ यथा । वरटाम
धुरास्निग्धारक्तपित्तकफापहा ।
कषायाशीतलागुर्वी स्वादवृष्यानि
लापहा ॥ + +

वरटी । स्त्री० हंस्याम् । वरडे०इ०-
प्र०सपक्षकीटे । गन्धोल्याम् ॥ गौ
रादि : ।

वरट्टिका । स्त्री० वरटायाम् । कुसुम्भ
बीजे ॥

वरण : । पुं० तिक्तशाके । वरुणद्रुमे ॥
प्राकारे । साले ॥ उष्ट्रे ॥ सङ्क्रमे ॥
न०कन्यादिवरणे ॥ वेष्टने । वृत्या
म् ॥ व्रियते०वृणोतिवा । वृञ्० ।
युच् ॥ कर्तृकरणयोर्वाल्युट् ॥ व
रुणे । यथा वरंवृणवन्तितंदेवावर-
दश्चवरार्थिनाम् । धातुर्वैवरणप्रा
क्तस्तस्मात्सवरण : स्मृत : ॥ इति
साम्बपुराणम् ॥ पूजनादौ ॥

वरणसी । स्त्री० वाराणस्याम् ॥

वरणा । स्त्री० काश्य उत्तरसीम्निस्थि
तायांनद्याम् ॥

वरणीय : । त्रि० उपासनीये । व-
रेण्ये ॥

वरण्ड : । पुं॰ अन्तरावेदाम् । वरण्डके । समूहे । सङ्घे ॥ वदनामये । ययस्फोडा॰ इ॰ भा॰ प्र॰ ॥ वृणोति । वृञ्॰ । अण्डन्कृसृभृवृञ्भ्यश्चण्डन् ॥

वरण्डक : । पुं॰ अन्तर्वेदौ । वरण्डे । मातङ्गवेदाम् ॥ अभ्यासकालिकाष्ठनवेदिमन्तर्वायदन्तिनीयोधयेतेढ्रुतिप्रसिद्धि : ॥ यौवनकण्टके ॥ संवर्त्तुले । गोलइतिख्याते ॥ भित्तौ ॥ त्रि॰ विशाले ॥ भयसम्पन्ने ॥ कृपणे ॥

वरण्डा । स्त्री॰ शरिकायाम् । वर्त्याम् । शस्त्रविशेषे । छुरिकायाम् ॥

वरण्डालु : । पुं॰ फलपुच्छे ।

वरतिक्त : । पुं॰ कुटजवृक्षे ।

वरतितिका । स्त्री॰ पाठायाम् ॥

वरत्करी । स्त्री॰ रेणुकानामगन्धद्रव्ये ।

वरत्रा । स्त्री॰ नद्ध्याम् । चर्ममयरज्जौ॰ । वरत॰ इ॰ भा॰ प्र॰ ॥ दूष्यायाम् । कक्षायाम् । गजमध्यबन्धनरज्जौ । व्रियतेऽनया । वृञ्॰ । बाहुलकादत्र : । वृञश्चिदित्यत्रनुवा । यद्वा । वरंत्रायते । चेङ्पालने । आतोनुपेतिक : ॥

वरत्त्वच : । पुं॰ निम्बवृक्षे । न॰ श्रेष्ठवल्कके ।

वरद : । त्रि॰ प्रसन्ने । अभीष्टदातरि । समर्थके ॥ शान्तचित्ते ॥ वरंददाति । डुदाञ्॰ । आतोनुपसर्गइतिक : ॥ पुं॰ अग्नौ ॥ शान्तिकर्मणिपुष्टौचवरदोऽव्यवाहनइत्यागमात् ॥

वरदा । स्त्री॰ कन्यायाम् । कुमारिकायाम् । वरदात्र्याम् ॥ अश्वगन्धायाम् । आदित्यभक्तायाम् ॥ टाप् ॥ तिथिविशेषे माघशुक्लचतुर्थ्याम् ॥

वरदाचतुर्थी । स्त्री॰ माघशुक्लचतुर्थ्याम् । तस्यांगौरीपूज्या । यथा । भविष्योत्तरेमाघशुक्लमधिकृत्य । चतुर्थीवरदानामतस्यांगौरीसुपूजिता । सौभाग्यमतुलंकुर्यात्पञ्चम्यांश्रीरपिश्रियम् ॥

वरदातु : । पुं॰ भूमिसहवृक्षे ॥

वरदात्री । स्त्री॰ दुर्गायाम् ॥

वरदानम् । न॰ भौमेतीर्थभेदे ॥ यत्रविष्णवेदुर्वाससावरोदत्त : ॥

वरदारु : । पुं॰ शाकवृक्षे ॥

वरदासङ्गम : । पुं॰ तीर्थविशेषे ॥

वरपर्णाख्य : । पुं॰ चोरकस्नुकोवृक्षे ॥

वरप्रद : । त्रि॰ वरदे ॥

वरप्रदा । स्त्री॰ अगस्त्यमुने : पत्न्याम् । लोपामुद्रायाम् ॥ वरंप्रददाति । डुदाञ : क : । टाप् ॥

वरफः । पुं॰ पिशाचविशेषे ॥ यथोक्तं शूलिनीमन्त्रविधाने । सहस्रं प्रजपेन्मन्त्रं शूलिन्यायंस्य शत्रवः । वटाश्च वरफाश्चैव नस्य शान्ति कदाचनेति ॥

वरफलः । पुं॰ नारिकेलवृक्षे ॥ वराणि फलानि यस्य ॥ न॰ श्रेष्ठफले ॥

वरम् । अ॰ ईषदुत्कर्षे ॥ मनागिष्टे ॥

वरमुखी । स्त्री॰ रेणुकाभिधगन्धद्रव्ये ॥

वरम्बरा । स्त्री॰ पृश्निपर्ण्याम् ॥

वरयिता । पुं॰ भर्त्तरि ॥ वरणकारयितरि ॥

वररः । त्रि॰ वरप्रदे ॥ वरान् राति । रा दाने । आतइतिकः ॥

वररुचिः । पुं॰ पुनर्वसौ ॥ कात्यायनमुनौ ॥ विक्रमादित्यराजसभास्थे कविविशेषे ॥ वरेषु रुचिर्यस्य ॥

वरलः । पुं॰ वरटे । गन्धोल्याम् ॥

वरलब्धः । पुं॰ चम्पकवृक्षे ॥ त्रि॰ वरप्राप्ते ॥

वरला । स्त्री॰ गन्धोल्याम् ॥ हंस्याम् ॥

वरली । स्त्री॰ वरटायाम् ॥

वरवत्सला । स्त्री॰ श्वश्र्वाम् ॥

वरवर्णिनी । स्त्री॰ वरारोहायाम् । मस्तकाशिन्याम् । उत्तमायां नार्य्याम् ॥ अस्याः लक्षणं यथा । शीतसुखोष्णासर्वाङ्गी ग्रीष्मे या सुखशीतला । भर्त्तृभक्ता च या नारी सा भवेद्वरवर्णिनी ॥ इति रुद्रः ॥ वरो वर्णोस्त्यस्याः । इनिः । ङीप् ॥ लाक्षायाम् ॥ हरिद्रायाम् ॥ रोचनायाम् । फलिन्याम् ॥ माधीयस्याम् वरश्चासौ वर्णश्च सोस्त्यस्याः । इनिः । ङीप् ॥ श्रियि ॥ गौर्याम् ॥ सरस्वत्याम् ॥

वरबाह्लीकम् । न॰ कुङ्कुमे ॥

वरवृद्धः । पुं॰ सुप्रसादे । शिवे ॥ वरेषु वृद्धः ॥

वरा । स्त्री॰ फलत्रिके । त्रिफलायाम् ॥ पाठायाम् ॥ रेणुकाख्यगन्धद्रव्ये ॥ गुडूच्याम् ॥ मेदायाम् ॥ ब्राह्म्याम् ॥ हरिद्रायाम् ॥ विडङ्गे । श्रेष्ठायाम् ॥ ग्रहवृद्धिरित्यवन्ताद्वृञष्टाप् ॥

वराकः । पुं॰ सङ्गरे । रणे । युद्धे ॥ त्रि॰ शोचनीये । शोच्ये ॥ अधरे ॥ वृणीतेतच्छीलः । वृङ्सम्भक्तौ । जल्पभिक्षकुट्टलुण्टवृङः षाकन् ॥

वराकी । स्त्री॰ अवरायाम् ॥ ङीष् ॥

वराङ्गः । पुं॰ पुष्करिणि । गजे । मातङ्गे ॥ न॰ योनौ ॥ मस्तके ॥ गुडत्वचि ॥ शोभनावयवे ॥ त्रि॰ शोभनावयवविशिष्टे ॥ वरश्चतदङ्गञ्च । वराण्यङ्गान्यस्य ॥

वराङ्गकम् । न॰ गुडत्वचि । त्वक्पत्रे । त्वचे ॥ वरमङ्गमस्य । शेषा-

विभाषेतिकप् ॥

वराङ्गना । स्त्री॰ अतिप्रशस्ताङ्गयुक्तायांस्त्रियाम् ॥ यथा । शिरः सपुष्पं चरणौ सुपूजितौ वराङ्गनासेवनमल्पभोजनम् । अनग्नशायित्वमपर्वमैथुनम् चिरप्रनष्टां श्रियमानयन्ति षट् ॥

वराङ्गरूपोपेतः । त्रि॰ श्रेष्ठरूपयुक्ते । सिंहसंहनने ॥ अङ्गानि चरूपञ्च अङ्गरूपाणि । वराणि चतानि अङ्गरूपाणि च॰ तैरुपेतः ॥

वराङ्गी । पुं॰ अम्लवेतसे ॥

वराङ्गी । स्त्री॰ हरिद्रायां ।

वराटः । पुं॰ कपर्दके ॥ तस्यभेदाः पञ्चयथा । सिंही॰ व्याघ्री॰ मृगी॰ हंसी॰ विदुल्लेति राजनिर्घण्टः ॥ रज्जौ ॥ वरमटति । अटगतौ । कर्मण्यण् ॥

वराटकः । पुं॰ पद्मबीजकोषे ॥ रज्जौ ॥ कपर्दके कौडी॰ इ॰ भा॰ प्र॰ ॥ तस्यसङ्ख्याभेदेन संज्ञाभेदा यथा । वराटकानां दशकद्वयं यत् सा काकिणी ताश्च पणश्चतस्रः ते षोडश द्रम्म इहावगम्यो द्रम्मैस्तथा षोडशभिश्च निष्कः ॥ इति लीलावती ॥ अपिच । तान्त्रिकः कार्षिकः पण इति याज्ञवल्क्यवचनेन॰ गुञ्जाः पञ्चाद्यमाषकस्ते षोडशाक्षः कर्षो ऽस्त्रीत्यमरसिंहोक्तो नचअशीतिरक्तिकापरिमितताम्रे पणशब्दः सङ्केतितः सचतावत्सङ्ख्यकवराटकैर्लभ्यते इति वराटकेष्वपितद्व्यवहारः । एतन्मूलकं भविष्यमत्स्यसूक्तयोर्वचनं यथा । अशीतिभिर्वराटकैः पण इत्यभिधीयते । तैः षोडशैः पुराणं स्याद्रजतं सप्तभिस्तु तैरिति प्रायश्चित्ततत्त्वम् ॥ तेच दक्षिणार्थं विधीयन्ते । यथा । हतमश्रोत्रियं दानं हतो यज्ञस्त्वदक्षिणः । तस्मात् पणं काकिणीं वा फलं पुष्पमथापि वा ॥ प्रदद्याद्दक्षिणां यज्ञे तया सफलो भवेत् । इति शुद्धितत्त्वम् ॥ त्रियतेट्लै : । वृञ् आवरणे । अन्येभ्योपीत्याटच् । ततः स्वार्थे कः ॥ यद्वा । वरं दलवर्णमटति । अट॰ । कर्मण्यण् । ततः स्वार्थे कन् ॥

वराटकारजाः । पुं॰ नागकेशरवृक्षे ॥

वराटिका । स्त्री॰ कपर्दके ॥

वराणः । पुं॰ इन्द्रे ॥ वरुणवृक्षे ॥

वराणसी । स्त्री॰ काश्याम् ॥

वरादनम् । न॰ राजादने ॥

वराभिधः । पुं॰ अम्लवेतसे ॥ श्रेष्ठनामनि ॥

वरारकम् । न॰ हीरके ॥

वरारोहः । पुं॰ परमेश्वरे ॥ वरआरोहोऽस्य । पुनरावृत्त्यसम्भवात्॰ वरमारोहणं यस्मिन् वा ॥ गजारो

हे ॥ अश्वरोहे ॥

वरारोहा । स्त्री० मत्तकाशिन्याम् । वरवर्णिन्याम् । वरआरोहोनितम्बोऽस्याः ॥ कटौ ॥

वरालिका । स्त्री० आर्यायाम् । पार्वत्याम् ॥ शू० चि० ॥

वराशि : । पुं० स्थूलवस्त्रे । स्थूलशाटके ॥ वरं श्रेष्ठं वरणं वा अश्नुते । अशू व्याप्तौ । इन् ॥

वरासन : । पुं० षिड्गे ॥ द्वारपाले ॥ न० ओड्रपुष्पे ॥ श्रेष्ठासने ॥

वरासि : । पुं० स्थूलशाटके ॥ खड्गधरे ॥

वरासी । स्त्री० म्लानवस्त्रे ॥

वराह : । पुं० विष्णौ ॥ मानप्रभेदे ॥ तीर्थप्रभेदे ॥ अद्रिविशेषे । मुस्तायाम् ॥ शिशुमारे ॥ वाराहीकन्दे ॥ अष्टादशद्वीपान्तर्गतक्षुद्रद्वीपविशेषे ॥ यथा । गन्धर्वौ० वरुणः सौम्यो वराहः कङ्कएव च । कुमुदश्च कशेरुश्च नागो भद्रारकस्तथा ॥ चन्द्रश्चन्द्रमलयाः शङ्खयवाङ्गकगभस्तिमान् । ताम्राङ्गश्च कुमारी च तत्र द्वीपा दशाष्टभिरिति ॥ सूकरे । कोले । भूदारे ॥ अस्य मांससाधनादि यथा । वराहस्य तनुं तोयैः सम्यक्प्रक्षालितां मुहुः । दग्धाग्निनाथ वादग्धां किञ्चित्तैलेन सेकिताम् ॥ शस्त्रेणादंशयेत्तान्तु यावन्निर्लोमता भवेत् । ततोऽतितीक्ष्णशस्त्रेण खण्डयित्वा यथोचितम् ॥ गृह्णीयाच्चामिषं तस्य पृथगङ्गविभागशः । रन्धयेद्बहुधा त्वन्नप्रलेहतलनादिकम् ॥ स्वेदनं बृंहणं वृष्यं शीतलं तर्पणं गुरु । श्रमानिलहरं स्निग्धं वाराहं बलवर्धनम् ॥ वरं श्रेष्ठमाहन्ति । हन० । अन्येभ्योपीति डः ॥ तन्मांसं विष्णवे न देयम् ॥ तदुक्तं विष्णुसूत्रे । नाभक्ष्यं नैवेद्यार्थे० भक्ष्येष्वजामहिषीक्षीरं वर्जयेत् । पञ्चनखमत्स्यवराहमांसानि चेति ॥ आरण्यवराहमांसं श्राद्धादौ विहितम् । अस्मन्तीष्यनुक्तौ० महारण्यवासिनश्च वराहांस्तथेति हारीतोक्तेः ॥

वराहकन्दः । पुं० वाराह्याम् ।

वराहकर्णी । स्त्री० अश्वगन्धायाम् ॥

वराहक्रान्ता । स्त्री० वाराह्याम् । बदराद्रुमे ॥

वराहकाली । स्त्री० सूर्यमणिपुष्पवृक्षे ॥ सूर्यावर्त्ते ॥

वराहक्रान्ता । स्त्री० लज्जालौ । तिक्तगन्धिकायाम् । नमस्कार्याम् ॥

वराहनामा । पुं० वाराहीकन्दे ॥

वराहपुराणम् । न० वाराहे ॥

वराहव्यूह : । पुं० वराहाकृतिवत्कृतरचनेव्यूहे ॥ सूक्ष्ममुखपश्चाद्भागः पृथुमध्यो वराहव्यूहो भवति ।

अनेनपार्श्वयोर्भयेसतियातव्यंमार्गंव्रजेत् ॥

वराङ्गाङ्गी । स्त्री० दन्त्याम् ॥

वराहिका । स्त्री० कपिकच्छौ ॥

वराही । स्त्री० भद्रमुस्तायाम् ॥ शूकरकन्दे ॥

वरिमा । पुं० उरुत्वे । विशालतायाम् ॥ उरोर्भाव : । पृथ्वादित्वादिमनिच् । प्रियस्थिरेति० उरोर्वर्भाव : ॥

वरिव : । न० परिचर्यायाम् ॥ धने ॥

वरिवसित : । त्रि० उपासिते ॥ वरिव : कृतम् । नमोवरिवइतिक्यच । क्तः क्यस्यविभाषेतिपक्षे यलोपः ॥

वरिवसिता । त्रि० नमस्कर्त्तरि ॥

वरिवस्या । स्त्री० शुश्रूषायाम् । सेवायाम् ॥ वरिवस : करणम् । वरिवश्शब्द : पूजार्थ : । नमोवरिवश्चित्रङ : क्यच् । अप्रत्ययादित्त्व : । टाप् ॥

वरिवस्थित : । त्रि० उपासिते । वरिवसिते ॥ वरिवस: क्यच् । क्त: । क्यस्यविभाषेतिपक्षे यलोपाभाव: ॥

वरिशी । स्त्री० मत्स्यवेधने ॥

वरिषम् । न० वत्सरे ॥

वरिषा : । स्त्री० भूम्नि० वर्षासु । प्रावृषि ॥ *

वरिषाप्रिय : । पुं० चातकेखगे ॥

वरिष्ठ : । पुं० तित्तिरौ ॥ नारङ्गवृक्षे ॥ न० मरिचे ॥ ताम्रे । त्रि० वरतमे ॥ उरुतमे ॥ अयमेषामतिशयेनवर : ० उरुर्वा । अतिशायने० इष्ठन् । प्रियस्थिरेति० उरोर्वर्भाव : ॥ वत्से ॥

वरी । स्त्री० शतावर्याम् ॥ नीलोत्पलाकारपुष्पत्वात् । वृणोति । वृञ् । पचाद्यच् । गौरादि : ॥ सूर्य्यपत्नीति ॥

वरीयान् । पुं० विष्कम्भादिष्वष्टादशेयोगे । तत्रजातस्यफलंयथा । दाताद्यालु : सुतरांसुवेश : सत्कर्मकर्त्तामधुर : स्वभाव : नरोबलीयान्धनवान्जनाढ्योयोगेवरीयान्यदिजन्मकाले ॥ त्रि० अतियूनि ॥ श्रेष्ठे । अतिविस्तारे ॥ अयमनयोरतिशयितउरुर्वरोवा । द्विवचनेतीयसुनिप्रियस्थिरेति० उरोर्वरादेश : ॥

वरीवर्द : । पुं० वलीवर्दे ॥

वरुट : । पुं० म्लेच्छजातिविशेषे ॥ यथा । पुलिन्दानाहलानिष्ठ्या : शवरावरुटाभटा : । मालाभिल्ला: किरातास्त्वसर्वेपिम्लेच्छजातय : ॥ इतिहेमचन्द्र : ॥

वरुड : । पुं० अन्त्यजजातिविशेषे ॥ यथा । रजकश्चर्मकारश्चनटोवरुडएवच । कैवर्त्तमेदभिल्लाश्चसप्तैतेचांत्यजा : स्मृता : ॥ एतेषांचस्त्रियोगत्वाभुक्त्वाचप्रतिगृह्यच । पतत्य

ज्ञानतोविप्रोज्ञानात् साम्यन्तुगच्छति ॥ इतियम : ॥ अस्योत्पत्तिर्यथा । कैवर्त्तस्यचकन्यायांशौण्डिकाद्वैसौचिक : । सौचिक्यांशौण्डिकाज्जातोनटोवरुडएवच ॥ इ० प० प० ॥

वरुण : । पुं० पश्चिमाशापतौ । प्रचेतसि । पाशिनि । यादसांपतौ । अप्पतौ ॥ यादसामर्थ्ये तेषांराजा वरुणोनामभगवतोविभूति: ॥ व्रियते०वृणोतिवा । वृञ्० । कृवृदारिभ्यउनन् ॥ अप्सु । जले ॥ स्वरश्मिसंवरणात्सायङ्कालेसूर्य्ये ॥ तरुविशेषे । वरणे । सेतौ । तिक्तशाके । कुमारके । अश्मरीघ्ने । श्वेतवृक्षे । तमाले । वरुणा० इ० भा० प्र० ॥ अस्यगुणा : । वरुण : पित्तलोभेदीश्लेष्मकृच्छ्राश्ममारुतान् । निहन्तिगुल्मवातास्त्रकृमींश्चोष्णोग्निदीपन: ॥ कषायोमधुरस्तिक्त : कटुकोरूक्षकोलघु : ॥ अपिच । वरुणोनिलशूलघ्नोभेदीचोष्णोश्मरोहर : । पुष्पंवरुणजग्राहीपित्तघ्नमामवातजित् ॥ *

वरुणजा । स्त्री० मदिरायाम् ॥

वरुणात्मजा । स्त्री० मदिरायाम् ॥ वरुणालयेपिवरुण: । तस्यात्मजा॥

वरुणानी । स्त्री० वरुणस्यपत्न्याम् ॥ . वरुणस्यस्त्री० । इन्द्रवरुणेतिङी षानुकौ ॥

वरुणालय : । पुं० समुद्रे ॥ वरुणस्य आलय : ॥

वरुत्रम् । न० प्रावरणे । उत्तरीयवस्त्रे ॥ वृणोति । वृञ्० । अशित्रादिभ्यइत्रोत्रावितिउत्रप्रत्यय : ॥

वरुल : । पुं० सम्भक्ते ॥

वरूथ : । पुं० रथगुप्तौ । परप्रहरणाभिघातरक्षार्थंरथस्यसन्नाहवदावरणकद्रव्ये ॥ वरूथोरथगुप्तिर्यातिरोधत्त रथस्थितमितिसज्जन : ॥ पिके ॥ काले ॥ समूहे ॥ त्रि० वरणीये ॥ न० चर्म्मणि ॥ वर्म्मणि ॥ वेश्मनि ॥ व्रियतेरथोऽनेन । वृञ्वरणे । जॄवृञ्भ्यांमूथन् ॥

वरूथाधिपति : । पुं० सेनान्याम् ॥

वरूथी । त्रि० गुप्तिमति ॥ रथिनि ॥

वरूथिनी । स्त्री० सेनायाम् ॥ वरूथा : सन्त्यस्याम् । इनि : ङीप् ॥

वरेण्य : । पुं० वह्नौ ॥ प्रजापतौ ॥ ध्यानेनसूर्य्यमण्डलेद्रष्टव्ये पुरुषे ॥ तथाचयोगियाज्ञवल्क्य : । वरेण्यंवरणीयंस्यज्जन्मसंसारभीरुभि : ॥ आदित्यान्तर्गतंयच्चभर्गाख्यंवामुमुक्षुभि : । जन्ममृत्युविनाशाय दु : खस्यत्रिविधस्यच । ध्यानेनपुरुषोयस्तुद्रष्टव्य : सूर्य्यमण्डलेइति ॥ न० कुङ्कुमे ॥ त्रि० प्रधाने ॥ वरणीये ॥ व्रियते । वृञ्० ।

बृ अण्यः ॥

बरेन्द्री । स्त्री॰ गौडदेशे ॥

बरेश्वरः । पुं॰ सदाशिवे । बराणा
मीश्वरः ॥

बरोटम् । न॰ मरुवकपुष्पे ॥

बरोलः ।) पुं॰
बरोली ।) स्त्री॰ बरटे ॥

बर्करः पुं॰ नर्म्मणि । परिहासे ॥
युवपशौ ॥ छागे । बकरा॰ इ॰भा॰
प्र॰ अस्यमांसगुणाः । यथा सहिङ्गु
नाज्येनयुतंसुपक्वमजासुतस्यामिष
मल्पकस्य । एलालवङ्गोषणयोगयो
गात्करोतिपुष्टिं जठरानलस्य ॥ अ
जासुतस्यबालस्यमांसं गुरुतरंस्मृत
म् । हृद्यं मृदुतरंश्रेष्ठं सुस्वादुबलदं
स्मृतम् ॥ बर्कर्यास्तु । सिद्धार्थसम्भवेतै
लेघृतेवोपस्करान्विते । साधितञ्चा
प्रसूतायाः पलमाजं गुणोत्तमम् ।
अजाऽप्रसूतासम्भूतं मांसं पीनस-
नाशनम् । शुक्रकासारुचिशोफेहित
मग्नेश्चदीपनम् ॥ अजासुतस्यपीन-
स्ययौवनस्थस्यसाधितम् । घृतरामठ
ठसंयुक्तोपस्करैरसवत्पलम् ॥ वा
तपित्तहरंबल्यं सुस्वादुरुचिकारक-
म् । हृद्यं पीनसकासार्श्ःशोष-
घ्नं पुष्टिकृत्परम् ॥ इतिपिठौरा ॥
अथछिलाधिया । स्थूलनिष्कासित-
तान्त्रस्यमांसंक्लृप्तमजस्यच । रन्धितं
बहुधासूदैरावृतादिकमस्तकम् ॥ त
न्मांसंमांसदंबल्यं रुच्यं पित्तानिला
पहम् । सुस्वादुमधुरंपाकेकिञ्चित्क
फकरंस्मृतम् । वर्कते । इकषादा
ने । बाहुलकादरन् ॥

बर्कराटः । पुं॰ कटाक्षे ॥ तरुणादि
त्यरोचिषि ॥ नारीपयोधरोत्स-
ङ्गकान्तदन्तनखक्षते ॥ इतिमेदि
निकरः ॥

वर्गः । पुं॰ स्वजातीयसमूहे । समा
नधर्म्मिभिः प्राणिभिरप्राणिभिर्वा
पलक्षितेवृन्दे ॥ यथा । कवर्गः
पशुवर्गः । इति ॥ ग्रन्थपरिच्छे
दे ॥ यथा । सर्गोवर्गपरिच्छेदोद्-
घाताध्यायाङ्कसङ्ग्रहाः । उच्छ्वा
सः परिवर्त्तश्चपटलः काण्डम-
स्त्रियाम् ॥ स्थानंप्रकरणंपर्वाह्णि
कञ्चग्रन्थसन्धयः ॥ समानाङ्कद्वय
स्यपूरणे । कृतौ ॥ वृज्यते । वृजीव
र्ज्जने । घञ् । कुत्वम् ॥

वर्गोत्तमः । पुं॰ नवांशानांमध्येस्वां
शे ॥ यथाचराणांमेषकर्कटतुलाम
कराशीनांप्रथमोंशः । स्थिराणां
वृषसिंहवृश्चिककुम्भानांपञ्चमोंशः ।
द्व्यात्मकानांमिथुनकन्याधनुर्मीना
नांनवमोंशः । चराणांप्रथमेचांशे
स्थिराणांपञ्चमेतथा । नवमेद्व्यात्म
कानाञ्चवर्गोत्तमइतिस्मृतः ॥
अपिच । मेषाद्यामकराद्याश्चतुला
द्याः कर्कटादयः । क्रमान्नवांशा

राशीनांस्वांशावर्गोत्तमाः स्मृताः॥ इति॥

वर्च्चाः। पुं० चन्द्रात्मजे॥ यथा। रोहिण्यामभवद्वर्च्चाश्च स्त्रीयेन चन्द्रमाः। त्रि०॥ न० रूपे॥ विष्ठायाम्॥ तेजसि॥ वर्च्चते। वर्च्चदीप्तौ। सर्व्वधातुभ्योऽसुन्॥

वर्च्चस्कः। पुं० न० गूथे। पुरीषे। विष्ठायाम्॥ वर्च्चते० वर्च्च्यतिवा। वर्च्च०। असुन्। कुत्सायांकन्॥

वर्च्चस्वी। पुं० चन्द्रमसि॥ त्रि० वर्च्चोविशिष्टे॥ अस्मायामेधेतिमत्त्वर्थीयेविनिः॥

वर्ज्जनम्। न० हिंसायाम्॥ त्यागे॥

वर्ज्जनीयः। त्रि० त्यागार्हे। वर्ज्ज्ये॥

वर्ज्जितः। त्रि० परित्यक्ते॥ वृजेः॥ क्तः॥

वर्ज्यः। त्रि० त्याज्ये। वर्ज्जनीये॥

वर्णः। पुं० द्विजादौ। ब्राह्मणादौ। ब्राह्मणे। क्षत्त्रिये। वैश्ये। शूद्रे॥ देवेषुवर्णायथा। आदित्याः क्षत्त्रियास्तेषांविशस्तुमरुतस्तथा। अश्विनौचस्मृतौशूद्रौतपस्युग्रेसमास्थितौ। स्मृतास्त्वाङ्गिरसादेवाब्राह्मणाइतिनिश्चयः। अपिच। चत्वारः कथितावर्णाआश्रमाअपिसुव्रते। आचाराश्चापिवर्णानामाश्रमाणांपृथक्पृथक्॥ कृतादौकलिकालेतुवर्णाः पञ्चप्रकीर्त्तिताः। ब्राह्मणः क्षत्त्रियोवैश्यः शूद्रः सामान्यएवच॥ सामान्योवर्णसङ्करः॥ शुक्लादौ॥ सचबहुविधोयथा। श्वेतः १। पांडुः २ धूसरः ३। कृष्णः ४। पीतः ५। हरितः ६। रक्तः ७। शोणः ८। अरुणः ९। पाटलः १०। श्यावः ११। धूम्रः १२। पिङ्गलः १३। कर्बुरः १४। यथाहामरः। शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डराः। अवदातः सितोगौरोऽवलक्षोधवलोऽर्जुनः॥ १॥ हरिणः पाण्डुरः पाण्डुः २। ईषत्पाण्डुस्तुधूसरः ३। कृष्णेनीलासितश्यामकालश्यामलमेचकाः ४॥ पीतोगौरोहरिद्राभः ५ पालाशोहरितोहरित् ६ लोहितोरोहितोरक्तः ७। शोणः कोकनदच्छविः ८॥ अव्यक्तरागस्त्वरुणः ९। श्वेतरक्तस्तुपाटलः १०। श्यावः स्यात्कपिशो ११ धूम्रधूमलौकृष्णलोहिते १२॥ कडारः कपिलः पिङ्गपिशङ्गौकद्रुपिङ्गलौ १३। चित्रंकिर्मीरकल्माषशबलैताश्चकर्बुरे १४॥ गुणेशुक्लादयः पुंसिगुणिलिंगास्तुतद्वति। इति। यशसि॥ गुणे। गजच्चित्रकम्बले। प्रवेण्याम्। आस्तरणे॥ हाथीकीझूल इ० भा०॥ स्तुतौ॥ काञ्चने॥

व्रते ॥ गीतक्रमे ॥ न॰ कुङ्कुमे ।
पुं॰ न॰ भेदे । रूपे ॥ विलेपने ॥
अक्षरे । अकारादिवर्णः सच द्विवि
धः । ध्वन्यात्मकोऽक्षरात्मकश्च ॥
अक्षरात्मकस्योच्चारणमुक्तं नारदात
न्त्रे । यथा । श्रीशिव उवाच । वि
शेषं कथयाम्यद्य प्राच्यार्याः कण्ठतः
स्वराः । स्वरद्वयं जिह्वया मूर्द्धद्वयं
जिह्वद्दन्तजम् ॥ मुखस्थानाच्चलौ वा
च्याः सकारः कण्ठतालजइति ॥
चित्रे । यशसि ॥ तालविशेषे ॥ ष
ड्जादिगतौ ॥ षड्गरागे ॥ व्रिय
तेऽनेन । वृञ्॰ । कृवृजृसिद्द्रुपन्य
निस्वपिभ्यो नित्इति नः ॥ यद्वा ।
वर्ण्यते वर्णाः सन्त्यस्य । अर्शआ
द्यच् ॥ वर्ण्यतेऽर्थोऽनेनवा । व
र्णं वर्णने॰ वर्ण प्रेरणे वा । घञ्
॥ वर्णयतिवा । अच् ॥

वर्णकः । पुं॰ चारणे ॥ मण्डले ॥
न॰ हरिताले ॥ घृष्टचन्दनादिवि
लेपने ॥ गात्रानुलेपनयोग्यपिष्ट
घृष्टवासुगन्धिद्रव्ये ॥ चन्दने ॥
पुं॰ स्त्री॰ हिङ्गुलहरितालका
चनीलीकादौ ॥ पुं॰ न॰ चन्दने
॥ विलेपने ॥ त्रि॰ वक्तरि ॥ वर्णं
करोति॰ वर्णयति॰ वक्तीतिवा ।
वर्ण॰ ॥ ण्वुल् ॥

वर्णकम्बलः । पुं॰ आस्तरणे ॥

वर्णकविः । पुं॰ कुवेरात्मजे ॥

मायुराजे ॥

वर्णका । स्त्री॰ प्रावर्णभेदे ॥ व
र्णश्वर्णक्रियाविस्तारगुणावचनेष्विति
चौरादिकः । ततोण्वुल् । वर्ण
कातान्तग्द्दत्तोऽस्त्वन ॥

वर्णकूटः । पुं॰ योटकविशेषे ॥ य
था । क्षात्रविट्शूद्रविप्राः स्युः
क्रमान्मेषादिराशयः । तत्रवर्णा
धिकाकन्यानैवोद्वाह्याकदाचन ॥
दोषस्तु । वर्णज्येष्ठातुयानारीवर्ण
हीनस्तुयः पुमान् ॥ विवाहं यदि
कुर्वीत तस्याभर्ताविनश्यतीति ॥

वर्णकूपिका । स्त्री॰ मसीधान्याम् ॥

वर्णक्रिया । स्त्री॰ वर्णकरणे ॥ यथा ।
वर्णस्यकरणे देयं कुङ्कुमं रक्तचन्दन-
म् । ताम्बूलं यच्चयद्युक्तं तच्चतच्च
प्रयोजयेत् ॥ पाक्षिषु गुरुणादेयो-
गोत्स्यजैचौरजेषु च ॥ शेषेषु पाक
योगेषु धूपयेद्धिङ्गुसर्पिषा ॥

वर्णचारकः । पुं॰ चित्रकारे ॥

वर्णज्येष्ठः । पुं॰ ब्राह्मणे ॥ वर्णानां॰
वर्णेषुवाज्येष्ठः ॥ त्रि॰ स्वर्णापे
क्षयोत्तमवर्णे ॥

वर्णतूलिः ।)
वर्णतूलिका ।) स्त्री॰ लेखन्याम् ॥
वर्णतूली ।)

वर्णदम् । न॰ कालीयके ॥ त्रि॰ व
र्णदातरि ॥

वर्णदात्री । स्त्री॰ हरिद्रायाम् ॥

त्रि० वर्णदातरि ॥
वर्णदूतः । पुं० लिखे । वाचिकहार
के ॥
वर्णधर्म्मः । पुं० न० वर्णाधिकृत
धर्म्मे ॥ वर्णत्वमेकमाश्रित्ययोधर्म्मः
सम्प्रवर्त्तते । वर्णधर्म्मः सउक्तस्तु
यथोपनयनंनृपेतिभविष्यपुराणम्
॥ अपिच । यजनंयाजनंदानंब्रा
ह्मणस्यप्रतिग्रहः । अध्यापनंचाध्य
यनंषट्कर्म्माणिद्विजोत्तमाः ॥
दानमध्ययनंयज्ञोधर्म्मःक्षत्रियवैश्य
योः । दण्डोयुद्धंक्षत्रियस्यकृषिर्वै
श्यस्यशस्यते ॥ शुश्रूषैवद्विजाती
नांशूद्राणांधर्म्मसाधनम् । कारुक
र्म्मतथाजीवः पाकयज्ञोपिधर्म्मतः
॥ क्षमादमोदयादानमलोभस्त्याग
एवच । आर्ज्जवंचानसूयाचतीर्था
नुसरणंतथा ॥ सत्यंसन्तोषआस्ति
क्यंश्रद्धाचेन्द्रियनिग्रहः । देवता
भ्यर्च्चनंपूजाब्राह्मणानांविशेषतः
॥ अहिंसाप्रियवादित्वमपैशुन्यम
कल्कता । सामासिकमिमंधर्म्मं
चातुर्व्वर्ण्येऽब्रवीन्मुनिः ॥ प्राजा
पत्यंब्राह्मणानांस्मृतंस्थानंक्रिया
वताम् । स्थानमैन्द्रंक्षत्रियाणां
सङ्ग्रामेष्वपलायिनाम् ॥ वैश्यानां
मारुतंस्थानंस्वधर्म्ममनुवर्त्तताम्
। गान्धर्व्वंशूद्रजातीनांपरिचारेणव
र्त्तताम् । इतिकौर्म्मे २ अध्या

यः ॥
वर्णनम् । न० उपवर्णने ॥ स्तवने
॥ शुक्लपीतादिवर्णयोजने ॥
वर्णना । स्त्री० प्रशंसायाम् । गुण
कथने । स्तवे ॥
वर्णनीयः । त्रि० वर्ण्ये । वर्णित
व्ये ॥
वर्णपात्रम् । न० चित्रकारस्यनीलाद्या
दिवर्णाधारे ॥
वर्णपुष्पः ।) पुं० महासहायाम्
वर्णपुष्पकः ।)
। राजतरुणीपुष्पवृक्षे । अम्लाने ॥
वर्णपुष्पी । स्त्री० उष्ट्रकाण्डीपुष्पवृ
क्षे ॥
वर्णप्रसादनम् । न० अगुरुणि ॥
वर्णमाता । स्त्री० भारत्याम् ॥ लेख
न्याम् ॥
वर्णमातृका । स्त्री० सरस्वत्याम् ॥
वर्णमाला । स्त्री० क्रमागताकाराद्य
क्षरसमूहे । मातृकायाम् ॥ वर्णा
नांमालेव ॥ तत्रसंस्कृतवर्णाः ५० ।
जपमालायाम् ५१ । इङ्गरेजीयव
र्णाः २६ । फरासीयाः २३ । हि
ब्रु० अर्थात्इहूदीयाः २२ । आ
रबीयाः २८ । पारसीयाः ३१ ।
तुरुस्कीयाः ३३ । रूशीयाः ४१ ।
ग्रिक्० अर्थात्यूनानीयाः २४ ।
लाटिन्देशीयाः २२ । डच्०
अर्थात्पोलन्दाजीयाः २६ । स्याम्

देशीया : २७ । इटेलीदेशीया : २० । तातारीया : २०२ । वर्म्म देशीया : १८ । चीनदेशीयवर्णा : शब्दात्मका : तत्सख्यासङ्ख्या : ८०००० ॥ इतिशब्दकल्पद्रुमेरा धाकान्तदेव : ॥

वर्णरेखा ।)
वर्णलेखा ।) स्त्री० कठिन्याम् ॥
वर्णलेखिका ।)

वर्णवती । स्त्री० हरिद्रायाम् ॥ त्रि० वर्णविशिष्टे ॥ वर्णोस्त्यस्याम् । रसादिभ्यश्चेतिमतुप् । उगित्वान् ङीप् ॥

वर्णविक्रिया । स्त्री० वर्णापचारे ॥ +

वर्णविलोडक : । पुं० श्लोकर्त्तने । काव्यच्छायाहृति ॥ सन्धिचौरे ॥

वर्णसङ्कर : । पुं० सङ्कीर्णाचरे ॥ मिश्रितजातौ । मूर्द्धाभिषिक्तमादिष्व्यकरणाद्यनुलोमप्रतिलोमजातेऽन्तरालजातौ ॥ वर्णयोर्वर्णानांवासङ्करोयस्मिन्नुजनयितव्येसवर्ण: सङ्कर :॥ व्यभिचारेणवर्णानामवेद्यावेदनेनच । स्वकर्मणाञ्चत्यागेनजायन्तेवर्णसङ्करा : ॥

वर्णसङ्घात : । पुं० अक्षरसमाम्नाये ॥

वर्णसमाम्नाय : । पुं० वर्णमालायाम् ॥

वर्णसि : । पुं० जले । वृणोति । वृ अ० । सानसिवर्णसीत्यादिना०

असिप्रत्ययेधातोर्नुक्च ॥

वर्णा । स्त्री० आढक्याम् ॥

वर्णाङ्का । स्त्री० लेखन्याम् ॥

वर्णाट : । पुं० गायने ॥ चित्रकरे ॥ स्त्रीकृतजीवने ॥

वर्णात्मा । पुं० शब्दे ॥

वर्णाश्रमधर्म्म : । पुं० वर्णाश्रमोभयाऽधिकृतधर्मे ॥ यथा । वर्णत्वमाश्रमत्वञ्चयोधिकृत्यप्रवर्त्तते । सवर्णाश्रमधर्मस्तुमौञ्जीयामेखलायथा ॥ वर्णाश्रमयोधर्म्मे ॥ सचोक्त : श्रीमहानिर्वाणतन्त्रे । यथा । श्रुत्वाधर्मान्बहुविधान्भवानीभवमोचिनो । हितायजगतांमाताभूय : श ङ्करमब्रवीत् ॥ श्रीदेव्युवाच । श्रुतं बहुविधंधर्ममिहामुत्रसुखप्रदम् । धर्मार्थकामदंविघ्नहरंनिर्वाणकारणम् ॥ साम्प्रतंश्रोतुमिच्छामित्वत्तोवर्णाश्रमान्विभो । यत्रयेविहिताचारा : कृपयावदतानपि ॥ श्रीसदाशिवउवाच ॥ चत्वार : कथितावर्णाआश्रमाअपिसुव्रते । आचारायापितद्वर्णानामाश्रमाणांपृथक्पृथक् ॥ कृतादौ० कलिकालेतुवर्णा : पञ्चप्रकीर्त्तिता: । ब्राह्मण: क्षत्रियोवैश्य : शूद्र:सामान्यएवच ॥ एतेषांसर्ववर्णानामाश्रमौद्वौमहेश्वरि । तेषामाचारधर्मांश्चशृणुष्वावदामिते ॥ पुरैवकथितंतावत्

कलिसम्भववर्जितम् ॥ तपः स्वा
ध्यायहीनानांनृणामल्पायुषामपि।
क्लेशप्रयासाशक्तानांकुतोदेहपरिश्र
मः ॥ ब्रह्मचर्याश्रमोनास्तिवानप्र
स्थोपिनप्रिये। गार्हस्थोभैक्षुकश्चै
वआश्रमौद्वौकलौयुगे ॥ गृहस्थस्य
क्रियाः सर्वाआगमोक्ताः कलौयु
गे। नान्यमार्गैः क्रियासिद्धिः
कदापिगृहमेधिनाम् ॥ भैक्षुके
प्याश्रमेदेविवेदोक्तंदण्डधारणम्।
कलौनास्त्येवतत्त्वज्ञेयतस्तच्छ्रौत
संस्कृतिः ॥ शैवसंस्कारविधिना
ऽवधूताश्रमधारणम्। तदेवकथि
तंभद्रेसंन्यासग्रहणंकलौ ॥ विप्रा
णामितरेषाञ्चवर्णानांप्रव्रज्याकलौ।
उभयत्राश्रमेदेविसर्वेषामधिकारि
ता ॥ सर्वेषामेवसंस्काराः कर्मा
णिशैववर्त्मना। विप्राणामितरेषां
स्वकर्म्मलिङ्गंपृथक्पृथक् ॥ जात
मात्रोगृहस्थः स्यात्संस्काराद्दाश्र
मीभवेत्। गार्हस्थ्यंप्रथमंकुर्याद्य
थाविधिमहेश्वरि ॥ तत्त्वज्ञानेसमु
त्पन्नेवैराग्यंजायतेयदा। तदासर्वं
परित्यज्यसंन्यासाश्रममाश्रयेत् ॥ वि
द्यामुपार्ज्जयेद्बाल्येधनंदारांश्चयौव
ने। प्रौढेधर्म्याणिकर्माणिचतुर्थेप्रव्र
जेत्सुधीः ॥ मातरंपितरंवृद्धंभार्यां
चैवपतिव्रताम्। शिशुञ्चतनयंहि
त्वानावधूताश्रमंव्रजेत् ॥ मातॄः

पितॄन्शिशून्दारान्स्वजनान्बा
न्धवानपि। यः प्रव्रजतिहित्वैता
न्समहापातकीभवेत् ॥ मातृहा
पितृहासस्यात्स्त्रीवधीब्रह्मघातकः
। असन्तर्प्य स्वपित्रादीन्योगच्छेत्
भिक्षुकाश्रमे ॥ ब्राह्मणोविप्रभिन्न
श्चस्वस्ववर्णोक्तसंस्क्रियाः। शैवेन
वर्त्मनाकुर्यादिशधर्मः कलौयुगे ॥
श्रीदेव्युवाच। कोवाधर्मोगृहस्थस्य
भिक्षुकस्यचकिंविभो। विप्रस्यवि
प्रभिन्नानांसंस्कारादीनिमेवद ॥
श्रीसदाशिवउवाच ॥ गार्हस्थ्यंप्र
थमंधर्म्मंसर्वेषामनुजन्मनाम्।
तदेवकथयाम्यादौशृणुकालिनित
त्त्वतः ॥ ब्रह्मनिष्ठोगृहस्थः स्याद्ब्र
ह्मज्ञानपरायणः। यद्यत्कर्मप्रकु
र्वीततद्ब्रह्मणिसमर्पयेत् ॥ नमि
थ्याभाषणंकुर्यात्नचशाठ्यंसमा
चरेत् ॥ देवतातिथिपूजासुगृहस्थो
निरतोभवेत् ॥ मातरंपितरञ्चैव
साक्षात्प्रत्यक्षदेवताम्। मत्वागृ
हीनिषेवेतसदासर्वप्रयत्नतः ॥ तु
ष्टायांमातरिशिवेतुष्टेपितरिपार्व
ति। तवप्रीतिर्भवेद्देविपरब्रह्मप्र
सीदति ॥ त्वमाद्याजगतांमातापि
ताब्रह्मपरात्परम्। युवयोः प्रीण
नंयस्मात्तस्मात्किंगृहिणांतपः
॥ आसनंशयनंवस्त्रंपानंभोजनमे
वच। तत्तत्समयमाज्ञायमात्रे

पित्रे नियोजयेत् ॥ श्रावयेन्मृदुलां
वाणीं सर्व्वदा प्रियमाचरेत्। पित्रोरा
ज्ञानुसारी स्यात् सत्पुत्रः कुलपाव
नः ॥ औद्धत्यं परिहासञ्च तर्जनं
परिभाषणम् । पित्रोरग्रे न कुर्वीत
यदीच्छेदात्मनो हितम् ॥ मातरं
पितरं वीक्ष्य नत्वोत्तिष्ठेत् ससम्भ्रमः
। विनाज्ञया नोपविशेत् संस्थितः
पितृशासने ॥ विद्याधनमदोन्मत्तो
यः कुर्यात् पितृहेलनम् । स याति
नरकं घोरं सर्व्वधर्म्मबहिष्कृतः ॥
मातरं पितरं पुत्रं दारानतिथिसो
दरान् । हित्वा गृही न भुञ्जीयात् प्रा
णैः कण्ठगतैरपि । वञ्चयित्वा गु
रून् बन्धून् यो भुङ्क्ते स्वोदरम्भरः
। इहैव लोके गर्ह्योऽसौ परत्र नारकी
भवेत् ॥ गृहस्थो गोपयेद्दारान् विद्या
मभ्यासयेत् सुतान् । पोषयेत् स्वज
नान् बन्धूनेष धर्म्मः सनातनः ॥
जनन्या वर्द्धितो देहो जनकेन प्रपोषि
तः । स्वजनैः शिक्षितः प्रीत्या
सोऽधमस्तान् परित्यजेत् ॥ एषामर्थे
महेशानि कृत्वा कष्टशतान्यपि । प्री
णयेत् सततं शक्त्या धर्म्मो ह्येष सना
तनः ॥ स धन्यः पुरुषो लोके सत्कृ
तो परमार्थवित् । ब्रह्मनिष्ठः सत्य
सन्धो यो भवेन्मानवः ॥ न भार्यां
ताडयेत् क्वापि मातृवत् पालयेत् सदा
। न त्यजेद् घोरकष्टेऽपि यदि साध्वी

वर्णाश्रमधर्म्मः

पतिव्रता ॥ स्थितेषु स्वीयदारेषु स्त्रि
यमन्यां न संस्पृशेत् । दुष्टेन चेतसा
विद्वानन्यथा नारकी भवेत् ॥ विरले
शयनं वासं त्यजेत् प्राज्ञः परस्त्रिया
। अयुक्तभाषणञ्चैव स्त्रियं शौर्य्यं न द
र्शयेत् ॥ धनेन वाससा प्रेम्णा श्रद्ध
यामृतभाषणैः । सततं तोषयेद्दा
रान् नाप्रियं क्वचिदाचरेत् ॥ उत्स
वे लोकयात्रायां तीर्थेष्वन्यनिकेतने
। न पत्नीं प्रेषयेत् प्राज्ञः पुत्रामात्य
विवर्ज्जिताम् ॥ यस्मिन्नरे महेशानि
तुष्टा भार्या पतिव्रता । सर्व्वधर्म्मः कृतं
तेन भवतीप्रिय एव सः ॥ चतुर्व्वर्षा
वधि सुतान् लालयेत् पालयेत् पिता
। ततः षोडशपर्य्यन्तं गुणान् विद्या
ञ्च शिक्षयेत् ॥ विंशत्यब्दाधिकान्
पुत्रान् प्रेरयेद् गृहकर्म्मसु । ततस्तां
स्तुल्यभावेन मत्वा स्नेहं प्रदर्शयेत् ॥
कन्याप्येवं पालनीया शिक्षणीयाति
यत्नतः । देया वराय विदुषे धनरत्न
समन्विता ॥ एवं क्रमेण भ्रातॄंश्च स्व
सृभ्रातृसुतानपि । ज्ञातीन् मित्राणि
भृत्यांश्च पालयेत् तोषयेद् गृही । त
तः स्वधर्म्मनिरतानेकग्रामनिवा
सिनः । अभ्यागतानुदासीनान्
गृहस्थः परिपालयेत् ॥ यद्येवं
नाचरेद्देवि गृहस्थो विभवे सति ।
पशुरेव स विज्ञेयः स पापी लोकग
र्हितः ॥ निद्रालस्यं देहयत्नं केशवि

न्यासमेव च । आसक्तिमशनेवस्त्रे नातिरिक्तं समाचरेत् ॥ ५१ ॥ युक्ताहारो युक्तनिद्रो मितवाङ् मितमैथुनः । स्वच्छो नम्रः शुचिर्दक्षो युक्तः स्यात् सर्वकर्मसु ॥ शूरः शत्रौ विनीतः स्याद्बान्धवे गुरुसन्निधौ । जुगुप्सितान् न मन्येत नावमन्येत मानिनः ॥ सौहार्दं व्यवहारांश्च प्रवृत्तिं प्रकृतिं नृणाम् । सहवासेन तर्कैश्च विदित्वा विश्वसेत् ततः ॥ चसेद् दृष्टैरपि चुद्रात् समयं वीक्ष्य बुद्धिमान् । प्रदर्शयेत् स्वप्रभावान् नैव धर्मं विलङ्घयेत् ॥ स्वीयं यशः पौरुषञ्च गुप्तये कथितञ्च यत् । कृतं यदुपकाराय धर्मज्ञो न प्रकाशयेत् । जुगुप्सितप्रवृत्तौ च निश्चितेऽपि पराजये । गुरुणा लघुना चापि यशस्वी न विवादयेत् ॥ विद्याधनयशोधर्मान् यतमान उपार्जयेत् । व्यसनञ्चासतां सङ्गं मिथ्याद्रोहं परित्यजेत् ॥ अवस्थानुगताश्चेष्टाः समयानुगताः क्रियाः । तस्मादवस्थां समयं वीक्ष्य कर्म समाचरेत् ॥ योगच्चेमरतो दक्षो धार्मिकः प्रियबान्धवः । मितवाङ् मितहासः स्यान्मान्यायं तु विशेषतः ॥ जितेन्द्रियः प्रसन्नात्मा सुचिन्त्यः स्याद् दृढव्रतः । अप्रमत्तो दीर्घदर्शी माचास्यर्थान् विचारयेत् । सत्यं मृदु प्रियं

धीरो वाक्यं हितकरं वदेत् । आत्मोत्कर्षं तथा निन्दां परेषां परिवर्जयेत् । जलाशयाश्च वृक्षाश्च विश्रामगृहमध्वनि । सेतुः प्रतिष्ठितो येन तेन लोकत्रयं जितम् ॥ सन्तुष्टो पितरौ यस्मिन्ननुरक्ताः सुहृद्गणाः । गायन्ति यद्यशो लोकास्तेन लोकत्रयं जितम् ॥ सत्यमेव व्रतं यस्य दया दीनेषु सर्वथा । कामक्रोधौ वशे यस्य तेन लोकत्रयं जितम् ॥ विरक्तः परदारेषु निःस्पृहः परवस्तुषु । दम्भमात्सर्यहीनो यस्तेन लोकत्रयं जितम् ॥ न बिभेति रणाद्यो वै सङ्ग्रामेऽप्यपराङ्मुखः । धर्मयुद्धे मृतो वापि तेन लोकत्रयं जितम् ॥ असंशयात्मा सुश्रद्धः शास्त्रवाचारतत्परः । मच्छासमेहितो यश्च तेन लोकत्रयं जितम् ॥ ज्ञानिना लोकयात्रायै सर्वत्र समदृष्टिना । क्रियन्ते येन कर्माणि तेन लोकत्रयं जितम् ॥ शौचन्तु द्विविधं प्रोक्तं बाह्याभ्यन्तरभेदतः । ब्रह्मण्यात्मार्पणं यत्तच्छौचमान्तरिकं स्मृतम् ॥ अद्भिर्वा भस्मना वापि मलानामपकर्षणम् । देहशुद्धिर्भवेद्येन बहिः शौचं तदुच्यते ॥ गङ्गानद्यो ह्रदा वाप्यस्तथा कूपाश्चतुष्ककाः । सर्वं पवित्रजननं सुवर्णादीक्रमतः प्रिये ॥ भस्माच याज्ञिकं श्रेष्ठं मृत्स्ना तु मलवर्जिता । वासोऽजिनतृणादीनि मृद्भस्मानी-

द्विसुव्रते ॥ किमत्र बहुनोक्तेन शौ-
चाशौचविधौ शिवे । मनः पूतं भवे
द्येन गृहस्थस्तत्तदाचरेत् ॥ निद्रा
न्ते मैथुनस्यान्ते त्यागान्ते मलमूत्रयोः ।
भोजनान्ते मलैस्पृष्टे वह्निः शौचं वि-
धीयते ॥ सन्ध्यास्त्रैकालिकी कार्या
वैदिकी तान्त्रिकी क्रमात् । उपास-
नाया भेदेन पूजां कुर्याद्यथाविधि ॥
ब्रह्ममन्त्रोपासकानां गायत्रीजपना-
त्प्रिये । स्नानाद्ब्रह्मोति तद्वाच्यं स
न्ध्या भवति वैदिकी ॥ अन्येषां
वैदिकी सन्ध्या सूर्योपस्थानपूर्वक
म् । अर्घ्यदानं दिनेशाय गाय
त्रीजपनं तथा । अष्टोत्तरं सहस्रं वा
शतं वा दशधापि वा । जपानां निय-
मो भद्रे सर्वं वाह्निककर्मणि ॥ शू-
द्रसामान्यजातीनामधिकारोऽस्ति के
वलम् । आगमोक्तविधौ देवि सर्व-
सिद्धिस्ततो भवेत् ॥ प्रातः सूर्योद
यः कालो मध्याह्नस्तदनन्तरम् ।
सायं सूर्यास्तसमयस्त्रिकालानामयं-
क्रमः ॥ श्रीदेव्युवाच । विप्रादि
सर्ववर्णानां विहिता तान्त्रिकी क्रिया ।
त्वयैव कथिता नाथ सम्प्राप्ते प्रबले क
लौ ॥ तदिदानीं कथं देव विप्रान्वै
दिककर्मणि । नियोजयसि तत्स
र्वं विशेषाद्वक्तुमर्हसि । श्रीसदाशि
व उवाच । सत्यं ब्रवीषि तत्त्वज्ञे स
र्वेषां तान्त्रिकी क्रिया । लोकानां भो

गमोक्ताय सर्वकर्म सुसिद्धिदा ॥ दृ
यन्तु ब्राह्मसावित्री यथा भवति वैदि
की । तथैव तान्त्रिकी ज्ञेया प्रशस्ता
भयकर्मणि ॥ अतोऽत्र कथितं देवि
द्विजानां प्रबले कलौ । गायत्र्यामधि
कारोऽस्ति नान्यमन्त्रेषु कर्हिचित् ॥
तारोद्याकमलायाश्च वाग्भवाद्याय
थाक्रमात् । ब्राह्मणक्षत्रियविशां सा
वित्री कथिता कलौ ॥ द्विजातीनां
प्रभेदार्थं शूद्रेभ्यः परमेश्वरि ।
सन्ध्येयं वैदिकी प्रोक्ता प्रागेवाह्नि
ककर्मणाम् ॥ अन्यथा शांभवैर्मा
र्गैः केवलैः सिद्धिभाग्भवेत् ।
सत्यं सत्यं पुनः सत्यं सत्यमत्र न सं
शयः ॥ कालात्ययेऽपि सन्ध्येयं क
र्त्तव्या देववन्दिते । ओंतत्सद्ब्रह्म
चोच्चार्य मोक्षप्सुभिरनातुरैः ॥
आसनं वसनं पात्रं शय्यां यानं नि
केतनम् । गृहकं वस्तुजातञ्च स्व
च्छात् स्वच्छं प्रशस्यते ॥ समाप्याह्नि
ककर्माणि स्वाध्यायं गृहकर्म वा ।
गृहस्थो नियतं कुर्यान्नैव तिष्ठेन्निरु
द्यमः ॥ पुण्यतीर्थे पुण्यतिथौ ग्रह
णे चन्द्रसूर्ययोः । जपं दानं प्रकु
र्वाणः श्रेयसां निलयो भवेत् ॥ क
लावन्नगताः प्राणा नोपवासः प्रशस्य
ते । उपवासप्रतिनिधावेकं दानं
विधीयते ॥ कलौ दानं महेशानि स
र्वसिद्धिकरं भवेत् । ततः पात्रं

केवलं स्त्रीयोऽरिद्रः सत्क्रियान्वि
तः ॥ मासव्रत स्वपक्षाणामारम्भ
दिनमब्धिकि । चतुर्द्दश्यष्टमीशुक्ला
तथैवैकादशीकुहू ॥ निजजन्म
दिनंचैव पितृमरणवासरः ।
वैधात सवदिनञ्चैवपुण्यकालः
प्रकीर्त्तितः ॥ गङ्गानदामहानद्यो
गुरोः सदनमेवच । प्रसिद्धदेवता
स्थंच पुण्यतीर्थं प्रकीर्त्तितम् ॥
त्यक्त्वासूाध्ययनं पित्रोः शुश्रूषां
दारकाणाम् । नरकायभवेत्तीर्थं ती
र्थायव्रततान्नृणाम् ॥ नतीर्थसेवा
नारीणांनोपवासादिकाः क्रियाः
। नैवव्रतानांनियमोभर्त्तुः शुश्रूष
णंविना भर्त्तैवयोषितांतीर्थं त
पोदानंव्रतंगुरुः । तस्मात् सर्वा
त्मनानारीपतिसेवांसमाचरेत् ॥
१०१ ॥ पत्युः प्रियंसदाकुर्यात्स्वच
सापरिचर्यया तदाज्ञानुचरीभू
त्वातोषयेत् पतिवान्धवान् ॥ नेत्रे
तत्पतिंक्रूरदृष्ट्याश्रावयेन्नैवदुर्व
चः । नाप्रियंमनसावापिचरेद्भर्त्तुः
पतिव्रता ॥ कायेनमनसावाचासर्व
दाप्रियकर्म्मभिः । याप्रीणयतिभ
र्त्तारंसैवब्रह्मपदंलभेत् ॥ नान्य
वक्त्रंनिरीक्षेतनान्यैः सम्भाषणं-
चरेत् । नचाङ्गंदर्शयेदन्यानांभ-
र्त्तुराज्ञानुसारिणी ॥ तिष्ठेत् पित्रो
र्वशेबाल्येभर्त्तुः सम प्राप्तयौवने

वर्णाश्रमधर्म्मः

। वार्द्धक्ये पितृवन्धूनांनमृतन्त्राभवे
त् क्वचित् ॥ अज्ञातपतिमर्यादा
मज्ञातपतिसेवनाम् । नोद्वाहयेत्
पिताबालामज्ञातधर्मशासनाम् ॥
नरमांसंनभुञ्जीयान्नराकृतिपशूंस्त-
था । बहूपकारकान्गाश्चमांसादा
न् रसशङ्कितान् फलानिग्राम्य
वन्यानिमूलानिविविधानिच । भू
मिजातानिसर्वाणिभोज्यानिस्वेच्छ
याशिवे ॥ १०९ ॥ अध्यापनंयाज
नञ्चविप्राणांवृत्तमुत्तमम् । अशक्तौ
चत्रियविशांवृत्तैर्निर्वाहमाचरेत् ॥
राजन्यानाञ्चसङ्ग्रामेभू-
मिशासनम् । अवाशक्तौवणिग्वृ
त्तंशूद्रवृत्तमथाश्रयेत् ॥ वाणिज्या
शक्तवैश्यानांशूद्रवृत्तमदूषणम् । शूद्रा
णांपरमेशानिसेवा वृत्तंविधीयते ॥
सामान्यानान्तुवर्णानांविप्रवृत्त्यन्यवृ
त्तिषु । अधिकारोऽस्तिदेवेशिदेहया
यात्राप्रसिद्धये ॥ अद्वेष्टानिर्ममःशा
न्तः सत्यवादीजितेन्द्रियः । नि
र्मत्सरोनिष्कपटः स्ववृत्तौब्राह्मणो
भवेत् ॥ अध्यापयेत् पुत्रवत्शिष्यान्
सन्मार्गवर्त्तिनः । सर्वलोक
हितैषीस्यात् पक्षपातविनिर्मुखः
। मिथ्यालापमसूयांचव्यसनाप्रिय
भाषणम् । नीचैः प्रसक्तिंदम्भञ्च
सर्वथाब्राह्मणस्त्यजेत् ॥ युयुत्सा
गर्व्विताखर्वीसम्मानैः सम्भिकृत

मा । मृत्युर्ज्जयोवायुद्धेषुराजन्या
नांबरानने ॥ अलोभीस्यात् प्रजा
वित्तेग्रहणीयात् सम्मितं करम् ।
रचन्नङ्गीकृतंधर्म्मं पुत्रवत् पालयेत्
प्रजाः ॥ न्यायंयुद्धंतथासन्धिं कर्मा
ण्यन्यानियानिच । मन्त्रिभिः सह
कुर्वीतविचार्य्यसर्वथान्नृपः ॥ धर्म
युद्धेनयोद्धव्यं न्यायदण्डपुरस्क्रियाः
। करणीयायथाशास्त्रं सन्धिंकुर्य्याद्य
थाबलम् ॥ उपायैः साधयेत्कार्य्यं
युद्धंसन्धिस्तु चशत्रुभिः । उपाया-
नुगताः सर्व्वाजयन्ते मविभूतयः ॥
स्त्रीषुचीनसङ्गाद्विरतः सदाविद्वज्ज
नप्रियः । धीरोविपत्तौदचस्त्रशौ
र्य्यवान् सम्मितव्ययी । निपुणोदु
र्गसंस्कारेशस्त्रशिक्षाविचक्षणः ।
स्वसैन्यभावान्वेषीस्यात् शिक्षयेद्र-
णकौशलम् ॥ नहन्यान्मूर्च्छिता
न् युद्धेत्यक्तशस्त्रान् पराङ्मुखान्
। बलानीतान् रिपून् देविरिपुदा
रशिशूनपि ॥ जयलब्धानिवस्तूनिस
न्धिप्राप्तानियानिच । वितरेत् ता
निसैन्येभ्योयथायोग्यविभागतः ॥
शौर्य्यवृत्तं चयोद्धॄणांस्वयंराजापृथ
क् पृथक् । बहुसैन्याधिपं नैकं
कुर्य्यादात्महितेरतः । नैकस्मिन्-
विश्वसेद्राजानैकंन्यासेनियोजयेत्
। साम्यंक्रीडापद्वासस्वनीचैः सह
विवर्ज्जयेत् ॥ बहुश्रुतः स्वल्पभा

षीजितात्मासुर्ज्जानिषानपि । बहुमा
नोपिनिर्दम्भोधीरोदण्डप्रसादयोः
स्वयं चाचारदृष्ट्याचाप्रजाभावान्वि
लोकयेत् । एवं स्वजनभृत्यानांभावा
न् पश्ये न् नराधिपः ॥ क्रोधाद्द-
म्भात् प्रमादाद्वासम्मानंशासनंतथा
। सहसानैवकर्त्तव्यंस्वामिनातत्त्वद
र्शिना ॥ सैन्यसेनाधिपामात्यव-
नितापत्यसेवकाः । पालनीयाः
सदोषाश्च दण्डाराज्ञायथाविधि
॥ उन्मत्तानसमर्थांश्चबालाँश्चमृत-
बान्धवान् । ज्वराभिभूतान्वृद्धां
श्चरक्षयेत् पितृवन्नृपः ॥ वैश्यानां
कृषिवाणिज्यवृत्तंबिद्धिसनातनं-
म् । येनोपायेनलोकानांदेहयात्रा
प्रसिध्यति ॥ अतः सर्व्वात्मनादे
विवाणिज्यकृषिकर्मसु । प्रमादव्य
सनालस्यं मिथ्याशाठ्यं विवर्ज्जयेत्
निश्चित्यवस्तुतन्मूल्यमुभयोः सम्म
तौशिवे । परस्पराज्ञाकरणं क्रय
सिद्धिस्ततोभवेत् ॥ मत्तशिशु
प्रबालानामरियस्तनृणांप्रिये । रो
गविभ्रान्तबुद्धीनामसिद्धौदान
विक्रयौ ॥ क्रयसिद्धिरदृष्टानांगुण
श्रवणतोभवेत् । विपर्य्यये तद्गुणा
नामन्यथाभवतिक्रयः ॥ कुञ्जरोष्ट्र
तुरङ्गाणांगुप्तदोषप्रकाशनात् ।
वर्षातीतेपितत्क्रयमन्यथाकर्त्तुमर्
हति ॥ धर्मार्थकाममोक्षाणांभाज

नं मानवं वपुः । अतः कुलेशित
त्वं क्रियोनसिद्धो न्मम शासनात् ॥
यवगोधूमधान्यानां लाभो वर्षगते
प्रिये । युक्तश्चतुर्थो धातूनामष्टमः
परिकीर्त्तितः ॥ ऋणं कृषौ च वाणि
ज्ये तथा सर्वेषु कर्मसु । यद्यदङ्गीकृ
तं मर्त्यैस्तत्कार्यं शास्त्रसम्मतम् ॥
दक्षः शुचिः सत्यभाषी जितनिद्रो
जितेन्द्रियः । अप्रमत्तो निरालस्यः
सेवावृत्तो भवेन्नरः प्रभुर्विष्णुसमो
मान्यस्तज्जाया जननीसमा । मान्या
स्तद्बान्धवा भृत्यैरिहामुत्रसुखेप्सुभिः ॥
भर्त्तुर्मित्राणि मित्राणि जानीयात्
तद्वैरीनरीन् । सभीतिः सर्वदा
तिष्ठेत् प्रभोराज्ञां प्रतीक्षयन् ॥ अप
मानं गृहच्छिद्रं गुप्त्यर्थं कथितञ्च य
त् । भर्त्तुर्ग्लानिकरं यच्च गोपयेदिति
यत्नतः ॥ अलोभः स्यात् स्वामिध
ने सदा स्वामिहिते रतः तत्सन्निधा
वसन्नापि क्रीडां हास्यं परित्यजेत् ॥
न पापमनसा पश्येदपि तद्गृहकिङ्क
रीः । शिविकाशय्यां हास्यञ्च ताभिः
सह विवर्ज्जयेत् ॥ प्रभोः शय्यास
नं यानं वसनं भाजनानि च । उपा
नद्भूषणं शस्त्रं नात्मार्थं विनियोजये
त् ॥ क्षमां कृतापराधश्चेत् प्रार्थयेद्
यत्नतः प्रभोः । प्रागल्भ्यं प्रौढवा
दञ्च साम्याचारं विवर्ज्जयेत् ॥ सर्वे
वर्णाः स्वस्ववर्णे ब्राह्मोद्वाहं तथाश

नम् । कुर्वीरन् भैरवीचक्रात् तत्त्व
चक्रादृते शिवे ॥ उभयत्र महेशानि
शैवोद्वाहः प्रकीर्त्तितः । तथाद
ने च पाने च वर्णभेदो न विद्यते ॥ श्री
देव्युवाच ॥ गृहस्थानामशेषेण ध
र्म्मान् कथय प्रभो । संन्यासविहि
तान् धर्म्मान् कृपया वक्तुमर्हसि ॥
श्रीसदाशिव उवाच ॥ अवधूताश्र
मो देवि कलौ संन्यास उच्यते । विधि
ना येन कर्त्तव्यस्तत्सर्वं शृणु साम्प्रत
म् ॥ ब्रह्मज्ञाने समुत्पन्ने विरते सर्व
कर्म्मणि । अध्यात्मविद्यानिपुणः
सन्न्यासाश्रममाश्रयेत् ॥ विहाय वृद्धौ
पितरौ शिशुं भार्यां पतिव्रताम् ।
त्यक्त्वाऽसमर्थान् बन्धूंश्च प्रव्रजन्नार
कीभवेत् ॥ ब्राह्मणः क्षत्रियो वै
श्यः शूद्रः सामान्य एव च । कुला
वधूतसंस्कारे पञ्चानामधिकारि
ता ॥ सम्पाद्य गृहकर्माणि परि
तोष्य परानपि । निर्ममो निलयाद्ग
च्छेन्निष्कामो विजितेन्द्रियः ॥ आहू
य स्वजनान् बन्धून् ग्रामस्थान् प्रतिवा
सिनः । प्रीत्यानुमतिमन्विच्छेद्
गृहान्निर्गमिषुर्जनः ॥ तेषाम-
नुज्ञामादाय प्रणम्य परदेवताम् ।
ग्रामं प्रदक्षिणीकृत्य निरपेक्षो गृहा
दियात् ॥ मुक्तः संसारपाशेभ्यः
परमानन्दनिर्वृतः । कुलावधूतं
ब्रह्मज्ञं गत्वा सम्प्रार्थयेदिदम् ॥ गृ

ह्याश्रमेपरब्रह्मन् समं तद्विगतं वय:
। प्रसाद कुरुमेनाथसन्न्यासग्रहणं
प्रति ॥ निवृत्तगृहकर्माणि विचा-
र्य विधिवद्गुरु: । शान्तं विवेकिनं
वीक्ष्य द्वितीयाश्रममादिशेत् तत:
शिष्य: कृतस्नानोयतात्माविहिता
ह्निक: । ऋणत्रयविमुक्त्यर्थं देव
र्षीन् चर्य्येत्पितॄन्नित्यादिविधानेन
द्वितीयाश्रमं स्वीकृत्य यथातिष्ठत्त
दाद्य । ततोनिर्द्वन्द्वरूपोऽसौ निष्का
म: स्थिरमानस: । विहरेत्स्वेच्छ
याशिष्य: साक्षाद्ब्रह्ममयोभुवि ॥
आब्रह्मस्तम्बपर्य्यन्तं सद्रूपेणविभाव
यन् । विस्मरन्नामरूपाणिध्यायन्ना
त्मानमात्मनि ॥ अनिकेत: क्षमा
वृत्तोनि: शङ्क: सङ्गवर्ज्जित: ।
निर्म्ममोनिरहङ्कार: सन्न्यासीविह
रेत्चित्तौ ॥ मुक्तोविधिनिषेधेभ्यो
निर्योगक्षेमआत्मवित् ॥ सुखदु:
खसमोधीरोजितात्माविगतस्पृह:
स्थिरात्माप्राप्तदु: खोपिसुखेप्राप्ते
पिनिस्पृह: । सदानन्द: शुचि:
शान्तोनिरपेक्षोनिराकुल: ॥ नोद्वे
जक: स्याज्जीवानांसदाप्राणिहिते
रत: । विगतामर्षभीर्दान्तोनिस्स
ङ्कल्पोनिरुद्यम: ॥ शोकद्वेषविमु
क्त:स्याच्छत्रौमित्रेसमोभवेत् । शी
तवातातपसह: समोमानापमान
यो: ॥ सम: शुभाशुभेतुष्टोयदृ-

वर्णाश्रमधर्म्म:

च्छाप्राप्तवस्तुना । निस्त्रैगुण्योनिर्वि
कल्पोनिर्लोभ: स्यादसञ्चयी ॥ य
थासत्यमुपाश्रित्यमृषाविश्वंप्रतिष्ठ-
ते । आत्माश्रितस्तथादेहोजानन्नेवं
सुखीभवेत् ॥ इन्द्रियाण्येवकुर्वन्ति
स्वंस्वंकर्मपृथक्पृथक् । आत्मासा
क्षीविनिर्लिप्तोज्ञात्वैवमोक्षभाग्भ
वेत् ॥ धातुप्रतिग्रहंनिन्दामनृतंक्री
डनंस्त्रिया । रेतस्त्यागमसूयाञ्चसं
न्यासीपरिवर्ज्जयेत् ॥ सर्वत्रसमदृ-
ष्टि: स्यात्कीटेदेवेतथानरे । सर्वं
ब्रह्मेतिजानीयात्परिव्राट् सर्वकर्म
सु ॥ विप्रान्नंश्वपचान्नंवायस्मात्त-
स्मात्समागतम् । देशंकालंतथा-
पात्रमश्नीयादविचारयन् ॥ अध्या
त्मशास्त्राध्ययनै: सदातत्त्वविचार
णै: । अवधूतोनयेत्कालंस्वेच्छा
चारपरायण: ॥ सन्न्यासिनांमृतं-
कायंदाहयेन्नकदाचन सम्पूज्यगन्ध
पुष्पाद्यैर्निखनेद्वाप्सुमज्जयेत् ॥ अ
प्राप्तयोगमर्त्यानांसदाकामाभिला-
षिणाम् । स्वभावाज्जायतेदेविप्रवृ-
त्ति: कर्मसङ्कुले ॥ तत्रापितेसानु
रक्ताध्यानार्चाजपसाधने । श्रेयस्त-
देवजानन्तस्तत्रैवदृढनिश्चया: ॥ अ
त: कर्मविधानानिप्रोक्तानिचित्त
शुद्धये । नामरूपंबहुविधंतदर्थंक-
ल्पितंमया ब्रह्मज्ञानादृतेदेविक
र्मसन्न्यसनंविना । कुर्वन्कल्पशतं

कर्मनभवेन्मुक्तिभागज्ञानः ॥ कुलावधूतस्तत्त्वज्ञोजीवन्मुक्तोनराकृतिः। साक्षान्नारायणंमत्वागृहस्थस्तंप्रपूजयेत् ॥ यतर्दशनमात्रेणविमुक्तःसर्वपातकात् । तीर्थव्रततपोदानसर्वयज्ञफलंलभेत् ॥ इतिश्रीमहानिर्वाणतन्त्रेऽष्टमोल्लासेवर्णाश्रमधर्मनिरूपणम् ॥

वर्णाङ्कः । पुं॰ मुद्गः ॥

वर्णिः । न॰ सुवर्णे ॥ वर्णैर्वेलिखाहिरण्यइत्युक्तः । अहिरण्येतु॰वलिः ॥

वर्णिकः । पुं॰ लेखके ॥

वर्णिका । स्त्री॰ कथनस्योत्कर्षे ॥ काठिन्याम् ॥ मसौ ॥ नील्यादिरागे ॥ व्याख्यायिकायाम् । ग्रन्थविशेषस्यव्याख्यायाम् ॥ स्तोत्रकल्यांम् ॥ वर्णो॰ । चौरादिकः । ततोण्वुल् । प्रत्ययस्थादितीत्त्वं ॥

वर्णितः । त्रि॰ स्तुतियुक्ते । अभिष्टुते । ईडिते । वर्ण्यतेस्म । वर्णवर्णक्रियाविस्तारगुणवचनेषु । क्तः ॥

वर्णी । पुं॰ लेखके ॥ चित्रकरे ॥ ब्रह्मचारिणि ॥ वर्णः अष्टविधमैथुनाऽभावरूपास्तुतिःसास्यास्ति । वर्णा ब्रह्मचारिणीति॰इनिः । त्रि॰ वर्णवति ॥

वर्णिनी । स्त्री॰ वनितायाम् ॥ हरिद्रायाम् ॥

वर्णिलिङ्गी । पुं॰ ब्रह्मचारिचिह्नवति ॥ वर्णीब्रह्मचारी॰ तस्यलिङ्गंचिह्नमस्यास्ति । इनिः ॥

वर्णुः । पुं॰ सूर्ये ॥ नदविशेषे ॥ वृणोति । वृञ्॰ । अजिवृरीभ्योनिच्चेतिणुः ॥ देशविशेषे ॥ वर्णुनदसमीपदेशोवर्णुः । अदूरभवश्चेत्यर्थे॰ सुवास्त्वादयणोजनपदेलुविंतिलुप् ॥

वर्ण्यः । त्रि॰ वर्णनीये । श्लाघ्ये ॥ व्याख्यातव्ये ॥

वर्त्तकः । पुं॰ अश्वस्यखुरे ॥ व्याघ्राटपक्षिणि । भारद्व इ॰ गौ॰ दे॰ भा॰ प्र॰ ॥ अस्यमांसगुणाय था । वर्त्तकोग्निकरः शीतोज्वरदोषत्रयापहः । सुरुच्यः शुक्रदोबल्योवर्त्तकाल्पगुणाततः ॥ वर्त्ततेइतुवर्त्तने । ण्वुल् । न॰ वर्त्तलोहे । नीललोहे । विदर॰ इ॰ भा॰ इ॰ केचित् ॥

वर्त्तका । स्त्री॰ वर्त्तिकायाम् । व्याघ्राटशकुनौ । वटेर॰ इ॰ भा॰ प्र॰ खगे ॥ वर्त्तकाशकुनौप्राचामितीत्त्वंन ॥

वर्त्तकी । स्त्री॰ अश्वस्यखुरे । व्याघ्राटे ॥

वर्त्तजन्मा । पुं॰ अम्बुदे । मेघे ॥

वर्त्तनः । पुं॰ वामने ॥ न॰ वृत्तौ । जीविकायाम् ॥ बहवोवर्त्तनोपायाऋषिभिः परिकीर्त्तिताः ।

सर्वेषामपि चैवैषांकुसीदमधिकंवि
दुः ॥ विशेषः कुसीदेद्रष्टव्यः ॥
वर्त्ततेऽनेन, वृतुवर्त्तने। ल्युट् ॥
साधारणवर्त्तुले ॥ न० स्त्री० तूल
मालायाम् ॥ तकुपीठे ॥ जीवने
॥ त्रि० वर्त्तिष्णौ ॥ वर्त्तनशीलः।
वृतु०। अनुदात्तेतश्चेतियुच् ॥
वर्त्तनि :। पुं० पूर्वदेशे ॥ स्त्री० प
थि ॥ वर्त्ततेऽनया। वृतु०। वर्तेश्च
त्यनिः ॥
वर्त्तनी। स्त्री० पथि। वर्त्तने ॥ त
कुपीठे। पेषणायाम् ॥ कृदिका
रादितिङीष् ॥
वर्त्तमानः। पुं० अतीतानागतभि
न्नकाले ॥ आरब्धापरिसमाप्तिर्व
र्त्तमानः कालः। यथा। महा
भारतंपठति। सचतुर्विधः यथा
। प्रवृत्तोपरतश्चैव० वृत्ताविरत
एवच ॥ नित्यप्रवृत्तः सामीप्यो
वर्त्तमानश्चतुर्विधः ॥ क्रमेणोदा
हरणानि। मांसंनखादति। आ
दौप्रवृत्तंमांसभोजनंनिवर्त्तय-
ति० इत्यर्थः। इहकुमाराः क्री
डन्ति० तदानीन्तनक्रीडनाभावेपि
पूर्वक्रीडाभावादृध्वीवर्त्तमानत्वा
त्। पर्वतास्तिष्ठन्ति० नित्यप्रवृत्
तत्वात्। किञ्चपर्वतानांस्थितत्वे
वर्त्तमानत्वपिभूतभविष्यत्काला
भ्यांसम्बन्धविवक्षयापर्वतास्तस्थुः०
स्थास्यन्तीत्यपिस्यात्। सामीप्यो
द्विविधः। भूतसामीप्ययथा।
कदाआगतोसि० इतिप्रश्ने० अ
यमेवागतोस्मि० इत्युत्तरे० वर्त्तमानत्वात्० एषो
हमागच्छामि० इत्यागतोपिवदति
भविष्यत्सामीप्ययथा। कदा०
गमिष्यसीतिप्रश्ने० एषोहंगच्छा-
मीतिगमनक्रियमाणोद्यमोपिवद
ति० इतिमुग्धबोधटीकायांदुर्गा-
दासः ॥ प्रयोगाधिकरणीभूतक्रा
लोवर्त्तमानः कालइतिनैयायि
काः ॥ अद्यतने। अधुनातने ॥
त्रि० तत्कालवृत्तौ। विद्यमाने
। स्थिते ॥ वर्त्तते। वृतु०।
शानच्।। मुक् ॥
वर्त्तरूकः। पुं० द्वौः साधिके।
द्वारपाले ॥ नदीभेदे ॥ काकनीडे
जलावटे ॥
वर्त्तलोहम्। न० लोहविशेषे। लो
हसंकरे। नीललोहे। विद्र०
इ० भा० प्र० इतिकेचित् ॥
वर्त्तिः। स्त्री० वटिकायाम्। भेष
जनिर्माणे ॥ नयनाञ्जने। लेखे ॥
गात्रानुलेपन्याम् ॥ दीपकस्यद
शायाम् ॥ दीपे ॥ वर्त्यते। वृतु०
। अन्तः अचइः वर्ततेऽनया
वा वृतु०। इ पिशिरुहीत्यादि
नेन्वा ॥ वृतेश्छन्दसीति० इर्वा
। स्वरभेदः। वाहुलकात्क्लोकेपि ॥

वर्त्तिविशेषे ॥ यथा । कतकस्य फलं शङ्खः सैन्धवं त्र्यूषणं तथा । फेनो रसाञ्जनं क्षौद्रं विडङ्गानि मनः शिला ॥ एषां वर्त्तिर्हन्ति काचं तिमिरं पटलं तथेति ॥

वर्त्तिकः । पुं॰ पक्षिविशेषे । वर्त्तके । वटेर॰ इ॰ भा॰ प्र॰ ॥

वर्त्तिका । स्त्री॰ वर्त्तकायाम् । व्याघ्राटे । वटेर । इ॰ भा॰ प्र॰ खगे ॥ अस्या मांसगुणा यथा वर्त्तिका मधुरा रूक्षा कफमारुतनाशिनी ॥ अजशृङ्ग्याम् ॥ वर्त्तौ । वर्त्ती॰ इ॰ भा॰ ॥ सा पञ्चविधा यथा । पद्मसूत्रभवा दर्भगर्भसूत्रभवा यथा ॥ शणजा बादरी वापि फलकोषोद्भवा यथा । वर्त्तिका दीपकृत्येषु सदा पञ्चविधा स्मृता ॥ वर्त्तते॰ वर्त्यते वा । वृतु॰ ण्वुल् । उदीचामतेः प्रत्ययस्थादितीत्वम् ॥ वस्तुतस्तु वर्त्तेस्तिकन्निति कन् बोध्यः ॥

वर्त्तितः । त्रि॰ नीते । निष्पादिते ॥ ग्रथिते ॥

वर्त्तितव्यः । त्रि॰ वर्त्तितुमर्हे ॥

वर्त्ती । त्रि॰ वर्त्तिष्णौ ॥

वर्त्तिष्णुः । त्रि॰ वर्त्तने ॥ वर्त्तनशीलः । अलङ्कृञितीष्णुच् ॥ वर्त्तिनि ॥

वर्त्तिष्यमाणः । त्रि॰ भविष्यत्कालादौ ॥ वर्त्तनप्रागभावाश्रये ।

वर्त्तौ । स्त्री॰ वर्त्तौ ॥

वर्त्तुलः । पुं॰ कलायविशेषे । बाटुला॰ इ॰ गौ॰ दे॰ भा॰ प्र॰ ॥ यथा । कलायस्य त्रयोभेदास्त्रिपुटो वर्त्तुलोऽकुटी । इति शब्दमाला ॥ न॰ गृञ्जने ॥ त्रि॰ गोलवस्तुनि । निस्तले । वृत्ते ॥ वर्त्तते । वृतु॰ । बाहुलकादुलच् ॥

वर्त्तुला । स्त्री॰ तर्कुपीठ्याम् । टेकोरबांटुल इ॰ गौ॰ भा॰ ॥ इति हारावली ॥

वर्त्तुली । स्त्री॰ गजपिप्पल्याम् ॥

वर्त्म । न॰ नेत्रच्छदे ॥ मार्गे । अध्वनि ॥ वर्त्ततेऽनेनास्मिन् वा । वृतु॰ । मनिन् ।

वर्त्मनिः । स्त्री॰ पथि ॥ वर्त्तन्तेऽनया । वृतु॰ । वृतेश्चत्यनिः । चान्मुडिति गोवर्द्धनः ॥

वर्त्मनी । स्त्री॰ पथि ॥ कृदिकारादिति ङीष् ॥

वर्त्स्यन् । त्रि॰ वर्त्तिष्यमाणे । लृटः सद्वेति सदादेशे॰ वृद्भ्यः स्यसनोरिति विभाषया परस्मैपदम् ॥

वर्द्धः । पुं॰ ब्राह्मणयष्टिकायाम् ॥ पूर्त्तौ ॥ छेदे ॥ न॰ सीसके ॥

वर्द्धकः । पुं॰ ब्राह्मणयष्टिकायाम् । भार्ग्याम् ॥ वर्द्धते । वृधु छेदने । ण्वुल् ॥ त्रि॰ पूरके । छेदके ॥

वर्द्धकिः। पुं० त्वष्टरि। रथकारे तक्षणि। बढ़ई० इ० तखाण० इ० भा० प्र०। वर्द्धते। वर्द्धच्छेदने। अच्। वर्द्धं कषति। कष हिंसायाम्। बाहुलकाड्डिः॥

वर्द्धकी। पुं० बढ़ई० इ० भा० प्र० वर्णसङ्करजातौ। त्वष्टरि। सूत्रधारे। रथकारे। काष्ठतक्षके॥

वर्धनम्। न० वृद्धौ॥ छेदने॥ वर्धच्छेदनपूरणयोः ल्युट्॥ त्रि० वर्धिष्णौ॥ वर्धतेतच्छीलः। वृधु वृद्धौ। अनुदात्तेतश्चेतियुच्॥ वर्धयति। नन्द्यादित्वाल्ल्युर्वा॥

वर्धनी। स्त्री० गलन्तिकायाम्। सनालजलपात्रे। बधना० बधनी० इ० भा० सम्मार्जन्याम्। बढनी० इ० भा०॥

वर्धमानः। पुं० प्रश्नभेदे॥ शरावे। एरण्डे। वीरजिने। चरमतीर्थकृति। महावीरे। विष्णौ। नारायणे। स्वस्तिके। राजगृहविशेषे। दक्षिणद्वाररहितो वर्द्धमानो धनप्रदः॥ वर्धते। वर्धच्छेदनपूरणयोः। शानच्। स्वनामप्रसिद्धे देशविशेषे। त्रि० वृद्धिमति॥

वर्धमानकः। पुं० शरावे॥ वर्धते। वृधु०। शानच्। शप्। वुन्। संज्ञायां कन्॥ त्रि० वृद्धिविशिष्टे॥

वर्धापनम्। न० नाडीच्छेदने॥ *

वर्धितः। त्रि० प्रसृते॥ छिन्ने॥ पूरिते॥

वर्धिष्णुः। त्रि० वर्धने। वृद्धिशीले॥ वर्धते० तच्छीलः वृधु०। अलङ्कृञितीष्णुच्॥

वर्ध्रः। पुं० न० त्रपुणि। सीसे॥ वरत्रायाम्॥ वर्धते० दृढबन्धनेन दीर्घीभवति। वृधु०। ऋधिवृधिभ्यां रन्। लघूपधगुणोऽरपरः॥

वर्ध्री। स्त्री० नध्राम्। वरत्रायाम्। चर्म्मरज्जौ। बधी० इ० भा०॥ वर्धते। वृधु०। रन्। गौरादित्वा न्ङीष्॥ यद्वा। औणादिकः ष्ट्रन्। गुणोऽरपरः। प्रत्ययतकारस्य० झषस्तथोर्धोऽधः इति धत्वे० षित्वान्ङीष्॥

वर्पः। न० रूपे॥ वृणोते। वृङ् सम्भक्तौ। वृङ्शीङ्भ्यां रूपस्वाङ्गयोः पुट्चेत्यसुन्० प्रत्ययस्य पुट्॥

वर्म्मकण्टकः। पुं० पर्पटे॥

वर्म्मकषा। स्त्री० चर्म्मकषायाम्। सप्तलायाम्॥

वर्म्मा। पुं० क्षत्रियस्य पद्धतौ॥ यथा। शर्म्मान्तं ब्राह्मणस्य स्याद्वर्म्मान्तं क्षत्रियस्य च। गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः॥ न० कवचे.

। तनुत्रे ॥ वृणोतिदेहम् । वृञ् व
रणे । मनिन् ॥
बर्म्मि: । पुं॰ मत्स्यविशेषे । बाँबो॰
बामी॰ इ॰ गौ॰ दे॰ भा॰ प्र॰ ॥
बर्म्मिक: । त्रि॰ वर्म्मिणि। वर्म्मास्या
स्तिव्रीह्यादित्वात्॰ ठक् ॥
बर्म्मित: । त्रि॰ धृतसन्नाहे । सन्नद्धे
। सज्जे । वर्म्मसञ्जातमस्य । तार
कादित्वादितच् ॥
बर्म्मी । त्रि॰ वर्म्मवति । वर्म्मिके ॥ व
र्म्मास्यास्ति व्रीह्यादित्वादिनि: ॥
बर्म्मिमत्स्य: । पुं॰ बांबीतिख्याते
मत्स्ये । वर्म्मिमत्स्योहरेवातपि
त्तंरुचिकरोलघु: ॥
बर्म्मुष: । पुं॰ बामिरूप॰ इ॰ गौ॰
दे॰ भा॰ प्र॰ मत्स्ये ॥
बर्य्य: । पुं॰ कन्दर्पे । स्मरे ॥ त्रि॰
वरेण्ये ॥ वर्य्यते, वरईप्सायां
चुरादावदन्त: । यचोयत् ॥
बर्य्या । स्त्री॰ पतिंवरायाम् ॥ अव
द्यपण्यवर्य्यागर्ह्यपणितव्यानिरोधे-
ष्विति॰ अप्रतिबन्धविषये॰ वृङ्
सम्भक्ताविस्यस्मात्॰ यत् ॥
बर्व्वणा । स्त्री॰ वृहन्मक्षिकायाम् ।
नीलमक्षिकायाम् ॥ वरिति । ब
र्वति । वणशब्दे । अच् ॥ यद्वा
। वर्वति । बर्वगतौ । युच् ॥
बर्व्वर: । पुं॰ पामरे । नीचे । केशे । वक्र
केशे । बावरी॰ इ॰ भा॰ ॥ चक्रले ॥

देशविशेषे ॥ यथा । मायापुरंसमा
रभ्यसप्तशृङ्गात्तथोत्तरे । बर्बरा
ख्योमहादेश: प्रोक्त: श्रीशक्तिसङ्ग
मे ॥ पारसिकेजने ॥ वृक्षविशेषे ।
सुमुखे । गरघ्ने । गन्धपत्रे । का
लबाबुइ॰ गौ॰ दे॰ भा॰ प्र॰ ॥
बर्बरि । वृञ्॰ । यङ्लुगन्त ।
पचाद्यच् । यद्वा । वृणोति । वृ
ञ्॰ । कृगॄशॄवृञ्चतिभ्य: ष्वर
च् ॥ न॰ हिङ्गुले ॥ पीतचन्दने
बोले ॥ हिमवत्प्रान्तेजन्तु॰ बटू॰
प्र॰ धूपविशेषे ॥ यथा । जलेना
लोडितंशालिपिष्टंखण्डमिश्रित
म् । धारायांपक्वंतत्पाच्यंतद्भवे
द्बर्बराह्वकम् ॥ बर्बरंबलकृत्मधु:
श्रेष्ठंपित्तानिलापहम् । रोचनं
कफकृच्छीतंहृद्यंहृल्लासनाशनं ।
बर्व्वरकम् । न॰ चन्दनभेदे । श्वेत
वर्बरके ॥
बर्व्वरा । स्त्री॰ शाकविशेषे । तुङ्
ग्याम् । खरपुष्पायाम् । अजग
न्धिकायाम् । वाबुइ॰ इ॰ भा॰
प्र॰ ॥ कृष्णार्जकस्तथाशुक्लोवटप
त्रस्ततोपर: । वर्वराचितयंरूक्षंशी
तंकटुविदाहिच ॥ तीक्ष्णंरुचिकरं
हृद्यंदीपनंलघुशाकच । पित्तल
लंकफवातास्रदद्रुकृमिविषापहम्
। पुष्पप्रभेदे ॥ वृणोति । वृञ्॰
कृगॄशॄवृञ्चतिभ्य: ष्वरच् । अनि

ष्य : षितांङीष् ॥

वर्वरी । स्त्री॰ वर्वरार्थे ॥ षित्वान् ङीष् ॥

वर्वरीक : । पुं॰ भार्ग्याम् । ब्राह्मणयष्टिकायाम् ॥ कुटिलकुन्तले । बाबरी॰इ॰भा॰ ॥ अजगन्धिकायाम् । बाबुइ॰इ॰भा॰ ॥ यूनि ॥ वृणुते । वृञ्॰ । शृपृवृञांद्वित्वक् चाभ्यासस्येति॰ईकन् ॥

वर्वा । स्त्री॰ वर्वर्याम् ॥

वर्वि : । पुं॰ घस्मरे ॥ वृणुते । वृञ्॰ । वहृभ्यांविन् ॥

वर्वुर : । पुं॰ युगलाक्षे । तीक्ष्णकण्टके । गोशृङ्गे । कफान्तके । ववूर॰ ववूल॰इ॰प्र॰वृक्षे ॥ वर्वुर : कफनुन्नाहीकुष्ठक्रमिविषापह : ॥

वर्वूर : । पुं॰ वर्वुरे ॥ इतिराजनिर्घण्ट : ॥

वर्ष : । पुं॰ न॰ भारतादौ ॥ जम्बुद्वीपे ॥ अब्दे । समायाम् । वत्सरे ॥ वृष्टौ ॥ वर्षधरे । मेघे ॥ वर्षणम्॰ वृष्यतेवा । वृषुसेचने । अज्विधौ-भयादीनामुपसङ्ख्यानमित्यच् ॥ वर्षयति॰वर्षतिवा । पचाद्यच् ॥ यद्वा ॥ वृणाति । वॄञ्वरणे । वॄतॄवदीतिस : ॥ वर्षशब्दोदिवसपरोपिदृश्यतेच॰दीर्घसत्राणिवार्षशतिकानि॰वार्षसहस्रिकाणिचेति ॥

वर्षकरी । स्त्री॰ झिल्लिकायाम् ॥

वर्षकेतु : । पुं॰ रक्तपुनर्नवायाम् ॥

वर्षकोष : । पुं॰ दैवज्ञे ॥ मासे ॥ वर्ष : कोषोऽस्य

वर्षज : । त्रि॰ वृष्टिजाते ॥

वर्षणम् । न॰ वृष्टौ ॥ वृषुसेचने । ल्युट् ॥ नचाऽचाल्युटोबाध : वृषभोवर्षणादितिभाष्यप्रयोगात्॰ल्युडपिभवतीतिकैयटादय : ॥

वर्षणि : । स्त्री॰ वर्तने ॥

वर्षपर्वत: । पुं॰ वर्षविकृतौ । भाजकगिरौ ॥ यथा । हिमवान्हेमकूटश्चनिषधोमेरुरेवंच । चैत्र : कर्णीचशृङ्गीचसप्तैतेवर्षपर्वता : ॥ इतिहारावली ॥

वर्षपाकी । पुं॰ आम्रातके ॥

वर्षपुष्पा । स्त्री॰ सहदेवीलतायाम् ॥

वर्षप्रिय : । पुं॰ चातकपक्षिणि ॥

वर्षवर : । पुं॰ शण्ढे । अत्यन्तान्तर्महल्लके । खोजा॰इ॰भा॰प्र॰ ॥ वृणोति॰वरतिवा । वृञ्वरणे॰-वरणावरणेवा । अच् । वर्षस्यवर : । येत्वल्पसत्त्वा : प्रथमक्लीबा-श्चस्त्रीस्वभाविन : । .जात्यानदुष्टा : कार्येषुतेवैवर्षवरा : स्मृता : ॥

वर्षवृद्धि : । स्त्री॰ जन्मतिथौ ॥

वर्षा : । स्त्री॰ भूम्नि॰॰प्रावृट्काले । नभोनभस्ययो : । श्रावणभाद्रयो : ॥ आषाढादिचतुर्षुमासेषु । यथा । वर्षासुसविषंतोयंदिव्यमप्याश्विनंविनेति ॥ वर्षवर्षणमत्रास्ति ।

अर्श आद्यच्। टाप्॥

वर्षांशः। पुं० मासे॥

वर्षाघोषः। पुं० महाभेके॥

वर्षाङ्गः। पुं० मासे॥

वर्षाभवः। पुं० रक्तपुनर्नवायाम्॥ त्रि० वर्षासुजाते॥

वर्षाभूः। पुं० भेके। मण्डूके॥ भूलतायाम्। गण्डूपदे। किञ्चुलुके॥ इन्द्रगोपे॥ वर्षासुभवति। भू०। भुवः संज्ञान्तरयोरिति क्विप्॥

वर्षाभूः। स्त्री० शोथघ्न्याम्। पुनर्नवायाम्॥ भेक्याम्॥

वर्षाभ्वी। स्त्री० भेक्याम्। वर्षासुभवति। भू०। क्विप्। वर्षाभ्वीत्यसाधुः। ङीष्विधायकाभावात्॥ गौरादित्वाद्वाङीष्॥ पुनर्नवायाम्॥

वर्षार्चिः। पुं० कुजे। भौमे॥

वर्षावसानः। पुं० शरत्काले॥

वर्षिष्ठः। त्रि० अतिवृद्धे॥ अयमेषामतिशयेनवृद्धः। इष्ठनि० प्रियस्थिरेति० वृद्धस्यवर्षि० आदेशः॥

वर्षीयान्। त्रि० वृद्धतरे। ज्यायसि॥ अयमनयोरतिशयेनवृद्धः। द्विवचनेतीयसुनि० प्रियस्थिरेतिवर्षि आदेशः॥

वर्षुकः। त्रि० वृष्टिकारिणि॥ वर्षतितच्छीलः। वृषुसेचने। लषपतपदेत्यादिनोकञ्॥

वर्षुकाब्दः। पुं० वर्षणशीलमेघे॥

वर्षेजः। त्रि० वर्षाकालजाते। वर्षे जे॥ विभाषावर्षक्षरशरवरादित्यलुक्॥

वर्षोपलः। पुं० करकायाम्॥ वर्षाया उपलः॥

वर्ष्मम्। न० देहे॥ इतिद्विरूपकोषः॥

वर्ष्म। न० देहे। तनौ॥ प्रमाणे॥ प्रमाणमात्रोन्नतिरितिस्वामी। इयत्तेतिभरतः॥ अतिसुन्दराकृतौ॥ वर्षति० वृष्यतेवा। वृषु०। मनिन्॥

वर्हम्। न० पुं० कलापे। मयूरपिच्छे॥ दले॥ न० ग्रन्थिपर्णे। स्थौणेये॥ परीवारे॥ वर्हति। वृहवृद्धौ। पचाद्यच्॥ वर्ह्यतेवा। वर्हहिंसायां। घञ्॥

वर्हणम्। न० पत्रे॥

वर्हिः। पुं० पावके॥

वर्हिःपुष्पम्। न० ग्रन्थिपर्णे॥

वर्हिःशुष्मा। पुं० अग्नौ॥ वर्हिः कुशः शुष्मबलमस्येतिविग्रहः॥

वर्हि। न० स्थौणेये। कुकुरौंधा० इ० भा०॥ वर्हं अन्नं प्रशस्तमस्य। अतइनिः॥

वर्हिकुसुमम्। न० ग्रन्थिपर्णे॥

वर्हिचूडा। स्त्री० खराश्वायाम्। मयूरशिखेतिप्रसिद्धायामोषधौ॥

वर्हिण : । पुं॰ मयूरे॥ वर्हमस्त्यस्य। फलवर्हाभ्यामिनच्॥

वर्हिणवाहन : । पुं॰ षडानने॥

वर्हिर्ध्वजा। स्त्री॰ पार्वत्याम्॥

वर्ही। पुं॰ मयूरे॥ वर्होऽस्त्यस्य। इनि : ॥

वर्हिःपुष्पम्। न॰ ग्रन्थिपर्णे॥

वर्हिर्ज्योति : । पुं॰ अग्नौ॥

वर्हिर्मुख : । पुं॰ गीर्वाणे। देवे॥ वर्हिरग्निर्मुखं यस्य स : ॥

वर्हिषद्। पुं॰ दैत्यदानवादीनांपितृषु॥ यथा। दैत्यदानवयक्षाणां गन्धर्वोरगरक्षसाम्। सुपर्णकिन्नराणाञ्च स्मृतावर्हिषदोऽत्रिजा : ॥

वर्हिष्ठम्। न॰ वाले। ह्रीवेरे। बाला॰। इ॰ भा॰ प्र॰ ओषधौ। वर्हिषिकुशेतिष्ठति। सुपिस्थइति क : । अम्बाम्बेतिषत्वम्॥

वर्हि : । पुं॰ हुताशने॥ चित्रके॥ यज्ञे॥ दीप्तौ॥ न॰ ग्रन्थिपर्णे॥ पुं॰ न॰ कुशे। दर्भे॥ वर्हिर्द्विविधम्। मुख्यं गौणञ्च। तत्रमुख्यं कुशकाशादिदर्भमयम्। गौणन्तु॰तत्सदृशंतृणान्तरम्। वृंहति वृद्धौ। ओष्यादि : । वृंहेर्नलोपश्चेति॰ इसि : । वर्हि : सान्त : ॥

वलम्। न॰ सैन्ये॥

वलक्ष : । पुं॰ शुक्लवर्णे। धवले॥

त्रि॰ तद्वति॥ वलते। वलसंवरणे सञ्चरणे च। क्विप्। वलमक्षत्यस्मिन्। अक्षू॰। घञ्॥ अवलक्षतेवा। अकारलोप : ॥

वलक्षगु : । पुं॰ चन्द्रे॥ वलक्षा : गावोयस्यस : । गोस्त्रियोरितिह्रस्व : ॥

वलभी। स्त्री॰ गोपानस्याम्। कुड्याच्छादनार्थंदत्तवक्रकाष्ठे। वडभ्याम्॥ पटलाधारवंशपञ्जरे॥ वलति। वल॰। बाहुलकादभच्। गौरादि : ॥

वलय : । पुं॰ कण्ठरोगे॥ वेलायाम्॥ पुं॰ न॰ कङ्कणे। कटके। प्रकोष्ठाभरणे॥ वल्यते। वल॰। वलिमलितनिभ्य : कयन्॥ अस्थिविशेषे॥ यथा। पाण्यो : पार्श्वयुगेपृष्ठेवक्षोजठरपायुषु। पादयोरपिचास्थीनिवलयानिवभाषिरे॥ लघ्वादित्रिकले॰। ऽऽ॰॥ गुर्वन्तरेपुं॰॥

वलयित : । त्रि॰ वेष्टिते। नद्यादिनारके॥ वलयंजातमस्य। तारकादित्वादितच्॥ यद्वा। वलयवत्कृतम्। तत्करोतीतिणिच्॥ क्त : ॥

वला। स्त्री॰ वलायाम्। वाट्यालके॥ विद्याविशेषे॥

वलाक : । पुं॰ क्षुद्रवके। वलायाम्॥

वलाहक : । पुं॰ बलाहके ॥

वलिकर : । त्रि॰ वलिकर्त्तरि ॥ वलिं करोति । डुकृञ्॰ । दिवाविभेतिट : ॥

वलित : । त्रि॰ वेष्टिते ॥

वलिर : । त्रि॰ केकरे । निम्नोन्नताक्षिण ॥ वलते । वल॰ । बाहुलकात्किरच् ॥

वलिशम् ।) न॰
वलिशि : ।) स्त्री॰ बलिशे । बडिशे ॥
वलिशी ।)

वली । स्त्री॰ मध्यमरेखायाम् ॥ ऊर्म्याम् ॥ जीर्णत्वचि ॥ गृहदारुणि ॥

वल्क : । पुं॰ न॰ त्वचि । वल्कले ॥ शल्के । खण्डे । पुं॰ पट्टिकालोध्रे ॥ वलते । वल॰ । शुल्कवल्कोल्कादृतिकक् ॥ यद्वा । वल्कयति । वल्कपरिभाषणे । पचाद्यच् ॥

वल्कतरु : । पुं॰ पूगवृक्षे ॥

वल्कद्रुम : । पुं॰ भूर्जवृक्षे ॥

वल्कल : । पुं॰ न॰ द्रुमत्वचि । वल्के । वक्कल॰ हु॰ भा॰ प्र॰ ॥ त्वचे । दालचीनीतिभा॰ प्र॰ ॥ वलति । वल॰ । बाहुलकात्कल : ॥ वल्कं लातीतितुस्वामी ॥

वल्कला । स्त्री॰ शिलावल्कायाम् ॥

वल्कलोध्र : । पुं॰ पट्टिकालोध्रे ॥

वल्कवान् । पुं॰ मत्स्ये ॥ त्रि॰ वल्कयुक्ते ॥

वल्किल : । पुं॰ कण्टके ॥

वल्ग : । पुं॰ न॰ अभ्यवहारे । जेमने ॥ वल्गभोजने । अच् ॥

वल्गन् । त्रि॰ धावति ॥

वल्गनम् । न॰ बहुभाषणे ॥ प्लुतगमने ॥

वल्गा । स्त्री॰ दन्तालिकायाम् । अवचेपण्याम् । अश्वमुखरज्जौ ॥ साचोत्क्षिप्तादिभेदेनचतुर्दशविधोक्ताहयलीलावत्याम् । उत्क्षिप्ताशिथिलातथोत्तरवतीमन्दाचवैहायसीरिक्षिप्तैककरार्द्धकम्बरसमोत्कीर्णाविभक्तातथा । अत्युत्क्षिप्तलोद्धृतेखलुतथा व्यागूढगोकर्णिके वाहानांकथिताश्चतुर्दशविधावल्गाप्रभेदाअमीति । तल्लक्षणानितुतत्रैवद्रष्टव्यानि ॥ अश्वप्रेरणविशेषे ॥

वल्गाविभागकुशल : । त्रि॰ वाहानां षड्विधप्रेरणाभिज्ञे ॥ यथाहभोज : । वाहनंप्रतिवाहानांषड्विधंप्रेरणंविदु : । रागावल्गाकशापार्ष्णिप्रतोदश्चभेदत : ॥ वल्गायाविभागोविविच्यप्रयोग : तत्रकुशल : ॥

वल्गितम् । न॰ घोटकस्यविशेषगमने । वेगेनवाजिप्रोपरिचरणे ॥ गमने ॥ बहुभाषणे ॥ वल्गनम् । वल्गगतौ । भावेक्त : ॥

वल्गु : । पुं॰ छागे ॥ त्रि॰ मनोज्ञे । सुन्दरे ॥ यथोक्तम् । चणमाच

मतिवल्गु जगदेतदतिफल्गु। धनलोभमपहायनमपद्मनयनाय॥ वल्गते। वल्ग०। वलेगु र्कचेत्यु :॥ वाचास्ते ॥

वल्गुकम्। न० चन्दने ॥ विपिने ॥ पणे ॥ त्रि० रुचिरे ॥

वल्गुपत्र :। पुं० वनमुद्गे ॥

वल्गुला। स्त्री० पाकुच्याम् ॥ पक्षिविशेषे। वक्रविष्ठायाम्। बादुड० इतिभाषा ॥

वल्गुलिका। स्त्री० तैलपायिकायाम्॥

वल्गुली। स्त्री० स्वविष्ठादेपक्षिविशेषे ॥

वल्भनम्। न० भक्षणे ॥

वल्मीक :। पुं० न० वामलूरे। वल्मीके॥ तन्मृत्तिकयाशौचनिषेधोयथा। वल्मीकमृत्तिकोत्खातांमृदमन्तर्जलांतथा। शौचावशिष्टांगेहाच्च नादद्याल्लेपसम्भवाम्। अन्त : प्राण्यवपन्नाश्च हलोत्खातांनकर्हिमाम् ॥

वल्लरि :। स्त्री० मञ्जर्याम् ॥ वल्लते। वल्ल०। क्विप्। ऋच्छति। ऋगतौ अच् :। वल्लचासावरिश्च ॥ मेथिकायाम् ॥ चित्रमूले ॥

वल्लव :। पुं गोदोग्धरि। गोपे ॥ भीमसेने ॥ त्रि० सूपकारे ॥ वल्लनम्। वल्लसंवरणसञ्चरणच। वल्लि : सौभोवाप्रीतौ। भावेघञ्। वल्लोस्यास्ति। अन्येभ्योपीतिव :॥ वल्लंवाति० वायतिवा। वाजगतिगन्धनयो : ओवैशोषणेवा। आतोनुपतिक :॥

वल्लवी। स्त्री० आभीर्याम्। गोपिकायाम्। महाशूद्राम् ॥

वल्लि :। स्त्री० वल्ल्याम्। लतायाम्॥ पृथिव्याम्॥ वल्लते। वल्ल०। सर्वधातुभ्यइन्॥

वल्लिकण्टकारिका। स्त्री० अग्निदमनोक्षुपे ॥

वल्लिदूर्वा। स्त्री० मालादूर्वायाम् ॥

वल्लिशाकटपोतिका। स्त्री० मूलपोत्याम् ॥

वल्लिशूरण :। पुं० अत्यम्लपर्ण्याम्॥

वल्ली। स्त्री० व्रतत्याम्। गुडूच्यादिलतायाम् ॥ याभूमेर्न्नचमारोहन्तिताबल्ल्य :॥ अजमोदायाम् ॥ कुसुमान्तरे। वेलाइ० भा० प० ॥ कृदिकारादितिङीष्॥

वल्लीगड :। पुं० मत्स्यविशेषे ॥ भोला० वालिकडा० इ० च० गौ० दे० भाषाप्रसिद्धे॥

वल्लीजम्। न० मरिचे। वेल्लजे* ॥

वल्लीबदरी। स्त्री० भूबदर्याम् ॥

वल्लीमुद्ग :। पुं० मकुष्ठके ॥

वल्लीवृक्ष :। पुं० सालवृक्षे ॥

वल्लुरम्। न० शाद्वले ॥ क्षेत्रे ॥ गह्वने ॥ औषधे॥ कुञ्जे॥ मञ्ज

र्याम् । औषधे । निर्जलस्थाने ॥ विश्वधरणिशब्दरत्नावलिषु । वल्लर-मितिपाठ : ॥

वल्लूरम् । त्रि० आतपादिनाशुष्कमांसे ॥ वनत्रेत्रे ॥ वाहने ॥ ऊषरभूमौ ॥ कोलमांसे ॥ वल्लते । वल्ल्यतेवा । वल्ल० । खर्जादित्वादूर: ॥

वल्ल्या । स्त्री० धात्रीवृक्षे ॥

वल्वजा : पुं० भूम्नि० उलपे । वघ-ही० इ० प्र० तृण ॥ वलते । वल० । क्विप् । वजति । वजगतौ । अच् । वल्चासौवजश्च । एकोवल्वज इतिभाष्यादेकत्वेपि ॥ यद्वा । बल्लतेभुशंवेष्टयतिविशादित्वादप्रत्यये० वल्व : पर्वत : तत्रजाता : वल्वजा : । इत्यन्ये । स्वभावाद्बहुत्वेवल्वजा : ॥ अतएव० सुमनोऽप्सरोवल्वजादेर्वैतिपाक्षिकबहुत्त्वाऽर्थंक्रमदीश्वरसूत्रम् ॥

वल्वजा । स्त्री० तृणविशेषे । दृढपत्र्याम् । तृणोर्व्यां । मौञ्जीपत्रायाम् । सावैवागे० इ० भा० ॥

वव : । पुं० एकादशकरणान्तर्गतप्रथमकरणे ॥ तत्रजातस्यफलंयथा । ववाभिधानेजननंहियस्यशूरोतिधीरोमनुज : क्षतीस्यात् । पद्मालयातन्निलयेनिवासंकरोतिनित्यंसुविचक्षण : स्यात् ॥

वशंवद : । त्रि० आयत्तकरवाक्यस्यकारि । इष्टवादिनि ॥ वशंवशकरंमधुरंवदति । प्रियवशेवद : खच् । मुम् ॥

वश: । पुं० कान्तौ । स्पृहायाम् । इच्छायाम् ॥ वेश्यागृहे ॥ आयत्ततायाम् ॥ योयस्यवशमापन्न : सतस्यकिङ्कर : किल ॥ प्रभुत्वे ॥ जन्मनि ॥ न० आयत्तत्वे ॥ इच्छायाम् ॥ प्रभुत्वे ॥ त्रि० आयत्ते ॥ वशनम् । वशकान्तौ । वशिरण्योरुपसङ्ख्यानमित्यप् ॥ वष्टि । अज्वा ॥

वशका । स्त्री० वश्यायांनार्याम् ॥

वशक्रिया । स्त्री० वशीकरणे । संवदने ॥ मणिमन्त्रौषधैरायत्तीकरणे ॥ वशस्यकरणम् । कृञ : शच ॥

वशग : । त्रि० वशीभूते ॥

वशा । स्त्री० वन्ध्यायाम् ॥ सुतायाम् । दुहितरि ॥ योषायाम् । नार्याम् ॥ वन्ध्यगव्याम् ॥ करिण्याम् । हस्तिन्याम् ॥ वष्टि । वश० । पचाद्यच् । उश्यतेवा । वशिरण्योरुपसङ्ख्यानमित्यप् ॥

वशाव्यक : । पुं० शिशुमारे ॥

वशापायी । पुं० कुक्कुरे ॥

वशि । न० वशित्वे ॥

वशिक: । त्रि० रिक्ते । शून्ये । उश्यते । वश० । सर्वधातुभ्यइन् । संज्ञायांकन् ॥

वशिका । स्त्री० अगुरौ ॥

वशिता । स्त्री० वशित्वे ॥ वशोऽस्या स्ति । इनि : । वशिनोभाव : । तल् ॥

वशित्वम् । न० शिवैश्वर्यविशेषे । अ ष्टभूतिष्वेकस्याम् ॥ येनभूतंभौति कञ्चावश्यमेववशीभवति ॥

वशी । पुं० जितेन्द्रिये ॥ अव्यसनिनि ॥ स्ववशीकृतकार्यकरणसङ्घाते ॥ स्वतन्त्रे । परमेश्वरे ॥ यत: सर्वंह्य स्यजगद्वशेवर्त्तते०इतिवशी ॥

वशिनी । स्त्री० शमीवृक्षे ॥वन्दा- याम् ॥

वशिर : । पुं० कणिश्याम् । अपामा- र्गे ॥ हस्तिपिप्पल्याम् ॥ चव्ये ॥ वचायाम् ॥ न०अचीवे । सामुद्रल वणे ॥ वष्टि । वश० । बाहुलका त्किरच् । संज्ञापूर्वकत्वान्नसम्प्र- सारणम् ॥ यद्वा । वशनम् । व- श० । क्विन् । वशिंराति । रा० । आतोनुपेतिक : ॥

वशिष्ठ : । पुं० स्वनाम्नाप्रसिद्धेमुनौ । अथर्वनिधौ । अरुन्धतीपतौ ॥ त्रि० वशकर्त्तरि ॥ श्रेष्ठतमे ॥

वशीकरणम् । न० मणिमन्त्रौषधैराय त्तीकरणे । वशक्रियायाम् ॥

वशीकारसञ्ज्ञा । स्त्री० ज्ञानप्रसाद रूपायांतृष्णाविरोधिन्याम् चित्तवृ त्तौ । दृष्टानुश्रविकविषयवितृष्णा स्यवैराग्ये ॥ औत्सुक्यमात्रस्यापि निवृत्तिरूपस्थितिष्वपिदृष्टानुश्रवि- कविषयेषुयासंज्ञात्रयात्पराचीना सावशीकारसंज्ञावैराग्यम् । उक्त ञ्चपतञ्जलिना । दृष्टानुश्रविकवि षयवितृष्णस्यवशीकारसंज्ञावैरा- ग्यमिति ॥

वशीकृत : । त्रि० जिते ॥

वशीभूत : । त्रि० वश्यताम्प्राप्ते ॥ अवशोवशोभवति । च्वि : । भूस्य च्वि ॥

वशीर : । पुं० गजपिप्पल्याम ॥

वश्यम् । नलवङ्गे ॥ आयत्तीकरणे ॥ वश्यंजनानांसर्वेषांविधेयत्वमुदाहृ तम् ॥ त्रि० प्रणये । प्रवर्त्तयितुं निवर्त्तयितुंवाशक्ये ॥ वशमधीन त्वंगत : । वशंगतइतियत् ॥

वश्यका । स्त्री० वशगायाम् ॥

वश्यकूट : । पुं० वैवाहिकविचारवि शेषे ॥ यथा । सिंहस्यसर्वेवशगा विनालिंविहायसिंहंवशिनोनरा णाम् । भक्ष्यास्तथैषांजलराशयस्ते वश्यास्तुलोकव्यवहारतोन्ये ॥ एवं वश्यसमायोगेदम्पत्यो : प्रीतिरुत्त मा । वश्याभावेपिदम्पत्योर्विवाह: कलहप्रद : ॥

वश्या । स्त्री० वशगायाम् ॥ टाप् ॥

वश्यात्मा । पुं० स्वाधीनान्त:करणे ॥ वैराग्यपरिपाकेण० वासनाक्ष येसति०वश्य : स्वाधीनोविषयपा

एतस्याशून्यः स्यात्मामम्नः कर्णयंयस्य सः ॥

वषट् । अ० देवहविर्दानमन्त्रे ॥ उह्यतेऽनेन । वह० बाहुलकात्० डषट् ॥

वषट्कारः । पुं० देवयज्ञे । आहुतौ । होमे ॥ वषट्क्रियाक्रियतेयस्मिन्नधिकरणे घञ् ॥ विष्णौ ॥

वषट्कृतम् । त्रि० हुते । अग्नौप्रक्षिप्ते ॥ अग्नौहुतन्तुयद्द्रव्यंतत् स्यात्त्रिषुवषट्कृतम् ॥ वषडितिमन्त्रोपलक्षणम् । वषट्मन्त्रेणकृतम्० अग्नौप्रक्षिप्तम् ॥

वष्कयः । पुं० तरुणवत्से ॥ एकहायनेवत्से । वष्कते । वष्कगतौ । बाहुलकादयन् ॥

वष्कयणी । स्त्री० वष्कयिण्याम् । चिरप्रसूतायांगवि ॥ वष्कयस्त्वेकहायनोवत्स इतिशाकटायनः । तेननीयते । णीञ् ० । क्विप् । सर्वतोक्तिन्नर्थादितिङीष् । गौरादित्वाद्वा । पूर्वपदादितिणत्वम् ॥

वष्कयिणी । स्त्री० वष्कयण्याम् ॥ वष्कयस्तरुणोवत्सः । सोस्त्यस्याः । अतइनिः । अट्कुप्वाङितिणत्वम् ॥

वसतिः । स्त्री० वासे । अवस्थाने ॥ यामिन्याम् । निशायाम् ॥ निकेतने । सदने ॥ वसन्त्यस्याम्० वसनंवा । वसनिवासे । वहिवस्यर्त्तिभ्यश्चिदित्यतिः ॥

वसती । स्त्री० वसतौ ॥ कृदिकारादितिङीष् ॥

वसनम् । न० छादने । वस्त्रे ॥ अस्यधारणेनक्षत्रादयोयथा । धातानुराधवसुपुष्यविशाखहस्ताश्चित्रोत्तराश्विपवनादितिरेवतीषु । जन्मर्त्तं जीववुधशुक्रदिनात्सवादौधार्यं- नवंवसनमीश्वरविप्रतुष्टाविति समयप्रदीपः ॥ वस्यतेऽनेनवा । वस आच्छादने ॥ ल्युट् ॥ निवासे ॥ स्त्रीकटीभूषणे ॥

वसना । स्त्री० स्त्रीकटीभूषणे । सारसने ॥

वसन्तः । पुं० ऋतुराजे । पुष्पसमये । कुसुमाकरे । सुरभौ । पिकानन्दे । कामसखे । मधुमाधवयोः । चैत्रवैशाखयोः ॥ वसन्त्यत्रपठनोत्सवाः । वस० । तॄभूवहिवसिभासीतिभच् । अतिसारे ॥ रागविशेषे ॥ तालविशेषे ॥ वसन्ततालेकर्त्तव्योनगणोमगणास्तथा ॥ श्योनाकविशेषे ॥ क्रतुविशेषे ॥

वसन्तकः । पुं० श्योनाकप्रभेदे ॥ वसन्ते ॥

वसन्तकुसुमः । पुं० शेलुवृक्षे ॥

वसन्तकुसुमाकरः । पुं० औषधवि

शेषे ॥ यथा । प्रवालरसमौक्तिका
न्वरमिदंचतुर्भागभाक्पृथक्पृथग
थस्मृतेरजतहेमतोऽ्शके । अयो
भुजगरङ्गकंचिलवकंविमर्दाखिलं-
शुभेहनिविभावयेद्भिषगिदंधिया
समश : ॥ द्रवैर्वृषनिशेत्यजै : क
मलमालतीपुष्पजै : पय : कदलि
कन्दजैर्मलयजैणनाभ्युद्भवै : । व
सन्तकुसुमाकरोरसपतिर्हिवर्णाशि
त : समस्तगदहृद्भवेत्किलनिजानु
पानैरयमितिप्रहृयोगतरङ्गिणी ॥
वसन्तजा । स्त्री॰ वासन्तीलतायाम् ॥
वसन्ततिलकम् । न॰ शर्करीछन्द: १४
प्रभेदे । सिंहोद्धतावृत्ते ॥ यथा ।
उक्तं यंवसन्ततिलकंतभजाजगौग : ।
यथा फुल्लंवसन्ततिलकंतिलकंवना
न्यालीलापरंपिककुलंकलमत्ररौति ।
वात्ये षपुष्पसुरभिर्मलयाद्रिवातो-
यातोहरि : समथुरांविधिनाहता
स : ॥ पुष्पविशेषे ॥ औषधविशे
षे ॥ यथा । श्चारलूदहनसैन्धववि
श्वगणकाचूर्णकरञ्जसहितंमथितेनपी
तम् । नैवंप्ररोहतिपुनर्गुदज : स्व
हेतोस्तस्मैवसन्ततिलकैरपिकल्पक
ल्पम् ॥
वसन्ततिलका । स्त्री॰ वसन्ततिलके ॥
यथा । उक्तावसन्ततिलकातभजा
जगौग : ॥
वसन्तदूत : । पुं॰ चैत्रे ॥ पिके पञ्च
मरागे ॥ आम्रे ॥
वसन्तदूती । स्त्री॰ पाटलीवृक्षे ॥ अ
तिमुक्तं । माधवीलतायाम् ॥ ग
णिकायाम् । कोकिलायाम् ।
पिक्याम् ॥
वसन्तद्रु : । पुं॰ आम्रवृक्षे ॥
वसन्तद्रुम: ।
वसन्तमालिका । स्त्री॰ विषमवृत्तप्र
भेदे ॥ यथा । विषमेससजागुरूस
मेचेत्सभरायवसन्तमालिकासा ॥
वसन्तसख : । पुं॰ कामदेवे ॥
वसन्तोत्सव : । पुं॰ होलाकायाम् ॥
वसा । स्त्री॰ मांसप्रभवधातुविशेषे
कायस्नेहे । मेदसि । वपायाम् ॥
वसति॰ वस्ते वा । वसनिवासे॰
वसआच्छादनेवा । पचाद्यच्॰ भि
दाद्यङ्वा ॥ मांसरोहिण्याम् ॥
वसाढ्य : । पुं॰ शिशुमारे ॥
वसादनी । स्त्री॰ सिंहमुख्याम् ॥ वा
सके ॥
वसान: । त्रि॰ आच्छादयति ॥ वस॰
। शानच् ॥
वसापायी । पुं॰ कुक्कुरे ॥
वसि। : पुं॰ वसने ॥ वस्ते॰वस्यतेवा
वसआच्छादने । खनिकष्यज्यसी
त्यादिनाइ : ॥
वसिरम् । न॰ अचीवे । सामुद्रलव
णे । वशिरे वस्ते वस॰ । बा
हुलकात्किरच् ॥ यद्वा । वसनम् ।

। वसुसम्भे । ह्रन् । वसिंराति । राट्।ने । ञातोनुपेतिक : । करि पिप्पल्याम् ।

वसिष्ठ: । पुं॰ वसिष्ठमुनौ । अरुन्धती जानौ । अरुन्धतीनाथे ॥

वसु : । पुं॰ देवभेदे । गणदेवता विशेषे ।। यथा । धरोध्रुवश्च सोमश्च विष्णुश्चैवानिलोऽनल : । प्रत्यूष श्च प्रभासश्च वसवोऽष्टौ क्रमात्स्मृता : ।। धनाधिपे ।। आयाम् । दीप्तौ ॥ अग्नौ ॥ योक्त्रे ॥ वकवृक्षे । शिवमल्ल्याम् । पाशुपते ॥ राजनि ।। साधौ ॥ पीतमुद्गे ॥ शिवे ॥ सूर्ये ॥ अष्टसङ्ख्यायाम् ।। धनिष्ठानक्षत्रे ॥ पुष्करिण्याम् ॥ क्लीवे ।। वृद्ध्यौषधे ॥ अश्वे ।। विष्णौ ॥ वसन्तिसर्वभूतान्यत्र॰ तेष्वयमपिवसतीतिवावसु : ॥ न॰ रत्ने ॥ धने । रायि ॥ हाटके ॥ जले ॥ स्त्री॰ दीप्तौ । वृद्ध्यौषधे ॥ त्रि॰ मधुरे ॥ शुष्के ॥ वसतिसर्वत्र॰ उच्यतेवागुणै : सर्वत्रोच्यतेऽनेनवा॰ वस्ते॰ वध्नातेवा । वसनिवासे॰ वसआच्छादनेवा । शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्य श्च्यु : ॥

वसुक : । पुं॰ शिववल्ल्याम् । वकपुष्पे । सुरेष्टे ॥ अर्कपर्णे । रक्तार्के । मन्दारे ॥ न॰ रोमके । साम्भरिलवणे ॥ पांशवे ॥ वासुके ॥ स्वार्थेकन् ॥ वसुकायतिवा । कै॰ । आतोनुपेतिक : । वस्वेव । यावादिस्वात्कन्वा ॥ वसवस्त्यस्मिन् । व्रीह्यादिस्वाट्ठन् । वसुरिति-कोवा ॥

वसुकीट : । पुं॰ याचके ।।

वसुचरणम् । न॰ भगणे॰ऽ ।। ॰ ।।

वसुच्छिद्रा । स्त्री॰ महामेदावृक्षे ।।

वसुद : । पुं॰ धनाधिपे । कुबेरे ।। हरौ ।। त्रि॰ धनदातरि ।। वसुदयते । देङ्पालने । वसुददातिवा । डुदाञ्॰ । आतद्दतिक : ॥

वसुदान : । त्रि॰ सर्वफलदे ॥

वसुदेव : । पुं॰ श्रीकृष्णजनके । आनकदुन्दुभौ । शूरे । वसुषुधनेषुदीव्यतिमोदते । दिवु॰ । पचाद्यच् ॥

वसुदेवता । स्त्री॰ धनिष्ठानक्षत्रे ॥

वसुदेवभू : । पुं॰ श्रीकृष्णे ॥

वसुधा । स्त्री॰ क्षितौ ॥ वसुदधाति । डुधाञ्॰ । आतद्दतिक : ॥

वसुधाखर्ज्जूरिका । स्त्री॰ भूखर्ज्जूरिकायां ॥

वसुधाधिप : । पुं॰ भूपतौ ॥ अगणे॰ । ऽ । ॰ ॥

वसुधान : । पुं॰ कोशे ॥ वसुधीयतेस्मिन् ।

वसुधारा । स्त्री॰ वृद्धिश्राद्धपूर्वकर्त्तव्ये दिराजवसूहे श्यकाकुडालम्नघृत

धारायाम् ॥ यथा । कुड्यलग्नांव सोर्धारां सप्तवारान् घृतेनतु । कारयेत् पञ्चवारान्वानातिनीचांनचोच्छ्रिताम् ॥ आयुष्यानिति शान्त्यर्थं जप्त्वातत्र समाहित : । षड्भ्य : पितृभ्यस्तदनुश्राद्धदानमुपक्रमेत् ॥ इति कात्यायन : । अपिच । देहल्यांनाभिमात्रायां प्रादेशपरिमाणत : । सप्तवापञ्चवाबिन्दून् दद्यात् सिन्दूरचन्दनै : ॥ प्रत्येकविन्दुंमतिमान् कामंमायांरमांस्मरन् । घृतधारामविच्छिन्नां दत्त्वातत्र वसुंयजेत् ॥ कुवेरपुर्याम् ॥ धनसन्ततौ ॥ जिनशक्तिविशेषे । तारायाम् ॥ वसोश्चेदिराजस्य धारा ॥ भौमे तीर्थविशेषे ॥

वसुनन्दक : । पुं॰ खेटके । धनवृद्धिजीवके ॥

वसुन्धरा । स्त्री॰ गोचायाम् । उर्व्याम् ॥ वसूनि धारयति । संज्ञायां भृतृवृजिधारीतिखच् । खचिह्रस्व : । अरुर्द्विषदिति मुम् ॥

वसुप्राण : । पुं॰ वह्नौ ॥

वसुमती । स्त्री॰ भुवि ॥ यथा सप्तद्वीपा वसुमतीति । वसुधनमस्त्यस्याम् ॥ मतुप् । ङीप् ॥

वसुमना : । पुं॰ विष्णौ ॥ वसुशब्देन प्राशस्त्यं लक्ष्यते । वसु प्रशस्तं मनो यस्य । रागद्वेषादिभि : क्लेशैर्मदादिभिरुपक्लेशैश्चयतो न कलुषितं चित्तं ततस्तन्मन : प्रशस्तम् ॥

वसुरोचि : । न॰ यज्ञे ॥ वसव : रोचन्ते यस्मिन् । रुचदीप्तौ । वसौ रुचे : संज्ञायामिति॰ इसिन् ॥

वसुल : । पुं॰ देवतायाम् ॥

वसुश्रेष्ठम् । न॰ रूप्ये ॥

वसुसेन : । पुं॰ कर्णे । चम्पाधिपे ॥

वसुस्थली । स्त्री॰ कुवेरपुर्य्याम् ॥

वसुहट्ट : । पुं॰ वकद्रुमे ॥

वसूक : । पुं॰ वकवृक्षे ॥ न॰ साम्भरिलवणे ॥

वसूत्तम : । पुं॰ भीष्मपितामहे ॥

वस्कय : । पुं॰ वष्कये ॥

वस्कयनी ।)
वस्कयिनी ।) स्त्री॰ वष्कयिण्याम् । चिरप्रसूतायांधेनौ ॥ वस्कयिन्यादिदोषघ्नं तर्पणं बलकृत्पय : ॥

वस्कराटिका । स्त्री॰ वृश्चिकायाम् । कालिकाख्ये ॥

वस्त : । पुं॰ छागे ॥ वस्तयते । वस्त अर्द्दनेच्‌ुरादि : । पचाद्यच् ॥

वस्तकम् । न॰ कृत्रिमलवणे ॥ वस्त इव । अजगन्धित्वात् । इवेप्रतिकृताविति कन् ॥

वस्तकर्ण : । पुं॰ शालवृक्षे ॥

वस्तगन्धा । स्त्री॰ अजगन्धायाम् ॥ वस्तस्येव गन्धोऽस्या : । वस्तशब्द :

स्वगन्धेलाचणिक : ॥

वस्तमोदा । स्त्री० अजमोदायाम् ॥ वस्तं मोदयति । मुद० । ण्यन्त: कर्म्मण्यण् ॥

वस्तान्त्री । स्त्री० छगलान्त्रीक्षुपे । वृषगन्धायाम् । मेषान्त्र्याम् । वस्तस्येवान्त्रमस्या: । गौरादि: ॥

वस्ति: । पुं० स्त्री० नाभेरधोभागे । नाभिलिंगयोरन्तरे ॥ मूत्राशयो धनुर्वक्रोवस्तिरित्यभिधीयते ॥ नाभेरधस्तादलाबूसदृशमधोनालमनेकच्छिद्रं मूत्रभाजनं वस्तिरुच्यते ॥ अस्यालक्षणं यथा । विस्तीर्णामांसलास्निग्धावस्ति: पुंसांप्रशस्यते । निर्मांसाकर्कशारूक्षादु:खदारिद्र्यदास्मृता ॥ गोमायुसदृशायस्यखरोष्ट्रमहिषस्यच । सभवेद्दु: खितो नित्यं धनहीनश्चमानव: ॥ वसति मूत्रमत्र । यद्वा । वस्ते० वस्यते वा । वस० निवासे० आच्छादने वा । वस्यतिवा । वसुस्तम्भे । वसेस्ति: ॥ चिकित्साविशेषे ॥ यथा । वस्तिर्द्विधानुवासाख्योनिरूहश्चतत: पर: । य: स्नेहैर्दीयतेसस्यादनुवासननामक: ॥ कषायक्षीरतैलैर्योनिरूह: सनिगद्यते । वस्तिभिर्दीयतेयस्मात्तस्माद्वस्तिरितिस्मृत: ॥ वस्तिभि: मृगादीनां मूत्राशयै: ॥ भूम्नि० वस्तय: --

वस्त्रान्तावयवेषु ॥ दशासु ॥

वस्तिकर्माढ्य: । पुं० अरिष्टवृक्षे । फेनिले ॥

वस्तिमलम् । न० मूत्रे ॥

वस्तु । न० द्रव्ये ॥ पदार्थे ॥ जगतिवस्तुद्वयंभावोऽभावश्चेतिन्यायशास्त्रम् ॥ वस्तु० सच्चिदानन्दाद्वयंब्रह्मेतिवेदान्तशास्त्रम् ॥ वसति । वस० । वसेस्तुन् ॥ लक्षणप्रमाणाभ्यांहिवस्तुसिद्धिर्भवतीतिव्याख्यातार: ॥

वस्तुकम् । न० वास्तूके ॥

वस्तुकी । स्त्री० श्वेतचिल्लीशाके ॥

वस्तुपरिच्छेद: । पुं० सजातीयभेदोविजातीयभेद: स्वगतभेदश्चेतित्रिविधभेदे ॥ जीवेश्वरभेद:० जीवजगद्भेद:० जीवपरस्परभेद:० ईश्वरजगद्भेद:० जगत्परस्परभेदइतिपञ्चविधभेदे ॥ वस्तुन: परिच्छेद: परिच्छिन्नत्वम् ॥

वस्तुविवेक: । पुं० अनित्यान्नित्यस्य पृथक्करणे ॥ नित्यमात्मस्वरूपंहिदृश्यंतद्विपरीतगम् । एवंयोनिश्चय: सम्यक्विवेकोवस्तुन: सवै ॥ वस्तुनोविवेक: ॥

वस्ता । पुं० वास्तव्ये ॥ वसति । वस० । तृच् ॥

वस्त्यम् । न० निशान्ते । गृहे ॥ वसनम् । वस० वसेस्ति: ॥ तत्रसा

धुरितियत् ॥ यद्वा । अवस्त्यायति । ष्ट्यै स्त्यै शब्दसङ्घातयोः । आतश्चोपसर्ग इति कः । षष्ठीत्स्य लोपः ॥

वस्त्रम् । न० आच्छादने । वाससि । चेले । वसने । अंशुके । कपड़ा० इ० भा० प्र० ॥ वस्यतेऽनेन । वस आच्छादने । सर्वधातुभ्यः ष्ट्रन् ॥

वस्त्रकुट्टिमम् । न० वस्त्रजालये । तंबूटी० इ० भा० प्र० ॥ वस्त्रस्य कुट्टिममल्पगृहम् ॥ छत्रे ॥

वस्त्रगृहम् । न० पटवेश्मनि । पटवापे । पटमये । दूष्ये । स्थूले । तम्बू० इ० भा० प्र० ॥ वस्त्रस्य गृहम् ॥

वस्त्रग्रन्थिः । पुं० उच्चये । नीव्याम् । परिधान वस्त्रस्य ग्रन्थने ॥

वस्त्रपञ्जलः । पुं० कोलकन्दे ॥

वस्त्रपुत्रिका । स्त्री० वस्त्रनिर्मितपुत्तलिकायाम् । गुड़िया० इ० भा० ॥

वस्त्रभूषणः । पुं० शाकरुण्डवृक्षे ॥

वस्त्रभूषणा । स्त्री० मञ्जिष्ठायाम् ॥

वस्त्रयोनिः । पुं० स्त्री० वसनोत्पत्तिकारणे त्वगादौ । त्वक् फलकृमिरोमसु ॥ वस्त्रस्य योनिः कारणम् ॥

वस्त्ररञ्जकम् । न० कुसुम्भे । वह्निशिखे ॥ वस्त्राणां रञ्जकम् ॥ त्रि० वस्त्राणां कुसुम्भादिना रञ्जनकर्त्तरि ॥

वस्त्ररञ्जनः । पुं० कुसुम्भे ॥

वस्त्ररञ्जनी । स्त्री० मञ्जिष्ठायाम् ॥

वस्त्वाभासः । पुं० मायामयेरज्जुसर्पादौ० कृष्णोगौरोदीर्घोह्रस्वइति व्यवहारे ॥ वस्तुधर्मि द्रव्यम्० तद्वदवभासते० इतितथा ॥

वस्नः । पुं० मूल्ये । अवक्रये ॥ न० वेतने ॥ वस्त्रे ॥ धने ॥ मूल्ये ॥ मृतौ ॥ द्रव्ये ॥ त्वचि ॥ वसत्यनया । वस० । धाप् वस्यञ्ज्यतिभ्यो नः ॥

वस्ननम् । न० कटिभूषणे ॥

वस्नसा । स्त्री० वायुवाहिन्यां नाड्याम् । स्नायौ ॥ वस्ते शरीरम् । वस आच्छादने । धाप् वस्यञ्ज्यतिभ्यो नः । वस्नं चर्म० स्यति । षोऽन्तकर्मणि । आतोऽनुपसर्ग इति कः । टाप् ॥

वस्निकः । त्रि० वस्नजीवातौ ॥ वस्नेन मूल्येन जीवति । वस्नक्रयविक्रयाट्ठन् । यद्वा । वस्नं मूल्यं हरति० वहति० आवहति वा । वस्नद्रव्याभ्यां ठन्कनावित्यार्षीय ष्ठन् ॥

वस्वौकसारा । स्त्री० अलकायाम् । कुबेरपुर्याम् ॥ कुबेरनलिन्याम् ॥ मानसोत्तरशिखरवर्त्तिन्यामिन्द्रस्य नगर्याम् । इन्द्रपुर्याम् ॥ इन्द्रनलिन्याम् ॥

वस्त्रोकसारिका । स्त्री॰ वस्त्रोकसारायाम् ॥

वहंलिहः । पुं॰ गवि ॥ वहः स्कन्धः लेढि । लिह॰ । वहाभ्रे लिहइति खश् । मुम् । खशोडित्त्वान्न गुणः ॥

वहः । पुं॰ वृषभस्कन्धे ॥ वाहे । हये ॥ गन्धवहे । वायौ ॥ पथि ॥ नदे ॥ वहतियुगमनेन । वहप्रापणे । गोचरसञ्चरेतिसाधुः ॥

वहतः । पुं॰ वृषे ॥ पान्थे ॥

वहतिः । पुं॰ गवि ॥ सचिवे ॥ वायौ ॥ वहति । वह॰ । वहिवस्यर्तिभ्यश्चिदित्यतिः ॥

वहतुः । पुं॰ पथिके ॥ वृषभे ॥ वहति । वह॰ । एधिवह्योश्चतुः ॥

वहनम् । न॰ प्रापणे ॥ होडे । तरान्धौ । हुडि॰डू॰गौ॰भा॰प्र॰नौका विशेषे ॥ वह॰ । ल्युट् ॥

वहन्तः । पुं॰ वायौ ॥ त्रि॰ वालके । वहति । वह॰ । तॄभूवहिवसी-भ्यादिनाभच्षित् ॥

वहलम् । न॰ वार्वटपोते ॥ त्रि॰ वहुले ॥ दृढे ॥

वहलगन्धम् । न॰ शम्वरचन्दने ॥

वहलचक्षुः । पुं॰ मेषशृङ्गाम् ॥

वहलत्वचः । पुं॰ श्वेतलोध्रे ॥

वहला । स्त्री॰ शतपुष्पायाम् ॥ स्थूलैलायाम् ॥

वहा । स्त्री॰ नद्याम् ॥ वहति । वह॰ । अच् ॥

वहिःकुटीचरः । पुं॰ तिर्यग्यायिनि । कुलीरे ॥

वहिःप्रज्ञः । पुं॰ विश्वस्मिन् । व्यष्टि पुहितचैतन्ये ॥ वहिः स्वात्मव्यतिरिक्ते विषयेप्रज्ञायस्यसः ॥

वहितः । त्रि॰ अवहिते ॥ अवधीयते स्म । डुधाञ् । क्तः । दधातेर्हिः । भागुरिमतेऽल्लोपः ॥

वहित्रम् । न॰ पोते । वार्वटे ॥ वहति । वह॰ । अशित्रादिभ्यइत्रो-त्राविति॰इत्रप्रत्ययः ॥

वहित्रकम् । न॰ जलयाने । यानपात्रे ॥

वहिर्द्वारम् । न॰ द्वारवाह्यभागे । तोरणे ॥ वहिर्द्वारात् । वहिस्थतद्वारस्थेतिवा ॥

वहिर्द्वारप्रकोष्ठकम् । न॰ प्रघाणे ॥

वहिर्भूतः । त्रि॰ वहिर्गते ॥

वहिर्मुखः । त्रि॰ विमुखे ॥ यथा । शैवोवावैष्णवोवापियोवास्यादन्यपूजकः । सर्वंपूजाफलंहन्तिशिवरात्रिवहिर्मुखः ॥

वहिश्चरः । पुं॰ कर्कटे ॥

वहिष्ठः । त्रि॰ वहिर्भवे । वहिःस्थिते ॥

वहिष्पवमानः । पुं॰ याज्ञिकस्तोत्रे । सामगानांसूक्तत्रयगानसाध्ये

स्तोत्रे ॥

वहि : । अ० वाह्ये ॥ वहति । वह० । इस् ॥

वहुल : । पुं० अग्नौ ॥ कृष्णपक्षे ॥ न० आकाशे ॥ सितमरिचे ॥ त्रि० प्राज्ये । प्रचुरे ॥ कृष्णवर्णे ॥ वह्नू मर्थान्लाति । ला० । आतइति-क : ॥ वहति । वह० । बाहुलका दुलच् ॥ वहुलायांजाते ॥ सन्धिवे लायृतुनक्षत्रेभ्योऽण् । तस्यश्रविष्ठा षाढेतिलुक् ॥

वहुला । स्त्री० नीलिकायाम् ॥ एलाया म् ॥ गवि ॥ मानसाचलस्थदेवी-विशेषे ॥

वहुला : । स्त्री० भूम्नि० कृत्तिकासु ॥

वहेडुक : । पुं० विभीतकवृक्षे । व-हेडा० इ० भा० प्र० ॥

वह्नि : । पुं० वैश्वानरे । चीतिहोत्रे । धनञ्जये । अग्नौ ॥ स्वाहादेवीवह्नि पत्नौ ॥ चित्रकाख्यौषधौ ॥ भल्लात के ॥ निम्बुके ॥ वहतिहव्यम् ० देवे भ्योहवि : प्रापयतिवा । वहप्राप णे । वह्विश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्दिति० नि : ॥

वह्निकरी । स्त्री० धातपुष्याम् । धा तक्याम् ॥

वह्निकाष्ठम् । न० दाहागुरुणि । दा हकाष्ठे ॥

वह्निगन्ध : । पुं० यक्षधूपे ॥

वह्निगर्भ : । पुं० वंशे ॥

वह्निगर्भा । स्त्री० शमीद्रुमे ॥

वह्निचक्रा । स्त्री० कलिकारीवृक्षे ॥

वह्निज्वाला । स्त्री० धातकीवृक्षे ॥ वह्नेरिवज्वालाऽस्या : । वह्निर्ज्वालि ववा । रक्तपुष्पत्वात् ॥

वह्निदमनी । स्त्री० अग्निदमनीक्षुपे

वह्निदीपक : । पुं० कुसुम्भे ॥

वह्निदीपिका । स्त्री० अजमोदायाम् ।

वह्निनामा । पुं० चित्रके ॥ भल्लात के ॥

वह्निनी । स्त्री० जटामांस्याम् ॥

वह्निपुष्पी । स्त्री० धातक्यां ॥

वह्निभोग्यम् । न० घृते ॥

वह्निमन्थ : । पुं० गणिकारिकावृ क्षे ॥

वह्निमन्थक : । पुं० अग्निमन्थे ॥

वह्निमारकम् । न० जले ॥

वह्निमित्र : । पुं० वायौ ॥

वह्निरेता : । पुं० शिवे । कृशानुरेत सि ॥ वह्नौरेतोऽस्य ॥

वह्निलोहकम् । न० कांस्ये ॥

वह्निवक्त्रा । स्त्री० कलिहार्याम् । लाङ्गल्याम् ॥

वह्निवधू : । स्त्री० अग्नाय्याम् । स्वाहायाम् ॥

वह्निवर्णम् । न० रक्तोत्पले ॥

वह्निवल्लभ : । पुं० सर्जरसे । धून के ॥ अनिले ॥ वह्नेर्वल्लभ : ॥

वह्निबीजम् । न० निम्बूके ॥ सु
वर्णे ॥
वह्निशिखम् । न० कुसुम्भे ॥ वह्नि
वत् शिखाऽस्य ॥
वह्निशिखरः । पुं० लोचमस्तके ॥
वह्निशिखा । स्त्री० अनन्तायाम् ॥
कलिन्याम् ॥ कलिकार्याम् ॥
धातक्याम् ।
वह्निसञ्ज्ञः ।)
वह्निसञ्ज्ञकः ।) पुं० चित्रकाख्ये
पर्णे ॥ वह्निः संज्ञायस्य सः ॥
वह्निसखः । पुं० वायौ ॥ जीरके ॥
वह्यम् । न० वाहने ॥ शकटे ॥
वहन्त्यनेन ॥ वह० । वह्यंकरण
मितियत् ॥
वह्या । स्त्री० मुनिपत्न्याम् ॥
वह्लीकः । देशविशेषे ॥ वह्लते । व
ह्लप्राधान्ये । बाहुलकात् ईकन् ॥
वा । विकल्पे ॥ उपमायाम् । उप
माने ॥ वितर्के ॥ पादपूरणे ॥
समुच्चये ॥ विस्मये ॥ नानार्थे
॥ अतीते । एवार्थे ॥ अवधारणे
वाति । वागतिगन्धनयोः । क्वि
प् ॥
वांशः । त्रि० वंशसम्बन्धिनि ॥
वांशिकः । पुं० वंशीवादके । वैण
विके ॥ वंशीवादनं शिल्पमस्य ।
ठक् ॥ भारभूतान्वंशान्हरति
० वहति० आवहतिवा । तद्धरति
वहतीत्यादिनाठञ् ॥
वांशी । स्त्री० वंशरोचनायां ॥
वाःकिटिः । पुं० शिशुमारे ॥ कु
म्भीरे ॥ वारीजलस्यकिटिःशूकरः॥
वाःसदनम् । न० जलाधारे ॥ ज
लान्तस्थगृहे । जलमन्दिर० इ०
भा० प्र० ॥
वाकः । पुं० वाचि ॥ उच्यतेऽनये
ति । वचपरिभाषणे । करणेघञ्
॥ न० बकसमूहे ॥ बकानांसमू
हः तस्य समूहइत्यण् ॥ त्रि० ब
कसम्बन्धिनि ॥ बकस्यावयवोवि
कारोवा । प्राणित्वादञ् ॥
वाकी । त्रि० वाग्विशिष्टे ॥ वाकोवि
द्यतेऽस्य । अतइनिः ॥
वाकुची । स्त्री० ओषधिविशेषे । सो
मराज्याम् ॥ सुप्रभायाम् । काम्बो
ज्याम् । पूतिगन्धायाम् ॥ वाकु
चीमधुरातिक्ताकटुपाकारसायनी
। विष्टम्भहृद्धिमारुच्यासराश्लेष्मास्र
पित्तनुत् ॥ रूक्षाहृद्याश्वासकुष्ठमे
हज्वरकृमिप्रणुत् । तत्फलंपित्त
लंकुष्ठकफानिलहरंकटु ॥ केश्यं
त्वच्यंकृमीश्वासकासशोथामपाण्डु
हृत् ॥ वातंसङ्कोचयति । कुचश
ब्दतारे । मूलविभुजादित्वात्कः
पृषोदरादिः ।
वाकुलम् । न० वकुलफले ॥ वाकु
लंमधुरंग्राहिदन्तस्थैर्यकरंपरम् ॥

वाकोवाक्यम्। न॰ तर्कशास्त्रे॥ उक्तिप्रत्युक्तिरूपे वैदिकग्रन्थे॥ यथा किंस्विदावपनं महत्। भूमिरावपनं महदिति॥

वाक्कोरः। पुं॰ श्यालके॥

वाक्छलम्। न॰ छलविभेदे। वाक्यव्याजे॥ यथा। अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना-वाक्छलम्॥ यत्र शक्यार्थद्वये सम्भवति॰ एकार्थनिर्णयैकविशेषाभावादनभिप्रेतशक्यार्थकल्पनेन दूषणाभिधानं तद्वाक्छलम्। लक्षणन्तु॰ शक्यैकार्थशाब्दबोधतात्पर्यकशब्दस्य शक्त्यार्थान्तरतात्पर्यकत्वकल्पनया दूषणाभिधानम्। यथा। नेपालादागतोऽयं नवकम्बलवत्त्वादित्युक्ते॰ कुतोऽस्य नवसङ्ख्याकाः कम्बला इति॥ एवं गौर्विषाणीत्युक्ते॰ कुतो गजस्य शृङ्गम् श्येतो धावतीति श्वेतरूपवदभिप्रायेणोक्ते॰ श्वा इतो न धावतीत्यभिधानमित्यादिकमूह्यम्॥

वाक्पतिः। पुं॰ बृहस्पतौ॥ वाचांपतिः॥ त्रि॰ वागीशे। पटुवचने॥

वाक्पारुष्यम्। न॰ अप्रियवाक्योच्चारणे। तत्तु सप्तधाव्यसनान्तर्गतव्यसनविशेषः। यथा। मृगयाक्षाः स्त्रियः पानं वाक्पारुष्यार्थदूषणे। दण्डपारुष्यमित्येतज्ज्ञेयं व्यसनसप्तकम्॥ तल्लक्षणमाह नारदः। देशजातिकुलादीनामाक्रोशन्यङ्गसंयुतम्। यद्वचः प्रतिकूलार्थं वाक्पारुष्यं तदुच्यत इति॥ देशादीनामाक्रोशन्यङ्गसंयुतम्। उच्चैर्भाषणमाक्रोशः॰ न्यङ्गमवद्यम्॰ तदुभययुक्तं यत्प्रतिकूलार्थमुद्वेगजननार्थं वाक्यं तद्वाक्पारुष्यं कथ्यते॥

वाक्यम्। न॰ परस्पराकाङ्क्षोपेतपदचये॰ तिङ्सुबन्तचये। तिङन्तानां चये यथा। पचति पश्येत्यादिवाक्यम्। सुबन्तानाञ्चये यथा। प्रकृतिसिद्धमिदं हि महात्मनामित्यादि। कारकान्वितक्रियायाम्॥ धात्वर्थः क्रिया॰ कारकैः कर्त्रादिभिरन्विता सम्बद्धार्था कारकान्विता॰ अन्वितत्वञ्च क्रियाकारकाणामाकाङ्क्षायोग्यतासन्निधिवशाज्ज्ञेयम्॰ तिङ्सुबन्तचयात्मकोऽपि सम्बद्धार्थता बोध्या॰ असम्बद्धार्थस्याप्रयोगात्॰ अतएव परस्पराभिसम्बन्धः पदसमूहो वाक्यमिति वृद्धाः। कारकान्विता क्रिया यथा॰ घटमानयेत्यादि॥ वाक्यस्वरूपमाह। वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः। वाक्योच्चयो महावाक्यमित्थं वाक्यं द्विधा मतम्॥ उक्तञ्च। स्वार्थबोधसमाप्तानामङ्गाङ्गित्वव्यपेक्षया।

वाक्यानामेकवाक्यत्वं पुनः सम्भूय जायत इति ॥ अत्र वाक्यं यथा । शून्यं वासगृहमित्यादि । महावाक्यं यथा । रामायणमहाभारतरघुवंशादि । इति ॥ पुनस्तद्द्विविधम् । लौकिकं वैदिकञ्चेति । वैदिकमीश्वरोक्तत्वात् सर्वमेव प्रमाणम् लौकिकन्त्वाप्तोक्तं प्रमाणम् । अन्यदप्रमाणम् ॥ समभिहारो वाक्यम् । समभिहारस्य साध्यत्वादि वाचकद्वितीयाद्यभावेऽपि वस्तुतः शेषशेषिवाचकपदयोः सहोच्चारणम् । यथा । यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीत्यत्र पर्णताजुह्वोः समभिहारादेव पर्णतायाः जुह्वङ्गत्वम् । न चानर्थक्यं जुह्वाः सिद्धत्वादिति वाच्यम् । जुहूशब्देन तत्साध्यापूर्वलक्षणात् तथा च वाक्यार्थः पर्णतयाऽवन्नह-विर्द्धारणद्वारा जुहूपूर्वं भावयेदिति । एवञ्च पर्णतया यदि जुहूः क्रियते तदैव तत्साध्यमपूर्वं भवति नान्यथेति गम्यते इति न पर्णताया वैयर्थ्यम् । अवन्नहविर्द्धारणद्वारेति चावश्यं वक्तव्यम् अन्यथा स्रुवादिष्वपि पर्णतापत्तेः । सेयं पर्णता अनारभ्याधीतापि सर्वप्रकृतिष्वेवान्वेति न विकृतिषु तत्र चोदकेनापि तत्प्राप्तिसम्भवात् पौनरुक्त्यापत्तेः । तदिदं वाक्यं प्रकरणादिभ्यो बलवत् । अत एवैन्द्राग्नी इदं हविरित्यादेरेकवाक्यत्वाद्दर्शाङ्गत्वम् । न तु प्रकरणाद्दर्शपूर्णमासाङ्गत्वम् ॥ उच्यते इति वाक्यम् । वचेर्ण्यत् । चजोरिति कुत्वम् । शब्दसंज्ञात्वात् वचोऽशब्दसंज्ञायामिति निषेधेन ॥ शुभाशुभवाक्यानि तु । नैव राज्येन महता न चैवार्थस्य राशिभिः । प्राप्यते ज्ञानकथनं परलोकसुभाषितम् ॥ स्वर्गापवर्गसिद्ध्यर्थं भाषितं यत् सुशोभनम् । वाक्यं मुनिवरैः शान्तैस्तद्विज्ञेयं सुभाषितम् ॥ रागद्वेषानृतक्रोधकामतृष्णानुसारि यत् । वाक्यं निरयहेतुत्वात् तद्भाषितमुच्यते ॥ संस्कृतेनापि किन्तेन मृदुना ललितेन वा । अविद्यारागवाक्येन संसारक्लेशहेतुना ॥ यच्छ्रुत्वा जायते पुण्यं रागादीनाञ्च संक्षयः । निरुद्धमपि तद्वाक्यं विज्ञेयमतिशोभनम् ॥ इति वह्निपुराणम् ॥

वाक्यलक्षणवित् । पुं० मीमांसाशास्त्रज्ञे ॥

वाक्याध्याहारः । पुं० आकाङ्क्षितैकदेशपूरणे ॥ वाक्यस्य अध्याहारः ॥

वाक्याभिधायी । त्रि० पृष्ठमांसादे ॥ वाक्यंभिधायी पुरुषः पृष्ठमांसाद उच्यत इति त्रिकाण्डशेषः ॥

वागधिपः । पुं० बृहस्पतौ । वाचा

मथिप : ॥

वागर : । पुं॰ गतातङ्के । परित्यक्तभये ॥ मुमुक्षौ ॥ वातवेष्टके ॥ विशारदे । पण्डिते ॥ विषाणे ॥ निर्णये ॥ वारके ॥ शाणे ॥ वाडवे ॥ वृके ॥

वागारु : । त्रि॰ आशाहन्तरि ॥ यथा । आशांवलवतीन्दत्तायोहन्तिपिशुनोजन : । सजीवासोपिवागारुर्दु° णा॰दानुस्तुदातरि ॥ इतिशब्दमाला

वागाशनि : । पुं॰ बुद्धे ॥

वागाशी : । पुं॰ शुभवाचि ॥ वाचि आशीर्यस्य स : ॥

वागीश : । पुं॰ जीवे । बृहस्पतौ ॥ त्रि॰ वाक्पतौ ॥

वागीशा । स्त्री॰ सरस्वत्याम् ॥ वाचामीशा ॥

वागीश्वर : । पुं॰ ब्रह्मणि ॥ बृहस्पतौ ॥ ऋग्वेदादिरूपाणांवाचामीश्वर : । मञ्जुघोषे ॥ त्रि॰वाचामीश्वरे ॥

वागीश्वरी । स्त्री॰ सरस्वत्याम् ॥

वागुजी । स्त्री॰ सोमराज्याम् ॥ वाचं गुञ्जति । गुजिअव्यक्तशब्दे । मूलविभुजादित्वात्क: । पृषोदरादि: ॥

वागुण : । पुं॰ कर्म्मरङ्गे ॥

वागुरा । स्त्री॰ मृगबन्धनार्थजाले । मृगबन्धन्याम् ॥ खावल॰खावली॰ इ॰जाल॰इ॰च॰भया ॥ अवागुरते । गुरीहिंसायाम । इगुपधेतिक : । वष्टिभागुरीत्यवाकारलोप : ॥

वागुरिक : । पु॰ व्याधविशेषे । जालिके ॥ वागुरयाचरति । चरतीतिठक् ॥

वाग्गुद : । पुं॰ पक्षिविशेषे । वागुड॰ वाड॰इ॰भा॰प्र॰ ॥

वाग्गुलि : । पुं॰ ताम्बूलिनि । राज्ञांताम्बूलदातरि ॥ जातिविशेषे ॥

वाग्गुलिक : । पुं॰ ताम्बूलदे ॥

वाग्जालम् । न॰ शास्त्रमात्रे ॥ यथा । परिनिर्मथ्यवाग्जालंनिर्णीतमिदमेवहि । नोपकारात्परोधर्मोनापकाराद्घंपरम् ॥

वाग्दरिद्र : । त्रि॰ वाग्मे । मितभाषिणि ॥ वाचादरिद्र : ॥

वाग्दलम् । न॰ दन्तवाससि । ओष्ठाधरयो : ॥

वाग्दुष्ट : । पुं॰ व्रात्ये ॥ त्रि॰ वाचा दूषिते । परुषभाषिणि ॥ वाचादुष्ट : ॥

वाग्देवता ।) वाग्देवी ।) स्त्री॰ सरस्वत्याम् ॥

वाग्बन्ध : । पुं॰ पणे । समये ॥ *

वाग्मी । पुं॰ सुराचार्य्ये ॥ त्रि॰ पटौ ॥ वक्तरि । विविधशास्त्राभ्यासाधिवासितप्रशस्तवाग्युक्ते ॥ वाग्मीसभ्य

वैखरीरूपायांवाण्याम् । सरस्वत्याम् ॥

वाङ्माचा । स्त्री० वाचोमाचायाम् ॥ यथा । निमेषोन्वेषणं पुंसामङ्गुल्याःक्रोटिकाथवा । गुर्वन्वरोच्चारणं वावाङ्माचे यंस्मृतावुधै: ॥

वाङ्मुखम् । न० वचनोपक्रमे । उपन्यासे ॥ वाचोमुखमिवमुखम्०उपक्रम : ॥

वाक् । स्त्री० वाण्याम् । भारत्याम् । अर्थपरिज्ञानफलायाम् । सर्वस्यार्थस्यप्रकाशिकायांसंस्कारवाण्याम् ॥ योह्यर्थंसम्यगववुध्यतेतेनैवसासम्यक्श्रुताभवति । प्रत्यक्षेणशब्दस्वरूपमुपलभमानोऽपिअर्थापरिज्ञानान्नपश्यतिनशृणोतीत्यनुभवात् ॥ शब्दसामान्ये ॥ वचने । वाक्ये ॥ तीक्ष्णानारुन्तुदावुद्धि : कर्मशान्तप्रतापवत् । नोपतापिमन : सोष्मवागेकावाग्मिन : सत : ॥ कण्ठताल्वादिस्थाने०इन्द्रिये ॥ जिह्वामूलादिष्वष्टसुस्थानेषुविषक्तेत्राग्नेयेवर्णानामभिव्यञ्जकेकरणे ॥ अकारादिवर्णेषु ॥ वर्णाश्चार्थसङ्केतपरिच्छिन्नाएतावन्तएवंक्रमप्रयुक्ताइत्येवंतदभिव्यङ्ग्य : शब्द : पदंवागित्युच्यते ॥ इतिभाष्यम् ॥ वक्तीति०उच्यते०ऽनयावा । वचपरिभाषणे । क्विव् वचीत्यादिनाक्विप्०दीर्घोऽसम्प्रसारणञ्च ॥

वाग्भवतीतिनिश्चितोथ : ॥ प्रशस्तावागस्य । वाचोग्मिनि : । गकारोच्चारणं प्रत्ययेभाषायामित्यनुनासिकाभावाय । उत्तरसूत्रस्यवहुभाषिणोत्यस्यापिसम्बन्धात् । सम्यग्वहुभाषिणि०वाग्मीतिवोध्यम् ॥

वाग्य : । त्रि० निर्वेदे ॥ कल्पे ॥ वाग्दरिद्रे ॥

वाग्यत : । त्रि० यतवाचि । मौनिनि ॥ वाचियत : ॥

वाग्याम : । त्रि० योब्रह्मशक्त्यादिनावाचंयच्छतितस्मिन् ॥

वाग्वज्र : । पुं० शापे ॥ वागेववज्रोऽहिंसकत्वात् ॥

वाग्वित् । त्रि० वैयाकरणे । वाक्यकोविदे ॥ वाच : विन्दति०वक्तुं०विवेक्तुंजानातिवा । सत्सूद्विषेत्यादिनाक्विप् ॥

वाग्विसर्ग : । पुं० वाच : प्रयोगे ॥

वाङ्क : । पुं० कच्छले । समुद्रे ॥

वाङ्मती । स्त्री० नदीविशेषे ॥ यथा । हिमाद्रेस्तुङ्गशिखरात्प्रोद्भूतावाङ्मतीनदी । भागीरथ्या : शतगुणंपवित्रंतज्जलंस्मृतम् ॥

वाङ्मय : । त्रि० वाक्यात्मके ॥ यथा । स्यरस्तनभुगैर्लान्तैरेभिर्दशभिरक्षरै : । समस्तंवाङ्मयंव्याप्तंत्रैलोक्यमिवविष्णुना ॥

वाङ्मयी । स्त्री० परापश्यन्तीमध्यमा

वाच : । पुं॰ मत्स्यविशेषे । वाचा॰ इ॰गौ॰दे॰भा॰ ॥

वाचंयम : । पुं॰ मुनौ । मौनव्रतिनि ॥ वाचंयच्छति । यमउपरमे । वाचि यमोव्रतइतिखच् । वाचंयमपुरन्दरौचेत्यमन्तत्वम् ॥

वाचक : । पुं॰ शब्दे ॥ यथा । शास्त्रे शब्दस्तुवाचक : । शास्त्रे व्याकरणीयेवाचक : साधुशब्द : सएवनिरुपपदेनशब्दशब्देनव्यवह्रियते ॥ वर्णव्यतिरिक्तस्यपदस्यवाक्यस्यवावाचकत्वमिच्छन्तिवैयाकरणा: । वर्णानांप्रत्येकंवाचकत्वे द्वितीयादिवर्णोच्चारणानर्थक्यप्रसङ्गादितिकैयट : ॥ कथके । पुराणादिपाठके ॥ सचब्राह्मणएवभवति । यथा । ब्राह्मणंवाचकंविद्यान्नान्यवर्णजमादरात् । श्रुत्वान्यवर्णजाद्राजन्वाचकान्नरकंव्रजेदिति ॥ त्रि॰वक्तरि ॥ वक्ति ॥

वाचक्नवी । स्त्री॰ वचक्नोर्दुहितरि । गार्ग्याम् ॥

वाचनम् । न॰ कथने ॥ पठने ॥ यथा । शुद्धेनानन्यचित्तेनपठितव्यंप्रयत्नत : । नकार्यासक्तमनसाकार्यंस्तोत्रस्यवाचनमितिवाराहीतन्त्रम् ॥

वाचनकम् । न॰ प्रहेलिकायाम् ॥ वायने । व्रतोपायने । यूपविशेषे ॥

वाचनिक : । त्रि॰ वचनप्राप्ते ॥ वचनादागत : । ठक् ॥

वाचनीय : । त्रि॰ वाचयितुमर्हे ॥

वाचस्पति : । पुं॰ जीवे । बृहस्पतौ ॥ वाच : समस्तविद्यारूपस्यवचस : पति: । षष्ठ्या: पतिपुत्रपृष्ठपारपदपयस्पोषेष्वितिसत्त्वविधानात्॰षष्ठ्याअलुक् ॥

वाचस्पतिवल्लभ : । पुं॰ पुष्परागमणौ । पोखराज॰इतिभाषाप्र॰ ॥

वाचस्पत्यम् । न॰ वाग्मित्वे ॥ ब्राह्मणादित्वाद्भावेष्यञ् ॥

वाचा । स्त्री॰ वाचि । वाण्याम् ॥ क्विबन्ताद्वाचो॰भागुरिमतेटाप् ॥

वाचाट : । त्रि॰ जल्पाके । वाचाले । बहुगर्ह्यवाचि ॥ कुत्सितंबहुभाषते । आलजाटचौबहुभाषिणि । कुत्सितइतिवक्तव्यमितिवाक्शब्दाद्‌आटच् ॥ सुबहुभाषिण्यपिजल्पाकवाचाटवाचालावर्त्तन्ते । वाचाटोवाचालोजल्पाक : सुबहुभाषीस्यादितिशब्दार्णवपर्यायेवोपालित : । नित्यप्रगल्भवाचालामुपतिष्ठे सरस्वतीमितिमुरारिश्च ॥

वाचारम्भणम् । न॰ अनृतजडानात्मरूपे ॥ निरूप्यमाणेस्वत : सत्ताहीनमपियद्परोक्षव्यवहारगोचरतया गम्यतेतदित्यर्थ : ॥

वाचाल : । त्रि॰ वाचाटे ॥ कुत्सितं बहुभाषते । वाचोबहुत्वेस्यसन्तीशा । आलजाटचौबहुभाषिणि । कुत्सित

इतिवक्तव्य मितिवाचमालच् ॥

वाचिकम् । न० सन्देशवाचि ॥ वाचोव्याहृतार्थाया मितिठक् ॥ वाचिकंतद्वचेयदूतत्वे नाभिशंसन मितिशब्दरत्नावली ॥ पुं० वाक्यारम्भे ॥ यथा । आलापश्चविलापश्च संलापश्चविलापकः । अनुलापो पलापश्चसन्देशश्चातिदेशिकः ॥ अपदेशोपदेशौचनिर्देशोव्यपदेशकः । कीर्त्तितावचनारम्भाद्वादशा मीमनीषिभिरित्युज्ज्वलनीलमणिः ॥ त्रि० वाचा० वचसाकृते ॥ यथा । कायिकंवाचिकंवापिमानसंवायथा मति । आराधनेपरेशस्यभावशुद्धिर्विधीयते ॥

वाचिकहारकः । पुं० लेखे । वर्णदूते ॥

वाचोयुक्तिः । त्रि० वाग्मिनि ॥ वाचोवचसः युक्तिः सयुक्तिरस्यम् । वाक्दिक्पश्यद्भ्योयुक्तिदण्डहरेष्विति षष्ठ्याअलुक् ॥

वाचोयुक्तिपटुः । त्रि० सुवक्तरि । वाग्मिनि । वाचोयुक्तिश्चासौपटुश्च ॥

वाच्यम् । न० प्रतिपादने । दूषणे ॥ त्रि० कुत्सिते । हीने ॥ वचनार्हे ॥ अभिधेये ॥ यद्यस्माच्छब्दान्नियमतः प्रतीयते० तत्तस्यवाच्यम् । यथा । गामानयेत्यस्मिन्वाक्ये० गोशब्दस्यगोत्वम् ॥ उच्यते । वचपरिभाषणे । ण्यत् । वचोऽशब्दसंज्ञायामिति नकुत्वम् ॥ अर्थोवाच्यश्चलक्ष्यश्च व्यङ्ग्यश्चेतित्रिधामतः । वाच्योर्थोभिधयाबोध्योलक्ष्योलक्षणयामतः । व्यङ्ग्योव्यञ्जनयाताःस्युस्तिस्रः शब्दस्यशक्तयः ॥

वाच्यमानः । त्रि० प्रस्तूयमाने ॥ वचेस्त्रौरादिकात्कर्मणिलटःशानच् ॥

वाजः । पुं० निस्वने । शब्दे ॥ पक्षे ॥ शरपक्षे ॥ वेगे ॥ मुनौ ॥ न० घृते । यज्ञे । अन्ने ॥ वारिणि ॥ वजत्यनेन । वजगतौ । हलश्चेतिघञ् । निष्ठायांसेटित्यादिनाकुत्वम् ॥ वाजयतिवा । ण्यन्तः । पचाद्यच् ॥

वाजपेयः । पुं० न० अन्नसुराप्रधाने यागविशेषे । वाजपेयप्रतिपादके ग्रन्थे ॥

वाजपेयिकः । पुं० वाजपेययागविदितरि ॥ वाजपेयप्रतिपादकग्रन्थाध्येतरि ॥ वाजपेयमधीते० वेदवा । क्रतूक्थादिसूत्रान्तात्ठक् ॥

वाजभोजी । पुं० वाजपेययज्ञे ॥

वाजश्रवाः । पुं० अन्नदानादिनिमित्तयशोविशिष्टे ॥ वाजमन्नंतद्दानादिनिमित्तंश्रवोयशोयस्यसः ॥

वाजश्रवसः । पुं० वाजश्रवसोपत्ये ॥

वाजसनेयः । पुं० जनमेजयकृतवेदा

र्थयन्थे ॥ सतुवैशम्पायनशापाद्
च्छिन्न: ॥

वाजसनेयी । पुं॰ यजुर्वेदिनि ॥

वाजिगन्धा । स्त्री॰ अश्वगन्धायाम् ॥

वाजिता । स्त्री॰ अश्वत्वे । पक्षे ॥

वाजिदन्त: । पुं॰ वासके ॥ वाजी
दन्तोऽस्य॰ वाजिदन्ताभकेशरत्वा
त् ॥

वाजिदन्तक: । पुं॰ वैद्यमातरि ।
अटरूषे ॥ स्वार्थेक: ॥

वाजी । पुं॰ अश्वे ॥ पक्षिणि । खगे
॥ वाणे ॥ वाजा: पक्षा: सन्त्य
स्य । अतइनि: । पूर्वंह्यश्वा: स
पक्षाआसन् । तथाचशालिहोत्र
म् । सपक्षावाजिन: पूर्वंसञ्जा
तोव्योमचारिण: गन्धर्वेभ्योयथा
कामंगच्छन्तिचसमन्ततइति ॥
अथर्व्यंव्रजति । व्रजगतौ । आव
श्यकेणिनिर्वा ॥

वाजिनम् । न॰ आमिक्षाजले ॥ घ
नीभूत: पिण्डआमिक्षा॰ जलंवा
जिनमितिव्यवहारात् ॥

वाजिनी । स्त्री॰ अश्वगन्धायाम् ॥
अश्वायाम् । वडवायाम् ॥

वाजिपृष्ठ: । पुं॰ अम्लानवृक्षे ॥

वाजिभक्ष: ।) पुं॰ चणके ॥ वाजि
वाजिभक्ष्य: ।)
भोभक्ष्य: ॥

वाजिभोजन: । पुं॰ मुद्गे ॥

वाजिमान् । पुं॰ पटोले ॥

वाजिवाहन: । पुं॰ गन्धर्वे ॥

वाजिशाला । स्त्री॰ मन्दुरायाम् । घ
ञशाल॰ टू॰ भा॰ ॥ वाजिनां
शाला ॥

वाजीकर: । त्रि॰ वाजीकरणे ॥

वाजीकरणम् । न॰ वीर्यवर्धकद्र
व्ये ॥ येनस्त्रीषुविषयेवाजीवन्नर:
सामर्थ्यंप्राप्नोति । अस्यलक्षणन्तु ।
यद्द्रव्यंपुरुषंकुर्याद्वाजिवत्सुरत-
क्षमम् । तद्वाजीकरमाख्यातंमुनि
भिर्भिषजांवरैरिति ॥ वाजीकरणत
न्त्रंनाम॰ अदुष्टविशुद्धक्षीणरेत
सामाप्यायनप्रसादोपचयजननमि-
मित्तंप्रहर्षजननार्थंचेतिसुश्रुत: ॥
विधिमाह । नरोवाजीकरान्यो
गान्सम्यक्शुद्धोनिरामय: । स
प्तत्यन्तंप्रकुर्वीतवर्षादूर्ध्वंतुषोडशा
त् ॥ नचवैषोडशादर्वाक्सप्तत्या:
परतोनच । आयुष्कामोनर: स्त्री
भि: संयोगंकर्त्तुमर्हति ॥

वाञ्छनम् । न॰ वाञ्छायाम् ॥

वाञ्छा । स्त्री॰ इच्छायाम् । काङ्
क्षायाम् । स्पृहायाम् । वाञ्छ
नम् । वाञ्छिइच्छायाम् । गुरोश्च
हल: । टाप् ॥ आत्मवृत्तिगुणवि
शेषइतिनैयायिका: । साद्विविधा
॥ यथा । उपायविषयिणी॰ फल
विषयिणीवा । फलंसुखंदु: खा

भावस्य । तत्र० फलेच्छांप्रतिफल ज्ञानंकारणम् । उपायेच्छांप्रति० इष्टसाधनताज्ञानंकारणमितिसि-द्धान्तमुक्तावली । ननाकपृष्ठंनच सार्वभौमंनपारमेष्ठ्यं नरसाधिपत्य म् । नयोगसिद्धीरपुनर्भवंवावा ञ्छन्तितत्पादरजः प्रपन्नाः ॥

वाञ्छितम् । त्रि० अभिलषिते ॥

वाञ्छिनी । स्त्री० वाञ्छनीयायांना र्याम् । लज्जिकायाम् । कुलटा लिकायाम् ॥

वाटः । पुं० पथि । मार्गे ॥ वृत्ति स्थाने । वृत्तौ । वाड० दू० भा० ॥ न० वरण्डे ॥ अङ्गे ॥ अन्नप्रभे दे । पुष्पादिवाटिकायाम् ॥

वाटधनः । पुं० भूर्जकण्टकोऽम्बष्ठ स्त्रीषु जाते ॥

वाटरम् । न० मधुविशेषे ॥ वटरैः कृतम् । क्षुद्राभ्रमरवटरेभ्यः ॥

वाटशृङ्खला । स्त्री० पथरोधकशृङ्खलायाम् लंभायाम् ॥

वाटिका । स्त्री० हिङ्गुपत्र्याम् ॥ कुट्याम् ॥ वास्तुनि ॥ वाट्यालके ॥ गृहोद्याने ॥ वध्यते । वटवेष्टने । संज्ञायामितिण्वुल् । टाप् । प्र त्ययस्थादितीत्वम् ॥

वाटी । पुं० वाट्याले ॥ त्रि० वेष्टित-स्थले ॥

वाटी । स्त्री० कुट्याम् ॥ वास्तौ ॥ गृ-हेद्याने । पूगपुष्पादिकृतोपवने ॥ वाट्यालके ॥

वाटीदीर्घः । पुं० इत्कटवृक्षे ॥

वाट्टकम् । न० भृष्टयवे ॥

वाट्यपुष्पी । स्त्री० वाट्यालके ॥

वाट्या । स्त्री० बलायाम् । बरियारा० दू० भा० ॥

वाट्यालः । पुं० वाट्यायाम् ॥

वाट्यालकः । पुं० क्षुपविशेषे । वा ट्यायाम् ॥ वाटीमलति । अलभू षणादौ । कर्मण्यण् । स्वार्थेकन् । णवुल्वा ॥ वाट्याघालकोवा ॥

वाट्याली । स्त्री० वाट्यालके ॥

वाडः । पुं० वेष्टने ॥

वाडवः । पुं० ब्राह्मणे ॥ वडवानले ॥ न० स्त्रीणांकरणे ॥ घोटकौघे ॥ पुं० न० पाताले ॥ वडवायां भवः । तत्रभवइत्यण् ॥ वडवा यांजातः । तत्रजातइत्यण्वा ॥ वडवानांसमूहः । खण्डिकादि भ्यश्चेत्यञ् ॥

वाडवाग्निः । पुं० वाडवाग्नौ ॥ वा डवश्चासावग्निश्च ॥

वाडवाग्र्यः । पुं० ब्राह्मणश्रेष्ठे ॥

वाडवेयः । पुं० अश्विनीसुते ॥ बीजा श्वे ॥ वडवायाअपत्यः । वडवा याहषेवाच्ये० इतिढक् ॥

वाडवेयौ । पुं० द्विवचनान्तः नासत्य योः ॥

वाडव्यम् । न॰ विप्रवृन्दे ॥ वाडवानां समूहः । ब्राह्मणमाणववाडवाद्यन् ॥ वाडवतायाम् ॥ वाडवस्य कर्म भावो वा । ब्राह्मणादित्वात् ष्यञ् ॥

वाड्वलिः । पुं॰ वाग्वादस्यापत्ये ॥ अपत्ये॰ अतइञ् । बाह्वादेः त्वं वल्भावश्चोत्तरपदस्येञि ॥

वाढम् । न॰ दृढे । भृशे । अतिशये ॥ प्रतिज्ञायाम् ॥ त्रि॰ अतिशयिनि ॥ आवेष्टके ॥ बाहते । बाहृप्रयत्ने॰ औणादिकः । गत्यर्थेति क्तप्रत्यये॰ क्षुब्धस्वान्तेति निपातितम् ॥ उह्यतेस्मवा । वहप्रापणे । क्तः । क्षुब्धस्वान्तेति साधुः ॥

वाढम् । अ॰ स्वीकारे । अङ्गीकृतौ ॥

वाणः । पुं॰ काण्डे । शरे । पृषत्के । विशिखे । अजिह्मगे । खगे । कलम्बे । मार्गणे ॥ गोस्तने ॥ केवले ॥ अग्नौ ॥ शरस्यावयवे ॥ वृक्षविशेषे ॥ भद्रमुञ्जे ॥ दैत्यविशेषे । बलेर्ज्येष्ठपुत्रे ॥ कविवरे ॥ मुञ्जे ॥ नीलझिण्ट्याम् ॥ ध्वनौ ॥ त्रि॰ ध्वनियुक्ते ॥ वाणयति॰ शेषमुत्पादयति शत्रुम् । वणशब्दे । स्वार्थे ण्यन्तः । पचाद्यच् ॥ वण्यते । कर्मणि घञ् वा ॥ वणनम् । भावे घञ् वा ॥ वाणः शब्दोऽस्त्यस्य । अर्श आद्यच् वा ॥

वाणगङ्गा । स्त्री॰ रावणवाणनिर्भिन्नसोमेश्वरगिरिप्रभवनदीविशेषे ॥ यथा । सोमेशाद्दक्षिणे भागे वाणेनाद्रिं विभिद्य वै । रावणेन प्रकटिता जलधारातिपुण्यदा ॥ वाणगङ्गेति विख्याता यास्नानादघहारिणी । स्नात्वा तु वाणगङ्गायां दृष्ट्वा वाणेश्वरं विभुम् । गङ्गास्नानफलं प्राप्य मोदते देववद्दिवि ॥

वाणदण्डः । पुं॰ वापदण्डे । वेमनि ॥

वाणपुङ्खा । स्त्री॰ शरपुङ्खायाम् ॥

वाणपुरम् । न॰ देवीकोटे । शोणितपुरे ॥ वाणस्यासुरविशेषस्य पुरम् ॥

वाणभट्टः । पुं॰ ग्रन्थकारविशेषे ॥

वाणयुद्धम् । न॰ वाणासुरेण सह श्रीकृष्णस्य युद्धे ॥ शरैर्युद्धे ॥

वाणलिङ्गम् । न॰ नर्मदानद्युद्भवशिवलिङ्गे ॥ यथा । नर्मदाजलमध्यस्थं वाणलिङ्गमिति स्मृतम् । वाणलिङ्गं स्वयंभूतं चन्द्रकान्तमयं स्थितम् ॥ चान्द्रायणशतं कार्यं शम्भोर्नैवेद्यभक्षणात् । ग्राह्याग्राह्यविभागोऽयं वाणलिङ्गे न विद्यते ॥ तदर्पितं जलं वान्नं ग्राह्यं प्रासादसंज्ञया । शिवनाभमयं लिङ्गं सदा पूज्यं महर्षिभिः ॥ यतश्च सर्वलिङ्गेभ्यस्तद्धि पूज्यतमं मतम् । चतुरङ्गुल

मुख्यायं रम्यं वेदिकयायुतम् ॥ उत्तमं लिङ्गमाख्यातं पञ्चसूत्रसुसाधितम् । तदर्धं मध्यमं प्रोक्तं तदर्धमवरं स्मृतम् ॥ तस्मान्न्यूनं पूजनीयं न कदापि न तत्फलम् ॥ रुद्राक्षं शिवलिङ्गस्य स्थूलत्वं प्रशस्यते । शालग्रामे नार्मदस्य सूक्ष्मस्य सूक्ष्मो विशिष्यते ॥

बाणवार: । पुं॰ भटादेश्चोलाकृतिसन्नाहे । वारबाणे । चोलके ॥

बाणवारक: । पुं॰ कञ्चुके ॥ बाणस्य वारक: ॥

बाणसुता । स्त्री॰ ऊषायाम् ॥ बाणस्य सुता ॥

बाणहा । पुं॰ विष्णौ ॥

बाणा । स्त्री॰ बाणमूले । पुं॰ स्त्री॰ नीलझिण्टाम् ॥ बण्यते । बण शब्दे । कर्मणि घञ् ॥

बाणाह्व: । पुं॰ मुञ्जे ॥ बाणइत्याख्यास्य ॥

बाणाश्रय: । पुं॰ धनुषि ॥

बाणासनम् । न॰ धनुषि ॥

बाणि: । स्त्री॰ वस्त्रादेर्वयनक्रियायाम् । व्यूतौ ॥ वयने ॥ वायदण्डे । अम्बुदे ॥ मूल्ये ॥ सरस्वत्याम् ॥ बाणनम् । बण॰ । चुरादि: । अचइ: ॥

बाणिनी । स्त्री॰ नर्त्तक्याम् ॥ मत्तायां नार्याम् ॥ विदग्धवनितायाम् ॥ अवश्यं वणति । बण॰ । आवश्यकेतिमध्यादित्वाद्बाणिनि: ॥ अष्टिसंख्यकछन्द: १६ प्रभेदे ॥ नजभजरैर्यदा भवति वाणिनी गयुक्तै: ॥ यथा । स्फुरतु ममानने ऽयमनुवाणिनीतिरम्यं तव चरणप्रसादपरिपाकत: कवित्वम् । भवजलराशिपारकरणक्षमं मुकुन्दं सततमहं स्तवै: स्वरचितैस्तवानि नित्यम् ॥

बाणी । स्त्री॰ सरस्वत्याम् । भारत्याम् ॥ वायक्रियायाम् । व्यूतौ ॥ वचने ॥ बण्यते । बण॰ । सर्वधातुभ्य इन्निति॰ इन् । कृदिकारादक्तिन इति ङीष् ॥

बात: । पुं॰ पवने । श्वसने । वायौ ॥ निमित्तभेदेनास्य गुणा यथा । व्यजनस्यानिलस्तृष्णास्वेदमूर्च्छाश्रमापह: ॥ तालवृन्तभवो वातस्त्रिदोषशमनो मत: ॥ वंशव्यजनज: सोष्णो रक्तपित्तप्रकोपन: । चामरोत्थ स्त्रसम्भूतो मायूरो वैत्रजस्तथा ॥ एते दोषजिता वाता: स्निग्धा हृद्याश्च पूजिता: ॥ बाति । वा गतिगन्धनयो: । हसिमृग्रिण्वामिदमिलूपूधुर्विभ्यस्तन्निति तन् ॥ स्वातिनक्षत्रे ॥ रोगविशेषे ॥ हेमन्तवर्षाशिशिरेषु वायो: प्रकोपो भवति । यत: । मार्गे पौषे तथा माघे आषाढे श्रावणेऽपि च । भाद्रे मासि विकि

स्मान्नैर्वातोराजप्रकीर्त्तितइति ॥
वातकः । पुं॰ शीतले । अपराजि
तायाम् । शणपर्ण्याम् ॥ वातंक
रोति । डुकृञ॰ । अन्येभ्योपी
तिडः ॥
वातकर्म्म । न॰ मरुत्क्रियायाम् ।
पर्द्दने ॥
वातकी । त्रि॰ वातरोगयुक्ते । वात
रोगिणि ॥ वातोऽतिशयितोऽस्य ।
वातातीसाराभ्यांकुक्चेतीनिः ॥
वातकुम्भः । पुं॰ गजकुम्भाधोभागे ॥
वातकेतुः । पुं॰ पांशौ । धूलौ ॥
वातकेलिः । पुं॰ कलालापे । चर्च्चरी
के ॥ षिड्गदन्तक्षते ॥
वातखुडा । स्त्री॰ वात्यायाम् ॥ पि
च्छिलस्फोटे ॥ वामायाम् ॥ वात
शोणिते ॥
वातगुल्मः । पुं॰ वातूले बवण्डर॰
बवूला॰ इतिभाषाप्रसिद्धे ॥
वातघ्नम् । न॰ तैले ॥ त्रि॰ वातना
शकर्त्तरि ॥ वातंहन्ति । हन॰ । अ
मनुष्यकर्त्तृकेचेतिटक् ॥
वातघ्नी । स्त्री॰ अश्वगन्धायाम् ॥ शा
लपर्ण्याम् ॥ शिमृडीक्षुपे ॥
वातचक्रम् । न॰ आषाढ्यांवायुविचारे
॥ तच्चोक्तंवाराह्यांभट्टोत्पलेन । य
था । आषाढपौर्णमास्यान्तुयदाशा
नैर्निलोभवेत् । अस्तंगच्छतितौ
क्ष्णांशौसस्यसम्पत्तिरुत्तमा ॥ पूर्वः

वातचक्रम्

पूर्वसमुद्रवीचिशिखरप्रस्फालनाघू
र्णितश्चन्द्रार्कांशुसटाकलापकलि-
तोवायुर्यदाकाशतः । नैकान्तस्थि
तनीलमेघपटलाशारदसंवर्द्धितावा
सन्तोत्कटसस्यमण्डिततलासर्वा
महीशोभते ॥ यदाग्नेयोवायुर्वहतिग
गनेखण्डिततनुः प्रवत्स्यस्मिन्योगे
भगवतिपतङ्गे प्रवसति । तदानि
त्योद्दीप्ताज्वलनशिखरालिङ्गिततला
स्तगोत्राप्नोच्छ्वासैर्वमतिवसुधाभस्म
निकरम् ॥ तालीपत्रलताबितान
तरुभि. शाखामृगान्नर्त्तयन्योगेस्मि
न्प्रवतिध्वनिः सुपरुषोवायुर्यदाद
क्षिणः । तद्वद्योगसमुत्थितस्तुगज
वत्तालाङ्कुशैर्घट्टिताः क्षीनाशा
द्रवमन्दवारिकणिकामुञ्चन्तिमेघा
स्तदा ॥ सूक्ष्मैलालवलीलवङ्गनि
चयान्व्याघूर्णयन्सागरेभानोरस्त
मयेप्रवत्यविरतोवायुर्यदानैर्ऋतः
। चुत्तृष्णावृतमानुषास्थिशकल
प्रस्तारभारच्छदामत्ताप्रेतवधूरिवी
यचपलाभूमिस्तदालक्ष्यते ॥ (*)
यदारेणूत्पातैः प्रविचलसटाटोप
चपलः प्रवातः पश्चाच्च दिनकर
करापातसमये । तदासस्योपेताप्र
वरनिकरावृद्धसमराश्चितिः स्थान
स्थानेष्वविरतवसामांसरुधिरा ॥
आषाढीपर्वकालेयदिकिरणपतेर
स्तकालोपपत्तौ वायव्योहृद्यवेगः

पवनघनवपुः पन्नगार्धानुकारी । नानाम्भोवारिधाराप्रमुदितमुदितां मत्तमण्डूककण्ठांसद्योहासैकचित्तां भूयबहुलतया भाग्यसेनामिवोर्वीम् ॥ मेरुग्रस्तमरीचिमण्डलतलच्छायावसानेरवौ वात्यामोदिकदम्बगन्धसुरभिर्वायुर्यदा चोत्तरः । विद्युद्भ्रान्तिसमस्तकान्तिकलनाभ्रान्तास्तदा तोयदा उन्मत्ता इव वृष्टिभिः स्फुरिकिरणां पूरयन्त्यम्बुभिः ॥ इतिवातचक्रनामाध्यायः । १७ ॥ कृत्तायामाषाढ्यां कृष्णाचतुर्थ्यामजैकपादर्क्षे । यदि वर्षति पर्जन्यः प्रावृट् शस्तानचेन्नतत ः ॥

वातचटकः । पुं० वार्त्तिकेखगे । बटेर० इ० भा० ॥

वाततूलम् । न० मरुद्ध्वजे । वृद्धसूत्रे । आकाशे० उड्डीयमानसूत्रे । ग्रीष्महासे ॥

वातथुडा । स्त्री० वातखुडार्थे ॥

वातध्वजः । पुं० मेघे ॥

वातपित्तजशूलम् । न० शूलरोगविशेषे ॥ तस्यौषधं यथा । मातुलुङ्गस्य निर्यासं गुडाढ्येन समन्वितम् । वातपित्तजशूलानि हन्ति वै पानयोगतः ॥

वातपुत्रः । पुं० महाधूर्त्ते ॥ भीमसेने । हनूमति ॥

वातपोतः ।) पुं० पलाशे ॥
वातपोतकः ।)

वातपोथः । पुं० पलाशे । किंशुके । पर्णे । केसू० इ० भा० प्र० वृक्षे ॥ वातं पोथयति । पुथ हिंसायाम् । कर्मण्यण् ॥

वातप्रमी । पुं० स्त्री० वातमृगे । वातादहरिणे । नि: शृङ्गमृगाकृतौ ॥ वातं प्रमिमीते० वाताभिमुखधावनात् । माङ् माने । वातप्रमीत्युणादिसूत्रेणमाङ ईप्रत्ययः कित् । स्त्रीत्वं वृद्दिकाशादितिवा ङीषित्यके । अन्ये तु कारग्रहणात्स्वतपरार्थत्वादीर्घान्तान्ङीप् नेत्याहुः नहि कारग्रहणं केवल ग्रहणमिति मुनित्रयेणपरिभाषितम् । अतएव० वातप्रमीश्रीलक्ष्मीतिपद्य ङ्यन्ताः सुसाधवइतिरचितः ॥ अश्वे ॥ नकुले ॥

वातफुल्लान्त्रम् । न० पुप्फुसे

वातमजः । पुं० वातप्रमी । वातादहरिणे । वातमजति । अजगतिक्षेपणयोः । वातशुनीतिलमर्द्धेप्वजधेटतुदजहातिभ्यउपसङ्ख्यानमितिखश् । अरुर्द्विषदितिमुम् ॥

वातमजा । स्त्री० वातमृग्याम् ॥

वातमण्डली । स्त्री० वायुसंहतौ । वात्यायाम् ॥

वातमृग : । पुं॰ वातमजे । वातप्रमी ॥ वातहरिण॰ वातस्यवामृग : ॥

वातरक्तम् । न॰ रोगविशेषे ॥

वातरक्तघ्न: । पुं॰ कुक्कुरे । ग्रन्थिपर्णे ॥

वातरक्तारि : । पुं॰ पित्तघ्नाम् । गुडूच्याम् ॥

वातरङ्ग : । पुं॰ अश्वत्थे ॥

वातरथ : । पुं॰ मेघे ॥ वातोरथोऽस्य ॥ गन्धे ॥

वातरशन: । त्रि॰ दिग्वाससि । दिगम्बरे ॥

वातरायण : । पुं॰ उन्मत्ते ॥ निष्प्रयोजनपुरुषे ॥ काण्डे । सायके । करपत्रे । क्रकचे ॥ कूटे ॥ शरसङ्क्रमे ॥ परसङ्क्रमे॰ इ॰ मेदिनी ॥ सरलद्रुमे ॥

वातरूष : । पुं॰ वातूले ॥ शक्रकार्मुके ॥ उत्कटे । इ॰ मेदिनी ॥ उत्कोचे । इ॰ हेमचन्द्र: ॥

वातरोग : पुं॰ वायुव्याधौ । चलातङ्के । अनिलामये ॥

वातरोगी । त्रि॰ वातरोगयुक्ते । वातकिनि ॥ वातरोगोऽस्यास्ति । इन्नृतोपतापेतीनि : ॥

वातर्षि: । पुं॰ काष्ठलौहोभयनिर्मितपात्रे । काष्ठलौह्याम् ॥

वातल : । पुं॰ चणके ॥ त्रि॰ वायुकारके ॥ वातंलाति । ला॰ । क : ॥

वातलमण्डली । स्त्री॰ वात्यायाम् ॥

वातवैरी । पुं॰ वाताद [illegible] त्रि॰ वातहरे ॥ वातस्यवैरी ॥

वातव्याधि: । पुं॰ वातरोगे ॥ [illegible] श्लेष्मणि । उद्भवे ॥

वातशीर्षम् । न॰ वस्तौ ॥

वातशोणितम् । न॰ वातरक्तरोगे ॥

वातष्ठीला । स्त्री॰ वातव्याधिविशेषे ॥ यथा । नाभेरधस्तात्सञ्जात : सञ्चारीयदिवाचल : । अष्ठीलावद्घनोग्रन्थिरूर्द्ध्वमायतमुन्नत: । वातष्ठीलांविजानीयाद्बहिर्मार्गनिरोधिनीम् ॥

वातसह : । त्रि॰ अत्यन्तवायुयुक्ते ॥ वातूले ॥

वातसारथि : । पुं॰ अग्नौ ॥

वातस्कन्ध : । पुं॰ आकाशस्यभागविशेषे ॥

वातहा । त्रि॰ वातघ्ने । वायुनाशकौषधौ ॥

वातहुडा । स्त्री॰ वातगुल्मार्थे ॥

वातघ्न : । पुं॰ वायुग्रस्ताङ्गे ॥ वातघ्न : पारदारिक : ॥

वाताट: । पुं॰ सूर्यघोटके । वातमृगे ॥

वाताण्ड : । पुं॰ मुष्करोगविशेषे ॥ तल्लक्षणंयथा । कुपितोदूषयेद्वायु : शुक्रं मार्गाय्यसंवृत: । तस्यमुष्कस्य कालेयोरोगोवाताण्डसंज्ञक : ॥

वातात्मज : । पुं॰ हनुमति ॥

वाताद: । पुं० बदामपादपे । तेच्चो
पमफले ॥ वाताद्दउष्णा : सुस्निग्धो
वातघ्न : शुक्रकृद्गुरु : । वाताद
मामधुरो दृष्य : पित्तानिलापह:॥
स्निग्धोष्ण : कफकृद्ज्ञेयो रक्तपित्त
विकारिणाम् । वातमत्ति । अद० ।
कर्म्मण्यण् ॥
वाताध्वा । पुं० वातायने ॥
वातापि : । पुं० इल्वलभ्रातर्य्यसुरवि
शेषे । वातमाप्नोति । आप्नृ० । फ
लीयच्छिरात्मम्भरिश्चेतिचकारादिन् ।

वातापिद्विट् ।)
वातापिसूदन : । } पुं० अगस्त्यमु
वातापिहा ।) नौ ॥

वाताम : पुं० वातादे ॥
वातायन : । पुं० एकशफे । अश्वे ।
हये ॥ न० गवाक्षे ॥ ईयतेऽनेन ।
इण्० । करणे ल्युट् वातस्याय
यनम् ॥ त्रि० शीघ्रगे ॥
वातायु : । पुं० मृगे । कुरङ्गे । हरि
णे ॥ वातमयते , अय० । बाहुल
कादुण् ॥
वातारि : । पुं० रक्तैरण्डे ॥ सयथा ।
वातारिबीजं प्रस्थञ्च सुपक्वं निस्तु
षीकृतम् । क्षीरं द्रोणार्द्धसंयुक्तं
भिषक् मन्दाग्निनापचेत् ॥ घृत
प्रस्थार्द्धसंयुक्तं खण्डप्रस्थद्वयं क्षिपेत् ।
त्र्यूषणञ्च चतुर्जातं ग्रन्थिकं वह्निचि
त्रकम् ॥ क्षुधामिसीशटीबिल्वं दी

प्यमोरीनिशायुगम् । अश्वगन्धा
बलं पाठा पुष्पा वैरपौष्करम् ॥ श्व
दंष्ट्रा रग्वधा दारु वेल्लजं बालकं वरी ।
एतानि पिच मात्राणि चूर्णयित्वा वि
नि: क्षिपेत् ॥ वातव्याधिं सशूलञ्च
राजयक्ष्मां तथोदरम् । आनाहं व
र्ध्म गुल्मञ्च आमवातं कटिग्रहम् ॥ ज
ठरं च तथा हिक्काश्वासकासहृदाम
यान् । अर्द्दितार्त्तिं पविश्वाची गृध्र
सीमपतन्त्रकम् ॥ पक्षाघातं पाण्डु
वातं भङ्गं दण्डापतानकम् । मन्या
स्तम्भं हनुस्तम्भं नाशयेदपि वेगतस्तु
ति ॥ पुत्रदाश्चीलतायाम् ॥ यवा
न्याम् ॥ शेफालिकायाम् ॥ स्नु
ह्याम् ॥ भार्ग्याम् ॥ विडङ्गे ॥ शू
रणे ॥ भल्लातके ॥ अतुकायाम् ॥
शतमूल्याम् ॥
वाताली । स्त्री० वातसंहतौ । वा
त्यायाम् ॥
वाताश्व : । पुं० कुलीनाश्वे । हयोत्त
मे । जात्ये । आजानेये ॥
वातासह : । त्रि० वातुले ॥
वाति : । पुं० अनिले । वायौ ॥ सू
र्य्ये ॥ सोमे ॥ वाति । वागतिगन्ध
नयो : । क्तिच् । वाते निर्दिश्य
तिर्वा ॥
वातिक : । पुं० कायुजव्याधौ ॥ न०
वातस्य शमने ॥ वातस्य कोपने ॥
वातपित्तश्लेष्म : शमनकोपनयो

रूपसङ्ख्यानमितिठञ् ॥

वातिग : । पुं॰ भण्टाक्याम् ॥ त्रि॰ धातुवादिनि ॥

वातिगम : । पुं॰ वार्त्ताकौ ॥

वातिङ्गण : । पुं॰ वार्त्ताकौ । भण्ट॰ भटा॰ इ॰ च॰ प्र॰ फलशाके ॥

वातीयम् । न॰ काञ्जिके ॥

वातुल : । पुं॰ वात्यायाम् ॥ त्रि॰ वायुरोगिणि ॥ वातसुखसेवनयोरदन्त : । बाहुलकादुलच् ॥ उन्मत्ते ॥

वातुलि : । स्त्री॰ तरुतूलिकायाम् । वादुड॰ इ॰ भा॰ ॥

वातूल : । पुं॰ वात्यायाम् ॥ त्रि॰ वातासहे । मारुतासहे ॥ वातानांसमूह : । वातंनसहतेवा । वातात् समूहेचेत्यूल : । चात्तदसहने ॥ यद्वा । वाता : सन्त्यस्यास्मिन्वा । सिध्मादित्वाल्लच् । वातदन्तबलललाटानामूङ्चेत्यूङ् ॥ उन्मत्ते ॥

वाता । पुं॰ वाते ॥ वाति । वागतिगन्धनयो : ॥ तृच् ॥

वातोना । स्त्री॰ गोजिह्वाक्षुपे ॥ त्रि॰ वायुहीने ॥

वातोर्म्मी । स्त्री॰ त्रिष्टुप्छन्द : ११ प्रभेदे ॥ तल्लक्षणादिर्यथा । वातोर्म्मीयंगदिताम्भौतगौग : । यथा ॥ ध्यातामूर्त्ति : क्षणमप्यच्युतस्यश्रेणीनाम्नांगदिताहेलयापि । संसारेऽस्मिन्दुरितंहन्तिपुंसांवातोर्म्मी पोतमिवाम्भोधिमध्ये ।

वात्या । स्त्री॰ वातसमूहे । वाताल्याम् ॥ वातानांसमूह : । पाशादिभ्यो य : ॥

वात्सकम् । न॰ वत्सानांवृन्दे । वत्सानांगणे ॥ वत्सानांसमूह : । गोत्रोक्षोष्ट्रेतिवुञ् ॥

वात्सल्य : । पुं॰ रसविशेषे ॥ न॰ प्रेम्णि ॥ त्रि॰ तद्वति ॥

वात्सल्यता । स्त्री॰ कृपालुत्वे ॥

वात्सीपुत्र : । पुं॰ नापिते ॥

वात्स्य : । पुं॰ मुनिविशेषे ॥ वत्सस्य गोत्रापत्यम् । गर्गादिभ्योयञ् । बहुत्वे॰ वत्सा : । यञञोश्चेतिलुक् ॥

वात्स्यायन : । पुं॰ शब्दादयोविषयाभूयोभूयोभुज्यमानास्तत्त्वमितिकल्पनापरेऋषिविशेषे । मन्दनागे । पक्षिले । स्वामिनि ॥

वाद : । पुं॰ यथार्थबोधेच्छोर्वाक्ये ॥ परिविद्विषोर्द्वयो: कथायाम् । व्यक्तवाक्ये ॥ भगवद्विभूतिविशेषे ॥ यथोक्तं भगवद्गीतायांवाद : प्रवदतामहमिति । अस्यार्थ : । प्रवदतांवादिनांसम्बन्धिन्योवादजल्पवितण्डाख्यास्तिस्र : कथा : प्रसिद्धा:॰ तासांमध्येवादोऽहम् । यत्र द्वाभ्यामपिप्रमाणतस्तर्कतश्चस्वपक्ष:

स्थापयति। परपक्षञ्छलजातिनिग्रह
स्थानैर्दूषयतिसजल्पोनाम। यस्त्वे
कः स्वपक्षं स्थापयति। अन्यस्तु।
छलजातिनिग्रहस्थानैस्तत्पक्षं दूष
यति। नतु स्वपक्षं स्थापयति। सा
वितण्डानामकथा। तत्रजल्पवितण्डे
विजिगीषमाणयोर्वादिनोः शक्ति
परीक्षामात्रफले। वादस्तुवीतराग
योः शिष्याचार्ययोरन्ययोर्वातत्त्व
निरूपणफलः। अतोऽसौश्रेष्ठत्वा
दादौभणितइत्यर्थः। इतिश्रीध
रस्वामिनः। अस्यलक्षणं गौतमो
क्तं यथा। प्रमाणतर्कसाधनोपाल
म्भः सिद्धान्ताविरुद्धः॥ १।
४१॥ अस्यार्थः। वादइतिलक्ष्यनि
र्देशः। पक्षप्रतिपक्षौविप्रतिपत्ति
कोटी। तयोःपरिग्रहस्तत्साधनो
द्देश्यकोक्तिप्रत्युक्तिरूपवचनसन्दर्भः
तावन्मात्रञ्चकथान्तरसाधारणम
तआह। प्रमाणेत्यादि। प्रमाण
तर्काभ्यांतद्रूपेणज्ञाताभ्यांसाधनो
पालम्भौयत्रसतथा। उभयत्रापि
प्रमाणादिसद्भावकोटिद्वयस्यापिसि
द्धिः स्यादतस्तद्रूपेणज्ञाताभ्यामि
ति। ज्ञानमनाहार्यंविवक्षितम्।
उपालम्भोदूषणम्। जल्पादौतुप्र
माणाभासत्वादिनाज्ञाताभ्यामपि
साधनोपालम्भौभवतइतितद्वारणं
तथा। इतरथातुतद्धेतोरेवदुष्टत्व

वादः

म्। इत्यत्रचप्रमाणाभासत्वप्रका
रकज्ञानविषयकरणकसाधनोपाल
म्भयोग्यान्यत्वे सतीत्यर्थः। तेन
तादृशजल्पविशेषेणातिव्याप्तिः। तत्र
चनिग्रहस्थानविशेषनियमार्थंसिद्धा
न्तेत्यादिविशेषणद्वयम्। अन्येतुतदपि
लक्षणघटकमेव। तदर्थञ्च। तावन्मा
त्रनिग्रहस्थानयोग्यत्वम्। तावद
तिरिक्तनिग्रहस्थानोपन्यासायोग्य
त्वं वा। निग्रहस्थानंप्रतिज्ञाहान्या
दीनामेकं धृत्वा। तदुपन्यासायोग्य
त्वमितिनिष्कर्षः। तेनोक्तजल्प
विशेषवारणमित्याहुः। सिद्धा
न्ताविरुद्धइत्यनेनापसिद्धान्तो
द्भावनम्। पञ्चावयवोपपन्नइत्य
नेनन्यूनाधिकोद्भावने। अवयवा
भासस्यदृष्टान्तासिद्ध्यादेश्चोद्भावनम्
। प्रमाणेत्यनेनचप्रमाणाभासत्वेनहे
त्वाभासानांतर्काभासस्यचोपन्यासो
नियम्यते। तथाचाचहेत्वाभासन्यूनाधि
कापसिद्धान्तरूपनिग्रहस्थानचतुष्ट
योद्भावनमितिवदन्ति। वस्तुतस्तुवाद
स्यवीतरागकथात्वेन। तत्त्वनिर्णयस्यो
द्देश्यतयापुरुषदोषस्याविज्ञातार्थादे
रिवन्यूनाधिकयोरपिनोद्भावनमुचि
तम्। अतएवपञ्चावयवावश्यकत्व
मपिभाष्यकारोनानुमेने। हेत्वाभा
साद्युद्भावनेनापिचतदेवकथाविच्छे
दोयदिहेत्वन्तरेणापिसाधयितुंनश

क्यते। इतरथा तु तदूर्ध्वे तैरेव दुष्टत्वम्। इत्यत्र चपत्र चावयवोपपन्न इति प्रायिकत्वाभिप्रायेणेति तत्त्वम्। वादाधिकारिणस्तु तत्त्वबुभुत्सवः। प्रकृतोक्तिकाः। अविप्रलम्भकाः। यथाकालस्फूर्त्तिकाः। अनाक्षेपकाः। युक्तिसिद्धप्रत्येतारः। अनुविधेयस्थेयः सभ्यपुरुषवती जनता सभा अनुविधेयो राजादिः स्थेयान् मध्यः सा च वादे नावश्यकी वीतरागकथात्वादिति ॥ १ । ४१ ॥ अपि च। वादफलस्य तत्त्वनिर्णयस्य दुर्दुरूढवादिनिराकरणेन संरक्षणार्थं विजिगीषुकथे जल्पवितण्डे। जयपराजयमात्रपर्य्यन्ते। तदुक्तम्। तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखाप्रावरणवदिति ॥ छलजातिनिग्रहस्थानैः परपक्षो दूष्यते इति जल्पे वितण्डायाञ्च समानम्। तत्र वितण्डायामेकेन स्वपक्षः स्थाप्यत एव। अन्येन च स दूष्यत एव। जल्पे तु उभाभ्यामपि स्वपक्षः स्थाप्यते उभाभ्यामपि परपक्षो दूष्यत इति विशेषः। तदुक्तम्। यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः ॥ १ । ४२ ॥ स प्रतिपक्षस्थापनाहीनो वितण्डेति । १ ॥ ४३ ।

अतो वितण्डाद्वयशरीरत्वाज्जल्पो नाम नैका कथा। किन्तु शक्त्यतिशयख्यापनार्थं समयबन्धमात्रेण प्रवर्त्तत इति खण्डनकाराः॥ तत्त्वाध्यवसायपर्य्यवसायित्वेन तु वादस्य श्रेष्ठत्वमेव ॥ सङ्घातादिवादेषु ॥ ते चोक्ता रामगीतास्वेव यथा। सङ्घातवादो लौकायतिकानां नास्तिकानाम्। अनादौ च क्षितिलोके नेश्वरादिरपेक्ष्यते। प्रत्यक्षसङ्घातभेदशक्तिभिः सर्वसिद्धितः ॥ यथौषधानां सङ्घाते मादो रागो रसायनम्। तथैव भूतसङ्घाते चैतन्यं कान्यजीवता ॥ १ ॥ यथा चारम्भवादस्तार्किकाणां मीमांसकानाञ्च। आत्माकाशाणुमुखतः कारणं पूर्वमिष्यते। कुलालादिवद्दण्डस्तु घटवज्जन्मनाशभाक् ॥ पृथिव्यम्भोग्निवायूनां कर्मसंयोजिताणवः। द्व्यणुकादिक्रमेणाण्डमारभन्त इदं महत् ॥ २ ॥ यथा च परिणामवादः साङ्ख्यपातञ्जलपाशुपतानाम्। गुणसाम्यं प्रधानं स्याद्गुणाः सत्त्वं रजस्तमः। सुखदुःखमोहरूपं दृश्यते हि स्फुटं जगत् ॥ प्रधानं स्यान्महान् सोऽहङ्कारोऽसौ षोडशात्मना। जायते पञ्च तन्मात्राण्यक्षाण्येकादशापि वत्। तन्मात्राणि तु भूतानि जायन्ते तत्र सङ्ख्यया। चतुर्विंशति

वाद :

रेतानितचात्मापञ्चविंशति : ॥ स देवकार्यमुत्पन्ने : पूर्व्वकारकरूपकम् । चाविर्भावतिरोभावौजन्ममाशावुदीरितौ ॥ ३ ॥ यथाचजीवोत्पत्तिवाद : पाञ्चराचाणाम् । ब्रह्मणोवासुदेवाख्याज्जीव : सङ्कर्षणाभिध : । जायतेचमनस्तस्मात्प्रद्युम्नाख्यंतत : पुन : ॥ चहङ्कारोऽनिरुद्धाख्यश्चतुष्वारोविश्वरूपका: । वासुदेवाराधनाद्यैर्जायतेवन्धमोचणम् ॥ ४ ॥ यथाचचणिकविज्ञानातिरिक्तभावाभाववादोवौद्धानाम् । विज्ञानंबुद्धिरितिनार्थान्तरम् । यद्न्तर्ज्ञेयतत्त्वंतद्वहिर्वद्वभासते । स्वप्नवज्जागरेसुप्तावभाव: स्फुटएवहि ॥ ५ ॥ यथाचवाद्यास्तित्ववादोवौद्धैकदेशिनाम् । समुदायोऽणुसम्भूतोवाह्योभूम्यपगादिक : । चान्तर : स्कन्धजस्तिस्तस्यरूपश्चतौजगत् ॥ रूदम्वुवह्निवायूनांखरस्निग्धोष्णचञ्चला : । चतुर्द्धाचाणव : पञ्चस्कन्धारूपादिभेदत : ॥ रूप : शब्दादयस्तेषांव्यक्तिर्विज्ञानमुच्यते । वेदनासुखदु : खेस्त : संज्ञाडित्यादिनामयत् ॥ संस्कारोवासनाचैवमुक्तसङ्घदया त्मकम् । जगत्प्रत्यचत : सिद्धंकिमन्यपरिकल्पनै : ॥ ६ ॥ यथा चसप्तपदार्थवादचार्हतानाम् । जीवाजीवात्मकंविश्वंचेतन : स्वशरीरवत् । परिणामावयववानऽजीव : षड्विध: स्मृत : ॥ महीधरादिरेक : स्यात्पञ्चधाचास्रवादिक : । चास्रव : संवरोनिर्जरोवन्धोमोच एवच ॥ इन्द्रियाण्यविवेकादि : केशोल्लुञ्चादिभिस्तप : । जन्मान्यूर्द्ध्वगतिश्चेतिपञ्चानामर्थ उच्यते ॥ स्यादस्तीत्यादिनासप्तभङ्गीन्यायेनवादिन : । सप्तैवक्रमशोऽपास्यस्वमतंसाधयेत्सुधी : ॥ सत्त्वासत्त्वोभयाऽवाच्यवादिन : स्युश्चतुर्विधा : । द्विधाऽऽद्यास्वावाच्यतोक्तावादिन : सप्तकीर्त्तिता : ॥ ७ ॥ एतेषांवादानांप्रमाणानपेचस्वाग्रहमाचमूलत्वाद्दृश्यमाणप्रमाणवाधितत्वाच्चनसामञ्जस्यम् । तथाहि । तावत्सङ्घातवादोनयुक्तिसह : । घटोपलब्धिवत्सङ्घोपलब्धिभिर्घ्यतेस्फुटम् । साजीवोममदेहोयमितिभेदानुभूतित : ॥ योगिनश्चाथभूतादेर्देहान्तरगति : स्फुटम् । चात्माभावेकृतध्वंसोह्यकृताभ्यागमस्तथा ॥ चणिकात्तोकार्यजन्मसहकार्यप्रतीचिण : । सहकारिप्रतीचायांचणिकत्वंपराहतम् ॥ ईशानुमानन्तुपुष्पदन्त : समर्थयामास । चजस्यास्यलोका : किमवयववन्तोपिजगतामधिष्ठातारंकिंभवविधिरनादृत्यभ

वति । अनीशोवाकुर्याद्भुवनजनमे
क : परिकरोयतोमन्दास्त्वांप्रत्यमरव
रसंशेरतइमे ॥ इति । यतोवाइमा
निभूतानिजायन्ते येनजातानिजीव
न्तियत्प्रयन्त्यभिसंविशन्तितद्ब्रह्मे
त्यादिश्रुतयस्तु स्वतन्त्रमेवप्रमाणम्
॥ १ ॥ आरम्भवादोपिनयुक्तिस
ह : । यथा । अणुसंयोजकंकर्म्म
निर्निमित्तंयदाभवेत् प्रलयस्तर्हि
नभवेत्सनिमित्तंकथंवद ॥ शरी
राभावतस्तत्रप्रयत्नादेरसम्भवात् ।
नित्यत्वादीशयत्नोपिकादाचित्कोऽ
र्हितोनहि ॥ जीवात्मसमवेतत्वाद
दृष्टंनाणुषुक्वचित् । एवमादिवि
चारेणदुष्टाणुपरिकल्पना ॥ कुला
लवत्तटस्थश्चेदीश्वरस्तर्हिमत्समः
। शरीरोपस्कराकाङ्क्षीविषमोनि
र्घृणस्तथा । ईशेवेदःप्रमाणञ्चेत्त्वा
ज्यातर्हितटस्थता ॥ यतःस्फुटंनिरा
बाधंमायित्वंतत्रवर्ण्यते ॥ अखण्डस
च्चिदानन्दोजगद्रूपेणभासते । मा
यायांदुर्घटंनास्तिकिञ्चित्तद्रूप
याहिसा ॥ परमाणवादिकल्पना
विरोधिन्यःश्रुतयः । एकोऽहं
बहुस्यांप्रजायेयेति । एतस्मादात्म
नआकाशःसम्भूतः आकाशाद्वा
युर्वायोरग्निरग्नेरापः अद्भ्यःपृ
थिवीति । मायान्तुप्रकृतिंविद्या
न्मायिनन्तुमहेश्वरमिति । इन्द्रो

मायाभिःपुरुरूपईयते । इत्येव
मायाप्रसङ्ख्याताएव । एवंस्मृ
तीतिहासवाक्यान्यपि ॥ २ ॥ परि
णामवादोपिनयुक्तिसहः । यथा ।
विचित्रजगतोहेतुर्नप्रधानमचेतन
म् । चेतनोपिहिनिस्सङ्गोनसहाय
त्वमर्हति ॥ गुणकार्यंसुखादीना
मान्तरत्वस्यनिश्चयात् । घटादावन्व
योनास्तिकथमव्यक्तकार्यता ॥ कि
ञ्चापरिणतेतस्मिन्कार्योत्पत्ति
र्नयुज्यते । परिणामेतस्यनाशः
कार्यस्यापिनिराश्रयात् ॥ नचप्र
धानकल्पनायाम् अजामेकांलो
हितशुक्लकृष्णामित्यादिश्रुतिःप्र
माणम् । तस्याःयदग्नेरोहितं
रूपंतेजसस्तद्रूपंयच्छुक्लंतदपां
यत्कृष्णंतदन्नस्येतिच्छान्दोग्योक्तते
जोबन्नात्मकप्रकृतिपरत्वेनमायापर
त्वेनापिसूरिभिर्व्याख्यातत्वात् । ए
वमन्यत्स्वयंसमाधेयम् ॥ ३ ॥ जीवो
त्पत्तिश्चनयुक्तिसहा । यथा । जीवोत्प
त्तिर्नयुक्तेतिजीवस्यानादिताश्रुता ।
विनाशिकृतनाशःस्यादकृताभ्या
गमस्तथा ॥ ४ ॥ विज्ञानवादोपि
नयुक्तिसहः । यथा । जागरेबाध्य
तेस्वप्नोजागरोनैवबाध्यते । तवत
द्बाधकाभावाद्बाह्यमस्त्युपलब्धितः
॥ बहिर्वदितितेप्युक्तिर्बाह्यमर्थं
प्रसाधयेत् । एवंनयुज्यतेबुद्धे

जगदाकारतातत्र ॥ स्थिरचेतन
राहित्यात् स्वयञ्च क्षणिकत्वात् :
। सृष्ट्यादिव्यवहारस्यलोपश्चतत्र
दोषः ॥ ममतु आगरादिभ्रमा
धिष्ठानस्याखण्डबोधानन्दरूपस्यब्र
ह्मणः साक्षात्कारोबाधकोस्ति ॥
५ ॥ बाह्यास्तित्ववादोऽपिनयुक्ति
सहः । यथा । स्थिरचेतनराहित्या
त्स्वयञ्चाचेतनत्वात् । नस्क
न्धानामणूनांवासमुदायोऽवयुज्य
ते ॥ ६ ॥ सप्तपदार्थीवादश्चनयु
क्तिसहः । यथा । एकस्मिन् सदस
त्त्वादिविरुद्धप्रतिपादनात् ।
अपन्यायः सप्तभङ्गीनयजीवस्यासां
मता ॥ अस्यार्थः । स्यादस्ति १
। स्यान्नास्ति २ । स्यादस्तिचनास्ति
च ३ । स्यादवक्तव्यः ४ । स्याद
स्तिचाऽवक्तव्यः ५ । स्यान्नास्तिचा
वक्तव्यः ६ । स्यादस्तिचनास्तिचा
वक्तव्यश्चेति ७ । सप्तभङ्गीवाक्यानि
। तेषुचस्याच्छब्दः ईषदर्थवाची
निपातः । तदर्थेचपूर्वपक्षश्लोको
क्तानांसद्वाद्यसद्वाद्युभयवाद्यनिर्व
चनीयवादद्व्यसदनिर्वचनीयवाद्यु
भयानिर्वचनीयवादिनांमतानि ।
क्रमेणाभिहितानि । तेचवादिनः
समागत्यार्हन्तं प्रतिकिन्त्वन्मते
मोक्षोस्तीत्यादिस्वस्वमतंक्रमेणपृ
च्छन्ति । तत्रार्हन्तान् प्रतिप्रत्ये

कं क्रमेणतान्येववाक्यानीषत्तन्म
ताभ्युपगमनार्थकानिपृथक्पृथगे
वोत्तरत्वेनब्रूते । तावतासर्व
वादिनोनिर्विषण्णाः सन्तोनो
त्तरंप्रतिपद्यन्तेएवंविधस्तेषांसप्त
भङ्गीरूपोयं न्यायोऽपन्याय एव ।
अपकृष्टोन्यायोन्यायाभ्यास एवे
त्यर्थः । कुतइत्यतआह ।
एकस्मिन्निति । एकस्य जीवप
दार्थस्यसद्वादिनंप्रतिसद्रूपत्वम् ।
असद्वादिनंप्रत्यसद्रूपत्वञ्चेत्येवमा
दिविरुद्धधर्म्मप्रतिपादकत्वात् ।
नचजीवस्यसावयवत्त्वंयुज्यते । श
रीरादिवदनित्यत्वप्रसङ्गात् । तद
नित्यत्वेमोक्षः कस्यपुरुषार्थः स्या
त् । तस्मान्न्यायाभासेनसप्तभङ्ग्याख्ये
नजीवादिपदार्थानांनसिद्धिरिति
॥ ततश्चपारिशेष्याज्जगतोमायाम-
यत्वसिद्धिः । तदुक्तम् । ततोनि
रंशआनन्देविवर्त्तोजगदिष्यताम् ।
अवस्थान्तरभानन्तुविवर्त्तोरज्जुसर्प
वत् ॥ मायाशक्तिः कल्पिकास्या
दिन्द्रजालिकशक्तिवत् । शक्तिः श
क्तात्पृथङ्नास्तितद्वद्दृष्टेनचाभि-
दा ॥ प्रतिबन्धस्यदृष्टत्वाच्छक्त्यभावे
तुकस्यसः । शक्तेःकार्यानुमेयाया
अनिर्वाच्यत्वमिष्यताम् ॥ इति ॥
वदनम् । वदव्यक्तायाम्वाचि ।
घञ् ॥

वादक: । त्रि॰ वाद्यकरे ॥ वक्तरि ॥

वादनम् । न॰ वाद्ये ॥ शिवागारे झल्लकस्य सूर्यागारे च शङ्खकम् । दुर्गागारे वंशिवाद्यं मधुरीं च न वादयेत्

वादफलम् । न॰ तत्त्वनिर्णये ॥

वादरम् । न॰ कृष्णालाबीजे । काकचिञ्च्याबीजे ॥ दक्षिणावर्त्तशङ्खे ॥ चीरे ॥ काकचिञ्चायाम् ॥ भारद्याम् ॥ कृमिजे ॥ जले ॥ कार्पासीफले ॥ वदराया विकार: फलम् । अवयवे चेत्यण् । तस्य फले लुक् । वदरस्य विकार: । तस्य विकार इत्यण् । त्रि॰ कार्पासीनिर्मितवस्त्रादौ ॥

वादरङ्ग: । पुं॰ अश्वत्थवृक्षे ॥

वादरा । स्त्री॰ कार्पास्याम् ॥

वादरायण: । पुं॰ व्यासदेवे ॥

वादरायणि: । पुं॰ शुकदेवे ॥ व्यासतनये ॥ वादरायणस्यापत्यम् । अत इञ् ॥ व्यासदेवे ॥

वादलम् । न॰ मधुयष्टिकायाम् ॥

वादवादी । पुं॰ जिनभेदे । आर्हते ॥

वादवित् । त्रि॰ धातुवादी मन्त्रशादखेष्टादयो वादा वस्तुभूता भवन्तीति वादज्ञे ॥ कल्पनैवैषा॰ ताम्रादिभावे स्थितेनष्ट अकनकादिस्वभावासम्भावात् । मन्त्रवादेपि॰ कालदष्टो न जीवति । अकालदष्ट: स्वयमेवोत्थास्यतीत्यभ्युपगमात्॰ व्यामोहमात्रमेव ॥ वादज्ञे ॥

वादान्य: । त्रि॰ बहुदातरि । बहुप्रदे ॥

वादमम् । न॰ वादामे । वातादे ॥

वादाल: । पुं॰ मत्स्यप्रभेदे । सहस्रदंष्ट्रे । बोयालि॰ इ॰ गौ॰ दे॰ भाषाप्रसिद्धे ॥

वादि: । त्रि॰ विदुषि ॥ वक्तरि । वादयति । वद॰ । वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ् । सूत्रे वादीति अयमपि विदिष्ट: । बाहुलकादण्यन्तादपि । तथाच भूवादिसूत्रे॰ वदतीति वादयो वाचका इति न्यासकारादय: ॥

वादित्रम् । न॰ आतोद्ये । वाद्ये ॥ वाद्यते॰ ध्वन्यते । वदेर्ण्यन्तात् । भूवदिगृभ्यो णित्रन्॰ इति॰ णित्रन् ॥

वादी । त्रि॰ वक्तरि । वदनशीले ॥ अर्थिनि । विवादकर्त्तरि । पुका रू॰ वादू॰ इ॰ भा॰ प्र॰ पूर्व्वपक्षकर्त्तरि ॥ वादोऽस्यास्ति । इनि: ॥

वादिरम् । न॰ वदरीसदृशसूक्ष्मफलवृक्षे ॥

वादिराट् । पुं॰ पूर्वजिने । मञ्जुघोषे ॥

वादिराज: । त्रि॰ वादिश्रेष्ठे ॥ वादिनां राजा । टच् ॥ पुं॰ मञ्जुघोषे ॥

वादिश:। त्रि० साधुवादिनि ॥

वाद्यम्। न० वादनीये। वादित्रे। आतोद्ये ॥ वाद्यते॰ध्वन्यते। वदेर्ण्यन्ताद्‌चोयत् ॥ तच्चतुर्विधं यथा। ततं वीणादिकं वाद्यमानद्धं मुरवादिकम्। वंश्यादिकन्तु शुषिरं कांस्यतालादिकं घनम् ॥ अथवा द्यानि। तालेन राजते गीतं तालो वादित्रसम्भवः। गरीयस्तेन वादित्रं तच्चतुर्विधमुच्यते ॥ ततं शुषिरमानद्धं घनमित्यं चतुर्विधम्। ततं तन्त्रीगतं वाद्यं वंशाद्यं शुषिरन्तथा। चर्मावनद्धमानद्धं घनं तालादिकं मतम् ॥ तत्र ततं यथा। अलावनी ब्रह्मवीणा किन्नरी लघुकिन्नरी। विपञ्ची वल्लकी ज्येष्ठा चित्रा घोषवती जया ॥ हस्तिका कुब्जिका कूर्मी शारङ्गी परिवादिनी। त्रिशवी शतचन्द्री च नकुलौष्ठी च ढंसवी ॥ औडम्बरी पिनाकी च निबन्धः शुष्कलस्तथा। गदावारणहस्तश्च रुद्रोऽथ शरमण्डलः ॥ कपिलासो मधुस्यन्दी घोणेत्यादि ततं भवेत् ॥ अलावणी यथा। कनिष्ठिकापरिध्यर्द्धमध्यच्छिद्रेण संयुतः। दशयष्टिमितो दण्डः खादिरो वैणवोऽथवा ॥ अधः करभवानूर्द्ध्वछवावल्याभिशोभितः। नवाङ्गुलाद्धच्छिद्रो परिचन्द्रार्द्धसन्निभाम् ॥ निवेश्य चुम्बिकां भद्रालाबुखण्डं निवेशयेत्। द्वादशाङ्गुलविस्तारं दृढपक्वं मनोहरम् ॥ तुम्बिकाविधमध्येन दण्डच्छिद्रे तु निर्मिताम्। अलाबुमध्यगां डोरीं कृत्वा स्वल्पान्तु काष्ठिकाम् ॥ तथा संवेष्ट्य तन्मध्ये काष्ठिकां भ्रामयेत्ततः। यथा स्यान्निश्चलालाबुर्बन्धश्चकरभोपरि ॥ पञ्चाङ्गुलिषु सन्त्यज्यालाबुं स्वल्पाश्च बन्धयेत्। केशान्तनिर्मितापट्टमयी सूत्रकृताथवा ॥ समा सूक्ष्मा दृढा तत्र तन्त्रदेया विचक्षणैः। एतल्लक्षणसंयोग्यान्यालावणी प्रकीर्त्तिता ॥ विन्दुनानसमुपेतं तुम्बिनिः क्षिप्य वक्षसि। मध्यमानामिकाभ्याञ्च वाद्या दक्षिणपाणिना ॥ तारे मन्द्रे च घोषे च त्रिस्थाने विन्दुरिष्यते। तुम्बीमूलं समुत्पन्न वामाङ्गुष्ठेन धारयेत् ॥ ततस्ताभिस्तु सर्वाभिः स्वरव्यक्तिर्विधीयते। त्रिस्वरो दक्षिणः पाणिर्वामस्तत्र चतुःस्वरः ॥ अलावण्यां स्थिता ज्ञेयाः सप्तषड्जादयः स्वराः। रागव्यक्तिर्यथा रागे भवेत् षड्जादिभेदतः ॥ अंशन्यासविभेदाश्च तथा चापि विधीयते। इयमलावणी प्रोक्ता मनःश्रवणरञ्जनी ॥ प्रत्यक्षा शारदा देवी वीणारूपेण संस्थिता। इत्यलावणी ॥ अन्येषां लक्षणं विस्तरभयान्नोक्तम् ॥ शुषिरं यथा। वंशी यपारी मधु

वीतिस्तिरीशङ्खकाहला : । तोडही
मुरलीबुक्का शृङ्गिकास्वरनाभय : ॥
शृङ्गं कापालिकं वंशश्चमं वंशस्तथा
पर : । एते शुषिरभेदास्तु कथिता :
पूर्वसूरिभि : ॥ वर्त्तुल : सरलश्चै
कपर्वदोषविवर्ज्जित : । वैणव :
खादिरोवापिरक्तचन्दनजोऽथवा ॥
श्रीखण्डजोऽथसौवर्णोदन्तिदन्तमयो
ऽपिवा ॥ राजतस्ताम्रजोवापिलौह
ज : स्फाटिकोऽथवा । कनिष्ठाङ्गुलि
तुल्येनगर्भरन्ध्रेण शोधित : शि
ल्पविद्याप्रवीणेन वंश : कार्योम
नोहर: ॥ वंशेनैवमतोपीतिमतङ्ग
मुनिनोदितम् । ततोऽन्येपितदा
कारावंशाएवप्रकीर्त्तिता : ॥ तत्र
त्यस्याशिरोदेशा दधोद्विमितमङ्गु
लम् । फूत्काररन्ध्रं कुर्वीतमित
मङ्गुलिपर्वणा ॥ पञ्चाङ्गुलानिसन्
त्यज्यतावद्रन्ध्राणिकारयेत् । कु
र्यात् तथान्यरन्ध्राणिसप्तसङ्ख्या
निकौशलात् ॥ बदरीबीजतुल्या
निसन्त्यज्याद्धार्द्धमङ्गुलम् । प्रा
न्तयोर्वन्धनं कार्यंस्वराद्यैर्नादहेतवे
॥ सिक्थकेनकलादेयातेनसुस्वरता
भवेत् । पञ्चाङ्गुलोऽयंवंश : स्या
देकैकाङ्गुलिवर्द्धित : ॥ षडङ्गु
लानितान्याद्यावदष्टादशाङ्गु
लम् । फूत्कारतारन्ध्रयावद
ङ्गुलिमन्तरम् ॥ तदेवनामवंश

वाद्यम्

स्ववांशिकै : परिकीर्त्त्यते । एका
ङ्गुलोद्व्यङ्गुलस्त्र्यङ्गुलश्चतुर
ङ्गुल : ॥ चलितारतरत्वेनवांशि
कै : समुपेक्षित : । अथोदशाङ्गु
लोवीणापर : । निन्दितोऽयंशतत्त्व
ज्ञैस्तथासप्तदशाङ्गुल : ॥ महान
न्दस्तथानन्दोविजयोऽथजयस्तथा ।
चत्वारउत्तमावंशामतङ्गमुनि
सम्मता :॥ दशाङ्गुलोमहानन्दो
नन्दएकादशाङ्गुल : । द्वादशा
ङ्गुलमानस्तुविजय : परिकीर्त्ति
त : ॥ चतुर्दशाङ्गुलमितोजयइ
त्यभिधीयते । ब्रह्मारुद्रोरविर्विष्णु:
क्रमादत्रव्यवस्थिता : ॥ नैविडं
प्रौढताचापिसुस्वरत्वञ्च शीघ्रता
। माधुर्यमितिपञ्चामीफूत्कृतेषु
गुणा : स्मृता : ॥ शीत्कारबहुल :
स्तब्धोविस्वर : स्फुटतोलघु : ।
अमधुराश्चविज्ञेया : षड्दोषा :
फूत्कृतेक्रमात् ॥ बुथाप्रयोगबाहु
ल्यमल्पतागीतवादने । एभिर्दोषै
र्युतोतोवनिन्दितोवांशिकोमत :
॥ स्थानकादिलयाभिज्ञोगमकाढ्या:
स्फुटाक्षर : । शीघ्रहस्त : कलाभि
ज्ञोवांशिकोरक्तउच्यते ॥ प्रमुक्ति
र्वद्धमुक्तिश्चयुक्तिश्चेत्यङ्गुलेर्गुणा :
। मुख्यानत्वंसुस्वरत्वमङ्गुलीसा
वनक्रिया ॥ समस्तगमकज्ञानंराग
रागाङ्गवेदिता । क्रियाभाषाविभा

वाद्यम्

षामृदङ्गता गीतवादने ॥ स्वस्थाने चापि दुःस्थाने नादनिर्माणकौशलं । गातॄणां स्थानदातृत्वं तद्वायाच्छादनं तथा ॥ वांशिकस्य गुणा एते मया सङ्क्षिप्य दर्शिताः ॥ इति वंशः ॥ ॥ काहला स्त्री निषङ्गः । तोडही मुरली वुक्का इत्येते च स्त्रियां सप्तस्वराणां नाभिरिव स्वरनाभिः स्त्रियां वर्त्तते । इतरेषां विस्तरभयान्नोक्तम् ॥ ॥ आनद्धं यथा । आनद्धे मर्द्दलः श्रेयान् इत्युक्तं भरतादिभिः । अपि च । मुरजपटहढक्काविश्वक्कोदर्पवाद्यंपणवघनसरुन्नालावजालम्बिशल्याः । करटकमठभेरीसाम्राज्यकुडुक्काहुडुक्काभानसमुरलीभल्लीढुक्कलीदौण्डिमाना ॥ डमरुटमुक्किमड्डुः कुण्डलीस्तुङ्गुनामारणमभिघटवाद्यं दुन्दुभीचरजश्च । क्वचिदपि टट्टकौ च्याद्दर्दुरं चाप्युपाङ्गं प्रकटितमनवद्धं वाद्यमित्थं जगत्याम् ॥ त्रिपुरमथनकर्त्तुस्ताण्डवे तत्प्रयाणे ततमुखशुषिरस्थानद्धमित्थं घनञ्च ॥ ॥ मर्द्दलः खादिरः श्रेष्ठोऽपीनः स्यादन्यदारुजः । रक्तचन्दनजो वाद्यो गभीरध्वनिरुच्चकैः ॥ सार्द्धहस्तप्रमाणस्तु दैर्घ्यमस्य विधीयते । अयोदशाङ्गुलं वाममथवा द्वादशाङ्गुलम् ॥ दक्षिणञ्च भवेद्धीनमेकेनार्द्धाङ्गुलेन

वाद्यम्

षा । करणानद्धवदनो मध्ये चैव पृथुर्भवेत् ॥ षण्मासीयो भवेद्दस्तस्तस्य मर्करणं मतम् । मृत्तिकानिर्मितस्यैव मृदङ्गः परिकीर्त्तितः ॥ पातयेत् खरलिं वाद्यमादनार्थं स्वमर्द्दले । विभूतिर्गैरिकं भक्तं किन्तु किनचसंयुतम् ॥ यद्वा चिपीटकं देयं जीवनीसत्त्वमिश्रितम् । सर्व्वमेकत्र पिष्टं तल्लेपः खरलिरुच्यते ॥ वामास्ये पूरिकां कृत्वा लेपं दद्याद्दक्षिणे ॥ एवं मर्द्दलकः प्रोक्तः सर्व्ववाद्योत्तमो मतः ॥ अस्य संयोगमासाद्य सर्व्ववाद्यानि शोभते । एतदङ्गे शौजकाष्ठे दलमर्द्धाङ्गुलं विदुः ॥ तधिधोतेमितिर्ज्ञेयाः पाटवर्णाः मृदङ्गजाः । थोंद्दं ढें धिक्कटस्तद्धीताकं द्दं द्दं घोगं धिधि ॥ खर्भ्भिं नं गटं द्दं घाकूटपाटामतात्रभो । तथिं थोंढें तक्कधीदों द्दं द्दं धिगणांततं तधि ॥ तक्कतं धं धिद्दोंताधिपाटखण्डेत्वयं क्रमः ॥ तथा च यतिमाने पाटखण्डः । द्रगतथे जां द्रगतथे जां घोघे धिकताधिकाथे जां थे जां तकतता धिकाथेता द्रगतता धिधिधिधिकतताकडना थे धिकथे जांधे ता द्रगतता द्रतता धि । इति यतिमाने पाटखण्डः ॥ ॥ यतिरीढाप्यवक्रो दोगजरो रूपकं ध्रुवम् । गलपः सारिगोणीचनाद

स्वकथितं तथा ॥ प्रहरणं वन्दनञ्च प्रबन्धाद्वाद्यसम्मता : । यथा । दं थातद्भूत्थं कताल्यांयति : ॥ चोढ वाद्यंयथा । दांतथोतधिक्कतधिक्क दं थादंथाथोधिथोधितत्ततत्थथिथ विदिथ्यांदिथ्यांटट्नक्किटट्नक्कित दटङ्गतंटंदगथवटङ्गथवटङ्गत गिनगितगिनगिदांदांदंदंदींदींदंता तथा । इत्योढवाद्यम् ॥ अवच्छेद्यं वाद्यंयथा । दंथात : दंथात : धि क्किधिक्किदिगणं दंथात : । इत्यव च्छेदवाद्यम् ॥ ॥ गजावाद्यं यथा । थोकटे अनेजठेङे गथोगथो ङ्गटेङ्गथोगतक्किधिकटे ङ्कनधिधि कटतकथोकतधिकटतक्ककतथोग तद्धीम् । इत्येकताल्यांगजर : ॥ रूपकवाद्यंयथा । तकधिक्तक धिक्कथितक्किथवितक्किधिक्कदंथात: । इतिरूपकवाद्यम् ॥ ध्रुवकवा द्यंयथा । तक्कतक्कटधिक्कधिक्कट । इतिनिसारतालेध्रुवक : ॥ ॥ गलपेयथा । तधिद्धिभिकतकतधि गलगं थाथादेंतथाठेनञ ॥ इत्ये कताल्यांगलप : ॥ ॥ सारिगो णीयथा । थोङ्गटे ञ तक्कधिक्कत कधिक्तकथो इटङ्गनइटङ्गनथो गक्कथो : । इतिप्रथमखण्ड : ॥ ॥ टे अथो : धिथोङ : टेअटे अदक् कतगदक्कधिक्कतदिदक्कदंगदं

गथोगथोक्क तककतक धिक्कत धिक्कत धोटे अधोटे अथटे गलखोगगलखो गखोइटगेंटगेंखोइटञ । इत्यखड न्दनम् । इतिसारिगोणी ॥ ॥ नादोयथा । दांकारचितयंपूर्वंदां धिगिति ततखयम् । दांदांधिक थयंयच्चइतिनाद : शचीप्रिय : ॥ इतिनाद : ॥ । द्रुतं मानसमार थ्यं शुद्धं कूटविनिर्मितम् । सप्त खण्डमयंवाद्यंकथितंतद्विरोच्यते ॥ द्रुतमानत्वात्प्रतिताल्येयथा । तत्ततत्ततक्किताकिदिदंधि गनथोधिगनथोधिक्कधिक्कधिक्क धिक्कधिक्कगिनगमिथोथोधिधि धि : दांदांधिक्थोथोथोइथोङ नजिथोनजिथोथोइथोइङेढिङे ढिथोइथोइतटितटितट्कगींगींध गिधगिततधे ततधेततगि ङी अङीथोगथोगथोंथोगगथोगथोतत्ता ता । इतिसप्तपदान्याहु: कथितं वा द्यपण्डितै : । प्रतितालेनतालेन पादवर्णसमासत : ॥ गन्धर्वपति नापूर्वं मूर्वं शीलाख्यनर्तने । सुध र्मारञ्जनार्थंस्वकथितं प्रकटीकृतम् ॥ ॥ प्रहरणं यथा । थोगकृक्का तद्धिकाथागकटगगोंदंथोगदिद् धिकधिक्कदिकटे ञ । इत्येकता ल्यांप्रहरणम् ॥ ॥ वाद्यंविमुच्य तेयेनकुनृदनंतत्रिगद्यते । यथा ।

तद्विधेोदितजैस्तन्त्र : । इति
च्छन्दनम् ॥ ॥ कलासोविकलास
घटाकलीचार्द्धटाकली । जोला
टाकलिकाचैव गोमुखीमुरजस्तथा
॥ अलाबुजवाद्यमन्यच्चवाद्यम् ।
मर्द्दलस्तयोदशाङ्गुलवाममुखोद्वाद
शाङ्गुलदक्षिणमुखः । मुरजस्त्वष्ट
दशांगुलवाममुख : सप्तदशांगुलद
क्षिणमुख : । मर्द्दलमुरजयोरयंभे
द : ॥ -॥ घनंयथा । अनुरक्तंविर
क्तञ्चद्विविधंघनवाद्यकम् । गीता
नुगमनुरक्तंविरक्तंतालसंश्रयम् ॥ कर
ताल : कांस्यवलोजयघण्टोथशुक्ति
का । कम्बिकापटवाद्यञ्चपट्टा
तोघस्वघर्घरम् ॥ झञ्झातालश्च
मञ्जीरकर्त्तर्युड्डुरइत्यपि । द्वादशे
तिमुनीन्द्रेणकथिताघनसंज्ञका : ॥
त्रयोदशाङ्गुलव्यासौशुद्धकांस्यवि
निर्मितौ । मध्यमुखौस्तनाकारौत
न्मध्येरज्जुगुम्फितौ । पद्मिनीपत्र
सदृशौकराभ्यांरज्जुयन्त्रितौ । कर
तालावुभौवाद्यौपाटैर्भ्नटकैरि
ति ॥ यद्वात्रयोदशयवव्यासंवक्त्रय
वोन्मितम् । यवपञ्चकगम्भीरंमध्ये
त्र्यवसप्तकम् ॥ विस्तृतंवर्त्तुलंनि
म्नंयवत्रयमितंततः । पृष्ठतोमध्य
देशेचशिवलिंगसमाकृतिम् ॥ त्र
यस्त्रपष्टौनिर्दिग्धशुद्धकांस्यवि-
निर्मितम् । संरक्ताङ्गुलिमुक्ति

ग्धसुदीर्घमधुरध्वनिम् ॥ घनानि
सारसंरक्तंदृढंशुष्कंमनोहरम् ।
काश्मीरादिसमुद्भूतंतालमाहुर्मनी
षिण : ॥ सुनादंदक्षिणंतालंततो
हीनञ्चवामकम् । कुर्वीततद्द्व
यंकार्यंतर्जन्यङ्गुष्ठयोगतः । वा
महस्तस्थतालस्यमध्यमंसन्निनादि-
तम् । तिर्यग्दक्षिणतालस्यपरि
व्यंशेनतालयेत् ॥ तालादौवाद्ये
च्चैवप्लुतदीर्घलघुद्रुतैः । इतिक
रतालविशेष : । कर्त्तरीघनविशे
ष: । उड्डुरश्चघनविशेषोऽन्तरेफा
न्तपुंल्लिङ्गः अन्येषांलक्षणंविस्तर
भयान्नोक्तम् ॥ ॥ रुक्मिण्या : स
त्यभामाया : कालिन्दीमित्रविन्द
यो : । जाम्बवत्यानाग्निजित्याल
क्ष्मणाभद्रयोरपि ॥ कृष्णस्याष्टमहि
षीणांपुरोद्वाहमहोत्सवे । ततंशुषिर
मानद्धंघनञ्चयुगपज्जना: ॥ अवा
द्यन्नसङ्ख्यातमितिपौराणिकी-
श्रुति : । ततंवाद्यन्तुदेवानांगन्ध
र्वाणाञ्चशौषिरम् । आनद्धं
राक्षसानान्तुकिन्नराणांघनंविदु : ।
निजावतारेगोविन्द : सर्वमेवानय
त्क्षितौ ॥ यावन्तिवाद्यभांडानि
रामरावणयोर्युधि । तावन्त्योनाभ
वन्सेना: कुरुपाण्डवसङ्गरे ॥ ॥
किञ्च । निलिम्पहृत्कम्पनतोम
रेणरणे सुरारेर्मथनात्सुरेण । च

भूत्ततादृयैरपिसिंहनादैः साप्यचशब्दीतिकथावाद्वादः ॥ युद्धे सैन्यानांयोऽहङ्काररवः ससिंहनादः । ततादिभिरेभिश्चतुर्भिर्वाद्यैश्चमूनांसिंहनादैश्चपञ्चशब्दीवाद्यमभूत् । सिंहनादेनसहवाद्यं पञ्चविधंभवतीत्यर्थः ॥ इतिसङ्गीतदामोदरः ॥ शिवागारेझल्लकञ्चसूर्यागारेचशङ्खकम् । दुर्गागारेवंशीवाद्यंमाधुरीञ्चनवादयेत् ॥ झल्लकंकांस्यनिर्मितकरतालम् । इतियोगिनीतन्त्रम् ॥ मत्स्यपुराणेपि । गीतवादित्रनिर्घोषंदेवस्याग्रेचकारयेत् । विरिञ्चिस्वगृहेढक्कांघण्टांलक्ष्मीगृहेत्यजेत् ॥ घण्टाभवेदशक्तस्यसर्ववाद्यमयीयतः ॥

वाद्यभाण्डम् । न० वादनीयपात्रे ॥

वाद्यकरः । त्रि० वादित्रकर्त्तरि । बजन्त्रीतिभाषाप्रसिद्धे ॥

वाधनम् । न० बाधायाम् ॥

वाध्रुक्यम् । न० विवाहे ॥

वाधूः । पुं० वहित्रे ॥

वाध्रीणसः । पुं० खड्गे । गण्डके ॥ वार्ध्रीणसे ॥ पक्षिविशेषे ॥ यथा । रक्तग्रीवोरक्तशिराः श्वेतपक्षोविहङ्गमः । सवैवाध्रीणसः प्रोक्तइत्येषानैगमीश्रुतिः ॥

वानम् । न० स्यूतिकर्म्मणि । सीवने ॥ कटे ॥ गतौ । गमने ॥ जलसमुत्थवातोर्म्याम् ॥ सुरुङ्गायाम् ॥ सौरभे ॥ गोक्षीरजीतवक्षीरे ॥ वाजिनांगतौ ॥ त्रि० शुष्कफले ॥ शुष्के । वनके । वनसम्बन्धिनि ॥ वायतिस्म । ओवैशोषणे । गत्यर्थाकर्म्मकेतिक्तः । ओदितश्चेतिनत्वम् ॥ वन्यते । वनुयाचने । घञ्वा ॥

वानप्रस्थः । पुं० मधूकवृक्षे । गुडपुष्पे । किंशुके । पलाशवृक्षे ॥ तृतीयाश्रमे ॥ सचकालीनाख्ये च ॥ वनमिवप्रस्थोवनस्यवाप्रस्थः प्रदेशः । वनप्रस्थेवनैकदेशेभवः । तत्रभवः इत्यण् ॥

वानरः । पुं० मर्कटे । कपौ । प्लवङ्गे । शाखामृगे । बन्दर० इ० भा० ॥ वनेभवम्० फलादि० वानम् । अण् । वानंराति । रा० । आतोनुपसर्गेकः ॥ यद्वा । वानम् । वा० । सम्पदादित्वात्क्विप् । वा० गमनेपि० नृणाति० वालकम् नॄनये । पचाद्यच् ॥

वानरप्रियः । पुं० क्षीरिवृक्षे ॥

वानराक्षः । पुं वनच्छागे ॥

वानराघातः । पुं० लोध्रवृक्षे ॥

वानरी । स्त्री० मर्कट्याम् । बांदरी० इ० भा० ॥ वानरस्यस्त्री । ङीष् ॥ शूकशिम्ब्याम् ॥ वानरीइवविवि

धर्चेष्टाहेतुत्वात् ॥

वानरेन्द्रः । पुं॰ सुग्रीवे ॥ वानराणामिन्द्रः ॥

वानलः । पुं॰ बाबवे । कालीबाबु इ॰इ॰ भा॰ ॥

वानस्पत्यः । पुं॰ पुष्पजातफलवृक्षे ॥ वानस्पत्यः फलैः पुष्पादित्यमरः ॥ वनस्पतिः । पारस्करादित्वात् सुट् । वनस्पतौ भवः । दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः ॥ वनस्पतिसमूहे ॥ तस्य समूह इत्यर्थे॰ पूर्ववत्॰ण्यः ॥

वाना । स्त्री॰ वर्त्तिकापक्षिणि ॥

वानायुः । पुं॰ हरिणे ॥ वनं वनभुवमयति । अय॰ । बाहुलकात् उण् ॥ भारतवर्षस्योत्तरपश्चिमस्थे देशविशेषे ॥ बहुवचनान्तः ॥

वानायुजः । पुं॰ हयविशेषे ॥ वनायुषु जातः । सप्तम्यां जनेर्डः । सएव । प्रज्ञाद्यण् ॥

वानीरः । पुं॰ वेतसे । वञ्जुले ॥ वायति । पै ओवै शोषणे । क्विप् । वां शुष्कमासमन्तान्नीरमस्य ॥

वानीरकः । पुं॰ मुञ्जतृणे ॥

वानीरजम् । न॰ कुष्ठे । कूठ इ॰ प्र॰ ओषधौ ॥

वानेयम् । न॰ कैवर्त्तीमुस्तके । मोथाख्ये ॥ वने पानीये जायते । नद्यादिभ्यो ढक् ॥

वान्तम् । न॰ उद्गीर्णे ॥ त्रि॰ कृतवमने ॥

वान्तादः । पुं॰ कुक्कुरे ॥ वान्तमत्ति । अण् ॥

वान्ताशी । त्रि॰ उद्गीर्णाशिनि ॥ पुं॰ शुनि ॥

वान्तिः । स्त्री॰ उद्वमने । वमने ॥

वान्तिकृत् । पुं॰ मदनद्रुमे । मयनफल॰ इ॰भा॰प्र॰ ॥ वान्तिं करोति । डुकृञ्॰ । क्विप् । तुक् ॥

वान्तिदा । स्त्री॰ कटुक्याम् ॥

वान्या । स्त्री॰ वनसमूहे ॥

वापः । पुं॰ क्षेत्रे ॥ उप्यतेऽस्मिन् । डुवप् घञ् ॥ वपने ॥

वापकः । त्रि॰ वपनकारयितरि ॥

वापदण्डः । पुं॰ तन्तुवायदण्डे । वेमनि ॥ वपनम् । डुवप्॰ । घञ् । वापस्य दण्डः ॥

वापिः । स्त्री॰ वापिकायाम् ॥ उप्यते पद्मादिरस्याम् । डुवप् बीजसन्ताने । वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ् ॥ भावे इञ्॰ वपादिभ्य इतीञ् वा ।

वापिका । स्त्री॰ वाप्याम् ॥

वापितः । त्रि॰ मुण्डिते ॥ बीजाकृते । उप्तकृष्टे ॥ न॰ धान्यविशेषे । वीयाधान॰ इ॰भा॰ ॥ वापितं गुरुतद्धान्यं किञ्चिद्धीनमवापितं ॥

वापी । स्त्री॰ दीर्घिकायाम् ॥ वद्धसा

पानकूपे ॥ पाषाणैरिष्टिकाभिर्वा बद्धकूपाद्बहूत्तरा । ससोपाना भवेद्वापी प्राहुः शास्त्रविशारदाः ॥ परिमाणं तद्द्रोणाद्दशगुणा वापीति । यथा । नव्यवर्द्धमानधृतौ वशिष्ठः । शतेन धनुभिः पुष्करिणी० विंशतिः शतैर्दीर्घिका० चतुर्भिर्द्रोणः पञ्चभिस्तडागः द्रोणाद्दशगुणा वा वापी । तेन चतुर्दिक्षु पञ्चविंशद्धस्तान्यूनतायां दशशतहस्तान्तरान्यूनत्वे नदीर्घिका ॥ चतुर्दिक्षु चत्वारिंशद्धस्तान्यूनतायां षोडशशतहस्तान्तरान्यूनत्वे नद्रोणः । चतुर्दिक्षु विंशदधिकशतहस्तान्यूनतायाम् षोडशसहस्रहस्तान्तरान्यूनत्वेन वापीति जलाशयोत्सर्गतत्त्वम् ॥ ये वापीमथवा कूपं देशे वारिविवर्ज्जिते । खानयेत् स दिवं याति विन्दौ विन्दौ शतं समाः ॥ तज्जलगुणास्तु । वाप्यं गुरु कटु क्षारं पित्तलं कफवातजित्० ॥ उप्यते पद्मादिकमत्राम् । डुवप० । वसिवपौल्यादिना० इञ् । ततः कृदिकारादिति पाक्षिको ङीष् ॥ याम्यायोमान्तरे ॥ यथा । एकान्तरगते लग्नाच्छुभे खेटेऽथवाऽशुभे । वापीयोगस्त्वरिव्रातितिमिरौघदिवाकरः ॥

वापीहः । पुं० चातकखगे ॥

वाप्यम् । न० कुष्ठौषधे । पारिभाव्ये ॥ वाप्यां भवम् । दिगादिभ्यो यत् ॥ वापीजले ॥ वाप्यं वारि यदि क्षारं पित्तकृत् कफवातहृत् । तदेव मिष्टं कफकृद्वातपित्तहरं भवेत् ॥ त्रि० वापीभवे ॥

वाभ्रवी । स्त्री० चण्ड्याम् । दुर्गायाम् । बभ्रोरपत्यं स्त्री । अण् । ङीप् ॥ बभ्रोर्विष्णोरियं वा ॥

वाम् । अ० युवामित्यर्थे ॥

वामः । पुं० उमानाथे । हरे ॥ कामदेवे । पयोधरे । न० धने ॥ वास्तूके ॥ पुण्यकर्मफले ॥ त्रि० वल्गौ । चारौ । शोभने । अतिसुन्दरे । प्रतीपे । प्रतिकूले ॥ सव्ये ॥ वमति० वम्यते वा । टुवमउद्गिरणे । ज्वलितिकसन्तेभ्यो णः भावे घञ् वा ॥ यद्वा । वाति । वा गतिगन्धनयोः । अर्त्तिस्तुसुहु इति मन् ॥

वामदृक् । स्त्री० वनितायाम् ॥ वामा मनोहरा दृक् दृष्टिर्यस्याः सा ॥

वामदेवः । पुं० शिवे ॥ वामयति० दुष्टानां मदमिति वामः । टुवम० । णिजन्तात् पचाद्यच् । वामश्चासौ देवश्च ॥ लोकविपरीतत्वात्० सुन्दरत्वाद्वा वामः । स चासौ देवश्च ॥ ऋषिविशेषे ॥

वामदेव्यम् । न० सामविशेषे ॥ वामदेवेन दृष्टम् । वामदेवात्

ङात्ङौ ॥

वामन: । पुं॰ अच्युते । हरौ । मन्वन्तरेप्यसम्प्राप्ते तथा वैवस्वते द्विज । वामन : कश्यपाद्विष्णुरदित्यां सम्बभूव हेति विष्णुपुराणम् ॥ अङ्कोठवृक्षे । दक्षिणाशास्थदिग्गजे ॥ मुमुक्षुभि : सम्भजनीये ॥ त्रि॰ अतिखर्वे । ह्रस्वे । बौना॰ इ॰ भा प्र॰ ॥ खर्वत्त्वाद्वामन : वामयति-त्याजयति मदम् । टुवम्॰ । नन्द्यादित्त्वाल्ल्यु : ॥ वामशब्दादस्त्यर्थे पामादित्वान्नो वा ॥ न॰ अयुतं वामनाख्यसंख्यातसङ्ख्याविशिष्टे महापुराणविशेषे ॥

वामनतीर्थम् । न॰ तीर्थविशेषे ॥ तत्र कौशिकी देवी तिष्ठति ॥

वामनी: । पुं॰ अक्षिस्थे निरञ्जने पुरुषे ॥ वामानि पुण्यकर्मफलानि॰ पुण्यानुरूपं प्राणिभ्यो नयति प्रापयतीति तथा ॥

वामनी । स्त्री॰ खर्वायां गवि ॥ वमनप्रदौषधिप्रभेदे ॥

वामनेत्रम् । न॰ सव्येचक्षुषि ॥ नेत्रस्याध : स्फुरणमसकृत् सङ्गरे भङ्गहेतुर्नेत्रोपान्ते हरति नयनं नेत्रमूले च मृत्यु : । नेत्रस्योर्द्ध्वं हरति सकलं मानसं दु : खजातं वामे चैवं फलमविकलं दक्षिणे वैपरीत्यम् ॥

वाममार्ग : । पुं॰ पुन : पुनर्गमनागमनवर्ज्जिते विद्वांसतां मार्गे । देवयानाख्येऽर्चिरादिमार्गे शुक्लकृष्णे गती ह्येते जगत : शाश्वते मते । एकया यात्यनावृत्तिमन्यया वर्त्तते पुन : ॥ दक्षिणादुत्तमं वाममित्युक्तकुलार्णवे ॥ अग्ने नय सुपथेति मन्त्रे॰ सुपथेति विशेषणं दक्षिणमार्गनिवृत्त्यर्थम्॰ निर्विण्णोऽहं दक्षिणेन मार्गेण गतागतलक्षणेन॰ अतो याचे त्वां पुन : पुनर्गमनागमनवर्ज्जितेन शोभनेन पथा नयेत्याचार्य्यभाष्यम् ॥

वामलूर : । पुं॰ नाकौ । वल्मीके । वांवी॰ इ॰ भा॰ प्र॰ ॥ वामैर्वामंवा॰ लूयते । लूञ् छेदने । वाहुलकाद्रक् ॥

वामलोचना । स्त्री॰ उत्कृष्टस्त्रीविशेषे ॥ वाम : कामे लोचने आलोचने॰ नेत्रे वा॰ यस्या : यद्वा । वामे सुन्दरे लोचने चक्षुषी यस्या : ॥

वामशील : । त्रि॰ वक्रस्वभावे ॥ सुन्दरस्वभावे ॥

वामा । स्त्री॰ नार्याम् । वनितायाम् ॥ वमति स्नेहम् । टुवम्॰ ज्वलादित्वाण्ण : ॥ यद्वा वाम: कामोऽस्त्यस्या : । अर्श आद्यच् ॥ दुर्गायाम् ॥ वर्मं विरुद्धरूपन्तु विपरीतन्तु गीयते । वामेन सुखदा देवी वामा तेन मता बुधै: ॥ पक्षिविशेषे ॥

वामाक्षी । स्त्री॰ वामलोचनायाम् ॥ वामेमनोहरेअक्षिणीयस्याः । षच् । ङीष् ॥

वामाचारः । पुं॰ देवयानमार्गसाधकेदक्षिणाचारादुत्तमेसदाशिवोक्ताचारविशेषे ॥ वामश्चासावाचारश्च ॥

वामापीडनः । पुं॰ पीलुवृक्षे ॥

वामिका । स्त्री॰ चण्डिकायाम् ॥

वामी । पुं॰ वामाचारयुक्ते ॥ वामः सव्यः सुन्दरोवादक्षिणादुत्कृष्टत्वादाचारः सोऽस्यास्ति । अतइनिठनाविति इनिः । नतुदक्षिणायान्तिनाविद्वांसस्तपस्विनः । तत्रत्यलोके ॥

वामिलः । त्रि॰ दाम्भिके । वामे ॥

वामी । स्त्री॰ शृगाल्याम् ॥ वडवायाम् ॥ रासभ्याम् ॥ करभ्याम् ॥ वामयति । टुवम् ॰ स्वार्थे ण्यन्तः । मितांह्रस्वइत्यत्रवेत्यनुवर्त्तनेर्ह्रस्वः ॥ यद्वा । वंवरुणममति । अमगत्यादौ । कर्मण्यण् । घञ्वा । गौरादिः ॥

वामोरूः । स्त्री॰ नारीविशेषे ॥ वामौसुन्दरौऊरूयस्याः । संहितशफलक्षणवामादेश्चेत्यूङ् ॥

वायकः । पुं॰ गणे । समूहे ॥ तन्त्ववायविशेषे ॥

वायदण्डः । पुं॰ वेमनि । वापदण्डे ॥ वयनम् । वेञ् तन्तुसन्ताने । भावेघञ् । आतोयुक् । वायस्य दण्डः ॥

वायनम् । न॰ व्रतोपायने । प्रहेणके । वायना॰ हू॰ भा॰ प्र॰ पूपादिद्रव्ये ॥

वायवी । स्त्री॰ वायुकोणे ॥

वायव्यम् । न॰ वायुदेवताकहविषि ॥ वायुदेवताकेऽस्त्रविशेषे ॥ वायुर्देवताऽस्य । वाय्वृतुपित्रुषसोयत् । गुणावादेशौ । त्रि॰ वायुसम्बन्धिदिगादौ ॥ न॰ षट्शतश्लोकाधिकचतुर्विंशतिसहस्रश्लोकात्मकेमहापुराणविशेषे ॥ वायव्यं षट्शतानिचचतुर्विंशतिसङ्ख्यातद्वतिदेवीभागवतोक्तेः ॥

वायसः । पुं॰ अगुरुवृक्षे ॥ श्रीवासे ॥ ध्वाङ्क्षे । काके ॥ वयते । वयगतौ । वयस्वेत्यसच् । णित् ॥ वायससमूहे ॥ तस्यसमूहइत्यण् ॥

वायसविरुतम् । न॰ शकुनविशेषे ॥

वायसादनी । स्त्री॰ तेजोवत्याम् ॥ महाज्योतिष्मत्याम् ॥ काकतुण्डाम् ॥

वायसारातिः । पुं॰ पेचके ॥ वायसस्यकाकस्यअरातिः ॥

वायसाह्वा । स्त्री॰ काकनामनि ॥ काकमाच्यां ॥

वायसी । स्त्री॰ काकोदुम्बरिकाया

म् ॥ काकमाच्याम् । महाज्योतिष्मत्याम् ॥ काकनामनि ॥ काकतुण्डाम् ॥ वायसानामियम् । तस्येदमित्यण् । ङीप् ॥ काक्याम् ॥

वायसेक्षुः । पुं॰ काशे । इक्षुगन्धायाम् ॥

वायसोलिका । स्त्री॰ काकोल्याम् ॥

वायसोली । स्त्री॰ काकोल्याम् ॥ वायसानोलण्डयति । ओलडि उत्क्षेपे । अन्येभ्योऽपीति डः । शकन्ध्वादिः ॥

वायुः । पुं॰ श्वसने । स्पर्शने । मातरिश्वनि । शब्दतन्मात्रसहितात् स्पर्शतन्मात्रादुत्पन्ने शब्दस्पर्शगुणे सर्वदाचलनस्वभावे रूपरहितस्पर्शवति मारुते ॥ शरीरान्तर्वाह्यभेदेन वायुर्दशविधो यथा । प्राणः ॥ १ ॥ तस्य कर्म बहिर्गमनम् । अपानः ॥ २ ॥ तस्य कर्माधोगमनम् । व्यानः ॥ ३ ॥ तस्य कर्माकुञ्चनप्रसारणादि । समानः ॥ ४ ॥ तस्य कर्माऽशितपीतादीनां समं नयनम् । उदानः ॥ ५ ॥ तस्य कर्म॰ ऊर्द्ध्वनयनम् । उद्गारे नागः ॥ ६ ॥ आख्यातः कूर्मः ॥ ७ ॥ उन्मीलने स्मृतः । कृकरः ॥ ८ ॥ क्षुत्करो ज्ञेयो देवदत्तो ॥ ९ ॥ विजृम्भणे ॥ न जहाति मृतस्यापि सर्वव्यापी धनञ्जयः ॥ १० ॥ अन्यदप्युक्तं यथा । द्वितीयं

मारुतो भूतं त्वगध्यात्मञ्च विश्रुता । स्पृष्टव्यमधिभूतञ्च विद्युत्तत्राधिदैवतम् ॥ अस्य गुणा यथा । स्पर्शस्त्वगिन्द्रियञ्चापि लघुता स्पन्दनं तथा । चेष्टा सर्वशरीरस्थ वायोरेते गुणा मताः ॥ अपि च । वायोरनियमस्पर्शो वादस्थानं स्वतन्त्रता । बलं शैघ्र्यञ्च मोचञ्च कर्म चेष्टात्मता भवः ॥ इ॰ म॰ भा॰ मोक्षधर्मः । अस्यार्थः । अनियमस्पर्शः अनुष्णाशीतस्पर्शः ॥ १ ॥ वादस्थानम्॰ श्रोत्रेन्द्रियगोलकानि ॥ २ ॥ स्वतन्त्रता॰ गमनादौ ॥ ३ ॥ बलम् ॥ ४ ॥ शैघ्र्यम् ॥ ५ ॥ मोचः सूत्रादेः ॥ ६ ॥ कर्म॰ उत्क्षेपणादि ॥ ७ ॥ चेष्टा॰ श्वासप्रश्वासादि ॥ ७ ॥ आत्मता॰ प्राणरूपेण चिद्वाधित्वम् ॥ ९ भवः जन्ममरणे ॥ १० ॥ इति तट्टीका ॥ न्यायमतेऽस्य गुणादिर्यथा । अपाकजानुष्णाशीतस्पर्शस्तु पवने मतः । तिर्य्यग्गमनवानेष ज्ञेयः स्पर्शादिलिङ्गकः ॥ पूर्ववन्नित्यताद्युक्तं देहव्यापि त्वगिन्द्रियम् । प्राणादिस्तु महावायुपर्य्यन्तो विषयो मतः ॥ वायुं निरूपयति॰ अपाकज इति । अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्त्वात्॰ अपाकज इति । अपाकजस्पर्शस्य जलादावपि सत्त्वादुक्तम्॰ अनुष्णाशीत इति । एतेन

वायोर्विजातीयस्पर्शोदर्शितः । त
त्वानकताविच्छेदकं वायुत्वमितिभा
वः । एषवायुः स्पर्शादिलिङ्गकः । वा
युर्हि स्पर्शशब्दधृतिकम्पैरनुमीयते ।
विजातीयस्पर्शेन० विलक्षणशब्देन
० तृणादीनांधृत्या० शाखादीनांक
म्पनेनच० वायोरनुमानात् । तथा
च वायुर्न प्रत्यक्षः । वायुर्नित्योऽ
नित्योवा० परमाणुरूपोनित्यस्तद
न्योऽनित्यः समवेतश्च । सोऽपिचि
विधः शरीरेन्द्रियविषयभेदात् ।
अत्रशरीरमयोनिजं पिशाचादीना
म् । देहव्यापीति । शरीरव्यापकं
स्पर्शग्राहकमिन्द्रियं त्वक् । तच्च
वायवीयम् रूपादिषुमध्ये स्पर्शस्यैव
व्यञ्जकत्वात् । अङ्गसंसर्गिसलिल
शैत्यव्यञ्जकव्यजनवातवत् । विष
यं दर्शयति० प्राणादिरितियद्यप्यनि
त्योवायुश्चतुर्विधः तथ्यचातुर्वि
ध्यं नाणादिना० इत्युक्तमाकरे ।
तथापिसङ्ख्यां पादन्यूने विध्यमुक्तम्
० प्राणस्त्वेक एवहृदादिनानास्था
नवशान्मुखनिर्गमादिनानाक्रिया
वशाच्च० नानासंज्ञांलभतइत्यर्थः
॥ ॥ सप्तवायवोयथा । भूवायुराव
हइहप्रवहस्तदूर्द्धः स्यादुद्वहस्तदनुसं
वहसंज्ञितश्च । अन्यस्ततोपिसुवहः
परिपूर्वकोऽस्माद्बाह्यः परावह
इमेपवनाः प्रदिष्टाइतिशिरोमणिः

॥ प्राचाशीनिवहश्चैवउद्वहः संवह
स्तथा । विवहः प्रवहश्चैवपरिवह
स्तथैव ॥ अन्तरीक्षेचवाह्येतेपृथ
ङ्मार्गविचारिणः । महेन्द्रप्रवि
भक्ताङ्गामरुतः सप्तकीर्त्तिताः ॥
॥ वायोः सप्तस्कन्धायथा । वायु
स्कन्धाः सप्ततेषामेकैकं सप्तसप्त
भिः । आमेयादेवावहादिरूपर्युप
रिसंस्थिताः ॥ आवहप्रवहानुवह
उद्वहइ०पाठान्तरम् संवहविवह
परावहाश्चपरिवहेति पाठान्तरम्
वर्त्मेतिभेदात्सप्तवायोः स्कन्धाः
॥ तथाचपुराणम् । आवाहः
प्रवहश्चैवतथाचैवोद्वहः परः ।
संवहोविवहश्चैवतदूर्ध्वंस्यात्परावहः
॥ तथापरिवहश्चोर्ध्वंवायोर्वैसप्तने
मयइति । तेषांस्थानानियथा ।
मध्येभूमेघयोर्वायुरावहः प्रवहस्त
तः । मेघभास्करयोः सूर्यशशिनो
रुद्वहस्ततः ॥ चन्द्रनक्षत्रगणयोः
संवहोविवहस्ततः । नक्षत्रग्रहम
ध्यस्थोग्रहसप्तर्षिमध्यगः ॥ परा
वहः परिवहः सप्तर्षिध्रुवमध्यगः
॥ इत्येवं वायवः सप्तवहन्तिभु
वनत्रयमिति ॥ वाति । वा० ।
कृवापाजीत्युण् । आतोयुगितियु
क् ॥ वायुरायुर्बलं वायुर्वायुर्धाता
शरीरिणाम् । वायुर्विश्वमिदं सर्वं
प्रभुर्वायुः प्रकीर्त्तितः ॥ वाह्यम

गडलचक्रे पुयथाराजाप्रयस्यते ।
तथाशरीरमध्ये पिवायुरेक: परोवि
भु : ॥ वायो : पत्नीखस्तिदेवी ॥
वायुकेतु: । पुं० चितिकणे । धूली॥
वायुगण्ड: । पुं० अजीर्णे ॥
वायुगुल्म : ।) पुं० आवर्त्ते । अम्भसा
वायुगुल्मक:)
म्भ्रमे ॥
वायुग्रस्त : । चि० विचिप्तचित्ते ॥
वायुदारु : । पुं० व्योमधूमे । मेघे ॥
वायुपुत्र : । पुं० भीमसेने ॥ हनू
मति ॥
वायुफलम् । न० शक्रकार्मुके ॥ जल
दोपले ॥
वायुभच्य : । पुं० सर्पे । चि० वात
भचके ॥
वायुवर्त्म । न० ख । नभसि ॥ वायो
र्वर्त्म ॥
वायुवाह : । पुं० धूमे ॥
वायुवाहन : । पुं० विष्णौ ॥ वहत:
सप्त० श्वावहादीन् वाहयतीतिव्यु
त्पादृहैल्यु : ॥
वायुवाहिनी । स्त्री० वायुसञ्चारिण्यां
शिरायाम् ॥
वायुष : । पुं० मत्स्यविशेषे । काल
वायुषपोना० इ० गौ० दे० भा०
प्र० । वायुषोऽह्यणोष्योमधुरो
धातुवर्द्धन : ॥
वायुसख : । पुं० पावके । वह्नौ ॥
वायो : सखा । राजाह : सखिभ्य
ष्टच् ॥
वायुसखा । पुं० अनले ॥ अग्नौ ॥
वायु : सखाऽस्येतितथा । टजभा
वाद्नङ्सावित्यनङ् ॥
वाय्वास्पदम् । न० आकाशे ॥
वा : । न० जले ॥ वारयति । वृञो
ण्यन्तात्क्विप् ॥
वार : । पुं० सूर्यादिवासरे ॥ यथा ।
रवि : सोमोमङ्गलश्चबुधोजीव: सि
त : शनि : । एतेषांनामतोवाराबि
ख्याता : सर्वकर्मसु ॥ सितेन्दु
बुधजीवानांवारा : सर्वत्रशोभना :
भानुभूसुतमन्दानांशुभकर्मसुकेष्व
पि ॥ द्वारे ॥ हरे ॥ कुजवृचे ॥
निवहे । वृन्दे ॥ अवसरे ॥ चणे ॥
वारयति० वृियतेवा । वृञ्० । प
चाद्यच् । घञ् वा । यद्वा । वार्यते०
आच्छाद्यतेऽनेन । हलश्चेति घञ् पुं०
सोतिघ : ॥ स्यन्दने ॥ न० मदि
रापात्रे ॥
वारक : । पुं० अश्वगतौ ॥ अश्वविशे
षे ॥ न० कष्टस्थाने ॥ हृीवेरे ॥
त्रि० कार्य्यनिषेधके ॥ वारयति
वृञ्० । ण्वुल् ॥
वारकी । पुं० शत्रौ ॥ चित्राश्वे ॥
पर्णाशे ॥ जीवे ॥ पर्णाजीविनि
पयोधौ ॥ इ० मेदिनिकर : ॥
वारकीर : । पुं० श्याले ॥ द्वारयाष्टि

णि ॥ बाडवे ॥ यूकायाम् ॥ वेणि
वेधिन्याम् ॥ जलौकायाम् ॥ नी
राजितहये ॥

बारङ्कः । पुं॰ पक्षिणि ॥

बारङ्गः । पुं॰ खड्गादिमुष्टौ ॥ वा
रयति॰ व्रियतेवा । वृञ्॰ । स्रव
ओर्वृद्धिश्चेत्यङ्गच् ॥

बारटम् । न॰ क्षेत्रे ॥ क्षेत्रसमूहे ॥

बारटा । स्त्री॰ हंस्याम् ॥

बारणः । पुं॰ मतङ्गजे । गजे ॥
बाणवारे ॥ न॰ प्रतिषेधे । प्रवृ
त्तिविघाते ॥ नदेवगुरुविप्राणां दी
यमानन्तु वारयेत् । नचात्मानं प्रशं
सेद्वा परनिन्दाञ्च वर्ज्जयेत् ॥ वार
यति शत्रुबलम् । वृञ् आवरणे ।
ल्युः ॥

बारणवल्लभा । स्त्री॰ कदल्याम् ॥

बारणबुसा । स्त्री॰ कदल्याम् । र
म्भायाम् ॥ बुस्यते । बुस उत्सर्गे ।
इगुपधज्ञाप्रीकिरः कः । बारणा
नां बुसा ॥

बारणसी । स्त्री॰ वाराणस्याम् । का
श्याम् ॥ वरस्तदनश्च॰ वरानः
श्रेष्ठोदकम् । तस्याश्चदूरेभवा । च
दूरभवश्चेत्यण् । वृद्धिः । ङीप्
। पृषोदरादिः ॥

बारप्रवृत्तिः । स्त्री॰ रेखादेशस्थलोका
नां सूर्य्यावलोकनसमये ॥ रेखाभूमौ
हि वारप्रवृत्तिर्भवति । रेखाभूमि
स्थ॰ लङ्का सुमेरुपर्व्वतयोर्म्मध्यसूत्रग
तो देशः । यथा । यल्लङ्कोज्जयनीपु
रोपरि कुरुक्षेत्रादिदेशान् स्पृशन्
सूत्रं मेरुगतं बुधैर्निगदिता सा मध्य
रेखा भुवः । आदौ प्रागुदयोऽपरत्र वि
षये पश्चाद्धि रेखोदयात् स्यात् त
स्मात् क्रियते तदन्तरभवं खेटेष्वृणं
स्वं फलम् ॥ इति सिद्धान्तशिरोमणिः
॥ अपि च । रेखोक्ता सूर्य्यसिद्धा
न्ते यथा । रेखामधिकृत्य । राक्ष
सालयदेवौकःशैलयोर्म्मध्यसूत्रगाः
। रोहितकमवन्तीं च तथा सन्निहितं
सरः ॥ अस्यार्थः । लङ्कासुमेरुप
र्व्वतयोर्म्मध्यसूत्रगा देशा रेखासंस्थि
ताः । तान् देशानाह । रोहितक
देशोऽवन्तीदेशः सन्निहितं सरः कु
रुक्षेत्रञ्चेत्यर्थः । रेखायाः पूर्व्व
देशे॰ परदेशे च॰ यथासङ्ख्यं सूर्य्यो
दयकालात् परकालम्॰ पूर्व्वकाल
ञ्च॰ वारप्रवृत्तिः स्यादित्यर्थः । ए
तेनैतदुक्तं भवति॰ रेखासंलग्नदेशस्थ
लोका यदा सूर्य्यं पश्यन्ति॰ तदैव सर्व्व
देशे वारप्रवृत्तिरित्यर्थः । तत्र॰ रे
खापूर्व्वस्थाः सन्निहितत्वादादौ
सूर्य्यं पश्यन्ति॰ तदनन्तरं रेखास्थाः
। अतो रेखापूर्व्वे॰ सूर्य्योदयात् परं
वारः । तथा रेखास्थैः सूर्य्ये दृष्टे स
ति । पश्चात् रेखापरस्थाः पश्यन्ति
अतो रेखापरदेशे सूर्य्योदयात् पूर्व्वं वारः

इत्यर्थः । तत्कालपरिमाणमाह । रेखातोयावन्तिदेशान्तरयोजनानि॰ तत्परिमिताभिर्विघटीभिः पलैः पादहीनाभिः चतुर्थभागहीनाभिर्वारप्रवृत्तिः स्यादित्यर्थः । देशान्तरसाधनप्रकारस्तु सूर्यसिद्धान्ते॰ उक्तः ॥ रामदैवज्ञोप्याह । पादोनरेखापरपूर्वयोजनैः पलैर्युतोनास्तिथयोदिनार्द्धतः । ऊनाधिकास्तद्विवरोद्भवैः पलैरूह्यं तथाधोदिनपप्रवेशनमिति ॥

वारमुख्या । स्त्री॰ जनैः सत्कृतायां वेश्यायाम् ॥ वारे॰ वेश्यावृन्दे मुख्या ॥

वारम्वारम् । अ॰ पौनः पुन्ये ॥

वारम्वारेण । अ॰ शश्वदर्थे ॥

वारयिता । पुं॰ भर्त्तरि ॥ त्रि॰ निषेधके ॥

वाररुच ः । पुं॰ वररुचिनाकृतेग्रन्थे ॥ कृतेग्रन्थइत्यण् ॥

वारला । स्त्री॰ गन्धोल्याम् । वरटायाम् ॥ हंसकान्तायाम् ॥

वारलीक ः । पुं॰ बल्वजायाम् । वावुइ॰ इ॰ भा॰ ॥

वारवधू ः । स्त्री॰ वेश्यायाम् ॥ वारस्य॰समूहस्यवधूः साधारणत्वात् ॥

वारवन्तीयम् । न॰ सामविशेषे ॥ वारवन्तशब्दोऽस्मिन्नस्ति । मत्वीयः सूक्तसाम्नोरितिच्छः ॥

वारवाण ः । पुं॰ न॰ लौहचर्मणि । कवचे । कञ्चुके । चोलकाकृतिसन्नाहे ॥ वाणं वारयति॰ वृणोतिवा । वृञ्॰ ण्यन्तोवा । कर्मण्यण् । राजदन्तादित्वात्परनिपातः ॥ वारमाच्छादकं वानमस्यवा । पूर्वपदादितिणत्वम् ॥

वारशाखि ः । पुं॰ वंशीवादके । उत्तमगायके ॥ धर्माध्यक्षे ॥ संवत्सरे ॥

वारवाणि ः ।)
वारवाणी ।) स्त्री॰ वेश्यायाम् । शून्यायाम् । झर्झरायाम् ॥

वारविलासिनी । स्त्री॰ वेश्यायाम् ॥ वारे॰ जनसमूहे॰ विलासिनी॰ विलसनशीला ॥

वारवेला । स्त्री॰ यामार्द्धविशेषे ॥ यथा । चतुः सप्तद्विपञ्चाष्टत्रिषट् सूर्यादिवारतः । यामार्द्धं वारवेला स्यान्नशुभाशुभकर्मसु ॥ अपिच । कृतमुनियमशरमङ्गलरामर्त्तुषुभास्करादियामार्द्धे । प्रभवतिहि वारवेलानशुभाशुभकार्यकरणाय ॥ इति ॥

वारसिद्धा । स्त्री॰ वासरविशेषेनन्दादितिथौ ॥ यथा । वारेनन्दापूर्व्वंदे वार्चिताङ्गेभद्राविद्याऽऽरेजया॰ सैनिरिक्ता । पूर्णागीर्वाणेशवन्द्ये

ऽखिलेषुकर्म्मस्वेवन्दोषवत्यस्तिसि
द्धा ॥ भौमादित्यवारेएताएवनेष्टा
यथा। सर्व्वारम्भेमूमिदायाद्भान्वो
र्नन्दा॰शुर्व्विन्दुर्वोश्चभद्राजयार्च्चे ।
रिक्ताधिष्णौ॰ हेलिसूनोश्चपूर्णा॰
ष्ठे यायाम्यागारदा॰कालविद्भिः ॥

वारसुन्दरी । स्त्री॰ वेश्यायाम् । म
ञ्जिकायाम् ॥ वारस्यजनतायाः
सुन्दरी॰स्त्रीसामान्यत्वात् ॥

वारस्त्री । स्त्री॰ गणिकायाम् । वेश्या
याम् ॥ वारस्यवृन्दस्यस्त्री । साधार
णत्वात् ॥

वारांनिधिः । पुं॰ अम्बुधौ । समु
द्रे ॥

वाराणसी । स्त्री॰ विश्वनाथनगर्य्याम्
। काश्याम् । तपस्थल्याम् । महा
श्मसाने ॥ अविमुक्ते । आनन्दका
नने ॥ मोक्षंसुदुर्ल्लभंमत्वा॰सं
सारञ्चातिभीषणम् । अश्मनाचर
णौहत्वा वाराणस्यांवसेन्नरः ॥
वरणायास्तथाचास्यामध्येवाराणसी
पुरी । वाराणस्यांमहादेशाज्ज्ञानं
लब्ध्वाविमुच्यते ॥ वरणासीचन
द्यौद्वेपुण्येपापहरेउभे । तयोरन्त
र्गतायातुसैषावाराणसीस्मृता ॥
विशेषोऽसिशब्दे द्रष्टव्यः ॥ वरञ्च
तत् अनश्चवरानः श्रेष्ठोदकम् ।
तस्यअदूरेभवा । अदूरभवश्चेत्यण्
। आदिवृद्धिः । ङीप् । पूर्व्वप
दात्संज्ञायामगइतिणत्वम् ॥

वाराणसीक्षेत्रम् । न॰ सिद्धक्षेत्रविशे
षे । काश्यां ॥

वाराणसेयः । त्रि॰ वाराणसीभवे ॥
वाराणस्यांजातादिः । नद्यादिभ्यो
ढक् ॥

वारासनम् । न॰ जलालये । वाः स
दने ॥

वाराहः । पुं॰ महापिण्डीतकवृक्षे
॥ वराहार्थे ॥ वराहएव । अण् ॥
त्रि॰ वराहसम्बन्धिनि ॥ न॰ चतु
र्व्विंशतिसहस्रश्लोकात्मकेमहापुरा
णविशेषे ॥ चतुर्व्विंशतिसाहस्रंवारा
हंपरमाद्भुतमितिभागवतोक्तेः ॥

वाराहकर्णी ।)
वाराहपत्री ।) स्त्री॰ अश्वगन्धायाम् ॥

वाराहाङ्गी । स्त्री॰ दन्तीवृक्षे ॥

वाराही । स्त्री॰ मातृप्रभेदे ॥ योगिनी
विशेषे ॥ तीर्थविशेषवराहदेवस्यशक्तौ
श्यामापक्षिणि॰विष्वक्सेनप्रियाया
म् । वृष्टिभेषजे । गेंठी॰ इ॰भा॰
। अस्यागुणायथा। वाराहीपित्तला
वल्याकट्वीतिक्तारसायनी । आयुः
शुक्राग्निकृन्मेहकफकुष्ठानिलापहा
॥ वाराहीकन्दसंज्ञस्तुपश्चिमेगृष्टि
संज्ञकः । वाराहीकन्दएवान्यैश्च
र्म्मकारालुकोमतः ॥ अनूपेसभ
वेद्देशेवाराहइवलोमवान् ॥ वराह
स्येयम्॰प्रियत्वात् । तस्येदमित्यण् ॥

वाराह्या । स्त्री॰ शूकर्याम् ॥ वराहस्यापत्यं स्त्री । यतङ्ञ् । तस्य॰ यञिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ्गोत्रे॰ इति ष्यङादेशः ॥

वारिः । स्त्री॰ वाचि । सरस्वत्याम् । गजबन्धनभूमौ ॥ वन्याम् । वारयति॰ वार्यते ऽनयावा । वसिवपियजिराजीतीञ् ॥ न॰ बालके । ह्रीवेरे ॥ अम्बुनि । जले । नीरे । रसोरसेन्द्रियंग्राह्यं स्वं शैत्यं गुरुतातथा । सांसिद्धिकं द्रवत्वं च सम्बन्धत्वं च सर्वशुक्लं वारिगुणाः स्मृताः ॥

वारिकण्टकः । पुं॰ शृङ्गाटके । सिंघाडा॰ इ॰ भा॰ ॥

वारिकर्णिका । स्त्री॰ कुम्भिकायाम् । खमूलिकायाम् ॥

वारिकर्पूरः । पुं॰ इल्लिशमत्स्ये ॥

वारिकुब्जः }
वारिकुब्जकः } पुं॰ वारिकण्टके । शृङ्गाटके ॥

वारिक्रिमिः । पुं॰ जलमक्षिकायाम् ॥

वारिचत्वरः पुं॰ कुम्भिकायाम् ॥

वारिचरः । पुं॰ मत्स्ये ॥ यादोमात्रे ॥

वारिचामरम् । न॰ शैवाले ॥

वारिजः । पुं॰ शङ्ख ॥ शम्बूके ॥ न॰ पद्मे ॥ द्रोणीलवणे ॥ गौरसुवर्णे । लवङ्गे ॥

वारितस्करः । पुं॰ सूर्ये ॥ मेघे ॥

वारिदा । स्त्री॰ जङ्गमकुट्याम् । राजनके॰ वारिदस्तोमे॰ चलन्तीत्यर्थः॰ इ॰ भा॰ यथा । जलदा जङ्गमकुटीकावारीमूर्द्धकर्पूरीति हारावली । छत्रे ॥

वारिदः । पुं॰ जलदे । मेघे । मुस्तके ॥ वारिददाति । डुदाञ्॰ । आतोनुपसर्गेकः ॥ न॰ बालायाम् । ह्रीवेरे ॥

वारिधरः । पुं॰ मेघे ॥

वारिधारः । पुं॰ अद्रिविशेषे ॥

वारिधारा । स्त्री॰ जलधारायाम् ॥

वारिधिः । पुं॰ समुद्रे । अकूपारे । अर्णवे ॥ वारीणिधीयन्तेऽस्मिन् । डुधाञ्॰ । कर्मण्यधिकरणे चेति॰ किः ॥

वारिनिधिः । पुं॰ वारिधौ ॥

वारिपथिकः । त्रि॰ जलपथेनागते ॥ जलपथगामिनि ॥ वारिपथेनाहृतम्॰ तेनगच्छतिवा॰ । ठक् ॥

वारिपर्णिका । स्त्री॰ वारिपर्ण्याम् ॥

वारिपर्णी । स्त्री॰ कुम्भिकायाम् । खमूल्याम् । वारिपर्णीहिमातिक्ता लघ्वीस्वाद्वीसरापटुः । दोषत्रयकरीरूक्षाशोणितज्वरशोषकृत् ॥ वारिणिपर्णान्यस्याः ॥ पाककर्णेतिङीष् । यद्वा वारिपिपर्त्ति । पृ॰ । धापृवस्यज्यतिभ्योनः । जातेरितिङीष् ॥

वारिपालिका । स्त्री॰ खमूल्याम् ॥

वारिप्रवाह : । पुं॰ निर्झरे । झरे । उत्सान्निर्गतजलप्रवाहे । वारिण: प्रवाह : ॥

वारिप्रश्नी । स्त्री॰ कुम्भिकायाम् ॥

वारिबदरम् । न॰ प्राचीनामलके ॥

वारिभवम् । न॰ स्रोतोञ्जने ॥

वारिमसि : । स्त्री॰ पाथोदे । मेघे ॥

वारिमुक् । पुं॰ खतमालि । मेघे ॥

वारिमूली । स्त्री॰ वारिपर्ण्याम् ॥ वारिणिमूलं यस्या : । पाककर्णेति ङीष् ॥

वारिरथ : पुं॰ नावि । तरिके ॥

वारिराशि : । पुं॰ समुद्रे ॥

वारिरुहम् । न॰ कमले ॥ वारिणि रोहति । रुह॰ । इगुपधेतिक: ॥

वारिलोमा । पुं॰ अप्पतौ । वरुणे ॥

वारिवल्लभा । स्त्री॰ विदार्याम् ॥

वारिवास : । पुं॰ सुराजीविनि । शौण्डिके ॥

वारिवाह : । पुं॰ जलदे । मेघे ॥ वारिवहति । वह॰ । कर्म्मण्यण् ॥ मुस्तायम् ॥

वारिवाहक : । पुं॰ बलाहके । मेघ ॥ वारिणोवाहक : ॥

वारिवाहन : । पुं॰ वारिदे ॥

वारिश : पुं॰ विष्णौ ॥

वारिशिरीषिका । स्त्री॰ शिरीषिकायाम् ।

वारिसम्भव : । पुं॰ यावनालशरे ॥

न॰ उशीरे ॥ लवङ्गे ॥ सौवीराञ्जने ॥

वारी । स्त्री॰ गजबन्धन्याम् । हस्तिशालायाम् ॥ कलस्याम् ॥ वार्य्यतेऽनया । वृञ् । ण्यन्त : । वसिवपियजिराजीतीञ् । बह्वादित्वान्ङीष्वा ॥

वारीट : । पुं॰ गजे । हस्तिनि ॥

वारीश : । पुं॰ समुद्रे ॥

वारु : । पुं॰ विजयकुञ्जरे ॥

वारुठ : । पुं॰ अन्तशय्यायाम् ॥

वारुण्कि : । पुं॰ वरुडापत्ये ॥ व्याघ्रवरुडस्यादिनेञ् ॰ अकङादेशश्च ॥

वारुण : । पुं॰ भारतवर्षीयोपद्वीपविशेषे ॥ न॰ उपपुराणविशे ॥ शतभिषर्क्षे ॥ जले ॥ त्रि॰ वरुणसम्बन्धिनि ॥

वरुणकर्म्म । न॰ जलाशयखननादौ ॥

वारुणव्रतम् । न॰ नृपतेर्नियमविशेषे ॥ यथा । वरुणेनयथापाशैर्बद्धएवाभिदृश्यते । तथापापान्निगृह्णीयाद्व्रतमेतद्धिवारुणम् ॥

वारुणि : । पुं॰ अगस्त्यमुनौ ॥ वसिष्ठे ॥

वारुणी । स्त्री॰ गण्डदूर्वायाम् ॥ पश्चिमायाम् । प्रतीच्यांदिशि ॥ इन्द्रवारुण्याम् ॥ दूर्वायाम् । शतभिषानक्षत्रे ॥ तिथिविशेषे ॥ यथा । वारुणेनसमायुक्तमधौकृष्णा

त्रयोदशी । गङ्गायां यदि लभ्येत सू
र्य्यग्रहशतैः समा ॥ वरुणं शतभि
षा ॥ इयमेव शनिवारयुक्ता चेन्महा
वारुणी शुभयोगयुता चेन्महाम
हावारुणीति संज्ञां लभते । यथा ।
शनिवारसमायुक्ता सा महावारुणी-
स्मृता । गङ्गायां यदि लभ्येत कोटिसू
र्य्यग्रहैः समा ॥ शुभयोगसमायुक्ता
शनौ शतभिषा यदि । महामहेति
विख्याता त्रिकोटिकुलमुद्धरेत् ॥
सुराधिदेवतायाम् । प्रथमाभिमा
निन्यां महत्त्यां देवतायाम् । मन्त्रा
वारुणीति श्रुतेः ॥ ६ ॥ अन्नमय्यां
सुरायाम् । पैष्ट्याम् ॥ पुनर्नवा-
शालिपिष्टैर्विहिता वारुणी स्मृता ।
संहितैस्तालखर्ज्जूररसैर्या सापि वारु
णी ॥ सुरावद्वारुणी लघ्वी पीनसा
ध्मानशूलनुत् ॥ वरुणप्रेरितवृ
न्दावनस्थकदम्बतरुकोटरनिः
सृतायां बलदेवपीतवारुण्याम् ॥
यथा । पराशर उवाच । वने विचर
तस्तस्य सह गोपैर्महात्मनः । मा
नुषच्छद्मरूपस्य शेषस्य धरणीभृतः
निष्पादितोरुकार्य्यस्य कार्य्येणोर्वी-
विचारिणः । उपभोगार्थमत्यर्थं व
रुणः प्राह वारुणीम् ॥ अभीष्टा
सर्व्वदा यस्य मदिरे त्वं महौजसः । अ
नन्तस्योपभोगाय तस्य गच्छ मुदे शुभे ॥
इत्युक्ता वारुणी तेन सन्निधानमथाक
रोत् वृन्दावनवनोत्पन्नकदम्बतरुको
टरे ॥ विचरन् बलदेवोऽपि मदिराग
न्धमुत्तमम् । आघ्राय मदिरातर्षम
वापाथ पुरातनम् ॥ ततः कदम्बात्
सहसा मद्यधारां स लाङ्गली । पतन्तीं
वीक्ष्य मैत्रेय प्रययौ परमां मुदम् ॥ प
पौ च गोपगोपीभिः समवेतो मुदा
न्वितः । उपगीयमानो ललितं
गीतवाद्यविशारदैः ॥ इति विष्णु
पुराणे पञ्चमांशे २५ अध्यायः ॥ अ
स्याधिकारिणः प्रति श्रीसदाशि
वः । सम्यग्विधिविधानेन सुस
माहितचेतसा । पिबन्ति मदिरां म
र्त्त्या अमर्त्त्या एव ते क्षितौ ॥ इयञ्च वा
रुणी देवी निपीता विधिवर्ज्जिता । नृ
णां विनाशयेत् सर्व्वं बुद्धिमायुर्यशोध
नमिति कुलार्णवसेतु ॥ कुलार्ण
वोपनिषत्को निर्भयो वीरो निर्लज्जो
निष्कृतफलः । निर्णीतवेदशास्त्रा
र्थो वरदो वारुणीं पिबेदिति ॥ वरुण
स्येयम् । तस्येदमित्यण् । ङीप् ॥

वारुणीवल्लभः । पुं० वरुणे । वारु
णी वल्लभा यस्य सः ।

वारुण्डः । पुं० फणिनां राज्ञि । पुं०
न० सेकपात्रे । नौस्थजलनिःसा
रणभाजने । नेत्रमले ॥ कर्णमले ॥

वारुण्डी । स्त्री० द्वारपिण्डाम् ॥

वारूढः । पुं० वस्त्राञ्चले ॥ कपाटे
॥ अग्नौ ॥ पञ्जरे ॥ शम्बले ॥

इति मेदिनीकरः ॥

वारेन्द्रः । त्रि॰ वरेन्द्रां जाते । अण् ॥

वरेन्द्री । स्त्री॰ देशविशेषे । राजसाही॰ इति गौड़देशभाषाप्रसिद्धे ॥

वार्क्षम् । न॰ वने । वृक्षाणां समूहः । तस्य समूह इत्यण् ॥ त्रि॰ वृक्षसम्बन्धिनि ॥

वार्क्ष्यदुर्गम् । न॰ वृक्षैः समन्तात् वेष्टिते पुरे पुराद्बहिः सर्वतो योजनमात्रं व्याप्य तिष्ठति महावृक्षकण्टकिगुल्मलताद्याचितो राज्ञो वासस्थाने ॥

वार्क्षी । स्त्री॰ स्त्रीविशेषे । इति महाभारतम् ॥

वार्ज्जम् । न॰ पद्मे ॥

वार्णवः । त्रि॰ वर्णुदेशजे ॥ कच्छादाण् ॥

वार्णिकः । त्रि॰ लेखके ॥

वार्त्तम् । न॰ निस्सारे ॥ आरोग्ये । पाटवे । स्वास्थ्ये ॥ त्रि॰ वृत्तिमति । वृत्तिशालिनि ॥ नीरोगे ॥ वृत्तिरस्त्यस्य वृत्तेश्चेति णः ॥

वार्त्तकः । पुं॰ पक्षिविशेषे । बटेर इ॰ भा॰ । वर्त्तके ॥ न॰ वर्त्तकानां गणे ॥ वर्त्तकानां समूहः । तस्य समूह इत्यण् ॥

वार्त्ता । स्त्री॰ वर्त्तने ॥ वातिङ्गने ॥ वार्त्ताक्याम् ॥ कृष्यादौ वृत्तौ ॥ यथा । कृषिर्वाणिज्या तद्वद्वृत्तीयं पशुपालनम् । विद्या देता महाभागवार्त्तावृत्तित्रयाश्रया ॥ चतुर्विधा पिता प्रोक्ता कृष्णेन पितरं प्रति । कृषिर्वाणिज्या गोरक्षा कुसीदन्तुर्यमुच्यते इति ॥ जनश्रुतौ ॥ उदन्ते ॥ वृत्तान्ते ॥ वृत्तिर्लोकवृत्तम्॰ तदस्त्यस्याम् । वृत्तेश्चेति वार्त्तिकेन॰ णः ॥ दुर्गायाम् ॥ यथा । पश्वादिपालनाद्देवी कृषिकर्मान्तकारणात् । वर्त्तनाकारणाद्वापि वार्त्ता सा परिगीयते ॥

वार्त्ताकः । पुं॰ वार्त्ताकौ ॥ वातिङ्गणे । वनभण्टा॰ इति ख्याते ॥ वार्त्तमारोग्यमाकयति । अककुटिलायां गतौ । अन्तः कर्मण्यण् ॥ वार्त्तफलं अकं यस्य वा ॥ वार्त्तक पक्षिणि ॥

वार्त्ताकी । स्त्री॰ हिंगुल्याम् । भण्टाक्याम् ॥ जातेरिति ङीष् ॥ वृहत्याम् ॥ वातिङ्गणे । वनभण्टा॰ इति भा॰ ॥

वार्त्ताकुः । स्त्री॰ हिंगुल्याम् । भण्टाक्याम् । वृन्ताके । अस्या गुणा यथा । अग्निप्रदा मारुतनाशिनी च शुक्रप्रदा शोणितवर्द्धिनी च । हृद्या सकासारुचिनाशिनी च वार्त्ताकुरेषा गुणसम्प्रयुक्ता ॥ सा बाल्या कफवातघ्नी पक्वा सक्षारपित्तला । सदा फला त्रिदोषघ्नी रक्तपित्तप्रसादनी ॥

अङ्गारपक्वावार्त्ताकुः किञ्चित्पित्त
करी मता । कफमेदोऽनिलहरा सरा
लघुतरा परा ॥ पुंलिङ्गोपीतिस्त्रिका
ण्डशेषः ॥ वर्त्तते । भ्रतु॰ । वृतेर्वृ
द्धिश्चेतिकाकुः ॥ बाहुलकादुका
रस्यात्वे वार्त्ताकमपि ॥

वार्त्तायनः । पुं॰ हैरिके । गूढपुरुषे
। प्रवृत्तिज्ञे । प्रणिधौ । चरे ॥
इति हेमचन्द्रः ॥

वार्त्तावहः । पुं॰ कृषिवाणिज्यादि
जीवे । वैवधिके ॥ वार्त्तायाव
हः ॥

वार्त्ताहारी । पुं॰ चारे । यथार्हव
र्णे ॥

वार्त्तिकः । पुं॰ वर्त्तिके । बटेर॰
हि॰ भा॰ ॥ वार्त्तिकोमधुरोरूक्षः
शीतश्च कफपित्तनुत् ॥ वार्त्ताकी ॥
चरे । स्पशे ॥ वैश्ये ॥ न॰ उक्ताऽ
नुक्तदुरुक्तार्थव्यञ्जकसङ्ग्रहे ॥ उक्ता
नुक्तदुरुक्तार्थचिन्ताकारितु वार्त्तिक
मिति हेमचन्द्रः ॥ वृत्तिमधीते॰
वेद वा । उक्थादित्वट्ठक् ॥ वृ
त्तौ साधुर्वा । कथादिभ्यष्ठक् ॥

वार्त्तिका । स्त्री॰ वर्त्तिकायाम् ।
विष्णुलिङ्ग्याम् । बटेर॰ हि॰ भा॰
॥ वर्त्तिकेतिहारावली ॥

वार्त्रघ्नः । पुं॰ पार्थे । अर्ज्जुने ॥ वृ
त्रघ्नोऽपत्यम् । अण् ॥ जयन्ते त्रि॰
वृत्रघ्नसम्बन्धिनि ॥

वार्द्दलः । पुं॰ मेलानन्दायाम् ।
न॰ दुर्द्दिने । बादला॰ हि॰ भा॰
॥ मस्याम् ।

वार्द्धकम् । न॰ वृद्धसङ्घाते ॥ वृ
द्धानां समूहः । वृद्धाच्चेति वक्त
व्यमिति वुञ् ॥ वृद्धस्य भावकर्म
णोः । वृद्धत्वे । यौवनात्पराव
स्थायाम् ॥ यथा । तिथिवर्षमतं
बाल्यं त्रिंशद्वर्षन्तु यौवनम् । मु
ख्यं गौणं द्विधाभिन्नं वार्द्धकन्तु ततः
परम् ॥ वृद्धस्य कर्म्म भावो वा ।
मनोज्ञादित्वाद्वुञ् ॥ वार्द्धकेतप
आतिष्ठेदिति शास्त्रोदितं वचः ॥

वार्द्धक्यम् । न॰ वृद्धत्वे । वार्द्धके ॥
वृद्धसङ्घाते ॥ वार्द्धकमेव । चतु
र्वर्णादित्वात् स्वार्थे ष्यञ् ॥

वार्द्धिः । पुं॰ समुद्रे ॥ वारीणि धीय
न्तेऽत्र । कर्मण्यधिकरणे चेति धा
ञः किः ॥

वार्द्धिभवम् । न॰ द्रोणीलवणे ॥ *

वार्द्धुषिः । त्रि॰ वृद्ध्याजीवे ॥ वृद्ध्य
र्थं द्रव्यं वृद्धिः तत्प्रयच्छति ।
प्रयच्छतीतिगर्ह्यमिति ठक् । वृ
द्धेर्वृधुषिभावः ॥ पृषोदरादि
त्वात्कलोपः ॥

वार्द्धुषिकः । त्रि॰ कुसीदिके । वृद्ध्
याजीवे । वार्द्धुषी । बहुरा॰ हि॰
भा॰ ॥ तल्लक्षणं यथा । समर्घं धा
न्यमादाय महार्घं यः प्रयच्छति ।

सर्व्वे वार्द्धुषिकोनाम हव्यकव्यबहि ष्कृत : ॥ तत्रवृद्धिग्रहणनियमो यथा । अशीतिभागं गृह्णीयान्मा साद्वार्द्धुषिक: शतात् । द्विकं शतं वागृह्णीयात्सतांधर्म्ममनुस्मरन् । द्विकं शतञ्चगृह्णानोनभवत्यर्थकि ल्विषीति । शतकार्षापणेऽशीति भागं विंशतिपणा : । द्विकं पुराण द्वयम् । एवं विधं नियममतिक्रम्य चनापदि • स्वयमन्यद्वारावाखाच्छ न्दो नयोव्यवहरतितस्यैवप्रायश्चित्त म् । आपदितुस्वयङ्करणे • नियमा तिक्रमेचनदोष : । इतिप्रायश्चित्त विवेक : ॥ वृद्ध्यर्थं द्रव्यंवृद्धि : । तांप्रयच्छति । प्रयच्छतिगर्ह्यमि तिठक् । वृद्धेर्वृधुषिभावोवक्त व्य : ॥

वार्द्धुष्यम् । न० धान्यवर्द्धने ॥

वार्धेयम् । न• द्रोणीलवणे ॥

वार्द्ध्रम् । न० स्त्री• चर्म्मणि ॥ व- र्ध्रैंइदम् । चर्म्मणोऽञ् त्रि० वर्ध्र स्यविकारे । तस्यविकारइत्यण् ॥

वार्ध्री । स्त्री• चर्म्मरज्वाम् । वही•इ• भा• । वार्ध्रान्•ङीष् ।

वार्ध्रीणस : । पुं• वार्ध्रीणसे । छाग विशेषे ॥ यथा । त्रिपिवंस्त्विन्द्रिय क्षीणं श्वेतं वृद्धमजापतिम् । वा र्ध्रीणसमितिप्राहुर्याज्ञिका: पितृक र्म्मणीतिनिगमे । एकचरे । गण्ड के । गैंडा•इ•भा• ॥ पक्षिविशे षे । यथा । नीलग्रीवोरक्तशीर्ष : कृष्णपाद : सितच्छद : । वार्ध्रीण स : स्यात्पक्षीशोममविष्णोरतिप्रि य : ॥ रोहितश्चतुमत्स्यस्यमांसैर्वा र्ध्रीणसस्यच । तृप्तिमाप्नोतिवर्षाणां शतानिञ्चीणिमत्प्रिया ॥ महिषा णाञ्चखड्गानांरुधिरै : शतवार्षि कीम् । तृप्तिमाप्नोतिपरमांशार्दूल रुधिरैस्तथा ॥ इतिकालिकापुरा णे ६६ ऽध्याय : । वार्ध्रीवनासि काऽस्य । अञ् नासिकायाइत्यच् • नसादेशश्च । पूर्व्वपदादितिणत्वम् ।

वार्भट : । पुं० नक्रे । कुम्भीरे । वा रिजले०भट : ॥

वार्म्मणम् । न• वर्म्मसमूहे ॥ वर्म्मणां समूह : । भिक्षादिभ्योण् ॥

वार्म्मिणम् । न• वर्म्मिणांसमूहे ॥

वार्म्मुक् । पुं० अम्भोदे । मेघे ॥ वा : मुञ्चति । मुच्लृ• । क्विप् ॥

वार्य्य : । पुं• ऋत्विजि ॥ व्रियते । वृङ्सम्भक्तौ । ण्यत् । क्यप्तु०व त्तएव । —*— ॥

वार्य्य : । त्रि• वरणीये ॥ वारिसम्ब न्धिनि ॥

वार्य्युद्भवम् । न• पद्मे । त्रि•जलजे ।

वाराशि : । पुं• समुद्रे । इतिपुरा णम् ॥

वार्व्वट : । पुं• वहित्रे ॥

वार्ष्वणा । स्त्री॰ वर्षणायां ॥

वार्षकम् । न॰ सुश्रुतोक्तपृथिवीद्ग्धभागान्तर्गतभागविशेषे ॥

वार्षगण्य : । पुं॰ पतञ्जलौ ॥ वृषगणस्य गोत्रापत्यम् । गर्गादित्वाद्यञ् ॥

वार्षभाणवी । स्त्री॰ वृषभाणुकन्यायाम् । श्रीराधायाम् ॥ यथापरात्पर : कृष्णस्तथेयं वार्षभाणवीति पद्मपुराणम् ॥

वार्षलम् । न॰ वृषलकर्मणि ॥ यथा । नकथञ्चनकुर्वीतब्राह्मण : कर्म्म वार्षलम् । वृषल : कर्मचन्ना(?)स्य पतनीयेह्तितयो : ॥

वार्षिकम् । न॰ त्रायमाणायाम् । बलभद्रिकायाम् ॥ वृष्टिजले ॥ यथा । वार्षिकं तदहर्वृष्टं भूमिष्ठमहितं जलम् । त्रिरात्रमुषितं तत्तु प्रसन्नममृतोपमम् ॥ त्रि॰ वर्षाभवे ॥ वर्षासुभवम् । जातम् साधु वा । वर्षाभ्यष्ठक् । ठस्येक : ॥ वर्षभवे । वात्सरिके । वर्षासम्बन्धिनि ॥ यथा । वार्षिकांश्चतुरोमासान् दुर्गमा : पथिसर्वदा । तस्मादेकत्र विबुधै : स्थातव्यमितिनिश्चय : ॥ अष्टौमासांस्तुप्रवसेत्सदाकार्यवशाद्द्विज : । वर्षाकालेनगन्तव्यं प्रवासेसुखमिच्छता इति भागवते नारद : ॥

वार्षिकी । स्त्री॰ त्रायमाणायाद्मोषधौ ॥ वेलङ्॰ प्र॰ पुष्पविशेषे ॥ यथा । श्रीमद्दोषट्पदानन्दावार्षिकीमन्तावध्वनेतिभावप्रकाश: । वार्षिकीशीतलालघ्वीतिक्तादोषत्रयापहा । कर्णाक्षिमुखरोगघ्नी॰ तत्तैलं तद्गुणं स्मृतम् ॥ इतिच ॥ वर्षकर्त्तव्यपूजादौ । वर्षासुभवा । ठक् । ङीप् । कालाट्ठञ्वा ॥

वार्षिला । स्त्री॰ करकायाम् ॥

वार्ष्णेय : । त्रि॰ वृष्णिवंशोद्भवे ॥

बार्हतम् । न॰ बृहतीफले ॥ बृहत्या: फलम् । प्लक्षादिभ्योण्विधानसामर्थ्यात्तस्यफलेनलुक् ॥

बार्हद्रथ : । } पुं॰ } नृपे ॥ बृहद्रथस्यापत्यम् । अण् इञ्वा ॥
बार्हद्रथि: ।

बार्हस्पत्य : । पुं॰ नास्तिके ॥ यथा । स्याद्वादवाद्यार्हत : स्यात्॰ शून्यवादीतुसौगत: । नैयायिकस्त्वक्षपाद: स्यात्॰ योग: साङ्ख्यस्तुकापिल: वैशेषिक: स्यादौलुक्य॰ बार्हस्पत्यस्तुनास्तिक: । चार्वाकोलौकायतिकश्चैतेषडपितार्किका : ॥ मेघे । कश्चाश्विद्वियायांमैत्रे योबृहस्पते : शिष्य : ॥ न॰ नीतिशास्त्रे ॥ बृहस्पतिदेवताके त्रि॰ बृहस्पतिसम्बन्धिनि ॥ बृहस्पतिर्देवतास्य॰ बृहस्पतेरिदं वा । दित्य

दिश्यादिश्यपत्युत्तरपदाण्य : ॥

वालक : । पुं॰ न॰ पारिहार्ये ॥ त्रि॰ अङ्गुरीयके ॥ वालको ऽस्त्री पारिहार्ये॰ त्रिषुस्यादङ्गुरीयके । इ॰ मेदिनि : ॥ बालके ॥

वालव : । पुं॰ द्वितीयकरणे ॥ तत्र जातस्य फलं यथा । कार्यस्य कर्ता स्वजनस्य भर्ता सेनाप्रणेता कुलशीलयुक्त : । उदारबुद्धिर्बलवान्मनुष्यो हि वालवाख्ये जननं हि यस्य ॥

वाल्कम् । न॰ क्षौमादिवस्त्रे ॥ त्रि॰ वल्कभवे ॥ वल्कस्य वल्कलस्य॰ विकार : । तस्य विकार इत्यण् ॥

वाल्कलम् । त्रि॰ वल्कलनिर्मिते ॥ वल्कलस्येदम् । अण् ।

वाल्कली । स्त्री॰ मदिरायाम् ॥

वाल्मिकि : ।
वाल्मीक : । पुं॰ } कविश्रेष्ठे ॥
वाल्मीकि : ।

प्राचेतसे भृगुवंशीयमुनिविशेषे ॥

वाव । अ॰ अवधारणार्थे ॥ प्रसिद्धौ ॥

वावदूक : । त्रि॰ वाचोयुक्तिपटौ । वाग्मिनि । वक्तरि ॥ कुर्वादिषु वावदूकशब्दपाठसामर्थ्याद्वदेरूक : ॥ यद्वा । पुन : पुनरतिशयेनवावदति॰ वृति॰ वदेर्यङन्तात्॰ उलूकादयश्चेत्यूक : ॥

वावय : । पुं॰ तुलसीविशेषे । वावुइ॰ इ॰ भा॰ ॥ इतिशब्दचन्द्रिका ॥

वावृत : । त्रि॰ कृतवरणे । वृते । वृतौ । स्वयंवरादिना स्त्रीकृतवरादौ ॥ वावृत्यतेस्म । वावृतुवर्तने । क्त : ॥

वाशा । स्त्री॰ वासके ॥ वाश्यते । वाशृशब्दे । गुरोश्चेत्य : । टाप् ॥

वाशि : । पुं॰ छेदनसाधने । कुठारप्रभेदे ॥ अग्नौ ॥ वाश्यते । वाशृ॰ । वसिवपीत्यादिना इञ् ॥

वाशिका । स्त्री॰ वासके ॥ वाश्यते । वाशृ॰ । गुरोश्च हलइत्य : टाप् । क : ॥ यद्वा । उश्यते । वशकान्तौ । संज्ञायामित्यनेन॰ ण्वुल् ॥

वाशितम् । न॰ पशुपक्ष्यादिशब्दे ॥ वाशनम् । वाशृ॰ भावेक्त : ॥

वाशिनायनि : । पुं॰ वाशिनोपत्ये ॥ उदीचां वृद्धादगोत्रादिति॰ फिञ् । दाण्डिनायनेति॰ टिलोपाभाव : ॥

वाशिष्ठ : । त्रि॰ वशिष्ठसम्बन्धिनि ॥

वाशिष्ठी । स्त्री॰ । गोमत्यां नद्याम् ॥ तीर्थविशेषे ॥ अत्र वक्ष्यति कुल्या तीर्थम् । ॥ वशिष्ठसम्बन्धिन्याम् ॥

वाशुर : । पुं॰ गर्दभे ॥ वाश्यते । वाशृ॰ । मन्दिवाशिमथिचतिचङ्ग्यङ्किभ्यउरच् ॥

वाशुरा । स्त्री॰ रात्रौ ॥ वाश्यतेऽस्याम् । वाशृ॰ । मन्दिवाशी

ष्युरच् । टाप् ॥

वाश्र : । पुं॰ दिवसे ॥ शकुनौ ॥ रासभे ॥ न॰ मन्दिरे ॥ चतुष्पथे ॥ वाश्यते । वाशृ॰ । स्फायितञ्चिवञ्चीत्यादिना - रक् ॥

वाष्प: । पुं॰ न॰ नेत्रजले । भाफइ॰ भा॰ प्र॰ ॥ ऊष्मणि ॥ वायति । ओवै शोषणे ॰ वातिवा । वागत्यादौ । खष्पशिल्पशष्पवाष्परूपपर्पतल्पा : इतिसाधु : । बाधतेनेत्रमितिवा । वाधते : षोनिपातनात् ॥ लोहे ॥ इतिमेदिनीकर : ॥

वाष्पक : । पुं॰ मारिषे । यथा । मारिषोवाष्पकोमार्ष : श्वेतोरक्तश्चसस्मृत : ॥

वाष्पका । स्त्री॰ हिङ्गुपत्र्याम् ॥

वाष्पायमाण: । त्रि॰ वाष्पमुद्वमति ॥

वाष्पिका । स्त्री॰ हिङ्गुपत्र्याम् । कारव्याम् ॥ वाष्पमिव इवेप्रतिकृतावितिकन् ॥

वाष्पी । स्त्री॰ वाष्पिकायाम् ॥

वाष्पीका । स्त्री॰ त्वक्पत्र्याम् । वाष्पिकायाम् । रांधुनी॰ इ॰ गौ॰ दे॰ भा॰ प्र॰ ॥ वाष्पमिव । कन् । टाप् । पृषोदरादि : ॥

वास : । पुं॰ वेश्मनि ॥ अवस्थाने ॥ वासके ॥ वसन्त्यत्र । वसनिवासे । हलश्चेतिघञ् ॥ लघ्वादिविकले॰ । ऽ॰ ॥

वासकोष : । पुं॰ वस्त्रपेटके ॥

वासक : । पुं॰ वैद्यमातरि । वृषे । अटरूषे । सिंहास्ये । वांसा॰ वासूटी॰ इ॰ भा॰ प्र॰ वृक्षे ॥ अस्यगुणायथा । वासकोवातकृत्स्वर्य: कफपित्तास्त्रनाशन : । तिक्तस्तुवरकोहृद्योलघु : शीतस्तृड्वर्तिहृत् ॥ श्वासकासज्वरच्छर्दिमेहकुष्ठक्षयापह: ॥ गानाङ्गविशेषे ॥ त्रि॰ गन्धकृति ॥ वासयति । ण्वुल ॥ यद्वा । वस्त्रे॰ आच्छादयति । वसआच्छादने । ण्वुल् ॥

वासकर्णी । स्त्री॰ यज्ञशालायाम् ॥

वासकसज्जा । स्त्री॰ स्त्रीयादिनायिकाभेदे ॥ अद्यमेप्रियवासर : ॰ इत्थंनिश्चित्य॰या॰ सुरतसामग्रींसज्जीकरोतिसा॰ वासकसज्जा । वासकोऽवासर : ॥

वासका । स्त्री॰ वासकवृक्षे ॥

वासगृहम् । न॰ गर्भागारे । गृहमध्यभागे ॥ शयनगृहे ॥ स्थितिगेहे ॥ वासार्थं॰ वासस्य वागृहम् ॥

वासतेयी । स्त्री॰ रात्रौ ॥ वसनम्॰ वसति : वसतौसाधु : । पथ्यतिथिवसतिस्वपतेर्ढञ् ॥

वासनम् । न॰ धूपने ॥ वारिधान्याम् ॥ वस्त्रे ॥ निक्षेपाधारे ॥ वासे ॥ ज्ञाने ॥ त्रि॰ वसनेनक्रीते ॥

शतमानविंशतिकसहस्रशसमादया॥

वासना। स्त्री॰ प्रत्याशायाम्॥ ज्ञाने॥ देहात्मबुद्धिजन्यमिथ्यासंस्कारे॥ दुर्गायाम्॥ यथा। वसस्यद्दृष्टा सर्वेषुभूतेष्वन्तर्हितायच। धातुर्वसनिवासेतोवासनातेनसास्मृतेति॥ स्मृतिहेतौ। संस्कारे। भावनायाम्॥ धर्माधर्मरूपेजीवगतसंस्कारविशेषे॥ वासनाद्विविधा। मलिना॰ शुद्धाच। शुद्धा॰ दैवीसम्पत्॰ शास्त्रसंस्कारप्राबल्यात्तत्त्वज्ञानसाधनत्वेनैकरूपैव। मलिनातु॰ त्रिविधा। लोकवासना॰ शास्त्रवासना॰ देहवासनाचेति। सर्वेजनायथा ननिन्दन्ति॰ तथैवाचरिष्यामीति॰अशक्यार्थाभिनिवेशो लोकवासना। तस्याश्चकोलोकमाराधयितुम्समर्थइतिन्यायेन॰सम्पादयितुमशक्यत्वात्॰ पुरुषार्थानुपयोगित्वाच्चमलिनत्वम्। शास्त्रवासनातु॰त्रिविधा। पाठव्यसनम्॰ बहुशास्त्रव्यसनम्॰ अनुष्ठानव्यसनञ्चेति। क्रमेण॰ भरद्वाजस्य॰ दुर्वाससो॰ निदाघस्यचप्रसिद्धा। मलिनत्वमस्याः क्लेशावहत्वात्॰पुरुषार्थानुपयोगित्वात्॰ दर्पहेतुत्वात्॰ जन्महेतुत्वाच्च। देहवासनापित्रिविधा। आत्मत्वभ्रान्तिः॰ गुणाधानभ्रान्तिः॰ दोषापनयनभ्रान्तिश्चेति। तत्रात्मत्वभ्रान्तिर्विरोचनादिषुप्रसिद्धा॰ सोवलौकिकी। गुणाधानंद्विविधम्॰ लौकिकं॰ शास्त्रीयञ्च। समीचीनशब्दादिविषयसम्पादनम् लौकिकम्॰ गङ्गास्नानशालग्रामतीर्थादिसम्पादनंशास्त्रीयम्। दोषापनयनमपिद्विविधम्॰ लौकिकं॰शास्त्रीयञ्च। चिकित्सिकोक्तैरौषधैर्व्याध्याद्यपनयनंलौकिकं॰ स्नानाचमनादिभिरशौचाद्यपनयनंवैदिकम्। एतस्याश्चसर्वप्रकाराया मलिनत्वम्॰ अप्रामाणिकत्वात्॰अशक्यत्वात्॰ पुरुषार्थानुपयोगित्वात्॰पुनर्जन्महेतुत्वाच्चशास्त्रप्रसिद्धम्। तदेतल्लोकशास्त्रदेहवासनात्रयमविवेकिनामुपादेयत्वेनप्रतिभासमानमपि॰ विविदिषोर्वेदनोत्पत्तिविरोधित्वात्॰ विदुषोज्ञाननिष्ठाविरोधित्वाच्च॰विवेकिभिर्हेयम्। तदेवं बाह्यविषयवासना॰ त्रिविधानिरूपिता। अभ्यन्तरवासनातु॰कामक्रोधदम्भदर्पाद्यसुरसम्पद्रूपासर्वानर्थमूलंमानसीवासनेत्युच्यते। तदेवंबाह्याभ्यन्तर वासनाचतुष्टयस्य॰शुद्धवासनयाक्षयः सम्पादनीयोविवेकिभिः॥ अत्रवशिष्ठः

॥ शुभाशुभाभ्यां मार्गाभ्यां वहन्तीवासनासरित्। पौरुषेणप्रयत्नेनयोजनीयाशुभेपथि ॥ अशुभेषुसमाविष्टं शुभेष्वेवावतारयेत्। स्वमनः पुरुषार्थेनबलेनबलिनांवर ॥ अशुभाच्चालितंयातिशुभंतस्मादपीतरत्। जन्तोश्चित्तन्तुशिशुवत् तस्मात् तच्चालयेद्बलात्। अपिच। वासनानांपरित्यागेयदियत्नंकरोष्यलम्। तत् तेशिथिलतांयान्तिसर्वाधिव्याधयः क्षणात्। पौरुषेणप्रयत्नेन बलात् सन्त्यज्यवासनाः। स्थितिं बध्नासिचेत् तर्हिपदमासादयस्यलमिति ॥

वासनाक्षयः। पुं॰ वासनानाशे ॥ यथा। पूर्वापरपरामर्शमन्तरेण॰ सहसोत्पद्यमानस्यक्रोधादिवृत्तिविशेषस्य॰ हेतुश्चित्तगतः संस्कारविशेषोवासना। पूर्वपूर्वाभ्यासेन॰ चित्तेवासमानत्वात्। तस्याः क्षयोनाम॰ विवेकजन्यायांचित्तप्रशमवासनायांदृढायांसत्यपिबाह्ये निमित्ते क्रोधाद्यनुत्पत्तिः। तत्र॰ तत्त्वज्ञानेसति॰ मिथ्याभूतेजगति॰ नरविषाणादाविव॰ धीवृत्त्यनुदयात्॰ आत्मनश्चद्रष्टृत्वेन॰ पुनर्वृत्त्यनुपयोगात्॰ निरिन्धनाग्निवन्मनोनश्यति॰ नष्टेचमनसि॰ संस्कारोद्बोधकस्यबाह्यस्यनिमित्तस्याऽप्रतिपत्तौ॰ वासनाक्षीयते। एवं क्षीयमाणायांवासनायां॰ हेत्वभावेनक्रोधादिवृत्त्यनुदयात् मनोनश्यति॰ नष्टेचमनसि॰ शमदमादिसम्पत्त्या॰ तत्त्वज्ञानमुदेति॰ एवमुत्पन्नेतत्त्वज्ञाने॰ रागद्वेषादिरूपावासनाक्षीयते॰ क्षीणायाञ्चवासनायांप्रतिबन्धाभावात् तत्त्वज्ञानोदय इति परस्परत्वंदर्शनीयम् ॥ वासनायाः क्षयः ॥

वासनाक्षयाभ्यासः। पुं॰ वासनाक्षयस्यावृत्तौ ॥ यथा। दृश्यासम्भवबोधेनरागद्वेषादितानवैः। रतिर्घनोदितायासौब्रह्माभ्यासः सउच्यते ॥

वासनात्यागः। पुं॰ पूर्वसंस्कारोपेक्षायाम् ॥ वासनायाः त्यागः ॥

वासनापरित्यागः। पुं॰ मनोनिग्रहस्योपायविशेषे ॥ यस्तु॰ विद्यामदादिदुर्वासनयापीड्यमानोनसाधूननुवर्त्तितुमुत्सहते॰ तस्यविवेकेनवासनापरित्यागएवोपायः ॥ वासनायाः परित्यागः ॥

वासनिकः। पुं॰ निवासे। मार्गेनिवासे ॥

वासन्तः। पुं॰ परपुष्टे। कोकिले। करभे। उष्ट्रे ॥ विटे ॥ मुद्गे ॥ कृष्णमुद्गे ॥ मदनवृक्षे ॥ त्रि॰ अव

ष्टिते ॥ वसन्तोत्सवे ॥ वसन्ते भवः सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् ॥

वासन्तक : । त्रि॰ वसन्तसम्बन्धिनि ॥

वासन्तिक : । पुं॰ विदूषके । केलिकिले ॥ त्रि॰ वसन्तजोत्सवे ॥ वसन्तसहचरिताध्ययनवति ॥ वसन्तमधीते वेद वा । वसन्तादिभ्यष्ठक् ॥

वासन्ती । स्त्री॰ लताविशेषे । माधव्याम् ॥ यूथ्याम् ॥ पाटलायाम् ॥ स्मरोत्सवे । चैत्रावल्याम् । मधूत्सवे । गणिकार्याम् ॥ पुष्पलताविशेषे । प्रहसन्त्याम् । वसन्तजायाम् ॥ नवमल्लिकायाम् । नेवारा॰ निवारी॰ इ॰ प्र॰ पुष्पवृक्षविशेषे ॥ यथा । नेपालीकथिता तज्ज्ञै : सप्तलानवमालिका । वासन्तीशीतलालघ्वी तिक्तादोषत्रयापहा ॥ जित् वसन्ते पुष्प्यति । कालात् साधुपुष्प्यत्पच्यमानेष्विति अण् ॥ शक्करीच्छन्द : १४ प्रभेदे ॥ तल्लक्षणं यथा । मात्तोनोमोगो यदिगदीता वासन्तीयम् । यथा । भ्राम्यद्भृङ्गीनिर्भरमधुरालापोद्गीतैः श्रीखण्डाद्रेरङ्कुतपवनैर्मन्दान्दोला । लोलालीलापल्लवविलसद्धस्तोल्लासैः कंसारातेर्नृत्यतिसदृशी वासन्तीयम् ॥ वासन्तीदुर्गापूजाप्रमाणं यथा । चैत्रे मासि सिते पक्षे सप्तम्यादिदिनत्रये । पूजयेद्विधिवद्दुर्गां दशम्यां तु विसर्जयेत् ॥ अपिच । श्रीनारायण उवाच । पुरा स्तुता सा गोलोके कृष्णेन परमात्मना । सम्पूज्य मधुमासे च प्रीतेन रासमण्डले ॥ मधुकैटभयोर्युद्धे द्वितीये विष्णुना पुरा । तत्रैव काले सा दुर्गा ब्रह्मणा प्राणसङ्कटे ॥ इति ब्रह्मवैवर्ते प्रकृतिखण्डे ६२ अध्याय : ॥

वासयोग : । पुं॰ चूर्णायाम् । पाटवासादिशब्दे । गन्धचूर्णे ॥ वासे सुगन्धीकरणे योग उपाय : ॥

वासर : । पुं॰ न॰ अह्नि । दिने ॥ रागप्रभेदे ॥ वासयति वसतेर्ण्यन्तात् । अर्त्तिकमिभ्रमीत्यादिना अर : ॥

वासरच्छवि : । स्त्री॰ प्रकाशे । आतपे ॥

वासव : । पुं॰ इन्द्रे । मरुत्वति । मघोनि । देवाधिपतौ ॥ सचदेशनामध्येभगवतोविभूति : ॥ वसवो देवा : । वसूनि रत्नानि वा । सन्त्यस्य । ज्योत्स्नादित्वादण् ॥ वासोऽरण्यं वा ॥ दैत्यानां वासं वाति । वा गतिगन्धनयो : । आतोऽनुपसर्गे क : ॥ त्रि॰ वसुदेवताके । सास्य देवतेत्यण् ॥ वसुशब्दात् स्वार्थिक : प्रज्ञाद्यण् वा ॥

वासवदत्ता । स्त्री० गद्यरूपे० आख्यायिकाग्रन्थविशेषे ॥ वासवदत्तामधिकृत्यकृता० आख्यायिका । वृद्धाच्छ : । तस्यलुक् ॥

वासवानुज : । पुं० उपेन्द्रे ॥ वासवस्यअनुज : ॥

वासवी । स्त्री० व्यासमातरि । सत्यवत्याम् । दासेय्याम् । उपरिचरस्यवसोर्वीर्य्यजातायाम् ॥ वसोराज्ञस्यापत्यम् । अण् । ङीप् ॥ इन्द्राण्याम् ॥

वासवेय : । पुं० व्यासे । पाराशर्य्ये ॥ वासव्याअपत्यम् । स्त्रीभ्योढक् ॥

वास : । न० वस्त्रे ॥ वस्यतेऽनेनवा० वस्तेशरीरंवा । वसआच्छादने । वसेर्णिदित्यसुन् ॥

वाससज्जा । स्त्री० नायिकाप्रभेदे ॥

वासा । स्त्री० अटरूषे । वासके ॥ वासायांविद्यमानायामाशायांजीवितस्यच । रक्तपित्तक्षयीकासीकिमर्थमवसीदति ॥ वासयति । वसनिवासे । णयन्त : । पचाद्यच् ॥

वासागारम् । न० भोगगृहे । कन्याटे ॥ वासस्यआगारम् ।

वासि : । पुं० कुठारभेदे । छेदनसाधने । वसूला० इ० भा० ॥ वास्यादीनामिवकरणानांकर्तृव्यापार्य्यत्व नियमादितिवैशेषिका : ॥ वसति० वस्तेवा । वसनिवासे० आच्छादनेवा । वसिवपियजीत्यादिना० इञ् ॥

वासिका । स्त्री० वासके ॥ वासैव । स्वार्थेकन् । प्रत्ययस्थादितीत्वम् ॥

वासितम् । न० रुते । खगाऽऽरावे ॥ ज्ञानमात्रे ॥ त्रि० सुरभीकृते । धूपितव्यञ्जनादौ । भाविते ॥ वस्त्राच्छन्ने ॥ वासितेस्म । वासस्नेहनादौ । चुरादि : । क्त : । वासउपसेवायाम्वा ॥ ख्याते ॥

वासिता । स्त्री० करिण्याम् ॥ नार्य्याम् ॥ वासयति । वसनिवासे० णयन्त : । वासउपसेवायाम्वा । क्त : । टाप् ॥

वासिनी । स्त्री० सितझिण्ट्याम् ॥

वासिष्ठ : । पुं० वसिष्ठात्मजे ॥ ऋष्यण् । बहुत्वे० वसिष्ठा : ॥ न० रुधिरे ॥ उपपुराणविशेषे ॥ वसिष्ठकृतयोगशास्त्रादौ ॥ त्रि० वसिष्ठसम्बन्धिनि ॥

वासी । स्त्री० तक्षण्याम् । वसूली० इ० भा० प्र० ॥

वासु : । पुं० विष्णौ । नारायणे ॥ वसतिसर्वभूतेषु जीवरूपेणान्तर्यामिरूपेणवा० वासयतिसर्वाणिभूतानिस्वात्मनिवा । वस० । बाहुलका

टुण् ॥ पुनर्वसौ ॥ विश्वरूपे ॥

वासुकि : । पुं॰ अहिराजे । सर्पराजे । सर्पजातिभेदानांमध्ये॰ भगवतोविभूतौ ॥ वसु : रत्नंकेमूर्द्धि यस्य । वसुकायतिवा । कैशब्दे । आतोनुपसर्गेक : । वसुकस्यापत्यम् । अतइञ् ।

वासुकेय : । पुं॰ अहिराजे ॥

वासुकेयस्वसा । स्त्री॰ विषहर्याम् । मनसादेव्याम् ॥ आस्तीकस्यमुनेर्माताभगिनीवासुकेस्तथा । जरत्कारुमुने : पत्नी मनसादेविनमोस्तुते ॥

वासुदेव : । पुं॰ चित्ताधिष्ठातरि । विष्णौ । नारायणे । वृष्णीनांमध्ये॰ वसुदेवपुत्रत्त्वेनप्रसिद्धे॰ऽर्जुनोपदेष्टरिभगवद्विभूतौ ॥ तस्येश्वरस्यापिविभूत्यन्त : पाठस्तेनरूपेणचिन्तनार्थ : । एवंरामादावप्यवगन्तव्यम् ॥ वसुदेवस्यापत्यम् । ऋष्यन्धकेत्यण् ॥ यद्वा । वसतीतिवासु : । वस॰ वाहुलकादुण् । वासुश्चासौदेवश्च ॥ विष्णुपुराणेनामव्युत्पत्तिर्यथा । सर्वत्रासौसमस्तञ्चवसत्यत्रेतिवैयत: । ततोसौवासुदेवेतिविद्वद्भि : परिगीयते ॥ इतिविष्णुपुराणम् ॥ यद्वा । वस्तेआच्छादयति॰ स्वमायया आवृणोतिजगदितिवासु : । वसेरौणादिकउ : । अन्येषामपिदृश्यतइतिवसुशब्दाकारस्यदीर्घ : । बाहुलकादुण्प्रत्ययोवा । दीव्यतिप्रकाशतइतिदेव : वासुश्चासौदेवश्च ॥ छादयामिजगत्सर्वंभूत्वासूर्यइवांशुभिरितिमोक्षधर्मेभारतम् ॥ लक्षणंत्वयथा । दक्षिणेतुकरेचक्रमधस्तात्पद्ममेवच । वामेशङ्खंगदाधस्ताद्वासुदेवस्यलक्षणमित्यग्निपुराणम् ॥

वासुदेवप्रियङ्करी । स्त्री॰ शतावर्याम् ॥ श्रीकृष्णप्रियकारिण्याम् ॥

वासुदेववरीयसी । स्त्री॰ शतावर्याम् ।

वासुपूज्य : । पुं॰ जिनविशेषे ॥

वासुभद्र : । पुं॰ श्रीकृष्णे ॥

वासुरा । स्त्री॰ वासितायाम् ॥ रात्रौ ॥ भुवि । वासतेयभूमौ ॥

वासू : । स्त्री॰ नाट्योक्त्याबालायाम् ॥ वास्यते॰ स्वगृहे । वसेर्ण्यन्ताद्वाहुलकादूः ॥

वासौक : । न॰ शयनास्पदे । वासमन्दिरे ॥

वास्तवम् । न॰ परमार्थभूते । परमात्मनि ॥ वस्त्वेव । स्वार्थेऽण् ॥ जीवे ॥ वस्तुनोंशत्त्वात् ॥ मायायाम् ॥ वस्तुन: शक्तित्त्वात् ॥ जगति वस्तुन : कार्य्यत्त्वात् ॥

वास्तविक : । त्रि॰ परमार्थभूतेवस्तुनि ॥

वास्तव्य : । त्रि॰ वस्तरि । वासकर्त्त

रि । वसति । वस० । वसेस्तव्यत् कर्त्तरिणिच्चेतितव्यत् । वासयोग्ये ॥ पुं० वसतौ ॥

वास्तु । न० वास्तुकशाके । वास्तूके ॥ पुं० न० पुर्य्याम् । सीम्नि ॥ सुरङ्गायाम् । गृहार्हभूमौ । वेश्मभूमौ । वसन्त्यत्र । वसनिवासे । वसेस्तुन् । अगारेणिच्च । पुं० दैत्यविशेषे ॥ जलाशयगृहारामसेतुसङ्क्रमशाखिनाम् । देवतानांप्रतिष्ठायांवास्तुदैत्यंप्रपूजयेत् ॥ अनर्चयित्वा योवास्तुंकुर्यात्कर्माणिमानवः । विघ्नंतस्यचरेद्वास्तुः परिवारगणैः सहेतिनिर्वाणतन्त्रम् ॥ अपिच । मारीभयेरोगभयेडाकिन्यादिभयेतथा । औत्पातिकेपत्यदोषेव्यालिरक्षाभयेऽपिचेति ॥ ध्यात्वाचपूजयेद्वास्तुं सर्वशान्तिस्ततो भवेदित्यूहः ॥

वास्तुकम् । न० वास्तूकशाके । वथुवा० इ० भा० प्र० ॥ यथास्यगुणाः । लघुदीर्घपत्रभेदाद्वास्तुकद्वितयंमतम् । वास्तुकद्वितयंस्वादुक्षारंपाकेकटूदितम् ॥ दीपनंपाचनंरुच्यंलघुशुक्रबलप्रदम् । सरंप्लीहास्रपित्तार्शः क्रिमिदोषत्रयापहम् ॥ वास्तौभवम् । अध्यात्मादित्वाट्ठञ् । इसुसुक्तान्तात्कः ॥

वास्तुकी । स्त्री० चिल्लीशाके । क्षुद्रवास्तुके ॥

वास्तुपुरुषः । पुं० वास्तुरक्षसि । पूर्वमासीन्महद्भूतंसर्वलोकभयङ्करम् । तद्देवैर्निहतंभूमौसवास्तुपुरुषः स्मृतः ॥

वास्तुविद्या । स्त्री० वास्तुविधानशास्त्रे ॥ पश्यवाराहीमन्यच्च ॥

वास्तूकम् । न० वास्तुके । वथुवा० इ० प्र० शाके ॥ वसतिदेहेचिरम्० गुणावाऽस्मिन्वसन्ति । वस० । उलूकादयश्चेतिसाधु ॥

वास्तेयम् । त्रि० वस्तिसदृशे ॥ वस्तिरिव । वस्तेर्ढञ् । ङीपि० वास्तेयी ॥

वास्तोष्पतिः । पुं० सुरपतौ । बलारातौ । इन्द्रे ॥ वास्तोर्गृहक्षेत्रस्य० पतिरधिष्ठाता । वास्तोष्पतिगृहमेधाच्छचेतिनिपातनादलुक्० षत्वं च्छेत्यके । इणः परत्वात्० कस्कादिषुचेतिषत्वम् ॥ देवे ॥

वास्तोष्पतीयम् । न० वास्तोष्पतदेवत्ये० हविषि ॥ वास्तोष्पतिर्देवतास्य । द्यावापृथिवीत्यादिनाछः ॥

वास्तोष्पत्यम् । न० वास्तोष्पतीये । वास्तोष्पतिर्देवताऽस्य । द्यावापृथिवीत्यादिनायत् ॥

वास्त्रः । त्रि० वस्त्रावृतरथे ॥ वस्त्रेणपरिवृतोरथः परिवृतोरथइत्यण् ।

वास्थः । त्रि० जलस्थे ॥

वाश्वः । त्रि० आच्छाद्ये ॥ वसआच्छादने । कर्म्मणिण्यत् ॥

वाहः । पुं० भुजे ॥ धान्यमानप्रभेदे यथाहुः । पलंप्रकुञ्चकंमुष्टिः कुडवस्तच्चतुष्टयम् । चत्वारः कुडवाः प्रस्थश्चतुःप्रस्थमथाढकम् ॥ अष्टाढकोभवेद्द्रोणोद्विद्रोणः सूर्प उच्यते । सार्द्धसूर्पोभवेत्खारीद्विखार्य्योगोणउदाहृता ॥ तामेवभारंजानीयाद्वाहोभारचतुष्टयमिति ॥ अश्वे ॥ वृषे ॥ वायौ ॥ वहति वहप्रापणे । हलश्चेतिघञ् ॥ उह्यतेऽनेनवा । वहेः कर्म्मणि० करणेवा० घञ् वाह्यतेवा । ण्यन्तः । अच् ॥ वाहतेवा । वोढ्प्रयत्ने । अच् ॥ रथादौ ॥ त्रि० वहनकर्त्तरि ॥

वाहकः । त्रि० वहनकर्त्तरि ॥ वहति । वह० ण्वुल् ॥

वाहद्विषन् । पुं० महिषे ॥ वाहानां द्विषन्० वाहेषुद्विषन्वा । सप्तमीतियोगविभागात्समासः ॥

वाहनम् । न० हस्त्यश्वरथादौ । याने । युग्य । पत्रे । धोरणे ॥ देव्यावाहनानियथा । विष्णुब्रह्मशिवैर्देवैर्ध्रियतेसाजगन्मयी । सितप्रेतोमहादेवोब्रह्मालोहितपङ्कजः ॥ हरिर्हरिस्तुविज्ञेयोवाहनानिमहौजसः । स्वमूर्त्त्यावाहनत्वन्तुतेषांयस्मान्नयुज्यते ॥ तस्मान्मूर्त्त्यन्तरंकृत्वा वाहनत्वंगतास्त्रयः । यस्मिन्यस्मिन्महामायाप्रीणातिसततंशिवा ॥ तेनतेनैवरूपेणआसनान्यभवंस्त्रयः । इतिकालिकापुराणम् ॥ वहत्यनेन । वह० । करणेल्युट् । वाहनमाहितादितिनिपातनाद्दीर्घः ॥ यद्वा । वाहयति । वहेः स्वार्थण्यन्तात्कर्त्तरिल्युट् ॥ वाहानांप्रेरणे ॥ यथा । वाहनंप्रतिवाहानांषड्विधंप्रेरणंविदुः । रागावल्गाकषापार्ष्णिप्रतोदरवभेदतः ॥ चतुर्थभवने ॥

वाहनश्रेष्ठः । पुं० अश्वे । हये ॥

वाहना । स्त्री० निर्वाहयितृत्वे ॥ ण्यासश्रन्थोयुच् ॥

वाह्वेगः । पुं० पशुभेदे ॥

वाहाः । पुं० अनडुहि ॥ वहति । वह० । वहिहाधाञ्भ्यश्छन्दसीत्यसुन्० णित् । ओणावृष्णूद्वाहसा ॥

वाहसः । पुं० अजगरे । शयौ । शयालौ ॥ जलनिर्याणे ॥ सुनिषण्णके ॥ वहति । वह० । वहियुभ्यांणिदित्यसच् । णित्वाद्वृद्धिः ॥ वाहंगतिंस्यतीतिवा । षोन्तकर्म्मणि । आतोनुपसर्गेकः ॥

वाहा । स्त्री० बाहौ । भुजे ॥ अजादित्वाट्टाप् ॥

वाहिकः । पुं॰ ढक्कायाम् ॥ गोवाह्ये । शकटादौ ॥

वाहितः । त्रि॰ लङ्घिते ॥

वाहित्थम् । न॰ हस्तिकुम्भाधोभागे ॥ कुम्भोऽत्रवातकुम्भः । वाहित्थंवातकुम्भाधइतिभागुरिः । सचलललाटाधोभागः । अवश्यंवहति । वह॰ । आवश्यकेणिनिः । सतिष्ठत्यत्र । घञर्थेकः । पृषोदरादित्वात्सस्थतः ॥

वाहिनी । स्त्री॰ तरङ्गिण्याम् । शैवलिन्याम् ॥ सेनायाम् ॥ सेनाविशेषे । त्रिगुणगेषु ॥ यथा । इभाः ८१ । रथाः ८१ । अश्वाः २४३ । पदातयः ४०५ । एतत्परिमाणपरिमितायांसेनायामित्यर्थः । समस्तसङ्ख्यया ८१० ॥ वहति । वह॰ । ग्रह्यादित्वाणिनिः ॥ वाहाःसन्त्यस्यांवा । इनिः ॥

वाहिनीपतिः । पुं॰ सेनापतौ । सेनान्याम् ॥ समुद्रे ॥ वाहिन्याः सेनायाः॰ वाहिनीनांनदीनांवा पतिः ॥

वाहीकः । पुं॰ देशविशेषे ॥ जर्त्तिकजातौ जाट॰ जट्ट॰ इ॰ भा॰ प्र॰ जातौ ॥ यथोक्तंकर्णपर्वणि ४०॰ अध्याये । तत्रइवः पुरातनाः कथाः कश्चिद्॰ द्विजोत्तमः । वाहीकदेशंमद्रांश्चकुत्सयन्वाक्यमब्रवीत् ॥ पञ्चानांसिन्धुषष्ठानामन्तरंयेसमाश्रिताः । तान्धर्मबाह्यानशुचीन्वाहीकान्परिवर्जयेत् ॥ शाकलंनामनगरमापगानामनिम्नगा । जर्त्तिकानामवाहीकास्तेषांवृत्तंसुनिन्दितमिति ॥ शतद्रुविपाशैरावतीवितस्ताचन्द्रभागेतिपञ्चनद्यः सिन्धुः षष्ठः तन्मध्यदेशीवाहीकइतिव्याख्यातारः ॥ म्लेच्छप्रभेदे ॥ गवि ॥ वाहके ॥ वहति । वह॰ । अलीकादित्वात्कीकन्॰ वहतेर्वृद्धिश्च ॥ त्रि॰ वाह्ये ॥ प्राग्दीव्यतीयेष्वर्थेषु॰ ईकक्चेतिवार्तिकेन॰ ईकक् ॰ वहिष्टिलोपश्च ॥ वाहीकाः पुं॰ भूम्नि॰ देशविशेषे । टक्कनामसु ॥ वाहीकाष्टक्कनामानोवाह्लीकावह्लिकाह्वयाइतिहेमचन्द्रः ॥

वाहुशारः । पुं॰ श्लेष्मातके । बहुवारे ॥

वाह्यम् । न॰ याने । युग्ये । पत्रे । वाहने । वह्ये ॥ त्रि॰ वहनीये । बलीवर्दादौ ॥ वहिरर्थे ॥ वहिर्भवे ॥ वाहयितुंयोग्यः । वहेर्ण्यत् ॥ वहिर्भवोवा । वहिष्टिलोपोयञ्चेतियञ् ॥

वाह्यप्रपञ्चः । पुं॰ आन्तरप्रपञ्चातिरिक्ते ॥ सयथा । पृथिव्यादिपञ्चभूततज्जन्यब्रह्माण्ड तदन्तर्भूतोप

र्ध्वंपरिविद्यमानभूर्भुवः स्वर्महर्जनस्तपः सत्यनामकाधोधोविद्यमानातलवितलसुतलतलातलमहातलरसातलपातालनामकचतुर्द्दशभुवनतन्निष्ठजरायुजाण्डजस्वेदजोद्भिज्जचतुर्विधभूतग्रामसमुदायोयथायोग्यंविविधनाम रूपगुणधर्म्माश्रयो॰ बाह्यप्रपञ्चः ॥ *

बाह्यमानः । त्रि॰ पृष्ठेनोह्यमाने ॥

बाह्यवृत्तिः । पुं॰ श्रोत्रवागादौ ॥

बाह्यास्तित्ववादः । पुं॰ बौद्धैकदेशिनांवादे ॥ सयथा । समुदायोऽणुसम्भूतोबाह्योभूम्यापगादिकः । आन्तरः स्कन्धजश्चित्तचैत्यरूपश्चतौजगत् ॥ मृदम्बुवह्निवायूनां खरस्निग्धोष्णचलाः । चतुर्ष्वाचाणवः पञ्चस्कन्धारूपादिभेदतः ॥ रूपशब्दादयस्तेषांव्यक्तिर्विज्ञानमुच्यते । वेदनासुखदुःखेस्तः संज्ञाडित्थादिनामयत् ॥ संस्कारोवासनाचैवमुक्तसङ्घयात्मकम् । जगत्प्रत्यक्षतः सिद्धंकिमन्यपरिकल्पनैरिति ॥ नायंवादोयुक्तिसहः । यतः । यथा । स्थिरचेतनराहित्यात्स्वपक्षाचेतनत्वतः । नस्कन्धानामणूनांवासमुदायोपयुज्यते ॥

बाह्येन्द्रियम् । न॰ श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणेषु ॥ वाक्पाणिपादपायूपस्थेषु ॥

बाह्येन्द्रियविषयम् । न॰ श्रोत्रादिविषयेषु ॥ यथाहुः । बुद्धीन्द्रियाणितेषांपञ्चविशेषाविशेषविषयाणि । वाग्भवतिशब्दविषयाशेषाणितुपञ्चविषयाणि ॥ अस्यार्थः । तेषांदशानामिंद्रियाणांमध्ये॰ पञ्च॰ विशेषाविशेषविषयाणि॰ विशेषाः॰ स्थूलाः शब्दादयः शान्ताघोरामूढाः पृथिव्यादिरूपाः॰ अविशेषाः तन्मात्राणि॰ सूक्ष्माः शब्दादयः । तन्मात्रग्रहणेन॰ स्थूलभूतभावमपाकरोति॰ विशेषाश्चाविशेषाश्चविशेषाविशेषाः॰ तएवविषयायेषांबुद्धीन्द्रियाणांतानि॰ तथोक्तानि । तत्रोर्द्ध्वस्रोतसांयोगिनां श्रोत्रम्॰ शब्दतन्मात्रविषयंस्थूलशब्दविषयञ्च॰ अस्मदादीनान्तुस्थूलविषयमेव । एवंतेषांत्वक्॰ स्थूलसूक्ष्मस्पर्शविषया॰ अस्मदादीनान्तुस्थूलस्पर्शविषयैव । एवंचक्षुरादयोपि॰ तेषामस्मदादीनाञ्चरूपादिषुस्थूलेषुद्रष्टव्याः एवंकर्म्मेन्द्रियेषुमध्ये॰ वाग्भवतिशब्दविषया॰ स्थूलशब्दविषया॰ तद्धेतुत्वात्॰ नतुशब्दतन्मात्रस्यहेतुः॰ तस्याहङ्कारकार्यत्वेन॰ वागिन्द्रियेणसहैककारणत्वात् । शेषाणितुचत्वारि॰ पाणिपादपायूपस्थानि॰ पञ्चविषयाणि॰ । पाण्य

ध्याद्दार्णापटादीनांपञ्चशब्दाध्यात्मकत्वात् ॥

वह्लि : । पुं॰ अश्वयोनौदेशविशेषे ॥

बाह्लिक : । पुं॰ बाह्लीकदेशे ॥ बाह्लीकदेशोत्पन्नेऽश्वे ॥ न॰ धीरे । कुङ्कुमे ॥ हिङ्गुनि ॥ वह्लिकदेशेभव : । कोपधाद्दिण्यण् ॥

बाह्लिज : । पुं॰ बाह्लिदेशोत्पन्नेतुरगे ॥

बाह्लीक : । पुं॰ बलख॰ इ॰ भा॰ प्र॰ देशविशेषे ॥ यथोक्तंशक्तिसङ्गमे । कम्बोजदेशमारभ्यमहाम्लेच्छात्पूर्वके । बाह्लीकदेशोदेवेशिअश्वोत्पत्तिपरायण : ॥ तद्देशोत्पन्नाश्वे ॥ न॰ हिङ्गुनि ॥ धीरे । कुङ्कुमे ॥ उच्यते॰ वहतिवा । वहप्रापणे । अलीकादयश्चेतिसाधु : ॥ यद्वा । वह्लते । वह्लप्राधान्ये । बाहुलकादीकन् ॥ त्रि॰ वह्लीकदेशोद्भवे ॥ वह्लीकदेशेभव : । कच्छादिभ्यश्चेत्यण् ॥ पुं॰ गन्धर्वविशेषे ॥

। अ॰ निग्रहे ॥ नियोगे ॥ पदपूरणे ॥ निश्चये । सहने ॥ हेतौ ॥ अव्याप्तौ ॥ विनियोगे ॥ ईषदर्थे ॥ परिभवे ॥ शुद्धावलम्बने ॥ विज्ञाने ॥ श्रेष्ठे ॥ अतीते ॥ विगते ॥ विशेषे ॥ गतौ ॥ आलम्भे ॥ पालने ॥ नानार्थे ॥ गते ॥ विरुद्धे ॥

वि : । पुं॰ स्त्री॰ पक्षिणि । वागतिगन्धनयो : । वातेर्डिच्चेतीण् ॥

विंश : । त्रि॰ विंशते : पूरणे विंशतितमे ॥ तस्यपूरणेडट् ॥

विंशक : । त्रि॰ विंशतौ ॥ विंशत्याक्रीते ॥ विंशतित्रिंशद्भ्यांड्वुन्नसंज्ञायाम् । तिविंशतेर्डितीतिलोप : ॥

विंशति : । स्त्री॰ सङ्ख्याविशेषे । एकाऽधिकोनविंशतौ ॥ सङ्ख्यार्थे॰एकद्विबहुवचनान्त : । सङ्ख्येये॰एकवचनान्त : । यथा । विंशत्याद्या : सदैकत्वेसर्वा : सङ्ख्येयसङ्ख्ययो : । सङ्ख्यार्थेद्विबहुत्वेस्तस्तासुचानवते : स्त्रिय : ॥ द्वौदशतौपरिमाणमस्य । पङ्क्तिविंशतीतिनिपातनात्॰प्रकृतेर्विन्भाव : शतिप्रत्ययश्च ॥

विंशतिक : । त्रि॰ विंशत्याक्रीतद्रव्याद्यर्थे ॥ विंशतित्रिंशद्भ्यांड्वुन्नसंज्ञायामित्यत्रयोगविभागात्कन् ॥

विंशतितम : । त्रि॰ विंशे ॥ विंशते : पूरण : ॥ तस्यपूरणेडट् । विंशत्यादिभ्यस्तमडन्यतरस्याम्॰इतिडटस्तमडागम : ॥

विंशी । पुं॰ विंशतौ ॥

विक्कम् । न॰ सद्य : प्रसूताया : गो : क्षीरे ॥ यथा । क्षीरंसद्य : प्रसूताया : पेयूष : पालनंविक्कमितिशब्द

चन्द्रिका ॥

विकङ्कटः । पुं॰ गोक्षुरे ॥ इतिशब्दमाला ॥

विकङ्कतः । पुं॰ स्वादुकण्टके । स्रुवावृक्षे । ग्रन्थिले । व्याघ्रपादि । मृदुफले । वंइं च॰ इ॰ गौ॰ दे॰ भा॰ प्र॰ विकङ्कते । कङ्किगतौ । अतच् प्रत्ययः ॥ विकङ्कतफलंपक्कंमधुरंसर्वदोषजित् ॥

विकङ्कता । स्त्री॰ अतिबलायाम् ॥

विकचः । पुं॰ क्षपणे ॥ केतुग्रहे ॥ त्रि॰ अकेशे । केशशून्ये ॥ विकसिते । स्फुटिते ॥ कचति । कचबन्धने । पचाद्यच् ॥ विगतः कचोऽस्माद्वा ॥

विकचा । स्त्री॰ महाश्रावणिकायाम् ॥

विकच्छः । त्रि॰ कच्छरहिते । मुक्तकच्छे ॥

विकटः । पुं॰ विस्फोटके ॥ साकुरुण्डवृक्षे ॥ त्रि॰ उरौ । विशाले । पृथुले ॥ पृथौ ॥ विकराले ॥ रम्ये । सुन्दरे । दन्तुरे ॥ कटाभावे । विकटति । कटे वर्षावरणयोः । पचाद्यच् ॥ यद्वा । सम्प्रोदश्चेतिचकाराद्वेरपिकटच् ॥

विकटा । स्त्री॰ बौद्धदेव्यन्तरे । मायादेव्याम् । मारीच्याम् । त्रिमुखायाम् । वज्रकालिकायाम् । वज्रवाराह्याम् । गौर्याम् । पोत्रिरथायाम् ॥

विकटाननः । पुं॰ राक्षसान्तरे ॥ त्रि॰ भीषणास्ये ॥

विकण्टकः । पुं॰ विकङ्कते ॥ दुरालभायाम् ॥ विरुद्धः कण्टकोऽस्य ॥

विकत्थनम् । न॰ मिथ्याश्लाघायाम् ॥ यथा । श्लाघाप्रशंसार्थवादः सातुमिथ्याविकत्थनम् । इ॰ हेमचन्द्रः ॥ विकत्थ्यते । कत्थ श्लाघायाम् । भावेल्युट् । त्रि॰ तच्छीले । ताच्छीलिकेषु॰वासरूपविधिर्नास्तीत्यस्यप्रायिकत्वात्॰वीकषलसेतिघिनुण्विषये॰चलनशब्देतियुच् ॥ स्वगुणश्लाघनादौ ॥

विकत्थी । त्रि॰ विकत्थनशीले ॥ विकत्थते । तच्छीलः । कत्थ॰ । वीकषलसकत्थस्रम्भः । इतिघिनुण् ॥

विकथा । स्त्री॰ अध्ययनेऽनुपयुक्तायां कथायां ॥

विकनीनिकः । त्रि॰ काणे ॥ विगताकनीनिकातारायस्मात् ॥

विकम्पितः । त्रि॰ विशेषेणकम्पविशिष्टे ॥

विकरः । पुं॰ रोगे ॥ विकीर्यते । कृ॰ । ऋदोरप् । त्रि॰ करशून्ये ॥

विकरालः । त्रि॰ भयानके ॥

विकर्णः । पुं॰ शिद्रिशि । कोणे ।

द्वयोर्मध्ये ॥ यथा । शक्रादीनांपुरेतिष्ठन्स्पृशत्येषपुरत्रयम् । विकर्णौद्वौ॰विकर्णस्तस्त्रीन्कोणान्हेपुरेतथेतिविष्णुपुराणम् ॥ दुर्योधनानुजे ॥ त्रि॰कर्णरहिते ॥

विकर्णिक: । त्रि॰ कर्णिकारहिते ॥ पुं॰भूम्नि॰सारस्वतदेशे ॥ यथा । काश्मीरास्तुमाधुमता: सारस्वता विकर्णिका: । इतिहेमचन्द्र: ॥

विकर्णी । स्त्री॰ अयाङ्कुशेशरे॰उद्दारेऽन्तर्वारिणि ॥

विकर्त्तन: । पुं॰ अर्के । मार्त्तण्डे । सूर्य्ये ॥ विकर्त्तयतिभक्तांरागात् । कृतीछेदने । णिजन्ताल्ल्युट् ॥ यद्वा । विशेषेणकर्त्तनंयस्य । विश्वकर्मणोयन्त्रोल्लीढत्वात् ॥ अर्कवृक्षे ॥

विकर्म्मकृत् । त्रि॰ निषिद्धकर्मकारिणि ॥

विकर्म्म । न॰ शास्त्रप्रतिषिद्धे॰व्यापारे ॥

विकर्म्मस्थ: । त्रि॰ निषिद्धकृति । श्रौतस्मार्त्तैहिककर्मणांविरोधीनियानिकर्माणि॰अगम्यागमनादीनितत्कारिणि ॥

विकर्ष: पुं॰। कर्षणे ॥ विकर्षणम् । कृष॰ । घञ् ॥ बाणे ॥

विकर्षणम् । न॰ आकर्षणे ॥

विकल: । त्रि॰ ऊने ॥ विह्वले ॥ स्वभावहीने ॥ विगताकलायस्य ॥ निष्कले ॥

विकलपाणिक: । पुं॰ कुणौ । कुकरे । विकृतकरे ॥ विकल: पाणिर्यस्य ॥

विकला । स्त्री॰ ऋतुहीनायाम् ॥ राश्यादिकलाया: षष्टितमांशे ॥

विकलाङ्ग: । त्रि॰ स्वभावतोन्यूनाधिकाङ्गे । अपोगण्डे ॥ विकलमङ्गमस्य ॥

विकली । स्त्री॰ ऋतुहीनायाम् । गौरादित्वान्ङीष् ॥

विकल्प: । पुं॰ भ्रमे । भ्रान्तौ ॥ कल्पने ॥ सङ्कल्पविपर्य्यये ॥ वितर्के ॥ संशये ॥ तुल्यबलरूपविरोधे विकल्पोभवति । शब्दज्ञानानुपातीवस्तुशून्योविकल्प: ॥ विकल्पनम् । कृपू सामर्थ्ये । भावेघञ् । विविधकल्पे । विशिष्टकल्पे ॥

विकल्पक: । त्रि॰ निर्मातरि ॥

विकल्पित: । त्रि॰ विपरीतत्वेनकल्पिते ॥

विकषा । स्त्री॰ मांसरोहिण्याम् ॥ मञ्जिष्ठायाम् ॥ विकषति । कषहिंसायाम् । पचाद्यच् ॥

विकस: । पुं॰ सिन्धुनन्दने ॥ चन्द्रे ॥

विकसत् । त्रि॰ जृम्भमाणे ॥

विकसनम् । न॰ स्फुटने ॥

विकसा । स्त्री॰ मञ्जिष्ठायाम् ॥ विक सति । कसगतौ । अच् ॥

विकसितः । त्रि॰ उज्जृम्भिते । विनिद्रे । दलानामन्योन्यविश्लेषे । दलिते ॥ व्यकासीत् । कस॰ । गत्यर्थेतिक्तः ॥

विकस्वरः । त्रि॰ विकसनशीले । विकाशिनि ॥ विकसति । कस॰ । स्थेशभासपिसकसोवरच् ॥

विकस्वरा । स्त्री॰ रक्तपुनर्नवायाम् ॥

विकारः । पुं॰ प्रकृतेरन्यथाभावे । विकृतौ ॥ स्वरूपपरित्यागेनरूपान्तरापत्तौ । कार्ये ॥ पञ्चमहाभूतान्येकादशेन्द्रियाणीतिषोडशकेगणे ॥ जन्मादिनाशान्तेपरिणामे । सचयास्केनपठितोयथा । जायते॰अस्ति॰वर्द्धते॰विपरिणमते॰अपक्षीयते॰विनश्यतीतिषट्भावविकाराःइति ॥ शान्तज्योतिःकथमनुदितानस्तनित्यप्रकाशंविश्वोत्पत्तौव्रजतिविकृतिंनिष्कलंनिर्म्मलञ्च । शश्वन्नीलोत्पलदलरुचामम्बुवाहावलीनांप्रादुर्भावेभवतिनभसःकीदृशोवाविकारः ॥ विकरणम् । कृञ॰ । घञ् । रुजि । रोगे ॥

विकारहीनः । त्रि॰ निर्विकारे । जायतेऽस्तीत्यादिषड्भावविकारशून्ये ॥

विकारावर्त्त । न॰ निर्गुणे॰भगवद्रूपे ॥ विकारेषुनवर्त्ततइतितथा ॥

विकारी । पुं॰ षष्टिवत्सरान्तर्गतवत्सरविशेषे ॥ विषमस्थंजगत्सर्वंविरोधिभयसम्प्लवम् । विकारीसर्वतोऽपायोममवाक्यन्तुनान्यथा ॥ ३३ ॥ त्रि॰ उपचयादिमति । परिणामिनि ॥ विकारोऽस्यास्ति । इनिः ॥ षड्भावविकारयुक्तदेहवति ॥ तथाहि । ब्रह्मादितृणपर्य्यन्तादेहवन्तोविकारिणः । किंविष्णुःकिंशिवोब्रह्मामघवाकिंबृहस्पतिः । देहवान्प्रभवत्येवविकारैःसंयुतःसदेतिव्यासः ॥

विकार्य्यः । पुं॰ सोमादौ॰ कर्म्मभेदे ॥ विक्रियते । डुकृञ॰ । विभाषाकृवृषोरितिक्यबभावे॰ऋहलोर्ण्यत् । वृद्धिः ॥ अहङ्कारे ॥ विविधंकार्य्यमस्य । सचत्रिविधः ॥ तामसोराजसःसात्त्विकइतिभेदात् । तत्रतामसाज्जडानिभूतसूक्ष्माणिजायन्ते॰ राजसाद्बहिर्मुखाणिदशेन्द्रियाणि॰ सात्त्विकान्मनइन्द्रियदेवताश्चजायन्ते ॥

विकालः । पुं॰ दिनान्ते । सायाह्ने ॥ दैवपैत्रादिकर्म्मणिविरुद्धःकालः ॥

विकालकः । पुं॰ विकाले ॥

विकालिका । स्त्री॰ ताम्र्याम् । मा

नरन्ध्रायाम् । तांबी० इ० गौदे० भा० प्र० बाचे ॥

विकाशः । पुं० विजने । रहसि ॥ प्रकाशे । व्यक्ते ॥ विकाशनमस्मिन वा । काशृदीप्तौ । भावेहलश्चेत्यधिकरणेवाघञ् ॥ यद्वा । विकशनमत्रवा कशशब्दे । पूर्ववद्घञ् ॥ विजृम्भणे ॥

विकाशनम् । न० विकाशे ॥

विकाशी । त्रि० विकस्वरे । विकासशीले ॥ विकाशोऽस्यास्ति । अतइनिः ॥

विकाषी । त्रि० विकाशिनि ॥ वीकषेतिघिनुण् ॥

विकासः । पुं० विकस्वरे ॥

विकासी । त्रि० विकस्वरे । विकसति । कसगतौ ॥ वीकषेतिघिनुण् । पृषोदरादिः ॥ विकासोऽस्यास्ति वा । अतइनिः ॥

विकिरः पुं० खगे । पक्षिणि । विकिरति । कॄविक्षेपे । इगुपधेति कः ॥ कूपे ॥ पूजासमयेविघ्नोत्सारणार्थंचपणीयलाजादौ । यथा । लाजाचन्दनसिद्धार्थभस्मदूर्वाकुशाक्षताः । विकिराइतिसन्दिष्टाः सर्वविघ्नौघनाशकाः ॥ अग्निदग्धादीनांपिण्डदाने ॥ न० जलविशेषे ॥ यथा । नद्यादिनिकटे भूमिर्याभवेद्वालुकामयी । उद्धा

व्यतीततोयत्तु तज्जलं विकिरं विदुः ॥ विकिरं शीतलं स्वच्छं निर्दोषं लघु चस्मृतम् । तुवरं स्वादुपित्तघ्नं मनाक्कफकरं स्मृतम् ॥

विकीरणः । पुं० रक्तार्कवृक्षे ॥ विकिरति । कॄविक्षेपे । कॄवृदॄतिक्युन् । इत्वंरपरत्वम् । बाहुलकाद्दीर्घः ॥ विक्षेपणे । वखेरणा० इ० भा० ॥ विहिंसने । विज्ञाने ॥

विकीर्णः । त्रि० विस्तीर्णे । लुलिते कीर्णे । विक्षिप्ते । बिखराइति ख्याते ॥ विललापविकीर्णमूर्द्धजेति० कुमारसम्भवः ॥ विकीर्यतेस्म । कॄ० । क्तः ॥

विकीर्णरोम । न० स्थौणेये । कुकुरौंधा० इ० भा० प्र० ओषधौ ॥ विकीर्णानिरोमाण्यस्मिन् ॥

विकीर्णसञ्ज्ञम् । न० स्थौणेये ॥ *

विकुण्ठितः । त्रि० कुण्ठीकृते ॥

विकुर्वाणः । त्रि० हर्षमाणे । हृष्टचित्ते ॥ विकुरुते । करोतेस्तानश् ० शानज्वा ॥ विक्रियमाणे ॥ विकृते ॥

विकुस्रः । पुं० चन्द्रे ॥ विकसति । वौकसेरितिरक् ० उच्चोपधायाः ॥

विकूणिका । स्त्री० नासिकायाम् ॥

विकूननम् । न० आस्यगतविकारे । विराबना० कटकठाबना० छौलना० इत्यादिभाषाप्रसिद्धे ॥

विकृतम् । न० विकारे ॥ तल्लक्षणं यथा । स्त्रीमतेर्ष्यादिभिर्यन्मनोच्यते स्वंविवक्षितम् । व्यज्यतेचेष्टयैवेदं विकृतंतद्विदुर्बुधाः ॥ पुं० वत्सरविशेषे ॥ तत्फलंयथा । सर्वाः प्रजाः प्रपीड्यन्ते व्याधिः शोकश्चजायते । शिरोवक्षोऽक्षिरोगाश्चपापाद्धिविकृतेजनाः ॥ २४ ॥ त्रि० बीभत्से ॥ रोगिते ॥ असंस्कृते । बीभत्साख्यरसान्विते ॥ विकरणंविकृतम् । जुगुप्साप्रभवत्वात् ॥ विक्रियतेस्मयथा । क्तः ॥

विकृतिः । स्त्री० विकारे ॥ क्तिन् ॥ डिम्बे ॥ यत्रनसमयाङ्गोपदेशः साविकृतिरितिमीमांसकाः । यथा सौर्यादिः । तत्प्रकृतिपदार्थानामतिदेशेनापिप्राप्तत्वात् ॥ मद्यादौ ॥ विकरणम् । कृञ् : क्तिन् ॥

विकृष्टः । त्रि० दीर्घे ॥ आकृष्टे ॥ विकृष्यतेस्म । कृषविलेखने । क्तः ॥

विकेशः । त्रि० केशरहिते ॥

विकेशी । स्त्री० केशशून्यायाम् ॥ पटवर्त्याम् ॥

विकोकः । पुं० वृकासुरपुत्रे ॥

विकोषः । त्रि० कोषरहिते । निष्कोषे ॥

विक्कः । पुं० करिशावके । कलभे ॥

विक्रमः । पुं० पादविन्यासे ॥ आक्रमे । क्रान्तिमात्रे ॥ शक्तिसम्पत्तौ ॥ यथा । प्रमत्तेष्वभियुक्तेषु दैवेनप्रहतेषुच । विक्रमास्तत्रसिद्ध्यन्तिपरीक्ष्यविधिनाकृताः ॥ इतियुद्धकाण्डे रावणंप्रतिविभीषणवाक्यम् ॥ शौर्यातिशये ॥ चरणे ॥ शिक्षाशास्त्रप्रयोगकौशले ॥ लग्नात्तृतीयभवने ॥ प्रभवादिषु चतुर्द्दशवर्षे ॥ यथा । जायन्ते सर्वशस्यामेदिनीनिरुपद्रवा । लवणंमधुगव्यञ्चमहार्घ्यंविक्रमेप्रिये ॥ विक्रमादित्यभूपतौ ॥ विक्रमणम् । चमेसवा । क्रमुपादविक्षेपे । घञ् ॥ त्रि० क्रमात् च्युते ॥

विक्रमादित्यः । पुं० स्वनाम्नाख्यातिप्रसिद्धेनृपतिश्रेष्ठे । साहसाङ्के । शकारौ ॥ विक्रमेणादित्यइव ॥ अथविक्रमार्कवर्णनम् सन्दधाति- ज्योतिर्विदाभरणसमाप्तौश्रीकालिदासः । वर्षेश्रुतिस्मृतिविचारविवेकरम्ये श्रीभारतेखधृतिसम्मित१८० देशपीठे । मत्तोऽधुनाकृतिरियंसतिमालवेन्द्रे श्रीविक्रमार्कनृपराजवरेसमासीत् ॥ प्रथमंनृपसभार्यां पण्डितवर्गंवर्णयति । शङ्कुःसुवाग्वररुचिर्मणिरंशुदत्तोजिष्णुस्त्रिलोचनहरोघटखर्पराख्यः । अन्येपिसन्तिकवयोऽमरसिंहपूर्वायस्यैवविक्रमनृपस्य सभासदोऽमी ॥

विक्रमादित्य :

यस्योवराहमिहिर : श्रुतसेननामा श्री बादरायणमणित्थकुमारसिंहा : । श्रीविक्रमार्कनृपसंसदि सन्ति चैते श्रीकालतन्त्रकवयस्त्वपरे मदाद्या : ॥ धन्वन्तरि : क्षपणकोऽमरसिंहशङ्कुवेतालभट्टघटखर्परकालिदासा : । ख्यातोवराहमिहिरो नृपते : सभायां रत्नानि वैवररुचिर्नवविक्रमस्य ॥ अथपरिजनान् वर्णयति । अष्टौयस्यशतानिमण्डलधराधीशा : सभायांसदास्यु : संसत्परिणाहकोटिसुभटा : सत्पण्डिता : षोडश । दैवज्ञादशषण्मिता० स्वभिषजो० भट्टा० स्तथा० ठक्कुरो० वेदज्ञारसचन्द्रमा १६ विजयते श्रीविक्रम : सोधिभू : ॥ अथास्य सैन्यंवर्णयति । यस्याष्टादशयोजनानि कटके० पादातिकोटित्रयम् ३००००००० वाहानामयुतायुतम् १०००००००० च० नवतेश्छिन्ना । कृति २४३०० हस्तिनाम् । नौकालक्षचतुष्टयं० विजयिनोयस्यप्रयाणे भवेत्० सोयंविक्रमभूपतिर्विजयते० नान्योधरित्रीतले । अथास्यशाकप्रवृत्तिंदर्शयति । येनास्मिन् वसुधातलेविधकणवान् सर्वादिश : सङ्करेह त्वापञ्चनवप्रमान् ५५५५५५५५५ कलियुगेशाकप्रवृत्ति : कृता । श्रीविक्रमभूसुमाप्रति दिक्..कृता

विक्रमादित्य :

मणिस्वर्णगोसमौभाग्यपवर्ज्जनेनविहितोधर्म : सुवर्णानन : ॥ अथास्य दिग्विजयमाह । उत्कलमद्रविडद्रुमैकपरशुर्लाटाटवीपावकोवङ्गाद्रुभुजङ्गराजगरुडोगौडाब्धिकुंभोद्भव: । गर्व्वाङ्कुरसौराजसिन्धुरहरिर्धाराधराकारायमाकाम्बोजाम्बुजचन्द्रमाविजयतेश्रीविक्रमार्कोनृप : ॥ अथास्यप्रभुत्त्वादिगुणान् वर्णयति । येनाप्युग्रमहीधरायविषयेदुर्गाण्यसह्यान्यहीनीत्वायानिनतीकृतास्तदधिपादत्तानितेषांपुन : । वृन्दाभोध्यमरद्रुमस्मरसुरध्नाभङ्गुणेनाप्तसाश्रीमद्विक्रमभूभृताखलजनाम्भोजेंदुनामण्डले ॥ अस्यपुरींवर्णयति । यद्राजधान्युज्जयिनीमहापुरी सदामहाकालमहेशयोगिनी । समाश्रितप्राणप्रवर्गदायिनी श्रीविक्रमार्कोऽवनिपोजयत्यपि ॥ योरुमदेशाधिपतिंशकेश्वरं जित्वागृहीत्वोज्जयिनींमहाहवे । आनीयसम्भ्राम्यमुमोचतत्त्वहोश्रीविक्रमार्क : समसह्यविक्रम : ॥ तस्मिन् सदाविक्रममेदिनीशेविराजमानेसमवन्तिकायाम् । सर्वप्रजामण्डलसौख्यसम्पद्वभूवसर्वत्रचवेदकर्म ॥ शङ्क्वादिपण्डितवरा : कवयस्त्वनेकेज्योतिर्विद : सममवंश्चवराहपूर्वा : । श्रीविक्रमार्कनृपसंसदिमा

त्यवुभिस्तैरप्यहं नृपसखा कालिका लिदास : ॥ इतिज्योतिर्विदाभरणम् ॥ पाकविशेषे ॥ यथा । घृतेगुग्गुलपलं विंशत्पचेत्सम्यग्भिषग्वर: । उत्तार्यं चक्षिपेदेषांखण्डञ्चपलविंशति : । तालमूलीतुरङ्गीचशुण्ठी चेतिपलार्द्धकम् । जातीफलं चक कोलं लवङ्गञ्चे तिकार्षिकम् ॥ मालतीञ्चकुलिञ्जञ्चकवावंकरभंस्तथम् । एतेषांकोलमात्राश्चआयसस्य पलद्वयम् ॥ पलैकं मोदकं कृत्वाए कैकं भक्षयेद्दिने । धातुक्षीणोग्निक्षीणश्चबलानलकरं परम् ॥ नेत्ररोगेषुसर्वेषुकासश्वासेचकामले । प्रमेहान् विंशतिंहन्याद्विक्रमादित्यमोदकइति ॥

विक्रमार्क : । पुं॰ विक्रमादित्ये ॥

विक्रमी । पुं॰ सिंहे ॥ त्रि॰ शक्तिमति ॥ विक्रम : शौर्यम्॰ तदस्यास्मिन्वाअस्ति । अतइनिठनाविनीनि : ॥

विक्रय : । पुं॰ विक्रयणक्रियायाम् । विपणे । मूल्यग्रहणपूर्वकद्रव्यत्यागे । वेचा॰ इ॰ भा॰ ॥ कन्याविक्रयेदोषो यथा । य : कन्या पालनं कृत्वाकरोतिविक्रयं यदि । वि... धनलोभेन कुम्भीपाकं स गच्छति । कन्यामूत्रपुरीषञ्चतत्रभक्ष... कृमिभिर्दंशित : का

कैर्यावदिन्द्राश्चतुर्दश । मृतस्वव्याधयोनौच सलभेज्जन्मनिश्चितम् । विक्रीणीतेमांसभारं वहत्येवदिवानिशमितिब्रह्मवैवर्त्तपुराणे ॥ विक्रयणम् । डुक्रीञ् द्रव्यविनिमये । एरच् ॥

विक्रयणम् । न॰ विक्रये ॥ यथा । यमाहिशक्राग्निहुताशपूर्वानिष्टा : क्रयेविक्रयणे प्रशस्ता : । पौष्णाग्निचित्राशतविन्दुवाता : क्रयेहिता विक्रयणे निषिद्धा : ॥

विक्रयिक : । त्रि॰ विक्रेतरि ॥ विक्रयेणजीवति । वस्नक्रयविक्रयाट्ठन् । क्रयविक्रयग्रहणं सङ्घातविगृहीतार्थम् ॥

विक्रयी । त्रि॰ विक्रयकर्त्तरि ॥

विक्रान्त : । पुं॰ शूरे ॥ विक्रान्तस्यलज्जाभूषणम् ॥ सिंहे ॥ न॰ वैक्रान्तमणौ ॥ नीचवज्रे । कुवज्रे ॥ विक्रामतिस्म । क्रमु॰ गत्यर्थे तिक्त : ॥

विक्रान्ति: । स्त्री॰ अश्वगतौ । पुलायिते ॥ विक्रमे ॥

विक्रयिक : । त्रि॰ विक्रेतरि ॥

विक्रिया । स्त्री॰ विकारे । विकृतौ ॥ विकरणम् । कृञ : शच ॥ विविधत्वेनक्रियतेइतिवा ॥ विशेषाकारे ॥

विक्रीत : । त्रि॰ कृतविक्रये । वेच

दिया० भा० ॥ विक्रीतेक्रयिणिविक्रि
मध्येविवादः ॥

विक्रुष्टः । त्रि० निष्ठुरे ॥

विक्रेता । त्रि० विक्रयकर्त्तरि ॥ विक्रयिकी ॥ विक्रीणाति । डुक्रीञ् ०तृच् ॥

विक्रेयः । त्रि० विक्रययोग्यद्रव्ये । पणितव्ये । विक्रयक्रियाकर्म्मणि ॥ विक्रीयते । डुक्रीञ्० । अचोयत् । गुणः ॥

विक्लवः । त्रि० विह्वले । भयादिनाभिभूते ॥ विक्लवते । क्लुङ्गतौ । पचाद्यच् ॥

विक्लवता । स्त्री० भीरुतायाम् ॥ भवतिहिविक्लवतागुणोऽङ्गनानाम् ॥

विक्लित्तिः । स्त्री० विक्लेदने ॥ क्तिन् ॥

विक्लिधिः । पुं० विचर्चिकादियुक्तदेहे ॥

विक्लिन्नः । त्रि० जरसाजीर्णे ॥ शीर्णे ॥ आर्द्रे ॥ विक्लिद्यतिस्म । क्लिदू० । कर्त्तरिक्तः ॥

विक्षतः । पुं० विशेषेणक्षते ॥

विक्षरः । त्रि० अविनाशिनि ॥ विगतः क्षरोविनाशोयस्य सः ॥

विक्षवणम् । न० विक्षावे । कासे ॥ टुक्षुशब्दे । ल्युट् ॥

विक्षारः । पुं० भोजनादौ ॥

विक्षालितः । त्रि० धौते ॥

विक्षावः । पुं० विक्षवणे ॥ शब्दे ॥ विक्षवणम् । टुक्षु० । वौक्षुश्रुवइतिघञ् ॥

विक्षिप्तम् न० चित्तस्यभूमिकाविशेषे ॥ यथा । सर्व्वदाविषयासक्तमपि० कदाचिद्ध्याननिष्ठंक्षिप्ताद्विशिष्टतया० विक्षिप्तम्० चित्तस्यतृतीयाभूमिः । तत्र० क्षिप्तमूढयोः समाधिशङ्कैवनास्ति० विक्षिप्तेतुचेतसि० कादाचित्कः समाधिर्विक्षेपप्राधान्याद्योगपक्षेनप्रवर्त्तते० किन्तु । तीव्रपवनविक्षिप्तप्रदीपवत् स्वयमेवनश्यति ॥ त्रि० विप्रस्ते ॥ विक्षेपयुक्ते ॥ विक्षिप्यतेस्म । क्षिपप्रेरणे । क्तः । त्यक्ते ॥

विक्षीरः । पुं० अर्क्कवृक्षे ॥

विक्षुभः । त्रि० कुट्टिते । कूटागशाकु० भा० ॥

विक्षेपः । पुं० प्रेरणे । त्यागे । विक्षेपणे ॥ ताडने ॥ अखण्डवस्त्वनवलम्बनेन० चित्तवृत्तेरन्यावलम्बने । विषयस्फुरणे ॥ ज्ञानेनावरणेनष्टेविक्षेपस्त्ववशिष्यते० इवाराहोक्तिः ॥ विक्षेपंलक्षयति गौतमः कार्य्यव्यासङ्गात्कथाविच्छेदोविक्षेपः । इति ॥ अस्यार्थः । कार्य्यव्यासङ्गात्० कार्य्यव्यासङ्गमुद्दिश्येत्यर्थः० ल्यब्लोपेपञ्चमी । कार्य्यव्यासङ्गस्यासम्भवात्कालान्त

रजतत्वेनारोपितः। तेनतादृशकथा
विक्षेपविक्षेपः। तेनराजपुरुषा
दिभिराकारणं गृहजनादिभिर्वा
बन्धकवार्त्तामाकारणे। स्वगृह
दाहादिकं पश्यतीगमनेषु। शिरो
रोगादिनाप्रतिबन्धो वा। नविक्षे
पः। ननुकार्य्यासङ्गेनावनं
कुतः। समाक्षोभादिनाचेत्। अन
नुभावणमेव। उत्तराप्रतिपत्त्याचे
त्। अप्रतिभैवेतिचेन्न। उत्तराव
सराभावात्। वस्तुतस्तूत्तरस्फू
र्त्तावपि। तद्रूपतासम्भावनयावि
क्षेपसम्भवात्। यथाचितिः सक
र्त्तृकाकार्य्यत्वादित्युक्तम्। अत्राङ्कुरे
व्यभिचारस्तावन्मयोद्भाव्यः। तत्र
चेदयंपक्षसमत्वंब्रूयात्। तदामे
किमुत्तरम्। अतोऽसमर्थार्थंबलि
खितंमयाचविचारितम्। किञ्चि
त्कार्य्यमुद्भाव्यगृहेगत्वादृश्यते। द्रु
त्यं वंचित्त पसम्भवादिति ॥ वि
क्षेपणम्। क्षिप। भावे। घञ्॥

विक्षेपशक्तिः। स्त्री। अज्ञानसाम
र्थ्यं। मायाशक्तिः॥ यथा। रज्ज्व
ज्ञानं। स्वावृतरज्जौ। स्वशक्त्या
सर्पादिकमुद्भावयति। एवम्। अ
ज्ञानमपि। स्वावृतात्मनि। तया
विक्षेपशक्त्या। आकाशादिप्रपञ्च
मुद्भावयतितादृशंसामर्थ्यम्। वि
... शक्तिर्लिङ्गादिब्रह्माण्डान्तंजग

त्सृजेदित्युक्तेः। विविधस्वरूपेण
भवनंविक्षेपशक्तिः॥

विक्षेपसहभूः। पुं। अन्तरायविशे
षः॥ तेचयोगसूत्रेदर्शिताः।
यथा। दुःखदौर्म्मनस्याङ्गमेजयत्वश्वा
सप्रश्वासाविक्षेपसहभुवः। इति॥
अस्यार्थः। कुतश्चिन्निमित्तादुत्प
न्नेषुविक्षेपेषु। एतेदुःखादयः
प्रवर्त्तन्ते। तत्रदुःखंचित्तस्यराग
जः परिणामोबाधनालक्षणः। य
द्बाधात्प्राणिनस्तदुपघातायप्रवर्त्त
न्ते। दौर्म्मनस्यंबाह्याभ्यन्तरैः
कारणैर्म्मनसोदौःस्थ्यम्। अङ्ग
मेजयत्वंसर्वाङ्गीणोवेपथुरासनमनः
स्थैर्य्यस्यबाधकः। प्राणोयद्बाह्यवा
युमाचामतिसश्वासः। यत्कौ
ष्ठ्यवायुंनिःश्वसितिसप्रश्वासः
। तएतेविक्षेपैः सहप्रवर्त्तमाना
यथोदिताभ्यासवैराग्याभ्यांनिरोद्ध
व्याः समाहितचित्तस्यैतेनभवन्ति
। विक्षिप्तचित्तस्यैवभवन्तीतिविक्षे
पसहभुवोऽन्तरायाएव। एतेअभ्या
सवैराग्याभ्यांनिरोद्धव्याः ईश्वर
प्रणिधानेनवा॥

विखः। त्रि। विगतनासिके।

विखनाः। पुं। सप्तर्षि। ब्रह्मर्षि॥

विखुः। त्रि। गतनासिके॥ विगता
नासिकाऽस्य। खुखौवक्तव्याविति
तिनासिकायाः खुः॥

विखुर : । पुं॰ राक्षसे । चौरे ।

विखिद् : । त्रि॰ गतमोहे ॥ विगत : खेदोऽस्य ॥

विख्य : । त्रि॰ विखौ ॥ विगतानासिकाऽस्य । ख्यश्चेतिनासिकाया ख्यादेशोऽच् प्रत्ययश्च ॥

विख्यात : त्रि॰ प्रसिद्धे । ख्यातस्यापन्ने ॥ विपूर्वात्ख्याते : क्त : ॥

विख्याति : । स्त्री॰ अतिप्रसिद्धौ ॥ विख्यानम् । ख्याप्रकथने । स्त्रियां क्तिन् ॥

विख्यापनम् । न॰ व्याख्याने ॥ प्रकाशने ॥

विखु : । त्रि॰ विख्ये । विगतानासिकाऽस्य । खुखौचवक्तव्यौ विनिनासिकाया : खु : ॥

विगणनम् । न॰ ऋणमुक्तौ । ऋणादिनिर्यातने ॥

विगत : । त्रि॰ निष्प्रभे । अरोके । प्रभारहिते ॥ वीते । गते ॥ विगच्छतिस्म । गम्ल् गतौ । गत्यर्थेति क्त : । च्युते ॥

विगतकल्मष : । त्रि॰ निर्गतमले । निर्मले । स्वच्छे ॥ संसारहेतुधर्माधर्मरहिते ॥

विगतक्लम : । त्रि॰ शरीरक्लेशरहिते ॥

विगतज्वर : त्रि॰ ऐहिकपारत्रिकदुर्यशोनरकपातादिनिमित्तशोकरहिते ॥ ज्वरहीने ॥

विगतशोक : । त्रि॰ नि : शोके । शोकरहिते ॥ विगताशोर्यस्य स : ॥

विगतस्पृह : । त्रि॰ देहजीवितभोगेष्वपिवाञ्छारहिते । सर्वदृश्येषुदोषदर्शनेन॰ नित्यबोधपरमानन्दरूपमे । आगुणदर्शनेनच॰ सर्वतोविरक्ते ॥ स्पृहारहिते ॥ विगतास्पृहायस्य ॥

विगतार्त्तवा । स्त्री॰ निष्फलायाम् । पञ्चपञ्चाशदब्देभ्योनिवृत्तरजसिस्त्रियाम् ॥ विगतमार्त्तवंरजोऽस्या : ॥

विगन्धक : । पुं॰ इङ्गुद्याम् ॥

विगन्धिका । स्त्री॰ हबुषायाम् ॥

विगम : । पुं॰ नाशे । यथा । एकदण्डिनोवेदान्तिनस्तु॰ यदुपाध्यनवच्छिन्नस्यब्रह्मणोविशुद्धरूपता॰ तादृशोपाधिविगमएवकैवल्यम् । त्रिदण्डिनस्तु॰ आनन्दमयपरमात्मनि॰ जीवात्मनोलयोमोक्ष : । जीवात्मपरमात्मनोरभेदेपि॰ उपाधिविशेषविशिष्टस्यात्मनोजीवरूपतया॰ तस्यौपाधिक : परमात्मभेद : । इतिभेदकोपाधिविगमएवजीवस्यपरमात्मनिलय : । यथाघटाकाशस्यघटविगमएवशुद्धआकाशेतस्यलय : । लिङ्गशरीरावच्छिन्नस्यैवात्मनोजीवभाव : इतिलिङ्गशरीरनाश

एवपथ्यंवसितोमोच : । इतिमु
तिवाद : ॥

विगर्हणम् । न० विगर्हणायाम् ॥

विगर्हणा । स्त्री० निन्दने । भर्त्सना
याम्

विगर्हित: । त्रि० जुगुप्सिते । निन्दि
ते ॥ निषिद्धे ॥

विगलित : । त्रि० स्खलिते ॥ यथा ।
विगलितवसनंपरिहृतवसनंघटय
जघनमपिधानम् । किसलयशयने
पङ्कजनयनेनिधिमिवहर्षनिधान
म् ॥

विगाढ : । त्रि० प्रविष्टे ॥ विगाहते
स्म । गाहूविलोडने । क्त : ॥ क
ठिने ॥ प्रगूढे ॥ स्नाते । अवगा
हिते ॥

विगाथा । स्त्री० मात्रावृत्तप्रभेदे ॥ य
था । गाथाद्वितीयतुर्यौ०पादौभव
तोयदाचविपरीतौ । सेयंभवतिवि
गाथा०फणिनायकपिङ्गलेनोक्ता॥
यथा । वृन्दारण्यविहारी०वल्लवनारी
मनोहारी । गोपालीकृतताली०न
र्त्तनशालीपुनातुवनमाली ॥

विगानम् । न० निन्दायाम् ॥ परदे
वते ॥ विरुद्धगानम् ॥

विगाहनम् । न० स्नाने ॥

विगाहमान : । त्रि० प्रविशमाने ॥
विगाहते । गाहू० । शानच् ।
मुक् ॥

विगीत : । त्रि० निन्दिते ॥

विगुण : । त्रि० गुणवैपरीत्यविशि
ष्टे ॥ यथा । यथामनोममोचष्टने
यंमातातयामम । विगुणेष्वपिपु
त्रेषुनमाताविगुणाभवेत् ॥ अ
ङ्गविकले ॥

विगूढ : । त्रि० गर्हिते ॥ गुप्ते ॥

विगृह्यवाद : । पुं० जयपराजयप्रधा
नेजल्पन्यायै ॥

विग्न : । त्रि० भीते ॥

विग्र : । त्रि० गतनासिके ॥ विग
तानासिकाऽस्य । वैयोवक्तव्य : ।
प्रादिभ्योधातुजस्येतिसमास : ॥

विग्रह : । पुं० काये । शरीरे ॥ वि
भागे ॥ विस्तारे ॥ समासवाक्ये ।
विस्तरे । व्यस्यार्थबोधकेवाक्ये ॥ पुं०
न० राज्ञांगुणभेदे । वैरे । रणे ।
युद्धे । कलहे । सङ्ग्रामे ॥ सम
ज्यायोभ्यांसन्दधीत० हीनेनविगृ
ह्णीयात् । यथा । बालोवृद्धोदी
र्घरोगी तथाज्ञातिबहिष्कृत : ।
भीरुकोभीरुकजनोलुब्धोलुब्धजन
स्तथा ॥ विरक्तप्रकृतिश्चैवविषयेष्वति
शक्तिमान् । अनेकचित्तमन्त्रश्चदेव
ब्राह्मणनिन्दक: ॥ दैवेनोपहतश्चैव
दैवचिन्तकएवच । दुर्भिक्षव्यसनो
पेतोबलव्यसनसंयुत : ॥ अदेश
स्थोबहुरिपुयुक्तकालविपर्यय : ।
सत्यधर्मव्यपेतश्चविंशति: पुरुषा

धमाः ॥ एतैः सन्धिं न कुर्वीत विगृह्णीयात्तु केवलम् इति कामन्दकीयः ॥ विरुद्धं विविधं वा ग्रहणम् । ग्रह० । ग्रहवृद्रिश्चपप् ॥ विविधैर्व्याधिभिर्गृह्यते वा । अप् ॥ विविधं सुखदुःखादिगृह्णाति वा । अच् ॥ त्रि० ग्रहशून्ये ॥

विपश्चावरम् । न० पृष्ठे ॥

विम्लापनम् । न० श्रमहृतौ ॥ विम्लापयति । म्लै० । ल्युट् ॥

विघटनम् । न० विरुद्धनिर्माणे ॥

विघटिका । स्त्री० पले ॥

विघटितः । त्रि० नाशिते ॥

विघटी । स्त्री० पले ॥

विघट्टनम् । न० सङ्घर्षे ॥

विघट्टितः । त्रि० अभिहते ॥ विशेषेणचालिते ॥ विपूर्वात् घट्टतेः क्तः ॥ इट् ॥

विघसः । पुं० भुक्तशेषे । अतिथिगुर्वादिभुक्तावशेषे ॥ विशिष्टैरद्यते । अद० उपसर्गेऽदः इत्यप् । घस्लादेशे तिघसल् ॥ आहारे ॥ न० सिक्थके ॥

विघसाशी । त्रि० अतिथिगुर्वादिभुक्तशेषभुजि ॥ विघसं भुक्तशेषमेवाश्नाति । अश० । णिनि ॥ "विघसाशी भवेन्नित्यं नित्यं वाऽमृतभोजनः । विघसो भुक्तशेषन्तु यज्ञशेषं तथामृतम्" ॥

विघातः । पुं० मारणे ॥ हननं घातः । विशिष्टो घातः ॥ व्याघाते । आघाते ॥

विघाती । त्रि० निवारके । घातके ॥

विघूर्णम् । त्रि० भ्रमति ॥ घूर्णघूर्णभ्रमणे । अनुदात्तेत्प्रयुक्तात्मनेपदस्य अभिडोऽिन्त्वे नानित्यत्वज्ञापनात् परस्मैपदम् । *

विघ्नः । पुं० अन्तराये । प्रत्यूहे । समाप्तिप्रतिबन्धकदुरिते ॥ विहन्यतेऽनेन । विघ्नन्ति मनांस्यस्मिन्वा । विहन्यतेऽनेन वा । हन० । घञर्थे कः ॥

विघ्नकारी । त्रि० घोरदर्शने ॥ विघातिनि । विघातस्य कारके ॥

विघ्नचतुष्टयम् । न० लयविक्षेपकषायरसास्वादलक्षणेषु चतुर्षु ॥ निर्विकल्पसमाधौ क्रियमाणे चैते चत्वारो विघ्नाः सम्भवन्ति ॥ विघ्नानाञ्चतुष्टयम् ॥

विघ्ननायकः । पुं० गणेशे ॥ विघ्नानां नायकः ॥

विघ्ननाशकः । पुं० विनायके । गणेशे ॥ विघ्नानां नाशकः ॥

विघ्ननाशनः । पुं० गणेशे ॥

विघ्नराजः । पुं० विनायके । गणाधिपे ॥ विघ्नानां राजा । राजाहःसखिभ्यष्टच् ॥

विघ्नविनायकः । पुं० श्रीगणेशे ॥

विघ्नहारी । पुं॰ गणाधिपे । लम्बोदरे ॥ अवश्यं हरति । हृञ्॰ । णिनिः । विघ्नस्य हारी ॥

विघ्नितः । त्रि॰ सञ्जातविघ्ने ॥ इतच् ॥

विघ्नेशः । पुं॰ हेरम्बे ॥ विघ्नानामीशः ॥

विघ्नेशवाहनः । पुं॰ महामूषके ॥ विघ्नेशस्य वाहनः ॥

विघ्नेशानकान्ता । स्त्री॰ श्वेतदूर्वायाम् ॥

विङ्कः । पुं॰ अश्वखुरे । पुटे ॥

विङ्का । स्त्री॰ अश्वगतिप्रभेदे ॥ शुशिमृव्याम् ॥ नर्त्तने ॥ इति मेदिनीकरः ॥

विचकिलः । पुं॰ मल्लीप्रभेदे । द्विपुटायाम् ॥ मदनवृक्षे ॥ इति मेदिनीकरः ॥

विचक्षणः । पुं॰ पण्डिते ॥ विचष्टे चक्षिङ्॰ । अनुदात्तेतश्चहलादेरिति युच् । क्शं रिल्युङितिन्यासकारः ॥ त्रि॰ विचारकुशले ॥ निपुणे । तत्तत्कालकर्त्तव्यतायां चतुरे ॥ निपुणतरवस्तुदर्शिनि ॥

विचक्षणा । स्त्री॰ नागदन्त्याम् ॥

विचक्षुः । त्रि॰ विमनसि ॥ चक्षुर्हीने ॥

विचयः । पुं॰ अन्वेषणे ॥ विचीयते । चिञ् चयने । कर्मण्येरच् ॥

विचयनम् । न॰ मार्गणे ॥ संवीक्षणे ॥ विविधम्॰ चयनम् ॥ चिञ्॰ । ल्युट् ॥

विचर्चिका । स्त्री॰ रोगविशेषे । पामनि । पामायाम् ॥ दाल्यते त्वक् खरारूक्षापाण्योर्ज्ञेया विचर्चिका । पादे विपादिका ज्ञेया स्थानभेदाद्विचर्चिका ॥ दाल्यते॰ ॥ विदार्यते ॥ विचर्च्यते । चर्च अध्ययने । रोगाख्यायां ण्वुल् बहुलम् । प्रत्ययोपसर्गाभ्यां रोगप्रतीतिः ॥

विचलः । त्रि॰ अस्थिरे ॥

विचलनम् । न॰ विभ्रमे ॥

विचलितः । त्रि॰ स्खलिते । पतिते ॥ स्थानान्तरप्राप्ते ॥

विचारः । पुं॰ कार्याकार्यरूपे विमर्शे ॥ तत्त्वनिर्णये । सन्दिग्धे वस्तुनि प्रमाणेन तत्त्वपरीक्षायाम् । वितर्के । प्रमाणैर्वस्तुतत्त्वपरीक्षायाम् । चर्चायाम् । सङ्ख्यायाम् ॥ सन्दिग्धं सप्रयोजनञ्च॰ विचारमर्हति ॥ विवेके ॥ कोऽहं कथमिदं जातं कोवै कर्त्तास्य विद्यते । उपादानं किमस्तीह विचारः सोऽयमीदृशः ॥

विचरणम् । न॰ विचरन्त्यनेनवा । चर॰ । घञ् ॥

विचारणा । स्त्री॰ विद्यायाम् ॥ यथा । परीक्षा चापरीक्षा च विद्या द्विधा विचारणा । तत्रापरीक्षविद्यायां

विचारोऽयंसमाप्यते ॥ त्रि॰ विचारोत्पन्ने । विचाराज्जाते ॥ जनी॰ । ड: ॥

विचारणम् । न॰ विचारे ॥ चरसंशयेचुरादि: युच् ॥

विचारणा । स्त्री॰ विचारे । चर्चायाम् ॥ मीमांसाशास्त्रे ॥ चरसंशये॰ चुरादि: । ण्यासश्रन्थोयुच् । टाप् ॥

विचारणीयम् । न॰ शास्त्रे ॥ त्रि॰ विचार्ये ॥

विचारित: । त्रि॰ कृतविचारे । विन्ने । वित्ते ॥ विचार्यतेस्म । चरणौ॰ण्यन्त: । क्त: ॥ विचार: सञ्जातोऽस्यवा । तारकादित्वादितच् ॥

विचार्य्य: । त्रि॰ विचारयोग्ये । विचारितव्ये । विचारणीये ॥

विचार्य्यमाण: । त्रि॰ चिन्त्यमाने ॥ ज्ञानंज्ञेयंतथाज्ञातात्रितयंभातिमायया । विचार्यमाणेत्रितयेआत्मैवैकोऽवशिष्यतइतिश्रीमच्छानिर्वाणतन्त्रम् ॥

विचाल: । पुं॰ न॰ अन्तरे । अभ्यन्तरे । अन्तराले ॥ रूपान्तरापत्तौ ॥ यथापयसोदध्यादिरूपताविचाल: ॥

विचि: । पुं॰ स्त्री॰ अल्पतरङ्गे ॥

विचिकित्सा । स्त्री॰ संशये । विरुद्धानेककोट्यवगाहिज्ञाने ॥ विचिकित्सनम् । कितसंशये । गुप्तिज्किद्भ्य: सन् । तत: अप्रत्ययादित्यकारप्रत्यय: । टाप् ॥

विचिकित्सित: । त्रि॰ संशयिते । सन्दिग्धे ॥ विचिकित्सासञ्जातास्य । तारकादित्वादितच् ॥

विचिकिल: । पुं॰ द्विपुटायांमल्लिकायाम् ॥ दमनके ॥ इ॰ हे॰ चन्द्र: ॥

विचित: । त्रि॰ अन्विष्टे ॥

विचित्त: । त्रि॰ उन्मत्ते ॥

विचित्रम् । न॰ कर्वुरवर्णे ॥ पुं॰ न॰ अलङ्कारविशेषे ॥ विचित्रंस्वविरुद्धस्यफलस्यस्यात्समुद्यमइतिलक्षणात् ॥ त्रि॰ विचित्रवर्णवति ॥ नानाविधे ॥

विचित्रक: । पुं॰ भूर्जद्रुमे ॥

विचित्रदेह: । पुं॰ मेघे ॥ त्रि॰ आश्चर्यशरीरे ॥ नानावर्णदेहे ॥

विचित्रवीर्य्य: । पुं॰ चन्द्रवंशीयनृपतिविशेषे ॥

विचित्रवीर्य्यसू: । स्त्री॰ सत्यवत्याम् ॥

विचित्रा । स्त्री॰ मृगेर्वारौ ॥ चित्राख्यनाड्याम् ॥

विचित्राङ्ग: । पुं॰ केकिनि । मयूरे । व्याघ्रे ॥ त्रि॰ आश्चर्यशरीरे ॥ विचित्राणि॰ अङ्गानियस्यस: ॥

विचिन्वन् । त्रि॰ मृगयमाणे । अन्विष्यति ॥

विची । स्त्री० वीच्याम् । तरङ्गे ॥ इ० द्विरूपकोष : ॥

विचेतन : । त्रि० चेष्टारहिते । विगताचेतनायस्य स : ॥ (०) ॥

विचेता : । त्रि० दुर्मनसि । अन्यमनसि । विमनसि । विगतचित्ते ॥ भगवन्नामजनितदुरितप्रतिबन्धविवेकविनाशे । विक्षिप्तचित्ते ॥ उद्विग्नचित्ते ॥

विचेय : । त्रि० मृग्ये ॥

विचेष्टकम् । न० अङ्गपरिवर्त्तने ॥

विचेष्टितम् । न० विरुद्धाचरणे ॥ व्यापारे ॥

विच्छन्द : । पुं० विच्छन्दके ॥ विशिष्टश्छन्दोऽत्र ॥

विच्छन्दक : । पुं० ईश्वरसद्मप्रभेदे ॥ विशिष्टश्छन्दोऽभिप्रायोऽत्र ॥ यद्वा । विशिष्टाम्•छन्दयति•साभिलाषान् करोति । छदि० । ण्वुल् •कृन् वा ॥ उपर्य्युपरि यद्गेहं तद्विच्छन्दकसंज्ञकमिति भरत : ॥

विच्छर्द्दक : । पुं० विच्छन्दके ॥ उच्छृदिर् दीप्तौ ॥ ण्वुल् ॥

विच्छाय : । पुं० मणौ ॥ न० पक्षिणां छायायाम् ॥ त्रि० हतप्रभे ॥ छायारहिते ॥ विगता छाया यस्य ॥

विच्छाया । स्त्री० पक्षिच्छायायाम् ॥ क्लीबतोचिता•छायाया•हृस्वइतिस्मरणात् ॥

विच्छित्ति: । स्त्री० अङ्गरागे ॥ विच्छेदे ॥ हावभेदे ॥ यथा । मण्डनानादरन्यासो विच्छित्तीरूपदर्पत : । आभरणविलेपनादीनांकृतस्थित्प्रियापराधादीर्ष्ययानादरेणाल्पकानां अङ्गेषु प्रबन्धनीधारणं विच्छित्ति : ॥ प्रियेणदत्तंप्रीतिनिबन्धनं स्वल्पमपि विभूषणं विच्छित्तिरित्यन्ये । आकल्पकल्पनाल्पापि विच्छित्ति : कान्तिपोषकृदित्युज्वलनीलमणि : ॥ विच्छेदनम् । छिदिर् द्वैधीकरणे । क्तिन् ॥ छेदे•विनाशे•विच्छित्तिरितित्रिकाण्डशेष : ॥ गेहावधौ ॥ इति हेमचन्द्र : ॥

विच्छिन्न : । त्रि० समालब्धे । छिन्ने । काटा•इ•भा• ॥ विभक्ते ॥ कुटिले ॥ विशेषेणच्छिन्न : ॥

विच्छिन्नावस्था । स्त्री० विच्छेदावस्थायाम् । अभिव्यक्तस्यजनितकार्य्यस्यापि•क्षीणचिद्बलवताभिभवे ॥

विच्छेद: । पुं० वियोगे । विरहे ॥ कान्तायाः कान्तविच्छेदोमरणादतिरिच्यते ॥ विच्छेदनम् । छिदिर्• । घञ् ॥

विच्छेदावस्था । स्त्री० विच्छिन्नावस्थायाम् ॥

विच्युत : । त्रि० विच्चरिते ॥ विगते ॥

विच्युति : । स्त्री० वियोगे ॥

विजन : । त्रि० निर्जने । विविक्ते ।

नि : शलाके । रहसि ॥ यथा ।
आहारनिर्हारविहारयोगा : सदैव
सद्भिर्विजने विधेया : ॥ अयमुद्यान
मद्य मध्यवि ॥ आह्वोबन्तयमध्यंपञ्च
शोवद्भिन्नविद्यते । येनेदंसततव्या
प्तंसद्देशोविजन : स्मृत : ॥ विगतो
जनोऽस्मात् ॥

विजननम् । न॰ प्रसवे ॥ पुं॰ सूति
मासे । विजायतेऽस्मिन् । अभो॰ ।
करणेतिल्युट् ॥

विजन्मा । पुं॰ मेषे । सुधन्वाचार्ये॰

विजपिलम् । न॰ पिच्छिले ॥

विजय : । पुं॰ जये । अपराजयनि
मित्तउत्कर्षे ॥ पार्थे । अर्जुनपा
ण्डवे ॥ विमाने । विष्णुनुचरविशे
षे ॥ दत्ताईत् पितरि ॥ जिनबल
देवे ॥ यमे ॥ कल्किपुत्रे । वत्स
रविशेषे ॥ तत्फलंयथा । अस्यतो
यात्तथामेघावर्षन्तिखण्डमण्डले ।
मध्यन्तिसर्वशस्यानिविजयेनात्र
संशय : ॥ २७ ॥ यात्रायोगान्तरे ॥
यथा । दिगीशोदिग्बलोपेतस्यात्
लग्नस्थसुहृदि । विजयोनामयो
गोयंयाताराजाजयीभवेत् । सम
रयात्रायोगे ॥ गुरौवीर्येकेन्द्रयुतेबु
धेवाभृगुनन्दने । विजयोनामयो
गोयंयातुर्विजयद : सदा ॥ विजय
नम् । अजये । एरण्डे ॥ एकादशे
मुहूर्ते ॥ चतुर्दिग्द्वारगृहे ॥ परमे

ष्वरे ॥ विजयतेस्माद्वैराग्येश्वर्या
दिगुणैर्विश्वम् । जिपराजयते :
पचाद्यच् ॥

विजयक : । पुं॰ विजयेकुशले ॥ या
कर्मादित्वात्कन् ॥

विजयकुञ्जर : । पुं॰ राजवाह्यमा
तङ्गे ॥

विजयच्छन्द : । पुं॰ पञ्चशतमौक्ति
कहारे ॥

विजयनन्दन : । पुं॰ कृष्णकुलंघज
राजविशेषे ॥ जये । अभिमन्यौ ॥
विजयस्यनन्दन : ॥

विजयमर्दल : । पुं॰ ढक्कायाम् ।
जयढक्का॰ श॰ मा॰ ॥

विजयसख : । पुं॰ श्रीकृष्णे ॥ विज
यस्यसखा । राजाह : सखिभ्य-
ष्टच् ॥

विजया । स्त्री॰ उमायाम् । सख्या
मन्याम् । दुर्गायाम् ॥ यथा । वि
जित्यपद्मनामानंदैत्यराजंमहाबल
म् । विजयातिगमादेवीलोकेषुवाप
राजितेतिदेवीपुराणम् ॥ उमास
ख्याम् ॥ तिथिविशेषे ॥ यथा ।
इषमासिसितादशमीविजयाशुभ-
कर्मसुसिद्धिकरीकथिता । श्रवणर्क्ष
युताप्नुतरांशुभदानृपतेस्तुगमेजयस
न्धिकरी ॥ अस्यांनीलकण्ठदर्शन
विधिर्यथा । कृत्वानीराजनंराजा
बलवृद्ध्यैयथाबलम् । शोभनंखञ्ज

नंपश्येज्जलगोगोष्ठसन्निधौ ॥ द
र्शनानन्तरंतन्नमस्कारमन्त्रोयम् ।
नीलग्रीवशुभग्रीवसर्वकामफलप्रद
। पृथिव्यामवतीर्णोसिखञ्जरीटन
मोस्तुते ॥ त्वंयोगयुक्तोमुनिपुत्रक
स्त्वमदृश्यतामेषिशिखोद्गमेन । त्वं
दृश्यसेप्रावृषिनिर्गतायांत्वंखञ्जना
श्चर्यमयेनमस्ते ॥ द्रव्यविशेषेपरि
स्थितस्यतस्यदर्शनफलंयथा ॥ अ
ब्जेषुगोषुगजवाजिमहोरगेषुराज्य
प्रदःकुशलदःशुचिशाद्वलेषु ।
भस्मास्थिकेशनखलोमतुषेषुदृष्टो-
दुःखंददातिबहुशःखलुखञ्जरीटः । अशुभदर्शनेप्रायश्चित्तंय
था । अशुभंखञ्जनंदृष्ट्वादेवब्राह्म-
णपूजनम् । दानंकुर्वीतकुर्याच्चस्ना
नंसर्वौषधीजलैरिति ॥ मादकद्रव्य
विशेषे । भङ्गायाम् ॥ तस्याना
मानिगुणाश्चयथा । भङ्गागञ्जा
मातुलानीमादनीविजयाजया ।
भङ्गाकफहरीतिक्ताग्राहिणीपाच
नीलघुः । तीक्ष्णोष्णापित्तलामोह
मदवाग्वह्निवर्द्धनी । इतिभावप्र
काशः ॥ अपिच । शक्राशनंतुती
क्ष्णोष्णंमोहकृत्कुष्ठनाशनम् । बल
मेधाग्निकृच्च श्लेष्मदोषहारिरसाय-
नम् ॥ जातामन्दरमन्थनाज्जलनि
धौपीयूषरूपापुरा त्रैलोक्ये विजय-
प्रदेतिविजयाश्रीदेवराजप्रिया॥ लो

कानांहितकाम्ययाक्षितितलेप्राप्ता
नरैःकामदासर्वातङ्कविनाशहर्ष
जननीयैःसेवितासर्वदा॥ इतिरा
जवल्लभः ॥ वचायाम् ॥ यमभार्या
याम् ॥ हरीतक्याम् ॥ अलाबुवृ
त्तांविजयेतिलक्षणाम् ॥ जयन्त्या
म् ॥ शेफालिकायाम् ॥ मञ्जि
ष्ठायाम् ॥ शमीभेदे ॥ अग्निमन्थे
। गणिकारिकायाम् ॥ अष्टमहाद्वाद
श्यन्तर्गतद्वादशीविशेषे ।

विजयासप्तमी । स्त्री॰ सप्तमीतिथिप्र
भेदे ॥ सायथा । शुक्लपक्षस्यसप्तम्यां
सूर्यवारोयदाभवेत् । सप्तमीविज
यानामतत्रदत्तंमहाफलम् ॥

विजयी । त्रि॰ विजयशीले ॥ विशेषे
णजेतुंशीलमस्य । जिदृक्षीत्यादि
ना॰ इनिः ॥

विजरः । पुं॰ वेदान्तवेद्यआत्मनि ॥
त्रि॰ जरारहिते ॥ विगताजरा
यस्य ॥

विजलम् । न॰ विजिले । पिच्छिले
इतिहेमचन्द्रः ॥ त्रि॰ जलशून्ये ॥

विजल्पः । पुं॰ वाक्यविशेषे ॥ यथा
। व्यक्तयासूययागूढमानमुद्रान्तरा
लया । अघद्विषिकटाक्षोक्तिर्विज
ल्पोविदुषांमतः ॥ इत्युज्ज्वल
नीलमणिः ॥

विजातः । त्रि॰ विकृते ॥ जाते ॥

विजाता । स्त्री॰ जातापत्यायाम् ।

प्रजातायाम् ॥

बिजातीय : । त्रि० बिभिन्नधर्माक्रान्ते ॥ बिलक्षणे । भिन्ने ॥ यथास्त्र चाद्विजातीय : शिलादि : ॥

बिजिगीष : । त्रि० जयेच्छौ ॥

बिजिगीषा । स्त्री० बिजयेच्छायाम् ॥ स्वोदरपूरणासक्तिनिमित्तकनिन्दा त्यागेच्छायाम् ॥

बिजिगीषाबिबर्ज्जित : । त्रि० आद्यूने । औदरिके ॥ स्वोदरपूरणासक्तिनिमित्तकनिन्दात्यागो बिजिगीषा० व्यबसाय : कश्चित्प्रकर्षोबा० आलस्यात्तेनबिहीनोय : केवलमुदराधीनवृत्तिभाब : ॥

बिजिगीषु : । त्रि० जयैषिणि । जयेच्छाशीले । प्रतिबादिजयकामे ॥ यथा । जेतुमीषणशीलस्यबिजिगीषुरितिस्मृत : । इति ॥ शक्तस्यहि बिजिगीषो : कार्य्यसाधनंप्रधानम्० अन्यत्समयरक्षणाद्यशक्तस्येतिनीति : ॥ बिजेतुमिच्छाधातो : कर्म्मण्युःसन् । सनाशंसभिक्षउ : ॥

बिजिघत्स : । त्रि० बिगताशनेच्छे ॥ बिगताजिघत्साक्षुधायस्य ॥

बिजिज्ञासितव्य : । त्रि० स्वसंवेद्यतामापादयितव्ये० निजात्मनि ॥ बिशेषेणज्ञातुमेष्टव्य : ॥

बिजित : । त्रि० पराजिते ॥ बिजीयतेस्म । जिपअभिभवे । क्त : ॥

बिजितात्मा । त्रि० स्ववशीकृतदेहे ॥ वशीकृतान्त : करणे ॥ बिजित आत्मादेहो० मनोबायेन ॥

बिजिताश्व : । पुं० पृथो : पुत्रे ॥ त्रि०बशीकृततुरगे ॥

बिजिति : । स्त्री० बिजये ॥ यथाह दण्डी । क्षितिबिजितिस्थितिबिहितिव्रतरतय : परगतय : । उरुरुरुधुगुरुदधुर्युधिकुरव : स्वमरिकुलम् ॥ इति ॥

बिजिलम् । त्रि० पिच्छिले । मण्डयुक्तजलयुक्तव्यञ्जनयो : ॥ बिजनंबिजि : । ओबिजीभयचलनयो : । इगुपधात्किदितीन् । बिजिंलाति । ला० । आतोनुपसर्गेक : ॥

बिजिबिल : । त्रि० बिजिले ॥ इतिहेमचन्द्र : ॥

बिजिहीर्षा । स्त्री० बिहर्त्तुमिच्छायाम् ॥

बिजिह्म : । त्रि० कुटिले । बक्रे ॥ बिशेषेणजिह्म : ॥

बिजुल : । पुं० शाल्मलीकन्दे ॥

बिजृम्भणम् । न० बिभ्रमे ॥ बिकासे ॥ जृम्भणे ॥

बिजृम्भितम् । न० चेष्टायाम् ॥ त्रि० बिकस्वरे । बिकसनशीले ॥ अभ्यूर्ज्जिते ॥ उल्लसिते ॥ जृम्भायुक्ते ॥ बिजृम्भासञ्जाताअस्य । तारकादित्वादितच् ॥

स्यर्थ इतिकल्पतरुः। अहमितिप्रत्यये। विज्ञानस्कन्धइत्यानन्दगिरिः॥

विज्ञानाकसितः। त्रि॰ विज्ञानेननिश्चिते॥

विज्ञानिकः। त्रि॰ वैज्ञानिके। प्रवीणे॥ विज्ञानमस्त्यस्य। व्रीह्यादित्वान्मत्वर्थीयठन्॥

विज्ञापनम्। न॰ बोधने। जनावना॰ बुझावना॰ इ॰भा॰प्र॰॥ विपूर्वाण्ण्यन्तज्जानातेर्ल्युट्॥

विज्ञेयम्। न॰ परमात्मतत्त्वे॥ त्रि॰ विज्ञातव्ये। इदमेवमितिविस्पष्टज्ञानार्हे॥ विज्ञातुंयोग्यः। ज्ञा॰। अचोयत्। ईद्यति॥

विज्यम्। न॰ निर्गुणे धनुषि॥ विगताज्यायस्मिन्॰यस्माद्वा॰तत्॥

विज्वरः। त्रि॰ विगतज्वरे॥ विगतमनस्तापे॥ विगतोज्वरोयस्य॥

विझर्झरः। त्रि॰ विषमे॥

विझामरम्। न॰ चक्षुषः शुक्लभेदे॥ इतिकश्चित्॥

विञ्झोली। स्त्री॰ वीथ्याम्। पङ्क्तौ॥

विटः। पुं॰ षड्गौ॥ लवणविशेषे॥ षिड्गे। स्वैणे॥ मूषिके॥ खदिरे॥ कामुकानुचरे॥ धूर्त्ते॥ कामतन्त्रकलाकोविदे॥ नारङ्गवृक्षे॥ वेटति। विटशब्दे। इगुपधलक्षणः कः॥

विटका। स्त्री॰ वीटिकायाम्॥ इतिकश्चित्॥

विटङ्कः। पुं॰ न॰ गृहप्रान्तरचितपक्षिस्थाने। कपोतपालिकायाम्॥ विशेषेणटङ्क्यतेऽत्र। टकिबन्धने। हलश्चेतिघञ्॥ तोरणस्तम्भयोरुपरितर्यङ्निहितेदारुणि॥ त्रि॰सुन्दरे॥ यथा। तस्मिन्नतीत्यमुनयः षडसज्जमानाः कक्षाः समानवयसावथसप्तमायाम्। देवावचक्षत गृहीतगदौपरार्द्ध्यकेयूरकुण्डलकिरीटविटङ्कवेशौ॥ इतिभा॰तृ॰स्कन्धे १५ अध्यायः॥

विटङ्कितः। त्रि॰ अलङ्कृते॥

विटपः। पुं॰ विटाधिपे। पारदारिकश्रेष्ठे॥ आदित्यपत्रे॥ पुं॰न॰शाखापल्लवसमुदाये। विस्तारे॥ स्तम्बे। गुल्मे॥ शाखायाम्॥ पल्लवे॥ मुष्कवङ्क्षणयोरन्तरे मध्यावीव्यो॥ विटान्पाति। पा॰। आतोनुपसर्गेकः॥ यद्वा। विटानांपानम्। पा॰। घञर्थेकः॥ वेटति॰विस्तृतोवा। विटआक्रोशे॰शब्देच। विटपविष्टपविशिपोलपाः॰इ॰साधुः॥

विटपी। पुं॰ पादपे। तरौ। वृक्षे॥ वटे॥ विटपः शाखाविस्तारोऽस्यास्ति। अतइनिः॥

विटप्रियः। पुं॰ मुद्गरवृक्षे। मोगरा॰ इ॰भा॰प्र॰॥ विटानांप्रियः॥

विटमाक्षिक : । पुं॰ धातुविशेषे । ताप्ये । नदीजे । कामारी ।

विटि : । स्त्री॰ पीतचन्दने ॥

विट्कारिका । स्त्री॰ पक्षिविशेषे । गोराख्याम् ॥

विट्खदिर : । पुं॰ दुर्गन्धिखदिरे । अरिमेदे ॥ विड्गन्धि : खदिर : ॥

विट्चर : । पुं॰ ग्राम्यशूकरे ॥ विषं विष्ठांचरति । चर॰ । पचाद्यच् । मूलविभुजादित्वात्कोवा ॥ विषचरोवा ॥

विट्ठल : । पुं॰ अज्ञानुग्राहकेदेवे ॥ यदाहुरर्वाचीनादाक्षिणात्या : । विदाज्ञानेनठान् शून्यान्॰लाति अदत्ते आत्मीयतयागृह्णाति । ला॰ । आतोनुपसर्गइतिक : । विदाज्ञानेनठान्शून्यान्लातिगृ- ह्णातिय : स्वयम् । अज्ञानुपद्रुहदेवोविट्ठल : कथ्यतेबुधैरिति प्रक्रियाप्रसाद : ॥

विट्पति : । पुं॰ जामातरि ॥ यथा । मातामहंमातुलञ्चस्वस्त्रीयं श्वशुरंगुरुम् । दौहित्रं विट्पतिं बन्धु मृत्विग्याज्यौचभोजयेत् ॥ एतान्मातामहादीन्॰दशमुख्यमोक्षिया ??? यसभवेभोजयेद् गुरुर्विद्यागुरुरा चार्यादि : । विट्दुहितातस्या : पति : । इतिकुल्लूकभट्ट : ॥ भोजयेत् ॰श्राद्धे॰इतिशेषोबोध्य : ॥ नृपतौ ॥ वैश्यवर्य्ये ॥

विट्सारिका । स्त्री॰ पक्षिविशेषे । कुणप्याम् । गुयासालुक्॰इ॰गौ॰दे॰भा॰प्रसिद्धे ॥

विठर : । पुं॰ वाग्मिनि ॥

विडम् । न॰ कृत्रिमलवणे । पाक्ये । खारील॰ण॰इ॰भा॰ ॥ अस्यगुणाःयथा । विडंसक्षारमूर्द्ध्वाध:कफवातानुलोमनम् । ऊर्द्ध्वंकफमधोवातंसञ्चारयेदित्यर्थ: । दीपनंलघुतीक्ष्णोष्णं रूक्षं रुच्यं व्यवायिच । विबन्धानाहविष्टम्भहृद्गुगौरवशूलनुत्॥ विडति । विडभेदने ॥ इगुपधज्ञाप्रीकिर:क : ॥

विडङ्ग : । पुं॰ न॰ वेल्ले । चित्रतण्डुलायाम् । कृमिघ्ने ॥ विडङ्गंकटुतीक्ष्णोष्णं रूक्षं वह्निकरंलघु । शूलाध्मानोदरश्लेष्मकृमिवातविबन्धनुत् ॥ त्रि॰अभिज्ञे ॥ विडति ॥ विड॰ । विडआक्रोशेवा । विडादिभ्य : किदित्यङ्गच् ॥

विडम्बनम् । न॰ अनुकरणप्रतारणे॥

विडम्बना । स्त्री॰ विडम्बने । अनुकृतौ ॥

विडम्बमान : । त्रि॰ अनुक्रियमाणे ॥

विडम्बित : । त्रि॰ अनुकृते ॥ व्यस्ते ॥ दुर्गते ॥ उपहसिते ॥

विडम्बा : । त्रि॰ उपहासास्पदे ॥

विडारः । पुं० विडाले ॥ रलयोर भेदः ॥

विडारकः । पुं० विडाले ॥

विडालः । पुं० खट्टाशे । मार्जारे । वृषदंशके ॥ नेत्रपिण्डे ॥ विडति० विडत्येव । विड आक्रोशे ॥ तमि विशिविडिमृणिकुलिकपिपलिपञ्चिभ्यः कालन् ॥ नेत्रौषधविशेषे ॥ रत्न० ५ । ५० ॥

विडालकम् । न० हरिताले ॥ पुं० नेत्ररोगौषधविशेषे ॥

विडालपदः । पुं० तोलकद्वयपरिमाणे ॥ न० मार्जारचरणे ॥

विडालपदकम् । न० कर्षपरिमाणे ॥

विडाली । स्त्री० भूमिकूष्माण्डे । विदार्याम् ॥ मार्ज्जार्याम् ॥

विडीनम् । न० खगानांगतिप्रभेदे ॥ विशिष्टं डयनम् । डीङ् विहायसा गतौ । क्तादिः । नपुंसके भावे क्तः । स्वादय ओदित इत्यतिदेशात् ओदित्त्वान्निष्ठानत्त्वम् ॥ विडीनं विचित्रं पक्षिणः पतनमिति महाभारतं ॥

विडुलः । पुं० वेतसवृक्षे ॥

विडोजाः । पुं० इन्द्रे ॥ वेवेष्टि । विष्लृ व्याप्तौ । क्विप् । विट् व्यापकम् ओजस्तेजोऽस्य ॥ विट् सुप्रजासु मनुष्येषु वा ओजोऽस्य स्थिरा ॥

विडौजाः । पुं० पाकशासने । इन्द्रे ॥ विडति । विड भेदने । इगुपधेति कः । विडं भेदकमोजोऽस्य । सान्तः ॥

विड्गन्धम् । न० विड् लवणे ॥

विड्जः । त्रि० विष्ठायांजाते ॥

विड्लवणम् । न० विडे ॥

विड्वराहः । पुं० विट्चरे ॥

वितंसः । पुं० वीतंसे ॥

वितण्डा । स्त्री० कच्चीशाके ॥ शिलाह्वये ॥ करवीर्याम् ॥ दर्व्याम् ॥ वादप्रभेदे । परपक्षप्रतिवादे । स्वपक्षस्थापनहीनायाम्विजिगीषुकथायाम् ॥ तथाचन्यायसूत्रम् । सप्रतिपक्षस्थापनाहीनोवितण्डा । यद्यपि तच्छब्देनजल्पोनपरामष्टुंशक्यते० जल्पस्यस्थापनाद्वयवतः प्रतिपक्षस्थापनाहीनत्त्वस्यविरुद्धत्त्वात् । तथापिस्थापनाद्वयवत्त्वंविहाय० जल्पैकदेशः परामृश्यते । प्रतिपक्षोद्वितीयपक्षः । तथाच० प्रतिपक्षस्थापनाहीनाविजिगीषुकथा० वितण्डेति । नचस्वस्यस्थापनीयाभावात्कथमियंकथाप्रवर्त्ततामितिवाच्यम् । परपक्षखण्डनेनजयस्यैवोद्देश्यत्वात् । परेतु० यत्परपक्षखण्डनेनैवस्वपक्षसिद्धेर्यादिन्रसिद्धे तत्साधनाभावेपि नप्रवृत्त्यनुपपत्तिरितिवदन्ति ॥ १ । ४२ ॥ वितण्डातेपरक्षोऽनया

। तडिन्निपाते । गुरोश्चेत्य: ॥

वितत: । त्रि० विस्तृते ॥ विपूर्वात्तनोते: क्त: ॥

विततिः । स्त्री० विस्तारे ॥

वितथम् । न० अनृतेवचसि ॥ त्रि० तद्वति ॥ विगतंतथासत्यंयस्मात्० तत्०वितथम् । अजितियोगविभागात्समासान्तोऽच् ॥

वितन्द्र: । त्रि० जागरूके ॥ तन्द्रारहिते ॥ विगतातन्द्रायस्य स: ॥

वितन्यमान: । त्रि० वितायमाने ॥ तनोते: कर्मणिलट: शानजादेश: ॥

वितन्वन् । त्रि० विस्तारयति ॥

वितमा: । त्रि० तमोगुणरहिते ॥

वितरणम् । न० दाने ॥ तृप्लवनतरणयो: विपूर्व: । भावेल्युट् ॥

वितर्क: । पुं० ऊहे ॥ संशये ॥ विपरीततर्के ॥ वितर्कणम् । तर्कभाषार्थश्चुरादी । भावेघञ् ॥ ज्ञानसूचके ॥

वितर्कणम् । न० वितर्के ॥ तर्क० । ल्युट् ॥

वितर्द्दि: । स्त्री० वेदिकायाम् ॥ विगतातर्द्दि:हिंसाऽस्या: । तर्द्दहिंसायाम् । सर्वधातुभ्यइन्नितीन् ॥

वितर्द्दिका । स्त्री० वेदिकायाम् ॥ स्वार्थेक: ॥

वितर्द्दी । स्त्री० वेदिकायाम् ॥ कृदिकारादक्तिन इति ङीष् ॥

वितलम् । न० पातालप्रभेदे ॥

वितस्ता । स्त्री० नदीविशेषे ॥ तीर्थविशेषे ॥ काश्मीरेवितस्ताख्यंनागसदनमस्ति ॥

वितस्ति: । पुं० स्त्री०अनिष्ठयासह विततेऽङ्गुष्ठे । द्वादशाङ्गुलपरिमाणे ॥ वितस्यति०वितस्यतेवा । तसुउपक्षये । वौतसेरितिति: ॥

वितान: । पुं० न०यज्ञे ॥ क्रतुकर्मणि । गार्हपत्यकुण्डस्य नामयनोना माहवनीयदक्षिणाग्निकुण्डयोर्विहारे ॥ कदके । उल्लोचे चन्द्रातपे ॥ विस्तारे ॥ न०वृत्तविशेषे । अवसरे त्रि०मत्ते ॥ तुच्छे । शून्ये ॥ मन्दे ॥ विततनम्०विततन्वतेवा । तनुविस्तारे । घञ् ॥

वितानक: । पुं० माडद्रुमे ॥ पुं०न० चन्द्रातपे ॥

वितानतनिका । स्त्री० पटमण्डपरज्जौ ॥

वितानमूलकम् । न० उशीरे ॥

वितायमान: । त्रि० वितन्यमाने । विस्तीर्यमाणे ॥ वितनोते: कर्मणिलट: शानजादेश:। तनोतेर्यक्वीति० वा० आकारादेश: ॥ विटङ्किते । अलङ्कृते ॥

वितिष्ठमान: । त्रि० अवतिष्ठमाने ॥ समवप्रविभ्यस्थइत्यात्मनेपदम् ॥

वितीर्णः । त्रि० दत्ते । अवगाढे ॥

वितुन्नम् । न० सुनिषण्णे । शिषखपरिया० इ० भा० प्र० शाके ॥ शैवाले ॥ विगतन्तुन्नं व्यथनमस्मात् ॥ त्रि० व्यथिते ॥

वितुन्नकः । पुं० न० धन्याके ॥ भाटामलौषधौ । तामलक्याम् । भूम्यामलक्याम् ॥ मुस्तावत्पेलवपुरंशुकाभं स्याद्वितुन्नकम् ॥ वितुन्नकं हिमं तिक्तं कषायं कटु कान्तिदम् ॥ कफपित्तास्रश्वासर्पकुष्ठकण्डुविषप्रणुत् ॥ वितुद्यते स्म । तुद व्यथने कर्मणि क्तः । स्वार्थे कन् ॥ विगतन्तुन्नं दुःखमस्माद्वा । कप् ॥

वितुन्ना ।)
वितुन्निका ।) स्त्री० तामलक्याम् । भूम्यामलक्याम् ॥ वितुन्नके ॥

वितृप्तः । त्रि० सन्तुष्टे ॥ विशेषेण तृप्तः ॥

वितृष्णः । त्रि० निष्कामे ।

वित्तम् । न० धने । न्यायार्जितधने । धर्माय यशसेऽर्थाय कामाय स्वजनाय च । पञ्चधा विभजन् वित्तमिहामुत्र च मोदते । प्रभूते हिरण्यरत्नादौ ॥ ज्ञाने ॥ लग्नाद्द्वितीयभवने । त्रि० ख्याते । विज्ञाते । विचारिते । विद्यते स्म । विद विचारणे । क्तः । नुदविदेति पक्षे नत्वाभावः । यद्वा । अवेदि । विद्लृ लाभे । क्तः । वित्तो भोगप्रत्यययोरिति साधुः । लब्धे ।

वित्तदः । पुं० पूर्वदक्षिणोत्तरद्वारिगृहे ॥ त्रि० धनदातरि ॥ वित्तं ददाति । डुदाञ् दाने । आतश्चू तिकः ॥

वित्तपः । पुं० कुबेरे ॥ त्रि० धनरक्षके ॥ वित्तं पाति । पा० कः ॥

वित्तमयः । त्रि० धनप्राये ॥

वित्तिः । स्त्री० विचारे । ज्ञाने ॥ यथा । सत्त्वं भावं न वित्तिर्व्यपनुदति यतः कर्मनाश्योघटादिर्मिथ्याभूतं च कर्म द्यपयति न तथा वित्तिघात्यं यतस्तत् । इत्थं सिद्धे विभागे स्तुतिभिस्त्वरगिरा वित्तिघात्यप्रतीतौ वस्तो मिथ्येति सिद्धं न तदपहतये कर्मजातं समर्थम् ॥ इति ॥ लाभे ॥ सम्भवे ॥ विदेर्भावादौ स्त्रियां क्तिन् ॥

वित्तेशः । पुं० धनपतौ । कुबेरे ॥

वित्तैषणा । स्त्री० धनलाभेच्छायाम् ॥ कर्मणां साधनैर्वित्ततृष्णा वित्तैषणा मता ।

वित्रस्तः । त्रि० त्रासयुक्ते ॥ विपूर्वात् त्रसेः क्तः ॥

वित्रासः । पुं० भये । त्रसी उद्वेगे । विपूर्वः । घञ् ॥

वित्सनः । पुं० वृषभे ॥

विथुरः । पुं० चौरे । राक्षसे ॥ व्यथते । व्यथ भयचलनयोः । व्यथेः

समप्रसारणं किच्चेत्युरच् ॥

विथ्या । स्त्री• गोजिह्वायाम् ॥

वित्•द् । त्रि• विदुषि ॥ न• ज्ञाने ॥ वेदनम् । विदज्ञाने । सम्पदादित्वात् भावे क्विप् ॥

विद : । पुं• पण्डिते । वेत्ति । विद• क : ॥

विदंश : । पुं• अवदंशे ॥ विदंश्यते । दंश• । कर्मणि• भावे वा घञ् ॥

विदग्ध : । त्रि• चतुरे । दग्धे ॥ नागरे ॥ पण्डिते । अत्यन्तपक्वे ॥

विदग्धता । स्त्री• विदग्धत्वे ॥

विदग्धा । स्त्री• परकीयान्तर्गतनायिकाप्रभेदे ॥

विदथ : । पुं• योगिनि ॥ कृतिनि । प्राज्ञे ॥ वेत्ति । विद ज्ञाने । रुदिविदिभ्यां ङिदित्यथ : ॥ यज्ञे ॥ वेत्ति• अस्मिन् देवान् ॥

विदन् । त्रि• पण्डिते ॥

विदन्दङ्क्षु : । त्रि• विदंष्टुमिच्छौ । उपदंशेच्छावति । दंशे : सन्नन्तादु प्रत्यय : ॥

विदन्ता । स्त्री• नातिदीर्घायां वराटिकायाम् ॥

विदर : । पुं• स्फुटने । भिदायाम् । फटना• इ• भा• । विदरणम् । दृ विदारणे । ऋदोरप् ॥ न• विश्वसारके । नागफणीथूहर• इ• भा• ॥ त्रि• दरशून्ये । निर्भये ॥

विदरणम् । न• विदरे ॥ विदारणे ॥

विदर्भ : । पुं• कुण्डिनपुरे ॥ स तु वङ्गदेशस्य दक्षिणपश्चिमे वर्त्तते• अधुना• वडानागपुर• इति ख्यात : । भद्रकालीमहापूर्वे रामदुर्गाच्च पश्चिमे । श्रीविदर्भाभिधो देशो वैदर्भीतत्र तिष्ठति ॥ त्रि• दर्भशून्ये ॥ कर्मठे ॥ विशिष्टेन दर्भेणोपलक्षित : ॥

विदर्भजा । स्त्री• अगस्त्यमुने : पत्न्याम् । कौषीतक्याम् । लोपामुद्रायाम् ॥ दमयन्त्याम् । रुक्मिण्याम् ॥

विदर्भराज : । पुं• विदर्भदेशाधिपतौ । भीमाभिधे पुराणप्रसिद्धे राजनि । दमयन्तीजनके ॥

विदर्भसुभ्रू : । स्त्री• दमयन्त्याम् ॥

विदर्भाधिपति : । पुं• कुण्डिनपतौ । भीष्मकाभिधे । रुक्मिणीजनके ॥

विदल : । पुं• रक्तकाञ्चने । पिष्टके ॥ न• वंशादिकृतपात्रविशेषे ॥ वेणुदले ॥ शिफाविदलरज्ज्वाद्यैर्विदध्यान्नृपतिर्दमम् इति मनु : ॥ दाडिमवल्कले ॥ द्विधाकृतकलायादौ । दाल• इ• भा• ॥ स्वर्णादेरवयवे ॥

विदला । स्त्री• त्रिवृति ॥ पत्रशून्यायाम् ॥

विदा । स्त्री• ज्ञाने । मनीषायाम् ॥ भिदादित्वाद् विदेरङ् । टाप् ॥

विदाय : । पुं• गमनानुमतौ ॥ यथा । क्षणं वा चम्पकवनं गच्छ मा तिष्ठ सु

न्दरि । चर्णांग्दस्वया यामिविशिष्टं कार्यमस्तिमे । विदार्यदेहिसमप्रीत्या चर्णांमांप्राणवल्लभे ॥ इतिब्रह्मवैवर्त्ते श्रीराधांप्रतिश्रीकृष्णवाक्यम् ॥

विदार : । पुं॰ जलोच्छ्वासे । आजौ । युधि ॥ दारणे ॥ विदार्यते । दॄ॰ । कर्मणिघञ् ॥

विदारक : । पुं॰ शुष्कनद्यादौवार्यर्थंकृतगर्त्ते । कूपके ॥ नद्यादौस्रोतोदृधकारिणितरुशिलादौ । कूपके ॥ याचायोगान्तरे ॥ यथा । मार्गेश : शनिसंयुक्त : सप्तमेऽस्तगतोयदि : ॥ विदारकमिमंमन्येप्राहु : पत्नीविनाशकम् ॥ पुनश्च । मार्गेशात्सप्तमेभानु : पञ्चमेक्रूरखेचर : । विदारकाख्यएवासौभार्यामरिवशंनयेत् ॥ न॰वच्चचारे ॥ विदार्यते । दॄविदारणे । णिच् । बाहुलकात्कर्मणिण्वुल् ॥ यद्वा । विदार्यते । कर्मणिघञ् ॥ कुत्सितोविदार : । कुत्सायांक : ॥ त्रि॰विदारणकर्त्तरि ॥ विदृणाति । दॄ॰ । ण्वुल् ॥

विदारकसमाख्य : । पुं॰ यात्रायांनिषिद्धयोगान्तरे ॥ यथा । भार्येशोव्ययगोनीचपुत्रस्थानेशनैश्चर : । विदारकसमाख्योयंयातु : पत्नींनिहन्तिवै ॥ विदारकेणसमाख्यायस्य स : ॥

विदारण : । पुं॰ कर्णिकारवृक्षे ॥ न॰ विडम्बे । विडम्बने । भेदे । भेदने । पुं॰ स्त्री॰ रणे । सम्पराये । समीके ॥ विदार्यतेऽनेन दॄ॰ । ण्यन्त : । ल्युट् ॥ विदारयतिवा ॥

विदारिका । स्त्री॰ शालपर्ण्याम् ॥ विदार्यर्थे ॥ विदार्येव । स्वार्थेक : ॥

विदारिगन्धा । स्त्री॰ अंशुमत्याम् । शालपर्ण्याम् ॥ विदार्या: गन्ध: विदारिगन्ध : । ङ्यापोरितिह्रस्व : । सोऽस्त्यस्या : ॥

विदारिणी । स्त्री॰ काश्मर्यां ॥

विदारित : । त्रि॰ भेदिते ॥ विदार्यतेस्म । दॄ॰ । ण्यन्त : । क्त : ॥

विदारी । त्रि॰ विदारणकर्त्तरि ॥ विपूर्वाद्दृणाते: कर्त्तरिणिनि : ॥

विदारी । स्त्री॰ शालपर्ण्याम् ॥ अष्टादशप्रकारकण्ठरोगान्तर्गतरोगविशेषे ॥ यथा । सदाहतोयंश्वयथुंसुताम्रमन्तर्गतेपूतिविशीर्णमांसम् । पित्तेनविद्याद्वदनेविदारींपार्श्वेविशेषात्सतुयेनशेते ॥ सपुरुषोयेनपार्श्वेन॰ विशेषाद्बाहुल्येनशेते॰ तस्मिन्पार्श्वेसाविदारीभवतीत्यर्थ : ॥ इक्षुगन्धायाम् । श्वेतभूकुष्माण्डे ॥ विदारीक्षीरशुक्लेक्षुगन्धाक्रोष्टीचेत्यमर : ॥ अस्या: गुणास्तु । विदारीमधुराम्लिग्धाबृंहणीस्तन्यशुक्रदा । शीतास्वर्यामूत्रलाचजीवनीबलवर्णदा ॥ गुरु: पित्तास्रपव

नदाहंहन्तिरसायनीति ॥ विदारयति । दृविदारणे० ण्यन्त : । पचाद्यच् । गौरादि:॥ विदार्या:फलंमूलस्व० विदारी ! अनुदात्तादेश्चेत्यञ् : ०पुष्पमूलेषुबहुलमिति० लुपि० युक्तवद्भाव : ॥

विदारु : । पुं० कृकचपादे । कृकलासे ॥

विदाहि । न० परिणामेऽम्लपाकमुपयाते० दाहजनकद्रव्ये ॥ विदाहिद्रव्यमुद्गारमम्लंकुर्यात्तथातृषाम् । हृदिदाहञ्चजनयेत्पाकंगच्छतितच्चिरात् ॥

विदिक्चक्र : । पुं० हरिद्राङ्गपक्षिणि ॥

विदित : । पुं० कवौ ॥ त्रि० बुधिते । अवगते । ज्ञाते । विदिक्रियातिशयेनाप्ते । विदिक्रियाकर्मभूते । यथा । तस्मिन्ब्रह्मणिविदितेविश्वमशेषंभवेदिदंविदितम् । कारणमृदिविदितायांघटककार्याद्यायथाऽवगम्यन्ते ॥ ७५ ॥ श्रुते ॥ अर्थिते ॥ वृत्तान्तज्ञानवति ॥ अभ्युपगते ॥ व्याकृते ॥ विद्यतेस्म । विद्ज्ञाने । क्त : । यस्यविभाषेतीट् ॥ विदितंवेदनमस्यास्तिवा । अर्शआद्यच् ॥

विदिक् । स्त्री० अपदिशं । अपदिशे । दिशोर्मध्ये । अग्निनिरृतिवाय्वीशानकोणचतुष्टये ॥ दिग्भ्यां विनिर्गता० शान्ताविदिक् ॥

विदिशा । स्त्री० नगरीविशेषे ॥

विदीर्ण : । त्रि० कृतविदारणे । चीरा० फाडा इ० भा० ॥ दॄ० । कर्मणिक्त : । ऋतइत्० रपर : । रदाभ्यामितिनत्वम् । णत्वम् ॥

विदु : । पुं० हस्तिकुम्भयोर्मध्यभागे ॥ कुम्भौतुपिण्डौशिरसस्तयोर्मध्ये विदु : पुमान् ॥ वेत्तिसंज्ञामनयातेन । विद्० । बाहुलकात्कु : ॥

विदुर : । पुं० नागरे ॥ धीरे ॥ धृतराष्ट्रानुजे । कौरवाणांमन्त्रिणि ॥ त्रि०ज्ञानशीले ॥ वेदनशील : । विदिभिदिच्छिदे : कुरच् ॥

विदुल : । पुं० अम्बुवेतसे ॥ वेतसे ॥ गन्धरसे । बोले ॥ वेत्तिविद्यतेवा । बाहुलकादुलच् ०गुणाभावश्च ॥ नम्रवेतसे ॥

विदुषी । स्त्री० पण्डितायांनार्याम् । वेत्ति । विदे : शतुर्वसु : । उगितश्चेतिङीप् ॥

विदुष्मती । स्त्री० पण्डितवत्यांपुर्याम् ॥

विदून : । त्रि० परितप्ते ॥ विदूयतेस्म । टुदुउपतापे । क्त : । ल्वादिभ्यश्चेतिनिष्ठानत्वम् ॥ विशेषेणदूनोवा ॥

विह्वरम् । न० देशविशेषे । बालवा

ये ॥ बालवायाद्रेः समीपवर्त्तिनि नगरे ॥ त्रि॰ अतिदूरस्थदेशादौ । विप्रकृष्टे ॥

विदूरजम् । न॰ वैदूर्य्यमणौ ॥

विदूरथः । पुं॰ राजविशेषे ॥

विदूरभूमिः । स्त्री॰ विदूरदेशे ॥

विदूराद्रिः । पुं॰ रोहणपर्व्वते ॥

विदूषकः । पुं॰ क्रीडनीयैकपात्रे । षिड्गे । विटे । व्यलीके । कामकेलौ । चाटुवटौ । वासन्तिके । वैहासिके । प्रहासिनि । परनिन्दाकरे । खले । अभीरौ । सूचके । कण्टके । परछेषिणि ॥ नायकविशेषे ॥

विदेशः । पुं॰ परदेशे ॥ कोतिभारः समर्थानां किं दूरं व्यवसायिनाम् । को विदेशः सविद्यानां कः परः प्रियवादिनाम् ॥

विदेहः । पुं॰ जनकान्वयभूमिपे । मैथिले ॥ विदेहाः पुं॰ भूम्नि । देशविशेषे । तीरभुक्तौ । तिरहित॰ इ॰ भा॰ प्र॰ ॥ यथा । गण्डकीतीरमारभ्य चम्पारण्यान्तकं शिवे । विदेहभूः समाख्याता तीरभुक्त्यभिधः स तु ॥ त्रि॰ कायशून्ये । निर्देहे ॥

विदेहमुक्तिः । स्त्री॰ मुक्तिविशेषे । सा यथा । ततः कालवशादेव प्रारब्धे तु क्षयङ्गते । वैदेही मामकी मुक्तिं याति नास्त्यत्र संशय इति । ततो जीवन्मुक्त्यनन्तरम् ॥

विदेहा । स्त्री॰ मिथिलायाम् ॥

विद्धः । त्रि॰ वेधिते । कृतच्छिद्रे ॥ क्षिप्ते । सदृशे । बाधिते । ताडिते ॥ विध्यते स्म । व्यधताडने । क्तः । ग्रहिज्येति सम्प्रसारणम् ॥

विद्धकर्णः । पुं॰ विद्धकर्णाम् ॥ त्रि॰ कृतकर्णवेधे ॥ विद्धौ कर्णौ यस्य ॥

विद्धकर्णा ।)
विद्धकर्णिका ।) स्त्री॰ विद्धकर्णाम् ॥

विद्धकर्णी । स्त्री॰ पाठायाम् । अम्बष्ठायाम् ॥ विद्धौ कर्णौ यया॰ यस्या वा । पाककर्णेति ङीप् ॥

विध्यर्थः । पुं॰ विधिफले ॥ कृतिसाध्यत्वमर्थहेतुत्वमनर्थाहेतुत्वञ्चेति ताल्किकाणां दर्शनम् ॥ भाट्टमते विध्यर्थस्तु॰ श्येनफलस्यैवाभिचारस्यानर्थहेतुत्वादधर्मत्वम्॰ श्येनस्य तु विहितस्य समीहितसाधनस्य धर्मत्वमेव । अर्थपदव्यावर्त्यस्तु॰ कलञ्जभक्षणादेर्निषिद्धस्यैवेति । फलतोऽनर्थहेतुत्वेन तु॰ शिष्टानां श्येनादौ नैवाधर्मत्वेन व्यवहारः । तदुक्तम् । फलतोऽपि च यत् कर्म्म नानर्थेनानुबध्यते । केवलप्रीतिहेतुत्वात् तद्धर्म्म इति कथ्यते ॥

विध्वंसः । पुं॰ विनाशे ॥ विधि

ष्टोध्वंसः ॥
विद्यमानः । त्रि॰ वर्त्तमाने ॥
विद्या । स्त्री॰ उमायाम् । शिवायाम्
। दुर्गायाम् ॥ मन्त्ररूपायाम् ॥ दे
वताज्ञाने । उपासनायाम् ॥ विज्ञा
ने ॥ श्रेयोविषयायाम् ब्रह्मविद्या
याम् ॥ अनावृतसंवित्तादात्म्यापन्ना
यांब्रह्माकारान्तःकरणवृत्तौ ॥ आ
त्मसाक्षात्कारे ॥ वेदार्थपरिज्ञाने ॥
शास्त्रे ॥ आन्वीक्षिकीत्रयीवार्त्तद
ण्डाख्यासुचतसृषु ॥ यथा । आन्वी
क्षिकीत्रयीवार्त्तादण्डनीतिश्चपार्थि
वः । तद्विधैस्तत्क्रियोपेतैश्चिन्तयेद्वि
नयान्वितः ॥ आन्वीक्षिक्यात्मवि
ज्ञानं॰धर्माधर्मौत्रयीस्थितौ । अर्था
नर्थौतुवार्त्तायांदण्डनीत्यांनयानयौ
॥ विद्याश्चतस्रएवैतायोगक्षेमायदे
हिनाम् । विद्याविनीतोनृपतिर्न
कृच्छ्रेष्ववसीदति ॥ इति ॥ पुराणा
दिचतुर्द्दशसु ॥ यथा । पुराणन्याय
मीमांसाधर्मशास्त्राङ्गमिश्रिताः । वे
दाः स्थानानिविद्यानांधर्मस्यच
तुर्द्दश ॥ इति ॥ अष्टादशविद्यासु
॥ यथोक्तंविष्णुपुराणे । अङ्गानिवे
दाश्चत्वारोमीमांसान्यायविस्तरः ।
धर्मशास्त्रंपुराणञ्चविद्याह्येताश्चतु
र्दश । आयुर्वेदोधनुर्वेदोगान्धर्वश्चे
तितेत्रयः । अर्थशास्त्रंचतुर्थञ्चवि
द्याह्यष्टादशैवताः ॥ इति ॥ तत्रा

ङ्गानिषट्॰यथा । शिक्षाकल्पोव्या
करणंनिरुक्तंछन्दोज्योतिषमिति ।
ऋग्यजुःसामाथर्वाख्याः वेदाश्च
त्वारईरिताः । विचारोवेदवाक्या
नांमीमांसाप्रोच्यतेबुधैः ॥ साचपू
र्वोत्तरभेदाद्द्विधा । तथाहि । कर्म
प्रतिपादनपराजैमिनिप्रणीताद्वाद
शाध्यायी॰पूर्वमीमांसा । ब्रह्मप्रति
पादनपराव्यासप्रणीताचतुरध्यायी॰
उत्तरमीमांसेति । पदार्थनिर्णयप
रंतर्कशास्त्रंन्यायः॰अत्रैववैशेषिक
नयस्यान्तर्भावः । मन्वत्रिविष्णुहा
रीतादिप्रणीतंधर्मशास्त्रम् । कापिलपा
तञ्जलपाशुपतपाञ्चरात्रादीनामाग
मानामपिधर्मशास्त्रएवान्तर्भावः ।
सर्गादिपञ्चलक्षणलक्षितम्॰मत्स्य
मार्कण्डेयभविष्यभागवतब्रह्मब्रह्मा
ण्डब्रह्मवैवर्त्तवायुवामनविष्णुवरा
हाग्निनारदीयपद्मलिङ्गगरुडकूर्मस्क
न्दभेदादष्टादशविधंपुराणम् । तदु
क्तम् । मद्वयंभद्वयञ्चैव॰ब्रत्रयंवचतु
ष्टयम् । अनापलिङ्गकूस्कानिपुराणा
निविदुर्बुधाः ॥ उपपुराणानामप्य
त्रैवान्तर्भावः । रोगोपशमपूर्वका
नन्दफलकोऽष्टस्थानसंयुतआयुर्वे
दः । शस्त्रास्त्रप्रयोगोपसंहारप्रति
पादकमन्त्रसहितःपादचतुष्टयात्म
कोधनुर्वेदः । पदावस्थिततानपरि
च्छेदप्रयुक्तावधानेपृथक्षड्जादि

स्वरसमुदायोगान्धर्ववेदः । चतुःषष्टिकलासङ्ग्राहकमीमनसादिशास्त्रमर्थशास्त्रमिति ॥ सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम् । अहार्य्यत्वादनर्घ्यत्वादक्षयत्वाच्च सर्वदा ॥ विद्या ददाति विनयं विनयाद्याति पात्रताम् । पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम् इति विष्णुशर्म्मा ॥ दानेन तपसा यज्ञैरुपवासव्रतैस्तथा । न तां गतिमवाप्नोति विद्यया यामवाप्नुयादिति यमः ॥ विद्न्त्यनया धर्म्मामिति वा । विद्‌ज्ञाने । संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिण इति क्यप् ॥ ब्रह्मविद्या स्त्रि० दृश्यमिथ्यात्वं दृग्वस्तुनः स्वरूपत्वं बोधयति ॥ परापरविभेदेन विद्या द्वैविध्यमीरितम् । ऋग्वेदाद्याऽपरा विद्या परा त्वक्षरतत्परा ॥ व्यवहारस्य दशेयं विद्याविद्येति भेदपरिभाषा । नास्त्येव तत्त्वदृष्ट्या तत्त्वं ब्रह्मैव नान्यदस्य स्मात् ॥ तत्त्वदृष्ट्या० ब्रह्मात्मैकत्वसिद्धान्तदृष्ट्या । तत्त्वम्० यथार्थस्वरूपम् ॥ गणिकार्यामोषधौ ॥

विद्यागुरुः । पुं० आचार्यातिरिक्तउपाध्यायादौ ॥

विद्यातीर्थम् । न० सन्ध्यातीर्थे ॥

विद्यादानपात्रे ॥

विद्यादलः । पुं० भूर्ज्जवृक्षे ॥

विद्यादाता । त्रि० विद्यादानकर्त्तरि ॥ यथा । अन्नदाताभयत्राता पत्नीतातस्तथैव च । विद्यादाता जन्मदाता पञ्चैते पितरो नृणाम् ॥

विद्यादानम् । न० अध्यापने ॥ पुस्तकदाने ॥ अन्नदानं महादानं विद्यादानं ततोऽधिकम् । अन्नेन क्षणिका तृप्तिर्यावज्जीवन्तु विद्यया ॥ अपि च । वाजपेयसहस्रस्य सम्यग्विष्टस्य यत्फलम् । तत्फलं समवाप्नोति विद्यादानान्न संशयः ॥ तस्माद्बालये नित्यं धर्म्मशास्त्रस्य वाश्रुते । पठनं कारयेद्धीमान् यदीच्छेच्छर्म्म आत्मनः ॥ गोभूहिरण्यवासांसि शयनान्यासनानि च । प्रत्यहं ते मदत्ताभिभवन्ति नृपसत्तम ॥ धर्म्माधर्म्मं न जानाति लोकोऽयं विद्यया विना । तस्मात् सदैव धर्म्मात्मन् विद्यादानरतो भव ॥ इति वह्निपुराणे विद्यादाननामाध्यायः ॥ अपि च गारुडे ५१ अध्याये । विद्यां दत्त्वा ब्राह्मणाय ब्रह्मलोके महीयते । दद्याद्वा रहस्तान्तु श्रद्धया ब्रह्मचारिणे ॥ सर्व्वपापविनिर्मुक्तो ब्रह्मस्थानमवाप्नुयात् इति ॥ यस्तु देव्या गृहे नित्यं विद्यादानं प्रवर्त्तयेत् । स भवेत् सर्व्वलोकानां पूज्यः पूजापदं व्रजेत् ॥ धर्म्मार्थीयच नस्यातां शुश्रूषा वापि तद्विधा । तत्र विद्या न वप्तव्या शुभं बीजमिवोषरे ॥

षरे ॥ विद्ययैवसमंकामंमर्त्तव्यंब्र
ह्मवादिना । आपद्यपिहिघोरायां
नत्वेनामिरिणेवपेत् ॥ विद्याब्रा
ह्मणमेत्याहशेवधिस्तेऽस्मिरक्षमाम्
। असूयकायमांमादास्तथास्यांवीर्य
वत्तमा ॥ यमेवतुशुचिंविद्यानिय
तंब्रह्मचारिणम् । तस्मैमांब्रूहिवि
प्रायनिधिपायाप्रमादिने ॥ इति-
मनुः ॥

विद्यादेवी । स्त्री० विद्याधिष्ठात्र्या
म् । सरस्वत्याम् ॥ जिनषोडश
देवीषु ॥ यथा । विद्यादेव्यस्तुषोड
श ॥ १५२ ॥ रोहिणीप्रज्ञप्तीवज्रशृ
ङ्खलाकुलिशाङ्कुशाः । चक्रेश्व
रीनरदत्ताकाल्यथोऽसौमहापरा ॥
गौरीगान्धारीसर्वास्त्रामहाज्वालाच
मानवी । वैरोट्याच्छुप्तमानसीमहा
मानसिकेतिताः ॥ १५४ ॥ इ०
हे०च० ॥

विद्याधनम् । म० विद्ययोपार्ज्जिते
वित्ते ॥ यथाहकात्यायनः । उप
न्यस्तेतुयल्लब्धंविद्ययापणपूर्वक
म् । विद्याधनन्तुतद्विद्याद्विभा
गेननियोजयेत् ॥ शिष्यादार्त्त्विज्य
तः प्रश्नात्सन्दिग्धप्रश्ननिर्णयात्
। स्वज्ञानशंसनाद्वादाल्लब्धंप्राध्यय
नाच्चयत् ॥ विद्याधनन्तुतत्प्राहु
र्विभागेनप्रयोजयेत् । शिल्पेष्वपि
हिधर्म्मोयं० मूल्याद्यच्चाधिकंभवेत्

विद्याधनम्

साधारणस्वर्णादिकमादाय० कुण्ड
लादिकंनिर्माय० स्वर्णादिमूल्यात्०
शिल्पगुणेनयदधिकमूल्यंस्यात्त
दित्यर्थः ॥ परंनिरस्ययल्लब्धंविद्य
याद्यूतपूर्वकम् । विद्यातिशयेनै
पुण्येन०द्यूतपूर्वकंयल्लब्धमित्यर्थः
॥ विद्याधनन्तुतद्विद्यान्नविभाज्यं
बृहस्पतिः ॥ अस्यार्थैवचनार्थानु
क्रमेणाह । यदीति । यदिभवान्भ
द्रमुपन्यस्यति० तदाभवते० एवम
येतद्देयमितिपणितंयश्चोपन्यासंनि
स्तीर्य्यलभतेतन्नविभाज्यम् ॥ शिष्या
दध्यापितात्० आर्त्त्विज्यतः द
यजमानाद्दक्षिणयालब्धंधनम्० द
क्षिणाधनप्रतिग्रहेवेतनरूपत्वात्त
स्याः तथायत्किञ्चिद्विद्ययाप्रश्ने
निस्तीर्णे० अपणितमेवयदिकश्चि
त्परितोषाद्ददाति०प्रश्ने निस्तीर्णे०
प्रश्नस्यसम्यगुत्तरेदत्तइत्यर्थः सन्दि
ग्धप्रश्ननिर्णयादितिव्याचष्टे । तथे
ति० तथायोह्यस्मिन्शास्त्रार्थेमहसं
शयमपनयति० तस्मैसुवर्णमिदंद
दानीत्युपस्थितस्यसंशयमपनीययल्ल
ब्धम् । तत्रैवविकल्पेनव्याख्यान्तर-
माहयद्वेति । यद्वा० वादिनोर्वा
दसन्देहे०न्यायकरणार्थमागतयोः
सम्यङ्निरूपणेनयल्लब्धंषष्ठांशादि
कम् । स्वज्ञानशंसनादितिव्याच
ष्टे० तथेति० तथाशास्त्रादिषुप्रक्ष

ष्ज्ञानंविभाज्ययत्प्रतिग्रहादिनालब्धम् । वादादित्यस्यार्थमाह• तथेति । तथाद्वयोः शास्त्रज्ञानविवादे• अन्यथापियत्रकुत्रचिदन्योन्यज्ञान-विवादे• निर्जित्ययल्लब्धम्० निर्जित्य• एककोटिव्यवस्थापनेनविवादमपनीय• लब्धम्• वादिपणितंराज्ञावाप्रसाददत्तमित्यर्थः । प्राध्ययनादितिव्याचष्टे• तथेति• तथैकस्मिन्देयेवह्लनामुपप्लवे• येन प्रकृष्टमधीत्य• यल्लब्धम् । शिल्पेष्वपीत्यस्यार्थमाह० तथेति० तथा शिल्पादिविद्यया• चित्रकारसुवर्णकारादिभिर्यल्लब्धम्• शिल्पगुणेन यदधिकंलब्धम् । तथाद्यूतेनापि परंनिर्जित्ययल्लब्धं• तत्सर्वंविद्याधनमविभाज्यमितरैरित्यर्थः । तस्मादाययाकयापविद्यायालब्धमर्ज-कस्यैवतन्नेतरेषामिति• प्रदर्शनार्थन्तुकात्यायनेनविस्तारितमितिदाय-भागः ॥ अथनारदः । कुटुम्बं-बिभृयाद्भ्रातुर्योविद्यामधिगच्छतः । भागंविद्याधनात्तस्मात्सलभेताश्रुतोपिसन्निति ॥ बिभृयादित्येकवचननिर्द्देशान्नवहवः । यदिविद्यामभ्यस्यतोभ्रातुः कुटुम्बमपरोभ्रातास्वधनव्ययशरीरायासाभ्यांसं-वर्द्धयति• तदातद्विद्यार्जितधने तस्याधिकारः• अश्रुतोमूर्खः ॥

विद्याधरः । पुं• देवयोनिविशेषे । जीमूतवाहनपुष्पदन्तादौ• कामरूपिणि• खेचरे ॥ विद्यायागुटिकाञ्जनादिविषयिण्याः• धरोधारकः ॥ रतिबन्धविशेषे ॥ यथा । नार्य्याऊरुयुगंधृत्वाकराभ्यांताडयेत्पुनः । कामयेन्निर्भयंकामीबन्धोविद्याधरोमतः ॥ यन्त्रविशेषे ॥ यथा ॥

विद्याधरयन्त्रम् । न• डमरुयन्त्रे ॥

विद्याधारः । पुं० वर्णवृत्तान्तरे ॥ यथा । नागाधीशेनोक्तंवृत्तंविद्याधारम्• यत्र : कर्णाः शेते पूर्णाभूमौसारम् । स्यादस्मिन्विश्रामोवेदैर्वेदैर्वेदैः• कृत्वायस्मात्पूर्णोधीरः कौत्स्यायुक्तः ॥ यथा । वन्देपादाम्भोजन्नित्यंसीताभर्त्तुः कृत्वासिन्धौसेतुंरक्षोनाथंहन्तुः । पैत्र्यामाज्ञांज्ञात्वाप्राप्तंराज्यंभ्रातुः स्वीयैः सर्वैर्लोकैः साकंनाकंयातुः ॥ विद्यां धरति । धृञ्• । कर्म्मण्यण् ॥

विद्याधिकारी । त्रि• उपनिषन्निर्वचनेनोक्तः ॥ विद्यायाः ब्रह्मविद्यायाः अधिकारी ॥ सद्विविधः• कृतोपास्तिरकृतोपास्तिश्च । तत्रोपास्तिसाक्षात्कारपर्य्यन्तामुपासनां कृत्वायोज्ञानेप्रवर्त्ततेसमुख्योविद्याधिकारी । इदानीन्तनस्तुप्रायेणाकृतोपासनएवौत्सुक्यमात्रात्तस्या

विद्यायांप्रवर्त्ततेसतुगौणोधिकारी।
तस्याज्ञानस्यसबातप्रदेशप्रदीपवत्स
हसानिवर्त्तनात् । ननु सर्वेषाम
पिविदुषामात्मनोनित्यप्राप्तिरूपो
मुख्याधिकारः किन्नस्याद्विशेषा
दविद्यानिवृत्तेरितिचेत्। शृणु। स्व
स्वायम्भावः। यस्तु प्राग्देवतासा
साक्षात्कारपर्य्यन्तं सगुणोपासनं वि
धायविद्यायांप्रवृत्तस्तस्यविचारेणज्ञा
नोत्पत्तौविघ्नाभावात्। आत्मनो
नित्यप्राप्तेव । यः पुनरुपासनमकृ
त्वाश्रवणाद्यनुष्ठायतत्त्वंनिश्चिनोति
तस्यचित्तवशीकरणाभावेविघ्नप्रस
ङ्गात्तत्प्रतिनियमविधिः। नच
तत्त्वज्ञानेनाज्ञानस्यनष्टत्वाद्विघ्ने
यर्थ्यमितिशङ्क्यम्। वशीकरणा
भावे। शास्त्रीयनश्येत्परमार्थबुद्धिरि
त्यज्ञानेपरमार्थत्वांशनाशेपि। जन्म
हेतुत्वज्ञानमात्रायोगात् । अन्यथा
वेदान्तेषूपास्तिविधीनामैकाग्र्यद्वा
राऽद्वितीयब्रह्मपरत्वंनस्यात् । अ
तस्तेषांश्रुतिप्रसिद्धश्रवणोच्चारणपूर्व
कमप्रतिबद्धसाक्षात्कारायनिरन्तरं
निर्गुणब्रह्मभावनाकार्य्या । अतएव
शास्त्रे। विदुषोविधिर्नास्तीत्युक्त्वा।
पुनर्विद्वानपिविधिमर्हतीतिब्रह्म
निष्ठाविधीयते। इत्याद्युक्तिर्नविरु
ध्यते । अधिकारिभेदेनव्यवस्थास
म्भवात् ॥

विद्यानिधिः। पुं। विद्यासम्प्रदाय
प्रवर्त्तके ॥

विद्यानैपुण्यकामः। त्रि। विद्याति
शयमात्रार्थिनि ॥

विद्याप्रयोजनम्। न। आत्यन्तिकसं
सारनिवृत्तौब्रह्मप्राप्तिलक्षणायाम्॥
विद्यायाः प्रयोजनम् ॥

विद्याभीप्सी। त्रि। विद्यार्थिनि ॥

विद्यारम्भः। पुं। प्राप्तेतुपञ्चमेवर्षे
विद्यारम्भञ्चकारयेदितिवचनबोधि
तेविद्यायाः प्रारम्भे ॥

विद्यार्थी। त्रि। विद्याभीप्सिनि ॥
विद्ययैवार्थः सोस्यास्तीति। इ-
निः ॥

विद्यावान्। त्रि। विद्याविशिष्टे ॥
पण्डिते ॥ विद्यास्त्यस्य । म-
तुप् ॥

विद्याविषयः। पुं। परब्रह्मणि। प्र
त्यगात्मभूते ॥ विद्यायाः विष
यः ॥

विद्युज्जिह्वः। पुं। राक्षसविशेषे ॥
त्रि। तडिदाभजिह्वे ॥

विद्युज्ज्वाला। स्त्री। कलिकारीवृ-
क्षे ॥ तडित्प्रभायाम् ॥

विद्युत्। स्त्री। मेघे पुष्ट्ये। दीर्घाका
रे। ज्योतिषि। तडिति। सौदा
मिन्याम्। चञ्चलायाम् ॥ साचतु
र्विधायथा। वातायकपिलाविद्युदा
तपायह्नितसिता। पीतावर्षायवि

स्रियादुर्भिक्षायासिताभवेत् ॥ सन्ध्यायाम् ॥ विशेषेणद्योतते । द्युतदीप्तौ । भ्राजभासेतिक्विप् ॥ त्रि० निष्प्रभे ॥

विद्युत्केश : । पुं० राक्षसविशेषे ॥

विद्युत्प्रियम् । न० कांस्ये ॥

विद्युत्वान् । पुं० मेघे ॥ विद्युत : सन्त्यस्मिन् । मतुप् ॥

विद्युन्माला । स्त्री० अनुष्टुप्छन्दोभेदे ॥ यथा । मोमोगोगोविद्युन्माला । वासोवल्लीविद्युन्मालावर्हश्रेणीशाक्रश्चाप : । यस्मिन्नास्तांतापोच्छित्त्यै गोमध्यस्थ : कृष्णाम्भोद : ॥ अपिच । उक्तायस्यामष्टौवर्णा : पादेपादेसर्वेदीर्घा: । विश्राम : स्याद्वेदैर्वेदै : साविद्युन्मालानिर्द्दिष्टा ॥ यथा । आगामिन्योनोयामिन्योयायायाताभूयोभूय : । अभ्रच्छायावत्तारुण्यंमानेनामेनस्यात्किन्ते ॥

विद्युन्माली । पुं० राक्षसविशेषे ॥

विद्योपयोग : । पुं० विद्यायोष्टसिद्धौ ॥ चतुर्भिश्चप्रकारैर्विद्योपयुक्ताभवति । आगमकालेन • आगमंकालस्यविद्याग्रहणकाल : । १ । स्वाध्यायकालेन • स्वाध्यायकालस्याभ्यासकाल : । २ । प्रवचनकालेन • प्रवचनकालोऽध्यापनकाल: । ३ । व्यवहारकालेन • व्यवहारोयज्ञानुष्ठनकर्म्मणि । ४ । तत्राद्ययोर्विद्यार्थ्यंयंबुद्धिमानिस्याद रपूर्वकमन्नवस्त्रादिलाभरूपोपयोग: । तृतीयेप्रतिष्ठा • सच्छिष्यलाभद्वारार्थप्राप्ति : सत्कारविशेषश्च । चतुर्थे • यज्ञादानुष्ठानकालेऽपशब्दप्रयोगप्रयुक्तप्रायश्चित्ताभाव : • कर्म्मसाङ्गता • दक्षिणालाभ : प्रतिष्ठाचेत्युपयोग : • तादृशस्योपयोग : सर्वाध्ययनएवेतिमहाभाष्यकारादय : ॥

विद्रम् । न० छिद्रे ॥

विद्रधि : । पुं० रोगविशेषे । हृद्ग्रन्थौ । हृद्व्रणे ॥ अस्यसम्प्राप्तिपूर्व्वकंसामान्यंलक्षणंयथा । त्वग्रक्तमांसमेदांसिप्रदुष्यास्थिसमाश्रिता : । दोषा : शोथंशनैर्घोरंजनयन्त्यायताभृशम् ॥ महामूलंरुजावन्तंवृत्तंव्याप्यथवायतम् । सविद्रधिरितिख्यातोविज्ञेय : षड्विधस्वस : ॥ पृथग्दोषै : समस्तैश्चक्षतेनाप्यसृजातथा । विद्रधि : षड्विध: प्रोक्तोविशेषोभाश्वसङ्गहे ॥ जलौकापातनंशस्तंसर्वस्मिन्नपिविद्रधौ । मृदुर्विरेकोलघ्वन्नंस्वेद : पित्तोत्तरंविना ॥ वेदनम् । विदेर्वहुलमन्यत्रापिसंज्ञाछन्दसोरितिवारक् । यद्वा । विद्रास्वप्ने पलायने । आतश्चोपसर्गइतिक: । विद्रंधीयतेऽस्याम् । डुधाञ् ० । कर्मण्यधिकरणेचेतिकि : ॥ यद्वा । विद्रस्यधानम् । इक्कृष्यादिभ्य : ॥

विद्रधिनाशन : । पुं० शोभाञ्जनवृक्षे ॥

विद्रव : । पुं॰ विद्रुतौ । पलायने ॥ धियि । बुद्धौ ॥ विद्रवणम् । द्रुगतौ । ऋदोरप् ॥ निन्दायाम् ॥ क्षरणे ॥

विद्रावित : । त्रि॰ पलायिते ॥

विद्रुत : । त्रि॰ पलायिते ॥ प्रचलिते ॥ द्रवीभूते स्रुत : प्राप्तद्रवीभावे । विलीने । द्रुते ॥ विद्रवतिस्म । द्रु गतौ । गत्यर्थेतिक्तः ॥

विद्रुति : । स्त्री॰ पलायने । प्रद्रावे ॥

विद्रुम : । पुं॰ रत्नवृक्षे ॥ प्रवाले ॥ किशलये ॥ विशिष्टोद्रुम : ॥ यद्वा । विशिष्टेद्रौवृक्षे भव : । विशिष्टोद्रुवृक्षोऽस्त्यस्यवा । द्युद्रुभ्यांम : ॥ त्रि॰विगतद्रुमेभूमिपर्वतादौ ॥

विद्रुमलता । स्त्री॰ नलीनामौषधौ ॥ शुषिराविद्रुमलताकपोताङ्घ्रिर्नटीनली ॥ विद्रुमस्येवलता ॥

विद्रुमलतिका । स्त्री॰ विद्रुमलतायाम् ॥

विद्वत्कल्प : । त्रि॰ ईषदूने विदुषि । विद्वद्देशीये ॥

विद्वत्संन्यास: । पुं॰ सम्यगनुष्ठितै : श्रवणमनननिदिध्यासनै: परन्तत्त्वं विदितवद्भि : सम्पाद्यमाने॰ श्रामफलभूतेचतुर्थाश्रमे ॥ तत्त्वयाज्ञवल्क्यादय : सम्पादयामासु : ॥

विद्वान् । त्रि॰ प्राज्ञे । दक्षे ॥ पण्डिते ॥ वेदविदि ॥ विदितसकलवेद्ये । आत्मविदि ॥ व्युत्थानमपरिग्रहश्चेतिद्वयंविविदिषूणांसाधनत्वेनोक्तम्॰ तत्॰ विदुषांस्वत : सिद्धमित्याह । लोकानुयायेथ पणाभ्योव्युत्थानस्यापरिग्रह : । द्वयंस्वाभाविकमेवविदुषांनतुयत्नत : ॥ आनन्दैकस्वभावंस्वमात्मानंपश्यत : कुत : । काम : परिग्रहोवास्यादयोकामइतिचश्रुते : ॥ वेत्ति । विदज्ञाने । विदे : शतुर्वसुरिति पाणिनीयसूत्रादेश: ॥ नविज्ञानादिज्ञानयुक्ते विद्वच्छब्द : प्रयुज्यते ॥ विद्वत्त्वञ्चनृपत्वञ्चनैवतुल्यंकदाचन । स्वदेशेपूज्यतेराजाविद्वान्सर्वत्रपूज्यते ॥

विद्विट् । त्रि॰ शत्रौ ॥

विद्वेष : । पुं॰ विद्वेषणे । द्विषअप्रीतौ । घञ् ॥

विद्वेषक : । त्रि॰ विद्वेष्टरि । द्वेषकर्त्तरि ॥ विद्वेष्टि । द्विष॰ण्वुल् ॥

विद्वेषणम् । न॰ विद्वेषे । वैरे ॥ अभिचारकर्मविशेषे ॥ स्निग्धानां द्वेषजननंमिथोविद्वेषणंमतम् ॥

विद्वेषणी । स्त्री॰ स्त्रीविशेषे ॥

विद्वेषी । त्रि॰ शत्रौ । वैरिणि ॥ विद्वेषोऽस्त्यस्यास्मिन्वा । इनि : ॥

विधनम् । त्रि॰ विनाशयति ॥

विधवनम् । न॰ कम्पने ॥

विधरण : । त्रि॰ विधारयितरि ॥

विधवा । स्त्री॰ रण्डायाम् । मृतभर्तृकायाम् । विश्वस्तायाम् । पतिर्हीनाचयानारीकामंभवतुपुत्रिणी । धनधान्यसमृद्धापिविधवेत्यु च्यतेबुधैः । विगतोधवोभर्त्तायस्याः॥

विधा । स्त्री॰ गजाशने । हुभाज्ञे । ऋद्धौ । विधौ । विधानम् । डुधाञ् धारणपोषणयोः । प्रातद्रुतिक : ॥ वेतने ॥ कर्मणिविधीयन्तेऽनया ॥ प्रकारे ॥ वेधने ॥

विधाता । पुं॰ वेधसि । द्रुहिणे ॥ स्मरे । कामदेवे ॥ विशेषेणदधाति । डुधाञ्॰ । तृच् । विरन्योपसर्गनिवृत्यर्थ : ॥ मदिरायामितिराजनिर्घण्ट : ॥ भृगुमुनेः पुत्रे ॥ विष्णौ कर्माणिदर्शपूर्णमासादीनि॰ तत्फलानिस्वर्गादीनिचविदधातिसृजति । पूर्ववत्तृच् ॥

विधातृभू : । पुं॰ नारदमुनौ ॥

विधातायु : । पुं॰ सूर्यशोभायाम्॥ ब्रह्मणोवयसि ॥

विधाची । स्त्री॰ पिप्पल्याम् ॥ मद्ये ॥ विधानकर्त्र्याम् ॥

विधानम् । न॰ हस्तिकवले ॥ विधौ॥ करणे ॥ अप्रवृत्तप्रवर्त्तने ॥ वेदे ॥ विधीयन्तेऽनेनकर्माण्यग्निष्टोमादीनि । डुधाञ्॰ । ल्युट् ॥

विधानग : । पुं॰ पण्डिते ॥ विधानं गायति । गै शब्दे । गापोष्टक् ॥

विधानोक्त : । त्रि॰ विधिशास्त्रबोधिते ॥ विधानेनउक्त : ॥

विधाय । अ॰ कृत्वेत्यर्थे ॥

विधायक : । त्रि॰ विधेर्ज्ञापके । विधानस्यकर्त्तरि ॥ विपूर्वोधाञो ण्वुल् ॥

विधायी । त्रि॰ विधानकर्त्तरि ॥

विधारक : । पुं॰ विधरणे ॥

विधि : । पुं॰ ब्रह्मणि । परमेष्ठिनि । काले ॥ दैवे । नियतौ ॥ विधाने ॥ विधिवाक्ये ॥ प्रकारे ॥ कल्पे ॥ क्रमे ॥ नियोगे ॥ विष्णौ ॥ वैद्ये ॥ यागोपदेशग्रन्थे ॥ कर्मणि ॥ लिङाद्यर्थे ॥ वेदे ॥ कुर्यात्क्रियेतकर्त्तव्यंभवेत्स्यादितिपञ्चमम् । एतत्स्यात् सर्ववेदेषुनियतंविधिलक्षणमितिन्यायविदांस्मरणम् ॥ तथाच॰ पुरुषार्थमुद्दिश्य॰ कर्मोपासनाज्ञानात्मककाण्डत्रयविधायको वेदो॰ विधिरितिफलितोर्थः॥ प्रमातज्ज्ञापकोवेदभागो॰ विधिरितिमीमांसका : । सचताद्दशप्रयोजनवदर्थविधानेनार्थवान्॰ यादृशंचार्थं प्रमाणान्तरेणाप्राप्तंविधत्ते । यथा॰ अग्निहोत्रंजुहुयात् स्वर्गकाम इतिविधिर्मानान्तरेणाप्राप्तंस्वर्गप्रयोजनवद्धोमंविधत्ते॰ अग्निहोत्रहोमेनस्वर्गंभावयेदितिवाक्यार्थबोधः । यत्रकर्ममानान्तरेणाप्राप्तं॰

तत्र तदुद्देशेन गुणमात्रं विधत्ते । यथा दध्ना जुहोतीत्यत्र होमस्याग्निहोत्रं जुहुयादित्यनेन प्राप्तत्वाद्धोमोद्देशेन दधिमात्रविधानं दध्ना होमं भावयेदिति । यत्र तूभयमप्राप्तं तत्र विशिष्टं विधत्ते । यथा सोमेन यजेतेत्यत्र सोमयागयोरप्राप्तत्वात् सोमविशिष्टयागविधानम् । सोमपदेन त्वर्थलक्षणया सोमवता यागेनेष्टं भावयेदिति वाक्यार्थबोधः । न चोभयविधाने वाक्यभेदः प्रत्येकमुभयस्याविधानात् किन्तु विशिष्टस्यैकस्य विधानात् ॥ विधिस्तु त्रिविधः नियोगविधिरधिकारविधिः प्रयोगविधिश्चेति ॥ विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसङ्ख्या विधीयते ॥ अप्राप्तप्रापको विधिरिति वैयाकरणाः ॥ न्यायमते विधिर्यथा । प्रवृत्तिः कृतिरेवात्र सा चेच्छातो यतश्च सा । तज्ज्ञानं विषयस्तस्य विधिस्तज्ज्ञापकोऽथवा ॥ विधिजन्यज्ञानात् प्रवृत्तिर्दृश्यते सा इच्छातः चिकीर्षातः चिकीर्षा च कृतिसाध्यत्वेष्टसाधनत्वज्ञानात् तज्ज्ञानस्य विषयः कार्यत्वमिष्टसाधनत्वञ्च विधिरिति प्राचीनमतम् । स्वमतमाह तज्ज्ञापकोऽथवेति । इष्टसाधनत्वानुमापकप्राप्ताभिप्रायो विधिप्रत्ययार्थः । इति हरिदासीयकुसुमाञ्जलिः ॥ विधिर्विधायक इति न्यायसूत्रम् । इष्टसाधनताबोधकप्रत्ययसमभिव्याहृतवाक्यं विधिः अग्निहोत्रं जुहुयात् स्वर्गकाम इत्यादि ॥ विधीयते अनेन सुखदुःखे । डुधाञ् उपसर्गे घोः किः ॥ विधत्ते इति विधिर्वा । बाहुलकात् कर्त्तरि किः ॥ यद्वा । विध विधाने । इन् । इगुपधात् किदिति कित्त्वान्न गुणः ॥ विधानमनेन वा । पूर्ववत् किः ॥

विधिगोचरः । त्रि॰ विधिकिङ्करे ॥

विधिज्ञः । त्रि॰ शास्त्रज्ञे ॥

विधित्समानः । त्रि॰ विधातुमिच्छति ॥

विधित्सा । स्त्री॰ विधातुमिच्छायाम् ॥ विपूर्वाद्दधातेः सनि मीमेत्यादिना इकारः । अत्र लोपोऽभ्यासस्येत्यभ्यासलोपः ततः स्त्रियामित्यनुवृत्तौ अप्रत्ययादिति अप्रत्यये टाप् ॥

विधित्सितः । त्रि॰ विधातुमीप्सिते । कर्त्तुमिष्टे ॥

विधित्सुः । त्रि॰ विधातुमिच्छौ ॥ विपूर्वाद्दधातेः सन्नन्तादुप्रत्ययः ॥

विधिदर्शी । पुं॰ सदस्ये । न्यूनाधिकविचारके ऋत्विग्विशेषे ॥ विधिं द्रष्टुं शीलमस्य । णिनिः ॥

विधिदृष्टः । त्रि॰ यथाशास्त्रं निश्चिते ॥ विधिना दृष्टः ॥

विधिदेशक : । पुं० सदस्ये । विधिद
र्शिनि ॥

विधियज्ञ : । पुं० विधिनानुष्ठेयमा
नेवाज्यज्ञे । दर्शपौर्णमासादौ ॥
विधिविषयोयज्ञ : ॥

विधिवत् । अ० यथाविधि । विध्यनु
सारेणेत्यर्थे ॥

विधिविषय : । त्रि० विधिजन्यप्रय
त्नभाव्ये ॥ विधेर्विषय : ॥

विधिहीन : । त्रि० यथाशास्त्रबोधित
विपरीते ॥ विधिनाहीन : ॥

विधु : । पुं० सुधांशौ । सोमे । चन्द्रे
॥ कर्पूरे । अच्युते । हरौ ॥ ब्रह्म
णि ॥ राक्षसे ॥ विध्यतिविरहिणम्
॰विध्यत्यसुरान्वा । व्यधताडने ।
पृभिदिव्यधिगृधिधृषिभ्य : कु : ।
ग्रहिज्येतिसम्प्रसारणम् ॥

विधुक्षय : । पुं० अमावास्यायाम् ॥

विधुत : । त्रि० त्यक्ते ॥ निरस्ते ॥ क
म्पिते ॥ विशेषेणधुत : ॥

विधुति : । स्त्री० कम्पने ॥

विधुन्तुद : । पुं० राहौ । सैंहिकेये ॥
विधुंतुदति । तुद० । विध्वरुषोस्तु
दइतिखश् । मुम् ॥

विधुपञ्जर : । पुं० खड्गे ॥

विधुप्रिया । स्त्री० चन्द्रपत्न्याम् ॥ दा
क्षायिण्योविधुप्रिया : ।इतिकोषा
न्तरम् ॥

विधुरम् । न० प्रविश्लेषे ॥ वैकल्ये
त्रि० विकले ॥ विगताधू : कार्यभा
र : । ऋक्पूरित्यप् । धुरोविगतइ
तिप्रादिसमासोवा ॥ न० प्रत्यवाये ॥
कष्टे ॥

विधुरा । स्त्री० रसालायाम् ॥ इ० मे० ॥

विधुरित : । त्रि० विह्वलिते ॥

विधुवनम् । न० विधूनने । कम्पने ॥
धूविधूनने । ल्युट् । गाङ्कुटादि
भ्यइतिङित्त्वाद्गुणाभाव : ॥

विधूत : । त्रि० कम्पिते ॥ त्यक्ते ॥ वि
धूयतेस्म । धूञ्कम्पने । क्त : । य
स्यविभाषेतिनेट् ॥

विधूननम् । न० कम्पने । विधुवने ।
धूञ्कम्पनेचुरादि : । ल्युट् । धू
ञ्प्रियोर्नुग्वक्तव्य : ॥ अश्वादीना
मङ्गानांकम्पने ॥

विधूनित : । त्रि० व्याहते ॥ कम्पिते
॥ धूञोण्यन्तात्कर्मणि० क्त : । धूञ्
प्रीञोरितिनुगागम : ॥

विधूम्र : । पुं० धूसरे । कृष्णरक्तमिश्रि
तवर्णे ॥ त्रि० तद्वति ॥

विधृत : । त्रि० विधारिते ॥ विशेषेण
धृते ॥ विष्टब्धे ॥

विधृति : । स्त्री० विधरणे ॥

विधेय : । पुं० मन्त्रे ॥ विधीयतेवि
नियुज्यतेब्राह्मणवाक्येनकर्माङ्गत्वे
नेतिहरिहरभाष्यम् ॥ त्रि० विनय
ग्राहिणि । वचनेस्थिते ॥ विधिज
न्यबोधविषये ॥ यथा । अनुवाद्यम

शुश्रूषुर्न विधेयमुदीरयेत् । नह्यल्पमप्यत्र किञ्चित्कुत्रचित्प्रतितिष्ठति ॥ विधातुं शक्य : । अचीयत् । इ यति । । गुण : ॥ विधिगम्ये । अ नुष्ठेये । कर्त्तव्ये ॥ बश्ये ॥

विधेयता । स्त्री० विधेयत्वे । विधिज न्यबोधविषयत्वे ॥ यथा ॥ यथाब्र ह्मवधादिषुपापस्य निषिद्धतयोपयुक्त प्रायश्चित्तादिज्ञाननैर्गुण्यं ० तथागङ्गा स्नानादिषुपुण्यस्य विधेयतावच्छेदक गङ्गादिस्नाननैर्गुण्यमितिप्रायश्चित्तत त्त्वम् ॥

विधेयवर्त्ती । त्रि० वशवर्त्तिनि ॥ वि धेयेवर्त्तते ० विधेयंवर्त्तयतिवा । णि नि : ॥

विधेयात्मा । पुं० वशीकृतान्त : कर णे ॥ विधेयआत्मायस्य ॥

विनत : । त्रि० प्रणते ॥ भुग्ने ॥ शि क्षिते ॥ विनमतिस्म । नम० । क्त : ॥ विशेषेणनतोवा ॥

विनता । स्त्री० तार्क्ष्यजनन्याम् । सुप र्णायाम् ॥ पिटकाभेदे ॥

विनतासूनु : । पुं० अरुणे । सूर्यसा रथौ ॥ गरुडे । खगेश्वरे ॥ विनता या : सूनु : ॥

विनति : । स्त्री० विनये ॥ विशिष्टान ति : ॥

विनद : । पुं० क्षुपाके । शिलीन्ध्रे ॥

विनम्र : । त्रि० विनयिनि ॥ विशेषे णनम्र : ॥

विनम्रकम् । न० तगरपुष्पे ॥

विनय : । पुं० शिक्षायाम् ॥ प्रणतौ । विनीतत्वे । निरहङ्कारे । सौशी ल्ये । अनौद्धत्ये । अवनतौ ॥ वि नयप्रशंसायथा । विनयोपग्रहार्थम् त्यै कुर्वीतनृपति : सुतान् । अवि नीतकुमारंहिकुलमाशुविशीर्यते । विनीतमौरसंपुत्रंयौवराज्येऽभिषेच येत् ॥ अपिच । वृद्धांश्चनित्यंसेवेत विप्रान्वेदविद : शुचीन् । वृद्धसे वीहिसततंरक्षोभिरपिपूज्यते ॥ ते भ्योधिगच्छेद्विनयंविनीतात्मापिनि त्यश : ॥ विनीतात्मादिनृपतिर्नवि नश्यतिकर्हिचित् ॥ बहवोऽविनया न्नष्टाराजान : सपरिच्छदा : । वन स्थाअपिराज्यानिविनयात्प्रतिपेदि रे ॥ वेणोविनष्टोऽविनयान्नहुषश्चैव पार्थिव : । सुदासोयवनश्चैवसुमुखो निमिरेवच ॥ पृथुस्तुविनयाद्राज्यंप्रा प्तवान्मनुरेवच । कुवेरश्चधनैश्वर्यं ब्राह्मण्यञ्चैवगाधिज : ॥ इतिमनु : ॥ द्विविधोविनय : स्वाभाविक : कृ त्रिमश्चेतिकौटिल्य : । विशिष्टोन य : ॥ दण्डे ॥ त्रि० वणिजि ॥ क्षि प्ते ॥ निभृते ॥ विजितेन्द्रिये ॥

विनयग्राही । त्रि० विधेये । वचनेस्थिते । आश्रवे ॥ विनयंग्रहीतुंशीलमस्य । सुपीतिणिनि : ॥

विनयस्थः । त्रि० विधेये । आश्रवे । वचनेस्थिते । आज्ञाकारिणि ॥ विनयेतिष्ठति । स्था० । कः ॥

विनया । स्त्री० बलौषधौ । वाट्यालके ॥

विनयी । त्रि० विनयान्विते ॥ विनयोऽस्यास्ति । इनिः ॥

विनर्द्दः । पुं० ऋषभकूजितसमस्वरविशेषे ॥ विशिष्टोनर्द्दः ॥

विनशनम् । न० तीर्थविशेषे । कुरुक्षेत्रे । सरस्वत्याः प्रथमादर्शनस्थले ॥ विनाशे ॥

विनष्टः । त्रि० अन्तर्हिते ॥ विनश्यति स्म । णश अदर्शने । गत्यर्थेतिक्तः ॥ छिन्ने । भिन्ने ॥ नाशाश्रये । ध्वंसविशिष्टे ॥ पतिते ॥

विनष्टिः । स्त्री० विनाशे ॥ णशेर्भावे क्तिन् ॥

विनसः । त्रि० विग्रे । गतनासिके ॥

विना । अ० वर्ज्जने । पृथक् । अन्तरेण । ऋते । हिरुक् । विनञ्भ्यां नानाञौ नसहेति० निषेधार्थाद्विशब्दान्ना ॥

विनाकृतः । त्रि० विरहिते । भिन्ने ॥ डु०त्रि० ॥

विनामः । पुं० शरीरस्यनम्रतायाम् । व्यथयावपुषोनमने ॥ विनमनम् । णम । घञ् ।

विनामकः । पुं० अधिमासे ॥

विनायकः । पुं० विघ्नराजे । गजानने । हेरम्बे ॥ तार्क्ष्ये ॥ विघ्ने ॥ ॥ जिने ॥ गुरौ ॥ विनयति हितमनुशास्ति । णीञ्० । ण्वुल् ॥ विशिष्टोनायकइतिवा ॥ विगतोनायकोनियन्ताऽस्येतिवा ॥ त्रि० नायकवर्ज्जिते ॥

विनायिका । स्त्री० तार्क्ष्यपत्न्याम् ॥

विनारुहा । स्त्री० विपर्णिकायाम् ॥

विनाशः । पुं० अदर्शने । विनष्टे ॥ ध्वंसे ॥ विनशनम् । णश अदर्शने । । घञ् ॥

विनाशकः । त्रि० विनाशकर्त्तरि ॥ विनाशयतितच्छीलादिः । णश० । विपूर्वोहेतुमण्ण्यन्तः । निन्दहिंसक्लिशखादविनाशपरिक्षिपेत्यादिना वुञ् ॥

विनाशी । त्रि० अनित्ये । देशकालवस्त्वात्मकत्रिविधपरिच्छेदवति ॥ विनष्टुंशीलमस्य । णिनिः ॥ विनाशकरणशीले ॥

विनाशोन्मुखः । त्रि० पक्के ॥ नाशोद्यते ॥ विनशनंविनाशः । भावेघञ् । उद्गतंमुखमारम्भोऽस्य । विनाशेउन्मुखः ॥

विनासकः । त्रि० अनासिके । गतनासिके ॥ विगतानासायस्यसः ॥

विनाहः । पुं० कूपाननपिधानके ॥ णह बन्धने । हलश्चेतिघञ् ॥

विनिगमकः । त्रि० विशेषेणनितरां बोधके । ज्ञापके ॥

विनिगमना । स्त्री० एकतरपक्षपातिन्यायुक्तौ । वैकल्पिकेषुवस्तुन्येकस्मिन्नवधारणायुक्तौ ॥

विनिद्रः । त्रि० उन्मीलिते । विकसिते । स्फुटिते । निद्रारहिते ॥ विगतानिद्राऽस्य ॥

विनिद्रत्वम् । न० निद्रारहितत्वे ॥ प्रबोधे ॥

विनिनीषुः । त्रि० विनेतुमिच्छौ ॥

विनिपातः । पुं० निपाते । अपाते । दैवादिव्यसने । दैविकानर्थे । विशिष्टोनिपातः ॥ अवमाने ।

विनिमयः । पुं० परिदाने । प्रतिदाने ॥ व्यतिहारे ॥ व्यत्यये । अन्यस्मिन्नन्याऽभासे ॥ बन्धके ॥ यथा । विक्रयैर्गोविनिमयैर्दत्त्वागोमांसखादके । व्रतं चान्द्रायणं कुर्यात्तथैसासाद्धीभवेत् ॥ इतिगोभिलवचनम् ॥ विशेषेणनिमीयते । मीञ् हिंसायाम् । एरच् ॥

विनियोगः । पुं० विनियोजने ॥ अनेनैतत्कर्त्तव्यं विनियोगः प्रकीर्त्तितः ॥ विशिष्टोनियोगः ॥ विभजने ॥ विनियोगोऽर्पणे फले० इ० हेमचन्द्रः ॥

विनियोगविधिः । पुं० अङ्गप्रधानसम्बन्धबोधकेविधौ ॥ यथा । दध्नाजुहोतीति । सहितृतीयाप्रतिपन्नाङ्गभावस्यदध्नोहोमसंबन्धं विधत्ते० दध्नाहोमं भावयेदिति । गुणविधौच धात्वर्थस्यसाध्यत्वेनैवान्वयः । क्वचिदाश्रयत्वेनापि । यथादध्नेन्द्रियकामस्यजुहुयादित्यत्र० दधिकरणकेनेन्द्रियं भावयेत् । तत्रकिन्निष्ठमित्याकाङ्क्षायां० सन्निधिप्राप्तहोमआश्रयत्वेनान्वेति । एतस्य धेः सहकारिभूतानि० श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यारूपाणि षट्प्रमाणानि । एतत्सहकृतेनानेनविधिनाङ्गत्वं परोद्देशसाध्यप्रवृत्तिकृतिसाध्यत्वरूपं पारार्थ्यापरपर्यायं ज्ञाप्यते ॥

विनियोजितः । त्रि० प्रवर्त्तिते । विनियुक्ते ॥

विनिर्णीतः । त्रि० विचार्यस्थापिते ॥ विशेषेणनिर्णीतः ॥

विनिर्देश्यः । त्रि० वक्तव्ये ॥

विनिर्धूतः । त्रि० दूरमस्थयाचलिते ॥ विशेषेणनितरांकम्पिते ॥ समुन्मूलिते ॥ परित्यक्ते ॥

विनिर्भयः । पुं० साध्यगणविशेषे । त्रि० भयरहिते ॥

विनिर्मुक्तः । त्रि० वियुक्ते ॥

विनिर्मोकः । पुं० विनिर्मुक्तौ ॥

विनिर्वृत्तः । त्रि० निष्पन्ने । समाप्ते ।

विनिहत: मङ्गलविशिष्टे । निरस्थे । शान्ते ॥

विनिवृत्तकाम: । वि॰ विवेकवैराग्यद्वाराव्यक्तसर्वकर्मणि ॥ विशेषेणनिवृत्त: कामोऽस्य ॥

विनिवेशित: । वि॰ प्रतिष्ठापिते । स्थापिते ॥

विनिश्चित: । वि॰ प्रमाणतोनिर्णीते ॥

विनिष्कल: । वि॰ निरवयवे ॥ विशेषेणनिर्गता: कला: यस्मात् ॥

विनिहत: । वि॰ विनष्टे ॥

विनीत: । पुं॰ सुवहाश्वे । साधुवाहिनि ॥ वणिजि ॥ दमनकवृक्षे ॥ शिक्षितवृषभादौ ॥ वि॰ जितेन्द्रिये । अपनीते । हृते । निभृते । विनयान्विते । अनुवृत्ते । नम्रे । शिक्षिते ॥ क्षिप्ते । कृतदण्डे ॥ व्यनायि॰ विनीयतेस्मवा । णीञ् प्रापणे । क्त: ॥

विनीतक: । पुं॰ दमनकवृक्षे ॥ पुं॰ न॰ वैनीतके । परम्परावाहने ॥

विनीय: । पुं॰ पिष्टऔषधिविशेषे । कल्के ॥ कपटे ॥ विनीयतेसिद्धिं प्राप्यते ॥ णीञ् । विपूर्यविनीयेतिक्यप् पपे ॥

विनीयमान । वि॰ शिक्ष्यमाणे ॥

विनेता । पुं॰ देशके । नियामके ॥ राजनि । त्रू॰ मे॰ ॥ विशिष्टोनेता ॥ देशिके ॥ त्रू॰ हे॰ चन्द्र: ॥

विनेय: । त्रि॰ नेतव्ये ॥ विनेतुंयोग्य: । णीञ्॰ । अचोयत् ॥ दण्ड्ये ॥

विनेयक: । पुं॰ आदेशके ॥ राज्ञि ॥

विनोक्ति: । स्त्री॰ अलङ्कारविशेषे ॥ यथा । विनोक्तिश्चेद्विनाकिञ्चित् प्रस्तुतंहीनमुच्यते । विद्याहृद्यापि सावद्याविनाविनयसम्पदम् ॥ किञ्चित्॰ विनाप्रस्तुतंयद्यहीनंदुष्टमुच्यतेचेत्तदाविनोक्तिर्नामालङ्कार इत्यर्थ: ॥ प्रकारान्तरमपि । तत्र किञ्चिद्विनारम्यंविनोक्ति: सापि कथ्यते । विनाखलैर्विभात्येषाराजेन्द्रभवत: सभा ॥ तत्प्रस्तुतंकिञ्चिद्विनारम्यञ्चेत्सापिविनोक्तिर्नामालङ्कार: कथ्यते ॥

विनोद: । पुं॰ क्रीडायाम् ॥ यथा । विनोदायचैतन्यमेकंविभज्यद्विधादेवि॰ जीवस्वरूपेतिनाम्ना । शिवस्याजीवत्वमापादयन्तीपुनर्जीवमेनंशिवंत्वाकरोषीति ॥ कुतूहले ॥ चमत्कारविशेषे ॥ अपनोदे ॥ राजगृहविशेषे ॥ आलिङ्गनविशेषे ॥ तल्लक्षणंयथा । नायकोनायिकायाद्विष्पादंवामपादंवास्वमध्यदेशे॰ स्वदक्षिणपादंवामपादंवा॰ नायिकामध्यदेशेनिधाय॰ वक्षसिवक्ष: ॰ ओष्ठेओष्ठंदत्वायदाश्लिष्यतितद्विनोदकामशास्त्रम् ॥

विनोदित: । वि॰ अपनीते ॥ सम्भा

रविमोदे ॥ तारकादित्वादितच् ॥

विन्दः । पुं॰ विजयाख्ये मुहूर्त्ते ॥ विन्दति । विद्लृ लाभे । अनुपसर्गाल्लिम्पविन्दधारीत्यादिना शः । शेमुचादीनामिति नुम् ॥

विन्दुः । पुं॰ जलकणायाम् । विप्रुषि । पृषते ॥ दन्तक्षतान्तरे ॥ भ्रुवोर्मध्ये ॥ रूपकार्थप्रकृतौ ॥ लवे ॥ अनुस्वारे ॥ नादाङ्गे ॥ त्रि॰ वेदितरि । ज्ञातरि ॥ विज्ञानशीले ॥ विन्दति॰ विदि अवयवे । बाहुलकात् उः । पवर्गीयादिः ॥ यद्वा । वेत्ता तच्छीलः । विन्दुरिच्छुरिति साधुः ॥ दातरि ॥ वेदितरि ॥

विन्दुचित्रकः । पुं॰ मृगविशेषे ॥ विन्दुभिश्चित्रः ॰स एव कः ॥

विन्दुजालम् । न॰ विन्दुजालके ॥

विन्दुजालकम् । न॰ तारुण्याज्जायमाने गजमुखादिस्थविन्दुसमूहे । पद्मके ॥ विन्दूनां जालकमिव ॥

विन्दुतन्त्रः । पुं॰ शारिफलके ॥ तुरङ्गके ॥

विन्दुपत्रः । पुं॰ भूर्जवृक्षे ॥

विन्दुरेखकः । पुं॰ पक्षिविशेषे ॥

विन्दुसरः । न॰ हैमवते॰ सरोविशेषे ॥ यथा । अभ्युत्तरेण कैलासं शिवं सर्वौषधिं गिरिम् । गौरन्तु पर्वतं श्रेष्ठं हरितालमयं प्रति ॥ हिरण्यशृङ्गः ॰सुमहान् दिव्यौषधमयो गिरिः । तस्य पादे महद्दिव्यं सरः काञ्चनसन्निभम् ॥ रम्यं विन्दुसरो नाम यत्र राजा भगीरथः । गङ्गार्थे स तु राजर्षिरुवास बहुलाः समाः ॥ दिवं यास्यन्ति मे पूर्वे गङ्गातोयपरिप्लुताः । तत्र त्रिपथगा देवी प्रथमन्तु प्रतिष्ठिता ॥ सोमपादात् प्रसूता सा सप्तधा प्रतिभज्यते । यूपा मणिमयास्तत्र चितयश्च हिरण्मयाः ॥ तत्रेष्ट्वा क्रतुभिः सिद्धः शक्रः सुरगणैः सह । दिव्यच्छायापथस्तत्र नक्षत्राणान्तु मण्डलम् ॥ दृश्यते भास्वरा रात्रौ देवी त्रिपथगा तु सा । अन्तरीक्षं दिवञ्चैव भावयित्वा भुवं गता ॥ भवस्य स्वाङ्के पतिता संरुद्धा योगमायया । तस्या ये विन्दवः केचित् क्रुद्धायाः पतिता भुवि ॥ कृतस्तु तैर्विन्दुसरस्ततो विन्दुसरः स्मृतम् ॥ इति मात्स्ये १०१ अध्यायः ॥

विन्ध्यः । पुं॰ जलयालके । विन्ध्याचले ॥ व्याधे ॥ विरुद्धं ध्यायति । ध्यै चिन्तायाम् । आतश्चोपसर्ग इति कः । पृषोदरादिः ॥ यद्वा । विदूध्यते । जिद्धौदीर्घाण्यत् । अन्तर्भावितण्यर्थः । शकन्ध्वादिः । अघ्न्यादिर्वा ॥ नर्मदासुरसाद्याश्च नद्यो विन्ध्यविनिर्गताः ॥

विन्ध्यकूटः । पुं॰ अगस्त्यमुनौ ॥ विन्ध्याद्रिशृङ्गे ॥

विन्ध्यवासिदेश : । पुं॰ विन्ध्यस्थदेशेषु ॥ यथा । मालवाश्च करूषाश्च मेकलाश्चोत्कलैः सह । उत्तमार्णा दशार्णाश्च भोजाः किष्किन्धकैः सह ॥ तोषलाः कोशलाश्चैव त्रैपुरा वैदिकास्तथा । तुमुरास्तुम्बुराश्चैव पटुमा नैषधैः सह ॥ अनूपास्तुण्डिकेराश्च वीतिहोत्रा ह्यवन्तयः । एते जनपदाः ख्याता विन्ध्यपृष्ठनिवासिनः ॥ इति मत्स्यपुराणम् ॥

विन्ध्यवासी पुं॰ व्याडिमुनौ ॥

विन्ध्यवासिनी । स्त्री॰ विन्ध्याचलनिवासिन्यां दुर्गायाम् ॥ विन्ध्ये तु तीर्थं देवार्थं हतो घोरो महाभटः । यया पितृवसा वासा तेन सा विन्ध्यवासिनी ॥ इति देवीपुराणम् ॥

विन्ध्यस्थ : । पुं॰ व्याडिमुनौ । त्रि॰ विन्ध्याचलस्थिते ॥ विन्ध्ये तिष्ठति स्था॰ । क : ॥

विन्ध्या । स्त्री॰ लवल्यां च ॥ त्रुटौ । सूक्ष्मैलायां ॥

विन्ध्याचलनिवासिनी । स्त्री॰ विन्ध्यवासिन्याम् ॥ नन्दगोपगृहे जाता यशोदागर्भसम्भवा । ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी ॥ विन्ध्याचले तथापि गङ्गातीरे निवासिनीति बोध्यम् । अयमवतारो भगवत्या जात एवेति पुराणप्रसिद्धम् ॥

विन्ध्यावली । स्त्री॰ बलिपत्न्याम् । बाणराजमातरि ॥

विन्ध्यावलीपुत्र : । पुं॰ बाणासुरे ॥

विन्ध्यावलीसुत : । पुं॰ बाणराजे ॥

विन्न : । त्रि॰ विचारिते । लब्धे ॥ स्थिते ॥ ज्ञाते । विद्यते स्म । विद विचारणे । क्त: । नुदविदेति वा नत्वम् ॥

विन्यस्त : । त्रि॰ क्रमेणस्थापिते । रचिते ॥ कृतविन्यासे ॥ विशेषेणात्यक्ते ॥ विन्यस्यते स्म । अस॰ । क्त : ॥

विन्याक : । पुं॰ छत्राके ॥

विन्यास : । पुं॰ विभज्यस्थापने ॥ यथा । गुह्येषु मणिविन्यासो विधेयो नवदण्डवत् । विशुद्धक्षीरकन्यासो विधेय : सदनोपरि ॥ तेन सर्वाणि गुह्यानि परिष्ठानि मनोभुजामिति युक्तिकल्पतरु : । विन्यसनम् । असु क्षेपणे । विनिपूर्व : । ततो घञ् ॥ संनिवेशे ॥ विशिष्टो न्यास : । रचने ॥

विपक्ष : । पुं॰ रिपौ । द्विषि । अविति । शत्रौ ॥ स्वाभाववति । निश्चितसाध्याभाववति ॥ यथा॰ धूमवत्त्वहेतौ ह्रद : ॥ विरुद्ध : पक्षोऽस्य । विविध : पक्षोऽस्य वा ॥

विपञ्चिका । स्त्री॰ विपञ्च्याम् ॥

विपञ्ची । स्त्री वीणायाम् । वल्लक्यां

म् ॥ विपञ्चीषु सप्तस्वरान् वा दयन्त्यस्तबद्दारिगायन्तिगन्धर्वक- न्या : । अथ सावधानेनचित्तेनमा त: समाकर्णयत्वं मयाप्रार्थितासि विपंचपतिविस्तारयतिशब्दं । पचि विस्तारे । ण्यन्तादच् । गौरादि : । केलौ । लीलायाम् ॥

विपण : । पुं॰ विक्रये । विक्रयक्रिया याम् ॥ विपणनम् । पणव्यवहा रे । घञ् । संज्ञापूर्वकत्वान्नवृद्धि: । खनोघचेतिघोवा ॥

विपणि : । पुं॰ स्त्री॰ विक्रयार्थप्रसा रितनानाद्रव्यायांवणिग्वीथ्याम् । पण्यवीथिकायाम् । वणिज् व्यवहा र॰ बजार॰ बाणिज्जावीथी॰ इतिच भाषाप्रसिद्धायाम् । पण्यवीथ्याम् । वणिजांविक्रयस्थाने ॥ विपण्यते॰ ऽस्यांवा । पण॰ । सर्वधातुभ्यइन् ॥ विपणन्त्यत्रवा । इकृष्यादिभ्य: ॥

विपणी । पुं॰ वणिजि । विपणीव्यव हार : सोऽस्यास्ति । इनि : ॥ बुध भेदे ॥

विपणी । स्त्री॰ पण्यवीथ्याम् । कृदि कारादितिङीष् ॥

विपण्यु : । त्रि॰ विगतव्यवहारे ॥

विपति : । पुं॰ खगेश्वरे । गरुडे ।

विपत्ति : । स्त्री॰ यातनायाम् ॥ आ पदि । विपदि ॥ मरणे । विनाशे । यथा । यस्मिन्राशिगतेभानौविप त्तिंयान्तिमानवा : । तेषांतत्रैवक र्त्तव्यापिण्डदानोदकक्रिया ॥ विपद नमनयावा । पदगतौ । स्त्रियांक्तिन् ॥ पुं॰ विशिष्टपदातौ ॥

विपथ : । पुं॰ निन्दितपथे । व्यध्वे । दुरध्वे । कदध्वनि । कापथे ॥ वि रुद्ध : पन्था : । प्रादयोगताद्यर्थइ तिसमास : । ऋक्पूरित्य : ॥

विपत्॰ द् । स्त्री॰ विपत्तौ । विपद्यनम नयावा । सम्पदादित्वात्क्विप् ॥ तृतीयतारायाम् ॥

विपदम् । न॰ नभसि ॥ वीनांवयसां पदंविहारस्थानम् ॥ त्रि॰ विगतप्र तिष्ठे ॥

विपदा । स्त्री॰ विपदि ॥

विपन्न : । पुं॰ भुजङ्गमे ॥ त्रि॰ विपदा क्रान्ते ॥ नष्टे ॥ विपद्यतेस्म । प द॰ । क्त : । नत्वम् ॥

विपरिणाम : । पुं॰ विशिष्ट : परि- णामे ॥

विपरिश्रम : । पुं॰ आयासेसत्यपिश्र मरहिते ॥

विपरीत : । त्रि॰ तम : प्रकाशावि वान्योन्यव्याहतरूपे । प्रतिकूले । उलटा॰ इ॰ भा॰ ॥ यथा॰ धर्मविप रीतोऽधर्म : ॥ पुं॰ रतिबन्धविशेषे ॥ यथा । पादमेकमुरौकृत्वाद्वितौ यंकटिसंस्थितम् । नारीषुरमते कामीविपरीतस्तुबन्धक : ॥ अपिच

। पादमेकमुरीकृत्वा द्वितीयंस्कन्धसं
स्थितम । कामिन्या : कामयेत्का
मौबन्ध : स्याद्विपरीतक : ॥

विपरीतभावना । स्त्री० यतस्मिंस्तद्
बौ ॥ यद्यथावस्तितस्यतत्त्वंद्वित्वा
ऽन्यथात्त्वधी : । विपरीताभावना
स्यात्पिचादावरिधीर्यथा ॥

विपरीता । स्त्री० कामुक्याम् ॥

विपर्ण : । त्रि० पर्णरहिते ॥

विपर्णक : । पुं० पलाशवृक्षे ॥ त्रि०
पत्ररहिते ॥

विपर्य्यय : । पुं० व्यतिक्रमे । व्यत्या
से । विपर्यासे । व्यत्यये ॥ मिथ्या
ज्ञाने ॥ यथाशुक्तिं बिन्दु रजतमिति
॥ अन्यथाभावे । देहादिष्वात्माभि
मानलक्षणे ॥ यथार्थानिश्चये । अ
तत्त्वज्ञाने ॥ विपर्ययादिष्यतेबन्ध :
। अविद्यास्मितारागद्वेषाभिनिवे
शा : यथासङ्ख्यंतमोमोहमहामो
हतामिस्रान्धतामिस्रसज्ञका : पञ्च
विपर्ययभेदाभवन्ति ॥ लक्षणन्तुयथा
। किञ्चित्सामान्यतोन्यत्रमतिरन्या
विपर्यय: । किञ्चित्साधारण्यादन्य
स्मिन्नन्यादृशीबुद्धिर्विपर्यय : । मरु
मरीचिकास्विवजलावगति : ॥ अ
पिच । विपर्ययस्तमोयोनिर्मिथ्या
रूपतयासच । सामान्यमात्रकाभा
सात्सत्त्वात्मेतिविनिश्चित: ॥ वि
पर्ययस्यमिथ्यारूपत्वात्तम : प्रभ
वत्वम्० सचविपर्यय : साधारण्य
मात्रप्रथनात्प्रकाशरूप : सत्त्वात्म
कोपिनिश्चित : ॥ विपर्ययणम् । ब्रू
णगतौ । एरच् ॥

विपर्य्यस्त : । त्रि० मिथ्याज्ञानविशि
ष्टे ॥ विपरीते ॥

विपर्य्याय : । पुं० विपरीतमयने ।
अन्यस्यान्यरूपग्रहणे ॥

विपर्य्यास : । पुं० विपर्यये । व्यत्य
ये । व्यतिक्रमे । यतस्मिंस्तद्बुद्धौ
। अविवेके ॥ विपर्य्यसनम् । अ
सु० । घञ् ॥

विपव्य : । त्रि० शोधनीये ॥

विपश्चित् । त्रि० विदुषि । दोषज्ञे ।
पण्डिते । अत्यन्तविवेकिनि । मे
धाविनि ॥ सर्वज्ञे० निरस्तभेदे० अ
विपरिलुप्तचैतन्यस्वभावे ॥ परमात्म
नि ॥ विप्रकृष्टंनिश्चिनोति० चेतति०
चिन्तयतिवा । पृषोदरादि : ॥

विपाक : । पुं० पचने ॥ स्वादे ॥
कर्मणोविसदृशफले ॥ कर्मणः :
परिणामे । दुर्गतौ ॥ जात्यायु
र्भोगात्मकेकर्मफले ॥ पचनंपा
क : विशिष्टपाक : विरुद्ध : पा
कोऽस्यवा ॥ विपच्यतेवा । घ
ञ् ॥ विपाककटुयत्कर्मनतच्छं
सन्तिपण्डिता : ॥ जाठरेणा
ग्निनायोगात्यदुदेतिरसान्तरम् ।
रसानांपरिणामान्तेसविपाकइति

सृतद्गतिसुश्रुतः ॥ अपिच । मिष्टः कटुश्चमधुरमम्लोऽम्लंपच्यते रसः । कटुतिक्तकषायाणांपाकः स्यात्प्रायशः कटुः ॥ तथा चवाग्भटः । त्रिधारसानांपाकः स्यात्स्वाद्वम्लकटुकात्मकः । प्रायः पदेन• व्रीहिः स्वादुरम्लविपाकः शिवाकषायामधुपाका । शुण्ठीकटुकमधुरपाकेत्यादिः ॥ विपाकानांगुणायथा । स्निग्धकृन्मधुरः पाकोवातपित्तहरोमतः । अम्लस्तुकुरुतेपित्तंवातञ्च श्लेष्मगदापहः ॥ कटुः करोतिपवनंकफंपित्तञ्चनाशयेत् । विशेषएषरसतोविपाकानांनिदर्शितः ॥

विपाचनम् । न• नरके ॥

विपाटः । पुं• वाणे अस्त्रकाण्डके । शरे ॥ विपाटयति । पचाद्यच् ॥

विपाण्डुः । पुं• शुभ्रे ॥ अति शुभ्रे ॥ त्रि• तद्वति ॥

विपादिका । स्त्री• । पादस्फोटे । बिवाइ• इ• भा• ॥ प्रहेलिकायाम् ॥ वैपादिकंपाणिपादेस्फुटनंतीव्रवेदनम् । कण्डुमद्भिः सरागैश्चगण्डैरलसकंचितम् ॥ विपादिकावातश्लेष्मोद्भवेतिमाधवः । अयंकुष्ठरोगः ॥

विपाट् । स्त्री• विपाशायाम् ॥ पाशंविमोचयति । सत्त्यापपाशेत्यादिना• पाशान्मोचनद्युतिणिच् । क्विप्चेतिक्विप् ॥

विपाशः । त्रि• पाशरहिते ॥

विपाशा । स्त्री• नदीविशेषे । विपाशि ॥ पाशंविमोचयति । सत्त्यापपाशेत्यादिना• पाशान्मोचनद्युतिणिच् । ततः पचाद्यच् । पुत्रशोकाद्वसिष्ठेपाशंबद्ध्वाप्रविष्टंवशिष्ठंपाशच्छेदात्विपाशितवतीविमुक्तपाशंकृतवतीतिविपाशा । अस्याजलस्यगुणायथा । शतद्रोर्विपाशायुजः सिन्धुनद्याः सुशीतंलघुस्वादुसर्वामयघ्नम् । जलंनिर्मलंदीपनंपाचनञ्चप्रदत्तेबलंबुद्धिमेधायुषञ्चेतिराजनिघण्टः ॥

विपिनम् । न• अरण्ये । गहने । वने ॥ वेपन्तेऽत्र । टुवेपृकम्पने । वेपितुह्योर्ह्रस्वश्चेतीनन् ॥ विशेषापियत्यवत्वौ । पिगतौ । बाहुलकान्नक् ॥

विपिनतिलकम् । न• अतिशक्करीछन्दः प्रभेदे ॥ तल्लक्षणंयथा । विपिनतिलकंनसनरेफयुग्मैर्भवेत् । यथा । विपिनतिलकंविकसितंसिन्नागमेमधुकृतमदैर्मधुकरैः क्वणद्भिर्वृतम् । मलयमरुतारचितलास्यमालोकयन्व्रजयुवतिभिर्विहरतिस्ममुग्धोहरिः ॥

विपीडः । त्रि• निर्बाधे ॥

विपुलः । पुं॰ मेरुपश्चिमभूधरे । मेरोः स्थैर्य्यायवेधसासृष्टेषुचतुर्षुविष्कम्भशैलेषु॰प्रतीच्यांविपुलोनामविष्कम्भशैलोनीलवर्णः पञ्चाशत्सहस्रयोजनोच्छ्रायोऽस्ति॰यत्रयोजनसहस्रोन्नतिमानश्वत्थपादपोऽस्ति ॥ सुमेरौ ॥ हिमाचले ॥ त्रि॰पृथुले । विशाले ॥ अगाधे । दक्षिणपश्चिमोत्तरद्वारगृहे ॥ विपोलति । पुलमहत्त्वे । इगुपधेतिकः ॥ विशिष्टपुलके ॥

विपुलपुलिना । स्त्री॰ नद्याम् ॥

विपुलरसः । पुं॰ इक्षौ ॥

विपुला । स्त्री॰ पृथ्व्याम् । क्षितौ ॥ आर्य्याप्रभेदे ॥ यथा । पथ्याविपुलाचपलामुखचपलजघनचपलाश्च । गीत्युपगीत्युद्गीतयआर्य्यागीतिश्चनवधार्य्या ॥ संलङ्घ्यगणत्रयमादिमंशकलयोर्द्वयोर्भवतिपादः । यस्यास्तांपिङ्गलनागोविपुलामितिसमाख्याति ॥ पुंसांकालिकालव्यालहतानांनास्त्यपहतिरन्यापि । वीर्य्यविपुलामुखेचेत्स्यादुगोविन्दाख्यमन्त्रोक्तिः ॥

विपुलांसः । त्रि॰ मांसलोन्नतभुजशिरस्के ॥

विपुलाश्रवा । स्त्री॰ गृहकुमार्य्याम् ॥

विपूयः । पुं॰ रज्ज्वादिकरणायशोधयितव्ये॰ मुञ्जे ॥ विपूयते । पूञ्पवने । विपूयविनीयेतिक्यप् । मुञ्जे ॥ यथा । वसानांवल्कलैश्शुद्धैर्विपूयैः कृतमेखलाम् । श्यामामञ्जनपिण्डाभांदण्डिनीमजिनाम्बरामितिभट्टिः ॥

विपोथितः । त्रि॰ आघातेनाधःपातिते ॥ आमर्द्दिते ॥

विप्रः । पुं॰ ब्राह्मणे ॥ तल्लक्षणंयथा । जन्मनाब्राह्मणोज्ञेयः संस्कारैर्द्विजउच्यते । विद्ययायातिविप्रत्वंत्रिभिःश्रोत्रियलक्षणमितिप्रायश्चित्तविवेकः ॥ विशेषेणप्रातिपूरयतिषट्कर्म्माणि । प्रापूर्त्तौ । आतश्चोपसर्गइतिकः ॥ उप्यतेधर्म्मबीजमत्रवा । डुवप्॰ऋज्रेन्द्रेतिसाधुः ॥ विपातिवा॰विपतिवा । विपक्षेपे ॥ अश्वत्थे ॥

विप्रकर्षः । पुं॰ विशेषे ॥ विशिष्टः प्रकर्षः ॥

विप्रकारः । पुं॰ अपकारे । निकारे ॥ विप्रकरणम् । कृञोभावेघञ् ॥ तिरस्कारे ॥

विप्रकाष्ठम् । न॰ तूलवृक्षे ॥

विप्रकृतः । त्रि॰ तिरस्कृते । निकृते । यत्रापकारः कृतस्तस्मिन् ॥ विप्राकारि । क्तः ॥ विप्रेणकृते ॥

विप्रकृतिः । स्त्री॰ विप्रकारे ।

विप्रक्राय्यम् । न॰ ब्राह्मणस्यकर्त्तव्ये ॥

यथा । अध्यापनमध्ययनं यजनं याजनं दानं प्रतिग्रहश्चैव षट्कर्माण्यग्रजन्मनः ॥ तथा । अध्यापनमध्ययनं यजनं याजनं दानं प्रतिग्रहः । षट् कर्माणि ... वा नध्ययनं तथैति राट् ॥ वैश्य : सदा प्रापयित्वा ... इतीयम् । कर्मस्वऽस्थत्वव्यवहार आनिकर्मण्येषाम्नेकान्यपरान्यजानाम् ॥ यदृर्शकर्माणि तदेवक्ष्येसंसाधितान्येवहियन्ति सिद्धिम् । ततश्च स्ववर्णव्यवहारकालंनयेन्मनीषीयुगपत्रयर्द्धिम् ॥ अथविप्रादीनांस्वभावकृत्यमाह । शमोदमः स्वस्मथार्जवंक्षमाशौचं तपोज्ञानकथामराचनम् । तीर्थं तथास्तिक्यमभिप्रसङ्गति : स्वभावकर्माग्रजन्मनेर्मृधव्रतम् ॥ शौर्यंबलंधैर्यं धृतिर्धृतिर्मृधं विद्यासुदीर्घस्त्वरतापवर्ज्जनम् । क्षमाभृत : कर्मनिसर्गजंविशोवाणिज्यगोरक्षवनकर्षणश्चिति ॥ द्विजातिसेवावनिदेवताश्रयाधर्मोविधि :शूद्रनिसर्गकर्मच । स्वभावकर्मप्रविहायैन्यथात्वयश्चरेत्सोऽस्यअकर्मभनर्मभाक् ॥ इतिकालिदास : ॥

विप्रकृष्ट :)
विप्रकृष्टक :) त्रि॰ दूरे ॥ विप्रकृष्यतेस्म । कृषि : क्त : । स्वार्थेकनिविप्रकृष्टकोपि ॥

विप्रचित्ति : । पुं॰ दनोगर्भेकश्यपाज्जातेऽसुरविशेषे ॥

विप्रतिपत्ति : स्त्री॰ विरुद्धकोटिद्वयोपस्थापकेशब्दे ॥ विरुद्धाप्रतिपत्ति : ॥ विरोधे ॥ विकृतौ ॥

विप्रतिपन्न : । त्रि॰ विरुद्धतयावगते ॥

विप्रतिषिद्ध : । त्रि॰ निषिद्धे ॥

विप्रतिषेध : । पुं॰ तुल्यबलविरोधे ॥ परस्परविरोधे ॥ विप्रतिपूर्वात्कामं व्यतिहारेवर्त्तमानात्सेधतेर्घञ् ॥

विप्रतिसार : । पुं॰ पश्चात्तापे ॥ विप्रतिसरणम् । स्मृतौ । घञ् । उपसर्गस्यघञीतिपाक्षिकोदीर्घाभाव: ॥

विप्रतीसार : । पुं॰ पश्चात्तापे । अनुतापे । कौकृत्ये ॥ अनुशये ॥ रुषि । रोषे ॥ विप्रतिसरणम् । सृ॰ । घञ् । उपसर्गस्यघञीतिदीर्घ: ॥

विप्रदेश : । पुं॰ फलमूलादिशुष्कद्रव्ये ॥ ब्राह्मणतमो ॥ विगत : प्रदेश : । विशेषेण प्रकृष्टोवादेशोस्य । विप्रस्यवादेश : ॥

विप्रप्रिय : । पुं॰ पलाशे ॥ विप्राणां प्रिय : ॥ विष्णौ । श्रीरामचन्द्रे ॥ त्रि॰ ब्राह्मणवल्लभे ॥ विप्रा : प्रियायस्य स : ॥

विप्रदास : । पुं॰ कायस्थे । मसीशे ॥

विप्रयाणम् । न॰ पलायने ॥

विप्रयुक्त : । त्रि॰ विभिन्ने । विश्लिष्टे ॥

विप्रयोग : । पुं॰ विरहे । ब्राह्मणे : सहसङ्गमे ॥ विप्रयोजनम् । युजिर् योगे । घञ् ॥ विरुद्ध : प्रयोगोवा ॥ विशेषेणप्रकृष्टोवायोग : ॥ विप्राणांवायोग : ॥ विप्रलम्भे ॥

विरहोविसम्वादोवैतिस्वामी ॥ रागिणोर्विच्छेदे ॥ इतिसुभूति: ॥
विप्रलब्ध: । त्रि० वञ्चिते ॥ विप्रलभ्यतेस्म । दुर्लभप्राप्तौ । क्त: ॥
विप्रलब्धा । स्त्री० स्वीयादिनायिकाभेदे ॥ सङ्केतनिकेतनेप्रियमनवलोक्य समाकुलहृदयाविप्रलब्धेतिलक्षणम् ॥
विप्रलब्धा । त्रि० प्रतारके ॥
विप्रलम्भ: । पुं० विसंवादे । अभीष्टतासम्पादने ॥ वञ्चने ॥ वियोगे । विरहे । रागिणोर्वियोजने ॥ विप्रविप्रलम्भनम् । दुर्लभप्राप्तौ । घञ् । उपसर्गादितिनुम् ॥ विप्रलब्धि: । लभेर्घञ् वा ॥
विप्रलम्भक: । पुं० मिथ्यावचने: परवञ्चके । ठग १ इ० भा० प्र० ॥
विप्रलाप: । पुं० विरोधोक्तौ । अन्योन्यविरुद्धवचने ॥ यथा० एकोब्रूते० आगताकल्यापोति० अन्योब्रूतिनेति । तथाभ्युदाजवारसर्वानन्द: । एष:स्वमधुसरोजमवैतिवक्त्रमन्य: सुधाकिरणबिम्बमदोमृगाक्ष्या: । यूनोर्मुहुर्विवदतोर्वदनेनभूतु: सिद्धान्तयन्मधुपराविगतागतानीति ॥ विरुद्ध: प्रलाप: ॥ अनर्थकवाक्ये । अपार्थवचने ॥
विप्रलिप्सा । स्त्री० वञ्चनेच्छायाम् ॥
विप्रलिप्सु: । त्रि० वञ्चके ॥
विप्रलुम्पक: । त्रि० अन्यायेनधनयाहिणि ॥
विप्रस्तोभी । पुं० अशोकपादपे । किङ्किराते ॥
विप्रवसित: । त्रि० कृतदूरदेशगमने ॥
विप्रश्निका । स्त्री० अनागतवक्त्रादिनाशुभाशुभनिरूपिण्याम् । ईक्षणिकायाम् । दैवज्ञायाम् ॥ विविध: प्रश्नोस्त्यस्या: । ठन् ॥
विप्रसृत: । त्रि० विस्तृते ॥ विप्रसरतिस्म । सृगतौ । गत्यर्थेतिक्त: ॥
विप्रिय: । पुं० अपराधे । आगसि । त्रि० अप्रिये ॥
विप्रियकृत् । त्रि० शठे ॥
विपुट । स्त्री० विन्दी । अलकणे ॥ पुपुटादेर । सम्पदादित्वात्क्विप् । विगतापुटाबापुट्दाहोऽस्मात् ॥
विप्लव: । पुं० डिम्बे । धाकडलुट नादौ ॥ अयस्त्वकलहे ॥ विप्लवनम् । प्लुङ्गतौ । ऋदोरप् ॥ परचक्रादिभये ॥ राष्ट्राद्युपद्रवे ॥ नाशे ॥ मतिसम्मोहे ॥
विप्लाव: । पुं० अश्वस्यप्लुतगतौ ॥
विप्लुत: । त्रि० व्यसनार्ते । विप्लुते ॥ खण्डिते ॥ विप्लवनम् । प्लुङ् । क्त: ॥
विप्लुताक्ष: । त्रि० अश्रुपूर्णनयने ॥

विप्लुति : । स्त्री॰ स्वभावच्युतौ ॥

विप्लुष्ट : । त्रि॰ निर्दग्धे । विशेषे
  णप्लुष्ट : ॥

विफल : । त्रि॰ निरर्थके । मोघे ॥
  विगतं फलं यस्य ॥

विफला । स्त्री॰ केतक्याम् ॥ ऋतु
  हीनायाम् ॥

विबध : । पुं॰ पर्य्याहारे । उभयतो-
  बद्धशिक्येस्कन्धवाह्यकाष्ठे ॥ अध्व
  नि ॥ भारे ॥ विगतोबधोऽस्मा
  त् ॥

विबधिक : । त्रि॰ वैबधिके ॥ विब
  धेनहरति । विभाषाविबधादिति
  ष्ठन् । ङीषि॰ विबधकी ॥

विबन्ध : । पुं॰ आनाहे । आध्मा
  ने । मूत्रादिरोधे ॥ यथास्वचि
  कित्सा । तुल्यकारणकार्य्यत्वादुदा
  वर्त्तहरीक्रियाम् । अनाहेपिचकु
  र्वीतविशेषश्चाभिधीयते ॥ त्रिवृत्
  कृष्णाहरीतक्योद्विचतुष्पञ्चभागि-
  का : । गुडेनतस्यावटिकाहरत्या
  नाहमुल्वणम् ॥ वर्ति स्त्रिकटुक
  सैन्धवसर्षपगृहधूमकुष्ठमदनफलै:
  । मधुनिगुडेनापक्वैर्निर्हिताङ्गुष्ठ
  ष्ठपरिमाणा ॥ वर्त्तिरियंदृष्टफला
  शनै : प्रणिहितागुदेघृताभ्यक्ते ।
  आनाहोदावर्त्तौशमयतिजठरंतथा
  गुल्मम् ॥ त्रिकटुकाद्यावर्तिर्भाव
  प्रकाशे ॥ विबन्धनम् । बन्धबन्धने
  । घञ् ॥ कारणेवाघञ् ॥

विबाधा । स्त्री॰ विहेठने ॥

विविध : । त्रि॰ नानाप्रकारे ॥

विबुद्ध : । त्रि॰ तत्त्वसाक्षात्कार-
  वति ॥

विबुध : । पुं॰ ज्ञे । पण्डिते ॥ सु
  रे । देवे ॥ चन्द्रे ॥ विशिष्टोबोधो
  यस्य । विशेषणबुध्यतेनस्वपितीति
  वा । बुधअवगमने । इगुपधे
  तिक : ॥

विबुधान : । पुं॰ आचार्य्ये ॥ पण्डि
  ते ॥ देवे ॥

विबुधानुग : । पुं॰ किन्नरादिषु ॥

विबुभूषु : । त्रि॰ विविधंभवितुमि
  च्छौ ॥

विबोध : । पुं॰ प्रबोधे ॥

विबोधनम् । न॰ प्रबोधने । जगा
  बना॰ इ॰ भा॰ ॥

विभक्त : । त्रि॰ विभज्यस्थापिते । कृ
  तविभागे ॥ विभिन्ने । परस्पर
  व्यावृत्ते ॥ प्राप्तविभागे ॥ विभज्य
  तेस्म । भज॰ । कर्म्मणिक्त : ॥
  विभक्ताभ्रातरइत्यत्रतु॰ विभक्तमे
  षामस्तीतिमत्वर्थीयोऽर्शआद्यजि-
  त्यच् । नतुकर्त्तरिक्त : । सकर्मके
  भ्यस्तस्यविधानाभावात् ॥ अथवा
  त्तरपदलोपोद्रष्टव्य : । विभक्तध
  नाविभक्ता : । गम्यार्थस्याप्रयोगए
  वलोपोभिमत : । तेनविभक्ताभ्रा

तरद्रूव्यवधनस्ययद्विभक्तत्वंतत् भ्रातृष्वारोप्यते ॥ विभक्तेपिधने यस्तुस्वीयांशंप्रतिपादयेत् । पुनर्विभज्यतद्द्रव्यमप्राप्तांशायदापयेत् ॥

विभक्तज: । पुं॰ विभागानन्तरंजातापत्ये ॥ पुत्रै: सहविभक्तेनपिवायत्स्वयमर्जितम् । विभक्तजस्यतत्सर्वमनीशा: पूर्वजा: स्मृता: ॥

विभक्ति: । स्त्री॰ विभागे ॥ सुप्तिङो: ॥ यथा । सङ्ख्याकारकबोधयित्री सामान्यै: शक्तिमान्प्रत्ययस्तु य: । साविभक्तिर्द्विधाप्रोक्तासुप्तिङ्चेतिप्रभेदत: ॥ सङ्ख्याकारकाद्यन्यतमावच्छिन्नशक्तिमान्य: प्रत्यय: साविभक्ति: । सुप्तिङितिभेदात्साद्विधेतिशब्दशक्तिप्रकाशिका ॥ कारकशक्तौ ॥ विभज्यतेप्रातिपदिकार्थोऽनया । स्त्रियांक्तिन् ॥

विभजनीय: । त्रि॰ विभाज्ये । विभागयोग्ये ॥ भजनार्हे ॥

विभज्य: । त्रि॰ विभक्तव्ये ॥ ऋच्छवोर्ण्यतिप्राप्ते॰ द्विभजनविभज्योपपदे॰ इतितदपवादोयन्निपात्यते । तेनविभाज्यमितिनभवति ॥

विभव: । पुं॰ राशि । धने ऐश्वर्य्ये ॥ विभवति । भू॰ । पचाद्यच् ॥ भिक्षाप्राणस्यरक्षार्थंकन्याशीतनिवारणी । चपलाक्षिप्रवेभक्तिर्विभवै: किंप्रयोजनमितिसव्यासिधर्म्म: ॥ निवृत्तौ ॥ मोक्षे ॥ विगत: भवोयस्मिन् ॥ षष्टिवत्सरान्तर्गतद्वितीयवत्सरे । यथाभविष्येभैरवउवाच । सुभिक्षंक्षेममारोग्यंसर्वव्याधिविवर्जिता: । प्रशान्तामानवास्तत्रबहुशस्यावसुन्धरा । हृष्टास्तुष्टाजना: सर्वेविभवेवरानने ॥ २ ॥

विभवी । त्रि॰ ऐश्वर्यवति ॥ विभवोऽस्यास्ति ॥ इनि: ॥

विभा । स्त्री॰ शोभायाम् ॥ प्रकाशे ॥ किरणे ॥ उदीच्यांसोमस्यपुर्याम् ॥

विभाकर: । पुं॰ अग्नौ । वह्नौ ॥ सूर्ये । विभांकरोति । दिवाविभानिशेतिटः ॥ अर्कवृक्षे । चित्रकवृक्षे ॥

विभाग: । पुं॰ अंशे । भागे ॥ विवेके । विविच्यप्रयोगे । संयोगनाशकेनवद्द्रव्यवृत्तिनिर्गुणे ॥ स्वत्वनिर्णयानुकूलेव्यापारे ॥ विभज्यते॰ विभजनंवा । भज॰ । भावेघञ् ॥

विभागी । त्रि॰ अंशिनि ॥ विभागोऽस्यास्ति । अतइनिठनाविती नि: ॥

विभाजित: । त्रि॰ विभागेनस्थापिते ॥

विभाज्यः । त्रि० विभजनीये । विभागयोग्ये ॥ विपूर्वाद्भजधातोर्ण्यत् ॥

विभाण्डकः । पुं० ऋष्यशृङ्गपितरि० मुनिविशेषे ॥

विभाण्डी । स्त्री० आवर्त्तकीलतायां ॥

विभान् । त्रि० भासमाने ॥ शत्रन्तः ॥

विभातम् । न० प्रभाते । प्रत्यूषे ॥ विभातुंप्रवृत्तम् । भा० । आदिकर्म्मणिक्तः ॥

विभातकम् । न० प्रत्यूषे ॥

विभावः । पुं० परिचये ॥ रसस्योद्दीपनादौ ॥ रत्यादीनांकारणेषु । ललनोद्यानादिष्वालम्बनोद्दीपनकारणेषु ॥

विभावनम् । न० विभावनायाम् ॥

विभावना । स्त्री० अलङ्कारविशेषे ॥ विभावनाविनापिस्यात्कारणंकार्यजन्मचेत् । अप्यलाक्षारसासिक्तं रक्तंतच्चरणद्वयम् ॥ अत्रलाक्षारसासेककारणाभावेपिरक्तिमाकथितः स्वाभाविकत्वेनविरोधपरिहारः ॥

विभावरी । स्त्री० तमस्विन्याम् । रजन्याम् । यामिन्याम् ॥ निशायाम् । हरिद्रायाम् ॥ कुट्टन्याम् ॥ वक्रयोषिति ॥ विवादवत्स्त्रियाम् ॥ विभातिनक्षत्रादिभिः । क्वनिप् । वनोरचेतिङीब्रौ ॥ मौखर्य्येमिरतस्त्रियाम् ॥ मेदाद्यक्षे ॥

विभावसुः । पुं० ग्रहपतौ । सूर्ये ॥ अर्कवृक्षे ॥ पावके ॥ हारभेदे ॥ चित्रकवृक्षे ॥ चन्द्रे ॥ विभाप्रभावसुधनंयस्य ॥ असुरविशेषे ॥ मणौ ॥

विभावितः । त्रि० अभ्यूहिते । ज्ञाते ॥ विचिन्तिते ॥ विशेषेणोत्पादिते ॥ विशेषेणप्रापिते ॥ विमिश्रयिते ॥ विशेषेणभावितः ॥

विभावि । त्रि० प्रभावसम्पन्ने ॥ विभावोस्यास्ति । इनिः ॥

विभाव्यः । त्रि० संलक्ष्ये ॥

विभाषा । स्त्री० विकल्पे ॥ विभाष्यते ० विकल्प्यते । भावव्यक्तायांवाचि । गुरोश्चहलइत्यकारः । ततष्टाप् ॥

विभिन्नः । त्रि० मिश्रिते ॥ विदारिते ॥ विदीर्णे ॥ विभक्ते ॥ समालब्धे । परिभिन्ने ॥ विकसिते ॥

विभीतः । त्रि० विभीतके ॥ विगतंभीतंरोगभयमस्मात् ॥ त्रि० निर्भये ॥

विभीतकः । त्रि० कर्षफले । भूतवासे । कलिद्रुमे वहेडुके । वहेडा० इतिख्याते ॥ विभीतकंस्वादुपाकंकषायंकफपित्तनुत् । उष्णवीर्य्यंहिमस्पर्शंभेदनंकासनाशनम् ॥ रूक्षंनेत्रहितंकेश्यंकृमिवैस्वर्य्यनाशनम् । विभीतमज्जातृट्छर्द्दिकफवातहरो

लघु : ॥ कषायोमदकृद्वाथधातम्र्यापित्तहृत्स्मृता ॥ विगतंभीतंरोगभयमस्मात् ॥ स्वार्थेक : स्त्रियां॰जातेरितिङीष् ॥

विभीषण : । पुं॰ रावणानुजे ॥ नक्षत्रे । त्रि॰भयानके ॥ विशेषेणभीषयते । ञिभीभये । नन्द्यादित्वाल्ल्यु : । भियोहेतुभयेषुक् ॥ निरुक्ताविदं ॥ विगतंभीषणंभयङ्करमस्मानंयस्मात् ॥

विभीषिका । स्त्री॰ भयप्रदर्शने ॥ यथा । कृत्वाशस्त्रविभीषिकांकतिपयग्रामेषुदीना : प्रजा : ॰मघ्नन्तो विटजल्पितैरुपहृता :क्षोणीभुजस्ते किल । विद्वांसोपिवयंपरंत्रिजगतां सर्गस्थितिव्यापदामीशस्तत्परिचर्ययामगणितोयैरेषनारायण :॥ इति शिह्लणमिश्र : ॥

विभु : । पुं॰ शङ्करे । सदाशिवे ॥ परमेश्वरे ॥ सर्वमूर्त्तसंयोगिनि । परममहत्त्ववति ॥ सतु॰आत्मादिर्यथा । आत्मेन्द्रियाद्यधिष्ठाताकरणंहिसकर्तृकम् । विभुर्बुद्ध्यादिगुणवानुबुद्धिस्तुद्विविधामतेतिभाषापरिच्छेद : । विभुरिति॰विभुत्त्वपरममहत्त्वमितिसिद्धान्तमुक्तावली ॥ कालखात्मदिशांसर्वगतत्त्वंपरमंमहदिति भाषापरिच्छेद : ॥ प्रर्हति ॥ नित्ये ॥ भृत्ये ॥ विष्णौ ॥ त्रि॰व्यापके ॥ प्रभौ ॥ सर्वगते । दृढे ब्रह्मणि ॥ यथा । निवृत्त : सर्वदु:खानामीशान : प्रभुरव्यय : । प्रद्वैत : सर्वभावानांदेवस्तुर्योविभु :स्मृतइत्यागम : ॥ विविधंभवतियस्मात् । भू॰ । विप्रसम्भ्याड्डुतिडु : ॥

विभुता । स्त्री॰ सामर्थ्ये ॥ भावेतल् ॥

विभूति : । स्त्री॰ भूतौ । ऐश्वर्ये । अणिमादिषु ॥ यथा । अणिमालघिमाप्राप्ति : प्राकाम्यंमहिमातथा । ईशितावशिताचैवतथाकामावशायितेति ॥ भस्मनि ॥ शिवधृतभस्मनि ॥ ग्रंशे ॥ विविधभावे । विशेषेणभवनम् । स्त्रियांक्तिन् ॥विभूतिरिति कथनमन्यप्रादिनिवृत्त्यर्थम् ॥

विभूतिद्वादशी । स्त्री॰ विष्णोर्व्रतविशेषे ॥

विभूतिमत् । त्रि॰ ऐश्वर्ययुक्ते ॥ विभूतिर्विद्यतेऽस्य । मतुप् ॥

विभूमा । त्रि॰ परिपूर्णे ॥ विगताभूमायस्मात् । यमपेक्ष्यान्यत्रमहत्त्वंनास्तीति ॥

विभूषणम् । न॰ अलङ्कारे । आभरणे ॥ विशिष्टंभूषणम् । विभूष्यतेऽनेनवा । भूषअलङ्कारे । ल्युट् ॥ पुं॰मञ्जुघोषे ॥

विभूषा । स्त्री॰ शोभायाम् ॥ आभरणे ॥

विभूषित : । त्रि॰ अलङ्कृते ॥

विभृत : । त्रि० धृते ॥ पुष्टे ॥

विभ्यत् । त्रि० भयंकुर्वति ॥

विभेद : । पुं० विशेषे ॥

विभ्रंस : । पुं० नाशे ॥

विभ्रत् । त्रि० धारणकर्त्तरि ॥ पोषणकर्त्तरि ॥

विभ्रम : । पुं० भ्रान्तौ ॥ संशये ॥ शोभायाम् ॥ भ्रमणे ॥ हावप्रभेदे । स्त्रीणांशृङ्गारभावजातक्रियाविशेषे । तथाहि । मदरागहर्षजनितविपर्यासोविभ्रम : । यथा । अन्यनिमित्तमानसादुत्थायान्यत्रगमनं • प्रियारब्धकथामाक्षिप्यसख्यासहालपनं • मुच्चैर्हसितक्रोधौ • पुष्पादीनांयात्रा • सहसैवतत्परित्याग : । वस्त्राभरणमाल्यानामकारणत: खण्डनंमाननञ्च । यदुक्तम् । क्रोध: स्मितञ्चकुसुमाभरणादियात्रातदर्पणञ्चसहसैवविमण्डनञ्च । आक्षिप्यकान्तवचनंलपनंसखीभिर्निष्कारणोत्थितगतंवद्‌विभ्रमंतत् ॥ इति ॥ चित्तवृत्त्यानवस्थानंशृङ्गाराद्विभ्रमोमत: । इत्यन्यत्र ॥ अपिच । विभ्रमस्त्वरयाकालेभूषास्थानविपर्यय : । यथा । श्रुत्वायान्तंवहि: कान्तमसमापितभूषया । भालेञ्जनंदृशोर्लाक्षाकपोलेतिलक : कृत : । इति ॥ योषितांयौवनजोविकारोविभ्रमइत्येके ॥ अपिच । वल्लभप्राप्तिवेलायांमदनावेशसम्भ्रमात् । विभ्रमोहारमाल्यादिभूषास्थानविपर्यय : ॥ विविधंभ्रमणम् । भ्रमुअनवस्थाने । घञ् । नोदात्तोपदेशेतिनवृद्धि : ॥

विभ्रमा । स्त्री० विस्रसायाम् । जरायाम् । वार्द्धक्ये ॥

विभ्राट्०ड् । त्रि० भ्राजिष्णौ । रोचिष्णौ । अलङ्कारादिनाशोभमाने ॥ विशेषेणभ्राजते । भ्राजृदीप्तौ भ्राजभासेतिक्विप् ॥

विभ्रान्त : । त्रि० विभ्रमयुक्ते ॥ यथा । विभ्रान्तबुद्धेर्मनुजात्कार्याकार्यमजानत: । स्वानिष्टञ्चपरानिष्टंजायतेस्मात्पदेपदे ॥ इतिमहानिर्वाणतन्त्रम् ॥

विभ्रान्ति : । स्त्री० विभ्रमे ॥

विमत : । त्रि० विरुद्धमतिविशिष्टे ॥

विमति : । स्त्री० नानामतौ ॥ विरुद्धमतौ ॥

विमत्सर : । त्रि० मात्सर्यरहिते ॥ अद्वितीयात्मदर्शनेननिर्वैरबुद्धौ । विगतोमत्सरोयस्मात् ॥

विमना : । त्रि० दुर्मनसि । अन्तर्मनसि । चिन्तादिनाव्याकुलचित्ते ॥

विमनस्क : । त्रि० विमनसि ॥

विमनीकृत : । त्रि० वैमनस्यंप्रापिते ॥ अविमना : विमना : सम्पद्यमान : कृत : । अरुर्मनश्चक्षुश्चेतोरहोरजसांलोपश्चेतिच्विप्रत्ययसलोपौ ।

अस्यच्चाविलोकार : ॥

विमय : । पुं॰ परिवर्त्तने । विनिमये ॥ विमीयते । मीञ्॰ । एरच् ॥

विमर्द्द : । पुं॰ कालङ्कतरुर्च्चे । चक्रमर्द्दे ॥ युद्धे ॥ व्यालोडने ॥ सङ्घर्षे ॥

विमर्द्दक : । पुं॰ चक्रमर्द्दे । कासौन्दीतिप्रसिद्धक्षुपे ॥

विमर्द्दनम् । न॰ कुङ्कुमादिनामर्द्दने । परिमले । मृद्धोदे । ल्युट् ॥

विमर्द्दना । स्त्री॰ कुङ्कुमादिमर्द्दे ॥

विमर्द्दोत्थ : । पुं॰ परिमले । मर्द्दनाज्जातिसुगन्धादौ ॥ यथा । अथगन्धे परिमलोविमर्द्दोत्थे मनोहरे । दूरगामीमनोहारीगन्धआमोदईरितइति शब्दरत्नावली ॥

विमर्श : । पुं॰ विचारे ॥ न्यायमार्गेणविचारे ॥ संशयात्मिकायांवृत्तौ ॥

विमर्शनम् । न॰ परामर्शे । वितर्के ॥

विमर्शित : । त्रि॰ विचारिते ॥ विमर्श : सञ्जातोस्य । तारकादित्वादितच् ॥

विमर्ष : । पुं॰ विचारणायाम् ॥ इति जटाधर : ॥ विशिष्टार्थाक्षमायाम् ॥

विमर्षणम् । न॰ ज्ञाने ॥ कर्मणाकर्मनिर्हारोनह्यात्यन्तिकइष्यते । अविद्वदधिकारित्वात्प्रायश्चित्तंविमर्षणम् ॥ इतिभागवतेषष्ठस्कन्ध : ॥

विमल : । पुं॰ सूर्य्यपरिवारे ॥ अर्हति । जिने ॥ न॰ तारङ्गेमाक्षिकधातौ॰ उपरसविशेषे । निर्म्मल्ये । स्वच्छधातुके ॥ त्रि॰ निर्मले । शीभ्रे ॥ विगतंमलंयस्मात् ॥ चारौ ॥ रागादिशून्ये ॥

विमलतीर्थम् । न॰ तीर्थविशेषे ॥ यथा वापिसौवर्णराजतमत्स्याद्दश्यन्ते ॥

विमलदानम् । न॰ नित्यनैमित्तिककाम्यदाने ॥ यथोक्तंगरुडपुराणे । नित्यंनैमित्तिकंकाम्यंविमलंदानमीरितम् । चेतनासत्त्वयुक्तेनदानंतद्विमलंस्मृतमितिग॰पु॰ ॥ ईश्वरप्रीणनार्थदाने ॥

विमलमणि : । पुं॰ स्फटिके ॥

विमला । स्त्री॰ शीतलायाम् । सप्तलायाम् । सोहुण्डप्रभेदे ॥ भुव : प्रभेदे ॥ देवीप्रभेदे ॥ यथा । उत्कले नाभिदेशस्तुविरजाक्षेत्रमुच्यते । विमलाचमहादेवीजगन्नाथस्तुभैरव : ॥

विमलात्मक : । त्रि॰ शीभ्रे । निर्मले । स्वभावनिर्मले ॥ विमलआत्मास्वभावोस्य ॥

विमलाद्रि : । पुं॰ शत्रुञ्जयपर्वते ॥

विमलेश्वर : । पुं॰ शिवे ॥ विश्वेशादेव्यधिष्ठितेपुण्यस्थाने ॥

विमाता । त्रि॰ गणयितरि ॥

विमाता । स्त्री॰ मातु : सपत्न्याम् ॥ विरुद्धामाता । प्रादयोगतेतिसमास : ॥

विमातृज : । पुं॰ सापत्नभ्रातरि ।

वैमात्रेये ॥ विमातुर्जात : । पञ्च म्यामजाताद्विति ड : ॥

विमान: । पुं॰ न॰ देवतायाने । व्योम याने । सार्वभौमगृहे । घोटके । या नपात्रे । विशिष्टं मानयन्त्यनेन । पुं सिसंज्ञायामितिकरणे घ: ॥ विशे षेणमान्त्यस्मिन्निति वा । अधिकरणे ल्युट् ॥ विगतं मानमुपमाऽस्येति वा ॥ त्रि॰ मानहीने ॥

विमानक : । पुं॰ विमाने ॥

विमानता । स्त्री॰ तिरस्कारे ॥

विमानित : । त्रि॰ अनादृते ॥

विमार्ग : । पुं॰ कुपथे ॥

विमिश्र : । त्रि॰ विभिन्ने ।

विमुक्त : । त्रि॰ विरहिते ॥ पृथग्भूते ॥ सर्वैषणाविनिर्मुक्ते ॥ नित्य मुक्ते चिदानन्दरसआत्मनि ॥ विशे षेण॰ अविद्याकामक्रोधादिभिर्मुक्त: परित्यक्त : ॥ क्षिप्ते ॥ जीवन्मु क्ते ॥ जीवन्नेवदृष्टबन्धात्कामादे र्विशेषेणमुक्त : सन् देहपातेभावि बन्धाद्विशेषेणमुच्यते । विमुक्तश्चवि मुच्यतइतिश्रुते : ॥

विमुक्ति : । स्त्री॰ मोक्षे ॥ विमोच ने । अनुध्यानरूपेऽनुग्रहे ॥

विमुख : । त्रि॰ पराङ्मुखे ॥ विरु द्धं मुखं यस्य ॥

विमुद्र: । त्रि॰ प्रस्फुटे । प्रफुल्ले ॥ मु द्रारहिते ॥

विमूढ : । त्रि॰ विक्षिप्ते ॥ अनुत्पन्न ब्रह्मात्मैक्यसाक्षात्कारे । दृष्टादृष्ट विषयभोगवासनाक्रष्टचेतस्तयाआ- त्मानात्मविवेकायोग्ये । अदूर दर्शिनि ॥ विगतमूढभावेऽतिचतु रे॰ सूक्ष्मार्थविवेचनकुशले ॥

विमूढभाव: । पुं॰ व्याकुलचित्तत्वे ॥

विमूढात्मा । त्रि॰ रागद्वेषादिदूषिता न्त: करणे ॥ विमूढआत्मायस्य स: ॥

विमूढेन : । त्रि॰ मूर्खशिरोमणौ । देहात्मवादिनि । सुत्यनादरकारि णि ॥ विमूढानामिन : ॥

विमूल्य: । त्रि॰ अमोलविमोलइतिभा षायांख्याते । महार्घे ॥

विमृत्यु : । पुं॰ विगतकामाविद्ये । वेदान्तवेद्यआत्मनि ॥

विमृश : । पुं॰ विमर्शे ॥

विमृष्ट: । त्रि॰ विभाविते ॥

विमृष्य : । त्रि॰ विचार्ये ॥ विमृषे : ऋदुपधाच्चाक्ॡपिचृतेरितिक्यप् ॥

विमृष्यकारी । त्रि॰ विवेकिनि ॥ वि मृष्यकरोति । णिनि : ॥

विमोक : । पुं॰ विमोचने ॥

विमोक्ष : । पुं॰ मुक्तौ ॥

विमोक्षणम् । न॰ विमोचने । परि त्यजने ॥

विमोचनम् । न॰ दूरीकरणे । विमु क्तौ । विपूर्वान्मुचेर्ल्युट् ॥ ती र्थविशेषे ॥

बिमोह : । पुं॰ भ्रमपरम्परायाम् ।
विशिष्टोमोह : ॥

बिमोहनम् । न॰ आकुलीकरणे । वै
चित्तीकरणे ॥

बिमोहित : । त्रि॰ विविधंमोहंभ्रम
परम्परांप्रापिते । मोहयुक्ते ।

बिम्ब : । पुं॰ कृकलासे ॥ न॰प्रति
बिम्बे ॥ बिम्बीफले ॥ वर्णवृत्तान्त
रे ॥ नगणककरगणकर्णभवतिनवव
र्णपूर्णम् । फणिवदनभूषणंयत्तत
द्गितिकिलबिम्बमेतत् ॥ यथा ।
कपटकृतगोपवेश : शयनवरभूत
शेष : । जयतिकृतनन्दहर्षोगिरि
विधुतशतवर्ष : ॥ पुं॰ न॰सूर्य
चन्द्रमण्डले ॥ वेतिशोभते । वीग
त्यादिषु । उल्वादयश्चेति॰वन्न्
मोगमरुत्वानि ॥ बिम्बशोष्ठाद
यशान्॥शाख्यन्तरे ॥

बिम्बकम् । न॰ मण्डले ॥ बिम्बी-
फले ॥

बिम्बजा । स्त्री॰ बिम्बिकायाम् ॥

बिम्बट : । पुं॰ सर्षपे ॥

बिम्बभूत : । त्रि॰ कारणभूते ।

बिम्बा । स्त्री॰ बिम्बिकायाम् ॥

बिम्बिका । स्त्री॰ तुण्डिकेर्याम् ।
रक्तफलायाम् । पीलुपर्ण्याम् ।
कंदूरी॰कुंदुरुइतिभाषा ॥ बिम्बीं
कायति ॥ कैशब्दे । आतोनुप
सर्गेक : । डापोरितिहस्व : ॥

बिम्बी । स्त्री॰ बिम्बिकायाम् ॥ गौ
रादित्वान्ङीष् ॥

बिम्बीफलम् । न॰ बिम्बिकायाम् । कं
दूरी॰हू॰प्र॰फले । बिम्बीफलंस्वा
दुशीतंगुरुपित्तास्रवातजित् । स्तम्भ
नंलेखनंरुच्यंविबन्धाध्मानकारक
म् ॥

बिम्बु : । पुं॰ गुवाके ॥

वियच्चारी । पुं॰ चिल्लखगे ॥ त्रि॰आ
काशगामिनि ॥

वियत् । न॰ विष्णुपदे । गगने । आ
काशे ॥ विविश्वतएतिव्याप्नोति ।
इण : शतृ । यद्वा । वियच्छति॰
नविरमति । विपूर्वाद्यमेरन्येभ्यो
पीतिक्विप् । क्वौचगमादीनामिति
मलोपेतुक् ॥

वियद्गङ्गा । स्त्री॰ मन्दाकिन्याम् । स्व
र्णद्याम् । सुरदीर्घिकायाम् ॥
वियति॰वियतोवागङ्गा ॥

वियद्भूति : । स्त्री॰ तमसि । अन्धका
रे ॥

वियन्मणि : । पुं॰ सूर्ये । सहस्रांशौ ॥
वियतोमणिरिव ॥

वियम : । पुं॰ संयमे ॥ विविधयमने
॥ वियमनम् । यम : समुपनिवि
षुचेतिपक्षे॰अप् ॥

वियात : । पुं॰ धृष्टे । निर्लज्जे ॥ वि
रुद्धंयातंचेष्टितंयस्य । विरुद्धमर्या
मोदा । गत्यर्थेतिक्त : ॥

वियामः। पुं॰ संयमे। विविधयमने॥ वियमनम्। यमः समुपनिविषु चेति॰ अवभावेघञ्॥

वियुक्तः। त्रि॰ वियोगविशिष्टे॥

वियोगः। पुं॰ विच्छेदे। विप्रलम्भे। रागिणोर्वियोजने। विरहे॥ स्मृत्वावियोगजं दुःखं त्यजस्नेहंप्रिये जने। अतिस्नेहपरिष्वङ्गाद्वर्तिरार्द्रापिदह्यते॥ वियोजनम्। युजिर्योगे। घञ्। वियुज्यतेऽनेनवा॥

वियोगभाक्। त्रि॰ विच्छेदयुक्ते।

वियोगी। पुं॰ चक्रवाके। कोके॥ त्रि॰ विरहिणि। वियोगयुक्ते॥ वियोगोऽस्यास्ति। इनिः॥

वियोगिनी। स्त्री॰ विरहिण्याम्॥

वियोजितः। त्रि॰ पृथक्कृते। वियोगंप्रापिते

विरक्तः। त्रि॰ विरागवति॥ सच॰ कुटीचकबहूदकहंसपरमहंसभेदाच्चतुर्विधः॥ विपूर्वाद्रञ्जेः क्तः॥ अतिरक्तवर्णे॥

विरक्ता। स्त्री॰ सांसारिकविषयेषुविरागविशिष्टायाम्॥ दुर्भगायाम्॥ अननुकूलायाम्॥ यांचिन्तयामिसततंमयिसाविरक्ता॥

विरक्तिः। स्त्री॰ वैराग्ये॥ तीव्रातीव्रतराचेतिविरक्तिर्द्विविधामता। तत्रसत्यान्तुतीव्रायांन्यसेद्योगीकुटीचके। शक्तोबहूदकेतीव्रतरायांहंसमुक्तिते। मुमुक्षुः परमहंसेसाक्षाद्विज्ञानसाधने॥ रञ्जेः क्तिन्॥

विरङ्गम्। न॰ कङ्कुष्ठे॥

विरचनम्। न॰ निर्माणे॥ विशेषेणरचनम्॥

विरचितः। त्रि॰ निर्मिते॥ विशेषेणरचितः॥

विरजम्। न॰ तीर्थविशेषे॥

विरजाः। त्रि॰ विगतधर्माधर्मे॥ रजोगुणरहिते॥ विगतंरजोयस्य सः॥

विरजाः। स्त्री॰ विगतार्त्तवायाम्॥

विरजस्तमाः। पुं॰ द्वयातिगे। निवृत्तरजस्तमोगुणे॥ रजस्तमोभ्यांविगतः। निरादयइतिसमासः॥ विगतेरजस्तमसीयस्मादितिवा॥

विरजा। स्त्री॰ कपित्थपर्ण्याम्॥ दूर्वायाम्॥ ययातिमातरि॥ गोलोकेश्रीकृष्णसखीविशेषे॥ दीक्षाविशेषे॥ देवयानपथवर्त्तिन्यां नद्याम्॥ जगन्नाथक्षेत्रे॥ यथा। मुण्डनञ्चोपवासश्चसर्वतीर्थेष्वयं विधिः। वर्जयित्वागयांगङ्गांविशालांविरजांतथा॥

विरजाक्षेत्रम्। न॰ पुरुषोत्तमतीर्थे॥ यथा। उत्कलेनाभिदेशान्तुविरजाक्षेत्रमुच्यते। विमलासामहादेवीजगन्नाथस्तुभैरवः इति तन्त्रचूडामणौपीठनिर्णयः॥

विरजाशिम : । पुं॰ अवधूतत्वस म्पादके॰ आगमप्रोक्तकर्मविशेषे ।।

विरञ्च : । पुं॰ द्रुहिणे । ब्रह्मणि ॥ विरचयति । रचप्रतियत्ने । पचा द्यच् । पृषोदरादित्वान्नुमागमः ।।

विरञ्चिः । पुं॰ स्रष्टरि । ब्रह्मणि ॥ विरचयति । रच॰ । स्वार्थण्य न्तादच्छ : । पृषोदरादित्वान्नु म् ॥

विरणम् । न॰ वीरणतृणे ॥

विरत: । त्रि॰ निवृत्ते । विरक्ते ।।

विरति : । स्त्री॰ आरतौ । उपरा मे । निवृत्तौ ॥ विरमणम् । र मक्रीडायाम् । क्तिन् ॥

विरथ : । त्रि॰ भग्नरथे ।।

विरमणम । न॰ विरतौ ॥ विपू र्वाद्रमेर्ल्युट् ॥

विरमित : । त्रि॰ निरस्ते ॥

विरलम् । न॰ दधि ॥ त्रि॰ अवका शे । पेलवे । तनौ । सान्तरे ॥ विराति । राशब्दे । बाहुलकात्क लन् ॥ पुं॰ निर्जने ॥

विरलजानुक : । त्रि॰ वक्रजानुवि शिष्टे । प्रज्ञौ । प्रज्ञे ॥ पु॰ हि॰ चन्द्र : ॥

विरलद्रवा । स्त्री॰ श्लक्ष्णयवाग्वाम् ॥ यथा । यवागुरुष्णिकाश्राणा सैवतुद्रतसिकथिका । विलेपीत रलाचस्य तसाश्लक्ष्णा विरलद्रवा ।।

विरस : । त्रि॰ रसहीने ॥ विग तोरसोयस्मात् ।।

विरह : । पुं॰ विप्रलम्भे । वियो गे । विच्छेदे ॥

विरहिणी । स्त्री॰ वियोगिन्याम् ॥ विच्छेदविशिष्टायाम् ॥ नार्यामृभ्भ र्तो ॥ ङीप् ॥

विरहित : । त्रि॰ त्यक्ते । विहीने विशेषेणरहित : ॥

विरही । पुं॰ वियोगिनि । विरह विशिष्टे ॥ विरहोस्यास्ति । अ तइनिः॥रहतेराभीक्ष्ण्येर्येणिनिर्वा॥

विरहोत्कण्ठिता । स्त्री॰ नायिका विशेषे ॥ चिरमप्यत्युरनालोके विरहोत्कण्ठितोन्मनेतिलक्षणात् ॥

विराग : । पुं॰ वैराग्ये । रागप्र तिद्वन्द्विनि ॥ त्रि॰ गताभिला षे ॥ विगत : रागोस्य ॥

विरागर्ह : । त्रि॰ विरागयोग्ये । वैराग्निके ॥ अर्हति । अर्ह॰ । पचाद्यच् । विशिष्टोराग : विरा ग : । विरागस्यअर्ह : ॥ धन वति ॥

विरागी । त्रि॰ विरक्तमति ॥

विराट् । पुं॰ विविधंराजमानत्वा त्स्थूलसमष्ट्युपहितचैतन्येभगवत: स्थूलरूपे ।। यथा तत्कार्यस्यवि राड्देह: स्थूलदेहोयमात्मनइति । पञ्चीकृतभूतानांयत्कार्यंतत्का-

यँविराट् देहोभवतिसचदेह : परमेश्वरस्यस्थूलदेह:॥चात्मनोममभगवत्याद्य॰दे॰भा॰॥ विराडात्माना म॰स्थूलप्रपञ्चाभिमानीसूर्यमण्डलात्मक: समष्टिदेहसघ्गोलकहृयानुयाहकोहिरण्यगर्भ: सचञ्चाभ्यामर्थान्तरमितिव्याख्यातार :॥ विशेषेणराजते। राज् दीप्तौ। विविधंराजतेवा। सत्सूद्विषेतिक्विप्। चर्विये॥ स्त्री॰दशाक्षरायांवृत्तौ॥

विराज :। पुं॰ विराजि॥

विराजमान :। त्रि॰ दीप्तिविशिष्टे। शोभमाने॥

विराजित :। त्रि॰ शोभिते। दीप्ते॥

विराट :। पुं॰ मत्स्यदेशे॥ वैदर्भदेशादूर्ध्वंस्वइन्द्रप्रस्थाच्चदक्षिणे। मरुदेशात्पूर्व्वभागेविराट : परिकीर्त्तित :॥ मत्स्यदेशाधिपे॥ नगरविशेषे॥

विराटक :। पुं॰ राजपट्टे॥ इति हेमचन्द्र :।

विराटज :। पुं॰ विराटदेशीयहीरके। राजपट्टे। राजावर्त्ते॥ त्रि॰ विराटराजजाते॥

विराणी। पुं॰ हस्तिनि॥ इतिशब्दमाला॥

विराव :। त्रि॰ विप्रकृते॥ राधेरनिट : कर्मणिक्त :॥

विराध :। पुं॰ रामायणप्रसिद्धराक्षसविशेषे॥

विराधनम्। न॰ पीडायां॥

विराध्यन्। त्रि॰ अपकुर्वाणे॥

विराम:। पुं॰ अवसाने॥ वितर्कविचारानन्दास्मितादिरूपचिन्तात्यागे। वृत्युपरमे॥ विपूर्वाद्रमेर्भावेघञ्॥ विरमन्तेनिवर्त्तन्तेऽस्मिन्नितिवा॥

विराव :। पुं॰ शब्दे। स्वाने। चारावे॥ विरवणम्। रु॰उपसर्गेरुवइतिभावेघञ्॥

विरिक्त :। त्रि॰ सञ्जातविरेके॥

विरिञ्च :। पुं॰ वैकुण्ठे। विष्णौ॥ परमेष्ठिनि॥ शिवे॥ इ॰श॰रत्नावलौ॥

विरिञ्चन :। पुं॰ विरञ्चने। द्रुहिणे॥ इ॰हे॰चन्द्र :॥

विरिञ्चि :। पुं॰ शिवे। विष्णौ॥ विधातरि। परमेष्ठिनि। सुरज्येष्ठे॥ भूतानिविरचयति। रचप्रतियत्ने। स्वार्थण्यन्तादचइ :। पृषोदरादित्वादकारस्येत्त्वंनुमागमश्च॥

विरिब्ध :। पुं॰ स्वरे॥ रेभृशब्देसौत्र :। क्त :। घृष्वस्वान्तध्वान्तेत्यादिनानिपातित :॥

विरिष्ट :। त्रि॰ विच्छिन्ने॥

विरुद्ध :। पुं॰ हेत्वाभासान्तरे। साध्याभावव्याप्ते हेतौ॥ यथाशब्दोनि

त्य : कृतकत्वादिति । कृतकत्वं ह्यनित्यत्वाभावेनानित्यत्वेन व्याप्तम् ॥ न्यायसूत्रञ्च । सिद्धान्तमभ्युपेत्य तद्विरोधी विरुद्ध : । अत्र च सिद्धान्तं साध्यम्० प्रतिज्ञार्थं इति यावत् सिद्धस्यान्तेसाध्यमभिधीयते० तथाच साध्यमभ्युपेत्य उद्दिश्य प्रयुक्तस्तद्विरोधी साध्याभावव्याप्त इति फलितार्थ : । यथा वह्निमान् ह्रद-त्वादिति । एतस्य साध्याभावानुमितिसामग्रीत्वेन साध्यानुमितिप्रतिबन्धो दूषकतावीजम् । न च सत्प्रतिपक्षाविशेष : । तत्र हेत्वन्तरं साध्याऽभावसाधकम्० इह तु हेतुरेव साध्याभावसाधक : साध्यसाधकत्वेन त्वयोपन्यस्तत्वस्य शक्तिविशेषो ज्ञापकस्तु न विशेषात् ॥ १ । ४६ ३० ॥ विपरीतधर्माक्रान्ते ॥ विरोधविशिष्टे ॥

विरूढ : । त्रि० अङ्कुरिते । विरूढ़ा० इतिख्याते ॥ विपूर्वाद्रुहेर्गत्यर्थे तिक्त : । ढत्वधत्वष्टुत्वढलोपदीर्घा : ॥ आरोहणविशिष्ट ॥

विरूपम् । न० पिप्पलीमूले ॥ त्रि० कुरूपे ॥ विरुद्धं रूपं यस्य स : ॥

विरूपा । स्त्री० अतिविषायाम् ॥ दुरालभायाम् ॥ कुरूपायाम् ॥

विरूपाक्ष : । पुं० त्रिलोचने । शम्भौ । ईशे । शिवे ॥ रुद्रविशेषे ॥ विविधानि रविचन्द्राग्निरूपाण्यक्षीणि यस्य । बहुव्रीहौ सक्थ्यक्ष्णो: स्वाङ्गात् षच् ॥ विरूपेष्वपि० अचिन्त्यपाद् इष्टं यस्ये तिवा ॥ विविधरूपाणि० विविधरूपेषु० अक्षाणीन्द्रियाण्यस्येतिवा ॥ असुरविशेषे ॥

विरूपिका । स्त्री० कुरूपायाम् ॥

विरूपी । पुं० जाहके ॥ त्रि० कुरूपविशिष्टे ॥

विरेक : । पुं० मलभेदे । रेचने । रेके । रेचनायाम् । विरेचने ॥ पृथक्त्वे ॥ यथा । यच्च यद्ध्यासस्तद्विरेकाग्रहणनिबन्धनो भ्रम इति भाष्यम् ॥

विरेचक : । त्रि० विरेककारके ॥ यथा । चूर्णमध्ये त्रिवृच्चूर्णं स्वरसे कारवेल्लकम् । स्नेहेष्वेरण्डजं तैलं फलेष्वपि हरीतकीति वाग्भट :

विरेचनम् । न० विरेके ॥ तत्कारकौषधं यथा । हरीतकीसमगुडा मधुनासह सेविता । विरेचनकरी रुद्र भवतीति न संशय : ॥ त्रिफला चित्रकं चैव तथा कटुकरोहिणी । जलस्तम्भहरो ह्येष उत्तमन्तु विरेचनम् ॥ अपि च । त्रिफलाबदरं द्राक्षा पिप्पलीच विरेचकृत् । हरीतकी सोष्णनीरा लवणाढ्या विरेचकृत् । इति गरुडपुराणे ॥ पुं० पीलुवृक्षे ।

विरेफ : । पुं० नदमात्रे ॥ त्रि० रेफशून्ये ॥

विरेभित : । त्रि० शब्दिते ॥

विरोक : । पुं० सूर्यकिरणे ॥ न० छिद्रे । रन्ध्रे ॥ विरोचतेऽनेन । रुच० । घञ् । चजो : कु घिण्यतोरिति कुत्वम् । लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति नपुंसकत्वाविरोध : ॥

विरोचनम् । न० स्फुरणे ॥

विरोचन : । पुं० प्रह्लादतनये ॥ अर्के । सूर्ये ॥ अग्नौ ॥ चन्द्रे ॥ अर्कवृक्षे ॥ रोहितकवृक्षे ॥ श्योनाकप्रभेदे । पूतिकरञ्जे ॥ विशेषेण रोचते । रुचदीप्तौ ॥ अनुदात्तेतश्चहलादेरितियुच् ॥ त्रि० रोचके ।

विरोचनसुत : । पुं० बलिराजाख्यदैत्ये ॥ विरोचनस्यसुत : ॥

विरोध : । पुं० वैरे । विद्वेषे ॥ यथा । प्रधानस्यप्रधानेनसहविरोधोनतुदुर्बलेनेति ॥ विरोधकरणे दोषोयथा । अथपुत्रं रेणुकासाक्षात्क्रोधात्त्वयस्यसि । उवाचकिञ्चिद्वचनंपरिणामसुखावहम् ॥ अविरोधोभवाख्यौदसर्वमङ्गलमङ्गलम् । विरोधिनाशबीजस्यसर्वोपद्रवकारणम् ॥ अकर्त्तव्योविरोधश्चदारुणैः सवियै : सह । प्रतिज्ञाचैषाकर्त्तव्या मदीयंश्रवनंशृणु ॥ इति ॥ अपि च । नकुर्याद्बन्धुभि : सार्द्धं विरोधंबंधुभिस्तथा । आत्मन : प्रतिकूलानिपरेषांनसमाचरेदिति ॥ विरोधंनोत्तमैर्गच्छेन्नाधमैश्चसदाबुधइतिच ॥ विरोधनम् । रुधिर् आवरणे । घञ् ॥ अलङ्कारविशेषे । यथा । विरोध : सोऽविरोधेपिविरुद्धत्वेनयद्वच : । वस्तुवृत्तेरविरुद्धेपिविरुद्धयोरिवयदभिधानंसविरोध : । जातिश्चतुर्भिर्जात्याद्यैर्विरुद्धास्याद्गुणस्त्रिभि : । क्रियाद्वाभ्यामपिद्रव्यंद्रव्येणैवेति तेदश ॥ अभिनवनलिनीकिसलयमृणालवलयादिदवदहनराशि : । सुभगकुरङ्गदृशोस्याविधिवशतस्त्वद्वियोगपविपाते ॥ गिरयोप्यनुन्नतियुजोमरुदप्यचलोब्धयोप्यगम्भीरा : । विश्वम्भराप्यतिलघुर्नरनाथतवान्तिकेनियतम् ॥ (*) येषांकण्ठपरिग्रहप्रणयितांसम्प्राप्यधाराधरस्तीक्ष्ण : सोप्यनुरज्यतेचकमपिस्नेहंपराप्नोतिच । तेषांसङ्गरसङ्गसक्तमनसांराज्ञांत्वयानृपतेपांशूनांपटलै : प्रसाधनविधिर्निर्वर्त्यतेकौतुकम् ॥ सृजतिचजगदिदमवतिच संहरतिचहेलयैवयोनियतम् । अत्र सरवशत : शफरोजनार्दन : सोपि चित्रमिदम् ॥ सततंमुसलासक्ताब

स्फुततरगृहकर्मघटनयानृपते । द्विजपत्नीनांकठिनाः सतिभवतिकराः सरोजकुसुमाराः ॥ पेशलमपिखलवचनं दहतितरांमानसंसुतत्त्वविदाम् । परुषमपिसुजनवाक्यंमलयजरसवत्प्रमोदयति ॥ क्रौञ्चाद्रिरुद्दामदृषद्दृढोयंयन्मार्गणानर्गलशातपाते । अभूनवाम्भोजदलाभिजातः स भार्गवः सत्यमपूर्व्वसर्गः ॥ परिच्छेदातीतः सकलवचनानामविषयः पुनर्जन्मन्यस्मिन्ननुभवपथं योनगतवान् । विवेकप्रध्वंसादुपचितमहामोहगहनो विकारः कोप्यन्तर्जडयतिचतापञ्चकुरुते । अयंवारामेकोनिलयइतिरत्नाकरइतिश्रितोऽस्माभिस्तृष्णातरलितमनोभिर्जलनिधिः । कएवंजानीतेनिजकरपुटीकोटरगतं क्षणादेनंताम्यत्तिमिमकरमापास्यतिमुनिः ॥ समदमतङ्गजमदजलनिःस्यन्दतरङ्गिणीपरिष्वङ्गात् । क्षितितिलकत्वयितटजुषिशङ्करचूडापगापिकालिन्दी । इति ॥ अनैक्ये । विपरीतार्थे ॥ यथा । श्रुतिस्मृतिविरोधेतुश्रुतिरेवगरीयसी । अविरोधेसदाकार्यंस्मार्त्तंवैदिकवत्सता ॥ असामानाधिकरण्ये ॥ न्यायमते ॰साध्यव्यापकाभावप्रतियोगित्वमितिचिन्तामणिः ।साध्यासमानाधिकरण्यमितिदीधितिः । अष्टिनकुलादेरन्यतरेणापरस्मरणे ॥ विरोधनाम्नवस्तुनि ॥

विरोधकृत् । पुं॰ वत्सरविशेषे ॥ तत्फलंयथा । वासवोवर्षतेदेविदेशेचाखण्डमण्डले । अहिष्णुवेकान्यकुर्ज्जेविरोधीकृषिनाशकृत् ॥ ४५ ॥ त्रि॰विरोधकर्त्तरि ॥

विरोधनः । पुं॰ विद्विषि । म॰पर्यवस्थायाम् । विरोधे ॥ रुधिर्॰ । स्यु ल्युट्‌वा ।

विरोधी । पुं॰ शत्रौ ॥ विरोधोस्त्यस्मिन्वा । इनिः । वत्सरविशेषे ॥ यथा । अनग्निप्रबलालोकाधान्यौषधिप्रपीडनम् । जायतेमानुषेकष्टं विरोधिनिनसंशयः ॥ त्रि॰विवादिनि । विरोधविशिष्टे ।

विरोधिनी । स्त्री॰ विरोधकारिकायाम् ॥ विरोधविशिष्टायाम् ॥

विरोधोक्तिः । स्त्री॰ विप्रलापे । परवचनविरोधिवचने । विरोधस्योक्तिः ॥

विलः । पुं॰ उच्चैःश्रवसि । इन्द्रस्यहये । वेतसे ॥ न॰छिद्रे । रन्ध्रे । गुहायाम् ॥ विलतिभिनत्ति । विलभेदने॰चौरादिः । इगुपधेतिकः ॥ विल्यतेवा । कृत्यल्युटोबहुलमिति॰इगुपधेतिकः । घञर्थेकोवा । खनोघचेतिघे॰संज्ञापूर्व्वकत्वान्नगुणाभावोवा ॥

विलकारकः । पुं० मूषके ॥

विलकारी । पुं० मूषिके ॥ गर्त्तकारके ॥

विलक्षः । त्रि० विस्मयान्विते । परकीयधर्मशीलादौप्राप्ताश्चर्ये ॥ विशेषेणलक्षयति । लक्षआलोचने । पचाद्यच् ॥ लक्षात्भ्रष्टे ॥ लज्जिते ॥ विलक्षणे ॥

विलक्षणम् । न० हेतुशून्यायांस्थितौ । निष्प्रयोजनस्थितौ ॥ यथा । विलक्षणं मतं स्थानं यन्नवैन्निष्प्रयोजनमितिभागुरिः ॥ त्रि० भिन्ने । अन्यलक्षणे ॥ विशेषलक्षणयुक्ते ॥ विगतं लक्षणमालोचनं यत्र ॥

विलक्षणा । स्त्री० शय्याविशेषे ॥

विलक्षितः । चिह्निते ॥ विशेषेणलक्षितः ॥

विलग्नः । पुं० न० मध्ये ॥ न० जन्मलग्ने ॥ मेषादिलग्नमात्रे ॥ त्रि० लग्ने । संसक्ते ॥ विशेषेणलग्नः ॥ वियुक्ते ॥

विलङ्घनम् । न० अतिक्रमणे ॥

विलङ्घितः । त्रि० अतिक्रान्ते ॥

विलङ्घ्यः । त्रि० अतिक्रमणीये ॥

विलज्जः । त्रि० लज्जयाहीने ॥ विगतालज्जायस्य सः ॥

विलपनम् । न० विलापे ॥ भाषणे ॥

विलम्बः । पुं० उचितकालाधिक्यकाले ॥ लम्बने ॥ गौणे ॥ वत्सरविशेषे ॥ तत्फलं यथा । तस्करैः पार्थिवैश्चापिभूतमिदं जगत् । अर्घोभवतिसामान्योविलम्बे तुभयं महत् ॥ ३२ ॥

विलम्बनम् । न० अशीघ्रे ॥

विलम्बितम् । न० नृत्याख्यनृत्यादौ ॥ विशेषेणलम्बन्तेकालचरणाद्यः प्रसर्पं गतिविशेषप्रदर्शनायात्र । लवित्रंसंसने० औणादिकः कोऽधिकरणे चेतिक्तः ॥ त्रि० आश्रिते । विलम्बमाने ॥

विलम्बी । त्रि० लम्बमाने ॥ विशेषेणलम्बमाने ॥

विलम्भः । पुं० अतिसर्जने । दाने ॥ विलम्भिः । डुलभष्प्राप्तौ । घञ् । उपसर्गात्खलघञोरितिनुम् ॥

विलयः । पुं० प्रलये ॥ विशेषेणलीयन्तेपदार्थाअस्मिन् । लीङ्श्लेषणे । एरच् ॥ यथालवणस्य तोये ॥

विलला । स्त्री० श्वेतवलायाम् ॥ इ० राजनि० ॥

विलवासः । पुं० आहकजन्तौ ॥

विलवासी । पुं० सर्पे ॥ विलेवसति । णिनिः ॥

विलशयः । पुं० विलेशये ॥

विलसन् । त्रि० विलासदुक्ते ॥

विलसितम् । न॰ चेष्टिते ॥ भावेक्तः ॥ उद्भूते ॥

विलापः । पुं॰ परिदेवने । अनुशोचनोक्तौ । शोकोक्तौ ॥ विलपनम् । लपेर्भावे घञ् ॥ दुःखजे वचसि ॥

विलापितः । त्रि॰ घृतवद्द्रवीकृते । विलीनतांप्रापिते ॥

विलालः । पुं॰ यन्त्रे ॥

विलासः । पुं॰ लीलायाम् ॥ हावभेदे । सयथा । प्रियसमीपगमनेयः स्थानासनगमनविलोकनेषुविकारोऽकस्माच्चक्रोधस्मितचमत्कारमुखविकूननं सविलासः । तथाहि । योवल्लभांचानुगतोविकारोगत्यासनस्थानविलोकनेषु । तथास्मितक्रोधचमत्कृतौचविकूननस्वाग्गतंविलासः ॥ अपिच । विलासोऽङ्गविशेषोयः प्रियाप्तावासनादिषु । इति । विलसनम् । लसश्लेषणे । घञ् ॥ प्रकाशे ॥ शारीरिकसुखानुभवे ॥

विलासकाननम् । न॰ क्रीडावने ॥

विलासायुधः । पुं॰ कामदेवे ॥

विलासी । पुं॰ भोगिनि ॥ व्याले सर्पे । विष्वक्सेने । हरौ । अग्नौ ॥ चन्द्रे ॥ विलसनशीलः । विपूर्वाल्लसैर्वाकषलसेतिघिनुण् ॥

विलासिनी । स्त्री॰ नार्याम् ॥ वेश्यायाम् ॥

विलिप्तः । त्रि॰ श्लिष्टे ॥ विशेषेणलिप्तः ॥

विलिम्पन् । त्रि॰ उपदिहाने ॥ विलिम्पति । लिप॰ । शतृ ॥

विलीनः । त्रि॰ स्वतः प्राप्तद्रवीभावेघृतादौ । विद्रुते । द्रुते । श्लिष्टे । संसक्ते ॥ विलीयतेस्म । लीङ्श्लेषणे । गत्यर्थेतिक्तः । स्वादयओदितइतिनत्वम् ॥ विशेषेणलीनोवा ॥ विशेषेणलयङ्गते ॥ यथा । विलीनोवैवैवस्वतनगरकोलाहलभरोगतादूतादूरंक्वचिदपिपरेतान्मृगयितुम् । विमामानांव्रातोविदलयतिवीथीर्दिविषादांकथातेकल्याणीयदवधिमहीमण्डलमगात् ॥ विश्लिष्टे ॥

विलुप्तः । त्रि॰ संहृते ॥ चोरिते ॥

विलुप्ताब्दः । पुं॰ लुप्तसंवत्सरे ॥ यथा । गोजाल्यकुम्भेतरभेऽतिचारगोनोपूर्वराशिंगुरुरेतिवक्रितः तदाविलुप्ताब्दइहातिनिन्दितः शुभेषुरेवासुरनिम्नगान्तरे ॥

विलुम्पकः । त्रि॰ अपहर्त्तरि ॥

विलुलितः । त्रि॰ आकुलिते । आकर्षणाकुलिते ॥ विधुते ॥

विलेखनम् । न॰ छेदने ॥ आकर्षणे ॥ लेखने ॥

विलेप: । पुं॰ लेपे ॥ लिपेर्भावे घञ् ॥

विलेपनम् । न॰ कुङ्कुमाद्यनुलेपने । समालम्भे ॥ गात्रानुलेपनयोग्ये पिष्टे घृष्टे वा सुगन्धद्रव्ये । गात्रानुलेपन्याम । घृष्टचन्दनादिलेपमात्रे । विलिप्यतेऽनेन । लिप उपदेहे । ल्युट् ॥

विलेपनी । स्त्री॰ यवाग्वाम् ॥ सुवेशस्त्रियाम् ॥

विलेपी । त्रि॰ विलेपनकर्त्तरि ॥

विलेपी । स्त्री॰ यवाग्वाम् । उष्णिकायाम् ॥ अस्या विधिर्गुणाश्च । चतुर्गुणाम्बुसंसिद्धा विलेपी घनसिक्थिका । पृथग्द्रवेयरहिता स्यात् शिथिलभक्तिका ॥ संसिद्धा॰ अतीवसिद्धा । विलेपीति गलस्थो॰ इति लोके । विलेपी दीपनी बल्या हृद्या सङ्ग्राहिणी लघुः । व्रणाक्षिरोगिणां पथ्या तर्पणी तृड्ज्वरापहा ॥ विलिम्पति । लिप॰ । पचाद्यच् । गौरादि: ॥

विलेवासी । पुं॰ सर्पे ॥

विलेशय: । पुं॰ सर्पे । मूषिके ॥ गोधादिषु ॥ यथा । गोधाशशभुजङ्गाखुशल्लक्याद्या विलेशया: । विलेशया वातहरा मधुरा रसपाकयो: । बृंहणा बद्धविण्मूत्रा वीर्य्योष्णाश्चापि कीर्त्तिता: ॥ विलेशेते । अधिकरणे शेते॰ इत्यच् । शयवासेत्यलुक् ॥

विलोकनम् । न॰ दर्शने । लोकृ दर्शने । ल्युट् ॥

विलोकित: । त्रि॰ दृष्टे ॥ लोकृ॰ । क्त: ॥

विलोचनम् । न॰ चक्षुषि ॥ विलोच्यतेऽनेन । लोचृ॰ । ल्युट् ॥ दर्शने ॥

विलोटक: । पुं॰ नलमीने । बालियामाछ॰ इ॰ गौ॰ भा॰ प्रसिद्धे ॥

विलोडनम् । न॰ मथने ॥ आलोडने । विलोवना॰ इ॰ भा॰ प्र॰ ॥

विलोडित: । त्रि॰ आलोडिते । मथिते । विलोया॰ इ॰ भा॰ न॰ तक्रे ॥

विलोप: । पुं॰ विशिष्टलोपे ॥

विलोभ: । पुं॰ विलोभने ॥ विलुभेर्घञ् ॥

विलोम: । पुं॰ सर्पे । वरुणे ॥ शुनि । न॰ अरघट्टके ॥ विपर्य्ययन्वे । त्रि॰ प्रतीपे । विपरीते ॥

विलोमक: । पुं॰ प्रतिकूले । विपरीते ॥

विलोमजिह्व: । पुं॰ अन्त: स्वेदे । महामृगे । हस्तिनि । विलोमा जिह्वा यस्य स: ॥

विलोमजिह्वक: । पुं॰ पीलौ । सि

म्बुरे। हस्तिनि। बिलोमा जिह्वा यस्य। कप्॥

बिलोमवर्णः। पुं॰ वर्णसङ्करजातौ॥

बिलोमी। स्त्री॰ आमलक्याम्॥

बिलोलः। त्रि॰ चञ्चले। यथा। कापि विलासबिलोलबिलोचनजनितमनोजम्। ध्यायति मुग्धबधूरधिकं मधुसूदनवदनसरोजम्॥

बिलोलितः। त्रि॰ विद्राविते॥

बिल्मम्। न॰ तले। तर्ष्ये। आलवाले। छिङ्गुनि॥

बिल्वः। पुं॰ श्रीफलद्रुमे। शाण्डिल्ये। शैलूषे। मालूरे। श्रीफले॥ अस्य फलगुणाः। श्रीफलस्तुवरस्तिक्तो ग्राही रूक्षोऽग्निपित्तकृत्। वातश्लेष्महरो बल्यो लघुरुष्णश्च पाचनः॥ अपि च। बिल्वं बालं कषायोष्णं पाचनं वह्निदीपनम्। सङ्ग्राहि तिक्तकटुकं तीक्ष्णं वातकफापहम्॥ पक्वं सुगन्धि मधुरं दुर्जरं ग्राहि दोषलम्। फलेषु परिपक्वेषु ये गुणाः समुदाहृताः॥ बिल्वादन्यत्र सर्वे ते बिल्वमामं गुणोत्तरम्। कफवातामपित्तघ्नी ग्राहिणी बिल्वपेशिका॥ अन्यच्च। काञ्जिके संस्थितं बिल्वमग्निसन्दीपनं परम्। इति॥ अथ भावप्रकाशे यथा। बालं बिल्वफलं ग्राहि दीपनं पाचनं कटु। कषायोष्णं लघु स्निग्धं तिक्तं वातकफापहम्। पक्वं गुरु त्रिदोषं स्याद्दुर्जरं पूतिमारुतम्। बिदाहि विष्टम्भकरं मधुरं वह्निमान्द्यकृत्॥ फलेषु परिपक्वं यद्गुणवत्तदुदाहृतम्। बिल्वादन्यत्र विज्ञेयमामं तद्धि गुणाधिकम्॥ द्राक्षाबिल्वशिवादीनां फलं शुष्कं गुणाधिकमिति च॥ अस्य शाकप्रकारस्तु। बाह्लीकसौरभ्ययुतप्रकाशबैल्वं फलं खण्डितमेव तैले। विपाचितं वल्लजचूर्णकीर्णं रुचिं विधत्तेऽभ्यवहारकाले॥ कफानिलहरं स्निग्धं कषायं दीपनं लघु। बालं तिक्तं फलं बैल्वं वृद्धं बैल्वं विबन्धकृत्। इति॥ बिलति। बिल भेदने। उल्वादिः। न॰ बिल्वद्वयस्य फले॥ पलपरिमाणे॥

बिल्वकर्कटी। स्त्री॰ बालबिल्वफले। बिल्वपेशिकायाम्॥

बिल्वजम्। न॰ बिल्वशाके॥ यथा। सुकृतं बिल्वजं शाकं चिरमाज्ये सहिङ्गुके। उषितं क्वथितं तक्रे शुक्लवर्णं सुपाचितम्॥ बिल्वजं कटुकं शाकं तिक्तं च लघु पाचितम्। सुगन्धं सुरसं प्रोक्तं सुशीतं रुचिकारकम्॥

बिल्वपत्री। स्त्री॰ बिल्वशुण्ठ्याम्। ज्वरापहायाम्। शुष्कबिल्वखण्डे॥

बिल्वपेशिका। स्त्री॰ बिल्वकर्क्याम्। बेलशूंठ। इ॰ गौ॰ भा॥ ग्राहिणी कफवातामशूलघ्नी बिल्वपेशिका

विल्वमूला । स्त्री० वाराहीकन्दे ॥

विल्वशुण्ठी । स्त्री० विल्वपत्र्याम् । बेलशुंठा० इ० गौ० दे० भा० प्र० ॥

विल्वसूः । स्त्री० दशपुत्रायाम् ॥

विल्वा । स्त्री० हिङ्गुपत्र्याम् ॥

विवः । त्रि० पक्षिवाहने ॥ विनापक्षिणा वाति गच्छति । वा० । आतइति कः ॥

विवक्षा । स्त्री० कथनेच्छायाम् ॥ अ क्तौ ॥

विवक्षितः । त्रि० कथनेच्छाविषये । वक्तुमिष्टे ॥ अवच्यार्थे ॥

विवक्षुः । त्रि० वक्तुमिच्छौ ॥

विवत्सा । स्त्री० नष्टापत्यायाम् ॥

विवदमानः । त्रि० विवादकर्त्तरि ॥

विवधः । पुं० पर्याहारे । वीवधे । पथि । भारे ॥ विविधो वधो हननं गमनं वा यत्र । प्रादिभ्यो धातुजस्येति समासोत्तरपदलोपौ ॥

विवन्धः । पुं० मलाप्रवृत्तौ ॥

विवरम् । न० दूषणे । गर्त्ते । छिद्रे ॥ अवकाशस्थाने ॥ विवृणोति । वृञ् वरणे । पचाद्यच् ॥ यद्वा । विव्रियते । ग्रहवृदृनिश्चिगमश्चेत्यप् ॥ विगतो वरोऽस्माद्वा ॥ वीनां पक्षिणां वरं वा ॥ पुं० अतलादिबिलेषु । यथा । अतलं प्रथमं प्रोक्तं द्वितीयं वितलं तथा । तृतीयं सुतलं प्रोक्तं चतुर्थं चैव तलातलम् । महातलं पञ्चमन्तु षष्ठं प्रोक्तं रसातलम् । सप्तमं विप्रपातालं सप्तैते विवराः स्मृताः । एतेषु बिलस्वर्गेषु दिवेऽप्यधिकमेव च । कामभोगैश्वर्यसुखं समृद्धभवनेषु चेति देवीभागवतम् ॥

विवरणम् । न० व्याख्यायाम् । अर्थस्फुटीकरणे ॥ कथने ॥

विवरनालिका । स्त्री० वंश्याम् । वेणौ ।

विवरेसद् । त्रि० मध्यवर्त्तिनि ॥ विवरे सीदति । षद् ऌ० । सत्सूद्विषेत्यादिना क्विप् । तत्पुरुषे कृतीत्यादिना ऽलुक् ॥

विवर्णः । त्रि० पामरे । नीचे । सङ्करे ॥ विगतो वर्णो यस्मात् ॥ मलिने ॥

विवर्णवासाः । त्रि० काषायवाससि ॥

विवर्त्तः । पुं० समुदाये । सङ्घे । अपावृत्तौ । अपवर्त्तने ॥ नर्त्तने । नृत्ये । स्वरूपानुपमर्देन कार्यान्तरापत्तौ । अप्रच्युतपूर्वस्वरूपस्य नानाऽऽकारावभासे ॥ यथा । सतत्त्वतोऽन्यथाप्रथा विकार इत्युदीरितः । अतत्त्वतोऽन्यथाप्रथा विवर्त्त इत्युदाहृत इति ॥ विवर्त्तनम् । वृतु० । घञ् ॥

विवर्त्तनम् । न० परिभ्रमणे ॥ प्रत्यावृत्तौ ॥ पराङ्मुखविलुण्ठने ॥

विवर्त्तवादः । पुं० वादविशेषे । ब्रह्मैवानाद्यनिर्वचनीयाविद्यावशात्मना

पेणविवर्त्तते । सुखमिवतत्त्वज्ञाया
स्वनभेदादित्यवं निर्द्धारितेति ॥ त
थाहि । ततोनिरंशस्यानन्दविवर्त्तो
जगदिष्यताम् । अवस्थान्तरभानन्तु
विवर्त्तोरज्जुसर्पवत् ॥ मायाशक्तिः
कल्पिकाख्यादिन्द्रजालिकशक्तिवत्
। शक्तिः शक्तात्पृथङ्नास्तितद्वद्
दृष्टेनचाभिदा । प्रतिबन्धस्यदृष्टत्वा
च्छक्त्यभावेतुकस्यसः । शक्तिः
कार्यानुमेयायाचनिर्वाच्यत्वमिष्य
ते ॥

विवर्त्तितः । त्रि॰ परिमण्डलिते ॥

विवर्द्धनः । पुं॰ विशेषेणवृद्धिहेतौ ॥

विवशः । त्रि॰ अस्वतन्त्रे । अवश्यात्म
नि ॥ अरिष्टदुष्टधियि । आसन्नमर
णसूचकलक्षणेनदुष्टमतौ ॥ विरुद्धं
वष्टि॰कामयते । वश॰ । अच् ॥
कातरे ॥

विवसनः । पुं॰ अर्हति । जिने ॥ बौ
द्धे ॥ त्रि॰ दिगम्बरे । विगतंवसनं
यस्य सः ॥

विवस्त्रः । त्रि॰ नग्ने ॥

विवस्वान् । पुं॰ सर्वज्ञचिद्वंशबीजभृ
ति॰ आदित्ये । सूर्य्ये । विविधवस्त
॰अ । च्छादयति वस॰ । क्विप् ।
विवोरश्मिरस्याऽस्ति । मतुप् । तस्यो
मस्यर्थे तु तभत्त्वाद्रुत्वाभावः ॥ वि
वस्वान् लोकोस्तिना ॥ अर्क्कवृक्ष ॥
[illegible] । सुरे । अरुणे ॥ वैवस्वत

मनौ ॥

विवस्वती । स्त्री॰ सूर्य्यनगर्याम् ॥

विवहः । पुं॰ दारपरिग्रहे ॥ वायोः
पञ्चमेस्कन्धे । सयथा । स्वःस्थाद्
गौडगन्धासुदृकप्रतिष्ठितसप्ततीः
सम्भवश्च्चावहेभ्यः पञ्चमोविवहो
गतः । ५ ॥

विवाकः । त्रि॰ विवेचनकर्त्तरि ॥ य
था । अर्थिप्रत्यर्थिनोर्वचनविरुद्धावि
रुद्धंसभ्यैः सह विविनक्ति विवेचयति
सः॰ विवाकइतिमिताक्षरा ॥

विवादः । पुं॰ व्यवहारे । ऋणादि
न्याये ॥ सचधनविभागादिविषय
न्यायादिः । यथा । ऋणादिदाय
कालहिक्ययोर्वहुतरस्थया । विवादोव्य
वहारश्चप्रमेतात्नगद्यते ॥ अष्टादश
विवादस्य नानियम्य । तेषामाद्य
मृणादानंनिक्षेपोऽस्वामिविक्र
यः । सम्भूयचसमुत्थानंदत्तस्यान
पकर्मच ॥ वेतनस्यैवचादानंसंविद
श्चव्यतिक्रमः । क्रयविक्रयानुशयो
विवादः स्वामिपालयोः ॥ सीमा
विवादधर्मश्चपारुष्येदण्डवाचिके ।
स्तेयञ्चसाहसञ्चैवस्त्रीसङ्ग्रहणमेवच
॥ स्त्रीपुंधर्मोविभागश्चद्यूतमाह्वयमे
वच । पदान्यष्टादशैतानिव्यवहार
स्थितावितिमनुः ॥ मिथोविरुद्ध
वादे । पक्षप्रतिपक्षपरिग्रहेणविरुद्ध
वदने ॥ विरुद्धोवादोविवादः ॥

विवादानुगत : । त्रि० विवादकर्त्तरि

विवादी त्रि० विवादवति ॥ मत्वर्थीयइनि : ॥ विवादकर्त्तरि ॥

विवाधनम् । न० शाठ्ये ॥ पीडायाम् ॥

विवाधा । स्त्री० पीडायाम् ॥

विवार : । पुं० वर्णोच्चारणे प्रयत्नविशेषे ॥ विवारयति विकाशयत्यास्यमिति विवार इति कैयट : ॥

विवास : । पुं० समाप्तौ ॥

विवाह : । पुं० भार्याप्राप्तिहेतौ । दारपरिग्रहे । उपयमे । परिणये । उद्वाहे । उपयामे । पाणिपीडने ॥ धर्मप्रजारत्यर्थो हि विवाह : विवाहो ऽष्टविध : प्रोक्त : स्मृतिशास्त्रे पुमूरिभि : । ब्राह्मणादिविभेदेन कलौ सद्विविधो मत : ॥ परिणीतास्तु या नार्यो ब्राह्मणैर्वत्मभि : । ता एव दारा विज्ञेया अन्या सर्वा परिग्रह इतमहानिर्वाणतन्त्रम् ॥ विवाहानन्तरकन्याया भर्तृगृहगमनकालि पिताद्रीनां रोदनं पुराणसिद्धम् । यथा दुर्वाससा सह और्वकन्याया : कन्दल्या विवाहे । कन्यासमर्पणं कृत्वा मोहाद्दुःखेन रोदन । मूर्च्छामवापस मुनि : स्वकन्याविरहातुर : ॥ च पश्यभेदमीकौच : स्वात्मारामं नमुक्षति । चर्व नचेतनां प्राप्य वेधया मास कन्यकाम् ॥ मूर्च्छितां तात

विच्छेदाद् दन्तीशोकसंयुताम् ॥ इति ब्रह्मवैवर्त्त पुराणम् ॥ विशिष्टं वहनम् । वहप्रापणे । घञ् ॥

विवाहक : । पुं० विवाहे । स्वार्थेक : ॥

विवाहित : । पुं० स्त्री० कृतविवाहे ॥

विवाह्य : । त्रि० विवाहयोग्ये ।

विविक्त : । पुं० वसुनन्दने ॥ त्रि० असम्पृक्ते ॥ एकान्ते । रहसि ॥ जनसम्मर्दरहितदेशे ॥ पूते ॥ विवेकिनि ॥ विविच्यन्ते जना अत्र । विचिर्० । पृथ्यार्थत्वात् कर्मण्यत्वादा धाराधिकरणे च क्त : । विविच्यते० विविच्यते वा । विचिर् पृथग्भावे० विचिर् विरेचने वा । क्त : ॥ एकाग्रे

विविक्तदेश : । पुं० जनसम्बन्धविवर्ज्जितदेशे । स्वभावत : संस्कारतो वा शुद्धे ऽशुचिभि : सर्पव्याघ्रादिभिश्च रहित० सुरधुनिपुलिनादौ० चित्तप्रसादकरदेशे ॥ विविक्तावासोदेशश्च ॥

विविक्तसेवी । त्रि० एकान्तवासस्वभावे विवेकिनि ॥ विविक्तं जनसम्मर्दरहितं० पूताद्यं० यद्वनगिरिगुहादि० तत्सेवितुं शीलं यस्य ॥

विविक्ता । स्त्री० दुर्भगायाम् ॥

विविग्न : । त्रि० भीते ॥

विविदिषा । स्त्री० वेदितुमिच्छायाम् ॥

विविक्षित : । त्रि० वक्तुमिष्टे । ल

अभिमिष्टे ॥

विविदिषा। स्त्री० वेदितुमिच्छायाम्॥

विविदिषासन्न्यास:। पुं० इहजन्मनि जन्मान्तरे वा सम्यगनुष्ठितैर्वेदानुवचनादिभिरुत्पन्नया विविदिषया सम्पादितो ज्ञानसाधनभूतस्त्यागो ॥ अयञ्च द्विविध: । जन्मापादककर्मादित्यागमात्रात्मक: प्रैषोच्चारणपूर्वं दण्डधारणाद्याश्रमरूपश्चेति । तत्राद्ये स्त्रियोऽप्यधिक्रियन्ते । अतएव वेदे येनाहं नामृता स्यां किमहं तेन कुर्यामित्यादिमैत्रेयीवाक्यमाम्नायते । ब्रह्मचारिगृहस्थवानप्रस्थानां केनचिन्निमित्तेन सन्न्यासाश्रमस्वीकारे प्रतिबन्धे स्वाश्रमधर्मेष्वनुष्ठीयमानेष्वपि वेदनार्थमिमं सन्न्यासकर्मादित्यागो न विरुध्यते श्रुतिस्मृतीतिहासपुराणेषु लोके च तादृशानां तत्त्वविदां बहूनामुपलम्भात् । यस्तु दण्डधारणादिरूपो वेदनहेतु: परमहंसाश्रम: स पूर्वोक्त एव बहुधा प्रपञ्चितस्तत्तद्ग्रन्थेष्ववधेय: ॥

विविदिषु:। त्रि० विविदिषासम्पन्ने॥ यथा । रुद्रा विविदिषु: पुत्रविततलोकैषणास्त्र । अनुतिष्ठति विद्यार्थं श्रवणादीन्यहर्निशम् ॥

विविध:। त्रि० बहुविधे । नानाप्रकारे ॥ त्रिविधाभिधायकस्य: ॥

विविधप्रहरणनामा । पुं० पशु-क्लि० ॥ १० ।

विवीत:। पुं० भूमिविशेषे । यथा । सममेषां विवीतेऽपि खरोष्ट्रमहिषीसमम् ॥ विवीत: प्रचुरतृणकाष्ठो रक्ष्यमाण: परिगृहीतो भूप्रदेशस्तदुपघातिपीतरस्त्वसमं दण्डमेषां महिष्यादीनां वदन् इति स्वामिपालविवादे मिताक्षरा ॥

विवीतभर्त्ता। पुं० विवीतभूस्वामिनि॥

विवृक्ण:। त्रि० छिन्ने ॥

विवृत:। त्रि० विस्तृते ॥ उद्घाटिते । व्याप्ते । वा:यो० इ० भा० । प्रकाशीकृते ।

विवृता। स्त्री० क्षुद्ररोगभेदे ।

विवृताक्ष:। पुं० ताम्रचूडे ॥ त्रि० व्यादितास्ये ।

विवृति:। स्त्री० व्याख्यायाम् । विवरणम् । इन् ० । क्तिन् ।

विवृत्त:। त्रि० लुठिते ॥ तिर्यक्चलिते । परावृत्ते ।

विवृता। स्त्री० क्षुद्ररोगभेदे ।

विवृत्ति:। स्त्री० स्फुरिते ॥ घूर्णे । चक्रवद्भ्रमणे । विवर्त्तनम् । वृतु ० । क्तिन् ॥

विवेक:। पुं० विचारे । मिथ्याभ्यासवस्तुस्वरूपनिश्चये । इदं हेयमिदमुपादेयमिति विवेचनायाम् ॥ यथा: नित्यानित्यवस्तुनो: ॥ तत्त्वज्ञानस्य श्रवणादिकं साधनम् । मनोना

अस्ययोगः। वासनचयस्यप्रतिकूलता।समोत्पादनमित्थं विविच्य निश्चये॥ पृथगात्मतायाम्। पृथग्भावे। प्रकृतिपुरुषादिभेदज्ञाने। व्यक्ताव्यक्तज्ञविज्ञानेविवेचनम्। विचिर्पृथग्भावे। घञ्॥ तत्त्वावधारणे। विद्यामदधनमदकुलाचारमदादिमदानांविरोधिनि॥ सच दर्शितोजनकेन। अद्ययेमहतांमू-र्ध्नितैर्दिनैर्निपतन्त्यधः। हन्ताचत्तमहत्तायांकैषाविश्वस्ततातव॥ क्वचनानिमहीपालाब्राह्मणाः क्वजगन्तिवा। प्राकृतानिप्रयातानिकेयं विश्वस्ततातव॥ कोटयोब्रह्मणांयातागतासर्गपरम्पराः। प्रयातापांशुवद्भूपाः काधृतिर्ममजीविते॥ येषांनिमेषणोन्मेषौजगतः प्रलयोदयौ तादृशाः पुरुषायातामादृशांगणनैवका॥ इति॥ जलद्रोण्याम्॥ पृथग्भावविचारे॥ विभागे॥ एकान्ते॥

विवेकिता। स्त्री० विवेकित्वे। कार्याकार्यविचारतायाम्। मदमूढवुद्धिषुविवेकिताकुतः॥

विवेकी। त्रि० मनीषिणि। गुरुशास्त्राद्युपदेशयुक्ते॥ विवेकोऽस्यास्ति। अतइनिः॥ शास्त्रदृष्टिर्विवेकिनाम्॥ विचारकर्त्तरि॥ पुं० देवसेनराजपुत्रे॥

विवेचकः। पुं० विवेचनस्यकर्त्तरि॥ विवेचयति। विचिर्०। ण्वुल्॥

विवेचनम्। न० विवेके॥

विवेचनीयः। त्रि० विवेच्ये। विवेचितव्ये॥

विवोढा। पुं० परिणेतरि। वरे। पत्यौ॥

विव्रुवन्। त्रि० विरुद्धवक्तरि।

विव्वोकः। पुं० हावविभेदे। स्त्रीणां शृङ्गारभावजायांक्रियायाम्॥ यथोक्तम्। विव्वोकोऽभिमतप्राप्तावपिगर्वादनादरइति॥ विवानम्। वागतौ। विवुर्गतिविशेषः। मृगय्वादित्वात्कुप्रत्ययः। उच्यतेसमवैत्यच। उचसमवाये। हलश्चेति घञ्। घञर्थेकोवा। ओकउचः के॰इतिनिपातितः। विवोरोकः स्थानम्॥

विट्। पुं० मनुजे॥ वैश्ये॥ प्रवेशे॥ विशति। विशप्रवेशने। क्विप्। व्रश्चेतिषत्वम्। जश्त्वचर्त्वे॥

विशम्। न० विसे। मृणाले॥

विशकण्ठी। स्त्री० वलाकायाम्॥

विशङ्कः। त्रि० निश्शङ्के। शङ्कारहिते॥

विशङ्कटः। त्रि० पृथौ। विशाले॥ विस्तृतार्थवृत्ते विशब्दात्॰वेः शालच्छङ्कटचौ॥ स्त्री॰विशङ्कटी। षद्गादिभ्यश्चेतिङीष्॥

विशदः । पुं॰ शुक्ले । शुभ्रे । श्वेते । पाण्डरे । धवले ॥ त्रि॰ व्यक्तवर्णयुक्ते ॥ प्रसन्ने । विमले । व्यक्ते । विविक्तावयवे । यथा॰ खरविशदमभ्यवहार्यंभक्ष्यमिति ॥ विशीयते॰ शद् शातने । अच् ॥

विशदप्रभः । त्रि॰ निर्मलकान्तौ ॥

विशब्दनम् । न॰ प्रतिज्ञाने ॥ शब्देनप्रकटीकृताभिप्राये ॥

विशस्वरा । स्त्री॰ पद्माम् । इतिरत्ननिर्घण्टः ॥

विशयः । पुं॰ संशये अस्यायमर्थोनवेतिसन्देहे ॥ विविधंशयनम् । शीङ्स्वप्ने । एरच् ॥

विशयी । त्रि॰ संशयिनि ॥

विशरः । पुं॰ वधे । मारणे । विशरणम् । शॄहिंसायाम् । ऋदोरप् ॥

विशरणम् । न॰ अवयवानांविश्लेषे ॥ मारणे ॥ भेदने ॥

विशल्यः । त्रि॰ शल्यरहिते ॥

विशल्यकरणी । स्त्री॰ ओषधिविशेषे ॥

विशल्यकृत् । पुं॰ अचोटके । भूपलाशे । इतिपरमानन्दः॰गौ॰दे॰भा॰प्र॰वृत्ते ॥ त्रि॰विशल्यकारिणि ॥ विशल्यंकरोति । डुकृञ्॰ । क्विप् ॥

विशल्या । स्त्री॰ अग्निशिखायाम् लाङ्गलिक्याम् । लघुदन्त्याम् । गुडूच्याम् ॥ त्रिपुटायाम् ॥ शल्यनरहितायाम् । लक्ष्मणाख्यौषधौ । अजमोदायाम् । कलिकार्याम् । विगतांशल्यात् । विगतंशल्यमनया॰यस्माद्वा । तीर्थविशेषे ॥

विशल्यानदी । स्त्री॰ तीर्थविशेषे ॥

विशसनः । पुं॰ तरवारौ ॥ खड्गे नरकान्तरे ॥ न॰ मारणे ॥ शसुहिंसायाम् । ल्युट् ॥

विशसितः । त्रि॰ मारिते ॥ विपूर्वाच्छसेः क्तः ॥

विशसिता । त्रि॰ पशोरङ्गानांकर्त्र्यादिनापृथक्पृथक्कारके ॥

विशस्तः । त्रि॰ अविनीते ॥ शसु॰ । क्तः । प्रविशसौवैयात्ये । एतौनिष्ठायामविनयएवानिटौस्तः ॥

विशस्ता । पु॰ चाण्डाले ॥

विशाकरः । पुं॰ भद्रचूडे ॥

विशाखः । पुं॰ शिखिवाहने । कार्त्तिकेये । षडानने ॥ विशाखति । शाखृव्याप्तौ । पचाद्यच् ॥ विशाखायांजातइतिवा । सन्धिवेलादौ अण् । श्रविष्ठाफल्गुन्यादिनातस्यलुक् । लुक्तद्धितलुकि । धन्विनांसमरकाले॰वितस्त्यन्तरेणस्थितेपादद्वयेसतिविशाखाख्यस्थानंभवति॰तस्मिन् । याचके । तर्के । पुनर्नवायाम् ॥

विशाखलम् । न॰ योधानांपादविन्यासभेदे ॥

विशाखा । स्त्री॰ षोडशनक्षत्रे । राधायाम् ॥ यत्रांजातस्य फलं यथा । सदानुरक्तो विविधक्रियायां सुवर्णकारैरपि सख्यमेति । यस्य प्रसूतौ च भवेद्विशाखा सखा न कस्यापि भवेत् प्रसूतः ॥ पार्थिकमेकवचनम् ॥ अजाद्याप् ॥ कठिल्लके ॥

विशाय: । पुं॰ उपशाये । यामिनां क्रमाच्छयने ॥ यथा । उपशायो विशायश्च पर्यायशयनार्थकौ । विशयनम् । शीङ् स्वप्ने । व्युपयोः शेतेः पर्याय इति घञ् ॥

विशारणम् । न॰ मारणे ॥ इति हेमचन्द्रः ॥

विशारदः । पुं॰ सर्वज्ञे । ईश्वरे ॥ वकुले ॥ मद्यगन्धे ॥ त्रि॰ पण्डिते ॥ धृष्टे ॥ प्रगल्भे ॥ प्रसिद्धे ॥ श्रेष्ठे ॥ विशिष्टो विपरीतो वा शारदः । प्रादयो गतेति समासः ॥ विशुद्धे ॥

विशारदा । स्त्री॰ क्षुद्रदुरालभायाम् ॥

विशालः । पुं॰ मृगप्रभेदे ॥ पक्षिविशेषे ॥ नृपान्तरे ॥ वृक्षविशेषे ॥ त्रि॰ पृथुले ॥ विस्तृतार्थवृत्तेर्विशब्दात् । वेः शालच्छङ्कटचाविति॰ शालच् ॥ यद्वा । विशति । विश प्रवेशने । तमिविशिबिडोत्यादिना कालन् ॥ विस्तीर्णे ॥

विशालता । स्त्री॰ पार्श्वविस्तारे । परिणाहे । पनहा॰ इ॰ भा॰ ॥ विशालस्य भावः । तस्य भावस्त्वतलाविति तल् ॥

विशालतैलगर्भः । पुं॰ अङ्कोठवृक्षे ॥

विशालत्वम् । न॰ विशालतायाम् ॥

विशालत्वक् । पुं॰ सप्तपर्णवृक्षे ॥ विशाला त्वगस्य । बृहत्त्वचि ॥

विशालपत्रः । पुं॰ कासालौ । कोकणदेशप्रसिद्धोयम् । मृदुताले । श्रीताले । विशालानि पत्राणि यस्य ॥

विशालफलिका । स्त्री॰ निष्पाव्याम् ॥

विशाला । स्त्री॰ इन्द्रवारुण्याम् ॥ अन्येन्द्रवारुणी प्रोक्ता विशाला तु महाफला । विशाला कफवातघ्नी मेहकुष्ठहरा सरा । उज्जयिन्याम् ॥ विशलति । शल चलने । ज्वलितीतिणः ॥ यद्वा । विशति । विश॰ । तमिविशिविडौतिकालन् । विशालशब्दात् स्त्रियामजाद्यतष्टाबिति टाप् ॥ उपोदक्याम् ॥ बदरिकाश्रमे ॥

विशालाक्षः । पुं॰ हरे । महेश्वरे ॥ तार्क्ष्ये । गरुडे ॥ त्रि॰ विशालनयने । सुनेत्रे ॥ विशाले अक्षिणी यस्य । बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ॥

विशालाक्षी । स्त्री॰ नागदन्त्याम् ॥ देवताविशेषे ॥ वाराणस्याम् विशालाक्षी विशाला-

यामपिस्थिता ॥ योगिनीविशेषे ।
षित्वान्ङीष् ॥

विशालाया । स्त्री॰ पाटलायाम् ॥

विशाली । स्त्री॰ अजमोदायाम् ।
वनयवान्याम् । वस्तगन्धायाम् ॥
बह्वादिभ्यश्चेतिङीष् ॥

विशिखः । पुं॰ शरे । बाणे ॥
तोमरे ॥ शरवृक्षे ॥ विशिष्टा
शिखाऽग्रमस्य ॥ त्रि॰ शिखारहि
ते ॥ यथा । विशिखोप्युपवीतीच
यत्करोतिनतत्कृतमितिस्मृतिः ॥

विशिखा । स्त्री॰ खनित्याम् । र
थ्यायाम् ॥ नलिकायाम् ॥ वि
शेते ॥ शीङ्॰ । शीङः किद्भ्र
स्वश्चेतिखः । टाप् ॥

विशिपम् । न॰ गृहे । मन्दिरे ।
विशन्त्यत्र । विश॰ विटपविष्टप
विशिपोलपाइति॰ विशेः कप-
न्॰ प्रत्ययोदेरित्वञ्च ॥

विशिष्टः । पुं॰ विष्णौ ॥ त्रि॰ प्र
कृष्टज्ञानवति ॥ अधिके ॥ युक्ते
॥ विशेषेणशिष्टः ॥ यद्वा । वि
शिष्यतेसर्वज्ञात्वादिभिः सर्वेभ्योऽ
तिरिच्यते । विपूर्वात्॰ शिष्लृ
विशेषणाद्भूयत : कर्मणिक्तः ॥

विशिष्टाद्वैतवादी । त्रि॰ प्रकृतिपु
रुषयोर्भिन्नत्वेपिमितयोस्तयोर्ब्रह्म
त्ववादिनि ॥ तस्यमतंयथा । पु
रुषस्तदतिरिक्ताकृतिः॰ किन्तुभ

यमितंब्रह्म । यथाकश्चिद्दलवत् । इ
त्थंब्रह्मणएकत्वंव्यवस्थितम् । चि
त्परमाणुस्वरूपोजीवः॰ समस्तवि
श्वंब्रह्मांशः । इतिमाधवभा-
ष्यादिः ॥

विशीर्णः । त्रि॰ विध्वस्ते ॥ गलि
ते ॥ विशीर्यतेस्म । शॄहिंसाया
म् । क्तः ऋतइद्धातोः । रदा
भ्यामितिनः । णत्वम् ॥ विशी
र्णः प्रारब्धोवपुरपिजराव्याधिवि
धुरंगतंदूरेविप्रस्वजनभरणांशाऽच्छि
तमपि । इदानींव्यामोहादहहवि-
परीतेहतविधौविधेयंयत्तत्वंस्फुर-
तिमनागपिहृदये । इतिशिह्ल
णमिश्रः ॥

विशीर्णपर्णः । पुं॰ निम्बवृक्षे ॥

विशीर्णवाक् । त्रि॰ स्खलित व
चने ॥

विशुद्धम् न॰। अज्ञानतत्कार्यम
लरहितत्वान्निष्प्रपञ्चे वेदान्तप्रसि-
द्धेब्रह्मणिषट्चक्रान्तर्गतपञ्चमच
क्रे कण्ठस्थे । विशुद्धिंतनुतेय
स्माज्जीवस्यहंसलोकनात् । विशु
द्धंपद्ममाख्यातमाकाशाख्यंमहा-
द्भुतम् ॥ जीवस्यहंसरूपपरमात्म
नोवलोकनाज्जीवंयस्माद्विशुद्धं-
तनुते॰ ततोविशुद्धमित्यन्वयः ॥
त्रि॰ उज्ज्वले । विमले । शुद्धे
॥ केवले ॥ निभृते ॥ सत्ये ।

विशेषेणशुद्धः ॥ विषयोपरागशून्ये ॥

विशुद्धविज्ञानम् । न० कार्यकारणोपाधिविनिर्मुक्तेब्रह्मणि ॥

विशुद्धात्मा । त्रि० निर्मलाऽन्तःकरणे ॥ विशुद्धोरजस्तमोभ्यामकलुषितआत्माऽन्तःकरणरूपंसत्त्वंयस्यसः ॥

विशुद्धिः । स्त्री० समे ॥ शोधने ॥ सर्वकर्मण्युपादेयाविशुद्धिश्चन्द्रतारयोः ॥

विशृङ्खलः । त्रि० शृङ्खलारहिते । अवशे ॥ अप्रतिहते ॥ विगताशृङ्खलायस्य ॥

विशेषः । पुं० तिलके ॥ प्रभेदे ॥ अतिशये ॥ प्रकर्षे । इतरव्यावर्त्तके असाधारणधर्मे ॥ सप्तपदार्थान्तर्गतपदार्थभेदे ॥ विशेषंनिरूपयति । अन्त्योनित्यद्रव्यवृत्तिर्विशेषःपरिकीर्त्तितइति । अन्तेअवसानेवर्त्तते० इतिअन्त्यः । यदपेक्षयाविशेषोनास्तीत्यर्थः । घटपटादीनांद्व्यणुकपर्यन्तानांतत्तदवयवभेदात्परस्परभेदः । परमाणूनांभेदकोविशेषएव० सतुस्वतएवव्यावृत्तः तेनतत्रविशेषान्तरापेक्षानास्तीत्यर्थः ॥ इतिमुक्तावली ॥ पञ्चतन्मात्रेभ्योयथासङ्ख्यमाकाशादीनियानिपञ्चभूतानि । एतेस्मृताविशेषाः कुतः शान्ताघोराश्चमूढाश्चेतिसाङ्ख्याः ॥ अलङ्कारप्रभेदे ॥ यथा । विशेषःख्यातमाधारंविनाप्याधेयवर्णनम् । गतेसूर्येपिदीपस्थास्तमश्छिन्दन्तितत्कराः ॥ १ ॥ विशेषःसोपियद्येकंवस्त्वनेकत्रवर्ण्यते । अन्तर्बहिःपुरःपश्चात्सर्वदिक्ष्वपिसैवमे २ ॥ किञ्चिदारम्भतोऽशक्यवस्त्वन्तरकृतिश्चसः । त्वांपश्यतामयालब्धंकल्पवृक्षनिरीक्षणम् ॥ ३ ॥ विशिष्यते । शिष्लृविशेषणे । घञ् ॥ त्रि० शेषशून्ये ॥

विशेषकम् । न० तमालपत्रे । ललाटकृततिलके ॥ त्रयाणांश्लोकानामन्वये ॥ पुं० तिलकवृक्षे ॥ पुं० न० तिलकविशेषे ॥ त्रि० विशेषयितरि । विशेषाधायके० प्रभेदे ॥ विशिनष्टि । शिष्लृ० । ण्वुल् ॥

विशेषकच्छेद्यम् । न० चतुःषष्टिकलान्तर्गतषष्ठकलायाम् ॥ सातुतिलकेषुनानाविच्छेदरचनेतिशैवतन्त्रम् ॥

विशेषगुणः । पुं० बुद्ध्यादिषट्के । रूपादिचतुष्टये ॥ स्नेहे ॥ स्वाभाविकद्रवत्वे ॥ अदृष्टे ॥ भावनायाम् ॥ शब्दे ॥ इतिभाषापरिच्छेदः ॥

विशेषज्ञः । त्रि० सारविदि ॥

विशेषणम्। न॰ विशेष्यधर्म्मे। स तु गुणादिर्यथा। नीलोत्पलमित्यादि। व्यवच्छेदके॥ इदन्तमापो द्दशविशेषणाक्रमम्। विशिष्यते येन तद्विशेषणम्। कर्त्तुः करणत्व'विवक्षायां ल्युट्॥ सुबन्तद्वयथा नेकमुबन्तस्य विशेषणम्। तथा तिङन्तमप्यापि सुबन्तस्य विशेषणम्। पश्यमृगो धावतीत्यादौ मृगकर्त्तृकंगमनं दृशिक्रियायां कर्म॰प्रधानत्वद्दृशि'क्रयैव॥

विशेषणविशेष्यभावः। पुं॰ पदार्थयोः सम्बन्धविशेषे॥ द्वयोर्हि प्रतीतपदार्थकयोर्लौकिकिविशेषणविशेष्यभावो भवतीति पक्ष भाष्यम्॥ सम्बन्धस्तु भग्नवनिरूपणीयत्वात्। यथा सोयंदेवदत्त'इत्यत्र॰सशब्दार्थतत्कालविशिष्टदेवदत्तस्य॰अयशब्दार्थतत्कालविशिष्टदेवदत्तस्य चान्योन्याभेदस्यावर्त्तकतया विशेषणविशेष्यभावः। इन्द्रियार्थसन्निकर्षे अभावप्रत्यक्षे॰ विशेषणविशेष्यभावःसन्निकर्षः घटाभाववद्भूतलमित्यत्र॰चक्षुःसंयुक्तभूतलेघटाभावस्य'विशेषणत्वात्॥

विशेषतः। अ॰ विशेषादित्यर्थः॥

विशेषप्रतिपत्तिः। स्त्री॰ उत्कृष्टसम्भावनायाम्॥

विशेषविधिः। पुं॰ अल्पविषयकविधौ॥ यथा। तथासामान्यकार्य्येभ्यो विशेषविधिर्बली। बहवो विषया यस्य स सामान्यो विधिर्भवेत्। अल्पः स्याद्विषयो यस्य स विशेषविधिर्मतः॥ सामान्यविशेषयोर्मध्ये विशेषविधिर्बलवान्॥

विशेषव्याप्तिः। स्त्री॰ व्याप्तिभेदे॥ तल्लक्षणं यथा। प्रतियोग्यधिकरणत्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वमिति चिन्तामणिः॥

विशेषितः। त्रि॰ व्यवच्छिन्ने॥

विशेषोक्तिः। स्त्री॰ अलङ्कारभेदे॥ तल्लक्षणोदाहरणे यथा। कार्य्याजनिर्विशेषोक्तिः सतिपुष्कलकारणे। हृदिस्नेहक्षयोनाभूत्स्मरदीपेज्वलत्यपि॥ इति चन्द्रालोके॥

विशेष्यः। पुं॰ व्यवच्छेद्ये। भेद्ये॥

विशोकः। पुं॰ वेदान्तवेद्यात्मनि॥ विगतः शोकदुःखादिवियोगनिमित्तोमनसः सन्तापो यस्य॥ अशोकवृक्षे॥ त्रि॰ शोकरहिते॥

विशोधनम्। न॰ विशुद्धिसाधने॥

विशोधनी। स्त्री॰ दन्तीवृक्षे॥ शोधन्याम॥

विशोधनीबीजम्। न॰ दन्तीबीजे। जयपाले॥

विशोधिनी। स्त्री॰ नागदन्त्याम्॥

विश्रः। पुं॰ दीप्तौ॥ गत्याम्॥ विच्छदीप्तौ॰गतौवा। यजयाचयतविच्छप्रच्छरक्षोनङ्। क्ङित्त्वाद्गुणः॥

विश्रवणम् । न॰ विश्रावणे । इ॰ म॰ द॰ ॥

विश्रब्धः । त्रि॰ अनुद्धटे शान्ते । विश्वस्ते ॥ अत्यर्थे । गाढे ॥

विश्रब्धनवोढा । स्त्री॰ मुग्धानवोढाभेदे ॥

विश्रमः । पुं॰ विरतौ ॥ अश्रान्तौ ॥ विश्रम्यतेऽस्मिन्निति अस्यत्वस्याविश्रम आधारः ॥ श्रमापनोदे । श्राम्यते घञ् । नोदात्तोपदेशस्यमान्तस्या माचमेरितिवृद्ध्यभावः ॥

विश्रमणम् । न॰ विश्रमे ॥

विश्रम्भः । पुं॰ विश्वासे ॥ विश्रम्भणम् । श्रम्भुविश्वासे । घञ् ॥ केलिकलहे ॥ प्रणये ॥

विश्राणनम् । न॰ विश्राणिते । दाने । सम्प्रेषणे । परित्यागे ॥ श्रणदाने । चुरादिः । प्रायेणविपूर्वः । भावे ल्युट् ॥

विश्राणितः त्रि॰ दत्ते ॥

विश्रान्तः । त्रि॰ विगतक्लमे ॥ विगतखेदे ॥ श्रमेः क्तः । अनुनासिकस्यक्विझलोः क्ङितीतिदीर्घः ॥ शान्तियुक्ते

विश्रान्तिः स्त्री॰ विश्रामेतीर्थविशेषे ॥ विश्रमेः क्तिन् ॥

विश्रामः । पुं॰ विरतौ । विरामे ॥ अश्रमगुणास्तु । विश्रामोवस्त्रकाल्लस्ते दश्रमजन्मास्वादः शुभः । इति । शयनगृहे । परमात्मनि ॥ संसारसागरेसुस्पिप सादृशुर्मिं भ्रमतरङ्गतं अविद्याद्यैः पञ्चक्लेशैर्मदादिभिरुपक्लेशैश्च वशी कृतानांविश्रान्तिमकुर्वाणानां विश्रामंमोक्षंकरोतीतिविश्रामः परमात्मा ॥ विश्रमणम् । भावेघञ् ॥ विश्रामइतित्वपाणिनीयम् । नोदात्तोपदेशस्येतिवृद्ध्यभावात्श्रमेः शुद्धादघञिवृद्धेर्दुर्लभत्वादितिभावः । यदितुअयान् विश्रमयेत्यादाविव॰ णिचिवृद्धौ माशिक्यनिज्ञान्तादेरच् क्रियते॰ तदारूपंसिद्ध्यत्येव । अर्थस्तुभिन्न तद्वतिभावः । निरुक्तप्रकाराद्धातोः प्राकृतार्थे णिजितिविवक्षायान्तुनदोषइत्यवधेयम् ॥

विश्रामगृहम् । न॰ पान्थानां पथि निवासोचितेगृहे यथा । अलाभयाश्रयवाश्वविश्रामगृहमध्वनि । सेतुः प्रतिष्ठितोयेनतेनलोकत्रयंजितमितमधिनिर्वाणतन्त्रम् ॥

विश्रामस्थानम् । न॰ पान्थानां पथिनिवासायस्थाने निश्चिष्टे ॥

विश्रावः । पुं॰ प्रख्यातौ । अतिप्रसङ्गौ । विश्रवणम् । श्रुश्रवणे । विस्रुश्रुवद्वितिघञ् ॥

विश्रिः । पुं॰ मृत्यौ ॥

विश्रुतः । त्रि॰ ख्याते । प्रसिद्धे ॥ व्यश्राबि । श्रु॰ । क्तः ॥ ज्ञाते ॥ हृष्टे ॥ विशेषेणश्रुतः ॥

विश्रुतात्मा । पुं॰ विष्णौ ॥ अनाद्यविद्यावशान्मनुष्योहंब्राह्मणोहंकर्त्ताहंभोक्ताहमित्यन्तरतयात्मनाप्रतीयमानोप्यन्तरजहदुःखात्मकेभ्योदेहादिभ्योविशेषेणवैलक्षण्येनवेदान्तवाक्यैः सत्यज्ञानादिलक्षणः सन्श्रुतः श्रवणादिनाऽवगतआत्माअतो विशेषेणश्रुतत्वाद्विश्रुतात्मा । सचक्षेत्रज्ञः । क्षेत्रज्ञंचापिमांविद्धीतिभगवद्वचनात् ॥ ब्रह्मविदि । विशेषेणश्रुतआत्मायेन । ज्ञानीत्वात्मैवमेमतमितिभगवद्वचनादस्यविष्णुरूपत्वंसुप्रसिद्धमेव ॥

विश्रुतिः । स्त्री॰ कीर्त्तौ ॥ विख्यातौ ॥

विश्लथः । त्रि॰ शिथिले ॥

विश्लिष्टः । त्रि॰ शिथिले ॥

विश्लेषः । पुं॰ विधुरे ॥ वियोगे विभागे ॥

विश्वः । पुं॰ विश्वरूपभगवति ॥ व्यष्ट्युपहितचैतन्ये व्यष्टिस्थूलशरीरोपहितस्य॰ विश्वशब्दवाच्यत्वेहेतुः सूक्ष्मशरीरमपरित्यज्यस्थूलशरीरादिप्रविष्टत्वादिति । सूक्ष्मशरीरंकारणशरीरं तदपरित्यज्य॰ स्थूलशरीरादौ॰ तदपेक्षयास्थूलशरीरंलिङ्गशरीरंतदादिर्यस्यपरमस्थूलशरीरस्येतितद्गुणसंविज्ञानोबहुव्रीहिः । तस्मिन्प्रविष्टत्वात् । तथाहि । जीवस्यत्रयउपाधयः सुषुप्त्यादौबुद्ध्यादिसंस्कारोपरक्तिमज्ञानमात्रमुपाधिः । स्वप्नेजाग्रद्वासनामयंलिङ्गशरीरमुपाधिः । जाग्रदवस्थायान्तुसूक्ष्मशरीरसंसृष्टस्थूलशरीरमुपाधिः । तथाचपूर्वंपूर्वोपाधिविशिष्टस्यैवोत्तरोपाधिप्रवेशात्सर्वशरीरप्रविष्टत्वेनैवस्थूलभोगायतनाभिमानिनोविश्वइतिसंज्ञा ॥ यद्वा । सूक्ष्मशरीरंलिङ्गशरीरंतदपरित्यज्य॰ स्थूलशरीरंविराट्व्यष्टितदादिर्यासांचक्षुरादिवृत्तीनां॰ तत्तद्विषयाकाराणान्तत्प्रविष्टत्वादितिहेतुयोजनाविश्वशरीरवर्त्तित्वाद्विश्वः ॥ गणदेवताविशेषेषु ॥ तेयथा ॥ क्रतुर्दक्षोवसुःसत्यः कालःकामोधृतिःकुरुः । पुरूरवामाद्रवाश्चविश्वेदेवादशस्मृताः ॥ इष्टिश्राद्धे क्रतुर्दक्षः सत्योनान्दीमुखेवसुः । नैमित्तिकेकालकामौकाम्येचधुरिलोचनौ ॥ पुरूरवोमाद्रवाश्चपार्वणेसमुदाहृतौ ॥ तेतु॰ धर्माद्दक्षकन्यायांविश्वायांजाताः ॥ विशति॰ कर्मस्वितिविश्वः । विशप्रवेशने । अशूप्रुषिलटिकणिखटिविशिभ्यः

क्विनितिक्वन् । ब्रह्मणि । विशन्ति
सर्वाणिभूतान्यस्मिन्‌ ०तत्। अनुप्र
वेशश्रुत्या० विशतिसर्वमितिवा ॥
पञ्चीकृतपञ्चमहाभूततत्कार्य्यात्म
कैवैराजशरीरे । भुवने । जगति ।
सर्वं अनुप्रपञ्चजाते ॥ विशतिस्वका
रणमितिनिरुक्तेः । अस्यकारणस्व
रूपादिविषयेतर्कजालंनकर्त्तव्यंमा
यामयत्वादित्याह किमिदं किमस्वरू
पंकथमिदमभूदमुष्यकोहेतुः। इति
नकदापिविचिन्त्यंचिन्त्यं मायेतिधी
मताविश्वम् ॥ दान्तनिद्रःकविकारे
दावतिरोभवतिसिपितचैव । जग
तितथापरमात्मापरमात्मन्यपिजग
तितिरोधत्ते । ६४ । इति । अपि
च । मूलोच्छेदंविनाकाश्चित्प्ररोह
न्तिपुनः पुनः । यथालतास्तथावि
श्वमस्त्वानप्रशमंविना ॥ अपिचाहुः
। विश्वंदर्पणदृश्यमाननगरीतुल्यं
निजान्तर्गतंपश्यन्नात्मनिमाययाबहि
रिवोद्भूतंयथानिद्रया । यः साक्षा
त्कुरुतेप्रबोधसमयेस्वात्मानमेवाद्व
यंतस्मैश्रीगुरुमूर्त्तयेनमइदंश्रीदक्षि
णामूर्त्तये ॥ इति ॥ अपिचाहुर्गौड
पादाचार्याः । स्वप्नमायेयथादृष्टेग
न्धर्वंनगरंयथा । तथाविश्वमिदंदृष्टं
वेदान्तेषुविचक्षणैरिति ॥ नागरे ।
शुण्ठ्याम् ॥ बोले ॥ अयोदशाके ।
त्रि०अखिले । कृत्स्ने । विशतिस्व

कारणम् ॥ विश० । कर्त्तरिक्वन् ।
अनन्ते ॥ विश्वंशतंसहस्रस्वसर्वमक्ष
यवाचकमितिभारतम् ॥ सर्वनाम
संज्ञोयम् । आधुनिकसंज्ञात्वेनसर्व
नामत्वपर्युदासात् ॥

विश्वकद्रुः । पुं० आखेटशुनि । मृगा
याकुशलकुक्कुरे । ध्वनौ । ध्याने ॥
त्रि० खले । पिशुने ॥ विश्वकंसर्वंद्र
वति । द्रुगतौ । मितद्र्वादित्वात्
डुः ॥ यद्वा । विश्वंकन्दते । कदि
आह्वानादौ । जत्वादिः ॥

विश्वकर्म्मजा । स्त्री० विश्वकर्मसुतायाम्।

विश्वकर्म्मा । पुं० सहस्रांशौ । सूर्ये ।
मुनिविशेषे । देवशिल्पिनि । त्वष्ट
रि । देववर्द्धकौ । तीर्थोक्तौविश्वक
र्म्माणौमयस्त्वष्टाचयोगवित् । विश्वं
कर्म्मास्मादस्यवेति ॥

विश्वकर्म्मसुता । स्त्री० सूर्यभार्य्याया-
म् । संज्ञायाम् ॥

विश्वका । स्त्री० गङ्गाचिल्लाम् ।

विश्वकृत् । पुं० देवशिल्पिनि । विश्व
कर्मणि । ब्रह्मणि । परमेष्ठिनि ॥
विश्वंकरोति । डुकृञ् ० । क्विप्
। तुक् ॥

विश्वकेतुः । पुं० कामे । मदने । वि
श्वस्मिन्‌० विश्वव्यापीवाकेतुर्य्योति
रस्य ॥ अनिरुद्धे ।

विश्वगः । पुं० ब्रह्मणि ।

विश्वगन्धः । पुं० पलाण्डौ । न० बो

ले ॥

विश्वगन्धा । स्त्री॰ भूमौ ॥ क्षितौ ॥
विश्वस्मिन्गन्धोऽस्याः ॥

विश्वग्रन्थिः । स्त्री॰ हंसपद्याम् ॥

विश्वचक्रम् । न॰ महादानविशेषे ॥

विश्वचक्रात्मा पुं॰ विष्णौ ॥

विश्वजनः पुं॰ सर्वसाधारणेवेश्यादौ
रमजनौ॰कू॰भा॰प्र॰ ॥

विश्वजनीनः त्रि॰ सर्वजनहिते ॥
विश्वश्चासौजनश्च॰तस्मै हितम् । आ
त्मविश्वजनभोगोत्तरपदात् खः ॥

विश्वजनीयः । त्रि॰ विश्वजनहिते ॥
विश्वस्यजनः सर्वसाधारणोवेश्यादिः
। विश्वाजनोऽस्यात बयहेपि॰सएवा
न्यपदार्थः । तस्मै हितम् । कर्मधा
रयादेवेष्यतइतीष्टेरत्नखः किन्तु
छएव ॥ विश्वेषांजनायहितोवा ॥

विश्वजित् । पुं॰ सर्वस्वदक्षिणयज्ञ
विशेषे । सर्वमेधे ॥ त्रि॰सर्वजेत
रि ॥ विश्वंजयति । जि॰क्विप्
चेतिक्विप् । तुक् ॥

विश्वतः । अ॰ सर्वतइत्यर्थे । विश्व
स्मात् । पञ्चम्यास्तसिल् ॥

विश्वतोमुखः । त्रि॰ सर्वतोमुखे ॥
विश्वतोमुखान्यस्य ॥

विश्वदेवः । पुं॰ गणदेवताविशेषे ॥
यथा । विश्वदेवौक्रतुदक्षौसर्वास्विष्टि
षुविश्रुतौ । नित्यंनान्दीमुखश्राद्धे
वसुसत्यौचपैतृके ॥ नवान्नालम्भ
नेदेवौकामकालौसदैवहि । अपि
कन्यागतेसूर्यश्राद्धेचध्वनिलोचकौ
॥ पुरूरवामाद्रवाश्वविश्वदेवौचपर्व
णि॰ वह्निपु॰ ॥ चतुरादिषुप्रा
णेषु ॥ देवसख्ये ॥ ह्रस्वगवेधु
कायाम् ॥

विश्वदेवा । स्त्री॰ ह्रस्वगवेधुकाया
म् ॥ गोरक्षचाकुलिया॰इ॰गौ॰
दे॰भा॰प्र॰ ॥ नागबलायाम् ॥ अरु
णपुष्पदण्डोत्पले ॥

विश्वधायाः । त्रि॰ विश्वस्यधारके ॥
विश्वंदधाति । डुधाञ्॰ । वहि
हाधाञ्भ्यश्छन्दसीत्यसुन्॰णित् ।
आतोयुक् ॥ वैदिकोयम् ॥

विश्वधृक् । पुं॰ श्रीपतौ ॥ विश्वंधृ
ष्णोतित्वानैश्वर्यादिभिर्ब्रह्मादीन्
वाऽभिभवति । ञिधृषा॰ । क्वि
प् । कुत्वात्पूर्वंजश्त्वं नस्तुः ।
गः । कः ॥

विश्वनाथः । पुं॰ विश्वेश्वरे । शि
वे ॥ विश्वेषांनाथः ॥

विश्वनाथनगरी । स्त्री॰ काश्याम् ॥
यत्रदेहपतनेनदेहिनांमुक्तिरेवभवती
तिनिश्चितम् । पूर्वपुण्यनिचयेन
लभ्यतेविश्वनाथनगरीगरीयसी ॥

विश्वपः । पुं॰ अग्नौ ॥ विश्वंपा-
ति । पा॰ । आतोनुपसर्गेकः ॥

विश्वपाः । पुं॰ अग्नौ ॥ विधौ ॥
रवौ ॥ प्रजापतौ ॥ विश्वंपा-

ति । पा० । आतोनुपसर्गइतिके
प्राप्ते०बासरूपन्यायेन०आतोमनि
न्क्वनिप्वनिपश्चेतिचेनविच् ॥
देवे ॥
विश्वपा । पुं० वह्नौ ॥ चन्द्रे ॥
सूर्ये ॥ समीरणे । कृतान्ते ॥
विश्वंपाति । पाभचणे । शु-
श्रुचन्निातसाधु : ॥
विश्वबोध : । पुं० धर्मकाये । बु-
द्धे ॥
विश्वभुक् । पुं० विष्णौ ॥ विश्वं
कृत्स्नंजगद्भुङ्क्ते संहरतिप्रलयका
लेइति०भुनक्तिपालयतिस्थितिका
लेइतिवाभुजेः परिपालनाभ्यवहा
रकर्मणः क्विप् ॥
विश्वभूः । पुं० बुद्धप्रभेदे ॥
विश्वभेषजम् । न० शुण्ठ्याम् ॥
विश्वस्यदोषस्यभेषजम् ॥
विश्वभोक्ता : । पुं० इन्द्रे ॥ विश्वं
भुङ्क्तेभुनक्तिवा । भुज० । वि
दिभुजिभ्यांविश्वे०इत्यसिप्रत्यय : ॥
विश्वमद्रा । स्त्री० अग्नेर्जिह्वाविशे-
षे ॥
विश्वम्भर : । पुं० अच्युते । वि
ष्णौ ॥ विडौजसि । शक्रे ॥
विश्वंबिभर्त्ति । डुभृञ्० । सं
ज्ञायांभृतृवृजिधारिसहितपिदमइ
तिखच् । अरुर्द्विषदितिमुम् ॥
अग्नौ ॥ विश्वस्यभरणाद्विश्वम्भरो

ग्निरितिभाष्यकारा : ॥ विसमभ
रा०इ०भा०प्राणिविशेषे ॥
विश्वम्भरा । स्त्री० धरायाम् । स्थि
रायाम् । पृथिव्याम् ॥ विश्वम्भ
रातद्धरणाच्चानन्तानन्तरूपत : ।
इतिपुराणम् ॥ विश्वम्बिभर्त्ति०
डुभृञ्धारणपोषणयो : । संज्ञाया
मित्यादिनाखच् । मुम् । टाप्
विश्वयोनि : । पुं० भगवति ॥ वि
श्वस्ययोनि : कारणम्०निमित्तो
पादानात्मकम् ॥
विश्वरूप : । पुं० विराजि । विष्णौ
॥ आदित्ये । सूर्ये ॥ विश्वानि
बहूनिरूपाण्यस्य ॥ विश्वानिन ना-
विधानि० रूपाणिश्वेतपीतादिगु
णात्मकानियस्यस : ॥ मणिविशेषे
॥ सघनानारूपोऽवभासते० उपा
धिसन्निधानात्०नस्वतोनेकरूप : ॥
न० अगुरुणि ॥
विश्वरूपकम् । न० अगुरुणि ॥
विश्वरेता : । पुं० ब्रह्मणिविधात
रि ॥ विश्वस्यरेत : कारणम् ॥
विश्वंसर्वंकार्यंत्वेनाभिमतंरेता : का
र्यंयस्यसविश्वरेता : परमेश्वर : ॥
विश्वरोचन : । पुं० नाडीचशाके ॥
विश्ववेद्रा : । पुं० अग्नौ ॥ सर्वज्ञे
। विश्वंवेत्ति० विदन्तिवा । वि
द० । विदिभुजिभ्यांविश्वइति०
असिप्रत्यय : ॥

विश्वसनम्। न० मुनिविश्रामदेशे॥ मुनिविश्रामदेशो यस्तत् विश्वसनं स्मृतमिति वचनात्।

विश्वसहा। स्त्री० वह्निजिह्वाविशेषे॥

विश्वसारम्। न० तन्त्रविशेषे॥

विश्वसारकम्। न० विट्खदिरे। फणिमनसा० शू० गौ० भा०। नागधूहर० शू० भा० प्र०॥

विश्वासितः। त्रि० विश्वस्ते। क्त विश्वासि॥

विश्वसृट्-ड्। पुं० विधौ। ब्रह्मणि॥ विश्वं सृजति। सृज०। क्विप्। क्विन्प्रत्ययस्येति कुत्वं न। रज्जुसृड्भ्यामिति भाष्यप्रयोगात्। यद्वा सृजयजोः पदान्ते षत्वविधेः कुत्वापवादत्वात्॥

विश्वस्तः। त्रि० जातविश्वासे। च शङ्किते॥

विश्वस्ता। स्त्री० विधवायाम्॥ विफलं श्वसिति। श्वसप्राणने। गत्यर्थेति क्तः। आगमशास्त्रानित्यत्वान्नेट्॥

विश्वस्था। स्त्री० शतावर्याम्॥

विश्वा। स्त्री० अतिविषायाम्॥ शुण्ठ्याम्। शतावर्याम्॥ विशति। विश०। अशूप्रुषीतिक्वन्। टाप्॥ पिप्पल्याम्॥

विश्वाकषायः। पुं० शुण्ठीक्वाथे॥

विश्वाची। स्त्री० अप्सरोविशेषे॥

विश्वात्मा। पुं० परमेश्वरे। विश्वस्य आत्मा नियन्ता॥ ब्रह्मणि॥ विश्वस्मिन्पञ्चीकृतपञ्चमहाभूततत्कार्यात्मिके स्थूले जगति वैराजशरीरे। जागरिते च। अत्रात्माहममित्यभिमानोऽस्य। विश्वस्य स्थावरजङ्गमात्मकस्य प्रोक्तजातस्यात्मा प्रत्यग्रूपो वा॥

विश्वामित्रः। पुं० ब्रह्मर्षिविशेषे। गाधिजे। विश्वरथाजिनि। कौशिके॥ विश्वं विश्वामित्रः। विश्वमये मैत्रीं कर्त्तुमिच्छति धर्मतः। विश्वामित्रः स इति भागवतोक्तेः॥ आत्मनि॥ विश्वस्य मित्रं निरुपाधिप्रेमगोचरतया प्रियात्। आत्मानमेव प्रियमुपासीतेति श्रुतेः॥ मित्रे चर्षाविति विश्वशब्दस्य दीर्घः॥ त्रि० सकलजगत्सखे॥ विश्वेषां मित्रः॥

विश्वामित्रतीर्थम्। न० तीर्थविशेषे॥

विश्वामित्रप्रियः। पुं० नारिकेले॥

विश्वाराट्। पुं० विश्वस्मिन्राजमाने॥

विश्वावसुः। पुं० गन्धर्वविशेषे॥ विश्वं वसु यस्य सः। विश्वस्य वसुराटोरिति पूर्वपदान्तस्य दीर्घः॥ वत्सरविशेषे॥ तत्र फलं यथा। सर्वदा यत्र सस्यं सर्वं शस्यमहार्घता। विश्वावसौ वरारोहे कापि सस्यमहार्घता॥ स्त्री० रात्रौ॥

विश्वासः । पुं॰ विश्रम्भे । इदमित्थमेव नान्यथेति निश्चये ॥ विश्वसनम् । श्वस॰ । घञ् ॥ लोभप्रमादविश्वासैः पुरुषो नश्यति त्रिभिः । तस्माल्लोभो न कर्त्तव्यः प्रमादो न न विश्वसेत् ॥ स्त्रीषु राज कुले अग्नौ जले सर्पे च शत्रुषु विश्वासो नैव कर्त्तव्यः ॥ यस्य विश्वासः पुरुषः स जितेन्द्रियः ॥ अपि च । सौहार्द्द व्यवहाराश्च प्रवृत्तिं प्रकृतिं नृणाम् । सहवासेन तर्कैश्च विदित्वा विश्वसेत् ततः ॥

विश्वास्यः । त्रि॰ विश्वसनीये ॥

विश्वेदेवाः । पुं॰ अग्नौ ॥ श्राद्धदेवे ॥ क्रतुर्दक्षो वसुः सत्यः कामः कालस्तथा ध्वनिः । रोचकश्चाद्रवाश्चैव तथा चान्यः पुरूरवाः ॥ विश्वेदेवा भवन्त्येते दश सर्वत्र पूजिताः ॥

विश्वेशः । पुं॰ परमेश्वरे ॥ विश्वेषां सर्वेषामीशो नियन्ता ॥

विश्वेशा । स्त्री॰ विमलेश्वरे बर्त्तमाना यां देव्याम् ॥

विश्वेश्वरः । पुं॰ काशिस्थे शिवे । काशीनाथे लिङ्गविशेषे ॥ विश्वेषामीश्वरः ॥ इत्थो विश्वेश्वरो देवो काशीव्यामर्णिकर्णिका ॥

विश्वौषधम् । न॰ शुण्ठ्याम् ॥ विश्वेषामौषधम् । विश्वस्य सदौषधत्वेति वा ॥

विट् । स्त्री॰ विष्ठायाम् ॥ वेवेष्टि । विष्लृ व्याप्तौ । क्विप् । अग्त्वश्च त्वे ॥ दुष्टतरि ॥ विट्पतिशब्दनिर्देशात् ॥ व्यापने ॥

विषम् । न॰ जले । तोये ॥ वत्सनाभाभिधे ॥ बोले ॥ सामान्यविषे ॥ पुं॰ न॰ क्ष्वेडे । गरले ॥ तद्भेदा यथा । पुंसि क्लीवे च काकोलकालकूटहलाहलाः । सौराष्ट्रिकः शौक्लिकेयो ब्रह्मपुत्रः प्रदीपनः ॥ दारदो वत्सनाभश्च विषभेदा अमी नव ॥ अपि च । विषं तु गरलं क्ष्वेडस्तस्य भेदाननुदाहरेत् । वत्सनाभः सहारिद्रः सक्तुकश्च प्रदीपनः ॥ सौराष्ट्रिकः शृङ्गकश्च कालकूटस्तथैव च । हालाहलो ब्रह्मपुत्रो विषभेदा अमी नव ॥ ब्राह्मणः पाण्डरस्तेषु क्षत्रियो लोहितप्रभः । वैश्यः पीतोऽसितः शूद्रो विषस्य तु चतुर्विधः ॥ रसायने विषं विप्रं क्षत्रियं देहपुष्टये । वैश्यं कुष्ठविनाशाय शूद्रं दद्याद्वधाय हि ॥ अथास्य गुणाः । विषं प्राणहरं प्रोक्तं व्यवायि च विकासि च । आग्नेयं वातकफहृद्योगवाहि मदावहम् ॥ व्यवायि॰ सकलकायगुणव्यापनपूर्वकपाकागमनशीलम् । विकासि॰ ओजः शोषणपूर्वकं सन्धिबन्धशिथिलीकरणशीलम् । आग्नेयम्॰ अधिकाग्न्यंशम् । योगवाहि ॰ संसर्गगुणग्राहकम् । मदावहम्॰ तमोगुणाधिक्येन बुद्धिविध्वंसकम् ॥

तदेवयुक्तियुक्तन्तुप्राणदायिरसाय
नम्। योगवाहिपरंवातश्लेष्मजित्
सन्निपातहृत्॥ योगवाहित्रिदोषघ्नं
बृंहणंवीर्यवर्द्धनम्। येदुर्गुणाविषे
ऽशुद्धे तेस्युर्हीनाविशोधनात्॥ तस्मा
द्विषंप्रयोगेषुशोधयित्वाप्रयोजयेत्।
अथशोधनविधिः। गोमूत्रे त्रिदि
नंस्थाप्यंविषंतेनविशुद्ध्यति। रक्तस
र्षपतैलाक्तं तत्राधायं स्वशासति॥
येगुणागरलेप्रोक्तास्तेस्युर्हीनाविशोध
नात्। तस्माद्विषंप्रयोगेषुशोधयि
त्वाप्रयोजयेत्॥ स्थावरंजङ्गमञ्चैव
द्विविधं विषमुच्यते। दृशाधिष्ठान
मायन्तु॰ द्वितीयंषोडशाश्रयम्॥
विशेषोभावप्रकाशेद्रष्टव्यः॥ वैवेष्टि
कायम्। विष्लृ॰ विषविप्रयोगेशा
। कुगुपधेतिकः॥ हालाहलोनैव
विषं विषं रमापरंजनाव्यत्ययमेवम
न्यते। योगेनजागर्त्ति निपीयतंशि
वः स्मरन् रमांमुह्यतिनिद्रयाह
रिः॥

विषकण्टकिनी। स्त्री॰ वन्ध्याकर्कोट
क्याम्॥

विषकन्दः। पं॰ नीलकन्दे॥

विषक्तः। त्रि॰ अतिश्लिष्टे। लग्ने॥
आश्रिते॥

विषघा। स्त्री॰ गुडूच्याम्॥

विषघाती। पुं॰ शिरीषवृक्षे॥ विष
नाशके॥ त्रि॰॥

विषघ्नः। पुं॰ शिरीषद्रुमे॥ यवासे
॥ विभीतके॥ चम्पकवृक्षे॥ त्रि॰
विषनाशके॥ विषंहन्ति। हन॰।
हन्तेरमनुष्यकर्तृकेषुचेतिठक्॥ वि
षघ्नौषधानिमात्स्ये १९२ ऽध्यायेद्र
ष्टव्यानि॥

विषघ्नधूपः। पुं॰ धूपविशेषे॥ तथा
। सक्तुः सर्जरसोपेतः सर्षपा
एलवालुकैः। सुवर्णातस्करतरोः
कुसुमैरर्जुनस्यतु॥ धूपोवासगृहे ह
न्तिविषंस्थावरजङ्गमम्। नतत्रकी
टाः सविषानदर्दुरसरीसृपाः। न
कृत्याकर्मणास्तत्रधूपोयंयत्रदह्यते॥

विषघ्ना। स्त्री॰ चिह्नतायाम्॥ गुडू
च्याम्॥

विषघ्नी। स्त्री॰ हिलमोचिकायाम्॥
वृन्दवारुण्याम्॥ वनवर्वरिकाया
म्॥ स्वल्पफलायाम्॥ भूम्याम
लक्याम्॥ रक्तपुनर्नवायाम्॥ हरि
द्रायाम्॥ वृश्चिकाल्याम्॥ महा
करञ्जे॥ हबुषायाम्॥

विषङ्गी। त्रि॰ मिथः श्लिष्टे॥

विषजिह्वः। पुं॰ देवताडवृक्षे॥

विषज्वरः। पुं॰ महिषे॥ विषजज्व
रे॥

विषगृडम्। न॰ मृणाले॥

विषण्णः। त्रि॰ विषादप्राप्ते॥ भग्नो
त्साहे॥ दुःखिते॥ विषीदतिस्म
। षदॢ॰। गत्यर्थेतिक्तः। रदा

श्यामितिनत्वम्॥

विषस्रुता। स्त्री॰ अङ्कतायाम्॥

विषतिन्दुः। पुं॰ कुपीलौ॥ कारस्करवृक्षे॥

विषदम्। न॰ पुष्पकासीसे॥ त्रि॰ विषदातरि॥ यथा। विषदः श्याव शुष्कास्यो विलक्षो वीक्ष्यते दिशः। खेदवेपथुमांस्त्रस्तो भीतः स्खलति जृम्भते॥ विषं ददाति। दुदाञ्॰। आतदूतिकः॥

विषदंष्ट्रा। स्त्री॰ सर्पकङ्काल्याम्॥

विषदन्तकः। पुं॰ सर्पे॥

विषदर्शनमृत्युकः। पुं॰ चकोरपक्षिणि॥ जीवञ्जीवस्तु गुन्द्रालो विषदर्शनमृत्युकइति हेमचन्द्रः॥

विषद्रुमः। पुं॰ कारस्करवृक्षे॥

विषधरः। पुं॰ आशीविषे। सर्पे॥ विषस्य धरः॥

विषधर्म्मा। पुं॰ कुलत्थयायाम्। शूकशिम्ब्याम्॥

विषधात्री। स्त्री॰ जिषवद्य्याम्॥

विषनाशनः। पुं॰ शिरीषवृक्षे॥ त्रि॰ विषनाशके॥

विषनाशिनी। स्त्री॰ सर्पकङ्काल्याम्॥ नाकुल्याम्॥

विषनुत्। पुं॰ श्योनाकवृक्षे॥

विषपुष्पः। पुं॰ मदनद्रुमे। मयनफलवृ॰ ॥ न॰ नीलपद्मे. विषयुक्तपुष्पे॥

विषपुष्पकः। पुं॰ मदनवृक्षे॥ ज्वरे॥ विषपुष्पभक्षणजन्यरोगे॥ विषपुष्पैर्जनितः। कालप्रयोजनाद्रोगइतिकन्॥

विषभक्षणम्। न॰ विषखादने॥ अथमुहूर्त्तमाह। चराचरेन्द्रध्रुवलघूडुचित्राविशाखाग्निभानुकवीन्दुभौमान्। यद्दूहतेऽनेकविधानितावत्सकालकूटानिसदेतिवैना॥

विषभिषक्। पुं॰ विषवैद्ये॥

विषमः। पुं॰ अलङ्कारविशेषे॥ यथा। क्वचिद्यदतिवैधर्म्यान्नश्लेषोघटनामियात्। कर्त्तुः क्रियाफलावाप्तिर्नैवानर्थश्चयद्भवेत्॥ गुणक्रियाभ्यां कार्यस्यकारणस्यगुणक्रिये। क्रमेण चविरुद्धे यत्सएवविषमोमतः॥ द्वयोरत्यन्तविलक्षणतया॰यदनुपपद्यमानत्वेनयोगः प्रतीयते॰यश्चकिञ्चिदारभमाणः कर्त्ता॰क्रियायाः प्रणाशान्नकेवलमभीष्टं तत्फलंनलभेत॰यावदप्रार्थितमप्यनर्थं विषयमासादयेत्॰तथासत्यपिकार्यस्यकारणरूपानुकारेयत्तयोर्गुणौक्रियेचपरस्परविरुद्धतांव्रजतः॰सप्तमविषयं यात्मा॰चतूरूपोविषमः। क्रमेणोदाहरणम्। शिरीषादपिमृद्वङ्गीकेयमायतलोचना। अयंक्वचकुकूलाग्निकर्कशोमदनानलः॥ सिंहिकासुतसन्त्रस्तः शशः शीतांशुमाश्रितः। जग्रसेसाश्रयंतत्रतमन्यः सिं

हिकासुतः ॥ सद्यः करस्पर्शमवाप्य चित्रं रणे रणे यस्य कृपाणलेखा । तमालनीला शरदिन्दुपाण्डु यशस्त्रिलोक्याभरणं प्रसूते ॥ आनन्दममन्दमिमं कुवलयदललोचने ददासि त्वम् । विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे ॥ अत्रानन्ददानं शरीरतापेन विरुद्धमिति ॥ एवम् । विपुलेन सागरशयस्य कुक्षिणा भुवनानि यस्य पपिरे युगक्षये । मदविभ्रमासकलया पपे पुनः स पुरस्त्रियैकतमयैकदृशा ॥ इत्यादावपि विषमत्वं यथायोगमवगन्तव्यम् ॥ तालभेदे ॥ यथा । चतुर्विधः परिज्ञेयस्तालः कङ्कणनामकः । पूर्णः खण्डः समश्चैव विषमश्चैव कथ्यते ॥ सचतुष्कांगणौ पूर्णे खण्डे विन्दुद्वयं गुरुः । यगणस्तु समे ज्ञेयस्तगणो विषमे भवेदिति ॥ अयुग्मराशौ ॥ न॰ विषमाशमे ॥ वहुस्तोकाक्षरसंभुक्तं यद्विषमं स्थितम् ॥ पद्यस्य त्रिविधवृत्तान्तर्गतवृत्तविशेषे ॥ यथा । पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा । वृत्तमक्षरसङ्ख्यातं जातिर्मात्राकृता भवेत् ॥ सममर्द्धसमं वृत्तं विषमञ्चेति तत् त्रिधा । समं समचतुष्पादं भवत्यर्द्धसमं पुनः ॥ आदिस्तृतीयवद्यस्य पादस्तुर्य्यो द्वितीयवत् । भिन्नचिह्नचतुष्पादं विषमं परिकीर्त्तितम् ॥ स्त्रपुटे ।

उन्नतानते । उच्चनीचस्थाने ॥ त्रि॰ असमाने ॥ कोपने ॥ अयुग्मे ॥ विगतः समः सदृशोऽस्य । सुविनिर्दुर्भ्यः सुपिसूतिसमाः इति षत्वम् ॥

विषमच्छदः । पुं॰ सप्तपर्णः । छतिविमौतिप्रसिद्धे ॥ विषमाश्छदा यस्य सः ॥

विषमज्वरः । पुं॰ चतुर्थकादिज्वरविशेषे ॥ तस्य निदानाद्याह । दोषाल्पोऽहितसम्भूतो ज्वरोत्सृष्टस्य वा पुनः । धातुमन्यतमं प्राप्य करोति विषमज्वरम् ॥ सन्ततं रससंस्थः स सततं रक्तधातुगः । दोषः क्रोज्ज्वरं पुंसां अन्येद्युः पिशिताश्रितः ॥ मेदोगतस्तृतीयेऽह्नि अस्थिमज्जगतः पुनः । कुर्य्याच्चातुर्थकं घोरमन्तकं रोगसङ्करम् ॥ यः स्यादनियतात्कालाच्छीतोष्णाभ्यां तथैव च । वेगतश्चापि विषमो ज्वरः स विषमः स्मृतः ॥ अस्य भेदा यथा । सन्ततः सततोऽन्येद्युस्तृतीयकचतुर्थकाविति ॥

विषमनयनः । पुं॰ शिवे ॥ विषमाणि नयनानि यस्य ॥

विषमन्त्रः । पुं॰ जाङ्गुल्याम् । विषविद्यायाम् ॥

विषमर्दनिका । विषमर्दनी । स्त्री॰ गन्धनाकुल्याम् ॥

विषमस्थ : । त्रि॰ दरिद्रे ॥ विषमेतिष्ठति । ष्ठा॰ । सुपिस्थइतिक : ॥ उपप्लवदेशस्थे ॥

विषमाक्ष : । पुं॰ शिवे ॥ विषमाण्यक्षीणियस्यस : ॥

विषमायुध : । पुं॰ कामे । पञ्चशरे ॥ विषमाण्यायुधानियस्य ॥

विषमाशनम् । न॰ अकालेबहुवाल्पंवाभुक्तन्तुविषमाशनमितिलक्षिते ॥ बहुस्तोकमकालेवाभुक्तंतद्विषमाशनम् ॥

विषमित : । त्रि॰ विषमीकृते

विषमीयम् । त्रि॰ विषमदेशभवे ॥ गहादिभ्यश्चेतिछ : ॥

विषमुष्टि : । पुं॰ महानिम्बे ॥ क्षुपविशेषे । सुमुष्ट्याम् । रणमुष्टिके ॥ विषंमुष्णाति । मुष॰ । क्तिच् ॥

विषमृत्यु : । पुं॰ चकोरे ॥

विषमेषु : । कामे ॥ विषमाइषवोयस्यस : ॥

विषमोन्नत : । त्रि॰ स्थपुटे ॥

विषय : । पुं॰ चक्षुरादिग्राह्ये रूपादीन्द्रियार्थे । गोचरे ॥ न्यायमतेक्षित्यप्तेजोवायूनांविषया यथा । तत्रक्षितिर्गन्धहेतुर्नानारूपवतीमता । षड्विधस्तुरसस्तत्रगन्धोपिद्विविधोमत : ॥ स्पर्शस्तस्यास्तुविज्ञेयोह्यनुष्णाशीतपाकज: । नित्यानित्याचसाद्वेधा नित्यास्यादणुलक्षणा ॥ अनित्यातुतदन्यास्यात्सैवावयवयोगिनी साचत्रिधाभवेद्देहइन्द्रियंविषयस्तथा ॥ योनिजादिर्भवेद्देहइन्द्रियंघ्राणलक्षणम् । विषयोद्व्यणुकादिश्चब्रह्माण्डान्तउदाहृत : ॥ वर्ण : शुक्लोरसस्पर्शौजलेमधुरशीतलौ । स्नेहस्तत्रद्रवत्वन्तुसांसिद्धिकमुदाहृतम् ॥ नित्यतादिप्रथमवत्किन्तुदेहमयोनिजम् । इन्द्रियंरसनंसिन्धुर्हिमादिर्विषयोमत : ॥ स्पर्शउष्णस्तेजसस्तुस्याद्रूपंशुक्लभास्वरम् । नैमित्तिकंद्रवत्वन्तुनित्यतादिचपूर्ववत् ॥ इन्द्रियंनयनंवह्निस्वर्णादिर्विषयोमत : ॥ अपाकजोऽनुष्णाशीत : स्पर्शस्तुपवनेमत : । तिर्यग्गमनवानेषज्ञेय : स्पर्शादिलिङ्गक : ॥ पूर्ववन्नित्यताद्युक्तं देहव्यापित्वगिन्द्रियम् । प्राणादिस्तुमहावायुपर्यन्तोविषयोमत : ॥ विषिण्वन्तिविषयिणमवबध्नन्ति स्वेनरूपेणनिरूपणीयंकुर्वन्ति॰ इतिविषया : । षिञ् बन्धने । पचाद्यच् । परिनिभ्योतिषत्वम् । विषयणामचवा॰विश्रिणोतिवा । षिञएरच्॰ पुंसीतिघोवा॰ पचाद्यजवा ॥ विषस्यविषयाणाञ्चदूरमत्यन्तमन्तरम् । उपभुक्तंविषंहन्तिविषया : स्मरणादपीतिविषयानुसन्धानस्यनिन्दितत्वादिन्द्रियार्थेषु

स्वहाक्षिर्विधेयेतिसतांमतम् ॥ यथोक्तम् । दोषेणतीव्रोविषयः कृष्णसर्पविषादपि । विषंनिहन्तिभोक्तारंद्रष्टारंचक्षुषाप्ययम् ॥ अपिच । विषयविषधराणांदोषदंष्ट्रोत्कटानांविषविषमविसर्पव्यक्तदुश्चेष्टितानाम् । विरमविरमचेतः सन्निधानादमीषामसुखकणमणिष्टैताः सार्द्धमास्मकार्षीः ॥ इति ॥ नियामके यथा । विशब्दोहिविशेषार्थः सि-नोतेर्बन्धउच्यते । विशेषेणसिनोतीतिविषयोऽतोनियामकः ॥ इति ॥ प्रबन्धाद्यस्ययोज्ञातस्तत्र ॥ यथाजीवब्रह्मैक्यंशुद्धचैतन्यंप्रमेयंवेदान्तानांविषयः ॥ कुरुपञ्चालादिदेशे ॥ जनपदे ॥ अन्यत्रे ॥ शुक्रे ॥ आश्रये । आश्रये ॥ भोगसाधने ॥ सर्वमेवहिकार्यमदृष्टाधीनम् यच्चकार्यंयददृष्टाधीनंतत्तदुपभोगंसाक्षात्परम्परयाजनयत्येव नहिबीजप्रयोजनाभ्यांविनाकस्यचिदुत्पत्तिरस्ति तेनह्यणुकादिब्रह्माण्डान्तसर्वमेवविषयोभवतीत्यर्थः । इतिसिद्धान्तमुक्तावली ॥

विषयवित् । पुं० वात्स्यायनादिमुनिषु ॥ तेचेत्थंकल्पयन्ति-शब्दादयोविषयाः भूयोभूयोभुज्यमानास्तत्त्वमितितदेतत्कल्पनंतेषांविभ्रममात्रम् । विषश्चविषयाणाञ्चेतिविषयानुसन्धानस्यनिन्दितत्त्वात् ॥

विषयाज्ञानम् । न० तन्द्रायाम् ॥

विषयायी । पुं० राज्ञि ॥ वैषयिकजने ॥ इन्द्रिये ॥ कामदेवे ॥ विषयासक्तपुरुषे ॥

विषयी । पुं० नृपतौ ॥ कामदेवे ॥ वैषयिके ॥ ध्वनौ ॥ विषयोऽस्यास्ति । अतइनिः ॥ देशे ॥ ग्रह्यादित्वात्सौनिर्वृद्ध्यभावःषत्वञ्चनिपात्यते ॥ न० इन्द्रिये ॥ त्रि० विषयासक्ते ॥ आरोप्यमाणे ॥

विषयोगः । पुं० तिथिवारयोर्योगविशेषे ॥ यथा । षष्ठीशशाङ्केनवमीचशुक्रेबुधेद्वितीयातपनेचतुर्थी । जीवेऽष्टमी० सौरिकुजेचसप्तमीयोगाविषाख्याः कुलनाशकाःस्युः ॥ बुधवारेभद्रारूपेणासिद्धियोगस्तुसप्तमीश्चादश्यांचरितार्थो० नतुद्वितीयायामिति । अन्यथाद्वदस्यश्याद्विवाक्यविरोधः स्यादिति ॥

विषरूपा । स्त्री० अतिविषायाम् ॥

विषलम् । न० विषे ॥

विषलता । स्त्री० इन्द्रवारुण्याम् ॥

विषविद्या । स्त्री० विषघ्नमन्त्रे ॥

विषवैद्यः । पुं० कथाप्रसङ्गे । गारुडिके । जाङ्गुलिके ॥ विद्यामधीते० वेत्तिवा । तदधीतेतद्वेदेत्यण् । विषस्यवैद्यः ॥

विषवैरिणी । स्त्री० निर्विषायाम् ॥

विषशालूक : । पुं॰ पद्मकन्दे ॥

विषशूक : ।) विषशृङ्गी ।) पुं॰ भृङ्गरोले ॥

विषसूचक : । पुं॰ चकोरे ॥

विषसृक्का । स्त्री॰ भृङ्गरोले ॥

विषहन्त्री । स्त्री॰ अपराजितायाम् ॥ निर्विषायाम् ।

विषहर: । पुं॰ गरलनाशकौषधादौ ।

विषहरा ।) विषहरी) स्त्री॰ मनसादेव्याम् ॥

विषहा । स्त्री॰ देवदालीलतायाम् ॥

विषा । अ॰ बुद्धौ ॥ विपूर्वात् स्यतेर्विषाविहित्याप्रत्यय : ॥

विषा । स्त्री॰ अतिविषायाम् ॥ विषा सोष्णा कटुस्तिक्ता पाचनी दीपनी हरेत् । कफपित्तातिसारामविषकासवमिक्रिमीन् ॥ बुद्धौ ॥ वेवेष्टि । विष् ल्ट॰ । विषप्रयोगे वा । इगुपधेति क : ॥

विषाङ्कुर : । पुं॰ शल्यास्त्रे ॥

विषाणम् । न॰ पशुशृङ्गे ॥ इभदन्ते ॥ कुष्ठनामौषधे ॥ क्रोडे ॥ व्यस्ति । असभुवि । चानश् असोरल्लोप: । उपसर्गप्रादुर्भ्यामितिषत्वम् ॥

विषाणिका । स्त्री॰ मेषशृङ्ग्याम् ॥ सातलायाम् ॥ कर्कटशृङ्ग्याम् ॥ आवर्त्तक्याम् ॥

विषाणी । पुं॰ हस्तिनि ॥ शृङ्गिणि ॥ ऋषभनामौषधे ॥ शृङ्गाटके ॥

विषाणी । स्त्री॰ क्षीरकाकोल्याम् ॥ अजशृङ्ग्याम् ॥ फलस्यानशृङ्गसदृशत्वात् । विषाणमस्त्यस्या : । अर्श आद्यच् । गौरादि : ॥ तिन्तिड्याम् ॥ ऋषभौषधे ॥ वृश्चिकाल्याम् ॥

विषाद : । पुं॰ अवसादे । उपतापे । स्नेहविषयीभूतस्वजनविच्छेदाशङ्कानिमित्तशोकापरपर्यायेचित्तव्याकुलीभावे ॥ इष्टनाशकृतेमनोभङ्गे ॥ तदुक्तम् । विषादश्चेतसो भङ्ग उपायाभावनाशयोरिति- विषदनम् । षद्ल्ट॰ । घञ् । मोहे ॥ विषादात्मकस्तमोगुण : ॥

विषादनी । स्त्री॰ पलाशीलतायाम् ।

विषादी । त्रि॰ सततमसन्तुष्टस्वभावत्वेनानुशोचनशीले ॥

विषानन : । पुं॰ सर्पे ॥

विषान्तक : । पुं॰ शिवे ॥ त्रि॰ विषनाशके ।

विषापह: । पुं॰ पाटलौ । मुष्कके ॥

विषापहा । स्त्री॰ इन्द्रवारुण्याम् ॥ निर्विषायाम् ॥ नागदमन्याम् । अर्कमूलायाम् ॥ सर्पकङ्कालिकायाम् ॥

विषाभावा । स्त्री॰ निर्विषायाम् ॥

विषायुध : । पुं॰ सर्पे । न॰ विषयुक्तास्त्रे ॥

विषार : । पुं॰ सर्पे ॥

विषाराति : । पुं॰ कृष्णधत्तूरके ॥

विषारि : । पुं॰ घृतकरञ्जे ॥ महाचञ्चुशाके ॥

विषास्य : । पुं॰ सर्पे ॥ त्रि॰ विषयुक्तमुखे ॥

विषास्या । स्त्री॰ भल्लातके ॥

विषोदन् । त्रि॰ विषादं कुर्वति । अतिदुःखिते ॥

विषु । अ॰ नानार्थे ॥ साम्ये ॥ सर्वतोऽर्थे ॥

विषुण : । पुं॰ विषुवदाख्ये काले । विषुवे ॥ विषुनानाश्नन्तीति विष्वञ्चि । तान्यस्य सन्ति । पामादिषु॰ विष्वगित्युत्तरलोपश्चाकृतसन्धेरिति गणसूत्रान्नप्रत्यय उत्तरपदलोपश्च । विषुवदाख्यकालस्य हि नानागतानि दिनानि सन्ति॰ दिनान्तराणां न्यूनाधिकभावस्य तन्मूलकत्वात् ॥

विषुवम् । न॰ समरात्रिन्दिवे काले । तुलामेषयोरर्कसङ्क्रमे ॥ विषु साम्यमस्यास्ति॰ तुलया मेषेण सह वेत्यर्थे॰ वप्रकरणे अन्येभ्योपीत्युक्तेर्वः ॥

विषुवत् । न॰ विषुवे ॥ प्रथमे कृत्तिकाभागे यदा भास्वांस्तदा शशी । विशाखानां चतुर्थांशे मुने तिष्ठत्यसंशयम् ॥ विशाखायां यदा सूर्यश्चरत्यंशं तृतीयकम् । तदा चन्द्रं विजानीयात् कृत्तिकाशिरसि स्थितम् ॥ तदैव विषुवाख्योऽयं कालः पुण्यो विधीयते । तदा दानानि देयानि देवेभ्यः प्रयतात्मभिः ॥ इति विष्णुपुराणम् ॥ विषु साम्यमस्यास्ति॰ तुलया मेषेण सह वेत्यर्थे मतुप् प्रत्ययः ॥

विषूचि : । स्त्री॰ नानागतौ । पृथक्फले ॥

विषूचिका । स्त्री॰ प्रवाहिकायाम् ॥

विषूचीन : । त्रि॰ सर्वतः प्रसृते ॥

विषौषधी । स्त्री॰ नागदन्त्याम् ॥

विष्क : । पुं॰ विंशतिवर्षके गजे ॥

विष्कम्भ : । पुं॰ योगविशेषे ॥ तत्रोत्पन्नस्य फलं यथा । विष्कम्भयोगाद्यदि जन्मकाले कार्येषु तन्त्रो मनुजस्तदानीम् । सुहृत्कलत्रात्मजसौख्ययुक्तो गृहस्य निर्माणविधौ समर्थः ॥ विस्तारे ॥ प्रतिबन्धे । अर्गलायाम् । आगल॰ इति भाषा ॥ योगिनां बन्धभेदे ॥ विष्कभ्नाति । स्कम्भुः सौत्रो रोधनार्थः । कर्मण्यण् । वेः स्कभ्नातेरिति षत्वम् । वृक्षे ॥

विष्कम्भक : । पुं॰ पूर्वं नटसङ्क्षेपपूर्वकतत्प्रतिपद्योत्कृष्टनटप्रवेशे ॥ यथा । वृत्तवर्त्तिष्यमाणानां कथांशानान्तु सूचकः । विष्कम्भक इति ख्यातो हीनपात्रप्रयोजक इति ॥

विष्कम्भशैल : । पुं॰ मेरोर्दार्ढ्यार्थं स्थितेषु चतुर्षु पर्वतविशेषेषु ॥ यथा । विष्कम्भशैलाश्चत्वारो मेरोः स्थैर्यार्थमेधसा । कल्पिताः सन्ति ते ग्रामा स्तेषां पूर्वे च मन्दरः ॥ श्वेतो हरिद्राचूर्णाभो याम्यतो गन्धमादनः । प्रतीच्यां विपुलो नील : सुपार्श्वः सौम्यतोऽरुण : ॥ सहस्रयोजनोच्छ्रायास्तेषु कल्पद्रुमाः स्थिताः । कदम्बजम्बु अश्वत्थन्यग्रोधौ चोत्तरान्तिका ॥

विष्कम्भि । न॰ अर्गलायाम् ॥ विष्कभ्नाति॰ रुणद्धि । स्कम्भु॰ । आवश्यके णिनि : ॥

विष्कल : । पुं॰ ग्राम्यशूकरे ॥ इ॰ रा॰ नि॰ ॥

विष्किर : । पुं॰ खगे । पक्षिणि ॥ पक्षिविशेषाणां गणे ॥ यथा । वर्तकालावविष्किरकपिञ्जलकतित्तिराः । कुलिङ्गकुक्कुटाद्याश्च विष्किराः समुदाहृताः ॥ विकीर्य्य भक्षयन्त्येते यस्मात्तस्माद्धि विष्किरा : ॥ विष्किरा मधुरा : शीता : कषाया : कटुपाकिन : । बल्या वृष्यास्त्रिदोषघ्नाः पथ्यास्ते लघवः स्मृता : ॥ विकिरति । कृ॰ । इगुपधेति क : । विष्किर : शकुनिर्विकिरो वेति पक्षे सुट् । परिनिविभ्य इति षत्वम् ॥

विष्ट : । त्रि॰ प्रविष्टे ॥ संवद्धे ॥ विशति । विश॰ । क्त : ॥

विष्टपम् । न॰ पुं॰ विष्टपे । भुवने ॥ विशन्त्यस्मिन् सुकृतिन : । विश प्रवेशने । विटपविष्टपविशिपोलपा इति विशेरौणादिक : कपन् प्रत्यय: । प्रत्ययस्य तुट् । व्रश्चेति षत्वम् । सूत्रे विष्टपस्थाने पिष्टप इति पकारादि पाठस्तूज्ज्वलदत्तरीत्यो क्त इति बोध्यम् । नायं युक्त: यत्र भुवस्य विष्टपमित्यादौ॰ दन्त्योष्ठ्यादिपाठस्य दर्शनात्

विष्टब्ध : । त्रि॰ विधृते ॥

विष्टम्भ : । पुं॰ प्रतिबन्धे ॥ आमयस्य भेदे । आनाहरोगे ॥ तल्लक्षणन्तु । आमं सकृद्वा निचितं क्रमेण भूयो विबद्धं विगुणानिलेन । प्रवर्त्तमानं न यथा स्वमेनं विकारमानाहमुदाहरन्ति ॥ आममपक्वमाहाररसारम्॰ शकृत्पुरीषं वा क्रमेण निचितं सञ्चितम्॰ भूयो विगुणानिलेन दुष्टवायुना विबद्धं व्यामयेऽपितम् वा यथा स्वं पूर्ववत् अप्रवर्तमानम्॰ एनं विकारमानाहमाहु : ॥ उत्तरदेशगतिप्रतिबन्धे ॥ चाक्रमे ॥

विष्टम्भी । त्रि॰ विष्टम्भरोगजनके ॥ विष्टम्भरोगवति ॥

विष्टर : । पुं॰ विटपिनि । महीरुहे ॥ दर्भमुष्टौ ॥ पीठाद्यासने ॥ आदिना कुशासनादिराह : ॥ सप्तदश्यग्रन्थि दर्भासने ॥ विष्टरलक्षणम् यथा । विष्टरस्तु॰ सार्द्धहस्तयवामावर्तवलि

ताभिर्मुखायाश्चसंख्यातदर्भा : ।
तथाचगृह्यसङ्ग्रह : । ऊर्द्ध्वकेशोभवेद्
ब्रह्मालम्बकेशस्तुविष्टर : । दक्षिणा
वर्त्तकोब्रह्मावामावर्त्तस्तुविष्टर : ॥
इति ॥ दर्भसङ्ख्यानविहिताबि
ष्टरास्तरणेष्वपीतिच ॥ विस्तीर्य्य
ते । स्तृञ्आच्छादने । वृक्षासनयो
र्विष्टरइतिसाधु : । विपूर्व्वात्स्तृञ्
इत्येतस्मात्० ऋदोरप्० इत्यपि०
षत्वंनिपातनादित्यर्थ : ॥
विष्टरश्रवा : । पुं० विष्णौ ॥ विष्टरेवृ
क्षेश्रूयते । असुन् । वृक्षस्याश्वत्थो
भिमत : ० अश्वत्थ : सर्व्ववृक्षाणा
मित्युक्ते : ॥ विष्टरोदर्भमुष्टिरिवश्र
वसीकर्णावस्येतिवा ॥
विष्टरा । स्त्री० गुण्डासिन्याम् ॥
विष्टरूढा । स्त्री० स्वर्णकेतक्याम् ॥
विष्टि : । स्त्री० वेतनंविनाश्ठाद्वारी
इत्थनादिक्लेशे । आज्ञाम् । वेठी०
वेठ० वेगारी० इतिभाषा ॥ ह
ठात्भृतिकः क्लेशोविष्टिराजूखकी
र्त्ति ॥ वेतने ॥ कर्म्मणि ॥ प्रे
षणे ॥ करणान्तरे । भद्रायाम्
॥ अस्याउत्पत्तिमाह । भद्रापुरा
संयुगईशविग्रहोद्भवबाभीषदना-
मरासुरे । लाङ्गूलिनीसप्तशया च-
पद्वतीवराटकाद्दग्घनघोषकस्वना
॥ बामीरासभीतद्वदनंमुखंयस्याः ।
घनोनिविडः० कुत्सितोघोषोघोष
का : कुत्सितकांस्यंतद्वत्स्वन : श
ब्दोयस्या : ॥ आविप्रविष्टाकुणपां
शुकाम्बराऽमरद्विषामग्रजकाननेत
दा । परेतगाधूमनिभाबलोचता
बाल्यंवसाभूदतिदीर्घविग्रहा ॥ जा
तिसमूहे । अग्रजकानने० पितृव
ने । परेतगा० शववाहना ॥ त
स्यास्तदाचानगिरेऽमरारय: कलि
न्दकासीदरधामपद्वतिम् । अवाप
साकर्णपदंकपर्द्दिनोवज्रायुधान-
न्दवतीमरुद्वया ॥ चानगिरे० ज
गम् : । वज्रायुधा० अग्निश
ला । आनन्दवत:० परमसुखयुक्त
स्य ॥ विधेयमेवाऽग्निशिखायता
लुका० फलंनसाश्रितशराऽस्तिमङ्गल
म् । नरैरत: स्वात्महितोपलब्धि
भिस्तदाश्रितंस्वाश्रितकर्मसिद्धिजम्
श्रितवरा० शाद्दीशात्द्रुत : प्राप्तो
वरोयया । अग्निशिखायता:लुका०
वह्निज्वालायवत्तालुकंयस्या : ।
स्वाश्रितकर्मसिद्धिजम्० स्वयावि
ष्ट्याश्रितंविहितंकर्म तस्यसिद्धि-
स्तस्याजातम्० भद्रायांकृतकार्य-
निष्पत्तिजातम् । तदाश्रितम्०
विष्टिवेलाप्राप्तम्० मङ्गलमुद्वाहा-
दिकंनविधेयम् । स्वात्महितोप
लब्धिभि० : स्वात्मनेनिजजीवाय०
हिता० हितकारिणी० उपलब्धि
र्वृद्धि : प्राप्तिर्ज्ञानंवायेषांतै : ।

विष्टियोग्यकालमाह । शुक्लेऽष्टमीपौर्णमास्योः पूर्वार्द्धे विष्टिसम्भवः । एकादशीचतुर्थ्योश्च परार्द्धे विष्टिरीरिता ॥ दशम्याञ्च तृतीयायाः परार्द्धे कृष्णपक्षके । चतुर्दश्याञ्च सप्तम्याः पूर्वार्द्धे विष्टिरेव हि ॥ विष्टिस्तु सर्पाकृतिरेव । आननेपञ्चदण्डाः स्युर्वक्षःस्थाने चतुर्द्दश । मध्ये चाष्टौ विजानीयाद्विष्टिपुच्छे त्रयः स्मृताः ॥ फलन्तु । आननेदेहनाशः स्याद्वक्षःस्थानेमहद्भयम् । मध्ये च मध्यमं विद्याद्विष्टिपुच्छे ध्रुवं जयः ॥ प्रकारान्तरञ्चापि । मुखे पञ्च गले त्वेका वक्षस्येकादश स्मृताः । नाभौ चतस्र षट् कट्यां तिस्रः पुच्छे तु नाडिकाः ॥ फ तु । मुखे कार्य्यध्वस्तिर्भवति मरणं चाथ गलके धननाशो निर्वाच्यथ कटितटे बुद्धिविलयः । कलिर्नाभीदेशे विजयमथपुच्छे च जगदुः शरीरं भद्रायाः पृथगिति फलं पूर्वमुनयः ॥ मनुवसुमुनितिथियुगदशशिवगुण-सङ्ख्यासु तिथिषु पूर्वान्ते : १४ । ८ । ७ । १५ । ४ । १० । ११ । ० ३ । यायाति विष्टिरेषापृष्ठे शुभदा पुरस्त्वशुभदा ॥ पूर्वान्ते:० पूर्वाम्यादिदिङ्मुखी भवतीत्यर्थः ॥ शिहाय विपरीतां तां विष्टिं सर्वं वर्ज्जयेत् । विष्टिपुच्छे विदग्धेऽपि

शेषिकार्यं शुभावहम् ॥ त्रि० कर्मकारी ॥ विशति क्लिश्यम् । विश० क्तिच ॥ यद्वा । विष्णाति । विषविप्रयोगे । क्तिच् ॥ यद्वा । विष्यते कर्म्मणि । क्तिन् ॥

विष्टुतिः । स्त्री० सामगानां स्तुतिप्रकारविशेषे ॥ तस्या विष्टुतेरुद्यतीतिनाम । एवं परिवर्त्तिनी कुलायिनी ति द्विविष्टुती ॥

विष्ठा । स्त्री० उच्चारे । शमले गूथे । विषि पुरीषे ॥ विविधप्रकारेण तिष्ठति उदरे० अनया वा० पुरुषः । ष्ठा० । आतश्चोपसर्गे इतिकः । उपसर्गादितिषः ॥

विष्ठारुहा । स्त्री० स्वर्णकेतक्याम् ॥

विष्णुः । पुं० नारायणे । देशकालवस्तुपरिच्छेदशून्ये व्यापनशीले परमात्मनि वासुदेवे ॥ यथा विष्णुपुराणे । ज्योतींषि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च नद्यः समुद्राश्च स एव सर्वं यदस्ति यन्नास्ति च विप्रवर्य्येति ॥ यथा वा तत्रादिनीचैः सुकृतानसत्यानृपाषाणमृद्दारुमयादिदेवान् । भजन्ति ये माधवनिन्दकास्ते पूर्णः सदानन्दमयोऽस्ति विष्णुरिति ॥ अपि च । वेदे रामायणे चैव पुराणे भारते तथा । आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयत इति । अजातवेकवचनं वाध्यम् ॥ द्वादशादित्यानां मध्ये भगवतो वासुदेवस्य विभूतौ । आदित्यानामहं विष्णुरित्यु

न्तौ : । वेवेष्टिव्याप्नोतिविश्वम् । विष्लृव्याप्तौ । विषेः किच्चेति • नु : । रषाभ्यामितिणत्वम् ॥ वेषति • सिञ्चति • आप्याययतिविश्वम् • इतिवा । विष्णाति • वियुङ्क्तेभक्तान् • मायापसारणेनसंसारादितिवा । पूर्वस्त्र : । विशति • भूतेन्द्रियमनोजीवभावेनसर्वप्राणिन : • विशन्तिसर्वभूतान्यत्रेतिवा । यस्माद्विष्टमिदंसर्वंतस्यशक्त्यामहात्मन : । तस्माद्देवोच्यतेविष्णुर्विशधातो : प्रवेशनात् ॥ यद्वा । रोदसीव्याप्यकान्तिरभ्यधिकास्थितास्येतितथा । व्याप्तमेरोदसीपार्थकान्तिरभ्यधिकास्थिता । विशेषेणक्रामति । क्रमु • विपूर्व : । अस्मात्ष्णुप्रत्ययोधातुलोपश्चपृषोदरादित्वात्क्रमणाद्वाप्यहंपार्थविष्णुरित्यभिधीयते ॥ यज्ञे ॥ वामने ॥ वेवेष्टित्रिभिर्विक्रमैरेवलोकत्रयमितितथा ॥ शुद्धे ॥ वसुदेवतायाम् ॥ वह्नौ ॥ धर्मशास्त्रकर्तृमुनिविशेषे ॥

विष्णुकमलम् । न • अवयवे ॥

विष्णुकन्द : । पुं • मूलविशेषे ॥ विष्णुगुप्ते । जलवासे । बृहत्कन्दे । दीर्घपत्रे ॥

विष्णुक्रान्ता । स्त्री • अपराजितायाम् ॥ अपराजितायामन्यासु पत्रातिरपिविष्णुक्रान्ता । तत्पर्याया : । हरिक्रान्ता • नीलपुष्पा • अपराजिता • नीलक्रान्ता • सुनीला • विक्रान्ता • इत्यादिकैतिराजनिघण्ट : ॥

विष्णुगुप्त : । पुं • कौण्डिन्यमुनौ ॥

विष्णुगुप्तकम् । न • चाणक्यमूलके ॥

विष्णुगृहम् । न • विष्णुमन्दिरे । स्तम्भपुरे ॥

विष्णुचक्रम् । न • सुदर्शनचक्रे ॥ करस्थरेखामयचक्रे ॥ विष्णुचक्रंकरेचिह्नंसर्वेषांचक्रवर्तिनाम् । भवत्यधिकतोयस्यप्रभावस्त्रिदशैरपि ॥

विष्णुतैलम् । न • भैषज्यरत्नावल्यायुक्ते लघुबृहद्भेदभिन्ने तैलविशेषे ॥

विष्णुदत्त : । पुं • परिक्षिन्नृपतौ ॥

विष्णुदैवतम् ।)
विष्णुदैवत्यम् ।) त्रि • विष्णुधिष्टातृदेवताके ॥ श्रवणे ॥

विष्णुदैवत्या । स्त्री • एकादश्याम् ॥ द्वादश्याम् ॥ एकादशीद्वादशीचप्रोक्ताश्रीचक्रपाणिन : ॥

विष्णुधर्म : । पुं • शास्त्रविशेषे ॥ विद्याविशेषे ॥

विष्णुधर्मोत्तरम् । न • संहिताविशेषे ॥ तत्रप्रश्नकर्त्ताजनमेजयसुत : • वक्तार : शौनकादय : ॥

विष्णुपञ्जरम् । न • विष्णुकवचविशेषे ॥

विष्णुपदम् । न • वियति । आकाशे ॥ विष्णो : पदम् • आस्पदंस्वरूपंवा ॥

अक्षे । विष्णोः स्थाने ॥ यथा ।
अपुण्यपुण्योपरमेक्षीणाशेषातिदे-
तत्रः । यत्रगत्वानशोचन्ति तद्वि
ष्णोः परमंपदम् ॥ पुं० चौरादे ॥

विष्णुपदी । स्त्री० गङ्गायाम ॥ विष्णोः
पदंस्थानंयस्याः सा । गौरादित्वा
न्ङीष् ॥ द्वारिकायाम् ॥ रवेः स
ङ्क्रान्तिविशेषे । वृषालिघटसिंहेषु
विष्णुपदार्कसङ्क्रमे ॥

विष्णुपुरम् । न० वैकुण्ठे ॥ विष्णोः
पूः । ऋक्पूरित्यप्रत्ययः ॥

विष्णुभक्तः । त्रि० वैष्णवे । विष्णु
भक्तिविशिष्टे ॥ तल्लक्षणं यथा । म
त्कर्मकृन्मत्परमोमद्भक्तः सङ्गव-
र्जितः । निर्वैरः सर्वभूतेषुयः स
मामेतिपाण्डव ॥ नचलतिनिजवर्ण
धर्मतोयः सममतिरात्मसुहृद्विपक्ष
पक्षे । नहरतिनचहन्तिकिञ्चिदुच्चैः
सितमनसंतमवेहिविष्णुभक्तम् ॥
विमलमतिरमत्सरः प्रशान्तः शुचि
चरितोऽखिलसत्त्वमित्रभूतः । प्रिय
हितवचनोऽस्तमानमायोवसतिसदा
हृदितस्यवासुदेवः ॥ सकलमिदमह
ञ्चवासुदेवः परमपुमान्परमेश्वरः
सएकः । इतिमतिरचलाभवत्यन
न्तेहृदयगतेव्रजतान्विहायदूरात् ॥
यमनियमविधूतकल्मषाणामनुदि
नमच्युतसक्तमानसानाम् । अपगत
मदमानमत्सराणांव्रजभटदूरतरेण
मानवानामिति ॥

विष्णुभक्तिः । स्त्री० भगवत्सेवाया
म् ॥

विष्णुमाया । स्त्री० दुर्गायाम् ॥ चि
च्छक्तौ ॥ अव्यक्तंव्यक्तरूपेणरजः स
त्त्वतमोगुणैः । विभज्ययार्थंकुरुते
विष्णुमायेतिसोच्यते ॥ विष्णोरेव
माया । एकैवशक्तिः परमेश्वरस्य
भिन्नाचतुर्धाव्यवहारकाले । भोगेभ
वानीपुरुषेषुविष्णुः कोपेषुकाली
समरेषुदुर्गा ॥ इत्यनेनविष्णुकालि
कयोरेकमूर्तित्वप्रतिपादनात् ॥

विष्णुयशाः । पुं० ब्रह्मयशः पुत्रे ।
कल्किपितरि ।

विष्णुरथः । पुं० नागान्तके । गरुडे
॥ विष्णोरथइव ॥ यद्वा । रथः
पौरुषदेहयोरितित्रिकाण्डशेषः ।
विष्णोरथः पौरुषंदेहोवा ॥ विष्
णोः स्यन्दने ॥

विष्णुरातः । पुं० अभिमन्युसुते ।
परीक्षिन्नृपतौ ॥ विष्णुनारातः ॥

विष्णुलिङ्गी । स्त्री० वर्त्तिकापक्षिणि ॥

विष्णुवल्लभा । स्त्री० तुलस्याम् ॥ लक्ष
म्याम् ॥ अग्निशिखायाम् ॥

विष्णुवाहनम् । न० अरुणावरजे ।
गरुडे ॥ विष्णोर्वाहनम् ॥ गरुडः
शाल्मल्यरुणावरजोविष्णुवाहन
इतिहेमचन्द्रः ॥

विष्णुवाह्यः । पुं० गरुडे

विष्णुस्थानम् । न॰ तीर्थविशेषे ॥

विष्यन्दनः । पुं॰ रोचकरसस्त्वन्तरे । विष्यंदे ॥ यथोक्तं सूदशास्त्रे । दधिक्षीरे समे पक्त्वा त्वर्द्धभागावशेषिते । अष्टमांशं क्षिपेत्तत्र तण्डुलान्निस्तुषस्तिलान् ॥ प्रियालपनसाम्राणाम् आमाणां समं क्षिपेत् । क्षीरादर्द्धं घृतञ्चैव शर्कराञ्च तथाक्षिपेत् ॥ सिद्धश्चिक्कटकोपेतः कर्पूरेणाधिवासितः । एष विष्यन्दनो नाम देवलोकेऽपि दुर्लभः ॥ यस्मिन् पक्ते हि भूतं स्यन्दते सर्वतोमुखम् । तस्मात् सूपविधानज्ञैर्विष्यन्दन इति स्मृतः ॥ विष्यन्दो बृंहणो हृद्यः पित्तानिलहरो गुरुः । रुच्यो बहुतरं चातुर्वर्णनशुक्रकरोऽहिमः ॥ इति ॥

विष्यः । त्रि॰ विषवधोचिते ॥ विषेण वध्यः । नौवयोधर्मविषेत्यादिना यत् ॥ विषाय हन्तो वा । उगवादिभ्यो यत् ॥

विष्वः । त्रि॰ हिंस्रे ॥

विष्वक्पर्णी । स्त्री॰ भूम्यामलक्याम् ॥ विष्वक्पर्णान्यस्य ॥

विष्वक्सेनः । पुं॰ जनार्द्दने । विष्णौ ॥ विषुना नाञ्चति गच्छतीति । ऋत्विगादिना क्विन् । उगितश्चेति ङीप् । विष्वची सेना यस्य । मकारपरत्वादेति संज्ञायामगादिति नषत्वम् ॥ विष्वगञ्चति पलायन्ते दैत्यसेना यद्दर्शनाद्योगमाद्येनेति वा ॥ विष्णोर्निर्माल्यधारिणि ॥ त्रयोदशमनौ ॥

विष्वक्सेनप्रिया । स्त्री॰ वाराह्यामोषधौ । चामारआलु॰ इ॰ गौ॰ दे॰ भा॰ । लक्ष्म्याम् ॥ विष्वक्सेनस्य प्रिया ॥

विष्वक्सेना । स्त्री॰ प्रियङ्गौ । फलिन्याम् ॥ विष्वक्सेनेति विष्ज् बन्धने । छात्रमीत्यादिना मः ॥

विष्वक् । अ॰ पारतः । समन्तादर्थे ॥ नानाविधगतौ ॥ तुल्याशेराच काले । विषुपञ्चति । ऋत्वि॰ । क्विन् ॥

विष्वङ् । पुं॰ पुरुषे । आत्मनि । ब्रह्मणि ॥ विविधं सृष्टमञ्चति । ऋत्वि॰ । क्विन् ॥

विष्वाणनम् । न॰ भोजने । शब्दकरणे ॥

विष्वद्र्यङ् । त्रि॰ सर्वतोगच्छति । विष्वग्गतिके ॥ विष्वगञ्चति । ऋत्विगादिना क्विन् । विष्वग्देवयोरित्यद्र्यादेशः । स्त्रियां विष्वद्रीची ॥

विष्वाणः । पुं॰ भक्षणे ॥

विसंवादः । पुं॰ विप्रलम्भे । प्रतिज्ञातासम्पादने ॥ विरुद्धं सम्यग् वदनम् । वदेर्भावे घञ् ॥

विसंवादि । त्रि॰ विलक्षणे ॥

विसम् । न॰ मृणाले । पद्मादीनां मूले ॥ विसति । विसप्रेरणे । इगु

पक्षिविशेषः ॥

विसकण्ठिका । स्त्री॰ बलाकायाम् ॥

विसकुसुमम् । न॰ कमले ॥

विसकूट : । पुं॰ सिंहे । मृगेन्द्रे ॥ इङ्गुदीवृक्षे ॥

विसतन्तु : पुं॰ मृणालसूत्रे

विसनाभि : । पुं॰ पद्मिन्याम् ॥

विसपुष्पम् । न॰ नलिने ॥ बिसप्रपुष्पम् ॥

विसप्रसूनम् । न॰ अम्भोरुहे । नलिने । पद्मे ॥ बिसप्रसूनम् ॥

विसम्वाद : । पुं॰ विप्रलम्भे । मिथ्याख्यानेनवञ्चने । अङ्गीकृतासम्पादने ॥

विसर : । पुं॰ सन्दोहे । व्रजे । समूहे । विसरति । सृगतौ । पचाद्यच् । प्रसरे ॥

विसर्ग : । पुं॰ दाने ॥ त्यागे ॥ मलनिर्गमे पायूपस्थयोर्व्यापारे ॥ विभासोऽयनभेदे ॥ विसर्ज्जनीये ॥ यथा । शृङ्गवद्गोलवत्तस्यवालिकाकुचयुग्मवत् । नेच्चवत्कृष्णसर्प्पस्यविसर्गोऽयमितिस्मृत : ॥ विशेषसृष्टौ ॥ यथा । पुरुषानुगृहीतानामेतेषांवासनामय : । विसर्गोयंसमाहारोवीजाद्वीजंचराचरम् ॥ विसर्ज्जनम् । सृज॰ । घञ् ॥ विविधंसृज्यतेक्षिप्यतेवा॰घञ् ॥

विसर्ज्जनम् । न॰ दाने ॥ परित्यागे ॥ सम्प्रेषणे ॥ सृजेर्विपूर्वाद्भावे ल्युट् ॥

विसर्ज्जनीय : । पुं॰ विसर्गे । द्विविन्दुके ॥

विसर्प्प : । पुं॰ रोगविशेषे । सविषामये ॥ अथविप्रकृष्टंनिदानंसङ्ख्यांनिरुक्तिञ्चाह । लवणाम्लकटूष्णादिसेवनाद्दोषकोपत : । विसर्प : सप्तधाज्ञेय : सर्वत : परिसर्पणात् ॥ आदिशब्दात्वरकोक्तद्दधिशाकशिखण्डादीनांग्रहणम् । सप्तधात्वंविवृणोति । पृथक्त्रयस्त्रिभिश्चैकोविसर्पाद्वन्द्वजास्त्रय : । वातिक : पैत्तिकश्चैवकफज : सान्निपातिक : । चत्वारएतेवीसर्पावक्ष्यन्तेद्वन्द्वजास्त्रय : । आग्नेयोवातपित्ताभ्यांग्रन्थ्याख्य : कफवातज : । यस्तुकर्दमकोघोर : सपित्तकफसम्भव : ॥ एषांलक्षणादिकंग्रन्थान्तराद्वबोध्यम् ॥

विसर्प्पणम् । न॰ प्रसरे । तन्तुवयादेर्विसर्प्पणे ॥ सृप्लृगतौ । ल्युट् ।

विसर्प्पि : । पुं॰ विसर्पे ॥

विसलम् । न॰ किसलये । पल्लवे ॥

विसार : । पुं॰ मत्स्ये ॥ विशेषेणसरति । सृगतौ । व्याधिमत्स्यबलेषुचेतिवाच्यमितिघञ् ॥

विसारिणी । स्त्री॰ माषपर्ण्याम् ॥

विसारितः । त्रि॰ प्रसारिते । विपूर्व्वात्सर्त्तेः क्तः ॥

विसारी । त्रि॰ प्रसरणशीले । प्रसारिणि ॥ विसरणम् । स॰ । घञ् विसारोऽस्यास्ति । अतइनिः । अभीक्ष्णं विसरतिवा । बहुलमाभीक्ष्ण्ये॰ इतिणिनिः ॥

विसिनी । स्त्री॰ पद्मिन्याम् ॥ मृणालि ॥ विसमस्त्यस्याः । पुष्करादिभ्यइतिइनिः ॥

विसूचिका । स्त्री॰ अजीर्णहेतुकेरोगविशेषे । विसूच्याम् ॥

विसूची । स्त्री॰ विसूचिकायाम् अस्यालक्षणन्तु । मूर्च्छातिसारोवमथुः पिपासाशूलंभ्रमोद्वेष्टनजृम्भदाहाः वैवर्ण्यकम्पौहृदयेरुजश्चभवन्तितस्यांशिरसश्चभेदः ॥ अस्याउपद्रवायथा । निद्रानाशोऽरतिः कम्पोमूत्राघातोविसंज्ञता । अमी उपद्रवाघोराः विसूच्याः पञ्चदारुणाइति । निरुक्तिर्यथा तु । सूचीभिरिवगात्राणितुदन्संतिष्ठतेऽनिलः । यत्राजीर्णेचसावैद्यैर्विसूचीतिनिगद्यते । नतांपरिमिताहारालभन्ते विदितागमाः । मूढास्तामजितात्मानोलभन्तेऽशनलोलुपाः । अस्याश्चिकित्सायथा । सशुनजीरकसैन्धवगन्धकत्रिकटुरामठचूर्णमिदंसमम् । सपदिनिम्बुरसेनविसूचिकांहरतिभोरतिभोगविचक्षणे इतिलोलिम्बराजः ॥

विसूरितम् । न॰ अनुतापे ॥ इ॰ ज॰ ध॰ ॥

विसृतः । त्रि॰ विस्तृते । विसरतिस्म । सृ॰ । गत्यर्थेतिक्तः ॥

विसृत्वतः । त्रि॰ विस्तृते ॥

विसृत्वरः । त्रि॰ प्रसारिणि प्रसरणशीले ॥ विसरतितच्छीलः । सृ॰ । इण्नशजीतिक्वरप् । ह्रस्वस्येति तुक् ॥

विसृमत्वम् । न॰ विस्तृते ॥

विसृमरः । त्रि॰ विसृत्वरे ॥ विसरतितच्छीलः । सृ॰ । घस्यदः क्मरच् ॥

विसृष्टः । त्रि॰ निक्षिप्ते । उत्पादिते ॥ विपूर्वात्सृजेः क्तः ॥ मुक्ते ॥ दत्ते ॥ विशेषेणसृष्टः ॥

विस्तः । पुं॰ हेम्नोऽक्षे । सुवर्णे । हेम्नः षोडशमाषेषु । अशीतिरक्तिकापरिमिते । स्वर्णे ॥ विस्यते । विसउत्सर्गे । क्तः । आगमशास्त्रस्यानित्यत्वान्नेट् ॥

विस्तरः । पुं॰ शब्दस्यविस्तारे । वाक्प्रपञ्चे ॥ विस्तारे ॥ प्रणये ॥ विस्तरणम् । स्तृञ् आच्छादने । ऋदोरप् ॥ पीठे ॥ समूहे ॥

विस्तारः । पुं॰ तिर्यगायतौ ।

विस्तृतौ । प्रसृतावयवेसमूहे । विटपे । शाखापल्लवादिसमुच्चये ॥ स्तम्बे ॥ विस्तीर्णतायाम् । विग्रहे । व्यासे ॥ विस्तरणम् । स्तृञ् । प्रथमेवावशब्दइतिघञ् ॥ विभूतौ ॥ यथा । विस्तारः सर्वभूतस्य विष्णोः सर्वमिदं जगत् । द्रष्टव्यमात्मवत् तस्मादभेदेनविचक्षणैरिति । सर्वभूतस्य सर्वात्मकस्य ॥

विस्तारित :। त्रि० विस्तृते ॥ प्राप्तविस्तारे ॥

विस्तीर्ण :। त्रि० विपुले । विशाले॥ विस्तीर्यतेस्म । स्तृञ् । क्त : । रदाभ्यामितिन : ॥

विस्तीर्णपर्ण :। पुं० म०मानकद्रुमे । महापत्रे ॥

विस्तृत :। त्रि० विस्तृते । तते । विस्तारिते । लब्धविस्तारे ॥ विस्तर्यतेस्म । स्तृञ् । गत्यर्थेतिक्त : ॥

विस्तृति :। स्त्री० विस्तारे ॥ विस्तरणम् । क्तिन् ॥

विस्पष्ट :। त्रि० सुव्यक्ते । सुस्पष्टे ॥ म०प्रकटोदिते । प्रकटोक्ते ॥

विस्फार :। पुं० धनुषः स्वाने । योधानांधनुर्गुणशब्दे ॥ विस्फुरणम् । स्फुरस्फुरणे । घञ् । स्फुरतिस्फुलत्योर्घञीत्यात्त्वम् ॥ स्फारस्फुरणेवा ॥

विस्फारित :। त्रि० निर्घोषिते ॥ विवर्त्तिते ॥ प्रकाशिते ॥ विपूर्वाण्णयन्तस्फुरतेः क्त : ॥

विस्फुरणम् । न० सर्वत्रप्रसरणे ॥

विस्फुरित :। त्रि० स्फूर्त्तिविशिष्टे ॥

विस्फुलिङ्ग :। पुं० विषप्रभेदे ॥ अग्निकणे ॥

विस्फूर्ज्थु :। पुं० उद्रेके ॥ ट्वितोथुच् ॥

विस्फूर्जित :। त्रि० सञ्जृम्भिते ॥

विस्फोट :। पुं० विरुद्धस्फोटके । पिटके । पिटकायाम् । पिडिया०फोड़ा०इ०भा० ॥ विस्फोटति । स्फुटिर्विशरणे । अच् ॥ करणेघञ्वा ॥

विस्फोटक :। पुं० व्रणविशेषे । विस्फोटे ॥ विस्फोटाति । स्फुटिर० ण्वुल् ॥

विस्मय :। पुं० अद्भुते । आश्चर्ये । अलौकिकचमत्कारविशेषे ॥ यथा । विविधेषुपदार्थेषुलोकसीमातिवर्त्तिषु । विस्फारश्चेतसोयस्तुसविस्मयउदाहृत : ॥ गर्वे । दर्पे ॥ विस्मयनम् । ष्मिङ्ईषद्धसने । एरच् ॥ सन्देहे ॥

विस्मयान्वित :। त्रि० विलक्षे ॥ विस्मयेनआश्चर्येणअन्वित : ॥

विस्मयाविष्ट :। त्रि० अद्भुतदर्शनजन्याश्चर्यव्याप्ते ॥ विस्मयेनआश्चर्येणआविष्टोव्याप्त : ॥

विस्मरणम् । न० विस्मृतौ ॥ स्मृ आध्याने । ल्युट् ॥

विस्मापन : । पुं० कुहके । इन्द्रजाले ॥ गन्धर्व्वनगरे ॥ स्मरे । कामदेवे ॥

विस्मित : । त्रि० विस्मयमाश्चर्य्यङ्गते । विस्मयान्विते ॥ स्मिङ्० । कर्त्तरि क्त : ॥

विस्मृत : । त्रि० अपगते । स्मरणाविषये ॥ विस्मर्य्यतेस्म । स्मृ० । क्त : ॥

विस्मृति : । स्त्री० विस्मरणे ॥ विस्मरणम् । स्मृ० । क्तिन् ॥

विस्मेर : । त्रि० विस्मयशीले ॥ विस्मयतेतच्छील : । नमिकम्पीत्यादिना र : ॥

विस्रम् । न० आमगन्धिनि ॥

विस्रंसनम् । न० अवस्रंसने । अध : पतने ॥

विस्रंसमान : । त्रि० ध्वंसमाने ॥

विस्रगन्ध : । पुं० हरिताले ॥ त्रि०दुर्गन्धिनि ॥ विस्रंगन्धोस्य ॥

विस्रगन्धा । स्त्री० हवुषायाम् ॥

विस्रगन्धि : । पुं० हरिताले ॥

विस्रब्ध : । त्रि० अनुद्भटे ॥ गाढे ॥ विश्वस्ते ॥

विस्रम्भ : । पुं० केलिकलहे । विश्वासे ॥ प्रणये ॥ प्रणय : परिचय : शृङ्गारप्रार्थनावेत्यमरमाला । क्रीडापारतन्त्र्यमितिकश्चित् ॥ वधे ॥ परिरये ॥ विप्रलम्भे ॥ विस्रम्भणम् । विस्रभ्यतेऽनेनवा । स्रम्भु विश्वासे । घञ् ॥

विस्रम्भित : । त्रि० विश्वासंप्रापिते ॥

विस्रम्भी । त्रि० प्रणयिनि ॥ विश्वासिनि ॥ अस्त्यर्थे इनि : ॥

विस्रसा । स्त्री० जरायाम् । विस्रस्यतेऽनया । स्रंसु अध: पतने । भिदाद्यङ् ॥

विस्रस्त : । त्रि० विच्युते ॥

विस्रा । स्त्री० हवुषायाम् ॥

विहग : । त्रि० पक्षिणि ॥ च शुगेबाणे ॥ ग्रहे ॥ विहायसा०विहायसिवा गच्छति । गम्लृ० । अन्यत्रापिदृश्यतइतिड : । डे चविहायसोवि हादेशोवक्तव्य : ॥

विहङ्ग : । त्रि० पक्षिणि ॥ आशुगे । बाणे ॥ पुं० चन्द्रे । सूर्य्ये ॥ मेघे ॥ विहायसा०विहायसिवागच्छति । विहायसोविहचगमे : सुपीतिखच् । खच्चडिद्वा ॥

विहङ्गम : । पुं० विहङ्गे । खगे ॥ विहायसागच्छति । गम्लृ० । विहायसोविहच०गमे : सुपीतिखच् ॥

विहङ्गमा । स्त्री० भारयष्ट्याम् ॥

विहङ्गराज : । पुं० गरुडे ॥ विहङ्गानांराजा । टच् ॥

विहङ्गिका । स्त्री० भारयष्ट्याम् । बङ्गी०ङ्०भा० ॥ विहङ्गप्रतिकृति :

। ह्वेप्रतिकृतावितिकन् ॥ विहा
यसामच्छतिवा । गमश्चेतिखच् ।
विहायसोविहच । खच्चमाडिद्वाच्य:
। यावादित्वात्कन् । टाप् ॥
विहत: । त्रि॰ विनष्टे । विशेषेणहत: ॥
विहननम् । न॰ विघ्ने ॥ हिंसायाम्
॥ तूलपिञ्जले । तूलधनुषि ॥
विहर: । पुं॰ वियोगे ॥
विहरणम् । न॰ विहारे ॥ विपूर्वाद्धृ
ञो ल्युट् ॥
विहरन् । त्रि॰ क्रीडति ॥
विहर्तुम् । अ॰ क्रीडितुमित्यर्थे ॥
विहसितम् । न॰ महत्त्वाल्पत्वहीने॰
मध्यहास्ये । यथाहु: । आकुञ्चित
कपोलाद्यं सस्वनं निस्वनं तथा । प्र
स्तावोत्थं सानुरागमाहुर्विहसितं बु
धा: ॥ हसेर्हसने । भावे क्त: ॥
विहस्त: । त्रि॰ पण्डिते ॥ विह्वले ।
व्याकुले ॥ करशून्ये ॥ विगतोवि
चित्रोवाहस्तोऽस्य ॥
विहा । अ॰ स्वर्गे । विशेषेणजहाति
। ओहाक्त्यागे । विषाविहेत्याप्रत्य
य: ॥ न्यायेनोपार्जितस्यधनादे:
सत्पात्रेविनियोगे ॥
विहापितम् । न॰ दाने ॥ विहापन
म् । ओहाक्॰ । ण्यन्तात्क्त: ॥
विहाया: । पुं॰ खगे । शकुने ॥ पुं॰
न॰ गगने । आकाशे ॥ विशेषेणहा
ययति॰ गमयति॰ विमानादीन् ।
हयगतौ । ण्यन्तादसुन् ॥ विजहा
तिभुवंवा । ओहाक्॰ । वहिहाधा
ञ्भ्यश्छन्दसीत्यसुन् । णिदित्यस्या
नुवर्त्तेर्युक् । क्वचिच्छान्दसाअपि
भाषायांप्रयुज्यन्तेतेनलोकेपि ॥
विहायसम् । न॰ व्योम्नि ॥
विहायसा । अ॰ नभसि ॥
विहार: । पुं॰ क्रीडार्थपद्भ्यांसञ्चरणे
। परिक्रमे । भ्रमणे । स्कन्धे । ली
लायाम् ॥ सुगतालये ॥ विहरण
म् । हृञ्॰ । घञ् ॥ यानादौ ॥
विहरन्त्यनेन । करणेघञ् ॥ क्रीडा
स्थाने ॥ विहरन्त्यत्र । अधिकरणे
घञ् ॥ बिन्दुरेखखगे ॥ त्रि॰ हार
वर्जिते । विगतोहारोऽस्य ॥
विहारगृहम् । क्रीडागारे ॥
विहारवित् । पुं॰ श्रीकृष्णे ॥ त्रि॰ वि
हारज्ञे ॥
विहारवेदिका । स्त्री॰ वितर्द्याम् ॥
विहारस्थानम् । न॰ क्रीडाप्रदेशे ॥
विहारी । त्रि॰ परिक्रमिणि । विहार
कर्त्तरि ॥ मत्वर्थीयइनि: ॥
विहित: । त्रि॰ सृष्टे । निर्मिते ॥ वि
धेये । विध्यागतोचितकृत्ये ॥ वि
धीयतेस्म । डुधाञ्॰ । क्त: । द
धातेर्हि: ॥ अभिहिते । विपूर्वस्य
दधाते: क्रियासामान्यवाचित्वात्
विहिति: । स्त्री॰ विधाने ॥
विहीन: । त्रि॰ विगते । विशेषेणहो

मे । त्यक्ते । वर्त्तिते । वेधविधौ
नेश्चोत्तरिक्ता, वाक्यं प्रयाति वैफल्यम्
। नयनविहीने भर्त्तरि लावण्यमिव
खञ्जनाक्षीणाम् ॥

विहृतम् । न० स्त्रीणां स्वाभाविकदशा
लङ्कारान्तर्गतालङ्कारविशेषे ॥ यथा
। लीलाविलासौ विच्छित्तिर्विब्बोकः
किलकिञ्चितम् । मोट्टायितं कुट्टमि
तं ललितं विहृतं तथा ॥ विभ्रमश्चे
त्यलङ्काराः स्त्रीणां स्वाभाविका द
शेति हेमचन्द्रः ॥ तल्लक्षणं यथा ।
वक्तव्याभाषणं व्याजाद्विहृतं दर्शितेङ्गि
तम् ॥ विहरणम् । हृञ्० । भावे क्तः ॥

विहृतिः । स्त्री० सञ्चारे ॥ विहरणम्
। हृञ्० । क्तिन् ॥ विशेषेण हरणे ॥

विहेठः । पुं० विहेठने ॥

विहेठनम् । न० हिंसायाम् ॥ मर्द्दने
॥ विडम्बने । हेठ विबाधायाम् ।
ल्युट् ॥ दुःखे ॥

विहेडनम् । न० विहेठनार्थे ॥ हेड्०
। ल्युट् ॥

विह्वलः । त्रि० भीत्याद्यभिभूते, स्वा
ङ्गान्यवधारयितुमशक्ते । विक्लवे ॥
विह्वलति । ह्वल चलने । अच् । मू
र्च्छिते । विलीने ॥ विवशे ॥

वी । पुं० गमने । वेति । वी गत्या
दौ । क्विप् ॥

वीकः । पुं० वायौ । वाते । पक्षिणि
। खगे । अजति । अज० । अजिपु

धूनीभ्यो दीर्घश्चेति कन् ॥ मनसि ॥

वीकाशः । पुं० रहसि । विजने ॥
विकाशे । प्रकाशे ॥ विकाशनम् ०
अस्मिन्वा । काशृ दीप्तौ । भावे० ह
लश्चेत्यधिकरणे वा घञ् । इकः
काश इति दीर्घः ॥ यद्वा, विकाश
नमत्र वा । कश शब्दे । पूर्ववत् घ
ञ् दीर्घौ ॥

वीक्षणम् । न० विलोकने ॥ विशिष्ट
मीक्षणम् ॥

वीक्षणीयः । त्रि० गुरुमुखादवगत्य
विचारणीये ॥ वीक्षितुं योग्ये ॥ ई
क्ष० । अनीयर् ॥

वीक्षापन्नः । त्रि० विस्मयान्विते ॥ वी
क्षणम् वीक्षा तामापन्नः ।

वीक्षितः । त्रि० अवलोकिते । दृष्टे ॥
विशेषेणेक्षितः ॥

वीक्ष्यः । पुं० लासके ॥ वाजिनि ।
घोटके । न० विस्मये । दृश्ये । त्रि०
दर्शनीये ॥ *

वीङ्खा । स्त्री० शूकशिम्ब्याम् ॥ ग
तिभेदे ॥ नर्त्तने ॥ अश्वगतिभेदे ॥
सम्भौ ॥

वीचिः । पुं० स्त्री० स्वल्पतरङ्गे । ज
र्म्याम् । अवकाशे । वीच० द्व० भा०
॥ सुखे ॥ वयति० जयतेर्वा । वेञ्
तन्तुसन्ताने । वेञो डिच्चेति० ईचिः
॥ अल्पे ॥ आल्याम् ॥

वीचिमाली । पुं० समुद्रे ॥ वीचीनां

मालाः सास्तिमस्य। वीच्यादित्वा दिनिः॥

वीची। स्त्री॰ वीचिशब्दार्थे॥

वीचीतरङ्गः। पुं॰ न्यायविशेषे॥ स तु श्रोत्रे शब्दस्योत्पत्तिकारणरूपः। यथा। वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्त्तिता। कदम्बगोलकन्यायादुत्पत्तिः कस्यचिन्मते॥ इ॰ भा॰ प॰॥ ननु मृदङ्गाद्यवच्छेदेनोत्पन्नशब्दे श्रोत्रे कथमुत्पत्तिरित्यत आह। वीचीति आद्यशब्दस्य वहिर्दशदिगवच्छिन्नोऽन्यः शब्दस्तेनैव शब्देन जन्यते तेन चापरस्तद्व्यापक एवं क्रमेण श्रोत्रे त्पन्नो गृह्यत इति। कदम्बेति। आद्यशब्दाद्दशदिक्षु दश शब्दा उत्पद्यन्ते ततश्चान्ये दश शब्दा उत्पद्यन्त इति भावः। अस्मिन् कल्पे गौरवादुक्तं कस्यचिन्मत इति॥

वीजम्। न॰ अङ्कुरकारणे॥ हेतौ। तत्त्वे॥ आधाने॥ शुक्रे। रेतसि। सर्वभूतानां प्ररोहकारणं वीजं तस्माद्योपाधिकं चैतन्यं भगवद्विभूतिः॥ विशेषेण जायतेऽनेन। उपसर्गे च संज्ञायामिति डः। अन्येषामपीति दीर्घः॥ यद्वा। विशेषेण ईजते। ईज गतिकुत्सनयोः। अच्। वीज्यते वा। घञ्। कुत्वन्तु न भवति अजेर्व्यघञपोरित्यत्र निष्ठायामनिट इति वार्त्तिककृता पूरितत्वात्। अस्य च निष्ठायां सेट्त्वात्॥ यद्वा। वीजयति वीज्यतेऽनेन वा। वीज व्यजने। अच् घञ् वा॥ मज्जनि॥ गणितविशेषे अव्यक्तगणिते॥ मन्त्रे॥

वीजकः। पुं॰ मातुलुङ्गे॥ असनवृक्षे। पीतसारके। विजयसार इ॰ भा॰॥ वीजकः कुष्ठवीसर्पश्वित्रमेहगुदकृमीन्। हन्ति श्लेष्मास्रपित्तघ्नस्त्वच्यः केश्योरसायनः॥

वीजकृत्। न॰ वाजीकरणे॥

वीजकोशः। पुं॰ वीजकोषे॥

वीजकोशी। स्त्री॰ शिम्बायाम्॥

वीजकोषः। पुं॰ वराटके। कर्णिकायाम्॥ वीजस्य कोषः पात्रमाधार इति यावत्॥ वीजाभिधाने॥

वीजगर्भः। पुं॰ पटोले॥

वीजगुप्तिः। स्त्री॰ शिम्ब्याम्॥

वीजधर्म्मिणी। स्त्री॰ सर्वेषां महदादीनां विकाराणां वीजत्वेनावस्थितायां प्रकृतौ॥

वीजधान्यम्। न॰ धान्याके॥

वीजनम्। व्यजने॥ कोके। चक्रवाके॥ चकोरे। वस्तुनि॥ विधूनने॥ वीज व्यजने। चुरादिः। ल्युट्॥

वीजपादपः। पुं॰ भल्लातके॥

वीजपुष्पम्। न॰ मरुवके॥ मदनद्रौ॥

वीजपूरः। पुं॰ फलपूरे। मातुलुङ्गे। टावा लेबू इ॰ वगो॰ दे॰ भा॰ मङ्गभाषा च॥ गुणास्तु। वीजपूरफलं

स्वादुरसेऽम्लं दीपनं लघु । रक्तपित्तह
रं कण्ठजिह्वाहृदयशोधनम् ॥ श्वा
सकासारुचिहरं हृद्यं तृष्णाहरं स्मृत
म् ॥ सैन्धवार्द्रकसंयुक्तं बीजपूरक
मन्वियः । शाकिनीभिरिवाकृष्टं
विशत्युदरमोदनम् ॥ केशरं मातु
लुङ्गस्य लघुश्लेष्मानिलापहम् । रो
चनं दीपनं हृद्यं गुल्मशूलार्शसां जये
त्इति ॥ क्वाथेऽस्य मूलं ग्राह्यमित्या
हुः ॥ बीजेन पूर्यते । पूरी आप्याय
ने । इगुपधेति कः । कर्मणि घञ्
वा ॥ देशभाषया बिजौरा इति प्र
सिद्धोयम् ।

बीजपूर्णः । पुं॰ बीजपूरे । छोलङ्गे ।

बीजपेशिका । स्त्री॰ वराण्डकोषे ॥

बीजप्रदः । पुं॰ पितरि । गर्भाधा
नस्य कर्त्तरि ॥

बीजफलकः । पुं॰ बीजपूरे ॥

बीजसूः । स्त्री॰ क्षितौ ॥

बीजमातृका । स्त्री॰ पद्मबीजे । प
द्माक्षे ॥

बीजरत्नः । पुं॰ माषकलाये ॥

बीजरुहः । पुं॰ शाल्यादौ ॥ य
था । कुरण्टाद्या अग्रबीजा मूल-
जास्तूत्पलादयः । पर्वयोनय इ
क्ष्वाद्याः स्कन्धजाः ॥ शल्लकीमु
खाः ॥ शाल्यादयो बीजरुहाः स
म्मूर्छजास्तृणादयः । पुर्वनस्प
तिकायस्य षडेते मूलजातयः॰ है

मचन्द्रः ॥

बीजरेचनम् । न॰ जयपाले ॥

बीजवपनम् । न॰ क्षेत्रे बीजक्षेपणे ॥

बीजवृक्षः । पुं॰ असनवृक्षे ॥

बीजसञ्चयः । पुं॰ बीजसङ्घे ॥

बीजसन्तानः । पुं॰ वपने । क्षेत्रे
बीजानां विकरणे ॥ गर्भाधाने ॥

बीजसूः । स्त्री॰ भूमौ । पृथिव्याम् ॥

बीजाकृतम् । न॰ उप्तकृष्टे । सबीज
कृष्टक्षेत्रे ॥ बीजेन सहकृतं कृष्ट
म् । कृञो द्वितीयेति डाच् ॥

बीजाम्लम् । न॰ वृक्षाम्ले ।

बीजी । पुं॰ पितरि ॥ त्रि॰ बीज
विशिष्टे ॥

बीजोदकम् । न॰ करकायाम् ॥ बी
जाकृत्युदकम् । शाकपार्थिवादिः ॥

बीजोप्तिचक्रम् । न॰ बीजवपनजन्य
शुभाशुभज्ञानार्थं सर्पाकारचक्रे ॥

बीज्यः । त्रि॰ कुलसम्भवे ॥ बीज्य
ते । बीजव्यजनेऽदन्तः । अचोय
त् ॥ यद्वा । बीजमस्यास्ति । अ
न्येभ्योपि दृश्यत इति यप् । बीजेभ
वः साधुर्वा ॥

बीटिका । स्त्री॰ सुसज्जीकृतताम्बू
ले ॥ इति केचित् ॥

बीणा । स्त्री॰ तडिति । विद्युति ।
वल्लक्याम् । विपञ्च्याम् ॥ वेति
वायते स्वरोऽस्याम् । बीगत्यादि
षु । रास्नासास्नास्थूणावीणा इति

नप्रत्ययो णत्वं गुणाभावश्च निपातितः ॥ अस्याः प्रभेदा यथा । विश्वावसोस्तु बृहती तुम्बुरोस्तु कलावती । महती नारदस्य स्यात् सरस्वत्यास्तु कच्छपी ॥ अपि च । शिवस्य वीणा नालम्बी सरस्वत्यास्तु कच्छपी । महती नारदस्य स्याद्गणानाञ्च प्रभावती ॥ विश्वावसोस्तु बृहती तुम्बुरोस्तु कलावती । चाण्डालानाञ्च कण्डालवीणा चाण्डालिकापि च ॥ तस्या अङ्गानां नामानि यथा । कायः कोलम्बकस्तस्या उपनाहो निबन्धनम् । दण्डः पुनः प्रवालः स्यात् ककुभस्तु प्रसेवकः । मूले वंशशलाका स्यात् कलिका कूणिकापि च ॥ इति ॥ रमण॰ ५ । ५० ॥

वीणादण्डः । पुं॰ वीणास्थितालाबूपरिकाष्ठे । प्रवाले ॥ वीणाया दण्डः ॥

वीणानुबन्धः । पुं॰ उपनाहे ॥

वीणालः । त्रि॰ वीणावति ॥ पुं॰ नारदे ॥ वीणा अस्ति अस्य । सिध्मादित्वाल्लच् ॥

वीणावादः । त्रि॰ वैणिके ॥ वीणां वादयति । वदेर्ण्यन्तात्॰ कर्म्मण्यण् ॥

वीणावादकः । पुं॰ वैणिके ।

वीणास्यः । पुं॰ नारदे ॥ वीणा आस्यमिव प्रधानं यस्य ॥

वीतम् । न॰ असारगजे । युद्धाक्षमे हस्तिनि ॥ असारतुरगे । युद्धाक्षमे घोटके ॥ अङ्कुशकर्म्मणि । कारिणः पादाघातपूर्व्वकाङ्कुशवारणे ॥ पादकर्म्म यत् प्रोक्तं यातमङ्कुशवारणम् । उभयं वीतमाख्यातमिति हलायुधः ॥ वेति॰ अजतिर्वा॰ युद्धादिकर्म्मणः वीगत्यादौ॰ अजगतौ वा । गत्यर्थे क्तः ॥ अनुमानप्रभेदे । अन्वयमुखेन प्रवर्त्तमाने विधायकेऽनुमानविशेषे ॥ वीतानुमानञ्च द्विधा । पूर्व्ववत्॰ सामान्यतोदृष्टञ्च । दृष्टस्वलक्षणसामान्यविषयं यत् तत् पूर्व्ववत् । पूर्व्वं प्रसिद्धम्॰ दृष्टस्वलक्षणसामान्यमिति यावत् । तदस्य विषयत्वेनास्त्यनुमानज्ञानस्येति पूर्व्ववत् । यथा धूमाद्वह्नित्वसामान्यविशेषः पर्व्वतेऽनुमीयते । तस्य वह्नित्वसामान्यस्य स्वलक्षणं वह्निविशेषो दृष्टो रसवत्याम् । अपरञ्च वीतं सामान्यतोदृष्टम्॰ अदृष्टस्वलक्षणसामान्यविषयम् । यथेन्द्रियविषयमनुमानम्॰ अत्र हि रूपादिज्ञानानां क्रियात्वेन करणत्वमनुमीयते यद्यपि च करणत्वसामान्यस्य च्छिदादौ वास्यादि स्वलक्षणमुपलब्धम्॰ तथापि यज्जातीयं रूपादिविज्ञाने करणमनुमीयते तज्जातीयस्य करणस्य न दृष्टं स्वलक्षणं प्रत्यक्षेण

इन्द्रियजातीयंहितत्करणम्० नचेन्द्रियत्वस्यसामान्यस्यलक्षणमिन्द्रियविशेषः प्रत्यक्षगोचरोवागिद्रष्टाम्० यथा वह्नित्वस्यसामान्यस्य लक्षणं वह्निः सोऽयंपूर्ववतः सामान्यतोदृष्टस्यसत्यपिवीतत्वे नतुल्यत्वे विशेषः। अत्रचदृष्टंदर्शनम्० सामान्यस्य सार्वविभक्तिकस्तसिल्० अदृष्टलक्षणस्यसामान्यस्य० दर्शनमनुमानमित्यर्थः॥ त्रि० शान्ते॥ निवृत्ते॥ आच्छादिते। विरहिते॥ विशेषणद्भतः॥

वीतंसः। पुं० मृगाणांपक्षिणामपि बन्धनोपाये॥ मृगाणांपक्षिणाञ्चवि श्वासहेतोः प्रावरणे॥ वितंस्यते। तसिअलङ्कारे। घञ्। उपसर्गस्येतिदीर्घः॥

वीतदम्भः। त्रि० त्यक्तदम्भे॥

वीतनः। पुं० कृकपार्श्वद्वये॥ यथा। कृकस्तुकन्धरामध्यंकृकपार्श्वौतु वीतनौ। इतिहेमचन्द्रः॥

वीतभयः। त्रि० निर्भये॥ वीतंविगतंभयंयस्य॥

वीतमन्युः। त्रि० विगतरोषे॥

वीतरागः। पुं० बुद्धे॥ त्रि० निस्पृहे। रागशून्ये। विशेषणद्भतः। गतः० रागः प्रीतिर्मात्सर्यंवा० यस्य० यस्माद्वा॥

वीतरागभयक्रोधः। त्रि० शुद्धसत्त्वे। रागभयक्रोधाः० वीताः विवेकेन विगतायस्मात्॥

वीतरागी। त्रि० इहामुत्रार्थफलभोगरहिते॥

वीतशोकः। पुं० अशोकद्रुमे॥ त्रि० आत्मज्ञे। आत्मज्ञएववीतशोको भवतिनानात्मज्ञः॥ शोकहीने। वीतः विशेषेणगतः शोकोयस्माद्यस्माद्वा॥

वीतस्पृहः। विरक्ते॥

वीतिः। पुं० अश्वे। स्त्री० गतौ दीप्तौ॥ प्रजने। अशने॥ धावने॥ वेति। वीगत्यादौ। क्तिच्० भावेक्तिशक्तिन्वा॥ निवृत्तौ॥

वीतिहोत्रः। पुं० धनञ्जये। अग्नौ॥ वीयते। वीगतिप्रजननकान्त्यसनखादनेषु। कर्मणिक्तिन्। वीतिर्भक्ष्यंपुरोडाशादि० हूयतेऽस्मिन्। हुदानादनयोः। हुयामाश्रुभसिभ्यस्त्रन्० इतित्रन्॥ वीतिरश्वोहोत्रंहवनमस्येतिवा॥ अर्के। सूर्य्ये॥

वीप्तः। त्रि० विशेषेणदत्ते॥ विदीयतेस्म। डुदाञ्०। क्तः। अच उपसर्गात्तइतितादेशः दस्तीति दीर्घः॥

वीथिः। स्त्री० वीथ्याम्। पण्यसञ्चारस्थाने॥ तास्वनव। यथा। सि

षंमुखेन वसुवीथिपु कश्चिदश्वं वल्गा विभागकुशलो गमयाम्बभूवेति माघव्याख्यानावसरे मल्लिनाथः । नव सुवीथिषु सञ्चारस्थानेषु गमयाम्बभूव० वीथयो नवाश्वानां सर्वत्र धारादावर्थाः परिमिताः प्रचारदेशाः । तास्विति सहृदयैके० नवेत्यन्ये० तत्रोत्तरपश्चमाश्रित्योक्तं कविनानवस्विति । यथाह भोजः । वीथ्यस्तिस्रोऽश्वधाराणां लघ्वी मध्योत्तमाः क्रमात् । तासां श्यादनुषां मानमशीतिर्नवतिः शतम् ॥ श्रेष्ठमध्योत्तमानान्तु वाजिनां वीथिकाः स्मृताः । नवानां कथिता वीथ्यो दृष्टानां क्रमशः क्रमे ॥ अन्येषामपि सर्वत्र गतिद्व्यर्थमीरिताः ॥ समोन्नता साविषमास्वङ्कीर्णा शुद्धा नता या ताः वीरुद्धाद्या । स्याणुप्रकीर्णोपलसंप्रकीर्णा पार्श्वोन्नताख्या नवधेति वीथ्यः ॥ सर्ववीथिषु योवाजी दृढशिक्षासमन्वितः । तेन राजा रणे नित्यं मृगयायां मुदं व्रजेदिति ॥ अन्ये तु० उरसाल्यादयो गतिविशेषा वीथय इत्याहुः । उरसाली वरश्वा लोपृ(?)लीमध्यनामकः । आलीढः शोभनेरङ्गैः प्रत्यालीढस्तथापरः ॥ उपधेन वउत्तमपादचालोचसर्वगः । निर्दिष्टा वीथयस्त्वेताइति ॥ विध्यते नया । विथृ याचने । इगुपधात्किदितीन् । वाहुलकाद्दीर्घः ॥

वीथिका । स्त्री वीथ्याम् ॥

वीथी । स्त्री० पङ्क्तौ ॥ गृहाङ्गे । गृहपिण्डकायाम् ॥ नाट्यरूपके । वर्त्मनि ॥ विध्यतेऽनया । विथृ० । घञ् । पृषोदरादिः । गौरादिः ॥ यद्वा । विध्यते । इगुपधात्किदितीन् । वाहुलकाद्दीर्घः । कृदिकारादितिपाक्षिको ङीष् ॥

वीथ्यङ्गः । त्रि० नाटकभेदे ॥

वीध्रः । पुं० अग्नौ ॥ वायौ ॥ न० नभसि ॥ त्रि० विमले ॥ वीन्धे । ञिइन्धी दीप्तौ ॥ बाविन्धेरिति० क्रन् ॥

वीनाहः । पुं० इष्टकादिभिर्बद्धकूपमुखे ॥ विनह्यतेऽनेन० कूपमुखम् । णहबन्धने । हलश्चेति घञ् । उपसर्गस्य घञीति दीर्घः ॥

वीपा । स्त्री० विद्युति ॥

वीप्सा । स्त्री० व्याप्तुमिच्छायाम् ॥ नानार्थकशब्दाधिकरणानां क्रियागुणाभ्यां प्रयोक्तुर्युगपद्व्याप्तुमिच्छा वीप्सा ॥ शैले शैले न माणिक्यं मौक्तिकं न गजे गजे । देशे देशे न विद्वांसश्चन्दनं न वने वने ॥

वीवधः । पुं० पर्याहारे । उभयतो बद्धशिक्ये स्कन्धवाह्ये काष्ठे । विहङ्गिकायाम ॥ अध्वनि । भा

रे ॥ मोर्गे ॥ धान्यादिप्राप्तौ । वि
विधोवधोऽननंगमनंवाऽत्रामेनशा
। प्रादिभ्योधातुजस्येतिसमासोत्त
रपदलोपो ऽन्येषामपीतिदीर्घं ॥

वीवधिकः । त्रि० वार्त्तावहे ॥ वीव
धेनहरति । एकदेशविकृतस्यान
न्यत्वात्॰ विभाषाविवधादितिष्ठ
न् । षोऽ्ोषष्ठः ॥

वीरः । पुं० शूरे । विक्रान्ते ॥ वि
ष्णौ । जिने ॥ शृङ्गाराद्यष्टरसा
न्तर्गतरसविशेषे । उत्साहवर्द्धने
॥ उत्तमप्रकृतिर्वीरउत्साहस्थायि
भावकः । महेन्द्रदैवतोहेमवर्णा
ऽयंसमुदाहृतः ॥ ककुभद्रुमे ॥
त्राह्मणे ॥ भावविशेषे ॥ न०
अम्नौ ॥ तण्डुलीये ॥ वराहकन्दे
॥ लताकरञ्जे ॥ करवीरे ॥ शृङ्गा
म ॥ नडे ॥ मरिचे ॥ पुष्करमूले ॥
काञ्जिके ॥ उशीरे ॥ आरुके ॥ त्रि०
उत्तमे । श्रेष्ठे । वीराचारविशिष्टेयथा
। कुलाचाररतोवीरः कुलसङ्गीसदा
भवेत् । संविदासेवनंकुर्यात्सोमपा
नंमहेश्वरि ॥ सर्वदाकुरुतेदेविवीर
स्रोद्धतमानसः ॥ पुं० वीरयति । शूर
वीरविक्रान्तौचुरादिः । पचाद्यच् ।
यद्वा । विशेषेण॰ ईर्त्ते॰ ईरयतिवा ।
ईरगतौ । कोऽज्वा ॥ यद्वा । अज
ति । अजगतिक्षेपणयोः । स्फायि
तञ्चीतिरक् । अजेर्वी ॥ विविधानां
शत्रूणामीरयितावा ॥ यद्वा । ईरण
म् । ईरगतौकम्पनेच । भावेघञ्
। ईरः पलायनंकम्पनञ्च॰ तद्भये
परवीरप्रयुक्तंविगतमस्येतिवीरः ॥

वीरकः । पुं० करवीरे ॥

वीरकुलम् । न० ब्राह्मणानांगणे ॥

वीरगतिः । पुं० स्वर्गे ॥

वीरजयन्तिका । स्त्री० रणेवीराणां
नृत्ये ॥

वीरणम् । न० उशीरस्थतृणे । वीरत
रे । बहुमूलके । गाँडरइतिख्याते
तृणे । वीरणंपाचनंशीतंस्तम्भनंल
घुतिक्तकम् । मधुरंज्वरनुद्वान्तिम
दजित्कफपित्तहृत् ॥ तृष्णास्रविष
वीसर्पकृच्छ्रदाहव्रणापहम् ॥ कुशा
दीनांगणे । यथा । कुशः काशश्च
दर्भश्चवल्वजस्तृणंभूतृणंतथा । श्वेतदू
र्वानीलदूर्वागण्डदूर्वेतिवीरणम् ॥
विंपक्षिणमीरयति । ईरगतौकम्प
नेच । ल्युर्ज्वा ॥

वीरतरः । पुं० वीरश्रेष्ठे ॥ शरे ॥
न० वीरणे ॥ अतिशयितोवीरः ।
द्विवचनविभज्येतितरप् ॥

वीरतरुः । पुं० अर्जुनवृक्षे ॥ वीरस्था
सैतरुश्च ॥ कोकिलाक्षवृक्षे ॥ वि
ल्वान्तरवृक्षे ॥ भल्लातके ॥

वीरपर्णम् । न० सुरपर्णे ॥

वीरपत्नी । स्त्री० वीरभार्यायाम् ॥ वी
रः पतिर्यस्याइतिविग्रहे॰ नित्यंस

पत्न्यादिष्विति० पतिशब्दस्य नकारान्तादेशे० कर्त्तर्य्यद्गुनिङीप् ॥ नहि वीरपत्नीनामलभ्यं नाम किञ्चिदस्ति ॥

वीरपत्त्रा । स्त्री० विजयायाम् ॥

वीरपाणम् । न० वीराणां समयविशेषे क्रियमाणे मद्यपाने ॥ यथा । वीरपानन्तु यत्पानं वृत्ते भाविनि वा रणे ॥ वीराणां पानम् । वाभावकरणयोरिति णत्वम् ॥

वीरपुरुष: । पुं० परैरपराजिते ॥

वीरपुष्पी । स्त्री० सिन्दूरपुष्प्याम् ॥

वीरप्रमोक्ष: । पुं० तीर्थविशेषे ॥

वीरभद्र: । पुं० अश्वमेधाश्वे ॥ वीरश्रेष्ठे ॥ वीरणे ॥ दक्षाध्वरध्वंसि शिवगणविशेषे ॥

वीरभद्रकम् । न० वीरणे ॥

वीरभार्य्या । स्त्री० वीरपत्न्याम् ॥ वीरस्यभार्य्या ॥

वीरमाता । स्त्री० वीरस्वाम् ॥ वीरस्य माता ॥

वीररज: । न० सिन्दूरे ॥

वीररात्रि: । स्त्री० निशाविशेषे ॥ यथा । दीपावल्याममायां वै यक्षणं यदि सत्रवे । वीररात्रिर्महाशानीत्यागम: ॥

वीररेणु: । पुं० भीमसेने । नागवल्ली ।

वीरवती । स्त्री० मांसरोहिण्याम् ॥ वीरजनन्याम् ॥

वीरवत्सला । स्त्री० श्वश्र्वाम् ॥

वीरवल्ला । स्त्री० वीरजनन्याम् ॥

वीरविप्लावक: । पुं० शूद्रद्रव्येण होमकर्त्तरि ॥ यथा । वीरविप्लावको जुह्वन् शूद्रसमर्पितैरिति हेमचन्द्र: ॥

वीरवृक्ष: । पुं० भल्लातके ॥ ककुभद्रुमे ॥ बिल्वान्तरे ॥ देवधान्ये । अश्मरीहरे ॥ वीरश्चासौ वृक्षः दुस्पर्शत्वात् ॥

वीरव्रत: । पुं० दृढव्रते ॥ नैष्ठिके ॥

वीरसू: । स्त्री० वीरमातरि ॥ वीरं सूते । षूङ् प्राणिगर्भविमोचने । सत्सूद्विषेति क्विप् ॥

वीरसेन: । पुं० नलाभिधभूपपितरि ॥ न० आरूकवृक्षे ॥ आलुके ॥

वीरसेनज: । पुं० नलाभिधनृपे ॥

वीरहा । पुं० त्यक्तयज्ञाग्नौ । नष्टाग्नौ । प्रमादादिनायस्याग्निहोत्रिणोऽग्निर्नष्टो निर्वाण: शान्तस्तस्मिन् ॥ वीरोऽग्निस्तं हन्ति । हन० । क्विप् । हरौ ॥ वीरान् असुरभटान् ० हिरण्यकशिपुप्रभृतीन् हन्तीति तथा ॥

वीरा । स्त्री० सुरायाम् । मदिरायाम् ॥ क्षीरकाकोल्याम् ॥ तामलक्याम् ॥ एलवालुके ॥ पतिपुत्रवत्याम् । पत्या सुतेन च युक्तायाम् ॥ रम्भायाम् ॥ विदार्य्याम् ॥ विदारीस्थाने गम्भारीति पाठान्तरम् ॥

काम्पील्याम् ॥ महाव्रतावर्याम् ॥ गृहकन्यायाम् ॥ ब्राह्म्याम् । य तिविषायाम् ॥ शिंशपावृक्षे ॥

वीराध्वा । पुं॰ मृत्यां स्मृति ॥ वीराणांगन्तव्यमध्वनि मार्गो॰गो त्र॰ब्राह्मणा॰ कल्यादावर्यं॰कण्टकबद्धि कसर्पसिंहव्याघ्रायभीतानामध्वा ॥

वीरारुकम् । न॰ आरुके ॥

वीराशंसनम् । न॰ अतिभयप्रदायां युद्धभूमौ ॥ साभीराशंसनं युद्धभू मिर्या तभयप्रदा ॥ वीरा : शंस्यन्तेऽ त्र । आङ् : शसित्रिच्छायाम् । ल्युट् ॥

वीराश्रम : । पुं॰ तीर्थविशेषे ॥ यत्र कार्त्तिकेयस्तिष्ठति ॥

वीरासनम् । न॰ रात्रौ खड्गहस्तस्य स्थितौ जागरणे ॥ ऊर्ध्वावस्थाने ॥ वीराणामासनम् ॥ योगिनामासन विशेषे ॥ तदुक्तं योगशास्त्रे वसिष्ठे न । एकं पादमथैकस्मिन् विन्यसे दूरुसंस्थितम् । इतरस्मिंस्तथावा हुं वीरासनमिदं स्मृतम् । इति ॥ अपिच । एकं पादमधः कृत्वावि न्यस्योरौ तथेतरम् । ऋजुकायोवि शेन्मन्त्री वीरासनमितीरितमिति तन्त्रशास्त्रम् ॥ श्रीभागवतेपि । कृत्वो रौ दक्षिणं सव्यं पादपद्मञ्चजानुनि । बाहुप्रकोष्ठे क्षमालामासीनं तर्कमु द्रयेति ॥

वीरिणी । स्त्री॰ दक्षप्रजापतेः प त्न्याम् ॥

वीरुत् । स्त्री॰ शाखापत्रप्रचयवत्यां ल तायाम् । गुल्मिन्याम् । उपले ॥ विटपे ॥ विरुणद्धि । रुधिर्॰ । क्विप् । अन्येषामपीतिदीर्घ : ॥

वीरुधा । स्त्री॰ वीरुधि ॥ भागुरिम तेनटाप् ॥

वीरेश : । पुं॰ शिवे ॥

वीरेश्वर : । पुं॰ सदाशिवे ॥ वीरा णामीश्वर : ॥

वीरोज्झः । पुं॰ होमाकर्त्तरि ॥ य था । अभ्युदिताभिनिर्मुक्तौ वीरो ज्झोनजुहोतिय : ॥ इतिहेमच न्द्र : ॥

वीरोपजीविक : । पुं॰ जीविकार्थम ग्निहोत्रिणि ॥ यथा । अग्निहोत्र फलाद्यर्थापरो वीरोपजीविकइति हेमचन्द्र : ॥

वीर्य्यम् । न॰ शुक्रे । रेतसि ॥ य था । हरितालं हरेर्वीर्यं लक्ष्मीवी र्यंमन : शिला । पारदं शिववीर्यं स्यात् गन्धकं पार्वतीरज : ॥ इति ॥ प्रभावे ॥ तेजसि ॥ इन्द्रियसाम र्थ्ये ॥ अतिशयशक्तिभाज्यस्मादि ॥ शक्तौ ॥ साचपञ्चव्यादीनां य : सा रभागस्तद्विशयरूपा । साद्विवि धाचिन्त्याचिन्त्यक्रियाहेतुत्वेन । तत्रचिन्त्यक्रियाहेतुर्यद्द्रव्यरसादीनां

स्वस्वकर्म्मविस्वभावसिद्धाशक्तिः ।
अचिन्त्यक्रियाहेतुस्वप्रभावापरपर्या
यः द्रव्याधारसाद्यनुरूपकार्यकर
णशक्तिः । उक्तञ्च । भूतप्रभावा
तिशयोद्द्रव्ये पाकेरसेस्थितः । चि
न्त्याऽचिन्त्यक्रियाहेतुर्वीर्यंधन्वन्तरे-
र्मतमिति ॥ अस्याऽवधिमाह । या
वत्संस्थक्षायवीर्यमखिलंचूर्णंस्वप
चयंषण्मासान्घृतमोदकौसहगु
डौमासद्वयंगुग्गुलौ । सिद्धानांर
सभस्मनांसुविपुलंवीर्यंस्ववर्षद्वयम्-
क्षिप्तद्रव्यविवर्जितंगुणपरंतैलंपुरा
णंभवेदितिनारायणदासकृतापरि
भाषा ॥ वीरे । अक्लीबे साधु । त
त्रसाधुरितियत् ॥ यद्वा । वीर्यते
ऽनेन । वीरविक्रान्तौ । अचोयत्
। अघ्न्यादिर्वा ॥ बले ॥

वीर्यवान् । त्रि० मांसले । वीर्यम
स्यस्यास्मिन्वा । मतुप् ।

वीर्य्यवृद्धिकरम् । न० वृष्ये । वाजी
करणे । शुक्रवृद्धिकारकौषधादौ ॥

वीर्य्या । स्त्री० अतिशयशक्तौ ॥

वीसर्प्प : । पुं० विसर्पे ॥

वीहार : । पुं० बुद्धमन्दिरे । महा
लये ।

वुक : । पुं० बकपादपे । शिवमल्
ल्याम् ॥ वाति । वा० बाहुल
कात्कुक । कुनोकारस्योत्वं वा ॥

वृंहण : । पुं० यावकाख्ये० खाद्य

भेदे ॥ संयावोवृंहणोगुरुः ॥ त्रि०
पुष्टिकारके ॥

वृंहितम् । न० करिगर्जिते ॥ वृह
णम् । वृद्धिध्वनौ । नपुंसके
तिक्तः ।

वृक : । काके । ईहामृगे । हुंडार०
द्व० भेड़िया० द्व० अभाषा० प्र०
॥ वर्कते । वृकआदाने । इगुप
धेतिकः । यद्वा । वृणोति । वृ
अ० स्वभ्रुषिमुषिभ्यः कक् ॥
शृगाले ॥ कृत्रिमधूपे ॥

वृकदंश : । पुं० कुक्कुरे ॥ वृकान्
दंशयति । दंश० । कर्मण्यण् ।

वृकधूप : । पुं० नानासुगन्धिद्रव्यकृ
तधूपविशेषे । कृत्रिमधूपे ॥ सर
लद्रवे । वृषधूपे । श्रीवेष्टे ॥ वृक
इवधूप : ॥ धूप्यतेऽनेन । धूप
सन्तापे । घञ् । वृकनामाधूप :
शाकपार्थिवादिर्वा ॥

वृकधूर्त्त : । पुं० शृगाले ॥

वृका । स्त्री० अम्बष्ठायाम् । पाठा
याम् ॥

वृकाणी । स्त्री० त्रिवृति ॥

वृकाराति : । पुं० कुक्कुरे ॥

वृकारि : । पुं० कुक्कुरे ॥

वृकी । स्त्री० पाठायाम् ॥

वृकोदर : । पुं० भीमाख्यपाण्डवे ।
भीमसेने ॥ यस्यतीक्ष्णो वृकोनाम
जठरेहव्यवाहन : । मयोदत्त : स

धर्मात्मातेनचासौवृक्षोदर: ॥ इ॰ मत्स्यपु॰ ॥ वृक्षवदुदरंयस्यस : ॥

वृक्ण : । चि॰ छिन्ने । वृश्च्यतेस्म । ओव्रश्चूछेदने । क्त : ॥

वृक्ष : । पुं॰ महीरुहे । शाखिनि । विटपिनि । पादपे ॥ पुष्पिता : फलिनश्चैववृक्षास्तूभयत: स्मृता : ॥ वृक्षतिवृक्षवरणे । पचाद्यच् । यद्वा । वृश्च्यते । ओव्रश्चू॰ । स्नुवृश्चिकृत्युषिभ्य : किदितिस : ।

वृक्षक : । पुं॰ कुटजवृक्षे ॥ ह्रस्वोवृक्ष : । ह्रस्वइतिक : ॥

वृक्षखण्ड : । पुं॰ वृक्षाणांसमूहे ॥ वृक्षादिभ्य : खण्ड : ॥

वृक्षचर : । पुं॰ वानरे ॥

वृक्षधूप : । पुं॰ श्रीवासे । सरलद्रवे ॥

वृक्षनाथ : । पुं॰ वटवृक्षे ॥

वृक्षपञ्चकम् । न॰ क्षीरिवृक्षपञ्चके ॥

वृक्षपाक : । पुं॰ वटद्रुमे ॥

वृक्षभक्षा । स्त्री॰ वन्दायाम् ॥

वृक्षभवनम् । न॰ वृक्षकोटरे ।

वृक्षभित्॰द् । स्त्री॰ वृक्षभेदिनि । वास्याम् ॥ वृक्षंभिनत्ति । भिदिर्॰ । क्विप् ॥

वृक्षभेदी पुं॰ कुठारविशेषे । वृक्षादने ॥ वृक्षंभेत्तुंशीलमस्य । भिदिर् विदारणे । सुप्यजातौणिनि : ॥

वृक्षमर्कटिका । स्त्री॰ इतिख्यातिप्रसिद्धपशुमृगजातौ ॥

वृक्षमार्जार : । पुं॰ वृक्षविडाले । गलहरी॰टिकरी॰इ॰भा॰ ॥

वृक्षरुह् : । पुं॰ जलवेतसे ॥

वृक्षराज : । पुं॰ अम्लवेतसे ॥

वृक्षरुहा । स्त्री॰ वन्दायाम् ॥ वृक्षेरोहतिरुहेर्मूलविभुजादित्वात्क : ॥ अमृतसुवायाम् ॥

वृक्षवाटिका । स्त्री॰ अमात्यस्य॰गणिकायाश्च॰गेहस्योपवने ॥ वक्ष्यते । वटवेष्टने । संज्ञायामितिण्वुल् । टाप् । प्रत्ययस्थादितीत्वम् । वृक्षाणांवाटिका ॥

वृक्षादन : । पुं॰ वृक्षभेदिनि॰कुठारविशेषे ॥ वृक्षमत्ति । अद॰ । कृत्यल्युटइतिल्युट् । अलदरे ॥ मधुच्छदे । पियाले ॥

वृक्षादनी । स्त्री॰ वन्दायाम् । विदारीकन्दे ॥ विदारीगन्धिकौषधौ ॥ टित्त्वान्ङीप् ॥

वृक्षादिरुहकम् ।) न॰ आलिङ्गने ॥
वृक्षादिरूढकम् ।)

वृक्षामय : । पुं॰ लाक्षायाम् ॥

वृक्षाम्ल : । पुं॰ आम्रातके ॥ न॰शाकाम्ले । तिन्तिडीके । चुक्रे ॥ अस्यगुणा : । वृक्षाम्लमाममम्लोष्णंवातघ्नंकफपित्तलम् । पक्वन्तुगुरुसङ्ग्राहिकटुकंतुवरंलघु । अम्लोष्णं

रोचनं रूक्षं दीपनं कफवातकृत् । तृष्णार्शोग्रहणीगुल्मशूलहृद्रोगजन्तुजित् ॥ वृक्षस्याम्लम् ॥ वृक्षेष्वम्लो वा ॥

वृक्षायुर्वेदः । पुं० महीरुहाणां चिकित्सायाम् । स च शार्ङ्गधरस्य ५३ अध्याये । यथा । तत्रादौ प्रयोजनप्रदर्शनार्थमाह । प्रान्तच्छायाविनिर्मुक्ता न मनोज्ञा जलाशयाः । तस्मादथो जलप्रान्तेष्वारामान् विनिवेशयेत् ॥ १ ॥ तत्र भूलक्षणम् । मृद्वी भूः सर्ववृक्षाणां हिता तस्यां तिलान् वपेत् । पुष्पितांस्तांश्च मृद्नीयात् तत्कर्म प्रथमं भुवः ॥ प्रथमरोप्यवृक्षाः । अरिष्टाशोकपुन्नागशिरीषाः सप्रियङ्गवः । मङ्गल्याः पूर्वमारामे रोपणीया गृहेषु वा ॥ ३ ॥ काण्डरोप्याणां विधानमाह । पनसाशोककदलीजम्बूबकुलदाडिमाः । द्राक्षापालीवताश्चैव बीजपूरातिमुक्तकाः ॥ एते द्रुमाः काण्डरोप्या गोमयेन प्रलेपिताः । मूलोच्छेदेऽथवा स्कन्धे रोपणीयास्ततः परम् ॥ ५ ॥ कालनियमार्थमाह । अजातशाखान् शिशिरे जातशाखान् हिमागमे । वर्षागमे च सुस्कन्धान् यथादिक्स्थान् प्ररोपयेत् ॥ घृतोशीरतिलक्षौद्रविडङ्गक्षीरगोमयैः । आमूलस्कन्धलिप्तानां सङ्क्रामणविरोपणम् ॥ ७ ॥ रोपणविधानम् । शुचिर्भूत्वा तरोः पूजां कृत्वा स्नानानुलेपनैः । रोपयेद्रोपितश्चैव पत्रैस्तैरेव जायते ॥ ८ ॥ रोपितानां सेकविधानम् । सायं प्रातश्च घर्मर्त्तौ शीतकाले दिनान्तरे । वर्षासु च भुवः शोषे सेक्तव्या रोपितद्रुमाः ॥ ९ ॥ अनूपजानाह । जम्बूवेतसवानीरकदम्बोदुम्बरार्ज्जुनाः । बीजपूरकमृद्वीकालकुचाश्च सदाडिमाः ॥ वञ्जुलो नक्तमालश्च तिलकः पनसस्तथा । तिमिरोऽम्रातकश्चेति षोडशानूपजाः स्मृताः ॥ ११ ॥ रोपितानां वृक्षाणां किम्प्रमाणमन्तरं कार्यमित्याह । उत्तमं विंशतिर्हस्ता मध्यमं षोडशान्तरम् । स्थानात् स्थानान्तरं कार्यं वृक्षाणां द्वादशावरम् ॥ १२ ॥ किमर्थमन्तरं कार्यं तदाह । अभ्यासजातास्तरवः संस्पृशन्तः परस्परम् । मिश्रैर्मूलैश्च न फलं सम्यग् यच्छन्ति पीडिताः ॥ २३ ॥ तेषां रोगज्ञानमाह । शीतवातातपै रोगो जायते पाण्डुपत्रता । अवृद्धिश्च प्रवालानां शाखाशोषो रसस्रुतिः ॥ १४ ॥ एतेषां चिकित्सामाह । चिकित्सितमथैतेषां शस्त्रेणादौ विशोधनम् ॥ विडङ्गघृतपङ्काक्तान् सेचयेत् क्षीरवारिणा ॥ फलनाशे चिकित्सितमाह ॥ फल

नाषिकुलत्थैश्च माषैर्मुद्गैस्तिलैर्यवैः। शृतशीतपयःसेकः फलपुष्पसमृद्धये ॥ १९ ॥ वृद्ध्यर्थप्रयोगः। आविकाजशकृच्चूर्णस्याढके द्वे तिलाढकम्। सक्तुप्रस्थो जलद्रोणो गोमांसतुलया सह ॥ सप्तरात्रोषितैरेतैः सेकः कार्यो वनस्पतेः। वल्लीगुल्मलतानाञ्च फलपुष्पाय सर्वदा ॥ १८ ॥ अथ बीजानां वापनविधानम्। वासराणि दश दुग्धभावितं बीजमाज्ययुतहस्तयोजितम्। गोमयेन बहुशो विरूक्षितं क्रौडमार्गपिशितैश्च धूपितम् ॥ मांससूकरवसासमन्वितं रोपितञ्च परिकल्पितावनौ। क्षीरसंयुतजलावसेचितं जायते कुसुमयुक्तमेव तत् ॥ २० ॥ अथ तिन्तिडीविधानम्। तिन्तिडी ह्यपि करोति वल्लरीं व्रीहिमाषतिलचूर्णसक्तुभिः। पूतिमांससहितैश्च सेचिता धूपिता च सततं हरिद्रया ॥ २१ ॥ अथ कपित्थबीजरोपणम्। कपित्थवल्लीकरणाय मूलान्यास्फोतधात्रीधववासिकानाम्। पलाशिनीवेतससूर्यवल्लीश्यामातिमुक्तैः सहिताष्टमूली ॥ क्षीरे शृते चाप्यनया सुशीते तालं शतं स्थाप्य कपित्थबीजम्। दिने दिने शोषितमर्कपादैर्मासं विधिस्त्वेष ततोऽधिरोप्यम् ॥ हस्तायतं तद्द्विगुणं गभीरं खात्वावटं प्रोक्तजलावपूर्णम्। शुष्कं प्रदग्धं मधुसर्पिषा तं प्रलेपयेद्भस्मसमन्वितेन ॥ चूर्णीकृतैर्माषतिलैर्यवैश्च प्रपूरयेन्मृत्तिकयान्तरस्थैः। मत्स्यामिषाम्भःसहितञ्च हन्याद्यावद्घनत्वं समुपागतं तत् ॥ उप्तञ्च बीजं चतुरङ्गुलाधो मत्स्याम्भसा मांसजलैश्च सिक्तम्। वल्ली भवत्याशु शुभप्रवाला विस्मापनी मण्डपमावृणोति ॥ २९ ॥ अथान्येषां रोपणम्। शतशोऽङ्कोठसम्भूतफलकल्केन भावितम्। एतत्तैलेन वा बीजं श्लेष्मातकफलेन वा ॥ वापितं करकाम्भश्च मृदितं तत्क्षणाज्जन्म फलभारान्विता शाखा भवतीति किमद्भुतम् ॥ २८ ॥ श्लेष्मातकरोपणम्। श्लेष्मातकस्य बीजानि निष्कुलीकृत्य भावयेत्प्राज्ञः। अङ्कोल्लविज्जलाद्भिश्छायायां सप्तकृत्वैवं ॥ माहिषगोमयपिष्टान्यस्य करीषे च तानि निक्षिप्य। करकाजलमृद्योगे न्युप्तान्यह्ना फलकराणि ॥ वृक्षाणां रोपणनक्षत्राणि। ध्रुवमृदुमूलविशाखागुरुभं श्रवणं तथाश्विनं हस्तम्। उक्तानि दिव्यदृग्भिः पादपसंरोपणे भानि ॥ ३१ ॥ इति ॥

वृक्षरुहा। स्त्री॰ वृक्षरुहायाम्। वृक्षमारीहतीति तथा ॥

वृक्षारोपकः। त्रि॰ वृक्षाणामारोप-

पितरि ॥

वृक्षार्द्रा । स्त्री॰ मत्स्यमेदायाम् ॥

वृक्षालय : । पुं॰ खगे । पक्षिणि ॥

वृक्षाश्रयी । पुं॰ क्षुद्रोलूके ॥

वृक्षेशय : । पुं॰ विहगे ॥ वृक्षे शेते । शीङ्॰ । अधिकरणे शेतेरित्यच् । शयवासवासिष्वकालादित्यलुक् ॥

वृक्षोत्पल : । पुं॰ कर्णिकारे ॥

वृजन : । पुं॰ केशे ॥ न॰पापे ॥ आकाशे ॥ वृणक्ति॰वृज्यते वा । वृजीवर्जने । कृपृवृजीत्यादिनाक्यु : ॥

वृजिन : । पुं॰ केशे ॥ न॰कल्मषे । अघे ॥ रक्तचर्मणि ॥ कर्मजाले । धर्माधर्मरूपे संसारफलके कर्म्मणि ॥ पापवत्पुण्यस्याप्यनिष्टफलत्वात् ॥ त्रि॰कुटिले । वक्रे ॥ वृज्यते । वृजी॰ । वृजे : किच्चेति॰इनच् ॥

वृजिनच्छित्॰द् । त्रि॰ दु:खहन्तरि ॥

वृत : । त्रि॰ वृत्ते । व्यावृत्ते । कृतवरणे ॥ स्वयंवरादौ स्वीकृतवरादौ ॥ व्रियते स्म । वृञ् वरणे । क्त : ॥ आवृते ॥

वृतकौशा । स्त्री॰ देवदाल्याम् ॥

वृतपत्रा । स्त्री॰ पुत्रदात्यामोषधौ ॥

वृतपुत्रा स्त्री॰ वृतपत्रायाम् ॥

वृति : । स्त्री॰ वरणे । वेष्टने । वाटे । वाड इति ग्रामीणप्रसिद्धविषयेकण्टकशाखावरणे ॥ वरणम् । वृञ्॰ । क्तिन् ॥ गोपने ॥

वृतिङ्कर : । पुं॰ विकङ्कतवृक्षे ॥ त्रि॰ वृतिकारके ॥

वृतिस्थ : । पुं॰ सरटे ॥ त्रि॰वृतौ तिष्ठति ॥

वृत्त : । पुं॰ कूर्मे पुं॰न॰पद्ये यथा । पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा । वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत् ॥ वृत्ते ॥ चारित्रे ॥ वेदबोधिताचारस्य परिपालने ॥ छन्दसि ॥ कृतिच्छन्दोभेदे ॥ यथा । वृत्तमीदृशन्तु नाम तो रजो रजो रजो गुरुर्लघुश्च । यथा । चित्रवृत्तलीलया निसर्गरम्यदेहरूपविभ्रमेण राजमानसद्वयो विलाससम्पदाकलाकुतूहलेन । य : समन्त्र जाङ्गनाजनै : सुराङ्गनानिभै : सुखं समेत्य विष्णुरुल्लसच्चित्तपङ्ककोषषट्पद : समेसदास्तु ॥ त्रि॰ अधीते ॥ गौरध्ययने वृत्तमिति निपातित : । वृत्तं व्याकरणम्॰अधीतमित्यर्थ : ॥ अतीते ॥ वर्त्तुले ॥ वृते ॥ मृते ॥ दृढे ॥ वर्त्तते स्म॰वृत्यते स्म वा । वृतु वर्त्तने । गत्यर्थेति क्त : ॥ वर्त्तनम् । वृतु वर्त्तने वरणे वा । भावे क्त : ॥

वृत्तकम् । न॰ गद्यप्रभेदे ॥ तल्लक्षणोदाहरणे यथा । अकठोराक्षरं स्वल्पसमासं वृत्तकं मतम् ॥ यथा । सहि त्रयाणामेव जगतां गति : परमपुरुष : पुरुषोत्तमो दृप्तदानवभरेणभङ्गु

राक्षीमवनिमवलोक्यकरुणार्द्रहृद
यस्तस्याभारमवतारयितुंरामकृष्ण
स्वरूपेणांशतोयदुवंशेऽवततारयस्तुप्र
सङ्गेनापिस्मृतोवागृहीतनामापुंसां
संसारपारमवलोकयति ॥
वृत्तकर्कटिका । स्त्री० वृत्तकर्कट्याम् ॥
वृत्तकर्कटी । स्त्री० वृत्तैर्वारौ । षड्भु
जायाम् ॥
वृत्तगन्धि । न० गद्यप्रभेदे ॥ तल्लक्षणं
यथा । भवेदुत्कलिकाप्रायंसमासा
व्यंदृढाक्षरम् । वृत्तैकदेशसम्बन्धा
द्वृत्तगन्धिपुनः स्मृतम् । तदुदा
हरणंयथा । जयजयजयजनार्द्दनसु
कृतिमनस्तडागविकस्वरचरणपद्मप
द्मपत्त्रनयनपद्मापद्मिनीविनोदराज
हंसाभभास्वरयशःपटलपरिपूरि
तभुवनकुहर । हरकमलासनादिवृ
न्दारकवृन्दवन्दनीयपादारविन्दद्वन्द्व
द्वन्द्वनिर्मुक्तयोगीन्द्रहृदयमन्दिराावि
ष्कृतनिरञ्जनज्योतिःस्वरूपनीर
द्रूपविरूपचनायनाथजगन्नाथमा
ममवधिभवदुःखव्याकुलंरक्षरक्ष
च ॥
वृत्तगुण्ड : । पुं० तृणविशेषे । दीर्घ
नाले । जलाश्रये ॥ अयंद्विधा । ल
घुस्थूलभेदात् । तत्रस्थूलोऽधिकगु
णः ॥
वृत्ततण्डुल : । पुं० यावनाले ॥
वृत्तत : । अ० वृत्तेनेत्यर्थे ॥

वृत्तनिष्पावी । स्त्री० वृत्तनिष्पाविकायाा
म् । नखनिष्पावे ॥
वृत्तपर्णी । स्त्री० महाश्रावणिकाया
म् ॥ पाठायाम् ॥
वृत्तपुष्प : । पुं० कदम्बे ॥ शिरीषे ॥
वानीरे ॥ कुब्जके ॥ मुद्गरे ॥
वृत्तफल : । पुं० दाडिमे ॥ बदरे ॥
न० मरिचे ॥
वृत्तफला । स्त्री० आमलक्याम् ॥ वा
र्त्ताक्याम् ॥ शशाण्ड्ल्याम् ॥
वृत्तमल्लिका । स्त्री० श्वेतार्के । मोदि
न्याम् ॥
वृत्तबीज : । पुं० भिण्डायाम् ॥
वृत्तबीजका । स्त्री० पाण्डुरफल्याम् ॥
वृत्तबीजा । स्त्री० आढक्याम् ॥
वृत्तसम्पन्न : । त्रि० सदाचारवति ॥
वृत्ता । स्त्री० भिञ्झिरिष्टायाम् ॥ प्रि
यङ्गौ । रेणुकायाम् ॥ मांसरोहि
ण्याम् ॥
वृत्ताध्ययनर्द्धि : । स्त्री० ब्रह्मवर्चसे ॥
वृत्तमाचारः०अध्ययनस्यगुरुमुखा
द्ग्रहणंतयोर्ऋद्धिः ॥
वृत्तानन्दम् । न० मात्रावृत्तान्तरे ॥
तल्लक्षणोदाहरणंयथा । एकादश
विश्रामि०सप्तविरामि०यदिवृत्तात्र
संभवति । छन्दोवृत्तानन्दमिहमा
नन्दकारिफणिनृपतिरितिवदति ॥
यथा । मधुरस्मितनवशालियदिव
नमालिवदनकमलमवलोकये । च

वृत्ति :

धरसुधारसधामपरमभिराममवलम्बे जीवितमयि ॥

वृत्तान्तः । पुं॰ वार्तायाम् । प्रवृत्तौ । उदन्ते । समाचारे ॥ यथा । अतीतजन्मवृत्तान्तं बाल्ये प्रायेण पश्यति । ऐहिकं यौवनेऽन्ते तु तपसीभाविवोच्यते ॥ वार्ताजनश्रुतिराख्यायिकाचेतिस्वामी ॥ प्रभेदे । विशेषे ॥ प्रक्रियायाम् ॥ कार्त्स्न्ये । प्रस्तावे । अवसरे ॥ वृत्तोऽनुवर्तनीयोगवेषणीयोऽन्तः समाप्तिर्यस्य । वृत्तोन्तोऽस्य॰ वृत्तस्यान्तइति वा । भावे ॥

वृत्तावृत्तम् । न॰ मात्रावृत्तान्तरे ॥ तस्यलक्षणोदाहरणे यथा । इह सप्तचतुष्कलगणनिर्मितपदं विलघुविरामं भवतियदि । नागाधिपपिङ्गलभणितसुमङ्गलवृत्तावृत्तमिदं हिपदि ॥ यथा । हृदितावदनेकः स्फुरतिविवेकस्तपसि मनोनियतं भवति । यावन्नवहरिणीनयनातरुणीस्मितसुभगं नविलोकयति ॥

वृत्तिः । स्त्री॰ व्याख्यानग्रन्थविशेषे । विवरणे ॥ आजीवे । वर्त्तने । कृष्यादिजीवने । अनुष्ठेयायांजीविकायाम् ॥ कैशिक्यादौ ॥ यथा । भारतीसात्वतीचैवकैशिक्यारभटीतथा । चतस्रोवृत्तयश्चैतायासुनाट्यंप्रतिष्ठितमितिभरतः ॥ शृङ्-

वृत्ति :

गारेकैशिकीवीरेसात्वत्यारभटीपुनः । रसेरौद्रे चबीभत्से वृत्तिसः वैचभारती । चतस्रोवृत्तयोह्येताः सर्वनाट्यस्यमातृकाः ॥ प्रवर्तने ॥ विधृतौ ॥ व्यवहारे ॥ वर्त्ततेऽनया । वृतुवर्त्तने । स्त्रियांक्तिन् ॥ प्रमाणविपर्ययविकल्पनिद्रास्मृतिषु पञ्चविधासु ॥ लज्जादिवृत्तीनामपिपञ्चस्वेवान्तर्भावः ॥ अर्थसन्निकृष्टेन्द्रिये ॥ इन्द्रियाणांव्यापारे । विषयाकारवृत्तिपरिणामे ॥ वृत्तीनामानन्त्यादियत्तांसूचयतिपतञ्जलिः । वृत्तयः पञ्चतय्यक्लिष्टाअक्लिष्टाइति । वृत्तयश्चित्तस्यपरिणामविशेषाः । रागद्वेषादिक्लेशरूपाः॰ आसुरवृत्तयः क्लिष्टाः । रागादिरहितादैववृत्तयोऽक्लिष्टाः । यद्यपिपञ्चस्वेवक्लिष्टानामक्लिष्टानामन्तर्भावः॰ तथापिक्लिष्टाएवनिरोद्धव्याइतिमन्दबुद्धिं धारयितुंताभिः सहाक्लिष्टाउदाहृताः । नामधेयलक्षणाभ्यांवृत्तीर्विशदयितुंसूत्रषट्कमाह । प्रमाणविपर्ययविकल्पनिद्रास्मृतयः । प्रत्यक्षानुमानागमाः प्रमाणानि । विपर्ययोमिथ्याज्ञानमतद्रूपप्रतिष्ठम् । अतद्रूपप्रतिष्ठम्॰ तस्यार्थस्ययद्रूपंमतस्मिन्रूपेप्रतिष्ठति॰ तस्यार्थस्ययत्पारमार्थिकंरूपंनतत्प्रतिभा

सयतीतियावत् । संशयोऽप्यतद्रूपप्रतिष्ठत्वान्मिथ्याज्ञानम् । यथा स्थाणुर्वा पुरुषो वेति । शब्दज्ञानानुपाती बस्तुशून्यो बिकल्पः । अभावप्रत्ययालम्बना वृत्तिर्निद्रा । अनुभूतबिषयासम्प्रमोषः स्मृतिः ॥ तत्र प्रमाणबिपर्ययबिकल्पा जाग्रदबस्था । त एव यदानुभवबलात् प्रत्यक्षायमाणाः सा स्वप्नः । निद्रा त्वसंवेद्यमानबिषया । स्मृतिश्च प्रमाणबिपर्ययबिकल्पनिद्रानिमित्तेति व्याख्याता वृत्तयः । कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपासु पञ्चसु । बिच्छिन्नस्य प्रतिबिधाने ॥ अप्रतिबन्धे ।

वृत्तिम्लानः । त्रि० वृत्तिक्षीणे ॥

वृत्तिज्ञानम् । न० घटाकारज्ञाने ॥ यद्यपि वृत्तिज्ञानमपि स्वरूपज्ञानमेव । तथापि । अन्तःकरणदोषैस्तत्तथा तथा भातीति तयोर्भेदः ॥

वृत्तिनिरोधः । पुं० वृत्तीनां प्रतिहनने ॥ तत्साधनं सूत्रयति भगवान् पतञ्जलिः । अभ्यासवैराग्याभ्यां तन्निरोधः । इति । प्रकाशप्रवृत्तिनियमरूपाणां चित्तवृत्तीनामभ्यासवैराग्याभ्यां प्रतिहननं स निरोधः । यथा तीव्रवेगोपेतं नदीप्रवाहं सेतुबन्धनेन निवार्य कुल्याप्रणयनेन क्षेत्राभिमुखं तिर्यक्प्रवाहान्तरमुत्पाद्यते । तथा वैराग्येण चित्तनद्या विषयप्रवाहं निवार्य । समाध्यभ्यासेन । प्रशान्तप्रवाहः सम्पाद्यते । एतदुक्तं भवति । तासां विनिवृत्तबाह्याभिनिवेशानामन्तर्मुखतया स्वकारण एव चित्ते शक्तिरूपतयावस्थानम् । तत्र विषयदोषदर्शनजेन वैराग्येण । तद्वैमुख्यमुत्पाद्यते । अभ्यासेन च सुखजनकशान्तप्रत्ययप्रवाहप्रदर्शनद्वारेण दृढं स्थैर्यमुत्पाद्यत इत्याभ्यां भवति चित्तवृत्तिनिरोधः ॥

वृत्तिभेदः । पुं० प्रवृत्तिनिमित्तभेदे ॥

वृत्तिमान् । त्रि० वार्त्ते । वृत्तिरस्यास्मिन् वास्ति । मतुप् ॥

वृत्तिविषयः । पुं० वृत्तिव्याप्ये ॥ आत्मनि ॥

वृत्तिविस्मरणम् । न० ध्यातृध्येयाकारवृत्तिशून्ये । द्वैताननुसन्धाने ॥

वृत्तिव्याप्यत्वम् । न० विशिष्टशब्दादिप्रमाणबलात् । तत्तद्विषयाकाराधीसमुन्मेषाभिव्यक्तत्वे ॥ ब्रह्मज्ञाननाशायवृत्तिव्याप्तिरपेक्षिता ॥

वृत्यः । त्रि० वरणीये ॥ वरणं । क्रियते वा । वृञ् वरणे । एतिस्तुशास्वृदृजुषः क्यप् ॥

वृत्त्यनुप्रासः । पुं० शब्दालङ्कारान्तरे । यथा । एकस्याप्यसकृत्परः । ए

कस्य॰ अपिशब्दादनेकव्यञ्जनस्य॰ द्वि वंर्दुक्तस्त्वोवासोहष्य' इत्यनुप्रासः । यथा । युधिष्ठिरंहैतवनैवनेचरद्र स्यच॰ द्वयोः स्वरव्यञ्जनसमुदाययो रेकदैवावृत्तिः ॥

वृत्रः । पुं॰ ध्वान्ते । अन्धकारे ॥ अ रौ । शत्रौ ॥ त्वष्टुः पुत्रे दानवविशेषे ॥ वृजिनात् आतुमधुनायस्मा च्छत्तोसिपुत्रक । तस्माद्वृत्रइति ख्यातंतवनामभविष्यति ॥ घने ॥ शैलविशेषे ॥ वासवे । इन्द्रे ॥ वृणोति । वृञ्॰ । बाहुलकात् त्रः ॥ वर्त्तते । वृतुवर्त्तने । स्फायित श्चीत्यादिनारक् वा ॥

वृत्रद्विट् । पुं॰ इन्द्रे ॥ वृत्रं द्वेष्टि । द्विषअप्रीतौ । सत्सूद्विषेत्यादिना क्विप् ॥

वृत्रभोजनः । पुं॰ गण्डीरे । समष्ठि लायाम् । समठ॰ इ॰ गौ॰ दे॰ भा॰ ॥

वृत्रहा । पुं॰ इन्द्रे ॥ वृत्रं हतवान् । ब्रह्मभ्रूणवृत्रेषुक्विप् ॥

वृत्रारिः । पुं॰ शक्रे । इन्द्रे ॥

वृथा । अ॰ वन्ध्ये । मुधा । अविधौ । निरर्थके । यथा । वृथावृष्टिः समुद्रस्यतृप्तस्यभोजनंवृथा । वृथादानं समर्थस्यनीचस्यसुकृतंवृथा ॥ निष्कारणे ॥

वृथाजन्म । न॰ निरर्थकजनने ॥ *

वृथादानम् । न॰ परिहासनिमित्त पण्डादिभ्योदेये ॥ धूर्त्तेवन्दिनिमल्ले चकुवैद्ये कितवेशठे । चारचारणचौरेषुदत्तंभवतिनिष्फलम् ॥

वृथामांसम् । न॰ देवतादिकमनुद्दिश्यकृतेमांसे ॥ तद्भक्षणे प्रं तत्त्वं भवतीत्युक्तं वह्निपुराणे । यथा । वृथाव्रेतावृथामांसोवृथावादोवृथामतिः । निन्दकोद्विजदेवानांसप्रेताजायतेनरइति ॥

वृद्धः । पुं॰ वृद्धदारके ॥ न॰ गन्धद्रव्यविशेषे । शैलजे । शैलेये । अश्मपुष्पे । रन्दूच॰ छरीला॰ इत्यादिभाषाप्रसिद्धे ॥ रूढे ॥ त्रि॰ जीर्णे । प्रवयसि । स्थविरे । जीने । गतयौवने ॥ सप्ततिवर्षानन्तरंवृद्धउच्यते । यथा । वृद्धोजनोदुःखशतानिभुङ्क्ते । इ॰ ॥ नतेनवृद्धोभवतियेनास्यपलितंशिरः । योवैयुवाप्यधीयानस्तं देवाः स्थविरंविदुरितिमनुः । वृद्धप्रत्युत्थायाभिवादनंकार्य्यम् ॥ ज्ञे । पण्डिते ॥ वर्द्धतेस्म । वृधुवृद्धौ । गत्यर्थेतिक्तः । यस्यविभाषितिनेट् ॥

वृद्धकाकः । पुं॰ काकोले । द्रोणकाके ॥

वृद्धगङ्गा । स्त्री॰ कामरूपपीठस्थनदीविशेषे ॥

वृद्धत्वम् । न॰ स्थाविरे । वार्द्धक्ये ॥ वृद्धस्यभावः । तस्यभावस्त्वतलौ ॥

वृद्धदारकः । पुं० छागलान्त्र्याम् । विधारा० इ० भा ॥ वृद्धो दारको ऽस्मात् ॥ वृद्धत्वं दारयति वा । ण्वुल् ॥

वृद्धदारु । न० वृद्धदारके । विधारा० इ० भा० प्रसिद्धे ॥ यथा । वृद्धदारुद्वयं गौल्यं पिच्छिलं कफवातनुत् । बल्यं कासामदोषघ्नं द्वितीयं स्वल्पवीर्यदम् ॥

वृद्धनाभिः । त्रि० उन्नतनाभौ । तुण्डिले । वृद्धा उन्नता नाभिरस्य ॥

वृद्धप्रपितामहः । पुं० प्रपितामहस्य जनके ॥

वृद्धप्रपितामही । स्त्री० प्रपितामहस्य जनन्याम् ॥

वृद्धबला । स्त्री० महासमङ्गायाम् ॥

वृद्धवाहनः । पुं० आम्रवृक्षे ॥ सुपक्का वृद्धवाहनद्रुति केचित् ॥

वृद्धविभीतकः । पुं० आम्रातके ॥

वृद्धश्रवाः । पुं० सुनासीरे । इन्द्रे ॥ वृद्धेभ्यः शृणोति । श्रु श्रवणे । असुन् ॥ वृद्धे श्रवसी यस्येति वा । वृद्धेषु पलितेषु श्रवो यशो यस्येति वा । । वृद्धात् बृहस्पतेः शृणोति वा ॥

वृद्धश्रावकः । पुं० कपालिनि ॥

वृद्धसङ्घः । पुं० वार्द्धके ॥ वृद्धानां सङ्घः ॥

वृद्धसूत्रकम् । न० इन्द्रतूले । ग्रीष्महासे । मरुद्ध्वजे । बुढियाकासूत इ० भा० ॥

वृद्धा । स्त्री० गतयौवनायाम् । पलिक्न्याम् । जरत्याम् ॥ तदवस्था कालो यथा । आषोडशाद्भवेद्बाला तरुणी त्रिंशता मता । पञ्चपञ्चाशतः प्रौढा वृद्धा भवति तत्परम् ॥ महाश्रावणिकायाम् ॥ अङ्गुष्ठे ॥

वृद्धाङ्गुलिः । स्त्री० अङ्गुष्ठे ॥

वृद्धिः । स्त्री० वर्द्धने । स्फात्याम् ॥ विष्कम्भादिष्वेकादशयोगे ॥ तत्र जातस्य फलं यथा । प्रसूतिकाले यदि वृद्धियोगो नरः सुभोगी विनयान्वितश्च । धनप्रयोगग्रहणे सुदक्षो विचक्षणः स्यात् क्रयविक्रयाभ्यामिति ॥ अष्टवर्गौषधान्तरे । योग्यायाम् । ऋद्धौ । सिद्धौ । लक्ष्म्याम् ॥ अस्या गुणा यथा । ऋद्धिर्वृद्धिश्च मधुरा सुस्निग्धा तिक्तशीतला । रुचिमेधाकरी कुष्ठक्रिमिहरा परा ॥ प्रयोगेष्वनयोरेकं यथालाभं प्रयोजयेत् । यत्र यद्दातुमिष्टिः स्याद्द्वयमप्यत्र योजयेदिति राजनिर्घण्टः ॥ ऋद्धिवृद्ध्योरुत्पत्तिलक्षणगुणा यथा । ऋद्धिर्वृद्धिश्च कन्दौ द्वौ भवतः कोषयामले । श्वेततोमान्वितः कन्दो लताजातः सरन्ध्रकः ॥ स एव ऋद्धिर्वृद्धिश्च भे

दमप्येतयोर्भुवे । तूलयन्थिसमोऋ
द्धिर्वामावर्तफलावसा ॥ वृद्धि
स्तद्भिणावर्तफलाप्रोक्तामहर्षि-
भिः । ऋद्धिर्योग्यं सिद्धिलक्ष्म्यौ
वृद्धेरप्याश्रयाद्रुमे ॥ ऋद्धिर्बल्या
विदोषघ्नी शुक्रलामधुरागुरुः । प्रा
णैश्वर्यकरीमूर्च्छारक्तपित्तविनाशि
नी ॥ वृद्धिर्गर्भप्रदाशीताबृंहणीमधु
रास्मृता । वृष्यापित्तास्रशमनी-
क्षतकासक्षयापहा ॥ राज्ञामप्यष्ट
वर्गस्तुयतोऽयमतिदुर्लभः । तस्मा
दस्यप्रतिनिधिंगृह्णीयात्तद्गुणंभि
षक् ॥ मुखशब्दः प्रतिनिधिः ॥
प्रतिनिधिमाह । मेदाजीवकका
कोलीऋद्धिद्वन्द्वेपिचासति । व
रीविदार्यश्वगन्धावाराहीश्चक्रमात्-
क्षिपेत् ॥ मेदामहामेदास्थानेशता
वरीमूलम् । जीवकर्षभकस्थाने
विदारीमूलम् । काकोलीक्षीरका
कोलीस्थानेऽश्वगन्धामूलम् । ऋ-
द्धिवृद्धिस्थानेवाराहीकन्दंगुणै-
स्तुल्यंक्षिपेत् ॥ कलान्तरे । वृद्धौ
। लाभे । सूद । व्याज । इ । भा ।
॥ अभ्युदये ॥ समृद्धौ ॥ हर्षे ॥
मुष्कवृद्धौ । कुरण्डरोगे । शै
लेये ॥ धने ॥ समूहे ॥ नीतिवेदि
नांक्षयादित्रिवर्गान्तर्गतवर्गविशेषे
॥ ह्रासाभावे ॥ वर्द्धनम् । वृधुवृ
द्धौक्तिन् । वर्द्धतेऽनयावा ॥ उत्त

मर्णेनमूलधनातिरिक्तंग्राह्यधने ॥
वृद्धिका । स्त्री० ऋद्धिनामौषधौ ॥
वृद्धिजीविका । स्त्री० अर्थप्रयोगे ।
कुसीदे । ऋणदानजीविकायाम् ॥
वृद्ध्याजीविका ॥
वृद्धिजीवी । त्रि० कुसीदिके ॥ वृ
द्ध्यर्थंद्रव्यंवृद्धिः । तयाजीवितुं
शीलमस्य । णिनिः ॥
वृद्धिदः । पुं० जीवके ॥ शूकरक-
न्दे ॥ त्रि०वृद्धिदायिनि ॥
वृद्धिश्राद्धम् । न० आभ्युदयिकश्रा
द्धे ॥ नान्दीमुखश्राद्धे ॥
वृद्धोक्षः । पुं० जरद्गवे । वृद्धवृ-
षे । वृद्धश्चासावुक्षाच । अचतुरे
तिसाधुः ॥
वृद्ध्याजीवः । त्रि० वृद्धिजीविनि ।
कुसीदिके ॥ वृद्धिराजीवोजीवि
काऽस्य ॥
वृधसानः । पुं० मनुष्ये ॥ वर्द्धते ।
वृधु० । ऋञ्जिवृधिमन्दिसहिभ्यः
कित्त्यसानच् ॥
वृन्तम् । न० फलपत्रादिर्येनधार्यते
तत्र । प्रसवबन्धने । बोंटा०बोंटा०
इ०भा० ॥ वृणोति । वृञ् ० । वा
हुलकाद्भिधृणोतिक्तोनुम्च ॥ घ
टीधारायाम् ॥ कुचाग्र । स्तन-
मुखे ॥
वृन्ताकम् । न० वार्ताकौ । अस्यगु
णायथा । वृन्ताकंकफपित्तकृत् ॥ अ

पित्त । वृन्ताकं स्वादु तीक्ष्णोष्णं कटुपाकमपित्तलम् । ज्वरवातबलासघ्नं दीपनं शुक्रलं लघु ॥ तद्बालं कफपित्तघ्नं वृद्धं पित्तकरं गुरु ॥ वृन्ताकं पित्तलं किञ्चिदङ्गारपरिपाचितम् । कफमेदोऽनिलामघ्नमत्यर्थं लघु दीपनम् । तदेव हि गुरु स्निग्धं सतैलं लवणान्वितम् ॥ अपरं श्वेतवृन्ताकं कुक्कुटाण्डसमं भवेत् । तदर्शःसु विशेषेण हितं हीनञ्च पूर्वत : ॥ पूर्वत : कृष्णात् ॥ भोजनं धिगवृन्ताकं वृन्ताकं धिगवृन्तकम् । सवृन्तं धिगतैलाढ्यं सतैलं धिगरामठम् ॥ सर्वासां शाकजातीनां वृन्ताकं शाकनायकम् ॥

वृन्ताकी । स्त्री॰ वार्ताक्यां ॥

वृन्तिका । स्त्री॰ वृन्तितायाम् । कटुक्याम् ॥

वृन्द : । पुं॰ दशार्बुदे । शतकोटौ । महार्बुदे । अजे ॥ न॰ समूहे ॥ वृण्यते वृणभक्ते । वृन्दादयश्चेति साधु : ॥

वृन्दा । स्त्री॰ तुलस्याम् ॥ जलन्धरस्य पत्न्याम् ॥ केदारराजकन्यायाम् ॥ राधाषोडशनामान्तर्गतनामविशेषे ॥

वृन्दार : । वि॰ मनोज्ञे ॥

वृन्दारक : । पुं॰ अमरे । देवतायाम् । सुरे । प्रशस्तं वृन्दं यस्य स : । शृङ्गवृन्दाभ्यामारकन् । स्त्रियां तु कापुविकावृन्दारकाणां वेति वक्तव्यमिति॰ वृन्दारका॰ वृन्दारिकेत्युभयम् ॥ यूथपतौ ॥ यथा । वृन्दारक : सुरश्रेष्ठे मनोज्ञे यूथपातरीति व्याडि : ॥ त्रि॰ मनोज्ञे ॥ श्रेष्ठे ॥

वृन्दावनम् । न॰ स्वनामप्रसिद्धे तीर्थविशेषे ॥ वृन्दा ह्येकेशजालसुमानाम्नी धदेवता । भूतेशो भैरवस्तत्र सर्व्वसिद्धिप्रदायक : ॥ इत्यागम : ॥ वृन्दाया च तपस्तेपे तत्तु वृन्दावनं स्मृतम् । वृन्दयाच कृता क्रीडा तेन वा मुनिसत्तम ॥ इति पुराणम् ॥ वृन्दाया वनम् ॥

वृन्दावनेश्वरक : पुं॰ श्रीकृष्णे ॥

वृन्दावनेश्वरी । स्त्री॰ राधायाम् ॥

वृन्दिष्ठ : । त्रि॰ अतिवृन्दारके ॥ अयमेषामतिशयेन वृन्दारक : । इष्ठन् । प्रियस्थिरेति साधु : ॥

वृन्दीयान् । त्रि॰ वृन्दारकतरे ॥ अयमनयोरतिशयेन वृन्दारक : । ईयसुनि॰ प्रियस्थिरेति वृन्दारकस्य वृन्दादेश : ॥

वृश : । पुं॰ आर्द्रके ॥ मूले ॥ वृणोति ॥ वृञ्॰ । जनिदस्यादिना शक् ॥ उन्दुरौ ॥

वृशा । स्त्री॰ औषधीविशेषे ॥

वृश्चिक : । पुं॰ अलौ । द्रुणे । विच्छू॰ हू॰ भा॰ प्र॰ । वृश्चिकविषस्य लक्षणं

यथा । दष्टस्त्वग्निरिवादौ च भिन-
तो वेदनमाशु च । वृश्चिकस्य विषं
याति पश्चाद्दंशोऽवतिष्ठते ॥ औषध
न्तु । शीरकस्य कृतः कल्को घृतसै
न्धवसंयुतः । सुखोष्णो मधुना लेपात्
वृश्चिकस्य विषं हरेत् ॥ गन्धमाघ्राय
मर्द्दितस्य सूर्य्यावर्त्तदलस्य तु । वृश्चिके
न नरो विद्धः क्षणाद्भवति निर्विषः
अष्टमराशौ । तल्लग्नजातस्य फ
लं यथा । वृश्चिकोदयसञ्जातः शौ
र्य्यवानतिदुष्टधीः । भवेद्विज्ञानस
म्पन्नो विग्रही सुभगः सुधीः ॥ शू
ककीटे । शुयोपोका । इ०भा०प्र०
॥ ओषधीविशेषे । वृश्चति । ओव्र
श्चू छेदने । व्रश्चिकृषोः किकन् ।
ग्रहिज्येति सम्प्रसारणम् ॥

वृश्चिकप्रिया । स्त्री० पूतिकायाम् ॥

वृश्चिकर्णी । स्त्री० आखुकर्ण्याम् ॥

वृश्चिका । स्त्री० क्षुद्रक्षुपविशेषे ।
नखपर्ण्याम् । पिच्छिलायाम् । अ
लिप्रियायाम् ॥

वृश्चिकाधिप: । पुं० मङ्गले ॥

वृश्चिकाली । स्त्री० क्षुपविशेषे
वृश्चिपत्र्याम् । विषघ्न्याम् ।
सर्पदंष्ट्रायाम् । भूरिदुग्धायाम् ।
भासुरपुष्पायाम् । विक्राटी० इ०
गौ०भा० ॥ वृश्चिकाली विषघ्नी
तु कासमारुतनाशिनी ॥

वृश्चिपत्री । स्त्री० वृश्चिकाल्याम् ॥

वृश्चीर: । पुं० श्वेतमूलपुनर्नवा-
याम् ॥

वृष: । पुं० धर्म्मे ॥ वर्षति फलम् । वृ
षु श्रेष्ठ सेचने च । इगुपधेति कः ॥
वर्षणात्सर्वकामानां धर्म्मो वृषः
इति शङ्करभाष्यम् ॥ बलीवर्द्दे ।
उक्षणि । भद्रे । ऋषभे । वृषभे ।
अनडुहि । सौरभेये । गवि ॥ शि
ववाहनवृषस्य स्वरूपं यथा । शृङ्गायु
धः शुक्लकायश्चतुष्पाद्रक्तचक्षुः
। बृहत्ककुत्कृष्णपुच्छः श्यामस्कं
धो वृषः स्मृत इति ॥ वृषोत्सर्ग
वृषे ॥ तल्लक्षणं यथा । चरणानि मु
खं पुच्छं यस्य श्वेतानि गोपतेः ।
लाक्षारससवर्णश्च तं नीलमिति नि
र्द्दिशेत् ॥ एवंविधवृषाभावेऽन्यो
वृषभो योयस्योपादेयः सोऽप्युक्तः ।
वर्णतस्ताम्रकपिलो ब्राह्मणस्य प्रशस्य
ते । तथा । श्वेतोदरः कृष्णपृष्ठो
ब्राह्मणस्य प्रशस्यते ॥ स्निग्धरक्तेन व
र्णेन क्षत्रियस्य प्रशस्यते ॥ काञ्चना
भेन वैश्यस्य कृष्णेनाप्यन्त्यजन्मनः ॥
इति । वृषोत्सर्गकालश्च अशौचान्त
द्वितीयदिनम् । कार्त्तिक्याञ्चैव वैरे
वत्यां युताश्विन्यपूर्णिमाञ्चेति ॥ स्मृ
त्याम् ॥ चतुर्विधपुरुषमध्ये पुरु
षविशेषे ॥ तल्लक्षणन्तु । बहुगुण
बहुबन्धः शीघ्रकामो नताङ्गः सक
लरुचिरदेहः सत्यशाठी वृषोऽयमि

ति ॥ तावृषिसंज्ञे द्वितीयराशौ एतद्राशिजातफलं यथा । स्थिरमतिंसुमतिंकमनीयतांक्षमलतांद्वि-जवामुपभोगताम् । वृषगतोहिमगुर्भृशमादिशेत्सुकृतिनः कृति-नयसुखान्यपि ॥ तल्लग्नजातस्यफलन्तु । वृषलग्ने भवेज्जातोगुरुभक्तः प्रियंवदः । गुणीकृतीधनीलुब्धःशूरः सर्वजनप्रियइति ॥ उत्तरपदस्थः श्रेष्ठे ॥ वासे । वासके । घटरूपे ॥ मूषिके ॥ शुक्रले । वास्तुस्थानभेदे ॥ रिपौ ॥ कामे ॥ बलवति ॥ ऋषभनामौषधे ॥ वर्षतिफलमधुकामादीन् । वृषु० । इगुपधेतिकः ॥ वृष्यप्रयोगे । स्त्री कृष्णे ॥ पुष्ये ॥ वस्त्रविशेषे । यथा । कोद्रवाः शालिमुद्गाश्च सक्तुमाषास्तथैवच । महार्घेनाव तेसर्वेवृषवसुरवन्दिते ॥ १५ ॥ न० जघे । विष्णौ ॥ वेतसे ॥ त्रि० पुष्यवति ॥

वृषकर्णी । स्त्री० सुदर्शनायाम् । सुदर्शनगुलुच्छ० इ० गौ० भा० ।

वृषकर्मा । पुं० भगवति । वृषोधर्मंलक्षणंकर्मास्य ।

वृषकेतु: । पुं० कर्णस्यपुत्रे ॥

वृषगन्धा । स्त्री० चनाम्ल्याम् ॥

वृषचक्रम् । न० कृषिकर्मोक्तवृषाकारचक्रे ॥

वृषण: । पुं० मुष्के । अण्डकोषे । वृषणोभवतः सारोकफासृङ्मांसमेदसाम् । वीर्यवाहिशिराधारौवृषणौपुरुषावहौ । स्थूलसिङ्गाद्दरिद्रः स्यादुःस्थेकवृषणोभवेत् विषमैश्चौचञ्चलोवै नृपः स्याद्वृषणैसमे ॥ प्रलम्बवृषणोल्पायुर्निर्द्धन्व्योमविभिर्भवेत् ॥ वर्षति । वृषु सेचने । बाहुलकात्क्युः । बहुलमन्यचेतियुज्वा । संज्ञापूर्वकत्वाद्गुणाभावः ॥

वृषणश्व: । पुं० इन्द्रस्याश्वे । उच्चैःश्रवसि । श्वेतहये ।

वृषण्वसु । न० इन्द्रसवने । नन्दने । नन्दसारे ।

वृषदंशक: । पुं० आखुभुजि । बिडाले । वृषाणूमूषिकान्दशति । दंश० । कर्मण्यण् । स्वार्थेकन् ॥

वृषध्वज: । पुं० वृषाङ्के । शिवे ॥ वृषोध्वजचिह्नमस्य ॥ हेरम्बे ॥ पुण्यकर्मणि ॥

वृषा । पुं० कर्णे ॥ महेन्द्रे ॥ वृषभे । तुरगे ॥ वर्षति । वृषु० । कनिन्युवृषितक्षिराजौ आदिना०कनिन् ।

वृषनाशन: । पुं० विडङ्गे ॥

वृषपति: । पुं० शिवे ॥ षण्डे ॥

वृषपत्रिका । स्त्री० वस्ताम्बाम् । चाम्बाम् ॥

वृषपर्णी । स्त्री० वृषविशेषे । दन्धा

स्याम् । अक्षाड्याम् । सुदर्शनायाम् । पुराती॰ दू॰ गौ॰ भा॰ ॥ आखुपर्ण्याम् ॥

वृषपर्व्वा । पुं॰ अश्वकसूदने । शम्भौ । ईशे । दैत्यप्रभेदे । शृङ्गारिणि ॥ कशेरौ ॥ वृषरूपाविपर्वाण्यस्य ॥

वृषभः । पुं॰ श्रेष्ठे ॥ गवि । हषे ॥ औषधीभेदे । शृङ्ग्याम् ॥ वर्षति मूत्रं भूमिं सिञ्चति । हषु॰ । कृषिवृषिभ्यांकिदित्यभच् ॥ आदित्ये ॥ कर्णरन्ध्रे ॥

वृषभगतिः । पुं॰ हरिहरे । शम्भौ । वृषभेणगतिर्यस्य ॥

वृषभध्वजः । पुं॰ महेश्वरे । शिवे । वृषभोध्वजश्चिह्नमस्य ॥

वृषभाक्षः । पुं॰ श्रीकृष्णे ॥ सर्वकामाभिवर्षकेपश्चिमोत्तरस्थः । बहुव्रीहावितिषच् । वृषभोधर्मोदृष्टिरस्य ॥

वृषभाक्षी । स्त्री॰ इन्द्रवारुण्याम् ॥

वृषभानुः । पुं॰ सुरभानुपुत्रे । राधिकापितरि ॥

वृषभासा । स्त्री॰ अमरावत्याम् ॥

वृषयः । पुं॰ आश्रये ॥ वृणोति । वृञ् वरणे । वृञ्ञः षुक्‌ह्रस्वश्चेतिकयन्॰ धातोः षुगागमश्च ॥

वृषलः । पुं॰ रसोने ॥ शूद्रे । चन्द्रगुप्तनृपे ॥ वाजिनि । तुरगे ॥ अधार्म्मिके ॥ वृष्यति॰ वर्षतिवा । वृषु॰ । वृषादिभ्यश्चित्‌तिकलः ॥ वृषं धर्म्मंलुनातिवा । लूञ्॰ । अन्येभ्योपीतिडः ॥ वृषंलातिवा । ला॰ । कः ॥ वृषोहिभगवान्धर्म्मस्तस्य यः कुरुतेह्यलम् । वृषलंतंविदुर्देवास्तस्माद्धर्मंनलोपयेत् ॥

वृषलपतिः । पुं॰ शूद्रे॰ चोराणांराज्ञि ॥

वृषलवृत्तिः । पुं॰ शूद्रोपकप्रवृत्तौ ॥

वृषली । स्त्री॰ शूद्रायाम् । जातित्वान्ङीष् ॥ स्त्रीमात्रे ॥ निरुक्तस्त्वकुर्वन्ति । वृषस्यन्तीचपलयतिभर्त्तारमिति॰ वृषली॰ ब्राह्मणस्यपरिणीताब्राह्मण्यपिवृषलीति॰ श्राद्धभुग्वृषलीतल्पमित्यत्रकुल्लूकभट्टः ॥ वन्ध्यातुवृषलीज्ञेया॰ वृषलीतुमृतप्रजा । अपरावृषलीज्ञेयाकुमारीयारजस्वला ॥ पितृगेहेअविवाहितायांरजस्वलायांकन्यायां ॥ यथाऽश्विकाध्यपी । पितुर्गेहेचयाकन्यारजः पश्यत्यसंस्कृता । भ्रूणहत्यापितुस्तस्याः साकन्यावृषलीस्मृता ॥ यस्तुतांवरयेत्कन्यांब्राह्मणोज्ञानदुर्बलः । अश्राद्धेयमपाङ्क्तेयं तंविद्याद्वृषलीपतिम्गिं ॥ स्वपतिं परित्यज्यपरपतिगामिन्याम् । यथा । स्ववृषंयापरित्यज्यपरवृषे॰ वृषायते । वृषलीसाहिविज्ञेयानशूद्रीवृषलीभवेदिति ॥

वृषलीपतिः । पुं॰ सवर्णामपरिणीय कृतशूद्राविवाहे ॥ वृषल्याः पतिः ॥ यस्तुतांवरयेत्कन्यांब्राह्मणोज्ञानदुर्बलः । अश्राद्धेयमपाङ्क्तेयंतंविद्याद्वृषलीपतिम् ॥ यदिशूद्रांव्रजेद्विप्रोवृषलीपतिरेवसः । तांपितुर्गृहेसञ्जातरजस्काम् ॥

वृषलीफेनः । पुं॰ शूद्रायाअधररसे ॥

वृषलोचनः । पुं॰ मूषिके ॥ त्रि॰ वृषनयने ॥

वृषवाहनः । पुं॰ शिवे ॥

वृषशत्रुः । पुं॰ विष्णौ ॥ इ॰त्रि॰ष॰ ॥ बिडाले ॥

वृषस्कन्धौ । पुं॰ भृङ्गरोले ॥

वृषस्यन्ती । स्त्री॰ कामुक्याम् । मैथुनेच्छावत्याम् ॥ वृषंनरं॰शुक्रलंवा॰इच्छत्यात्मनः । सुपआत्मनः क्यच् । अश्ववृषयोर्मैथुनेच्छायामितिसुक् । लटः शतृ । उगितश्चेतिङीप् ॥

वृषा । स्त्री॰ मूषिकपर्ण्याम् ॥ कपिकच्छ्वाम् ॥ वर्षति । वृषेरिगुपधेतिकः । टाप् ॥

वृषाकपायी । स्त्री॰ श्रियाम् ॥ गौर्य्याम् ॥ वृषाकपेः स्त्रीतिपुंयोगात्॰ वृषाकप्यग्निकुसितकुसिदानामुदात्तइत्यैकारादेशोङीप्च ॥ शच्याम् । शतावर्य्याम् ॥ जीवन्त्याम् ॥ शच्याम् ॥ स्वाहायाम् ।

वृषाकपिः । पुं॰ हरे । स्मरहरे ॥ कृष्णे । वासुदेवे ॥ वर्षणात्सर्वकामानांधर्मोवृषः । आतृतीयात्भूमिमपादितिकपिर्वराहः । वृषत्वात्कपिरूपत्वाच्चवृषाकपिः । कपिर्वराहश्श्रेष्ठश्चधर्मश्चवृषउच्यते । तस्माद्वृषाकपिंप्राहकश्यपोमांप्रजापतिरितिमहाभारतम् ॥ जातवेदसि । अग्नौ ॥ वृषंधर्मंनकम्पयति । कपिकिम्पिचलने । कुण्डकम्प्यानलोपश्चेति॰इः । वृषाद्धर्मादाकम्पयतिदुष्टानितिवा ॥ यद्वा । वर्षतिकामान् । वृषु॰ । इगुपधेतिकः । आकम्पयतिपापानि । पूर्ववदिः । वृषश्चासावाकपिश्च ॥ यद्वा । वृषाइन्द्रोनकम्पते॰आकम्पतेवाऽस्मात् ॥ यद्वा । वृषोधर्मो॰वृषाइन्द्रोवा॰कपिर्वराहोयस्य । यद्वा । वृषश्चकः कपिर्वराहः । शाकपार्थिवादिः । अन्येषामपीतिदीर्घः ॥ यद्वा । वृषाइन्द्रस्य॰अकम्वृषाकम्पिबति॰पिबतौ । अन्तर्भावितण्यर्थोवा । इन्द्रदुःखंप्राप्नोति॰प्रापयतिवादैत्यान्॰रक्षकत्वात् । विचिसंज्ञापूर्वकत्वान्नगुणः । किपितुआगमशास्त्रस्यानित्यत्वान्नतुक् ॥

वृषाकरः । पुं॰ माषे ॥

वृषाकृतिः । पुं॰ विष्णौ । नारायणे ।

धर्माधर्माद्याकृतिरस्य ॥ वृषशब्दस्ताद्दर्थ्ये॰ आकृतिराकारः शरीरम् । वृषार्थधर्मार्थाकृतिः शरीरमस्येति ॥

वृषाङ्कः । पुं॰ शङ्करे । साधौ ॥ वृषः अङ्कश्चिह्नमस्य ॥ भल्लातके ॥ मड्डुके ॥

वृषाङ्कजः । पुं॰ डमरुशब्दे ॥ इ॰ श॰ र॰ ली ॥

वृषाश्वनः । पुं॰ शिवे ॥ इ॰ त्रि॰ ष: ॥

वृषाणकः । पुं॰ महाकाले ॥ इ॰ त्रि॰ ष: ॥

वृषाधिपः । पुं॰ शुक्रग्रहे ॥ वृषस्य राशिविशेषस्याधिपः ॥

वृषान्तकः । पुं॰ जनार्दने ॥ विष्णौ ॥

वृषायणः । पुं॰ चटके ॥ इ॰ हा॰ ली॰ ॥

वृषासनः । पुं॰ शिवे ॥ वृषोबलीवर्दः आसनं यस्य ॥ वृषरूपासने ॥

वृषाहारः । पुं॰ बिडाले ॥ वृषाम् बिकमाहारोऽस्य ॥ इ॰ हा॰ ली॰ ॥

वृषी । पुं॰ मयूरे ॥ इ॰ श॰ ला॰ ॥

वृषी । स्त्री॰ यतीनामासने । व्रतिविष्टरे ॥ वर्षति सुखम् । वृषु॰ । इगुपधेति कः । गौरादिः ॥

वृषोत्सर्गः । पुं॰ श्राद्धादौ वत्सतरी चतुष्टयसहितत्रिशूलचक्राङ्कितवृषत्यागे ॥

वृष्टः । त्रि॰ सिक्ते ॥ वृषेः क्तः ॥

वृष्टिः । स्त्री॰ वर्षे । मेघाज्जलपतने । वर्षणे । वर्षणम् । वृषु॰ । स्त्रियां क्तिन् ॥ भाग्याख्यायाम् तुष्टौ ॥

वृष्टिघ्नी । स्त्री॰ भृङ्गपर्णिकायाम् । सूक्ष्मैलायाम् ॥ त्रि॰ वृष्टिनाशके ॥

वृष्टिजीवनः । पुं॰ देवमातृके देशे ॥ वृष्टिर्जीवनं यस्य सः ॥ वृष्ट्या जीवनं यत्र वा ॥

वृष्टिप्रमाणम् । न॰ मेघाज्जलपतनेयत्तायाम् ॥ यथा । द्रोणोपञ्चनिमित्तगर्भे॰ त्रीण्याढकानि पवनेन । षड्विद्युतानवाभ्रैः स्तनितेन द्वादशप्रसवः ॥ इति वराहोक्तौ वृष्टेराढकद्रोणप्रमाणपरिज्ञानपराशरश्चाह । आढकाश्चतुरो द्रोणमपां विद्यात् प्रमाणतः । धनुः प्रमाणमेदिन्यां विद्याद्द्रोणाभिवर्षणम् ॥ समे विंशाङ्गुलानाहे द्विचतुष्काङ्गुलोच्छ्रिते । भाण्डे वर्षति सम्पूर्णे॰ ज्ञेयमाढकवर्षणम् ॥ तथा चाचार्य्यः । हस्तविशालं कुण्डकमधिकृत्याम्बुप्रमाणनिर्द्देशः । पञ्चाशत्पलमाढकमनेन मिनुयाज्जलं पतितमिति ॥

वृष्टिभूः । पुं॰ भेके ॥ वृष्टौ भवति ।

भू० । भुव : संज्ञान्तरयोरिति-
क्विप् ॥

वृष्णि : । पुं० यादवे । मेषे ॥ श्रीकृ
ष्णे ॥ वर्षति । वृषु० । सृवृषि
भ्यां क्रिदिति निः ॥ त्रि० पाषण्डे ॥
चण्डे ॥

वृष्णिगर्भ : । पुं० श्रीकृष्णे ॥ वृष्णि
योगर्भो यस्य स : ॥

वृष्य : । पुं० माषे ॥ न० वाजीकर
णे ॥ त्रि० शुक्रवृद्धिकारकौषधा
दौ ॥ वृष्यते । वृषु० । विभाषाकृ
वृषोरितिक्यप् । पक्षे ण्यतितु० व
र्ष्यम् ॥ वृषायहिते ॥ वृषायका
मुकायहितम् । खलयवमाषेति-
यत् ॥

वृष्यकन्दा । स्त्री० विदार्याम् ॥

वृष्यगन्धा । स्त्री० वृद्धदारके ॥

वृष्यगन्धिका । स्त्री० अतिबलायाम् ॥

वृष्यवल्लिका । स्त्री० विदार्याम् ॥

वृष्या । स्त्री० ऋद्धिनामौषधे ॥ शता
वर्याम् ॥ आमलक्याम् ॥

वृसी । स्त्री० व्रतिनामासने । ब्रह्म
चार्याद्यासने ॥ व्रुवन्त : सीदन्त्य
स्याम् ॥ पृषोदरादित्वाद्व्रुवच्छ
ब्द्य० वृ० आदेश : । अन्येष्वपीत्य
धिकरणे ड : ॥

वृहच्चञ्चु : । पुं० महाचञ्चुशाकेपक्षि
विशेषे । दीर्घपादे । कुलङ्ग० -
भा० ॥

वृहच्चित्त : । पुं० बीजपूरे ॥

वृहच्छल्क : । पुं० चिङ्गटमत्स्ये ॥

वृहच्छुक : । पुं० दार्वाघाटे । काठ
कोरवा० इतिख्यातेखगे ॥

वेकट : । पुं० वैकटिके । मणिकारे ।
मणिआरा० इ० भा० प्र० भेकटी० इ०
गौ० देशभाषाप्रसिद्धमत्स्ये ॥ यू
नि । जाततारुण्ये ॥ विदूषके ॥

वेग : । पुं० जवे । रंहसि । रये ।
स्यदे ॥ प्रवाहे । ओघे । धाराया
म् ॥ किम्पाके । महाकालफले ॥
रेतसि ॥ मूत्रादिप्रवृत्तौ ॥ यथा ।
वेगान्नधारयेज्जातुविण्मूत्रपवनाट्-
घ्रुधाम् ॥ अपिच । वेगरोधोनक
र्त्तव्योह्यन्यत्रक्रोधवेगत : ॥ पुन
श्च । स्वभावत : प्रवृत्तानांमलादी
नांजिजीविषु : । नवेगान्धारयेद्वी
र : कामादीनान्तुधारयेदिति ।
पृथिव्यादिचतुष्टयमनोवृत्तौसंस्का
रे । वेजनम् । ओविजीभयचलन
यो : । घञ् ॥

वेगनाशन : । पुं० श्लेष्मणि ॥

वेगवान् । पुं० ईश्वरे । त्रि० वेगि
नि ॥ वेगोजवोऽस्यास्ति । मतुप् ॥

वेगवती । स्त्री० अर्द्धसमवृत्तभेदे ॥
यथा । विषमेप्रथमावरणौनंदोध
कमेवहिवेगवतीस्यात् ॥ यथा ।
स्मरवेगवतीव्रजरामाकेशववंशरवै
रतिमुग्धा । रभसान्नगुरून्गणयन्

न्नोवेलिनिकुम्भरथायकगाम ॥
वेगसर : । पुं॰ वेगिरथे ॥
वेगित : । त्रि॰ सञ्जातवेगे । वेगवि शिष्टे ॥ वेग : सञ्जातोऽस्य । ता रकादित्वादितच् ॥
वेगी । पुं॰ श्येनपक्षिणि ॥ त्रि॰वेग वति । तरस्विनि । जाङ्घिके ॥ अतिशयितोवेगोऽस्य । अतइनि: ॥
वेगिरथ : । पुं॰ श्रीकारीमृगे ॥
वेङ्कट : । पुं॰ द्रविडदेशस्थे ऽचलवि शेषे ॥
वेचा । स्त्री॰ मूल्ये ॥ विचिर्॰ । अच् । टाप् । वेचामूल्यस्यवेत- नमितिहलायुध : ॥
वेजानी । स्त्री॰ सोमराज्याम् ॥
वेजित : त्रि॰ भीते ॥
वेडम् । न॰ सान्द्रविच्छिन्नचन्दने ॥
वेडा ।) स्त्री॰ नौकायाम् ॥
वेडी ।)
वेण : । पुं॰ अङ्गात्सुनीथायामुत्पन्ने पृथो : पितरि : ॥ ससपुत्रेण तु जातेनवेणोपिचिदिवंययौ । पुन्ना म्नोनरकात्त्रात : सतेनसुमहात्म नेतिविष्णुपुराणम् ॥ वर्णसङ्कर जातिविशेषे ॥ यथा । वैदेहकेन त्वम्बष्ठामुत्पन्नोवेणउच्यतइतिम- नु : ॥
वेणा । स्त्री॰ भारतवर्षस्थनदीविशेषे ॥
वेणि : । स्त्री॰ वेण्याम् ॥ वेति॰ वीयतेवा । वीगतिव्याप्तिप्रजनकान्त्यसनखादनेषु । वीज्याज्वरिभ्यो नि : । बाहुलकाण्णत्वम् ॥ यद्वा । वेणति । वेणृ॰ । इन् ॥
वेणिवेधिनी । स्त्री॰ जलौकायाम् ॥
वेणी । स्त्री॰ केशबन्धे । प्रवेण्याम् । प्रोषितभर्तृकादिधार्यकेशरचनावि शेषे ॥ यथा । जटानेयंवेणीकृत कचकलापोनगरलंगलेकस्तूरीयंशि रसिशशिलेखानतिलकम् । इयं भूतिर्नाङ्गेप्रियविरहजन्माधवलि मापुरारातिभ्रान्त्याकुसुमशरकिंमां- व्यथयसि ॥ देवताडे ॥ नद्यादेर न्तरे ॥ सेतौ ॥ प्रवाहे ॥ मेध्या म् ॥ नदीविशेषे ॥ वेणति । वे णृगतिज्ञानचिन्तानिशामनवादि त्रग्रहणेषु ॥ इन् । कृदिकारा दितिङीष् ॥
वेणीर : । पुं॰ अरिष्टवृक्षे ॥
वेणु : । पुं॰ नृपविशेषे ॥ त्वक्सा रे । वंशे ॥ वंशवाद्ये ॥ यथा । महानन्दस्तथानन्दोविजयोथजयस्त था । चत्वारउत्तमावंशामतङ्ग- मुनिसम्मता : ॥ दशाङ्गुलोमहा- नन्दोनन्दएकादशाङ्गुल : । द्वाद शाङ्गुलमानस्तुविजय : परिकीर्त्ति त : । चतुर्दशाङ्गुलिमितोजयइत्य भिधीयते ॥ वेणति । वेणृगत्या दौ । बाहुलकादु : ॥ यद्वा । अ

जति । अजिवृरीभ्योनिच्चेतिणुः । अजीर्णे ॥

वेणुकम् । न० तोत्रे । गजस्यतोदनदण्डे । वेणुनानिर्वृत्तम् । निर्वृत्तेऽक्षद्यूतादिभ्यइतिठक् । इसुसुक्तान्तात्कः । संज्ञापूर्वकत्वान्नवृद्धिः ॥

वेणुकर्करः । पुं० करीरवृक्षे ॥

वेणुजः । पुं० वेणुयवे ॥

वेणुदारी । पुं० नरकात्मजे बाणासुरात्मजे ॥

वेणुध्मः । पुं० वैणविके । वंशीवादके ॥ वेणुंधमति । ध्मा० आतोनुपसर्गेकः ॥

वेणुपत्री । स्त्री० वंशपत्रीवृक्षे ॥

वेणुयवः । पुं० वंशतण्डुले । वंशयवे ॥

वेणुवादः । पुं० वैणुके ॥

वेणुवीजम् । न० वंशयवे ॥

वेण्वा । स्त्री० तीर्थविशेषे ॥

वेण्वासङ्गमः । पुं० तीर्थविशेषे ॥

वेतः । पुं० वेत्रे ॥ इ०रा०नि० ॥

वेतनम् । न० कर्मकरस्य०भृतौ । कर्मण्यायाम् । विधायाम् । भृत्यायाम् । निर्वेशे । कामकराइ०इ०भा० ॥ जीवनोपाये । आजीवे ॥ रूप्ये ॥ वीयतेऽनेन । वीगत्यादौ । वीपतिभ्यांतनन् ॥

वेतसः । पुं० लताविशेषे । रथे । अम्बपुष्पे । विदुले । शीते । वानीरे । वञ्जुले । वेत०इ०भा० ॥ अथभावप्रकाशः । वेतसोविदुलोनम्रोवञ्जुलोदीर्घपत्रकः । नादेयीगम्भपत्रश्चजलौकासम्भृतस्तथा ॥ नदीकूलप्रियस्त्वन्यः सुशीतोघनपुष्पकः । जलजातस्तोयकामोविदुरोजलवेतसः ॥ वेतसः शीतलोदाहशोथार्शोयोनिरुग्व्रणान् । हन्तिवीसर्पकृच्छ्रास्रपित्ताश्मरिकफानिलान् ॥ अथनम् । इण्० । नपुंसकइतिक्तः । वाभिकल्पस्य०इतंज्ञानं०श्रुति । घोऽन्तकर्मणि । आतोनुपेतिकः ॥ यद्वा । अयते । वेञ् । वेञस्तुट्चेत्यसच् । वाहुलकाद्दास्त्वं न ॥

वेतसाम्लः । पुं० अम्लवेतसे ॥

वेतसी । स्त्री० वेतसे ॥

वेतसीका । स्त्री० तीर्थविशेषे ॥

वेतस्वान् । त्रि० बहुवेतसदेशे ॥ वेतसाः सन्त्यत्र । कुमुदनडवेतसेभ्योड्मतुप् । मादुपधायाइतिवः ॥

वेतालः । पुं० ईश्वरद्वारपाले ॥ भूताधिष्ठितशवे ॥ अकस्मान्नभस्याभासमानेभूतविशेषे ॥ शिवगणाधिपविशेषे ॥

वेत्ता । त्रि० वेदितरि । ज्ञातरि ॥ वेत्ति । विद० । तृच् ॥

वेत्रः । पुं० वेते । योगिदण्डे । सुदण्डे । वीयते । वीगत्यादिषु । गुधूवीपचिवचीत्यादिना०त्रः ॥ वं

शे ॥ फलिन्याम् ॥ पुं॰ असुरविशेषे ॥

वेत्रधरः । पुं॰ द्वारपाले ॥

वेत्रधारकः । पुं॰ द्वाःस्थिते ॥

वेत्रवान् । त्रि॰ वेत्रधारके ॥

वेत्रवती । स्त्री॰ नदीविशेषे ॥ सा तु मालवदेशात् कालपीसमीपे यमुनायां मिलिता ॥ वेत्रासुरमातरि ॥ वेत्राणि सन्त्यस्याम् ! मतुप् । ङीप् ॥

वेत्रावती । स्त्री॰ वेत्रवत्यां नद्याम् ॥

वेत्रासनम् । न॰ वेत्रनिर्मितासने । आसन्द्याम् ॥ स्याद्वेत्रासनमासन्दीति॰हेमचन्द्रः ॥

वेत्रासुरः । पुं॰ असुरविशेषे ॥

वेत्री । पुं॰ द्वारपाले ॥ त्रि॰ वेत्रयुक्ते ॥

वेदः । पुं॰ आम्नाये । श्रुतौ । क्रमोपगृहीतवर्णात्मन्यपौरुषेयवाक्ये ॥ वेदयति बोधयति आत्मानम् । विद ज्ञाने । इत्यतोऽस्मात् पचाद्यच् ॥ नार्थं बुद्ध्वा वेदसृष्टिः कालिदासादिवाक्यवत् । किन्तु श्वासवद्वायत्नात्तस्माद्वेदोऽपौरुषेयता ॥ यथाहुरार्यायामाचार्याः । वेदोऽनादितया वायद्वा परमेश्वरप्रणीततया । भवति परमं प्रमाणं बोधे नास्ति स्वतः परतो वा ॥ नापेक्षते यदन्यद्यदपेक्षन्तेऽखिलाभिमानानि । वाक्यं तन्निगमानां मानं व्याख्यातीन्द्रियावगतौ । मानं प्रबोधयन्तं बोधं मानेन ये बुभुत्सन्ते । एधोभिरेव दहनं दग्धुं वाञ्छन्ति ते महात्मानः ॥ ४६ ॥ वेदोऽनादिरमुष्य व्यञ्जक ईशः स्वयंप्रकाशात्मा । तदभिव्यक्तिमुदीक्ष्य प्रोक्तोऽसौ सूरिभिः प्रमाणमिति ॥ रूपाणामव लोके चक्षुरिवान्यन्न कारणं दृष्टम् । तद्वद्दृष्टावगतौ वेदवदन्यो न वेदको हेतुः ॥ निगमेषु निश्चितार्थं तन्त्रं काश्यादि प्रकाशयति । तदिदमनुवादमात्रं प्रामाण्यं तस्य सिद्धान्ति न क्वचित् ॥ अंशद्वयवति निगमे साधयति द्वैतमेक एकोंऽशः । अद्वैतमेव वस्तु प्रतिपादयति प्रसिद्धमपरोंऽशः ॥ ५० ॥ स च वेदो मन्त्रब्राह्मणभेदाद्द्विविधः । विधिमन्त्रनामधेयनिषेधार्थवादभेदात् पञ्चविधश्च भवति ॥ अस्मात् तज्ज्ञापको वेद इति प्रमाणविदः ॥ अतो वेदार्थज्ञानप्रशंसामाह कूर्मपुराणम् । न वेदपाठमात्रेण सन्तोषं कारयेद्बुधः । पाठमात्रावसानस्तु पङ्के गौरिव सीदति ॥ योऽधीत्य विधिवद्विप्रो वेदार्थं न विचारयेत् । स सान्वयः शूद्रसमः पात्रतां न प्रपद्यते ॥ व्यासश्च । वेदस्याध्ययनं सर्वं धर्मशास्त्रस्य वापि यत् । अजानतार्थं तत् सर्वं तुषाणां कण्डनं यथा ॥ यथा पशुर्भारवाही न तस्य भजते फलम् । द्विजस्तथार्थानभिज्ञो न वेदफलमश्नुते ॥ पाठमात्ररतो नित्यं द्विजातीनां स्वार्थं वर्जि

तान्। पशूनिवचतान्प्राज्ञोवाङ्मात्रेणापिनार्चयेत्॥ श्रुतहीनमधीतंयत्रेहनामुत्रतद्भवेत्। श्रुतन्तुकेवलमपिसमुद्धारायकल्पते। योधीतेनार्थंतत्त्वज्ञस्तस्यतद्धारणादृथा। भारवाहीसभृतकःकेवलंक्लेशभाग्भवेत्॥ तस्मादर्थंपरिज्ञानेयत्नःकार्योविजानता। ज्ञानंकर्मचसंयुक्तंयुक्तार्थंकथितंमया॥ अधीतंश्रुतसंयुक्तंतथाश्रेष्ठंनकेवलम्। अधीत्ययत्किञ्चिदपितदर्थमवबुध्यच। स्वर्गलोकमवाप्नोतिधर्मानुष्ठानविद्विजः इति। अपिच। वेदार्थज्ञोजपंजप्त्वातथैवाध्ययनंद्विजः। कुर्वन्स्वर्गमवाप्नोतिनरकन्तुविपर्यये॥ इतिव्यासः॥ मनुः। वेदशास्त्रार्थतत्त्वज्ञोयत्रतत्राश्रमेवसेत्। इहैवलोकेतिष्ठन्सब्रह्मलोकायकल्पते इति॥ व्यासः। समुच्चितंश्लोकमपिश्रुताधीतंविशिष्यते। चतुर्णामपिवेदानांकेवलाध्ययनाद्द्विजाः॥ अज्ञेभ्योग्रन्थिनःश्रेष्ठाग्रन्थिभ्योधारिणोवराः। धारिभ्यश्चार्थतत्त्वज्ञास्तेभ्योप्यध्यात्मचिन्तकाः॥ पुस्तकेवेदलिखननिषेधः पाद्मोत्तरखण्डे ११० ऽध्यायेयथा। वेदस्यलिखनंकृत्वायःपठेद्ब्रह्महाभवेत्। पुस्तकंवागृहेस्थाप्यवज्रपातोभवेद्ध्रुवमिति॥ विदन्त्यनेनधर्मम्। विदज्ञाने। हलश्चेतिघञ्॥ वेदार्थवेदनहेतुत्वाद्व्याकरणे॥ व्याकरणेनहिपदादिविभागशऋग्वेदादयोज्ञायन्ते॥ अनुभवे। भावेघञ्॥ वृत्तौ॥ केशवे॥ इन्द्रियादिदेवताप्रकाशके॥ मीनशरीरावच्छेदेनभगवद्वाक्यमितिन्यायशास्त्रम्॥

वेदगर्भः। पुं॰ अज्जयोनौ। ब्रह्मणि॥ ब्राह्मणे॥ वेदोगर्भेयस्यसः॥

वेदगर्भा। स्त्री॰ दुर्गायाम्। वेदजननियाम्॥ अस्यमहतोभूतस्यनिश्वसितमेतद्यदृग्वेदइत्यादिश्रुतेः। ममैवाज्ञापराशक्तिर्वेदसंज्ञापुरातनी। ऋग्यजुःसामरूपेणसर्गादौसंप्रवर्ततइतिकूर्मपुराणेद्वादशाध्यायेश्रीभगवद्युक्तेश्च। तयाचचत्वारोवेदाःसाङ्गाःसरहस्याबहुधाभिन्नाः। एकशतमध्वर्युशाखाः। सहस्रवर्त्मासामवेदः। एकविंशतिधावाह्वृच्यम्। नवधाथर्वणोवेदइतिमहाभाष्यम्॥

वेदज्ञः। त्रि॰ वेदपारगे। वेदंजानाति। ज्ञा॰। आतोनुपसर्गइतिकः॥

वेदनम्। न॰ अनुभूतौ। संवेदने। विदज्ञाने। ल्युट्चेति॰ल्युटिक्लीबत्वम्॥ विवाहे॥

वेदना। स्त्री॰ ज्ञाने। दुःखे। पीडायाम्। विदवेदनाख्याननिवासेषुचुरादिः। ण्यासेतियुच्। व

दृ । विद्यामे । चडिवन्दिविदिभ्य
श्च इतिवाच्यमितियुच् ॥

वेदनास्कन्धः । पुं॰ विषयज्ञानप्रपञ्चे ।
विज्ञानस्कन्धजन्ययोः सुखदुःखयोः
याप्रियाप्रियानुभवविषयस्तयोर्मसुख
दुःखतद्रहितविशेषावस्थाचित्तस्य
जायते॰ सवेदनास्कन्धइतिवाचस्प
तिः । सुखादिप्रत्ययोवेदनास्कन्ध
इत्यानंदगिरिः ।

वेदनिन्दकः । पुं॰ नास्तिके । वेदनि
न्दाकरे ॥ वेदंनिन्दति । णिन्दिकुत्सा
याम् । ण्वुल् ॥

वेदपारगः । पुं॰ मन्त्रब्राह्मणात्मकशा
खाध्यायिनि ॥ त्रि॰ अवगतवेदार्थ
तत्त्व॰ ज्ञानिनि॰ सन्न्यासिनि ॥
वेदस्यपारंगच्छति । गमॢ॰ । अ-
न्तात्यन्तेतिगमेर्डः ॥

वेदभागः । पुं॰ मन्त्रब्राह्मणयोः ॥
पूर्वैरुदाहृतेषुइत्यादिषु । तेयथा ।
हेतुर्निर्वचनंनिन्दाप्रशंसासंशयोवि
धिः । परकृतिः पुराकल्पोवधारण
कल्पनेतिइत्यादयः ॥

वेदमाता । स्त्री॰ गायत्र्याम् ॥ सर्वशा
स्त्रादिवाः प्रोक्ताजनयैवानघवैष्ण
वाः । उपासतेऽस्यादिदेवीगायत्रींवे
दमातरम् ॥ अपिच । योधीतेऽहन्य
हन्येतांसाविर्त्रींवेदमातरम् । वि
ज्ञायार्थंब्रह्मचारीसयातिपरमांगति
मिति ॥ दुर्गायाम् ॥

वेदमार्गः । पुं॰ वेदबोधितेपथि ॥ य
था । जलौघैर्निरभियन्तसेतवोयर्थ
तीश्वरे । पाखण्डिनामसद्वादैर्वेद
मार्गाः कलौयथेतिश्री॰ । अपिच ।
एतस्माद्वेदमार्गाद्वियदन्यद्विजाय
ते । ततस्तद्ब्रह्मविज्ञेयंरौद्रंशौच
विवर्जितमितिव॰पु॰ ॥

वेदवती । स्त्री॰ कुशध्वजराजकन्याया
म् ॥ विवेकस्यप्रतीहार्याम् । वेद
विद्याभिमानिन्यांदेवतायाम् ॥

वेदवदनम् । न॰ व्याकरणे ॥ यथा ।
योवेदवेदवदनंसदनंहिसम्यग्ब्रा
ह्म्याः सवेदमपिवेदकिमन्यशास्त्र
म् । यस्मादतः प्रथममेतदधीत्य
धीमान्शास्त्रान्तरस्यभवतिश्रवणे
धिकारीतिसिद्धान्तशिरोमणिः ॥
योगिनोतस्मात्प्रथमेवपाठः ॥

वेदवादरतः । त्रि॰ वेदेयेसन्तिवादाः
॰अर्थवादाः ॰अक्षय्यंहवैचातुर्मा
स्ययाजिनः सुकृतंभवतीत्येवमाद
यस्तेष्वेवरते । वेदार्थंसत्यत्वेनैव
मेवैतदितिमिथ्याविश्वासेनसन्तुष्टे ॥

वेदवासः । पुं॰ ब्राह्मणे । वेदस्यवा
सोयस्मिन् ।

वेदवित् । पुं॰ कर्मब्रह्माख्यवेदार्थवि
दि । कर्मकाण्डोपासनाकाण्डज्ञा
नकाण्डात्मकसर्ववेदार्थविदि ॥
वेदज्ञ ॥ कर्मवेदाद्यैर्वेदाश्चत्वारस्त
त्त्वानीतिवेदविद्वदति ॥ वेदंवेदार्थं

स्ववेत्ति॰विद्यते॰विन्ते वा । विद ज्ञाने॰विद सत्तायाम्॰विद विचारणे वा । सत्सूद्विषेति॰क्विप् ॥

वेदव्यास : । पुं॰ शुकदेवस्य पितरि । माठरे । द्वैपायने । पाराशर्य्ये । बादरायणे ॥ वेदं व्यस्यति । असु॰ । अण् ॥ यथा । वेदमेकं चतुर्भेदं कृत्वा शाखाशतैर्विभुः । करोति बहुलं भूयो वेदव्यासस्वरूपधृक् । द्वापरे तु युगे विष्णुर्व्यासरूपी महामुने । वेदमेकं स बहुधा कुरुते जगतो हितः ॥ यथा सुकुरुते तन्त्र वेदमेकं पृथक् प्रभुः । वेदव्यासाभिधानातु सा सा मूर्त्तिर्मधुद्विषस्त्विति विष्णुपुराणम् ॥

वेद : । न॰ धने ॥ विद्यते॰लभ्यते । विद्लृ लाभे । असुन् ॥

वेदसार : । पुं॰ श्रीदेवीभागवते ॥

वेदसन्न्यासी । पुं॰ वेदविहिताग्निहोत्रादिकर्मत्यागिनि ॥

वेदस्वामी । पुं॰ आगमपे । आगमाधिपतौ ॥ यथा कालिदास : । मुरुशनेऽङ्गारकराजपुत्रांश्च य : क्रमेणागमपा : प्रवीणा : । निजागमेशाद्रनिमेखलायाबन्धस्तदाचारकरो निरुक्त : ॥ इति ॥ तदाचारकर : ॰तेषां विप्रादीनामाचारकृत्॰उक्तम् ॥

वेदाग्रणी । स्त्री॰ सरस्वत्याम् ॥

वेदाङ्गम् । न॰ शिक्षाकल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति स्मृतिवोधितेषु षट्सु ॥ तत्राकारादिवर्णानां स्थलकरणप्रयत्नबोधिका अकुहविसर्जनीयानां कण्ठ इत्यादिका शिक्षा । यागक्रियाणामुपदेश : कल्प : । साधुशब्दान्वाख्यानं व्याकरणम् । वर्णागमो वर्णविपर्ययश्चेत्यादिना निश्चयेनोक्तं निरुक्तम् । श्रुतिच्छन्दसां प्रत्यायकं छन्द : । ग्रहणादिगणनशास्त्रं ज्योतिषमिति सङ्क्षेप : ॥

वेदाङ्गम् ॥ पुं॰ परमेश्वरे ॥ वेदा अङ्गभूता यस्य ॥

वेदादि । न॰ प्रणवे ॥

वेदानुवचनम् । न॰ नित्यस्वाध्यायलक्षणे मन्त्रब्राह्मणाध्ययने ॥ वेदस्यानुवचनम् ॥ वेदोऽनूच्यते गुरूच्चारणानन्तरं पठ्यते इति ॥ अथवा । वेदस्य अनुपश्चात् गुरूपासनाऽनन्तरम् वचनम्॰पठनम् ॥

वेदान्त : । पुं॰ उपनिषदि ॥ तदुपकारिशारीरकसूत्रादौ ॥ तथा च वेदानामन्तोऽवसानभागो वेदान्त इति व्युत्पत्तियोगात् श्योवेदान्तशब्दो वेदविभागोत्तरभेदेषूपनिषत्सु॰शारीरकादौतूपचरित इति ॥ वेदानामन्त निर्णये । प्रस्थानत्रयात्मकेशास्त्रे ॥ आसुप्तेरामृते : कालं नयेद्वेदान्तचिन्तयेतिसत्यासितो यावज्जीवाग्निहोत्रप्रयोगवन्निन्यत्वेन विहितं प्रवच॰

दि । गृहस्थादीनामुपयवासादिका
भ्यम् । तदुक्तम् । दिनेदिनेतुवेदा
न्तश्रवणाद्भक्तिसंयुतात् । गुरुशुश्रू
षयालब्धात्कृच्छ्राऽशीतिफलंलभे-
दिति ॥ वेदेषुनिखिलेषुतैलवदन्तोऽ
वस्थितोयः । तैलवद्वेदेवेदान्तःउ
प्रतिष्ठितइतिश्रवणात् ॥

वेदान्तकृत् । पुं॰ वेदान्तार्थसम्प्रदा
यप्रवर्त्तकेवेदव्यासादौ ॥

वेदान्तगः । त्रि॰ ब्रह्मज्ञे ॥ वेदा
न्तानामुपनिषदामर्थंब्रह्मगच्छति ।
गम्॰ । डप्रत्ययः ॥

वेदान्तसारः । पुं॰ वेदान्तस्यमथि
तार्थे ॥ वेदान्तस्यसारः ॥

वेदान्ती । पुं॰ ब्रह्मतत्त्वज्ञे ॥ येत्वे
तांविद्यात्मिकांचेतोवृत्तिमुपेक्ष्यके
वलतदनुकूलयुक्त्यनुसन्धानकौश-
लेनैवतुष्यन्ति॰तेतुनैयायिकादिस
दृशानिन्दिताएव । तदुक्तम् । वेदा
न्ताबहुतर्ककर्कशमतिग्रस्ताः परं
मायया॰ भाट्टाः कर्मकलाकुला
हतधियोद्वैतिवैशेषिकाः । अ
न्येभेदरताविवादकलहास्तेतत्त्वतो
वञ्चितास्तस्मात्सिद्धमतंस्वभावकम
यंधीरःपरंसंश्रयेत् ॥ इति ॥ वे
दान्ताउपनिषदःप्रमाणमस्यास्ति
इनिः ॥

वेदाभ्यासः । पुं॰ वेदानुशीलने ॥ स
पञ्चविधोयथादक्षः । द्वितीयेच

तथाभागेवेदाभ्यासोविधीयते । वे-
दाभ्यासोहिविप्राणांपरमंतपउच्य-
ते । ब्रह्मयज्ञःपरंज्ञेयःषडङ्गसहि
तश्चयः । वेदस्वीकरणपूर्वंविचारो
ऽभ्यसनंजपः ॥ तदानञ्चैवशिष्ये
भ्योवेदाभ्यासोहिपञ्चधा ॥ मत्स्य
लिखितौ नवेदमनधीत्यान्यांवि
द्यामधीयीतान्यत्रवेदाङ्गस्मृतिभ्यः ।

वेदारः । प॰ कृकलासे ॥ इ॰ चि॰
षः ॥

वेदारण्यम् । न॰ सुन्दर्यादेव्यासमधि
ष्ठितेपुण्यस्थाने ॥

वेदिः । पुं॰ पण्डिते । बुधे ॥ वे
त्ति । विद्॰ । इगुपधात्कित्
विदीतिइन् । न॰ अम्बष्ठायाम्
॥ स्त्री॰ परिष्कृतायांभूमौ ॥ प
रिष्कृता॰ यज्ञार्थं॰ पशुबन्धना
य॰ यज्ञपात्रासादनायचाश्रितसं-
स्काराभूमिर्वेदिरुच्यते ॥ विद्यते॰
शोधनेनज्ञायते॰ विचार्य्यते॰ प्रा
प्यतेवा । पूर्ववद्दिरिन् ॥ यद्वा ।
वेदयति॰ वेद्यतेवा । विदनिवा
सादौ॰ चुरादिः । अचइः ॥ अ
ङ्गुलिमुद्रायाम् ॥

वेदिका । स्त्री॰ चतुरस्रायांकर्मार्थवि
द्याम् ॥ वितर्द्याम् । प्राङ्गणादि
षुकृते॰ उपवेशनस्थाने ॥ स्वा
र्थेकः ॥

वेदिजा । स्त्री॰ द्रौपद्याम् । इतिहे

मचन्द्रः ॥

वेदितः । त्रि० ज्ञापिते ॥

वेदितव्यः । त्रि० विदुरे । ज्ञातरि ॥ इ० हे० चन्द्रः ॥

वेदी । पुं० पण्डिते ॥

वेदी । स्त्री० सरस्वत्याम् ॥ वेदिशब्दार्थे ॥

वेदीतीर्थम् । न० तीर्थविशेषे ॥

वेदीशः । पुं० द्रुहिणे । विधौ । ब्रह्मणि ॥

वेदोदयः । पुं० रवौ । सूर्ये ॥

वेदोदितः । त्रि० वेदोक्ते ॥

वेदोपकरणम् । न० शिक्षादिवेदाङ्गे ॥ वेदस्यउपकरणम् ॥

वेद्धव्यः । त्रि० ताडयितव्ये ॥

वेद्यः । त्रि० वेदितव्यवस्तुनि । ज्ञेये । संविद्विषयभूते ॥ वेदितुंयोग्यः । विदेर्ज्ञानार्थात्कर्मणिण्यत् । सचार्थकृत्यव्यत्ययस्त्वर्हार्थे । इत्याहभगवान्शङ्कराभाष्ये । निःश्रेयसार्थिभिर्वेदनार्हत्वाद्वेद्यइति ।

वेधः । पुं० व्यधे । वेधने ॥ वेधनम् । विधविधाने । घञ् ॥ चेपणे ॥ गभीरतायाम् । गहरा० इति भाषाप्र० ॥

वेधकः । पुं० अम्लवेतसे ॥ कर्पूरे । न० धान्याके ॥ त्रि० वेधकर्त्तरि ॥

वेधनम् । न० वेधे । बींधना० इ०भा० ॥ विध० ल्युट् ॥ वेधसाधने ॥ विध्यतेऽनेन । करणेतिल्युट् ॥

वेधनिका । स्त्री० मणिमङ्ग्वादिवेधनोपकरणे । आस्फोटन्याम् । भौंरी० वर्मी० इ० भा० ॥ विध्यतेऽनया । विधविधाने । ल्युट् । स्वार्थेकः ॥

वेधमुख्यः । पुं० कर्चूरे ॥ वेधमुख्यः ॥

वेधमुख्यकः । पुं० कर्चूरके ॥ द्राविडके । काल्यके ॥ स्वार्थेकन् ॥

वेधमुख्या । स्त्री० कस्तूर्याम् वेधमुख्या ॥

वेधाः । पुं० परमेष्ठिनि । धातरि ॥ बुधे ॥ विष्णौ । हृषीकेशे ॥ रवौ ॥ ब्रह्मतार्क्ष्ये ॥ विदधाति । डुधाञ् । विधाञोवेधचेतिविधादेशोऽसिप्रत्ययश्च ॥ विधति । विधविधाने । असुन्वा ॥

वेधसम् । न० ब्रह्मतीर्थे । अङ्गुष्ठमूले । इ०श०चं०का० ॥

वेधितः । छिद्रिते । विद्धे । विंधा० बींधा० इ०भा० ॥ वेध्यतेस्म । विध० णिच्क्तोऽनेकार्थः ः

वेधी । पुं० अम्लवेतसे ॥ त्रि० वेधकर्त्तरि ॥ वेधविशिष्टे ॥

वेधिनी । स्त्री० रक्तपायाम् ॥ मेथिकायाम् ॥

वेध्यम् । न० लक्ष्ये ॥ त्रि० वेधनीये ॥

वेनः । पुं० प्रजापतौ ॥ अजति ।

अज० । धाप्वस्यज्यतिभ्योनः । अजीर्णे ॥

वेन्ना । स्त्री० नद्याम् ॥ वनति । वन शब्दे सम्भक्तौ वा । वनेरिच्चोपधाया इति० नः । लघूपधगुणः ॥

वेपथुः । पुं० कम्पे ॥ वेपनम् । टुवेपृ कम्पने । ट्वितोऽथुच् ॥

वेपनम् । न० कम्पने ॥ टुवेपृ० । ल्युट् ॥

वेपः । न० अनवद्ये ॥

वेपमानः । त्रि० भयेनकम्पमाने ॥

वेमः । पुं० वायदण्डे ॥ यथा । वायदण्डः पुंसि वेमा वेमो ना वेमनद्वयोरिति श० र० इ० ली० ॥

वेमा । पुं० न० वायदण्डे । तन्तुवायदण्डो वियु० इ० गो० भा ॥ वयति० अनेन । वेञ्० । वेञः सर्वत्रेति० इमनिच् । अर्द्धर्चादिः । सामनी० वेमनी० इतिवृत्तिप्रयोगात् ॥

वेमनः । त्रि० वेमवति ॥ वेमाऽस्यास्ति । पामादित्वात् नः ॥

वेरम् । न० कलेवरे । शरीरे ॥ वार्त्ताकौ । वृन्ताके ॥ कुङ्कुमे । घुसृणे ॥

वेरकम् । न० कर्पूरे ॥

वेरटः । पुं० नीचे ॥ न० बदरीफले ॥ त्रि० मिश्रीकृते ॥

वेलम् । न० आरामे । उपवने । कृत्रिमवने ॥

वेला । स्त्री० काले । समये ॥ मर्यादायाम् । सीमायाम् ॥ होरायाम् ॥ यथा । चतुर्विंशतिवेलाभिरहोरात्रं प्रचक्षते । पश्चिमादहोरात्राद्धि होराणां विद्यते क्रमः इ० वह्निपुराणम् ॥ अब्धेः कूले ॥ अब्धेर्विकारे । अब्ध्यम्बुविकृतौ ॥ अक्लिष्टमरणे ॥ रोगे ॥ ईश्वरस्य भोजने ॥ बुधस्य भार्यायाम् ॥ वाचि ॥ वेलति । वेल्ल गतौ । पचाद्यच् ॥ वेल्यते० अनया वा । वेल कालोपदेशे । गुरोश्च हलः । टाप् ॥

वेलाकूलम् । न० ताम्रलिप्तदेशे ॥

वेलायाम् । अ० कालपरिमाणे ॥

वेल्लम् । न० पुं० विडङ्गे ॥ वेल्लति । वेल्ल चलने । पचाद्यच् ॥ अभ्यनुज्ञाने ॥

वेल्लजम् । न० मरिचे ॥ वेलनम् । वल्ल० । घञ् ॥ वेल्ले जायते । जनी० । अन्तर्भावितण्यर्थः । अन्येष्वपीति डः ॥

वेल्लनम् । न० भूमावश्वस्य लुण्ठने । लुठने । अङ्गपरिवर्त्तने ॥ बलनइ० प्र० रोटिकानिर्माणार्थकाष्ठे ॥

वेल्लनी । स्त्री० मालादूर्वायाम् ॥

वेल्लन्तरः । पुं० मजलदेशप्रसिद्धे वृक्षविशेषे । वीरतरौ ॥ तथा । वेल्लन्तरो जगति वीरतरुः प्रसिद्धः श्वेतासितारुणविलोहितनीलपुष्पः ।

श्यामातितुल्यकुसुमः शमिसूक्ष्मपत्रः स्तोत्कण्टकोऽचलदेशजएष वृक्षः ॥ वेल्लन्तरोरसेपाकेतिक्तास्त्याकफापहः । मूत्राघाताश्मजिद्ग्राहीयोनिमूत्रानिलार्त्तिजित् ॥

वेल्लहल: । पुं॰ केलिनागरे ॥

वेल्लि: । स्त्री॰ लतायाम् ॥

वेल्लिकाख्या । स्त्री॰ वृक्षविशेषे । मरुन्मालायाम् । बिल्वपत्र्याम् ॥

वेल्लितम् । न॰ चेष्टिते ॥ गमने ॥ त्रि॰ कुटिले ॥ विधुते । कम्पिते ॥ वेल्लतिस्म । वेल्ल॰ । गत्यर्थेतिक्तः ॥

वेश: । पुं॰ वेश्यागृहे ॥ गृहमात्रे ॥ नेपथ्ये । अलङ्कारादिकृतशोभायाम् ॥ विशन्त्यत्र । विशप्रवेशने । हलश्चेतिघञ् ॥ विशति॰वेशनम्॰ विश्यतेवा । विश॰ । पदरुजविशस्पृशोघञ्॰अज्वा । पण्यस्त्रियाः भृतौ । प्रवेशे ॥

वेशक: । पुं॰ गृहे ॥ वेशएव । स्वार्थेकः ॥

वेशजीवी । त्रि॰ वेशवति ॥

वेशदान: । पुं॰ सूर्य्यशोभायाम् ॥

वेशधारी । पुं॰ छलतपस्विनि ॥ त्रि॰ वेशधारके ॥

वेशनम् । न॰ चणकचूर्णे । बेसण॰ इ॰भा॰प्र॰ ॥ यथा । दोलयच्चणकान्नान्तु निस्तुषायन्त्रपेषिताः । तच्चूर्णंवेशनंप्राहुःपाकशास्त्रविशारदैः ॥

वेशनमोदक: । पुं॰ बुंदियालाडू॰ इतिख्यातेखाद्यप्रभेदे ॥ यथा । सुक्ष्मामोदकवत्कार्य्यावेशनस्यचमोदकाः । वेशनालघवःशीताः किञ्चिद्वातकरास्तथा । विष्टम्भिनोज्वरघ्नाश्चपित्तरक्तकफापहाः ॥

वेशनवटिका । स्त्री॰ पकौरी॰ इ॰प्र॰ खाद्यद्रव्ये ॥ वटिकावेशनस्याक्ता घितायांनिर्म्मिता । रुच्याविष्टम्भजननीबल्यापुष्टिकरीस्मृता ॥

वेशन्त: । पुं॰ पल्वले । अल्पसरसि ॥ विशन्त्यत्रभेकादयः । विश॰ । तॄविशिभ्यांझच् ॥ अग्नौ ॥

वेशर: । पुं॰ अश्वतरे ॥

वेशवार: । पुं॰ वेगर॰इ॰भा॰प्र॰ मांसादिसाधकद्रव्ये ॥ यथा । द्रव्याणिवेशवारस्यनागवल्लीदलानिहि । तंडुलाश्चलवङ्गानिमरिचानिसमासतः ॥

वेशि: । पुं॰ जन्मकालेसूर्य्याक्रान्तराशेर्द्वितीयेराशौ ॥ यथा । सूर्य्याद्द्वितीयभवनंवेशिस्थानंप्रकीर्त्तितंयवनैरिति ॥

वेशीजाता । स्त्री॰ पुष्पदामीलतायाम् ॥

वेश्मकलिङ्क: । पुं॰ चटके ॥

वेश्मकूल: । पुं॰ अचेण्डायाम् ॥

वेश्म । न॰ गृहे । सद्मनि ॥ विशन्त्यत्र । विश॰ । मनिन् ॥

वेश्मनकुल : । पुं॰ गन्धमूषिके ॥

वेश्मभू : । स्त्री॰ गृहरचनार्थच्छिन्नभूमौ । वास्तुनि ॥ वेश्मनोभू : ॥

वेश्यम् । न॰ वेश्यालये ॥ वेशेभव : । दिगादित्वाद्यत् ॥

वेश्या । स्त्री॰ वारस्त्रियाम् । गणिकायाम् । रूपाजीवायाम् ॥ वेशेननेपथ्येनसम्पद्यते । कर्मवेशाद्यत् ॥ वेशेवेश्यागृहेभवा वा । दिगादित्वाद्यत् ॥ वेश : प्रवेशोऽस्त्यस्या वा । अन्येभ्योपीतियत् ॥ पाठायाम् ॥

वेश्यागण : । पुं॰ वेश्यावारे । वेश्यासमूहे ॥

वेश्याचार्य्य : । पुं॰ पीठमर्द्दे ॥

वेश्याजनसमाश्रय : । पुं॰ । गणिकागृहे । वेशे ॥ वेश्याजनस्यसमाश्रयोवासस्थानम् ॥

वेश्यालय : । पुं॰ वेशे ॥

वेष : । पुं॰ वेशे । प्रसाधने । अलङ्काररचनादिकृतशोभायाम् ॥ विवेष्टि । विष्लृव्याप्तौ । अच् ॥

वेषण : । पुं॰ कासमर्द्दे । पचोपस्करे ॥

वेषणा । स्त्री॰ वितुन्नके । धन्याके ॥

वेष्ट : । पुं॰ वेष्टने ॥ निर्यासे । श्रीवेष्टे । सरलरसे । वेष्टते । वेष्टवेष्टने । अच् ॥

वेष्टक : । पुं॰ कुष्माण्डे । पुष्पफले ॥ प्राचीरे । वृतौ ॥ न॰ उष्णीषे ॥ निर्यासे ॥ श्रीवेष्टे ॥ त्रि॰ वेष्टनकारके संवेष्टके ॥

वेष्टनम् । न॰ कर्णशष्कुल्याम् ॥ उष्णीषे ॥ मुकुटे ॥ वृतौ । गुग्गुलौ ॥ व्यावर्तने । वेठन॰ लपेटन॰ इ॰ भा॰ प्र॰ ॥

वेष्टनक : । पुं॰ रतिबन्धविशेषे ॥ यथा । ऊर्द्ध्वगंपादमेकन्तुभुजान्तरैर्वेष्टयेद्यदि । कान्तकचाश्रितांनारींबन्धोवेष्टनक : स्मृत : ॥

वेष्टनवेष्टक : । पुं॰ रतिबन्धविशेषे ॥ यथा । ऊर्द्ध्वपादद्वयंनार्याभुजाभ्यांवेष्टयेद्यदि । कराभ्यांकण्ठमालिङ्ग्यबन्धोवेष्टनवेष्टक : ॥

वेष्टनिका । स्त्री॰ वेढमिकायाम् ॥

वेष्टवंश : । पुं॰ कण्टकिले ॥

वेष्टसार : । पुं॰ श्रीवेष्टे ॥

वेष्टित : । त्रि॰ वलयिते । संवीते । रुद्धे । आवृते ॥ न॰ लासके ॥ स्त्रीणांकरणान्तरे ॥ वेष्ट्यतेस्म । विष्टवेष्टने । क्त : ॥

वेष्प : । पुं॰ जले । नीरे । पानीये ॥ विवेष्टि । विष्लृ॰ । पानीविषिभ्य : प : । इतिप : ॥

वेष्य : । पुं॰ नटे । विविधकृत्रिमाकारेणसम्पद्यते ॥

वेष्या । स्त्री॰ गणिकायाम् ॥ विवेष्टि । विष्लृव्याप्तौ । अघ्न्यादित्वाद्यत् ॥

वेसनम् । न॰ चणकादालिचूर्णे । वेशने ॥

वेसर : । पुं॰ सङ्कराश्वे । अश्वतरे ॥

वेसवारः । पुं० व्यञ्जनादीसंस्कारार्थं दीयमानेहिङ्ग्वादौ । उपस्करे ॥ द्रव्याणिवेसवारस्यनागवल्लीदलानि हि । तण्डुलाश्चलवङ्गानिमरिचानि समासतः ॥ सर्वव्यञ्जनपरिभाषायान्तु । हिङ्गुद्रिमरिचंजीरंहरिद्राधान्यकंतथा । क्रमेणहिगुणंसर्वंवेसवारमिमंजगुः । स्तोकेनवारिणासर्वंव्हृतंवस्त्रगालितम् । मापयाव्यञ्जने देयंक्वासमर्दंचततस्मृतम् ॥ वेसनम् । विसप्रेरणे । घञ् । वेसंप्रेरणंवारयति० वृणोति३ा । वृञ्० । कर्मण्यण् ॥

वेहत् । स्त्री०गर्भोपघातिन्यामगवि ॥ विहन्तिगर्भम् । संश्चत्तृपद्वेहदित्यतिप्रत्ययेनसाधुः ॥

वेहारः । पुं० स्वनामख्यातेदेशविशेषे ॥ यथा । वेहारेचैवश्रीहट्टे कोशलेशवकर्णिके । अष्टादशभुजाकार्या माहेन्द्रेचहिमालये० इतिमत्स्यसूक्ते ५० पटलः ॥ महिषासुरमर्द्दिनीतिशेषः ॥

वै । अ० हेतौ ॥ पादपूरणे ॥ सम्बोधने ॥ विशेषे ॥ स्मरणार्थे ॥ अनुनये ॥ प्रसिद्धौ ॥ निश्चये ॥ वाति । वागतिगन्धनयोः । ०मीगत्यादौवा । डैः ॥

वैंशतिकः । त्रि० विंशत्याक्रीते ॥

वैकक्षम् । न० तिर्यग्वक्षोलम्बिमाल्ये ॥

वैकक्षकम् । न० उरस्युपवीतवत्तिर्यक्क्षिप्तमाल्ये ॥ विशिष्टःकक्षोस्मात्० विकक्षमुरस्तत्रभवम् । तत्रभवइत्यण् । स्वार्थेकन् ॥

वैकङ्कतः । पुं० विकङ्कते । विकङ्कतस्यावयवोविकारोवा । पलाशादित्वादञ् ॥

वैकटिकः । पुं० मणिकारे ॥

वैकर्णः । पुं० वात्स्ये ॥ विकर्णस्यापत्यम् । विकर्णशुङ्गच्छगलाद्वत्सभरद्वाजात्रिष्वित्यण् ॥

वैकर्णेयः । पुं० काश्यपे ॥ विकर्णस्यापत्यम् । विकर्णकुषीतकात्काश्यपइतिढक् ॥

वैकल्पिकः । त्रि० विकल्पेनभवे ॥

वैकल्यम् । न० विकलतायाम् ॥ अविवेके । विकलस्यभावः । ष्यञ् ॥

वैकारिकः । पुं० देवःनाहङ्कारणेसात्त्विकाहङ्कारे ॥ देवतावर्गे ॥ बन्धविशेषे ॥ सप्तबन्धस्तेषां० येविकारानेवभूतेन्द्रियाहङ्कारबुद्धिरूपान्०पुरुषबुद्ध्यापासते । तान्प्रतीदमुच्यते०दशमन्वन्तराणीहतिष्ठन्तीन्द्रियचिन्तकाः । भौतिकास्तुशतंपूर्णंसहस्रन्त्वाभिमानिकाः ॥ बौद्धादशसहस्राणितिष्ठन्तिविगतज्वराः । पुरुषंनिर्गुणंप्राप्यकालसङ्ख्यानिवर्त्तते ॥ तेखल्वमीविदेहायेषांवैकृति

कोबन्धः ॥
वैकुण्ठः । पुं॰ विष्णौ । कृष्णे । वि
ष्टरश्रवसि ॥ विकुण्ठाया अपत्यम् ।
शिवाद्यण् । यथोक्तं विष्णुपुराणे ।
चाक्षुषस्यान्तरे देवो वैकुण्ठः पुरुषो
त्तमः । विकुण्ठायामसौ जज्ञे वैकु
ण्ठैर्दैवतैः सहेति ॥ अपिच । कु
ण्ठं जडस्वविष्यौघं विशिष्टं स्वकरोति
या । विकुण्ठां प्रकृतिं वेदास्तस्याः स्व
यदृच्छताम् ॥ गुणाश्रयेण भगवान्
तस्यां जातः स्वसृष्टये । परिपूर्णत
मं तेन वैकुण्ठं स्वविदुर्बुधाः ॥ विग
ता कुण्ठा नाशो यस्य स विकुण्ठः ॰ वि
कुण्ठं स्थानं ज्ञानं वा अस्तित्वरूपत्वेन
आश्रयत्वेन वाऽस्य । ज्योत्स्नादि
त्वादण् ॥ यद्वा । विविधा कुण्ठा
माया विद्यतेऽस्य ॥ अण् ॥ यद्वा ।
विकुण्ठानां ईशानामयं नियन्ता ॰
ज्ञाता वा । तस्येदमिति ॰ शैषिकत्वा
॰ अण् ॥ विगता कुण्ठाऽस्मात् प्रज्ञा
द्यण् ॥ स्वं तद्रूपाभिधेयं विष्णोर्धाम
विशेषे । तद्वर्णनं यथा । उपरिष्टा
त्स्थितैरष्टौ कोटयः सत्यमीरितम्
। सत्यादुपरि वैकुण्ठो योजनानां प्रमा
णतः ॥ भूर्लोकात् परिसङ्ख्यातः
कोटिरष्टादशप्रभोः । यत्रास्ते श्रीप
तिः साक्षात् सर्वेषामभयप्रदः ॥
वैकुण्ठादुत्तरे शैवो लोकः षोडश
कोटयः । तिर्यगेव मण्डलाकेला

साक्ष्यस्तु पर्वतः ॥ पार्वत्या सहितः
शम्भुर्यत्रास्ते स्वगणैर्वृतः । इति
पाद्मे स्वर्गखण्डे ६ अध्यायः ॥
अपिच । अमृतं शाश्वतं नित्यमनन्तं
परमं पदम् । हिरण्मयं मोक्षपदं ब्र
ह्मानन्दसुखाह्वयम् ॥ एवमादिगु
णोपेतं तद्विष्णोः परमं पदम् । यज्ञ
स्यानभिवर्त्तन्ते तद्धाम परमं हरेः ॥
न हि वर्णयितुं शक्यं कल्पकोटिशते
रपि । अपि द्रष्टुमशक्यं तद्ब्रह्मरुद्रा
दिदैवतैः ॥ ज्ञानेन शास्त्रमार्गेण
द्रक्ष्यते योगिपुङ्गवैः । तत्स्थानमु
पभोक्तव्यमव्यक्तब्रह्मसेविनाम् ॥
श्रीगाङ्घ्रिभक्तिसेवैकरसभोगविव
र्जिताः । महात्मानो महाभागा भ
गवत्पदसेवकाः ॥ तद्विष्णोः प
रमं धाम यास्ति ब्रह्मसुखप्रदम् । ना
नाजनपदाकीर्णं वैकुण्ठं तद्धरेः प
दम् ॥ प्राकारैश्च विमानैश्च सौधैर
त्नमयैर्युतम् । तन्मध्ये नगरी दिव्या
सायोध्येति प्रकीर्त्तिता ॥ चतुर्द्वार
समायुक्ता हेमगोपुरसंयुता । च
ण्डादिद्वारपालैस्तु कुमुदाद्यैः सु
रक्षिता ॥ चण्डप्रचण्डौ प्राग्द्वारे
याम्ये भद्रसुभद्रकौ । वारुण्यां जय
विजयौ सौम्ये धातृविधातरौ । कु
मुदः कुमुदाक्षश्च पुण्डरीकोऽथ वाम
नः । शङ्कुकर्णः सर्वनिद्रः सुमु
खः सुप्रतिष्ठितः तस्मिन् सर्वा वि

निर्मुक्ताः प्राप्नुवन्ति सुखं पदम्। यं प्राप्य न निवर्त्तन्ते तस्मान्मोक्ष उदाहृतः॥ मोक्षं परं पदं लिङ्गममृतं विष्णुमन्दिरम्। अक्षरं परमं धाम वैकुण्ठं शाश्वतं परम्॥ नित्यञ्च परमव्योम सर्वोत्कृष्टं सनातनम्। पर्य्यायवाचकान्यस्य परं धाम्नो च्युतस्य हि॥ इति पाद्मोत्तरखण्डे २८ अध्यायः॥ विहतस्यैतन्नामसाहस्रे भाष्यकारैः विविधा कुण्ठा गतेः प्रतिहतिर्विकुण्ठा। तस्याः विकुण्ठायाः कर्त्ता वैकुण्ठः। तथेद मिच्यण्। जगदारम्भे विश्लिष्टानि भूतानि परस्परं संश्लेषयन् तेषां गतिं प्रतिःधाति। मया संश्लेषिता भूमिरद्भिर्व्योम च वायुना। वायुश्च तेजसा सार्द्धं वैकुण्ठत्वं ततो मम॥ इति शान्तिपर्व्वणीति॥ भूमिरद्भिः सार्द्धं मया संश्लेषिता परस्पराधारिणः स्थापिता। पृथिव्यादीनि भूतानि उत्तरोत्तरैरंशैर्विकुण्ठयामीति विकुण्ठः विकुण्ठ एव वैकुण्ठः। इति विकुण्ठायाः कर्त्तेति वेति शङ्कार्थः॥ शक्रे। वासवे॥ सितार्जके॥

वैकृतः। त्रि॰ सात्त्विके। न॰ वैकृत्ये। बीभत्सरसे॥ विकृतमेव। प्रज्ञादाण्॥ त्रि॰ बीभत्सरसालम्बने मांसशोणितादौ। दुर्निमित्ते॥

वैकृताहङ्कारः। पुं॰ सात्त्विकाभिमाने॥

वैकृत्यम्। न॰ बीभत्सरसे॥ त्रि॰ तदालम्बने

वैक्रान्तम्। न॰ मणिविशेषे। तत्पर्य्यायगुणौ यथा। वैक्रान्तश्चैव विक्रान्तं नीचवज्रं कुवज्रकम्। गोनाशः क्षुद्रकुलिशं नीचं वज्रञ्च गोनसः॥ ...वैक्रान्तं रसवीर्य्यादिभिः समम्। कुष्ठविषघ्नं पुष्टिदं सुरसायनम्। वैक्रान्तं वज्रसादृश्यं बलदं सर्वीयकम्। यथाप्यभावे वज्रस्य ग्राह्यं वैक्रान्तमुत्तमम्॥ वज्राकारतया वैप्रसन्नाहरणाय सर्वरोगाणाम्। तद्विक्रान्तिं धत्ते तद्वैक्रान्तं बुधैरिदं कथितम्॥

वैक्लव्यम्। न॰ वैकल्ये॥ व्याकुलतायाम्॥

वैखरी। स्त्री॰ बुद्ध्युत्थितकण्ठगतनादरूपवर्णे॥ यथा। मूलाधारात्प्रथममुदितो यस्तु तारः पराख्यः पश्चात् पश्यन्त्यथ हृदयगो बुद्धियुङ् मध्यमाख्यः। वक्त्रे वैखर्य्यथ रुरुदिषोरस्य जन्तोः सुषुम्णा बद्धस्तस्माद्भवति पवनप्रेरितो वर्णसङ्घः॥ इत्यलङ्कारकौस्तुभे प्रथमः किरणः। अस्यार्थः। अस्य तारो नादो वर्णरूपः सन्नाभिरूपमूलाधारात् प्रथममुदयप्राप्तः सन् पराख्यासंज्ञो वर्णस्तथाभूतो भवति। अथानन्तरं स ए

वह्नद्येचित्त गतध्वेनुरोऽन्नसमये-
नासिकाद्वारायथाकथञ्चिद्वर्णित ।
कण्ठदेशाज्जातोनासामध्यस्थितसुषु
म्नामार्गाश्रयः । तथाचनासाद्वारे
णयथाकथञ्चिन्नादस्वरूपः प्रत्ययो
भवतीत्यर्थः । तस्माद्वैखरीदशा
पन्नाच्चोदात्तपवनप्रेरितोवर्णसमू-
होऽत्र हि : सर्वेषांप्रत्ययविषयीभव
तीत्यर्थः । परापश्यन्तीदशापन्न
स्तुयोगिनामेवप्रत्ययोनतुसर्वेषामि
त्यपिबोध्यमितितट्टीका ॥ हरिर
प्याह । वैखर्यामध्यमायाश्चपश्य
न्त्याश्चैतदद्भुतम् । अनेकतीर्थभे
दायास्त्रय्यावाचः परंपदमिति ।
तत्रश्रोत्रविषयावैखरीमध्यमाहृद
यदेशस्थापदप्रत्ययानुपपत्त्याव्यव-
हारकारणम् । पश्यन्तीतुलोकव्य
वहारातीतायोगिनान्तुतत्रापिप्रकृ-
तिप्रत्ययविभागावगतिरस्ति । प
रायान्तुनेतिव्याख्यातम् । स्वरू
ज्योतिरेवान्तः परावागनपायि
नी । तस्यांदृष्टस्वरूपायामधिका
रोनिवर्त्ततइत्युक्तेः । अनेनती
र्थभेदायाः नामाख्यातादिवर्णा-
शेष्वस्त्रशब्दादिरूपानेकभेदायाः
। आहुस्त्वपिचत्वारिवाक्परिमि
तानीतिकठत्मन्त्रश्रुतितद्व्याख्या
तारः ॥

वैखानसः । पुं॰ तपोविशेषाश्रमसं-
स्थे तापसविशेषे । वानप्रस्थे । ब्र
ह्मणोनखाज्जात । येनखास्तेवै
खानसाइतिस्मृतेः ॥ यद्वा । विख
नसमुनिप्रोक्तं सूत्रमधिकृत्यतन्मा-
र्गानुसारीवैखानसः ॥

वैगुण्यम् न॰ विगुणत्वे

वैचक्षण्यम् । न॰ विचक्षणत्वे ।

वैचित्त्यम् । न॰ अविवेके ।

वैचित्र्यम् । न॰ विचित्रतायाम् ॥

वैजननः । पुं॰ सूतिमासि । विजा
यतेऽस्मिन् । जनी॰ करणे तिष्ठ्यु
ट् । विजननएव । प्रज्ञाद्यण् ॥
यद्वा । विजननस्यगर्भमोचनस्या
यम् । तस्येदमित्यण् नवमेदश
मेवापिप्रबलैः सूतिमारुतैः ।
निःसार्य्यतेबाणइवजन्तुश्छिद्रेणसत्-
त्वरः ॥

वैजपायनः । पुं॰ ऋष्यन्तरे ।

वैजयन्तः । पुं॰ गृहे । शक्रध्वजे
शक्रप्रासादे ॥ वैजयन्त्यः पताकाः
सन्त्यस्य अर्शआद्यच् ॥

वैजयन्तिकः । पुं॰ धृतपताके । पता
किनि । वैजयन्त्यस्यास्ति व्रीह्या
दिभ्यश्चेतिठन् ॥ यद्वा । वैजयन्त्या
पताकयाचरति । चरतीतिठक् ।

वैजयन्तिका । स्त्री॰ पताकायाम् ॥
जयन्तीवृक्षे । नाडीतिप्रसिद्धे ॥ अ
ग्निमन्थे ॥ विजयन्तस्यायम् । तस्ये
दमित्यण् । स्वार्थेकन् ॥ यद्वा ।

वैजयन्तीशब्दादिवेप्रतिकृताविति कन्।

वैजयन्ती। स्त्री॰ पताकायाम्॥ जयन्तीपादपे॥ अग्निमन्थे॥ विजयते। जिपभिभवे। तृभूवहीतिझच्। विजयन्त एव यम्। तस्येदमित्यण्॥ पञ्चवर्णमय्यां जानुपर्यन्तलम्बितायां मालायाम्॥ सा चोक्ता विष्णुपुराणे। पञ्चरूपा च या माला वैजयन्ती गदाभृतः। सा भूतहेतुसङ्घातभूतमाला च वै द्विजेति। पञ्चरूपा मुक्तामाणिक्यमरकतेन्द्रनीलवज्रसमानवर्णा हरेर्या वैजयन्त्याख्या माला। सा भूतहेतूनां पञ्चतन्मात्राणां सङ्घातः पङ्क्तिः भूतमाला च महाभूतपङ्क्तिश्चेति सूक्ष्मस्थूलभूतमयीत्यर्थः॥

वैजयिः। पुं॰ अर्जुनात्मजे॥ विजयस्यापत्यम्। इञ्॥ जिनचक्रवर्त्तिविशेषे। मघवति॥

वैजयिकः। त्रि॰ विजयस्य निमित्ते॰ विजयस्य निमित्तं॰ संयोगः उत्पातो वा। तस्य निमित्तमितिठञ्॥

वैजवापः। पुं॰ गृह्यभेदे॥

वैजिकः। पुं॰ सद्योऽङ्कुरे॥ न॰ शिग्रुतैले॥ हेतौ। कारणे॥ त्रि॰ बीजसम्बन्धे॥ प्रतिषिद्धमैथुनसङ्गत्यादिना च पैतृककरेतोदोषजे पापे॥

वैज्ञानिकः। त्रि॰ प्रवीणे। निपुणे। शिल्पिनि। कृतमुखे। कुशले॥ विज्ञानजनिते॥ विज्ञानं बुद्धिः विज्ञानेन युक्तः। तत्र नियुक्त इति ठक्॥ यद्वा। विज्ञानेन जयति। तेन दीव्यति खनति जयति जितमिति ठक्॥

वैडालः। त्रि॰ विडालसम्बन्धिनि॥

वैडालव्रतम्। न॰ दुष्टाचारविशेषे॥ यथा। यस्य धर्मध्वजो नित्यं शक्रध्वज इवोच्छ्रितः। प्रच्छन्नानि च पापानि वैडालं नाम तद्व्रतम्॥

वैडालव्रतिकः। पुं॰ छद्मतापसे। सर्वाभिसन्धिनि॥ यथाह मनुः। धर्मध्वजी सदा लुब्धश्छाद्मिको लोकदम्भकः। वैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसन्धकः॥ इति॥ विडालव्रतेन चरतीति वैडालव्रतिकः। विडालो हि प्रायेण मूषिकादिहिंसार्थितया ध्याननिष्ठ इव विनीतः सन्नवतिष्ठते तद्वदुपचरितोऽयं शब्दः॥

वैडालव्रती। पुं॰ भण्डतापसे॥ वैडालव्रतिनः पापाः सर्वधर्मविनाशकाः। सद्यः पतन्ति पापेषु कर्मणस्तस्य तत्फलम्॥

वैणवम्। न॰ वेणुफले॥ वेणोः फलम्। विल्वादिभ्योऽण्। विधेर्मयटो लुक्। त्रि॰ वेणोर्विकारे॰ दण्डादौ॥ वेणोर्विकारः। पूर्ववदण्॥ पुं॰ राज्ञि। उपनयने वैणवदण्डे॥

वैणविकः । त्रि० वेणुवादे । वेणुध्मे ॥ वेणोर्विकारः । अरञ् । वैणवं शिल्पमस्य । शिल्पमिति ठक् ॥

वैणवी । स्त्री० वंशरोचनायाम् । वेणोर्विकारा । बिल्वादण् । ङीप् ॥

वैणिकः । त्रि० वीणावादे । वीणा० तद्वादनं शिल्पमस्य । शिल्पमिति ठक् ॥

वैणुकः । पुं० वेणुवादिनि ॥ न० तोत्रे । गजप्रतोदनदण्डे । हस्तिचालनार्थे लौहमुखवंशदण्डे ॥ वेणुना निर्वृत्तम् । निर्वृत्ते चक्षुरादिभ्य इति ठक् । इसुसुक्तान्तात्कः ॥ साभ्वर्य० गुडादिभ्यष्ठञ् ।

वैण्यः । पुं० पृथुनाम्नि धराधीशे ॥ यथा । वेणस्य मथिते पाणौ सम्बभूव महामुने । वैण्यो नाम महीपालो यः पृथुः परिकीर्त्यते ॥

वैतंसिकः । त्रि० कौटिके । मांसिके । मांसविक्रेतरि ॥ वीतंसेन मृगपक्ष्यादिरक्षणोपायेन चरति । चरतीति ठक् ॥

वैतण्डिकः । त्रि० वितण्डावादिनि ॥

वैतत्यम् । न० महत्त्वे ॥ विततस्य भावः । ष्यञ् ॥

वैतथ्यम् । न० वितथस्य भावे । असत्यत्वे ॥ वैतथ्यं सर्वभावानां स्वप्न आहुर्मनीषिणः । भावे ष्यञ् ।

वैतनिकः । त्रि० भृतके । भृतिभुजि । वेतनेन कर्म करोति ॥ वेतनेन जीवति । वेतनादिभ्यो जीवतीति ठक् ॥

वैतरणिः । स्त्री० वैतरण्याम् । इति रुद्रः ॥

वैतरणी । स्त्री० धातुमातरि । राक्षसानां जनन्याम् ॥ तीर्थविशेषे ॥ नरकनद्याम् । विण्मूत्रपूयशोणितकेशनखास्थिमेदोमांसवसावाहिन्यां तनद्याम् ॥ यथा । नदी वैतरणी नाम दुर्गन्धा रुधिरावहा । उष्णतोया महावेगा अस्थिकेशतरङ्गिणीति यमदर्भिः ॥ विगतस्तरणिर्यत्र० तत्र भवत्यण् ॥ विगता तरणिर्नौर्यत्र वा । प्रज्ञाद्यण् ॥ वितरणेन दानेन लभ्यते० इति वा । शिषद्रूयण् । ङीप् । यमद्वारे महाघोरे तप्ता वैतरणी नदी । तां सन्तर्तुं ददाम्येनां कृष्णां वैतरणीं च गामिति वैतरणीगोदानान्तरं प्रार्थनामन्त्रः ॥

वैतसः । पुं० अम्लवेतसे ।

वैतानम् । न० श्रौतकर्मणि । गार्हपत्यकुण्डस्थानग्नीन्० आहवनीयादिकुण्डेषु वितत्य क्रियत इति ।

वैतानिकः । पुं० श्रौतहोमे । अग्निहोत्रे ॥ गार्हपत्यकुण्डस्थानामग्नीनामाहवनीयदक्षिणाग्निकुण्डयोर्विहारो वितानम्० तत्र भवः । ठञ् कर्मण्योगिनि ॥

वैतालिकः । पुं० खिट्टिताले ॥

त्रि० बोधकरे । मङ्गलपाठके । स्तुत्यादिना प्रातर्जागरणकारिणि ॥ विविधैर्नतालैन० शब्दं नयचरति । चरतीति ठक् ॥ वैतालिकास्तुकविभिः कथ्यन्ते सौख्यशायिकाः० इत्यन्यत्र ॥

वैतालीयम् । न० छन्दोभेदे ॥ षड्विषमेऽष्टौ समे कलास्ताश्च समे स्युर्नो निरन्तराः । न समात्र पराश्रिता कला वैतालीयेऽन्ते रलौ गुरुः ॥ यथा । घुसृणेन मदेन चर्चितं तव यन्निन्दति राधिके कुचम् । मुदमातनुतेऽश्वपक्षिमं तद्वैतालीयंफलं हरेः ॥

वैदग्धी । स्त्री० भङ्ग्याम् । सुभनिमौलिकायाम् ॥ वैदग्ध्ये ॥ शोभायाम् ॥ विदग्धस्य भावः । ब्राह्मणादित्वात् ष्यञ् । षित्वान्ङीष् । यलोपः ॥ भर्त्तानिःश्वसितेऽप्यसूयति० मनोजिघ्रः सपत्नीगणः० श्वश्रूरिङ्गितदैवतं० नयनयोरीहालिहोयातरः । तद्दूरादयमञ्जलिः० किममुनादृग्भङ्गिभागेन ते वैदग्धीमधुरप्रबन्धरसिकव्यर्थोऽयमत्रश्रमः ॥

वैदग्ध्यम् न० विदग्धभावकर्म्मणोः । चातुर्य्ये ॥ ब्राह्मणादित्वात् ष्यञ् ॥

वैदर्भः । पुं० विदर्भदेशाधिपतौ ॥ स तु दमयन्त्याः पिता भीमसेन० रुक्मिणीजनकौ० भीष्मकश्च ॥ दन्तरोगविशेषे । यथा । घृष्टेषु दन्तमांसेषु संरम्भो जायते महान् । भवन्ति दन्ताश्चपलाः स वैदर्भोऽभिघातजः ॥ ८ न० वाक्यवक्रत्वे । त्रि० विदर्भसम्बन्धिनि ॥

वैदर्भी । स्त्री० काव्यरीतिभेदे ॥ यथा माधुर्य्यव्यञ्जकैर्वर्णै रचना ललितात्मिका अवृत्तिरल्पवृत्तिर्वा वैदर्भीरीतिरिष्यते ॥ उपनागरिकावृत्त्यनुप्रासघटकवृत्तिभेदे ॥ लोपामुद्रायाम् । दमयन्त्याम् । रुक्मिण्याम् ॥

वैदलः । पुं० पिष्टके । पूपे ॥ शमीधान्ये ॥ तद्गुणा यथा । वैदला मधुरा रूक्षाः कषायाः कटुपाकिनः । वातलाः कफपित्तघ्ना बद्धमूत्रमला हिमाः ॥ ऋते मुद्गमसूराभ्यामन्ये त्वाध्मानकारकाः । मुद्गमसूरयोरनाध्मानकारित्वमन्ये वैद्या अपि सर्वथा० नच सर्वथा० एतयोरपि किञ्चिदाध्मानकारित्वदर्शनात् ॥ न० भिक्षुकपात्रविशेषे । यथा । अलाबुदारुपात्रञ्च मृन्मयं वैदलं तथा । एतानि यतिपात्राणि मनुः स्वायम्भुवोऽब्रवीत् ॥

वैदिकः । पुं० वेदज्ञब्राह्मणे । त्रि० श्रुत्युपनिबद्धविधर्मादौ । वेदोक्ते । यथोक्तं श्रीदेवीभागवते । यथा ।

शुक उवाच । सन्देहोऽयं तु मे चित्ते न हि गच्छति मे क्वचित् । भवता कथितं यत्तच्छृण्वते मे नराधिप ॥ वेदधर्मेषु हिंसा स्यादधर्मबहुला हि सा । कथं मुक्तिप्रदो धर्मो वेदोक्तो वद भूपते ॥ प्रत्यक्षेण त्वनाचारः सोमपानं नराधिप । पशूनां हिंसनं तद्वद्भक्षणं चामिषस्य तु ॥ सौत्रामण्यां तथा प्रोक्तः प्रत्यक्षेण सुराग्रहः । द्यूतक्रीडा तथा प्रोक्ता व्रतानि विविधानि च ॥ — व्रतानि ब्रह्मचारिपुंस्त्रीमैथुनादीनि — ॥ श्रूयते स्म पुरा ह्यासीच्छशबिन्दुर्नृपोत्तमः । यज्वा धर्मपरो नित्यं वदान्यः सत्यसागरः ॥ गोप्ता च धर्मसेतूनां शास्ता चोत्पथगामिनाम् । यज्ञाश्च विहितास्तेन बहवो भूरिदक्षिणाः ॥ चर्मणां पर्वतो जातो विन्ध्याचलसमः पुनः । मेघाम्बुप्लावनाज्जाता नदी चर्मण्वती शुभा ॥ सोऽपि राजा दिवं यातः कीर्तिरस्याचला भुवि । एवं धर्मेषु वेदेषु न मे बुद्धिः प्रवर्तते ॥ — स्वर्गाद्यनित्यफलकत्वाद्वेदोक्तकर्मणः — ॥ स्त्रीसङ्गेन सदा भोगसुखमाप्नोति मानवः । अलाभे दुःखमत्यन्तं जीवन्मुक्तः कथं भवेत् ॥ जनक उवाच । हिंसा यज्ञेषु प्रत्यक्षा साऽहिंसा परिकीर्त्तिता । उपाधियोगतो हिंसा नान्यथेति विनिर्णयः ॥ — अहिंसेतिच्छेदः ;

अहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्य इति श्रुतेः । उपाधियोगतः इति । रागरूपोपाधिना कृता तु हिंसैव भवति — ॥ यथा चेन्धनसंयोगादग्नौ धूमः प्रवर्त्तते । तद्वियोगे तथा तस्मिन् निर्धूमत्वं विभाति वै ॥ अहिंसां तथा विद्धि वेदोक्तां मुनिसत्तम । रागिणां सापि हिंसैव निःस्पृहाणां न सा मता ॥ आर्द्रेन्धनोपाधिना वह्निः सधूमत्वमन्यथा निर्धूमत्वम् । तथा रागाद्युपाधिना पश्वालम्भस्य हिंसात्वमन्यथा हिंसात्वाभाव इति — ॥ अरागेण च यत्कर्म तथाऽहङ्कारवर्जितम् । अकृतं वेदविद्वांसः प्रवदन्ति मनीषिणः ॥ गृहस्थानां तु हिंसैव या यज्ञे द्विजसत्तम । — गृहस्थानां रागिणामित्यर्थः । — । अरागेण च यत्कर्म तथाऽहङ्कारवर्जितम् । साऽहिंसैव महाभाग मुमुक्षूणां जितात्मनाम् ॥ इत्यष्टादशोऽध्यायः प्रथमस्कन्धे ॥ वेदभवः । अध्यात्मादित्वाट्ठञ् ॥ म । वेदार्थज्ञानी ॥

वैदिकदर्शनम् । न० वैदिकानां सिद्धान्तः ॥ यथा । अन्यो विज्ञानमयतयात्मान्तरः । अस्तीत्येवोपलब्धव्य इति वैदिकदर्शनमिति ॥

वैदुष्यम् । न० विद्वत्तायाम् ॥ यथा । वाग्वैखरी शब्दझरी शास्त्रव्याख्यानकौशलम् । वैदुष्यं विदुषां तद्वद्भु

कार्य्येभवमुक्तयेद्धृति ॥ विदुरः कर्म्म भावो वा । ब्राह्मणादित्वात् ष्यञ् ।

वैदूर्य्यम् । न॰ लसुनिया॰ इति ख्याते कृष्णपीतवर्णे मणौ । बालवायजे । बालसूर्य्ये । केतुरत्ने ॥ तल्लक्षणं यथा । एकं वेणुपलाशकोमलरुचा मायूरकण्ठत्विषा मार्जारेक्षणपिङ्गलच्छविजुषा ज्ञेयं त्रिधा छायया । यद्गात्रं गुरुतां दधाति नितरां स्निग्धन्तु दोषोज्झितं वैदूर्य्यं विशदं वदन्ति सुधियः स्वच्छन्तु तच्छोभनम् ॥ तस्य कुलक्षणं यथा । निच्छायं मृच्छिलागर्भं लघु रूक्षञ्च सक्षतम् । सत्रासं परुषं कृष्णं वैदूर्य्यं दूरतां नयेत् ॥ तत्परीक्षा यथा । घृष्टं यदात्मना स्वच्छं स्वच्छायां निकषाश्मनि । स्फुटं प्रदर्शयेदेतद्वैदूर्य्यं जात्यमुच्यते । विशेषो गारुडे॰ युक्तिकल्पतरौ च द्रष्टव्यः ॥ विदूरात् प्रभवति । विदूरात् ञ्यः । अयमनन्वर्थसङ्गतिः॰ बालवायाद्धासौ प्रभवति विदूरे तु संस्क्रियते । सत्यम् । बालवायस्यापि विदूरमिति संज्ञा । अथवा । बालवायस्य॰ विदूरश्चादेशः । अतएव भाष्ये॰ बालवायो विदूरञ्च प्रकृत्यन्तरमेव वेति समाहितम् ॥

वैदूर्य्यभूमिः । स्त्री॰ बालवायप्रभवस्थाने ॥ उरगेन्द्रमूर्द्धन्ययत्नाङ्कुरैः सद्योदितमेघध्वनेर्विदूरभूमेरङ्गिन्नाङ्कुरा भवतीति प्रसिद्धिः । उरगमूर्द्धन्यरत्नसन्निधानात् कालेऽपि मेघागर्जनीति वार्त्ता । केचित्तु यत्र वैरागरत्नं॰ मेघरसितस्य॰ तत्रैव वैदूर्य्यभूमिरित्याहुः ॥

वैदेहः । पुं॰ वणिजि ॥ निमिराजपुत्रे । जनके ॥ वैश्याद्ब्राह्मण्यामुत्पन्ने सङ्करजात्यन्तरे । त्रि॰ विदेहदेशजाते ॥

वैदेहकः । पुं॰ वाणिजके ॥ शूद्राद्वैश्यामुते ॥ विदेहेषु भवः । धूमादिभ्यश्च इति वुञ् ॥ विदेग्धवा । दिह॰ । ण्वुल् । प्रज्ञाद्यण् ॥ वैनिश्चितः देहउपचयो यस्येति वा । विदेहेषु भवः । तत्र भव इत्यण् । विदेहस्यापत्यं वा । जनपदेत्यञ् । कः स्वार्थे ॥

वैदेही । स्त्री॰ रोचनायाम् ॥ सीतायाम् । जानक्याम् ॥ वणिक्स्त्रियाम् । वैदेहनार्य्याम् ॥ पिप्पल्याम् ॥ विदेहेषु भवा । अण् । ङीप् ।

वैद्यः । पुं॰ भिषजि । रोगहारिणि । अगदङ्कारे । चिकित्सके ॥ स चतुर्विधः । रोगहरः १ । विषहरः २ । शल्यहरः ३ । कृत्याहरः ४ । इति भेदात् ॥ सत्त्वस्य प्रकोपस्य प्रसंख्यानमेव च । दोषाणाञ्चैव यो वेद स भवेद्भिषगुत्तमः ॥ व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः । एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः ॥

कुचेलः कर्कशोऽदीनः कुग्रामी स्वयमागतः। पञ्च वैद्या न पूज्यन्ते धन्वन्तरिसमा अपि॥ सुश्रुतं न श्रुतं येन हारीतं येन नश्रुतम्। नालोकितं चरकं येन स वैद्यो वैद्यनिन्दितः॥ हेतौ लिङ्गे प्रशमने रोगाणामपुनर्भवे। ज्ञानं चतुर्विधं यस्य स राजार्हो भिषक्तमः॥ अपि च। एकं शास्त्रमधीयानो न विद्याच्छास्त्रनिश्चयम्। तस्माद्बहुश्रुतः शास्त्रं विजानीयाच्चिकित्सकः॥ शास्त्रं गुरुमुखोद्गीर्णमादायोपास्य चासकृत्। यः कर्म कुरुते वैद्यः स वैद्योऽन्ये तु तस्कराः॥ इति सुश्रुतः॥ विद्यामधीते। तदधीते इत्यण्॥ वासकवृक्षे॥ पण्डिते॥

वैद्यकम्। न॰ आयुर्वेदे। चिकित्साशास्त्रे॥

वैद्यनाथः। पुं॰ देशविशेषे॥ शिवे। महालिङ्गविशेषे॥ यथा। झारखण्डे वैद्यनाथो वक्रेश्वरस्तथैव च। वीरभूमौ सिद्धिनाथो राढे च तारकेश्वरः॥ भैरवविशेषे॥ यथा। हार्दपीठे वैद्यनाथे वैद्यनाथस्तु भैरवः। देवता जयदुर्गाख्या॰ नेपाले जानुनी मम॥ इति॥

वैद्यबन्धुः। पुं॰ आरग्वधवृक्षे॥ *

वैद्यमाता। स्त्री॰ अटरूषे। वासके॥ वैद्यस्य मातेव॥

वैद्यसिंही। स्त्री॰ वासकवृक्षे॥

वैद्या। स्त्री॰ काकोल्याम्॥

वैद्यी। स्त्री॰ वैद्यपत्न्याम्॥

वैधः। त्रि॰ विधिबोधिते॥

वैधहिंसा। स्त्री॰ वेदबोधितप्राणिवधे॥ सा चाहिंसैव। यथाह मनुः। या वेदविहिता हिंसा नियतास्मिंश्चराचरे। अहिंसामेव तां विद्याद्वेदाद्धर्मो हि निर्बभाविति॥

वैधात्रः। पुं॰ सनत्कुमारे॥ विधातुरपत्यम्। अण्॥ त्रि॰ विधातृसम्बन्धिनि॥ यथाहुः। कलत्रं वैधात्रं कतिकति भजन्ते न कवयः श्रियो देव्याः को वा न भवति पतिः कैरपि धनैः। महादेवं हित्वा तव सति सतीनामचरमे कुचाभ्यामासङ्गः कुरबकतरोरप्यसुलभ इति॥

वैधात्री। स्त्री॰ ब्राह्म्यामोषधौ॥

वैधृतिः। पुं॰ विष्कम्भादिषु शेषयोगे। तत्र जातस्य फलं यथा। मैत्रीविहीनः कुटिलः खलश्च मूर्खो दरिद्रः परवञ्चकश्च। कुकर्मकर्त्ता परदारभर्त्ता भवेन्नरो वैधृतिलब्धजन्मा॥

वैधेयः। त्रि॰ मूर्खे॥ विधेयं विधानम्। तस्यायमधिकारी॰ अविद्यावद्विषयत्वाच्छास्त्राणाम्। तस्येदमित्यण्। स्त्रियां॰ वैधेयी।

वैध्यतः। पुं॰ यमप्रतीहारे॥

वैनतेयः। पुं॰ खगेश्वरे। गरुडे॥ पक्षिणांमध्ये गरुडोभगवद्विभूतिः। वैनतेयश्चपक्षिणामित्युक्तेः। विनतायाअपत्यम्। स्त्रीभ्योढक्॥ अरुणे। सूरसूते॥

वैनयिकः। पुं॰ शस्त्राभ्यासरथे। योग्यरथे॥ गुणविशेषे॥ यथा। लोकशौर्य्यगुरुशास्त्रेभ्योभातिवैनयिकोगुणः। यस्तुसद्यथावत्तितलोकवृद्धगुरुतः शास्त्राद्वा॰समर्जितः सवैनयिकोभाति। समर्ज्जितोवैनयिकोमनोवाक्तनुचेष्टया। योमनोवाक्तनुचेष्टयाशुभव्यापारेणार्ज्जितः सवैनयिकोबोद्धव्यः॥ त्रि॰ विनयान्विते॥ विनयादिभ्यष्ठगितिस्वार्थेठक्॥

वैनायिकः। पुं॰ बौद्धे॥ सर्वज्ञाणिकत्ववादिनिपुणवैनाशिके॥

वैनाशिकः। त्रि॰ क्षणिके। परतन्त्रे। परायत्ते॥ बौद्धे। असद्वादिनि॥ पुं॰ ऊर्णनाभे॥ न॰ नाडीनक्षत्रविशेषे॥ निधनतारायाम्॥

वैनीतकः। पुं॰ न॰ परम्परावाहने॥ दोढृपरम्परया॰यद्वाह्यं॰वहवोढुपानराश्चवहन्ति॰शकटशिविकादि यथा॰तद्वैनीतकम्। विनीतकानामिदम्। तस्येदमित्यण्॥ यद्वा। विनीयतेस्म। क्तः। संज्ञायांकन्॥

वैपरीत्यम्। न॰ व्यत्यासे। विपर्य्यासे। विपर्य्यये। व्यत्यये॥ दू॰ हे॰न्द्रः॥ विपरीतस्य। भावः। ष्यञ्॥

वैपरीत्यलज्जालुः। पुं॰ स्त्री॰ स्वल्पक्षुपह्रस्वफलायांलज्जालौ॥ यथा। लज्जालुर्वैपरीत्यान्यास्वल्पक्षुपह्रस्वफला। वैपरीत्याचलज्जालुर्ह्यभिधानैप्रयोजयेत्। लज्जालुर्वैपरीत्याख्या: कटुरुष्ण: कफापनुत्। रसेनियामकश्चैवनानाविज्ञानकारकः॥ इ॰रा॰नि॰वट:॥

वैवधिकः। त्रि॰ वार्त्तावहे। कांवडियाः॰इ॰भा॰प्र॰॥ विवधेन॰वीवधेनवा॰हरति। विभाषाविवधादितिपक्षेठक्। एकदेशिकृतस्याऽनन्यत्वात्॰वीवधादपिठक्॥

वैषेधिकः। पुं॰ वैतालिके। विवेधः शीलमस्य। शीलमितिठक्॥

वैभवः। पुं॰ विभवस्वरूपे। न॰ ऐश्वर्य्ये॥

वैभाजित्रम्। न॰ विभाजयितुर्धर्म्ये॥ तस्यधर्म्यमित्यधिकारेविभाजयितुर्णिलोपश्चाञ्वक्तव्यइत्यञ्णिलोपश्च॥

वैभ्राजम्। न॰ सुराणामुद्यानविशेषे॥ विपुलाख्यस्याद्रेर्मूले॰वैभ्राजाख्यंनामवनमस्ति। यथा। वैभ्राजंवैपुलेमूर्ध्निसितोदस्यकदोत्तमः। देवैर्निषेव्यतेकन्न: कामसेरंशुमत्प्रभै:॥

वैमात्र : । पुं॰ विमातृजे ॥ विमातुरपत्यम् । अण् ॥

वैमात्री । स्त्री॰ विमातुः कन्यायाम् ॥

वैमात्रेय : । पुं॰ वैमात्रे ॥ विमातुरपत्यम् । शुभ्रादिभ्यश्चेति ढक् ॥ स्त्रीभ्यो ढगित्यत्र॰ स्त्रीप्रत्ययान्तस्य ग्रहणात् ॥

वैमात्रेयी । स्त्री॰ विमातृकन्यायाम् ॥

वैमानिक : । त्रि॰ विमानयायिनि देवादौ ॥ विमानेन चरतीत्यर्थे ठक् ॥

वैमेय : । पुं॰ विनिमये ॥

वैम्बकि : । पुं॰ विम्बात्मजे ॥ विम्बस्यजात्यन्तरस्यापत्यम् । व्यासवरुडेत्यादिनेञ्॰ प्रकृतेरकङादेश : ॥

वैयाकरण : । त्रि॰ व्याकरणशास्त्राभिज्ञे ॥ व्याकरणमधीते॰ वेदवा॰ तदधीतेतद्वेदेत्यण् । ऐजागम : ॥ व्याकरणस्य व्याख्यान : व्याकरणे भवोवा वैयाकरण : । अण् ऋगयनादिभ्यश्चेत्यण् ॥ स्त्री॰ वैयाकरणी ॥

वैयाघ्र : । त्रि॰ व्याघ्रचर्मावृतस्यन्दने । द्वैपे ॥ व्याघ्रस्य विकार : । प्राणिरजतादिभ्योऽञ् । वैयाघ्रेण चर्मणापरिवृतोरथ : । द्वैपवैयाघ्रादञ् ॥

वैयाघ्रपद्य : । पुं॰ गोत्रमुनौ॰ मुनिविशेषे ॥ व्याघ्रपदोऽपत्यम् । ञ्य । इन्द्रद्युम्नमुनौ ॥ व्याघ्रपदो गोत्रापत्यत्वात् ॥ यद्वा । व्याघ्रस्येव पादावस्येति बहुव्रीहौ पादस्यलोपइति लोपेगर्गादित्वात्यञ् पाद : पदिति पद्भावेन यञ्वाभ्यामित्यैच् ॥

वैयात्यम् । न॰ अविनीततायाम् ॥ विरूपं यातं गमनम्॰ चेष्टनं यस्य । वियातस्य भाव : । दृढादित्वात् ष्यञ् ॥

वैयासम् । न॰ व्यासोपन्यस्ते वचसि ॥ शेषइत्यण् ॥

वैयासकि : । पुं॰ शुकदेवे ॥ व्यासस्य अपत्यम् । व्यासवरुडनिषादचण्डालबिम्बानाञ्चेति वक्तव्यमिति वार्त्तिकादिञ्॰ अकङादेशश्च । नय्वाभ्यामित्यैजागम : ॥

वैरम् । न॰ विरोधे ॥ तस्य समुत्थानं पञ्चविधम् । स्त्रीकृतम् १ यथा कृष्णशिशुपालयो : । वास्तुजम् २ यथा कौरवपाण्डवानाम् । वाग्जम् ३ यथा द्रोणद्रुपदयो : । सापत्नम् ४ यथा मूषिकमार्जारयो : । अपराधजम् ५ यथा पूजनीब्रह्मदत्तयो : ॥ वीरस्य कर्म । वैरमैथुनिकयोरितिनिर्देशात्॰ युवादित्वाद्वाण् । अतिवादांस्तितिक्षेत नावमन्येत कञ्चन । नचेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ॥ /

वैरङ्गिक : । त्रि॰ विरागयोग्ये ॥ विरागं नित्यमर्हति । छेदादिषु॰ वि

रागविरक्तयोरितिपाठात् अण्। विरक्तादेशस्य ॥

वैरञ्च्यः पुं॰ सनकादिषु ॥

वैरदेया । स्त्री॰ वैरकर्म ॥

वैरनिर्यातनम् । न॰ वैरशुद्धौ । प्रतीकारे । कृतापकारस्य प्रत्यपकारे । वैरस्य निर्यातनम् । यतनिकारादौचुरादिः । ल्युट् ॥

वैरप्रतिक्रिया । स्त्री॰ वैरनिर्यातने ॥

वैरशुद्धिः । स्त्री॰ वैरनिर्यातने ॥ वैरस्य शुद्धिः ॥

वैरस्यम् । न॰ विरसत्वे ॥

वैरागी । त्रि॰ विषयेच्छारहिते । वैराग्ययुक्ते ॥ यथा । सनकश्च सनन्दश्च तृतीयश्च सनातनः । सनत्कुमारो वैरागी चतुर्थः पुत्र एव च ॥

वैराग्यम् । न॰ विषयेषु तुच्छबुद्ध्या रागाभावे ॥ तस्य च॰ यतमानसंज्ञा॰ व्यतिरेकसंज्ञा॰ एकेन्द्रियसंज्ञा॰ वशीकारसंज्ञेति चतस्रः संज्ञा भवन्ति । तत्रैव द्रष्टव्यम्॰ विषयांस्त्यक्तुम् अशक्नुवतोपि तस्माभिच्छात्यागश्चाद्य वैराग्यम् । ततो विषयाणां मध्ये लवणादिव्यतिरेकेणापि वृत्तिर्द्वितीयम् । तथा वृत्तावपि मनसि रागशैथिल्येन॰ वाह्येन्द्रियैरेव विषयसेवनं तृतीयम् । तत्राप्यौदासीन्यं चतुर्थम् । यथाहुः । वैराग्यमाद्यं यतमानसंज्ञं कश्चिद्विरागो व्यतिरेकसंज्ञम् । एकेन्द्रियाख्यं हृदि रागमोचनस्तस्याप्यभावस्तु वशीकृताख्यमिति ॥ विषयेषु क्षयित्वादिदोषदर्शनेन॰ वैतृष्ण्ये ॥ तद्वैराग्यं नुपसायादर्शनश्रवणादिभिः ॥ देहादिब्रह्मपर्यन्तेष्वनित्ये भोग्यवस्तुनि ॥ विषयेष्वौदासीन्यभावे ॥ ब्रह्मादिस्थावरान्तेषु वैराग्यविषयेष्वनु । यथैव काकविष्ठायां वैराग्यं तद्धि निर्मलम् ॥ त्यागेच्छायाम् ॥ दोषदृष्टिर्जिहासा च पुनर्भोगेष्वदीनता । हेतुस्वरूपकार्याणि वैराग्यस्य विदुः क्रमात् ॥ परमपरञ्चेति द्विविधं वैराग्यम् ॥ दृष्टानुश्रविकेषु॰ भोगेषु॰ रागविरोधिन्यामस्पृहात्मिकायाम् चित्तवृत्तौ॰ दृष्टादृष्टविषयेषु॰ स्पृहाविरोधिचित्तपरिणामे ॥ वैराग्यात्प्रकृतिलयः ॥ यथा च॰ नवनीलनीरजदलोपान्तातिमृदीतनुं त्वङ्मात्रावरितान्मिषां यदि पुनर्नैव प्रजानां पतिः प्रत्यग्रचरदस्रमिश्रपिशितग्रासग्रहं गृध्रवेगध्वाङ्क्षबकांस्ततो निपततः को वा कथं वारयेत् ॥ अपि च । भ्रियो दोलालोला विषयजरसाः प्रान्तविरसाः विपद्गेहं देहं महदपि धनं भूरिनिधनम् । बृहच्छोको लोकः सततमवलाऽनर्थकुला तथाप्यस्मिन् घोरे पथि

वतरतामात्मनिरताः । विराग एव । स्वार्थे ष्यञ् ॥

वैराजम् । न० सामविशेषे ॥ पुं० आत्मरूपे विराजो देहे ॥

वैराज्यम् । न० अणिमादिसिद्धिभाक्त्वे ॥ विराजो भावः । ष्यञ् ॥

वैराटः । पुं० विराटतनये ॥ इन्द्रगोपकीटे ॥

वैराटी । स्त्री० उत्तरायाम् । अभिमन्युपत्न्याम् ॥ विराटस्यापत्यं स्त्री । अण् । ङीप् ॥

वैरातङ्कः । पुं० अर्जुनवृक्षे ॥

वैरिञ्चः । पुं० सनकादिषु ॥ त्रि० विरिञ्चसम्बन्धिनि ॥

वैरी । पुं० रिपौ । शत्रौ वैरमस्यास्ति । इनिः ॥ षष्ठभवने ॥

वैरूपम् । न० सामविशेषे ॥

वैरूप्यम् । न० विरूपतायाम् ॥

वैरोचनः । पुं० रवेस्तनये ॥ विष्णुपुत्रे ॥ बलिदानवे ॥ सिद्धगणे बुद्धे ॥ अग्निपुत्रे ॥ त्रि० सवितुः सम्बन्धिनि ॥ विरोचनस्यायम् । अण् ॥

वैरोचननिकेतनम् । न० पाताले ॥

वैरोचनिः । पुं० अर्कपुत्रे ॥ बलिदैत्ये ॥ सुगते ॥ विरोचनस्यापत्यम् । अतइञ् ॥

वैरोचिः । पुं० बाणासुरे ॥

वैरोद्धारः । पुं० कृतापकारस्य प्रत्यपकारे । प्रतीकारे । वैरनिर्यातने ॥

वैलक्षण्यम् । न० विलक्षणत्वे ॥

वैलक्ष्यम् । न० व्यलीके ॥ विलक्षणस्य विस्मयव्यग्रस्य भावः । ष्यञ् ॥

वैल्वः । पुं० बिल्वप्रकाण्डे ॥ बिल्वविकारे ॥ बिल्वस्यावयवे विकारो वा । बिल्वादिभ्योऽण् । वैल्वः खादिरो वा यूपः स्यात् ॥ न० बिल्वशाके ॥ बिल्वफले ॥ त्रि० बिल्वसम्बन्धिनि ॥

वैवधिकः । पुं० वार्त्तावहे ॥ पसारी० इ० भा० प्र० विवधेन धान्यतण्डुलादिना व्यवहरति । ठक् ॥ कृषिवृद्ध्यादिजीवे ॥

वैवर्ण्यम् । न० विवर्णतायाम् ॥

वैवस्वतः । पुं० श्राद्धदेवे । अन्तके । यमे ॥ सप्तमे मनौ ॥ विवस्वतोऽपत्यम् । अण् ॥ रुद्रविशेषे ॥ शनैश्चरे ॥

वैवस्वती । स्त्री० दक्षिणस्यां दिशि ।

वैवाहिकम् । न० धनविशेषे ॥ यथा । वैवाहिकन्तु यद् द्रव्यं भार्यया यत् सहागतम् । भार्याप्राप्तिकाले लब्धमित्यर्थः ॥ त्रि० विवाहसम्बन्धिन्यग्न्यादौ विवाहे भवः । अध्यात्मादेठञ् इष्यते ।

वैवाह्यः । त्रि० सम्बन्धिनि ॥

वैशम्पायनः । पुं० यजुर्वेदधरे । व्यासशिष्ये मुनौ ॥ विशम्पस्य गोत्रापत्य

त्यम् । अश्वादिभ्यः फञ् ॥

वैशसम् । न० हिंसायाम् ॥ यथा । वरं हुतवहज्वालापुञ्जस्यान्तर्व्यवस्थितिः । न शौरिचिन्ताविमुखजनसंवासवैशसमिति कात्यायनः । शौरिचिन्ताविमुखेषु तन्निन्दापरेषु जनेषु यः संवासः स एव वैशसं हिंसा ततोऽवरमित्यर्थः ॥ नरकविशेषे ।

वैशस्त्रम् । न० विशसितुर्धर्म्ये ॥ विशसितुरिड्लोपश्चाञ् वक्तव्यः ॥

वैशाखः । पुं० मासविशेषे । माधवे । राधे ॥ वैशाखी पौर्णमास्यस्मिन् सास्मिन् पौर्णमासीत्यण् ॥ खजके । मन्थानदण्डे । रत्न० हू० भा० प्र० ॥ विशाखाप्रयोजनमस्य । विशाखाषाढादित्यण् ॥ न० धन्विनां संस्थानभेदे । वितस्त्यन्तरे यत्स्थितौ पादद्वये विशाखाख्यस्थानं भवति । विशाख एव । स्वार्थेऽण् ॥

वैशाखी । स्त्री० वैशाखपूर्णिमायाम् ॥ विशाखया युक्ता पौर्णमासी । नक्षत्रेण युक्तः काल इत्यण् । ततो ङीप् ॥ रक्तपुनर्नवायाम् ॥

वैशारदी । स्त्री० मायायाम् ॥ विशारद ईश्वरः । तस्येयम् । अण् ङीप् ॥

वैशारद्यम् । न० विशुद्धौ ॥ विशारदस्य भावः । दृढादिषु० वैयातत्याभमतिमनःशारदानामिति ष्यञ् ॥

वैशिकः । पुं० त्रिविधनायकान्तर्गतनायकविशेषे ॥ बहुवेश्याभोगी परसिको वैशिक इति तल्लक्षणम् ॥

वैशिष्ट्यम् । न० विशिष्टत्वे । सम्बन्धरद्वार्थे । विशिष्टधीनियामके ॥

वैशेषिकः । पुं० कणादमुनिकृतदर्शनविशेषे । परमार्थतो द्रव्यादिसमवायान्तषट्पदार्थवादिनि । यथा यथात्मनो द्रव्यं तस्य गुणा बुद्ध्यादयो नव । वासनान्ते नवैदोत्ताद्दृ ति वैशेषिकोदयः बुद्ध्यादिधर्मिणमन्तःकरणमेवात्मेति भ्रमित्वा० चात्मगुणा एव वासनान्ते न० यथा । महारजनमित्यादिसूत्रोच्यतद् इति षट्स्वकाणादाद्यर्थः ॥ अथ वैशेषिकग्रन्थविवरणम् । स तु विशेषपदार्थनिरूपकग्रन्थः । अस्य मतं न्यायदर्शनमततुल्यम् । अत्र जगतः कारणं परमाणुपर्यन्तं निरूपितम् ॥ इह खलु निखिलप्रेक्षावन्निसर्गप्रतिकूलवेदनीयतया निखिलात्मसंवेदनसिद्धं दुःखं जिहासतस्तद्धानोपायं जिज्ञासुः परमेश्वरसाक्षात्कारमुपायमाकलयति । यदा चर्मवदाकाशं वेष्टयन्तीह मानवाः । तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यतीत्यादिवचननिचयप्रामाण्यात् । परमेश्वरस्य साक्षात्कारश्च श्रवणमननभावनाभिर्भ

वनीयः। यदाह। आगमेनानु
मानेन ध्यानाभ्यासरसेन च। त्रिधा
प्रकल्पयन् प्रज्ञां लभते योगमुत्तममि-
ति। तच्च मननमनुमानाधीनम्।
अनुमानञ्च व्याप्तिज्ञानाधीनम्।
व्याप्तिज्ञानञ्च पदार्थविवेकसापेक्षम्
। अतः पदार्थषट्कम्॥ अथातो
धर्मं व्याख्यास्यामः। इत्यादिका
यां दशलक्षण्यां कणभक्षभगवता-
व्यवस्थापि। तत्राह्निकद्वयात्मके
प्रथमेऽध्याये समवेताशेषपदार्थक
थनमकारि। तत्रापि प्रथमाह्निके
जातिमन्निरूपणम् द्वितीयाह्निके जा
तिविशेषयोर्निरूपणम्। आह्निकद्व
यात्मके द्वितीये भूतदिक्कालक्षणम्
। तत्रापि प्रथमाह्निके भूतविशेषल
क्षणम्। द्वितीये दिक्कालप्रतिपा
दनम्। आह्निकद्वयात्मके तृतीये
आत्मान्तःकरणलक्षणम्। तत्रा
प्यात्मलक्षणं प्रथमे। द्वितीयेऽन्तः
करणलक्षणम्। आह्निकद्वययुक्ते
चतुर्थे शरीरतदुपयोगिविवेचनम्
। तत्रापि प्रथमे तदुपयोगिविवेचन
म्। द्वितीये शरीरविवेचनम्। आ
ह्निकद्वयवति पञ्चमे कर्मप्रतिपा
दनम्। तत्रापि प्रथमे शरीरसम्ब
न्धिकर्मचिन्तनम्। आह्निकद्वय
शालिनि षष्ठे श्रौतधर्मनिरूपण-
म्। तत्रापि प्रथमे दानप्रतिग्रहधर्म

विवेकः। द्वितीये चातुराश्रम्योचि
तधर्मनिरूपणम्। तथाविधे सप्तमे
गुणसमवायप्रतिपादनम्। तत्रा
पि प्रथमे बुद्धिनिरपेक्षगुणप्रतिपाद
नम्। द्वितीये तत्सापेक्षगुणप्रति
पादनं समवायप्रतिपादनञ्च।
अष्टमे निर्विकल्पकसविकल्पकप्रत्य
क्षप्रमाणचिन्तनम्। नवमे बुद्धिवि
शेषप्रतिपादनम्। दशमे अनुमा
नप्रतिपादनम्। तत्रोद्देशो लक्षणं प
रीक्षा चेति त्रिविधास्य शास्त्रस्य प्रवृत्ति
रिति वैशेषिकग्रन्थविवरणम्॥ क
णादमुनिकृतदर्शनशास्त्रविशेषः।
औलूक्यः॥ विनयादित्वात् स्वार्थे
ठक्॥ त्रि॰ विशेषविदि॥

वैशेष्यम्, न॰ भागाधिक्ये॥ भावे
ष्यञ्॥

वैश्यः, पुं॰ ऊरव्ये। ऊरुजे। भू
स्पृशि। तमउपसर्जनरजःप्रधा
नस्तृतीयवर्णः। तस्य च कृष्यादीनि
तादृशानि कर्माणि भवन्ति। तानि
च वर्णाश्रमशब्दे द्रष्टव्यानि। निषि
द्धानि यथा। वैश्यानां धनलोभेन मि
थ्यामूल्यप्रकाशनम्। अपालनं प
शूनाञ्च अनिज्या विभवे सतीति पाद्मे
स्वर्गखण्डे २७ अध्यायः॥ लक्ष
णन्तु। विशत्याशु पशुभ्यश्च कृष्यादा
नरुचिः शुचिः। वेदाध्ययनसम्पन्नः
स वैश्य इति संज्ञितः॥ विशति।

विश॰ क्विप्। स्वार्थे॰ ष्यञ्॥

वैश्यकर्म। न॰ कृषिगोरक्ष्यवाणिज्यादौ॰

वैश्या। स्त्री॰ अर्याणाम्। आर्यायाम्। बुधशुक्रयन्तरे॥ तारायाम्॥

वैश्रवणः। पुं॰ कुवेरे। विश्रवसोऽपत्यम्। शिवादिषु विश्रवसः विश्रवस्रवणावादेशौ निपातितौ॰ अण्च॥

वैश्रवणालयः। पुं॰ वैश्रवणावासे॥ वटवृक्षे॥

वैश्रवणावासः। पुं॰ वटद्रुमे॥ कुवेरपुर्याम्॥

वैश्रवणोदयः। पुं॰ वटवृक्षे॥

वैश्वः। पुं॰ उत्तराषाढनक्षत्रे॥

वैश्वदेवः। पुं॰ अन्नसाध्यहोमबलिदानातिथिभोजनात्मकेसायम्प्रातर्गृहस्थंप्रतिविहितेकर्मविशेषे॥ विश्वेदेवादेवताअस्य। सास्यदेवतेत्यण्। न॰ उत्तराषाढान॰॥

वैश्वदेवी। स्त्री॰ आमिक्षायाम्। जगतीछन्दःप्रभेदे॥ तल्लक्षणादि यथा। वाणाश्वैश्छिन्नावैश्वदेवीममौयौ। यथा। अर्चामन्येषांत्वंविहायामराणामद्वैतेनैकंविष्णुमभ्यर्च्यभक्त्या। तत्राशेषात्मन्यर्चितेभाविनीतेभ्रातः सम्पन्नाराधनावैश्वदेवी॥

वैश्वदेव्यम्। न॰ सामविशेषे॥

वैश्वानरः। पुं॰ अग्नौ। वह्नौ॥ अग्न्यभिमानिन्यांदेवतायाम्॥ जाठराग्नौ॥ चित्रकवृक्षे। विश्वेनराअस्य। नरेसंज्ञायामितिविश्वशब्दस्य दीर्घः॥ विश्वानरस्यापत्यम्। ऋष्यण्। गोत्रापत्ये॰ विदादित्वादञ्‌वा॥ विश्वेषांनराणांकर्त्तरि॥ ब्रह्मणि। जीवे॥ विश्वनराभिमानित्वात्॰ स्थूलसमष्ट्युपहितेचैतन्ये॥ विश्वेचतेनराश्च॰ विश्वानराः। पूर्वपदस्यदीर्घः। विश्वानरान्नेतृत्वेनव्यवस्थितान्प्रति॰ अनेकधाधर्माधर्मकर्मानुसारेण॰ सुखदुःखादिप्रापणात्॰ अयंपरमात्माकर्मणांफलदाता॰ वैश्वानरशब्दितोभवति॥ अथवा। विश्ववासौनरश्च॰ विश्वानरः। नरेसंज्ञायाम्। विश्वानरएव। वैश्वानरः। स्वार्थेऽण्॥

वैश्वानरमार्गः। पुं॰ दक्षिणवीथ्याम्। पूर्वोत्तराषाढयोः समीपे॥

वैश्वानरीवीथी। स्त्री॰ दक्षिणमार्गेनक्षत्रविशेषाणांसंज्ञाविशेषे॥ यथा। शतभिषक्तथा। वैश्वानरीभाद्रपदेरेवतीचैवकीर्त्तिता। एतास्तुवीथयस्तिस्रोदक्षिणोमार्गउच्यतइति॥

वैश्वी। स्त्री॰ उत्तराषाढानक्षत्रे॥

वैषम्यम्। न॰ विषमत्वे॥ भावे॰ ब्राह्मणादित्वात्ष्यञ्॥

वैषयम्। न॰ विषयाणांसमूहे भि

ष्वाद्यण् ॥

वैषयिकः । त्रि॰ विषयसम्बन्धिनि ॥

वैष्टुतम् । न॰ होमभस्मनि ॥

वैष्टम् । न॰ विष्णौ ॥ विष्टपे ॥ वेवेष्टि । विश॰ भ्रमजिगमिनमिहनि विश्यशांसहिस्यो तिष्टुन् ॥ दिवि ॥ वायौ ॥

वैष्णवः । त्रि॰ विष्णूपासके । विष्णुमन्त्रदीक्षिते । कार्ष्णे । हारे ॥ तल्लक्षणमाहात्म्यादि यथा । फलसम्बन्धरहिता विष्णुभक्ताश्च वैष्णवाः । मत्प्रीतिभक्तिकामास्ते सर्वदा स्वकर्मसु ॥ गुरुवक्त्राद्विष्णुमन्त्रो यस्य कर्णे प्रविश्यते । जीवन्मुक्तं वैष्णवं तं वेदाः सर्वे वदन्ति च ॥ पुरुषाणां शतं पूर्वं पैतृकञ्च शतं परम् । मातामहस्य च शतं मातरं मातृमातरम् । भगिनीं भ्रातरञ्चैव भागिनेयञ्च मातुलम् । श्वश्रूं श्वशुरञ्चैव गुरुपत्नीं गुरोः सुतम् ॥ गुरुञ्च ज्ञानदातारं मित्रञ्च सहचारिणम् । भृत्यं शिष्यं तथा चेटीं प्रजाः स्वाश्रमसन्निधौ ॥ उद्धरेदात्मना सार्द्धं मन्त्रग्रहणमात्रतः । मन्त्रग्रहणमात्रेण जीवन्मुक्तो भवेन्नरः । तस्य संस्पर्शमात्रेण पूतं तीर्थञ्च भारतम् । तस्यैव पादरजसा सद्यः पूता वसुन्धरा ॥ पादोदकं तस्य नित्यं तीर्थमेव भवेद्ध्रुवम् । इति ब्र॰ वै॰ ब॰ पुराणम् । ये कण्ठलग्नतुलसीभववकाष्ठमाला ये द्वादशाङ्गहरिनामकृतोर्द्ध्वपुण्ड्राः । ये कृष्णभक्तिसुदृढा धृतशङ्खचक्रास्ते वैष्णवा भुवनमाशु पवित्रयन्ति ॥ अपि च । पशुर्मनुष्यः पक्षी वा ये च वैष्णवसंश्रयाः । तेनैव ते प्रयास्यन्ति तद्विष्णोः परमं पदमिति ॥ अस्याचारश्च । सर्वान् कामान् परित्यज्य दृढभक्तिञ्च साधयेत् । स एव वैष्णवाचारः कामसङ्कल्पवर्ज्जितः ॥ विष्णोरयम् । अण् ॥ न॰ विष्णुपुराणे ॥ यथा । त्रयोविंशतिसाहस्रं वैष्णवं परमाद्भुतमिति ॥

वैष्णवी । स्त्री॰ विष्णोः शक्तौ ॥ यथा । एषा चित्शक्तिरुद्दिष्टा नयसिद्धान्तगामिनी । एषा श्वेतापरा सृष्टिः सात्त्विकी ब्रह्मसंस्थिता ॥ एषैव रक्ता राजसी वैष्णवी परिकीर्त्तिता । एषैव कृष्णा तमसी रौद्री देवी प्रकीर्त्तिता ॥ अष्टदश तथा कोट्यो वैष्णव्या भेद उच्यते । या विष्णो राजसी शक्तिः पालनी चैव वैष्णवी ॥ इति वराहपुराणम् ॥ दुर्गायाम् ॥ यथा । शङ्खचक्रगदाधारि विष्णुमाता तथारिहा । विष्णुरूपा च या देवी वैष्णवीति निगद्यते ॥ इति देवीपुराणम् ॥ गङ्गायाम् ॥ तुलस्याम् ॥ अपराजितायाम् ॥ शतावर्याम् ॥

वैसादृश्यम् । न॰ विसदृशत्वे ॥

वैसारिणः। पुं॰ मत्स्ये ॥ विविधंसरति । सृ॰ । ग्रह्यादित्वाण्णिनिः। ततोविसारिणोमत्स्यइति स्वार्थेऽण् ॥ सिद्धे ॥

वैहायसः। पुं॰ खेचरे ॥

वैहायसी। स्त्री॰ भारतवर्षस्यनद्यन्तरे ॥

वैहार्य्यः। त्रि॰ परिहासेनलालनीयेश्यालसंबंध्यादौ ॥

वैहासिकः। पुं॰ वासन्तिके । कैलिकिले । विदूषके । प्रहासिनि ॥

वोटा। स्त्री॰ चेट्याम् । दास्याम् ॥ इ॰हे॰न्द्रः॰ ॥

वोड्रः। पुं॰ गोनसाहौ ॥ झषान्तरे

वोड्री। स्त्री॰ पणचतुर्थांशे । बुडि॰ इ॰गौ॰दे॰भा॰प्र॰ ॥

वोढव्यः। त्रि॰ वहनीये ॥

वोढुः। पुं॰ मुनिविशेषे ॥

वोढा। पुं॰ भारिके ॥ सूते । वोढृ ऋहः। वह॰ । अर्हे कृत्यतृचश्चेतितृच् । ढत्वधत्वष्टुत्वढलोपाः। सहिवहोरोदवर्णस्येत्योकारः ॥ अनडुहि । ऋषभे । परिणेतरि ॥ सूढे ॥

वोद्रः। त्रि॰ आर्द्रे ॥

वोदालः। पुं॰ पाठीनमत्स्ये ॥

वोद्रः। पुं॰ गोनसाहौ ॥ झषान्तरे ॥

वोद्री। स्त्री॰ पणपादे। काकिन्याम् ॥

वोरकः। पुं॰ लेखके ॥ इ॰त्रि॰शेषः ॥

वोरटः। पुं॰ कुन्दपुष्पे ॥ इ॰त्रि॰शेषः ॥

वोरपट्टी। स्त्री॰ मन्दुरायाम् । मादरी॰ कट्॰ चटाइ॰ इ॰भा॰प्र॰ ॥

वोरवः। पुं॰ वोरो॰ इ॰गौ॰भा॰प्र॰ धान्यविशेषे ॥ यथास्यगुणाः। वोरवस्तुबुधैः प्रोक्तस्त्रिदोषस्यप्रकोपणः। मधुराम्लपाकश्चव्रीहिः पित्तकरोगुरुः ॥

वोरुखानः पुं॰ पाटलवर्णाश्वे ॥ इ॰हे॰न्द्रः ॥

वोलम्। न॰ गन्धरसे । अस्यगुणाः। वोलंरक्तहरंशीतंमेध्यंदीपनपाचनम् । मधुरंकटुतिक्तञ्चज्वरस्वेदत्रिदोषजित् ॥ ज्वरापस्मारकुष्ठघ्नंगर्भाशयविशुद्धिकृत् ॥ अपिच । वोलस्तु कटुस्तिक्तोष्णःकषायोरक्तदोषनुत् । कफपित्तामयान्हन्तिप्रदरादिरुजापहम् । पुं॰ रसगन्धे ॥ वोलयति । कुलमज्जने । अच् ॥ वालतिवा । वा॰ । पिच्छादित्वाट्लच् ॥

वोलकः। पुं॰ लेखके ॥

वोला। स्त्री॰ रोलावृत्ते ॥ यथा । द्विगुणितरविमितकलितकलाभिर्ललितनिबद्धा॰ मङ्गलपिङ्गलभणितगणितकलयाकिलनद्धा । एकादशकलविरतिविदितमृदुगतिरिह-

वेला॰ यशसापूरितभुवनभुवनरसनासनवेला॥

वोल्लाहः। पुं॰ अश्वविशेषे॥ यथा। वोल्लाहस्त्वयमेवस्यात्पाण्डुकेशरवालधिः॥ इ॰ हे॰ चन्द्रः॥

वोहित्थम्। न॰ यानपात्रे। पोते। जहाज॰ इ॰ भा॰ प्र॰॥ इ॰ हे॰ चन्द्रः॥

वौषट्। अ॰ देवहविर्दानमन्त्रे॥ स्वाहादेवहविर्दानेश्रौषट्वौषट्वषट्स्वधेत्यमरः॥ उह्यतेऽनेन। वह॰। बाहुलकात्॰ डौषट्॥

व्यंशकः। पुं॰ पर्वते॥ इ॰ मुद्राङ्कितहेम चन्द्रः॥

व्यंसकः। पुं॰ धूर्त्ते॥

व्यंसितः। त्रि॰ वञ्चिते॥

व्यक्तः। त्रि॰ स्फुटे॥ मनीषिणि॥ प्रत्यक्षे। हेतुमदनित्यमव्यापिसक्रियमनेकमाश्रितंलिङ्गम्। सावयवंपरतन्त्रंव्यक्तम्। इतिलक्षिते॥ स्थूले॥ यथा। अव्यक्तोव्यक्तकारणमिति॥ व्यज्यतेस्म। अञ्जूव्यक्त्यादौ। क्तः। विपूर्वादस्मात्ः क्तेतु॰ अस्यानित्वे व्यक्तप्रतिषेधइति निष्ठातस्यअस्योनपादानइतिनत्वम्॥

व्यक्तकालः। पुं॰ स्थितिकाले॥

व्यक्तदृष्टार्थः। पुं॰ प्रत्यक्षिणि॥ साक्षिणि। इ॰ त्रि॰ शेषः॥

व्यक्तविशेषः। पुं॰ वुधे॥

व्यक्तिः। स्त्री॰ पृथगात्मताम्॥ प्रत्यक्षे। स्पष्टतायाम्। शरीरविषयादिरूपायांभोगभूमौ॥ प्रभावे॥ व्यक्तिलक्षणमाहगौतमः। यथा। व्यक्तिर्गुणविशेषाश्रयोमूर्त्तिरिति। अस्यार्थः। यद्यपिजात्यादेरपिव्यक्तित्वात्प्रमेयत्वमेवव्यक्तित्वम्॰ तथापिजात्याकृतिशक्तिविषयव्यक्तेरिदंलक्षणम्। तथाच॰ गुणविशेषोजात्याकृतिसमानाधिकरणोगुणः॰ सङ्ख्यादिभिन्नस्तदाश्रयः॰ मूर्त्तिर्व्यक्तिरितिसमानार्थकमित्यर्थः। परेतु॰ गुणारूपादयः॰ विशेषाविशेषकाः॰ उत्क्षेपणादयस्तेषामाश्रयोद्रव्यम्॰ तेन जात्याश्रयोव्यक्तिरित्याशयः। विशेषलक्षणमाहमूर्त्तिरिति। मूर्त्तिः संस्थानविशेषस्तद्वानित्याहुः। अवयवव्यञ्जनदशोपीसमासइत्याशयः। अन्येतु॰ व्यक्तेर्लक्षणंमूर्त्तिरिति॰ सैवकेत्याह। गुणविशेषाश्रयइति। गुणविशेषस्य॰ अवच्छिन्नपरिमाणस्याश्रयइत्यर्थइत्याहुः॥ १३२॥ व्यज्यतेऽनया। अञ्जू॰। स्त्रियांक्तिन्॥ जनै॥ इ॰ हे॰ चन्द्रः॥

व्यग्रः। त्रि॰ व्याहते। व्याकुले॥ अग्रवर्जिते॥ सोद्यमे। व्यासक्ते॥

त्रिविधं॰ विविधैर्वाच्यमस्य यद्वा । द्विकमगतिर्वा । व्यग॰ कर्त्तरि क्त् तिसाधुः ॥

व्यङ्कटः । पुं॰ अद्रिप्रभेदे ॥

व्यङ्गः । पुं॰ भेके ॥ मुखरोगविशेषे ॥ तल्लक्षणं यथा । क्रोधायासप्रकुपितो वायुः पित्तेन संयुतः । मुखमागम्य सहसा मण्डलं विसृजत्यतः ॥ नीरुजं तनुकं श्यावं मुखे व्यङ्गं तमादिशेत् ॥ त्रि॰ हीनाङ्गे॰ छिन्ननासिकादौ ॥ विगतानि॰विगतानि वा अङ्गान्यस्य ॥ विकले ॥ विगतमङ्गमस्य ॥

व्यङ्गकः । पुं॰ शैले । पर्व्वते हे॰ त्रि॰ शेषः ॥

व्यङ्गाङ्गः । त्रि॰ विकलाङ्गे । व्यङ्गमङ्गमस्य ॥

व्यङ्ग्यः । त्रि॰ व्यञ्जनया बोध्येऽर्थे ॥ यथा । वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः । व्यङ्ग्यो व्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः ॥ प्रकाश्ये । आन्तरेशब्दे ॥

व्यजः । पुं॰ तालवृन्ते । व्यजन्त्यनेन । अज॰ गोचरसञ्चरेति घप्रत्ययान्तो निपातितः ॥

व्यजनम् । न॰ वाजे । तालवृन्ते ॥ चामरे ॥ व्यजन्त्यनेन । अज॰ । करणे ल्युट् । वीयाविति पक्षे वीन ॥

व्यञ्जकः । पुं॰ अभिनये ॥ त्रि॰ व्यक्तिकारके । प्रकाशके ॥ वैखरीरूपे शब्दे ॥ घटप्रत्यक्षसमये आलोको व्यञ्जको यथा ॥ व्यञ्जनया प्रतिपादके ॥ इ॰ सा॰ द॰ ध॰ ॥ व्यनक्ति । अञ्ज॰ । ण्वुल् ॥

व्यञ्जनम् । न॰ निष्ठाने । तेमने । दधिघृतादौ । सूपशाकादौ । तीवण हू॰ भा॰ प्र॰ ॥ चिह्ने ॥ श्मश्रुणि ॥ अवयवे । स्त्रीपुंसयोः गुह्यदेशे । सत्यादिचिह्ने ॥ अहनि । दिने ॥ व्यज्यतेऽनेनवा ल्युट् ॥ स्वरहीन वर्णे ॥ अच्सहितस्यास्योच्चारणं न भवति । नपुनरन्तरेणाचं व्यञ्जनस्योच्चारणमपि भवतीति भाष्योक्तेः ॥

व्यञ्जना । स्त्री॰ शब्दस्य वृत्तिविशेषे ॥ तस्या लक्षणं यथा । विरतास्वभिधाद्यासु ययार्थो बोध्यते परः । सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च ॥ शब्दबुद्धिकर्म्मणां विरम्य व्यापाराभाव इति नयेनाभिधालक्षणा तात्पर्याख्यासु तिसृषु वृत्तिषु स्वं स्वमर्थं बोधयित्वोपक्षीणासु॰ यया अन्योऽर्थो बोध्यते॰ सा शब्दस्यार्थस्य प्रकृतिप्रत्ययादेश्च वृत्तिर्व्यञ्जनध्वननगमनप्रत्यायनादिव्यपदेशविषया व्यञ्जना नाम ॥ विशेषः साहित्यदर्पणादौ द्रष्टव्यः ॥

व्यञ्जितः । त्रि॰ प्रकटीकृते ॥

व्यडम्बकः । पुं॰ एरण्डे ॥ व्यडं मलमम्बयति । अविस्रंसने । णिच् । ण्वुल् ॥

व्यडम्बनम् । न॰ एरण्डे ॥ व्यडंमलमम्बयति । अवि॰ । ल्युट्॰ युज्वा ॥ शुक्लैरण्डे ॥

व्यतिकरः । पुं॰ व्यसने ॥ व्यतिकृ॰ ॥ मिश्रणे ॥ क्षोभे ॥ सम्बन्धे ॥

व्यतिकीर्णः । त्रि॰ संकीर्णे ॥

व्यतिक्रमः । पुं॰ व्यत्यये । अन्यथात्वे । क्रमविपर्यये । यथा । सर्वमप्राङ्मुखो दाता यथोतावउदङ्मुखः । एष एव विधिर्दाने विवाहे तु व्यतिक्रमः ॥ व्यतिक्रमणम् । क्रम॰ । घञ् । नोदात्तोपदेशेति न वृद्धिः ॥ अन्याये ॥

व्यतिभेदः । पुं॰ समावेशे ॥

व्यतिरिक्तः । त्रि॰ व्यतिरेकविशिष्टे । भिन्ने । अन्यस्मिन् ॥ व्यतिरिच्यते स्म । रिचिर् विरेचने । क्तः ॥

व्यतिरेकः । पुं॰ अभावे । विरहे । कारणकार्याद्व्यवृत्तौ । कार्यव्यतिरेकप्रयोजकव्यतिरेकप्रतियोगित्वे ॥ अलङ्कारविशेषे । यथा । व्यतिरेको विशेषश्चेदुपमानोपमेययोः । शैलाइवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः ॥ अयमुपमेयाधिक्यपर्यवसायी व्यतिरेकः ॥ यथा वा ।

पल्लवतः कल्पतरोरेष विशेषः करस्य ते वीर । भूषयति कर्णमेकः परस्तु कर्णे तिरस्कुरुते ॥ तन्न्यूनत्वपर्यवसायी । यथा । रक्तस्त्वं नवपल्लवैरहमपि श्लाघ्यैः॰ प्रियाया गुणैस्त्वामायान्ति शिलीमुखाः स्मरधनुर्मुक्ताः सखे मामपि । कान्तापादतलाहतिस्तव मुदे तद्वन्ममाप्यावयोः सर्वं तुल्यमशोक केवलमहं धात्रा सशोकः कृतः ॥ अनुभयपर्यवसायी यथा । दृढतरनिबद्धमुष्टेः कोषनिषण्णस्य सहजमलिनस्य । कृपणस्य कृपाणस्य च केवलमाकारतो भेदः ॥ विशिष्टः॰ अतिरेकः॰ पृथग्भावः ॥ विपर्यये ॥

व्यतिरेकव्याप्तिः । स्त्री॰ साध्यनिषेधसाधननिषेधरूपेण॰ प्रवृत्तायां व्याप्तौ । यथा । यत्र वह्निर्नास्ति॰ तत्र धूमो नास्तीति॰ यथा ह्रदे ।

व्यतिरेकसंज्ञा । स्त्री॰ वैराग्यविशेषे । परिपाचने चानुष्ठीयमाने केचित्कषायाः पक्वाः॰ पच्यन्ते केचित् तत्रैवं पूर्वापरीभावे सति पच्यमानेभ्यः कषायेभ्यः पक्वानां व्यतिरेकेणावधारणे, क्वचित्तु पूर्वं विद्यमानदोषाणां मध्ये ऽभ्यस्यमानविवेकेनैते पक्वा॰ एतेऽवशिष्टा इति चिकित्सकवद्विवेचनस्वरूपे ॥

व्यतिरेकोदाहरणम् । न॰ उदाहरण

विशेषे ॥ अव्यतीतम : । तद्विपर्ययाद्वाविपरीतंव्यतिरेक्युदाहरणमिति । अस्यार्थ : । तद्विपर्ययात्‌ साध्यसाधनव्यतिरेकव्याप्तिप्रदर्शनात्‌ । तथाचसाध्यसाधनव्यतिरेकव्याप्त्युपदर्शकोदाहरणं व्यतिरेक्युदाहरणम्‌ । यथाजीवच्छरीरं सात्मकम्प्राणादिमत्वात्‌ यन्नैवम्‌ तन्नैवम्‌ यथाघटइति । बाकार : प्रयोगमपेक्ष्य तथाचान्वयुदाहरणं व्यतिरेक्युदाहरणंचाप्रयोगक्रमइति ॥ ३६ ॥

व्यतिषक्त : । त्रि॰ सम्बन्धाक्रान्ते । सम्बद्धे । व्यतिषज्यतेस्म । षञ्जसङ्गे । क्त : । उपसर्गात्सुनोतीत्यादिनाषत्वम्‌ ।

व्यतिषङ्ग : । पुं॰ विनिमये ॥ सङ्गे । परस्परमेलने ॥व्यतिषञ्जनम्‌ । षञ्ज॰ । घञ्‌ ।

व्यतिहार : । पुं॰ विनिमये । परस्परकरणे । यथा॰ त्वमहमस्मि॰ अहन्तु त्वमसीतिव्यतिहार : सचैक्यतात्पर्यकगमनइत्यर्तीति । व्यत्यये । अन्यस्मिन्नन्याधर्मासे ॥ व्यतिहरणम्‌ हृञ्‌॰ । घञ्‌ । व्यतिह्रियतेऽनेनावा । घञ्‌ । उपसर्गस्येतिपाक्षिकोदीर्घाभाव : ॥

व्यतीत : । त्रि॰ विगते । विशेषेण॰ अतीत : ॥

व्यतीपात : । पुं॰ महोत्पाते । उपद्रवे ॥ अपमाने । पलायने । योगविशेषे ॥ तज्जातस्यफलंयथा । कठोरवाक्य : । पिशुनस्वभावोगदातुरोमातृहिंसोमनुष्य : । परस्यकार्यंकृतपक्षपातोयस्यप्रसूतौव्यतिपातयोग । व्यतिक्रम्यपतनम्‌ । पत्लृगतौ । घञ्‌ । उपसर्गस्येतिदीर्घ : ॥ अन्ययोगे ॥

व्यतीहार : । पुं॰ परीवर्ते । व्यतिहरणम्‌ ॰व्यतिह्रियतेवा । हृञ्‌॰ । घञ्‌ । उपसर्गस्येतिपाक्षिकोदीर्घ : ॥ परस्परमेककालीनक्रियाकरणे ॥

व्यत्यय : । पुं॰ व्यतिक्रमे । व्यत्यासे । विपर्यासे । विपर्यये । व्यत्ययनम्‌ इण्‌॰ । एरच्‌ ॥

व्यत्यस्त : । त्रि॰ व्यतिक्रमसंस्थिते । यथा । व्यत्यस्तपाणिनाकार्यमुपसंग्रहणं गुरो : । सव्येनसव्य : स्प्रष्टव्योदक्षिणेनचदक्षिणइतिमनु : ॥ उत्तानाभ्यांहस्ताभ्यांदक्षिणोपरिभावेनव्यत्यास : शिष्टसमाचारात्‌ बोध्य : ॥

व्यत्यास : । पुं॰ व्यतिक्रमे । व्यत्यये ॥ व्यत्यसनम्‌ । असुक्षेपणे । घञ्‌ ॥

व्यत्यासित : । त्रि॰ वैसादृश्यंप्रापिते ॥ तारकादित्वादितच्‌ ॥

व्यथकः। त्रि॰ व्यथाकारिणि। दुःखजनके॥ भयङ्करे॥ व्यथयतिव्यथभयचलनयोः। बहुल मन्यत्रापीति क्वुन्॥

व्यथा। स्त्री॰ पीडायाम्॥ दुःखे॥ व्यथ॰। घटादयः षितइतिषित्त्वादङ्। टाप्॥

व्यथितः। त्रि॰ दुःखिते। पीडिते॥ व्यथासञ्जातास्य। तारकादित्वादितच्॥

व्यधः। पुं॰ वेधे॥ व्यधनम्। व्यधताडने। व्यधजपोरित्यप्॥ ताडने॥

व्यधनम्। न॰ वेधने॥

व्यध्यः। पुं॰ प्रतिकाये। धनुर्गुणे॥

व्यध्वः। पुं॰ दुरध्वे। विपथे। निन्दितेवर्त्मनि॥ विरुद्धोध्वा। प्रादयोगताद्यर्थेइतिसमासः। उपसर्गादध्वनइत्यच्॥

व्यपगतः। त्रि॰ निवृत्ते॥

व्यपदेशः। पुं॰ शब्दे। नामनि॥ कपटे॥ विशिष्टोऽपदेशः॥ वाक्यविशेषे॥ यथा। व्याजेनात्माभिलाषिणीं व्यपदेशइतीर्यतइत्युज्ज्वलनीलमणिः॥

व्यपवर्गः। पुं॰। व्यपवृत्तिभेदे॥

व्यपाकृतिः। स्त्री॰ अपकृते। अस्वीकारे॥

व्यपाश्रयः। पुं॰ शरणे॥

व्यपेतः। त्रि॰ अपगते॥

व्यपोढः। त्रि॰ विपरीते॥

व्यपोहः। पुं॰ व्यपोहने॥

व्यपोहनम्। न॰ अपाकरणे॥

व्यभिचारः। पुं॰ कदाचारे। भ्रष्टाचारे॥ परिलोपे॥ स्खालित्ये॥ दोषविशेषे॥ तल्लक्षणं यथा। साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववृत्तित्वं हि व्यभिचारइतिव्यधिकरणधर्मावच्छिन्नाभावचिन्तामणिः॥ सचत्रिविधः। साधारणासाधारणानुपसंहारिभेदात्। तत्र विपक्षवृत्तित्वं साधारणत्वम्। सर्वसपक्षव्यावृत्तत्वमसाधारणत्वम्। व्याप्तिग्रहानुकूलैकधर्म्युपसंहाराभावोयत्रसत्त्वभिमतोऽनुपसंहार्यः। इतिसव्यभिचारचिन्तामणिः॥ विशिष्टोभिचारः॥ व्यभिचरणं वा। चर॰। घञ्॥

व्यभिचारिणी। स्त्री॰ परपुरुषगामिन्याम्। कुलटायाम्॥ यथा। हृताधिकारांमलिनांपिण्डमात्रोपजीवनीम्। परिभूतामधःशय्यांवासयेद्व्यभिचारिणीम्॥ व्यभिचारोव्यतिक्रमोस्त्यस्याः। इनिः। ङीप्॥

व्यभिचारी। पुं॰ चतुस्त्रिंशत्प्रकारशृङ्गारभावविशेषे॥ तेयथा। निर्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमाः। आलस्यञ्चैवदैन्यञ्चचिन्तामोहः स्मृतिर्धृतिः॥ व्रीडाचपलता

हर्षश्च वेगो जडता तथा गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥ सुप्तो विबोधोऽमर्षश्चावहित्थमथोग्रता मति: । उपलक्ष्य व्याधिरुन्मादो मरणं तथा ॥ त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिण इति हेमचन्द्र: ॥ साहित्यदर्पणे त्रयस्त्रिंशदुक्ता: । यथा । विशेषादाभिमुख्येन चरन्तो व्यभिचारिण: । स्थायिन्युन्मग्ननिर्मग्ना त्रयस्त्रिंशच्च तद्भिदा: ॥ स्थिरतयावर्त्तमाने हि रत्यादौ निर्वेदादय: प्रादुर्भावतिरोभावाभ्यामाभिमुख्येन चरणाद्व्यभिचारिण: कथ्यन्ते । केते । इत्याह । निर्वेदावेगदैन्यश्रममदजडता औग्र्यमोहौ विबोध: स्वप्नापस्मारगर्वा मरणमलसतामर्षनिद्रावहित्था: । औत्सुक्योन्मादशङ्का: स्मृतिमतिसहिता व्याधिसन्त्रासलज्जा हर्षासूयाविषादा: सधृतिचपलताग्लानिचिन्तावितर्का इति ॥ त्रि० व्यभिचारविशिष्टे ॥

व्यय: । पुं० अर्थापचये । वित्तस्यापगमे । उठाव० खरच० इ० भा० ॥ पूर्वगृहीतदेहेन्द्रियादिवियोगे ॥ धर्मादिरुविमियोगे ॥ क्षये ॥ वत्सरविशेषे ॥ तत्फलं यथा । दुर्भिक्षं जायते घोरं सर्वोपद्रवसंयुतम् । अनावृष्टि: समाख्याता व्ययेसंवत्सरेप्रिये ॥ २० ॥ न० लग्नाद्द्वादशभवने व्ययनम् । व्ययवित्तसमुत्सर्गेऽन्त: । घञ० अच् वा । विपूर्वादिणएरच्वा ॥

व्ययित: । त्रि० कृतव्यये ॥

व्ययी । त्रि० व्ययुक्ते ॥ यथा । द्रविणं परिमितमधिकव्ययिनं जनमाकुलीकुरुते । क्षौमांशुकमिवपीनस्तनजघनाया: कुलीनाया: ॥

व्यर्थ: । त्रि० निरर्थके । मोघे । विफले ॥ यथा । भर्त्तानिश्वसितेऽप्यसूयतिमनोजिघ्र: सपत्नीगण: श्वश्रूरिङ्गितदैवतं नयनयोरीहालिहो यातर: । तद्दूरादयमञ्जलि: किमधुनादृग्भङ्गिभागेन तेवैदग्धीमधुरप्रबन्धरसिकव्यर्थोऽयमत्रश्रमइति ॥ विशेषेणगत: अर्थोयस्मात् ॥

व्यर्थभाषणम् । न० निरर्थकेव्यापारे । यथा । देशराष्ट्रप्रसङ्गाच्चपरार्थपरिकल्पनात् । नर्महासप्रसङ्गाच्चभाषणंव्यर्थभाषणमितिदेवल: ॥

व्यलीक: । पुं० नागरे । षिङ्गे ॥ न० अप्रिये ॥ अकार्ये ॥ वैलक्ष्ये ॥ पीडने । व्यङ्गे । विशेषणचलति । अलभूषणादौ । अलीकादयश्चेति साधु: ॥ विगतानृते । विगतमलीकम् ॥ विपर्ययेपीतिस्वामी ॥

व्यवकलनम् । न० वियोगे । क्षीणे ॥ अङ्कस्यांतरकरणे । बाकिकाटा० इ० गौ० दे० भा० ॥

व्यवकलित : त्रि॰ कृतव्यवकलने । वियोजिते । न॰ व्यवकलने ।

व्यवच्छिन्न : । त्रि॰ भिन्ने ॥ विशेषिते

व्यवच्छेद : । पुं॰ पृथक्त्वे । बाणमुक्तौ ॥

व्यवच्छेदकम् । न॰ विशेषणे ।

व्यवच्छेद्यम् । त्रि॰ विशेष्ये ॥

व्यवधा । स्त्री॰ अन्तर्द्धायाम् । तिरोधाने । व्यवधानम् । डुधाञ्॰ । आतश्चोपसर्ग इत्यङ् ॥

व्यवधानम् । न॰ अन्तर्द्धौ । तिरोधाने । वस्त्वन्तरकृतेऽवच्छेदे । खड्गादेः कोषादिवदावरणे ॥ व्यवपूर्वाद्धाञो ल्युट् ॥

व्यवधायक : । त्रि॰ व्यवधानकर्त्तरि ॥

व्यवधि: । पुं॰ विधाने । व्यवधाने ॥ व्यवधानम् । डुधाञ्॰ । उपसर्गे घो: कि: ॥

व्यवसर्ग : । पुं॰ दाने ॥ व्यवसर्ज्जनं सृज॰ । घञ् ॥

व्यवसाय : । पुं॰ उपजीविकायाम् ॥ उद्यमे : फलाव्यभिचार्युद्यमे ॥ यथा । व्यवसायिनांव्यवसाय : फलाव्यभिचार्युद्यमोभगवद्विभूतिरिति । निश्चये ॥

व्यवसायात्मिका । स्त्री॰ निश्चयात्मिकायांबुद्धौ ॥ व्यवसायोनिश्चय: आत्मायस्या : ।

व्यवसायी । त्रि॰ कृतनिश्चये ॥ साद्यमे ॥ व्यवसायविशिष्टे ॥ वाणिज्यकारके ॥ अनुष्ठातरि ॥

व्यवसित : । त्रि॰ निश्चये ॥ प्रतारिते ॥ अनुष्ठिते ॥ विशिष्टमवस्यतिस्म॰ अवसीयतेस्मवा । षोऽन्तकर्मणि । क्त : । द्यतिस्यतीतीत्त्वम् ॥

व्यवस्था । स्त्री॰ संस्थायाम् । सद्विषयकत्वनिर्धारणे ॥ विशिष्टावस्था ॥ शास्त्रनिरूपितविधौ । रचनानियमे ॥ व्यवतिष्ठतेऽनया । ष्ठा॰ । आतश्चोपसर्गइत्यङ् । टाप् ॥ व्यवस्थानंवा ॥

व्यवस्थान : । पुं॰ श्रीहरौ । यस्मिन् व्यवस्थित : सर्व्वस्य : ॥ जातिवर्णाश्रमतद्धर्मादिकान्विभज्यकरोतिवा । कृत्यल्युटोबहुलमिति॰ बहुलग्रहणात्कर्त्तरिल्युट् । व्यवतिष्ठतेसर्वंजगद्साङ्कर्येणात्र। अधिकरणेल्युट्वा । न॰ व्यवस्थितौ ।

व्यवस्थापक: । पुं॰ व्यवस्थादातरि ।

व्यवस्थापित : । त्रि॰ निश्चिते ॥

व्यवस्थित : । त्रि॰ अप्रचलिते । तत्तद्योगेनावस्थिते । प्रतिष्ठिते ॥ विशेषेणअवस्थित : ॥ व्यवस्थांप्राप्ते ॥ इतच् ।

व्यवस्थिति : । स्त्री॰ अवस्थाने । व्यवस्थाने ॥

व्यश्च । अ० निश्चित्येत्यर्थे ॥

व्यवहरणम् । न० व्यवहारे ॥

व्यवहर्त्ता । पुं० व्यवहारकर्त्तरि ॥ प्राड्विवाके ।

व्यवहारः । पुं० शास्त्रीयलौकिकादिव्यवहरणे । व्यौहार० इ० भा० । यथाहुः । अहमिदमितिममतिर्यांसततंव्यवहरतिसर्वलोकोपि । प्रथमाप्रतीचिचरमानिवसतिवपुरिन्द्रियादिवाह्यार्थे ॥ इति ॥ द्रुमप्रभेदे । न्यासे ॥ पणे ॥ स्थितौ व्युत्पत्तौ ॥ विवादे । ऋणदानादिविषयचतुष्पाद्व्याये ॥ ऋणदानाद्यष्टादशविषये० विरुद्धार्थिप्रत्यर्थिवाक्यजनितसन्देहहारीविचारएवव्यवहारः । यथाहकात्यायनः । विनानार्थेऽवसन्देहहरणंहारउच्यते । नानासन्देहहरणाद्व्यवहारइतिस्मृतइति ॥

व्यवहारज्ञः । पुं० प्राप्तव्यवहारे ॥ सतुषोडशवर्षानन्तरंभवति । यथा । बालआषोडशाद्वर्षात्पौगण्डोपि निगद्यते । परतोव्यवहारज्ञःस्वतन्त्रः पितरावृतेइति ॥ त्रि० व्यवहारज्ञातरि ॥

व्यवहारदर्शनम् । न० न्यायदर्शने । विचारकरणे ।

व्यवहारपदम् । न० वादिनाराज्ञिनिवेदने ॥ यथाहयाज्ञवल्क्यः । स्मृत्याचारव्यपेतेन० मार्गेणाधर्षितः परैः । आवेदयतिचेद्राज्ञेव्यवहारपदंहितदिति ॥

व्यवहारपादः । पुं० व्यवहारांशे । यथा । पूर्वपक्षःस्मृतःपादोद्विपादश्चोत्तरःस्मृतः । क्रियापादस्तथाचान्यश्चतुर्थोनिर्णयःस्मृत इति ॥

व्यवहारमातृका । स्त्री० व्यवहारोपयोगिक्रियायाम् ॥ साचमिताक्षरातोनुसन्धेया ॥

व्यवहारमार्गः । पुं० व्यवहारविषये । व्यवहारपदे ॥

व्यवहारविधिः । पुं० धर्मशास्त्रे । व्यवहारस्यविधाने ॥

व्यवहारविषयः । पुं० व्यवहारपदे ॥

व्यवहारिका स्त्री० लोकयात्रायाम् ॥ वर्द्धन्याम् । सम्मार्ज्जन्याम् ॥ इङ्गुदे ॥

व्यवहारी । त्रि० व्यवहारविशिष्टे ॥

व्यवहार्य्यः । त्रि० व्यवहरणीये । व्यवहर्त्तव्ये । व्यवहारयोग्ये ॥

व्यवहितः त्रि० दूरस्थिते ॥ व्यवधानविशिष्टे । सान्तरे । भित्त्याद्यन्तरिते ॥ तिरोहिते ॥

व्यवहृतः । त्रि० कृतव्यवहारे ॥

व्यवहृतिः । स्त्री० व्यवहारे ॥

व्यवायः । पुं० सुरते । ग्राम्यधर्मे ।

मैथुने ॥ अन्तर्द्धौ । व्यवधाने ॥ शुद्धाविति धरणिः ॥ न॰ तेजसि ॥ व्यवायनम् । इण् गतौ॰ अयगतौ वा । एरच्॰ घञ् वा ॥

व्यवायी । पुं॰ स्त्री॰ कामुके ॥ त्रि॰ द्रव्यविशेषे ॥ व्यवायोऽस्यास्मिन् वाऽस्ति । इनिः ॥

व्यश्नुवानः । त्रि॰ व्याप्नुवति ॥ अश्नोतेर्लटः शानजादेशः ॥

व्यष्टिः । स्त्री॰ व्यस्तव्यापिनि ॥ विशेषे । अध्यात्मादिविभागेन व्याप्तिर्व्यष्टिरितीरिता ॥

व्यसनम् । न॰ अशुभे ॥ सक्तौ ॥ दैवानिष्टफले । भ्रंशे ॥ पापे ॥ विपत्तौ । निष्फलोद्यमे ॥ स्त्रीपानमृगयादिष्वष्टादशविधेषु ॥ यथाह मनुना । मृगयाक्षो दिवास्वप्नः परिवादः स्त्रियो मदः । तौर्य्यत्रिकं वृथाट्या च कामजो दशको गणः ॥ पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम् । वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ॥ कामजेषु प्रसक्तो हि व्यसनेषु महीपतिः । वियुज्यतेऽर्थधर्माभ्यां क्रोधजेष्वात्मनैव तु ॥ द्वयोरप्येतयोर्मूलं यं सर्वे कवयो विदुः । तं यत्नेन जयेल्लोभं तज्जावेतावुभौ गणौ ॥ पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमम् । एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे ॥ दण्डस्य पातनं चैव वाक्पारुष्यार्थदूषणे । क्रोधजेऽपि गणे विद्यात्कष्टमेतत्त्रिकं सदा ॥ सप्तकस्यास्य वर्गस्य सर्वत्रैवानुषङ्गिणः । पूर्वं पूर्वं गुरुतरं विद्याद्व्यसनमात्मवान् ॥ तथाहि॰ द्यूतात्पानं कष्टतरम्॰ मद्यपानेन मत्तस्य संज्ञाप्रणाशात्॰ यथेष्टचेष्टया देहधनादिविरोध इत्यादयो दोषाः॰ द्यूते तु पाक्षिको धनावाप्तिरप्यस्ति । स्त्रीव्यसनात्॰ द्यूतकष्टम्॰ द्यूते हि वैरोद्भवादयो नीतिशास्त्रोक्ता दोषाः॰ मूत्रपुरीषवेगधारणाच्च व्याध्युत्पत्तिः॰ स्त्रीव्यसने पुनरपत्योत्पत्त्यादिगुणयोगोऽप्यस्ति । मृगयास्त्रीव्यसनयोः स्त्रीव्यसनं दुष्टम्॰ तत्रादर्शनं कार्याणां कालातिपातेन धर्मलोपादयो दोषाः॰ मृगयायां तु व्यायामेनारोग्यादिगुणयोगोऽप्यस्तीत्येवं कामजचतुष्कस्य पूर्वं पूर्वं गुरुदोषम् ॥ क्रोधजेष्वपि त्रिषु॰ वाक्पारुष्यात्॰ दण्डपारुष्यं दुष्टम्॰ अङ्गच्छेदादेरशक्यसमाधानत्वात्॰ वाक्पारुष्ये तु॰ कोपानलो॰ दानमानपानीयसेकैः शक्यः शमयितुम् । अर्थदूषणात्॰ वाक्पारुष्यदोषवन्मर्मपीडाकरम्॰ वाक्पारुष्यस्य दुश्चिकित्स्यत्वात् । एवं पूर्वं पूर्वं दुष्टतरं त्यजेदित्यर्थः । यतो व्यसनासक्तिरनर्थावहा ॥ व्यसनस्य च मृत्योश्च व्यसनं कष्टमुच्यते । व्यसन्यधोऽधो

व्रजति स्वर्गाद्व्यसनी मृतः ॥ इति ॥ अन्यच्चापि । एकैकव्यसनासक्ताः सर्वे मृत्युवशं गताः । यः पुनः संहतान् सेवेद्विषयान् विषयी नरः । स पतेन्महदैश्वर्याच्छिन्नमूल इव द्रुम इति ॥ चौर्य्यं व्यसनान्यद्य कामजानि भवन्त्युत । मिथ्यावाक्यं परमक्तं तस्माद्दूरतराशुभौ ॥ परदाराभिगमनं विनावैरस्त्रीदृतेतिरामायणम् ॥ व्यस्यते । असुक्षेपणे । भावकर्मकरणादौ ल्युट् ॥ सर्वथैतत् सम्पादयिष्यामीत्याग्रहो व्यसनम् ॥

व्यसनव्रातकः । पुं॰ राजर्षिविशेषे ॥

व्यसनार्त्तः । त्रि॰ उपरक्ते । दैवमानुषान्यतरपीडायुक्ते ॥ व्यस्यति श्रेयोमार्गात्॰ व्यसनम्॰ तेनार्त्तः ॥

व्यसनी । त्रि॰ व्यसनग्रस्ते । पञ्चभद्रे । व्यसनमस्यास्ति॰ अस्मिन्नर्था । इनिः ॥

व्यस्तः । त्रि॰ व्याकुले । व्याप्ते ॥ प्रत्येकम् । पृथक्पृथगर्थे ॥ विपरीते ॥ व्यस्यते स्म । असुक्षेपणे । क्तः ॥ विभक्ते ॥ विक्षिप्ते ॥ *

व्यस्तपदम् । न॰ ऋणादौ नाभियोगपदान्तरेणोत्तरे ॥ यथा ॥ सुवर्णशताभियोगे॰ अनेनाहं ताडित इति ॥

व्यस्तारम् । न॰ हस्तिनो मदप्रयोगे ॥

व्याकरणम् । न॰ वेदस्याङ्गे शब्दशास्त्रे ॥ विशेषेण आक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेन । डुकृञ्॰ ल्युट् । प्रादिसमासः ॥ अक्षारम्भेषु यथा । नयेच्छब्दशास्त्रागमारम्भकालं कृतौशिमुषोशीशमैाविद्विषु । चलच्चिप्रमैत्रोडुशैवाश्रिते पुष्यतीधर्मशास्त्रादिकारम्भकालमिति ॥ अथोक्तं महाभाष्ये । पुराकल्पएतदासीत् । संस्कारकालोत्तरं ब्राह्मणा व्याकरणं स्माधीयते॰ तेभ्यस्तत्तत्स्थानकरणनादानुप्रदानज्ञेभ्यो वैदिकाः शब्दा उपदिश्यन्ते॰ तदद्यत्वे न तथा॰ वेदमधीत्य त्वरिता वक्तारो भवन्तीति । त्वरिता विशेषादृष्टिति कैयटः । संस्कार उपनयनम् । करणमाभ्यन्तरप्रयत्नः । अनुप्रदानं नादादिर्बाह्यः प्रयत्नः । तेन अधीतव्याकरणशिक्षेभ्य इत्यर्थ इति विवरणम् ॥

व्याकारः । पुं॰ व्याकरणे । कृञो घञ् ॥

व्याकीर्णः । त्रि॰ विकीर्णे । विक्षिप्ते ॥ *

व्याकुलः । त्रि॰ शोकादिभिरितिकर्त्तव्यतापरिज्ञानशून्ये ॥ विह्वले ॥ व्याकोलति । कुल संस्त्याने बन्धुषु च । इगुपधेति कः ॥ उपद्रुते ॥ सम्भ्रान्ते ॥

व्याकुलात्मा । त्रि॰ शोकाभिहतचित्ते ॥

व्याकृत : । पुं० कार्यब्रह्मणि । सम्भूतौ । हिरण्यगर्भे ॥

व्याकृति : । स्त्री० भङ्ग्यां । व्युत्पत्तौ ॥ व्याकरणम् । डुकृञ्० । क्तिन् ॥ विशिष्टाआकृतिर्वा ॥ व्यञ्जने ॥

व्याकोश : । त्रि० व्याकोषे । विकसिते ॥ व्यावृत्त : कोश : सङ्कोचोऽस्मात् । प्रादिसमास : ॥

व्याकोष : । पुं० प्रफुल्ले । उत्फुल्ले । विकसिते ॥ व्यावृत्त : कोष : सङ्कोचोऽस्मात् । प्रादिभ्यो धातुजस्येतिसमास : ॥

व्याक्षेप : । पुं० अन्तराये ॥ अव्याक्षेपोभविष्यन्त्या : कार्यसिद्धेर्हि लक्षणम् ॥

व्याख्या : स्त्री० विवरणे । व्याख्यानम् । ख्या० । आतश्चोपसर्गइत्यङ् । टाप् ॥

व्याख्यागम्यम् । न० उत्तराभासभेदे ॥ यथा अस्तव्यस्तपदव्यापिनिगूढार्थं तथाकुलम् । व्याख्यागम्यमसारञ्चेत्तरंशास्त्रविदुर्बुधै : ॥ व्याख्ययागम्यतेज्ञायतेयत् गम्लृ० । पोरदुपधादितियत् ॥ ❀

व्याख्यात : । त्रि० विवृते । कथिते । विस्पष्टमाख्याते ॥

व्याख्याता । त्रि० विवरणकर्त्तरि ॥

व्याख्यानम् । न० व्याख्यायाम् ॥ यथास्वलक्षणम् । पदच्छेद : पदार्थोक्तिर्विग्रहोवाक्ययोजना । आक्षेपस्यसमाधानंव्याख्यानंपञ्चलक्षणम् ॥ व्याख्यानसाधने ॥ व्याख्यायतेऽनेन । ख्या० । करणेल्युट् ॥

व्याघात : । पुं० विष्कम्भादियोगान्तर्गतयोगभेदे ॥ अत्रजातस्यफलं यथा । व्याघातकर्त्तासततांनितान्तंव्याघातजन्मामनुज: कठोर : । असत्यभाषीकृपयाविहीनोमन्देक्षणोदीर्घतनु : कृशाङ्ग : ॥ अन्तराये । विघ्ने । घाते । प्रहारे । विशिष्टआघात : ॥ अलङ्कारविशेषे ॥ तस्यलक्षणं यथा । तद्यत्र साधितं केनाप्यपरेणतदन्यथा । तथैवयद्विधीयेतसव्याघातइतिस्मृत : ॥ येनोपायेनयदेकेनोपकल्पितं० तस्यान्येनजिगीषुतयातदुपायकमेवयदन्यथाकरणं० सव्यसाधितत्वस्तुव्याहतिहेतुत्वात्० व्याघात: ॥ उदाहरणम् । दृशादग्धंमनसिजंजीवयन्तिदृशैवया : । विरूपाक्षस्यजयिनीस्ता: स्तुवेवामलोचना: ॥

व्याघ्र : । पुं० शार्दूले । द्वीपिनि । रक्तैरण्डे ॥ करञ्जे ॥ नराद्युत्तरस्थ : श्रेष्ठे ॥ यथानरव्याघ्र : । व्याजिघ्रति । घ्रा० । व्याङिघ्रातिस्वजातावितिक : । यद्वाआतश्चोपसर्गइतिक: । पाघ्राध्मधेटदृश :

ग्रहतिशीन । घ्र : संज्ञायामितिनि षेधात् ॥

व्याघ्रदल : । पुं० एरण्डे ॥

व्याघ्रनख: । पुं० स्नुहीवृक्ष ॥ व्याघ्रनखे । व्यस्रफले ॥ व्याघ्रस्यनखे ॥ न० नखीनामगन्धद्रव्ये । व्याडायुधे । करजे । चक्रकारके कन्दविशेषे ॥ नखक्षतविशेषे ॥ व्याघ्रस्यनखमिव ॥

व्याघ्रनखकम् । न० नखक्षते ॥

व्याघ्रनायक : । पुं० शृगाले ॥ इ० रा० भट : ॥

व्याघ्रपात् । पुं० विकङ्कते । ग्रन्थिले ॥ व्याघ्रस्यपादाएवपादमूलान्यस्य ॥ मुनिविशेषे ॥ त्रि० व्याघ्रतुल्यचरणे ॥

व्याघ्रपाद : । पुं० विकङ्कतवृक्षे ॥ विकण्टकवृक्षे ॥ मुनिविशेषे ॥ रक्तैरण्डे ॥

व्याघ्रपुच्छ :। पुं० एरण्डमात्रे । व्याघ्रपुच्छमिवपुच्छमस्य ॥

व्याघ्राट : । पुं० भरद्वाजपक्षिणि । व्याघमटति । अट० । कर्मण्यण् । व्याघ्रइवअटतिवा । अच् ।

व्याघ्रादनी । स्त्री० चिरतायाम् ॥

व्याघ्रायुधम् । न० नखाख्यगन्धद्रव्ये ॥

व्याघ्रास्य : । पं० बिडाले ॥ न० व्याघ्रमुखे ॥

व्याघ्री । स्त्री० निदिग्धिकायाम् । कण्टकार्याम् ॥ व्याजिघ्रति । घ्रा० । व्याघ्रादिभिरितिलिङ्गादातश्चोपसर्गइतिकः० नतुश : । गौरादि: ॥ धूम्रवर्णायामवराटिकायाम् ॥ व्याघ्रस्त्रियाम् ॥ यथा । व्याघ्रीवास्तेजराचायुर्यातिभिन्नघटाम्बुवत् । निघ्नन्तिरिपुवद्रोगास्तस्माच्छ्रेय: समाचरेत् ॥ इ० कुलार्णव : ॥

व्याङ्गि : । पुं० व्यङ्गसुते ॥ अपत्ये इञ् । स्वागतादीनाञ्चेतिइविनिषेधऐजागमश्चन ॥

व्याचिख्यासित : । त्रि० व्याख्यातुमिष्टे ॥

व्याचिख्यासु : । त्रि० व्याख्यातुमिच्छौ ॥

व्याज : । पुं० शाठ्ये । कपटे ॥ स्वरूपाच्छादने । अपदेशे । मिषे ॥ व्यजन्ति० विपक्षमनेन । अज० । हलश्चेतिघञ् । निष्ठायांसेटस्त्वान्नकुत्वम् ॥

व्याजनिन्दा । स्त्री० अलङ्कारविशेषे ॥ यथा ॥ निन्दायानिन्दयाव्यक्तिर्व्याजनिन्देतिगीयते । विधेस निन्द्योयस्तेप्रागेकमेवाहरच्छिर : ॥ अत्रहरनिन्दया० विषमविपाकसंसारप्रवर्त्तयतोविधेर्निन्दाव्यङ्ग्या० व्याजनिन्दा ॥ यथावा । वि

धिरेवविशेषगर्हणीयः कारटस्त्वंरट
कस्तवापराधः। सहकारतरौचकार
योसौसहवासंसरलेनकोकिलेन॥ अ
न्यस्तुत्या॰ अन्यस्तुत्यभिव्यक्तिरिति
पञ्चमप्रकारव्याजस्तुतिप्रातवन्दीयं
व्याजनिन्दा॥ कपटकुत्सायाम्॥

व्याजस्तुतिः। स्त्री॰ अलङ्कारविशेषे
॥ यथा। उक्तिर्व्याजस्तुतिर्निन्दा
स्तुतिभ्यांस्तुतिनिन्दयोः। कः स्व
र्धुनिविवेकस्तेपापिनोनयसेदिवम्
॥ साधुदूतिपुनः साधुकर्त्तव्यं
किमतः परम्। यन्मदर्थेविलू
नासिदन्तैरपिनखैरपि॥ निन्दया
स्तुतेः॰ स्तुत्यानिन्दयावा॰ अवग
मनंव्याजस्तुतिः। कः स्वर्धुनी
त्युदाहरणे॰ विवेकोनास्तीतिनिन्दा
व्याजेन॰ गङ्गामुक्तिप्रदेव॰ महा
पातकिनोपि॰ स्वर्गंनयतीतिव्याज
रूपयानिन्दयातत्प्रभावातिशयस्तु
तिः। साधुदूतीत्युदाहरणे॰ म
दर्थमियन्तंक्लेशमनुभूतवत्यसीति
व्याजरूपयास्तुत्या॰ मदर्थंनगतासि
॰ किन्तुरन्तुमेवगतासि॰ धिक्त्वांदू
तिकांधर्मविरुद्धकारिणीमितिनि
न्दावगम्यते॥ कपटप्रशंसायाम्॥

व्याजोक्तिः। स्त्री॰ छलवाक्ये॥ अ
लङ्कारविशेषे॥ यथा। व्याजो
क्तिरन्यहेतूक्त्यायदाकारस्यगोपनम्।
सखिपश्यगृहारामपरागैरस्मिधूस
रा॥ अत्रचौर्यरतकृतसङ्केतभूपृष्ठ
लुण्ठनलग्नधूलिकालस्यगोपनम्॥
कस्यवानभवेद्रोषः प्रियायाः स
व्रणेधरे। सभृङ्गपद्ममाघ्रासीर्वारि
तापिमयाधुना॥ उपपतिनाख
ण्डिताधरायानायिकायाः सका
शमागच्छन्तंप्रियमपश्यन्त्येवसख्या
नायिकांप्रतिहितोपदेशव्याजेनत
म्प्रति॰ नायिकापराधगोपनंच्छेका
पह्नुतेरस्यायंविशेषः। यत्तस्यांव
चनस्यान्यथानयनेनापह्नवः। अस्या
माकारस्यहेत्वन्तरवर्णनेन॰ गोपन
मिति॰ लक्षणे॰ लक्ष्यनाम्निचोक्तिप
हणमाकारस्यगोपनार्थंहेत्वन्तरप्रत्या
यकव्यापारमात्रेणलक्षणम्॥

व्याडः। पुं॰ हिंस्रपशौ॥ मांसा
दिपशौ॥ सर्पे॥ व्याडति। अ
ड उद्यमे। व्याङ्पूर्वः। पचाद्य
च्॥ खले। वञ्चके॥ इन्द्रे॥

व्याडायुधम्। न॰ व्याघ्रनखाख्यगन्धद्र
व्ये॥ व्याडस्यव्याघ्रस्यायुधमिव॥

व्याडिः। पुं॰ मुनिभेदे। विन्ध्यस्थे
नन्दिनीसुते। मेधाविनि॥ व्यड
स्यापत्यम्। इञ्। स्वागतादित्वा
द्वृद्धिनिषेधऐजागमश्च॥

व्यात्तः। त्रि॰ विवृते। वाचा॰ द्व॰
भा॰ प्र॰॥ यथाव्यात्ताननः॥

व्यात्युक्षी। स्त्री॰ रसिकजनानाम
न्योन्यंजलक्रीडने। करपार्श्वे। ज

लक्रीडायाम् । करपत्रिकायाम् । छीटाखेलना॰ इ॰ छींटाछींटीसेखेलना॰ इ॰ ख॰ भा॰ ॥ व्यतिहारेणउक्षणम्॰ परस्पराभ्युक्षणम् । उक्षसेचने । कर्मव्यतिहारेणच् स्त्रियामितिणच् प्रत्ययः । णचः स्त्रियामञ् टिड्ढाणञित्यादिनाङीप् ॥

व्यादित : । त्रि॰ प्रसारिते ॥

व्यादिष्ट : । त्रि॰ सन्दर्शिते ॥ व्याङ्पूर्वाद्दिशेः क्तः ॥

व्याध : । पुं॰ मृगवधाजीवे । मृगयौ । लुब्धके ॥ अयंसवर्णस्त्रिभार्यायांचक्रियाज्जातः । यथोक्तंब्रह्मवैवर्त्ते । नापिताद्गोपकन्यायांसर्वस्वी॰ तस्ययोषिति । क्षत्राद्बभूवव्याधश्चबलवान् मृगहिंसकः इति ॥ दुष्टे ॥ तारामयेरवि ॥ मेदिनी ॥ विध्यति । व्यधताडने । श्याद्व्यधेतिणः ॥

व्याधभीत : । पुं॰ मृगे ॥

व्याधाम : । पुं॰ वज्रे ॥ इ॰ हे॰ न्द्र : ॥

व्याधि : । स्त्री॰ कुष्ठौषधौ ॥ रोगे । धातुवैषम्यनिमित्ते॰ ज्वरातीसारादिरूपेविकारे ॥ चिकित्साशास्त्रे॰ पञ्चमहाभूतशरीरिसमवायः पुरुषइत्युच्यते । तस्मिन्क्रियासोऽधिष्ठानम्॰ कस्माल्लोकस्यद्वैविध्यात् । लोकोहिद्विविधः स्थावरोजङ्गमश्च । द्विविधात्मकएवाग्नेयः सौम्यश्च॰ तद्भूयस्त्वात् । पञ्चात्मकोवा । तत्रचतुर्विधोभूतग्रामः । स्वेदजाण्डजोद्भिज्जजरायुजसंज्ञः । तत्रपुरुषप्रधानम् । तस्योपकरणमन्यत् । तस्मात्पुरुषोऽधिष्ठानम् । तद्दुःखसंयोगाव्याधयइत्युच्यन्ते । तेचतुर्विधाः॰ आगन्तवः॰ शारीराः॰ मानसाः॰ स्वाभाविकाश्चेति । तेषामागन्तवोऽभिघातनिमित्ताः । शारीरास्त्वन्नपानमूलावातपित्तकफशोणितसन्निपातवैषम्यनिमित्ताः । मानसास्तु॰ क्रोधशोकभयहर्षविषादेर्ष्याभ्यसूयादैन्यमात्सर्यकामलोभप्रभृतयइच्छाद्वेषभेदैर्भवन्ति । स्वाभाविकाः क्षुत्पिपासाजरामृत्युनिद्राप्रभृतयः तएतेमनःशरीराधिष्ठानाः ॥ तेषांसंशोधनसंशमनाहाराचाराः सम्यक्प्रयुक्तानिग्रहहेतवः इत्यादिसुश्रुतेप्रथमाध्यायः ॥ विगतआधिरनेन ॥ विशिष्टआधिर्यस्माद्वा ॥ व्याधानंवा । उपसर्गेघोः किः ॥

व्याधिघात : । पुं॰ आरग्वधे ॥ व्याधीन्हन्ति । हन॰ कर्मण्यण् । हनस्तोऽचिण्णलोः ॥

व्याधित : । त्रि॰ व्याधियुक्ते । आमयाविनि । आतुरे ॥ व्याधिः सञ्जा

लोस्य । तदुत्पसङ्घातंतारकादिभ्य इतच् ॥

व्याधिहन्ता । पुं॰ वाराहीकन्दे ॥ त्रि॰ व्याधेर्घातके ॥

व्याधूतः । त्रि॰ कम्पिते ॥ विशेषेण आसमन्ताद्धूतः ॥

व्यानः । पुं॰ त्रिष्वगगमनवत्खिल शरीरवर्त्ति निदेहस्थपञ्चवाय्वन्तर्गतानिलविशेषे ॥ प्राणापानयोर्नियमनकर्माचरणमन्युत्पादनादिवीर्यवत्कर्महेतुत्वादखिलशरीरवर्त्ती व्यानइत्यर्थः ॥ व्याप्नोतिनामयत्यङ्गं व्याने व्याधिप्रकोपणः । प्रतिदानंतथाकण्ठाद्व्यापनाद्व्यानउच्यते ॥ व्याप्त्याअनित्यनेनइत्यस्वितिघञ् ॥

व्यानतम् । न॰ रतिबन्धान्तरे ॥ यथा । स्वेच्छयाभ्रमतिवल्लभेप्रियायेपिदाचरतिवल्लभायितम् । व्यानतंरतमिदंयदिप्रियास्यादधोमुखचतुष्पदाकृतिः ॥

व्यानद्धः । त्रि॰ विशेषेणबद्धे ॥

व्यापकः । त्रि॰ अपरिच्छिन्ने । अन्यूनदेशकालवर्त्तौ ॥ विष्णौ ॥ स्वसत्ताप्रकाशाभ्यांनामरूपेऽव्याप्नोति । आप्लृव्याप्तौ । ण्वुल्तृचाविति ण्वुल् ॥ तद्भिन्नवृत्त्यत्यन्ताभावाऽप्रतियोगिनि । यथा । साध्यस्यव्यापकोयस्तुहेतोरव्यापकस्तथा । सउपाधिर्भवेत्तस्यनिष्कर्षोयंप्रदर्श्यते ॥ इ॰ भा॰ प॰ ॥ आच्छादके ॥ यथा । पद्यस्यव्यापकंसारमसन्दिग्धमनाकुलम् । अव्याप्यागम्यमित्येवमुत्तरंतद्विदोविदुः ॥ पद्यस्य॰ भावार्थस्य॰ व्यापकमाच्छादकम्॰ अभियोगाप्रतिकूलमितियावत् । इतिव्यवहारतत्त्वम् ॥ लिंगिनि ॥ येनचप्रतिबद्धंतद्व्यापकम् ॥ वाच्ये ॥

व्यापकता । स्त्री॰ व्यापकत्वे ॥

व्यापत्तिः । स्त्री॰ व्याधौ । मरणे ॥

व्यापद् । स्त्री॰ आपदि ॥ मृत्यौ ॥ व्याङ्पूर्वात्पदेः क्विप् ॥ विशिष्टाआपद् ॥

व्यापनम् । न॰ आच्छादने ॥ व्याप्तौ ॥

व्यापन्नः । त्रि॰ मृते ॥

व्यापादः । पुं॰ द्रोहचिन्तने ॥ व्यापादनम् । व्याङ्पूर्वकपद्धातोर्ण्यन्ताद्भावेघञ् ॥

व्यापादनम् । न॰ मारणे ॥ व्याङ्पूर्वात्पद्धातोर्ण्यन्तात्ल्युट् ॥

व्यापादितः । त्रि॰ मारिते ।

व्यापारः । पुं॰ कर्मणि । क्रियायाम् ॥ दशमभवने ।

व्यापारितः । त्रि॰ नियुक्ते ॥

व्यापारी । त्रि॰ व्यापारविशिष्टे व्यवसायिनि ॥

व्यापिका । स्त्री॰ व्यापिन्याम् । व्या

प्नोति । आप्लृ॰ ण्वुल् । टाप् । ह्रस्वम् ॥

व्यापी । त्रि॰ विभौ । व्यापके । आत्मनि । पुंसि ॥ सकलवस्तुव्यापनशीले । व्याप्तुंशीलमस्य । आप्लृ॰ । सुप्यजातावितिणिनिः ॥

व्यापिनी । स्त्री॰ व्यापिकायाम् ॥

व्यापृतवान् । त्रि॰ व्याप्रियमाणे ॥

व्यापृतः । पुं॰ कर्मसचिवे । आयुक्ते ॥ त्रि॰ व्यापारयुक्ते ॥

व्यापृतिः । स्त्री॰ व्यापारे ॥

व्याप्तः । त्रि॰ ख्याते । समाक्रान्ते । यथा । यद्यत्कार्यंकारणेनव्याप्तमन्तर्बहिश्चेति । कारणत्वेनसर्वकार्याणांव्यापनाद्व्याप्तः परमात्मा । पुंसि ॥ व्याप्यतेस्म ॥ आप्लृ॰ । गत्यर्थाकर्मकेतिक्त कात्स्न्र्येनस्वहि । तते । सर्वकार्यमुपादानत्वेनव्याप्नोति । विपूर्वादाप्नोतेः पूर्वेणकर्त्तरिक्तः ॥

व्याप्तिः । स्त्री॰ व्यापने ॥ लाभे । इतिमेदिनी ॥ लम्भने । इतिहेमचन्द्रः ॥ यत्रधूमस्तत्राग्निरितिसाहचर्य्यनियमे ॥ व्यापनम् । आप्लृ॰ । स्त्रियांक्तिन्नावादिभ्यइतिक्तिन् ॥ आप्तौ ॥

व्याप्यम् । न॰ लिङ्गे । साधने ॥ अधिकदेशकालनियमंव्याप्यम् ॥ व्यापकाभावेव्याप्याभावोन्याय्यः ॥ व्याप्यते । आप्लृ॰ । ऋहलोर्ण्यत् ॥ कुष्ठौषधौ । पालके । व्याधौ । उत्पले ॥ त्रि॰ व्याप्तिविशिष्टे । व्याप्तिकर्मणि ॥ आस्तरे ॥ शङ्कितसमारोपितोपाधिनिराकरणेन स्वभावप्रतिबद्धंव्याप्यमितिसाङ्ख्याः ॥ अस्यार्थः । समययुक्तः शङ्कितः विपर्ययुक्तः समारोपितः उपाधिर्विशेषणम् स्वभावेति । भावः सत्ता तयाप्रतिबद्धमित्यर्थः । प्रतिबद्धंग्रहीतम् । तेनलिङ्गसत्ताभावेनाऽनुमानं सिद्ध्यतिभावः ॥

व्याप्यत्वासिद्धः । पुं॰ सोपाधिके ॥ साध्यव्यापकत्वेसतिसाधनाव्यापकत्वमुपाधिः । साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वंसाध्यव्यापकत्वम् । साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वंसाधनाव्यापकत्वम् । पर्वतोधूमवान्वह्निमत्वादित्यत्रार्द्रेन्धनसंयोगउपाधिः । यत्रधूमस्तत्रार्द्रेन्धनसंयोगइति साध्यव्यापकता । यत्रवह्निस्तत्रार्द्रेन्धनसंयोगोनास्ति । अयोगोलके आर्द्रेन्धनाभावादितिसाधनाव्यापकत्वम् । एवंसाध्यव्यापकत्वेसतिसाधनाव्यापकत्वादार्द्रेन्धनसंयोगउपाधिः । सोपाधिकत्वाद्वह्निमत्त्वंव्याप्यत्वासिद्धहेत्वाभासः ॥

अव्यभिचारितसामानाधिकरण्यस्था
भावे ॥

व्याम: । पुं॰ बाह्वो: सकरयोस्ततयो
स्तिर्यगन्तरे । स्वस्वपार्श्वप्रसारित
योर्बाह्वोर्मध्ये । व्यायामे । न्यग्रो
धे ॥ विशेषिणमस्यतेऽनेन । अमग
तौ । हलश्चेति घञ् ॥

व्यामनम् । न॰ व्यामे ॥

व्यामिश्र: । त्रि॰ सङ्कीर्णे ॥

व्यामृष्ट: । त्रि॰ प्रमृष्टे ॥

व्यामोह: । पुं॰ मोहे । विपरीतज्ञा
ने ॥

व्यायच्छमान: । त्रि॰ व्यायामंकुर्व
ति ॥

व्यायत: । त्रि॰ व्यापृते ॥ दीर्घे ॥
दृढे ॥ अतिशये ॥ विशेषिणायत: ॥

व्यायाम: । पुं॰ वियामे ॥ दुर्गसञ्च
रे ॥ शरीरायासजनककर्मणि पौरुषे श्रमे ।
मल्लक्रीडायाम् ॥ अस्यगुणा यथा ।
व्यायामोहि सदा पथ्यो बलिनां स्निग्ध
भोजिनाम् । सच शीते वसन्ते च तेषां
पथ्यतम: स्मृत: । सर्वेष्वृतुषु
वर्षैर्हि पुरुषैरात्महितार्थिभि: । श
क्त्यर्द्धेन तु कर्त्तव्यो व्यायामोहन्यते
व्यथाम् ॥ कुक्षौ ललाटे ग्रीवायांच
दाघर्म: प्रवर्त्तते । श्वासश्चैव तं विजा
नीयाद्रायतोच्छासमेवच ॥ लाघवं
कर्मसामर्थ्यं स्थैर्यं क्लेशसहिष्णुता ।
दोषक्षयोग्निवृद्धिश्च व्यायामादुपजा

यते ॥ व्यायामंकुर्वतो नित्यं विरु
द्धमपि भोजनम् । विदग्धमविदग्धं
वा निर्दोषं परिपच्यते ॥ नचव्या
यामसदृशमन्यत् स्थौल्यापकर्षणम्
। नचव्यायामिनं मर्त्यं मर्दयन्त्यर
यो बलात् ॥ नचैनं सहसाक्रम्य जरा
समधिगच्छति । व्यायामक्षुण्ण
गात्रस्य पद्भ्यामुद्वर्त्तितस्य च ॥ व्या
धयो नोपसर्पन्ति वैनतेयमिवोरगा:
॥ रक्तपित्ती क्षयी शोषी कासी श्वासी
क्षतातुर: । भुक्तवान् स्त्रीषु च क्षीणो
व्यायामं परिवर्ज्जयेत् ॥ वातपित्ता
मयी बालो वृद्धोऽजीर्णी च सन्त्यजेत् ॥
अतिव्यायामत: कासो रक्तपित्त
प्रजायते । श्रम: क्लम: क्षयस्तृष्णा
ज्वरश्छर्दिश्च जायते ॥ इति राजवल्ल
भ: ॥ व्यामे ॥ इतिहेमचन्द्र: ॥

व्यायामवान् । त्रि॰ व्यायामिनि ॥
व्यायामोऽस्त्यस्य । बलादित्वात् पक्षे
मतुप् । तद्भावे इनि: ॥ व्यायामी ॥

व्यायास: । पुं॰ परिश्रमे ॥ विशिष्ट:
आयास: ॥

व्यायोग: । पुं॰ दशविधरूपकान्तर्गत
रूपकविशेषे ॥ यथा । स्यान्नाटकं
प्रकरणं भाण: प्रहसनं डिम: । व्या
योग: समवाकारो वीथ्यङ्केहामृगा
इति । अभिनेयप्रकारा: स्युर्भाषा:
षट्संस्कृतादिका: ॥ इतिहेमच
न्द्र: ॥

व्यालः । पुं॰ दुष्टगजे ॥ सर्पे ॥ श्वापदे ॥ सिंहे ॥ त्रि॰ खले ॥ शठे ॥ व्याडति । अडउद्यमे व्याङ्पूर्वः । पचाद्यच् । डलयोरैक्यस्मरणाद्व्यालः यद्वा । विहृद्धमासमन्तात् लति॰ स्वङ्ति वा अल॰ अड॰ । डलयोरैक्यम् । पचाद्यच् ॥

व्यालकः । पुं॰ दुष्टगजे । गम्भीरवेदिनि ॥ दु॰ त्रि॰ ग्रीषः ॥

व्यालखड्गः । पुं॰ व्यालनखे ॥

व्यालगन्धा । स्त्री॰ नाकुल्याम् । रास्नायाम् ॥

व्यालग्रहः । पुं॰ व्यालग्राहिणि ॥

व्यालग्राही । पुं॰ आहितुण्डिके । व्यालं गृह्णाति । नन्द्यादीति णिनिः ॥

व्यालजिह्वा । स्त्री॰ महासमङ्गायाम् ॥

व्यालदंष्ट्रः । पुं॰ गोक्षुरे ॥

व्यालनखः । पुं॰ गन्धद्रव्यविशेषे । व्याघ्रनखे ॥

व्यालपत्रा । स्त्री॰ एर्वारौ ॥

व्यालबलः । पुं॰ व्यालनखे ॥

व्यालमालः । पुं॰ शिवे ॥ व्यालाः सर्पा एव माला यस्य ॥

व्यालमृगः । पुं॰ चित्रव्याघ्रे ॥

व्यालम्बः । पुं॰ रक्तैरण्डे ॥

व्यालायुधम् । न॰ व्याडायुधे ॥ व्यालसिंहस्यायुधमिव ॥

व्याली । त्रि॰ व्यालवति ॥

व्याली । स्त्री॰ दुष्टायाम् ॥

व्यालोडनम् । न॰ विमर्दने ॥

व्यालोलितः । त्रि॰ विलुलिते ॥

व्यावक्रोशी । पुं॰ परस्पराक्रोशने

व्यावर्त्तः । पुं॰ रोगभेदे ॥ विशिष्टावर्त्ते ॥

व्यावर्त्तकः । त्रि॰ भेदके ॥

व्यावर्त्तनम् । न॰ इतरेतरवियोगस्थाने ॥ वेष्टने । वेठन॰ दु॰ भा॰

व्यावर्त्तयितुम् । अ॰ बाधितुमित्यर्थे

व्यावर्त्तिका । स्त्री॰ बाधिकायाम् । प्रतिबन्धिकायाम् ॥ यथा । बीभत्साप्रतिभान्ति किन्न विषयाः किन्तुस्पृहायुष्मती॰ देहस्यापचयो मतौ नि विशते गाढो गृहेषु ग्रहः । ब्रह्मोपास्यमिति स्फुरत्यपि हृदि व्यावर्त्तिका वासना॰ कामामेयमतर्क्यमोहगहनाद्वैरी सतां यातना ॥

व्यावर्त्तितः । त्रि॰ बाधिते । पराङ्मुखीकृते ॥

व्यावहारिकः । त्रि॰ व्यवहारसिद्धे ॥ व्यवहारेण चरति । चरतीति ठक् । स्वागतादिः ॥ विनयादित्वात् स्वार्थे वा ठक् ॥

व्यावृत्त : । त्रि॰ निवृत्ते ॥ वृते ॥

व्यावृत्ति : । स्त्री॰ व्यतिरेके । निरसने । खण्डने । आवृत्तौ ॥ यथा सर्वसपक्षव्यावृत्तिरेवदोषो॰ नविपक्षव्यावृत्तिरपितस्याननुगुणत्वात् ॥

व्याश्रय : । त्रि॰ विभिन्नाश्रये । नानापक्षसमाश्रये ॥ विभिन्नआश्रय : ॥

व्यास : । पुं॰ मुनिविशेषे । बादरायणे । पाराशर्य्ये । भगवति॰ कृष्णद्वैपायने । मुनीनांमध्ये भगवतोविभूतौ । येन॰ ऋग्वेदादिविभागेन॰ चतुर्धावेदाव्यस्ता : । तत्रऋग्वेदएकविंशतिधाकृत : यजुर्नवाधिकशतधाकृत : । सामवेद: सहस्रधाकृत : अथर्वण : पञ्चाशच्छाखाभेदेनकृत : । एवंविभागेनचतुर्धावेदव्यस्ता : । अन्यानिचपुराणानि॰ व्यस्तान्यनेनेतिव्यास : ॥ तंवेदशास्त्रपरिनिष्ठितशुद्धबुद्धिं-चर्माम्बरंसुरमुनीन्द्रनुतंकवीन्द्रम्- । कृष्णत्विषंकनकपिङ्गजटाकलापंव्यासनमामिशिरसातिलकंमुनीनाम् ॥ व्यस्यतिविभजतिविस्तारयतिवापूर्वोद्धतेर्वाहुलकात्कर्त्तरिघञ् ॥ वेदविस्तारकरणाद्व्यासनामाभवन्मुनिरितिभागवतम् ॥ पाठकब्राह्मणे ॥ यथा । विस्पष्टमद्रुतंशान्तंस्पष्टाक्षरपदन्तथा । कलस्वरसमायुक्तंरसभावसमन्वितम् ॥ बुद्ध्यमान : सदर्थंवैग्रन्थार्थंकृत्स्नशोनृप । ब्राह्मणादिषुसर्वेषुग्रन्थार्थंश्चार्पयेनृप । यएवंवाचयेद्ब्रह्मन्सविप्रोव्यासउच्यते ॥ विस्तृते । प्रपञ्चे । विस्तारे ॥ मानभेदे ॥ गोलस्य मध्यरेखायाम् ॥ व्यसनम् । असुक्षेपणे । घञ् ॥

व्यासक्त : । त्रि॰ व्यापृते । विशेषेणासक्ते । संलग्ने ॥ व्यासक्त : कार्यान्तरंविस्मरतीत्यसावधानोक्ति : ॥

व्यासङ्ग : । पुं॰ विक्षेपे ॥ विशिष्टासङ्गे ॥ विशेषेणआसङ्ग : ॥ अभ्यासे ॥

व्यासमाता । स्त्री॰ सत्यवत्याम् । वासव्याम् ॥

व्यासिद्ध : । त्रि॰ निषिद्धे ॥

व्यासेध : । पुं॰ प्रतिषेधे । व्यासेधनम् । व्याङ्पूर्वात्सिधतेर्घञ् ॥

व्याहत : । त्रि॰ बाधिते ॥ विधूनिते ॥ क्षयंनीते ॥ विशेषेणआहत : ॥ व्यर्थे ॥

व्याहति : । स्त्री॰ व्याघाते ॥

व्याहन्यमान : । त्रि॰ प्रतिषिद्ध्यमाने ॥

व्याहरणम् । न॰ व्याहारे ॥ यथा । स्नातुस्तुवरुणस्तेजोजुह्वतोऽग्नि : श्रियंहरेत् । भुञ्जानस्ययमस्त्वायुस्त

स्मान्नयव्याहरेत् चित्प्रवितिभविष्योत्त
रपुराणम् ॥

व्याहरत् । त्रि० शब्दयति ।

व्याहार : । पुं० उक्तौ । जल्पिते ।
वचसि ॥ व्याहरणम् । व्याङ्
पूर्वात् हृञोभावेघञ् ।

व्याहृतम् । त्रि० उक्ते ॥ सन्दिष्टे ।

व्याहृति : । स्त्री० भूरादिषु ॥ व्या
हरतिभूरादिसप्तलोकान् । हृञ०
। व्याङ्पूर्वस्ततः ० क्तिन् । व्या
हारे ॥

व्युच्छिन्न : । त्रि० विमुक्ते । विशेषे
णोच्छिन्ने ॥

व्युत : । त्रि० स्यूते ॥ दू०द्वि०को
ष : ॥

व्युति : । स्त्री० व्यूतौ दू०द्वि०को
ष : ॥

व्युत्क्रम : । पुं० क्रमविपर्यये । व्यति
क्रमे । उत्क्रमे । अक्रमे । विशिष्टउ
त्क्रम : ॥

व्युत्क्रमणम् । न० पृथगवस्थाने ॥
व्युत्पूर्वात्क्रमेर्ल्युट् ॥

व्युत्थानम् । न० स्वातंत्र्यकरणे । चि
त्तमूढविक्षिप्ताख्यभूमिद्वये । समा
धिपारणे ॥ विरुद्धमुत्थानम् । प्रा
दयोगतेतिसमास : ॥ वैपरीत्येनो
त्थानंवा ॥ विरोधाचरणे । न्याय्यां
वृत्तिं समुल्लङ्घ्यतद्विरुद्धतयास्थि
ति : । व्युत्थानमुदितंराज्ञ : साम
न्तोव्युत्पत्तीयथा ॥ एषणानुगुणत
यास्थितिमतिक्रम्यतत्प्रतिकूलत्वेन
व्यास्थिति : सा० व्युत्थानमित्यु
दितंमहद्भिरितिशेष : । तच्चप्रसि
द्धिंप्रमाणयति । राजवृत्त ॥ प्र
तिरोधने ॥ नृत्यभेदे ॥ विशेषेणो
त्थाने ॥

व्युत्थापनम् । न० बाधने ॥

व्युत्पत्ति : । स्त्री० सम्यग्ज्ञाने ॥
संस्कारे ॥ विशेषेणोत्पत्ति : ॥ वि
विधावोत्पत्ति : ॥ शब्दज्ञाने ॥

व्युत्पन्न : । त्रि० व्युत्पत्तियुक्ते । स
म्यग्ज्ञानवति ॥ संस्कृते । विशेषे
णात्यन्तम् ० उत्पन्न : परिचित : ॥

व्युत्पादक : । पुं० व्युत्पत्तिजनके ॥

व्युदसनम् । न० निरसने ॥

व्युदस्त : । त्रि० प्रतिषिद्धे ॥

व्युदास : । पुं० प्रतिषेधे ॥

व्युषित : । त्रि० पर्युषिते । वुसा० इ
तिभाषाप्रसिद्धे ॥ व्युष्यतेस्म । उ
ष० । क्त : ॥ देशान्तरकृते ॥

व्युष्टम् । न० कल्ये । प्रभाते । काल०
दृ०भा० ॥ फले ॥ दिने ॥ त्रि०
उषिते । पर्युषिते ॥

व्युष्टि : । स्त्री० फले ॥ समृद्धौ ॥
स्तुतौ ॥ व्युच्छनम् ० व्युच्छातेवा । उ
च्छीविवासे ॥ स्त्रियांक्तिन् ॥ स्वक
रणसंवेद्यविस्मृतत्वे । अपरोक्षख्या
तौ ॥

व्यूढः । त्रि॰ विन्यस्ते । व्यूहरचनया स्थिते ॥ संहते ॥ पृथुले । विशिष्टे ऊढे स्त्रीकृते च । बहुप्राप्त्यां । क्त: ॥

व्यूढकङ्कट: त्रि॰ सन्नद्धे । वर्म्मिते । सज्जे । दंशिते । धृतसन्नाहे ॥ गूढोधृतः । कङ्कटः सन्नाहोयेन ॥

व्यूढिः । स्त्री॰ व्यूहे ॥ विन्यासे ॥ संहतौ ॥ पृथुलतायाम् ॥

व्यूतः । त्रि॰ ऊते । तन्तुसन्तते ॥

व्यूतिः । स्त्री॰ वस्त्रादिवाने वानौ ॥ विशिष्टा ऊतिः । वेञः । क्तिप्रत्ययादेर्नात्त्वनिपातितः ॥

व्यूहः । पुं॰ निर्माणे ॥ वृन्दे । समूहे । विभागे ॥ तर्के ॥ देहे ॥ विस्तारे ॥ बलविन्यासे । युद्धार्थसेनारचनायाम् । युद्धार्थं सैन्यस्य देशविशेषे विभज्य दण्डव्यूहानि मत्स्याकारे । व्यूहते । ऊहावितर्के । सुगुपधेतिकः ॥ व्यूहोवा । घञ् ॥ विशिष्ट ऊहोवा ॥

व्यूहनम् । न॰ सैन्यसंस्थाने ॥

व्यूहपार्ष्णिः । पुं॰ व्यूहपृष्ठे । प्रत्यासारे । सैन्यस्य पृष्ठे धनुःशतद्वयान्तरे स्थितसैन्ये ॥ व्यूहस्य पार्ष्णिः पृष्ठभागः ॥

व्यूहभेदः । पुं॰ बलविन्यासस्य प्रभेदे । व्यूहस्य भेदो विशेषः ॥ यथाहुः । समयस्तु सैन्यस्य विन्यासः स्थानभेदतः । सव्यूहइति विख्यातो युद्धेषु पृथिवीभुजाम् ॥ व्यूहभेदास्तु चत्वारो दण्डोभोगोऽथमण्डलम् । असंहतश्च निर्णीता नीतिसारादिसम्मताः ॥ अन्येपि प्रकृतिव्यूहाः क्रौञ्चचक्रादयः क्वचित् । तत्र । तिर्यग्वृत्तिस्तु दण्डः स्याद्भोगोऽन्वावृत्तिरेव च । मण्डलं सर्वतो वृत्तिः पृथग्वृत्तिरसंहतः ॥ वृत्ति ॥ दण्डवदवस्थानं दण्डः । अन्योन्यानुगतावृत्तिर्भोगः । सर्पशरीरवदवस्थानं मण्डलम् । गजादीनां विजातीयैरमिश्रतानामवस्थानमसंहतः । शकटमकरपताकासर्वतोभद्रदुर्ग्यादयोऽन्येपि व्यूहाः सन्ति तेषां लक्षणं भारतादिपुद्रष्टव्यम् ।

व्यो । अ॰ लिहे ॥

व्योकारः । पुं॰ लोहकारके ॥ व्योकुत्सव्ययं लोहवाचीति श्रीभोजः । व्योकरोति । डुकृञ् । कर्मण्यण् ॥

व्योमः । पुं॰ मयासुरपुत्रे ॥

व्योमकेशः । पुं॰ शिवे ॥ व्योमेवकेशायस्य । गङ्गाधारणाय व्योमव्यापिनः केशायस्येति वा ॥

व्योमचारी । पुं॰ देवतायाम् ॥ विहङ्गमे । ग्रहे ॥ चिरजीविनि ॥ त्रि॰ व्योमचरे ॥

व्योमचारिपुरम् । न॰ देवानांपुरे ॥ व्योमचारिणांपुरम् । शोभे ॥

व्योमधूमः । पुं॰ मेघे ॥

व्योम । न० वारिणि ॥ आकाशे ॥ भास्करस्याचंनाश्रये ॥ व्ययति । व्येञ् संवरणे । नामन्सीमन्व्योमन्नित्यादिनामन्नन्तं निपातितम् ॥ यद्वा । व्ययति । विपूर्व्वादवतेर्मनिन् । ज्वरत्वरेत्यूठ् । सवर्णदीर्घः । सार्व्वधातुकेगुणः । अभ्रके ॥ लग्न द्वादशभवने ॥

व्योमनासिका । स्त्री० पक्षिविशेषे । भारत्याम् । गरुडाधिनि ॥

व्योम (मध्यम?) । न० पताकायाम् ॥

व्योममण्डलम् । न० आकाशे ॥

व्योममुद्गरः । पुं० निर्घाते ॥

व्यो(मयानम्) । न० विमाने ॥ व्योम्न यात्यनेन । करणे ल्युट् । व्योम अल्युटौ बहुलमिति कर्त्तरि ल्युड्वा ॥

व्योमसद् । पुं० गन्धर्व्वे ॥

व्योमस्थली । स्त्री० भूमौ ॥

व्योमाभः । पुं० बुद्धे ॥

व्योमोदकम् । न० दिव्योदके ॥

व्योषः । पुं० करिविशेषे ॥ न० त्रिकटुद्रव्ये । विशेषेणोषति । उष दाहे । पचाद्यच् ॥

व्रजः । पुं० गोष्ठे । गोकुले । गवांस्थाने ॥ अध्वनि । अयने ॥ वृन्दे । सङ्घे । व्रजति । व्रजगतौपचाद्यच् व्रजन्त्यनेनवा । गोचरसञ्चरवहव्रजेत्यादिनाघः । सः साधुः ॥

व्रजकः । पुं० तपस्विनि ॥

व्रजकिशोरः । पुं० ललितायामाधिवनाधिपेश्रीकृष्णदेवे ॥

व्रजनाथः । पुं० श्रीकृष्णे ॥

व्रजभूः । पुं० सत्कदम्बे ॥ स्त्री० व्रजभूमौ ॥

व्रजमण्डलम् । न० व्रजभूमौ ॥

व्रजमोहनः । पुं० श्रीकृष्णे ॥

व्रजवरः । पुं० आवरटाधिवनाधिपेश्रीकृष्णदेवे ॥

व्रजवल्लभः । पुं० श्रीकृष्णे

व्रजाङ्गना । स्त्री० गोप्याम् ॥

व्रजेश्वरी । स्त्री० व्रजाधिष्ठातृदेव्याम् ॥ यशोदायाम् ॥ *

व्रज्या । स्त्री० अटाट्यायाम् । पर्यटने ॥ प्रस्थाने । जिगीषोः प्रयाणे ॥ गमने ॥ वर्गे ॥ व्रजनम् । व्रज० । व्रजयजोर्भावेक्यप् ॥

व्रणः । पुं० न० क्षते । ईर्मे अरुषि ॥ व्रणोद्विधापरिज्ञेयोदोषजागन्तुभेदतः । दोषजोदुष्टदोषैःस्यादन्यः शस्त्रादिसम्भवः । अर्मशोग्यस्तु । आयतस्त्रविशालस्त्रसुविभक्तोनिराशयः । प्राप्तकालकृतस्त्रापिव्रणः कर्म्मणिशस्यते ॥ व्रणति । व्रणशब्दे । पचाद्यच् ॥ यद्वा । व्रणयति । व्रणगात्रविचूर्णनेऽदन्तः । अच् ॥ *

व्रणकृत् । पुं० भल्लातके ॥ व्रणकारी

तीति । डुकृञ्० । क्विप् । तुक् ॥ त्रि० क्षतकारके ॥

व्रणकेतुघ्नी । स्त्री० दुग्धफेन्याम् । गोजापर्ण्याम् ॥

व्रणहिट् । पुं० ब्राह्मणयष्टिकायाम् ॥ त्रि० व्रणद्वेषके ॥

व्रणशोधनम् । न० व्रणपरिष्कारणे यथा । व्रणस्य त्वक्शुद्ध्यर्थं क्वाथः शुद्धिकरः परः । पटोलनिम्बपत्रस्य सर्वत्रैव प्रयुज्यते । जातिकिंशुकमूलानां क्षीरिणां पैत्तिके व्रणे । आरग्वधादेः कफजे कषायः शोधनं हितम् ॥

व्रणहः । पुं० एरण्डवृक्षे ॥ त्रि० व्रणघातके ॥

व्रणघ्ना । स्त्री० गुडूच्याम् ॥

व्रणहृत् । पुं० कालकारीवृक्षे ॥

व्रणारिः । पुं० बोले ॥ अगस्त्यवृक्षे ॥

व्रतम् । न० पुं० अशने । भक्षणे ॥ इत्युणादिकोषः ॥ पुण्यजनको पवासादौ । नियमे । शास्त्रविहिते नियमानुष्ठाने । मधुमांसवर्जनादिनियमे ॥ तथाच वेदे० पयोव्रतो ब्राह्मणो यवागूव्रतो राजन्यः आमिक्षाव्रतो वैश्य इत्युच्यते । व्रतशब्दो नामधेयत्वाभावार्थमुपादीयते । शक्यश्चानेन शालिमांसादीन्यपि व्रतयितुम् । तत्र नियमः क्रियते० इति भाष्यम् । सत्यामपि तायां पयएव व्रतयतीति नियमोऽयं न तु विधिरिति कैयटः ॥ उपनयने ॥ व्रियते । वृञ्० वृङ् वा । पृषिरञ्जिभ्यां किदित्यतच् । बाहुलकाद्वृञोऽपि । कित्त्वान्न गुणः ॥ यद्वा । व्रजत्यनेन स्वर्गम् । गोचरसञ्चरेति घः । पृषोदरादिः । कन्यासङ्क्रान्त्यादौ स्त्रीणां व्रतं निषिध्यते कालिदासो यथा । वर्णिनीनां व्रतोपासनं नो हितं कुम्भतीर्थोदयेव गिर्नोन्मुखे हरौ । देवतासुप्तकालेऽथ मासि धिक्के पवर्दे इज्यदेवेज्ययोरस्तके ॥ कुम्भतीर्थोदये० कुम्भे घटे० तीर्थे यो निरुत्पत्तिर्यस्य सः० कुम्भतीर्थः० अगस्तिः तस्योदये ॥ मयेदं कर्त्तव्यमिदं न कर्त्तव्यमित्येवं विधिसङ्कल्पविशेषे ॥

व्रततिः । स्त्री० विस्तारे ॥ वल्ल्याम् ॥ व्रजन्तीतति विस्तृतिरस्याः । पृषोदरादिः ॥ यद्वा । प्रतनोति । तनु विस्तारे । क्तिच्क्तौ च संज्ञायाम् । पृषोदरादित्वात् पस्य वः ॥ व्रतमिव करोति । व्रतशब्दात् तत्करोतीति णिजन्ताद्बाहुलकाड्डतिर्वा ॥

व्रतती । स्त्री० वल्ल्याम् ॥ विस्तारे । इ० द्विरूपकोषः ॥

व्रतबन्धः । पुं० उपनयने ॥ व्रतानां शास्त्रीयाणां नियमानां बन्धो बन्धनं यस्मिन् सः ॥

ब्रतयज्ञः । पुं॰ संशितब्रते ॥

ब्रतसङ्ग्रहः । पुं॰ दीक्षायाम् ॥

ब्रतस्थः । पुं॰ ब्रह्मचारिणि ॥

ब्रतादेशः । पुं॰ उपनयने ॥

ब्रती । पुं॰ यजमाने । साधके ॥ ब्रह्मचारिणि ॥ चान्द्रायणादिब्रतचारिणि ॥ ब्रतमैणाजिनादिधारणंभोजनादिनियमोवास्यास्ति । इनिः । यद्वा ब्रतयति । ब्रताद्भोजनतन्निवृत्त्योरितिणिच् । ब्रतेः णिनिः ॥

ब्रतोपनयम । न॰ ब्रतस्योद्यापने ॥

ब्रतोपायनम् । न॰ वायने ॥

ब्रश्चनः । पुं॰ स्वर्णादिच्छेदनद्रव्ये । पत्रपरशौ । छेनी॰ इ॰ भा॰ ब्रश्चतेऽनेन । ओब्रश्चू॰ । करणेतिल्युट् ॥ न॰ छेदने ॥

ब्राजिः । स्त्री॰ वायौ ॥ वातालौ ॥ ब्रजति । ब्रजगतौ । वसिवपी त्यादिना॰ इञ् ॥

ब्रातः । पुं॰ सङ्घे । नानाजातीयानामनियतवृत्तीनामुत्सेधजीविनां सङ्घे ॥ न॰ तेषांकर्मणि ॥ ब्रियते॰ नियम्यते॰ मुण्डमिश्रेतिण्यन्तात्ब्रतशब्दात्॰ घञ् । ब्रातच्फञोरितिलिङ्गाद्वृद्धिः ॥ पुं॰ समूहमात्रे ॥ ब्याधादौ ॥

ब्रातीनः । त्रि॰ सङ्घजीविनी ॥ शरीरायासजीविनि ॥ ब्रातेनशरीरायासेनजीवति॰ नतुबुद्धिवैभवेन । ब्रातेनजीवतीतिखञ् ॥

ब्रात्यः । पुं॰ षोडशादिवर्षपर्यन्तमप्यसंस्कृतेभ्रष्टगायत्रीकेविप्रादौ । संस्कारहीने ॥ यथाहमनुः । आषोडशाद्ब्राह्मणस्य सावित्रीनातिवर्त्तते । आद्वाविंशात्क्षत्रबन्धोराचतुर्विंशतेर्विशः ॥ अतऊर्द्ध्वंत्रयोऽप्येतेयथाकालमसंस्कृताः सावित्रीपतिताब्रात्याभवन्त्यार्य्यविगर्हिताः ॥ नैतैरपूतैर्विधिवदापद्यपिहिकर्हिचित् । ब्राह्मान्यौनांश्चसम्बन्धानाचरेद्ब्राह्मणः सहेति ॥ शरीरायासजीवीच ब्याधादिब्रातः॰ सङ्घः । शाखादिभ्योयः ॥ यद्वा ब्रातमर्हति । दण्डादिभ्ययइतियत् ॥ उपनयनादिसंस्कारहीने ॥

ब्रात्यस्तोमः । पुं॰ यज्ञविशेषे ॥

ब्रीडः । पुं॰ लज्जायाम् ॥ भावेघञ् ॥

ब्रीडनम् । न॰ लज्जायाम् ॥

ब्रीडा । स्त्री॰ लज्जायाम् । त्रपायाम् ॥ गुरोश्चहलः । टाप् ॥

ब्रीडाकरवातः । पुं॰ गुदरवे । पर्द्दे ॥

ब्रीडितः । त्रि॰ लज्जिते ॥ भावेक्तः ॥

ब्रीहिः । पुं॰ धान्यमात्रे ॥ आशुधान्ये ॥ बर्हति॰ उपचयंगच्छति । बृहवृद्धौ । इगुपधात्कि

दितीन् । पृषोदरादि : ॥ व्रीयते । व्रीङ् गत्याम् । बाहुलकाद्धिक्‌वा ॥

व्रीहि : फलंवा • व्रीहि : । बिल्वादिभ्योऽण् । फलपाकशुषामिति • लुपि • युक्तवद्भाव : ॥

व्रीहिक : । पुं • धान्यविशिष्टे ॥ ठन् ॥

व्रीहिकाञ्चन : । पुं • मसूरे

व्रीही । त्रि • व्रीहियुक्तक्षेत्रादौ ॥ व्रीह्यादिभ्यश्चेतिइनि : ॥

व्रीहिपर्णी । स्त्री • शालपर्ण्याम् ॥

व्रीहिमय : । पुं • पुरोडाशे । व्रीहेविकार : पुरोडाश : । व्रीहे : पुरोडाशद्वितिमयट् ॥

व्रीहिराजक : । पुं • कामलिकायाम् । कङ्गुधान्ये ॥ चीनकधान्ये ॥

व्रीहिश्रेष्ठ : । पुं • शालिधान्ये ॥

व्रीह्यगारम् । न • कुसूले । धान्यगृहे ॥

व्रैह : । त्रि • व्रीहिनिर्मिते ॥

व्रैहेयम् । न • व्रीहिभूस्थले । धान्यसामान्यस्य कलमादेश्चोत्पत्तियोग्ये क्षेत्रे ॥ व्रीहीणांभवनंक्षेत्रम् । व्रीहिशाल्योर्ढक्

इत्यादि गौड़कुलोत्पन्ना डीसवालप्रधानोपनाम तुलाराम मिश्रात्मज श्रीधनपति मिश्रापरनाम्ना श्रीसद्गुरु कुलावधूत श्रीपरमहंस परिव्राजकाचार्य श्री महरिहरानन्द नाथ भारती शिष्येण ब्राह्मावधूत श्री सुखानन्दनाथ परनामधेयेन विरचिते शब्दार्थचिन्तामणौ यवर्ग : समाप्तिमगात :

श्रीसुखानन्दनाथ तच्छिष्य श्री जगदीशमिश्रा परनाम ब्राह्मावधूत श्री जगदानन्दनाथ प्रीतिकामै :, श्रीमन्महा राजाधिराज रविकुलावतंस महोमहेन्द्र यावदार्यकुलकमल दिवाकरैः मेदपाटदेशाधीशैः अखिल भूपाल मौलिमणिभि : श्री १०८ श्रीयुत सज्जनसिंहै : संस्थापिते उदयपुरस्थ सज्जन यन्त्रालये मुख्यमन्त्रि कविराजिराज श्रीश्यामलदास प्रेरणया पण्डितवाजपेयि वंशीधरेण अक्षिस्तनाजितदेव शर्मणाचशोधितः हैडजीवनराम शम्भूनाथ गुलाबराम लक्ष्मीनाथ प्राणनाथ लालसिंह प्रभृतिभिर्द्विजै : वर्णक्रमेणदर्भित : सदारवेग ययमेन गौरीशङ्करेणच

मार्गशीर्षशुक्ला चतुर्दश्यां सोमवासरे शब्दार्थ-

चिन्तामणिकोशस्य यवर्गोमुद्रितः :

एकोनविंशत्यैकाधिकचत्वारिंशत्तमे १९४१ वैक्रमाब्दे राजधा

न्युदयपुरि सज्जनयन्त्रालये श्रीमेदपाटेश्वर

कोषधनव्ययात् वाजपेयिवंशीधरस्य

प्रबन्धतोमुद्रित :

शवर्गप्रारम्भः

शः । पुं॰ शिवे ॥ शस्त्रे ॥ शकारे ॥

शंयुः । त्रि॰ शुभान्विते ॥ शमस्य
स्य । कंशंभ्यांबभयुस्तितुतयसः
इतियुस् । सकारः पदत्वार्थः ॥
पक्षेऽनुस्वारस्यपरसवर्णेऽनुनासि-
कोयः शय्युँः ॥

शंवः । पुं॰ मुषलाग्रस्थलौहमण्डल
के ॥ वज्रे । त्रि॰ शुभान्विते ।
शाम्यत्यरीन् । अन्तर्भावितण्यर्था
च्छमेर्वन् ॥ शंशुभमस्यास्त्यस्यामेध
त्वादितिवा । कंशंभ्यामितिवः
। पक्षद्वयेऽपिदन्त्योष्ठ्यः । अनुस्वा
रस्यवैकल्पिकेपरसवर्णेऽनुनासि-
कोवः । शव्वँः ॥

शंवट् ॰ अन्तःकरणे ॥ आभिमुख्ये ॥

शंसन् । त्रि॰ कथयति ॥

शंसनम् । न॰ शंसायाम् ॥ सूचने ॥
कथने ॥ शंसुस्तुतौ । ल्युट् ॥

शंसा । स्त्री॰ वचसि । वचने ॥ वा
ञ्छायाम् ॥ प्रशंसायाम् ॥

शंसितः । त्रि॰ निश्चिते ॥ हिंसि
ते ॥ स्तुते ॥ अनुष्ठिते । शंसेः क्तः ॥

शंसितव्रतः । त्रि॰ अनुष्ठितव्रते ॥

शंस्ता । पुं॰ स्तोतरि ॥ होतरि ॥
शंसति । शंसु॰ । तृन्तृचौशंसि
क्षदादिभ्यः संज्ञायाञ्चानिटाविति-
तृन् । नप्त्रादिग्रहणस्यनियमा
र्थत्वान्नदीर्घः । शंस्तारौ॰शंस्तर

इत्यादि ॥

शंस्यः । त्रि॰ स्तुत्ये ॥

शकः । पुं॰ म्लेच्छजातिप्रभेदे । श
कदेशोद्भवेपुरस्तात्क्षत्रिये॰पश्चाद्वि
हितक्रियालोपादिनाशूद्रत्वमापन्ने
॥ यथाहमनुः । शनकैस्तुक्रिया
लोपादिमाःक्षत्रियजातयः । वृष
लत्वंगतालोकेब्राह्मणादर्शनेनच ॥
पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजा
यवनाः शकाः । पारदाः पह्ल
वाश्चीनाः किराताद्दरदाः खशाः
। इति । अस्यसत्ययुगेसगरेणम
स्तकार्द्धमुण्डयित्वावेशान्यत्ववेद
वाह्यत्वञ्चाऽकारि । अर्द्धंशिरः
शकानान्तुमुण्डयामासभूपतिरिति
पाद्मेस्वर्गखण्डेनिरूपितम् ॥ रू
मइतिप्रसिद्धदेशे तत्रत्याः स
र्वेशकपदवाच्याः ॥ शालिवाहन
नाम्नाप्रसिद्धनृपतिभेदे ॥ तस्यज
न्मदिनावधिवत्सरगणनाङ्कः श-
काब्द॰इतिसंज्ञयातिथिपत्रेव्यवह्रि
यते ॥

शककारकः । पुं॰ शकप्रवृत्तिकर्त्त-
रिनृपतिवरे ॥ यथाहकालिदासः
। निहन्तियोभूतलमण्डलेशकान्स
पञ्चकोट्यब्जदलप्रमान् ५५०००-
०००० कलौ । सराजपुत्रः श
ककारकोभवेन्नृपाधिराजोह्यतः-
शाकवर्द्धनः । पञ्चशतकोटिम्त

स्यादुपशम्बात्कोटिः ॥ कलौषट्श ककारकानाह । युधिष्ठिरोविक्रम शालिवाहननौनराधिनाथौविजया- भिनन्दनः । द्वमेनुनागार्जुनमेदि नौविभुर्बलिः क्रमात्षटशककार का कलौ ॥ एषामन्तरालवर्षाण्या ह । युधिष्ठिराद्दयुगाब्धरामनय : ३०४४ ॥ कलब्धरविशुद्धे १३५ ऽभ्रखखाष्टभूमय : १८००० इहायु तं १०००० लक्षचतुष्टयं४००००० क्रमात्समहा हनागा ८२१ इति शाकवत्सरा : ॥ एषांजन्मभूमि माह ॥ युधिष्ठिरोभूद्धस्तिना पुरे० तथोज्जयिन्यांपुरिविक्रमा ह्वय : । शालेयधाराभृतिशालिवा हन सुचित्रकूटेविजयाभिनन्दन: ॥ नागार्जुनोरोहितकेचितौबलि र्भविष्यतीन्द्रोभृगुकच्छपत्तने । क्र मप्रवृत्तस्तदनन्तरंभवेत्तदाभवि- ष्यत्यवनौभृतोऽर्कतः ॥

शकटः । पुं० न० यनसि । कुक्क डा० इ० भा० । गन्त्र्याम् । गा डौ० इ० भा० । शक्नोतिभारं- वोढुं० औश्वयितुं वा । शक्यशक्नौ । शकादिभ्योऽटन् ॥ तिनिशवृ- क्षे ॥

शकटव्यूहः । पुं० शकटाकारेणबलवि न्यासे । सूच्याकाराय : पश्चात् पृथुल : शकटव्यूहोभवति । तेन पृष्ठतोभयेसतियातव्यं मार्गं गच्छे त् ॥

शकटहा । पुं० श्रीकृष्णे ॥ त्रि० शकटनाशके ॥

शकटाह्वा । स्त्री० रोहिणीनक्षत्रे ॥

शकटिका । स्त्री० गन्त्र्याम् ॥

शकटी । स्त्री० सुमीनांशाकमविशेषे ॥ बह्वादित्वात् ङीष् ॥

शकट्या । स्त्री० शकटसङ्घे ॥ शक टानांसमूह : । पाशादिभ्याय : ॥

शकलः । पुं० न० खण्डे एक देशे ॥ न० रोहितादिमत्स्यत्वां- त्वचि ॥ रागवस्तुनि ॥ वल्कले । पुं० रुट्यन्तरे । शक्यते० शक्नो तिवा । शकृशक्नौ । शकिशम्यो र्नित्तिकल : ॥

शकली । पुं० मत्स्ये ॥ शकलं०शल्क मस्यास्ति । पतद्धीन : ॥

शकलीकृत : । त्रि० खण्डीकृते ॥

शका । स्त्री० भाषान्तरे ॥ शक्नोतीत्य र्थेपचाद्यच् ॥

शकान्तक : । पुं० विक्रमादित्ये ॥

शकार : । पुं० राज्ञोऽनूढाया : स्त्रि याभ्रातरि ॥ यथा । मदमूर्खताभि मानौदुष्कुलतैश्वर्यसयुक्त: । सोय मनूढाभ्राताराज्ञ : श्याल :शकार इत्युक्त : ।

शकारि: । पुं० विक्रमादित्ये । शाह साङ्के ॥

शकुनः । पुं० पक्षिमात्रे ॥ पक्षिवि
शेषे । गृध्रे ॥ विप्रप्रभेदे ॥ उत्स
वादिषु मङ्गलार्थं गेयगीतविशेषे ॥ न०
शुभाशुभशंसिनिमित्ते । शुभा
शुभस्थाननिर्णयहेतौ ॥ यथा । श
कुनं कथ्यते तत्तु यच्छुभाशुभसूचक
म् । तथा हि । विप्राश्वेभफलान्नदु
ग्धदधिगोसिद्धार्थपद्माम्बरंवेश्यावा
द्यमयूरचाषनकुलाः बद्धैकपश्वामि
षम् । सद्वाक्यकुसुमेक्षुपूर्णकलशच्छ
त्राणि मृत्कन्यकारत्नोष्णीषसितोक्ष
मद्यससुतास्त्रीदीप्तवैश्वानराः ॥
आदर्शाञ्जनधौतवस्त्ररजको मीनाज्य
सिंहासनं शावं रोदनवर्जितं ध्वजम
धुच्छागास्त्रगोरोचनम् । भारद्वाज
नृयानवेदनिनदा माङ्गल्यगीताङ्कुशा
दृष्टाः सत्फलदाः प्रयाणसमये
रिक्तो घटः स्वानुगः ॥ नरो निरू
पः सितवाससश्च श्लोकाश्च प्रशस्ताः म
धुराश्च जल्पन् । एवंविधा योषिद
पि प्रयाणे प्रवेशकाले कुरुतेऽर्थसिद्धि
म् ॥ पृथ्वीपतिर्ब्राह्मणहर्षयुक्तो वे
श्या कुमारी सुहृदः सुवेशाः । ना
र्यो नराः श्वेतवपोऽधिरूढाः शु
भाय दृष्टाः सकलोद्यमेषु । श्वेता
म्बराः श्वेतविलेपनाढ्याः श्वेतां स्रजं
मूर्द्धनि धारयन्ती । दृष्टा प्रहृष्टा यदि
गौरवर्णा नारी नरैः स्यात्तदभीष्ट
सिद्ध्यै ॥ धृतातपत्रः शुचिशुक्लवा
साः पुष्पार्चितश्चन्दनचर्चिता
ङ्गः । निःश्वासयुक्तः कृतभोज
नो वा विप्रः पठन् यच्छति सर्वसिद्धि
म् अभ्युपगच्छति यस्य यियासोः
स्त्रीपुरुषोऽप्यथवा फलहस्तः । सर्व
समीहितसिद्धिरवश्यं तस्य नरस्य भव
त्यचिरेण ॥ आदाय रिक्तकलशं ज
लार्थी यदि व्रजेत् कोऽपि सह प्रवेशेन ।
पूर्णं समादाय निवर्त्तते सौ यथा कृ
तार्थः पथिकस्तथैव ॥ गोधाजाह
कसूकराहिशशकानां कीर्त्तनं शोभ
नं नो शब्दो न विलोकनं च कपिऋ
क्षाणां शुभो व्यत्ययः । नद्युत्तारभ
यप्रवेशसमरे नष्टार्थसंवीक्षणे व्यत्य
स्ताः शकुना नृपेक्षणविधौ यात्रोदि
ताः शोभनाः ॥ वामाङ्गे कोकिला
पल्ली पोतकी शूकरी रला । पिङ्गला
छुच्छुन्दरी शिवा पुरुषसंज्ञिता
छिक्करः पिप्पीको भासः श्रीकण्ठो
वानरो रुरुः । स्त्रीसंज्ञकाः काक
ऋक्षश्वानः स्युर्दक्षिणे शुभाः ॥
प्रदक्षिणगताः श्रेष्ठाः यात्रायां मृ
गपक्षिणः । ओजा मृगा व्रजन्तोऽति
धन्या वामे खरस्वनः ॥ श्यामा शि
वा पिङ्गलिकान्यपुष्टा पल्ली बला शूक
रिका तथैव । कुच्छुन्दरी चापि शु
भाय वामे पुन्नामधेयाः शकुनाश्च
सर्वे । श्रीकण्ठकिक्काररुरुप्रवङ्गाः
श्रीकण्ठभासौ भषको मयूरः । श्ये

न : सम : पिप्पकायाप्रशस्ता : स्त्री
नामधेयाश्चपिट्टनिर्णेन ॥ दुष्टेश
कुनेजातेयत्कर्त्तव्यंतदाह । प्रा
णायामांस्त्त्रयस्त्रस्मरन्नारायणादाप्
शाकुनैर्वेविरुद्धैः । तिग्मानृक्त्वे
कंद्वितीयेतृतीयेघस्रप्रख्यान्नोचतुर्थे-
गम : स्यात् ॥ घस्रप्रख्यान्हिंस्र
तुल्यानृनिम्मानृतीक्ष्णानृप्राप्येत्य
र्थं : शक्नोति । शक् ० शकेरुनोन्तो
न्त्युनयश्वस्त्युनप्रत्यय : ॥

शकुनज्ञ : । त्रि० शकुनज्ञातरि ॥

शकुनज्ञा । स्त्री० ज्येष्ठ्याम् । प
ल्ल्याम् ।

शकुनाहृत : । पुं० शालिविशेषे ॥

शकुनि : । पुं० विहगे । पक्षिणि ॥
सौबले । दुर्य्योधनस्यमातुले ॥ क
रणान्तरे ॥ तत्रजातस्यफलंयथा ।
परजनधनहर्त्तावञ्चक : क्रूरचेष्ट :
करधृतकरवालोव्याहत : स्वामिप
च : । अतिशयपरदारासक्तचित्त
स्तोषिभवतिशकुनिजन्मामानव :
शीघ्रकर्म्मा ॥ शक्नातीत्यर्थे । शकेरु
नोन्तोन्त्युनयश्चस्त्युनि : ॥

शकुनिक : । त्रि० शकुनीकुशले ॥
आकर्षादित्वात्कन् ॥

शकुनिप्रपा । स्त्री० पक्षिणांपानीय
शालायाम् । स्त्रीयहे ॥

शकुनी । स्त्री० श्यामाख्यविहगे ॥

शकुनीश्वर : । पुं० गरुडे ॥

शकुन्त : । पुं० कीटविशेषे । भा
सपक्षिणि ॥ विहङ्गमात्रे ॥ श
क्नोति । शकेरुनोन्तोन्त्युनयश्चति०
उन्त : ॥

शकुन्तला । स्त्री० दुष्यन्तपत्न्या ।
भरतमातरि ॥ निर्जनेतुवनेयस्मा
त्० शकुन्तै : परिरक्षिता । शकु
न्तलेतिनामाऽस्या: कृतञ्चापिततो
मया ॥ कालिदासविरचितेना-
टके ॥

शकुन्तलात्मज : । पुं० भरते ॥ य
न्नाम्नाभारतोवर्ष: सुप्रसिद्धोधरा
तले ॥

शकुन्ति : । पुं० पक्षिमात्रे ॥ शक्नो
ति । शकेरुनोन्तोन्त्युनयश्चतिशके
रुन्ति : ॥

शकुन्द : । पुं० करवीरे ॥

शकुल : । पुं० मत्स्यविशेषे । कल
के । शउल् ० इ० गौ० दे० भा०
प्र० ॥ शक्नोतिगन्तुंवेगेन । बाहु
लकात्शकेरुलच् ॥

शकुलगण्ड : । पु० शालमत्स्ये ॥

शकुलाक्षक : । पुं० श्वेतदूर्वायाम् ।
गोलोम्याम् ॥ शकुलस्यमत्स्यस्येवा
क्षियस्या : । अक्षाऽदर्शनादित्यच्
। स्वार्थेकन् ॥

शकुलाक्षी । स्त्री० गण्डदूर्वायाम् ।

शकुलादनी । स्त्री० कृष्णभेद्याम् । क
टुक्याम् ॥ कस्तटशाके । जलपिप्प

ल्याम् । काचडाटाम० इति० गौ० भा० प्र० ॥ मांस्याम् ॥ किषु लिकायाम् ॥ शकुलं स्यति । षट० । कर्मणि ल्युट् । ङीप् । ग जोषणायाम् । कट्फले ॥

शकुलार्भकः । पुं० गडकमत्स्ये ॥ शकुलस्य मत्स्यविशेषस्य अर्भकः ॥

शकुली । स्त्री० मत्स्यविशेषे । सौरी, इ० दे० भा० प्र० । मृगाल् इ० गौड० दे० भा० ॥ शकुली ग्राहिणी हृद्या मधुरा तुवरा स्मृतेति भावप्रकाशः ॥ शकुलीरोहिताकारा भूमौ प्रायश्चरसौ । गुर्वीपाकेषम धुरा भेदिका दे पकोपन्तिरा जशस्त भः ॥

शकृत् । न० विष्ठायाम् ॥ शक्नोति० शक्यते वानिस्सर्तुं वानिस्सारयितुं वा । शकेर्ऋतिन् ॥

शकृत्करिः । पुं० वत्से ॥ शकृत्करोति । स्वशकृतोरिन् ॥

शकृद्द्वारम् । न० गुदे । पायौ ॥ शकृतो द्वारम् ॥

शक्वरः । पुं० वृषे ॥ इ० हे० चन्द्रः ॥

शक्वरिः । पुं० इ० चि० शेषः ॥

शक्वरी । स्त्री० चतुर्दशाक्षरायां छन्दसि । शर्कर्य्यम् ॥ नदीप्रभेदे ॥ मेखलायाम् ॥

शक्तः । चि० शक्तिविशिष्टे । समर्थे ॥ शक् । कर्मणि क्तः ॥ शक्तानां भूषणं क्षमा ॥

शक्तिः । स्त्री० अस्त्रविशेषे । सेल इ० भा० प्र० ॥ गौर्याम् । दुर्गायाम् ॥ या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता । चैतन्यरूपायाम् । चित्शक्तौ । निर्विषयकसंविदि ॥ सा च सर्वैकरूपा ॥ यथा । एकैव शक्तिः परमेश्वरस्य भिन्ना चतुर्धा व्यवहारकाले । भोगे भवानी पुरुषेषु विष्णुः कोपेषु काली समरेषु दुर्गा ॥ अपि च । एकमूर्त्तिरपि भिन्नरूपिणी या जगज्जननपालनक्षये । काच्युतेश्वरतया विवर्त्ततेब्रह्मशक्तिमहमानतोऽस्मितामिति ॥ तथा हि देवीभागवते । निर्गुणाया सदा नित्या व्यापिकाऽविकृता शिवा । योगगम्याखिलाधारा तुरीयायाश्च संस्थिता ॥ तस्यास्तु सात्त्विकी शक्ती राजसी तामसी तथा । महालक्ष्मीः सरस्वती महाकालीति ताः स्त्रियः ॥ तासां तिसृणां शक्तीनां देहाङ्गीकारलक्षणः । सृष्ट्यर्थंश्च समाख्यातः सर्गः शास्त्रविशारदैरिति ॥ सा च सच्चिदानन्दब्रह्मरूपिणी । तस्या या सात्त्विकी शक्तिस्तथा राजसी तथा तामसी च या शक्तिः तत्तच्छक्तिविशिष्टं यत् परब्रह्म इत्यर्थः । तन्महालक्ष्म्यादयो याः प्रसिद्धाः स्त्रियस्ताः स्त्रियो भवन्ति । साम्यावस्था

शक्तिः

त्मकब्रह्मरूपिणीमूलदेवतातद्दे-
कैकगुणविशिष्टब्रह्मरूपिण्योमहाल
क्ष्म्यादयोदेवताइतिभावः अतएव
श्रुत्यागमपुराणादिष्वासांसच्चिदा
नन्दरूपत्वमुक्तं नतुकेवलजडशक्ति-
रूपत्वं सृष्ट्यर्थंजगत्सर्जनाययस्या-
सांतिसृणांशक्तीनांदेहाद्यीकारादे-
ष्टधारणंतल्लक्षणोयः सर्गः सोऽ
त्रशास्त्रविशारदैः पण्डितैः सर्ग
शब्देनसमाख्यातइत्यर्थः ॥ अपि
च । पौराण्य बहिप्रमाणानिपठिता
निसुपण्डितैः । प्रत्यक्षानुमा
नशब्दश्चैवतृतीयकम् । चत्वा
र्यैवेतरेप्राहुरुपमानयुतानिच ॥ इ
तरेनैयायिकैकदेशिनः । अर्थाप-
त्तियुतान्यन्येपञ्चप्राहुर्मनीषिणः
॥ सप्तपौराणिकाश्चैवप्रवदन्तिमनी
षिणः । पूर्वोक्तानिपञ्चसम्भवमै
तिह्यं । एतच्चसप्तममितिसप्तप्रमा
णानि । एतैः प्रमाणैर्दुर्ज्ञेयंयद
द्ब्रह्मरूपमद्भुतम् । एतैरनेकधा
भेदभिन्नैः प्रमाणैर्दुर्ज्ञेयंयत्परंब्रह्म
तदेवपरमंमुख्यं जगत्कारणमस्ती-
तिवेदान्ताश्चाहुरितिशेषः । एव
मेतानिसर्वमतानिवेदे । एतस्मिं
स्त्रीकंमतंमुख्यमितिविमर्शोदुर्घट
एव । तथापियच्छ्रुतिवाक्यानांपर
स्पराविरोधेनमन्त्रोपक्रमोपसंहारादि
लिङ्गैः श्रुतितात्पर्यंनिर्णीततात्पर्य

शक्तिः

यतोऽस्तुतिः प्रबलेतिसिद्धान्तउत्तर
मीमांसायामुक्तः । ननुतेनसिद्धा
न्तेनब्रह्मैवजगत्कारणमितिसिद्धमि
तिचेत्तत्रानुमानेनागमेनश्रुतिभा
क्येनच । यद्ब्रह्मकिंसशक्तिकंजगत्का
रणमुतशक्तिरहितमितिविचारः
कर्तव्यइत्याहवितर्कइति । वित
र्कस्वावकर्तव्यावुद्ध्याचैवागमेनच ।
निश्चयात्मिकयायुक्त्याविचार्यचपु
नः पुनः ॥ वितर्कोऽनुमानमित्य
र्थः । बुद्ध्येत्यस्यार्थोनिश्चयात्मि
कयायुक्त्येति । प्रत्यक्षतस्तुविज्ञानं
चिन्त्यमतिमतासदा । दृष्टान्तेना
पिसततंशिष्टमार्गानुसारिणा ॥
क्तिस्वमतिमताप्रत्यक्षतोयद्विज्ञानं
तदपिचिन्त्यंग्राह्यम् प्रमाणत्वेने
त्यर्थः । शिष्टमार्गः शिष्टाचारस्त
दनुसारिणादृष्टान्तेनव्याप्तिग्राहके
णापिसततमनुमेयमितिशेषः ॥ तमे
वदृष्टान्तमाह । बि. सोपीति । वि
द्वांसोपिवदन्त्येवंपुराणैःपरिगीयते ।
दुर्दर्शासृष्टिशक्तिश्चहरौपालनशक्ति
ता ॥ हरेसंहारशक्तिश्चसूर्येशक्तिः
प्रकाशिका । धराधरणशक्तिश्चशेषे
कूर्मेतथैवच ॥ सायाशक्तिः परि
णतासर्वस्मिन्याप्रतिष्ठिता । दाह
शक्तिस्तथावह्नौसमीरेप्रेरणात्मिका ॥
सादेति । यासर्वस्मिन्याद्याश
क्तिरस्तिसाशक्तिः परिणता । तत्र

क्तिरूपेणेत्यर्थः ॥ शिवोपि शवतां
याति कुण्डलिन्या विवर्जितः । श
क्तिहीनस्तु यः कश्चिदसमर्थः स्मृ
तो बुधैः ॥ एवं सर्वप्रभूतेषु स्थाव
रेषु चरेषु च । ब्रह्मादिस्तम्बपर्यन्तं
ब्रह्माण्डेऽस्मिन् मृगातपाः ॥ शक्ति
हीनन्तु निन्द्यं स्याद्वस्तुमात्रं चराचर-
म् । अशक्तः शत्रु विजयेगमनेभो
जनेतथा ॥ तथा विद्वांसो वदन्तीत्य
न्वयः ॥ एवं सर्वगता शक्तिः सा
ब्रह्मेति विविच्यते । सोपास्या वि-
बुधैः सम्यक् विचार्य सुधिया सदा
॥ एवमिति । यथा सर्वपदार्थ
त्वावच्छेदेन शक्तिमत्त्वव्याप्तिर्गृहीता •
तथा ब्रह्मणोपि पदार्थत्वावच्छिन्नत्वे
न शक्तिरस्ति • सा च शक्तिः साम-
र्थ्यरूपा • न स्वाश्रयाद्भिन्नत्वेन भा
सते • अग्निशक्त्यादावदृष्टत्वात् ।
। किन्त्वभिन्नैव • तदेव दर्शयितुमे
वं सर्वगता शक्तिः सा ब्रह्मेति विवि
च्यते • इत्यनेन स्वाश्रयाद्भेद एवोक्तः
तथा च श्रुतिप्रतिपाद्यं ब्रह्म • मा-
यापषामारसिंहीतिमनस्सकार्यक्ष
रणस्वपियति • परास्य शक्तिर्विविधै
व श्रूयते • इत्यादिश्रुतिभिरनुमाना
दिभिश्च सशक्तिकमेव जगत्कारणमि
ति तदेवोपास्यमिति भावः । एतेन
का शक्तिरित्यस्योत्तरं ब्रह्मसामर्थ्यरू
पा शक्तिरस्तीति बोधितम् । सोपास्ये

ति । यतो ब्रह्माभिन्ना न शक्तिस्ततस्त
स्या भजने • अग्निशक्त्यादिमेऽग्नौ
होमस्यार्थसिद्धत्ववद्ब्रह्मण उपासनं
जातमेवेति सर्वेषां कारणभूता सैव
शक्तिः साम्यावस्थात्मिकोपास्येत्य
र्थः । विष्णौ च सात्त्विकी शक्तिस्तया
होनोप्यकर्म्मकृत् । द्रुहिणे राजसी
शक्तिर्यया होनोप्यसृष्टिकृत् ॥ शि
वे च तामसी शक्तिस्तया संहारकारकः
। इत्यूह्यं मनसा सर्वं विचार्य च पुनः
पुनः ॥ ब्रह्मविष्णुरुद्रादिषु प्रसिद्धे
ष्वन्वयव्यतिरेकं दर्शयंस्तेषामेकैक
गुणवत्तयान्यूनत्वं म॰नोपासार्हत्वं
श्रीभगवद्देवीत्वयेति दर्शयति [illegible] च
प्यौचित ॥ शक्तिः करोति [illegible] सं
सा वै पालयतेऽखिलम् । कु[illegible] सं
हरत्येषा जगत्सचराचरम् । ना[illegible]णु
र्नेश्वरः शक्तो न ब्रह्मा न च पावकः । न
सूर्यो वरुणः शक्ताः स्वे स्वे कार्ये क
थञ्चन ॥ तया युक्ता हि कुर्वन्ति स्वानि
कार्याणि ते सुराः । सैव कारणकार्ये
षु प्रत्यक्षेणावगम्यते ॥ सगुणा निर्गु
णा सा तु द्विधा प्रोक्ता मनीषिभिः ।
सगुणा रागिभिः सेव्या निर्गुणा तु
विरागिभिः ॥ सगुणा • एकैकगुण
विशिष्टा • निर्गुणा साम्यावस्थोपाधि
कब्रह्मरूपेत्यर्थः ॥ धर्मार्थकाममो
क्षाणां स्वामिनी सा निराकुला । ददा
ति वाञ्छितान् कामान् पूजिता विधि

पूर्वकम् ॥ नजानन्ति जना मूढास्तां सदा मायया वृताः । जानन्तोऽपि नराः केचिन्मोहयन्ति परानपि ॥ पण्डिताः स्वोदरार्थं वै पाखण्डानि पृथक् पृथक् । प्रवर्त्तयन्ति कलिना प्रेरिता मन्दचेतसः ॥ कलावस्मिन् महाभाग नानाभेदसमुत्थिताः । नान्ये युगे तथा धर्मा वेदवाह्याः कथञ्चन ॥ विष्णुश्चरत्यसावुग्रं तपो वर्षाण्यनेकशः । ब्रह्मा हरस्तथा देवा ध्यायन्तः कमपि ध्रुवम् ॥ कामयानाः सदा कामं ते चयः सर्वदैव हि । यजन्ति यज्ञान् विविधान् ब्रह्मा विष्णुश्च शङ्कराः ॥ यदि ब्रह्मादयो मुख्यास्तर्हि सेऽन्यं किमिति भजेयुः । भजन्ति च तज्ज्ञानीमुख्याः । किन्तु पराशक्तिरेवेति भावः ॥ सैव शक्तिं परां देवीं ब्रह्माख्यां परमात्मिकाम् । ध्यायन्ति मनसा नित्यं नित्यां मत्वा सनातनीम् ॥ परं ब्रह्मैव तस्या रूपं नान्यमतोऽन्यभिप्रायेण ब्रह्मात्मिकोक्तिल्यताम् । स्पष्टीकृतञ्चैतदग्रिमपद्यद्वये ॥ तस्माच्छक्तिः सदा सेव्या विद्वद्भिः कृतनिश्चयैः । निश्चयः सर्वशास्त्राणां ज्ञातव्यो मुनिसत्तमाः ॥ कृष्णाच्छ्रुतं मया चैतत्तेन ज्ञातञ्च नारदात् । पितुः सकाशात्तेनापि ब्रह्मणा विष्णुना श्रुतम् ॥ न श्रोतव्यं न मन्तव्यमन्यं पापवचनं बु-

धैः । शक्तिरेव सदा सेव्या विद्वद्भिः कृतनिश्चयैः ॥ यथा गगनशरीरप्रविष्टस्यैव तस्य गगनमिति व्यवहारः तथा प्रथमतो मायाशरीरप्रविष्टस्यैव तस्य मायाशक्तिरिति व्यवहारः तदनन्तरं गुणोत्पादादेकैकगुणविशिष्टमायाशवलब्रह्मण एव ब्रह्मा विष्णु रुद्र इत्यादि व्यवहारः । तथा च सर्वकारणं ब्रह्म मायाशक्तिसहितमेव भवतीति मायाशक्तिर्देवी भगवतीत्यादि मुख्यशब्दैरेवोपास्या इत्याह । शक्तिरेवेति ॥ प्रत्यक्षमपि दृष्टञ्च मया तत्त्वविचेष्टितम् । अतः सर्वेषु भूतेषु ज्ञातव्या शक्तिरस्ति हि ॥ इति श्रीदेवीभागवते प्रथमस्कन्धे अष्टमोऽध्यायः ॥ या शक्तिः परमात्मासौ योऽसौ सा परमात्मता ॥ अन्तरं मे तयोः कोऽपि सूक्ष्मं वेद च नारदेति तृतीयस्कन्धे ऽध्यायः ॥ इति ॥ उत्साहादौ । नीतिवेदिनां प्रभावोत्साहमन्त्रजास्तिस्रः ॥ तत्र प्रभुत्वं साधकत्वात् कोशदण्डौ प्रभुशक्तिः । विक्रमे बलं शक्तानां स्फुरणमुत्साहशक्तिः । सन्ध्यादीनां साम्नादीनाञ्च यथावस्थानं मन्त्रशक्तिः ॥ बले । सत्त्वे । शौर्य्ये । पराक्रमे ॥ यदृच्छितसामर्थ्ये ॥ स्त्रियाम् । योषिति । नार्य्याम् ॥ प्रकृतौ ॥ लक्ष्म्याम् ॥ अस्मात्पदा

यमर्थं बोद्धव्य इतीश्वरसङ्केते । शक्यते जेतुमनया सा । शक् + क्ति । स्त्रियां क्तिन् । कासाम् । अर्थ लाञ्छे ॥ पुं॰ वशिष्ठमुनेर्ज्येष्ठ पुत्रे

शक्तिग्रह : । पुं॰ शिवे ॥ कार्त्तिकेये ॥ शब्दशक्तिज्ञाने ॥ अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरेच्छा शक्तिरिति तार्किका : । तज्ज्ञानन्तु व्याकरणादिभ्यः । अतएव । शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद्व्यवहारतश्च । वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यत : सिद्धपदस्य वृद्धा: ॥ इति प्राञ्च: ॥

शक्तिग्राहक : । पुं॰ व्याकरणोपमानादौ ॥ त्रि॰ शक्तिग्राहीतरि ॥

शक्तित्रयम् । न॰ ज्ञानेच्छाक्रियाख्य शक्तित्रये । यथा । इच्छाक्रियातथाज्ञानंगौरीब्राह्मीतुवैष्णवी । त्रिधाशक्ति : स्थितायत्रतत्परंज्योतिरोमिति ॥ राज्ञांप्रभुमन्त्रोत्साहाख्यासु । अत्र विजयार्थं राज्ञा शक्तित्रयंतावदरणीयंनतुस्थापनीयम् ॥ त्रिशक्त्यो यथा । एषाचिच्छक्तिरुद्दिष्टानयसिद्धाश्रगामिति । एषा शक्तिपराकृष्टि : सात्त्विकीत्रह्मसंस्थिता ॥ एषैव रक्तारजसि वैष्णवी परिकीर्त्तिता । एषैव कृष्णातमसि रौद्रीदेवीतुकीर्त्तिता ॥ परमात्मायथादेवएकएवत्रिधास्थित: । प्रयोजनवशाच्छक्तिरेकैवत्रिविधाभवेदिति वाराहपुराणम् ॥ शक्तीनांत्रयम् ॥

शक्तिधर : । पुं॰ कार्त्तिकेये । स्कन्दे । त्रि॰ शक्तिभृति ॥ शक्तेर्धर : ॥

शक्तिपर्ण : । पुं॰ सप्तपर्णवृक्षे ॥

शक्तिपाणि : । पुं॰ कार्त्तिकेये ॥ त्रि॰ शक्तिधारिणि ॥ शक्ति : पाणौयस्य स : ॥

शक्तिबन्धनम् । न॰ प्रजननसामर्थ्ये । शक्तिसम्बन्धे ॥

शक्तिभृत् । पुं॰ कार्त्तिकेये ॥ त्रि॰ शक्तिधारके ॥

शक्तिमान् । त्रि॰ शक्ते ॥

शक्तिहेति : । त्रि॰ शक्तिधरे ॥

शक्तिहेतिक : । त्रि॰ शक्त्यस्त्रधारिणि । शाक्तीके ॥

शक्ती । स्त्री॰ अस्त्रान्तरे । शक्तौ ॥ वरुणादिषु शक्ति : शब्दइतिपाठात्पक्षेङीप् ॥

शक्यर्ष्टि : । पुं॰ अनकारङ्कुशललाटग्रीवासूत्रंच घर्म॰दीर्घान : ख्यासि च ॥ यथा । कुशीलवाद्यै यो वा यां यदा घर्म: प्रवर्त्तते । शक्यर्द्धितं विजानीयादावर्तीच्छासमेवच ॥

शक्य : । त्रि॰ शक्तिविषये । शक्तुयाग्ये । वाच्ये ॥ यथा । शक्योऽर्थोऽभिधया ज्ञेय : लक्ष्योलक्षणयामत:

। व्याख्नोमिनयाख्येयंविसृयः शब्दकल्प
मयइति । ईश्वरसङ्केत : शक्तिस्त
स्याऽर्थबोधकंपदंशाब्दकम् । यथागो
त्वादिविशिष्टबोधकंगवादिपदं॰त
द्बोध्योर्थोगवादिर्वाच्य : सएवमुख्या
र्थइत्युच्यते । समर्थे ॥ शक्॰ । श
क्तिसद्वोर्व्वितियत्साध्ये । शकनीये॥
शक्यतावच्छेदकम् । न॰ शक्यां
शेभासमानार्थे ॥

शक्रः। पुं॰इन्द्रे। देवराजे ॥ कुटजवृक्षे
॥ अर्ज्जुनपादपे ॥ शक्नोतिदैत्यान्
नाशितुम् । शक्॰ । स्फायितञ्चीति
रक् ॥ ज्येष्ठानक्षत्रे ॥

शक्रक्रीडाचलः । पुं॰ सुमेरुपर्व्वते ॥

शक्रगोपः । पुं॰ इन्द्रगोपकीटे ॥

शक्रजः । पुं॰ काके । अवयवे । गूढ
मैथुने ॥ इन्द्रपुत्रे ॥ शक्राज्जातः
। जनी॰ डः ॥

शक्रजित् । पुं॰ इन्द्रजिति । रावणपु
त्रे । शक्रमजैषीत् । जि॰ । सत्सू
द्विषेत्यादिनाक्विप् ॥

शक्रधनुः। न॰ शक्रायुधे।शक्रस्यधनुः ॥

शक्रध्वजः । पुं॰ इन्द्रध्वजे ।उत्सवबि
शेषे ॥ चतुरस्रंध्वजाकारंराजद्वारेप्र
तिष्ठितम् । आहुः शक्रध्वजंनाम
पौरलोकसुखावहम् ॥ विशेषोदेवी
पुराणे॰वाराहीसंहितादिषुद्रष्ट
व्यः ॥ शक्रस्य ध्वजइव ॥

शक्रनन्दनः । पुं॰ जयन्ते । अर्ज्जुने
वालिनि । काके ॥ शक्रस्यनन्दनः

शक्रपर्य्यायः । पुं॰ कुटजवृक्षे ॥ शक्रः
पर्य्यायोऽस्य

शक्रपादपः । पुं॰ देवदारुवृक्षे शक्र
स्यपादपः ॥ कुटजे ॥

शक्रपुष्पिका । स्त्री॰ शक्रपुष्पाम् ॥

शक्रपुष्पी । स्त्री॰ अग्निशिखावृक्षे ॥
शक्रोऽर्ज्जुनतरुः पुष्पमस्याः । शक्र
शब्दस्तत्पुष्पेलाक्षणिकः । पाक
कर्णेतिङीष् ॥

शक्रभवनम् । न॰ स्वर्गे ॥

शक्रभित्॰द् । पुं॰ इन्द्रजिति । रा
वणौ ॥ शक्रमभैत्सीत् । भिदिर्॰
। क्विप् ॥

शक्रभुवनम् । न॰ नाके । सुरलोके ॥
शक्रस्यभुवनम् ॥

शक्रभूभवा । स्त्री॰ इन्द्रवारुण्याम् ॥

शक्रमाता । स्त्री॰ भार्ग्याम् ॥ इन्द्र
जनन्याम् ॥

शक्रमातृका।स्त्री॰ इन्द्रध्वजाङ्गयष्टिवि
शेषे ॥

शक्रमूर्द्धा । पुं॰ वल्मीके ॥ इ॰वि॰
शेष : ॥

शक्रवल्ली । स्त्री॰ इन्द्रवारुण्याम् ॥

शक्रशाखी । स्त्री॰ इन्द्रवारुण्याम् ॥

शक्रवाहन : । पुं॰ मेघे ॥

शक्रबीजम् । न॰ इन्द्रयवे ॥ शक्रस
ञ्ज्ञकंबीजम् ॥

शक्रशरासनम् । न॰ इन्द्रधनुषि ॥

शक्रशाखी । पुं॰ कुटजवृक्षे ॥ शक्रस्य: शाखी ॥

शक्रशाला । शक्रशालिका ।) स्त्री॰ प्रतिश्रये । सभायाम् ॥

शक्रशिरः । न॰ वल्मीके ॥ इन्द्रमस्तके ॥

शक्रसारथिः । पुं॰ मातलौ ॥

शक्रसुतः । पुं॰ जयन्ते ॥ वालिवानरे ॥ अर्ज्जुने ॥ काके ॥ शक्रस्यसुतः ॥

शक्रसुधा । स्त्री॰ कुन्दुरौ ॥

शक्रसृष्टा । स्त्री॰ हरीतक्याम् ॥

शक्राख्यः । पुं॰ पेचके ॥ त्रि॰ इन्द्रनामके ॥

शक्राणी । स्त्री॰ इन्द्राण्याम् ॥ शक्रमणतिकीर्त्तयति । अणशब्दे । कर्म्मण्यण् । टिड्ढेतिङीप् ॥

शक्रायुधम् । न॰ इन्द्रायुधे ॥ अस्यसम्भवादिकंयथावाराह्याम् । सूर्य्यस्य विविधवर्णाः । पवनेनविघट्टिताः कराः साभ्रे । वियतिधनुःसंस्थानायेदृश्यन्तेतदिन्द्रधनुः ॥ केचिदनन्तकुलोरगनिःश्वासोद्भूतमाहुराचार्य्याः । तद्यायिनांनृपाणामभिमुखमजयावहंभवति ॥ अच्छिन्नमवनिगाढंद्युतिमत्स्निग्धंघनंविविधवर्णम् । द्विरुदितमनुलोमञ्चप्रशस्तमम्भः प्रयच्छतिच ॥ विदिगुद्भूतं दिक्पतिनाशंचव्यभ्रजंमरककारि । पाटलपीतकनीलैः शस्त्राग्निक्षुत्कृतादोषाः ॥ जलमध्येऽनावृष्टिर्भुवि सस्यवधस्तरौस्थितेव्याधिः । वल्मीकेशस्त्रभयंनिशिसचिववधायधनुरैन्द्रम् ॥ वृष्टिंकरोत्यवृष्ट्यांवृष्ट्यांवृष्टिंनिवारयत्यैन्द्र्याम् । पश्चात्सदैववृष्टिंकुलिशभृतश्चापमाचष्टे ॥ चापंमघोनः कुरुतेनिशायामाखण्डलायांदिशिभूपपीडाम् । याम्यापरोदक्प्रभवंनिहन्यात्सेनापतिंनायकमन्त्रिणौच ॥ निशिसुरचापंसितवर्णाद्यंजनयतिपीडांद्विजपूर्व्वाणाम् । भवतिचयस्यांदिशितद्दृश्यंनरपतिमुख्यंनचिराद्धन्यात् ॥ इति ॥

शक्राशनः । पुं॰ कुटजवृक्षे ॥ न॰ भङ्गायाम् । विजयायाम् । संविदि ॥ अस्यगुणायथा । शक्राशनन्तुतीक्ष्णोष्णंमेहकृत्कुष्ठनाशनम् । बलमेधाग्निकृत्श्लेष्मदोषहारिरसायनम् ॥

शक्राह्वः । पुं॰ इन्द्रयवे ॥

शक्रोत्थानम् । न॰ शक्रध्वजोत्सवे ॥

शक्रोत्सवः । पुं॰ ध्वजोत्थाने । इन्द्रस्योत्सवे ॥

शक्लः । त्रि॰ प्रियंवदे ॥ शक्नोति । शक्लृ॰ । सूशक्यविभ्यः क्लः ॥

शक्वा । पुं॰ हस्तिनि ॥ शक्वा ॥ शक्नोति । शक्लृ॰ । स्नामदिपद्यर्त्तिपॄशकिभ्योवनिप् ॥

शक्करः । पुं॰ वृषे ॥

शक्करी । स्त्री॰ चतुर्द्दशाक्षरायां छन्दोजातौ ॥ नदीविशेषे ॥ मेखलायाम् ॥ सामविशेषे॰ नित्यं बहुवचनान्तोयम्॰ शक्वर्य्य इति॰ महानाम्नीषु ऋक्षु शक्वर्य्यो गीयन्ते । शक्करी॰ अङ्गुलिरिति मल्लव्याख्यानम् । अनोरथेति श्रौत्री ॥

शङ्कः । पुं॰ शकटवाहकवृषे । स्कन्धवाहे । अर्द्धधूर्त्ते ॥ इ॰ हा॰ ली ॥

शङ्कनकः । पुं॰ चन्द्रगण्डे ॥ शङ्कते । शङ्कि शङ्कायाम् । कर्त्तरि॰ अनुदात्तेतश्चहलादेरिति युच् । संज्ञायां कन् ॥

शङ्करः । पुं॰ सदाशिवे ॥ एकादशरुद्राणां मध्ये भगवद्विभूतौ ॥ शं सुखं करोति । शमि धातोः संज्ञायामिति॰ अच् ॥ यथा । शङ्करोमि सदाध्यानात् परमं शर्म्म राम च । भूतानामतुलं यस्मात् तेनाहं शङ्करः स्मृतः ॥ इति स्कान्दे ॥ त्रि॰ कल्याणकरे ॥

शङ्कराचार्य्यः । पुं॰ स्वनामप्रसिद्धे॰ अद्वैतवादिनि॰ वेदान्तभाष्यकर्त्तरि॰ नरावतारे विश्वेश्वरे ॥ यथाहुः । सत्सम्प्रदायप्रथमायतिभ्यो शिष्यैश्चतुर्भिः सह योगवतीर्णः । उज्जीवयन् सन्मतमन्तरा जीयो शङ्कराचार्य्यगुरुं तमीडे ॥

शङ्करावासः । पुं॰ कर्पूरप्रभेदे ॥ कैलाशे ॥

शङ्करावाससंज्ञः । पुं॰ कर्पूरे ॥

शङ्करी । स्त्री॰ मञ्जिष्ठायाम् ॥ पार्वत्याम् ॥ श्रीगिरौ शङ्करी सा तेति देवीगीता ॥ अप्येश्वराधिवासिन्याम् अम्बायाम् ॥ शम्याम् ॥

शङ्कव्यम् । न॰ शङ्कुपयोगिदारुणि । शङ्कवे हितम् । उगवादिभ्यो यत् ॥

शङ्का । स्त्री॰ त्रासे ॥ वितर्के ॥ इति शब्दार्णवः ॥

शङ्कितः । त्रि॰ भीते ॥ वितर्किते । संशययुक्ते ॥ अविश्वस्ते ॥ शङ्का सञ्जाताऽस्य । तारकादित्वादितच् ॥ पुं॰ चोरकनामगन्धद्रव्ये । दुष्पत्रे ॥

शङ्कितवर्णः ।) पुं॰ चौरे ॥
शङ्कितवर्णकः ।)

शङ्कुः । पुं॰ सङ्ख्याविशेषे ॥ यथा । १.............. ॥ अस्त्रप्रभेदे । दीर्घायुधे । कुन्ते । शल्ये । यादोभेदे । शङ्कोचमत्स्ये ॥ कीले ॥ दीपसूर्य्ययोश्छायापरिमाणार्थं काष्ठादिनिर्म्मितक्रमेण सूक्ष्माग्रे द्वादशाङ्गुलपरिमितकीलके ॥ ईशे । शम्भौ ॥ मेढ्रे ॥ कलुषे ॥ राक्षसे ॥ नखीनामगन्धद्रव्ये ॥ द्वादशाङ्गुलपरिमाणे ॥ स्थाणौ । शा

खापचहरिततरौ ॥ पद्मनाभे ॥
पद्मगिरामाले ॥ शङ्कतेऽस्मात् ।
शकि० । खरशङ्कुपीयुमिलङ्कु लि
ख्यतिकुप्रत्ययान्त : साधु : ॥
शङ्कुकर्णः । पुं० गर्द्दभे ॥ सिद्धस्था
नविशेषे ॥ शङ्कुकर्णध्वनि : प्रा
प्तेतिदेवीगीता ॥
शङ्कुकर्णी । स्त्री० औषधिप्रभेदे । पा
शकर्णत्यादिमाङ्गीष् ॥
शङ्कुधि : पुं० शङ्कुमत्स्ये ॥
शङ्कुतरु : । पुं० शालवृक्षे ॥
शङ्कुर : त्रि० भयदे ॥ त्रासदायि
नि ॥
शङ्कुला । स्त्री० उत्पलपत्रिकायाम् ।
पूगकर्त्तन्याम् । सरौता० इ० भा०
प्र : ॥ शङ्कतेऽस्या : । शकि० । बा
हुलकादुलच् । टाप् ॥
शङ्कुवृक्ष : । पुं० शालवृक्षे ॥
शङ्कुशिरा : । पुं० दानवविशेषे ॥
शङ्कुश्रुति : । पुं० पातालाधिपतिदै
त्यविशेषे ॥
शङ्कोच : । पुं० शङ्कुमत्स्ये । शांकी
च० इ०गौ०दे०भा०प्र० ॥
शङ्कोचि : । पुं० शङ्कोचमत्स्ये ॥
शङ्ख : । पुं० ललिकास्थ्नि । भा
लाऽस्थनि ॥ कुवेरस्य निधिप्रभेदे ॥
नखीनामनिगन्धद्रव्ये । शुक्तौ ।
कोलदले ॥ कर्णसमीपास्थनि ॥
अष्टनागनामकान्तर्गतनागविशेषे ॥

शङ्खः

हस्तिदन्तमध्ये ॥ दशनिखर्वसङ्ख्या
याम् । लक्षकोटौ ॥ धर्म्मशास्त्रप्रणे
तृमुनिविशेषे ॥ वाद्यविशेषे ।
भाषामाचे० । ० ॥ पुं०न० कम्बौ ।
अर्णोभवे । पावनध्वनौ । अन्त :
कुटिले । महानादे ॥ अस्योत्प
त्त्यादिकं काशीदेवीभागवते ब्रह्मवैव
र्त्ते च यथा । अस्थिभि: शंखचूडस्य शं
खजातिर्बभूव ह । नानाप्रकाररू
पेण शश्वत्पूतासुरार्च्चने ॥ प्रशस्तं श
ङ्खतोयञ्च देवानां प्रीतिदम्परम् । ती
र्थतोयस्वरूपञ्च पवित्रं शम्भुना विना
॥ शङ्ख [illegible] : सु
संस्थिरा [illegible] थैषु
य : स्नात : शङ्ख [illegible] शंखो
हरिरधिष्ठानं यत्र शङ्खस्ततो हरि :
। तत्रैव वसते लक्ष्मीर्दूरीभूतममङ्ग
लम् ॥ स्त्रीणाञ्च शङ्खध्वनिभि : शू
द्राणाञ्च विशेषत : । भीता रुष्टा या
ति लक्ष्मी: स्थलमन्यत् स्थलात्तत
इति ॥ भूताद्यहङ्कारात्मके पाञ्चज
न्ये ॥ यथा ॥ भूतादिमिन्द्रिया
दिञ्च द्विधाहङ्कारमीश्वर : । बिभ
र्त्ति शङ्खरूपेण शार्ङ्गरूपेण च स्थितम्
इति विष्णुपुराणम् ॥ शङ्खनति० खन
यति । खनु अवदारणे । अन्येभ्यो
पीति ड : ॥ शङ्ख ख इति वा ॥ शा
म्यति अलक्ष्मीर्वा । शमु० । अन्त
र्भावितण्यर्थ : । शमे : ख : ॥

शास्यस्थमेनवा ॥ असुरविशेषे ॥

शङ्खकः । पुं॰ शिरोरोगविशेषे । तल्लक्षणादि यथा । पित्तरक्तानिला दुष्टाः शङ्खदेशे विमूर्च्छिताः । तीव्ररुग्दाहरागं हि शोथं कुर्वन्ति दारुणम् ॥ स शिरो विषवद्वेगान्निरुध्याशु गलं तथा । त्रिरात्राज्जीवितं हन्ति शङ्खको नाम नामतः । त्र्यहाज्जीवति भैषज्यं प्रत्याख्येयस्य कारयेत् । पित्तरक्तानिला॰ अथ कफोऽपि योज्यः । कृतानुतापः कफपित्तरक्तैरिति सुश्रुतवचनात् । विमूर्च्छिताः प्रवृद्धाः । त्रिरात्रात् त्रिरात्रिमध्ये मारयति । अस्य चिकित्सा शिरोरोगे भावप्रकाशे द्रष्टव्या । न॰ वलये । पुं॰ न॰ कम्बौ ॥

शङ्खकारः । पुं॰ शूद्रागर्भे विश्वकर्मीरसजाते॰ वर्णसङ्करजातौ । शाङ्खिके । शांखारी॰ इति भा॰ ॥ शङ्खं करोति । डुकृञ्॰ कर्मण्यण् ॥

शङ्खचरी । स्त्री॰ ललाटिकायाम् ॥ शङ्खचरति । चर॰ । पचाद्यच् टित्वात् ङीप् ॥

शङ्खचर्ची । स्त्री॰ ललाटिकायाम् ॥

शङ्खचिलः । पुं॰ कम्बुतायिनि ॥

शङ्खचूडः । पुं॰ दैत्यविशेषे ॥

शङ्खचूर्णम् । न॰ शङ्खजातचूर्णे ॥ शङ्खचूर्णं कटुक्षारमुष्णं क्रिमिहरं परम् ॥

शङ्खजः । पुं॰ कपोतडिम्बवद्वृहन्मुक्तायाम् ॥ त्रि॰ शङ्खजातवस्तुनि ॥

शङ्खद्रावी । पुं॰ अम्लवेतसे ॥

शङ्खधरा । स्त्री॰ हिलमोचिकायाम् ॥

शङ्खधारी । पुं॰ छन्दोविशेषे ॥ ध्वजानन्दकर्णाः षडेवाचवर्णाः । बुधानन्दकारी भवेच्छङ्खधारी ॥ यथा । स्फुरद्गोपनारीपरीरम्भकारी । हरिः पातु वृन्दावनाभ्यर्णचारी ॥

शङ्खध्मः । पुं॰ शङ्खवादके । शाङ्खिके ॥

शङ्खध्माः । पुं॰ शाङ्खिके ॥

शङ्खनखः । पुं॰ क्षुद्रशङ्खे ॥ शङ्खस्य नख इव ॥ शङ्खनतिवा । बहुलमन्यत्रापीति युच् ल्युड् वा । स्वार्थे कः । पृषोदरादिः नखीनामगन्धद्रव्ये । हट्टनख्याम् ॥

शङ्खनखा । स्त्री॰ शङ्खनख्याम् ॥ द्विधा शङ्खनखाख्याऽन्या शुक्त्याख्या वदरीच्छदः ॥ इति रत्नमाला ॥

शङ्खपुष्पी । स्त्री॰ मङ्गल्यकुसुमायाम् ॥ शङ्खपुष्पी तु शङ्खाह्वा मङ्गल्यकुसुमापि च । शङ्खपुष्पी सरा मेध्या पुष्पा मानसरोगहृत् । रसायनी कषायोष्णा स्मृतिकान्तिबलाग्निदा ॥ दोषापस्मारभूतास्रकुष्ठक्रिमिविषप्रणुत् । इति भावप्रकाशः ॥ पाककर्णेति ङीष् ॥

शङ्खप्रस्थः । पुं॰ चन्द्रस्य चिह्ने ॥

शङ्खभृत् । पुं॰ विष्णौ ॥ भूताहङ्कारात्मकं पाञ्चजन्याख्यं शङ्खं बिभर्त्ति । डुभृञ्॰ ॥ क्विप् । तुक् ।

शङ्खमुखः । पुं॰ कुम्भीरे ॥

शङ्खमूलम् । न॰ मूलके ॥

शङ्खसञ्ज्ञा । स्त्री॰ याचायोगान्तरे । यथा । स्वांशसंस्थे बुधे लग्ने शुक्रे वा देवपूजिते । शङ्खसंज्ञाह्वयो योगो यातुः कीर्त्तिप्रदः सदा ॥

शङ्खसेनः । पुं॰ चित्रगुप्तात्मजेका यस्थविशेषे ॥

शङ्खाख्यः । पुं॰ शङ्खनख्याम् ॥

शङ्खालुकम् । न॰ श्वेततायुक्तकन्दविशेषे

शङ्खाह्वा । स्त्री॰ शङ्खपुष्प्याम् ॥

शङ्खिका । स्त्री॰ तृणविशेषे । चोरायाम् । चोरहुली॰ इ॰ गौ॰ भा॰ ॥

शङ्खी । पुं॰ हरौ ॥ समुद्रे ॥ त्रि॰ शङ्खवति ॥

शङ्खिनी । स्त्री॰ चोरपुष्प्याम् । केशिन्याम् । शांखाहुली॰ इ॰ भाषा ॥ श्वेतचुक्रायाम् । वधूभेदे । चपलाप्रभेदे ॥ तीर्थविशेषे ॥ कुलशक्तिविशेषे ॥ श्वेतपुन्नागे ॥ यवतिक्तायाम् ॥ श्वेतवृन्दायाम् ॥ शङ्खवत्याम् ॥ चतुर्विधस्त्रीमध्ये स्त्रीविशेषे ॥ तल्लक्षणं यथा । दीर्घातिदीर्घनयना वरसुन्दरी या कामोपभोगरसिका गुणशीलयुक्ता । रेखात्रयेण च विभूषितकण्ठदेशा सम्भोगकेलिरसिका किल शङ्खिनी सा ॥ शशकः पद्मिनीतुष्टा चित्रिणी रमते मृगम् । वृषभं शङ्खिनी तुष्टा हस्तिनी रमते हयम् ॥ पद्मिनी पद्मगन्धा च मीनगन्धा च चित्रिणी । शङ्खिनी क्षारगन्धा स्यान्मदगन्धा च हस्तिनी ॥ नाडीविशेषे ॥ गान्धार्याश्च सरस्वत्याः स्थिता मध्ये च शङ्खिनी ॥ शङ्खाः सन्त्यस्याः शङ्खाकारपुष्पत्वात् । अतइनिः ॥

शङ्खिनीफलः । पुं॰ शिरीषवृक्षे ॥

शङ्खिनीवासः । पुं॰ शाखोटवृक्षे ॥

शचि । स्त्री॰ शच्याम् । इन्द्राण्याम् ॥ शचति । शच व्यक्तायां वाचि । सर्वधातुभ्य इन् ॥ स्त्रीकरणान्तरे ॥

शची । स्त्री॰ पुलोमजायाम् । पौलोम्याम् । इन्द्राण्याम् । शचति॰ व्यक्तं वदति । शच॰ इन्नन्तात्॰ कृदिकारादिति ङीष् ॥ शतावर्याम् ॥

शचीपतिः । पुं॰ इन्द्रे ॥ शच्याः पतिः ॥

शचीशः । पुं॰ इन्द्रे ॥

शाम्यत्यनेन वा ॥ असुरविशेषे ॥

शङ्खकः । पुं॰ शिरोरोगविशेषे । तल्लक्षणादिर्यथा । पित्तरक्तानिला दुष्टाः शङ्खदेशे विमूर्च्छिताः । तीव्ररुग्दाहरागं हि शोथं कुर्वन्ति दारुणम् ॥ स शिरो विषवद्वेगान्निरुध्याशु गलं तथा । त्रिरात्राज्जीवितं हन्ति शङ्खको नाम नामतः । त्र्यहाज्जीवति भैषज्यं प्रत्याख्यायास्य कारयेत् । पित्तरक्तानिला॰ अत्र कफोऽपि ग्राह्यः । कृतानुतापः कफपित्तरक्तैरिति सुश्रुतवचनात् । विमूर्च्छिताः प्रवृद्धाः । त्रिरात्रात् त्रिरात्रिमध्ये मारयति । अस्य चिकित्सा शिरोरोगे भावप्रकाशे द्रष्टव्या । न॰ वलये । पुं॰ न॰ कम्बौ ॥

शङ्खकारः । पुं॰ शूद्रागर्भे विश्वकर्मारसजाते॰ वर्णसङ्करजातौ । शाङ्खिके । शांखारी॰ इति भा॰ ॥ शङ्खं करोति । डुकृञ्॰ कर्म्मण्यण् ।

शङ्खचरी । स्त्री॰ ललाटिकायाम् ॥ शङ्खचरति । चर॰ । पचाद्यच् टित्वात् ङीप् ॥

शङ्खचर्च्ची । स्त्री॰ ललाटिकायाम् ॥

शङ्खचिल्लः । पुं॰ कम्बूतायिनि ॥

शङ्खचूडः । पुं॰ दैत्यविशेषे ॥

शङ्खचूर्णम् । न॰ शङ्खजातचूर्णे ॥ शङ्खचूर्णं कटुक्षारमुष्णं क्रिमिहरं परम् ॥

शङ्खजः । पुं॰ कपोतडिम्ववद्बृहन्मुक्तायाम् ॥ त्रि॰ शङ्खजातवस्तुनि ॥

शङ्खद्रावी । पुं॰ अम्लवेतसे ॥

शङ्खधरा । स्त्री॰ हिलमोचिकायाम् ॥

शङ्खधारी । पुं॰ छन्दोविशेषे ॥ ध्वजानन्दकर्णाः षडेवात्र वर्णाः । बुधानन्दकारी भवेच्छङ्खधारी ॥ यथा । स्फुरद्गोपनारीपरीरम्भकारी । हरिः पातु वृन्दावनाभ्यर्णचारी ॥

शङ्खध्मः । पुं॰ शङ्खवादके । शाङ्खिके ॥

शङ्खध्मा : । पुं॰ शाङ्खिके ॥

शङ्खनखः । पुं॰ क्षुद्रशङ्खे ॥ शङ्खस्य नख इव ॥ शङ्खनतिवा । वहुलमन्यत्रापीति युच्ल्युड्वा । स्वार्थेकः । पृषोदरादिः नखीनाम गन्धद्रव्ये । हट्टवल्याम् ॥

शङ्खनखा । स्त्री॰ शङ्खनख्याम् ॥ द्विधा शङ्खनखाख्याऽन्या शुक्तयाख्या बदरीच्छदः ॥ इति रत्नमाला ॥

शङ्खपुष्पी । स्त्री॰ मङ्गल्यकुसुमायाम् ॥ शङ्खपुष्पी तु शङ्खाह्वा मङ्गल्यकुसुमापि च । शङ्खपुष्पी सरा मेध्या वृष्या मानसरोगहृत् । रसायनी कषायोष्णा स्मृतिकान्तिबलाग्निदा ॥ दोषापस्मारभूतालक्ष्मीकुष्ठकृमिविषप्रणुत् । इति भावप्रकाशः ॥ पाककर्णेति ङीष् ॥

शङ्खप्रस्थः । पुं० चन्द्रस्य चिह्ने ॥

शङ्खभृत् । पुं० विष्णौ ॥ भूतादाहङ्कारात्मकं पाञ्चजन्याख्यं शङ्खं बिभर्त्ति । डुभृञ्० ॥ क्विप् । तुक् ।

शङ्खमुखः । पुं० कुम्भीरे ॥

शङ्खमूलम् । न० मूलके ॥

शङ्खसञ्ज्ञा । स्त्री० याम्यायोगान्तरे । यथा । स्वांशसंस्थे बुधे लग्ने शुक्रे वा देवपूजिते । शङ्खसञ्ज्ञाह्वये योगे जातः कीर्त्तिप्रदः सदा ॥

शङ्खसेनः । पुं० चित्रगुप्तात्मजे कायस्थविशेषे ॥

शङ्खाख्यः । पुं० [illegible] ॥

शङ्खालुकम् । न० श्वेततायुक्तकन्दविशेषे

शङ्खाह्वा । स्त्री० शङ्खपुष्प्याम् ॥

शङ्खिका । स्त्री० तृणविशेषे । चोरायाम् । चोरहुली० इ० गौ० भा० ॥

शङ्खी । पुं० हरौ ॥ समुद्रे ॥ त्रि० शङ्खवति ॥

शङ्खिनी । स्त्री० चोरपुष्प्याम् । केशिन्याम् । शांखाहुली० इ० भाषा ॥ श्वेतचुक्रायाम् । वधूभेदे । चवलाप्रभेदे ॥ तीर्थविशेषे ॥ बुद्धशक्तिविशेषे ॥ श्वेतपुन्नागे ॥ यवतिक्तायाम् ॥ श्वेतवृन्दायाम् ॥ शङ्खवत्याम् ॥ चतुर्विधस्त्रीमध्ये स्त्रीविशेषे ॥ तल्लक्षणं यथा । दीर्घासुदीर्घनयनावरसुन्दरी या कामोपभोगरसिका गुणशीलयुक्ता । रेखात्रयेण च विभूषितकण्ठदेशा सम्भोगकेलिरसिका किल शङ्खिनी सा ॥ शशकः पद्मिनीतुष्टश्चित्रिणीरमते मृगः । वृषभः शङ्खिनीतुष्टो हस्तिनीरमतेऽश्वम् ॥ पद्मिनी पद्मगन्धा च मीनगन्धा च चित्रिणी । शङ्खिनी क्षारगन्धा स्यान्मदगन्धा च हस्तिनी ॥ नाडीविशेषे ॥ गान्धार्याश्च सरस्वत्याः स्थिता मध्ये च शङ्खिनी ॥ शशङ्खाः सन्त्यस्याः शङ्खाकारपुष्पत्वात् । अत इनिः ॥

शङ्खिनीफलः । पुं० शिरीषवृक्षे ॥

शङ्खिनीवासः । पुं० शाखोटवृक्षे ॥

शचि । स्त्री० शच्याम् । इन्द्राण्याम् ॥ शचति । शच व्यक्तायां वाचि । सर्वधातुभ्य इन् ॥ स्त्रीकरणान्तरे ॥

शची । स्त्री० पुलोमजायाम् । पौलोम्याम् । इन्द्राण्याम् । शचति० व्यक्तं वदति । शच० । इन्नन्तात्० कृदिकारादिति ङीष् ॥ शतावर्याम ॥

शचीपतिः । पुं० इन्द्रे ॥ शच्याः पतिः ॥

शचीशः । पुं० इन्द्रे ॥

शण्ड । पुं॰ देशान्तरे ॥ शटेरच् । च॰ पक्षे ।

शटा । स्त्री॰ जटायाम् । शटति । शटरुजाविशरणगत्यवसादनेषु । अच् । टाप् ।

शटिः । पुं॰ शट्याम् । गन्धपलाश्याम् । शट॰ । इन् ।

शटिका । स्त्री॰ शटीप्रभेदे । गन्धपचायाम् ।

शटी । स्त्री॰ गन्धशट्याम् । गन्धमूल्याम् । षड्ग्रन्थिकायाम् । कर्चूरे । पलाशे । गन्धपलाश्याम् । कचूर॰इ॰दे॰भा॰ । बनचादा॰इ॰गौ॰दे॰भा॰ ॥ गन्धपलाशीसुगन्धद्रव्यं काश्मीरेप्रसिद्धम् । शटति । शट॰ । अच् । गौरादिः ॥

शट्ट । पुं॰ शट्टके ॥

शट्टकम् । न॰ शट्टे । सांटा॰इ॰भा॰प्र॰ । शालिचूर्णं घृततोयंमिश्रतं शट्टकंबदेत् ।

शठः । पुं॰ मध्यस्थपुरुषे ॥ धूस्तूरे ॥ धूर्त्ते । परवञ्चनार्थं मन्यथा जानन्नप्यन्यथावादिनि । गूढविप्रियकृति । यथोक्तं विष्णुपुराणे । प्रियंवक्तिपुरोऽन्यत्रविप्रियंकुरुतेभृशम् । व्यक्तापराधचेष्टश्चशठोऽयंकथितोबुधैरिति ॥ अपिच । परकार्यविमुखे । यथा । मनसाबचसायश्चदृश्यते कार्यतत्परः । कर्मणाविपरीतश्च सशठः सद्भिरुच्यते ॥ चतुर्विधपत्यन्तर्गतपतिविशेषे ॥ तल्लक्षणं यथा । कामिनीविषयकपटपटुरिति ॥ शठति॰वञ्चयति । शठकैतवे । पचाद्यच् ॥ न॰ तगरे । कुङ्कुमे ॥ तीक्ष्णायसि ।

शठता । स्त्री॰ कुसृतौ । निकृतौ । मायायाम् । शाठ्ये ॥ भावकर्मणोस्तल् ॥

शठाम्बा । स्त्री॰ अम्बष्ठायाम् । छिन्नपल्याम् ॥

शणः । पुं॰ स्वनामप्रसिद्धक्षुपे । माल्यपुष्पे । कटुतिक्तके । त्वक्सारे । दीर्घपल्लवे ॥ न॰ भङ्गायाम् । मातुलान्याम् ॥

शणघण्टिका । स्त्री॰ शणपुष्प्याम् ।

शणपत्रम् । न॰ शणवल्कलनिर्मितपत्रे । कागद॰इ॰प्र॰ ॥

शणपर्णी स्त्री॰ अश्मन्तपर्ण्याम् । शणस्य पर्णमस्याः । शणशब्दः शणपर्णसदृशलाक्षणिकः । पाककर्णेति ङीष् ॥

शणपुष्पम् । न॰ शणके ॥

शणपुष्पिका । स्त्री॰ घण्टारवायामोषधौ । शणाः पुष्पं यस्याः । स्वार्थेकन् ॥

शणपुष्पी । स्त्री॰ घण्टारवायाम् । घण्टेतिख्यातौषधौ ॥ शणाः पुष्पं यस्याः । शणशब्दस्तत्पुष्पसदृ॰ला

घणिक: । पाककर्म्मणि तिन्दोष् ।। अथास्या गुणा: । शणपुष्पी कटुस्तिक्ता वामिनी कफपित्तजित् ।। आढक्याम् ।

शणसूत्रम् । न० शणद्रुमांशुसूत्रे । पवित्रके ।। शणोऽति । शणगतौ । पचाद्यच् । शणस्य सूत्रम् ।

शणालु: ।)
शणालुक: ।) पुं० आरेवते । आरग्वधे । इ० श० र० नी० ।।

शणिका । स्त्री० शणपुष्प्याम् ।।

शणीरम् । न० शोणमध्यस्थपुलिने ।। दर्द्दरीतटे । इ० मेदिनिकर: ।

शण्डम् । न० षण्डे । पद्मादिसमूहे ।। पुं० असुरपुरोहिते । शण्डते । शडिरुजायां सङ्घाते च । अस्मात् पचाद्यच् ।।

शण्डक: । पुं० देशविशेषे ।

शाण्डल: । पुं० मुनिविशेषे ।। शण्डते । शडि० । सलिकल्यनिमहिभडिभण्डशण्डपिण्डतुण्डकुकिभूभ्य इलच् ।

शण्ढ: । पुं० गोपतौ । सांड० इ० भा० ।। आकृष्टाण्डे ।। वर्षवरे । अन्तर्म्महलिके । अभ्यन्तरस्त्रीरक्षके ।। तृतीयप्रकृतौ । क्लीवे ।। शाम्यति शिष्णाभावात् । शम उपशमे । शमेर्ढ: ।। बन्ध्यपुरुषे । उन्मत्ते ।।

शतम् । न० दशगुणितदशसङ्ख्यायाम् । दशतौ । १०० दशदशत: परिमाणमस्य । पङ्क्तिविंशतीति निपातनात् प्रकृते: शभाव० त प्रत्यय: ।। सङ्ख्येये ।।

शतक: । त्रि० शतसङ्ख्याविशिष्टे सङ्घे । शतंपरिमाणमस्य । सङ्ख्याया अतिशदन्ताया: कन् ।। शतेन क्रीतो वा ।

शतकीर्त्ति: । पुं० भाव्यर्हद्विशेषे ।।

शतकुन्द: । पुं० करवीरे ।।

शतकुम्भ: । पुं० पर्व्वतविशेषे । श्वेतकरवीरे ।

शतकोटि: । पुं० वज्रे ।। शतं कोटयो धारा: कोणलक्षणा: यस्य स: ।। दशार्ब्बुदे । अब्जे । पद्मे ।।

शतक्रतु: । पुं० इन्द्रे ।। शतं क्रतवो यस्य स: ।।

शतखण्डम् । न० सुवर्णे ।। त्रि० शतभागे ।।

शतग्रन्थि: । स्त्री० दूर्व्वायाम् ।।

शतघ्नी । स्त्री० शिल्पविद्याप्रसिद्धशस्त्रविशेषे ।। प्राकाररक्षार्थं निर्म्मिते यन्त्रविशेषे । शतं हन्ति । हन० । अमनुष्यकर्त्तृके चेति टक् ।। ङीप् । लोहकण्टकसञ्छन्ना शतघ्नी महती शिलेति० विजयरक्षित: ।। वृश्चिकाल्याम् ।। करञ्जके ।। गलरोगविशेषे ।।

शतच्छन्दः । पुं॰ काष्ठकुट्टखगे । दार्व्वाघाटे ॥ शतंछदाश्चस्य ॥

शततमः । त्रि॰ शतस्य पूरणे । नित्यं शतादिमासार्द्धमाससंवत्सराच्चेति डट्तमडागमः ॥

शततारा । स्त्री॰ शतभिषायाम् ॥

शतदन्तिका स्त्री॰ नागदन्त्याम् ॥

शतद्रुः । स्त्री॰ सरिद्विशेषे । शतुद्री ॥ अस्या जलगुणा यथा । शतद्रौर्विपाशायुजः सिन्धुनद्याः सुशीतं लघु स्वादु सर्वामयघ्नम् । जलं निर्म्मलं दीपनं पाचनञ्च प्रदत्ते बलं बुद्धिमेधायुषञ्च । शतधा द्रवति । द्रुगतौ । हरिमितयोर्द्रुवः शते चेति कुः । मितद्र्वादित्वाड्डुर्वा ॥

शतधा ।)
शतधा ।) स्त्री॰ शतप्रकारे ॥ दूर्व्वायाम् ॥

शतधामा । पुं॰ विष्णौ ॥ शतमनन्तानि धामान्यस्य ॥

शतधारम् । न॰ पवौ । वज्रे ॥ शतं धाराः कोणलक्षणा यस्य सः । त्रि॰ शतधाराविशिष्टे ॥

शतधृतिः । पुं॰ इन्द्रे । शक्रे ॥ परमेष्ठिनि । स्रष्टरि ॥ दिवि । स्वर्गे ॥

शतपत्रः । पुं॰ मयूरे ॥ दार्व्वाघाटे ॥ सारसे ॥ राजकीरे ॥ नू । रीतात॰ इ॰ भा॰ न॰ कमले शतं पत्राण्यस्य ॥

शतपत्रकः । पुं॰ दार्व्वाघाटे । काष्ठकुट्टखगे ॥ शतं पत्राण्यस्य ॥

शतपत्रनिवासः । पुं॰ ब्रह्मणि ॥ त्रि॰ पद्मस्थे ॥

शतपत्रिका । स्त्री॰ शतपत्र्याम् । सेवन्त्याम् ॥

शतपत्री । स्त्री॰ सेवन्त्याम् । सेवती॰ इ॰ भा॰ ॥ पाटलवर्णासौ॰ गुलाब इ॰ प्रसिद्धा स्त्री॰ उभयोः पर्य्याया यथा । शतपत्री तरुण्युक्ता कर्णिका चारुकेशरा । महाकुमारी गन्धाढ्या लाक्षापुष्पातिमञ्जुला ॥ शतपत्री हिमा हृद्या ग्राहिणी शुक्रला लघुः । दोषत्रयास्रजिद्वर्ण्या तिक्ता कट्वी च पाचनी ॥

शतपथः । पुं॰ वेदैकदेशे ।

शतपथिकः । त्रि॰ शतपथाध्येतरि ॥ शतपथमधीते वेद वा । इकन् पदोत्तरपदात्॰ शतषष्टेः षिकन् पथः इति षिकन् ॥ षित्वात् स्त्री॰ शतपथिकी ॥

शतपद्चक्रम् । न॰ नामानक्षत्रज्ञानार्थचक्रे ॥ तद्यथा । चक्रं शतपदं वक्ष्ये॰ कृत्वां नाचरसम्भवम् । मामादिवर्णतो ज्ञेया अचराद्यं शकास्तथा ॥ तिर्य्यगूर्द्धगता रेखा रुद्रसङ्ख्या लिखेद्बुधः ॥ आयते कोष्ठका मा स्युः शतैकांनोपसंमय ॥ प॰ व॰ का॰ इ॰ ढौ रैवाच्यां॰

शतपदचक्रम्

म० ट० प० र० ता० इरिति० चाग्नेय्याम् । न० य० भ० ज० खा० नैऋत्यां० ग० स० द० च० ला० वायव्याम् ॥ पञ्चपञ्चक्रमेणैवं अवर्णान्प्रयोजयेत् । पञ्चस्वरसमायोगे एकैकं पञ्चधा कुरु ॥ अवर्णाद्या स्वरोज्झिताः सन्ध्यक्षरयुतास्तथा । सजातीयैक्यमाश्रित्य पञ्चस्वरविनिर्णय: ॥ ऋद्लृतोरप्यकारेण ग्रीम सम्परिग्रहः । कूर्वात्कुपु० भु० दु० ख्याभिधौ विचोक्ष्यक्षराविव ॥ कु० घ० ङ० छा० भवेत्स्तम्भो रौद्रे त्वीशानगोचरे । पु० ष० ण० ठा० भवेत्स्तम्भ हस्ते चाग्नेयसंज्ञके ॥ भु० ध० फ० ढा भवेत्स्तम्भ पूर्वाषाढे च नैऋते । दु० थ० झ० ञ० भवेत्स्तम्भो वायव्ये भाद्रउत्तरे एवं स्तम्भचतुष्कञ्च ज्ञातव्यं स्वरवेदिभिः । धिष्ण्यानि कृत्तिकादीनि प्रत्येकं चतुरक्षरैः ॥ साभिजित्यं शकास्तच्छतैकंद्वादशाधिकम् । यद्दर्णा शककोष्ठस्थ : क्रूर : सौम्योऽपि वा ग्रह : ॥ तत्रस्थो वेधयेत्सम्यक् पुंसो नामादिमाक्षरम् । सौम्यैर्विद्धं शुभं ज्ञेयमशुभं पापखेचरै : ॥ मिश्रैर्मिश्रफलं तत्र निर्वेधेन शुभाशुभम् । यदाच्यं सर्वतोभद्रे यदोपग्रहभेदत : ॥ शुभाशुभफलं सर्वं तद्दिहापि विचिन्तयेत् ॥ पञ्चस्वरा:० अ०

शतपदचक्रम्

इ० उ० ए० ओकारास्तैर्योगेधिष्ण्यानि मन्तथापि । अत्र चतुर्भिर्वर्णैरेकनक्षत्रं यथा । अ० इ० उ० ए० कृत्तिका । ओ० व० वि० वु० रोहिणी । वे० वो० क० कि० मृगशिर : । कु० घ० ङ० छ० आर्द्रा । के० को० ह० हि० पुनर्वसू । हु० हे० हो० ड० पुष्य: । डि० डु० डे० डो० श्लेषा । म० मि० मु० मे० मघा । मो० टा० टि० टु० पूर्वाफाल्गुनी । टे० टो० प० पि० उत्तराफाल्गुनी । पु० ष० ण० ठ० हस्त: । पे० पो० र० रि० चित्रा । रु० रे० रो० त० स्वाति । ति० तु० ते० तो० विशाखा । न० नि० नु० ने० अनुराधा । नो० य० यि० यु० ज्येष्ठा । ये० यो० भ० भि० मूलम । भु० ध० फ० ढ० पूर्वाषाढा । भे० भो० ज० जि० उत्तराषाढा । जु० जे० जो० ख अभिजित् । खि० खू० खे० खो० श्रवण: । ग० गि० गु० गे० धनिष्ठा । गो० श० शि० शु० शतभिषा । शे० शो० द० दि० पूर्वभाद्रपदा । दु० थ० झ० ञ० उत्तरभाद्रपदा । दे० दो० च० चि० रेवती । चु० चे० चो० ल० अश्विनी। लि० लु० ले० लो० भरणी । ऋ लृयुक्त : अकारयुक्तमक्ष

यः। क्रस्वेनदीर्घोवेयः। ताल
व्यशकारेणदन्त्यसकारोवेयः॥ इ
तिशतपदचक्रम्॥

शतपदी। स्त्री॰ कर्णजलौकायाम्॥
शतंपादायस्याः। कुम्भपदीषुचे
तिसाधुः॥ शतावर्य्याम्॥

शतपत्रम्। न॰ श्वेतकमले। पुण्ड
रीके॥

शतपर्व्वा। पुं॰ वंशे। इक्षुसारे।
शतंपर्व्वाण्यस्य॥ इक्षुविशेषे। शत
पोरके॥ यथा। शतपर्व्वभवेत्
किञ्चित्कोषकारगुणान्वितः। वि
शेषात्किञ्चिदुष्णश्चसक्षारः पवना
पहः॥

शतपर्व्वी। स्त्री॰ दूर्व्वायाम्॥ वचा
याम्॥ भार्गवभार्य्यायाम्॥ कोजा
गरपूर्णिमायाम्॥ कटुकायाम्॥
शतंपर्व्वाण्यस्याः। पाक्षिकः ङीष्
भावः॥

शतपर्व्विका। स्त्री॰ दूर्व्वायाम्॥ वचा
याम्॥ शतंपर्व्वाण्यस्याः। शेषा
द्विभाषेति कप्। यद्वा। शतंपर्व्वति।
पर्व्वपूरणे। ण्वुल्॥ यवे॥

शतपर्व्वेशः। पुं॰ शुक्रग्रहे॥ शत
पर्व्वायाईशः॥

शतपात्·द्। स्त्री॰ शतपद्याम्॥ श
तंपादाअस्याः॥ सङ्ख्यासुपूर्व्व
स्येतिसाधुः॥

शतपादिका। स्त्री॰ शतपद्याम्॥ का
कोल्याम्॥

शतपादी। स्त्री॰ शतपादिकायाम्॥

शतपुष्पा। स्त्री॰ सितच्छत्रायाम्।
अतिच्छत्रायाम्। मधुरायाम्।
सौंफ। इतिख्याता॥ इ॰भा॰प्र॰॥
अस्यागुणायथा। शतपुष्पालघुस्तीक्ष्ण
पित्तकृद्दीपनीकटुः। उष्णाज्वरानि
लश्लेष्मव्रणशूलाक्षिरोगहृत्॥ मिश्रे
यातद्गुणाप्रोक्ताविशेषाद्योनिशूलनु
त्। अग्निमान्द्यहरीहृद्याबद्धविट्क
मिशुक्रहृत्॥ रूक्षोष्णापाचनीकास
वमिश्लेष्मानिलान्हरेत्॥ अपि
च। एकैवाहं बहुरसास्वबासेनैव
वासिता। शतपुष्पावदत्येवं छत्रं दृष्ट्वा
जिगीषया॥ शतंपुष्पाण्यस्याः।
सङ्घकाण्डेतिटाप्॥

शतपुष्पिका। स्त्री॰ शतपुष्पायाम्॥

शतपोरकः। पुं॰ शतपर्व्वाख्येक्षु
विशेषे॥

शतप्रसूना। स्त्री॰ शतपुष्पायाम्॥

शतप्रासः। पुं॰ करवीरवृक्षे॥ श
तंप्रासाःपुष्पाण्यस्य॥ शतंपुष्पा
ण्यप्रास्यतेअस्य। असुक्षेपणे। कर्म्म
ण्यण्॥

शतबलिः। पुं॰ कपोताबूयपतिवि
शेषे॥

शतभिषक्। स्त्री॰ शतभिषानक्षत्रे
॥ वि॰ शतभिषजिजाते। बलमा
सितिजातार्थस्यलुक्। पक्षे:।

तभिषज् : । शतभिषापि ॥

शतभिषा । स्त्री० अश्विन्यादिषु चतुर्विंशे ॥ तत्र जातस्य फलं यथा । शीतभीर्विरतिसाहसी सदा निष्ठुरो ष्टचतुरोऽमरो भवेत् । वैरिणामतिशयोच्छिदाकरो वारुणोडु यदि यस्य सम्भवे ॥

शतभीरुः । स्त्री० मल्लिकायाम् । बेला·बेली·रायबेल· इ· च·भा· प्र· पुष्पे ॥ शतं बहवो वियोगिनो भीरवोऽस्याः ।

शतमखः । पुं० इन्द्रे । शचीपतौ ॥ शतं मखा यस्य ॥

शतमन्युः । पुं दिवस्पतौ ॥ इन्द्रे ॥ शतं मन्यवो यागा यस्य । शतेषु दैत्येषु मन्युः क्रोधोऽस्येति वा । शतं मन्यवो दैन्यान्यस्य वा । दैत्यैः पराजितत्वात् ॥

शतमानः पुं० दशरूप्यधरणेषु । विंशत्यधिकरत्तिकाशतत्रयपरिमाणे इत्यर्थः ॥ धरणानि दश ज्ञेयः शतमानस्तु राजत इति मनुः ॥

शतमार्जः । पुं० अस्त्रकारके ॥ इ· कस्वित् ॥

शतमूला । स्त्री० दूर्वायाम् ॥ वचायाम् ॥

शतमूलिका स्त्री० द्रवन्त्याम् । मूषिकपर्ण्याम् ॥

शतमूली । स्त्री० बहुसुतायाम् ।

शतावर्याम् ॥ शतं मूलान्यस्याः । पाककर्णेति ङीष् ॥

शतयष्टिकः । पुं० शतलतिकाहारे । देवच्छन्दे ॥

शतरुद्रियम् । न० हविरादौ ॥ शतं रुद्रा देवता अस्य । शतरुद्राद् घश्चेति घः ॥

शतरुद्रीयम् । न० शतरुद्रिये ॥ शतरुद्राद् घश्चेति चकाराच्छः । शतशब्दोऽनन्तवचनः ॥

शतरूपा । स्त्री० स्वायम्भुवमनोः पत्न्याम् ॥ ब्रह्मणः कन्यायाम्० पत्न्यास्येति मात्स्ये तृतीयोऽध्यायः ॥

शतलुम्पः ।)
शतलुम्पकः ।) पुं० किरातार्जुनीयकाव्यकर्त्तरि भारविकवौ ॥

शतवीर्या । स्त्री० श्वेतदूर्वायाम् ॥ शतं वीर्याण्यस्याः ॥ कपिलद्राक्षायाम् । शतावर्याम् ॥

शतवेधी । पुं० अम्लवेतसे ॥ शतं वेद्धुं शीलमस्य । विधविधाने । सुपीति णिनिः ॥

शतवेधिनी । स्त्री० चुक्रिकायाम् । चूकाख्यशाके ॥

शतव्रजः । पुं० अनन्तगतौ । अपरिमितगतौ ॥

शतसहस्रम् । न० शतगुणितसहस्रे । लक्षे ॥

शतसहस्रकम् । न० तीर्थविशेषे ॥

शतह्रदा । स्त्री० वज्रे ॥ विद्युति । सौदामिन्याम् ॥ शतं ह्रदाः ०प र्वाणि०अगाधजलाशयवा यस्याः । अच् ॥ शतं ह्रादाय स्याडुबिरा । पृषोदरादित्वात् सः ॥

शतांशः । त्रि० शततमेभागे । स ङ्ख्याशब्दस्यवृत्तिविषयेपूरणार्थत्व म् । यथा । तस्याश्रिताऽष्टांशेनया गङ्गासुरपूजिता । शतांशेन बतुल सीतेनविष्णोः प्रियासदेतिमत्स्य शतम्मम् । तथा : सुरायाङ्कतस स्वस्थ : ॥

शताक्षी स्त्री० पार्वत्याम् ॥ शत पुष्पायाम् ॥ रात्र्याम् ॥ शतम क्षीण्यस्याः । बहुव्रीहौ० अच् । ङीष् ।

शताङ्गः । पुं० युद्धार्थरथे । स्यन्दने ॥ शतमङ्गान्यवयवा यस्य सः । ति निशद्रुमे ॥

शतानकम् । न० रुद्राक्रीडे । श्म शाने ॥

शतानन्दः । पुं० मुनिविशेषे । गौतमस्यसुतेदेवकीनन्दने ॥ गौत ममुनौ ॥ जनकपुरोहिते ॥ ब्र ह्मणि । विष्णुरथे । शतमानन्दा अस्य एकएवपरानन्दउपाधिभेदा च्छतधाभिद्यते ॥ शतमनेके०अन्तः करणवृत्तिविशेषोपाधिव्यभिव्यज्य मानाआनन्दाअस्यपरमानन्दसिन्धौ र्ब्रह्मणवृत्तिरा ॥

शतानीकः । पुं० व्यासशिष्ये०मुनि विशेषे ॥ वृद्धे ॥ नृपविशेषे । जन मेजयपुत्रे ॥

शतायुः । त्रि० शतवर्षवयसि ॥ श तंवर्षाणामायुर्यस्य सः ॥

शतारम् । न० वज्रे ॥

शतारुषी ।) स्त्री०
शतारुः ।) न० कुष्ठभेदे ॥ रक्तांश्यावं सदाहार्त्ति शतारुः स्याद्बहुव्रणम् ॥

शतावरी । स्त्री० शतमूल्याम् । इन्दी वर्याम् ॥ अस्यागुणाः । शतावरी गुरुः शीतातिक्ता स्वाद्वीरसायनी । मेधाग्निपुष्टिदास्निग्धानेत्र्यागुल्मा तिसारजित् । शुक्रस्तन्यकरीबल्या वातपित्तास्रशोथजिदिति ॥ अस्या पाकोयथा । शतावरीमूलकल्कं कल्का त्क्षीरंचतुर्गुणम् । क्षीरतुल्यं घृतंग व्यंसितयाकल्कतुल्यया ॥ घृतशे षंपचेत्तन्तुपलार्द्धंलेहयेत्सदा । र क्तपित्तंत्वम्लपित्तंक्षयंश्वासस्वनाशये त्इतिलघुशतावरीपाकः ॥ शच्या म् । इन्द्राण्याम् ॥ शतेनाश्नोति । इञ्० । पचाद्यच् । गौरादिः ॥

शतावर्त्तः । पुं० विष्णौ ॥ शतमाव र्त्ताः प्रादुर्भावाअस्य ॥

शतावर्त्ती : । पुं० विष्णौ ॥

शताश्रिः । पुं० शतकोटौ ॥ वज्रे ॥

शताह्वा । स्त्री० शतपुष्पायाम् ।

शलफा० हु० गौ० भा० ॥ मधु रिकायाम् । अतिच्छत्रायाम् ॥

शतिकः । चि० शत्य ॥ शतेनक्रीतः० शतस्य विकारोऽवयवो वा । शतस्य निमित्तं संयोग उत्पातो वा ॥ क्रीतवत् परिमाणादित्यतिदेशात् ० शताच्च ठन्यतावशते इति ठन् ॥

शतेरः पुं० शचौ । हिंसायाम् ॥ शीयते । शद्लृ शातने । अदेस्तचेत्येरक् ॥

शत्यः । त्रि० शतिके ॥ शतिकवदिति शत्यन् ॥

शवि । पुं० कुञ्जरे हस्तिनि ॥ शीयते । शद्लृ । राशदिभ्यां त्रिप् ॥

शत्रुः । पुं० । स्वविषयान्तरावनिपे ॥ विषयानन्तरो राजा शत्रुः ॥ नि पातकारिणि । रिपौ । वैरिणि । सपत्ने । अरौ । अभिघातिनि ॥ शत्रुर्द्विधा । आभ्यन्तरो बाह्यश्च । आभ्यन्तरः कामक्रोधादिरूपः ॥ बाह्यश्च विघातादिकर्त्ता । यथा हुः । एकः शत्रुर्न द्वितीयोऽस्ति शत्रुरज्ञानतुल्यः पुरुषस्य राजन् । येनावृतः कुरुते कार्यमेषोऽराणि कर्म्माणि सुदारुणानीति ॥ लभ्यात् षष्ठस्थाने । शातयति । शद्लृ० । शवत्रुः । रुशातिभ्यां क्रुन् । ब हुलमन्यत्रापीति णिलुक् । प्रज्ञा दिपाठात् स्वार्थे अण् : ॥ शातयितरि । हन्तरि ॥ यथा । इन्द्रशत्रुः । इन्द्रस्य शत्रुर्हन्ता । इन्द्रः शत्रुर्हन्ता यस्येति बहुव्रीहिर्वा ॥

शत्रुघ्नः । पुं० सुमित्रातनये । श त्रुमर्द्दने । श्रीरामभ्रातरि ॥ श त्रून् हतवान् । हन० । मूलवि भुजादित्वात्कः ॥ यद्वा । शत्रून् हन्ति । अमनुष्यकर्त्तृकेऽपि चेत्यपि शब्दात् । कृतघ्नशत्रुघ्नादयः सिद्धा इति दुर्गसिंहः । पाणिनीयेऽपि० बहुलग्रहणाद्यथेष्टसिद्धिः । कृत्य ल्युटो बहुलम् ॥ त्रि० अरिघ्ने ॥

शत्रुघ्नजननी । स्त्री० सुमित्रायाम् ॥

शत्रुजित् । पुं० भूपविशेषे । कुव लयाश्वपितरि ॥ त्रि० वैरिजय कारिणि ॥ शत्रून् जयति अभिभव ति । जि० । क्विप् ० तुक् ॥

शत्रुञ्जयः । पुं० विमलाद्रौ ॥ हस्ति नि । शत्रुंजयति जि० । संज्ञायां भृतृवृजीतिखच् ॥ शत्रुजेतरि ॥

शत्रुता । स्त्री० शत्रुत्वे । वैरिभावे । तल् ॥

शत्रुन्तपः । त्रि० वैरितापकृति ॥

शत्रुमर्द्दनः । पुं० शत्रुघ्ने । त्रि० वैरि घ्ने ॥

शत्रुबलः । त्रि० शत्रुमति । शत्रु रस्त्यस्य । अन्येभ्योऽपि दृश्यत इति बलच् । असंज्ञात्वाद्बलच इति न दीर्घः

शत्रुहा । पुं० क्रूरकर्मणि वक्रौ ॥

शत्वरी । स्त्री० निशायाम् ॥
शद: । पुं० फलमूलादौ ॥ शदेरच् ॥
शद्रि: । पुं० पयोधरे । मेघे । जिष्णौ ॥ हस्तिनि ॥ खण्डे ॥ स्त्री० तडिति ॥ शीयतेऽस्यतेवा। शद्लृ० । अदिशदीतिक्रिन् ॥
शनकावलि: । स्त्री० गजपिप्पल्याम् ॥
शनकैः । अ० अत्वरायाम् । शनैरेव । अव्ययसर्वनाम्नामकच्प्राक्टेरित्यकच् ॥ स्वार्थमेवेत्यर्थे ॥
शनपर्णी । स्त्री० शसनपर्ण्याम् ॥ चटक्याम् ॥
शनि: । पुं० सप्तमग्रहे । सौरौ । शनैश्चरे । नीलवाससि । मन्दे । छायात्मजे ॥ कुब्जरे ॥
शनिगृहम् । न० मकरराशौ ॥ कुम्भराशौ ॥ शनेर्गृहम् ॥
शनिप्रसू: । स्त्री० छायायाम् । सूर्यपत्न्याम् ॥
शनिप्रियम् । न० नीलमणौ ॥
शनिवार: । पुं० शनिभोग्यसावनदिने ॥ तत्पु० । छन्दवालादोद्यवाल: ॥
शनैश्चर: । पुं० शनिग्रहे । शनैश्चरति० पचाद्यच् । चर० । अच् ॥ त्रि० मन्दगामिनि ॥
शनैः । अ० क्रियामान्द्ये । स्वैरे । अत्वरायाम् । अद्रुते । शनैश्चरे । शणति० । शाम्यतिवा । शणदा नै० शानतेर्वा। डैसुप्रत्यय: । पृषोदरादित्वात्० अस्यन: शब्दोवा
शन्तनु: । पुं० प्रतीपभूपतनये । महाभिषे ॥
शप: । पुं० शपथे । निर्भर्त्सने ॥
शपथ: । पुं० कारे ॥ आक्रोशे ॥ दिव्ये । समये । सुतादिभि: शपने ॥ शपन्ति शपथाक्रोशे । शीङ्शपिरुगमीश्चादिनाऽथप्रत्यय: ॥
शपनम् । न० शपथे ॥ शप० । ल्युट् ॥
शपमान: । त्रि० क्रोशति ॥ स्वरितेत्त्वादात्मनेपदम् ॥
शप्त: । त्रि० शापयस्ते । शप्यतेस्म । शप० । क्त: । पुं० उक्त० वृ० गौ० भा० प्र० तृणविशेषे ॥
शफ: । पुं० सुगन्धिद्रव्यविशेषे । नखी । कोलदले ॥ न० तरूणां मूले ॥ गवादीनां खुरे ॥ शंफवति । फवगतौ । अन्येभ्योऽपीति ड: । पृषोदरादि: ॥
शफर: । पुं० मत्स्यविशेषे । प्रोष्ठ्याम् । पुंठौ० वृ० गौ० दे० भा० प्र० शफंराति । रा० । आतोनु प्रेतिक: ॥
शफराधिप: । पुं० ढूलिशि० मत्स्ये । वारिकपूरे ॥ शफराणामधिप: ॥
शफरी । स्त्री० शफरे । प्रोष्ठ्याम् ॥ जातेरितिङीष् ॥

शबलः । पुं॰ एते । कर्बुरे । चित्रे । किर्मीरे । अमर॰ । च क्लीं शबलितकर्माम् । शप॰ शपेर्वश्चेति कलप्रत्ययो वत्वञ्च । पोःष्ठ्यमध्यः । त्रि॰ तद्वति ।

शब्दः । पुं॰ अक्षरे । यशसि । गीतौ । वाक्ये । खे । श्रवणे । ध्वनौ । इति हेमचन्द्रः । श्रोत्रग्राह्यगुणपदार्थविशेषः । अस्य पर्य्याययथा । शब्द॰ निनादनिनदध्वनिध्वानरवस्वनाः । स्वाननिर्घोषनिर्ह्रादनादनिस्वाननिस्वनाः । आरवारावसंरावविरावाः । इत्यमरः ॥ प्रयोगेणाभिज्वलितथाकाशदेशः शब्दः । स द्विविधः ध्वन्यात्मको॰ वर्णात्मकश्चेतिभेदात् । तथाहि । शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः । कण्ठसंयोगादिजन्या वर्णास्ते कादयो मताः ॥ सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते । वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्त्तिता । कदम्बगोलकन्यायादुत्पत्तिः कस्यचिन्मते । उत्पन्नः को विनष्टः क इतिबुद्धेरनित्यता ॥ सोयं क इति बुद्धिस्तु साजात्यमवलम्बते । तदेवौषधमित्यादौ सजातीयेऽपि दर्शनात् । इ॰ भा॰ प॰ शब्दं निरूपयति । शब्द इति । नभोवृत्तिराकाशसमवेतः । दूरस्थशब्दस्याऽग्रहणादाह । श्रोत्रोत्पन्न इति । ननु मृदङ्गाद्यवच्छेदेनोत्पन्ने शब्दे॰ श्रोत्रे कथमुत्पत्तिरत आह । वीचीतरङ्गन्यायेनेति । आद्यशब्दस्य बहिर्दशदिगवच्छिन्नोऽन्यः शब्दस्तेनैव शब्देन जन्यते॰ तेन चापरस्तद्व्यापकः एवं क्रमेण श्रोत्रोत्पन्नो गृह्यत इति कदम्बगोलकन्यायादिति । आद्यशब्दाद्दशदिक्षु॰ दश शब्दा उत्पद्यन्ते । ततश्चान्ये दश शब्दा उत्पद्यन्ते॰ इति भावः । अस्मिन् कल्पे गौरवादुक्तं कस्यचिन्मत इति । ननु शब्दस्यानित्यत्वादुत्पत्तिः कथमत॰ आह । उत्पन्नः क इति । शब्दानामुत्पादविनाशप्रत्ययशालित्वादनित्यत्वमित्यर्थः । ननु स एवायं ककार इत्यादिप्रत्यभिज्ञानाच्छब्दानां नित्यत्वम् । इत्थं चोत्पादविनाशबुद्धिर्भ्रमरूपा चेत्यत आह । सोयं क इति बुद्धिस्तु साजात्यमवलम्बते इत्यादि । तत्र प्रत्यभिज्ञाने तत्सजातीयत्वं विषयः । ननु तद्व्यक्त्यभेदो विषयः॰ उक्तप्रतीतिविरोधात् । इत्यत्र द्वयोरपि बुद्ध्योर्न भ्रमत्वमिति । ननु सजातीयत्वं सोयमिति प्रत्यभिज्ञायां भासते॰ इति कुत्र दृष्टमित्यत आह । तदेवेति । यदौषधं मया कृतं तदेवान्येनापि कृतमित्यर्

दिदर्शनादितिभावः इति मुक्तावली ॥ आप्तवाक्यं । आप्तश्रुतिराप्तवचनन्त्विति सांख्याः । आप्तवचनमिति लक्ष्यनिर्देशः । शेषं लक्षणम् । आप्ता प्राप्ता युक्तेति यावत् । आप्ता चासौ श्रुतिश्च आप्तश्रुतिः । श्रुतिः वाक्यजनितं वाक्यार्थविज्ञानम् । तच्च स्वतः प्रमाणम् । अपौरुषेयवेदजनितत्वेन सकलदोषाशङ्काविनिर्मुक्तं युक्तं भवति । एवं वेदमूलस्मृतीतिहासपुराणवाक्यजनितमपि ज्ञानं युक्तम् । आदिविदुषश्च कपिलस्य कल्पादौ कल्पान्तराधीतश्रुतिस्मरणसम्भवः । सुप्तप्रबुद्धस्येव पूर्वेद्युरवगतानामर्थानामन्येद्युः । तथा च आवट्यजैगीषव्ययोः संवादे भगवान् जैगीषव्यो दशमहाकल्पवर्त्तिजन्मस्मरणमात्मन उवाच । दशसु महाकल्पेषु परिवर्त्तमानेन मयेत्यादिना ग्रन्थसन्दर्भेण । आप्तग्रहणेन च अयुक्ताः शाक्यभिक्षुकनिर्ग्रन्थकसंसारमोचकादीनामागमाभासाः परिकृता भवन्ति । अयुक्तत्वञ्चैतेषां विगानाद्विच्छिन्नमूलत्वात् प्रमाणविरुद्धार्थाभिधानात् कैश्चिदेव म्लेच्छादिभिः पुरुषापसदैः पशुप्रायैः परिग्रहाद्बोद्धव्यम् । तुशब्देनानुमानाद्व्यवच्छिनत्ति । वाक्यार्थो हि प्रमेयः न तद्धर्मो वा

क्यं येन तल्लिङ्गं भवेत् । न च वाक्यं वाक्यार्थं बोधयत् सम्बन्धग्रहणमपेक्षते । अभिनवकविविरचितस्य वाक्यस्यादृष्टपूर्वस्याननुभूतचरवाक्यार्थबोधकत्वादिति । अध्ययनकार्यः शब्दः । शब्द इति शब्दजनितमर्थस्वरूपज्ञानमुपलक्षयति कार्ये कारणोपचारात् । सा द्वितीया सिद्धिः सुतारमुच्यते । तदिदं द्विधा श्रवणम् । अन्येभ्यः श्रवणं । यस्य सांख्यशास्त्रपाठमन्यदीयमाकर्ण्य तत्त्वज्ञानमुत्पद्यते सा सिद्धिः शब्दः शब्दपाठानन्तरं भावात् । इति सांख्याः ॥ आप्तोपदेशः शब्दः इति गौतमसूत्रम् । अस्यार्थः । शब्द इति लक्ष्यकथनं तदर्थः प्रमाणशब्द इति । आप्तोपदेश इति लक्षणम् । आप्तः प्रकृतवाक्यार्थयथार्थज्ञानवान् । तस्योपदेश इत्यर्थः । प्रकृतवाक्यार्थयथार्थज्ञानप्रयुक्तः शब्द इति फलितार्थः । अथवा । आप्तो यथार्थ उपदेशः शब्दबोधो यस्मात् तत् । शाब्दत्वञ्च जातिविशेषः । तथा च यथार्थशाब्दज्ञानकरणत्वमर्थः । अत्र च विशेष्यावच्छिन्नप्रकारकत्वे सति तत्प्रकारकत्वादि प्रमालक्षणमेकम् । लक्षणपरस्य लक्ष्यतावच्छेदकेनैव निवेशनीयमतो नाभेदः ॥ ७ ॥ विभजते । स द्विविधो दृष्टा

दृष्टार्थत्वात् । स प्रमाणशब्दः श
ब्दतदुपजीविप्रमाणातिरिक्तप्रमाण
गम्यार्थको दृष्टार्थकः । शब्दतदुपजी
विप्रमाणमात्रगम्यार्थकोऽदृष्टार्थकः
। तथाच दृष्टार्थकत्वादृष्टार्थकत्व
भेदात् प्रमाणशब्दस्य द्वैविध्यमित्य
र्थः ॥ ८ ॥ शप्यते । शप आक्रोशे
। शाशपिभ्यां ददनाविति दन् ॥ शा
स्त्रे शब्दस्तु वाचक इति । शास्त्रे
व्याकरणादिशास्त्रे वाचकः
साधुशब्दः एवं निरुपपदेन शब्दश
ब्देन व्यवह्रियते न ध्वनिर्न चापभ्रंशः
। स द्विविधो लौकिकवैदिकभेदात्
। तत्र गौरश्वः पुरुषो हस्ती शकुनि
र्मृगो ब्राह्मण इति लौकिकः । शन्नो
देवीरभीष्टये । इषे त्वोर्जे त्वा । अग्नि
मीळे पुरोहितम् । अग्न आयाहि वीत
य इति वैदिक इत्यर्थः ॥ वाक्यसन्द
र्भे ॥ अस्य प्रयोगविषयो यथा । म
हान् शब्दस्य प्रयोगविषयः । सप्त
द्वीपा वसुमती त्रयो लोकाश्चत्वारो वे
दाः साङ्गाः सरहस्या बहुधा भिन्नाः ।
एकशतमध्वर्युशाखाः । सहस्रवर्त्मा
सामवेदः । एकविंशतिधा बाह्वृच्य
म् । नवधाथर्वणो वेदः । वाकोवा
क्यम् । इतिहासः । पुराणम् । वै
द्यकमित्येतावच्छब्दस्य प्रयोगविषयः
। एतावन्तं शब्दस्य प्रयोगविषयमन
नुनिशम्य सन्त्यप्रयुक्ता इति वचनं केव

लं साहसमेव । एतस्मिंश्चातिमहति
शब्दस्य प्रयोगविषये ते ते शब्दास्तत्र तत्र
नियतविषया दृश्यन्ते । तद्यथा ।
शवतिर्गतिकर्मा कम्बोजेष्वेव भाषि
तो भवति । विकार एवैनमार्या भाष
न्ते शव इति । हम्मतिः सुराष्ट्रेषु
रंहतिः । प्राच्यमध्येषु गमिमेव
त्वार्याः प्रयुञ्जते । दातिर्लवनार्थे
प्राच्येषु दात्रमुदीच्येषु । इति महा
भाष्यम् । शवतेर्मृतावस्था विका
रस्य चेत्यर्थः ॥ इति कैयटः ॥ श
ब्दश्चतुर्विधः । जातिगुणक्रियायदृ
च्छाशब्दभेदात् । तत्र जातिशब्दो य
था गौरश्वः पुरुषो हस्ती शकुनिर्ब्राह्म
ण इत्यादिः । गुणशब्दो नीलो हरित
इत्यादिः । क्रियाशब्दः पचति प
ठति गच्छतीत्यादिः । यदृच्छाशब्दो
डित्थो डवित्थश्चाश्वत्थो बालस्वस्त
स्वेत्यादिः ॥

शब्दकोषः । पुं॰ शब्दसमूहे ॥ शब्दा
नां कोषोऽर्थसमूहः शब्दकोषः ॥

शब्दग्रहः । पुं॰ कर्णे ॥ शब्दो गृह्यते
ऽनेन । ग्रहवृदृनिश्चिगमश्चेत्यप् ॥

शब्दनः । त्रि॰ शब्दकारके । रवणे ॥
शब्दयतितच्छीलः । शब्दशब्दक्रि
यायाम् । चलनशब्दार्थादितियुच् ॥

शब्दब्रह्म । न॰ वेदे ॥

शब्दभावना । स्त्री॰ शाब्दीभावनाया
म् ॥ शब्दस्य भावना ॥ प्रेरणाधर्मकः

शब्दव्यापारः स्वज्ञानकरणकः स्तुत्यादिज्ञानेतिकर्त्तव्यताकः पुरुषप्रयत्नभाष्यमिष्टः शब्दभावनोच्यते ॥

शब्दभेदी । पुं॰ अर्जुने । तृतीयपाण्डवे ॥ भेदनं भेदः । सोऽस्यास्तीति भेदी । शब्दस्य भेदी, बाणविशेषे । इ॰ रामायणम् ॥

शब्दयन् । त्रि॰ व्याहरति ॥ शब्दशब्दात् तत्करोतीति ण्यन्तात् लटः शतृप्रत्ययः । स्त्री॰ ङीप् ॥

शब्दयोनिः । पुं॰ भ्वेधस्पर्द्धादिधातुषु ॥ शब्दस्य नाम्नो योनिः ॥

शब्दवृत्तिः । स्त्री॰ शब्दप्रवृत्तौ ॥ सा च चतुर्विधा यथा । तत्स्थतत्समताभ्यां तत्समीपतयापि च । तस्माच्चार्थाच्छब्दानां वृत्तिरुक्ता चतुर्विधा ॥ सा च॰ मुख्यलक्षणागौणभेदेन॰ त्रिधा । मुख्यापि रूढियोगभेदेन द्विधा रूढिस्वरूपेण जात्या गुणेन वा निर्देशार्हे वस्तुनि॰ संज्ञासंज्ञिसङ्केतेन॰ प्रवर्त्तते । यथा॰ डित्थः डवित्थः॰ गौः शुक्ल इति । लक्षणा च तेनैव सङ्केतेनाभिहितार्थसम्बन्धिनि । यथा गङ्गायां घोष इति । गौणी च॰ अभिहितार्थलक्षितगुणयुक्ते तत्सदृशे । यथा॰ सिंहो देवदत्त इति । योगवृत्तिस्तु॰ एतत्त्रिविधवृत्तिप्रतिपादितपदार्थयोः प्रकृतिप्रत्ययार्थयोर्योगेन । यथा॰ पङ्कजम्॰ औपगवः॰ पाचक इत्यादि॰ ॥

शब्दवेधी । पुं॰ अर्जुने ॥ दशरथे ॥

शब्दस्मृतिः । स्त्री॰ व्याकरणे ।

शब्दहेतुः । पुं॰ यष्ट्यादिषु । यथा । यष्टीगुणक्रियाजातिरूढयः शब्दहेतवः । गोमान्नीलोत्पलञ्चैव पाचको घट एव च ॥ आकाश इति शब्दानां तत्तदर्थप्रवर्त्तकाः ॥

शब्दाधिष्ठानम् । न॰ कर्णे ॥

शब्दानुशासनम् । न॰ प्रकृत्यादिविभागेन शब्दव्युत्पादने ॥ उक्तञ्च यथा । विविक्ताः साधवः शब्दाः प्रकृत्यादिविभागतः । ज्ञाप्यन्ते येन तच्छास्त्रमत्र शब्दानुशासनमिति ॥ व्याकरणस्येदमन्वर्थं नाम शब्दानुशासनमिति ॥

शब्दार्थः । पुं॰ शब्दजन्यज्ञानविषये । वस्त्वाकृतौ ॥ शब्दस्यार्थः ॥ यत्परः शब्दः स शब्दार्थ इति मीमांसकाः ॥ संयोगो विप्रयोगश्च साहचर्यं विरोधिता । अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥ सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः । शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥

शब्दितम् । त्रि॰ भाषिते ॥ गीते ॥ प्रतिपादिते ॥ शब्दसंशब्दने चौरादिकः । कर्मणि क्तः ॥

शम् । अ॰ कल्याणे ॥ सुखे ॥ शास्त्रे

शमः । पुं॰ शान्तौ । विषयेभ्य इन्द्रियोपरतौ ॥ मोक्षे ॥ अन्तरिन्द्रियनिग

षे । चान्तःकरणोपरमे ॥ मनोनैश्चल्ये ॥ मनःप्रसादे ॥ चान्तःकरणस्य विषयेभ्यो निवृत्तौ ॥ अथवा इन्द्रियातिरिक्तविषयेभ्यो मनसो निवर्त्तने ॥ उपशान्तौ ॥ सर्वकर्मसंन्यासे ॥ सदैववासनात्यागः शमोयमिति शब्दितः ॥ शमनम् । शम उपशमे । भावे घञ् ॥ नोदात्तोपदेशेति वृद्ध्यभावः ॥ शान्तिरसे ॥ शाम्यतेऽनेनेति व्याख्यानात् ॥ पाणौ । शये । हस्ते ॥ शाम्यति कण्डूमनेनेन । हलश्चेति घञ् ॥ उपचारे । चिकित्सायाम् ॥

शमकः । त्रि॰ शान्तिकारके ॥

शमथः । त्रि॰ शान्तौ । मन्त्रिणि ॥ शमनम् । शम॰ । शमादिभ्योऽथच् ॥ शाम्यतिवा । बाहुलकादथप्रत्ययः ॥

शमनः । पुं॰ यमराजे । यमे । श्राद्धदेवे । अन्तके । पितृपतौ ॥ मृगविशेषे ॥ कलापे ॥ न॰ शान्तौ ॥ वधे । हिंसायाम् ॥ परम्पराके । प्रोक्षणे । यज्ञार्थपशुहनने ॥ चर्वणे ॥ शमयति । शम॰ । णिजन्तात् ल्युः । भावे ल्युट् वा ॥

शमनस्वसा । स्त्री॰ कालिन्द्याम् । यमुनायाम् ॥ शमनस्य स्वसा ॥

शमनी । स्त्री॰ उन्मूलिन्याम् ॥

शमनीषदः । पुं॰ निशाचरे । राक्ष

से ॥

शमपरा । स्त्री॰ तीर्थप्रभेदे ॥

शमयिता । त्रि॰ विनाशके ॥

शमलः । पुं॰ अपराधे ॥ न॰ विष्ठायाम् ॥ शम्यते । शाम्यति वा । शम॰ । शकिशम्योर्नित् इति कलः ॥

शमसुखम् । न॰ शान्त्यानन्दे ॥

शमादिषट्कम् । न॰ शमदमोपरतितितिक्षासमाधानश्रद्धाः ॥ शमादीनां षट्कम् ॥

शमान्तकः । पुं॰ कामदेवे ॥ बू॰ त्रि॰ शेषः ॥

शमिः । स्त्री॰ शिम्बायाम् ॥ शाम्यति । शम॰ । सर्वधातुभ्य इन् ॥

शमितः । त्रि॰ शान्ते । शीतोष्णसहने ॥ शम्यते स्म । शम॰ । क्तः । वादान्तशान्तेति पक्षे साधुः ॥ विनाशिते ॥ निर्वापिते ॥

शमी । त्रि॰ शान्ते ॥

शमिरः । पुं॰ शमीवृक्षे ॥

शमी । स्त्री॰ सक्तुफलायाम् । शिम्बायाम् । छोंकरा॰ जाटी॰ इ॰ भा॰ प्र॰ वृक्षे ॥ अस्याः गुणा यथा । शमी तिक्ता कटुः शीता कषाया रेचनी लघुः । कम्पकासज्वरश्वासकुष्ठार्शः कृमिजित् स्मृता ॥ शिम्बिकायाम् ॥ वल्ल्याम् ॥ शाम्यति । शम॰ । अच् । गौरादिः ॥ यद्वा । शमयति रोगान् । शमेरजन्तान्ङी

ष् ॥
शमीकः । पुं॰ मुनिविशेषे ॥ शाम्यति । शम॰ । अलीकादित्वादीकन् ॥
शमीगर्भः । पुं॰ ब्राह्मणे ॥ अग्नौ ॥
शमीजः । पुं॰ शमीधान्ये ॥
शमीधान्यम् । न॰ वैदले । माषादौ । यथा । मुद्गामसूराजमाषः कुलत्थश्चणकस्तिलः । काकाण्डाचौवरस्तु तिशमीधान्यगणः स्मृतः ॥ शम्याधान्यम् ॥
शमीपत्रा । स्त्री॰ खदिरिकायाम् । लज्जालौ । शमीपत्रसदृशानि पत्राण्यस्याः सा ॥
शमीफलम् । न॰ शम्याः फले । सागर॰ सैगर॰ इ॰ भा॰ प्र॰ । यथा । शमीफलं कोमलबीजसम्मितं तमोदके स्वेदितमेवकेवलम् । प्रलेहयोगेविधिना विपाचितं सराजिकं वाद्दधिसैन्धवान्वितम् ॥ शमीफलं लघु स्वादु कुष्ठार्शः कफहृत्सरम् । सुरुच्यं फलं रूक्षं मेध्यं पापविनाशनम् ॥
शमीरः । पुं॰ अल्पायां शम्याम् । हूस्वा शमीत्यर्थे॰ कुटीशमीशुण्डाभ्यो रः ॥
शम्पा । स्त्री॰ शतह्रदायाम् । विद्युति ॥ भयङ्करत्वात्॰ शं सुखं पिबति । पा॰ । आतोऽनुपसर्गे कः । टाप् ॥
शम्पाकः । पुं॰ आरग्वधे । चतुरङ्गुलि ॥ शं कल्याणं पाकोऽस्य ॥ विपाके ष् ॥

॥ पावके ॥
शम्पातः । पुं॰ आरग्वधे ॥
शम्बः । पुं॰ शंवे । मुसलाग्रस्थलोहमण्डलके ॥ लोहकाञ्च्याम् । पवौ ॥ शम्बसम्बअगे॰ चुरादिः । शम्बयतिसम्बाऽतिशम्बून् इतिबिधाद्वै पवर्गतृतीयः । अच् ॥ प्रतिलोमे । द्वितीयकर्षणे ॥ यथा । शम्बाकरोति॰ अनुलोमं कृष्टं क्षेत्रं प्रतिलोमं कर्षतीत्यर्थः ॥ कृञो द्वितीयेतिडाच् ॥ त्रि॰ शुभान्विते ॥ शमस्यास्ति । कंशम्भ्यामिति बः ॥ यद्वा । शाम्यति । शम॰ । शमेर्बन् ॥ दन्त्यः स्थ : चोष्ठ्यवानपि ॥
शम्बरः । पुं॰ गवयाम्बरतिमृगविशेषे । सामर॰ इ॰ भा॰ प्र॰ ॥ अस्य मांसगुणाः । शम्बरस्यापलं स्निग्धं शीतलं गुरु बृंहितम् । रसे पाके च मधुरं कफहृन्मांसपित्तहृत् ॥ दैत्यविशेषे ॥ मत्स्यप्रभेदे ॥ गिरिविशेषे ॥ शं वृणोति । वृञ॰ । पचाद्यच् ॥ शंबसंवरणं रातिवा । कः ॥ शंवयति । बाहुलकादरन्निति वा । शमिधातोः संज्ञायामित्युज्ज्वा ॥ न॰ सलिले । जले ॥ चित्रे । बौद्धव्रतविशेषे ॥
शम्बरकन्दः । पुं॰ वाराहीकन्दे ॥
शम्बरचन्दनम् । न॰ चन्दनविशेषे । कैरातैबहुलगन्धे ॥
शम्बरविद्या । स्त्री॰ मायायाम् । श

म्बरस्यदैत्यविशेषस्यविद्या ॥

शम्बरसूदन: । पुं॰ मदने । कामदेवे ॥ शम्बरंदैत्यविशेषं॰सूदितवान्॰ सूदयतिवा । सूद॰ । नन्द्यादित्वाल्ल्यु: ॥

शम्बरारि: । पुं॰ मनसिजे । कामे ॥ शम्बरस्यदैत्यविशेषस्य॰ब्रतविशेस्यवा॰अरि: शत्रु: ॥

शम्बरी । स्त्री॰ आखुपर्ण्याम् ॥ मायायाम् ॥ शंवृणोति । वृञ्॰ । शमि धातोरित्यच् । गौरादि: ॥

शम्बल: । पुं॰ न॰ कूले । तटे ॥ पाथेये ॥ मत्सरे ॥ शम्बयति । शम्ब॰ । बाहुलकात्कल: ॥

शम्बली । स्त्री॰ कुट्टन्याम् ॥ शंसुखं॰ बलते॰ बलतिवा ; बलसंवरणे॰ बलप्राणनेवा । पचाद्यच् । गौरादि: ॥

शम्बाकृतम् । त्रि॰ द्विवारकृष्टक्षेत्रे । द्वितीयाकृते ॥ शमस्यास्ति । शं शम्बामितिव: । शंशब्दोद्वितीयकर्षणेवर्त्तते । शंकृ॰ वं कृतम् । कृञोद्वितीयतृतीयशंबबीजात्कृषाविति डाच् ॥ यथा । शंब शब्द: प्रतिलोमे । अनुलोमेनकृष्टंक्षेत्रंपुन: प्रतिलोमेनकृष्टमित्यर्थ: ॥

शम्बु: पुं॰ शम्बूके ॥ यथा । शम्बूक: शम्बुकोऽप्यय: पूर्व: का

नस्तुसर्वदा । ककारेणविनाशेषा दृश्यतेऽन्यविस्तरे ॥ इतिहट्टचन्द्र: ॥

शम्बुक । पुं॰ शम्बूके ॥ शमेर्बहुलकादुकप्रत्ययोबुगागमश्च ॥ शम्बूकमपिशम्बुकमितिद्विरूपकोष: ॥

शम्बुक: पुं॰ जलशुक्तौ ॥

शम्बूक: । पुं॰ गजकुम्भान्ते । जलशुक्तिकायाम् ॥ शूद्रतापसे ॥ जलजन्तुविशेषे ॥ दैत्यविशेषे ॥ शङ्खे ॥ शाम्यति । शम॰ । उलूकादयश्चेत्यूकोबुकच ॥ क्षुद्रशङ्खे ॥

शम्बूकपुष्पी । स्त्री॰ शङ्खपुष्प्याम् ॥

शम्बूका । स्त्री॰ जलशुक्तौ ॥

शम्भल: । पुं॰ ग्रामविशेषे ॥ तत्रचाष्टतीर्थानिसन्ति॰कल्कीचाविर्भूय सहस्रंसमा: स्थास्यति ॥

शम्भली । स्त्री॰ कुट्टन्याम् ॥ शंसुखंभलते । भलपरिभाषणे । पचाद्यच् । गौरादि: ॥

शम्भु: । पुं॰ महादेवे । ईशे । शिवे ॥ परमेष्ठिनि । ब्रह्मणि ॥ विष्णौ ॥ सिद्धे ॥ अर्हति ॥ श्वेतार्कपादपे ॥ शंसुखंभवति॰ भावयति भू॰ । मितद्र्वादित्वाड्डु: ॥ यद्वा । शंभवत्यस्मात् । भूसत्तायाम् । भूप्राप्तौवा । बाहुलकादपादानेपि॰ मितद्र्वादि

त्वाङ्गः । वर्णवृत्तविशेषे ॥ यथा ।
कुरुपाणिपङ्कजयुग्मालङ्कृतमयि रत्नं
शारं त्वम् • चरणं सन्नूपुरसंयुक्तं कु
रु कर्णे राजत्ताटङ्कम् । रसनामा
योजय मञ्जीरद्वयमेव शम्भुं संहृत्वम्
• भुविकान्तं गौरि चिरं सम्भावय तन्वा
गाधीशेनोक्तम् ॥ यथा । जयमावामा
नवमूर्त्तिदानवं शब्दं सव्यापारौ •
वलमायोद्रावणहृत्याकारवलङ्का
लक्ष्मीसंहारी । कृतकं सध्वंसनध
र्माशं सनगोगोपीगोपानन्दी • वलि
लक्ष्मीशासनलीलावामनदैत्यश्रे
णीनिष्कन्दी ॥

शम्भुतनयः । पुं • कार्त्तिकेये ॥ ग
णेशे ॥

शम्भुतिथिः । स्त्री • चतुर्द्दश्याम् ॥

शम्भुनन्दनः । पुं • कार्त्तिकेये ॥
गणेशे ॥ शम्भोर्नन्दनः ॥

शम्भुप्रिया । स्त्री • गौर्य्याम् ॥ आम
लक्याम् । शम्भोः प्रिया ॥

शम्भुवल्लभम् । न • श्वेतपद्मे ॥
त्रि • शिवप्रिये ॥

शम्या । स्त्री • युगकीलके ॥ शम्य
तेऽनया । शम • अघ्न्यादिः ॥
यज्ञाङ्गभेदे शूलाकारे काष्ठविशेषे ॥
दक्षिणहस्तपृष्ठीततालविशेषे ॥ य
ष्ट्याम् ॥ यथा । धनुः शतंपरी
णाहोऽस्या मस्यात्समन्ततः । श
म्यापाताप्तयो वापि • त्रिगुणोनग

रस्तु ॥ अथ शम्यायष्टिरिति कुल्लू
कभट्टः ॥

शम्याक्षेपः । पुं • भ्रमितक्षिप्तयष्टि
प्राप्तयावत्भूप्रदेशे । शम्यापाते ॥

शम्यापातः । पुं • शम्याक्षेपे ॥ य
था । भ्रामयित्वा बहुशो यष्टिः क्षि
प्ता सम्प्रयात् । भुवः प्रदेशं याव
न्तं शम्यापातः स उच्यते ॥

शम्याप्रासः । पुं • व्यासाश्रमे । य
था । ब्रह्मनद्यां सरस्वत्यामाश्रमः
पश्चिमे तटे । शम्याप्रास इति प्रोक्त
ऋषीणां सत्रवर्द्धन इति ॥

शयः । पुं • शय्यायाम् ॥ पन्नगा
ख्ये । पाणौ । शेतेऽस्मिन् सर्वम् ।
शीङ् स्वप्ने । पुंसीति घः ॥ अर्शौ
॥ निद्रायाम् । पणे ॥

शयण्डः । पुं • निद्रालौ । शयालौ ॥

शयथः । पुं • अजगरे ॥ निद्रालौ ।
मरणे ॥ शेते । शीङ् शपिरुग
मिवञ्चिजीविप्राणिभ्योऽथः । म
त्स्ये । वराहे ॥

शयनम् । न • शय्यायाम् ॥ निद्रा
याम् ॥ करणानामुपशमे ॥ सुर
ते । मैथुने ॥ शीङो भावे ल्युट्
॥ शय्यतेऽत्र । अधिकरणे ल्युड्वा
॥ शयने विशेषो यथा । श्वासान
ष्टौ समुत्तानस्तान्मृद्विः १६ पार्श्वे
तद्दक्षिणे । ततस्तु द्विगुणान् ३२
वामे • पश्चात्स्वप्याद्यथासुखम् वा ॥

मद्दिशायामनन्तोनाभेरूर्द्ध्वास्तिवन्तू नाम् । तस्मात्तु वामपार्श्वे शयीत भुक्तप्रपाकार्थम् ॥

शयनासनम् । न० शयनपट्टे । आस्य ते ऽस्मिन् । आस० । करणाधिकरणयोरिति ल्युट् । शयनस्यासनम् ॥

शयनीयम् । न० शय्यायाम् ॥ शेते० शय्यते ऽनया । कृत्यल्युटो बहुलमधिकरणे शीङो ऽनीयर् । त्रि० शयनयोग्ये ॥

शयनीयकम् । न० शय्यायाम् ॥

शयान : । त्रि० शय्यानिहिताङ्गे । शय्यायां सुप्ते । शयाना भुञ्जते यवना : । भुजिक्रियायाः शयनं लक्षणम् । लक्षणहेत्वोः क्रियाया इति लटः शानच् । निद्राकृते ॥ शयानं न प्रबोधयेत् ॥ विश्रान्ते ॥

शयानक : । पुं० अजगरे ॥ कृकलासे ॥ शेते । आनक : शीङ्भियः ॥

शयालु : । पुं० वाहसे । अजगरे । कुक्कुरे । शुनि । मृतकान्तके । शृगाले । सियाल० सयाल० इ० भा० प्र० । त्रि० निद्रालौ । स्वप्नजि । निद्रालु० इ० भा० प्र० । शयनशीलः । शीङो वाच्यङ्यालुच् ।

शयित : । पुं० शेलौ । श्लेष्मान्तके । वसन्तकुसुमे । त्रि० निद्रिते । निद्राणे । शेतेस्म । शीङ० । अकर्मकत्वात्कर्त्तरि क्त : । निष्ठाशीङिति न कित्त्वम् । स्थिते ॥

शयितवान् । त्रि० निद्रिते ॥ शेतेस्म । शीङो ऽकर्मकत्वात्कर्त्तरि क्तवतुः । निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषइति न कित्त्वम् ॥

शयिता । त्रि० शयनकर्त्तरि ॥

शयु : । पुं० वाहसे । अजगरे ॥ शेते । भृ० मृ० शी० तृ० चरि० तनि० धनि० मि० मस्जिभ्य उः ॥

शयुन : । पुं० अजगरे ॥ शेते ऽत्यर्थम् । अजि० यमि० शीङ्भ्यश्चेति शीङ उनम् ॥

शय्या । स्त्री० शयनीये । तूलिकाद्यास्तरणविशेषे ॥ शय्यते ऽत्र० शेते ऽस्यां वा । संज्ञायां समजेति शीङः क्यप् । अयङ् यि क्ङितीति शीङो ऽयङादेशः । खट्वादौ । गुम्फने । शब्दगुम्फे ॥

शय्याजन्तु : । पुं० मत्कुणे ॥

शर : । पुं० तेजनके । गुन्द्रे ॥ बाणे । काण्डे ॥ दध्यग्रे । दधिसारे ॥ न० सलिले । नीरे । जले ॥ शृणाति० अनेनवा । शृ हिंसायाम् । अच्० ऋदोरप्वा ॥

शरजम् । न० हैयङ्गवीनं ॥

शरजन्मा । पुं० षडानने । स्कन्दे ॥ शरेषु जन्मास्य ॥

शरट : । पुं० सरटे ॥ शृणाति : शकादिभ्यो ऽटन् ॥ कुसुम्भशाके ।

शरणम्। न॰ गृहे। रक्षितरि। वधे॥ रक्षणे॥ भीर्यैर्दु: समस्मिन्निति व्युत्पत्त्या प्रपन्नानामार्त्तिहृति। यथा। शरणं नहि मम जननी न पिता न सुता न सोदरा नान्ये। परमशरणमिदमेव चरणं मम मूर्द्ध्नि देशिकन्यस्तमिति॥ आश्रये॥ घातकी॥ शृणाति। शृ हिंसायाम्। ल्युट्॰ भावे वा॥

शरणद:। पुं॰ रक्षणदातरि॰ ईश्वरे। त्रि॰ शरणदातरि॥

शरणा। स्त्री॰ प्रसारण्याम्॥

शरणागत:। त्रि॰ आश्रिते। शरणापन्ने। शरणार्थिनि॥ शरणे आगत:॥ शास्त्रे पुनिष्कृतिर्दृष्टा महापातकिनामपि। शरणागतहन्तुस्तु न दृष्टा निष्कृति: क्वचित्॥ शरणागतमार्त्तं यस्त्यजति नराधम:। स एव नरकं याति यावदाहूतसंप्लवम्॥

शरणागति:। स्त्री॰ शरणागमने॥ सा च षड्विधा यथा। आनुकूल्यस्य संकल्प: प्रातिकूल्यस्य वर्जनम्। रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा॥ आत्मनिक्षेपकार्पण्ये षड्विधा शरणागति:॥

शरणार्थी। त्रि॰ शरणागते। अनुगते॥

शरणापन्न:। पुं॰ शरणापन्ने। स्मारणीविनि॥

शरणि:। स्त्री॰ पथि॥ शृ॰। बाहुलकादनि:॥ आवलौ॥ शरणिं हिंसामिति वेदभाष्यम्॥ पृथ्व्याम्॥

शरणी। स्त्री॰ पथि॥ प्रसारण्याम्॥ जयन्त्याम्। जयाह्वे॥

शरण्ड:। पुं॰ धूर्त्ते॥ सरटे॥ भूषणान्तरे॥ पक्षिणि॥ कामुके॥ चतुष्पदे॥

शरण्य:। त्रि॰ आर्त्तस्य रक्षितरि। त्रातरि॥ शरणे रक्षणे साधु:। तत्र साधुरिति यत्॥ शृणाति भयं वा। शृ॰। शॄस्वृस्निहीत्यन्य:॥ शरणमिव वा। शाखादिभ्यो य:॥

शरण्या। स्त्री॰ शरणदायिन्याम्। दुर्गायाम्॥ यथा। विपन्निभयघोरेषु शरण्या शरणाश्रित:। शरण्येति नसादेवी मुनिभि: परिकीर्त्तिता॥

शरण्यु:। पुं॰ वारिदे॥ वाते॥

शरत्तृणम्। न॰ तृणप्रभेदे॥

शरत्कामी। पुं॰ कुक्कुरे॥

शरत्पद्मम्। न॰ सिताम्बुजे॥

शरत्पर्व। न॰ दुर्गोत्सवे। कोजागरे॥

शरत्पुष्पम्। न॰ आकुल्यं॰ क्षुपे। हलरास्ये। तगरे। सिन्धीफले। सुपुष्पे। पीतपुष्पे। काश्मीरे तरवटनामप्रसिद्धे। शारदपुष्पमात्रे॥

शरत्·द् । स्त्री· हायने । संवत्सरे । वर्षे ॥ शृणाति भावान् । शॄहिंसायाम् । शॄदृभसोऽदिः ॥ ऋतुविशेषे । आश्विनकार्त्तिकयोः ॥ वर्षावसाने ॥ शीर्य्यतेऽस्यां पाकिनो यवयः । पूर्ववदृदिः ॥ तज्जातस्य फलं यथा । नरः शरत्संज्ञकालजन्मा भवेत् सुकर्मा मनुजस्तरस्वी । शुचिः सुशीलो गुणवान् सुमानी धनान्वितो राजकुलप्रपन्नः ॥

शरदः । त्रि· शरवर्षिणि ॥ शरं ददातीति । डुदाञ्· । आतङ्कतिकः ॥

शरदन्तः । पुं· हेमन्ते ॥ शरदोऽन्तोऽस्मिन् ॥

शरदा । स्त्री· सम्वत्सरे ॥ शरदृतौ ॥ शरदो भागुरिमतेटाप् ॥

शरदिजः । त्रि· शरत्कालजाते ॥

शरदुदाशयम् । न· शरत्कालिकेसरोवरे ॥

शरधिः । पुं· तूणे । तूणीरे ॥ शरा धीयन्तेऽस्मिन् । डुधाञ्· । उपसर्गे घोः किः । कित्वादाकारलोपः ॥

शरपर्णी । स्त्री· ओषधिविशेषे ॥

शरपुङ्खः । पुं· शोहवणी । सरफोंका· इ·भा·प्र· ओषधौ ॥ अस्यगुणा यथा । शरपुङ्खो यकृत्प्लीहगुल्मव्रणविषापहः । तिक्तः कषायः कासास्रज्वरश्वासहरो लघुः ॥

शरभः । पुं· मृगेन्द्रविशेषे । महामृगे । अष्टापदे । महासिंहे । पर्वताश्रये ॥ अस्यलक्षणं यथा महाभारते । अष्टपादूर्द्ध्वनयनऊर्द्ध्वपादचतुष्टयः । सिंहहन्तुं समायातिशरभोवनगोचरइति ॥ शृणाति । शॄ· । कॄशॄशलिकलिगर्द्दिभ्योऽभच् ॥ करभे उष्ट्रे । वानरविशेषे ॥ हरौ । विष्णौ ॥ शीर्य्यन्तइति । शराः शरीराणि· शीर्य्यमाणत्वात्· तेषु प्रत्यगात्मतया भाति । भादीप्तौ । आतङ्कतिकः ॥ पतङ्गे ॥ वर्णवृत्तविशेषे ॥ यथा । द्विजवरतिलककलितमिहसगणं कलयशरभमिदमलिसुपुष्करणम् । कविवरसकलहृदयकृतहरणं फणिवरनरपतिवदनविहरणम् ॥ अत्रहि जवरशब्दश्चतुष्कलगणपञ्चमरूपवाचकस्तद्रूपम्चतुर्लघुतेषां तल्लकेन चितयेनकलितं द्वादशलघुभिरितियावत् ॥ यथा । सकलकमलदलरुचिधरनयनः अखिलजलनिधिफणिपतिफणशयनः । दनुजविजयसुरपतिनतिमुदितोहरिरपहरतु दुरिततति मुदितः ॥

शरभङ्गः । पुं· गौतमवंशजे । रामायणप्रसिद्धे । मुनिविशेषे ॥

शरभङ्गाश्रमः । पुं· तीर्थविशेषे ॥

शरभूः । पुं· पार्वतीनन्दने । स्कन्दे ॥

शरभूमिजः । पुं· गन्धर्वे ॥

शरमयः । त्रि० शरनिर्मिते ॥

शरमल्लः । पुं० खगविशेषे । गृध्र लक्ष्मे ॥

शरलकम् । न० जले ॥

शरवणोद्भवः । पुं० स्कन्दे ॥

शरवाणिः । पुं० शरमुखे । शरजीविनि । पदातौ ॥

शरबीजम् । न० धातुके । बीटुकाख्ये ॥

शरव्यम् । न० लक्ष्ये । शरविंशा र्हितम् । उगवादिभ्योयत् । यद्वा । शरान्व्ययति । व्येञ् संवरणे । सम्प्रसारिविभ्योड : ॥

शराघातः । पुं० प्रचलाके । बाणाघाते ॥

शराटिः ।) शराडिः ।) स्त्री० शरारिविहगे ॥

शरातिः । स्त्री० शरारौ । पक्षि विहगे । शरंनीरमतति । अत० अज्यतिभ्याञ्चेतीच् ॥

शराभ्यासः । पुं० उपासने । शर शिक्षायाम् ॥ शरस्यशरमोक्षस्य अभ्यासः ॥

शरारिः । स्त्री० सुरगार्डु० इ० भा० प्र० ॥ पक्षिविशेषे । आटी । शरं नीरमृच्छति । ऋगतौ इञ् : ॥

शरारुः । त्रि० हिंस्रे ॥ शृणाति । शृ० । शृवन्द्योरारुः ॥

शरालिः । स्त्री० शरारिपक्षिणि ॥

शरं नीरमृच्छति । ऋ० । अचबू: । कपिलकादित्वाल्लत्वम् ॥

शरालिका ।) शराली) स्त्री० शरालिविहगे ॥

शरावः । पुं० कुडवद्वयपरिमाणे चतुःषष्टितोलके । सेर० इ० भा० प्र० । माणिकायाम् ॥ मृत्पात्रविशेषे । वर्द्धमानके । सराचा० इ० भा० प्र० शरवम् । शृ० । ऋदोरप् । शृणातिवा । अप् ॥ शरं शरादृवा० अवति । अवरक्षणादौ । अच्० अण्वा ॥

शरावती । स्त्री० रामात्मजस्य लवस्य राजधान्याम् ॥ नदीविशेषे ॥ इयञ्चोत्तरपूर्वाभिमुखी० पश्चाद्दक्षिणपूर्वं स्थाप्य व्यवस्थितीदेश : प्रागुदेशः उत्तरापरस्यां व्यवस्थितजङ्गदेशः । तथाचोक्तम् । प्रागुदञ्चौ विभजतेहंस : क्षीरोदकं यथा । विदुषां शब्दसिद्ध्यर्थं सानः पातुशरावतीति ॥ शराः सन्त्यस्याम् । मतुप् । शरादीनाञ्चेतिदीर्घः ॥

शरावरः । पुं० कवचे ॥ तूणीरे ॥ यथा । शरावरीशरैः पूर्णौ बिभ्रतौपश्यलक्ष्मणेतिरामायणम् ।

शरावापः । पुं० धनुषि ॥

शरावार्हम् । न० कुडवपरिमाणे । द्वात्रिंशत्तोलके । आधसेर० भा० प्र० परिमाणे ॥

शराश्रयः । पुं॰ तूणे ॥

शरासनम् । न॰ कोदण्डे । चापे धनुषि ॥ शराअस्यन्तेऽनेन । अ सुक्षेपणे । करणे ल्युट् ॥

शरास्त्रम् । न॰ धनुषि ॥

शरिः । पुं॰ हिंस्रे ॥ शुके ॥ शृणाति । शॄ॰ । इन् ॥

शरिमा । पुं॰ प्रसवे । शृणाति यौवनम् । शॄ॰ । हृभृधृसृशॄभ्य इमनिच् ॥

शरी । स्त्री॰ गुन्द्रायाम् । एरकावर्षे । गौरादित्वान्ङीष् ॥

शरीरम् । न॰ कलेवरे । गात्रे । वपुषि । संहनने । वर्ष्मणि । विग्रहे । समवेतेन्द्रियकलापे॰ देवपितृमनुष्यादीनां देहे । जरायुजाण्डजोद्भिज्जस्वेदजभेदभिन्ने॰ पादादिशिरोऽन्ते ॥ शीर्यते॰ तत्त्वज्ञानादिना अश्यतीति शरीरम् ॥ शरीरत्वञ्चैवं यथा । चेष्टेन्द्रियार्थाश्रयः शरीरमिति गोतमः ॥ अत्र चेष्टादिमिलिताश्रयत्वं न लक्षणम्॰ वैयर्थ्यात् । अपितु॰ आश्रयपदस्य प्रत्येकमन्वये चेष्टाश्रयत्वादिलक्षणत्रये तात्पर्य्यम् । चेष्टात्वञ्च॰ प्रयत्नजन्यतावच्छेदकजातिविशेषः । न च शरीरावयवेऽतिव्याप्तिः अन्त्यावयवित्वेन विशेषणात् । न च निश्चेष्टशरीरेऽव्याप्तिः॰ तादृशीमात्रमाभावात् । अत एवाह॰ इन्द्रियाश्रय इति । इन्द्रियाश्रयत्वञ्च॰ अवच्छेदकताख्यस्वरूपसम्बन्धविशेषेण॰ अत एव घ्राणदेवदत्तीयमित्यादिप्रतीतेः । अर्थाश्रयत्वमित्यत्रार्थशब्दो न रूपादिपरः । तदाश्रयत्वस्य घटादावतिव्याप्तेः । किन्तु सुखदुःखान्यतरपरः । अत एव भाष्यं॰ यस्मिन्नायतने सुखदुःखयोः प्रतिसंवेदनं प्रवर्त्तते॰ स एषामाश्रयस्तच्छरीरमिति । वस्तुतस्त्वन्यतराश्रयत्वमपि तन्न लक्षणम् । किन्तु॰ सुखाश्रयत्वं दुःखाश्रयत्वञ्चेति लक्षणद्वये तात्पर्य्यम् । शरीरस्य तदाश्रयत्वमवच्छेदकतासम्बन्धेन हस्तादेरलक्ष्यत्वेऽन्त्यावयवित्वेन विशेषणीयम्॰ स्वर्गशरीरे नारकिशरीरे च यथाक्रमं सुखदुःखस्वीकाराव्याप्तिः । न च तच्छून्यखण्डशरीरेऽव्याप्तिः॰ सुखाद्याश्रयवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्॰ तादृशजातिश्च मनुष्यत्वचैत्रत्वादिः॰ कल्पभेदेन नरसिंहशरीराभेदात् नरसिंहत्वजातिमादाय नरसिंहशरीरे लक्षणसमन्वय इति ॥ १ ॥ शृणाति॰ शीर्यते रोगादिना वा । शॄ॰ । कॄशॄपॄकटीतीरन् ॥ अर्द्धर्चादिः ॥

शरीरजः । पुं॰ रोगे ॥ कामे ॥ पुत्रे ॥ त्रि॰ देहजाते ॥ शरीरा

ष्याते । खनौ० । पञ्चम्यामिति ङः ॥

शरीरभाक् । त्रि० देहभाजि ॥ भजो ण्विः ॥

शरीरभृत् । पुं० प्राणिनि ॥ शरीरं बिभर्त्ति । भृञ् : क्विप् ॥ विष्णौ । ईश्वरे ॥ शरीराणांशरीराण्यन्नरूपेणपोषयन् । प्राणरूपेणवाधारयन् शरीरभृत् । स्वमायया शरीराणिबिभर्त्ति वा । डुभृञ्० । क्विपचेति क्विप्तुक् ॥

शरीरयात्रा । स्त्री० वपुषःस्थितौ ॥

शरीरावरणम् । न० त्वचि । चर्म्मणि ॥ कायवेष्टने ॥

शरीरी । पुं० जीवे । प्राणिनि ॥ शरीरमस्यास्ति । अतइनिठनाविति : ॥ घेचर्म्मे ॥

शरुः । पुं० कोपे । क्रोधे ॥ वज्रे ॥ शरे । बाणे ॥ आयुधे ॥ शृणाति । शॄ० । शॄस्वृस्निही- त्युः ॥

शरेष्टः । पुं० आम्रे ॥

शर्क्करकः । पुं० मधुजम्बीरे ॥

शर्क्करजा । स्त्री० सिताखण्डे ॥

शर्क्करा । स्त्री० खण्डविकृतौ । सितायाम् । शुक्लायाम् । बूरा० हु० भा० प्र० ॥ मीनागडाम । सितोपलायाम् । चीनी० हु० भा० प्र० ॥ उपलायाम् । अश्मरु पार्यामर्दि ॥ मृत्तिकामिश्रशुष्कक्षुद्रपाषाणेषु । कर्परांशे ॥ मृत्कपालखण्डे ॥ शर्क्करान्वितदेशे ॥ शकले ॥ रोगप्रभेदे ॥ यथा । पच्यमानाश्मरीपित्ताच्छोष्यमाणाचवायुना । विमुक्तककसस्थानाघरन्ती शर्क्करामता ॥ शृणाति० शीर्यतेवा शॄ० । शः करन् । शर्क्कराऽस्त्यस्य । देशेलुबिलचौचेतिमत्वर्थीयस्याणोलुप् ॥

शर्क्कराचलः । पुं० दानार्थकृत्रिमे शर्क्करामयेगिरिविशेषे ॥

शर्क्कराधेनुः । स्त्री० दानार्थंशर्क्करानिर्म्मितायांधेनौ ॥

शर्क्करापुष्पः । पुं० अर्क्कद्रुमे ॥

शर्क्कराप्रभा । स्त्री० जिनानांनरकविशेषे ॥ यथा । रत्नशर्क्करावालुकापङ्कधूमतमप्रभा । महातमप्रभावेत्यधोऽधोनरकभूमय इतिहेम० ॥

शर्क्करावान् । त्रि० सशर्क्करेदेशे ॥ शर्क्करायाम् । शर्क्करिले । शार्क्करे शर्क्करास्त्यस्य । देशेलुबिलचौचेतिचान्मतुप् ॥

शर्क्करावती । स्त्री० नदीविशेषे ॥

शर्क्करासप्तमी । स्त्री० वैशाखशुक्लसप्तम्याम् ॥

शर्क्करासवः । पुं० शर्क्करयाकृतेआसवविशेषे ॥

शर्क्करिलः । त्रि० शर्क्करावतिदेशे ॥

शर्करायाम् । शाकरे । शर्कराऽस्त्यस्य । देशेलुविलचौचेतीलच् ॥

शर्करी । स्त्री॰ शर्कर्याम् ॥

शर्करोदकम् । न॰ शर्करान्वितपानीये । रस॰ रसवत॰ इ॰ भा॰ प्र॰ ॥ यथा ॥ जलेनशीतलेनैवघोलिताशुभ्रशर्करा । एलालवङ्गकर्पूरमरिचैश्चसमन्विता ॥ शर्करोदकनाम्नैतत्प्रसिद्धंविदुषांमुखे । शर्करोदकमाख्यातंशुक्रलंशिशिरंसरम् ॥ बल्यंरुच्यंलघुस्वादुवातपित्तास्रनाशनम् । मूर्च्छाछर्दितृषादाहज्वरशान्तिकरंपरम् ॥

शर्द्धः । पुं॰ अपानशब्दे ॥ शर्द्धनम् । शृधुशब्दकुत्सायाम् । घञ् ॥

शर्द्धञ्जहः । पुं॰ माषे ॥ शर्द्धमपानशब्दंजहाति । ओहाक्॰ । वातशुनीतिलशर्द्धेष्वजधेट्तुदजहातिभ्यः खश् । अरुर्द्विषदिति मुम् । खशातिरत्वान्तर्भावितण्यर्थः ॥

शर्द्धनम् । न॰ गुदशब्दे । पर्द्दे ॥

शर्म्मा । पुं॰ ब्राह्मणस्योपपदे ॥ न॰ सुखे ॥ त्रि॰ तद्वति ॥ शृणात्यशुभम् । शॄ॰ । सर्वधातुभ्योमनिन् ॥

शर्म्मरः । पुं॰ वस्त्रविशेषे ॥

शर्म्मरा स्त्री॰ दारुहरिद्रायाम् ॥

शर्म्मिष्ठा । स्त्री॰ दानवेन्द्रवृषपर्व्वणोदुहितरि ॥

शर्य्या । स्त्री॰ रात्रौ ॥ इ॰ वाचस्पतिकोषः ॥

शर्य्यातिः । पुं॰ वैवस्वतमनोःपुत्रे ॥

शर्व्वः । पुं॰ ईश्वरे । ईशाने । शिवे ॥ शृणाति॰सर्व्वाः प्रजाः संहरतिप्रलयेसंहारयतिवा । शृणात्यसुरान्॰भक्तानांपापंवा । शॄ॰ । कॄगॄशॄदॄभ्योवः ॥

शर्व्वरी । स्त्री॰ निशायाम् । यामिन्याम् ॥ त्रियामाम् ॥ शृणातिचेष्टा । शॄ॰ । कॄगॄशॄवृञ्चतिभ्यः ष्वरच् । षित्त्वान्ङीष् ॥ वनिपितु॰ वनोरचेतिङीव्रौ ॥ हरिद्रायाम् ॥ वत्सरविशेषे ॥ तत्फलंयथा । क्वचिद्वर्षतिपर्ज्जन्योदेशेसंछन्नमण्डलः । दुर्भिक्षंशर्व्वरीवर्षेव्यवहारोविपर्य्ययः ॥ ३४ ॥

शर्व्वरीशः । पुं॰ निशापतौ । चन्द्रे ॥

शर्व्वला । स्त्री॰ तोमरास्त्रे । गँड़ासा॰सब्बली॰इ॰भा॰प्र॰ ॥ हस्तचर्म्मसशल्यदण्डे । रायवांस॰इ॰गौ॰भा॰ ॥

शर्व्वाणी । स्त्री॰ उमायाम् । कात्यायन्याम् । गौर्य्याम् ॥ शर्व्वस्यस्त्री । इन्द्रवरुणभवशर्व्वेत्यादिना॰ङीषानुकौ ॥ शर्व्वाणीमध्यमाभिधे । मध्यमेश्वरस्थानइत्यर्थः ॥

शर्शरीकः । पुं॰ हिंस्रे ॥ खले । शृणाति । शॄ॰ । शॄपॄवृञ्भ्यो द्वे चाभ्यासस्येति॰ईकन्॰द्वित्वमभ्यासस्यचरुक् ॥

शल: । पुं॰ भृङ्गिणि ॥ वंशप्रभेदे ॥ विधौ । ब्रह्मणि ॥ दीर्घायुधे । कुन्ते । विषाङ्कुरे ॥ उष्ट्रे ॥ शल्यो स्यनृपे । न॰ श्वाविल्लोम्नि शलल्याम् । शलति ॥ शलति । शल चलने । पचाद्यच् ॥

शलक: । पुं॰ मर्कटे । लूतायाम् । मकडो॰मकडा॰हृ॰भा॰प्र॰ ॥

शलङ्ग: । पुं॰ लोकपाले ॥ लवणविशेषे ।

शलभ: । पुं॰ कीटविशेषे ॥ पतङ्गे । ईतिविशेषे । टिड्डी॰ टीडी॰ हृ॰ दे॰ भा॰ ॥ शलति । शल॰ । कृशृशलिकलिगर्दिभ्योऽभच् ।

शललम् । न॰ शल्ये । श्वाविल्लोम्नि । शलति । शल्लचलनसंवरणयो: ॥ वृषादित्वात्कलच्चित् ॥

शलली । पुं॰ श्वाविधि ॥ शललमस्यास्ति । इनि. ॥

शलली । स्त्री॰ शलले ॥ गौरादित्वाज्जातित्वाद्वा ङीष् ॥

शलाका । स्त्री॰ शल्ये ॥ मदनद्रुमे ॥ शारिकायाम् ॥ शलाध्याम् छत्रपञ्जरादिकाष्ठ्याम् ॥ तिलि हृ॰ भाषा॰ शरे ॥ आलेख्यकूर्चिकायाम् ॥ शलति । शल॰ । बलाकादयश्चेति साधु: ॥ धातुमय्यामञ्जनकलिकायाम् । सला

हृ॰ भा॰ ॥

शलाकापुरुष: । पुं॰ जैनानांदैव पुरुषेषु ॥ ते च त्रिषष्टिसङ्ख्यापरिमिता: ॥ तत्र द्वादशचक्रवर्त्तिन: । चतुर्विंशतिर्जिना: । नववासुदेवा: । नवबलदेवा: । नवप्रतिवासुदेवा: । इति ॥

शलाट: । पुं॰ शकटपरिमाणे ॥

शलाटु: । पुं॰ बिल्वे । मूलविशेषे ॥ त्रि॰ आमफले ॥ शलति । शलचलनसंवरणयो: । पचाद्यच् । अटति । अटगतौ । मृगय्वादित्वात्कु: । शलश्चासावटुश्च ॥

शलाभोलि: । पुं॰ उष्ट्रे । हृ॰ है॰ न्द्र ।

शलालु: । न॰ सुगन्धिद्रव्यविशेषे ।

शली । स्त्री॰ श्वाविधि ॥

शल्कम् । न॰ त्वचि । वल्कले ॥ शकले । खण्डे ॥ मत्स्यत्वचि । शलति । शलचलने । शुकभीकेति कन् ॥ शल्कै: काष्ठखण्डैरिति वेदभाष्यम् ॥

शल्कली । पुं॰ मत्स्ये । मीने ॥

शल्की । पुं॰ मीने ।

शल्मलि: । स्त्री॰ शाल्मलितरौ ॥ शलति । शल॰ । क्विप् । मलते । मलधारणे । सर्वधातुभ्य इन् । शल्चासौ मलिश्च ॥ डु॰ द्वि॰ प: ॥

शल्मली । स्त्री॰ शाल्मलिद्रुमे ।

शल्य: । पुं॰ मदनद्रुमे ॥ श्वाविधि ॥
नृपविशेषे । युधिष्ठिरमातुले ॥
सीम्नि । शलाकायाम् ॥ बिल्व
वृक्षे ॥ मत्स्यविशेषे ॥ न॰ क्ष्वे
डे ॥ इषौ । शरे । तोमरे । कु
न्ते ॥ वंशकम्बिकायाम् ॥ पा
पे । दुःसहे ॥ दुर्वाक्ये ॥
अस्थ्नि ॥ आयुर्वेदस्याङ्गविशेषे ॥
यथाह सुश्रुतः । तत्र शल्यं नाम विविध
तृणकाष्ठपाषाणपांशुलोहलोष्टास्थि
बालनखपूयास्रावान्तर्गर्भशल्योद्धर
णार्थं यन्त्रशस्त्रक्षाराग्निप्रणिधानव्रण
विनिश्चयार्थञ्चेति ॥ पुं॰ न॰ शङ्कौ
। तोमरे । सेल इ॰ भा॰ ॥ शल
ति । शलगतौ । अघ्न्यादित्वाद्य
त् ॥ यद्वा । सानसिवर्णसीत्या
दिना शलेर्यः ॥

शल्यक: । पुं॰ मदनद्रुमे । राढे
॥ श्वाविधि स्थूलरोमवति प्रा
णिविशेषे ॥ तन्मांसगुणास्तु । श
ल्यकः श्वाससकासास्रशोषदोषत्र-
यापहः । इति ॥

शल्यकण्टक: । पुं॰ शल्यके ॥

शल्यलोम । न॰ शलल्याम् ॥

शल्यहृत् । त्रि॰ व्रणचिकित्सके ।
शल्यहर्त्तरि ॥

शल्यारि: । पुं॰ धर्मपुत्रे । युधि
ष्ठिरे ॥

शल्ल: । पुं॰ भेके ॥ न॰ त्वचि ॥

शल्लक: । पुं॰ शोणकवृक्षे ॥ न॰ त्वचि ॥

शल्लकी । स्त्री॰ श्वाविधि । शल्य
मृगे । अस्या मांसगुणा यथा । श
ल्यमांसं गुरु स्निग्धं शीतलं कफपित्त
जिदिति ॥ द्रुमविशेषे । गजभ
क्ष्यायाम् । सुवहायाम् अस्या
गुणास्तु । शल्लकी तुवरा शीता पित्त
श्लेष्मातिसारजित् । रक्तपित्तव्रण
हरी पुष्टिकृन्मधुरीरितेति ॥ सल
ति । सलगतौ । क्वुन् । पृषोद
रादिः । गौरादिः ॥ सत्कृत्य ल
क्ष्यते । लक्ष आस्वादने । क्वुन् ।

शल्लकीद्रव: । [illegible]

शल्व: । पुं॰ [illegible]

शव: । पुं॰ कुणपे [illegible]
न॰ तोये [illegible]
पचाद्यच् ॥

शवकाम्य: । पुं॰ कुक्कुरे ।

शवयानम् । न॰ काष्ठमञ्चे । शवव
हनार्थखट्वायाम् ॥

शवर: । पुं॰ पर्वतवासिम्लेच्छविशेषे ॥
अप्सु । पानीये ॥ शङ्करे ॥ शा
स्त्रविशेषे ॥ हस्ते ॥ न॰ जले ॥
चित्रे ॥ बौद्धानां व्रतविशेषे ॥
शवति । शव॰ बाहुलकादरः ॥
शवं राति वा रा॰ । कः ॥

शवरथ: । पुं॰ शवयाने । अरथी॰
इ॰ भा॰ ॥

शवपादप: । पुं॰ लोध्रे ।

शबरलोध्रः । पुं॰ श्वेतलोध्रे ॥
शबरालयः । पुं॰ पक्कणे । भिल्लग्रामे । शबरगृहे । शवं राज्ञीति शबराः । तेषामालयः ॥
शबरावासः । पुं॰ शबरालये । शबराणामावासः ॥
शबरी । स्त्री॰ शबरभार्यायाम् ॥
शबलः । पुं॰ शबले चित्रे । कर्बुरे वर्णे ॥ त्रि॰ तद्वर्णयुक्ते ॥ पर्य्यायोऽस्य मध्यम् ॥
शबलिमा । पुं॰ विचित्रतायाम् । शबलस्य भावः । पृथ्वादिभ्य इमनिच् ॥ वर्णवाचकत्वात् वर्ण दृढादिभ्यष्यञ् वा॰ इमनिच् ॥
शबली । स्त्री॰ शबलवर्णायां गवि ॥ शबलयोगाद्वन्यतो ङीष्
शवः । न॰ बले ॥ श्वयति । टु ओश्वि॰ । श्वेः संप्रसारणञ्चेत्यसुन् । शवसी॰ शवांसि॰ इत्यादि बोध्यम् ॥
शवसानः । पुं॰ पथि ॥ शवति॰ शूयते वा । शगतौ । छन्दस्यसानच् शुजृभ्याम् ॥
शव्यम् । न॰ शवकर्म्मणि ॥
शशः । पुं॰ बोले ॥ लोध्रे ॥ पशुविशेषे । शशके । लोमकर्णे । वनाखौ । सस्रा॰ इ॰ भा॰ ॥ अस्य मांसगुणा यथा । शशः शीतो लघुर्ग्राही रूक्षः स्वादुः सदा हितः । वह्निकृत्कफपित्तघ्नो वातसाधारणः स्मृतः ॥ ज्वरातीसारशोषास्रश्वासामयहरस्तथा । अपिच । निरस्थिमस्तं पललमेषा मांसस्य बुद्धिमान्यो मक्षतं सुपाकम् । ससैन्धवं धूमदत्तवासं करोति कोऽग्निमतिप्रकामं ॥ शशादिमांसानि विवर्जयिप्रदियानीत्याह । मार्गं मांसं तथा छागं शाशं समनुयुज्यते । एतानि द्विप्रियाणि स्युः प्रयोज्यानि वसुन्धरे । इत्येकादशीतत्त्वम् ॥ चतुर्विधपुरुषान्तर्गतपुरुषविशेषे । तल्लक्षणं यथा । मृदुवचनसुशीलः कोमलाङ्गः सुकेशः सकलगुणविधानः सत्यवादी शशोऽयमिति ॥ चन्द्रचिह्ने ॥ शशति । शश प्लुतगतौ । अच्
शशकः । पुं॰ वनाखौ । शशे ॥
शशघातकः । पुं॰ श्येने । बाजइ॰ भा॰ प्र॰ ॥
शशघ्नी । स्त्री॰ शकुन्त्याम् । शशं हन्ति । अमनुष्यकर्तृके इति टक् । ङीप् ॥
शशधरः । पुं॰ विधौ । चन्द्रे ॥ यथा । विलोक्य वदनं प्रिये शशधरो ह्रियापाण्डुरः कुचौ कमलकोरकः स्फुटति बस्त्रसा साम्प्रतम् । रदांस्तु हिनकलान्वदलानि दन्तच्छदं प्रिये कथय जायतां सपदि तन्विमूकः :

पिकः ॥ शशधरोधारकः कर्पूरे ॥

शशपानतीर्थम् । न॰ तीर्थविशेषे ॥

शशप्लुतकम् । न॰ स्तनादिस्थनखाघाते ॥

शशभृत् । पुं॰ विधौ । चन्द्रे ॥ शशं बिभर्त्ति ; डुभृञ्॰ । क्विप् ॥

शशलोम । न॰ शशोर्णे ॥ शशस्य लोम ॥

शशबिन्दुः । पुं॰ वासुदेवे ॥ राजान्तरे । चित्ररथपुत्रे ॥ चन्द्रे ॥ शशरूपबिन्दुस्त्वम्लक्षणमस्य ॥

शशशिम्बिका । स्त्री॰ जीवन्त्याम् ॥

शशस्थली । स्त्री॰ गङ्गायमुनयोर्मध्यदेशे । अन्तर्वेद्याम् ॥ इ॰ मुद्रितचि॰ शेषः ॥

शशाङ्कः । पुं॰ चन्द्रमसि । कर्पूरे ॥

शशाङ्कमूर्त्तिः । पुं॰ चन्द्रे ॥ शशाङ्कामूर्त्तिर्यस्य ॥

शशाण्डुली । स्त्री॰ कर्कटीप्रभेदे । बहुफलायाम् । तण्डुल्याम् । अस्याः पर्याययथा । शशाण्डुलीबहुफलातण्डुलीर्च्चसम्भवा । क्षुद्राम्लाक्षीमशफलाधूम्राग्नफलातथा ॥ अस्याः गुणाः । शशाण्डुलीतिक्तकटुश्चकोमलाकण्डूमयुतामधुराकफापहा । पाकेतुसाम्लामधुराविदाहकृत्कफातुशुष्कारुचिकृद्दीपनी ॥

शशादः । पुं॰ विकुक्षिसंज्ञके॰राजर्षिविशेषे ॥ श्येने ॥

शशादनः । पुं॰ श्येनपक्षिणि ॥ शशमत्ति । अद॰ ॥ ल्युः॰ ल्युट्॰युज्वा ॥

शशिकला । स्त्री॰ यतिशर्करी १५ छन्दोविशेषे ॥ तत्रयत्र गुरुनिधनमनुलघुरिहशशिकला । यथा । मलयजतिलकसमुदितशशिकला॰ व्रजयुवतिलसदलिकगगनगता सरसिजनयनहृदयसलिलनिधिंव्यतनुतविततरभसपरितरलम् ॥ शशिनः षोडशांशे ॥

शशिकान्तः । पुं॰ चन्द्रकान्तमणौ ॥ न॰कुमुदे । कह्लारे । कैरवे ॥ त्रि॰ चन्द्रसमे ॥

शशिदेवः । पुं॰ रन्तिदेवे ॥

शशिध्वजः । पुं॰ भल्लाटपुरनृपे ॥ कल्किपुराणस्य २५ ऽध्यायप्रसिद्धे ॥

शशी । पुं॰ हिमांशौ । चन्द्रे । नक्षत्रेशे ॥ नक्षत्राणांमध्येशशीविष्णोर्विभूतिः ॥ सचजलमयः । यथा । सलिलमयेशशिनिरवेर्दीधितयोमूर्च्छितास्तमोनैशम् । क्षपयन्तिदर्पणोदरनिहिताइवमन्दिरस्यान्तः इति ॥ वर्णवृत्तप्रभेदे । नरेन्द्रोयदिस्यात् । शशीकथ्यतेतत् ॥ यथा । जनानन्दकन्दः प्रियस्याम्बुकुन्दः ॥ षण्मासस्यद्वितीयप्रभेदे॰ ॥ ऽऽ॰

॥ चर्हद्गुजविशेषे ॥

शशिप्रभम् । न० मुक्तायाम् ॥ कुमुदे ॥ त्रि० चन्द्रसमदीप्तियुक्ते ॥

शशिप्रभा । स्त्री० ज्योत्स्नायाम् ॥

शशिभूषण: । पुं० चन्द्रशेखरे । शिवे ॥

शशिलेखा । स्त्री० चन्द्रमस: कलायाम् । इन्दुलेखायाम् ॥ गुडूच्याम् ॥ वाकुच्याम् । सोमराज्याम् ॥ चन्द्रलेखाभिधेवृत्ते ॥ रसालाया: प्रभेदे ॥ यथा । शर्कराशुभ्रयुक्तेन शृतदुग्धघृतेन च । पटपूता शिखरिणीयं शशिलेखेति कीर्त्तिता ॥ शशिलेखा हिमा बल्या रुच्या: पुष्टिप्रदा लघु । वातपित्तहरा श्रेष्ठा महादाघविनाशिनी ॥

शशिलेखिका । स्त्री० शशिलेखायाम् ॥

शशिवदना । स्त्री० गायत्रीछन्द: ६ प्रभेदे ॥ शशिवदनाख्यौ ॥ यथा । शशिवदनानांव्रजतरुणीनाम् । अधरसुधोर्मिं मधुरिपुरैच्छत् ॥ चन्द्रसममुखायांवीथिति ॥

शशिवाटिका । स्त्री० पुनर्नवायाम् ॥

शशिशेखर: । पुं० ईश्वरे । चन्द्रमौलौ सदाशिवे ॥ बुद्धभेदे । चक्रसंवरे । वज्रकपालिनि । वज्रटीके ॥

शशोर्णम् । न० शशलोमनि ॥ शशस्य ऊर्णा० शशोर्णम् । शशोर्णकारणं करणमिति चन्द्रगोमिलिङ्गानुशा

सनात्० क्लीवत्वम् ॥

शश्वत् । अ० आत्मप्रश्ने मङ्गले ॥ पुराकल्पे ॥ सदार्थे । नित्ये । निरन्तरे ॥ आभीक्ष्ण्ये ॥ पुनरर्थे ॥ शशतिगमनं वा । शश० । बाहुलकात्० वत् ॥ सहार्थे ॥

शष्कुल: । पुं० छित्तौ । करञ्जे ॥

शष्कुली । स्त्री० पिष्टविशेषे । सोहाली इति ख्याते ॥ यथा । समितां वा घृतान्तां यालीं पर्पटीकृत्वा च वेल्लयेत् । आज्येतां भर्जयेत् सिद्धा शष्कुली फेनिका गुणा ॥ कर्णरन्ध्रे ॥ यथा कर्णशष्कुल्यवच्छिन्नं नभ एव श्रोत्रमिति ॥ सौरी० इ० भा० प्र० मत्स्ये ॥ तद्गुणा यथा । शष्कुलीपाहिबीहयामधुरा तुवरा स्मृता ॥ गौरादित्वात् ङीष् ॥

शष्पम् । न० नवीनतृणे । बालतृणे ॥ पुं० प्रतिभाहानौ ॥ शस्यते० शुष्यति वा । शसु हिंसायाम्० शुष शोषणे वा । खष्पशिल्पशष्पेति पो निपातनात्० षत्वश्च ॥

शसनम् । न० परम्पराके । यज्ञार्थ पशुहनने ॥ शसु० । भावे ल्युट् ॥

शस्तम् । न० श्व: श्रेयसि । शिवे । क्षेमे ॥ त्रि० कल्याणयुक्ते ॥ स्तुते ॥ प्रशस्ते ॥ शस्यते स्म । शंसु स्तुतौ । कर्म्मणि क्त: ॥

शस्तकम् । न० अङ्गुलित्राणे ॥

शस्तकोशक: । त्रि० प्रशस्तकोशवान्

शस्त्राङ्गः । त्रि० रम्यतमे ॥ शस्ताम्य
शान्यस्य ॥ पुं० अतीतकल्पार्हद्भे
दे ॥

शस्त्रम् । न० लौहे ॥ तीक्ष्णायसे । अ
स्त्रे । आयुधे ॥ शस्त्रास्त्रवर्हुषामु
क्ते रित्यादौ शस्त्रास्त्रयोर्भेदउक्तः ।
तथाहि । येन करधृतेन हन्यते तच्छ
स्त्रं खड्गादि । येन प्रक्षिप्तेन हन्यते
तदस्त्रं काण्डादि इत्यनयोर्भेदः ।
अपिच । अस्त्रं मन्त्राभिमन्त्रितम् ।
शस्त्रं तद्रितरदिति ॥ शस्यतेऽनेन ।
शसु हिंसायाम् । दाम्नीतिष्ट्रन् ।
सर्वधातुभ्यष्ट्रन्वा ॥ अमिचिमि
दिशसिभ्यः क्त्रो वा ॥ अप्रगीतऋ
ग्जाति ॥ शोभादिनाशंसमानत्
स्वर्थः ॥ अप्रगीतमन्त्रसाध्यायांस्तु
तौ ॥ अप्रगीतमन्त्रसाध्यगुणनिष्ठगु
णाभिधानं शस्त्रमितियाज्ञिकानांव्य
वहारः ॥ पुं० खड्गे । तरवारौ ॥

शस्त्रकम् । न० अयसि । लौहे ॥ श
स्यतेऽनेन । शसेः ष्ट्रन् । स्वार्थे
कः ॥

शस्त्रकर्म । न० वैद्यानांप्रधानेकर्म
विशेषे ॥ तदष्टविधंभवति । यथा
। छेद्यं भेद्यं लेख्यं वेध्यं मेष्यमा
हार्यं विस्राव्यं सीव्यमित्यभेदे
दात् ॥

शस्त्रकोषतरुः । पुं० महापिण्डीत
रौ ॥

शस्त्रजीवी । पुं० शस्त्राजीवे ॥

शस्त्रधारणजीवकः । पुं० शस्त्राजीवे ॥

शस्त्रपाणिः । पुं० अश्वादिशस्त्रहस्ते
॥ आततायिविशेषे ॥

शस्त्रभृत् । पुं० शस्त्रधारिणि ॥

शस्त्रमार्जः । पुं० असिधावके ।
शाणाजीवे ॥ शस्त्रंमार्ष्टि । मृजू शु
द्धौ । कर्मण्यण् ॥

शस्त्रशास्त्रम् । न० अथर्ववेदस्योपवे
दे ॥

शस्त्रहतः । त्रि० शस्त्राघातेनमृते ॥

शस्त्रहस्तः । त्रि० शस्त्रपाणौ ॥

शस्त्राजीवः । त्रि० काण्डपृष्ठे । आ
युधीये । आयुधिके ॥ शस्त्रमाजी
वति उपजीवति । जीव० । कर्म
ण्यण् ॥

शस्त्राभ्यासः । पुं० शस्त्रशिक्षायाम् ॥

शस्त्रायसम् । न० पिण्डायसे । इस्
पात इ० भा० ॥

शस्त्री । त्रि० शस्त्रविशिष्टे ॥

शस्त्री । स्त्री० छुरिकायाम् ॥ ष्ट्रनः
षित्वान्ङीष् ॥

शस्यम् । न० वृक्षादिफले ॥ शंस्यते ।
शसु० । तकिशसिचतीत्ययत् ॥
तालव्याश्च पिदन्त्याश्च शस्य शूकरपां
शवः ॥ क्वचिद्धान्ये ॥ यथा । शस्यं
क्षेत्रगतं प्राहुः सतुषंधान्यमुच्यते
। आमंवितुषमित्युक्तं स्विन्नमन्नमु
दाहृतमितिस्मृतिः ॥

शस्यध्वंसी । पुं॰ तुन्नवृक्षे । नन्दीद्रुमे । त्रि॰ शस्यनाशके ॥

शस्यमञ्जरी । स्त्री॰ कणिशे । अभिनवनिर्गतधान्यादिशीर्षके ॥ शस्यस्य मञ्जरी ॥

शस्यशूकम् । न॰ यवाद्यग्रे । किंशारौ । शस्यस्य शूकम् ॥

शस्यसंवर: । पुं॰ अश्वकर्णे । सालवृक्षे ॥ शस्यै: संव्रियते । वृञ्॰ । अप् ॥

शस्यसंवरण: । पुं॰ दीर्घपर्णे । अश्वकर्णे । अरण्यद्रुमे ॥

शस्यात् । त्रि॰ शस्यभक्षके ॥

शस्यारु: । पुं॰ शमीरे । अल्पशमीवृक्षे ॥

शांशप: । पुं॰ अमसे ॥ शिंशपाया विकार: । अञ् । देविकाशिंशपेत्यात्वम् ॥

शांशपायन: । पुं॰ मुनिविशेषे ॥

शाक: । पुं॰ द्वीपविशेषे । शाके शाकद्रुमस्तुङ्ग: शाकसंज्ञानिबन्धनहुत्युता: ॥ ककशपर्णे महतिद्रुमे । क्रकचपत्रे । शरपत्रे । श्रेष्ठकाष्ठे । स्थिरसारे । शक्तौ ॥ नृपविशेषे ॥ युधिष्ठिरविक्रमादित्यशालिवाहनादिशकनरपतीनामतीताब्दे ॥ वर्षे । गोयानाख्ये ॥ पुं॰ न॰ हरितके । शाकभाजे ॥ मण्डूकपर्णी पालङ्क्याचिञ्चिकाचाप्यपीदृशा । चाङ्गेरीहिलमोचावत्सलस्त्री शाकजा

तय: । वास्तुके ॥ पत्रपुष्पादिषु । तत्र पत्रं निम्बादे: । पुष्पं कोविदारादे: । आदिपदात् फलं वार्त्ताकादे: । मूलं मूलकादे: । कन्द: शूरणादे: । अङ्कुरो वंशादे: । यथा । मूलपत्रकरीराग्रफलकन्दाधिरूढकम् । त्वक् पुष्पं कवकञ्चैव शाकं दशविधं स्मृतम् ॥ अधिरूढकं तालवीजाङ्कुरास्थिमज्जादीति गौडा: । अन्ये तु चर्चोद्भूतस्य फलमूलादे: स्वेदान्निर्विभिन्नानङ्कुरान्मन्यन्ते ॥ शक्यते॰ शक्नोत्यनेन वा भोक्तुम् । शक्॰ । घञ् ॥ यद्वा । श्यति । शो तनूकरणे ॥ बाहुलकात् कन् ॥ भावप्रकाशे तु॰ षड्विधं शाकमुक्तम् । यथा । पत्र पुष्प फलं नालं कन्दसंस्वेदजं तथा । शाकं षड्विधमुद्दिष्टं गुरुविद्याद्यथोत्तरम् । अथ तेषां गुणा: । प्राय: शाकानि सर्वाणि विष्टम्भीनि गुरूणि च । रूक्षाणि बहुवर्चांसि सृष्टविण्मारुतानि च ॥ शाकं भिनत्ति वपुरस्थि निहन्ति नेत्रं वर्णं विनाशयति रक्तमथापि शुक्रम् । प्रज्ञाक्षयं प्रकुरुते पलितञ्च नूनं हन्ति स्मृतिं गतिमिति प्रवदन्ति तज्ज्ञा: ॥ शाकेषु सर्वेषु वसन्ति रोगास्ते हेतवो देहविनाशनाय । तस्माद्बुध: शाकविवर्जनन्तु कुर्यात्तथाम्लेषु स एव दोष: ॥ अपि च । सामा

न्यान्येववोध्यानिशाकानिस्त्रावर्णां सिद्धि । विशेषस्तत्रतेषान्तुतत्रतत्र निरूपितः ॥ शाकपाकविधिर्यथा । हिङ्गुजीरयुतेतैलेक्षिपेच्छाकं सुखण्डितम् । लवणञ्चार्द्रचूर्णां हरिद्रांहिङ्गुदकंक्षिपेत् ॥ कूल्येवंसर्वशाकानांसाधनेभिहितोविधिः ॥ वास्तूकंकाकमाचीचतण्डुलीयः पुनर्नवा । कोचुकंनालिकापाठातस्यान्तेऽग्नेनतद्वधैः । कासमर्दीयमेथीचपुन्नाटचणकोद्भवम् । एषाद्रस्वरसंरहितंपक्वंसम्यग्विचक्षणैः । एवंवार्त्ताककूष्माण्डपटोलादिफलेष्वपि । तत्रनैविधिरुद्दिष्टोविशेषोयःसकथ्यते ॥ तप्ततैलेक्षिपेच्छाकंवास्तूकादिसुखण्डितम् । लवणंतोयमल्पञ्चसंसिद्धेऽर्द्धमात्रकम ॥ सधान्यवेशनेतक्रेगालितंक्वथितंक्षिपेत् ॥ ततःशुण्ठीजीरकञ्चक्षिपेद्धिङ्गुदकं क्षिपेत् ॥ इत्थमेवापरस्यापिवर्णस्तुकरणंयदि । तत्रवंस्वेच्छयादेयंवर्णकृतप्रथमंस्मृतम् । एवं यत्कथितंशाकंकषायंकटुतिक्तकम् । तदुष्णेनाम्बुनापूर्वंतक्रेणातदनन्तरम् । तप्ततैलेविनिःक्षिप्यरम्ययेश्चयथेच्छया । वर्णेस्वरकर्णेदेयंकुङ्कुमंरक्तचन्दनम् । ताम्बूलंवचयद्युक्तंतत्रतत्रप्रयोजयेत् ॥

शाकचुक्रिका । स्त्री॰ चिञ्चायाम् ॥

शाकटः । पुं॰ शकटवोढरि ॥ शृङ्गातके । बहुवारके ॥ त्रि॰ शकटस्येदमित्यर्थे । शकटोपकरणे ॥ शकटं वहति । शकटादण् ॥ शकटवाह्यभारे ॥ शकटेनलभ्यते । शेषद्रव्ये ॥

शाकटाख्यः । पुं॰ धवद्रुमे ॥

शाकटायनः । पुं॰ मुनिविशेषे ॥

शाकटिकः । त्रि॰ शकटेनगमनकर्त्तरि ॥ शकटेनचरति॰ गच्छति । चरतीति ठक् ॥

शाकटीनः । पुं॰ विंशतितुलापरिमाणे । भारे । आचिते । शलाटे ॥

शाकतरुः । पुं॰ शाकवृक्षे । सागौन॰ इ॰ भा॰ ॥ शाकाख्यस्तरुः ॥

शाकपत्रकः । पुं॰ शिग्रौ ॥

शाकम्भरी । स्त्री॰ । चण्डाम् । दुर्गायाम् ॥ शाकैर्भरणात्पोषणात् ॥ तस्याः स्थानंहिमाद्रेः प्रत्यन्तपर्वतेप्रसिद्धम् ॥ तीर्थविशेषे ॥

शाकम्भरीयम् । न॰ सांभर॰ इ॰ भा॰ प्र॰ लवणविशेषे । अस्यपर्यायगुणायथा । शाकम्भरीयंकथितंगडाख्यंरोमकंतथा । गडाख्यं लघुवातघ्नमत्युष्णंभेदिपित्तलम् ।

तीक्ष्णव्यवायिसूक्ष्मस्वाभिष्यन्दिक
टुपाकि च ॥

शाकयोग्यम् । न॰ धान्याके ॥

शाकराट् । पुं॰ वास्तूके ॥

शाकराजः । पुं॰ वास्तूके

शाकरुण्डः । पुं॰ ग्रन्थिफले ॥

शाकलः । पुं॰ उदीच्यग्रामे ॥ वा
हीकग्रामे ॥

शाकल्यः । पुं॰ ऋषिविशेषे ॥ श
कलस्यगोत्रापत्यम् । गर्गादित्वा
द्यञ् ॥

शाकवालेयः । पुं॰ ब्रह्मयष्ट्याम् ॥

शाकबिल्वः ।) पुं॰ वार्त्ताकौ ।
शाकबिल्वकः ।)

शाकवीरः । पुं॰ जीवशाके ॥ पुन
र्नवायां ।

शाकवृक्षः । पुं॰ शाके । खरप
त्रे । अर्ज्जुनोपमे । क्रकचपत्रे ॥

शाकशाकटम् । न॰ शाकक्षेत्रे ॥
शाकानांभवनङ्क्षेत्रम् । भवने
क्षेत्रे शाकटशाकिनावितिशाक-
टः ॥

शाकशाकिनम् । न॰ शाकशाकटे ॥
शाकानाम्भवनङ्क्षेत्रम् । भवने
क्षेत्रे शाकटशाकिनावितिशाकि-
नः ॥

शाकश्रेष्ठः । पुं॰ न॰ वास्तूकशाके ॥

शाकश्रेष्ठा । स्त्री॰ जीवन्त्याम् । वा
र्त्ताकौ ॥ डिडीशपे ॥

शाकाख्यम् । न॰ पत्रपुष्पादौ । य
था । मूलपत्रकरीराग्रफलकाण्डा
धिरूढकम् । त्वक्पुष्पं कवकञ्चै
तिशाकंदशविधंस्मृतम् ॥ पुं॰
शाकवृक्षे । अतिपत्रे । श्रेष्ठका
ष्ठे । स्थिरसारे । गृहद्रुमे । सा
गौनवृ॰ गौ॰ भा॰ ॥

शाकाङ्गम् । न॰ मरिचे ॥

शाकाम्लम् । न॰ वृक्षाम्ले ॥

शाकाम्लभेदनम् । न॰ चुक्रे । का
ञ्जिकप्रभेदे ॥

शाकालाबूः । स्त्री॰ राजतुम्ब्याम् ॥

शाकिनम् । न॰ महच्छाकवति ।
महच्छाकंशाकी॰ तद्वति ॥ मत्व
र्थेपामादित्वान्नः । शाकोपलालो
दद्रूणाङ्क्षत्वच ॥

शाकिनी । स्त्री॰ दुर्गायाअनुचरीवि
शेषे ॥ शाकयुक्तायांभूमौ ॥ यथा
। शकटः शाकिनीगावोजालमस्य
न्दनंवनम् । अनूपंपर्व्वतोराजादु
र्भिक्षेनवमस्मयः ॥ शकटोधान्या
दिवहनद्वारेणोपजीव्यः । पत्रपुष्प
फलादिषड्विधशाकयोगात्॰ शा-
किनी॰ गृहवाटिका॰ शाकाद्या
हरणेन । गावो । दुग्धादिना ।
जालं । मत्स्याद्याहरणेनअस्यन्द-
नंस्वस्थानाऽत्यागः॰ कृष्यादिलाभेन॰
व्ययाधिक्यनिवृत्त्याच । वनंफलपु
ष्पाद्याहरणेन । अनूपंबहूदकदे

शः॰ समुद्रवालशालुकाद्याहरणे
न । पर्वतगैरिकमृदाद्याहरणेन ।
राजाभिषेकादिमित्यर्थः ॥

शाकी । पुं॰ मत्स्याकौ ॥

शाकुनः । पुं॰ न॰ पशुपक्ष्यादिरूप
शकुनद्वारामनुष्यशुभाशुभनिश्चाय
कग्रन्थे । वसन्तराजादौ ॥

शाकुनिः । त्रि॰ पक्षिजीविनि ॥

शाकुनिकः । पुं॰ जीवान्तके । पक्षि
हन्तरि । शकुनान् हन्ति । पक्षिम
त्स्ये । स्वपर्यायस्यापिग्रहणात् ठक् ॥

शाकुनेयः । पुं॰ क्षुद्रोलूके । पिङ्गले ।
क्षुद्रपेचके । शकुनेरपत्यम् । शुभ्रा
दित्वात् ढक् ॥

शाकुन्तलेयः । पुं॰ भरते । शकुन्तला
या अपत्यम् । स्त्रीभ्यो ढक् ॥

शाकुलिकः । पुं॰ मात्स्यिकविशेषे ।
शकुलान् हन्ति । पक्षिमत्स्येति
ठक् ॥

शाक्करः । पुं॰ अनडुहि ॥

शाक्तः । त्रि॰ सर्वदेवमय्याः शक्तेरु
पासके । शक्तिर्देवतास्य । सास्यदे
वतेत्यण् । यथा । शाक्ता एव द्विजाः
सर्वे न शैवा न च वैष्णवाः । उपासते
यतो देवीं गायत्रीं परमाक्षरीम् ॥ श
क्त्युपासनानन्तरमन्योपासननिषे
धो यथा । अस्याराधनं कृत्वा नान्य
स्याराधनं चरेत् । अन्यस्य स्मरणा
द्वियोगिनी शापमाप्नोतीति दिदिग

वैस्वतन्त्रम् ॥ देवीभक्तापराधस्तु स्व
दातृत्वमुक्तं मुण्डमालातन्त्रे ।
शाक्तान् हिंसन्ति गर्जन्ति निन्दन्ति
बहुजल्पकाः । छिनत्ति तेषां देवे
शी शिरांसि हरवल्लभेति । गर्ज-
न्ति॰ कुप्यन्ति युध्यन्तीत्यर्थः ॥

शाक्तिकः । त्रि॰ शक्त्युपजीविनि ॥
शक्त्या जीवति । वेतनादित्वात् ठ-
ञ् ॥

शाक्तीकः । त्रि॰ शक्तिहेतिके । श
क्तियोधिनि ॥ शक्तिः प्रहरणम
स्य । शक्तियष्ट्योरीकक् ॥

शाक्यः । पुं॰ बुद्धे । शकोऽभिज
नोऽस्य । शण्डिकादिभ्यो ञ्यः ॥
शाक्यमुनौ गौतमवत् ॥

शाक्यमुनिः । पुं॰ शौद्धोदनौ ।
मायादेवीसुते ॥ शकोऽभिजनो
ऽस्य । शण्डिकादिभ्यो ञ्यः ॥ य
द्वा । शाकवृक्षप्रतिच्छन्नं वासं यस्मा
च्च चक्रिरे । तस्मादिक्ष्वाकुवंश्यास्ते
शाक्या इति भुवि स्मृताः इति सुन्द
रानन्दचरितागमे ॥ अयमर्थः ।
केचिदिक्ष्वाकुवंश्या राजपुत्राः पि
त्रा वनवासाय दत्ताज्ञाः गौतमवंश
स्य कपिलस्याश्रमे॰ शाकच्छन्नं वस
तिं कृतवन्त इति हेतोस्ते शाक्याः ।
शाके भवाः । दिगादित्वाद्यत् । त
द्वंश्यावतीर्णो मुनिः । शाक्यश्चा
सौ मुनिश्चेति॰ शाक्यमुनिः ॥

शाक्यसिंहः। पुं॰ सर्वार्थसिद्धे। शाक्यमुनौ॥ शाक्यः सिंह इव। उपमितंव्याघ्रेतिसमासः॥

शाक्री। स्त्री॰ दुर्गायाम्॥

शाखः। पुं॰ छिन्नौ। कारस्ने॥

शाखा। स्त्री॰ पक्षान्तरे॥ बाहौ॥ ग्रन्थभेदे॥ अन्तिके॥ द्रुमाङ्गे। लतायाम्॥ वेदभागे। ऋग्वेदादिक मेघवेदाश्चत्वारः। तत्रैकविंशति शाखऋचः। नवाधिकशतशाखा यजुषः। सहस्रशाखाः साम्नः। पञ्चाशच्छाखा अथर्वणः। अतोक्तं छन्दोगपरिशिष्टे। स्वशाखाश्रय मुत्सृज्य परशाखाश्रयस्तु यः। कर्त्तुमिच्छति दुर्मेधा मोघंतत्तस्य यत्कृतम्॥ यन्नाम्नातं स्वशाखायां पारक्यमविरोधियत्। विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवदिति॥ बह्वृच्यं वा स्वगृह्योक्तं यस्य यत्कर्मकीर्त्तितम्। तस्य तावति शास्त्रार्थे कृते सर्वं कृतं भवेदिति तत्तत्पाठविशेषः॥ शाखति। शाखृ व्याप्तौ। पचाद्यच्। टाप्। यद्वा। शेतेऽस्यां पक्षी। शीङो ह्रस्वश्चेत्युण॰ ह्रस्वाश्चयश्चाचेतिदशपाद्यनुसारिणः॥

शाखाकण्टः। पुं॰ स्नुहीवृक्षे॥

शाखानगरम्। न॰ यन्मूलनगरादन्यत्पुरं तस्मिन्। मुख्यपुराभ्यर्णपुरे। अभिध्यान्दिरमर्थे। यथा। आरभ्यमूलनगरादपरं नगरं हि यत्। तदभिध्यन्दिरमथ शाखानगरमित्यपीति शब्दरत्नावली॥ तत्स्थानीयस्य मूलनगरस्य शाखेव नगरम्॥

शाखापित्तम्। न॰ पाणिपादांसमूलदाहे॥

शाखापुरम्। न॰ शाखानगरे॥ शाखेव पुरं॥

शाखामृगः। पुं॰ कपौ। वलीमुखे। वानरे॥ शाखाचरो मृगः पशुः। शाकपार्थिवादिः॥

शाखामृगाधिपः। पुं॰ सुग्रीवे। शाखामृगाणामधिपः।

शाखाम्ला। स्त्री॰ वृक्षाम्लायाम्॥

शाखारण्डः। पुं॰ स्वशाखांपरित्यज्य शाखान्तराध्ययनकारिणि। अन्यशाखके। स्ववेदशाखामुत्सृज्य परशाखाश्रयकर्मकारिणि॥

शाखारथ्या। स्त्री॰ षोडशहस्तप्रस्थे पथि। यथा। धनूंषि चैव चत्वारि शाखारथ्यास्तु निर्मिताः। त्रिकराचोपरथ्यास्तु द्विकराप्युपरथ्यका॥ इति देवीपुराणम्॥

शाखालः। पुं॰ वानीरवृक्षे॥

शाखाशिखा। स्त्री॰ मूलादारभ्याग्रं यावद्गतायां लतायाम्। अवरोहे॥

शाखिः। पुं॰ तुरुष्के। तुरकस्तान् इ॰ भा॰ प्र॰ देशे॥ शा

खृ० । इन् ॥

शाखी । पुं० पादपे ॥ वेदे ॥ तुरुष्काख्यजने ॥ राजभेदे ॥ शाखाऽस्यास्ति । व्रीह्यादित्वादिनिः ॥ यद्वा । अवश्यं शाखति । शाखृ० । आवश्यकेतिणिनिः ॥

शाखोटः । पुं० सहोड़ा इ० भा० प्र० हर्ष । पीतफले ॥ यथास्यपर्यायगुणाः । शाखोटः पीतफलको भूतावासः खरच्छदः । शाखोटो रक्तपित्तार्शोवातश्लेष्मातिसारजित् ॥

शाखोटकः । पुं० शाखोटे ॥

शाङ्करः । पुं० बलीवर्द्दे ॥ न० छन्दोभेदे ॥ त्रि० शङ्करसम्बन्धिनि । माहेश्वरे । शङ्करप्रोक्ते ॥ यथा । आगमोक्तविधिं हित्वाय: श्राद्धं कुरुते नरः । श्राद्धं तद्विफलं सोऽपि पितृभिर्नरकं व्रजेत् ॥ ततोयं शोणितसमं पिण्डो मलमयो भवेत् । तस्मान्मर्त्यः प्रयत्नेन शाङ्करमतमाश्रयेत् ॥ शङ्करस्यायम् । शङ्करेणप्रोक्तं वा । अण् ॥

शाङ्करिः । पुं० स्कन्दे ॥ गणेशे ॥

शाङ्करी । स्त्री० देवीविशेषे ॥ श्रीगिरीशाङ्करीस्मृतेतिदेवीशाङ्करीतुमहाकालीति देवीगीता । अच शङ्करीशाङ्करीव्यत्ययेनपाठोगीतायांबोध्यः ॥

शाङ्कवी । स्त्री० शङ्कुयादसि ॥

शाङ्खिकः । पुं० काम्बविके । शङ्खवलयादिकर्त्तरि जातिविशेषे ॥ शङ्खः शिल्पमस्य । शिल्पमितिठक् ॥

शाङ्गुष्ठा । स्त्री० गुञ्जायाम् ॥ इ० र० माला ॥

शाटः । पुं० वस्त्रविशेषे । शाटके ॥ शटेःकर्म्मणिघञ् ॥

शाटकः । पुं० न० पटप्रभेदे ॥ यथा आजानुलम्बितमलीमसशाटकानां मिथ्यादपि प्रथमयाचितभाटकानाम् । पुत्रादपि प्रियतमैकवराटकानां धर्मं दिव: पततु मूर्द्धि कराटकानाम् ॥ स्वार्थेकः ॥

शाटिका । स्त्री० शाट्याम् ॥

शाटी । स्त्री० शाटके । स्त्रीपरिधेयवस्त्रे । साड़ी० इ० भा० प्र० ॥ शाट्यते । शट श्लाघायां चुरादिः । सर्वधातुभ्यइन् । कृदिकारादिति ङीष् ॥

शाट्यायनः । पुं० मुनिविशेषे ॥ न० प्रकृतकर्मवैगुण्यप्रशमनार्थे होमे ॥ नायंहोमः सर्वसम्मतः निर्मूलत्वात् । समूलत्वे शाखान्तरीयत्वमितिगौडाः ॥

शाठ्यम् । न० कुसृतौ । कपटे । व्याजे । निकृतौ । शठतायाम् ॥ शठति । शठकैतवे । पचाद्यच् । शठस्य कर्म । ब्राह्मणादित्वात्ष्यञ् ॥

यथा । शठनम् । स्फटिकोऽर्थ्यते ॥

शाणः । पुं० माषचतुष्टये । निष्के । टङ्के ॥ खड्गादितीक्ष्णीकारकयन्त्रे निकषे । कषे । कसौटी० इ० भा० प्र० पाषाणे ॥ शण्यते । शणु दाने । करणे रीतिघञ् ॥ अस्त्रि तिवा । शीतनूकरणे । बाहुलकात् : ॥ न० शणनिर्मितवस्त्रे ॥

शाणकम् । न० शणपुष्पे ॥ तच्छाकप्रकारो यथा । सुस्विन्नं शाणकं पुष्पं तक्रे तैले विपाचितम् । हिङ्गुना वासितं वल्लकचूर्णेनावचूर्णितम् । शणपुष्पं सरं बल्यमस्रक्प्रदरनाशनम् । मधुरं रुचिरं पाके किञ्चिद्विष्टम्भकारकम् ॥

शाणाजीवः । पुं० असिधावके । शस्त्रमार्जे ॥

शाणिः । पुं० पट्टवस्त्रे ॥

शाणितः । त्रि० तेजिते । निशिते ॥

शाणी । स्त्री० प्रावरणान्तरे । शणसूत्रमय्यां पट्टिकायाम् । यथा । शाणीप्राया चिववस्त्रा भिक्षमीप्राया महीरुहः । शूद्रप्रायास्तथा वर्णाभविष्यन्ति कलौ युगे । इ० वि० पु० शाणी० शणसूत्रमयी पट्टिका० मत्तुल्यानि वस्त्राणीति तट्टीका ॥ छिद्रवस्त्रे ॥ हस्तकटाद्यादि सूचनायाम् । मैन० इ० भा० ॥ शणस्य विकारः । तस्य विकारइत्यण् । टिड्ढेति ङीप् ॥

शाण्डकी । स्त्री० मण्डलिपत्तनस्था यां देवतायाम् ॥

शाण्डिल्यः । पुं० गोत्रभक्तिसूत्रयोः कर्त्तरि मुनिविशेषे ॥ शाण्डिल्यो मुनिवर्य्येषु मान्योऽतीवप्रकीर्त्तितः ॥ पावकविशेषे । मालूरे । बिल्व वृक्षे । शण्डते । अण्डिरुजायां स कृतेच । सलिकल्यनिमस्थिभण्डि भण्डिशण्डिपिण्डितुण्डिकुकिभूभ्यइलच् । शाण्डिलस्य मुनेर्गोत्रापत्यम् । गर्गादिभ्यो यञ् । शाण्डिल्यवत्स्वमात्यत्वाद्वा ॥

शाण्डिल्यविद्या । स्त्री० मनोमयात्मनउपासनायाम् । शाण्डिल्येन मुनिना दृष्टा विद्या ॥

शातम् । न० सुखे । त्रि० दुर्बले । निशिते ॥ सुखान्विते । शायते स्म । शो० । क्तः । शाच्छो रन्यतरस्यामिति पक्षे इत्वाभावः ॥ शयति दुःखम् । शाशतेर्वा बाहुलकात्तन् ॥

शातकर्णिः । पुं० मुनिविशेषे ॥

शातकुम्भः । पुं० अश्वमारके । करवीरे ॥ न० काञ्चने ॥ शतकुम्भपर्वते भवम् । अण् ॥

शातकौम्भम् । न० काञ्चने । स्वर्णे ॥ शतकुम्भपर्वते भवम् । तत्र भवइत्यण् । अनुशतिकादीनाञ्चेत्युभय

पदत्वविरितिस्वामी ॥

शातकौम्भाम्बरम् । न० सुवर्णरसाक्ते वस्त्रे ॥

शातनम् । न० कार्श्ये ॥ विशीर्णने । यथा । वसन्ते सर्वसस्यानां जायते पत्रशातनम् । मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः ॥ शदॢ शातने । णिच् । शदेरगता वितितस्व ल्युट् ॥

शातपत्रः । पुं० शातपत्रके ॥ शतपत्रमिव । शर्करादिभ्योऽण् ॥

शातपत्रकः । पुं० चन्द्रिकायाम् । ज्योत्स्नायाम् । प्रकाशे ॥ स्वार्थे संज्ञायां वा० ककनौ ॥ बृ० श० चं० का ॥

शातभीरुः । पुं० मल्लिकाप्रभेदे ॥

शातामनम् । त्रि० शतमानेन क्रीते ॥

शातयिता । त्रि० हन्तरि ॥

शातला । स्त्री० चर्मकषायाम् । सीहुण्डप्रभेदे ॥ शातं सुखं लाति । ला० । कः ॥ शातला कटुका पाके वातला शीतला लघुः । तिक्ता शोधककानाहपित्तोदावर्त्तरक्तजित् ॥

शातह्रदम् । न० विद्युत्सम्बन्धिनि ज्योतिषि ॥

शातितः । त्रि० छिन्ने ॥

शात्रवः । पुं० द्विषि । शत्रौ । स्वार्थेऽण् ॥ न० शत्रुसंहतौ ॥ शत्रुत्वे । अण् ॥

शादः । पुं० कर्दमे । शष्पे ॥ शस्ये । शीयन्तेऽस्मिन्ननेन वा । शदॢ० । घञ् । यद्वा । शीयते० नश्यति । ज्वलितिकसन्तेभ्यो णः ॥ यद्वा । श्यति । शो० । शाशपिभ्यां ददनाविति दः ॥ शद्यतेऽनेन वा । शदॢ० । हलश्चेति भावे घञ् ॥

शादहरितः । त्रि० नवतृणप्रायदेशे । शाद्वले । शादैर्बालतृणैर्हरितः ॥

शाद्वरः । त्रि० शाद्वले ॥ रलयोरभेदः ॥

शाद्वलः । त्रि० शादहरिते ॥ शादा बालतृणमस्मिन् । नडशादाड्ड्वलच् । अप्यत्र चिन्त्य एव शादाड्ड्वलच् । न तु पङ्कवाचिनोऽनभिधानात् ॥

शानपादः । पुं० पारियात्रशैले ॥ चन्दनघर्षणपाषाणे ॥

शान्तः । पुं० अभियुक्ते । शमिनि ॥ रसविशेषे ॥ नयत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ न च काचिदिच्छा । रसः स शान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु समप्रमाणः ॥ त्रि० शमान्विते । शान्ते । संयतान्तःकरणे । अन्तरिन्द्रियनिग्रहकर्त्तरि । प्रशान्तचित्ते । दान्ते ॥ उपप्लवरहिते० सर्वानर्थोपशमरूपे० जात्यादिरहिते० अविकृते० निरस्त

समस्तोपाधिरत्नादिवचे पाद्विविकार शून्ये • आत्मनि ॥ रागादिदोषरहिते । निवृत्तिकतयानिरुद्धेन्द्रियव्यापारे • संस्कारमात्रशेषे • चित्तविचे परहितेयतौ चतुर्थाश्रमरहिते ॥ सर्वविशेषप्रत्यस्तमितरूपे • अविक्रिये • सर्वान्तरे • सर्वबुद्धिप्रत्ययसाक्षिणि • मुख्यआत्मनि । आकाशादिषुस्थूलेषुसत्त्वप्रधानतया • केचिद्विशेषा : शान्ता : सुखा : प्रकाशका : लघवस्ते शान्ता : कथ्यन्ते ॥ शाम्यतिस्म । शम० । क्त : । क्त : । वादान्तशान्तेतिसाधु : ॥ निवृत्ते ॥ यथा • शान्तोरोग : ॥

शान्तनव :, पुं० भीष्मे ॥ शन्तनोरपत्यम् । अण् ॥

शान्तनु :, पुं० कुरुवंशजेनृपविशेषे । प्रातीपे, प्रतीपभूपतनये ॥ योयंगङ्गायांभीष्मंजनयामास ॥ यंयं कराभ्यांस्पृशतिजीर्णंयौवनमेष्यति । शान्तिमाप्नोतिचैवाग्र्यांकर्मणा तेनशान्तनु : ॥ ललितिकातीर्थे ।

शान्तम् । क्ली० वारणे ॥

शान्तमाना : । त्रि० नियतचित्ते । वशीकृतमनसि ॥

शान्ता । स्त्री० दुर्गायाम् ॥ सात्त्विक्यांमनसोवृत्तौ । आमलक्याम् ॥ शमीप्रभेदे । शुभायाम् । भद्रायाम् । अपराजितायाम् ॥ शीवद्यागुणा : ॥

शान्तावग : पुं० अयायाम् ॥

शान्ति : । पुं० अर्हद्विशेषे ॥ जिनचक्रवर्त्तिविशेषे ॥ दशमम न्वन्तरीयेइन्द्रे ॥

शान्ति : । स्त्री० मङ्गले । भद्रे ॥ सम्पूजकानांकुलपालकानांयती-न्द्रयोगीन्द्रतपोधनानाम् । देशस्य राष्ट्रस्यकुलस्यराज्ञ : करोतुशान्तिं भगवान्कुलेश : ॥ विषयेभ्यइन्द्रियोपरतौ । शमथे । शमे । तृष्णाक्षये ॥ तल्लक्षणंयथा । यत्किञ्चिद्वस्तुसम्प्राप्यस्वल्पंवायदिवाबहु । यातुष्टिर्जायतेचित्ते शान्ति : साग द्यतेबुधैरिति ॥ सुशीलस्यभार्यायाम् । यथा । शान्तिलक्ष्मीश्चभार्येद्वेसुशीलस्यचपूजिते । याभ्यांविनाजगत्सर्वमुन्मत्तमिवनारदेति ॥ कामक्रोधाद्यभावे ॥ सर्वसंसारोपरतौ । मुक्तौ । सहेतुकस्यसंसारस्योपशमे । सर्वद्वन्द्वस्युपरतौ ॥ विषयभोगस्पृहानिवृत्तौ । अन्त : करणस्योपशमे ॥ सकार्याविद्यानिवृत्तिरूपायांवेदान्तवाक्यजन्यायां• ब्रह्मात्मैक्यसाक्षात्कृतौ ॥ सर्वलौकिकालौकिककर्मविक्षेपनिवृत्तौ ॥ बाधितानुवृत्त्याऽविद्याकार्यनिवृत्तौ । अविद्यातत्कार्यनिवृत्तिरूपायांमुक्तौ ॥

दुर्गायाम् ॥ यथा । उत्पत्तिस्थिति नाशेषु रजआदिगुणात्मता । सर्वत्र सर्वदेहत्वाच्छान्तित्वाच्छान्तिरुच्यते । गोपीविशेषे ॥ अनर्थनिवृत्तौ ॥ धर्म्मद्वारा यद्दौस्थ्यादुःस्वप्नादिसूचितैर्दृष्टानिष्टैश्च दुरितनिवृत्तौ ॥ यथा शस्त्रप्रहाराणां कवचं विनिवारकम् । तथा दैवोपघातानां शान्तिर्भवति वारणम् ॥ अपि च । रोगकृच्छ्रग्रहादीनां निरासः शान्तिरीरितेति ॥ शमनम् । शम० । स्त्रियां क्तिन् । अनुनासिकेति दीर्घः ॥

शान्तिकामः । त्रि० शान्त्यभिलाषिणि ॥ श्रीकाम: शान्तिकामो वा ग्रहयज्ञं समाचरेत् । वृष्ट्यायुःपुष्टिकामो वा तथैवाभिचरन्नपि ॥

शान्तिगृहम् । न० यज्ञान्ते शान्त्याचये । शान्तिकुम्भजलेन स्नानगृहे । आथर्वणे । इ० हे० च० ॥

शान्तिमार्गः । पुं० दुस्तर्क्कादिरहिते वर्त्मनि ॥

शापः । पुं० आक्रोशे । इदमनिष्टमेषामस्त्वित्येवंरूपे अभिशापे ॥ शापदानात्तपःक्षयः ॥ दिव्ये । शपथे ॥ शपनम् । शप० । घञ् ॥ निन्दायाम् ॥ मिथ्याभिशंसने ॥ अनिष्टाचरणे ॥

शापास्त्रः । पुं० मुनौ ॥

शाफरिकः । त्रि० मात्स्यिकविशेषे ॥ शफरान् हन्ति । पक्षिमत्स्येति ठक् ॥

शाब्दः । त्रि० शब्दजन्ये ॥ शब्दसम्बन्धिनि ॥ शब्दे जातः ० शब्दे भवः ० शब्दस्यायं वा । अण् ॥

शाब्दबोधः । पुं० शब्दार्थज्ञाने ॥ न्यायमते० पदार्थज्ञानजन्यज्ञाने ॥ तस्य करणं पदज्ञानं । तस्य कारणं पदशक्तिज्ञानम् । कदाचित्लक्षणाज्ञानम् । एवमाकाङ्क्षायोग्यतासत्तितात्पर्यज्ञानञ्च ॥ यथा । पदज्ञानन्तु करणं द्वारं तत्र पदार्थधीः । शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणीति० भा० प० ॥ संसारमोहनाशाय शाब्दबोधो न हि क्षमः । न निवर्त्तते तिमिरं कदाचिद्दीपवार्त्तयेति कुलार्णवे १ उल्लासः ॥

शाब्दिकः । पुं० वैयाकरणे ॥ शब्दं करोति • प्रकृतिप्रत्ययविभागेनोत्पादयति • अवैयाकरणे • शब्ददर्दुरंकरोतीति ठक् • अभिधानस्वाभाव्यात् । तेनेह न । शब्दं करोति खरः ॥ आदिशाब्दिका यथा कविकल्पद्रुमे । इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः । पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः ॥ इति ॥

शाब्दीभावना । स्त्री० पुरुषप्रवृत्त्यनुकूलव्यापारविशेषे ॥ यथा । यजेत० इत्यत्रास्य शब्दयम् • यजिधातुः प्र

त्ययश्च । तत्प्रत्ययेप्यस्त्यंशद्वयम् •
आख्यातत्वं • लिङ्त्वञ्च । तत्रा
ख्यातत्वं दशलकारेषु विद्यते • लिङ्
त्वञ्च केवले लिङ्येव । तत्राख्यातत्व
लिङ्त्वाभ्यां भावनैवोच्यते । साद्वि
विधा • शाब्दीभावना • आर्थीभा
वना चेति । तत्र शाब्दीभावना लि
ङ्त्वांशेनोच्यते • लिङ्श्रवणे • अ
यं मां प्रवर्त्तयति • मत्प्रवृत्त्यनुकूलव्या
पारवानयमिति नियमेन प्रतीयमा
नत्वात् । यच्च यस्मात् प्रतीयते • त
त् • तस्य वाच्यम् । यथा गोत्वम्
। स च प्रवृत्त्यनुकूलो व्यापारविशेषो
लोके पुरुषनिष्ठाभिप्रायविशेषः ।
वेदे तु पुरुषाभावाल्लिङादिशब्दनिष्ठ
एव शाब्दीभावनेत्युपदिश्यते । सा
च शाब्दीभावना • अंशत्रयमपेक्षते •
साध्यं • साधन • मितिकर्त्तव्यताञ्च
। साध्यं स्वर्गादि • साधनं लिङादिज्ञा
नस्य करणत्वेनान्वयत्वम् • इतिकर्त्त
व्यता प्राशस्त्यज्ञानमितिकर्त्तव्यता
त्वेनान्वीयते । यथोक्तमेवाएतत् •
यज्ञस्य क्रियते यत् प्रयाजानुयाजादि
ति प्रयाजादिस्तुतिज्ञानम् । तथा
हि • भाव्याकाङ्क्षायां • किं भाव
येत् • स्वर्गं भावयेत् । कारणाका
ङ्क्षायां केन भावयेत् • यागेन भाव
येत् । कथम्भावाकाङ्क्षायां यत्
सन्निधौ पठितमग्न्यमायफलस्तुति
यागातं तद्देवोपकार्य्याकाङ्क्षामामि
तिकर्त्तव्यतात्वेनान्वयमनुभवितुं
योग्यम् । तथा च • प्रयाजानुयाज
सहकृतेन दर्शपौर्णमासेन स्वर्गं भा
व्यः • इति ॥

शामनी । स्त्री • यमाच्यां दिशि ॥

शामिता । त्रि • वधकर्त्तरि ॥

शामित्रम् । न • वधरूपे शमितुः कर्म्म
णि ॥

शामित्रकर्म्म । न • पशुहिंसने । शमि
तुरिदं शामित्रम् • तच्च तत्कर्म्म चेति ॥

शामीलम् । न • भस्मनि । शमीभस्म
नि । शम्या विकारः । शम्याः ष्
लञ् । षित्वान् ङीष् । शामीली
स्रुक् ॥

शाम्बरी । स्त्री • मायायाम् । इन्द्रजा
लादौ ॥ शम्बरस्य दैत्यविशेषस्येय
म् । तस्येदमित्यण् । ङीप् ॥

शाम्भवः । पुं • गुग्गुलौ ॥ कर्पूरे ॥
शिवमल्ल्याम् । विषप्रभेदे ॥ शम्भु
पुत्रे ॥ न • देवदारुणि ॥ त्रि • श
म्भुसम्बन्धिनि ॥ कौलिके । माहे
श्वरे ॥ पुं • शम्भुप्रोक्त आचारे ।
कुलाचारे ॥ यथा । अशाम्भवेन मा
र्गेण देवतास्थापनं चरेत् । न सान्नि
ध्यं भवेत्तत्र देवतायाः कथञ्चन ॥
इहामुत्रफलं नास्ति कायक्लेशो धनक्ष
यः ॥ आगमोक्तविधिं हित्वा यः
आव कुरुते नरः । आव तद्विफलं

स्रोपिपिष्टभिर्नरकं व्रजेत् ॥ ततो यं शोणितसर्वापिण्डो मलमयो भवेत् । तस्मान्मर्त्यः प्रयत्नेन शाङ्करं मतमाश्रयेत् ॥ बहुभावविमुक्तेन सत्यं सत्यं मयोच्यते । अथाभवं कृतं कर्म सर्वं देवि निरर्थकम् ॥ अस्तुतावत्परो धर्म्मः पूर्वधर्मोपि नश्यति । शाम्भवाचारहीनस्य नरकान्नैव निष्कृतिः ॥ शम्भोरयम् । शम्भोरागतः शम्भुमाप्रोक्ता वा ॥ अण् ॥

शाम्भवी । स्त्री० पार्वत्याम् ॥ कुलौमायाम् ॥ नीलदूर्वायाम् ॥

शायिका । स्त्री० शयने ॥ शीङो धात्वर्थनिर्देशे ण्वुल् । वृत्तम् ॥

शार: । पुं० समीरणे । वाते ॥ अक्षोपकरणे ॥ त्रि० शबले । कर्बुरे ॥ पीते ॥ शीर्यतेऽनेन शृणाति वा । शॄ हिंसायाम् । शॄवायुवर्णनिवृतेष्विति घञ् ॥ शृणन्त्यनेन द्यूतकाराः परस्परम् । बाहुलकाद्घञ् ॥ शारो वर्णः । चित्रीकरणमिह धात्वर्थः ॥

शारङ्गः । पुं० सारङ्गविहगे ॥ शारयति० शीयते वातपादिना । शॄ० । तरत्यादिभ्यश्चेत्यङ्गच् ॥ शबले ॥ हरिणे ॥

शारङ्गी । स्त्री० वाद्ययन्त्रविशेषे ॥

शारद: । पुं० अब्दे । वत्सरे ॥ काशे ॥ बकुले ॥ पीतमुद्गे ॥ हरिन्मुद्गे ॥ रोगे ॥ न० सस्ये ॥ श्वेतपद्मे ॥ त्रि० शरज्जाते ॥ नवे । नूतने ॥ अप्रतिभे ॥ शालीने ॥ शृणाति । शॄ० । शॄदृभसोऽदिरिति० अदिः । प्रज्ञाद्यण् ॥ शरदिभवः । सन्धिवेलादीत्यण् ॥ शरदि पुष्प्यति कालात्साधुपुष्प्यत्पच्यमानेष्विति अण् ॥ शरदि पच्यन्ते शारदाः शालयः ॥

शारदकः । पुं० भू०दर्भविशेषे ॥ मुद्गविशेषे । शरदि जाताः । संज्ञायां शरदो वुञ् ॥

शारदा । स्त्री० सरस्वत्याम् । दुर्गायाम् ॥ शरत्काले पुरा यस्मादनवम्यां बोधितासुरैः । शारदा सा समाख्याता पीठे लोके च नामतः ॥ ब्राह्म्याम् ॥ शारिवायाम् ॥ शृणाति जाड्यम् । शॄ० अदिः । अण् । टाप् ॥

शारदिकः । पुं० रोगे । शारदे ॥ विभाषा रोगातपयोरिति ठञ् । पक्षे ० शारदो रोग आतपो वा ॥ न० शरदिभवे० श्राद्धे ॥ श्राद्धे शरद इति ठञ् ॥

शारदी । स्त्री० तोयपिप्पल्याम् ॥ कोजागरपूर्णिमायाम् ॥ शरदिभवा । सन्धिवेलेत्यण् । ङीप् ॥ सप्तपर्णे ॥ शरदि पुष्प्यति । कालात्साधुपुष्प्यदित्यण् । ङीप् ॥

शारदीय: । पुं० दुर्गोत्सवे ॥ यथा ।

अटूरेजगदम्बाया : शारदीयीमहोत्स
व : ॥

शारदीयमहापूजा । स्त्री० शरत्कालि
कदुर्गामहापूजायाम् ॥

शारद्वत : । पुं० कृपे ॥

शारि : । पुं० अक्षोपकरणे । द्यूत
साधने । खेलन्याम् । शारे । गु
टिका० गोट० सारि० इ० भा०
प्र० ॥ स्त्री० शकुनिकाप्रभेदे ॥ यु
द्धार्थगजपर्याणे ॥ व्यवहारान्तरे ॥
शृणाति । शॄ० । श्र: शकुनाविति
० इञ् ॥ कपटे ॥ बह्वादित्वात्प
क्षेङीषि० शारी ॥

शारिका । स्त्री० खगान्तरे । पीतपा
दायाम् । गोराख्याम् । मैना० इ०
भा० ॥ शृणातिदु : खंविरहिणीना
म् । शॄ० । ण्वुल् । प्रत्ययस्थादि
तीत्वम् ॥ वीणावादनदण्डे ॥ इ०
हे० न्द्र : ॥

शारीफलम् । न० अष्टापदे । शारिखे
लनाधारे । शारीणांखेलनाधरपट्टे
। चौपड० इ० भा० शारीणांफल
म्० पट्ट : ॥

शारिफलक : । पुं० न० शारिफले ।
अक्षपीठिकायाम् ॥

शारिवा । स्त्री० गोप्याम् । श्यामा
याम् । अनन्तायाम् । उत्पलशा
रिवायाम् ॥ अस्यागुणा : । श्वेत
कृष्णप्रभेदेनशारिवाद्विविधास्मृता

॥ शारिवायुगलंस्वादुस्निग्धंशुक्रकरं
गुरु । अग्निमान्द्यारुचिश्वासकासा
मविषनाशनम् ॥ दोषत्रयास्रप्रदर
ज्वरातीसारनाशनम् ॥ अपिच ।
एकं वाशारिवामूलंसर्वव्रणविशोध
नमिति ॥ शरणम् । शॄ० । कृमॄ
त्वादिना० इण् । शारिरस्यस्या:
। अन्येभ्योपीतिव : ॥

शारिशृङ्खला । स्त्री० पाशकविशे
षे । पञ्चम्याम् ॥ यथा । चतुरी
तिस्तडीयुतं० पञ्चमीशारिशृङ्
खला । नयपीठोचाष्टकाष्ठो० नव:
स्याज्जयपुत्रक : ॥ एतेपाशकभेदा:
स्यु० जंयकोलाहलोपिच । इति
शब्दरत्नावली ॥

शारी । स्त्री० शारिपदार्थे ॥ कुशाया
म् ॥

शारीर : । पुं० जीवे ॥ न० वृषे ॥ त्रि०
देहजे ॥ शरीरेभव : शरीरेजातो
वा । अण् ॥ कर्मविशेषे । शरीर
स्थितिमात्रप्रयोजने० कौपीनाच्छा
दनादियहणभिक्षाटनादिरूपेयति
स्मातिशास्त्राभ्यनुज्ञाते ॥ शारीरंके
वलंकर्मकुर्वन्नाप्नोतिकिल्बिषमिति
भगवदुक्ते : ॥ शरीरप्रधानै : वाचा
दिभि : साध्येचकर्मणिनतुकेवले
नशरीरेण० पञ्चैतेतस्यहेतवइत्यु
क्ते : ॥ शरीरमात्रसाध्येचकर्मणि
॥ तपोविशेषे ॥ यथा । देवद्विजगु

रूपाणामपूरणं शौचमार्जवम् । ब्रह्म
चर्यमहिंसाच शारीरंतपउच्यते ॥
शारीरकः । पुं॰ जीवे ॥ शरीरमेव
शरीरकम् । तत्रभवः । अण्
। शारीरकंभाष्यमितिव्यभेदोपचा
रात् ॥
शारीरकसूत्रम् । न॰ उत्तरमीमांसा
याम् । अथातोब्रह्मजिज्ञासेत्या
दिव्यासप्रणीतेषु॰ जीवयाथात्म्य
वादिषु वेदान्तार्थसङ्ग्रहवाक्येषु ॥
शारीरकोजीवःससूच्यतेयाथातथ्ये
ननिरूप्यतेस्त्रानीतिव्याख्यानात् ॥
शारीरकीयः । पुं॰ ग्रन्थविशेषे ॥
शारीरकमधिकृत्यकृतोग्रन्थः । अ
धिकृत्यकृतेग्रन्थइत्यर्थे॰छदाच्छः ॥
शारुकः । त्रि॰ हिंसके ॥
शार्कः । पुं॰ शर्करायाम् ॥
शार्ककः । पुं॰ दुग्धफेने । शर्क
रापिण्डे ॥
शार्करः । पुं॰ दुग्धफेने । शर्करेव
। शर्करादिभ्योण् । शर्करान्वित
देशे । शर्करायाम् । शर्करिले ॥
शर्करास्यत्र । देशेलुविलचौचेति
चादण् ॥ त्रि॰ शर्करासम्बन्धि
नि ॥
शार्कराक्ष्यः । पुं॰ जनाख्यर्षौ ॥
शर्कराक्षस्यापत्यम् । गोत्रापत्ये॰
गर्गादित्वाद्यञ् ॥
शार्ङ्गः । पुं॰ न॰ विष्णोर्धनुषि ।

कार्मुकमात्रे ॥ शृङ्गस्यविकारः ।
अनुदात्तादेश्चेत्यञ् ॥ पुं पक्षि
णि ॥ शृणाति । शॄ॰ । गण्श
कुनाविति गण्॰ तस्यनुट् । अथा
अवतीतिधातोर्वृद्धिः ॥ त्रि॰
शृङ्गसम्बन्धिनि ॥ न॰ आर्द्रके ॥
शार्ङ्गधन्वा । पुं॰ विष्णौ ॥ इन्द्रि
याद्यहङ्कारात्मकं॰ शार्ङ्गनामधनु
र्यस्य । धनुषश्चेत्यनङ् ॥ यथा
। भूतादिमिन्द्रियादिञ्चद्विधाहङ्कार
मीश्वरः । बिभर्त्तिशङ्खरूपेणशार्ङ्ग
रूपेणचस्थितिमिति वि॰ पु॰ ॥
शार्ङ्गपाणिः । पुं॰ विष्णौ ॥ शा
र्ङ्गपाणौयस्य सः । प्रहरणार्थेभ्यः
परेनिष्ठासप्तम्याविति पाणेः परनि
पातः ॥
शार्ङ्गी । पुं॰ विष्णौ ॥ शार्ङ्गमस्या
स्ति । अतइनिठनाविति॰ इनिः
। धन्विमात्रे ॥
शार्दूलः । पुं॰ व्याघ्रे ॥ पशुविशे
षे ॥ राक्षसे । उत्तरस्थितःस
त्तमे ॥ यथा॰ राजशार्दूलः ॥
अग्नौ । चित्रके ॥ शारयति । शॄ॰
स्वार्थेणिचः क्विप् । दूयते । टूङ्
परितापे । अन्तर्भावितण्यर्थः ।
बाहुलकात्क् । शार्चासौदूलश्च ।
यद्वा । शृणाति । पिच्छादित्वादूल
च् । बाहुलकाद्दुक् । वृद्धिः ॥
शार्दूलललितम् । न॰ धृति १८

छन्दःप्रभेदे ॥ तल्लक्षणं यथा । मः सौ जः सततसाद्दिनैश्चतुर्भिः शार्दूलललितम् । यथा । कृत्वाकंसमृगेपराक्रमविधिं शार्दूलललितंयश्च क्षितिभारकारिषुसुरारातिष्वतिद्रुतम् । सन्तोषंपरमन्तुदेवनिवहे त्रैलोक्यशरणं श्रेयोनःसततनोत्वपारमहिमालक्ष्मीप्रियतमः ॥

शार्दूलवाहनः । पुं॰ पञ्चविंशति पूर्वजिनान्तर्गतजिने ॥

शार्दूलविक्रीडितम् । न॰ अतिधृति १९ वृत्तप्रभेदे ॥ तल्लक्षणं यथा । सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् । यथा । गोविन्दंप्रणमोत्तमाङ्गरसनेत्वंघोषया हर्निशम्पाणीपूजयतंमनः स्मरपदेतस्यान्वयंगच्छतम् । एवंचेत्कुरुताखिलंममहितंशीर्षादयस्तद्ध्रुवम् नप्रेत्यभवतांकृतेभवमहाशार्दूलविक्रीडितम् ॥

शार्व्वरम् । न॰ अन्धतमसे । ध्वान्ते ॥ त्रि॰ घातुके । शर्व्वरीभवम् । तत्रभवइत्यण् । काणाट्ठञ्चितः ॥ शर्व्वरीसम्बन्धिनि ॥

शार्व्वरी । स्त्री॰ शर्व्वरीम् । रात्रौ ॥

शार्व्वी । स्त्री॰ ऐशान्यांदिशि ॥

शालः । पुं॰ मत्स्यविशेषे । गजकै । गजाड॰ इ॰ प्र॰ ॥ शालिवाहननृपे ॥ मत्स्यविशेषे ॥ सालवृक्षे ॥ शाडाते । शाड़्श्लाघायाम् । कर्म्मणि॰ घञ् । डलयोरैक्यम् ॥ प्राकारे । शीतनकरणे । वाहुलकात्कालनवा ॥

शालग्रामः । पुं॰ हरिक्षेत्रे । गण्डकीशिलायाम् । विष्णवादिदेवानांप्रतिबिम्बरूपेपाषाणविशेषे । गण्डक्यास्त्वेकदेशेचशालग्रामस्थलंस्मृतम् । पाषाणंतद्भवंयत्तच्छालग्राममितिस्मृतम् ॥ शालवृक्षोपलक्षितोग्रामः शालग्रामः शालग्रामेभवः । अण् ॥ अपिपापसमाचारोब्रह्महत्यायुतोऽपिवा । शालग्रामशिलातोयंपीत्वायातिपरांगतिम् ॥ तुलसीचन्दनंचक्रंशङ्खोघण्टाचचक्रकम् । शिलाताम्रस्यपात्रन्तुविष्णोर्नामपदामृतम् ॥ पदामृतन्तुनवभिः पापराशिप्रदाहकम् । वदन्तिमुनयः शान्ताः सर्वशास्त्रार्थकोविदाः ॥ सर्वतीर्थपरिस्नानात्सर्वक्रतुसमर्च्चनात् पुण्यंभवतियद्राजन्बिन्दौबिन्दौतदद्भुतम् ॥ शालग्रामशिलायत्रपूज्यतेपुरुषोत्तमः । तत्रयोजनमात्रन्तुतीर्थकोटिसमन्वितम् ॥ शालग्रामाः समाः पूज्याः समेषुद्वितयंनहि । विषमानैवपूज्याश्चविषमेषुत्रयंनहि ॥ द्वारावतीभ

वंचक्रंतथावैगण्डकोभवम् । उभयोः सङ्गमोयत्रतत्रगङ्गासमुद्रगा ॥ शालग्रामोहरेर्मूर्त्तिर्जगन्नाथस्यभारतम् । कलिंद्रंशहस्राणांययुस्त्यक्त्वाहरेः पदम् ॥ विप्रचक्षत्रियवैश्यानांशालग्रामशिलार्च्चने अधिकारीनशूद्राणांहरेरर्च्चनेतथा ॥

शालग्रामगिरिः । पुं॰ शालग्रामोत्पादकपर्वते ॥

शालङ्कटङ्कट: । पुं॰ मुकेशिनिराक्षसे ॥

शालङ्कायन: । पुं॰ मुनिविशेषे ॥ नन्दिनि । शिवद्वारपाले ॥

शालङ्कायनक: । पुं॰ शालङ्कायनानविषयेदेशे । राजन्यादिभ्योवुञ् ॥

शालङ्कायनजीवसू: । स्त्री॰ व्यासमातरि ॥

शालङ्कि: । पुं॰ मुनिविशेषे । पाणिनौ ॥

शालज: । पुं॰ गर्ज्जकमत्स्ये । शालि ॥

शालनिर्यास: । पुं॰ धूनके । सर्ज्जरसे ॥

शालपर्णिका । स्त्री॰ शालपर्ण्याम् ॥

शालपर्णी । स्त्री॰ ओषधिविशेषे । विदारिगन्धायाम् । अंशुमत्याम् । स्थिरायाम् । शालपाणी॰ इ॰ गौ॰ भा॰ ॥ अस्यागुणायथा । शालपर्णी गरच्छर्द्दिज्वरश्वासातिसारजित् । शोषदोषत्रयहरीवृंहण्युक्तारसायनी ॥ तिक्ताविषहरीस्वादु: क्षतकासक्रिमिप्रणुत् ॥ पाककर्म्मतिङीष् ॥

शालभञ्जिका । स्त्री॰ शालभञ्ज्याम् ॥

शालभञ्जी । स्त्री॰ पञ्चालिकायाम् । दन्तकाष्ठादिनिर्मितपुत्त्रिकायाम् । वेश्यायां ॥

शालव: । पुं॰ लोध्रे ॥

शालवेष्ट: । पुं॰ धूनके । शालस्यवेष्टोनिर्यास: ॥

शालसार: । पुं॰ तरौ । द्रुमे ॥ हिङ्गुनि ॥

शाला । स्त्री॰ गृहे ॥ गेहैकप्रदेशे । द्रुमस्कन्धशाखायाम् । स्कन्धात्प्रथमोत्पन्नप्रधानशाखायाम् ॥ शलस्यच । शलगतौ । हलश्चेति॰ घञ् ॥ यद्वा । शलति । शलचलने । ज्वलितीतिण: ॥ श्यति । शो॰ । बाहुलकात्॰ कालन्शा ॥

शालाकटङ्कम् । न॰ चाणक्यमूलके ॥

शालाकी । पुं॰ अस्त्रवैद्ये ॥ नापिते ॥ शिलधारिणि ॥ इतिकश्चित् ॥

शालाक्यम् । न॰ आयुर्वेदस्याङ्गविशेषे ॥ यथाहसुश्रुत: । तत्र॰ शालाक्यंनाम॰ ऊर्द्ध्वजत्रुगतानांरोगाणां॰ श्रवणनयनवदनघ्राणादिसंश्रितानांव्याधीनामुपशमनार्थंमिति ॥

शालाग्नि : । पुं॰ शालसथ्याग्नौ ॥
शालाङ्की । स्त्री॰ पुत्तलिकायाम् । पञ्चालिकायाम् ॥ इ॰ श॰ र॰ ह्नौ ॥
शालाजिर : । पुं॰ न॰ शरावे ॥
शालाङ्घ्रि : । स्त्री॰ शालविशेषे । शालिखे ॥
शालातुरीय : । पुं॰ पाणिनीयमुनौ ॥ शलातुरोभिजनोऽस्य । तूदीशलातुरेतिछण् ॥
शोलानी । विदार्याम् ॥
शालामृग : । शृगाले ॥
शालारम् । न॰ हस्तिनखे । पुरद्वारसमुच्चये ॥ सोपाने ॥ पक्षिपञ्जरे ॥
शालावृक : । पुं॰ शृगाले ॥ सारमेये ॥ वलीमुखे । मर्कटे । वानरे ॥ शालां वृणोति । वञ् । सलभृशुभ्य : कक् ॥ विडाले ॥
शालि : । पुं॰ गन्धोतौ । गन्धमार्जारे ॥ कलमादिधान्ये ॥ चादिमस्तात्राजशाल्याद्यावोद्भ्या : ॥ सैयथा । राजान्नषष्टिकसितेतररक्तमुण्डस्थूलाशुगन्धतिरियादिकाशालिसंज्ञा : । व्रीहिस्तथैतिदृशधाभुविमाळयथ सर्वान्नमेवगुणनामगणं ब्रवीमि । इतिराजनिर्घण्ट : ॥ शाडाते । शाकृषाज्ञाव्ये । डलयोरैक्यम् ॥ इन् ॥ शाल्यतेवा । शलवे । अथ : । अचट् : ॥ शदा । शुषाति । शृ॰ । वाकुलकादिशालि : । कपिलकादित्वात्सलम् ॥ शालयोविविधा: प्रोक्ता नलता : स्थलजास्तथा । तत्र । कण्डनं विना शुक्ला हैमना : शालय : स्मृता : ॥ शालीनांनामान्याह । रक्तशालि : सकलम : पाण्डुक : शकुनाहृत : । सुगन्धक : कर्दमको महाशालिश्चदूषक : ॥ पुष्पाण्डक : पुण्डरीकस्तथामहिषमस्तक : । दीर्घशूक : कांचनकोहायनोलोध्रपुष्पक : ॥ इत्याद्याशालय : सन्तिबहवोबहुदेशजा : । ग्रन्थविस्तरभीतेस्तेसमस्तानात्रभाषिता: ॥ अथगुणा: । शालयोमधुरा: स्निग्धावल्यावद्धाल्पवर्चस : । कषायालघवोरुच्या : स्वर्यावृष्याश्चबृंहणा: ॥ अल्पानिलकफा: शीता: पित्तघ्नामूत्रलास्तथा । शालयोदग्धमृज्जाता : कषायालघुपाकिन: ॥ सृष्टमूत्रपुरीषारूक्षा : श्लेष्मापकर्षणा : ॥ केदाराबातपित्तघ्नागुरव : कफशुक्रला : । कषायाअल्पवर्चस्कामधुराश्चबलावहा : ॥ केदारा : कृष्टजं बलावहा : ॥ स्थलजा : स्वादव : पित्तकफघ्नावातवह्निदा : । किञ्चितिक्ता : कषायाविपाकेकटुकाश्चपि ॥ स्थलजा :

अकृष्टभूमिजाः स्वयंजाताः ॥ वा
पितामधुराहृष्याबल्याः पित्तप्र
शमनाः । ईषत्तुवराअल्पवर्चस्काः
कषायागुरवोहिमाः ॥ वापिताः
कृष्टक्षेत्रे अकृष्टक्षेत्रे वा ॥ वा
पितेभ्योगुणैः किञ्चिद्धीनाः प्रो
क्तास्त्ववापिताः । कृष्टक्षेत्रे अकृ
ष्टक्षेत्रे वा । रोपितास्तुनवाहृष्याः
पुराणालघवः स्मृताः ॥ रोपिता
रोपिताभूयः शीघ्रपाकागुणाधि
काः ॥ छिन्नरूढाहिमारूक्षाबल्याः
पित्तकफापहाः ॥ बद्धविट्काः
कषायाश्चलघवश्चाल्पतिक्तकाः ॥
रक्तशालिर्वरस्तेषु बल्योवर्ण्यस्त्रिदो
षजित् । चक्षुष्योमूत्रलः स्वर्यः
शुक्रलस्तृड्ज्वरापहः ॥ विषव्रण
श्वासकासदाहनुद्वह्निपुष्टिदः ।
तस्मादल्पान्तरगुणाः शालयोमह
दादयः ॥ रक्तशालिः दाउदखानी•
इतिमगधदेशेयस्यप्रसिद्धिः ॥ इ
ति भावप्रकाशः ॥

शालिकरः । पुं• षण्मावक्षचयो
दशप्रभेदे ॥

शालिका । स्त्री• विदार्याम् ॥

शालिञ्चः । पुं• शाकविशेषे । दीपने ॥

शाली । त्रि• शोभायमाने ॥ शाल
ते । श्लाघत्यने । तच्छीलः ।
णिनिः ॥ पदान्तेयुक्तवाचकोयं-
यथा । स्मितशाली ॥

शालिनी । स्त्री• त्रिष्टुप् ११ छन्दो
भेदे ॥ तल्लक्षणंयथा । मात्तौगौ
चेच्छालिनीवेदलोकैः ॥ यथा ।
चंडीहृत्क्षानवृद्धिंविधत्तेधर्मंधत्ते
काममर्थं सूते । मुक्तिंदत्ते सर्वं
दोपास्यमानापुंसांश्रद्धाशालिनीवि
ष्णुभक्तिः ॥ स्वाधायाम् ॥

शालिनीकरणम् । न• न्यग्भावने ।
तिरस्कारइतियावत् ॥ इ• चि• शेषः ॥

शालिपर्णी । स्त्री• माषपर्ण्याम् ॥

शालिपिष्टम् । न• स्फाटिकोपले ।
धौतशिले ॥

शालिवाहनः । पुं• वर्त्तमानशक
कर्त्तरिनृपविशेषे ॥

शालिहोत्रः । पुं• अश्वे । मुद्गभु
जि । घोटके ॥ मुनिविशेषे ॥

शाली । स्त्री• कृष्णजीरके ॥

शालीनः । त्रि• अधृष्टे । सलज्जे ॥
शालाप्रवेशमर्हति । शालीनकौ
पीनेअधृष्टाकार्ययोरितिसाधुः ॥
शोभमाने ॥ यथा । वनहरिण
शालीननयनाद्धृत्याचार्याः ॥

शालिना । स्त्री• मिश्रेयायाम् ॥

शालीयः । त्रि• शालायाम्भवे ॥

शालुः । पुं• कषायद्रव्ये । चोर
काख्यौषधौ । मण्डूके । भेके ॥
न• शालूके ॥

शालुकम् । न• पद्मसूरणे । शालूके ॥

शालूकम् । न• सौगन्धिकादीनां

कन्दे । पद्मशूरणे ॥ शालूकं शीतलं वृष्यं पित्तदाहास्रनुद्गुरु । दुर्जरं स्वादुपाकञ्च स्तन्यानिलकफप्रदम् ॥ सङ्ग्राहि मधुरं रूक्षं भिस्साण्डमपि तद्गुणम् ॥ जातीफले ॥ शल्यते॰ शलतिशा । शलचलनसंवरणयोः । शलिमण्डिभ्यामूकण्॰ ष्टद्धिश्च ।

शालूकिनी । स्त्री॰ ग्रामविशेषे ॥ शालूकानि सन्त्यस्याः देशे । पुष्करादिभ्यो देशइति॰ इनिः ॥ तीर्थविशेषे ॥

शालूरः । पुं॰ प्लवे । दर्दुरे ॥ शालते । शाडगतौ । खर्जपिञ्जादिभ्य ऊरोलचाविल्यूरः । डलयोरैक्यम् ॥ शालतेवा । शालश्लाघने ॥ पूर्ववदूरः ॥

शालेयः । पुं॰ मिसौ । मधुरायाम् ॥ त्रि॰ शाल्युद्भवेचर्चे । धान्यसामान्यस्य कलमादेश्चोत्पत्तियोग्ये चर्चे ॥ शालीनांभवनं क्षेत्रम् । व्रीहिशाल्योर्ढक् । तदस्यास्ति । चर्चादाच् ॥

शालेयधाराभृत् । पुं॰ गिरिविशेषे । शालेरमौ॰ इ॰ भा॰ प्र॰ । शालिवाहनजन्मस्थाने ॥

शालेया । स्त्री॰ मिश्रेयायाम् ॥

शाल्मलः । पुं॰ शाल्मलिद्रुमे ॥ शाल्मलिद्वीपे ।

शाल्मलिः । पुं॰ स्त्री॰ पिच्छिलायाम् । पूरण्याम् । मोचायाम् । स्थिरायुषि । सेमल॰ सेंमर॰ इ॰भा॰ । षष्टिवर्षसहस्राणि वने तिष्ठति शाल्मलिः ॥ अस्या गुणा यथा । शाल्मलिः शीतलः स्वादुर्रसे पाके रसायनी । श्लेष्मलः स्निग्धवीर्यश्च बृंहणी रक्तपित्तजित् ॥ इति ॥ शालयति । शलचलने णिजन्तः । क्विप् । मलते । मलधारणे । सर्वधातुभ्य इन् । शाल् चासौमलिश्च ॥ द्वीपविशेषे । सहस्रयोजनोन्नतः सूर्यद्युतिशाल्मलिश्च : शाल्मलिद्वीपेऽस्ति । यथा । शाल्मलिः शाल्मलीद्वीपो हैमः सान्ध्रस्निग्धाकभाः । प्रियोमराणां तत्केतुः सततध्यानिवर्षनइति ॥

शाल्मलिकः । पुं॰ रोहितकवृक्षे । कूटशाल्मली ॥

शाल्मली । पुं॰ गरुडे ॥ इ॰ हा॰ को ॥

शाल्मलिनिर्यासः । पुं॰ मोचरसे ॥

शाल्मलिनी । स्त्री॰ शाल्मलीवृक्षे ॥

शाल्मलिपत्रकः । पुं॰ सप्तच्छदवृक्षे ॥

शाल्मलिस्थः । पुं॰ गरुडे । शाल्मलिद्वीपस्थशाल्मलिवृक्षे तिष्ठति । स्था॰ । कः ॥

शाल्मली । स्त्री॰ शाल्मलिवृक्षे ॥ कृदिकारादिति ङीष् ॥

शाल्मलीकन्दः । पुं॰ शाल्मलिवृक्षमूले । विजुले । मलघ्ने ॥

शाल्मलीपुष्पम् । न० पिच्छिलाकुसुमे ॥ तच्छाकगुणाः । शाल्मलीपुष्पशाकन्तु घृतसैन्धवसाधितम् । प्रदरं नाशयत्येव दुःसाध्यञ्च न संशयः ॥ रसे पाके च मधुरं कषायं शीतलं गुरु । कफपित्तास्रजिद्ग्राहि शाल्मलीपुष्पकीर्त्तितम् ॥

शाल्मलीफलः । पुं० तेजःफलवृक्षे ॥

शाल्मलीवेष्टः । पुं० पिच्छायाम् । मोचरसे । मोचस्रावे सेमरगोंद इति ख्याते ॥ शाल्मल्या वेष्टः ॥

शावः । पुं० अर्भके । शिशौ । त्रि० शवसम्बन्धिनि । शव्यते । शव गतौ । घञ् । शवस्यायम् । अण् ॥

शावकः । पुं० शिशौ । बाले । शव्यते । शव० । घञ् । स्वार्थे कन् ॥

शावरः । पुं० पापे ॥ अपराधे ॥ श्वेतलोध्रे । गालवे ॥ शवराणामयम् । तस्येदमित्यण् ॥ शवरस्वामिकृतभाष्ये ॥ न० तन्त्रविशेषे ॥ मन्त्रविशेषे ॥ त्रि० शवरसम्बन्धिनि ॥

शावरभेदाख्यम् । न० ताम्रे ॥

शावरी । स्त्री० शूकशिम्ब्याम् ॥ ङीप् ॥

शावरोत्सवः । पुं० म्लेच्छकृतोत्सवे ॥ यथा । पूजयित्वा महाष्टम्यां नवम्यां बलिभिस्तथा । विसर्जयेद्दशम्यान्तु श्रवणे शावरोत्सवैरित्यादि कालिकापुराणम् ॥

शाश्वतः । पुं० वेदव्यासे । शिवे । त्रि० नित्ये । अनाद्यनन्ते । सदैकरूपे । परमात्मनि ॥ शश्वत् सर्वदा भवति । नापचीयते नापचीयते च यो ह्यशाश्वतः सोऽपचीयतेऽपचीयते च । अयन्तु न तथा ॥ सतते । अनारते । सापेक्षनित्ये ॥ शश्वद्भवः । तत्र भवइत्यण् । अनित्योऽव्ययानां टिलोपो बहिष्ट्वेलोपविधानाज्ज्ञापकात् ॥ पारिभाषिकशाश्वतं यथा गारुडे । शाश्वतं देवपूजादि विप्रदानञ्च शाश्वतम् । शाश्वतीमगुणा विद्या सुहृन्मित्रञ्च शाश्वतमिति ॥

शाश्वतिकः । त्रि० नित्ये ॥ शश्वद्भवः । अध्यात्मादित्वाट्ठञ् । शाश्वतिकइतिनिर्द्देशान्नकादेशः ॥

शाष्कलः । त्रि० आमिषाशिनि ॥ शष्कुलीमांसोपलक्षणम् । तामत्ति । शिषद्वत्यण् । पृषोदरादिः ॥

शाष्कुलिः । त्रि० मांसाशिनि ॥ शष्कुलीमांसोपलक्षणम् । तामत्ति । शिषद्वत्यण् ॥

शाष्कुलिकम् । न० शष्कुलीवृन्दे । शष्कुलीमांससमूहः । अचित्तहस्तिधेनोष्ठक् । त्रि० शष्कुलिप्रिये ॥ शष्कुल्यो भक्तिरस्य अचित्ताद्देशका

शष्कुलाद्दक् ॥ शष्कुलीसदृशे ॥ शष्कुलीव । अङ्गुल्यादिभ्यष्ठक् ॥

शासकः । त्रि॰ शासनकर्त्तरि । उपदेष्टरि । शास्तरि ॥ शास्ति । शासु॰ ण्वुल् ॥

शासनम् । न॰ राजदत्तोर्व्व्याम् ॥ लेखे । लिपौ । लेखायाम् ॥ आज्ञायाम् । प्रवर्त्तनायाम् ॥ शास्त्रे ॥ शास्तौ ॥ पत्रे ॥ श्रुतिरूपेश्वराज्ञावले ॥ शासु अनुशिष्टौ । ल्युट् ॥ । त्रि॰ । शासयितरि ॥ णिजन्ताच्छासेर्नन्द्यादित्वाल्ल्युः ॥

शासनहरः । पुं॰ राजदूते ॥ आज्ञावाहके ॥

शासितः त्रि॰ कृतशासने ॥

शासिता । त्रि॰ शासनकर्त्तरि । उपदेष्टरि । शास्तरि ॥ ब्रह्मादिस्तम्बपर्य्यन्तस्य॰ चेतनाचेतनस्य॰ जगतो नियन्तर्य्यन्तर्य्यामिणि परमात्मनि ॥ योयमग्न्यादीनामौष्ण्यादिनियमो यश्चादित्यादीनां भ्रमणादिनियमः यश्च कर्म्मणां फलं प्रतिनियतमेतत् सर्व्वं परमात्माधीनमस्ति ॥

शास्तिः । स्त्री॰ आज्ञायाम् ॥ राजदण्डे । शासु॰ । बाहुलकात् तिप्रत्ययः इत्त्वाभावश्च ।

शास्ता । पुं॰ उपाध्याये ॥ पितरि ॥ राजनि ॥ बुद्धे ॥ समन्तभद्रे । जिने ॥ त्रि॰ शासके । देशके । शासितरि ॥ शास्ति शिष्यान् इति॰ शास्ता । तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटाविति तृन्॰ तृच् वा । नप्तृ इत्युत्पत्तिपक्षे नियमार्थत्वान्नदीर्घः । पिता तृ॰ शास्तृशब्दः । धाता वाधाता च पौराणो जगतः पतौ शास्तारौ त्रिलोकेस्मिन् धर्माधर्मौ प्रकीर्त्तिताविति वस्तुतस्तु ण्वुल्तृचाविति तृज्बोध्यः ॥ प्रशासितरि । ईश्वरे ॥ सर्व्वेषां वर्णाश्रमाणां तत्तत्कर्म्मण्यधिकृतानां श्रुतिस्मृत्यादिभिरनुशिष्टिकर्त्तरि सतथा । शासिरयं यद्यपि सेट् कस्तथापि बहुतरप्रयोगानुरोधात् नित्यमागमशासनमिति न्यायात्॰ यसितस्कभितेत्यादि छन्दसि निपातनादिडभावः ॥

शास्त्रम् । न॰ । आज्ञायाम् । निदेशे । आगमे । वेदे । शिष्यते॰ अनुशिष्यतेऽपूर्व्वार्थो बोध्यतेऽनेनेति शास्त्रं वेदः ॥ वेदोपजीविषु॰ स्मृतिपुराणागमादिषु ॥ एकप्रयोजनोपनिबद्धेऽशेषार्थप्रतिपादके ॥ छन्दोव्याकरणाभिधानकोषकल्पचतुरङ्गगजतुरगखड्गादिलक्षणग्रन्थाः शास्त्राण्यभिधीयन्ते ॥ प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा । पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते ॥

तच्छास्त्रं त्रिविधं प्रोक्तं सात्त्विकादिविभेदतः। यथोक्तं देवीभागवते। सात्त्विकं तत्र वेदान्तं मीमांसा राजसं मतम्। तामसं न्यायशास्त्रञ्च हेतुवादाभियन्त्रितमिति॥ तत्राध्यात्मशास्त्रातिरिक्तशास्त्रनिन्दा यथा कूलार्णवे। षड्दर्शनमहाकूपे पतिताः पशवः प्रिये। परमार्थं न जानन्ति पशुपाशनियन्त्रिताः॥ वेदशास्त्रार्णवे घोरे उह्यमाना इतस्ततः। षडूर्म्मिनिग्रहग्रस्तास्तिष्ठन्ति हि कुतार्किकाः॥ वेदागमपुराणज्ञः परमार्थं न वेत्ति यः। विडम्बकस्य तस्यैव तत् सर्व्वं काकभाषितम्॥ इदं ज्ञानमिदं ज्ञेयमिति चिन्तासमाकुलाः। पठन्त्यहर्निशं शास्त्रं परतत्त्वपराङ्मुखाः॥ वाक्यच्छन्दोनिबन्धेन काव्यालङ्कारशोभिताः। चिन्तया दुःखिता मूढास्तिष्ठन्ति व्याकुलेन्द्रियाः॥ अन्यथा परमं तत्त्वं जनाः क्लिश्यन्ति चान्यथा। अन्यथा शास्त्रसद्भावो व्याख्यां कुर्व्वन्ति चान्यथा॥ कथयन्त्युन्मनीभावं स्वयं नानुभवन्ति च। अहङ्कारहताः केचिदुपदेशादिवर्ज्जिताः॥ पठन्ति वेदशास्त्राणि बोधयन्ति परस्परम्। न जानन्ति परं तत्त्वं दर्व्वी पाकरसं यथा॥ शिरो वहति पुष्पाणि गन्धं जानाति नासिका।

पठन्ति वेदशास्त्राणि दुर्लभो भावबोधकः॥ तत्त्वमात्मस्थमज्ञात्वा मूढः शास्त्रेषु मुह्यति। गोपः कक्षगते छागे कूपे पश्यति दुर्म्मतिः॥ संसारमोहनाशाय शाब्दबोधो न हि क्षमः। न निवर्त्तेत तिमिरं कदाचिद्दीपवार्त्तया॥ प्रज्ञाहीनस्य पठनं यथान्धस्य च दर्पणम्। देवि प्रज्ञावतः शास्त्रं तत्त्वज्ञानस्य साधनम्॥ अग्रतः पृष्ठतः केचित् पार्श्वयोरिति केचन। तत्त्वमीदृक्तादृगिति विवदन्ति परस्परम्॥ सद्विद्यादानशौर्य्यादिगुणैर्व्विख्यातमानवः। ईदृशस्तादृशश्चेति दूरस्थः कथ्यते जनः॥ प्रत्यक्षग्रहणं नास्ति वार्त्तया ग्रहणं प्रिये। एवं ये शास्त्रसम्मूढास्ते दूरस्था न संशयः॥ इदं ज्ञानमिदं ज्ञेयं सर्व्वं तच्छ्रोतुमिच्छति। दिव्यवर्षसहस्रायुः शास्त्रान्तं नैव गच्छति॥ वेदाद्यनेकशास्त्राणि चाल्पायुर्विघ्नकोटयः। तस्मात् सारं विजानीयात् क्षीरं हंस इवाम्भसः॥ अभ्यस्य सर्व्वशास्त्राणि तत्त्वं ज्ञात्वाथ बुद्धिमान्। पलालमिव धान्यार्थी सर्व्वशास्त्राणि सन्त्यजेत्॥ यथाऽमृतेन तृप्तस्य नाहारेण प्रयोजनम्। तत्त्वज्ञस्य तथा देवि न शास्त्रेण प्रयोजनम्॥ न वेदाध्ययनान्मुक्तिर्न शास्त्रपठनादपि। ज्ञानादेव

हिमुक्तिः स्यान्नान्यथा चीर्णवन्दिते
॥ आगमाः कारणं मुक्तेर्दर्शना-
निमकारणम् । तथैव सर्वकर्मा
णि ज्ञानमेव हि कारणम् ॥ मुक्ति
दा गुरुवागेका॰ विद्याः सर्वा वि
डम्बनाः । काष्ठभारसहस्रेषु॰
एकं सञ्जीवनं परम् ॥ अद्वैतं हि शि
वप्रोक्तं क्रियायाससविवर्जितम् ।
गुरुवक्त्राल्लभ्यते नाधीतागमकोटि
भिः ॥ आगमोत्थं विवेकोत्थं द्वि
धा ज्ञानं प्रचक्षते । शब्दब्रह्मागम
मयं परं ब्रह्मविवेकजम् ॥ अद्वैतं के
चिदिच्छन्ति द्वैतमिच्छन्ति चापरे ।
सम तत्त्वं न जानन्ति द्वैताद्वैतविव-
र्जितम् ॥ द्वे पदे बन्धमोक्षाय
निर्ममेति ममेति च । ममेति बध्य
ते जन्तुर्निर्ममेति विमुच्यते ॥ तत्
कर्म यन्न बन्धाय सा विद्या या विमुक्ति
दा । आयासायापरं कर्म विद्यान्या शि
ल्पनैपुणम् ॥ यावत्कर्माणि दी
प्यन्ते यावत्संसारवासना । यावदि
न्द्रियचापल्यं तावत्तत्त्वकथा कुतः
॥ यावत् प्रयत्नवेगोऽस्ति यावत्-
सङ्कल्पकल्पना । यावन्न मनसः
स्थैर्यं तावत् तत्त्वकथा कुतः ॥
यावद्देहाभिमानश्च ममता यावदेव
हि । यावन्न गुरुकारुण्यं तावत्
तत्त्वकथा कुतः ॥ तावत् तपो
व्रतं तीर्थं जपहोमार्चनादिकम् ।

वेदशास्त्रागमकथा यावत् तत्त्वं न वि
न्दति ॥ तस्मात् सर्वप्रयत्नेन सर्वा
वस्थासु सर्वदा । तत्त्वनिष्ठो भवेद्दे
वि यदीच्छेन्मोक्षमात्मनः ॥ धर्म
ज्ञानसुपुष्पश्च स्वर्गभोगफलस्य च ।
तापत्रयाग्निसन्तप्तश्छायां मोक्षतरोः
श्रयेत् ॥ इति ॥ वह्निपुराणेऽपि ।
पुराणं भारतं वेदा धर्मशास्त्राणि या
नि च । आयुषः क्षपणायैव धर्मं त
स्मैव चाचरेत् ॥ पुत्रदारादिसंसा
रः पुंसां सम्मूढचेतसाम् । विदु
षां शास्त्रसंसारः सद्योगाभ्यासवि
घ्नकृत् ॥ इदं ज्ञेयमिदं ज्ञेयं यः
सर्वं ज्ञातुमिच्छति । अपि वर्षशते
नापि शास्त्रान्तं नाधिगच्छति ॥ वि
ज्ञायाक्षरतन्मात्रं जीवितञ्चापि चञ्च
लम् । विहाय शास्त्रजालानि पारलौ
किकमाचरेत् । पण्डितोऽपि हि मू
र्खोऽसौ भक्तियुक्तोऽप्यभक्तिकः ॥ यः
संसारान्न चात्मानं समुत्तारयितुं क्ष
मः ॥ इति ॥ शैवपाशुपतादिशा
स्त्रोत्पत्तिर्यथागस्त्यवचने ॥ प्रथमं
हि मया प्रोक्तं शैवं पाशुपतादिकम् ।
मच्छक्त्यावेशितैर्विप्रैः सम्प्रोक्ता
नि ततः परम् ॥ कणादेन च सम्प्रो
क्तं शास्त्रं वैशेषिकं महत् । गौतमेन
तथा न्यायं साङ्ख्यन्तु कपिलेन हि ॥
धिषणेन तथा प्रोक्तं चार्वाकमतिगर्हि
तम् । दैत्यानां नाशनार्थाय विष्णु

नाश्रुविरूपिणा ॥ वेदशास्त्रं तथा प्रो
क्तं नमनोमपटादिकम् । आपत्यं
श्रुतिशास्त्राणांदृश्यं यन्लोकगर्हित
म् ॥ कर्मस्वरूपत्यागस्त्वमथवै प्र
तिपद्यते । सर्वकर्मपरिभ्रष्टं कस्म
यन्तु तदुच्यते ॥ गौतमप्रोक्तशास्त्रा
र्थनिरता : सर्व एव हि । शार्गाली
योनिमापन्ना : सन्दिग्धा : सर्वक
र्मसु ॥ शास्त्रविहीनोऽन्ध : ।
यथोक्तम् । अनेकसंशयोच्छेदि प
रोक्षार्थस्य दर्शकम् । सर्वस्य लोच
नं शास्त्रं यस्य नास्त्यन्ध एव स: ॥ इति
॥ शासनम् ० शिष्यतेऽनेनवा । शा
सु अनुशिष्टौ । सर्वधातुभ्यष्ट्रन् ॥
विहायशास्त्रमालानियत्सत्यंतदुपा
श्रूताम् ।

शास्त्रकृत् । पुं० ऋषौ । मुनौ ॥
त्रि० शास्त्रकारे ॥

शास्त्रगण्ड : । पुं० प्रघटाविदि ।
छात्रगण्डे ॥ पदाद्यविदि । श्लोका
द्यवेत्तरि ॥

शास्त्रचक्षु : । न० व्याकरणे ॥

शास्त्रचारण : । पुं० शास्त्रदर्शिनि ॥

शास्त्रज्ञ : । त्रि० शास्त्रविदि । आग
मज्ञे । वक्तुर्योग्ये ॥ यथा । अनि
युक्तोनियुक्तोवाशास्त्रज्ञोवक्तुमर्हति
। दैवींवाचंसवदति शास्त्रमुप
जीवतीति । शास्त्रंजानातिनारद:
। ज्ञा० । क : ॥

शास्त्रतत्त्वज्ञ : । परमार्थविदि ॥ ग
णके । शास्त्रतत्त्वंजानाति । ज्ञा०
। क : ॥

शास्त्रदर्शी । त्रि० शास्त्रज्ञे ॥

शास्त्रदृष्टि : । स्त्री० विवेकिनचक्षुष्म
त्तायाम् ॥

शास्त्रयोनि : । पुं० वेदप्रमाणके ; प
रमात्मनि ॥ शास्त्रंयोनि : कारणं
प्रमाणमस्य । यतोशाब्दमानिभूता
नीत्यादिशास्त्रादेवप्रमाणाज्जगतो
जन्मादिकारणंब्रह्माधिगम्यते ॥ वे
दात्मकनिश्वासे ॥

शास्त्रयोनित्वम् । न० शास्त्रस्यवेद
स्यापिकारणत्वे ॥ शास्त्रयोनि :
कारणम्प्रमाणंयस्य ० तस्यभावे ॥

शास्त्रवित् ० द्र० । त्रि० अन्तर्वाणौ ।
शास्त्रज्ञे ॥ शास्त्रंवेत्ति । विद०
। सत्सूद्विषेत्यादिनाक्विप्

शास्त्रविधि : । पुं० शास्त्रसम्बन्धिलि
ङादिशब्दे । कुर्यान्नकुर्यादित्येवं
प्रवर्त्तनानिवर्त्तनात्मककर्त्तव्याक
र्त्तव्यज्ञानहेतौविधिविधायके ॥
विधिनिषेधातिरिक्तमपिब्रह्मप्रतिपा
दकंशास्त्रमस्तीतिसूचयितुंविधि
शब्द : ॥

शास्त्रशिल्पिन : । पुं० भूम्नि कीरे
षु । काश्मीरदेशे ॥

शास्त्रित : । त्रि० विहिते ॥ शास्त्रं
सञ्जातमस्य । तारकादित्वादित

च् ॥

शास्त्री । त्रि० शास्त्रज्ञानवति ॥ शास्त्रमस्त्यस्यास्मिन्वा । इनि : ॥

शास्त्रीय : । त्रि० शास्त्रेणप्रोक्ते ॥ वृद्धाच्छ : ॥

शास्य : । त्रि० शासनयोग्ये । शासनीये ॥

शिंशपा । स्त्री० पिच्छिलायाम् । अगुरौ । सीसौं इ० प्र० द्रुमे ॥ गुणायथा । शिंशपाकटुकातिक्ता कषायाशोषहारिणी । उष्णवीर्या हरेन्मेद : कुष्ठश्वित्रवमिक्रमीन् ॥ वस्तिरुग्व्रणदाहास्रबलासान्गर्भपातिनीति० भा० प्र० ॥ शिंशपा वातनाशिनीतिराजवल्लभ : ॥ शीघ्र० शीर्षंवापाति । पा० । घातइतिक : । पृषोदरादि : ॥ यद्वा । शिमित्यव्यक्तं शब्दं० शब्देनवा० शपति । शप आक्रोशे । पचाद्यच् ॥ शिंवाभि : शपतीतिवा । देविकाशिंशपेतिनिर्द्देशाद्वाशब्दलोप : ॥

शिक्ष : । त्रि० अव्यवसायिनि ॥

शिक्यम् । न० काचे । दर्भमौञ्जादिरसनारचितदुग्धदध्यादिद्रव्याधारविशेषे ॥ सन्यासिनांभिक्षादिपात्राधारभूते । छीका इ० भा० प्र० ॥ संस्रतेऽस्मात् । स्रंसुअध : पतने । स्रसे : शिकुट्किच्चेति० धातो : शिरादेशोयत्प्रत्यय : कित्० तस्यकुडागमश्च ॥

शिक्या । स्त्री० शिक्ये । काचे ॥

शिक्यत : । त्रि० काचवते । शिक्यस्यापितवस्तुनि ॥ शिक्येधृतम् : प्रातिपदिकाद्धात्वर्थेइतिणिच् । क्त : ॥

शिक्षक : त्रि० शिक्षाकारके शिक्षाभिज्ञे ॥ शिक्षामधीते० वेदवा । क्रमादिभ्योवुन् ॥

शिक्षणम् । न०विद्योपादाने ॥ शिक्षायाम् । शिक्षविद्योपादने । ल्युट् ॥

शिक्षा । स्त्री० वेदाङ्गविशेषे । अकारादिवर्णानांस्थानप्रयत्नादिबोधके० अथशिक्षांप्रवक्ष्यामिपाणिनीयंमतं-यथेत्यादिपाणिन्यादिमुनिप्रोक्ते-शास्त्रविशेषे ॥ शिक्षणे । अध्येनाकष्टे । शिक्ष्यतेस्थानादिकमनया । शिक्ष० । गुरोश्चहल : । टाप् ॥

शिक्षाकर : । पुं० वेदव्यासे । त्रि० शिक्षाकर्त्तरि । शिक्षके ॥

शिक्षाकार : । पुं० पाणिन्यादिमुनौ ।

शिक्षागुरु: । पुं० शिक्षादातरिगुरौ ॥

शिक्षित: । त्रि० कुशले । विज्ञे बोधिते ॥ शिक्षासञ्जाताऽस्य । तारकादित्वादितच् ॥ यद्वा । अशिक्षिष्ट ।

शिख० । अकर्मकत्वात् कर्तरि क्तः ॥

शिखितावरः । पुं० अवरमुखि । छागे ॥

शिख्यः । त्रि० नियम्ये ॥

शिखण्डः । पुं० बर्हे । मयूरपिच्छे । मोरपङ्ख इ० भा० ॥ चूडायाम् ॥ शिखिना अम्यते । अमगत्यादिषु । अमन्ताड्डः । शकन्ध्वादिः ॥

शिखण्डकः । पुं० काकपक्षे । पट्टे इ० भा० । शिखायाम् ॥ यथा । वालानाम् शिरः कार्य्यं शिखण्डमुण्डमेवेति ॥ पुं० न० केकिपुच्छे ॥

शिखण्डिकः । पुं० कुक्कुटे । शिखण्डोऽस्यास्ति । ठन् ॥

शिखण्डिका । स्त्री० शिखायाम् ॥

शिखण्डी । पुं० कलापे । बर्हे । मोरपङ्ख इ० भा० ॥ मयूरे । बर्हिणि ॥ गाङ्गेयारौ । भीष्मरिपौ । द्रुपदराजपुत्रे ॥ कुक्कुटे ॥ वाणे ॥ गोपवेशधरे विष्णौ ॥ शिखण्डो बर्हः कलापोलङ्करणमस्यास्मिन् वास्ति अतइनिठनाविति इनिः ॥

शिखण्डिनी । स्त्री० गुञ्जायाम् ॥ यूथिकायाम् ॥ द्रुपदराजकन्यायाम् ॥ मयूरपिच्छभूषणायाम् ॥ मयूरकलाध्वजे ॥ शिखण्डोऽस्त्यस्याः । इन्नन्तान् ङीप् ॥

शिखण्डी । स्त्री० गुञ्जायाम् ॥ यूथिकायाम् ॥ गौरादित्वान् ङीष् ॥

शिखरः । पुं० न० द्रुमाग्रे । शिरसि । अग्रे ॥ अद्रिशृङ्गे । कूटे । शृङ्गे ॥ पुलके ॥ कक्षे ॥ पक्वदाडिमबीजाभमाणिक्यशकले ॥ अग्रे ॥ कोटौ ॥ शिखाऽस्यास्ति । शिखायाङ्कस्वस्येतिरः ॥ शिखारातिबा । रा० । कः । ङ्यापोरिति ह्रस्वः ॥

शिखरवासिनी । स्त्री० उमायाम् । दुर्गायाम् ॥ सातिभक्तुसुप्रीता देवी शिखरवासिनी । उग्रं अतपसालब्धो यया पशुपतिः पतिः ॥

शिखरा । स्त्री० मूर्वायाम् ॥

शिखरिणी । स्त्री० रसालाप्रभेदे ॥ यथा । गव्यमावर्त्तितं दुग्धं निबद्धं दधिमाहिषम् । एकीकृत्यपटे घृष्टं शुभ्रशर्करयासमम् । एलालवङ्गकर्पूरमरीचैश्च समन्वितम् । नाम्ना शिखरिणी कुर्य्याद्रुचिं सकलवल्लभा ॥ अत्यष्टि १७ प्रभेदे ॥ यथा । रसै रुद्रैश्छिन्ना यमनसभलागः शिखरिणी ॥ यथा । स्तनाद्रस्यभ्रष्टेन नु शिखरिणीदृश्यतिगिरौ । विलीनाः स्मः सत्यं नियतमवधेयं तदखिलैः । इति कश्चन्दोऽनुमितमिमतालापजनितं स्मितं बिभ्रद्देवो जगदवतु गोवर्द्धनधरः ॥ इति श्रीपतिमिश्रोद्धृतिच्छेद । नारीरत्ने ॥ मल्लिकायाम् ॥ रोमावल्याम् ॥ नवमालिकायाम् ॥

द्राक्षाविशेषे ॥ मूर्वायाम् ॥

शिखरी । पुं॰ अपामार्गे । शैले । पर्वते । पादपे । द्रुमे ॥ कोट्टे ॥ कोयष्टौ ॥ वन्दाके ॥ कर्कटशृङ्ग्याम् ॥ कुन्दुरुसंज्ञकनिर्यासे ॥ यावनाले । शिखरमस्त्यस्य । अतइनि : ॥

शिखलोहित : । पुं॰ कुकुरमुडा॰ इ॰ गौ॰ दे॰ भा॰ प्र॰ वृक्षे ॥

शिखा । स्त्री॰ शाखायाम् ॥ बर्हिचूडायाम् । लाङ्गलिक्याम् ॥ अग्रमात्रे ॥ शिरोमध्यस्थकेशेषु । चूडायाम् । केशपाश्यायाम् । चोटी॰ इ॰ भा॰ ॥ अग्निज्वालायाम् । ज्वाले । अर्चिषि ॥ प्रपदे ॥ प्रधाने । शिफायाम् ॥ घृणौ । कामज्वरे ॥ मात्राछन्द : प्रभेदे । यथा । द्विजवरमिह द्विरसगुणितमुपनयतदनुअगणमपिनिधेहि स्वरगुणितमपरदलमपि कुरुवरफणिपतिमुखभणितरुचिरशिखिहि । यथा । बकुलवनमृदुपवनचयनिहतशिरहिशंतसुरभिरयमेति । दयिततमविरहिमनमहृदयमतिलपतिसखियदिहतविधुरयमुदेति ॥ शेते । शीङो [illegible] खः । [illegible] गुण : ॥

शिखाकन्दम् । न॰ गृञ्जने । सलगम॰ इ॰ भा॰ प्र॰ ।

शिखाजट : । पुं॰ ब्रह्मचारिविशेषे ॥ शिखेवजटाजातायस्य स : ॥ अपरे॰ शिर : केशामुण्डितायस्य तथाविधोब्रह्मचारी॰ शिखाजटइत्युच्यते ॥

शिखाखण्डक : । पुं॰ काकपक्षे ॥

शिखातरु : । पुं॰ दीपवृक्षे ॥ दीवट॰ इ॰ भा॰ प्र॰ दीपाधारविशेषे ॥

शिखाधर : । पुं॰ मयूरे ॥ मञ्जुघोषे ॥

शिखाधार : । पुं॰ मयूरे ॥

शिखामूलम् । न॰ गृञ्जने ॥

शिखालु : । पुं॰ मयूरशिखायाम् ॥

शिखावान् । पुं॰ अग्नौ ॥ चित्रके ॥ केतुग्रहे ॥ त्रि॰ शिखायुक्ते ॥ शिखास्त्यस्य मतुप् ॥

शिखावती । स्त्री॰ मूर्वायाम् ॥

शिखावर : । पुं॰ पनसद्रुमे ॥

शिखावल: । पुं॰ शिखिनि । मयूरे ॥ शिखास्त्यस्य । दन्तशिखात्संज्ञायामिति वलच् ॥

शिखावला । स्त्री॰ मयूरशिखायाम् ॥

शिखावृद्धि : । स्त्री॰ कायिकावृद्धौ ॥

शिखावृक्ष : । पुं॰ शिखातरौ ॥

शिखिकण्ठम् । न॰ नीले । मयूरग्रीवे । तुल्याञ्जने ॥

शिखिग्रीवम् । न॰ तुत्थे ॥ शिखिनो ग्रीवा । शिखिग्रीवाअस्यास्ति । तद्वर्णत्वात् ॥ अर्शआद्यच् ॥

शिखिध्वज : । पुं॰ कार्त्तिकेये ॥ शिखीमयूरोध्वजचिह्नमस्य ॥ धूमे ॥

शिखिनो ध्वजः ॥

शिखी । पुं॰ अग्नौ वैश्वानरे ॥ चित्रकवृक्षे ॥ बलीवर्दे ॥ शरे ॥ केतुग्रहे ॥ द्रुमे ॥ मयूरे ॥ कुक्कुटे ॥ हये ॥ शिखाः सन्त्यस्य । शिखा अस्त्यस्य वा । इन्द्रोपतापेति॰ सू॰ निः॰ व्रीह्यादिभ्यश्च ॥ अजलोमनि ॥ सितावरे ॥ मेथिकायाम् ॥ शूकशिम्ब्याम् ॥ त्रि॰ शिखायुक्ते ॥

शिखिनी । स्त्री॰ मयूर॰ शिखायाम् ॥

शिखिपुच्छम् । न॰ मयूरपिच्छे ॥

शिखिप्रियः । पुं॰ लघुबदरे ॥

शिखिमण्डलः । पुं॰ वरुणद्रुमे ॥

शिखिमूलम् । न॰ गृञ्जने ॥

शिखिमोदा । स्त्री॰ अजमोदायाम् ॥

शिखियूपः । पुं॰ श्रीकारीमृगे ॥

शिखिवर्द्धकः । पुं॰ कूष्माण्डे ॥

शिखिवाहनः । पुं॰ कार्त्तिकेये । महासेने ॥ शिखी मयूरो वाहनमस्य ॥

शिखिव्रतम् । न॰ व्रतविशेषे ।

शिग्रुः । पुं॰ शाकमात्रे ॥ शोभाञ्जने । अस्य पर्य्याया यथा । शोभाञ्जनशिग्रुतीक्ष्णगन्धकाक्षीवमोचकाः । रक्तोऽसौ मधुशिग्रुः स्यादिति ॥ अस्य गुणा यथा । शिग्रुस्तु कटुकः पाके तीक्ष्णोष्णो मधुरो लघुः । दीपनो रोचनो रूक्षः क्षारस्तिक्तो विदाहकृत् ॥ संग्राही शुक्रलो हृद्यः पित्तरक्तप्रकोपनः । चक्षुष्यः । कफवातघ्नो विद्रधिश्वयथुक्रिमीन् । मेदोऽपचीविषप्लीहगुल्मगण्डव्रणान् हरेत् । श्वेतः प्रोक्तगुणो ज्ञेयो विशेषाद्दाहकृद्भवेत् । प्लीहानं विद्रधिं हन्ति व्रणघ्नः पित्तरक्तहृत् ॥ मधुशिग्रुः प्रोक्तगुणो विशेषाद्दीपनः सरः । शिग्रुवल्कलपत्राणां स्वरसं परमार्त्तिहृत् ॥ अपि च । लोलम्बराजकविनावनितावतंसे शिग्रोरमुष्य कथितोऽस्ति किमुपयोगः । एतस्य पल्लवरसात् समधोः किमन्यद् दृग्व्याधिमाश्वहरणे महिलाग्रगण्ये ॥ इति ॥ शिनोति । शिञ् निशाने । जम्ब्वादयश्चेति निपातितः ॥ शीक्यते वा । शीकृ सेचने । बाहुलकात् द्रुक्॰ ह्रस्वो॰ गश्च ॥

शिग्रुकम् । न॰ वाह्लीकेप्रसिद्धशाकविशेषे ॥

शिग्रुजम् । न॰ श्वेतमरिचे । शोभाञ्जनस्य बीजे ॥ अस्य गुणाः । चक्षुष्यं शिग्रुजं बीजं तीक्ष्णोष्णं विषनाशनम् । अवृष्यं कफवातघ्नं तन्नस्येन शिरोऽर्त्तिनुत् ॥ त्रि॰ शिग्रुभवे ॥ शिग्रोर्जायते स्म । जनी॰ । डः ॥

शिग्रुपुष्पम् । न॰ शोभाञ्जनकुसुमे । तस्याग्रगुणाः । शिग्रोः पुष्पन्तु कटु तीक्ष्णोष्णं स्नायुशोथनुत् । क्रिमिहृत् कफवातघ्नं विद्रधिप्लीहगुल्म

जित् ॥ मधुशिग्रोस्त्वचि वितरत्नापि
त्तप्रसादनम् ॥

शिग्रुमूलम् । न० शोभाञ्जनजटाया
म् ॥ अस्य गुणाः । धौतं कुञ्जरदन्त
दीप्तिसदृशं सिन्धूत्थतैलामुरीराशौ
सङ्क्रमितं तथौत्तररसं मूलं नवं शिग्रुज
म् । तस्याहो वदनाम्बुजे निविशते
श्रीचन्द्रचूडप्रियापादाम्भोरुहरेणुर
ञ्जितशिरोयः प्राश्निकासि पुमान् ॥
शिग्रुमूलन्तु वातघ्नं श्लेष्मगर्भविनाश
नम् । शमनं स्नायुरोगस्य पित्तकृत्
कफनाशनम् ॥

शिग्रुबीजम् । न० शिग्रुजे ॥

शिङ्घाणम् । न० नासिकामले ॥
शिङ्घ्यते । शिघि घ्राणे । आ
णकोलूधूशिङ्घिधाञ्भ्यः । पृषोद
रादित्वात्पक्षे कलोपः ॥ पुं० श्ले
ष्मणि ॥ न० काचपात्रे ॥ लौहम
ले । मण्डूरे ॥

शिङ्घाणकः । पुं० श्लेष्मणि ॥ न० ना
सिकामले ॥ शिङ्घ्यते । शिघि०
। आणकोलूधूशिङ्घिधाञ्भ्यः ॥

शिङ्घिणी । स्त्री० नासिकायाम् ॥

शिङ्घितः । त्रि० घ्राते ॥

शिक् । स्त्री० शिक्ये ॥ स्निग्धाः सु
शिग्भिर्विदारयेयाव ॥ शिचेः
क्विप् ॥

शिञ्जा । स्त्री० भूषणशब्दे ॥ धनुर्गुणे
॥ शिञ्जनम् । शिजि अव्यक्ते शब्दे
॥ गुरोश्चेत्यप्रत्ययः । टाप् ॥

शिञ्जितम् । न० भूषणध्वाने । नूपुर
शब्दे ॥ शिञ्जनम् । शिजि० । ता
लव्यादिः । भावे क्तः ॥ त्रि० श
ब्दायमाने । कर्त्तरि क्तः ॥

शिञ्जिनी । स्त्री० मौर्व्याम् । धनुर्गु
णे ॥ शिङ्क्ते । शिजि० । आवश्य
के णिनिः ॥

शिण्डाकी । स्त्री० खाद्यद्रव्यविशेषे
राजिकायुक्तैः सर्षपस्वरसैर्मूल
कद्रवैर्निष्पन्नशाकतुल्यपिष्टके ॥ यथा
। शिण्डाकी राजिकायुक्तैः स्यान्मू
लककदलद्रवैः । सर्षपस्वरसैर्वापिश
लिपिष्टकसंयुतैः ॥ सहितैरितिशे
षः । शिण्डाकी रोचनी गुर्वी पित्त
श्लेष्मकरी स्मृता ॥ इति राजनिर्घ
ण्टः ॥

शितः । त्रि० दुर्बले । कृशे ॥ तीक्ष्णे
। निशिते ॥ शायते स्म । शो तनूक
रणे० शोङ्गतौ वा । क्तः । शाच्छो
रितीत्वम् ॥

शितद्रुः । स्त्री० शतद्रुनद्याम् ॥
चौरगोरटे ॥

शितशूकः । पुं० यवे । गोधूमे ॥ शि
तं शूकं यस्य ॥

शिताग्रः । पुं० कण्टके ॥

शितिः । पुं० भूर्जे ॥ त्रि० सिते ।
धवले ॥ असिते । श्यामले ॥ शी
यते० शिनोति स्म वा । शिञ् निशा

ने । क्लिन्० क्लिन्ना । शते : सौ चात्० क्रमितमिशतिसम्भ्रामत हृद्येति० हृत्सचक्रित्० चतहृदा देशोवा ॥

शितिकण्ठः । पुं० शम्भौ । ईशे । शिवे ॥ शितिः कालः कण्ठोऽस्य ॥ दात्यूहखगे ॥

शितिचरः । पुं० सुनिषण्णशाके ॥

शितिवारः । पुं० शाकविशेषे ॥

शितिच्छदः) शितिपक्षः) पुं० हंसे ॥

शितिसारः । पुं० तिन्दुके । स्फूर्जके । तेंदू० हि० प्र० इति ॥ शितिः कालः सारो मज्जा यस्य सः ॥

शितिसारकः । पुं० शितिसारे ॥

शिथिलम् । त्रि० श्लथे । ढीला हि० भा० । न० मन्दबन्धने ॥ श्लथबन्धे ॥ संयोगविशेषे ॥ श्रथमोचने । अजिरशिशिरशिथिलेति किरच्० उपधाया इत्वम्० रेफलोपः प्रत्ययरेफस्य लत्वञ्च निपात्यते ॥

शिथिलितः । त्रि० विश्लथिते ॥

शिनिः । पुं० सात्यकेः पितामहे० क्षत्रियविशेषे ॥

शिनिनप्ता । पुं० सात्यकौ ॥ शिनेर्नप्ता ॥

शिपिः । पुं० रश्मौ ॥ पशौ ॥ पा० ॥ बाहुलकात् किः ॥

शिपिविष्टः । पुं० खलतौ । खल्वाटे । दुश्चर्मणि । पिनाकिनि । शिवे ॥ विष्णौ ॥ यथा । शैत्यात्कथनयोगाच्छीतवारि प्रचक्षते । तत्पानाद्द्रवत्वाच्च वशिपयोरस्मयो मताः । तेषु प्रवेशाद्विश्वेशः शिपिविष्ट उच्यते ॥ शिपिषु० रश्मिषु पशुषु वा विष्टः प्रतिष्ठितो यश्चरूपेणेति तथा ॥

शिप्रः । पुं० कालिकापुराणप्रसिद्धे० सरोवरविशेषे ॥

शिप्रा । स्त्री० अवन्तिदेशप्रसिद्धपुण्यसरिद्विशेषे ॥

शिफा । स्त्री० वटादिद्रुमाणां जटायाम् । मूले ॥ सरिति ॥ मांसिकायाम् ॥ मातरि ॥ शतपुष्पायाम् ॥ हरिद्रायाम् ॥ शेते । बाहुलकात्० शीङः फक् ह्रस्वश्च ॥

शिफाकः । पुं० पद्ममूले ॥

शिफाकन्दः । पुं० करहाटे । पद्ममूले । शिफामूलतरुप्ररोहः तत्र स्थितः कन्दो मूलम् ॥

शिफाधरः । पुं०) शिफाधरा । स्त्री०) शाखायाम् ॥

शिफारुहः । पुं० वटवृक्षे ॥

शिमृडी । स्त्री० क्षुपविशेषे । मतिदायाम् । द्रवत्पत्न्याम् । वातघ्नाम् । गुच्छपुष्पाम् ॥

शिम्बः । पुं० रक्तचक्रमर्द्दके ॥

शिम्बा । स्त्री० सम्याम् । बीजगुप्त्याम् । सेमफली० हि० भा० ॥

शिनोति । शिञ॰ । उणाद्य श्चेतिसाधुः ॥

शिम्बाभवः । पुं॰ शमीधान्ये ॥

शिम्बिः । स्त्री॰ शिम्बायाम् । शिम्बी पुस्तकशिम्बीतिभेदाच्छिम्बिर्द्विधा मता ॥ शिम्बिद्वयञ्च मधुरं रसे पाके हिमं गुरु । बल्यं दाहकरं प्रोक्तं श्लेष्म लं वातपित्तजित् ॥ शिनोति । शि ञ॰ । इन् ॥

शिम्बिकः । पुं॰ कृष्णमुद्गे ॥

शिम्बिका । स्त्री॰ शिम्बायाम् ॥

शिम्बिजः । त्रि॰ शमीधान्ये ॥

शिम्बिपर्णी । स्त्री॰ मुद्गपर्ण्याम् ॥

शिम्बी । स्त्री॰ मुद्गपर्ण्याम् ॥ शूकशि म्ब्याम् ॥ शिम्बायाम् ॥

शिम्बीफलम् । न॰ चाङ्गुल्ये । पीत पुष्पे । काञ्चनपुष्पके ॥

शिरः । पुं॰ पिप्पलीमूले ॥ मस्त के । शिरसि । यथा । शिरोश चौ शिरोऽहन्तौ रजो वा चौरजस्तथे- ति केशान्तरम् । पिण्डं दद्याद्भया शिरैरिति वायवीये ॥ शृणातिर्घञ र्थे कः ॥

शिरःफलः । पुं॰ नारिकेले ॥

शिरःशूलम् । न॰ मस्तकवेदनारो गे ॥ तदौषधं यथा । श्वेतापराजि ता... पिप्पलीशुण्ठिसंयुतम् । ...शिरोलेपाच्छिरःशूलविना शनम् ॥

शिरजः । पुं॰ केशे । चिकुरे ॥

शिरः । न॰ मस्तके । मूर्द्धि ॥ तद्रोगनाशकौषधं यथा । शिरोरो गहरं लेपात् गुञ्जामूलं सकाञ्जिकमि ति ॥ सङ्गीतदामोदरे भङ्गहारवर्ण्ण ने शिरसश्चतुर्द्दशभेदा उक्ताः । यथा । आकम्पितं कम्पितञ्च धुतं वि धुतमेव च । परिवाहितम् आधू तम् अवधूतं तथाञ्चितम् । आ कुञ्चितं परावृत्तम् उत्क्षिप्तम् चाप्यधोगतम् । लोलितं प्रक्ष त्तञ्चेति चतुर्दशविधं शिर इति ॥ प्रधाने ॥ सेनाग्रे ॥ शिखरे ॥ नगाग्रे ॥ वृक्षाग्रे ॥ श्रीयते उष्णीषादिना । श्रिञ् सेवायाम् । श्रयतेः स्वाङ्गे शिरः किच्चेत्यसु न् धातोः शिरादेशश्च ॥

शिरसिजः । पुं॰ कुन्तले । बाले । केशे ॥ शिरसिजातः । सप्तम्या मिति ड । तत्पुरुषे कृतीति॰ हल दन्तादिति अलुक् ॥

शिरस्कम् । न॰ शिरस्त्राणे ।

शिरस्त्रम् । न॰ शिरोरक्षणसंनाहे । शीर्षण्ये । शीर्षके । टोप॰ इ॰ भा॰ ॥ शिरः त्रायतेऽनेन । त्रै ङ् पालने । आतोऽनुपेति कः ॥

शिरस्त्राणम् । न॰ शिरस्त्रे ॥

शिरस्यः । पुं॰ विशदकुन्तलकचे । स्नानादिना निर्मलकेशे । श्री

र्थ्ये ॥ शिरसिभवः शिरसि स्थिता वा । शरीरावयवाद्यत् ॥

शिरा । स्त्री॰ धमन्याम्॰ नाड्याम् ॥ शिनोति । शिञ्॰ बहुलमन्यत्रापीति रक् ॥

शिरापत्रः । पुं॰ हिन्तालवृक्षे ॥ कपित्थे ॥

शिरालम् । न॰ कर्मरङ्गे ॥ त्रि॰ शिरासन्तते ॥

शिरालकः । पुं॰ अस्थिभङ्गवृक्षे ॥

शिरावृत्तम् । न॰ सीसके ॥

शिरिः । पुं॰ शलभे हिंस्रे ॥ हन्तरि ॥ शृणाति । शॄ॰ । कॄगॄशॄपॄकुटीत्यादिना इः ॥ खड्गे ॥ शरे ॥

शिरीषः । पुं॰ कपीतने । भण्डिले । सिरसइति [illegible] शिरीषो मधुरोऽनुष्णः [illegible] । दोषशोथविसर्पघ्नः [illegible] विषापहः ॥ शृणाति [illegible] । शॄ॰ । शॄपॄभ्यां कित् इति॰ ईषन् ॥

शिरीषपत्रिका । स्त्री॰ श्वेतकिणिह्याम् ॥

शिरोगृहम् । न॰ चन्द्रशालायाम् ॥ शिरसिगृहम् । इ॰ हि॰ न्द्रः ॥

शिरोधरा । स्त्री॰ ग्रीवायाम् । शिरसोधरा ॥ इ॰ हि॰ न्द्रः ॥

शिरोधानम् । न॰ उपधाने । गण्डे । सिराहना॰ इ॰ भा॰ ॥ शिरोधीयतेऽत्र । डुधाञः करणाधिकरणयोश्चेत्यधिकरणे ल्युट् ॥

शिरोधिः । स्त्री॰ ग्रीवायाम् । शिरोधीयतेऽस्याम् । कर्मण्यधिकरणे चेति किः ॥

शिरोमणिः । पुं॰ स्त्री॰ शिरोधार्यरत्ने । चूडामणौ ॥ शिरसः मणिः ॥

शिरोमर्म्मा । पुं॰ शूकरे ॥

शिरोरत्नम् । न॰ शिरोमणौ ॥ शिरसोरत्नम् ॥

शिरोरुजा । स्त्री॰ सप्तपर्णवृक्षे । शिरोरोगे ॥

शिरोरुहः । पुं॰ केशे मूर्द्धजे । शिरसि रोहति । इगुपधेति कः ॥

[illegible]रोगः । पुं॰ शिरपीडायां ॥

[illegible]रोवल्ली । स्त्री॰ बर्हिचूडायाम् ॥

शिरोवृत्तम् । न॰ मरिचे ॥ श्रीदेवीभागवते द्वादशस्कन्धे श्रीनारायणप्रोक्तव्रतविशेषे ॥

शिरोवृत्तफलः । पुं॰ रक्तापामार्गे ॥

शिरोवेष्टः । पुं॰ उष्णीषे । चेलोण्डुके ॥ इ॰ चि॰ शेषः ॥

शिरोवेष्टनम् । न॰ शिरोवेष्टे ॥

शिरोस्थि । न॰ मस्तकास्थनि । करोटी । शिरस्त्राणे ॥

शिरीषिका । स्त्री॰ वारिशिरीषिका

याम् ॥ यथा । चिदोषविषकुष्ठार्शो हरीवारिशिरीषिका ॥

शिलः । पुं॰ न॰ कणिशाद्यर्जने । लूनकेदारशेषधान्ये । मञ्जर्यात्मकानेकधान्योञ्छने ॥ शिलति । शिल उञ्छे । कः घञ् वा । संज्ञापूर्वकत्वान्न गुणः ॥

शिलकः । पुं॰ वेदप्रसिद्धमुनिविशेषे ॥

शिलगर्भजः । पुं॰ पाषाणभेदने ॥

शिलहट्टः । पुं॰ देशविशेषे ॥ यथा । गणेश्वरं समाराध्य महीदध्यन्तगं शिवे । शिलहट्टाभिधो देशः पर्वतेसिष्ठतिप्रिये ॥

शिला । स्त्री॰ पाषाणे । प्रस्तरे ॥ मनःशिलायाम् ॥ द्वाराधःस्थितदारुणि ॥ स्तम्भशीर्षे । कर्पूरे । टाप् ॥

शिलाकर्णी । स्त्री॰ शल्लकीवृक्षे ॥

शिलाकुट्टः ।) शिलाकुट्टकः ।) पुं॰ पाषाणदारणे । टङ्के । शिलाश्ट॰ हु॰ भा॰ प्र॰ ॥

शिलाजम् । न॰ शैलेये । लौहे ॥

शिलाजतु । न॰ पर्वतजातोपधातुविशेषे । सिलाजीत॰ हि॰ भा॰ प्र॰ । अस्य पर्यायादयो यथा । गैरेयमर्थ्यं गिरिजमश्मजञ्च शिलाजत्वित्यमरः । शिलाव्याधी ॥ निदाघघर्मसन्तप्ताधातुसारं धराधराः । निर्यासवत्प्रमुञ्चन्ति तच्छिलाजतु कीर्त्तितम् ॥ सौवर्णं राजतं ताम्रमायसञ्च चतुर्विधम् । शिलाजत्वद्रिजतु च शैलनिर्यास इत्यपि । गैरेयमश्मजञ्चापि गिरिजं शैलधातुजम् । शिलाजं कटु तिक्तोष्णं कटुपाकं रसायनम् । छेदियोगवहं हन्ति कफमेदोऽश्मशर्कराः ॥ मूत्रकृच्छ्रं क्षयं श्वासं वाताशीसि पाण्डुताम् । अपस्मारं तथोन्मादं शोथकुष्ठोदरकृमीन् ॥ सौवर्णन्तु जवापुष्पवर्णं भवति तद्रसात् । मधुरं कटु तिक्तोष्णं कटुपाकं रसायनम् ॥ छेदियोगवहञ्च शीतलं कटुपाकि च । राजतं पाण्डुरं शीतं कटुकं स्वादुपाकि च ॥ ताम्रं मयूरकण्ठाभं तीक्ष्णमुष्णञ्च जायते । लौहं जटायुपक्षाभं तत् तिक्तं लवणं भवेत् । विपाके कटुकं शीतं सर्वश्रेष्ठमुदाहृतम् ॥ अस्य शोधनप्रकारो भावप्रकाशादितोऽवधेयः ॥ शिलाया जत्विव ॥ षष्ठीतत्पुरुषः ॥

शिलाञ्जनी । स्त्री॰ कालाञ्जनीवृक्षे ॥

शिलाटकः । पुं॰ अट्टे । अट्टालके ॥ बिले । गर्त्ते ॥ ह॰ मे॰ नी॰ शिलाट्टयोरिति मुद्रितहेमचन्द्रे पाठः ॥

शिलाटिका । स्त्री॰ रक्तपुनर्नवायाम् ॥

शिलात्मज : । पुं॰ लौहे ॥

शिलात्मिका । स्त्री॰ मूषायां ॥

शिलादद्रु : । पुं॰ शैलेये । शिलाजतुनि ॥

शिलाधातु : । पुं॰ सितोपले । खट्याम् । सेलखड़ी॰ इ॰ भा॰ ॥ स्वर्णगैरिके । सोनागेरु॰ इ॰ भा॰ प्र॰ ॥

शिलापट्ट : । पुं॰ निघर्षणशिलायाम् । सिलवट्॰ भा॰ ॥

शिलापुत्र : । पुं॰ घर्षणशिले । सिलबट्टा॰ लोढा॰ इ॰ भा॰ प्र॰ ॥

शिलापुष्पम् । न॰ शैलेये । अश्मपुष्पे । शिलाजतुनि ॥

शिलाभवम् । न॰ शिलापुष्पे ॥

शिलाभेद : । पुं॰ पाषाणभेदनिष्ठ र्ते ॥ पाषाणभेदकार्ये ॥

शिलारम्भा । स्त्री॰ काष्ठकदल्याम् ॥

शिलावल्का । स्त्री॰ औषधद्रव्यविशेषे । वल्कलायाम् । शैलगर्भायाम् । शिलावल्क॰ इ॰ भा॰ प्र॰ ॥

शिलाव्याधि : । पुं॰ शिलाजतुनि ॥

शिलासनम् । न॰ शैलेये । पाषाणरचितासने ॥

शिलासन्धि : । पुं॰ पर्वतगह्वरे । गुहायाम् ॥

शिलासारम् । न॰ लौहे ॥

शिलाह्वम् । न॰ शिलाजतुनि ॥

शिलि : पुं॰ भूर्जपत्रवृक्षे । स्त्री॰ द्वाराध : स्थितकाष्ठे ॥

शिलिन्ध्र : । पुं॰ मत्स्यविशेषे ॥ यथा । शिलिन्ध्र : श्लेष्मलो बल्यो विपाके मधुरो गुरु : । आमवातकरो हृद्यो वातपित्तहरो मत : । इ॰ रा॰ भ : ॥

शिली । स्त्री॰ गण्डूपद्याम् । स्तम्भशीर्षे । द्वाराध : स्थितदारुणि ॥ शिलति । शिल॰ । इगुपधेति क : । गौरादित्वात् ङीष् ॥

शिलीन्ध्र : । पुं॰ मत्स्यविशेषे । विचफले ॥ यथा । शिलीन्ध्र : श्लेष्मलो बल्यो विपाके मधुरो गुरु : । वातपित्तहरो हृद्य आमवातकरश्च स : ॥ तरुप्रभेदे ।। न॰ कवके । छत्राके । कदलीपुष्पे ॥ विपुटाख्ये ॥

शिलीन्ध्रकम् । न॰ हिलीरे । गोमयच्छत्रिकायाम् ॥

शिलीन्ध्री । स्त्री॰ विहगीविशेषे ॥ गण्डूपद्याम् ॥ मृदि ॥

शिलीपद : । पुं॰ श्लीपदाभिधपादरोगे । पाइवल्मीके । गोद॰ इ॰ गौ॰ भा॰ प्र॰ । पीलुपांव॰ इ॰ भा॰ ॥ अस्य विप्रकृष्टनिदानं सामान्यलक्षणञ्चाह । पुराणोदकभूयिष्ठा : सर्वर्त्तुषु च शीतला : । ये देशास्तेषु जायन्ते श्लीपदानि विशेषत : ॥ य : सज्वरो वङ्क्षणजो भृ-

नि॰ : श्रीशोभनापादगतः क्रमे
णातनश्रीपदंत्वात्प्रकरणेनैवशिल्प
ष्ठनासामुपिकीचिद्राहुः ॥

शिलीमुखः । पुं॰ अली । भ्रम
रे ॥ काण्डे । बाणे । शिली॰
शल्यं मुखे यस्य ॥

शिलूषः । पुं॰ वृक्षविशेषे ॥

शिलेयम् । न॰ शैलजे । शिलेश ।
शिलावाढः ॥

शिलोच्चयः । पुं॰ शैले । गिरौ ॥
शिलाभिरुच्चीयते । चिञ्॰ । ए
रच् । शिखरी ॥

शिलोञ्छः । पुं॰ उञ्छशिले ॥

शिलोत्थम् । न॰ शैलेये ॥

शिलोद्भवम् । न॰ शैलेये । चन्द
नविशेषे ॥ यथा । सुशीतलं चन्द
नं यत्तु तत्पर्यायकमुच्यते । उभयो
स्तत्पर्यायेऽसौ मयेऽनिशिलोद्भव-
म् ॥

शिलौकाः । पुं॰ गरुडे ॥

शिल्पम् । न॰ स्रुवे ॥ क्रियाचातुर्ये
। कलादिकर्मणि । हस्तव्यापार
रूपे॰ चित्रादिकर्मणि ॥ कला॰
[illegible]नादिरूपा च तुःषष्टिभेदभि
न्ना [illegible]स्वर्णकारादिकाकर्म-
र्म यत्र । क्रियाकौशल्ये । क्रिया
ऽभ्यासपूर्वकज्ञानविशेषे ॥ शील्य
ते॰ शल्यते वा । शील समाधौ॰
शल गतौ वा । [illegible]शिल्पशब्दः

व्यपपर्तल्पाद्भुतिसाधुः ॥

शिल्पकारः । पुं॰ शिल्पिनि ॥

शिल्पकारी । त्रि॰ शिल्पकर्मकर्त्तरि
। सङ्करजातिविशेषे ॥ तदुत्पत्तिर्य
था । विश्वकर्मा च शूद्रायां वीर्याधा
नं चकार सः । ततो बभूवुः पुत्रा
श्च नवैते शिल्पकारिणः ॥ मालाका
रः कर्मकारः शङ्खकारः कुविन्द
कः । कुम्भकारः कांस्यकारः षडे
ते शिल्पिनां वराः ॥ सूत्रधारश्चित्रक
रः स्वर्णकारस्तथैव च । पतितास्ते
ब्रह्मशापादयाज्या वर्णसङ्कराः ॥
स्वर्णकारः स्वर्णचौर्याद्ब्राह्मणानां
द्विजोत्तम । बभूव सद्यः पतितो ब्र
ह्मशापेन कर्मणा ॥ सूत्रधारो द्विजा
तीनां शापेन पतितो भुवि । शीघ्रञ्च
यज्ञकाष्ठञ्च न ददौ तेन हेतुना ॥ व्य
तिक्रमेण चित्राणां सद्यश्चित्रकरस्तथा
। पतितो ब्रह्मशापेन ब्राह्मणानाञ्च
कोपतः । कश्चिद्वणिग्विशेषश्च संस
र्गात्स्वर्णकारिणः । स्व[illegible]थीद्वि
द्वेषात्पतितो ब्रह्मशापतस्त्विति ब्र॰ वै
॰ पु॰ ब्र॰ खण्डे १० अध्यायः ॥

शिल्पयोगः । पुं॰ क्रियाकौशल्ये ॥

शिल्पशाला । स्त्री॰ स्वर्णकारादिका
रूणां कर्मगृहे । आवेशने । कारखा
ना॰ इ॰ प्र॰ ॥ शिल्पस्य शाला ॥

शिल्पशास्त्रम् । न॰ वास्तुशास्त्रादि
शिल्पकर्मग्रन्थे ॥

शिल्पिका । स्त्री॰ तृणविशेषे ॥

शिल्पी । त्रि॰ कारौ । शिल्पविद्याव्यवसायिनि कारकर॰ इ॰ भा॰ प्र॰ ॥ यथा । तन्तुवायस्तन्तुवायश्च नापितो रजकस्तथा । पञ्चमश्चर्मकारश्च कारवः शिल्पिनो मताः ॥ अपि च । मालाकारः कर्मकारः शङ्खकारः कुविन्दकः । कुम्भकारः कांसकारः षडेते शिल्पिनां वराः ॥ सूत्रधारश्चित्रकरः स्वर्णकारस्तथैव च । पतितास्ते ब्रह्मशापादयाज्या वर्णसङ्कराः ॥ शिल्पं क्रियाकौशलम् अस्त्यर्थे इनः ॥ शिल्पिनो वर्णसङ्कराः ॥

शिल्पिनी । स्त्री॰ कोलदलौषधौ ॥

शिल्पशाला । स्त्री॰ शिल्पशालायाम् । आवेशने ॥ शिल्पिनां शाला ॥

शिवः । पुं॰ शम्भौ । ईशे । पशुपतौ । शूलिनि । महेश्वरे । महादेवे । हरे । चन्द्रशेखरे । अप्रतिहतनिरतिशयसर्वार्थदृक्क्रियाशक्तौ ॥ नामस्मरणमात्रेणास्मत्पापावनः शिवः । परिशुद्धे परमानन्दबोधरूपे ॥ सर्वद्वैतोपशमत्वात् । तुरीये ॥ मोक्षे ॥ वेदे । कीले । कीलकयष्टौ ॥ गुग्गुलौ ॥ पुण्डरीकद्रुमे ॥ कृष्णधुस्तूरे । पारदे । देवे । सुरे ॥ विष्कम्भादिषु विंशतितमे योगे ॥ अत्र जातस्य फलं यथा । महेशभक्तः श्रुतिपारदृश्वा जितेन्द्रियश्चाकृतनुर्महात्मा । शिवाभिधानः खलु योगराजः प्रसूतिकाले यदि मानवानाम् ॥ आर्द्रानक्षत्रे ॥ पञ्चमात्रस्य प्रथमपर्याये । यथा • ऽऽऽ • ॥ शेतेऽस्मिन् सर्वम् शेतेऽनिनशौ । शीङ् स्वप्ने । सर्वनिघृष्वरिष्वलष्वशिवपट्वप्रह्वेष्वा अतन्त्रे । इति शीङो वन् ह्रस्वश्च निपात्यते ॥ न॰ कल्याणे । मङ्गले । क्षेमे ॥ जले । सुखे ॥ समुद्रलवणे ॥ सैन्धवे ॥ श्वेतटङ्कणे ॥ शिवं सुखं तदस्यास्ति अर्श आद्यच् ॥ शिवयति तत्करोतीति णिजन्तात् । पचाद्यच् ॥

शिवकः । पुं॰ कीलके । बन्धनकाष्ठे । खूंटा॰ इ॰ भा॰ ॥ गवां गात्रकण्डूयनार्थं गोष्ठे निखातस्तम्भे ॰ इति सुभूतिः ॥ ऽतिगात्रक काण्डूम॰ शेतेऽस्यां । शीङ्कर्मणि । शीङ् स्वप्ने । सर्वनिघृष्वेति साधुः । स्वार्थे कः ॥

शिवकरः । त्रि॰ मङ्गलकारके ॥ पुं॰ अतीतकल्पार्हद्भेदे ॥

शिवकीर्त्तनः । पुं॰ भृङ्गरीटे शिवगणे ॥ असुरद्विषि । हरौ ॥ शौरौ ॥

शिवचर्मम् । न॰ । स्थापितेशस्य प

रित: शतहस्तप्रमाणे सिद्धस्थाने ।
तदुक्तं श्रीमहानिर्वाणे । यथा ।
लिङ्गरूपधरं शम्भुं परितो दिक्षु विदिक्षु
च । शतहस्तप्रमाणेन शिवक्षेत्रं
प्रकीर्त्तितम् ॥ अस्य माहात्म्यम
पि । ईशस्य च महापुण्यं सर्वतीर्था
धिकोत्तमम् । यत्रामरा विराजन्ते
सर्वतीर्थानि सर्वदा ॥ सप्तमार्षं
[illegible]
सर्वपापनिर्मुक्तो यात्यन्ते शङ्कराल
यम् ॥ अत्र यत् क्रियते कर्म स्वल्पं
वा बहुलं तथा । प्रभावाद्धूर्जटेस्त
स्य तत्तत्कोटिगुणं भवेत् ॥ यत्र
तत्र कृतात् पापात् मुच्यते शिवसन्नि
धौ । शैवक्षेत्रे कृतं पापं वज्रलेप
समं प्रिये ॥ पुरश्चर्या जपं दानं श्राद्धं
तर्पणमेव च । यत् करोति शिवक्षे
त्रे तदनन्ताय कल्पते ॥ पुरश्चर्याश
तं कृत्वा यच्छशिदिनेशयोः । य
त् फलं तदवाप्नोति सकृज्जप्त्वा शि
वान्तिके ॥ गयागङ्गाप्रयागेषु कोटि
पिण्डप्रदो नरः । यत् प्राप्नोति तद
त्र सकृत् पिण्डप्रदानतः ॥ अति
पातकिनो ये च महापातकिनश्च ये ।
शैवतीर्थे कृतश्राद्धास्ते यान्ति परां
गतिम् ॥ लिङ्गरूपी जगन्नाथो देव्या
श्रीदुर्गया सह । यत्रास्ति तत्र तिष्ठ
न्ति भुवनानि चतुर्द्दश ॥ अथापि ते
शम्भोर्माहात्म्यं किञ्चिदेतत्प्रकाशि

तम् । अनादिभूतभूतेशमहिमा
वागगोचरः ॥ महापीठस्य शार्व्व
या मस्पृश्यस्पर्शदूषणम् । विद्यते विद्य
ते नैतल्लिङ्गरूपधरे हरे ॥ यथा चक्रा
र्च्चने देवि कोऽपि दोषो न विद्यते । शि
वक्षेत्रे महातीर्थे तथा जानीहि कालि
के ॥ बहुना किमिहोक्तेन सततं गो
सव्यमुच्यते । प्रभावः शिवलिङ्गस्य
न सम्यक् ज्ञायते ॥ अथ स्फटिक
तं लिङ्गं युक्तं वेदिकया प्रिये । सा
धकः पूजयेद्भक्त्या स्वाभीष्टफल
सिद्धये इति ॥

शिवगतिः । पुं॰ भूतार्हद्विशेषे ॥

शिवधर्मजः । पुं॰ मङ्गलग्रहे ॥

शिवङ्करः । त्रि॰ मङ्गलकर्त्तरि । शं
करे ॥

शिवचतुर्द्दशी । स्त्री॰ चतुर्द्दशीकर्त्त
व्यशिवव्रतविशेषे ॥ फाल्गुनकृ
ष्णचतुर्द्दश्याम् । शिवरात्रौ ॥

शिवज्ञा । स्त्री॰ शिवोपासिकायाम्
। च मल्लायाम् ॥

शिवज्ञानम् । न॰ शुभाशुभकालबो
धकशास्त्रे ॥

शिवतातिः । स्त्री॰ कल्याणकारि
ण्याम् । शङ्कर्याम् ॥

शिवदः । त्रि॰ परमसुखदे ॥

शिवदत्तम् न॰ विष्णुचक्रे । त्रि॰
शिवेन॰ शिवाय वा दत्ते द्रव्यमात्रे ॥

शिवदारु । न॰ देवदारुवृक्षे ॥

शिवदूतिका । स्त्री० मातृकाविशेषे ॥

शिवदूती । स्त्री० भवान्याम् । दुर्गायाम् ॥ यतोनियुक्तो दौत्येन तया देव्या शिवः स्वयं । शिवदूतीति लोकेऽस्मिंस्ततः साख्यातिमागता ॥ शिवेन दूतयति सन्देशम् प्रापयतीत्यर्थे गौरादेराकृतिगणत्वात् ङीष् । बहुव्रीहौ तु टाप् स्यादित्याहुः । वस्तुतस्तु दुमोतिदुतनिभ्यां दीर्घश्चेति निष्ठायां दीर्घे सत्यल्पसन्देशप्रापकत्वविवक्षायां स्वाद्यल्पाख्यायामिति बहुव्रीहावपि ङीप् सम्भवति ॥ सा तृभेदे । योगिनीविशेषे ।

शिवद्रुमः । पुं० विल्वे मालूरवृक्षे ॥

शिवद्विष्टा । स्त्री० केतक्याम् ॥

शिवधातुः । पुं० पारदे ॥

शिवनाभिः । पुं० शि[illegible]

शिवपुराणम् । न० उपपुराणविशेषे

शिवपुरी । स्त्री० काश्याम् ॥

शिवप्रियः । पुं० वकद्रुमे ॥ स्फटिके ॥ धत्तूरे ॥ धत्तूरधूर्त्ततरुणो न्दु निशासयोग्यस्यामेपिशाचपतिनाविनिवेशितोसि । किं वैरवाणि विकसन्नितमः प्रयाति किं वापि रुद्रसतिकिं दृषदः स्रवन्ति ॥ न० रुद्राक्षे ॥ त्रि० शिवेष्टद्रव्ये ॥ शिवस्यप्रियः ॥

शिवप्रिया । स्त्री० उमायाम् ॥

शिवभट्टारकः । पुं० सर्वशानामीशिते ॥

शिवमल्लकः । पुं० अर्जुनपादपे ॥

शिवमल्लिका । स्त्री० वसुके । वकवृक्षे ॥

शिवमल्ली । स्त्री० वकपुष्पे ॥ शिवप्रियामल्ली ॥

शिवरसः । पुं० अन्नोदके । त्रिरात्रस्थापितान्नाख्यरसे ॥

शिवरात्रिः । स्त्री० शिवचतुर्द्दश्याम् ॥ अस्यामुपवासः प्रधानम् । यथा । नस्नानेन न वस्त्रेण न धूपेन न चार्च्चया । तुष्यामि न तथा पुष्पैर्यथा तत्रोपवासतः ॥ ततो रात्रौ प्रकर्त्तव्यं शिवप्रीणनतत्परैः । प्रहरे प्रहरे स्नानं पूजा चैव विशेषतः शैवो वा वैष्णवो वापि यो वा स्यादन्यपूजकः । सर्वं पूजाफलं हन्ति शिवरात्रिवहिर्मुखः ॥ शिवरात्रिव्रतेकालमाह । यथा । माघ निशीथगुणता चतुर्द्दशीपक्षेऽपरे या शिवरात्रिसंज्ञिका । भवेदुपोष्यासजयाभिशोऽभयायुता च रिक्तां प्रविहाय पारणा ॥ यदानिशीथद्वयगामिनी भवेच्चतुर्द्दशी सा परपूर्वगा क्रमात् । व्रतिचतयत्वादुतमुक्ततद्वयान्तोविधियाकिलकालवेदिभिः ॥ इति ज्योतिर्व्विदाभरणम् ॥ जयन्तीशिवरात्रिश्च कार्ये भद्रजयान्विते । कृत्वोपवासं तिथ्यन्ते तदा कुर्य्याच्च पारणम् ॥ तिथ्यन्तपारणं तु जयन्तीभाचपर

म् । चतुर्दश्यामेवपारणम् । यथो
क्तम् । ब्रह्माण्डोदरमध्येतुयानितो
र्थानिसन्तिवै । पूजितानिभवन्तो
हभूतादिपारणे क्रतेवृति ॥

शिवलिङ्गम् । न॰ महादेवस्यशिश्ने ॥

शिवलोकः । पुं॰ कैलासे ॥

शिववल्लभः । त्रि॰ शिवप्रिये ॥ शि
वस्यवल्लभः । शिवोवल्लभोस्यवा ॥

शिववल्लभा । स्त्री॰ शतपत्याम् ॥

शिववल्लिका । स्त्री॰ लिङ्गिमृन्य ।

शिववल्ली : स्त्री॰ श्रीवल्ल्याम् ॥
लिङ्गिन्याम् ।

शिववाहनः । पुं॰ वृषभे ॥

शिवबीजम् । न॰ पारदे ॥

शिवशेखरः । पुं॰ वकद्रुमे ॥ ध
त्तूरे ॥ शिवमस्तके ॥

शिवसायुज्यम् । न॰ शिवेनसहयोगे ॥

शिवसुन्दरी । स्त्री॰ भवगेहिन्याम्
। गौर्य्याम् ॥

शिवा । स्त्री॰ गौर्य्याम् । भवान्याम्
॥ यथा । शिवामुक्तिः समाख्या
तायोगिनां[illegible]गिनी । शिवा
यर्थाजपेद्देवीं शिवालोकीततः स्मृ
तेतिदेवीपुराणम् ॥ अपिच, शि
वाकल्याणरूपाचशिवदाचशिवप्रि
या । प्रियेदातरिवाशब्दः शिवातेन
प्रकीर्त्तितेतिब्र॰ वै॰ पुराणम् ॥ पु
नश्च । शश्वत्कल्याणवचनश्चोत्कृ
ष्टवाचकः । समूहवाचकश्चैवचा
कारोदातृवाचकः । श्रेयःसङ्
घोत्कृष्टदात्रीशिवातेनप्रकीर्त्तिता
। शिवराशिमूर्त्तिमतीशिवातेन
प्रकीर्त्तितेतिचब्र॰ वै॰ पु॰ ॥ आ
त्मानुभूतिनिष्णातोद्वैतभावविव
र्ज्जिताः । तेपिप्रेम्णाभजन्त्ये
नामित्यंसर्व्वोत्तमाशिवेत्युमासंहि
ता ॥ मुक्तौ ॥ फेरौ । सप्तफला
याम् । भाटामलोवध्वौ ॥ अभ
यायाम् ॥ आमलक्याम् ॥ श
म्याम् ॥ हरिद्रायाम् ॥ दूर्वाया
म् । गोरोचनायाम् ॥ बुद्धिशक्ति
विशेषतारायाम् ॥ शिवमस्त्यस्याः
शिवोस्तिभर्त्तृत्वेनयस्याइतिवा ।
अर्श आद्यच् ॥ शिवः शिवोवा
देवतास्तित्यस्याः अर्श आद्यच् ।
शकुनावेदकत्वात् । शिवंकरोति
। तत्करोतीतिणिच् । पचाद्यच् ॥
शिवयतिवा ॥

शिवाक्षम् । न॰ रुद्राक्षे ॥

शिववाटिका । स्त्री॰ वंशपत्याम् ॥

शिवात्मकम् । न॰ सैन्धवे ॥ त्रि॰
शिवमये ॥

शिवानी । स्त्री॰ जयन्तीवृक्षे ॥ दु
र्गायाम् ॥

शिवापीडः । पुं॰ चन्द्रमसि ॥ ब
कवृक्षे ॥ शिवस्यआपीडः ॥

शिवाप्रियः । पुं॰ छागे ॥

शिवाफला । स्त्री॰ शमीवृक्षे ॥

शिवारातिः । पुं० सारमेये ॥

शिवारुतम् । न० शृगालध्वाननिनादे ॥

शिवालयः । पुं० हरमन्दिरे ॥ रक्ततुलस्याम् ॥ श्मशाने ॥

शिवालुः । पुं० शृगाले ॥

शिवाह्लादः । पुं० बकवृक्षे ॥ शिवस्यानन्दे ॥

शिवाह्वयः । पुं० पारदे त्रि० शिवनामके ॥

शिवाह्वा । स्त्री० रुद्रजटायाम् ॥

शिबिः । पुं० उशीनरदेशाधिपतौ भूपतिवरे औशीनरे । उदारो यं महीपतिर्येन स्वमांसं श्येनाय दत्वा० शरणागतः कपोतो रक्षितः ॥ भूर्जपत्रवृक्षे । व्याडे । हिंस्रपशौ ॥

शिबिका । स्त्री० याप्ययाने । झम्पान० डोला० चौपाला० पालकी० इत्यादिभाषाप्रसिद्धे बहुविधे । शिबीरथे ॥ शिवेव । शिवं करोतिवा । तत्करोतीति ण्यन्तात् ण्वुल् ॥

शिविरम् । न० युद्धवेश्मनि ॥ निवेशे । आगन्तुकसैन्यवसतौ ॥ सेनावासस्थाने ॥ राजनिवेशे ॥ अथ शिविरलक्षणम् । श्रीभगवानुवाच । शिबिरं परिखायुक्तमुच्चैः प्राकारवेष्टितम् युक्तं द्वादशशारद्वसिंहद्वारपुरस्कृतम् ॥ युक्तं चित्रैर्विचित्रैश्च कृत्रिमैश्च कपाटकैः । निषिद्धहस्तिरथसिद्धैश्च पुरस्कृतम् ॥ सुतरां चन्द्रवेधं प्राङ्गणस्तत्र वर्त्तेति । विशेषो ब्रह्मवैवर्त्ते द्रष्टव्यः कृष्णखण्डके १०२ अध्याये ॥ शव मृत्यच । शवगतौ । बाहुलकात् किरच० अतद्धत्वञ्च ॥ यद्वा । शेरते राजवलान्यस्मिन् । शीङ् स्वप्ने । बाहुलकात् किरच् । शीङो वुगागमश्च ॥

शिबी । स्त्री० गौर्याम् ॥ पुं० येगेभो ष ॥

शिबीरथः । पुं० शिबिकायाम् । ङ० शाली ॥

शिविष्टः । पुं० बकवृक्षे ॥ त्रि० शिवप्रिये ।

शिविष्टा । स्त्री० दूर्वायाम् ।

शिशयिषुः । त्रि० शयितुमिच्छौ ॥ शेतेः सन्नन्तादुप्रत्ययः ॥

शिशिरः । पुं० हिमे । तुषारे ॥ द्वीपान्तरप्रसिद्धगिरिविशेषे ॥ पुं० न० ऋतुविशेषे । तपस्तपस्ययोः । माघफाल्गुनयोः । कम्पने । शीते । हिमकूटे ॥ अस्य गुणा यथा । शिशिरः शीतलोऽतीवरूक्षो वाताग्निवर्द्धनः । अपिच । शिशिरं शीतलं वृष्य शीतवातप्रकोपशमिति ॥ अत्र जातस्य फलम् । मिष्टान्नभोगी मधुरप्रणाशी कलत्रपुत्रादियुतः सुधान्तः । क्रोधी सुधीश्चारुकलेवरश्च प्रसू

ति: शिशिराभिधाने । इति ॥ त्रि॰ शीतगुणयुक्ते ॥ यथा । सुशीम: शिशिरो जड: । तुषार: शीतल: शीतो हिम: सप्तान्यलिङ्गका: ॥ अश्नि॰ धाम्नि यस्मिन्निकामम् । अप्सु तगतौ । अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिरा: ॰ इति किरच्॰ शशेरुपधाया इत्वञ्च निपात्यते ॥

शिशु: । पुं॰ पोते । पाके । अर्भके । डिम्भे । पृथुके । शावके ॥ अस्य लक्षणाद्युक्तं ब्रह्मातातपेन यथा । शिशोरभ्युक्षणं प्रोक्तं बालस्याचमनं स्मृतम् । रजस्वलादिसंस्पृश्य स्नातव्यं तु कुमारकै: ॥ प्राक्चूडाकरणाद्बाल: प्रागन्नप्राशनाच्छिशु: [illegible] यावन्मौ ञ्जी[illegible]ष्यति॰ [illegible] सा । [illegible] श: कितन् वस्त्रे[illegible] ॥

शिशुक: । पुं॰ संसुकदू॰ गौ॰ प्र॰ यादोविशेषे । उलूपिनि ॥ शिशु: शिशुमार: तस्य प्रकृतिरिव । इवे प्रतिकृताविति कन् ॥ शिशुमारे ॥ बालके ॥ वृक्षविशेषे ॥

शिशुगन्धा: । स्त्री॰ मधुमल्ल्याम् ॥

शिशुचान्द्रायणम् । न॰ व्रतविशेषे ॥ यथा । चतुर: प्रातरश्नीयात्पिण्डान् विप्र: समाहित: । चतुरोऽस्त मिते सूर्ये शिशुचान्द्रायणं स्मृतम् ॥

शिशुता । स्त्री॰ शिशुत्वे ॥ शिशोर्भाव: । तल् । टाप् ॥

शिशुत्वम् । न॰ शिशुतायाम् । शैशवे ॥ शिशोर्भाव: ॥ तस्य भावस्त्वतलौ ॥

शिशुपाल: । पुं॰ दमघोषसुते नृपतौ । चैद्ये । चेदिराजे ॥

शिशुपालक: । पुं॰ दमघोषसुते । सत्कदम्बे ॥ शिशून् पालयति । पालि॰ । कर्मण्यण् । स्वार्थे क: ॥ त्रि॰ बालकपालके ॥

शिशुपालहा । पुं॰ श्रीकृष्णे ॥

शिशुप्रिय: । पुं॰ इक्षुपाके । गुडे ॥ त्रि॰ बालकाभीष्टवस्तुनि ॥

शिशुभाव: पुं॰ शिशुत्वे । यथा । अयं कस्यचिदस्ति कश्चिदभित: केनापि पूर्वे कृत: संसार: शिशुभाववौवनजराभावावतारादयम् । बालस्तं च कुमन्यतामसुलभं प्राप्य युवा सेव्यतां वृद्धस्तद्विषयाद्बहिष्कृत इह व्यावृत्य किं पश्यति ॥

शिशुमार: । पुं॰ यादोविशेषे । संस॰ इ॰ भा॰ प्र॰ मत्स्योच्छ्रासि । अस्य पर्याया यथा । जलकूर्मस्त्वम्बुकौशीरसाढ्य: शिशुकश्च स इति॰ त्रिकाण्डशेषोक्ता: ॥ शिशून् मारयति मृङ् प्राणत्यागे । णिजन्तात् कर्मण्यण् ॥ तारात्मकाच्युते । तस्य विव

एवं विष्णुपुराणे २ अंशे १२ अध्याये यथा । शिशुमारस्तु यः प्रोक्तः स ध्रुवो यत्र तिष्ठति । सन्निवेशञ्च तस्यापि शृणुष्व मुनिसत्तम ॥ यदह्ना कुरुते पापं दृष्ट्वा तन्निशि मुच्यते । यावन्त्यश्चैव तारास्ताः शिशुमाराश्रिता दिवि ॥ तावन्त्येव तु वर्षाणि जीवत्यभ्यधिकानि तु । उत्तानपादस्तस्याथ विज्ञेयो ह्युत्तरो हनुः ॥ यज्ञोऽधरश्च विज्ञेयो धर्म्मो मूर्द्धानमाश्रितः । हृदि नारायणश्चास्ते अश्विनौ पूर्व्वपादयोः ॥ वरुणश्चार्य्यमा चैव पश्चिमे तस्य सक्थिनी । शिश्ने संवत्सरस्तस्य मित्रोऽपानं समाश्रितः ॥ पुच्छेऽग्निश्च महेन्द्रश्च कश्यपोऽथ ततो ध्रुवः । तारका शिशुमारस्य नास्तमेति चतुष्टयम् ॥ इत्येष सन्निवेशोऽयं पृथिव्यां ज्योतिषां तथा । द्वीपानामुदधीनाञ्च पर्व्वतानाञ्च कीर्त्तितः ॥ वर्षाणाञ्च नदीनाञ्च ये च तेषु वसन्ति वै । तेषां स्वरूपमाख्यातं सङ्क्षेपः श्रूयतां पुनः ॥ यदम्बु वैष्णवः कायस्ततो विप्र वसुन्धरा । पद्माकारा समुद्भूता पर्व्वताब्ध्यादिसंयुता ॥ ज्योतींषि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च । नद्यः समुद्राश्च स एव सर्व्वं यदस्ति यन्नास्ति च विप्रवर्य्य ॥ ज्ञानस्वरूपो भगवान् यतोऽसावशेषमूर्त्तिर्न तु वस्तुभूतः । ततो हि शैलाब्धिधरादिभेदान् जानीहि विज्ञानविजृम्भितानि ॥ यदा हि शुद्धं निजरूपसर्व्वं कर्म्मक्षये ज्ञानमपास्तदोषम् । तदा हि सङ्कल्पतरोः फलानि भवन्ति नो वस्तुषु वस्तुभेदाः ॥ मही घटत्वं घटतः कपालिका कपालिका चूर्णरजस्ततोऽणुः । जनैः स्वकर्म्मस्तिमितात्मनिश्चयैरालक्ष्यते वस्तु किमत्र वस्तु ॥ इति ॥ अपि च । तारामयं भगवतः शिशुमाराकृति प्रभोः । दिवि रूपं हरेर्यत्तु तस्य पुच्छे स्थितो ध्रुवः ॥ सैष भ्रमन् भ्रामयति चन्द्रसूर्य्यादिकान् ग्रहान् । भ्रमन्तमनु तं यान्ति नक्षत्राणि च चक्रवत् ॥ सूर्य्याचन्द्रमसौ तारा नक्षत्राणि ग्रहैः सह । वातानीकमयैर्बन्धैर्ध्रुवे बद्धानि तानि वै ॥ शिशुमाराकृति प्रोक्तं यद्रूपं ज्योतिषां दिवि । नारायणोऽयनं धाम्नां तस्याधारः स्वयं हृदीति ।

शिशुवाहकः । पुं० वनच्छागे । त्रि० बालकवोढरि ॥

शिशुवाह्यकः । पुं० एडके । वनच्छागे ॥

शिश्नः । पुं० मेढ्रे । मेहने । शेफसि ॥ शशति । शश० । शिश्नोति वा । शिश्न् निशाने । बाहुलकान्नक् । पृषोदरादिः ॥

शिश्नकः । पुं० मेढ्रे ॥ स्वार्थे कन् ॥

शिश्विदानः । त्रि० अकृष्णकर्म्मणि ।

। पुण्यकर्म्मणि ॥ शिष्टिरन्दे । शिष
दिश्वैत्ये । बाहुलकाच्छिटः क्रानच्
। अनित्यत्वान्नुम् ॥ यद्वा । शिष्टं
शितुमिच्छति । शिशतावर्ण्ये । शिश
तेर्दशवित्यानच्० दःसनोलुक् च
॥ कृष्णकर्मेत्यमरपाठान्तरात् । पा
पाचारेऽपि ॥

शिष्टः । त्रि० आर्य्ये । साधुव्यवहा
रान्विते ॥ यथा । न पाणिपादचप
लो न नेत्रचपलोऽयतिः । न च वाक्च
पलश्चैवमिति शिष्टस्य लक्षणम् ॥
शान्ते ॥ स्वच्छस्वान्ते ॥ सत्कारणवा
दिनि ॥ धर्म्मेणाधिगतो यैस्तु वेदः स
परिवृंहणः । ते शिष्टाब्राह्मणा ज्ञेयाः
श्रुतिप्रत्यक्षहेतवः ॥ उत्तरिते ॥
शिष्यते । शिष्लृ० । क्त० ॥

शिष्टसमाचार । पुं० आर्यव्यवहारे ॥

शिष्टाचारः । पुं० सदाचारे । साधु
व्यवहारे ॥ यथा । दानं सत्यं तपोऽ
लोभो विद्येज्यापूजनं दमः । अष्टौ
तानि चरित्राणि शिष्टाचारस्य लक्षण
म् ॥ शिष्टा यस्माच्चरन्त्येनं मनुः
सप्तर्षयश्च ये । मन्वन्तरेषु सर्व्वेषु शि
ष्टाचारस्ततः स्मृतः ॥ श्रुतिस्मृति
भ्यां विहितो धर्मो वर्णाश्रमात्मकः ।
शिष्टाचारानुरुद्धस्तु धर्मः स साधुस
म्मतः ॥ शिष्टानामाचारः ॥

शिष्टबुद्धिः । त्रि० शास्त्राचार्यानुशि
ष्टमतौ ।

शिष्टापरिग्रहः । पुं० सत्कारवचनादि
भिः केनाप्यशिष्टेनागृहीते० अणुवा
दिवादे ॥ शिष्टानामपरिग्रहो यस्मि
न् ॥

शिष्टिः । स्त्री० आज्ञायाम् । शासने
॥ शासनम् । शासु० । स्त्रियां क्ति
न्नाचादिभ्यः । शासइदङ्हलोः ॥

शिष्यः । पुं० छात्रे । अन्तेवासिनि
। शासनयोग्ये ॥ तल्लक्षणं यथा ।
वाङ्मनःकायवसुभिर्गुरुशुश्रूष
णे रतः । एतादृशगुणोपेतः शि
ष्यो भवति नारद ॥ देवताचार्य्यशुश्रू
षां मनोवाक्कायकर्मभिः । शुद्ध
भावो महोत्साहो बोद्धा शिष्य इति स्मृ
तः ॥ अपि च । शान्तो विनीतः
शुद्धात्मा श्रद्धावान् धारणक्षमः
। समर्थश्च कुलीनश्च प्राज्ञः सच्चरितो
व्रती ॥ एवमादिगुणैर्युक्तः शिष्यो
भवति नान्यथेति ॥ शिष्यते । शा
सु० । एतिस्तुशास्वृदृजुषः क्यप् ।
शासइदङ्हलोः । शासिवसीति
षः ॥ पुत्रशिष्ययोस्तुल्यत्वं यथा ।
यथा पुत्रस्तथा शिष्यो न भेदः पुत्रशि
ष्ययोः । तर्पणे पिण्डदाने च पाल
ने परिपोषणे ॥ यथा जनदाता पुत्र
स्तथा शिष्यश्च निश्चितम् । इतीदं का
ण्वशाखायामुवाच कमलोद्भवः ॥

शीः । स्त्री० शान्तौ । शयने ॥

शीकरः । पुं० वातहृताम्बुनि । वा

तालजले । अम्बुकणेषु ॥ शीकते । शीकृसेचने । तालव्यादिः । स्फच्छेररन्निति बाहुलकादरन् ॥ न॰ सरलद्रवे ॥

शीघ्रम् । न॰ उशीरे । नलदे । चक्राङ्गे ॥ त्वरिते । लघुनि । क्षिप्रे । अरे । द्रुते । सत्वरे । चपले । तूर्णे । अविलम्बिते । आशुनि ॥ तूर्णपर्यायोयं क्रियाविशेषणात् द्रव्ये वर्त्तमानः क्लीबे । यथा॰ शीघ्रं जुहोति । सत्वगामीतुवाच्यलिङ्गः । यथा । कलौशीघ्राजरा॰ शीघ्रो मृत्युः शीघ्रंभयस्तथेति ॥ शिङ्घति॰ व्याप्नोति । शिघिआघ्राणे । शीघ्रादयश्चेतिरगन्तोनिपातितः ॥ त्रि॰ द्रुतगतौ ॥

शीघ्रगः । त्रि॰ नभसूति । वायौ ॥ त्रि॰ त्वरितगामिनि ॥

शीघ्रगामी । त्रि॰ आशुगमनशीले । द्रुतगतौ ॥

शीघ्रचेतनः । पुं॰ शुनि ॥ त्रि॰ त्वरितचेतनायुक्ते ॥

शीघ्रजन्मा । पुं॰ पूतिकरञ्जे ॥

शीघ्रपुष्पः । पुं॰ वकतरौ । अगस्त्यागे ॥

शीघ्रवेधी । पुं॰ लघुहस्ते । शिक्षितास्त्रे । आशुशरादिनालक्ष्यवेधकर्त्तरि ॥

शीघ्रा । स्त्री॰ उदुम्बरपर्णीम् । दन्त्याम् ॥

शीतः । पुं॰ वानीरे । बहुले । वेतसवृक्षे । शीतमस्यास्ति । अर्शआद्यच् । शीतवीर्य्यत्वेपाद्दाहशमनात् ॥ उद्दाले । बहुवारके । निम्बे ॥ पर्पटे । कर्पूरे ॥ असनपर्य्याम् ॥ नरकान्तरे । हिमर्त्तौ ॥ न॰ हिमगुणे । जले ॥ त्वचे । दारचीनी॰ इ॰ भा॰ ॥ शीतंतुपर्वानीरबहुवारद्रुमेषुचेत्यजयः ॥ त्रि॰ शीतले । अलसेशीतस्पर्शे । शीतंविद्यतेऽस्य । अर्शआद्यच् ॥ विशेष्यीभूतः शीतशब्दोनपुंसकम् । यस्मिन्द्रव्येशीतः स्पर्शइत्यादौविशेषणीभूतस्तुशीतशब्दोविशेष्यनिघ्नः ॥ श्यायतइतिशीतः । श्यैङ्गतौ । भावेक्तः । द्रवमूर्त्तिस्पर्शयोः श्यइतिसम्प्रसारणम् । हलइतिदीर्घः । श्येस्पर्शइति पर्युदासान्ननिष्ठानत्वम् ॥

शीतकः । पुं॰ शीतकाले ॥ स्वतानुषाशीत॰ इ॰ यावादिषुपाठात्॰ स्वार्थेकन् ॥ असनपर्य्याम् ॥ त्रि॰ सुस्थिते । सुस्थे ॥ अलसे । दीर्घसूत्रिणि । मन्दे ॥ शीतंकरोति । शीतोष्णाभ्यांकारिणीतिकन् ॥ वृश्चिके ॥

शीतकरः । पुं॰ चन्द्रे ॥ त्रि॰ शीतलप्राणियुक्ते ॥ शीतकारिणि ॥

शीतकषाय: । पुं॰ हिमकषाये यथा । चतुः सद्रव्यपलं सम्यक् षड्भिर्जलपलै: सुतम् । शर्वरीमुषित: स स्यादृषिम: शीतकषायकइतिवैद्यकम् ॥

शीतकाल: । पुं॰ हिमर्त्तौ । मार्गपौषयो: । हेमन्ते । कूपोदकं वटच्छाया श्यामास्त्री इष्टकागृहम् । शीतकाले भवेदुष्णमुष्णकाले च शीतलम् ॥ हेमन्तशिशिरर्त्तौ ॥

शीतकिरण: । पुं॰ हिमांशौ ॥ चन्द्रमसि ॥ यथा । कान्तेकोयमुदेति शीतकिरणो जात: कुतो वारिधेस्ते सुन्दरिसोदर: कारमहो दत्तस्त्वदीये स्मि । धन्यात्वं युवतीसतीकुलवती भ्रातापि धन्यस्तवइत्थं शीपरिहासकेलिकलयामुग्धोहरि: पातु व: ॥

शीतकुम्भ: । पुं॰ करवीरे ॥

शीतकुम्भी । स्त्री॰ जलजद्रव्यविशेषे । शिवलीछोप॰ इ॰ गौ॰ भा॰ प्र॰ । अस्या: पर्याया यथा । शीतली शीतकुम्भी च शुक्रपुष्पा जलाश्रयेतिरत्नमाला ।

शीतकृच्छ्र: । पुं॰ व्रतविशेषे । यथा । त्र्यहं शीतं पिबेत्तोयं त्र्यहं शीतं पय: पिबेत् । त्र्यहं शीतं घृतं पीत्वा वायुभक्ष्य: परं त्र्यहमिति यमस्मृति: ॥

शीतचारम् । न॰ श्वेतटङ्कणे ॥

शीतगन्ध: । पुं॰ श्वेतचन्दने ॥

शीतगु: । पुं॰ चन्द्रे ॥

शीतचम्पक: । पुं॰ चातपर्णे । तर्पणे ॥ दिने ॥ दीपे ॥ दर्पणे ॥

शीतपर्णी । स्त्री॰ अर्कपुष्पिकायाम् । सूर्यवल्ल्याम् ॥

शीतपाकिनी । स्त्री॰ महासमङ्गायाम् ॥ काकोल्याम् ॥

शीतपाकी । स्त्री॰ वाट्यालके ॥ गुञ्जायाम् ॥ काकोल्याम् ॥

शीतपुष्प: । पुं॰ अर्कवृक्षे । शिरीषे ॥ न॰ परिपेले ॥ शैलेये ॥

शीतपुष्पक: । पुं॰ अर्कवृक्षे ॥ न॰ शैलेये ॥

शीतपुष्पा । स्त्री॰ अतिबलायाम् ॥

शीतप्रभ: । पुं॰ कर्पूरे । त्रि॰ शीतलप्रभायुक्ते ॥

शीतप्रिय: । पुं॰ पर्पटे ॥ त्रि॰ शीतलप्रीतियुक्ते ।

शीतफल: । पुं॰ उदुम्बरे ॥ बहुलशारे । शेलौ ॥ पीलौ ॥ शीतानि फलानि यस्य ॥

शीतबला । स्त्री॰ महासमङ्गायाम् ॥

शीतभानु: । पुं॰ चन्द्रे ॥ शीता भानव: किरणा यस्य स: ॥

शीतभीत: । त्रि॰ शीतार्त्ते ।

शीतभीरु: । स्त्री॰ मल्लिकायाम् ॥ शीतात्॰ भीरु: ॥ त्रि॰ शीतभीते ॥

शीतभीरुक: । त्रि॰ शीतार्त्त

शीतभीरुका । स्त्री॰ मल्ल्याम् ॥

शीतमञ्जरी । स्त्री॰ शेफाल्याम् ॥

शीतमयूख: । पुं॰ चन्द्रे ॥ कर्पूरे ॥

शीतमरीचि: । पुं॰ इन्दौ । कर्पूरे ॥

शीतमूलकम् । न॰ उशीरे ॥

शीतरम्य: । पुं॰ प्रदीपे ॥ त्रि॰ शीतरमणीये ॥

शीतरश्मि: । पुं॰ चन्द्रे ॥ कर्पूरे ॥

शीतरस: । पुं॰ शीधुप्रभेदे ॥

शीतल: । पुं॰ अशनपर्ण्याम् ॥ अर्हद्विशेषे ॥ सुधांशौ । चन्द्रे । व्रतविशेषे ॥ चम्पके । बहुवारके । धूनके । राले । कर्पूरभेदे ॥ न॰ पुष्पकासीसे । शैलजे ॥ मलयोद्भवे । चन्दने ॥ पद्मके ॥ मौक्तिके ॥ शैत्ये ॥ वीरणमूले ॥ त्रि॰ सुषीमे । शिशिरे ॥ शीतं गुणोऽस्यास्ति । सिध्मादित्वाल्लच् ॥ शीतं लातीति वा । लाआदाने । आतइतिक: ॥

शीतलक: । पुं॰ मरुवके ॥ न॰ सितोत्पले ॥

शीतलच्छद: । पुं॰ चम्पके ॥ शीतलपत्रे ॥

शीतलजलम् । न॰ उत्पले ॥ शिशिरोदके । शीताम्बुनि ॥ यथा मूर्च्छापित्तोष्णदाहेषु विषे रक्ते मदात्यये । भ्रमे श्रमे विदग्धेऽन्ने तमके च वमौ तथा । ऊर्द्धगे रक्तपित्ते च शीतलम्भ: प्रशस्यते ॥ पार्श्वशूले प्रतिश्याये वातरोगे गलग्रहे । आध्माने स्तिमिते कोष्ठे सद्य: शुद्धौ नवज्वरे ॥ अरुचिग्रहणीगुल्मश्वासकासेषु विद्रधौ । हिक्कायां स्नेहपाने च शीताम्बु परिवर्ज्जयेत् ॥

शीतलत्वम् । न॰ शीतलतायाम् ॥ जडत्वे ॥

शीतलत्वकम् । न॰ शीतलत्वे ॥

शीतलप्रद: । पुं॰ चन्दने ॥ त्रि॰ हिमदातरि ॥

शीतवनम् । न॰ तीर्थविशेषे ॥

शीतलशातक: । पुं॰ असनपर्ण्याम् ॥

शीतला । स्त्री॰ शीतलीवृक्षे ॥ यथा । शीतला शीतली शीतकुम्भी पाण्डुरपुष्पिकेति शब्दचन्द्रिका ॥ कुट्टिम्न्याम् । जलेरुहायाम् ॥ बालुकायाम् ॥ आरामशीतलायाम् ॥ देवताविशेषे । विस्फोटकविशेषाधिष्ठात्र्याम् ॥ यथा । नमामि शीतलां देवीं रासभस्थां दिगम्बरीम् । मार्ज्जनीकलशोपेतां सूर्पालङ्कृतमस्तकामिति स्कन्दपुराणम् ॥

शीतली । स्त्री॰ जलजवृक्षविशेषे । शीतकुम्भ्याम् ॥ कालानुसारि

वायाम् ॥

शीतवल्कः । पुं॰ उडुम्बरे ॥

शीतवीर्य्यकः । पुं॰ प्लक्षवृक्षे । त्रि॰ शीतलवीर्य्ययुक्ते ॥

शीतशिवः । पुं॰ सक्तुफलावृक्षे ॥ मधुरिकौषधौ ॥ न॰ सैन्धवेलवणे । मणिमन्थे ॥ शैलेयनामगन्धद्रव्ये ॥ शीतमस्यास्ति । अच् । शिवमस्यास्ति । अच् । शीतश्चासौ शिवश्च ॥

शीतशिवा । स्त्री॰ मिश्रेयायाम् । शमीवृक्षे ॥

शीतसहः । पुं॰ पीलुवृक्षे । नीलसिन्धुवारके ॥

शीतसहा । स्त्री॰ नीलसिन्धुवारे । वासन्त्याम् ।

शीतहरः । पुं॰ कुचोपाग्नि ॥ शीतं हरति । हृञ् । हरतेरनुद्यमनेऽजित्यच् । त्रि॰ शीतापहे ॥

शीता । स्त्री॰ रामपत्न्याम् । सीतायाम् ॥ यथा । शीतानभः सरितिलाङ्गलपद्धतौ च शीता दशाननरिपोः सहधर्म्मिणी च । शीतं समुत्तं हिमगुणोपेतदन्विते च शीतोऽलसे च बहुवारतरोमहृष्टः ॥ इति मालव्याडीधरणिः ॥ दूर्व्वायाम् ॥ शिल्पिन्यामोषधौ ॥ अतिबलायाम् ॥ कुटुम्बिन्याम् । पयस्यायाम् ॥ कौमुद्याम् । ज्योत्स्नायाम् । शीतेस्म । गत्यर्थत्वादिना शीङः क्तः । टाप् ॥

शीतांशुः । पुं॰ विधौ । चन्द्रे ॥ कर्पूरे

शीतांशुतैलम् । न॰ कर्पूरतैले ॥

शीताङ्गः । त्रि॰ शीतलाङ्गे ॥

शीताङ्गी । स्त्री॰ हंसपद्याम् । गोधापद्याम् ॥ शीतलाङ्ग्याम् ॥

शीतादः । पुं॰ दन्तरोगविशेषे ॥ तन्निदानं यथा । शोणितं दन्तवेष्टेभ्यो यस्याकस्मात्प्रवर्त्तते । दुर्गन्धीनि सकृष्णानि प्रक्लेदीनि मृदूनि च ॥ दन्तमांसानि शीर्य्यन्ते पचन्ति च परस्परम् । शीतादो नाम स व्याधिः कफशोणितसम्भवः ॥ अस्यौषधं यथा । शीतादे हृतरक्ते तु तोयनागरसर्षपान् । निष्क्वाथ्य त्रिफलां चापि कुर्य्याद्गण्डूषधारणम् ॥ कासीसलोध्रकृष्णामनःशिलाप्रियङ्गुतेजोह्वाः । एतच्चूर्णं मधुयुक्शीतादेऽतिमांसहरम् ॥ तेजोह्वा॰ तेजस्वा । तैलं घृतं वा वा तच्च शीतादे सम्प्रशस्यते ॥ इ॰ भा॰ प्र॰ ध ः ॥

शीतार्त्तः । त्रि॰ शीतार्त्ते ॥ शीतेन ऋतः ॥

शीतालुः । त्रि॰ शीतार्त्ते । शीतं न सहते । शीतोष्णतृप्रेभ्यस्तदसहने आलुः ॥ शीतालुराच्छादसे ॥

शीताम्ला । स्त्री॰ महासमङ्गायाम् ॥

शीताश्मा । पुं॰ चन्द्रकान्तमणौ ॥ शीतलपाषाणे ॥

शीतीभावः । पुं॰ मोक्षे ॥ इ॰ त्रि॰

भिषः ॥

शीतोत्तमम् । न॰ जले ॥

शीत्कारः । पुं॰ वरस्त्रीणां रतिकालध्वनौ ॥ यथा । शीत्कारोरतनाराच: सुरतैवरयोषिताम् ॥

शीत्कृतम् । न॰ शीत्कारे ॥ इ॰ धरणि: ॥

शीधुः । पुं॰ न॰ इक्षुरसे । मद्ये ॥ पुं॰ स्त्री॰ आसवे ॥ यथा । शीधुरिक्षुरसै: पक्वैरपक्वैरासवोभवेत् । इतिमाधव: ॥ अपिच । इक्षो: पक्वैरसै: सिद्ध: शीधु: । पक्वरसश्च स: । आमैस्तैरेवय: सिद्ध: स तु शीतरस: स्मृत: ॥ शीधु: पक्वरस: श्रेष्ठ: स्वराग्निबलवर्णकृत् । वातपित्तकरोहृद्य: स्नेहनोरोचनोहरेत् ॥ विबन्धमेद: शोफार्श: शोषोदरकफामयान् । तस्मादल्पगुण: शीतरस: संलेखनस्मृत: ॥ शेरतेऽनेन । शीङोधुक् ॥ शीध्यतेऽनेनेतिशीधुरितिमल्लिनाथ: ।

शीधुगन्धः । पुं॰ बकुलवृक्षे ॥ मद्यगन्धे ॥ यथा । वेश्याविभ्रमसुशीधुगन्धिललनावक्त्रासवामोदितैर्नीत्वानिर्भरमन्मथोत्सवरसैरुन्निद्रचन्द्रा: क्षपा: सर्वज्ञाइतिदीक्षिताइतिचिरात्प्राप्ताग्निहोत्राइतिब्रह्मज्ञाइतितापसाइतिदिवाधूर्त्तैर्जगद्वञ्च्यते ॥ इत्यपिदाभिकाव्यवहरन्ति ॥

शीधुगन्धिः । त्रि॰ सुरागन्धयुक्ते ॥

शीधुपः । त्रि॰ मद्यपे । सुरापे ॥ शीधुपिबति । पादाने । गापोष्टगित्यत्र॰ पिबते: सुराशीध्वोरितिवार्त्तिकात् टक् । स्त्रियांटित्वान्ङीपि॰ शीधुपी ॥

शीधुपुष्पः । पुं॰ कदम्बेबकुले ॥

शीधुपुष्पी । स्त्री॰ धातक्याम् ॥

शीधुरसः । पुं॰ आम्रे ॥

शीधुसंज्ञकः । पुं॰ बकुले ॥

शीनः । पुं॰ अजगरे ॥ त्रि॰ मूर्खे । द्रवावस्थायाः काठिन्यङ्गते घृतादौ ॥ श्यैङ्गतौ । क्तः । द्रवमूर्त्तिस्पर्शयो: श्यइतिसम्प्रसारणम् । श्योऽस्पर्शइतिनत्वम् ॥

शीभरः । पुं॰ शीकरे ॥

शीरः । पुं॰ अजगरसर्पे । सूर्ये ॥ शेते । स्फायितञ्चीतिशीङोरक् ॥

शीर्णम् । न॰ स्थौणेये ॥ त्रि॰ तनौ । कृशे ॥ विशीर्णे ॥ शीर्यतेस्म । शॄ॰ । क्तः । ऋतइद्धातो: । रदाभ्यामितिनः । णत्वम् ॥

शीर्णपत्रः । पुं॰ पट्टिकालोध्रे । कर्णिकारवृक्षे ॥ निम्बे ॥ न॰ विशीर्णपत्रे ॥

शीर्णपर्णः । पुं॰ निम्बवृक्षे ॥ न॰ विशीर्णपत्रे ॥

शीर्णपादः । पुं॰ महिषध्वजे ॥ यमे ॥

शीर्षपुष्पिका । स्त्री० अवाक्पुष्प्याम् ॥

शीर्षमाला । स्त्री० पृश्निपर्ण्याम् ॥ विशीर्णायांमालायाम् ॥

शीर्षन्नाम् । न० गोडुम्बे । तरम्बुजे ॥

शीर्षाङ्घ्रिः । पुं० यमे ॥ त्रि० ऊर्ध्वपादे ॥

शीर्विः । त्रि० हिंस्रे ॥ शृणाति शृ० । जृशृस्तृजागृभ्यः क्विन् ॥

शीर्षम् । न० कालागुरुणि ॥ मस्तके ॥ कुमारशीर्षयोरिनिज्ञापकात् शिरसः शीर्षादेशः ॥

शीर्षकः । पुं० विधुन्तुदे । राहुग्रहे ॥ शीर्षस्य प्रतिकृतिः इवेप्रतिकृतावितिकन् न० शिरोऽस्थ्नि ॥ शिरोरक्षणसन्नाहे । शीर्षण्ये । शिरस्त्रे । टोपइतिभाषा ॥ शीर्षं कं सुखमस्मात् ॥ जयपराजयपत्रे ॥

शीर्षच्छेदिकः । त्रि० वध्ये ॥

शीर्षच्छेद्यः । त्रि० वध्ये ॥ शिरश्छेदं नित्यमर्हति । शीर्षच्छेदाद्यच्चेतियत् । प्रत्ययसंनियोगेनशिरसः शीर्षभावोनिपात्यते ॥

शीर्षण्यः । पुं० सुकेशे । विशदकचे ॥ शिरस्ये । स्नानादिनाभिशोऽसक्तकचे ॥ शिरसिभवः । शरीरावयवाद्यत् । येचतद्धितइत्य च० वाकेशेष्वितिवचनात्॰ शिरसः शीर्षन्नादेशः ॥ न० शिरस्त्रे । शीर्षके ॥ शिरसिहितम् । यत् । येचतद्धितइतिशीर्षन्नादेशः । येचाभावेतिटिलोपाभावः ॥

शीर्षरक्षम् । न० शिरस्त्राणे । शिरस्के ॥

शीर्षा । स्त्री० उष्णिक्छन्दः ७ प्रभेदे ॥ यथा । उक्तावर्णाः सप्तार्णां॰ सर्वदीर्घाः श्रुवं स्याम् । एषा शीर्षानिर्दिष्टा केषांचन्नामादेष्टा ॥ यथा । दृष्टः कृष्णः कालिन्दीतीरे गोपालानन्दी । वेणुक्वाणैरक्तानां चेतोहर्ता गोपीनाम् ॥

शीर्षोदयः । पुं० राशिविशेषे ॥ यथा । मिथुनकेशरीकन्यातुलावृश्चिकभं तथा । कुम्भोथमीनएवैते सप्तशीर्षोदयाः स्मृताः ॥

शीलः । पुं० न० स्वभावे । सहजधर्मविशेषे ॥ सद्वृत्ते । साधुवृत्ते । सच्चरित्रे । हारीतोक्ते । ब्रह्मण्यतादिरूपे ॥ तदाह॰ हारीतः । ब्रह्मण्यता॰ देवपितृभक्तता॰ सौम्यता॰ अपरोपतापिता॰ अनसूयुता॰ मृदुता॰ अपारुष्यम्॰ मैत्रता॰ प्रियवादित्वम्॰ कृतज्ञता॰ शरण्यता॰ कारुण्यताम्॰ प्रशान्तिश्चेति त्रयोदशविधं शीलम् ॥ चरित्रमार्चे ॥ लनम्॰ शीलयतीऽ

शेनया । शीलसमाधी० शयन्ता हा० घञ्० घोषा ॥ यद्वा । शीङ्० शुकलबालजबालनद्वरि० लक् । अर्द्धर्चादि: ॥

शीलनम् । न० पाठनिश्चये । गुणान्याम् । अविन्याम् ॥

शीलवान् । त्रि० सुस्वभाववति । सुशीले । सद्वृत्ते ॥

शीलहीन: । त्रि० अमिद्रतपुंस्त्रीदास्यादिजने ॥

शीला । स्त्री० कौण्डिन्यमुने: पत्न्याम् ॥

शीलितम् । न० शीर्णे ॥ त्रि० अभ्यस्ते ॥ शील्यतेस्म । शील० । क्त: ॥

शीली । त्रि० शीलवति ॥ शीलमस्त्यस्य । …आदिभ्यश्चेतीनि: ॥

शीवा । पुं० अजगरे ॥ शेते : शीङ् स्वप्ने । शीङ्क्रुशिवनि… धृभ्य: क्वनिप् ॥

शीवलम् । न० शैवले ॥ शे… ललिशेतेतिष्ठतिशीङोवलन् । वा… कादृणाभाव: ।

शु । अ० पूजायाम् ॥ आश्चर्ये ॥

शुक: । पुं० व्याससुते । बादरायणौ ॥ कीरे । मेधाविनि । फलाशने । तोता० इ० भा० प्र० पक्षिणि । अस्य शुभसूचकत्वं यथाम समराजे । वाम: पठनृराजशुक: प्रयाणे० शुभंभवेद्दक्षिणत: प्रवेशे । वनेचरा: काष्ठशुका: प्रयातु: स्यु: सिद्धिदा: सम्मुखमापतन्त: । इति ॥ रावणस्यमन्त्रिणि । शिरीषवृक्षे ॥ न० ग्रन्थिपर्णे ॥ वस्त्रे । वस्त्राञ्चले ॥ शिरस्त्रे ॥ शोचति० शक्तिरा । शुचशोके० शुगतीश । शुकवल्कोल्का…तसाधु: ॥ शोभते । शुभशोभे । पूर्ववत्साधु: ॥ यद्वा । शु…ति । शुकगतौ ॥ इगुपधेतिक: ॥

शुकच्छदम् । न० स्थौणेये ॥

शुकजिह्वा । स्त्री० शुकनासायाम् । सुवाठोंठो० इ० भा० प्र० ॥

शुकतरु: । पुं० शिरीषवृक्षे ॥

शुकतुण्ड: । पुं० छिङ्गलप्रभेदे ॥ स्पीत: शुकतुण्डक: ॥

शुकद्रुम: । पुं० शुकतरौ ॥

शुकनासा । स्त्री० शुकजिह्वायाम् ॥

शुकनासन: । पुं० दद्रुघ्ने ॥ त्रि० शुकनासके ॥

शुकनास: । पुं० शोणकद्रुमे ॥ शुकनासिवपुष्पमस्यास्ति । अर्शआद्यच् ॥ त्रि० शुकनासयुक्ते ॥

शुकपिण्ड: । स्त्री० शुकशिम्ब्याम् ॥

शुकपुच्छ: । पुं० गन्धके ॥ शुकलाङ्गूले ॥

शुकपुच्छकम् । न० स्थौणेये ।

शुकपुष्प: । पुं॰ शिरीषवृक्षे ॥ न॰ स्थौणेये ॥

शुकप्रिय: । पुं॰ शिरीषद्रुमे ॥ त्रि॰ शुकवल्लभे ॥

शुकप्रिया । स्त्री॰ जम्ब्वाम् ॥ शिरीषि ॥

शुकफल: । पुं॰ अर्कवृक्षे ॥

शुकबर्ह: । पुं॰ न॰ स्थौणेये । ग्रन्थिपर्णे ॥ गन्धद्रव्यविशेषे ॥

शुकबर्हकम् । न॰ ग्रन्थिपर्णे ॥

शुकम् । न॰ ग्रौणेय ॥

शुकवल्लभ: । पुं॰ दाडिमे । त्रि॰ शुकप्रियवस्तुनि ॥

शुकाख्या । स्त्री॰ शुकशिम्बायाम् ॥

शुकादन: । पुं॰ दाडिमे ॥

शुकानना । स्त्री॰ शुकशिम्बायाम् ॥

शुकी । स्त्री॰ कश्यपस्यपत्नीप्रभेदे । शुकीशुकानजनयदुलूकीप्रत्युलूकानितिगारुडम् ॥

शुकोदरम् । न॰ तालीशपत्रे ॥ कीरजठरे

शुक्त: । त्रि॰ अम्ले ॥ यथा । यन्म स्त्वाऽऽदिशुचौभाण्डे सगुडक्षौद्रकाञ्जिकम् । धान्यराशौत्रिरात्रिस्थं शुक्तं चुक्रंतदुच्यते॰ इति ॥ स्वभावतोमधुरादिरसानिकालवशेनाम्लतांपन्नानि ... तानि शुक्तानीतिमन्वर्थं शुक्ताख्यां-कन्दमूलफलानि । शुक्तं । कुहु: । पूते । शटिते । राडा॰ इ॰ भा॰ शुक्तेषु शुचिरत्तौभावेन : । द्रव्य विशेषे ॥ यथा । कन्दमूलफलादीनिसस्नेहलवणानिच । यत्रद्रव्ये भिषूयन्ते तच्छुक्तमभिधीयते ॥ शुक्तं कफघ्नं तीक्ष्णोष्णंरोचनं पाचनंलघु : पाण्डुकृमिहरं रूक्षं भेदनं रक्तपित्तकृत् ॥ निघण्टे । कर्कशे ॥ काञ्जिके । मांसे ॥

शुक्ता । स्त्री॰ चुक्रिकायाम् ॥

शुक्ति: । स्त्री॰ कपालशकले । शङ्खे ॥ शङ्खनखे । नख्याम् ॥ अश्वावर्त्ते ॥ यथा । वक्षस्या : शुक्तयस्तिस्रजरीमानयाश्वाइति ॥ दुर्नामनि । अर्शोरोगे ॥ मुक्तास्फोटे । सीपी॰ इ॰ भा॰ प्र॰ ॥ दृग्व्याधिविशेषे ॥ कर्षद्वयेमिते ॥ चतुस्तोलकपरिमाणे । अष्टमिकायाम् । शुच्यति॰ शोचति॰ शोकतिवा । शुचपभिषवे॰ शुचशोके॰ शुकगतौवा । क्तिन् ॥

शुक्तिका । स्त्री॰ चुक्रिकायाम् ॥ शुक्तौ । मुक्तास्फोटे ॥

शुक्तिजम् । न॰ मौक्तिके ॥

शुक्तिमान् । पुं॰ कुलपर्वतविशेषे ॥ ऋषिकुल्याकुमाराद्या: शुक्तिमत्पादसम्भवा : ॥

शुक्तिबीजम् । न॰ मौक्तिके ॥

शुक्र: । पुं॰ दैत्यगुरौ । काव्ये । उशनसि । भार्गवे । कवौ । सिते ॥ ज्येष्ठमासे ॥ अग्नौ । चित्रकवृक्षे ॥

न० । मज्जजातधातौ । तत्पर्याया यथा । शुक्रं तेजोरेतसी च बीजवीर्येन्द्रियाणि चेति ॥ नेत्ररोगविशेषे ॥ शुक्लवर्णे । शुभ्रे । त्रि० तद्वर्णविशिष्टे । शोचयति । ऋज्रेन्द्रेति निपातनात् कुत्वं रन् प्रत्ययश्च । शोचतीति शुक्रः । शुचशोके । पूर्ववत् । शोचत्यनेन ॥ विरहिणः शोचन्त्यस्मिन् ॥ शुक्रोज्यैष्ठमास : ॥

शुक्रकर : । पुं० म[illegible] ॥ त्रि० वीर्यकारके ॥

शुक्रगृहम् । न० वृषतुलयोः ॥

शुक्रभुक्०ग्० । पुं० मयूरे ।

शुक्रभू: । स्त्री० मज्जनि । त्रि० वीर्योत्पन्ने ॥

शुक्रल : । त्रि० बहुवीर्यवति ॥ वीर्यदे ॥

शुक्रला । स्त्री० उच्चटायाम् ॥

शुक्रवार : । पुं० षष्ठवारे । शुक्रग्रहभोग्यदिने ॥

शुक्रशिष्य: । पुं० दितिसुते । असुरे ॥ शुक्रस्यशिष्य: ।

शुक्राङ्ग : । पुं० मयूरे ।

शुक्रास्त : । पुं० नष्टभृगौ । अस्य यात्रादिनिषिद्धो यथाह श्रीराजमार्तण्डे । यात्राविवाहव्रतबन्धवेश्मप्रासादचूडाकरणं हि तेषु । नष्टे भृगौ सोप्यद्रिभिन्नराणां देशप्रतिष्ठामपि कर्णवे धमिति ।

शुक्रियम् । न० शुक्रदैवते० हविषि ॥ शुक्रो देवताऽस्य । शुक्राद्घन् ॥

शुक्ल : । पुं० विष्कम्भादियोगान्तर्गतयोगविशेषे ॥ वर्णविशेषे । तत्पर्याया यथा । शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डुराः । अवदातः सितो गौरो वलक्षो धवलोऽर्जुन इति ॥ वत्सरविशेषे ॥ तत्फलं यथा । रोगा बहुविधास्तत्र मनुष्याणां जिकुरा: । सर्व एव प्रपश्यन्ति शुक्ले वर्षे वरानने ॥ इति ॥ शुक्ले रण्डे ॥ शुक्लपक्षे । न० रजते । रूप्य ॥ नवनीते ॥ नेत्ररोगविशेषे ॥ यथा । सुश्रुते । मृदुशुक्लाम शुक्लं तदङ्ग ते चिरात् ॥ चिकित्साचयथ भुक्त्वा पाणितलं घृष्ट्वा चक्षुषोर्यदि दीयते अचिरेणैव तद्वारि तिमिराणि व्यपोहति ॥ स्नानं कृत्वा तिग्मे वापि चक्षुष्यमनिलापहम् । अन्नमलैः सततं स्नानं परं दृष्टिवलावहम् ॥ शुण्ठीनिम्बदलैः पिण्डी सुखोष्णा स्वल्पसैन्धवा । धार्या नेत्रेऽनिलघ्ने पाशोथकण्डूव्यथाहरी ॥ त्रिफला पिण्डिका नेत्रे वातपित्तकफापहेति ॥ शु[illegible]गि ॥ देवयानमार्गे ॥ त्रि० शुभ्रवर्णयुक्ते ॥ शुक्लो गुणोऽस्याऽस्ति० अस्मिन् वा । मतुप् । गुणवचनेभ्यो मतुपोलुगिष्ट इति लुक् ॥

शोचतिवा । शुच० । रक्त्रेन्द्राग्रे
त्यादिनारन् निपातनात्कुत्वेश्च
रक्तः । पक्षे रेफस्य लः ॥

शुक्लकः । पुं० शुक्ले ॥ शुक्लपक्षे ॥

शुक्लकण्ठः । पुं० दात्यूहे ॥ त्रि०
श्वेतगलयुक्ते ॥

शुक्लकन्दः । पुं० महिषकन्दे ॥ श्वे
तमूले ॥

शुक्लकन्दा । स्त्री० अतिविषायाम् ॥

शुक्लकर्म्मा । त्रि० अकृष्णकर्म्मणि ॥

शुक्लकुष्ठम् । न० श्वेतकुष्ठे ॥

शुक्लकृष्णम् । न० शुभाशुभे ॥

शुक्लक्षीरा । स्त्री० काकोल्याम् ॥

शुक्लदुग्धः । पुं० शृङ्गाटके ॥

शुक्लधातुः । पुं० कठिन्याम् ॥ शुक्ल
श्चासौधातुश्च ॥

[illegible] । पुं० सितपक्षे । विधुस
म्पूर्णकलानुकूलपक्षदपचालाक्रियः
प्रवृत्ते ॥ तत्र पर्य्यायाः । सितस्त्वा
पूर्य्यमाणः [illegible] शुचिः
श [illegible]
तद [illegible] प्रतिप
दा [illegible] दर्शतिथ्यात्मा
[illegible] । यथा । [illegible] भौमासिशुक्ल
कृष्णौक्रमेणहि । चन्द्रवृद्धिकरः
शुक्लः कृष्णश्चन्द्रक्षयात्मकः ॥
पक्षत्याद्यास्तुतिथयः क्रमात्पञ्चद
शस्मृताः । दर्शान्ताः कृष्णपक्षे ताः
पूर्णिमान्ताश्चशुक्लके ॥

शुक्लपुष्पः । पुं० कवकवृक्षे । अतिच्छ
त्रे । कुन्दपुष्पवृक्षे ॥ मरुवके ॥
त्रि० श्वेतकुसुमयुक्ते ।

शुक्लपुष्पा । स्त्री० नागदन्त्याम् ॥
शीतकुम्भ्याम् ॥

शुक्लपुष्पी । स्त्री० नागदन्त्याम् ॥

शुक्लपृष्ठः) । पुं० निसिन्धुके ।
शुक्लपृष्ठकः) । पुं० सिन्धुवारे ॥

शुक्लबलः । पुं० जिनविशेषे ॥

शुक्लरोहितः । पुं० श्वेतरोहितवृ
क्षे ॥

शुक्लला । स्त्री० उच्चटायां ॥

शुक्लवर्ण्णः । पुं० श्वेतवर्णसजाती
यद्रव्ये । शङ्खशुक्तिकपर्दकादौ ॥

शुक्लवायसः । पुं० वके । दीर्घज
ङ्घे । वकोटे ॥

शुक्लशालः । पुं० अद्रिनिम्बे ॥ इ०
रा० गट् ॥

शुक्ला । स्त्री० शारदायाम् । सरस्व
त्याम् । वाग्देवतायाम् ॥ शुक्लां
ब्रह्मविचारसारपरमामाद्यांजगद्व्या
पिनींवीणापुस्तकधारिणीमभयदां
जाड्यान्धकारापहाम् । हस्तेस्फाटि
कमालिकांविदधतींपद्मासनेसंस्थि
तांवन्देतांपरमेश्वरींभगवतींबुद्धिप्र
दांशारदाम् ॥ गतिविशेषे । ज्ञान
प्रकाशमयत्वादर्च्चिरादिगतौ । सा
ममार्गस्त्वेनागमप्रसिद्धे देवयानमा
र्गे । स्नुह्याम् ॥ काकोल्याम् ॥

विदार्य्याम् । शुभ्रवर्णायाम् ॥ टाप् ॥

शुक्लाङ्गी । स्त्री० शेफालिकायाम् ॥

शुक्लापाङ्गः । पुं० मयूरे ॥ त्रि० शुक्लवर्णनेत्रान्ते ॥

शुक्लार्कः । पुं० सितपर्णासे । वर्व्वराप्रभेदे ॥

शुक्लार्म्म । न० चक्षूरोगविशेषे ॥ सुश्रुते तंमृदुशुक्लाभंशुक्लं तद्वर्द्धतेचिरात् ।

शुक्लिमा । पुं० शुक्लत्वे ॥

शुक्लोपलः । पुं० श्वेतपाषाणे ॥

शुक्लोपला । स्त्री० शर्करायाम् ॥

शुषिः । पुं० वायौ ॥ तेजसि ॥ चित्रे ॥ शुष्यति । शुषशोषणे । सुषिकुषिशुषिभ्यः क्सः ॥

शुङ्गः । पुं० न० वटे । आम्रातके ॥ पर्क्कट्याम् ॥ अङ्कुरे । कार्य ॥

शुङ्गा । स्त्री० प्लक्षवृक्षे ॥ नवपल्लवकोश्याम् ॥

शुङ्गाकर्म्म । न० पुंसवनसंस्कारविशेषे ॥

शुङ्गी । पुं० प्लक्षवृक्षे ॥ वटद्रुमे ॥

शुक् । स्त्री० शोके ॥ शोचनम् । शुचशोके । सम्पदादित्वात्क्विप् ॥ वशंप्राप्ते मृत्योः पितरितनयेवासुहृदिवा० शुचासन्तप्यन्ते भृशमुदरतोऽजडधियः । असारेसंसारेविरसपरिणामेतुविदुषांवियोगोवैराग्यदृढयतिवितन्वन्शमसुखम् ॥

शुचा । स्त्री० शोके ॥

शुचिः । पुं० ग्रीष्मे ॥ अग्नौ ॥ सौराग्नौ ॥ यथा । पावकः पवमानश्च शुचिरग्निश्च तेत्रयः । निर्मथ्यः पवमानः स्याद्वैद्युतः पावकः स्मृतः । यश्चासौ तपते सूर्य्यः शुचिरग्निस्त्वसौ स्मृतः । तेषान्तु सन्ततावन्ये चत्वारिंशच्च पञ्च च ॥ पावकः पवमानश्च शुचिस्तेषां पिता च यः । एतेषैकोनपञ्चाशद्वह्नयः परिकीर्त्तिताः ॥ इ० कौर्म्मे १२ अध्यायः ॥ चित्रके ॥ शृङ्गाररसे ॥ उत्तमयुवप्रकृतिकत्वेन० जुगुप्सारहितत्वात्० शुचिः शृङ्गाररसः ॥ आषाढेमासि ॥ शुचिंपवित्रंकरोति० शुचयति । तत्करोतीतिण्यन्ताद् इदुः ॥ यद्वा । शोचति । अन्तर्भावितण्यर्थोऽच्छुचेरगुपधात्किदितीन् ॥ शोचन्तिविरहिणोऽस्मिन्निति वा । शोचत्यनेनवा ॥ विदुषि ॥ शोचति जनं क्लिश्यमानम् ॥ उपदाशुद्धमन्त्रिणि ॥ ज्येष्ठमासि ॥ स्त्री० कश्यपपत्न्यास्ताम्रायाः सुतायाम् ॥ त्रि० धवले ॥ शुद्धे ॥ यथा । आसनंशयनंयानंजायापत्यंकमण्डलुम् । आत्मनः शुचिरेतानिपरेषामशुचीनि तु ॥ स्वभावतः संस्कारतश्च शुद्धे ॥ बाह्याभ्यन्तरशौचसम्पन्ने ॥ शे

र्थं शुचिर्हि मशुचिनं स्मृतारिशुचिः शुचिः। अनुपहते। शुक्लगुणविशिष्टे ॥

शुचिता। स्त्री॰ शुचित्व ॥

शुचिद्रुम :। पुं॰ पिप्पलवृक्षे ॥

शुचिप्रणी :। पुं॰ आचमने ॥

शुचिमणि :। पुं॰ स्फटिके ॥

शुचिमल्लिका। स्त्री॰ नवमालिकायाम्। यौप्योद्भवायाम्।

शुचिरोचि :। पुं॰ चन्द्रमसि ॥

शुचिव्रत :। पुं॰ युधिष्ठिरे ॥

शुचिश्रवा :। पुं॰ विष्णौ। शुचीनि पावनानिश्रांसिनामानिश्रवणीयानियस्यस :।

शुचिषद् पुं॰ परमात्मनि। शुचिचित्ते सीदति। षद्लृ॰। सत्सूद्विषेतिक्विप् ॥

शुटीरता। स्त्री॰ वीर्ये। इ॰ चि॰ शेष :॥

शुण्ठ :। स्त्री॰ शुण्ठ्याम्। शुण्ठतिकफम्। शुठि॰। इक् ।

शुण्ठी। स्त्री॰ शुष्कार्द्रके। महौषधि। विश्वे। नागरे। [illegible] शृंगवेरे। कफारौ। [illegible] भा॰ अस्यागुणायथाभावप्रकाशे। शुण्ठीरुच्यामवातघ्नीपाचनीकटुका लघु। स्निग्धोष्णामधुरापाकेकफवातविबन्धनुत् ॥ वृष्यास्वर्यावमिश्वासशूलकासहृदामयान्। हन्तिश्लीपद

शोथार्शआनाहोदरमारुतान्। आग्नेयगुणभूयिष्ठतोयांशपरिशोष्ययत्। संगृह्णातिमलंतत्तुग्राहिशुण्ठ्यादयोयथा ॥ विबन्धभेदिनीयातुसाकथंग्राहिणीभवेत्। शक्तिर्विबन्धभेदेस्याद्यतोनमलपातने ॥ शुण्ठतिकफम्। शुठिशोषणे। पचाद्यच्। गौरादि :॥ इतितु॰ कृदिकारादितिङीष् ॥

शुण्ठीक्वाथ :। पुं॰ विश्वाकषाये ॥ सचोक्तोयथा। वातंनिर्दलयन्कफंकवलयन्नुन्मूलयन्पीनसंदृष्टिनिर्मलयन्प्रभांप्रबलयन्हृद्रोगमुत्सारयन्। निःशेषंजठरामयंप्रशमयन्नुद्दीपयन्पावकंकासश्वासनिरासमाधमसौविश्वाकषाय : कृतइति ॥

शुण्ठीपाक :। पुं॰ विश्वभेषजप्रधानेपाकविशेषे ॥ यथा। प्रस्थद्वयं शुद्धशुण्ठ्याः पचेद्दुग्धे चतुर्गुणे। शुण्ठीसमंगव्यंसर्पिः खण्डं क्षीरसमंपचेत् ॥ ताम्रायसेकटाहेच दर्व्या[illegible]पचेत्। जातीफलं लीरकेहृ प्रतास्त्रात्रिफलंतथा। ए जाद्राधोमकुस्थाचविदारीमनयालुका। बीजंखर्जूरकाणांचघनसारकमेवच। पलार्द्धमात्राश्चैतेषांनालिकेरफलस्यच। पलान्यष्टौचपादांशिष्टलोहस्यमतौ ॥ चारबीजंमि

सिद्धापिप्पलीमरिचादि प्रस्तादिकः । चित्रकायाः पलेन कुशलया परिष्कृता भवेत् ॥ हन्त्यशीतिवातरोगान् चत्वारिंशत्पित्तजान् । विंशतिश्लेष्मसम्भूतानष्टौ च पिच्छरोगकान् ॥ दृगमूत्रभवान् रोगानन्यानपि निवारयेत् । महौषधप्रसादेन परमः सुन्दरो भवेत् । इति पाकावली ॥

शुण्ठाम् ।) न०
शुण्ठाम्लः ।) पुं० शुण्ठाम्लम् ।

शुण्डः । पुं० मदनिर्झरे ॥

शुण्डकः । पुं० मण्डहारके ॥ युद्धवेणौ ॥

शुण्डरोहः । पुं० भूतृणे ॥

शुण्डा । स्त्री० मद्यपानालये ॥ जलहस्तिन्याम् ॥ वेश्यायाम् ॥ हस्तिहस्ते ॥ सुरायाम् ॥ नलिन्याम् ॥ शुन्यते शुन गतौ । अमन्तुः ॥

शुण्डापानम् । न० मद्यस्थाने ॥

शुण्डारः । पुं० शौण्डिके । स्वल्पशुण्डायाम् ॥ ह्रस्वशुण्डा । कुटीशमीशुण्डाभ्यो रः ॥

शुण्डालः । पुं० हस्तिनि ॥

शुण्डी । पुं० शौण्डिके ॥

शुण्डिमूषिका ।)
शुण्डिमूषी ।) स्त्री० छुच्छुन्दर्याम् ॥ इ० रा० नि० व० ॥

शुण्डी । स्त्री० हस्तिशुण्डावृक्षे ॥

शुतुद्रिः । स्त्री० शतद्रुसरिति ॥ शु पूजितं तुदति । तुद० । इगुपधात्किदितीन् । बाहुलकात् कुक् ॥

शुदि । अ० शुक्लपक्षे ॥

शुद्धम् । न० मरिचे सैन्धवे ॥

शुद्धः । त्रि० पूते । पवित्रे । अशुद्धिवर्जिते ॥ निर्मले । निर्लेपे ॥ निर्दोषे ॥ शुक्ले ॥ रागान्तरामिश्रितरागे ॥ प्रसन्ने ॥ नित्यनिरस्तसमस्तदोषपरसंविद्रूपे ॥ शुध्यति शुध्यतेऽनेनवा । शुध शौचे । क्तः ॥ प्रशस्ताशुद्धिरस्त्यस्य । अर्शआद्यच् ॥ अन्तररहितभवने ॥ रागाद्यशुद्धिरहितेपरमात्मनि ॥

शुद्धचैतन्यम् । न० सर्वधर्मातीते ।

शुद्धजङ्घः । पुं० शुक्लपार्श्वे । गर्दभे ॥

शुद्धदत् । त्रि० शुक्लदन्तयुक्ते । शुद्धदन्ते । शुद्धा दन्ता यस्य सः ॥ अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्चेति पक्षे दन्तस्य दत्रादेशः ॥

शुद्धमतिः । स्त्री० पवित्रमतौ । सुमतौ त्रि० सुमतिविशिष्टे ॥ पवित्रबुद्धियुक्ते ॥ शुद्धा मतिर्यस्य ॥

शुद्ध[illegible]सः । पुं० चतुर्विंशतितमार्हदन्तर्गतजिनविशेषे ॥

शुद्धमांसम् । न० मांसव्यञ्जन

विशेषे । सुखवास० इ० भा० ॥ यथा । पाकपात्रे घृतं दद्यात्तैलं वातदभावतः । तस्मिन् हिङ्गुहरिद्रा च भर्जयेत्तदनन्तरम् ॥ छागादेरस्थिरहितं मांसं तत्खण्डितं भृशम् । धौतं निर्गालितं तस्मिन् घृते तद्भर्जयेत्क्रमैः ॥ सिद्धयोग्यं जलं दत्त्वा लवणं चापचेत्ततः । सिद्धं जलेन सम्पृक्तं वेसवारं परिक्षिपेत् ॥ द्रव्याणि वेसवारस्य नागवल्लीदलानि हि तण्डुलाश्च लवङ्गानि मरिचानि समानतः ॥ अनेन विधिना सिद्धं शुद्धमांसमिति स्मृतम् । शुद्धमांसं परं वृष्यं बल्यं रुच्यञ्च बृंहणम् ॥ त्रिदोषशमनं श्रेष्ठं दीपनं धातुवर्द्धनम् ॥ इति भावप्रकाशः ॥

शुद्धवती । स्त्री० वरुणस्य पुर्य्याम् ॥ यथा । शुद्धवत्यम्बुनाथस्य स्फटिकोपलनिर्मिता । पाण्डुराभ्रोपमैर्यादःसेविता भाति धामभिः ॥ इति मृगेन्द्रसंहिता ॥

शुद्धवल्लिका । स्त्री० गुडूच्याम् ॥

शुद्धसत्त्वम् । न० रजस्तमोभ्यामस्पृष्टे त्रिगुणायां मायायामंशमूर्त्तौ विमलसत्त्वगुणे ॥ त्रि० शुद्धान्तःकरणे ॥ शुद्धं रागादिकषायरहितं सत्त्वमन्तःकरणं यस्य ।

शुद्धान्तः । पुं० भूभुजां स्त्र्यागारे । अन्तःपुरे अवरोधने ॥ स्मा

भृद्गृहकक्षान्तरे । राजधानीस्थान विशेषे वा सगृहाद्ये । इति स्वामी ॥ राजयोषिति ॥ शुद्धोऽन्तोऽस्य । रक्षकाः शुद्धा अन्ते समीपेऽस्य वा ॥ अशौचान्ते ॥

शुद्धान्तपालकः । पुं० अन्तःपुररक्षके । गृहदौवारिके । कञ्चुकिनि । सौविदल्ले ॥ तल्लक्षणं यथा । शुद्धः कुलोद्गतः सूक्तः पितृपैतामहः शुचिः । राज्ञामन्तःपुराध्यक्षो विनीतश्च तथेष्यते ॥ इ० मत्स्यपु० ॥

शुद्धान्ता । स्त्री० राजयोषिति ॥

शुद्धापह्नुतिः । स्त्री० अलङ्कारविशेषे ॥ यथा ॥ शुद्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः । नायं सुधांशुः किन्तर्हि व्योमगङ्गासरोरुहम् । इति ॥

शुद्धिः । स्त्री० । मार्ज्जनायाम् ॥ दोषनिरासे ॥ वैदिककर्म्मार्हत्वप्रयोजकसंस्कारविशेषे ॥ कलिकल्मषदीनानां द्विजादीनां सुरेश्वरि । मेध्याऽमेध्याविचाराणां न शुद्धिः श्रौतकर्म्मणा ॥ न संहिताद्यैः स्मृतिभिरिष्टसिद्धिर्नृणां भवेत् । विनाह्यागममार्गेण कलौ नास्ति गतिः प्रिये ॥ कलावागममुल्लङ्घ्य योऽन्यमार्गे प्रवर्त्तते । न तस्य गतिरस्तीति सत्यं सत्यं न संशयः ॥ दुर्गायाम् ॥

यथा । स्मरणाच्छिन्नमात्रापि शोध्यते सर्वपातकात् । तेन शुद्धिरसमाख्याता देवीरुद्रतनौ स्थितेति ॥ शुचिस्थितां ज्ञान् । देवतायै सुराप्रदाने द्रव्यान्तरसंज्ञायाम् ॥ यथा । मांसं मीनश्च मुद्रा च फलमूलानि यानि च । सुराप्रदाने देवतायै सर्वेषां शुद्धिरीरितेति ॥

शुद्धिलाभः । पुं॰ प्रायश्चित्ते ॥

शुद्धोदनः । पुं॰ नृपविशेषे ॥ शुद्ध ओदनोऽस्य । शाकम्बादिः ॥ शुद्धोदनो यतो भुङ्क्ते न्यायवच्छुद्धमोदनम् ॥

शुद्धोदनसुतः । पुं॰ शाक्यमुनौ ॥

शुनः । पुं॰ वायौ ॥ कुक्कुरे ॥ यथाह वाचस्पतिः । कुक्कुरस्तु शुनिः श्वानः कपिलो मण्डलः शुनक इति ॥

शुनःशेपः ।) पुं॰
शुनःशेफः ।) न॰ मुनिविशेषे । ऋचीकमुनिपुत्रे । आजीगर्त्तौ ॥

शुनकः । पुं॰ कुक्कुरे । शुनति । शुनगतौ । कुन्शिल्पिसंज्ञयोरपूर्वस्यापि ॥

शुनकचञ्चुका । स्त्री॰ क्षुद्रचञ्चुक्षुपे ॥

शुनकचिल्ली । स्त्री॰ शाकविशेषे । श्वानचिल्लिकायां ॥

शुनाशीरः । पुं॰ इन्द्रे ॥ शुनो वायुः शीरः सूर्यः तावस्य स्तः । अर्शआद्यच् । अन्येषामपीति दीर्घः ॥ शुनाशीरो दन्तालव्यः सुनासीरो दन्त्यकः । तालव्यादिर्दन्त्यमध्यः शुनासीरश्च दृश्यते । इति भरतः ॥

शुनासीरः । पुं॰ इन्द्रे । पुरुहूते । पुरन्दरे ॥ शुनं इत्यव्ययं सुपूजार्थकं स्यात् ॥ शोभनं नासीरं सेनाविशेषो यस्य सः ॥ यद्वा । शुनो वायुः सीरश्चादित्यः । शुनश्च सीरश्चेति । देवताद्वन्द्वे चेत्यानङ् इति सर्वितकारः । दन्त्यतृतीयपाठो बहुसम्मतः ॥

शुनासीरीयम् । न॰ शुनासीर्य्ये ॥ शुनासीरौ देवताऽस्येत्यर्थे॰ द्यावापृथिवीत्यादिना छः ॥

शुनासीर्य्यम् । न॰ शुनासीरीये॰ हविरादौ । शुनासीरौ देवतास्येत्यर्थे॰ द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ चेति॰ यत् ॥

शुनिः । पुं॰ कुक्कुरे । सारमेये ॥

शुनी । स्त्री॰ कुक्कुरीम् । अश्नन्त्यश्च शुनीति व्यमत्र ॥ कुष्माण्डाम् ॥ गौरादित्वान्ङीष् ॥

शुनीरः । पुं॰ कुक्कुरीसमूहे ॥ इति॰ त्रि॰ शेषः ॥

शुन्ध्युः । पुं॰ अग्नौ ॥ शुन्धति । शुन्ध शुद्धौ । यजिमनिशुन्धिदसिजनिभ्यो युच् ॥

शुन्यम्। न० शून्ये॥ शुने हितम्। गवादिषु शुनः सम्प्रसारणं वाच दीर्घत्वमिति यत्॥ शुनीमांसमूढे॥

शुभः। पुं० विष्कम्भादिषु० योगविशेषे योगे॥ तत्रोत्पन्नस्य फलं यथा। शुभप्रसूतः शुभकृन्नराणां शुभोदयेष्टो विदुषां समाजे। करोति नित्यं शुभकर्म्म वीमान् शोभाधिकः शोभनवेशधारीति॥ छागे॥ शुभ हिंसायाम्। इगुपधेति कः॥ न० कल्याणे। क्षेमे। भद्रे। मङ्गले॥ मौक्तिके॥ पद्मकाष्ठे॥ इष्टफले॥ परमानन्दरूपत्वेन मङ्गलानां मङ्गले मोक्षसुखे॥ त्रि० सुखरूपे॥ क्षेमशालिनि॥ स्वसन्धारिपुटे॥ प्रशस्ते॥ शोभने। शुभ शोभायाम्। इगुपधज्ञाप्रीकिरः कः॥

शुभंयुः। त्रि० शुभान्विते॥ शुभमस्यास्ति। शुभमिति मान्तमव्ययम्। अहंशुभमोर्युस्॥

शुभकृत्। पुं० प्रभवादिवत्सरान्तर्गतवत्सरविशेषे। यथा। सुवर्णरूप्यधान्यानि जगत्सर्वं सुशोभनम्। ब्राह्मणाः क्षत्रियास्तुष्टाः सुभिक्षे शुभकृत्प्रिये॥ ३६॥ त्रि० शुभकारके॥

शुभगन्धकम्। न० बोले॥ त्रि० मङ्गलगन्धयुक्ते॥

शुभग्रहः। पुं० सौम्यग्रहे॥ चन्द्राधिकः शशी चैव गुरुः शुक्रस्तथैव च। पापाऽयुतो बुधश्चैव प्रोक्तास्ते शुभग्रहाः॥

शुभङ्करः। त्रि० क्षेमङ्करे। धर्मकारे॥

शुभङ्करी। स्त्री० पार्वत्याम्॥

शुभदः। पुं० अश्वत्थवृक्षे। त्रि० शुभदातरि॥

शुभदन्ती। स्त्री० सुदन्त्याम्। सुदत्स्त्रियाम्। पुष्पदन्तभयोषिति॥ शुभौ शोभनौ दन्तावस्याः। नासिकोदरौष्ठेति ङीष्॥

शुभपत्रिका। स्त्री० शालपर्ण्याम्॥ मङ्गलपत्रिकायाम्॥

शुभम्। अ० क्षेमे। भद्रे॥

शुभवासनः। पुं० मुखवासकारगन्धे। मुखवासने॥

शुभस्थली। स्त्री० यज्ञभूमौ। भद्रभूमौ॥

शुभा। स्त्री० वंशरोचनायाम्॥ गोरोचनायाम्॥ प्रियङ्गौ॥ शम्याम्॥ श्वेतदूर्व्वायाम्॥ देवसभायाम्॥ उमासखीविशेषे॥ मङ्गलजनिकायाम्॥ छाग्याम्॥ टाप्॥

शुभाङ्गः। त्रि० मङ्गलावयवयुक्ते। सुन्दरावयविनि॥ शुभानि सुलक्षणलक्षितान्यङ्गान्यस्य॥

शुभाङ्गी। स्त्री० कुवेरपत्न्याम्। कामदेवपत्न्याम्॥ मङ्गलावयवयुक्ता

याम् ॥

शुभाचार : । त्रि॰ शोभनाचारवति ।

शुभाचारा । स्त्री॰ उमासखीभेदे ॥

शुभाञ्जन : । पुं॰ शिग्रौ ॥

शुभात्मिका । स्त्री॰ कन्यायाम् । शुभोक्तौ ॥

शुभान्वित : । त्रि॰ मङ्गलयुक्ते । शुभंयौ ॥ शुभेनान्वित : कर्तृकरण इतिसमास : ॥

शुभ्र : । पुं॰ चन्दने ॥ शुक्लवर्णे ॥ शोभते । शुभंदीप्तौ । स्फायितञ्चीतिरक् ॥ न॰ अभ्रके ॥ रूप्ये ॥ कासीसे ॥ गडलवणे ॥ शाकम्भरीये ॥ त्रि॰ उद्दीप्ते । शुक्लगुणयुक्ते ।

शुभ्रदन् । त्रि॰ शुभ्रदन्ते ॥ शुभ्रादन्ता यस्य स : । अयान्तशुद्धशुभ्रेतिदन्तस्यदत्रादेश : ॥

शुभ्रदन्त : त्रि॰ शुभ्रदति ॥

शुभ्रदन्ती । स्त्री॰ पुष्पदन्तभार्यायाम् ॥ शुभ्रौदन्तौ॰ अस्या: सा । नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्चेतिङीष् ॥

शुभ्ररश्मि : । पुं॰ चन्द्रे ॥

शुभ्रा । स्त्री॰ गङ्गायाम् ॥ वंशरोचनायाम् । स्फटिक्याम् ॥

शुभ्रांशु : । पुं॰ सुधांशौ । औषधीशे । चन्द्रे ॥ शुभ्रांअंशवोयस्य ॥ कर्पूरे ॥

शुभ्रालु : । पुं॰ महिषकन्दे ॥

शुभ्रि : । पुं॰ ब्रह्मणि । कमलासने ॥ दुर्गन्धे ॥ शोभते । शुभशोभनार्थे । अदिशदिभूशुभिभ्य क्रिन् ॥

शुम्भ : । पुं॰ कश्यपाद्दित्यामुत्पन्ने॰ निशुम्भनमुचिभ्यांज्येष्ठे॰ शिवात्स्नातोयाग्रामवरे॰ असुरासने ॥ यथा । कश्यपस्यदितिर्भार्यासीदृक्षिणसत्तम । तस्या : पुत्रत्रयंजज्ञे सहस्राक्षाद्बलाधिकम् । ज्येष्ठ : शुम्भइतिख्यातोनिशुम्भश्चाऽपरोऽसुर : ॥ तृतीयोनमुचिर्नाममहाबलपराक्रम : । इतिवामनपुराणम् ॥

शुम्भघातिनी । } शुम्भमर्दिनी । } स्त्री॰ महासरस्वत्याम् ॥

शुम्भपुरम् । न॰ एकचक्रे । हरिद्वारे । अधुनातद्वलधुनाप्रसिद्धपुरञ्च ॥

शुम्भपुरी । स्त्री॰ शुम्भासुरनगर्याम् । शुम्भपुरे ॥

शुम्भमथनी । } शुम्भमर्दिनी } स्त्री॰दुर्गायाम् । महासरस्वत्यां ॥

शुम्भा । स्त्री॰ शोभायाम् ॥ शुम्भति शुम्भशुम्भशोभायाम् । भवादाच् ॥

शुल्क । पुं॰ न॰ घट्टादिदेये राजानिमित्तकपरिजभागे । राजानिर्वशीराजभाग : शुल्क : ॰ इत्युक्ते : । स्थलजलपथादिना॰ वाणिज्याकारि

भ्यो नियतस्थानेषु द्रव्यानुसारेण राजग्राह्यभागे । दान० कृ० भा० प्र० ॥ घट्टादौत्यादिशब्दे न शुल्कप्रतीत्यादिवत् : तथापि प्रावेशनैष्क्रामद्रव्येभ्यो राजग्राह्यभागोऽस्ति ॥ वराटकग्रहणे ॥ गृहोपस्करवाह्यानादेराभरणकर्मिणाम् । मूल्यं कन्यकायत् किञ्चिच्छुल्कं तत् परिकीर्त्तितम् ॥ गृहादिकर्मभिः शिल्पिभिस्तत् कर्मकरणाय भर्त्रादिप्रेरणार्थं स्त्रियै यदुत्कोचदानं तच्छुल्कम् तदेव मूल्यप्रवृत्त्यर्थत्वात् ॥ व्यसिक्तं च । यथा । यद्दानीतं भर्तृगृहे शुल्कं तत्परिकीर्त्तितम् ॥ भर्तृगृहगमनार्थमुत्कोचादियद्दत्तं तदित्यर्थः ॥ यज्ञादिदेयवस्तुनि ॥ शुल्कयति । शुल्कअतिसर्जने । घञ् ॥

शुल्कशाला स्त्री० आयस्थानविशेषे ॥

शुल्वम् न० ताम्रे ॥ यज्ञकर्मणि ॥ आचारे ॥ जलसन्निधौ ॥ शलति । शलगतौ उल्वादयश्चेति साधुः ॥ यद्वा । शुल्वयति । शुल्यतेवा । शुल्वमाने० ण्यन्तः । एरच् । घञ् वा ॥ वराटे । रज्जौ ॥

शुल्वा । स्त्री० रज्जौ ॥

शुल्वारि: । पुं० गन्धके ॥

शुश्रुवान् । त्रि० श्रुतवति । शृणोतेः क्वसुः ॥

शुश्रूः । स्त्री० मातरि । यथा । शिशोः शुश्रूषणाच्छुश्रूरितिमत्ताभारतेमेऽधमः ॥

शुश्रूषणम् । न० सेवायाम् । शुश्रूषायाम् ॥

शुश्रूषा । स्त्री० उपासने । परिचर्यायाम् । सेवायाम् ॥ यथाह भगवान् । नाहमिज्याप्रजातिभ्यां तपसोपशमेनवा । तुष्येयसर्वभूतात्मा गुरुशुश्रूषयायथेति ॥ कथने ॥ श्रोतुमिच्छायाम् ॥ शुश्रूषणम् । श्रुश्रवणे । सन्नन्तः । अप्रत्ययात् ॥

शुश्रूषुः । पुं० परिचारके । श्रोतुमिच्छौ ॥ यथा खनन् खनित्रेण नरो वार्यधिगच्छति । तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति ॥ शृणोतेः सन्नन्तादुप्रत्ययः ॥

शुषः । पुं० गर्त्ते ॥ शोषणे ॥ इत्यजयपालः ॥

शुषिः । स्त्री० शोषे ॥ छिद्रे । शुषिरे । शोषणम् । शुषशोषणे । इगुपधात् किदितीन् । शुष्यत्यनेनेतिवा ॥

शुषिरः । पुं० न० गर्त्ते ॥ वह्नौ ॥ मूषिके ॥ न० वंशयादिवाद्ये । चादिनावंशयादिवत् : । यथा । वंशीऽथपारीमधुरीतिसरीयङ्खकाहला : । तेऽडहीमुरलीबुकाशृङ्गिकास्वरनाभयः ॥ शृङ्गकापालिकंवंश

चर्मवंशस्तथापरः । एतैश्शुषिरभेदास्तु कथिताः पूर्वसूरिभिरिति ॥ विवरे ॥ त्रि॰ सरन्ध्रे । रन्ध्रान्विते । शुषिश्छिद्रमस्यास्मिन्वाऽस्ति । अघशुषीतिरः ॥ यद्वा । शुष्यति । शुष॰ इषिमदिमुदीतिकिरच् ॥ शुष्कपीत्यन्ये ॥

शुषिरा । स्त्री॰ नलीनामगन्धद्रव्ये ॥ शुषिराविद्रुमलताकपोताङ्घ्रिर्नटीनलीत्यमरः ॥ शुषिरमस्त्यस्य अर्शआद्यच् ॥

शुषिलः । पुं॰ समीरणे । वायौ ॥

शुष्कः । त्रि॰ नीरसे ॥ शुषितः । शुषः क्तइति॰ निष्ठातकारस्य ककारः ॥ यद्वा । शुष्यति । शुष॰ । स्ववभृशुषिमुषिभ्यः कक् ॥

शुष्कतर्कः । पुं॰ दुस्तर्के । अनुग्राहकमानहीनतया॰ निरालम्बने॰ ऽर्द्ववैनाशिकादिकल्पितेऽनुमाने ॥

शुष्कपत्रम् । न॰ नीरसदले ॥ आतपादिशोषितपत्रशाके । नालिता॰ शुक्ता॰ इ॰ गौ॰ दे॰ भा॰ प्र॰ । अस्यगुणा यथा । शुष्कपत्रं पयोमिश्रं पित्तश्लेष्मज्वरापहम् । तच्छुष्कपत्रं जलदोषनाशनं विशेषतः पित्तकफज्वरापहम् । जलस्थलस्यापि च पित्तहारकं सुरोचनं व्यञ्जनयोगकारकमिति राजवल्लभः ॥

शुष्कमत्स्यः । पुं॰ आतपादिनानीरसे मीने ॥ शुष्कमत्स्या नवल्याः स्युर्दुर्जराविड्विबन्धनाः ॥

शुष्कमांसम् । न॰ आतपादिना॰ अनार्द्रे पिशिते । उत्तप्ते । वल्लूरे ॥ यथा । वृद्धानां दोषलं मांसं बालानलनं लघु । त्रिदोषकृद्व्यालजुष्टं शुष्कं भूलचरं गुरु ॥

शुष्करेवती । स्त्री॰ मातृकाविशेषे ॥

शुष्कलः । त्रि॰ आमिषे ॥ शुष्कमांसस्यापणिके । पिशिताशिनि ॥ शुष्कलीमस्ति । शेषद्रूल्यण् । संज्ञापूर्वकत्वान्नवृद्ध्यभावः ॥

शुष्कली । स्त्री॰ शुष्कमांसे ॥ मांसमात्रे ॥

शुष्कवृक्षः । पुं॰ पाण्डुतरौ । धवे ॥

शुष्कव्रणः । पुं॰ किणे ॥

शुष्काङ्गः । पुं॰ धववृक्षे ॥ त्रि॰ निस्तेजावयवे ॥

शुष्काङ्गी । स्त्री॰ गोधायाम् ॥

शुष्कार्द्रम् न॰ शुण्ठ्याम् ॥

शुष्णः । पुं॰ सूर्ये ॥ वह्नौ ॥ शुष्यत्यनेन । शुष॰ । तृषिशुषिरसिभ्यः कित् इति नः ॥

शुष्मः । पुं॰ सूर्ये ॥ अग्नौ ॥ अर्चिषि ॥ न॰ तेजसि ॥ ओजसि । बले ॥ शुष्यति जलम् । शुषेरन्तर्भावितण्यर्थात्॰ अविसिवि

सिगुषिभ्यः किदितिमन्प्रत्ययः शुष्यत्यनेनवा । शुष॰ ॥

शुष्म । पुं॰ अग्नौ ॥ चित्रकवृक्षे ॥ सूर्ये ॥ न॰ तेजसि ॥ शुष्यत्यनेन । शुष॰ । अन्येभ्योऽपीतिमनिन् । संज्ञापूर्वकत्वान्नगुणः ॥ शोषयतिवा । बाहुलकात्सलुक् ॥

शुष्मी । त्रि॰ बलिष्ठे । मत्ते ॥ अस्त्यर्थे इनिः ॥

शूक । पुं॰ शूके । अच्छातीच्छाये । किंशारोरन्यस्मिन्॰ अच्छातीच्छाये । समासादेरन्यत्रवृश्चिकादिकण्टके ॥ शूयति, शीतनूकरणे । उलूकादयश्चेतिसाधुः ॥ दयायाम् । न॰ शूकतृणे ॥

शूककः । पुं॰ प्राशटे । यवे । रसे

शूककीटः । पुं॰ वृश्चिके ॥ शूकवान्कीटः । शूकयुक्तः कीटः । शाकपार्थिवादिः ॥ ऊर्णादिभक्षकः कीटविशेषोवृश्चिकः शूककीटस्य॰ भ्रमरप्रभेदोयम् ॥

शूककीटकः । पुं॰ शूककीटे ॥

शूकतृणम् । न॰ तृणविशेषे । शूके । शूकाढ्ये । कनिष्ठके ॥ इ॰ रा॰ राटः ॥

शूकधान्यम् । न॰ यवगोधूमादौ ॥ शूकस्यधान्यम् ॥

शूकपिण्डिका ।) स्त्री॰ शूकशिम्ब्याम् ॥
शूकपिण्डी ।)

शूकरः । पुं॰ कूलचरविशेषे , वराहे क्रोडे ॥ शूकोस्त्यस्य॰ खररोमत्वात् । रः ॥ यद्वा , शूकंराति । रा॰ आतइतिकः ॥ यद्वा । शू॰ इति ध्वनिंकरोति , अच्॰ टीवा ॥ शालिविशेषे ॥

शूकरकन्दः । पुं॰ वाराहीकन्दे ॥

शूकरपादिका । स्त्री॰ कोलशिम्ब्याम् । सुवराशिमइतिभाषाप्रसिद्धायाम् ॥

शूकरमुखम् । न॰ नरकविशेषे ॥

शूकराक्रान्ता । स्त्री॰ वराहक्रान्तायाम् ॥

शूकरी । स्त्री॰ शूकरस्त्रियाम् । जातेरितिङीष् ॥ इन्द्रस्याशुचिशूकरस्य च सुखेदुःखेचनास्त्यन्तरं स्वेच्छाकामनयोस्तयोरपिसुधाविष्ठाचकाम्याशनम् । रम्भाचाशुचिशूकरीचपरमप्रेमास्पदंमृत्युतः सन्त्रासोऽपि समः स्वकर्मगतिभिश्चान्योन्यभावः समः ॥ वराहक्रान्तायाम् ॥

शूकरेष्टः । पुं॰ कशेरुणि ॥ त्रि॰ सूकरप्रियवस्तुनि ॥

शूकलः । पुं॰ दुर्विनीताश्वे ॥

शूकवान् । त्रि॰ शूकयुक्ते ॥

शूकवती । स्त्री॰ कपिकच्छ्वाम् ॥

शूकशिम्बा ।) स्त्री॰
शूकशिम्बिः । } पुं॰ कपिकच्छ्वाम् ॥
शूकशिम्बिका ।) स्त्री॰
शूकशिम्बी ।)

। कौवद्द॰ भा॰ ॥ शूकयुक्ताशिम्बा॰ शिम्बि: शिम्बिका॰ शिम्बी वा ॥

शूकशिम्बा ।) स्त्री॰
शूकशिम्बि: । } पुं॰ कपिकच्छ्वाम् ।
शूकशिम्बी ।) स्त्री॰

मर्कट्याम् । कौंच॰ भा॰ प्र॰ ॥

शूका । स्त्री॰ शूकशिम्बायाम् ॥

शूकाख्यम् । न॰ शूकतृणं ॥

शूकापटु: । पुं॰ तृणग्राहिणि । तृणमणौ । कपूरं॰ भा॰ प्र॰ ॥ इ॰ हा॰ ली ॥

शूतिपर्ण: । पुं॰ आरग्वधे ॥

शूद्र: । पुं॰ अवरवर्ण: । वृषले । जघन्यजे । अस्यान्नादिग्रहणं वैदिकब्राह्मणेन न कर्त्तव्यमित्याह नारायण: । शूद्रान्नं शूद्रसम्पर्कं शूद्रेण च सहासनम् । ते यान्ति नरकं घोरं यावच्चन्द्रदिवाकराविति ॥ अस्योत्पत्तिरग्निपुराणे जातिमालायामुक्ता । तथाहि । आदौ प्रजापतेर्जाता मुखाद्विप्रा: सदारका: । बाह्वोश्च क्षत्रिया जाता ऊर्व्वोर्वैश्या विजज्ञिरे ॥ पादाच्छूद्रस्समभूत्तस्त्रिवर्णस्य च सेवक: । भीमनामा सुतस्तस्य प्रदीपस्तस्य पुत्रक: । कायस्थस्तस्य पुत्रोऽभूद्बभूव लिपिकारक: । कायस्थस्य त्रय: पुत्रा विख्याता जगतीतले ॥ चित्रगुप्तश्चित्रसेनो विचित्रश्च तथैव च । चित्रगुप्तो गत: स्वर्गे विचित्रो नागसन्निधौ । चित्रसेन: पृथिव्यां वै इति शूद्र: प्रपञ्चत इति ॥ शोचति । शुच शोके । शुचेर्दश्चेति रक्, दीर्घश्च ॥ अपहारे त्वा शूद्रेति श्रुतौ तु॰ रुद्धेर्धातु॰ ये।मए॰पुरस्कृत: तथाचोत्तरतन्त्रे भगवान्व्यास: । शुगस्य तदनादरश्रवणात्॰ तदाद्रवणात्सूच्यते हि ॥ १ । ३ । ३४ । अस्यार्थ: । छान्दोग्ये चतुर्थप्रपाठके॰ शिष्यं प्रति शूद्रेति सम्बोधनाच्छूद्रेऽधिकार इति चेन्न । शुगस्येति । अर्हतो हंसैरज्ञश्रुत्यनादृतो जानश्रुति: • तदनादरश्रवणाद्या शुक्॰ तया॰ आशीघ्रं॰ रैक्वगुरुं प्रति द्रवणात्स शूद्र: । एतद्वृत्तं॰ शूद्रेति सम्बोध्य॰ सर्व्वज्ञत्वख्यापनाय रैक्वेणसूच्यते ॥

शूद्रक: । पुं॰ अतिकुत्सिते शूद्रे ॥ कुत्सार्थे कन् ॥

शूद्रकर्म्म । न॰ द्विजपरिचर्य्यायाम् ॥ यथाह भगवान् । परिचर्य्यात्मकं कर्म्म शूद्रस्यापि स्वभावजम् इति । स्वभावजं रजउपसर्ज्जनतमोगुणस्वभावाज्जातम् । कालिदासोऽपि । द्विजातिसेवाऽनिर्दिष्टा तथा धर्म्मविधि: शूद्रनिसर्गकर्म्म च । स्वभावकर्म्म प्रतिहाय योऽन्यथा स्वयं व्रजेत्सोऽन्त्यजकर्म्मनर्म्मभागिति ॥ शूद्रस्य कर्म्म ॥ अस्य निषिद्धानि कर्म्मा

शियथा । शूद्राणाञ्चमहाराजहृदये वधनसञ्चय: । शुश्रूषा: कृतकार्य्यस्यकृतसम्मानकर्म्मण: ॥ अस्य नुष्ठातराजस्य शूद्रस्य जगतीपते । अल्पान्तरगतस्याशिद्रस्य धर्म्मगतस्य च ॥ आश्रमा विहिता: सर्व्वे वर्ज्जयित्वा निराशिषमिति पाद्मे स्वर्गखण्ड: ॥

शूद्रकृत्यम् । न० शूद्रकर्त्तव्यकर्म्मणि ॥

शूद्रधर्म्म: । पुं० शूद्रस्य शास्त्रविहिताचारे ॥ सच वर्णाश्रमशब्दे द्रष्टव्य: ॥

शूद्रप्रिय: । पुं० पलाण्डौ ॥ त्रि० तदिष्टद्रव्ये ॥

शूद्रप्रेष्य: । पुं० शूद्रस्य परिचारके ब्राह्मणादौ ।

शूद्रयाजक: । पुं० शूद्रसम्बन्धियज्ञादावृत्विजि ॥ शूद्रस्य याजक: ॥

शूद्रासनम् । न० पट्टे । मकुली । शूद्रसाधिकारे ॥ भूरि० त्रि० शेष: ॥

शूद्रशिष्य: । त्रि० शूद्राद्याकरणाध्ययनकारिणि ।

शूद्रा । स्त्री० शूद्रजातौ । अन्यभार्यायामपि शूद्रजातीयायाम् ॥ शूद्री शूद्रस्य भार्या स्यात् । शूद्रा तज्जातिरेव चेत्यमर: ॥ शूद्राचामहत्पूर्वा जातिरिति टाप् ॥

शूद्रान्नम् । न० शूद्रस्वामिकान्ने । यथा । शूद्रान्नेनतु भुक्तेन उदरस्थेन यो मृत: । स वै खरत्वमुष्ट्रत्वं शूद्रत्वञ्चाधिगच्छति ॥

शूद्राभार्य्य: । पुं० शूद्रास्वामिनि ॥ शूद्राभार्य्यायस्य स: ॥

शूद्रार्त्ता । स्त्री० प्रियङ्गुवृक्षे ॥

शूद्रावेदी पुं० सवर्णापरिणीयकृत शूद्राविवाहे ॥ शूद्रां विन्दति० परिणयति, विदेर्णिनि: ॥ शूद्रावेदी पतत्यत्रेरुतथ्यतनयस्य च । शौनकस्य सुतोत्पत्त्या तदपत्यतया भृगो: ॥ अपिच ॥ शूद्राशयनमारोप्य ब्राह्मणो यात्यधोगतिम् । जनयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयते ॥

शूद्री । स्त्री० शूद्रस्य भार्यायाम् । भिन्नजातीयायाम् शूद्रभार्यायाम् ॥ शूद्रस्य स्त्री । पुं० योगादाख्यायामिति ङीष् ॥

शून: ।)
शूनवान् ।) त्रि० श्वयथुनि, स्फीते ।

वर्द्धिते । उत्श्वीयते स्म । क्रमेण श्वयते: ० क्तक्तवतू । यजादित्वात् सम्प्रसारणे० पूर्व्वरूपे ओदितश्चेति नत्वे हलइति दीर्घ: ॥

शूनाक्ष: । त्रि० । उच्छूनाक्षे ॥

शून्यम् । न० आकाशे ॥ बिन्दौ ॥ त्रि० निर्ज्जनदेशादौ । तुच्छे । रिक्ते । सूना० रौता० इ० भा० ॥

अविद्यजीवनं शून्यं दिक्शून्या चेदबान्धवा । पुत्रहीनं गृहं शून्यं सर्वशून्या दरिद्रता ॥ खपुष्पादिवदत्यन्ताभावरूपे ॥ यथा । मृगतृष्णाम्भसि स्नातः खपुष्पकृतशेखरः । एष वन्ध्यासुतो याति शशशृङ्गधनुर्द्धरः ॥ शुनेहितम् । शुनः सम्प्रसारणं वा च दीर्घत्वमिति यत् ॥

शून्यकम् । न० शून्यार्थे । त्रि० तुच्छे ॥ शून्यरिक्तइतियावादिषु पाठात् कन् । स्वार्थे को वा ॥

शून्यता । स्त्री० चित्तस्य दोषे । रागद्वेषादितीव्रवासनया चित्तस्य स्तब्धीभाविकषाये । शून्यतायाम् ॥ ध्यानं चिन्ताहितानाम् : शून्यताश्वासतापकृत् ॥ शून्यस्य भावः तल् ॥

शून्यतिथिः । स्त्री० तिथिविशेषे ॥ यथा । अष्टमी नवमी चैव पक्षयोरुभयोरपि । माधवे द्वादशी त्याज्या पक्षयोरुभयोस्तथा ॥ ज्येष्ठे त्रयोदशी निन्द्या सिते० कृष्णे चतुर्द्दशी । आषाढे कृष्णपक्षस्य षष्ठी० शुक्ले च सप्तमी । द्वितीया च तृतीया च श्रावणे सितकृष्णयोः । प्रथमा च द्वितीया च नभस्ये मासि निन्दिता ॥ दशम्येकादशी निन्द्या० मासीषे शुक्लकृष्णयोः । ऊर्ज्जे चतुर्द्दशी शुक्ला कृष्णपक्षे तु पञ्चमी ॥ सप्तमी चाष्टमी सौम्ये पक्षयोरुभयोरपि । पौषे पक्षद्वये चैव चतुर्थी पञ्चमी तथा ॥ माघे तु पञ्चमी षष्ठी कृष्णे शुक्ले यथाक्रमम् । तृतीया च चतुर्थी च फाल्गुने सितकृष्णयोः । तिथयो मासशून्याख्या वित्तवंशविनाशिकाः । आसु श्राद्धं प्रकुर्वीत नैव मङ्गलमाचरेदिति वशिष्ठः ॥

शून्यनक्षत्रम् । न० शून्यभे ॥ यथा । अश्विनी रोहिणी चैव शून्यभे परिकीर्त्तिते । चित्रा स्वाती च वैशाखे० ज्येष्ठे विश्वं ज्यतारके ॥ भगवासवमाषाढे० श्रावणे हरिविश्वभे । नभस्ये वारुणान्त्यञ्च मजपाद्ध्वयुज्यपि ॥ कार्त्तिके पितृवह्न्यृक्षे सौम्ये चित्रादितैवते । पौषेद्रासकरार्द्राः स्युर्माघे मूलस्वविष्णुभम् ॥ तपस्ये शक्रभरणी शून्यभान्याहुरग्रजाः । एषु यत्नकृतं कर्म धनैः सह विनश्यति ॥

शून्यभम् । न० शून्यनक्षत्रे ॥

शून्यमध्यः । पुं० नले । पोटगले ॥

शून्यराशिः । पुं० मासविशेषगतराशिविशेषे । यथा । घटमत्स्यवृषा युग्म मेष कन्याः सवृश्चिकाः । तुलाचापकुलीराख्या मृगसंज्ञाश्च राशयः ॥ चैत्रादौ राशिशून्याख्या वित्तवंशविनाशदाः ॥

शून्यलग्नम् । न० दग्धलग्ने ॥ यथा । पञ्चादितस्त्वोजतिथौघटे यो मृगेन्द्रनक्रौमिथुनाङ्गनेच । चापेन्दुभेकर्क्कहरीहयान्त्यै।गोन्त्यौच नेष्टेतिथिशून्यलग्ने • तस्यांतस्यां तिथौ• द्वे द्वे लग्ने नेष्टे • निषिद्धे ॥

शून्यवादी । पुं० माध्यमिके । सौगते ॥ अस्यमतंयथा । विज्ञानं क्षणिकंनात्माविद्युदभ्रनिमेषवत् । अनन्यस्यानुपलब्धत्वाच्छून्यंमाध्यमिकाजगुरिति । अस्यापवादो यथा । अभावोयेनभावेनज्ञायते शून्यवादिनातस्यभावस्यसत्ता- वोधकेननिवार्य्यते ॥ अपिच । शून्यस्यापिहिशून्यत्वं तत्साक्षिणिसतोच्यते । असाक्षिकंचेत्तत्सिद्धंसाक्षिवत्स्यात्स्वयम्प्रभमिति ॥ शून्यंवदत्यवश्यम् । आवश्यकेणिनिः ॥

शून्यवृत्तिः । स्त्री० अभाववृत्तौ ॥

शून्यशून्यः । त्रि० शून्यप्रकारे । अनर्थप्राये ॥ प्रकारेगुणवचनस्येतिद्विर्भावः ॥

शून्या । स्त्री० नल्याम् ॥ तूलिकायाम् ॥ महाकण्टकिन्याम् । नागथूहर• नागफणाथूहर• इ• भा• ॥ वन्ध्यायाम् ॥

शून्यालयः । पुं० निर्जनमन्दिरे ॥

शूरः । पुं• भटे । वीरेयुद्धकर्म्मण्युत्साहशक्ति । यादवे । वसुदेवस्यपितरि ॥ सूर्य्ये ॥ शूरयति । शूरवीरविक्रान्तौ । पचाद्यच् ॥ यद्वा । शवति । शु : सौत्रोगत्यर्थः । शुसिचिमीनांदीर्घश्चेतिक्रन् । सिंहे । शूकरे ॥ कुक्कुरे ॥ चित्रकव्याघ्रे ॥ चित्रकवृक्षे ॥ साले । डह्वौ । लकुचे ॥ मसूरे । रगणे ऽ । ऽ ॥

शूरकः । पुं• कोकिलाक्षे ॥

शूरणः । पुं• अर्शोघ्ने । कन्दे ॥ अस्यगुणायथा । शूरणोदीपनोरूक्षः कषायः कण्डुकृत्कटुः । विष्टम्भी विशदोरुच्यः कफार्शः कृन्तनोलघुः ॥ विशेषादर्शसेपथ्यः प्लीहगुल्मविनाशनः । सर्वेषांकन्दशाकानांशूरणः श्रेष्ठउच्यते ॥ दद्रूणांरक्तपित्तानांकुष्ठानांनहितोहिसः । सन्धानयोगसम्प्राप्तः ॥ शूरणोगुणकृत्परः ॥ शूयते । शूरीहिंसायाम् । बहुलमन्यत्रापीतियुच् । कर्म्मणिल्युड्वा ॥

शूरणोद्भजः । पुं• हरिद्रकपक्षिणि ॥

शूरदेवः । पुं• भाव्यर्हद्विशेषे ॥

शूरसेनः । पुं• चन्द्रवंशीयेनृपतिविशेषे ॥ शूराः सेनायांयस्य । शूराणां सेनायस्यवा ॥ पुं• भूम्नि• मथुरादेशेषु ॥

शूर्प्पः । पुं॰ द्रोणद्वयात्मकपरिमाणे ॥ पुं॰ न॰ प्रस्फोटने । सूप॰ इ॰ भा॰ ॥ शूर्पयति । शूर्प्यतेऽनेनवा । शूर्पमाने । पचाद्यच्॰ पुंसीति घोषा ॥ यद्वा । शृणाति । शॄ॰ । सुशॄभ्यांनिच्चेतिपः । बाहुलकादुत्वम्॰ रपरत्वम्॰ हलिचेतिदीर्घः ॥ न॰ शोणितभाजने ॥

शूर्प्पकः । पुं॰ कामदेवारातावसुरविशेषे ।

शूर्प्पकर्णः । पुं॰ गजे । नागे । गणेशे । विघ्नराजे ॥ शूर्पाविवकर्णौ यस्य ॥

शूर्प्पकारातिः ।) पुं॰ कामदेवे ।
शूर्प्पकारिः ।)

शूर्प्पणखा । स्त्री॰ रावणभगिन्याम् ॥ शूर्प्पाइवनखानियस्याः । पूर्वपदात्संज्ञायामितिणत्वम् । नखमुखात्संज्ञायामितिनङीष् । केवलयौगिकत्वे तु ङीष् ॥

शूर्प्पणखी । स्त्री॰ रावणस्वसरि ॥ शूर्पं शोणितभाजनम्॰ नखबिदूषणइतिधातुः । शूर्पेण॰ शोणितभाजनेनयज्ञादिक्रियानखयतिदूषयतीतिशूर्पणखी ॥ यद्वा । शूर्पाकाराणिनखानियस्याः साङीष् ॥

शूर्प्पपर्णी । स्त्री॰ मुद्गपर्ण्याम् ॥

शूर्प्पवातः । पुं॰ सूर्पवायौ । फुल्लफाले ॥

शूर्प्पश्रुतिः । पुं॰ हस्तिनि ॥ इ॰ हा॰ ली ॥

शूर्प्पी । स्त्री॰ शूर्पणखायाम् ॥ गौरादित्वान्ङीष् ॥ चन्द्रभूर्पः ॥

शूर्म्मः । पुं॰ }
शूर्म्मिः । स्त्री॰ } शूर्मिकायाम्
शूर्म्मिका । स्त्री॰ }
शूर्म्मी । }

। लौहप्रतिमायाम् ॥

शूलः । पुं॰ न॰ आयुधविशेषे वर्छा॰ भाला॰ इ॰ भा॰ प्र॰ । मृत्यौ ॥ केतने ॥ विष्कम्भादिपुनश्चयोगे॰ तत्रजातस्यफलं यथा । भीतोदरिद्रोदयिताप्रियश्च शूलोद्भवः शूलङ्गरस्वशम्भ्वोः । विद्यामवाभ्यां रहितोयश्शूलीकरोतिलोकेनहितं कदाचित् ॥ मुतौच्या ॥ वधहेतावय॰ कीलके ॥ व्यथायाम् ॥ विक्रेतव्ये ॥ यथा । अट्टशूलाजनपदाः शिवशूलाश्चतुष्पथाः । प्रमदाः केशशूलिन्योभविष्यन्तिकलौयुगे ॥ इतिमहाभारतेआदिपर्व ॥ रोगविशेषे ॥ अस्यदानादिकं भावप्रकाशे॰ शूलाधिकारेद्रष्टव्यम् ॥ राश्यङ्कोरादिमध्यान्तेपुनश्चान्त्यादिमध्यतः । मध्येचान्तेतथादौचदोषेनाल्पातिशूलकम् ॥ भुक्तेजीर्यतिजीर्णेऽन्नेजीर्णे भुक्तेचजीर्यति । जीर्णेजीर्यतिभुक्तेऽपदोषेनाल्पा

तिरुक् क्रमात् ॥ ‡ दोषैर्वातपि
त्तकफैः शूलरुक् शूलाख्योरोगः
। रात्रिश्चअहश्चरात्र्यहनीतयोरात्रि
मध्यान्तेषुभागेषु वातेनशूलरुक्
नभवतिशमंप्राप्नोति । अल्पाभवति
ईषत् प्रादुर्भवति । अतिभवतिच
त्यन्तंभवति ॥ रात्र्यह्नोरन्त्यादिम
ध्यतःअंत्यादिमध्येषुपित्तेनशूलरुक्
नअल्पाअत्यन्तञ्चभवति ॥ तयोरेवम
ध्येचान्त्येचादौचकफेनशूलरोगोना
ल्पातिभवतीत्यर्थः । । भुक्तइति ।
अन्नेभुक्तेअभ्यवहृतेसतिजीर्यतिपा
कंगच्छति : जीर्णेपाकंगतेअन्नेइ
ति॰सर्वत्रसम्बध्यते । तेनायमर्थः
। भुक्तेअन्नेवातशूलरुक् नभवति
शान्तोभवतीत्यर्थः । जीर्यतिच
ल्पाभवति । जीर्णेचातिभवति ॥
पित्तशूलरुक्॰जीर्णेऽन्नेन । भुक्ते
ऽल्पा । जीर्यतिअतिभवतिश्लेष्म
शूलरुक् जीर्णेऽन्नेन । जीर्यति
अल्पा । भुक्तेऽतिभवति ॥ शूल
ति । शूलरुजायाम् । इगुपधेति
कः ॥

शूलग्रन्थिः । स्त्री॰ मालादूर्वायाम् ॥

शूलघातनम् । न॰ मंडूरे ॥

शूलघ्नः । पुं॰ तुम्बुरुवृक्षे । तीक्ष्ण फले ॥ त्रि॰ शूलघातके ॥

शूलद्विट् । पुं॰ हिङ्गुनि ॥

शूलधन्वा । पुं॰ शम्भौ । शिवे ॥

शूलधरः । पुं॰ शिवे ॥ त्रि॰ शूल धारिणि ॥

शूलधरा । स्त्री॰ दुर्गायाम् ॥

शूलधारी । पुं॰ शूलिनि ॥

शूलधारिणी स्त्री॰ दुर्गायाम् ॥

शूलधृक् । पुं॰ शिवे ॥ स्त्री॰ दुर्गा याम् ॥

शूलनाशनम् । न॰ सौवर्चललव णे ॥

शूलपत्नी । स्त्री॰ गौडदेशेशूलीतिख्याते तृणे ॥

शूलपाणिः । पुं॰ ईश्वरे । शिवे ॥ शूलंपाणौयस्य सः । प्रहरणार्थेभ्यः परेनिष्ठासप्तम्यौभवतः ॥

शूलप्रोतः । पुं॰ नरकविशेषे ॥

शूलभृत् । पुं॰ शङ्करे ॥

शूलशत्रुः । पुं॰ एरण्डवृक्षे ॥

शूलहन्त्री । स्त्री॰ यवान्याम् ॥

शूलहृत् । पुं॰ सूपधूपने । हिङ्गु नि ॥

शूला । स्त्री॰ पण्ययोषिति ॥ दुष्टव धार्थकीलके ॥

शूलाकृतम् । त्रि॰ शूलविद्धपक्वमांसा दौ । भटित्रे । शूल्ये । शूला॰ कृ॰ भा॰ प्र॰ ॥ शूलेनकृतम् । शूला त्पाकइतिडाच् ॥

शूलिकः । पुं॰ शशके ॥ न॰ शू ल्येअङ्गारपरिपाचितेमांसे ॥

शूली । पुं॰ शिवे । महेश्वरे ॥ यथा

। शूलं शूलीचक्रमादाय चक्री पाशं
पाशीवज्रमादाय वज्री धावन्त्वग्रे पृ
ष्ठतः पार्श्वतोवा दुर्गां दुर्गावादिनो
रक्षणाय ॥ त्रि॰ शूलरोगयुक्ते ॥
यथा । वर्जयेद्विदलं शूली कुष्ठी मांसं
क्षयी स्त्रियमिति ॥ शूलमस्यास्ति ।
इनिः ॥

शूलिकः । पुं॰ भाण्डीरवृक्षे ॥

शूलिनी । स्त्री॰ दुर्गायाम् ॥

शूली । स्त्री॰ तृणप्रभेदे । शूलपत्र्याम्
। धूम्रमूलिकायाम् ॥

शूलोत्खा । स्त्री॰ सोमराज्याम् ॥

शूल्यम् । त्रि॰ शूलके । लौहशलाक
यापक्वमांसे । शूलाकृते ॥ शूले संस्कृ
तं मांसम् । तत्र संस्कृतमित्यर्थे ॰शू
लोखाद्यत् ॥ तत्पाकप्रकारोय
था । कोलखण्डानि मांसानि ग्रथि
तानि शलाकया । घृतं सलवणं दत्त्वा
निर्धूमे दहनेपचेत् ॥ तत्तु शूल्यमि
ति प्रोक्तं पाककर्मविचक्षणैः । शू
ल्यं शल्यं सुधातुल्यं रुच्यं वह्निकरं लघु
। कफवातहरं बल्यं किञ्चित् पित्तक
रं हितम् ॥ अन्योपि । अङ्गारकर्प
राभ्यासु स्थूलयन्त्रे पुटेथवा । भर्ज
नं विविधं प्रोक्तं सूपकारविशारदैः
॥ जलेन स्वेदयेत्पूर्वं प्रोतं शूलेन्तरा
न्तरम् । दध्याद्रं हिङ्गुलवणैर्लि
प्तं स्वङ्गारपाचितम् ॥ तच्छूल्यन्तु
सुधातुल्यं रुच्यं वह्निप्रदं लघु । तद्दे

ष्याङ्गारतप्तन्तु प्रपक्वं वातशातनम् ॥

शूल्यकम् । त्रि॰ शूलविद्धपक्वमांसे ।
भटित्रे । शूल्यमेव । कन् ॥

शृगालः । पुं॰ शिवायाम् । भूरिमा
ये । गोमायौ । मृगधूर्त्तके ॥ सि
याल॰ इ॰ भा॰ ॥ सृजतिमायाम्
। सृज॰ । बाहुलकात् कालन् । न्य
ङ्क्वादिः । पृषोदरादिः ॥ असृ
गालातिवा । पृषोदरादिः ॥ सृगं
भिन्दिपालम्नलातिवा । पूर्ववत्
॥ तालव्यादिः । तालव्यापिदन्त्या
श्च शस्वगस्वलशूकराः । रशनापिच
जिह्वायां शृगालः कलशोपिचेतिश
ब्दभेदात् ॥ दैत्यभेदे ॥ वासुदेवे ॥
खले ॥ निष्ठुरे ॥ भीरौ ॥

शृगालकण्टकः । पुं॰ सियालकांटा इ॰
भा॰ प्र॰ क्षुपे ॥

शृगालकोलिः । पुं॰ क्षुद्रबदर्याम् ।
गोपघोण्टायाम् । भडवेरो॰ इ॰
भा॰ ॥

शृगालघण्टी । स्त्री॰ कोकिलाक्षे ॥

शृगालजम्बूः । स्त्री॰ गोडिम्बे ॥
घोण्टाफले ॥

शृगालविन्ना । स्त्री॰ पृश्निपर्ण्याम् ॥

शृगालिका । स्त्री॰ शृगालयोषिति ।
शिवायाम् ॥ लोमालिकायाम् ।
दीर्घजिह्वायाम् । लोमडी॰ इ॰
भा॰ प्र॰ ॥ त्रासात्पलायने । विद्रु
तौ । भाजड॰ इ॰ भा॰ प्र॰ ॥

शृगाली । स्त्री॰ विद्रवे । डमरे । भीत्यापलायने ॥ कोकिलाचे ॥ विद्राव्याम् : सियाला॰ इ॰ भा॰ ॥

शृङ्खलः । त्रि॰ पुंस्कटीवस्त्रबन्धे । कौपीनी॰ इ॰ भा॰ प्र॰ । पुंस्कटीभूषणे । तगडी॰ इ॰ भा॰ प्र॰ । निगडे । पुरुषप्रचारनिरोधके । लोहरज्जौ । बेड़ी॰ इ॰ भा॰ प्र॰ ॥ बन्धने ॥ शृङ्खः खलति । खल सञ्चये । अच् । पृषोदरादिः ॥

शृङ्खलकः ॥ पुं॰ दारुविकारशृङ्खलाप्रायबन्धनयुक्ते॰ करभे । करभाः स्युः शृङ्खलकादारवैः पादबन्धनैरित्यमरः । शृङ्खलबन्धनमस्य । शृङ्खलमस्य बन्धनं करभस्येति कन् उष्ट्रे ॥

शृङ्खला । स्त्री॰ पुंस्कटीवस्त्रबन्धे ॥ निगडे ॥ कपाटादिबन्धयोग्यवस्तुनि । सङ्कल॰ सांकर॰ इ॰ भा॰ प्र॰ ॥ परम्परायाम् । परिपाट्याम् ॥ शृङ्गं प्राधान्यं खलति । खल॰ । अन्तर्भावितण्यर्थः । अच् । पृषोदरादिः ॥ शृङ्गात् प्राधान्यात् ॰ खलत्यनेन । पुंसीति घः । भिदाद्यङ् वा । पृषोदरादिः ॥ कोकिलाचे ॥

शृङ्खली ।)
शृङ्खलीका ।) स्त्री॰ कोकिलाचे ॥

शृङ्गः । पुं॰ कूर्चशीर्षकवृक्षे । जीवकौषधौ । मुनिविशेषे ॥ न॰ प्रभुत्वे । शिखरे । कूटे । पर्वतोपरिभागे ॥ चिह्ने । क्रीडाम्बुयन्त्रे ॥ विषाणे ॥ उत्कर्षे ॥ पर्वतसमभूभागे । सानौ ॥ महिषादिशृङ्गनिर्मितवाद्यविशेषे ॥ यथा । क्वचिच्च नागायमनोद्गधश्शृङ्गजातप्रातः समुत्थायवयस्यवत्सपान् । प्रबोधयन् शृङ्गरवेण चारुणाविनिर्गतोवत्सपुरस्सरोहरिः ॥ शृणाति । शृ॰ । शृणातेर्ह्रस्वश्चेति॰ गन्नुट्च ॥ कामोद्रेके ॥

शृङ्गकः । पुं॰ जीवकवृक्षे । विषविशेषे ॥ परीक्षास्ययथा । यस्मिन्गोशृङ्गकेबद्धे दुग्धं भवतिलोहितम् । सशृङ्गकइतिप्रोक्तोद्रव्यतत्त्वविशारदैरिति ।

शृङ्गकन्दः । पुं॰ शृङ्गाटके ॥

शृङ्गजः । त्रि॰ शृङ्गजाते ॥ न॰ अगुरौ ॥

शृङ्गमूलः । पुं॰ शृङ्गाटके ॥

शृङ्गरोही । पुं॰ चम्पके ॥

शृङ्गला । स्त्री॰ अजशृङ्ग्याम् ॥

शृङ्गवान् । पुं॰ इलावृतस्योत्तरवर्ति सहस्रयोजनविस्तीर्णपूर्वतोदीर्घे कुरुवर्षस्यमर्यादागिरौ ॥

शृङ्गवेरम् । न॰ आर्द्रके । शुण्ठ्याम् ॥ शृङ्गमिवबेरं शरीरमस्य ॥ रामनिषादाधिपतेर्गुहस्यपुरे ॥

शृङ्गवेरकम् । न० आर्द्रके ॥

शृङ्गवेरपुरम् । न० तीर्थविशेषे ॥ यत्र रामो गङ्गामुत्तीर्णः ॥

शृङ्गवेराभमूलकः । पुं० गुन्द्रायाम् । गोंदपटेरा० इ० भा० प्र० ॥

शृङ्गाटः । पुं० अम्बुकण्टके स्वादुकण्टके ॥ कामाख्यादेशस्थ पर्वतविशेषे । द्वीपवत्याः पूर्वतस्तु शृङ्गाटो नाम पर्वतः ॥ न० चतुष्पथे ॥

शृङ्गाटकः । पुं० वारिकण्टके ॥

शृङ्गाटकम् । न० चतुष्पथे । वारिकण्टके । सिँघाड़ा० इ० प्र० जलजलताफले । गुणा यथा । शृङ्गाटकं हिमं स्वादु गुरु वृष्यं कषायकम् । ग्राहि शुक्रानिलश्लेष्मप्रदं पित्तास्रदाहनुत् । मांसशृङ्गाटके ॥ शृङ्गंप्राधान्यमटति । अट० । कर्मण्यण् । संज्ञायां कन् ॥

शृङ्गाटी । स्त्री० जीवन्त्याम् ॥

शृङ्गारः । पुं० सुरते । अङ्गभूषणे । राजमण्डने । मण्डने । नाट्यरसे ॥ तल्लक्षणं यथा । पुंसः स्त्रियां स्त्रियाः पुंसि संयोगं प्रति या स्पृहा स । शृङ्गार इति ख्यातो रतिक्रीडादिकारणम् । अपि च । शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः । उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते० इति ॥ शृङ्गंप्राधान्यमियर्ति । ऋ० । कर्मण्यण् । यद्वा । शृङ्गारमिति० शृणातेरारन् नुम० गुक्० ह्रस्वश्च ॥ न० लवङ्गे ॥ नागसम्भवे । चूर्णे ॥ कालागुरुणि ॥

शृङ्गारकः । पुं० शृङ्गारे ॥ स्वार्थे कः । न० सिन्दूरे । त्रि० शृङ्गयति ॥ शृङ्गमस्त्यस्य । शृङ्गवत्त्वाभ्यामारकन् ॥

शृङ्गारभूषणम् । न० सिन्दूरे ।

शृङ्गारयोनिः । पुं० कामदेवे ॥

शृङ्गारितः । त्रि० मण्डिते । अलङ्कृते । सिंगारा० इ० भा० । शृङ्गारोऽमण्डनं सञ्जातमस्य । तारकादित्वादितच् ॥

शृङ्गारी । पुं० गजे । क्रिमे । पूगे । क्रमुके । पद्मरागे । माणिक्ये ॥ त्रि० सशृङ्गारे ॥ सुवेषे । शृङ्गारोऽस्त्यस्मिन्नर्थे । अतइनिठनाविति इनिः ॥

शृङ्गि । स्त्री० मत्स्यविशेषे । शृङ्गाम् ॥

शृङ्गिकः । पुं० न० विषभेदे ॥

शृङ्गिका । स्त्री० प्रतिविषायाम् ।

शृङ्गिणः । पुं० मेषे ॥ शृङ्गोऽस्त्यस्य । ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन् इत्यादिना शृङ्गादिनच् निपात्यते ॥

शृङ्गिणी । स्त्री० गवि । गाभ्याम् । सौरभेय्याम् । गवि ॥ शृङ्गोऽस्त्यस्याः । अतइनिः ॥

शृङ्गी । पुं० नागे । हस्तिनि । वृक्षे ॥ पर्वते ॥ वर्षपर्वतविशेषे ॥ ऋष्यमौकर्षितनये ॥ वटे ॥ प्रलयाम्भसि शृङ्गवतिमत्स्यविशेषस्वरूपेश्वरौ ॥ अतिशय : शृङ्गीस्त्यस्य । इनि: ॥ त्रि० शृङ्गयुक्ते ॥

शृङ्गी । स्त्री० विषायाम् । अतिविषायाम् ॥ कुण्डलादिभूषणानां स्वर्णे ॥ मीनविशेषे । मद्गुरस्त्रियायाम् । सींगीमछ्ली० इ० भा० प्र० ॥ अस्यागुणायथा । शृङ्गीतु वातश्लेष्मघ्नीस्निग्धाम्ला प्रकोपणी । रसेतिक्ताकषायाचबल्यारुच्यास्मृ-त बुधैरिति ॥ ऋषभौषधे । जीवकौषधे ॥ अजशृङ्ग्याम् । यथा अस्यागुणा: । शृङ्गीकषायातिक्तोष्णाकफवातक्षयज्वरान् । श्वासोर्ध्ववातहृट्कासहिक्कारुचिवमीर्हरेत् ॥ शृणाति । शॄ० । शृणातेर्ह्रस्वश्चेति० गन्० कित्वं० नुडागमश्च । पुंयोगादिति० जातेरितिवा ङीष् । गौरादित्वाद्वा ॥

शृङ्गीकनकम् । न० कुण्डलोद्यलङ्कारसुवर्णे ॥ शृङ्गिणामो० शृङ्गीकनति । कनीदीप्तौ । क्वुन् ।

शृणि : । पुं० स्त्री० अङ्कुशे । आंकस० इ० भा० प्र० ॥ शृणाति । शॄ० । शृणातेर्बाहुलकात्सिर्निरिति कश्चित् ॥ दन्त्यादिरेवसाधु : ॥

शृत : । त्रि० क्षीरहविषो : पाके ॥ श्रायतेस्म । श्रापाके । शृतंपाके० इतिसाधु : । अनेनश्रातिश्रायत्यो रुद्रादिभ्वादौरकर्मकत्वात्कर्तरिक्ते शृभावोनिपात्यते० क्षीरहविषो: पाके । यथा० शृतंक्षीरं० स्वयमेव विक्लिन्नंपक्वंवेत्यर्थ : । शृतंहवि: स्वयमेव ॥ क्षीराज्यपयसांपाके ॥ क्वथिते ॥ इतिरत्नमालाशब्दचन्द्रिकात्र ॥ यथा । जलजलजजलवाहैर्गाङ्कश्चौषधशिशिरै : शिशिरंजलंशृतंयदितिसोऽलिम्नराज : ॥

शृदर : । पुं० भुजङ्गमे ॥ शृणाति । शॄ० । कृदरादयश्चेत्यदरप्रत्ययान्तो निपातित : ॥

शृधु : । पुं० गुदे । शर्द्धते । शृधुगणकुत्सायाम् । नृतिशृध्यो : कु ॥

शेखर : । पुं० आपीडे । शिखाविन्यस्तमालायाम् ॥ शिरोभूषणे ॥ न० लवङ्गे ॥ शिग्रुमूले ॥ शिङ्खति । शिखिगतौ । बाहुलकादर : । आगमशास्त्रस्यानित्यत्वान्ननुम् ॥ पक्षमात्रिकच्छपक्षमेप्रभेदे० । ५०।०।

शेखरित : । त्रि० मुकुटवत्कृते ॥

शेखरी । स्त्री० वन्दायाम् ॥

शेप : । पुं० शिश्ने । शेफसि ॥ शेते रेत : पाते । शीङ्स्वप्ने । बाहुलकात्पप्रत्यय : ॥

शेप : । न० शिश्ने ॥ शेतेरेत : पाते ।

हङ्शीङ्भ्यांरूपसिागमो : फुट् चेत्यसुन् ॥

शेपाल : । पुं॰ न॰ शैवाले ॥ ड॰ श॰ र॰ ली ॥

शेफ : । पुं॰ मेढ़े । शिश्ने ॥ शेते रेत : पातानन्तरम् । बाहुलकात् फप्रत्यय : ॥

शेफ : । पुं॰ मेढ़े । शिश्ने ॥ शेतेरे त : पाते । शीङ्॰ । हङ्शीङ्भ्यांरूपस्वांगयो : फुट्चेत्यसुन् । चत्रपवर्गद्वितीयोप्यागमे ॥

शेफसी । स्त्री॰ शिश्ने ॥

शेफालि : । स्त्री॰ शेफालिकायाम् ॥

शेफालिका । स्त्री॰ सुवहायाम् । निर्गुण्ड्याम् ॥ नीलिकायाम् । हारशृङ्गार॰ पारिजाता॰ इ॰ भा॰ प्र॰ पुष्पवृक्षे । शिउली॰ गौ॰ दे॰ भा॰ प्र॰ ॥ चत्वारि शेफालिकामाचे । शियली तिख्यातनीलपुष्पायांशेफालिकायामिति केचित् । शेफालिकाद्वयंशेफालिकामाचे॰ निर्गुण्ड्यादिद्वयं नीलपुष्पशेफालिकायामितिकेचित् । न्यवारीतिख्यातेपुष्पविशेषे॰ इतिचान्ये ॥ शब्दरत्नावल्युक्ता : पर्यायास्तु । शेफाली॰ मल्लिका॰ रजनीहासा॰ निशिपुष्पिका॰ सा शुक्लाचेत्॰ श्वेतसुरसा॰ भूतवेशीति ॥ राजनिर्घण्टोक्तास्तु । शुक्लाङ्गीशीतमञ्जरी॰ विजया॰ वातारि:॰ भूतकेशीति ॥ शेतेइतिशे : ॰ शीङोविच् । शयंफालयति । त्रिफलाविशरणे । अण् । स्वार्थेकन्कृत्वा ॥ शेफालिकाया : पुष्पम् । शेफालिका । पुष्पमूले शुबहुलमिति॰ अनुदात्तादेरञोऽस्यलुप् । लुपियुक्तवत् ॥ शेरते शेफाअलयोऽस्याम् । वा । ङीष् । स्वार्थेकन् ॥

शेफाली । स्त्री॰ निर्गुण्ड्याम् । शेफालिकायाम् । न्यवारीतिख्याते पुष्पवृक्षे । हारशृङ्गार॰ इ॰ च॰ भा॰ प्र॰ ॥ शेरतेशेफाअलयोऽस्याम् । वाङीष् ॥ नीलसिन्दुवारे । संभालू॰ इ॰ भा॰ ॥

शेमुषी । स्त्री॰ बुद्धौ । प्रज्ञायाम् । मतौ ॥ शेतेइतिशे: । शीङोविच् । शे:॰ मोहः॰ तंमुष्णातीति॰ शेमुषी । मुषस्तेये । मूलविभुजादित्वात्क : । गौरादित्वात्ङीष् ॥

शेयाल : । पुं॰ जलनील्याम् । शैवले । जलेशेते॰ तिष्ठति । शीङो वालन् ॥ बाहुलकाद्प्रत्यय : ॥

शेलु : । पुं॰ श्लेष्मातके । बहुवारके । लसोडा इ॰ भा॰ प्र॰ ॥ शिलति । शिल॰ । बाहुलकादु: ॥

शेव : । पुं॰ पशौ ॥ शिश्ने ॥ शि॰ उन्नते ॥ शेते । कृणुशीभ्यां

वन्निति॰ शौण्डीवत् ॥ शेतेऽत्यर्थम् । शेवयच्छतिसाधुर्वा ॥ सुखे ॥

शेवधि : । पुं॰ सामान्यनिधौ । शेवल्याणे॰ सोहेवा॰ अवधि : । तत्पुरुषडूत्यलुक् ॥ यद्वा । शेतेऽनेनशेवंसुखम् । दुन्शौभ्यांवन् । शेवंधीयतेऽस्मिन् । कर्मण्यधिकरणेचेतिकि : ॥

शेवलम् । न॰ शैवाले ॥

शेवालम् । न॰ शैवले ॥ जलेशेतेतिष्ठति । शौण्डीधुकलकबलजवालवद्वितिवालन् ॥

शेवालिनी । स्त्री॰ नद्याम् ॥

शेवाली । स्त्री॰ आकाशमांस्याम् ॥

शेष : । पुं॰ भगवतोद्वितीयायांमूर्त्तौ ॥ यथा । एकाभगवतोमूर्त्तिर्ज्ञानरूपाशिवामला । वासुदेवाभिधानासागुणातीतासुनिष्कला ॥ द्वितीयाकालसंज्ञाऽन्यातामसीशेषसंज्ञिता । निहन्तिसकलांश्चान्तेवैष्णवीपरमातनुरितिकौर्मे ४८ऽध्याय : ॥ सङ्कर्षणे । सीरपाणौ । बलदेवे ॥ वधे ॥ अनन्ते । नागजातिराजे । फणासहस्रसंयुते ॥ शिष्यते । शिष्लृविशेषणे॰ शिषअसर्वोपयोगेवा । घञ् ॥ यथा : शेषवद्वितिमीमांसका : ॥ उद्धर्ये ॥ पुं॰ न॰ उपयुक्तेतरे ॥ परमात्विकस्यपञ्चमप्रभेदे ॥ ८॰ ॥ त्रि॰ अन्ते । सीकृतेतरवस्तुनि ॥ अवशेषे ॥ यथा । अत्यादरपरोविद्वानीहमान : स्थिरांश्रियम् । अग्ने : शेषमृणस्यापिशत्रो: शेषंनशेषयेत् ॥ अपिच । ऋणशेषमग्निशेषंशत्रुशेषंतथैवच । पुन: पुन:प्रवर्द्धन्तेतस्माच्छेषंनशेषयेदितिगरुडपु॰ १६६ अ॰ ॥ शिष्यते परिशिष्यते । शिषिघञ् ॥

शेषत्वम् । न॰ उपकारित्वे ॥ पारार्थ्ये । परोद्देश्यप्रवृत्तिकत्वे ॥ यथा । शेषत्वमुपकारित्वंद्रव्यादावाहबादरि : । पारार्थ्यंशेषतातच्चसर्वेष्वस्तीतिजैमिनिरित्यधिकरणमालायांमाधवाचार्य्य : ॥

शेषभूत : । त्रि॰ अङ्गभूते ॥

शेषरात्रि : । स्त्री॰ रात्रिशेषे । उच्छन्दे । अपररात्रे ॥

शेषवत् । न॰ अनुमानभेदे ॥ शेष एवविषयतयाऽस्त्यस्यानुमानज्ञानस्य॰ तच्छेषवत् ॥

शेषा । स्त्री॰ प्रसादेनस्वामिमाल्यार्पणे । निर्माल्यदाने ॥ वर्णवृत्तान्तरे ॥ यथा । छन्दोविद्भि : प्रोक्ताषड्विंशैरेषा । सर्वैर्वर्णैर्यस्यादीर्घा साख्याच्छेषा : यथा । किंवाकुर्य्यात्कान्त : स्नेहेनैवायात : व्योमाभ्रैश्यामाश्चैताता : प्राणास्तेषाम् ॥

शैवावस्था । स्त्री० वार्द्धक्ये ॥

शैषित : । त्रि० उर्वरिते ॥

शैक्ष : । पुं० प्रथमारब्धवेदे । प्राथमकल्पिके ॥ शिक्षामधीते । तदधीतद्वेत्यण् ॥ शिक्षायाअयम्० तत्र भवोवा ॥ यद्वा । शिक्षांलभते । शैक्षवृत्यण् ॥ यद्वा । शिक्षाशीलमस्य । छत्रादिभ्योण् ॥

शैख : । पुं० सङ्कीर्णजातिविशेषे । । भूर्जकण्टके ॥

शैखरिक : । पुं० अपामार्गे ॥ शिखरेप्रायेणभवति । अध्यात्मादित्वाट्ठञ् ॥

शैखरेय : । पुं० अपामार्गे ॥

शैत्यम् । न० शीतत्वे ॥ भावेष्यञ् ॥ शैत्यंहियत्सःप्रकृतिर्जलस्य ॥

शैथिल्यम् । न० शिथिलतायाम् ॥ अनुद्यमे ॥ भावेष्यञ् ॥

शैनेय : । पुं० शिनेर्नप्तरि । सात्यकौ । श्रीकृष्णसारथौ ॥ शिनेर्गोत्रापत्यम् । इतश्चानिञइतिढक् ॥

शैर्षच्छेदिक : । त्रि० शीर्षच्छेद्ये ॥ शिरश्छेदंनित्यमर्हति । शीर्षच्छेदाद्यच्चेतिठञ्० प्रत्यययोगेनशिरस : शीर्षभावश्च ॥

शैल : । पुं० महीध्रे । अचले । शिलोच्चये ॥ प्रचुरा : शिला : सन्त्यत्र । ज्योत्स्नादित्वादण् ॥ न० शैलेये ॥ तार्क्ष्यशैले । रसाञ्जने ॥ शिलाजतुनि ॥

शैलकम् । न० शैलजे ॥

शैलगन्धम् । न० शावरचन्दने ॥

शैलगर्भा । स्त्री० शिलावल्कायाम् ॥

शैलगर्भाह्वा । स्त्री० शिलावल्कायाम् ॥ इ० रा० नि० गण : ॥

शैलजम् । न० शैलेये । सुगन्धिद्रव्यविशेषे ॥ शैलेजातम् । जनौ० । सप्तम्यांजनेर्ड : ॥ त्रि० पर्वतोत्पन्नेवस्तुनि ॥

शैलजा । स्त्री० गिरिजायाम् । पार्वत्याम् ॥ शैलाज्जाता । जनौ० । पञ्चम्यामितिड : ॥ गजपिप्पल्याम् ॥ सैंहल्याम् ॥

शैलधन्वा । पुं० शम्भौ । शिवे । इ० त्रि० शेष : ॥

शैलधर : । पुं० गिरिधरे । श्रीकृष्णे ॥ इतिधनञ्जय : ॥

शैलधातुजम् । न० शिलाजतुनि ॥

शैलनिर्यास : । पुं० अश्मजे । शिलाजतुनि ॥ शैलस्यनिर्यासइव ॥

शैलपत्र : । पुं० विल्ववृक्षे ॥

शैलपीलु : । पुं० अक्षोटे ॥

शैलभित्ति : । स्त्री० टङ्के ॥

शैलराज : । पुं० मेरुपर्वते ॥ हिमालये ॥ शैलानांराजा । टच् ॥

शैलराजतनया । स्त्री० पार्वत्याम् ॥

शैलराजसुता । स्त्री० पार्वत्याम् ।

दुर्गायाम् ॥ यथा । अरूपापरभावत्वाद्दुरूपाक्रियात्मिका । आताशैलेन्द्रगेहे सा शैलराजसुतात-तः ॥ इति देवीपुराणे ४५ अ० ॥

शैलवल्कला । स्त्री० शिलावल्कलायाम् ॥

शैलबीजः । पुं० भल्लातकवृक्षे ॥

शैलशिबिरम् । न० वार्द्धौ । धरणीस्रवे । समुद्रे ॥

शैलसुता । स्त्री० अम्बिकायाम् । पार्वत्याम् ॥ ज्योतिष्मत्याम् ॥

शैलाख्यम् । न० शैलजे ॥

शैलाग्रम् । न० शिखरे । शैलशृङ्गे ॥

शैलाजम् । न० शैलेये ॥ इ० रा० नटः ॥

शैलाटः । पुं० देवले ॥ सिंहे ॥ शुक्लकाचे । किराते ॥ इ० मेदिनीकरः ॥

शैलादिः । पुं० नन्दिनि । शिवगणविशेषे ॥

शैलापगा । स्त्री० क्षुद्रनद्याम् ॥

शैलाली । पुं० नटे ॥ शिलालिना प्रोक्तं नटसूत्रमधीते । पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोरिति णिनिः ॥

शैलिक्यः । पुं० सर्वलिङ्गिनि ॥ शिलिकस्वभावः कर्म वा ष्यञ् ॥

शैली । स्त्री० सङ्केते ॥ प्रणालिः परिभाषा शैली सङ्केतसमयव्यवहारा-स्थितिश्चकालसम्भेषः ॥ समवधानपूर्विकायां प्रवृत्तौ ॥ यथा ब्राह्मणैः सह ब्राह्मणा भोज्यन्ते क्षत्रियैः सह क्षत्रिया इति ॥ शीले भवा । अण् ङीप् ॥

शैलूषः । पुं० बिल्वे । मालूरवृक्षे ॥ नटे ॥ शिलूषस्यापत्यम् । अण् । शैलूषवृत्तेति० नानारूपत्वात् ॥

शैलूषिकः । पुं० नटवृत्त्यन्वेषिणि ॥

शैलूषिकी । स्त्री० शैलूषिकजातिस्त्रियाम् ॥

शैलेन्द्रः । पुं० हिमाचले ॥

शैलेन्द्रस्थः । पुं० भूर्जवृक्षे ॥

शैलेयः । पुं० मधुपे । भ्रमरे ॥ सिंहे । न० तालपर्ण्याम् । सैन्धवे । शैलजे शैलजातगन्धद्रव्ये । छरीला० इ० भा० प्र० ॥ अस्य पर्यायादयो यथा । शैलेयन्तु शिलापुष्पं वृद्धं कालानुसार्य्यकम् ॥ शैलेयं शीतलं हृद्यं कफपित्तहरं लघु । कण्डूकुष्ठाश्मरीदाहविषहृद्गुदरक्तहृदिति ॥ त्रि० शिलातुल्ये ॥ शिलायामुत्पन्ने ॥ शिलायां भवः । नद्यादिभ्यश्चेति ढक् ॥ शिलेव । शिलाया इति योगविभागेन ढञ् वा । ङीपि शैलेयी ॥

शैलेयी । स्त्री० पार्वत्याम् ॥

शैलोदा । स्त्री० निम्नगान्तरे ॥

शैलोद्भवा । स्त्री० क्षुद्रपाषाणभेदायाम् ॥ अम्बिकायाम् ॥

शैवः । त्रि० शिवोपासके । स्त्रीं ङ् स्रौतसिके ॥ न० शिवप्रोक्ते मार्गे ॥ यथा । न पादुकापरो मन्त्रो न देवः श्रीगुरोः परः । न हि शैवात्परो मार्गो न पुण्यं कुलपूजनात् ॥ आचारविशेषे ॥ यथा । अष्टाङ्गयोगसंयुक्तो यत्नेर्हिं शैवविधानतः । यावज्ज्ञानं समाधिस्थस्तावच्छैवः प्रचक्ष्यते ॥ विवाहविशेषे ॥ यथा । शैवो विवाहो द्विविधः कुलचक्रे विधीयते । चक्रस्य नियमे नैको द्वितीयो जीवनावधिः ॥ अपि च । परिणीता न रमिता कन्यका विधवा भवेत् ॥ साप्युद्वाह्या पुनः पित्रा शैवधर्मेष्वयं विधिः ॥ शिवस्यायम् । तस्येदमित्यण् ॥ शिवे । स्वार्थेऽण् ॥ वसुके । बस्तहच्चें ॥ धत्तूरे ॥ देशविशेषे ॥ शिवीनां विषयो देशः । विषयो देश इत्यण् ॥ न० शिवपुराणे ॥ शैवालि ॥ त्रि० शिवसंबन्धिनि ॥

शैवलः । पुं० शैवाले ॥ न० पद्मकाष्ठे ॥ जलशेते तिष्ठति । शीङो धुक्लुक्वलञ्वालनश्चेति वलच् ॥

शैवावधूतः । पुं० अवधूतविशेषे ॥ स चोक्तः श्रीमहानिर्वाणे सदाशिवेन । पूर्णाभिषेकविधिना संस्कृता ये च मानवाः । शैवावधूतास्ते ज्ञेयाः पूजनीयाः कुलार्चिते इति ॥

शैवलिनी । स्त्री० तरङ्गिण्याम् ॥ तटिन्याम् । नद्याम् ॥ शैवलमस्त्यस्याम् । अतइनिठनाविति निः । ऋन्नेभ्यो ङीप् ॥

शैवालम् । न० जलनील्याम् । शैवाले ॥ शैवालं तुवरं तिक्तं मधुरं शीतलं लघु । स्निग्धं दाहतृषापित्तरक्तज्वरहरं परम् ॥

शैवालिनी । स्त्री० नद्याम् ॥

शैवी । स्त्री० शैवविवाहेनोद्वाहितायाम् ॥

शैव्यः । पुं० श्रीकृष्णरथस्याश्वविशेषे ॥ यथा । तुरगाः शैव्यसुग्रीवमेघपुष्पबलाहकाः ॥ पाण्डवानां सेनापतिविशेषे ॥

शैशवम् । न० शिशुत्वे । बाल्ये ॥ शिशोर्भावः कर्म वा । इगन्ताच्च लघुपूर्वादित्यण् ॥

शैशिरः । पुं० श्यामचटके ॥ दन्तरोगविशेषे ॥ त्रि० शिशिरसम्बन्धिनि ॥

शैशुमारम् । न० शिशुमाराकारे ज्योतिश्चक्रे ॥

शोकः । पुं० मन्यौ । शुचि । व्या

कुलतायाम् । इष्टवियोगानुचिन्तने । इष्टवियोगनिमित्तमनसः सन्तापे । इष्टवियोगेनतल्लाभानर्हताज्ञाने ॥ सदानुचितएव० यतः । शोचमानास्तुसन्तोष्टाबान्धवाः सुहृदस्तथा । पातयन्तिगतंस्वर्गादश्रुपातेनराघव ॥ भूरियुन्नोगतः स्वर्गंपुण्येनपतितः पुनः । शोचितोबन्धुवर्गैस्तस्मात्तंपरित्यज ॥ इतिवह्निपुराणे रामंप्रतिवशिष्ठोक्तिः ॥ विवेकिनांचित्ततुनास्त्येवशोकावकाशः । यतः । पान्थानामिवबर्त्मनि० क्षितिरुहांनद्यामिव० भ्राम्यतां० मेघानामिवपुष्करे० जलनिधौसांयात्रिकाणामिव । संयोगः पितृमातृबन्धुतनयभ्रातृप्रियाणांयदासिद्धो० दूरवियोगएव० विदुषांशोकोदयः कस्तदा ॥ शोचनम् । शुचशोके । घञ् ॥ संसारे ॥ स्वसंसृष्टंपुरुषंशोचयतीतिशोकस्तमोमूलः संसारः । उक्तञ्चश्रीविद्यारण्यगुरुभिः । शोकंतरतिचात्मविदिति ॥

शोकनाशनः । पुं० अशोकवृक्षे ॥ शोकंनाशयति । णशअदर्शने । नन्द्यादित्वाल्ल्युः ॥ परमात्मनि ॥ स्वाभेदसाक्षात्कारेणसंसारिणांसंसारशोकंनाशयति ॥

शोकहारी । पुं० वनबर्बरिकायाम् ॥

शोकातिगः । त्रि० मानसदुःखैर्वर्ज्जिते ॥ शोकमतीत्यगच्छतीतितथा ॥

शोकापनुदः । पुं० पुत्रे । शोकमपनुदति । णुदप्रेरणे । तुन्दशोकयोः परिमृजापनुदोरितिसूत्रेणकः ॥

शोकारिः । पुं० कदम्बवृक्षे ॥

शोकार्त्तः । त्रि० शोकाकुले ॥

शोचनम् । न० शुचि । शौचे ॥ त्रि० शोकशीले । शोचति० तच्छीलः । शुचशोके । जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः । इतियुच् ॥

शोचना । स्त्री० शोकोत्पादनायाम् ॥

शोचनीयः । त्रि० शोच्ये । शोचितुंयोग्ये । यथा । येबालभावेनपठन्ति विद्यांयेयौवनस्थाअधनाअदाराः । तेशोचनीयाइहजीवलोकेमनुष्यरूपेणमृगाश्चरन्तिइति ॥

शोचिष्केशः । पुं० उषर्बुधे । अग्नौ ॥ शोचींषिज्वालाः केशाइवास्य । नित्यंसमासेऽनुत्तरपदस्थस्येतिषत्वम् । चित्रकवृक्षे ॥

शोचिः । न० रोचिषि । प्रभायाम् ॥ शुच्यति० पूतीभवत्यनेन । इशुचिरपूतीभावे । अर्चिशुचिहुसृपिछादिछर्दिभ्यः इसिः ॥

शोच्यः । त्रि० तपस्विनि । सापराधे ॥

अनुक्रम्य ॥

शोच्यकः । त्रि० क्षुद्रे ॥

शोठः । त्रि० मूर्खे ॥ अलसे ॥ धूर्त्ते । नीचे ॥ पापरते ॥

शोणः । पुं० कृशानौ । अग्नौ श्योनाके ॥ लोहिताश्वे । नदविशेषे । हिरण्यबाहौ ॥ योऽयममरकण्टकदेशात्पाटलिपुत्रे गङ्गायांमिलितः ॥ समुद्रविशेषे ॥ रक्तोदौ ॥ लवणाम्बुधेः पारस्थे रक्तजलेऽगाधे शीघ्रगामिनिनिम्नवहोपान्तवर्त्तिनि नदविशेषे ॥ अनुत्कटरक्ते । कोकनदवर्णे ॥ श्योनाकप्रभेदे ॥ न० सिन्दूरे ॥ रुधिरे ॥ त्रि० कोकनदच्छाये । कोकनदवर्णवति ॥ शोणति । शोणु वर्णगत्योः । पचाद्यच् ॥ रक्तवर्णे ॥

शोणकः । पुं० श्योनाकतरौ । सोनापाठा० कु० भा० प्र० ॥ स्वार्थे कः ॥

शोणज्योतीरथीसङ्गमः । पुं० तीर्थविशेषे ॥

शोणभण्टिका । स्त्री० रक्तसैरेये ॥

शोणभिण्टी । स्त्री० कुरवके ॥ कण्टकिन्याम् ॥

शोणपत्रः । पुं० रक्तपुनर्नवायाम् ॥

शोणपद्मम् । शोणपद्मकम् । न० रक्तपद्मे ॥

शोणपुष्पः । शोणपुष्पकः । पुं० कुद्दाले । कोविदारे ॥ शोणानि० तद्वर्णानि पुष्पाण्यस्य ॥

शोणपुष्पी । स्त्री० सिन्दूरपुष्प्याम् ॥

शोणप्रभवः । पुं० तीर्थविशेषे ॥

शोणरत्नम् । न० पद्मरागमणौ ॥ माणिक्ये ॥ शोणञ्च तद्रत्नञ्च ।

शोणा । स्त्री० शोणवर्णयुक्तायाम् । शोण्याम् ॥ शोणात्प्राचामित्यन्येषांमतेटाप् ॥

शोणाकः । पुं० श्योनाकवृक्षे । शुकनासे ।

शोणितम् । न० रुधिरे । रक्ते ॥ कुङ्कुमे ॥ शोणतिस्म । शोणु० । गत्यर्थे क्तः ॥

शोणितचन्दनम् । न० रक्तचन्दने ॥

शोणितपुरम् । न० बाणासुरपुरे सराहृग० कु० भा० प्र० ॥ शोणितसंज्ञकंपुरम् ॥

शोणितह्वम् । न० कुङ्कुमे ॥

शोणितोत्पलम् । न० रक्तोत्पले ॥

शोणी । स्त्री० रक्तायाम् । रक्तोत्पलवर्णायाम्स्त्रियाम् । शोणात्प्राचामितिवाङीप् ॥

शोणोपलः । पुं० माणिक्ये ॥

शोथः । पुं० शोफे । श्वयथौ, त्वग्विवर्द्धने ॥ शवति । शवगतौ । बाहुलकात् थः । च्छ्वोरित्यूठ् ।

गुणः। संज्ञापूर्वकत्वादेत्येधत्यूठ्स्विति न वृद्धिः। यद्वा। शवति। शु गतौ। पूर्ववत्। थः।
ऊर्द्ध्वगामी नरं हन्त्यधोगामी मुखात् स्त्रियम्। उभयोर्वस्तिसञ्जातः शोथो हन्ति न संशयः॥

शोथकः। पुं॰ शोथे॥

शोथकृत्। त्रि॰ शोफकारिणि॥

शोथघ्नः। त्रि॰ शोथनाशके॥

शोथघ्नी। स्त्री॰ रक्तपुनर्नवायाम्॥ पुनर्नवायाम्॥ शोथं हन्ति। अमनुष्यकर्त्तृकेऽपि चेति टक्। ङीप्॥ शालपर्ण्याम्॥

शोथजित्। पुं॰ भल्लातके॥ पुनर्नवायाम्॥ त्रि॰ शोफहारके॥

शोथहृत्। पुं॰ भल्लातके॥

शोधः। पुं॰ शोधने॥

शोधकः। त्रि॰ शुद्धिकारके॥ न॰ कतके॥

शोधनः। पुं॰ निम्बे॥ निम्बूके॥ न॰ शुद्धौ। शोधे॥ मलापनयने॥ विष्ठायाम्॥ कासीसे॥ धातुनिर्दोषीकरणे॥ प्रमादिपरिष्करणे॥ लिखितपत्रादेः प्रमादीकरणे॥ विरुद्धलिखितस्याशुद्धधीकरणे। ऋणस्याहरणे। त्रि॰ शुद्धिसाधने। शुद्धिकारके॥

शोधनी। स्त्री॰ सम्मार्जन्याम्। सा। चनौ॰ रु॰ मा॰॥ शोध्यतेऽनया। शुध शौचे। करणे ल्युट्। ङीप्॥ ताम्रवल्ल्याम्॥ नील्याम्॥

शोधनीयः। त्रि॰ शोधितव्ये। शोध्ये॥

शोधनीबीजम्। न॰ जयपाले। मलद्राविणि॥

शोधितः। त्रि॰ सम्मृष्टे। मक्षिकाद्यपनयनेन कृतशोधने व्यञ्जनादौ॥ यथा। व्यञ्जने कीटकाटादिशून्ये सम्मृष्टशोधिते त्विति शब्दरत्नावली। अपनीतमले। निर्णिक्ते। मृष्टे। धौते॥ शोध्यतेस्म। शुध॰। ण्यन्तः कर्त्तरि क्तः॥

शोफः। पुं॰ शोथे॥ शवति। शव॰। बाहुलकात् फः। छोरित्यूठ्। गुणः। संज्ञापूर्वकत्वादेत्येधत्यूठ्स्विति न वृद्धिः॥ यद्वा शवति। शु॰। पूर्ववत् फः॥

शोफकृत्। त्रि॰ शोथकृति॥

शोफघ्नी। स्त्री॰ रक्तपुनर्नवायाम्॥ शालपर्ण्याम्॥

शोफनाशनः। पुं॰ नीलवृक्षे॥ त्रि॰ शोथनाशके॥

शोफहृत्। पुं॰ भल्लातके॥ त्रि॰ शोथहारके॥

शोभनः। पुं॰ ग्रहे॥ विष्कम्भादिषु पञ्चमयोगे॥ तत्र जातस्य फलं यथा। स्याच्छोभनः शोभनयोगजन्मा दक्षो विपक्षप्रतिलब्धवित्तः।

सद्वृत्तरत्नरुचपुः सुधीरम्. सम्मा-
नयुक्तामनुजः प्रवीणः ॥ शोभ
नकृतिवत्सरे । तत्फलं यथा । सु
भिक्षं क्षेमसारोग्यं हृष्टा गोब्राह्मणाः
प्रिये । सुस्थिताः शोभने वर्षे प्रजाः
सर्वाः सुलोचने ॥ ३७ ॥ न०
वारिजे । पद्मे ॥ त्रि० सुन्दरे
। सुषमे । मनो[illegible]भते
। शुभदीप्तौ । अनुदात्तेत्त्वात्तयु
च् । शोभयति । नन्द्यादित्वात् ल्यु
[illegible] ॥

शोभनकः । पुं० शिग्रौ ।

शोभकृत् । पुं० शोभनवर्षे ॥ त्रि०
शोभनकारके ॥

शोभना । स्त्री० गोरोचनायाम् ।
हरिद्रायाम् ॥ इ० रा० ट ।

शोभनीयः । त्रि० शोभितव्ये ॥

शोभमानः । त्रि० विराजमाने
॥ यथा । माघः । शाखोत्कोट०
०समरविजयीस्थितिद्दलितो० मदघो
त्तोनागः शरदिसरितः स्थानपु
लिनाः । कलागोपश्चन्द्रः सुरत
मृदिताबालवनितातनिम्बा शोभमाने
गलितविभवास्वार्थिषु न पाकृति ॥

शोभा । स्त्री० कान्तौ । द्युतौ ॥
अवालक्षणं यथा । सा शोभारूप
भोगाद्यैर्यत्स्यादङ्गविभूषणम् ।
शोभैवकान्तिराख्याता मन्मथाप्या-
यनोज्ज्वलेति । इच्छायाम् ॥

गोपीविशेषे ॥ गोरोचनायाम् ॥
हरिद्रायाम् ॥ कृतिच्छन्दः २०
प्रभेदे ॥ यथा । रसाश्वाश्वैः शो
भानयुगलजठरामेघविस्फूर्जिता-
चेत् ॥ यथा । सपीयूषोन्मील
त्सरसिजयुगलामध्यनम्राफलाभ्या
मृतयोरूर्ध्वं राजत्तरलकिसलया श्लि
ष्टसुस्निग्धशाखा । लसन्मुक्तार
क्तोत्पलकुवलयवच्चन्द्रबिम्बास्थिता
यामत्र शोभामौलौ मिलद्दलपट-
लैः कृष्णसाकापिवल्लौ ॥ शोभव
ति । शुभशुम्भशोभायाम् । पचा
द्यच् ॥

शोभाञ्जनः । पुं० शिग्रौ । तीक्ष्ण
गन्धके । अक्षीवे । मोचके । स
हिजना० संभ्हना० इ० भा० प्र०
॥ शोभाञ्जनः कटुस्तिक्तः शो
थविद्रधिगुल्मनुत् ॥ शोभासम
क्ति । अस्त्रुव्यक्तिम्रक्षणकान्तिगति
षु । कर्त्तरिल्युट् । बहुलमन्य
त्रापीतियुज्वा ॥

शोभितः । त्रि० शोभायुक्ते ॥

शोभनी । स्त्री० शोभनीयायाम् ॥

शोली । स्त्री० वनहरिद्रायाम् ॥

शोषः । पुं० शोषणे ॥ यक्ष्मणि
॥ संशोषणाद्रसादीनां शोषइत्यभि
धीयते ॥ अस्यौषधं यथा । वचा
त्रिकटुकं पौष्करञ्च देवदारुच ।
मञ्जिष्ठात्रिफलाश्वेतामरीचिरज-

नीहयम्॥ प्रियङ्गुनिम्बविकट, गोमूत्रेणावघर्षितम्। नस्यमालेपनञ्चैवस्नानमुद्वर्त्तनं तथा॥ अपस्मारविषोन्मादशोषालक्ष्मीज्वरापहम्। भूतेभ्यश्चभयंहन्तिराजद्वारेचशासनमिति॥ रवेः पार्श्वगे॥ शोषयति। शुषशोषणे पचाद्यच्॥

शोषकः। त्रि॰ शोषणकर्त्तरि॥

शोषणः। पुं॰ कामास्त्रविशेषे॥ श्योनाके। न॰ रसाकर्षणे। रसादाने। शोषे॥ त्रि॰ शोषके॥

शोषसम्भवम्। न॰ पिप्पलीमूले॥

शोषापहा। स्त्री॰ क्षीतके॥

शोषितः। त्रि॰ जारिते॥ यथा। समुद्रः शोषितोयेनतमगस्तिंनमाम्यहम्॥

शौकम्। न॰ शुकगणे॥ शुकानां समूहः। खण्डिकादित्वादञ्॥ शुकस्यावयवोविकारोवा। प्राणिरजतादिभ्योऽञ्॥ स्त्रीणांकरणान्तरे॥

शौकरम्।)
शौकरवम्।) न॰ तीर्थविशेषे॥

शौक्तिकम्।)
शौक्तिकेयम्। न॰) मुक्तायाम्।
शौक्तेयम्।)

शौक्तिके। शुक्तिसम्भवे॥

शौक्लम्। न॰ शुक्लतायाम्॥

शौङ्गः। पुं॰ भारद्वाजे॥ शुङ्गस्याऽपत्यम्। विकर्णशुङ्गेत्यादिनाऽण्॥

शौचम्। न॰ बाह्याभ्यन्तरभेदभिन्ने पावित्र्यजनककर्मणि। शुचितायाम्। तदुक्तं श्रीमहानिर्वाणतन्त्रे। शौचन्तु द्विविधं देवि बाह्याभ्यन्तरभेदतः। ब्रह्मण्यात्मार्पणं यत्तच्छौचमान्तरिकं स्मृतम्॥ अद्भिर्वाभस्मनावापिमलानामपकर्षणम्। देहशुद्धिर्भवेद्येनबहिः शौचं तदुच्यते॥ गङ्गानद्योह्रदावाप्यस्तथाकूपाः स्वपुष्कलाः। सर्वं पवित्रजननं स्वर्णदीक्षमतः प्रिये॥ भस्माचयाज्ञिकं श्रेष्ठंमृत्स्नाशुमलवर्ज्जिता। यासेऽजिनकणादीनिमृद्भानीहि सुव्रते॥ किमत्रबहुनोक्तेनशौचाशौचविधौशिवे। मनः पूतंभवेद्येनगृहस्थस्तत्समाचरेत्॥ निद्रान्ते मैथुनस्यान्ते त्यागान्ते मलमूत्रयोः। भोजनान्ते मलैस्पृष्टे बहिः शौचं विधीयते॥ इति॥ अवर्त्तमाने प्रबलेकलौ॥ शौचेयत्नः सदा कार्यः शौचमूलोद्विजः स्मृतः। शौचाचारविहीनस्यसमस्तानिष्फ-लाः क्रियाः॥ मृज्जलादिभिः कायादिक्षालनंहितमितमेध्याशनादिच॰ बाह्यम्। मैत्र्यमुदितादिभिर्मदमानादिचित्तमलक्षालनमान्तरम्॥ कायमलानांमृज्जलाभ्य

क्षालनं बाह्यम् । मनोमलानां रागद्वेषादीनां विषयदोषदर्शनरूपप्रतिपक्षभावनयाऽपनयनमाभ्यन्तरमिति विवेकः ॥ वैश्यधर्म्मं तु यथा प्रयोगादौ मायाऽनृतादिराहित्यं न तु मृज्जलादिजनितं ग्राह्यं ॥ सर्व्वेषामेव शौचानामर्थशौचं परं स्मृतम् । योऽर्थे शुचिर्हि स शुचिर्न मृद्वारिशुचिः शुचिरिति मनुः ॥ आह्निके शौचविशेषउक्तः । गन्धलेपक्षयकरं शौचं कुर्य्यादतन्द्रित इति । एतत्तु सर्व्वसाधारणम् । गृहस्थस्य तु एका लिङ्गे गुदे तिस्रो दश वामकरे तथा । उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सता । पादयोः षट् प्रकीर्त्तिता इति च ॥ तृतीयशौचमिच्छन्न कुर्य्याद्द्विचतुर्गुणम् । यद्दिवाविहितं शौचं तदर्द्धं निशि कीर्त्तितम् ॥ तदर्द्धमातुरे प्रोक्तमातुरस्यार्द्धमध्वनि । स्त्रीशूद्रबालवृद्धानामर्द्धमेतत् प्रसूतवत् ॥ शौचविद्दक्षिणं हस्तं नाधः शौचे नियोजयेत् । तथैव वामहस्तेन नाभेरूर्द्ध्वं न शोधयेदिति ॥ मूत्रकरणे शौचन्तु एका लिङ्गकरे तिस्र उभयोर्मृद्द्वयं स्मृतमिति ॥ अशुद्धतानिरसनेन शुद्धेरापादकत्वञ्चास्य स्वरूपम् । यथा । अभक्ष्यपरिहारस्तु संसर्गश्चाप्यनिन्दितैः । स्वधर्म्मे च व्यवस्थानं शौचमेतत् प्रकीर्त्तितमिति ॥ सत्यशौचं मनःशौचं शौचमिन्द्रियनिग्रहः । सर्व्वभूतदयाशौचं जलशौचन्तु पञ्चमम् ॥ यस्य सत्यञ्च शौचञ्च तस्य स्वर्गो न दुर्लभः ॥ शुचेः कर्म्म भावो वा । इगन्ताच्च लघुपूर्व्वादित्यण् । गोकुले कन्दुशालायां तैलयन्त्रे च यन्त्रयोः । अमीमांस्यानि शौचानि स्त्रीषु बालातुरेषु च । अत्यन्तमलिनो देहो देही चात्यन्तनिर्म्मलः । असङ्गोऽहमिति ज्ञानं शौचमेतत् प्रचक्षते ॥

शौचपरः । त्रि॰ बाह्याभ्यन्तरशौचयुक्ते ॥

शौचिकः । पुं॰ वर्णसङ्करविशेषे ॥ यथा । कैवर्त्तस्य च कन्यायां शौण्डिकाद्देवशौचक इति पराशरपद्धतिः ॥

शौचेयः । पुं॰ रजके । इ॰ श॰ र॰ ली ॥

शौटीरः । पुं॰ वीरे ॥ त्यागिनि ॥ शौटति शौटृ गर्व्वे । कृशॄपॄकटिपटिशौटिभ्य ईरन् ॥

शौटीर्य्यम् । न॰ वीर्य्ये । गर्व्वे ॥ तदेतदिति शौटीर्य्यमौड्यलोमेन मृष्यतीति कल्पतरुः ॥ शौटीरस्य भावः । ब्राह्मणादित्वात् ष्यञ् ॥

शौण्डः । त्रि॰ मत्ते । मदिरामत्ते ॥ प्रगल्भे ॥ विख्याते ॥ शुण्डायां पानागारे भवः । तत्र भवइत्यण् ॥

शौण्डिकः । पुं॰ जातिविशेषे । आसुतीवले । मण्डहारके । सुँडी॰ कलवार॰ इ॰ भा॰ प्र॰ ॥ अस्योत्पत्तिर्यथा । तीरागान्धिककन्यायां कैवर्त्तादिह शौण्डिकः । कैवर्त्तस्य च कन्यायां शौण्डिकादेव सौचिकः ॥ इ॰ प॰ पु॰ ॥ शुण्डा सुरा॰ पण्यमस्य । तदस्य पण्यमिति ठक् । शुण्डिकादागतो वा । शुण्डिकादिभ्योऽण् ॥

शौण्डी । पुं॰ शौण्डिके ॥

शौण्डी । स्त्री॰ पिप्पल्याम् ॥ चव्ये । कटभ्याम् । मधुरेणौ ॥ शुण्डायां मद्यपानस्थाने भवा । तत्र भव इत्यण् । ङीप् ॥

शौण्डीरः । त्रि॰ शूरे । अहङ्कारिणि ॥ शौटति । शौट्॰ । ओणादिक ईरन् । पृषोदरादित्वान्नुम्॰ टस्य डः ॥

शौण्डीर्य्यम् । न॰ पौरुषे । शौर्य्ये ॥ भावे॰ ष्यञ् ॥

शौद्रः । पुं॰ द्वादशविधपुत्रान्तर्गतपुत्रविशेषे । पारशवे । त्रि॰ शूद्रसम्बन्धिनि ॥

शौद्धोदनिः । पुं॰ शाक्यवंशजमुनिविशेषे । सर्वार्थसिद्धे । गौतमे । मायादेवीसुते ॥ शुद्धोदननृपतिविशेषस्यापत्यम् । अत इञ् ॥

शौधिका । स्त्री॰ रक्तकह्लीकु॰ हे॰

चन्द्रः ॥

शौन । त्रि॰ पशुघातिनि ॥

शौनकः । पुं॰ ऋषिविशेषे । अतिधन्वनि ॥ शुनकस्यापत्यम् । बिदाद्यञ् । कापेयमुनिविशेषे ॥

शौभः । पुं॰ निलिम्पे । देवे । सुरे ॥ गुवाके । न॰ व्योमपुरे । हरिश्चन्द्रपुरे । हरचन्द्रावली॰ इ॰ भा॰ प्र॰ ॥ त्रि॰ शुभान्विते ॥

शौभाञ्जनः । पुं॰ शिग्रौ ॥ शोभाञ्जन एव । प्रज्ञाद्यण् ॥ अस्य शाकप्रकारस्तु । शिग्रुमूलफलपुष्पकं भृतं तैलपक्वमुदकेऽप्यधिश्रितम् । हिम सैन्धवरजोयुतं हि गुणायते सपदि दीपनमम्लः ॥ शिग्रुकः कटुतीक्ष्णोष्णः स्नायुशोथसमीरजित् । कृमिहृत्कासदोषघ्नस्तथा तिप्लीहगुल्महा ॥

शौभाञ्जनफलम् । न॰ शिग्रुफले ॥ सौभाञ्जनफलं स्वादु कषायं कफपित्तनुत् । शूलकुष्ठक्षयश्वासगुल्महृद्दीपनं परम् ॥

शौभिकः । त्रि॰ इन्द्रजालिके । कुहककारिणि ॥ इ॰ हारावली ॥

शौरिः । पुं॰ वसुदेवे । वासुदेवे । श्रीकृष्णे ॥ शूरस्यापत्यम्॰ वंशजत्वात् । वृष्णित्वेन ऋष्यन्धकवृष्ण्यत्यणभावम् । तथापि बाह्वादित्वादिञ् ॥ शनैश्चरे ॥

शौर्य्यम् । न॰ आरभट्याम् ॥ बले ।

शक्तौ ॥ शूरस्यकर्म भावोवा । ष्य ञ् ॥ उत्साहे ॥

शौल्क : । पुं॰ शुल्कसम्बन्धिनि ॥

शौल्कशालिक : । पुं॰ शुल्कशालाया मवक्रये ॥ अवक्रयद्गुरिठक् ॥

शौल्किक : । त्रि॰ शुल्काध्यक्षे ॥

शौल्किकेय : । पुं॰ विषप्रभेदे ॥ शु ल्किकदेशेभव : । इतिकुक्षौतियो गविभागाट्ठञ् ॥

शौल्किक : । पुं॰ कांसकारे । ताम्रकु ट्टके । कसेरा॰ इ॰ भा॰ प्र॰ ॥ शु ल्कघट्टनं शिल्पमस्य । शिल्पमिति ठक् ॥

शौव : । पुं॰ अभिहष्टे सामविशेषे ॥ हष्टं सामेत्यण् ॥ न॰ शुनांसमूहे ॥ खण्डिकादिस्वादञ् ॥

शौवस्तिकम् । त्रि॰ भाविदिनस्थायि नि द्रव्ये । श्वस्तने ॥ श्वोभवम् । श्वसस्तुट्चेति॰ ठक् । ऐजागम: ॥

शौवापदम् । त्रि॰ श्वापदे । श्वापद सम्बन्धिनि ॥ श्वापदस्येदम् । अण् । पदान्तस्यान्यतरस्यामितिपर्य्य॰ ऐच् ॥

शौषिर : । पुं॰ दन्तरोगविशेषे ॥ य था । श्वयथुर्दन्तमूलेषुरुजावान् कफरक्तज : । लालास्रावीसविज्ञे य : शौषिरोनामनामत : ॥ ४ ॥

शौष्कल : । पुं॰ शुष्कमांसस्यापणिके । त्रि॰ पिशिताशिनि ॥ शुष्कलेशु ष्कमांसं॰ मांसमात्रं वास्ति । शे षद्रत्यण् ॥

श्च्योत : । पुं॰ प्रापारे । क्षरणे ॥ श्च्योतनम् । श्च्युतिर्क्षरणे । घञ् ॥

श्च्योतन् । त्रि॰ क्षरति ॥

श्म । न॰ नाम्त : ॰ मुखे ॥

श्मशानम् । न॰ प्रेतदाहभूमौ । श व्यस्थाने । पितृवने ॥ शवा : शेरते ऽत्र॰ शवानांशयनं वा । पृषोदरा दित्वात्साधु ॥ श्मशब्देनशव : प्रो क्त : शानंशयनमुच्यते । निर्वचन्ति श्मशानार्थं मुनेशब्दार्थकोविदा: ॥

श्मशानकाली । स्त्री॰ कालीविशेषे ॥

श्मशानवासी । पुं॰ शिवे ॥ त्रि॰ श्म शानवासकर्त्तरि । श्मशानेवस्तुंशी लंयस्य । वस॰ । सुप्यौतिणिनि: ॥

श्मशानवासिनी । स्त्री॰ कालिकाया म् ॥

श्मशानवेश्मा । पुं॰ गिरिशे । शम्भौ ॥

श्मशानालयवासिनी । स्त्री॰ कालि कायाम् ॥ श्मशानालयेवस्तुंशील मस्या : । णिनि : । ङीप् ॥

श्मश्रु । न॰ पुंमुखलोमहहर्षोड़ाढीइ ॰ भा॰ केशश्मश्रु''ारयतामग्र्याभ वतिसन्ततिरितिदानधर्मभारतम् ॥ श्म॰ मुखंश्रयति । श्रिञ्॰ । श्म निश्रयतेऽर्जुन् । यद्वा । श्मनिमुखे शूयते॰ उपलभ्यते । श्रु॰ । कि

दृढादित्वात् ड : । क्विब्बा आग
मशासनस्यानित्यत्वान्नतुक् ॥

श्मश्रुमुखी । स्त्री॰ श्मश्रुयोषिति । पो
टायाम् ॥

श्मश्रुल: । त्रि॰ प्रवृद्धमुखरोमवति ।
सिध्मादित्वाल्लच् ॥

श्माशानिक : । पुं॰ पितृवनेपाठादि
कर्त्तरि । मताक्षरा॰ द्व॰ भा॰
प्र॰ । श्मशानेऽधीते । अध्यायिन्य
देशकालादितिठक् ॥

श्यान : त्रि॰ शीतात्सङ्कुचिते । स
ङ्कुचितमात्रे ॥ श्यायतेस्म । श्यै
ङ् गतौ । क्त : । संयोगादेरातोधा
तोर्यण्वतइतिनिष्ठानत्वम् ॥

श्याम: । पुं॰ प्रयागस्थवटे । वारिदे ॥
वृद्धदारके । पिके । कोकिले ॥
कृष्णवर्णे ॥ हरिद्वर्णे ॥ श्यामाके
॥ पीलुवृक्षे ॥ धत्तूरे ॥ दमनकवृ
क्षे ॥ गन्धतृणे ॥ न॰ मरिचे ॥
सिन्धुलवणे ॥ त्रि॰ कृष्णवर्णवि
शिष्टे ॥ हरिद्वर्णवति ॥ श्यायतेम
नोऽस्मात् । श्यैङ्॰ । इषियुधीन्धि
दसिश्याधूसूभ्योमगितिमक् ॥ पुं
॰ ऋषभाद्रिजाते॰ तमालदलनि
भे॰ चन्दनविशेषे ॥ श्रीकृष्णे ॥

श्यामक : । पुं॰ श्यामाके । सांवक
इतिभाषाप्रसिद्धान्ने ॥ न॰ रोहिष
तृणे ॥ श्यामं वर्णमञ्चकति । व्य
क्त॰ । कर्मण्यण् । शकन्ध्वादि: ॥

श्यामकण्ठ : । पुं॰ मयूरे ॥ शिवे ॥
पक्षिविशेषे ॥

श्यामकन्दा । स्त्री॰ अतिविषायाम् ॥

श्यामकाण्डा ।)
श्यामग्रन्थि : ।) स्त्री॰ गण्डदूर्वाया
म् ॥ गण्डाल्याम् । मीनगेधाया
म् ॥

श्यामपत्र : ।)
श्यामपत्रक :) पुं॰ तमालपादपे ॥

श्यामल : । पुं॰ पिप्पले । कृष्णे ।
श्यामे ॥ नीलमार्कवे । त्रि॰ कृष्ण
वर्णविशिष्टे । सिध्मादित्वाल्लच् ॥

श्यामलचूडा । स्त्री॰ गुञ्जायाम् ॥

श्यामलता । स्त्री॰ शारिवायामोषधौ
॥ श्यामलिम्नि ॥

श्यामला । स्त्री॰ पार्वत्याम् । कस्तू
र्याम् ॥ अश्वगन्धायाम् ॥ जम्ब्वा
म् ॥ कटभ्याम् ॥

श्यामलिका । स्त्री॰ नील्याम् ॥

श्यामलिङ्ग : । पुं॰ कृष्णेशौ ॥

श्यामवल्क : । पुं॰ शिरीषे ।

श्यामसुन्दर : । पुं॰ श्रीकृष्णे ॥

श्यामशालि : । पुं॰ कृष्णशालौ ॥

श्यामा । स्त्री॰ कालिकायाम् । दुर्गा
याम् । पार्वत्याम् ॥ श्यामायाउ
त्पत्तिर्यथा । तत : साकालिकादे
वीयोगनिद्राजगन्मयी । पूर्वत्य
क्तसतीरूपाजन्मार्थमेनकांययौ ॥
समयस्यानुरूपेणमेनकाजठरेशिवा

। सम्भूय च समुत्पन्ना सा लक्ष्मीरिव सागरात् ॥ वसन्तसमये देवी नवम्यां मृगयोगतः । अर्द्धरात्रौ समुत्पन्ना गङ्गेव शशिमण्डलात् ॥ ततस्तस्यान्तु जातायां प्रसन्ना ह्यभवन् दिशः । सानुकूलो ववौ वायुर्गम्भीरो गन्धिलः शुभः ॥ बभूव पुष्पवृष्टिश्च तोयवृष्टिः परा तथा । जज्वलुश्चाग्नयः शान्ता जगर्जुश्च घनाघनम् ॥ तस्यान्तु जायमानायां सर्व्वं स्वास्थ्यमपद्यत । तान्तु दृष्ट्वा यथाजातां नीलोत्पलदलानुगाम् ॥ श्यामां सा मेनका देवी मुदमायातिहर्षिता । देवाश्च हर्षमतुलं प्रापुस्तत्र मुहुर्मुहुः । तुष्टुवुस्तामन्तरीक्षे गन्धर्व्वाश्चाप्सरोगणाः । तान्तु नीलोत्पलदलश्यामां हिमवतः सुताम् ॥ कालीति नाम्ना हिमवान्नाजुहावकृते दिने । बान्धवास्तु स्वसन्तानां नाम्ना तां पार्व्वतीति च ॥ कालीति च तथा नाम्ना कीर्त्तिता गिरिनन्दिनी ॥ इति कालिकापुराणे ४० अध्यायः ॥ शारिवौषधौ ॥ कृष्णश्वेता शारिवा या सा श्यामेति निगद्यते ॥ अप्रसूताङ्गनायाम् ॥ नारीविशेषे । यौवनमध्यस्थायाम् । तल्लक्षणं यथा । स्निग्धनखनयनदशना निरनुशया मानिनी स्थिरस्नेहा । सुस्पर्शशिशिरमांसलवराङ्गना सा मता श्यामेति ॥ छायायाम् । भावानुरूपायाम् ॥ प्रियङ्गौ ॥ वाकुच्यौ । सोमलतायाम् ॥ यमुनायाम् ॥ त्रियामायाम् ॥ कृष्णत्रिवृत्तिकौषधौ । यथा । श्यामा त्रिवृत्ततो हीनगुणा तीव्रविरेचिका । मूर्च्छादाहमदभ्रान्तिकण्ठोत्कर्षणकारिणी ॥ नीलिकायाम् ॥ गुग्गुलौ ॥ गुन्द्रायाम् । गुडूच्याम् ॥ कस्तूर्याम् ॥ वट०ल्याम् ॥ वन्ध्यायाम् । रोचनायाम् ॥ नीलपुनर्नवायाम् ॥ पिप्पल्याम् । कृष्णायाम् । हरिद्रायाम् ॥ नीलगव्याम् ॥ नीलदूर्व्वायाम् ॥ स्त्रियाम् ॥ पद्मवीजे । शिंशपायाम् ॥ पक्षिविशेषे । वाराह्याम् । पाण्डविकायाम् । शकुन्याम् । पोतक्याम् । कालिकायाम् । शितिसिम्बिन्याम् ॥ श्यामो वर्णोऽस्त्यस्याः । अर्श आद्यच् ॥ मगन्ताद्दाटाप् ॥

श्यामाकः । पुं० तृणधान्यभेदे । श्यामके । श्यामे त्रिबीजे । अविप्रिये । राजधान्ये । सांवा० सांवक० इ० भा० प्र० ॥ श्यामाकः शोषणो रूक्षो वातलः कफपित्तहृत् ॥ श्यायते । श्यैङ्० । पिनाकादयश्चेति साधुः ॥ यद्वा । श्यामं वर्णम्० अकति । अक० । कर्म्मण्यण् ॥

श्यामाङ्गः । पुं० बुधग्रहे ॥ त्रि० श्या

सशरीरे ॥

श्यामाङ्गी । स्त्री० मेघाङ्ग्याम् । कृष्णकलेवरायाम् ॥

श्यामादनी । स्त्री० लाङ्गल्यां ॥

श्यामाम्ली । स्त्री० दीर्घशाखिकायाम् । नीलाम्ल्याम् ॥

श्यामायमानः । त्रि० योऽश्यामश्च भवति तत्र । लोहितादिडाज्भ्यः क्यष् । वा क्यष इत्यात्मनेपदे शानच् । आने मुक् ॥

श्यामितः । त्रि० श्यामले ॥

श्यामैककर्णः । पुं० श्वेतहयविशेषे ॥

श्यालः । पुं० पत्नीसहोदरे । वाकीरे । साला० इ० भा० प्र० ॥ श्यायते । बाहुलकात् शीङः कालन् ॥ उच्छिष्टमधुरकर्कवाची श्यालशब्दः । श्यालाति । आतोऽनुपेति कइति मुकुटः ॥

श्यालकः । पुं० श्याले ॥ स्वार्थे कः ॥

श्यालिका । स्त्री० केलिकुञ्चिकायाम् । पत्नीभगिन्याम् । साली० इ० भा० प्र० ॥

श्याली । स्त्री० श्यालिकायाम् ॥

श्यावः । पुं० कपिशे । कृष्णपीतमिश्रितवर्णे ॥ धूम्रे । शुक्लानुविद्धे कृष्णवर्णे ॥ शाकवर्णे० इति भावप्रकाशः ॥ मुद्राभवर्णे इति भट्टोत्पलः ॥ त्रि० तद्वर्णवति । श्यायते । कॄगॄशॄदृभ्योवः इति० बाहुलकात्०

श्यैङो वः ॥

श्यावदत् । त्रि० श्यावदन्ते । कृष्णपीतमिश्रितवर्णदन्तयुक्ते ॥ श्यावा दन्ता यस्य सः । विभाषा श्यावारोकाभ्यामिति पक्षे दन्तस्य दत्रादेशः ॥

श्यावदन्तः । त्रि० जन्मनैव कृष्णदन्ते ॥ श्यावा दन्ता यस्य । विभाषा श्यावारोकाभ्यामिति पक्षे दत्रादेशाभावः ॥

श्यावदन्तकः । त्रि० श्यावदन्ते ॥ प्रधानदन्तद्वयमध्यस्थसूक्ष्मदन्तविशिष्टे ॥ प्रधानदन्तोपरिदन्तान्तरयुक्ते ॥ अत्र विष्णुः । अथ नरकानुभूतदुःखानां तिर्यक्त्वमुत्तीर्णानां मानुष्ये लक्षणानि भवन्ति । कुष्ठ्यतिपातकी० ब्रह्महा यक्ष्मी० सुरापः श्यावदन्तकः० सुवर्णहारी कुनखी० गुरुतल्पगो दुश्चर्मा इत्यादि ॥ दन्तरोगविशेषे । यथा । योऽसृङ्मिश्रेण पित्तेन दग्धो दन्तस्त्वशेषतः । श्यावतां नीलतां वापि गतः स श्यावदन्तकः । १८ ॥ स्वार्थे कः ॥

श्येतः । पुं० शुक्लवर्णे । श्वेते । पाण्डुरे ॥ त्रि० तद्वर्णयुक्ते ॥ श्यायते । श्याय्याभ्यामितन्निति० श्यैङ इतन् ॥

श्येतकोलकः । पुं० मत्स्यविशेषे । शफरे । पुंटी० इ० गौ० भा० प्र० ॥

श्येनः। पुं० पक्षिविशेषे। अस्माद्भी। पक्षिणि। बाज० इ० प्र०। महाकायोमन्दवेगः श्येनद्रुतव्याख्यातारः॥ श्यायते। श्यैङ्०। आत्याद्रुजविश्यद्रुनच्। पाण्डुरे। शुक्ले॥ त्रि० तद्वति॥

श्येनघण्टा। स्त्री० दन्तीवृक्षे। एरण्डफलायाम्॥

श्येनचित्। पुं० आहवनीयधारणार्थे० इष्टकानिर्मितस्थलविशेषे। श्येनइवचितः। चिञ्०। कर्मण्यन्याख्यायामितिक्विप्॥

श्येनजीवी। पुं० क्रयविक्रयादिना श्येनर्जीवति० तस्मिन्॥

श्येनी। स्त्री० शुक्लवर्णायाम्। वर्णादनुदात्तोपधात्तोनइति० ङीप्० तकारस्यनकारादेशश्च॥ त्रिष्टुप्छन्दः ११ प्रभेदे॥ यथा। श्येन्युदीरितारजौरलौगुरुः॥ यस्यकीर्त्तिरिन्दुकुन्दचन्दनश्येनशोभलोकपावनीसदा। अङ्गकोषविप्लवप्रदविभ्रमातंभजामिभावगम्यमच्युतम्॥ श्येनयोषिति।

श्येनीपुत्रः। पुं० जटायुषि। सम्पातेरनुजे। दशरथराजसखे॥

श्यैनम्पाता। स्त्री० मृगयायाम्॥ पतनम्पातः। श्येनस्यपातः। कर्तृषष्ठ्यासमासः। श्येनपातोऽस्यांवर्त्तते। घञः साऽस्यांक्रियेतिञः। श्येनतिलस्यपातेञ० इतिममागमः॥

श्योनाकः। पुं० श्योनाकद्रुमे। सोनागाछ इ० गौ० भा० प्र०॥ अस्यपर्यायायथा। मण्डूकपर्णपत्रोर्णनटकट्वङ्गटुण्टुकाः। स्योनाकशुकनासर्क्षदीर्घवृन्तकुटन्नटाः॥ शोणकश्चारलुरिति। सोनापाटा० इ० भा० प्र०॥ अस्यगुणा यथा। श्योनाकोदीपनः पाके कटुकस्तुवरोहिमः। ग्राहीतिक्तोऽनिलश्लेष्मपित्तकासामनाशनः॥ टुण्टुकस्यफलंबालंहृद्यंवातकफापहम्। हृद्यंकषायंमधुरंरोचनंलघुदीपनम्। गुल्मार्शःकृमिहृत् प्रौढंगुरुवातप्रकोपणम्॥ श्यायते। श्यैङ्गतौ। पिनाकादौ निपातितः॥

श्रत्। अ० श्रद्धायाम्॥

श्रथनम्। न० वधे॥ यत्ने॥ पुनःपुनर्हर्षणे॥ बन्धने॥ मोक्षणे॥ शिथिलीकरणे॥

श्रद्दधानः। त्रि० श्रद्धायुक्ते। श्रद्धावति। यथा। श्रद्दधानः शुभांविद्यामाददीतावरादपि। अन्त्यादपिपरंधर्मं स्त्रीरत्नंदुष्कुलादपीति॥ श्रत्० श्रद्धांदधनोविभाषः॥

श्रद्धा। स्त्री० सम्प्रत्यये। आदरे। आस्तिक्यबुद्धौ। शास्त्रार्थप्रत्यये॥

गुरुवेदान्तादिवाक्येषु विश्वासे । गुरुवेदान्तादिवाक्येषु इदमित्थमेवेति प्रमारूपायामास्तिक्यबुद्धौ । शास्त्राचार्योपदिष्टेर्थेऽननुभूतेऽप्येवमेवैतदिति विश्वासे ॥ निगमाचार्यवाक्येषु भक्तिः श्रद्धेति विश्रुतेति पूज्यपादोक्तिः ॥ प्रत्यये । धर्मकार्येषु दृढश्रद्धेत्युदाहृता । नास्त्यश्रद्दधानस्य धर्मकृत्यप्रयोजनमिति स्मृतिः ॥ इयं वैराग्यस्य पत्नी । वैराग्यस्य च द्वे भार्ये श्रद्धाभक्तिश्चेत्युक्तेः ॥ श्रद्धानम् । डुधाञ० । श्रदन्तरोरुपसर्गवद्वृत्तिर्वाच्या । आतश्चोपसर्ग इत्यङ् । टाप् ॥ इच्छायाम् । काङ्क्षायाम् । स्पृहायाम् ॥ चेतसः प्रसाद इति पातञ्जलभाष्यम् ॥ श्रद्धा त्रिविधा । सात्त्विक्यादिभेदात् । यथा हि । श्रीभगवानुवाच । त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा । सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥ सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत । श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः । यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः । प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जना इति ॥

श्रद्धालुः । स्त्री० दोहदवत्याम् ॥ श्रद्दधाति । डुधाञ० । स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्यश्चालुजित्यालुच् । श्रद्धते तच्छीला वा ॥ त्रि० श्रद्धायुक्ते ॥

श्रद्धावान् । त्रि० आस्तिके । अतिशयेन श्रद्दधाने । श्रद्धासमन्विते ॥ श्रद्धास्त्यस्यास्मिन् वा । मतुप् ॥

श्रद्धाविरहितः । त्रि० ऋत्विग्द्वेषादिना श्रद्धारहिते । अश्रद्दधाने ॥

श्रद्धेयः । त्रि० विश्वसनीये । श्रद्धातुमर्हे । आगमोपपत्तिभ्यां हि निश्चितोऽर्थः श्रद्धेयो भवत्यव्यभिचारादिति पूज्यपादाः ॥

श्रन्थः । पुं० श्रन्थने ॥

श्रन्थनम् । न० ग्रन्थने । गुम्फे ॥ यथा । सन्दर्भो रचना गुम्फः श्रन्थनं ग्रन्थनं समा इति हेमः ॥

श्रन्थितः । त्रि० ग्रन्थिते । गुम्फिते ॥ कृतवधे ॥

श्रपितः । त्रि० पक्वे । घृतदुग्धजलभिन्नपक्वद्रव्ये ॥ यथा । निष्पक्वं क्वथिते पक्वं त्वाज्यं क्षीरं पयः शृतम् । अन्यत्तु श्रपितं श्राणं समुदक्तोद्धृते समे । इति जटाधरः ॥ आपाकेक्ताः ॥

श्रपिता । स्त्री० काञ्जिके ॥ इति केचित् ॥

श्रमः । पुं० अभ्यासे । अभ्यसने ॥ यथा । शस्त्राभ्यासे । खुरल्याम् । शरमिच्छो ॥ यत्नातिशये ॥ क्लमे । परिश्र

मे । आयासे । व्यायामे ॥ तपसि ॥ खेदे । गमनादिप्रयुक्तखेदादौ । श्रमः खेदोऽध्वरत्यादेरितिलक्षणम् ॥ श्राम्यत्यनेन । श्रमुतपसिखेदे । घञ् । नोदात्तोपदेशस्येतिवृद्ध्यभावः ॥

श्रमणः । पुं० तपस्विनि । श्रमणाः परिव्राड्इतिपूज्यपादाः ॥ बुद्धभिक्षुके । निर्ग्रन्थे । यतौ । जति० • हू० भा० प्र० । न० श्रमे । त्रि० निन्द्यजीविनि ॥ तपस्विनि ॥ श्राम्यति । श्रमु० । ल्यु ः ॥

श्रमणा । स्त्री० सुदर्शनायाम् । मांस्याम् । मुण्डीर्याम् । शबरीभेदे ॥

श्रमणी । स्त्री० चतुर्थाश्रमप्राप्तायाम् । तपस्विन्याम् ।

श्रमवारि । न० आयासेनस्वेदबिन्दौ ॥

श्रमी त्रि० श्रमयुक्ते ॥

श्रयः । पुं० श्रयणे । आये । श्रयणम् । श्रिञ्सेवायाम् । एरच् ॥

श्रयणम् । न० आये । आश्रये ॥ श्रिञो ल्युट् ॥

श्रवः । पुं० कर्णे । श्रवणे । श्रूयतेऽनेनश्रवणंवा । श्रुश्रवणे । ऋदोरप् ॥

श्रवणः । पुं० नक्षत्रविशेषे । श्रवणायाम् । न० श्रुतौ । श्रोत्रकर्मणि । श्रुतिस्मृतीतिहासपुराणेषुमध्वतात्प‍र्य्यावधारणे । तदर्थनिर्द्धारणानुकूलन्यायविचारे ॥ षड्भिर्लिङ्गैरशेषवेदान्तानामद्वितीयेवस्तुनितात्पर्य्यावधारणे । वेदान्तानामशेषाणामादिमध्यावसानतः । ब्रह्मात्मन्येवतात्पर्य्यमितिधीः श्रवणंभवेदित्युक्तेः ॥ आचार्य्यस्यमुखादेवश्रवणंसफलंभवेत् ॥ कर्णेन्द्रियेणसगुणस्यनिर्गुणस्यवाशब्देनज्ञाने । मननादौ • हू० भा० प्र० । पुं० न० कर्णे । कान० हू० भा० प्र० । कर्णपुंनपुंसकयोः । श्रवणावनिलस्यचेतिदर्शनात् । नस्त्रियांश्रवणः कर्णइतिहेमचन्द्राभिधानाच्च ॥ श्रूयतेऽनेन । करणेल्युट् ॥

श्रवणद्वादशी । स्त्री० श्रवणानक्षत्रयुक्तायांभाद्रशुक्लाद्वादश्याम् ॥

श्रवणशीर्षिका । स्त्री० श्रावणीवृक्षे । मुण्डीर्याम् ॥

श्रवणा । स्त्री० द्वाविंशतितमेनक्षत्रे ॥ तत्रजातस्यफलंयथा । शास्त्रानुरक्तोबहुपुत्रमित्रः सत्पुत्रभक्तिर्विजितारिवर्गः । चेज्जन्मकालेश्रवणाहिदस्यप्रेमोपराश्रश्रवणेप्रवीणः ॥ श्रावणपूर्णिमायाम् । श्रावण्याम् ॥ श्रवणेनयुक्तापौर्णमासी । नक्षत्रेणेत्यण् । तस्य• लुबविशेषइतिलुप् । टाप् । मुण्डीरीवृक्षे ॥

श्रवणाह्वा । स्त्री० मुण्डीरिकायाम् ।

श्रवः । न० यशसि ॥ कर्णे ॥ श्रूयते

ऽनेनवा । उ० । सर्वधातुभ्योऽसुन् ॥

श्रवाय्यः । पुं० यज्ञपशौ ॥ शृणोति । उ० । श्रुदक्षिस्पृहिगृहिभ्य आय्यः ॥ श्रवाय्यः० श्रवणीयइतिवेदभाष्यम् । अस्मन्नर्थे० वाच्यलिङ्गः ॥

श्रविष्ठा । स्त्री० धनिष्ठानक्षत्रे ॥ श्रवणं श्रवः । ऋदोरप् । प्रसिद्धः श्रवोऽस्त्यस्याः । मतुप् । अतिशयेनश्रववति । अतिशायनेतमबिष्ठनाविति ष्ठन् । विन्मतुपोर्लुगितिमतुपोलुक् ॥

श्रविष्ठाजः । पुं० बुधग्रहे ॥ त्रि० तज्जातमात्रे ॥

श्रव्यम् । न० सुन्दरवाक्ये ॥

श्राणम् । त्रि० । पक्वे ॥ श्रातिः । श्राणः । क्तः । संयोगादेरातोधातोर्यण्वतइति० तस्य नः ॥ श्रपिते ॥

श्राणा । स्त्री० । उष्णिकायाम् । यवागाम् ॥ श्रायतेस्म । श्रा० । कर्मणिक्तः । संयोगादेरितिनिष्ठानत्वम् ॥ पक्वायाम् ॥

श्राद्धम् । न० शास्त्रोक्तविधानेनपितृणांकर्म्मणि ॥ तल्लक्षणंयथा । संस्कृतव्यञ्जनाद्यञ्चपयोदधिघृतान्वितम् । श्रद्धयादीयतेयस्मात्श्राद्धंतेननिगद्यते० इतिवचनात्० श्रद्धयाऽन्नादेर्दानंश्राद्धमितिवैदिकप्रयो

गाधीनयौगिकमितिश्राद्धतत्त्वम् ॥ वेदबोधितपात्रालम्भनपूर्वकप्रमीतदेवताकत्यागविशेषे । सम्बोधनपदोपनीतान्० पित्रादीन्० चतुर्थ्यन्तपदेनोद्दिश्य० हविस्त्यागे । तच्च श्राद्धंद्वादशविधम्भवतिविश्वामित्रोक्तेः । तथाहि । नित्यंनैमित्तिकंकाम्यंवृद्धिश्राद्धंसपिण्डनम् । पार्वणञ्चेतिविज्ञेयंगोष्ठ्यांशुद्ध्यर्थमष्टमम् ॥ कर्माङ्गंनवमंप्रोक्तंदैविकंदशमंस्मृतम् ॥ । यात्रार्थैकादशंप्रोक्तंपुष्ट्यर्थंद्वादशंस्मृतमिति ॥ विवृतञ्चैतद्भविष्यपुराणेयथा । अहन्यहनियच्छ्राद्धंतन्नित्यमभिधीयते । वैश्वदेवविहीनंतदशक्तावुदकेनतु ॥ एकोद्दिष्टन्तुयच्छ्राद्धंतन्नैमित्तिकमुच्यते । तदप्यदैवंकर्त्तव्यमयुग्मानाशयेद्द्विजान् ॥ कामायविहितंकाम्यमभिप्रेतार्थसिद्धये । पार्वणेनविधानेनतदप्युक्तंखगाधिप ॥ वृद्धौयत्क्रियतेश्राद्धंवृद्धिश्राद्धंतदुच्यते । सर्वंप्रदक्षिणंकार्यंपूर्वाह्णेतूपवीतिना ॥ गन्धोदकतिलैर्युक्तंकुर्यात्पात्रचतुष्टयम् । अर्घ्यार्थंपितृपात्रेषुप्रेतपात्रंप्रसेचयेत् । येसमानाइतिद्वाभ्यामेतज्ज्ञेयंसपिण्डनम् । नित्येनतुल्यंशेषंस्यादेकोद्दिष्टंस्त्रियाअपि ॥ अमावास्यांयत्क्रियतेतत्पार्वणमुदाहृ

तम् । क्रियते वा पर्वणि यत् तत् पा
र्वणमिति स्थितिः ॥ गोष्ठ्यां यत्
क्रियते श्राद्धं गोष्ठीश्राद्धं तदुच्यते
। बहूनां विदुषां सम्पत् सुखार्थं पि
तृतृप्तये ॥ क्रियते शुद्धये यत्तु ब्रा
ह्मणानां तु भोजनम् । शुद्ध्यर्थमि
ति तत् प्रोक्तं वैनतेय मनीषिभिः ॥
निषेककाले सोमे च सीमन्तोन्नयने त
था । ज्ञेयं पुंसवने चैव श्राद्धं कर्मा
ङ्गमेव च ॥ देवानुद्दिश्य यच्छ्राद्धं तद्दै
विकमिहोच्यते । हविष्येण विशि
ष्टेन सप्तम्यादिषु यत्नतः ॥ गच्छन्
देशान्तरं यत्तु श्राद्धं कुर्यात्तु सर्पिषा ।
यात्रार्थमिति तत् प्रोक्तं प्रवेशे च न संश
यः ॥ शरीरोपचये श्राद्धमर्थोप
चय एव च । पुष्ट्यर्थमेतद्विज्ञेयमौप
चयिकमुच्यते • इति ॥ पञ्चविध
मपि बृहस्पतिवचनात् तद्यथा । नि
त्यं नैमित्तकं काम्यं वृद्धिश्राद्धं तथैव
च । पार्वणञ्चेति मनुना श्राद्धं पञ्च
विधं स्मृतमिति ॥ श्रद्धा चास्ति ।
प्रज्ञाश्रद्धार्चाभ्यो ण इति णः ॥ य
द्वा । श्रद्धाप्रयोजनमस्य । चूडा
दिभ्य उपसङ्ख्यानमित्यण् ॥ कलाव
स्यानुष्ठानमागमोक्तविधिनैव कार्य
म् । यथाह भगवान् सदाशिवः ।
आगमोक्तविधिं हित्वा यः श्राद्धं
कुरुते नरः । श्राद्धं तद्विफलं सोऽपि
पितृभिर्नरकं व्रजेत् । तत्तृतीयं शो

शितसमं पिण्डो मलमयो भवेत् । त
स्मान्मर्त्यः प्रयत्नेन शाङ्करं मतमा
श्रयेत् इति ॥ त्रि• श्रद्धान्विते ॥
श्राद्धदेवः । पुं• अन्तके । धर्मराजे
। यमे । श्राद्धस्य देवः • अंशभा
क्त्वात् • पितृपतित्वाद्वा ॥
श्राद्धप्रदेशः । पुं॰ स्वगृहतीर्थादिषु ॥
श्राद्धशाकम् । न• कालशाके ॥
श्राद्धिकः । त्रि• श्राद्धिनि । अद्य
तन एव श्राद्धान्नभोजिनि । श्राद्ध
शब्दः कर्मनामधेयं तत्साधनद्रव्ये
लक्षणया वर्त्तते । श्राद्धं भुक्तमनेन
। श्राद्धमनेन भुक्तमिति ठनाविति
ठन् ॥ श्राद्धसम्बन्धिद्रव्ये ॥
श्राद्धी । त्रि• श्राद्धिके ॥ श्राद्धम
नेन भुक्तमितीनिः ॥
श्रान्तः । पुं• यतौ । शान्ते ॥ त्रि•
क्लान्ते । श्रमयुक्ते ॥ श्राम्यतेः क्तः ॥
श्रान्तकथः । त्रि• निवृत्तसंलापे ॥
श्रान्तसंवाहनम् । न• श्रमान्वितस्या
सनादिप्रदानद्वारा श्रमोपशमने ॥
श्रामः । पुं• मासे ॥ मण्डपे ॥ का
ले ॥
श्रामणेरः । पुं• जिनभिक्षोः शिष्ये
। चेलुके । महापासके ॥
श्रायः । पुं• आश्रये । शरणे ॥ श्रय
णम् । श्रिञ् सेवायाम् । श्रिणीभु
वोऽनुपसर्गे इति घञ् ॥ त्रि॰ श्रीदे
वताकेऽविरादौ ॥ श्रीर्देवताऽस्य

। श्रण् ॥

श्राव :, पुं॰ श्रवणे ॥

श्रावक :, पुं॰ शाक्यमुनेः शिष्ये ॥ काके । वायसे ॥ दूरध्वनौ । त्रि॰ श्रावयितरि ॥ श्रावयति । श्रु॰ । णवुल् ॥

श्रावण : पुं॰ मासविशेषे । नभसि । श्रावणिके ॥ श्रवणापौर्णमास्यस्मिन् । सास्मिन्पौर्णमासीत्यर्थे विभाषाफाल्गुनीतिपाक्षिकोऽण् ॥ शब्दे ॥ श्रवणेनगृह्यते । शेषद्वत्यण् ॥ पाषण्डे ॥ इ॰ मेदिनिकरः ॥

श्रावणा : स्त्री॰ दृष्यालोहृदे ॥

श्रावणिक : । पुं॰ नभोमासि । श्रावणे ॥ श्रवणापौर्णमास्यस्मिन्नस्ति । विभाषाफाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यष्ठतिठक् ॥

श्रावणी । स्त्री॰ श्रवणायाम् । श्रावणमासस्यपूर्णिमायाम् ॥ अस्यामृषितर्पणं भवति । तत्रकालादिकमाह्न्वालिदासः । पूर्वाह्णकालसमयाच्युतशारदान्तायापूर्णिमानभसिसम्भवगातुतस्याम् । शिष्ट्यायुतोतरस्थितामुनितर्पणं स्यात्स्त्रसम्भोभवतिवायवर्यतदानं । केचित्समिच्छन्तितदेवतर्पणं श्रुतौ च हस्ते श्रुतिशाखिनोयदि । स्यात्सङ्क्रमे वासतिसर्वशाखिनांतर्पणं श्रावणशुक्लपञ्चमी : स्यात्सम्बान्त्व मुपाकृतौस्यात्पूर्वान्वितावापिचपाकयज्ञे । तथासितापक्षदशीसमुक्तातथाष्टकौ तत् समयाभिरूपैः ॥ ज्यो॰ २१ अध्यायः । ४६ ४८ । श्रवणेनयुक्तापौर्णमासी । नक्षत्रेत्यण् ; ङीप् । मुंडीर्याम् ॥

श्रावस्ती । स्त्री॰ देशविशेषे । धर्मपत्तने ॥

श्राविष्ठीय : । त्रि॰ श्रविष्ठायांजाते छण् प्रत्ययः ॥

श्राव्यम् : त्रि॰ श्रुतिपथमधुरे ॥

श्रित : । त्रि॰ आश्रिते ॥ संलग्ने ॥ श्रयति । श्रिञ्॰ । गत्यर्थाकर्मकेतिकर्त्तरिक्तः ॥

श्रितवान् । त्रि॰ श्रिते ॥ श्रिञः क्तवतु ॥

श्री : । पुं॰ सोमेश्वरमतेषड्रागान्तर्गतप्रथमरागे ॥ हनुमद्भरतयोर्मते पञ्चमरागे ॥

श्री : । स्त्री॰ वेशरचनायाम् ॥ शोभायाम् ॥ भारत्याम् । सरस्वत्याम् ॥ लवङ्गे ॥ सरलद्रुमे ॥ लक्ष्म्याम् । पद्मालयायाम् । पद्मायाम् । कमलायाम् । हरिप्रियायाम् ॥ त्रिवर्गसम्पत्तौ ॥ विधायाम् ॥ उपकरणे ॥ विभूतौ ॥ नात्मानमवमन्येतपूर्वाभिरसमृद्धिभिः । आमृत्योः श्रियमन्विच्छेन्नैनांमन्येतदुर्लभाम् ॥ म

तौ ॥ विल्वद्रुमे ॥ लवङ्गे ॥ अधिकारे ॥ प्रभायाम् ॥ कीर्त्तौ ॥ वृद्धौ ॥ सिद्धौ ॥ वृत्ताहं म्मातरि ॥ तारायाम्, । बुद्धदेव्याम् ॥ श्रयतिहरिम्० श्रयन्त्येतामितिवा । श्रिञ्० । क्विब्वचीति० क्विप् दीर्घौ ॥ कर्त्तरि विहितस्य क्विप : कर्मण्यसम्भव : कृदिकारादिति ङीष् तुन० कृत्प्रत्ययोयदुकारदृतिव्याख्यानात् । कृदन्तं यदिकारान्तमितिपक्षे पि० कारग्रहणे तत्सामर्थ्यादेवकेवलग्रहणात् । दुर्घटस्तु० ङीषि० श्रीमिताधिरक्षितदुच्छतीताः ॥ विद्याशक्तौ ॥ श्रयतिपारतन्त्र्याच्चिदात्मानमिति श्री : ॥ राजलक्ष्म्याम् ॥ शरीरशोभायाम् । सर्वोत्कृष्टत्वेनात्सत्वाश्रयतयासौक्रियतेप्रलयसुषुप्तादौसर्वभूतैरिताक्या० जीवस्योपाधिभूयामाम्विद्यायाम् ॥ देवादिनाम्न : पूर्वंश्रीशब्दप्रयोगः कर्त्तव्यइत्याह । देवंगुरुंगुरुस्थानंक्षेत्रंक्षेत्राधिदेवताम् । सिद्धंसिद्धाधिकारांश्चश्रीपूर्वंसमुदीरयेदितिप्रयोगसार : ॥ स्वर्गगामित्वादिनासिद्धोऽधिकारोयेषांनराणामितार्थेन० जीवतांश्रीशब्दादित्वंनामानोनतुमृतानांतथैताधुनिकशिष्टानामाचार : ॥ पत्रेश्रीशब्दप्रमाणंयथा । षड्गुरोः स्वामिन : पञ्चदेभृत्येचतुरोरिपौ । श्रीशब्दानांत्रयंमित्रएकंपुत्रभार्य्ययोरिति ॥ उक्थायां १ वृत्तौ ॥ ग. श्रीः । यथा । श्रीस्ते । सास्ताम् ॥

श्रीकण्ठ : । पुं० नीलकण्ठे । शिवे ॥ कालकूटविषधारणात्० श्रीः शोभाकण्ठे यस्य स : । धृतंकण्ठेविषंघोरंतत : श्रीकण्ठनामभीतिनीलकण्ठस्तथ : ॥ कुरुजाङ्गलदेशे ॥

श्रीकण्ठपदलाञ्छन : । पुं० मालतीमाधवनाटककर्त्तरि० भवभूतिकवौ ॥

श्रीकण्ठसख : । पुं० कुवेरे ॥ इ० इ० युध : ॥

श्रीकन्दा : स्त्री० वन्ध्याकर्कोटक्याम् ॥

श्रीकर : । पुं० विष्णौ ॥ स्मरतांशृण्वतांस्तुवतांकीर्त्तयतामर्च्चयतांभक्तानांश्रियंमोक्षसाम्राज्यलक्ष्मींकरोति । कृञोहेतुताच्छील्यानुलोम्येष्विति कृज्जट : ॥ न० रक्तोत्पले ॥ त्रि० श्रीकारके ॥ करोति । डुकृञ्० । अच् ॥ श्रियः कर : ॥

श्रीकरणम् । न० लेखन्याम् ॥

श्रीकरी । स्त्री० शक्तिविशेषे ॥

श्रीकान्तः । पुं॰ विष्णौ ॥

श्रीकारी । पुं॰ मृगविशेषे । वेगिहरिणे । इ॰ रा॰ नि॰ पाटः ॥

श्रीकुञ्जम् । न॰ सरस्वत्यास्तीर्थे ॥

श्रीखण्डः । पुं॰ न॰ चन्दने । इ॰ त्रि॰ शेषः ॥

श्रीगर्भः । पुं॰ विष्णौ ॥ श्रीर्विभूतिः गर्भे यस्य ॥ खड्गे ॥

श्रीग्रहः । पुं॰ पक्षिणांपानीयशालायाम् । शकुनिप्रपायाम् ॥

श्रीघनः । पुं॰ सर्वज्ञे । बुद्धे । जिने । मुनीन्द्रे ॥ श्रिया॰ ज्ञानपुण्यसम्भारेण॰ बुद्ध्या वा॰ घनः पूर्णः क्षुभ्नादित्वान्नणत्वम् ॥ न॰ दधि ॥

श्रीजः । पुं॰ कामदेवे ॥

श्रीतालः । पुं॰ तालवृक्षसदृशे वृक्षविशेषे । मृदुताले । विशालपत्रे । मसीलेख्यदले ॥

श्रीतीर्थम् । न॰ तीर्थविशेषे ॥

श्रीदः । पुं॰ पुण्यजनेश्वरे । कुवेरे ॥ श्रियंदयते॰ ददातिवा । देडोदाञोवा॰ आतश्चोपसर्गेकः ॥ त्रि॰ श्रीप्रदे । शोभादातरि ॥

श्रीदेवी । स्त्री॰ तीर्थविशेषे ॥

श्रीधरः । पुं॰ विष्णौ ॥ श्रियाः वक्षसिधरोधारकः ॥ भूतार्हद्भेदे ॥ शालग्रामविशेषे । यथा । अतिचन्द्रार्द्धचक्रान्तुवनमालाविभूषितम् । श्रीधरंदेविविज्ञेयंश्रीप्रदंगृहिणांसदा ॥

श्रीनगरम् । न॰ श्रीविद्यास्थाने ॥

श्रीनन्दनः । पुं॰ कामदेवे ॥

श्रीनिकेतनः । पुं॰ विष्णौ ॥

श्रीनिवासः । पुं॰ विष्णौ । नारायणे ॥ श्रियोनिवासः । निनिश्चयेन॰ अपायंविना॰ श्रीर्वसत्यत्रवायस्यवक्षसिअनपायिनिश्रीर्वसति॰ सङ्गत्यर्थः । यथा । श्रियोनिवासोयस्योरः पानपात्रंमुखं दृशाम् । बाहवोलोकपालानां सारङ्गानांपदाम्बुजमिति ॥ यद्वा श्रीशब्देनश्रीमत्तोलक्ष्यन्ते । श्रीमत्सुनित्यंनिवासोऽस्य । यतोलक्ष्मीस्ततोहरिरित्युक्तं ॥

श्रीपतिः । पुं॰ पुरुषोत्तमे । विष्णौ ॥ अमृतमथनेसर्वानसुरान्सर्वान्देवांश्चविहायविष्णुमेवपतित्वेनवृतवतीतिविष्णुपुराणप्रसिद्धे ॥ श्रियः पतिः ॥ नृपतौ । पृथिवीनाथे ॥

श्रीपथः । पुं॰ राजमार्गे ॥ इ॰ हे॰ चन्द्रः ॥

श्रीपर्णम् । न॰ अग्निमन्थे ॥ अब्जे । पद्मे ॥ श्रीः पर्णे॰ पर्णेषुवाऽस्य । अर्शआद्यच् ॥

श्रीपर्णिका । स्त्री॰ फटफली । कायफल॰ इ॰ प्र॰ ॥ काश्मर्याम् ।

गम्भार्याम् ॥ स्वार्थे कन् । ह्रस्वः ॥

श्रीपर्णी । स्त्री॰ काश्मर्याम् । गम्भार्याम् ॥ शठे । कुम्भयाम् । वारिपर्ण्याम् ॥ श्रीयुक्तानि पर्णान्यस्याः ॰ श्रीपर्णं पुष्पस्यावा । पाककर्णपर्णेत्यादिना ङीष् ॥ कट्फले ॥ शाल्मली ॥

श्रीपर्वतः । पुं॰ श्रीशैले ॥ तीर्थविशेषे ॥

श्रीपिष्टः । पुं॰ सरलद्रुमरसे । सरलद्रवे ॥ श्रियः सरलद्रुमस्य पिष्टः ॰ तच्चूर्णेनजमितत्वात् ॥

श्रीपुत्रः । पुं॰ अश्वे ॥ कामदेवे ॥

श्रीपुष्पम् । न॰ लवङ्गे ॥ पद्मकाष्ठे ॥

श्रीप्रसूनम् । न॰ लवङ्गे ॥

श्रीफलः । पुं॰ विल्वे । मालूरे ॥ श्रीप्रदं॰ श्रीप्रियं वा फलमस्य । शाकपार्थिवादिः । श्रीफलस्तुवरस्तिक्तोग्राही रूक्षोऽग्निपित्तकृत् । वातश्लेष्महरो बल्यो लघुरुष्णश्च पाचनः । राजादनवृक्षे ॥

श्रीफला । स्त्री॰ आमलक्याम् ॥ नील्याम् ॥ क्षुद्रकारवेल्ल्याम् ॥

श्रीफलिका । स्त्री॰ आमलक्याम् ॥ क्षुद्रकारवेल्ल्याम् ॥ महानीलीवृक्षे ॥

श्रीफली । स्त्री॰ धात्र्याम् । आमलक्याम् ॥ नीलिकायाम् ॥

श्रीवल्ली । स्त्री॰ कटुफलायाम् ॥

श्रीभद्रः । पुं॰ चित्रगुप्तसुतेकायस्थजातिविशेषे ॥

श्रीभद्रा । स्त्री॰ भद्रमुस्तके ॥

श्रीभागवतम् । न॰ पुराणार्के । महापुराणान्तर्गतपुराणविशेषे ॥

श्रीभ्राता । पुं॰ घोटके ॥ विधौ । चन्द्रे ॥ समुद्रोत्पन्नत्वात् ॥

श्रीमान् । पुं॰ तिलकवृक्षे । क्षुरके ॥ अश्वत्थवृक्षे ॥ शिवे ॥ विष्णौ ॥ कुवेरे ॥ इन्द्रे ॥ त्रि॰ मनोज्ञे ॥ धनिके । श्रीले ॥ सर्वातिशयितश्रियि । अखण्डितैश्वर्यसम्पन्ने ॥ महाराजचक्रवर्त्तिनि ॥ श्रीः लक्ष्मीः सम्पत् ॰ शोभा॰ कान्तिर्वा॰ सास्यास्मिन् वास्ति । तदस्यास्त्यस्मिन्निति मतुप् । कवचायजुषिसामानि सामश्रीरमृतासताम् । तथा युक्तामहात्मानः श्रीमन्तः शास्त्रसम्मताः ॥

श्रीमतिः । स्त्री॰ राधायाम् ॥

श्रीमती । स्त्री॰ श्रीयुक्तायाम् ॥ योषितामभिधानस्य पूर्वमेतत् प्रयोजयेत् ॥

श्रीमदः । पुं॰ धनमदे । सर्वमदाधमे ॥ यथा । नह्यन्योजुषतोजोष्यान् बुद्धिभ्रंशो रजोगुणः । श्रीमदादाभिजात्यादिर्यत्स्त्रीद्यूतमासवः ॥ हन्यन्ते पशवो यत्र निर्दयैरजितात्मभिः । मन्यमानैरिमं देहमजराम्

स्थु० भस्त्रम् ॥
श्रीमलापहा । स्त्री० षट्पदायाम् ॥ गन्धपदार्यां ॥
श्रीमस्तक : । पुं० रसोने ॥ इ० त्रि० श्रेष्ठ : ॥
श्रीमुख : । पुं० सप्तमेवत्सरे ॥ तत्फलंयथा । सुभिक्षं चैव मारोग्यं वर्षाकालं सुशोभनम् । सस्यवृद्धिं विजानीयात् श्रीमुखे सुरवन्दिते ॥ ७ ॥ न० शोभिताननी ॥
श्रीमूर्त्ति : । स्त्री० देवताविग्रहे ॥ विष्णुप्रतिमायाम् ॥
श्रीयुक्त : । श्रीयुत : । त्रि० लक्ष्मीविशिष्टे । श्रीमति ॥
श्रीरङ्ग : । पुं० पुण्यक्षेत्रविशेषे ॥ श्रीरङ्गाख्यं महापुण्यं यत्र सन्निहितो हरिरितितत्त्वम् ॥
श्रीरस : । पुं० सरलरसे । श्रीवेष्टे ॥
श्रीराग : । पुं० षड्रागान्तर्गततृतीयरागे ॥
श्रीराम : । पुं० दशरथात्मजे ॥
श्रील: । त्रि० श्रीमति । लक्ष्मीवति ॥ लक्ष्मणे । श्रियायुक्ते ॥ श्रीरस्यास्ति । सिध्मादित्वाल्लच् ॥ श्रियं लाति लाला० आदाने । आतोनुपसर्गे क :
श्रीलता । स्त्री० महाज्योतिष्मत्याम् ॥
श्रीवत्स । पुं० विष्णोश्चिह्नविशेषे । कृष्णस्यदुर्वासस : पदाघातरूपेरेखाविशेषे ॥ महापुरुषलक्षणभूते० व क्षस्थस्खेतवर्णदक्षिणावर्त्तरोमावर्त्तविशेषेवा ॥ प्रदक्षिणावर्त्तविचित्ररोमश्रीवत्ससंज्ञ्चविभूषिताङ्गमिति गरुडपुराणात् ॥ वदतिमहत्वम् । वदव्यक्तायांवाचि । वृतृवदिहनिकमिकषिभ्य : सहतिस : । श्रीयुक्तो वत्स : ॥ विष्णौ । कृष्णे । गृहविशेषे ॥ सुरङ्गाप्रभेदे ॥ अश्वत्थे ॥
श्रीवत्सकी । पुं० हृल्लवक्षावर्त्तहये ॥
श्रीवत्सभृत् । पुं० हरौ । विष्णौ ॥
श्रीवत्सलाञ्छन : । पुं० विष्णौ । श्रीवत्सोमहापुरुषलक्षणभूतस्स्वेतरोमावर्त्तविशेषोलाञ्छनं चिह्नमस्येतिविग्रह : ॥
श्रीवत्साङ्क : । पुं० विष्णौ ॥
श्रीवराह : । पुं० आदिवराहे । विष्णौ ॥
श्रीवल्लभ : । पुं० परमात्मनि ॥ श्रिया : विद्याशक्तेर्वल्लभस्तदाकारे ॥
श्रीवाटी । स्त्री० नागवल्लीभेदे ॥
श्रीवारक : । पुं० शाकविशेषे । सितावरे । सूच्याह्वे । सचीपत्रके । सिराला० सिरयारा० सिरियारी० इ० भा० प्र० ॥ तच्छाकप्रकारोयथा । श्रीवारकंदलंग्राह्यमारनालेसुसाधितम् । पीडितासीडितं तैलेकासमर्दसमन्वितम् । वातपित्तह

रावल्याविबन्धाध्माननाशिनी । क
फगुल्मशूलकृच्छ्रघ्नी भेदिनी सारसाध
नी ॥ सा० श्रीवालीत्यर्थः ॥

श्रीवाली । स्त्री० श्रीवल्ली० शाकवि
शेषे ॥

श्रीवासः । पुं० विष्णौ । नारायणे ॥
श्रियोवासः । अधिकरणे श्रीर
नपायिनी० वसतीत्यर्थः ॥ शिवे ।
हरे ॥ पद्मे । वृक्षधूपे । सरलद्र
वे । श्रीवेष्टे ॥ अस्यगुणाः । श्रीवा
सो मधुरस्तिक्तः स्निग्धोष्णस्तुवरः
सरः । पित्तलोवातमूर्द्धाक्षिस्वररो
गकफापहः ॥ रक्षोघ्नः स्वेददौर्ग
न्ध्ययूकाकण्डूव्रणप्रणुत् ॥

श्रीवासवः । पुं० चित्रगुप्तात्मजकाय
स्थजातिविशेषे ॥

श्रीविद्या । स्त्री० महाविद्याविशेषे ।
परदेवतायाम् । त्रिपुरसुन्दर्याम् ॥

श्रीवृक्षः । पुं० बिल्ववृक्षे ॥ अश्वत्थ
वृक्षे ॥ श्रीप्रदः० श्रीप्रियोवावृक्षो
यस्य । शाकपार्थिवादिः ॥

श्रीवत्सकः । पुं० अश्वस्य वक्षस्थावर्त्ते ॥

श्रीवत्सकी । पुं० श्रीवत्सकावर्त्तविशि
ष्टेऽश्वे ॥ तल्लक्षणं यथा । वक्षोभवा
वर्त्तचतुष्टयञ्च कण्ठेभवेद्यस्य च रोच
मानः । श्रीवत्सकीनामहयः स भ
र्त्तुः श्रीपुत्रपौत्रादिविवृद्धयेस्यादि
ति ॥ श्रीवत्सकी वक्षसिचेद्रोमावर्त्तो
सुखिपिच्चेतितुवैजयन्ती ॥

श्रीवेष्टः । पुं० सरलवृक्षरसे । वृक्ष
धूपे । श्रीवासे ॥ तस्यगुणायथा ।
श्रीवेष्टः कटुकस्तिक्तकषायः श्ले
ष्मपित्तजित् । योनिदोषरुजाजीर्णं
व्रणशाध्मानदोषनुत् ॥ श्रीसंज्ञकः
० श्रियोवावेष्टोनिर्यासः ॥

श्रीशः । पुं० विष्णौ ॥ श्रीरामे ॥ श्रि
यईशः ॥

श्रीशैलः । पुं० भारतवर्षस्य पर्वत
विशेषे ॥ सिद्धिंतथाविधमनोविल
यांसमर्थां श्रीशैलशृङ्गकुहरेषु कदोप
लभ्ये । गाढंयथामरलताः परिवे
ष्टयन्ति कर्णं यथा विरचयन्ति खगाश्च
नीडम् ॥ इति योगतारावली ॥

श्रीसंज्ञम् । न० लवङ्गे ॥ श्रियः संज्ञा
सञ्ज्ञायस्य ॥

श्रीहरिः । पुं० परमात्मनि ॥ श्रियं
जीवस्योपाधिभूतामविद्यां हरति०
आत्मज्ञानप्रदानेन नाशयति० इति
श्रीहरिः ॥ श्रियं दधाने । विष्णौ ॥

श्रीहस्तिनी । स्त्री० भूरुण्ड्याम् । हाती
सुंडा० इ० गौ० दे० भा० प्र० ॥
श्रियाहस्तः० श्रीहस्तः । सविद्य
तेयस्याः । अतइनिः ॥ यद्वा । ह
स्तंगृह्णाति हस्तयति । अवश्यं श्रि
यं हस्तयति । आवश्यकेति णिनिः ॥

श्रुघ्निका । }
श्रुघ्नी । } स्त्री० सर्ज्जिकाक्षारे ॥

श्रुतम् । न० शास्त्रे ॥ शास्त्रविचारे ।

वेदे । श्रवणे । सुपना० इ० भा० ॥ त्रि० विश्रुते । आकर्णिते । श्रवणगोचरे ॥ श्रूयते० श्रवणं वा । श्रु श्रवणे । क्तः ॥ अशुाविवा । श्रु० । क्तः ॥

श्रुतकीर्त्तिः । पुं० देवर्षौ ॥ स्त्री० जनकभ्रातुः कुशध्वजस्य कन्यायाम् ॥ त्रि० कीर्त्तियुक्ते ॥

श्रुतदेवी । स्त्री० सरस्वत्यां ॥

श्रुतर्षिः । पुं० सुश्रुताद्यृषिषु ॥ सुश्रुताद्याः श्रुतर्षयइतिमिकाण्डशेषः ॥

श्रुतश्रवाः । त्रि० आकर्णितयशसि ॥

श्रुतश्रवा । स्त्री० श्रीकृष्णस्य पितृष्वसरि । शिशुपालमातरि ॥

श्रुतश्रवोनुजः । पुं० शनैश्चरग्रहे ॥

श्रुतश्रेणी । स्त्री० द्रवन्त्यां ॥

श्रुतादानम् । न० ब्रह्मवादे ॥ इ० हा० ली० ॥

श्रुताध्ययनसम्पन्नः । त्रि० धर्मशास्त्रज्ञे ॥ यथा । श्रुताध्ययनसम्पन्नाः कुलीनाः सत्यवादिनः । राज्ञासभासदः कार्याः शत्रौमित्रेचयेसमाः ॥

श्रुतान्वितः । त्रि० शास्त्रज्ञे ॥

श्रुतार्थः । पुं० शब्दबोधविषयीभूतार्थे । श्रवणमात्रबोध्येर्थे ॥ यथा । श्रुतार्थस्यपरित्यागादश्रुतार्थस्य कल्पनात् । प्राप्तस्यबाधादित्येवं परिसङ्ख्यात्रिदोषिकेति ॥

श्रुतायुः । पुं० सूर्यवंशोद्भवनृपतिविशेषे ॥

श्रुतिः । स्त्री० वेदे । आम्नाये । वेदाख्यपरदेवतायाम् ॥ विनियोगविधेः सहकारिभूतेप्रमाणविशेषे ॥ तत्रनिरपेक्षोरवः श्रुतिः । साच त्रिविधा । विधात्री० अभिधात्री० विनियोक्त्रीच । तत्राद्यालिङ्गाद्यात्मिका० द्वितीयाव्रीह्यादिश्रुतिः० यस्यशब्दस्यश्रवणादेवसम्बन्धः प्रतीयतेसाविनियोक्त्री । साऽपि त्रिविधा । विभक्तिरूपा० एकाभिधानरूपा० एकपदरूपाचेति । तत्रविभक्तिश्रुत्याङ्गत्वम्० यथाव्रीहिभिर्यजेतेति० तृतीयाश्रुत्या० व्रीहीणांयागाङ्गत्वम्० तदपिपुरोडाशप्रकृतितया० अरुणयाएकहायन्यागवासोमंक्रीणातीत्यस्मिन्वाक्ये आरुण्यस्यापितृतीयाश्रुत्याक्रयाङ्गत्वम्० तदपिगोरूपद्रव्यपरिच्छेदद्वारा० नतुसाक्षादमूर्त्तत्वात् । व्रीहीन्प्रोक्षतीतिप्रोक्षणस्यव्रीह्यङ्गत्वं द्वितीयाश्रुत्या० तच्चप्रोक्षणं० नव्रीहिस्वरूपार्थंतस्यतेनविनाप्युपपत्तेः । किन्त्वपूर्वसाधनत्वप्रयुक्तम्० व्रीहीन्प्रोक्ष्ययागानुष्ठानेऽपूर्वानुपपत्तेः । एवंसर्वत्वङ्गेषु० अपूर्वप्रयुक्तमङ्गत्वंबोध्यम् । एवमिमामरम्भन्रसनामृतस्येत्यश्वाभिधानीमा

दत्त० इत्यत्र० द्वितीयाश्रुत्या० मन्त्रस्याग्न्यभिधानाङ्गत्वम् । यदाहवनीये जुहोतीत्याहवनीयस्य होमाङ्गत्वं सप्तमीश्रुत्या । एवमन्योऽपि विभक्तिश्रुत्या विनियोगो ज्ञेयः । पशुना यजेतेत्यत्रैकत्वपुंस्त्वयोः समानाभिधानश्रुत्या कारकाङ्गत्वम् । यजेतेत्याख्यातादभिहितसङ्ख्याया भावनाङ्गत्वम् समानाभिधानश्रुतेरेकपदश्रुत्या च यागाङ्गत्वम्० न चामूर्त्तायास्तस्याः कथं भावनाङ्गत्वम्० कर्तृपरिच्छेदद्वारा तदुपपत्तेः । कर्त्ता चात्रोपलभ्यः० आख्यातेन हि भावनोच्यते० सा च कर्त्तारं विनाऽनुपपन्नेति तमाक्षिपति । सेयं श्रुतिर्लिङ्गादिभ्यः प्रबला० लिङ्गादिषु न प्रत्यक्षो विनियोजकः शब्दोऽस्ति० किन्तु कल्प्यः । यावच्च तैर्विनियोजकः शब्दः कल्प्यते० तावत् प्रत्यक्षया श्रुत्या विनियोगस्य कृतत्वेन तेषां कल्पकत्वशक्तिर्व्याहतत्वात् । अत एवैन्द्र्या लिङ्गान्नेन्द्रोपस्थानार्थत्वम्० किन्त्वैन्द्र्या गार्हपत्यमुपतिष्ठत इत्यत्र० गार्हपत्यमिति द्वितीयाश्रुत्या० गार्हपत्योपस्थानार्थत्वम् ॥ अत्र देवीगीतायां देवीवाक्यं यथा । सर्वज्ञायाः सर्वशक्तेर्मत्तो वेदः समुत्थितः । अज्ञानस्य ममाभावादप्रमाणा न च श्रुतिरिति सर्वज्ञात्-

सर्वशक्तेश्च मत्त इति पाठे तु मत्तो मत्स्वरूपादित्यर्थः ॥ प्रयोगविध्युपयोगिनि प्रमाणविशेषे ॥ तत्र क्रमपरं वचनं श्रुतिः । तच्च द्विविधम् । केवलक्रमपरम्० तद्विशिष्टपदार्थक्रमपरञ्च । तत्र वेदं कृत्वा वेदिं करोतीति केवलक्रमपरम्० वेदिकरणादेर्वचनान्तरप्राप्तत्वात् । वषट्कर्त्तुः प्रथमभक्ष इति तु क्रमविशिष्टपदार्थपरम्० एकप्रसरताभङ्गभयेन भक्षानुवादेन क्रममात्रस्य विधातुमशक्यत्वात् । सेयं श्रुतिरितरप्रमाणापेक्षया बलवती० तेषां वचनकल्पनद्वारा क्रमप्रमाणत्वात् । अत एवाश्विनग्रहस्य पाठक्रमात् तृतीयस्थानेऽपि ग्रहणप्रसक्तावाश्विनो दशमो गृह्यत इति वचनाद्दशमस्थाने ग्रहणमित्युक्तम् ॥ कर्णः । अस्य पर्यायः । कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः ॥ अस्य शुभाशुभलक्षणं यथा । रक्तास्यपरुषस्थूलकर्णाः स्युः पापमृत्यवः । निर्मांसैश्चिपिटैर्भोगाः कृपणाः स्वल्पकर्णकाः ॥ शङ्कुकर्णाश्च राजानो रोमकर्णाः शतायुषः । हस्तकर्णाश्च राजानो धनिनः परिकीर्त्तिताः ॥ श्रवणे । वाक्यजनितवाक्यार्थविज्ञाने । मनननिदिध्यासनसहकृतश्रवणज्ञाने ॥ श्रोत्रकर्मणि ॥

वार्त्तायाम् ॥ अभ्यासे ॥ षड्जादिस्वरारम्भकावयवेशब्दविशेषे ॥ तदुक्तम् । प्रथमश्रवणाच्छब्दः श्रूयते ह्रस्वमात्रकः । सा श्रुतिः सम्परिज्ञेया स्वरावयवलक्षणेति ॥ श्रवणे ॥ श्रूयते । स्त्रियां क्तिन्निति कर्म्मणि क्तिन् ॥ श्रूयते धर्म्मोऽनयेति वा । श्रुयजीषिस्तुभ्यः करणइति क्तिन् ॥

श्रुतिकटः । पुं॰ प्रायश्चित्ते ॥ सर्पे ॥ पापशोधने । प्रायश्चित्ते ॥ इ॰ मेदिनिहेमचन्द्रौ ॥

श्रुतिकटुः । पुं॰ कठोरशब्दे ॥

श्रुतिजीविका । स्त्री॰ स्मृतौ ॥

श्रुतितत्पर । त्रि॰ वेदाभ्यासरते ॥ सकर्णे ॥

श्रुतिधरः । त्रि॰ श्रुतमात्रेणधारके ॥ तदौषधमुक्तं गारुडे यथा । हरिरुवाच । हस्तिकर्णस्यवैमूलंगृहीत्वाचूर्णयेद्धर । सर्वरोगविनिर्मुक्तं चूर्णपलशतंशिव ॥ सक्षीरं भक्षितंकुर्य्यात्मासाहेनवृषध्वज । नरंश्रुतिधरंशूरंमृगेन्द्रगतिविक्रमम्-पद्मगौरप्रतीकाशंयुक्तंदशशतायुषा । षोडशाब्दाकृतिंविप्रसततंदुग्धभोजितम् । मधुसर्पिःसमायुक्तं जग्धमायुष्करंभवेत् । तज्जग्धं मधुनासार्द्धंशरदांसप्तविंशतिम् । कुर्य्यान्नरंश्रुतिधरंप्रमदाजनवल्लभ-

मिति ॥ १८१ अध्यायः ॥

श्रुतिवर्ज्जितः । त्रि॰ बधिरे ॥ नास्तिके ॥ श्रुतिभ्यां॰ श्रुत्यावावर्ज्जितः ॥

श्रुतिवेधः । पुं॰ कर्णवेधे ॥

श्रुतिस्फोटा । स्त्री॰ कर्णस्फोटायाम् । त्रिपुटायांलतायाम् ॥

श्रुत्योपनिषत्कः । त्रि॰ ज्ञानिनि ॥

श्रेटी । स्त्री॰ लोलावत्युक्ताङ्कविशेषे ॥

श्रेणिः । पुं॰ स्त्री॰ वीथ्याम् । आलौ । पङ्क्तौ ॥ समानशिल्पिसंहतौ । कारुसंहतौ । एकेनशिल्पेनपण्येनवायेजीवन्ति॰ तेषांसमूहे ॥ श्रयति॰ श्रीयतेवा । श्रिञ्॰ । वहिश्रीतिनिः ॥ एकमुख्येसजातिसमूहे ॥ सेकपात्रे ॥

श्रेणिकः । पुं॰ मगधदेशीयनृपतिविशेषे ॥ इतिहेमचन्द्रः ॥

श्रेणी । स्त्री॰ श्रेणिशब्दार्थे ॥

श्रेणीधर्म्मः । पुं॰ वणिगादीनांधर्म्मे ॥

श्रेयः । न॰ मुक्तौ । निर्वाणे । निःश्रेयसे । वेदबोधितेपरमपुरुषार्थे । स्वरूपावस्थाने । अनपायिसुखाभिलक्षणे । आगमज्ञापितेहिते ॥ यथा । इहैवनरकव्याधेश्चिकित्सांनकरोतियः । गत्वानिरौषधंदेशं व्याधितस्यःकिंकरिष्यति ॥ यावत्तिष्ठतिदेहोऽयंतावत्तत्त्वंसमभ्यसेत् । सन्दीप्तेभवनेकोनुकूपंखनतिपार्व्वति

ति । व्याघ्रीवास्ते जरा चायुर्याति
भिन्नघटाम्बुवत् । निघ्नन्ति रिपुवद्रो
गास्तस्माच्छ्रेयः समाचरेत् ॥ या
वन्नाश्रयते दुःखं यावन्नायान्ति चाप
दः । यावन्नेन्द्रियवैकल्यं तावच्छ्रे
यः समाचरेत् ॥ कालो न ज्ञायते
नानाकार्यैः संसारसम्भवैः । सुख
दुःखैर्जनो हन्त न वेत्ति हितमात्म
नः ॥ इति कुलार्णवे प्रथमोल्लासः ॥
कल्याणे । मङ्गले । शुभे ॥ धर्मे ।
। वेदविहितैः प्राणिनामभ्युदयनिः
श्रेयससाधने० प्रवृत्तिनिवृत्तिलक्ष
णे । पुण्ये ॥ त्रि० अतिप्रशस्ते ।
शस्ते ॥ इदमनयोरतिशयेन प्रशस्त
म् । द्विवचनेतीयसुन् । प्रशस्यस्य श्रः
। विद्याद्यधिके ॥ धर्मार्थावुच्यते श्रे
यः ० कामार्थौ० धर्म एव च । अ
र्थ एवेह वा श्रेयस्त्रिवर्ग इति तु स्थि-
तिः ॥ अयमुपदेशोऽबुभुत्सून्प्रति
बोध्यः ॥

श्रेयसी । स्त्री० करिपिप्पल्याम् ॥ अ
भयायाम् । पाठायाम् । शठाम्बा
याम् । श्रेष्ठायाम् ॥ उगित्वान्ङी
प् ॥

श्रेयांसः । पुं० व्रतार्हद्विशेषे ॥

श्रेष्ठः । पुं० कुबेरे । धनदे ॥ विप्रे
॥ नृपे ॥ मुख्यप्राणे । न० गोदु
ग्धे । गव्ये ॥ त्रि० अग्र्ये । वरे
। पुष्कले । सत्तमे । अतिशोभने ॥
अयमेषामतिशयेन प्रशस्यः । अति
शायने तमबिष्ठनाविति ष्ठन् । प्रश
स्यस्य श्रः ॥ प्रधानभूते ॥ ज्येष्ठे ॥
वृद्धे ॥

श्रेष्ठकाष्ठः । पुं० शाकवृक्षे ॥

श्रेष्ठता । स्त्री० श्रेष्ठत्वे ॥

श्रेष्ठा । स्त्री० स्थलपद्मिन्याम् । उत्त
मायांनार्याम् ॥ ज्येष्ठानक्षत्रे ॥

श्रेष्ठाम्लम् । न० वृक्षाम्ले ॥

श्रेष्ठी । पुं० कुलोत्तमशिल्पिनि ॥

श्रोणः । त्रि० जङ्घाहीने पङ्गौ ॥ श्रो
णति । श्रोणृ सङ्घाते । पचाद्यच्
॥ यद्वा । शृणोति । श्रु० । बाहुल
कान्नः ॥

श्रोणिः । स्त्री० कट्याम् ॥ श्रोणति ।
श्रोणृ० । इन् ॥ यद्वा । श्रूयते पुं
भिः । श्रु० । वह्निश्रिश्रुयुद्रुग्ला
हात्वरिभ्यो नित्इति निः ॥ पथि ॥

श्रोणीफलम् । न० कटौ ॥

श्रोणीफलकम् । न० कटिपार्श्वे ।
कटे ॥ श्रोणिः फलकमिव० चर्मा
कारत्वात् ॥

श्रोणिबिम्बम् । न० कटिसूत्रे ॥

श्रोणिसूत्रम् । न० खड्गबन्धनसूत्रे ।
परतला० इ० भा० प्र० ॥

श्रोणी । स्त्री० कट्याम् ॥ पथि ॥ कृ
दिकारादक्तिन इति पक्षे ङीष् ॥

श्रोतव्यः । त्रि० श्रवणीये । श्रोतुं यो
ग्ये । श्रोतव्यः श्रुतिवाक्येभ्यो म

न्यश्चोपपत्तिभिः ॥

श्रोतः । न० कर्णे ॥

श्रोता । त्रि० श्रवणकर्त्तरि ॥ योह्यर्थं सम्यगवबुध्यते स एव श्रोता भवति ॥ यथा । वक्तुरेव हि तज्जाड्यं श्रोता यन्नावबुध्यते । इति ॥ अपि च । बोधविहीने श्रोतरि वक्तुर्वाक्यं प्रयाति वैफल्यम् । नयनविहीने भर्त्तरि लावण्यमिव खञ्जनाक्षीणामिति ॥ शृणोति । श्रु० । तृच् ॥

श्रोत्रम् । न० श्रुतौ । कर्णे । शब्दग्रहणलिङ्गे इन्द्रियविशेषे । शब्दाभिव्यञ्जकेन्द्रिये ॥ शृणोत्यनेनेति श्रोत्रम्० शब्दस्य श्रवणं प्रति करणम् ॥ श्रूयतेऽनेन वा । श्रु० । ष्ट्रन् । हुयामाश्रुभसिभ्यस्त्रन्निति त्रन् ॥ कर्णशष्कुल्यवच्छिन्नं नभ एव श्रोत्रम् ॥

श्रोत्रियः । पुं० छान्दसे । अधीतवेदे ॥ शिष्टाचारवति ॥ स्नातके ॥ छन्दोऽधीते । श्रोत्रियश्छन्दोऽधीत इति० छन्दः शब्दस्य० श्रोत्रभावो घन्प्रत्ययश्छन्दोऽध्यायिनि निपात्यते ॥ छन्दोमात्राध्यायिनि ॥ श्रोत्रियलक्षणं यथा । जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते । विद्याभ्यासी भवेद्विप्रः श्रोत्रियस्त्रिभिरेव हि ॥ इति पाद्मे उत्तरखण्डे ११६ अध्यायः ॥ अपि च । एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य च । षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित् ॥ इति दानकमलाकरः ॥

श्रोत्रियता । स्त्री० श्रोत्रे । श्रोत्रियत्वे ॥

श्रोत्रियत्वम् । न० श्रोत्रे । वेदवेदाङ्गपारगत्वे । वेदान्तार्थपारगत्वे ॥ श्रोत्रियस्वभावः । स च श्रोत्रियो कामराहित्यात् सर्वानन्दाः सदस्थिताः । सोऽश्नुते सकलान् कामान् सहेति प्राहुरिति श्रुतिः ॥

श्रौतम् । न० अग्नित्रये । गार्हपत्याहवनीयदक्षिणाग्निषु० । त्रि० वेदसम्बन्धे ॥ श्रुतौ भवम्० श्रुतेरिदमित्यर्थे च वा० शैषिकोऽण् । श्रुतिविहितधर्मादौ ॥ यथा । धर्मज्ञैर्विहितो धर्मः श्रौतः स्मार्त्तो द्विधा द्विजैः । दानाग्निहोत्रसम्बन्धमिज्या श्रौतस्य लक्षणम् ॥ स्मार्त्तो वर्णाश्रमाचारो यमैश्च नियमैर्युतः । पूर्वेभ्यो वेदयित्वेह० श्रौतं सप्तर्षयोऽब्रुवन् ॥ ऋचो यजूंषि सामानि ब्रह्मणोऽङ्गानि सा श्रुतिः । मन्वन्तरस्यातीतस्य स्मृत्वा तन्मनुरब्रवीत् ॥ ततः स्मार्त्तः स्मृतो धर्मो वर्णाश्रमविभागशः । एवं वै द्विविधो धर्मः शिष्टाचारः स उच्यते । विज्ञेयः श्रवणाच्छ्रौतः स्मरणात् स्मार्त्त उच्यते ॥ इज्या वेदात्मकः :

श्रौत : स्मार्त्तोवर्णाश्रमात्मकइति मात्स्ये १२० अध्याय : ॥

श्रौतयज्ञ : । पुं॰ अग्निहोत्रदर्शपौर्णमासादौ ॥ श्रुत्याप्रोक्त : श्रौत : । अण् । सचासौयज्ञश्च ॥

श्रौतसंस्कृति : । स्त्री॰ वेदोक्तसंस्क्रियायाम् । यथा । गृहस्थस्यक्रिया: सर्वाआगमोक्ता: कलौशिवे । नान्यमार्गै: क्रियासिद्धि: कदापिगृहमेधिनाम् ॥ भैक्षुकीयाश्रमैर्देविवेदोक्तं दण्डधारणम् । कलौनास्त्येवतत्त्वज्ञे यतस्तच्छ्रौतसंस्कृतिरिति म॰ नि॰ तन्त्रम् ॥

श्रौत्रम् । न॰ श्रोत्रियतायाम् । श्रोत्रियस्यकर्मभावोवा । युवादित्वादण्॰ श्रोत्रियस्ययलोपश्च ॥ श्रोत्राणांसमूहे ॥ भिक्षायाम् ॥

श्रौषट् । अ॰ देवहविर्दाने ॥ श्रूयतेऽनेन । श्रु॰ । बाहुलकात्॰ डौषट् ॥

श्लक्ष्ण : । त्रि॰ स्तोके । अल्पपर्यायायथा । स्तोकाल्पक्षुल्लका : सूक्ष्मंश्लक्ष्णंदभ्रंकृशंतनु । स्त्रियांमात्रात्रुटि॰ पुंसिलवलेशकणाणव : ॥ इति ॥ मनोहरे ॥ सुखस्पर्शे । अपरुषे । स्निग्धे ॥ श्लिष्यति॰ श्लिष्यतिवा । श्लिषआलिङ्गने । श्लिषेरच्चोपधायाइतिक्स्न : ॥

श्लक्ष्णकम् । न॰ पूगफले ॥

श्लक्ष्णतीक्ष्णाग्रम् । न॰ शृङ्गे । शूके ॥ श्लक्ष्णंकृशञ्चतत्तीक्ष्णञ्च॰ तच्चतदग्रञ्च ॥

श्लक्ष्णत्वक् । पुं॰ अश्मन्तकवृक्षे ॥ सुन्दरवल्कले ॥

श्लक्ष्णभूमि : । स्त्री॰ कृष्णमृदि ॥

श्लथ : । त्रि॰ शैथिल्याढ्ये । शिथिले ॥

श्लाघनम् । न॰ अभिनन्दने ॥

श्लाघा । स्त्री॰ अभिलाषे । इच्छायाम् ॥ उपास्तौ । परिचर्यायाम् ॥ प्रशंसायाम् । अविद्यमानगुणसम्बन्धख्यापने ॥

श्लाघिष्ठ : । त्रि॰ श्लाघ्यतमे ॥

श्लाघ्य : । त्रि॰ प्रशंस्ये । श्लाघनीये । स्तुत्ये ॥ आशास्ये ॥

श्लिकु : । पुं॰ सेवके । भृत्ये ॥ श्लिष्यति॰ यावत्कार्यंलगतिव्याप्रियते । श्लिषआलिङ्गने । श्लिषे : कश्चेति कु : कषान्तादेश : ॥ षिङ्गे ॥ न॰ ज्योति : शास्त्रे ॥

श्लिषा । स्त्री॰ आलिङ्गने ॥

श्लिष्ट : । त्रि॰ सम्पृक्ते । गत्यर्थाऽकर्मकेति॰ श्लिषे : क्त : ॥ श्लेषयुक्तशब्दादौ । भिन्नार्थकैकरूपान्वितवाक्ये ॥ तल्लक्षणंयथा । श्लिष्टमिष्टमविस्पष्टमेकरूपान्वितंवचइति ॥

श्लीपदम् । न॰ पादरुग्भिदि । पादवल्मीके ॥ अस्यनिदानन्तु । य : सज्वरोवङ्क्षणयोर्भृशार्त्ति : शो

थोन्नर्णापादगत: क्रमेण । तच्छ्री पदं स्मात्करकर्णनेत्रशिरोष्ठनासास्वपि केचिदाहु: ॥ पुराणोदकभूयिष्ठा: सर्वर्त्तुसुखशीतला: । ये देशास्ते सुजायन्ते श्लीपदानि विशेषत: । इति ॥ विशेषतइत्युक्तेरन्यत्रापि भवतीति बोध्यते ॥

श्लीपदप्रभव: । पुं० आम्रवृक्षे ॥

श्लीपदापह: । पुं० पुत्रजीववृक्षे ॥

श्लीपदी । त्रि० व्याधिनास्थूलचरणे ॥

श्लील: । त्रि० लक्ष्मीवति । श्रीले ॥ श्रियंलाति । ला० । क: । कपिलकादित्वाल्लत्वम् ॥

श्लेष: । पुं० संयोगे । सन्धौ ॥ शब्दालङ्कारविशेषे । तस्य लक्षणादियथा । वाच्यभेदेनभिन्नायद्युगपद्भाषणस्पृश: । श्लिष्यन्तिशब्दा: श्लेषोसावक्षरादिभिरष्टधा ॥ अर्थभेदेन शब्दभेदइतिदर्शने० काव्यमार्गे स्वरोनगण्यतइतिचनये० वाच्यभेदेन भिन्ना अपिशब्दायद्युगपदुच्चारणेन श्लिष्यन्ति० भिन्नस्वरूपमपह्नुवते० सश्लेष: । सचवर्णपदलिङ्गभाषाप्रकृतिप्रत्ययविभक्तिवचनानांभेदादष्टधा । क्रमेणोदाहरणम् । अलङ्कार: शङ्काकरनरकपालं परिजनो विशीर्णाङ्गो भृङ्गी वसु च वृषएको बहुवया: । अवस्थेयं स्थाणोरपि भवति सर्वामरगुरोर्विधौ वक्रे मूर्ध्नि स्थितवति वयं केपुनरमी ॥ विधौचन्द्रेएव० विधौ दैवेवक्रे कुटिलेएव० वक्रे प्रतिकूले० मूर्ध्नि मस्तके स्थितवति सति सर्वामरगुरोर्महादेवस्याप्यीयमवस्थाभवति ०अमीमानुषावयंपुन: केऽकस्मांगणना:यामित्यर्थ: । अत्रविधावित्युवर्णे० वर्णयो: श्लेष: ॥ पृथुकार्त्तस्वरपात्रं भूषितनि:शेषपरिजनं देव । विलसत्करेणुगहनं सम्प्रति सममावयो:सदनम् ॥ भक्तिप्रह्वविलोकनप्रणयिनी । नीलोत्पलस्पर्धिनी । ध्यानालम्बनताम् । समाधिनिरतै र्नीते हितप्राप्तये । लावण्यैकमहानिधौ रसिकतां लक्ष्मीदृशौ तन्वती युष्माकं कुरुतां भवार्त्तिशमनं नेत्रे तनु र्वा हरे: । एषवचनश्लेषोपि ॥ महदे सुरसन्धम्मे तमव समासङ्गमागमाहरणे । हरबहुसरणं तं चित्तमोहमवसरउमेसहसा ॥ अयं सर्वाणि शास्त्राणि हृदिज्ञेषु चवक्ष्यति । सामर्थ्यकृदमित्राणांमित्राणाञ्चनृपात्मज: ॥ रजनिरमणमौले: पादपद्मावलोकक्षणसमयपराप्तापूर्वसम्पत्सहस्रम् । प्रथमनिबद्धमध्ये जातुचित्तप्रसादादहमुचितरुचि: स्यां नन्दितासातथामे ॥ सर्वस्वंहरसर्वस्यत्वंभवच्छेदतत्पर: । नयोपकार

साम्यस्यमायासितनुबन्धनम् । भेदाभावात्प्रकृत्यादेर्भेदोपिनवमोभवेत् । नवमोपीत्यपिभिन्नक्रमः ॥ उदाहरणम् । योऽसकृत्परगोत्राणांपक्षच्छेदक्षणक्षमः । शतकोटिदतांबिभ्रद्विबुधेन्द्रः सराजते ॥ अत्रप्रकरणादिनियमाभावात् द्वावप्यर्थौ वाच्यौ ॥ अर्थालङ्कारविशेषः ॥ तल्लक्षणादयोयथा । श्लेषः सवाक्यएकस्मिन्यत्रानेकार्थताभवेत् ॥ एकार्थप्रतिपादकानामेवशब्दानांयत्रानेकोर्थः सश्लेषः । उदाहरणम् । उदयमयतेदिङ्मालिन्यंनिराकुरुतेतराम् नयतिनिधनंनिद्रामुद्रांप्रवर्त्तयतिक्रियाः । रचयतितरांस्वैराचारप्रवर्त्तनकर्त्तनम् बतबतलसत्तेजःपुञ्जोविभातिविभाकरः ॥ अत्राभिधायानियन्त्रणात् द्वावप्यर्कभूपौवाच्यौ ॥ श्लेषणम् । श्लिष । घञ् ॥ ऐक्ये ॥ श्लिष्यति । श्याद्व्यधेतिणः ॥

श्लेषणम् । न० एकीभवने ॥

श्लेष्मकः । पुं० कफे ॥

श्लेष्मकरः । त्रि० कफवर्द्धकद्रव्येषु ॥ तानियथा । भोजनानन्तरंस्नानंजलपानंतृषांविना । तिलतैलंस्निग्धतैलंस्निग्धामामलकीद्रवम् ॥ पर्युषितान्नंतक्रञ्चपक्वंरम्भाफलंदधि । मायाम्बुशर्करातोयंसुस्निग्धस्थलसेवनम् ॥ नारिकेलोदकंकूपस्नानंपर्युषितंजलम् । तक्रमुस्तापक्वफलंसुपक्वंकर्कटीफलम् ॥ स्वातस्नानश्चवर्षासु मूलकंश्लेष्मकारणम् । तज्जलंब्रह्मरन्ध्रेचमङ्क्षोर्यविनाशनमिति० ब्र० वै० १६ अध्यायः ॥

श्लेष्मघना । स्त्री० मल्ल्याम् ॥ केतक्याम् ॥

श्लेष्मघ्नः । त्रि० श्लेष्मनाशके । न० मधुनि ॥ श्लेष्माणंहन्ति । हन० । अमनुष्येतिटक ॥

श्लेष्मघ्ना । स्त्री० मल्लिकायाम् ॥ कम्पिल्लके ॥ इ० हे० न्द्रः ॥

श्लेष्मघ्नी । स्त्री० मल्लिकाराः ॥ ज्योतिष्मत्याम् ॥ टित्वान्ङीष् ॥ चिकटुनि । व्योषे ॥ इ० मे० करः ॥

श्लेष्मणः । पुं० श्लेष्मले । बहुवारके ॥ सञ्चितकफे । त्रि० श्लेष्मवति । श्लेष्मास्त्यस्य । पामादित्वान्नः ॥

श्लेष्मणा । स्त्री० वृक्षभेदे । तपर्ण्याम् । गुरुस्कन्धे ॥

श्लेष्मा । पुं० कफे ॥ तत्प्रकोपहेतुर्यथा । गुरुमधुररसातिस्निग्धदुग्धेक्षुभक्ष्यद्रवदधिदिननिद्रापूपसर्पिः प्रपूरैः । तुहिनपतनकाले श्लेष्मणः सम्प्रकोपः प्रभवति

दिवसादौ भुक्तमात्रे वसन्ते ॥ तल्लक्षणं यथा । स्तैमित्यं मधुरास्यता शिशिरता शौक्ल्यं प्रसेको मलप्राचुर्यं स्थिरता रसस्य लवणः कण्डूरतिस्वल्पता । आलस्यं चिरकारिता कठिनता शोथारुचिः स्निग्धता तन्द्रा तृप्त्युपदेहकाः सगुरुताद्यताः कफोत्था रुजः ॥ तत्प्रशमनताकारणं यथा । गुरुशीतमृदुस्निग्धमधुरस्थिरपिच्छिलाः । श्लेष्मणः प्रशमं यान्ति विपरीतगुणैर्गुणाः ॥ रूक्षक्षारकषायतिक्तकटुकव्यायामनिष्ठीवनस्त्रीसेवाध्वनियुद्धजागरजलक्रीडाप्रहाघातनम् । धूमात्युष्णशिरोविरेकवमनं दीपनाद्यादिकं पानाहारविहारभेषजमिदं श्लेष्माणमुग्रं जयेत् ॥ श्लिष० । सर्वधातुभ्यो मनिन् ॥

श्लेष्मलः । पुं० शेलौ । श्लेष्मातके ॥ त्रि० श्लेष्मयुक्ते । कफिनि ॥ श्लेष्मास्यास्ति । सिध्मादिभ्यश्चेति पक्षे लच् ॥

श्लेष्मवान् । त्रि० श्लेष्मली ॥ लजभावे मतुप् ॥

श्लेष्महः । पुं० कट्फलवृक्षे ॥

श्लेष्महरः । त्रि० श्लेष्महरद्रव्येषु ॥ तानि यथा । वह्निस्वेदं भृष्टभङ्गं पक्वतैलं विशोषकम् । भ्रमणं शुष्कभक्ष्यञ्च शुष्कपक्वहरीतकीं । पिण्डारकमपक्वञ्च रम्भाफलमपक्वकम् । शिशवारं सिन्धुवारमनाहारमपानकम् ॥ सघृतं रोचनाचूर्णं सघृतं शुष्कशर्करम् । मरीचं पिप्पलीं शुष्कमार्द्रकं जीरकं मधु ॥ द्रव्याण्येतानि गव्यविं सद्यः श्लेष्महराणि चेति ब्र० वै० १६ऽध्यायः ॥

श्लेष्मातः । पुं० श्लेष्मातके । बहुवारके ॥

श्लेष्मातकः । पुं० शेलौ । शीतै । बहुवारके । लसोडा० इ० भा० प्र० ॥ श्लेष्माणमतति । अत सातत्यगमने । कुन्शिल्पिसंज्ञयोरपूर्वस्यापि ॥

श्लैष्मिकः । त्रि० कफजे ॥ श्लेष्मणः शमनं कोपनं वा । वातपित्तश्लेष्मभ्यः शमनकोपनयोरिति ठञ् । कफस्य शमने ॥

श्लोकः । पुं० पद्ये । अनुष्टुप्प्रभेदे ॥ यथा । पञ्चमो लोगुरुः षष्ठः सप्तमस्तु समे लघुः । पादे ह्विषमे गद्ये श्लोकोऽनुष्टुप् च कीर्त्तितः ॥ क्वचित्पादे तु विषमे पञ्चमाद्यास्त्रयोऽपि लाः । तत्रापि सर्वगाः श्लोके कश्चित्केवलपञ्चमः ॥ यशसि ॥ यथा । पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः । पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्दनः ॥ वेदमन्त्रे ॥ सङ्घाते ॥ श्लोक्य

ते ॥ श्लोकस्तु सङ्घाते । घञ् ॥

श्लोककार । पुं॰ वाल्मीकिमुनौ ॥ श्लोककृति ॥ श्लोकं करोतिकर्मण्यण् ॥

श्लोक्य : । त्रि॰ पुण्यकीर्त्ते ॥

श्व : कार्य्यम् । न॰ आगामिन्यह्नि कर्त्तव्ये ॥ यथा । श्व : कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ॥ नहिमृत्यु : प्रतीक्षेत कृतंवाप्यथवाकृतम् ॥ इतिकुलार्णवतन्त्रम् ॥

श्व : श्रेयसम् । न॰ शिवे । भद्रे । कल्याणे । मङ्गले । शुभे । शस्ते अर्थपरपदस्याश्व : शब्द : कालवाच्यपि । अभिधत्तेस्वभावेन॰ सेनेमीमङ्गलार्थकाविति पाणिनीयमतदर्पण : ॥ परमात्मनि । परानन्दे । शर्म्मणि । शाते । सुखे ॥ श्व : आगामीश्रेयोऽस्य । श्वसीवसीय : श्रेयसइत्यच् समासान्त : ॥ श्व : श्रेयइतिविग्रहे॰ मयूरव्यंसकादित्वात्समास : ॥

श्वगण : । पुं॰ कुक्कुरसमूहे ॥

श्वगणी । त्रि॰ शुनांपोषके ॥ श्वगणो । स्यस्तीति : ॥

श्वग्राही । त्रि॰ शुनांपोषके ॥ शुनां ग्राही ॥

श्वचक्रम् । न॰ कुक्कुरचेष्टायाम् ॥ पश्यवारङ्ग्राम ॥

श्वदंष्ट्रक : । पुं॰ गोक्षुरे ॥

श्वदंष्ट्रा । स्त्री॰ गोकण्टके । गोक्षुरके शुनोदंष्ट्रेव ॥

श्वधूर्त्त : । पुं॰ शृगाले ॥

श्वा । पुं॰ ग्राममृगे । अस्य पर्याया यथा । कौलेयक : सारमेय : कुक्कुरोमृगदंशक : । शुनकोभषक : श्वा श्वादिति ॥ शुनोलक्षणं यथा । पाद : पञ्चनखास्त्रयो ऽग्रचरण : षड्भिर्नखैर्दक्षिण स्ताम्रौष्ठाग्रनखो मृगेश्वरगतिर्जिघ्रन्भुवंयाति च । लाङ्गूलंससटं॰ दृगृक्षसदृशौ कर्णौ च लम्बौ मृदू यस्य स्यात् सकरोतिपोष्टुरचिरात्पुष्टांश्रियंवैगृही ॥ इति वाराही ॥ अस्यपरीक्षातुमृगयार्थं शाकुनार्थं कौतुकार्थंमपेक्षिता । श्वान : पोष्यास्ततस्तेषां मत्स्यवक्ष्यामिलक्षणम् ॥ गुणजातिप्रभेदेन शुनोभेदाह्यनेकश : । सात्त्विकाराजसाश्चैवतामसास्त्रिधामता: ॥ अश्रान्ताश्चपरिक्षीणा : पवित्रा॰ स्वल्पभोजिन : । श्वानस्तेसात्त्विका : प्रोक्ताद्दश्यन्ते च क्वचित्क्वचित् ॥ १ ॥ कृशाबहुभुजोदीर्घा गुरुवक्षस्तनूदरा : । आकुलस्याजाङ्गिकास्वशुनस्तेराजसामता : ॥ २ ॥ अल्पश्रमेणयेश्रान्तालम्बजिह्वागुरूदरा : । श्वानस्तेतामसाज्ञेया : सन्त्यासवनसमाश्रया : ॥ ३ ॥ ब्रह्मादिजातिभेदेनचतुर्द्धासर्वएवहि । शुभादौ घास्त्वकर्णालघुपुच्छास्तनूदरा:

सुशुक्लखरदन्ताश्च श्वानस्ते ब्रह्मजातयः ॥ १ ॥ रक्ताङ्गास्तनुलोमानो लसत्कर्णास्तनूदराः । दीर्घादीर्घनखरदाः श्वानस्ते क्षत्रजातयः ॥ २ ॥ येपीतवर्णास्तद्वस्तनुलोमानएव च । कुशाकुशालवर्ण्णिन्नास्ते श्वानो वैश्यजातयः ॥ ३ ॥ कृष्णवर्णास्तनुमुखा दीर्घरोमाणएव च । चक्रुशाः श्रमयुक्ताश्च तीव्रश्वानः शूद्रजातयः ॥ ४ ॥ लघुप्रमाणास्तु गुरूदरा ये येऽमेध्यभक्षा बहुपुच्छकाश्च । प्रवृद्धपुच्छा लघुसूक्ष्मदन्तास्ते चान्त्यजाः कुक्कुरजातयः स्युः ॥ ५ ॥ द्विजातिर्विजसंसर्गात् द्विजातिः श्वा भयावहः । लक्षणत्रयसम्बन्धात् विजातिर्धननाशनः ॥ चर्मभोजः । द्विजातिर्वा विजातिर्वा विजातिः श्वामशीभृताम् । भयं धनक्षयं शोकं विदधाति यथाक्रमम् ॥ द्युतिभो जराऽङ्गतोयुक्ताः कल्पतरुः ॥ शुन्यालक्षणं यथा । पादे पादे पञ्चपञ्चाऽग्रपादे वामेयश्चषण्नखा-मल्लिकाख्याः । वक्रं पुच्छं पिङ्गलाभं स्वकर्णौ यासारः सुकुक्कुरी पातिपुष्टा ॥ इति वाराही ॥ श्वयति । टुओश्वि गतिवृद्ध्योः । श्वन्नुक्षन्निति साधुः । वास्तुनः स्थानभेदे ।

श्वनिशम् । न० श्वनिशायाम् ॥ श्वानो निशायां श्वानउपवसन्ति । तां कृष्णचतुर्दशीत्याहुः । तस्यां हि शक्तिश्वानउपवसन्ति । तथा च तिथ्यधिकरणे शाबरभाष्यम् । शुनश्चतुर्दश्यामुपवसतः पश्यामहति । शुनां निशेति विग्रहे विभाषा सेनासुराच्छायाशालानिशानामिति । निशान्ततत्पुरुषस्य पाक्षिकं क्लीवत्वम् ॥

श्वनिशा । स्त्री० श्वनिशि ॥ शुनां निशा । विभाषासेनेति पक्षे क्लीवत्वाभावः ॥

श्वपक् । पुं० श्वपचे ॥ निषादः श्वपचः श्वपगिति वैपाजितः ॥

श्वपचः । पुं० श्वपाके चण्डाले । अन्त्यावसायी त्वस्य संज्ञान्तरम् ॥ अस्य धर्मो यथा । चण्डालश्वपचानान्तु बहिर्ग्रामात् प्रतिश्रयः । अपपात्राश्च कर्त्तव्याधनमेषां श्वगर्दभम् ॥ वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम् । कार्ष्णायसमलङ्कारः परिव्रज्या च नित्यशः ॥ न तैः समयमन्विच्छेत् पुरुषो धर्ममाचरन् । व्यवहारो मिथस्तेषां विवाहः सदृशैः सह ॥ अन्नमेषां पराधीनं देयं स्याद्भिन्नभाजने । रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च ॥ दिवा चरेयुः कार्यार्थं चिह्निता राजशासनैः । अबान्धवं शवञ्चैव निर्हरेयुरिति स्थितिः ॥ वध्यांश्च हन्युः सततं यथाशास्त्रं नृ

पाणया। वध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि चेति मनुः॥ चण्डालः श्वपचः क्षत्ता सूतो वैदेहकस्तथा। मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः॥ इत्यङ्गिराः॥ श्वपचः। डोम० डुमडा० इ० भा० प्र०॥ श्वानं पचति। डुपचष्०। पचाद्यच्॥

श्वपदम्। न० कुक्कुरपादे॥

श्वपाकः। पुं० निषादे। चण्डाले॥ तस्योत्पत्तिर्यथा। क्षत्तुर्जातस्तथोग्रायां श्वपाक इति कीर्त्यते० इति मनुः। शूद्रेण वैश्यायां जातः क्षत्ता० क्षत्रियेण शूद्रायां जाता उग्रा० तेन तस्यां जातः श्वपाक इत्युच्यत इति कुल्लूकभट्टः॥

श्वफलः। पुं० बीजपूरे॥

श्वफल्कः। पुं० वृष्णिपुत्रे। अक्रूरपितरि॥

श्वफल्कपुत्रः। पुं० अक्रूराख्ययादवे॥

श्वभीरुः। पुं० फेरौ। शृगाले॥

श्वभ्रम्। न० भूछिद्रे। तत्पर्याया यथा। कुहरं शुषिरं विवरं बिलम्। छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपा शुषिरिति॥ श्वभ्रयति। श्वभ्रगतौ। अन्तः। पचाद्यच्॥ शुभ्रे। भगमभ्रं व्योमाभ्रवा॥ विदीर्णभूभागे॥

श्वयथुः। पुं० शोथे। त्वग्विवर्द्धने श्वयति० श्वयनमनेन वा। टुओश्वि गतिवृद्ध्योः। ट्वितोऽथुच्॥

श्वयीचिः। पुं० वन्हौ॥ व्याधौ॥ श्वयति। टुओश्वि०। श्वयतेश्छिदिति ईचिः। गुणायादेशौ॥

श्ववृत्तिः। स्त्री० सेवायाम्। चाकरी० इ० भा० प्र०॥ सेवा तु दीनहृष्टसंदर्शनस्वामितर्जननीचक्रियादिधर्मयोगात्० शुनोवृत्तिरिव। शुनइववृत्तिर्वा। सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेदिति मनुः॥

श्वव्याघ्रः। पुं० श्वापदे। व्याघ्रादिहिंस्रपशौ॥

श्वशुरः। पुं० पूज्ये॥ पतिपत्न्योः पितरि॥ पत्युः पिता पत्न्याः श्वशुरः० पत्न्याः पिता पत्युः श्वशुरः॥ शुङ्त्याश्वर्य्ये० पूजायां वा। शुअश्नुते० अश्यते वा। अशूव्याप्तौ० संघाते च। आशुशिरामावित्युरन्॥

श्वशुरा। स्त्री० ब्राह्म्याम्॥

श्वशुरौ। पुं० २ सहोक्त्या० श्वश्रूश्वशुरयोः। श्वश्रूश्चश्वशुरश्च तौ। श्वशुरः श्वश्र्वेति पाक्षिकएकशेषः॥

श्वशुर्य्यः। पुं० देवरे॥ श्याले॥ श्वशुरस्यापत्यम्। राजश्वशुराद्यत्॥

श्वश्रूः । स्त्री॰ शाश्रुधियि । श्वशुरभार्यायाम् । पतिपत्न्योः प्रसवाम् । पत्युर्मातापत्न्याः श्वश्रूः॰ पत्न्याः मातापत्युः श्वश्रूः । श्वशुरस्त्री॰ श्वशुरस्योकाराकारलोपश्चोत्यूङ् । पुंयोगलक्षणाभावेऽपि पवाद: ॥

श्वश्रूश्वशुरौ । पुं॰ २ सश्चोत्तयाश्वशुरयोः ॥ श्वश्रूश्च श्वशुरश्चतौ । श्वश्रूः पूर्वंजपत्नीचमातृतुल्या प्रकीर्त्तितेति श्वश्र्वा अभ्यर्हितत्वात्पूर्वनिपातः ॥

श्वः । अ॰ अनागतदिने ॥ आगामिअह: पृषोदरादिः । ऐषमोह्यः श्वसोन्यतरस्यामितिनर्देशस्वाभानुकूल: ॥

श्वसनः । पुं॰ स्पर्शने । वायौ ॥ मदनद्रुमे । मयनफलेतिप्रसिद्धे ॥ न॰ श्वसिते । श्वासे ॥ श्वसित्यनेन । श्वसप्राणने । ल्युट् ॥ निर्जलेपिश्वसिति । नन्द्यादित्वाल्युर्वा ।

श्वसना । स्त्री॰ श्वासोच्छ्वासवत्यायांधमन्याम् ॥

श्वसनाशनः । पुं॰ सर्पे ॥ श्वसनोऽशनं यस्य सः ॥

श्वसनेश्वरः । पुं॰ अर्जुनद्रुमे ॥

श्वसनोत्सुकः । पुं॰ अहौ । सर्पे ॥

श्वसितम् । न॰ श्वासे ॥ उच्छ्वासमारुते । फूत्कारे ॥ श्वसिति । श्वस॰ ।क्तः ॥

श्वस्तनः । त्रि॰ श्वोभवेवस्तुनि ॥ ऐषमोह्यः श्वसोऽन्यतरस्यामिति॰ त्यवभावेस्त्यु ल्यौ॰ तुट्च ॥ न॰ भविष्यत्काले । इतिराजनिर्घण्टः ।

श्वस्त्यः । त्रि॰ श्वोभवे । श्वस्तने । ऐषमोह्यः श्वसोऽन्यतरस्यामितित्यप् ॥

श्वानम् । न॰ शुनांसमूहे । खण्डिकादित्वादञ् ॥ पुं॰ कुक्कुरे ॥ इ॰ श॰ र॰ लौ ।

श्वानकः । पुं॰ शुनि ॥

श्वानचिल्लिका । स्त्री॰ शाकविशेषे । शुनकचिल्ल्याम् ॥

श्वानलोमापहः । पुं॰ तीर्थविशेषे ॥

श्वानी । स्त्री॰ शुन्याम् ॥

श्वापदः । पुं॰ व्याघ्रादिहिंस्रपशौ ॥ व्याघ्राद्योवनचराः पशवः श्वापदामताः ॥ शुनोदंतदंष्ट्राकर्णकुन्दवराहपुच्छपदेषुश्चोर्वाँवाच्यइतिदीर्घः ॥ त्रि॰ शौवापदे ॥ श्वापदस्येदम् । श्वापदस्यान्यतरस्यामितिपाक्षिकऐच्निषेधः ॥

श्वाविध्॰ द । पुं॰ शल्यपशौ । सा॰ उ॰ इ॰ प्र॰ सूक्ष्मलोमवति ॥ श्वानंविध्यति । व्यध॰ । क्विप् । नहिवृतीतिदीर्घः ॥

श्वाश्व : । पुं० भैरवे ॥

श्वास : । पुं० श्वसिते । प्राणेनबा ह्यवायोरन्तः प्रवेशने । समा ध्यङ्गरेचकविरोधिनि । प्राणवा यौ । श्वसिति । श्वस० । श्वाद्य चेतिघ : ॥ रोगविशेषे ॥ पिशु नो नरकः स्यान्तो जायते श्वासकास वान् । घृततैलप्रदातव्यं सहस्रप लसम्मितमितिशातातपीयकर्मवि पाकः ॥ अस्यौषधं यथा विभीतक स्यचूर्णं मधु श्वासनाशनम् ॥ पिप्पलीत्रिफलाचूर्णं मधुसैन्धवसं युतम् । सर्वरोगज्वरश्वासशोषपी नसहृद्वेदि इति गारुडे १८९ अध्या यः ॥ प्राणे ॥ हारोद्घाटने ॥

श्वासकास : । पुं० श्वासयुक्तकासरोगे । श्वासजनककासे ॥ यथा । का सश्वासभवेत्कासः पूर्वोवादोषको पनेरितिगरुडपुराणम् ॥

श्वासकुठार । पुं० । श्वासरोगस्यौष धविशेषे ॥ यथा । रसोगन्धोविष स्वापिटङ्कणस्तुमनः शिला । ए तानिकर्षमात्राणिमरिचस्याष्टकर्ष कान् ॥ कटुत्रयंकर्षयुग्मंपृथग चरिनिः क्षिपेत् रसः श्वासकु ठारोयं सर्वश्वासनिवारण इतिभा वप्रकाश : ॥

श्वासप्रश्वासधारणम् । न० प्राणायामे । श्वासप्रश्वासयोर्धारणंयत्तत् ॥

श्वासहेतिः । पुं० निद्रायाम् । स्वापे ॥

श्वासारि : । पुं० पुष्करमूले ॥

श्वासी । पुं० वायौ । त्रि० श्वास रोगिणि ॥

श्वित्रम् । न० श्वेतकुष्ठे । कुष्ठे ॥ श्वित्तते । श्वेतावरणे , स्फायि तस्त्रीतिरक् ॥ अस्यौषधन्तु । धा त्रीखदिरयोः क्वाथं पीत्वा चवल्गुसं युतम् । शङ्खेन्दुधवलं श्वित्रं ह न्तितूर्णं नसंशयः ॥

श्वित्रघ्नी । स्त्री० पीतपर्य्याम् । त्रि कूटी० इति० गौ० भा० प्र० ॥

श्वित्री । त्रि० श्वेतकुष्ठवति । श्वि त्रमस्यास्मिन्वास्ति । अतइनिठ नावितीनिः ॥

श्वेत : । पुं० शुभ्रवर्णे । सपे- द० इ० भा० ॥ द्वीपविशेषे । श्वेतद्वीपे ॥ अद्रिविशेषे । इला वृतस्योत्तरेहिमवत्स्तयोजनविस्तीर्णे प्रागायतेहिरण्मयवर्षमर्यादागि रौ ॥ वानरविशेषे ॥ यथारामा यणे । श्वेतोरजतसङ्काशश्चपलो भीमविक्रमः । बुद्धिमान्वानर वरश्रिपुलोकेषुविश्रुत इति ॥ कप र्दके ॥ शुक्रग्रहे ॥ शङ्खे ॥ श्वे ताभ्रे ॥ शिखावतारविशेषे ॥ न० रूप्ये । त्रि० शुक्लवर्णविशिष्टे ॥

श्वेतते । श्विता० । पचाद्यच् ॥

श्वेतकः पुं० वराटके ॥ न० रूप्ये ॥

श्वेतकण्टकारी । स्त्री॰ नाकुल्याम् । कण्टकार्य्याम् ॥

श्वेतकन्दा । स्त्री॰ अतिविषायाम् ।

श्वेतकिणिही । स्त्री॰ गिरिकर्णिकायाम् । शिरीषपर्ण्याम् । विषघ्निकायाम् । श्वेताचासौ किणिही च ॥

श्वेतकुञ्जरः । पुं॰ ऐरावते ॥ शुक्लगजे ॥ श्वेतश्चासौ कुञ्जरश्च ॥

श्वेतकुशः । पुं॰ तृणविशेषे ॥ सितदर्भे । ह्रस्वकुशे । पूते । यज्ञभूषणे । सूचीमुखे । पुण्यतृणे । बर्हिषि ॥

श्वेतकुष्ठम् । न॰ शुक्लकुष्ठे ॥ अस्यौषधं यथा । सोमराजस्य बीजानि नवनीतयुतानि च मधुना स्वादितानि स्युः शुक्लकुष्ठहराणि वै ॥

श्वेतकेतुः । पुं॰ उद्दालकस्यर्षेस्तनये । श्रुतिप्रसिद्ध आरुणेयमुनौ ॥ केतुग्रहविशेषे ॥ बुधे ॥

श्वेतकेशः । पुं॰ रक्तशिग्रौ ॥ शुक्लकचे ॥

श्वेतकोलः । पुं॰ शफरमत्स्ये ॥

श्वेतखदिरः । पुं॰ शुक्लखदिरे । सोमवल्के । कदरे ।

श्वेतगजः । पुं॰ इन्द्रहस्तिनि । ऐरावणे । अभ्रमातङ्गे । चतुर्दन्ते ॥

श्वेतगरुत् । पुं॰ हंसे ॥ श्वेता गरुतोऽस्य ॥

श्वेतगुञ्जा । स्त्री॰ चूडालायाम् । श्वेतकाम्बोज्याम् । काकादन्याम् ॥

श्वेतचन्दनम् । न॰ शुक्लचन्दने ॥

श्वेतचिल्ली । स्त्री॰ शाकभेदे । वास्तुक्याम् । सुपथ्यायाम् । श्वेतचिल्लिकायाम् । ज्वरघ्न्याम् । चुद्रवास्तुक्याम् । अथ श॰ इ॰ भा॰ प्र॰ ॥ अस्या गुणा यथा । श्वेतचिल्लीसुमधुरा क्षारा च शिशिरा च सा त्रिदोषशमनी पथ्या ज्वरदोषविनाशिनी ॥

श्वेतच्छदः । पुं॰ हंसे ॥ श्वेताश्छदा यस्य सः । गन्धपत्रे । वायु इ॰ भू॰ भा॰ ॥

श्वेतजीरकः । पुं॰ अजाज्याम् । गौरजीरके ॥

श्वेतटङ्कणम् । न॰ क्षारविशेषे टङ्कणक्षारे । मालतीतीरसम्भवे ॥

श्वेतदूर्वा । स्त्री॰ पाण्डुरदूर्वायाम् । अस्याः पर्यायास्तु । गोलोमी शतवीर्या च गण्डाली शकुलाक्षका इति गुणास्तु । श्वेतदूर्वा कषाया स्यात् तिक्ता च मधुरा तथा स्वाद्वी वर्ण्या च जीवनी । तिक्ता हिमा विसर्पास्रतृट्पित्तकफदाहनुत् इति ॥

श्वेतद्युतिः । पुं॰ इन्दौ । चन्द्रे ॥

श्वेतद्वीपः । पुं॰ शक्रहस्तिनि । हस्तिमल्ले । चतुर्दन्ते । ऐरावणे ॥

श्वेतद्वीपः । पुं॰ विष्णोर्धामविशेषे ॥ यत्रानिरुद्धमूर्त्तिर्भगवानास्ते ॥

श्वेतधातुः । पुं॰ खटिकायाम् ॥ शुक्लवर्णधातुमात्रे ॥

श्वेतधामा । पुं॰ इन्दौ । घनसारे अब्धिफेने ॥

श्वेतनीलः । पुं॰ अम्बुदे । मेघे ॥ शुक्लनीलवर्णे ॥

श्वेतपत्रः । पुं॰ हंसे ॥ न॰ शुभ्रपर्णे ॥

श्वेतपत्ररथः । पुं॰ स्रष्टरि ब्रह्मणि । विधातरि ॥ श्वेतपत्रो हंसो रथो वाहनं यस्य ॥

श्वेतपद्मम् । न॰ पुण्डरीके । सिताम्भोजे । शंभुवल्लभे ॥

श्वेतपर्णा । स्त्री॰ कुम्भिकायाम् । वारिपर्ण्याम् ॥

श्वेतपर्णासः । पुं॰ श्वेततुलस्याम् अर्ज्जके । गन्धपत्रे ॥

श्वेतपाटला । स्त्री॰ शुक्लपाटलायाम् ॥

श्वेतपिङ्गः । पुं॰ सिंहे ॥ इ॰ हे॰ न्द्रः ॥

श्वेतपिङ्गलः । पुं॰ सिंहे ॥ त्रि॰ शुक्लकपिलवर्णयुक्ते ॥

श्वेतपिण्डीतकः । पुं॰ महापिण्डीतके ॥

श्वेतपुष्पः । पुं॰ सिन्धुवारवृक्षे ॥ श्वेतार्के । श्वेतकरवीरे ॥ वरुणद्रुमे । न॰ शुक्लवर्णकुसुमे ॥

श्वेतपुष्पकः । पुं॰ करवीरवृक्षे ॥

श्वेतपुष्पा । स्त्री॰ मृदङ्ग्याम् । श्वेतघोषा॰ इ॰ गौ॰ भा॰ प्र॰ ॥ नागदन्त्याम् । मृगेर्वारौ ॥ श्वेतानि पुष्पाणि यस्याः ॥

श्वेतपुष्पिका । स्त्री॰ महाशणपुष्पिकायाम् ॥ पुत्रदात्र्याम् ॥ इ॰ रा॰ राटः ॥

श्वेतप्रसूनकः । पुं॰ वृक्षविशेषे । वरुणद्रुमे ॥

श्वेतभण्डा । स्त्री॰ श्वेतापराजितायाम् ॥

श्वेतमन्दारकः । पुं॰ पृथ्वीकुरङ्के । दीर्घायुष्ये । श्वेताकड॰ भा॰ प्र॰ ।

श्वेतमरिचम् । न॰ शिग्रुबीजे ॥ श्वेतं मरिचमिव ॥ शुक्लमरिचे ॥

श्वेतरक्तः । पुं॰ पाटलवर्णे । श्वेतयुक्तो रक्तः ॥

श्वेतरञ्जनम् । न॰ सीसके ॥

श्वेतरथः । पुं॰ दैत्यगुरौ । शुक्रे ॥ श्वेतो रथोऽस्य ॥ शुक्लवर्णस्यन्दने ॥

श्वेतराजी । स्त्री॰ चिचिण्डे । सुदीर्घफले ॥

श्वेतरोचिः । पुं॰ चन्द्रे ॥

श्वेतरोहितः । पुं॰ सितपुष्पे । सि

ताह्वये । श्वेतरोहिता० द्र० भा० प्र० वृक्षे ॥

श्वेतलोध्रः । पुं० पट्टिकालोध्रे ॥

श्वेतवचा । स्त्री० अतिविषायाम् ॥ वचाप्रभेदे । मेध्यायाम् । हैमवत्याम् । सा च वच० द्र० भा० प्र० ॥

श्वेतवल्कलः । पुं० उदुम्बरवृक्षे ॥ शुक्लत्वचि ॥

श्वेतवाजी । पुं० चन्द्रे ॥ पार्थे । अर्ज्जुने ॥ कर्के । शुक्लाश्वे ॥

श्वेतवासाः । पुं० शुक्लवस्त्रधारिसन्न्यासिनि ॥ द्र० हलायुधः ॥ त्रि० परिहितशुक्लवसने ॥

श्वेतवाः । पुं० इन्द्रे ॥ श्वेता एनं वहन्ति । वह- श्वेते वाहे धातोर्वा मन्त्रे श्वेतवहेति णिवर्णे विषये० श्वेतवहादीनां डस् पदस्य इति० यत्र पदत्वं तत्र णिवनोपशादे डस् । श्वेतवाः० श्वेतवाह० श्वेतवोभ्यामित्यादि ॥

श्वेतवाहनः । पुं० चन्द्रे । शशिनि ॥ धनञ्जये । अर्ज्जुने ॥ मकरे ॥

श्वेतवाहो । पुं० अर्ज्जुने । पार्थे ॥

श्वेतवुह्ना । स्त्री० वनतिक्तायाम् । निसर्पिण्याम् । गिरिजायाम् ॥

श्वेतवृहती । स्त्री० क्षुद्रवार्ताक्याम् । श्वेतफलायाम् ॥

श्वेतवृक्षः । पुं० वरुणद्रुमे ॥

श्वेतशरपुङ्खा । स्त्री० क्षुपविशेषे । सितशायकायाम् । सितपुङ्खायाम् ॥

श्वेतशिग्रुः । पुं० शुक्लशोभाञ्जने सुतीक्ष्णे । मधुशिग्रुके ॥

श्वेतशिंशपा । स्त्री० शुक्लशिंशपावृक्षे ॥

श्वेतशिम्बिकः । पुं० निष्पावे । भटवांसु० द्र० भा० प्र० ॥

श्वेतशुङ्गः । पुं० यवे ॥

श्वेतशूरणः । पुं० वनशूरणे ॥

श्वेतसर्प्पः । पुं० शुक्लवर्णभुजङ्गे । वरुणवृक्षे ॥

श्वेतसर्षपः । पुं० गौरसर्षपे ॥

श्वेतसारः । पुं० कदरे । खदिरे ॥

श्वेतसुरसा । स्त्री० श्वेतपुष्पशेफालिकायाम् । भूतवेश्याम् ॥ शोभनो रसोऽस्याः । श्वेता चासौ सुरसा च ॥ श्वेततुलस्याम् ॥

श्वेतस्यन्दा । स्त्री० विष्णुक्रान्ताभेदे ॥

श्वेतहयः । पुं० उच्चैःश्रवसि । वृषणाश्वे ॥ अर्ज्जुने । पार्थे ॥ चन्द्रे ॥ शुक्लवर्णाश्वे । कर्के ॥

श्वेतहस्ती । पुं० ऐरावते । शुक्लगजे ॥

श्वेता । स्त्री० वराटिकायाम् ॥ काष्ठपाटलायाम् ॥ शङ्खिन्याम् ॥ अपराजितायाम् ॥ स्फट्याम् ॥ अतिविषायाम् ॥ श्वेतवृहत्याम् ।

श्वेतकण्टकार्य्याम् ॥ पाषाणभेद्याम् ॥ श्वेतदूर्व्वायाम् ॥ शिलावल्कलायाम् ॥ वंशरोचनायाम् ॥ शर्करायाम् ॥ लताविशेषे । क्षुद्रिकापर्णिकायाम् । पर्व्वमूलायाम् ॥ ऋषिप्रियायाम् ॥ गुणास्तु । श्वेतातिमधुराशीतास्तन्यदारुच्चिकारिका ।

श्वेताचिल्लत् । स्त्री॰ शुक्लचिल्लतायाम् । चिभाण्डाम् ॥

श्वेताम्ली । स्त्री॰ क्षुपविशेषे । पम्लिकायाम्पिष्टोडाम् ॥

श्वेतार्कः । पुं॰ शुक्लार्कवृक्षे । तपने । शर्करापुष्पे । वृत्तमल्लिकायाम् ॥ अस्यगुणाः । श्वेतार्कः कटुकस्तिक्तउष्णोमलविशोधनः । मूत्रकृच्छ्राश्मशोथार्त्तिव्रणदोषविनाशनइति ॥

श्वेतावरः । पुं॰ सितावरशाके ॥

श्वेताश्वः । पुं॰ अर्ज्जुने ॥ सहदेवपाण्डवे ॥

श्वेताह्वा । स्त्री॰ सितपाटलायाम् ॥

श्वेतेक्षुः । पुं॰ सितेक्षौ । वंशपत्रके । पाण्डुरेक्षौ ॥ अस्यगुणाः । श्वेतेक्षुः कठिनोरुच्योगुरुश्चकफमूत्रकृत् । दीपनः पित्तदाहघ्नोविपाकेऽप्यम्लस्तथेति ॥

श्वेतोदरः । पुं॰ कुवेरे ॥ त्रि॰ श्वि

काण्डशेषः ॥

श्वोवसीयसम् । न॰ कल्याणे । मङ्गले ॥ वसुशब्दः प्रशंसावाची॰ ईयसुन्नन्तः । शुस् शब्दउत्तरपदार्थप्रशंसामाशीर्व्विषयमाह । श्वोवसीयइतिविग्रहे॰ मयूरव्यंसकादित्वात्समासः । श्वोवसीयः श्रेयस् तुल्यच् समासान्तः अर्थपरपदस्यावश्वः शब्दः कालवाच्यपि । अभिधत्तेस्वभावेनतेनेमौमङ्गलार्थकाविति पाणिनीयमतदर्पणः । श्वोवसीयसन्ते भूयात् ॥

षकारस्य प्रारम्भः

षः । पुं॰ षकारे ॥ कचे ॥ त्रि॰ विज्ञे । निपुणे ॥ श्रेष्ठे ॥

षट्कः । पुं॰ षण्णांसङ्घे ॥ सङ्ख्यायाः संज्ञासङ्घसूत्राध्ययने ष्विति कन् ॥ षष्ठेनरूपेणगृह्णातीत्यर्थे तु॰ तावतिथेनगृह्णातीति कन्वक्तव्यः पूरणप्रत्ययस्य च नित्यंलुक् । षष्ठेनरूपेणगृह्णाति॰ षट्कोदेवदत्तः ॥

षट्कट । न॰ षडूषणे ॥

षट्कर्णः । पुं॰ कर्णवेधहीनयोरप्रत्ययोर्व्विद्यमानयोस्तृतीयस्याप्रत्ययस्यासम्भावनायाम् ॥

षट्कर्म्मा । पुं॰ यागादिभिर्युते ब्राह्मणे ॥ षट्कर्म्माण्यध्ययनादीन्यत्र । तानियथा । यज्याध्ययन

दानानियाजनाध्यापनेतथा । प्रतिग्रहश्चतैर्युक्तः षट्कर्माविप्रउच्यतइति ॥ बहुपोष्यवर्गे गृहस्थब्राह्मणे ॥ स्वतायाचितभैक्षकृषिवाणिज्यकुसीदानिषट्कर्माण्यस्य ॥ न॰ षण्णांकर्मणांसमाहारे । अध्यापनादिषट्सुकर्मसु ॥ यथा । अध्यापनमध्ययनंयजनंयाजनंतथा । दानंप्रतिग्रहश्चैवषट्कर्माण्यग्रजन्मनइति ॥ शान्त्यादिषट्सुकर्मसु ॥ तानियथा । शान्तिवश्यस्तम्भनानिविद्वेषोच्चाटनेतथा । मारणान्तानिशंसन्तिषट्कर्माणिमनीषिणइति ॥ त्रि॰ षट्कर्मकर्त्तरि ॥

षट्काष्टकम् । न॰ विवाहादिविचारे दोषविशेषे ॥ यथा । यदिकन्याष्टमेभर्त्ताभर्त्तुः षष्ठेचकन्यका । षट्काष्टकंविजानीयात्वर्ज्जितंचिद्वशैरपि ॥

षट्कूटा । स्त्री॰ भैरवीदेवताविशेषे॥

षट्कोणम् । न॰ वज्रे ॥ षडस्रे । लग्नात्षष्ठगृहे ॥

षट्कोणः । पुं॰ न॰ षड्भ्यः कोणेभ्यउत्पन्ने वपुषि ॥ यथाहुः । पितृभ्यामशितादन्नात्षट्कोषंजायतेवपुः । स्नायवोऽस्थीनिमज्जाचजायन्तेपितृतस्तथा । त्वङ्मांसशोणितमितिमातृतश्चभवन्तिहि ॥

षट्चक्रम् । न॰ शरीरस्थपद्माकारषट्प्रकारचक्रे ॥

षट्चरणः । पुं॰ भ्रमरे ॥ यूकायाम् ॥

षट्तिली । पुं॰ माघशुक्लैकादश्यांभैम्यामुपवासंकृत्वाद्वादश्यांषट्तिलाचारविशिष्टे ॥ यथा । मृगशीर्षेश्रवणेमाघेमासिप्रजायते । एकादश्यांसितेपक्षेसोपवासोजितेन्द्रियः ॥ द्वादश्यांषट्तिलाचारंकृत्वापापात्प्रमुच्यते । तिलस्नायीतिलोद्वर्त्तीतिलहोमीतिलोदकी ॥ तिलस्यदाताभोक्ताचषट्तिलीनावसीदतीति ॥

षट्त्रिंशत् । स्त्री॰ सङ्ख्याविशेषे । छत्तीस॰ इ॰ भा॰ प्र॰ त्रि॰ । सङ्ख्येये ॥ यथाषट्त्रिंशदुपचाराः ॥

षट्त्रिंशत्तत्त्वम् । न॰ शैवशास्त्रप्रसिद्धे तत्त्वसमूहे ॥ यथा । प्राणापानसमानाश्चोदानव्यानौचवायवः । भूतैश्चपञ्चभिः सार्धैश्चतुर्दशभिरिन्द्रियैः ॥ चतुर्विंशतितत्त्वानिसाङ्ख्यशास्त्रविदोविदुः । महान्कालः प्रधानञ्चमायाविद्याचपूरुषः ॥ इतिपौराणिकाः प्राहुस्त्रिंशत्तत्त्वानितैः सह । बिन्दुनादौशक्तिशिवौशान्तातीतौपरंततः ॥ षट्त्रिंशत्तत्त्वमित्युक्तंशैवागमविशारदैरितिमानसोल्लासः ॥

षट्पदः । पुं॰ भ्रमरे ॥ षट्पदानियस्य ॥ यूकायाम् ॥ न॰ मात्रा

वृत्तान्तरे । यथा । षट्कलमादौ तदनु चतुस्तुरगं परिसन्तनु । श्रीविहि कलं कलयचतुष्पदमेवं संश्रितनु० ॥ छन्दः षट्पदनामभवति फणिना वकगीतं० रुद्रे विरतिमुपैति नृप तिसुखकरमुपनीतम् । उल्लालयुगलमन्ते भवेदष्टाविंशतिकलमिदम्० शृणु पञ्चदशे विरतिस्थितं पठनेप ण्डितजनहितम् ॥ तथा । वामकरोदरकलितकमलसोदरकृषिवदना० गुरुपुरतो पितवेवनामजल्पतिगुरुमदना० भवदभिलषणविशेषरभसपरिशोषितदिवसा० सुस्थितचन्द्रभयेनरञ्जनिमधिशोवितमपि सा । निजहृदि विनिहितभवदभिसरणार म्भतरङ्गमनङ्गयति० भवदीय विलोकनमन्तरानमनोरथमुग्धमनु भवति ।

षट्पदप्रिय : । पुं० नागकेशरवृक्षे ॥ न० रक्तोत्पले ॥

षट्पदा । स्त्री० यूकायाम् ॥

षट्पदातिथि : । पुं० चाम्रवृक्षे ॥

षट्पदानन्द : । पुं० पुष्पवृक्षविशेषे । किङ्किराते । पीतभद्रे ॥

षट्पदानन्दवर्द्धन : । पुं० किङ्किराते । अशोकपादपे ।

षट्पदी । स्त्री० यूकायाम् ॥ द्र० हे० न्द्र : ॥

षट्पदेष्ट : । पुं० नीपे । कदम्बे ॥

षट्प्रज्ञ : । पुं० कामकेलौ । कामुके पिङ्गे ॥ धर्मादिशास्त्रवित्ते ॥ यथा । धर्मार्थकाममोक्षेषु लोकतत्त्वार्थयोरपि । षट्सु प्रज्ञास्ति यस्योच्चैः सषट्प्रज्ञ इति स्मृतः ॥ द्र० चि० शेष : ॥

षड : । पुं० पेयान्तरे । भेदे ॥

षडंश : । त्रि० षष्ठांशे ॥ सङ्ख्याशब्दस्यवृत्तिविषयेपूरणार्थत्वम् ॥

षडङ्ग : । पुं० वेदे ॥ षट्शिक्षादीन्यङ्गान्यस्य । चाट्रगे तुरके ॥ न० शिक्षादिषु वेदाङ्गेषु ॥ यथा । शिक्षा कल्पो व्याकरणं निरुक्तं ज्योतिषं तथा । छन्दश्चेति षडङ्गानि वेदानां वैदिका विदुः ॥ छन्दः पादौ तु वेदस्य हस्तौ कल्पस्तु कथ्यते । ज्योतिषामयनं नेत्रं निरुक्तं श्रोत्रमुच्यते ॥ शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम् । तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥ द्र० स्मृति : ॥ शरीरस्य षडवयवे । यथा । जङ्घे बाहू शिरो मध्यं षडङ्गमिदमुच्यते० इति ॥ हृदादिषु ॥ हृच्छिरश्च शिखा चैव कवचं नयनत्रयम् । करतलकरपृष्ठे च षडङ्गं न्याससंज्ञकम् ॥ गव्यविशेषे ॥ यथा ॥ गोमूत्रं गोमयं क्षीरं सर्पिर्दधि च रोचना । षडङ्गमेतन्माङ्गल्यं पवित्रं सर्वदा गवामिति स्मृति : ॥

षडङ्गजित् । पुं॰ जनार्द्दने ॥ त्रि॰ षडङ्गजेतरि ॥

षडङ्गधूपः । पुं॰ । देवदेयधूपविशेषे ॥ यथा । गुग्गुल्वगुरुशीरशर्करामधुचन्दनैः । धूपयेदाज्यसंमिश्रैर्नीचैर्देवषडङ्गक इति ॥

षडङ्गवित् । पुं॰ शिक्षादिवेदाङ्गज्ञे । पङ्क्तिपावनब्राह्मणे ॥ षडङ्गानि शिक्षादीनि यो व्याचष्टे सः ॥

षडभिज्ञः । पुं॰ अद्वयवादिनि । सर्वज्ञे । बुद्धे ॥ दिव्यं चक्षुः श्रोत्रं॰ परचित्तज्ञानं॰ पूर्वनिवासानुस्मृतिः॰ आत्मज्ञानं॰ वियद्गमनं॰ कायव्यूहादिसिद्धिरिति षट् अभिज्ञा यस्य सः । षट्सु॰ दानशीलक्षान्तिवीर्यध्यानप्रज्ञासु॰ अभिज्ञा॰ आद्यं ज्ञानमस्येति वा ॥

षडशीतिः । स्त्री॰ अर्कसङ्क्रान्तिविशेषे ॥ यथा । षडशीतिर्भवेत् आपन्नयुक्कन्याझषेषु चेति ॥ षडधिकाऽशीतिसङ्ख्यायाम् ॥

षडशीतिचक्रम् । न॰ मिथुनकन्याधनुर्मीनराशिस्थरवेः शुभाऽशुभफलज्ञानार्थं नरचक्राङ्कनराकारचक्रे ॥ यथा । मुखे वैकं करे वेदाः पादयुग्मे द्वयं द्वयम् । क्रोडे चाष्टतथा वेदाः करे सव्येतरेपि च । द्वयं द्वयं तथा नेत्रे मस्तके त्रितयं तथा । द्वयं द्वे च तथा गुह्ये षडशीत्यां स्थिते ॥ मुखे दुःखं करे लाभः पादयोर्भ्रमणं हरि । कान्तालाभस्तनं वा नेत्रे स्ते स्यात् तृतीयमे नृणाम् ॥ सम्मानं नेत्रयोश्चैव अपमानश्च मस्तके । गुह्ये चैव भवेन्मृत्युः षडशीतिफलश्रुतिरिति ॥

षडष्टकम् । न॰ षट्काष्टयोगे ॥ स तु वरकन्ययोः स्वस्वराश्यपेक्षया परस्परषष्ठाष्टमराशिसम्बन्धः । स च मित्रारिभेदेन द्विविधः । तत्र मित्रषडष्टकं यथा मकरसमेतं मिथुनं । कन्याकलसौ मृगेन्द्रमीनौ च । वृषभतुले च अलिमेषौ कर्कटधनुषौ च मित्रविधौ ॥ षडष्टकारिविशेषः ॥ अरिषडष्टकमाह । मकरः करिकुलरिपुणा कन्या मेषेण सह भाषस्तुलया । कर्किघटौ वृषधनुषौ वृश्चिकमिथुने च वैरिविधौ ॥ यदि कन्याष्टमे भर्त्ता भर्त्तुः षष्ठे च कन्यका । षडष्टकं विजानीयात् वर्ज्जितं त्रिदशैरपि ॥

षडाननः । पुं॰ कार्त्तिकेये । महासेने । स्कन्दे । गुहे ॥ कृत्तिकानामग्निपत्नीनां षण्णां स्तनपानार्थं षट् आननानि यस्य सः ॥

षडूषणम् । न॰ । मिलितकटुषट्कद्रव्ये ॥ यथा । पञ्चकोलं समरिचं षडूषणमुदाहृतम् । पञ्चकोलगुणं तत्तु रूक्षमुष्णं विषापहमिति भाव

प्रकाशः ॥

षड्गवा । स्त्री॰ षड्विधगवायाम् ॥ यथा । गवागवीगवादिलीगायत्रीचगदाधरः । गवागवासुरश्चैव षड्गवामुक्तिदायिकेतिवायुपुराणे गयापद्धतिः ॥

षड्गवम् । न॰ गोषट्कयुक्तहलादौ । यथा । अष्टागवंधर्महलंषड्गवंजीविकार्थिनाम् । चतुर्गवंनृशंसानांद्विगवंब्रह्मघातिनाम् ॥ षण्णांगवांसमाहारः । गोरतद्धितलुकीतिसमासान्तष्टच् ॥

षड्गुणरहितः । पुं॰ मधुरादिषड्गुणरहितेपरमात्मनि ॥

षड्गुणेशः । पुं॰ षडिन्द्रियनियन्तरि ॥

षड्ग्रन्थः । पुं॰ महाकरञ्जपादपे । षट्ग्रन्थयोयस्य । अच्प्रत्यन्ववपूर्वादित्यचाजितियोगविभागादच् ॥ षट्ग्रन्थायस्यवा ॥

षड्ग्रन्था । स्त्री॰ वचायाम् ॥ षट्ग्रन्थाः ग्रन्थयोयस्याः सा ॥ शव्याम् ॥ शुक्लवचायाम् ॥

षड्ग्रन्थिः । पुं॰ षट्पर्व्वणि ॥ स्त्री॰ वचायाम् ॥ न॰ पिप्पलीमूले ।

षड्ग्रन्थिका । स्त्री॰ शट्याम् । गन्धमूल्याम् । षट्बहवोग्रन्थयोयस्याः । स्वार्थेकन् ॥

षड्जः । पुं॰ तन्त्रीसमुत्थिते॰ कण्ठोत्थितेचस्वरविशेषे ॥ षड्भ्यः स्थानेभ्योजातः । पञ्चम्यामितिडः ॥ यथा । नासांकण्ठमुरस्तालुजिह्वांदन्तांश्चसंस्पृशन् । षड्भ्यः सञ्जायतेयस्मात्तस्मात्षड्जइतिस्मृतः ॥ मयूरस्वरतुल्यस्वरोयम् । यथा । षड्जंरौतिमयूरोहिगावोनर्दन्तिचर्षभम् । अजाविरौतिगान्धारंक्रौञ्चोनदतिमध्यमम् ॥ तानसेनमतेसप्तस्वराणांमध्येप्रथमस्वरोयम् ॥

षड्धा । अ॰ षट्प्रकारे ॥ सङ्ख्यायाविधार्थेधा ॥

षड्विधः । त्रि॰ षट्प्रकारे ॥ षट्विधाः प्रकारायस्य ॥

षड्भावविरहितः । त्रि॰ अस्तीत्यादिशरीरधर्मरहितेपरमात्मनि । अस्तीत्यादयोयथा । अस्तिजायतेवर्द्धतेविपरिणमतेअपक्षीयतेविनश्यतीति ॥

षड्भुजः । त्रि॰ षड्हस्तयुक्ते ॥

षड्भुजा । स्त्री॰ चण्डिकायाम् ॥ रुद्रचण्डायाम् ॥ चण्डवत्याम् ॥ न॰ षड्रेखाभिर्युक्तफललताविशेषे । मधुफलायाम् । हस्तकर्क्याम् । तिक्तफलायाम् । खरबूजा॰ इ॰ भा॰ प्र॰ ॥ अस्याः फलगुणायथा । तिक्तंबाल्येतदनुमधुरंकिञ्चि

दम्लद्रवपाकेनिष्पक्वचेत्तदम्लतसमंतप्पर्णं शुष्टिदापि । दृष्यं दाहश्रमविभ्रमनं मधुद्धिं विधत्ते पित्तोन्मादापहरं कफदं षड्भुजंबीजं कारीतिराजनिघण्टः ॥

षड्रसः । पुं॰ मधुरादिषट्प्रकाररसे ॥ यथा । मधुरो लवणस्तिक्तः कषायोऽम्लः कटुस्तथा । सप्तेतिरसनीयत्वाद्रसाख्या षडमी रसाः ॥ एषां नामलक्षणं यथा । मधुरं गौल्यमित्याहुरिक्ष्वादौ स च लक्ष्यते । लवणस्तु पटुः प्रोक्तः सैन्धवादौ स दृश्यते ॥ तिक्तस्तु पिचुमर्दादौ व्यक्तमास्वाद्यते रसः । कषायस्तु वरस्तुक्तः सपपूगीफलादिषु ॥ कटुस्तु क्षारसंज्ञः ग्राम्यमरिचादौ स चेष्यते । इति राजनिघण्टः ॥

षड्रात्रम् । न॰ षडहे ॥

षड्रेखा । स्त्री॰ षड्भुजायाम् ॥ खर्जूरे ॥

षड्लवणम् । न॰ सपत्नलवणमृत्त्वातलवणे । मृत्त्वोपेतेपत्नलवणे ॥

षड्वक्त्रः । पुं॰ कार्त्तिकेये ॥

षड्वर्गः । पुं॰ लग्नहोरादिषु ॥ यथा । त्रिंशद्भागात्मकं लग्नं होरा तस्यार्द्धमुच्यते । लग्नत्रिभागो द्रेक्काणो नवभागो नवांशकः ॥ द्वादशांशो द्वादशांशस्त्रिंशांशस्त्रिंशदंशकाः । षड्वर्गाः कथिताश्चैतेषांक्रममुदीरितम् ॥ षष्ठांवर्गः ॥ षडिन्द्रियसुखे ॥

षड्वर्षः । त्रि॰ षड्वर्षविभूते॰ बालके ॥ तद्धितार्थेतिसमासः । चित्तवतिनित्यमितिखठञोस्तद्धितयोर्लुक् ॥

षड्वाद : । पुं॰ भ्रमरे ॥

षड्विन्दुः । पुं॰ हरौ । विष्णौ ॥ कीटविशेषे ॥ शिरोरोगापहे॰ पक्वतैलविशेषे ॥ यथा । एरण्डमूलं तगरं शताह्वा जीवन्तिका सैन्धवरास्निकेच । भृङ्गं विडङ्गं मधुयष्टिका च विश्वौषधं कृष्णतिलस्य तैलम् ॥ अजापयस्तैलविमिश्रितश्च चतुर्गुणे भृङ्गरसे विपक्वम् । षड्विन्दवो नासिकयोः प्रदेयाः सर्वान्निहन्युः शिरसो विकारान् ॥ च्युतांश्च केशान्पलितांश्च दन्तान्निर्बध्यमूलान्सुदृढीकरोति । सुपर्णगृध्रप्रतिमश्च चक्षुः कुर्वन्तिबाह्वोरधिकं बलञ्च । जीवन्तिका च हरीतकी शाकविशेषः । इति भावप्रकाशः ॥

षड्विन्ध्या । स्त्री॰ तैलिन्याम् ॥

षण्डः । पुं॰ गोपतौ । वृषभे ॥ समूहे ॥ पुं॰ न॰ कदम्बे । वृक्षादिकदम्बे । पद्मकुमुदादिसङ्घाते ॥ सनोति । षणुदाने । अमन्ताड्डः । बाहुलकात्सत्वाभावः ॥

षण्डाली । स्त्री• सरश्याम् । कामुक
स्त्रियाम् । तैलमाने । छटांक•
इ० भा• प्र• । इतिहेमचन्द्रोमेदि
निकारश्च ॥

षण्ढः । पुं• षण्ढशब्दार्थे । शाम्यति
स्त्रियाभावात् । शमउपशमे । शमे
ढः । बाहुलकात्षः । यद्वा । स
नति । षमष्टमवैकल्ये । अनिदितां
दिनाषमेर्ढः । बाहुलकात्सत्वाभा
वः ॥ षण्ढदर्शनेसूर्यदर्शनम् • स्प
र्शनम् • स्पर्शेतुस्नानंसूर्यावलो
कनञ्चप्रायश्चित्तम् ॥

षण्मुखः । पुं• कार्त्तिकेये । स्कन्दे
। षट्मुखान्यस्य ॥

षण्मुखा । स्त्री• षट्भुजायाम् । ख
रबूजा• इ• भा• ।

षट् । त्रि• सङ्ख्यान्तरे । छ छे•
इ• भा• । सङ्ख्येये ।

षष्टिः । स्त्री• सङ्ख्यान्तरे साठ• इ०
भा• । सङ्ख्येये । षट्दशतः प
रिमाणमस्य । प्रकृतेः षष्भावश्चि
प्रत्ययोऽपदत्वञ्च• पङ्क्तिविंशतित्रिं
शत्चत्वारिंशत्पञ्चाशत्षष्टीतिनि
पातनात् ॥

षष्टिकः । पुं• न• ग्रीष्मजे• धान्यवि
शेषे । साठी• इ• भा• प्र० । षष्टि
काद्विधान्यविशेषाः षष्टिकाः ष
ष्टिरात्रेणपच्यन्तइतितृतीयान्तात्क
न्• रात्रशब्दलोपश्चनिपात्यते । धा
न्यविशेषएवायंसाधुर्नमुद्गेषु• ते
षिषष्टिरात्रेणपच्यन्ते ॥ षष्टिकस्य
गुणाश्चयथा । गर्भस्थाएवयेपाकंया
न्तितेषष्टिकामताः ॥ षष्टिकः श
तपुष्पश्चप्रमोदकमुकुन्दकौ । महा
षष्टिकइत्याद्याः षष्टिकाः समुदा
हृताः ॥ एतेपिव्रीहयः प्रोक्ताव्री
हिलक्षणदर्शनात् ॥ षष्टिकामधुराः
शीतालघवोबद्धवर्चसः । वातपि
त्तप्रशमनाः शालीनांसदृशागुणाः
। ततः साठीगुणाः षष्टिकायाम्
॥ अपिच । गौरोसितः षष्टिकोऽ
यंद्विधाद्यादृतोऽपव्यः शीतलोदो
षहारी । बल्यः पथ्योदीपनोवी
र्यवृद्धिर्दृष्टस्तस्मात्किञ्चिदूनोद्वि-
तीयः ॥

षष्टिका । स्त्री• साठीतिप्रसिद्धधा
न्ये । अस्याः गुणाः । षष्टिका
प्रवरातेषांलघ्वीस्निग्धात्रिदोषजित्
। स्वाद्वीमृद्वीग्राहिणीचबलदाज्वर
हारिणीति ॥ रक्तशालिगुणैस्तु
ल्याततःस्वल्पगुणाःपरे ॥ ते
षांषष्टिकशतपुष्पादीनाम् । परे•
षष्टिकाशतपुष्पादयः ॥ शरदिषष्टि
काभिः पावयन्तिल्यमितिवाचस्प
तिमिश्रः ।

षष्टिक्यम् । न• षष्टिकधान्योत्पत्त्युचि
तभूमौ ॥ षष्टिकानांभवनंक्षेत्रम्
। यवयवकषष्टिकाद्यदितियत् ॥

षष्टिज: । पुं॰ षष्टिकधान्ये ॥
षष्टितम: । त्रि॰ षष्टे: पूरणे ॥
षष्टिदुर्गा । स्त्री॰ स्कन्दभार्यायाम् ॥ तिथिभेदे ॥
षष्टिधा । अ॰ षष्टिप्रकारे ॥
षष्टिमत्त: । पुं॰ गजे ॥ षष्टिवर्षपर्यन्तं य: पूर्णाद्धिस्थित्या॰षष्टिमत्तो हस्तीतिसारस्वताभिधानम् ॥
षष्टिलता । स्त्री॰ भ्रमरमार्याम् ॥
षष्टिहायन: । पुं॰ गजे । हस्तिनि ॥ धान्यविशेषे ॥ त्रि॰ षष्टिसङ्ख्यकवत्सरवयोयुक्ते ॥
षष्ठ: । त्रि॰ षण्णांपूरणे ॥ तस्यपूरणे डट् । षट्कतिकतिपयचतुरां थुक् ॥
षष्ठान्नकालिक: । त्रि॰ तृतीयदिनभोजिनि ॥ न॰ द्विविदिनानन्तरभुक्ते ॥ यथा । द्व्यन्तरेत्यन्तरेभुक्तमाहु: षष्ठान्नकालिकम् ॥
षष्ठिका । स्त्री॰ षष्ठ्याम् ॥
षष्ठी । स्त्री॰ कात्यायन्याम् । गौर्याम् ॥ मातृकाविशेषे ॥ साचप्रकृते: षष्ठीकला॰स्कन्दभार्याच ॥ यथा । प्रकृतेरतिसम्बन्धे॰प्रधानांशस्वरूपया देवसेनाचनारद । मातृकासुपूज्यतमासाषष्ठीचप्रकीर्त्तिता ॥ पुत्रपौत्रादिदात्रीचधात्रीचिजगतांसती । षष्ठांशरूपाप्रकृतेस्तेनषष्ठीप्रकीर्त्तितेतिश्रीदेवीभागवतम् ॥ तिथिविशेषे । गुहतिथौ ॥ षण्णांपूरण्याम् । ङस् ॰ ओस् ॰ आम् ॰ इतिविभक्तौ ॥ अस्याश्चसम्बन्धोर्थ: स्वराजपुरुषोपगवादिशब्दानांप्रवृत्तौनिमित्तम् गोमान् धनवानित्यादीनांचप्रवृत्तिनिमित्तम्॰ अपत्यापत्यवत्सम्बन्धादे: शब्दप्रवृत्तिनिमित्तत्वात् ॥ एतत्प्रत्ययान्तघटित्वात ङीष् ॥षष्ठ्यान्तिथावुत्पन्नस्यफलं यथा । विद्वान् वरिष्ठश्चतुर: सुकीर्त्ति: प्रलम्बबाहुर्न्नक्षीणगात्र: । सत्यप्रतिष्ठोधनपुत्रयुक्त: षष्ठीप्रसूतोमनुजश्चिरायुरिति ॥
षष्ठीदण्डकपाठ: । पुं॰ । ग्रन्थविशेषे ॥ यत्रैकशतं षष्ठ्यर्थाउक्ता: ॥
षाट्कौशिक: । पुं॰ स्थूलदेहे ॥ यथा । मज्जास्थिस्नायव: शुक्राद्रक्तात्त्वङ्मांसशोणितम् । इतिषाट्कौशिकोनामदेहोभवतिदेहिनाम् ॥
षाडव: । पुं॰ गाने । रागस्यजातिविशेषे । सचषट्स्वरमिलितरागरागिण्यौ । यथा । औडव: पञ्चभि: प्रोक्त: स्वरै: षड्भिस्तुषाडव: । सम्पूर्ण: सप्तभिर्ज्ञेय एवंरागस्त्रिधामत: ॥ रसविशेषे ॥ सचरसविशेषउक्त: सूदशास्त्रे । यथा । सितामध्वादिमधुरोद्राक्षादाडिमजोरस: । विरलश्चेत्कृतोरा

ग: सान्द्रश्चेत् षाडवः स्मृतः ॥ इति ॥ अपिच । षाडवामधुराम्लादिरससंयोगपाचिता इति । गुडाम्बुप्रभृतयः षाडवा इत्यर्थः ॥

षाड्गुण्यिक । पुं॰ इन्द्रियषड्वर्गविषये ।

षाड्गुण्यम् । न॰ राज्ञां राज्यकरणोपायेषु षट्सु ॥ यथा । सन्धानासनम् ॰ सन्धिं कृत्वाऽवस्थानम् १ यात्रासन्धानम् २ । विग्रह्यासनम् ॰ वैरं कृत्वाऽवस्थानम् । ३ । यात्रां सम्परिगृह्यासनम् ॰ शत्रोर्भयप्रदर्शनार्थं यानं प्रदर्श्य स्वस्थानेऽवस्थानम् ४ द्वैधीभावः ॰ उभयत्र सन्धीकरणम् ५ । अन्येषां संश्रयः ॰ दुर्गादिसंश्रा राजस्य वा आश्रयः ६ इति महाभारते राजधर्मः ॥ सन्धिर्नाविग्रहो यानमासनं द्वैधमाश्रय इत्यमरः ॥ षड्गुणा एव । चतुर्वर्णादित्वात् स्वार्थे ष्यञ् ॥

षाण्मातुरः । पुं॰ शक्तिधरे । कार्त्तिकेये ॥ षण्णां मातॄणामपत्यम् । मातुरुत्संख्यासम्भद्रपूर्वाया इत्यणि ॰ उत्वं रपरत्वञ्च ॥

षाष्ठः । त्रि॰ षष्ठे ॥

षिड्ग । पुं॰ कामकेलौ । कामुके । नागरे । विटे । लुच्चा॰ इ॰ भा॰ ॥ सेटति॰ षिव्यतेवा । षिटचनादरे । बाहुलकाद्गन्॰ सत्वाभावश्च ॥

षु: । पुं॰ गर्भविमोचने ॥

षोडन् । त्रि॰ षड्दन्तयुक्ते ॥ षट्दन्ता अस्य । वयसि दन्तस्येति दत्रादेशः । ततः षषउत्वं दतदशधासूत्तरपदादेष्टुत्वञ्च॰ धासुवेतिवाच्यम् ॥

षोडशः । त्रि॰ षोडशानाम्पूरणे । तस्य पूरणे डट् ॥

षोडश । पुं॰ नित्यं बहुवचनान्तः । एकाधिकपञ्चदशसंख्यायाम् ॥ गर्भाधानादिसंस्कारेषु ॥ तद्यथा । गर्भाधानं पुंसवनं सीमन्तोन्नयनं तथा । जातकर्माभिधानञ्च निष्क्रमः प्राशनन्ततः ॥ चूडोपनयनं वेदव्रतानाञ्च चतुष्टयम् ॥ गोदानं मेखलान्तो विवाहः षोडश क्रमात् ॥ षट्च दश च षडधिका दश वा । षषउत्वं दतदशधासूत्तरपदादेष्टुत्वञ्च॰ धासुवेतिवाच्यम् ॥ त्रि॰ संख्येये ॥

षोडशक: । पुं॰ षोडशसंख्यापरिमितगणविशेषे ॥ यथा । षोडशकस्तु विकार इति । पञ्चभूतानि॰ एकादशेन्द्रियाणि चेत्येतानि विकारपदवाच्यानि ॥

षोडशकला: । स्त्री॰ चन्द्रमण्डलस्य षड्धिकदशभागेषु ॥ यथा । अमृता मानदा पूषा तुष्टिः पुष्टी रतिर्धृतिः । शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा ॥ पूर्णापूर्णामृता कामदायिन्यः शशिनः

कला : ॥

षोडशदानम् । न॰ आद्यादिषोडश प्रकारदेयद्रव्ये ॥ तत्क्रममाहु: सा म्प्रदायिका : । भूम्यासनंजलंवस्त्रं प्रदीपोन्नंतत : परम् । ताम्बूल च्छत्रगन्धाश्चमाल्यंफलमत : परम् ॥ शय्याचपादुकागाव : काञ्चनंर जतन्तथा । दानमेतत्षोडशकं प्रे तमुद्दिश्यदीयते ॥ तत्षोडशषोड शकैरेकोदानसागरोभवति ॥

षोडशभुजा । स्त्री॰ षोडशहस्तयुक्ता यांदुर्गायां ॥

षोडशमातृका : । स्त्री॰ गौर्यादिषु ॥ यथा । गौरीपद्माशचीमेधासावित्री विजयाजया । देवसेनास्वधास्वाहा:न्ति: पुष्टिर्धृति : क्षमा ॥ आत्मनोदेव ताचेवतथैवकुलदेवता ॥

षोडशर्त्विक्क्रतु : । पुं॰ षोडशर्त्वि क्साध्ये॰ ज्योतिष्टोमयागे॰ द्वाद शाहसाध्यसत्रयागेच ॥ तच्चर्त्वि जांनामानियथा । ब्रह्मा १ ब्राह्म णाच्छंसी २ आग्नीध्र : ३ पोता ४ एतेसार्ववेदोया: ॥ होता ५ मै त्रावरुण : ६ अच्छावाक : ७ ग्राव स्तोता ८ एतेऋग्वेदिन : ॥ अध्व र्यु : ९ प्रतिप्रस्थाता १० नेष्टा ११ उन्नेता १२ एतेयाजुषा : ॥ उद्गा ता १३ प्रस्तोता १४ प्रतिहर्त्ता १५ सुब्रह्मण्य : १६ एतेसामगा : ॥ ज्योतिष्टोमेद्वादशशतगोदक्षिणावि भाग : षोडशर्त्विजाम् । तद्विक्र तीभूतेसत्राख्येद्वादशाहसाध्ये॰ शतेनार्द्धिनोद्दीक्षयन्तोत्यादिदर्शने नर्निर्णीयते । तत्रविभागमनुरप्या ह । सर्वेषामर्द्धिनोमुख्यास्तदर्धे नार्द्धिनोऽपरे । तृतीयिनस्तृतीयांशा श्चतुर्थांशैकपादिन: ॥ दक्षिणागो शतविभागायश्रौतकात्यायनोपि । चयद्वाद्शद्वादशआद्येभ्य : षट्ष ट्द्वितीयेभ्यश्चतस्रश्चतस्रस्तृतीयेभ्य स्तिस्रस्तिस्रइतरेभ्य : । इत्यषोड षर्त्विजांचतुरश्चतुर: कृत्वाचत्वा रोवर्गाइतिमलमासतत्त्वम् ॥

षोडशांशु : । पुं॰ शुक्रग्रहे ॥ षोडश अंशवोऽस्य ॥

षोडशाङ्ग : । पुं॰ धूपविशेषे ॥ यथा । गुग्गुलुंसरलंदारुपत्रंमलयसम्भ वम् । ह्रीवेरमगुरुंकुष्ठंगुडंसर्जरस ङ्घनम् ॥ हरीतकींनखीलाक्षांज टामांसोश्चशैलजम् । षोडशाङ्गंवि दुर्धूपंदैवेपित्र्येचकर्म्मणि ॥ त्रि॰ षोडशावयववति ॥

षोडशाङ्घ्रि : । पुं॰ कर्कटे ॥

षोडशारम् । न॰ षोडशदलपद्मे ॥

षोडशार्चि : । पुं॰ शुक्रग्रहे ॥

षोडशावर्त्त : । पुं॰ शङ्खे ॥

षोडशिकाम्रम् । न॰ पलपरिमाणे ॥

षोडशी । पुं॰ यज्ञपात्रविशेषे ॥ सतो

मकपाचविशेषे ॥ समयाध्युषिते सूर्ये षोडशिनः स्तोत्रमुपाकरोति ॥

षोडशी । स्त्री॰ दशमहाविद्यान्तर्गत महाविद्याविशेषे ॥ यथा । काली तारामहाविद्याषोडशीभुवनेश्वरी । भैरवीछिन्नमस्ताचविद्याधूमावती तथा ॥ बगलासिद्धविद्याचमातङ्गी कमलात्मिका । एतादशमहाविद्याः सिद्धविद्याः प्रकीर्त्तिताः ॥ ऊनविंशतिपिण्डदानक्रियायाम् ॥ षोडशानांपूरणी । डट् । ङीप् ॥

षोढा । अ॰ षड्धा । षट्प्रकारे ॥ षोढाषट्धावाःकृत । सङ्ख्यायाविधार्थेधा । षषउत्वंदतृदशधासूत्तरपदादेष्टुत्वञ्च॰धासुवेतिवाच्यम् ॥

ष्ठीवनम् ।) न॰ फूत्कृत्यश्लेष्मणः
ष्ठेवनम् ।)

प्रक्षेपे ॥ ष्ठिवुनिरसने । ल्युट् । ष्ठिवुसिव्वोर्ल्युटिदीर्घोवेतिस्वामी ॥

ष्ठ्यूतम् । त्रि॰ ष्ठीवने ॥ ष्ठिवु॰ । कर्मणिक्तः । क्तोरित्यूठ् ॥ *

सकारादिशब्दप्रारम्भः

सः । पुं॰ सकारे । ईश्वरे । सर्पे । पक्षिणि । विष्णौ । सगणे॰ । ऽपुं॰ ॥

संयः । पुं॰ कङ्काले ॥ इ॰ श॰ च॰ का ॥

संयत् । पुं॰ स्त्री॰ युद्धे । चाद्येधर्मे । समितौ ॥ संयतनम्॰ संयमनंवा । यतीप्रयत्ने॰ यमउपरमेवा । स

म्पदादित्वात्क्विप् । गमादीनामिति मलोपः । तुक् ॥

संयतः । त्रि॰ बद्धे ॥ संयम्यतेस्म । यम॰ । क्तः ॥ कृतसंयमे ॥

संयतेन्द्रियः । त्रि॰ वशीकृतेन्द्रिये ॥ संयतानिविषयेभ्योनिवर्त्तितानि॰ इन्द्रियाणियेनसः ॥

संयत्तः । त्रि॰ उद्युक्ते ॥

संयद्वरः । पुं॰ नृपे । संयच्छति । यम॰ । क्त्वरप्छत्वरेतिष्वरच् । निपातनान्मस्यदः ॥

संयन्ता । त्रि॰ संयमनकर्त्तरि । नियन्तरि ॥ संयच्छति । यम॰ । सम्पूर्वः । तृच् ॥

संयमः । पुं॰ व्रताद्यङ्गपूर्वदिनकर्त्तव्याचारे । नियामे । नियमे । यामे । यमे । संयामे । संयमने ॥ धारणाध्यानंसमाधिरितित्रयमेकविषयं॰ संयमशब्देनोच्यते । त्रयमेकत्र संयमइतिपतञ्जलिः ॥ सर्ववर्णानुष्ठेयः सकलपुरुषार्थोपयुक्तोयंसंयमः । तथाचमनुः । इन्द्रियाणांविचरतांविषयेष्वपहारिषु । संयमेयत्नमातिष्ठेद्विद्वान्यन्तेववाजिनामिति ॥ विद्वान्॰ विषयेषुवर्त्तमानानामिन्द्रियाणांहर्यित्वादिदोषान्जानन्नित्यर्थः ॥ धर्माधर्मफलदानेनानुग्रहेनिग्रहेच ॥ संयमनम् । यमः समुपनिविषुचेतिपक्षेऽप्

॥ संयते ॥

संयमक : । त्रि० नियन्तरि ॥ संयमिनि ॥

संयमन : । पुं० यमलोके ॥ न० बन्धने ॥ व्रते ॥

संयमनी । स्त्री० यमस्य पुर्य्याम् ॥ यथा काशीखण्डे गन्धर्वसंस्थितायाम् ॥ मृत्योः संयमनी तुङ्गलोहप्राकारमण्डला । कालपाशपितृव्याधिप्रेतमारीभिरावृता ॥ कालपाशादिजुष्टा० ऽत्युच्चतायसप्राकारसमूहा० संयमनी नामदक्षिणस्यां याम्यपुरीत्यर्थ : ॥

संयमित : । त्रि० जातसंयमे ॥ तारकादित्वादितच् ॥ यमिते ॥

संयमी । पुं० मुनौ ॥ त्रि० संयमवति ॥ स्थितप्रज्ञे ॥ यानिशासर्वभूतानांतस्यांजागर्त्तिसंयमी ॥ संयमोऽस्यास्ति । इनि : ॥

संयाता । स्त्री० सम्भूयपातायाम् । पितेनद्दीपान्तरगमने ॥ समुद्रतानांगमने ॥

संयाम : । पुं० संयमे ॥ संयमनम् । यम : समुपनिविपुचेतिपक्षे घञ् ॥ संयते ॥

संयाव : । पुं० घृतक्षीरगुडगोधूमचूर्णसिद्धे भोज्यविशेषे ॥ यथा । संयावस्तु घृतक्षीरगुडगोधूमपाकजइति ॥ पिष्टकविशेषे । पेराक० पिराकी० इ० भा० प्र० । यथा । पर्य्यःसाज्यसमितानिर्मिताघृतभर्ज्जिता : । कुट्टिताश्चोलिता : शुभा : शर्कराभिर्विमर्द्दिता : ॥ तत्रचूर्णं क्षिपेदेलालवङ्गमरिचानिच । नारिकेरंसकर्पूरं चारबीजान्यनेकश : ॥ घृताक्तसमितापुष्टैटिकारचित : तत : । तस्यांतत्पूरणंन्यस्यकुर्य्यान्मुद्रांदृढांसुधी : ॥ सर्पिषिप्रचुरेतान्तुसुपचेन्निपुणोजन : । प्रकारस्तै : प्रकारैयंसंयावइतिकीर्त्तित : ॥ मठकेनसमोज्ञेय : संयावोपिगुणैर्जनै : ॥ लोके० गुंभाइतिप्रसिद्धोयम् ॥ संयूयतेमिश्रीक्रियतेगुडादिभि : । यु० । संनियुद्रुदुवइतिघञ् ॥

संयुक्त : । त्रि० संलग्ने । संयोगाश्रये ॥ सम्यग्युक्त : ॥

संयुक्तसमवाय : । पुं० सन्निकर्षे ॥ यथा० घटरूपप्रत्यक्षे संयुक्तसमवाय : सन्निकर्ष : । चक्षु : संयुक्ते घटे रूपस्य समवायात् ॥

संयुक्तसमवेतसमवाय : । पुं० सन्निकर्षविशेषे ॥ यथा० रूपत्वसामान्यप्रत्यक्षे० संयुक्तसमवेतसमवाय : सन्निकर्ष : । चक्षु : संयुक्तघटेरूपंसमवेतम्० तत्ररूपत्वस्यसमवायात् ॥

संयुग : । पुं० युद्धे । आयोधने । जन्योरणे ॥ संयोजनम् । युजिर्० । घञ् । रथदुर्गेतिनिर्देशाद्गुणा

भावः। प्रतिजनादिषुसंयुगशब्द पाठोऽस्ति॥

संयुक्। वि॰ गुणवति। सम्बन्धिनि॥ संयुज्यते। युज॰। क्विप्चेति क्विप्॥

संयुतः। वि॰। संयुक्ते। बद्धे॥

संयोगः। पुं॰ प्रश्लेषे। इमौसंयुक्ताविति व्यवहारहेतौ॰ नवद्रव्यवर्त्तिनि॥ मेलने। सम्बन्धे॥ सन्निकर्षभेदे॥ चक्षुषाघटप्रत्यक्षजननेसंयोगसन्निकर्षः॥ संबन्धमात्रे॥ संयुज्यतेनेन। युजिर्॰। घञ्॥ न्यायमतेसंयोगोगुणपदार्थः। स चाप्राप्तवस्तुद्वयस्यप्राप्तिरूपः सम्बन्धविशेषः। सत्रिविधोयथा। एककर्मजन्यः। यथापर्वतेपक्षिसंयोगः। १। उभयकर्मजन्यः। यथा मेषद्वयसंयोगः। २। संयोगजन्यसंयोगः। यथाकपालतरुसंयोगजन्यतरुकुम्भसंयोगः। ३। कर्मजन्यसंयोगोऽपिद्विविधः। अभिघातः॰ तस्माच्छब्दोजायते। १। नोदनः॰ तस्माच्छब्दोनजायते। २॥ अथप्रमाणम्। अप्राप्तयोस्तुयाप्राप्तिः सैवसंयोगईरितः। कीर्त्तितस्त्रिविधस्त्वेषआद्योन्यतरकर्मजः॥ तथोभयोः कर्मजन्योभवेत्संयोगजोऽपरः। आदिमः श्येनशैलादिसंयोगः परिकीर्त्तितः॥ मेषयोः सन्निपातोयः सद्वितीयउदाहृतः। कपालतरुसंयोगात् संयोगस्तरुकुम्भयोः॥ द्वितीयः स्यात्कर्मजोपिद्विधैवपरिकीर्त्तितः। अभिघातोनोदनञ्चशब्दहेतुरिहादिमः॥ शब्दाहेतुर्द्वितीयः स्यादिभागोपित्रिधाभवेदितिभाषापरिच्छेदः॥ उदयात्पूर्वदशम्याः शेषे॥ यथा। उदयात्प्राक्दशम्यास्तुशेषः संयोगइष्यते। उपरिष्टात्प्रवेशस्तुतस्मात्तांपरिवर्ज्जयेत्॥ सन्निधौ॥

संयोगपृथक्त्वम्। न॰ न्यायविशेषे॥ यथा। एकस्यकर्मणोनित्यत्वकाम्यत्वाभ्यांद्विरूप्याङ्गीकारे॰ नित्यानित्यसंयोगविरोधः। नेवम्॰ संयोगपृथक्त्वन्यायात्। सचन्यायश्चतुर्थाध्यायउक्तः। यथा। खादिरेपशुंबध्नाति॰ खादिरंवीर्यकामस्ययूपंकुर्वीतेतिश्रूयते। अत्रसंशयः। किंकाम्यस्यैवखादिरतानित्येपिस्यादुतनेति। तत्रफलार्थत्वेनानित्यतया॰ नित्यप्रयोगाङ्गतानयुक्ता। यत्तुनित्येपिखादिरत्वश्रवणं॰ तत्काम्यस्यैवपशुबन्धनाययूपाश्रयज्ञापनार्थमतोननित्येखादिरतेति प्राप्ते॰ राद्धान्तायचतुर्थाध्यायसूत्रम्। एकस्यतूभयत्वेसंयोगपृथक्त्वमिति। अत्रसंयोगः सम्बन्धमा

वम॰ पृथक्त्वंभेद : । एकस्यखा
दिरस्यक्रत्वर्थत्वपुरुषार्थत्वरूपोभया
त्मकत्वेवाक्यद्वयेनचक्रतुशेषत्वफल
शेषत्वलक्षणसंयोगभेदावगमान्नि
त्यानित्यसंयोगविरोध : । नचा
श्रयज्ञानार्थमित्यवाक्यं॰ सन्निधा
नादेवाश्रयलाभात् । चतउभयार्था
त्वादिरतीति ।एवंदध्नाजुहोति॰ द
ध्नेन्द्रियकामस्येत्यादावुभयार्थतेव
। दधित्वस्यद्वधाश्रवणादितिप्राय
श्चित्ततत्त्वम् ।

संयोगित: । त्रि॰ आत्तसंयोगे ॥ तार

संयोगी । त्रि॰ संयोगविसिष्टे ॥
कादित्वादितच् ॥

संयोजनम् । न॰ संयोगे ॥ रतिलक्षे । नि
धुवणे । मैथुने ॥ इ॰ हारावली ॥

संयोजित : । त्रि॰ पदार्थान्तरेणसंयु
क्तीकृतेपदार्थे । उपाहिते । मेलि
ते ॥ संयोज्यतेस्म युजिर्॰ । ण्य
न्त : । क्त : ॥

संरब्ध : । त्रि॰ संलग्ने । कुपिते ॥

संरम्भ : । पुं॰ आटोपे ॥ उत्साहे
॥ यथा । कार्यारम्भेषुसंरम्भःस्थे
यउत्साहउच्यते ॥ कोपे ; क्रोधे
॥ यथा । प्रणिपातप्रतीकार : सं
रम्भोहिमहात्मनाम् ॥ संरम्भणम् ।
रभराभस्ये । घञ् । रभेरश्वलुटो
रितिनुम् ॥

संरम्भी । त्रि॰ क्षुभिते । संरम्भयुक्ते ॥

संराद्धि : । स्त्री॰ निष्पत्तौ ॥

संराधनम् । न॰ समाध्यादौ । भ
क्तिध्यानप्रणिधानाद्यनुष्ठाने ॥ सं
राध्यतेऽनेन । राध ॰ । भावक
रणादौल्युट् ॥

संराव: । पुं॰ आरवे । आरावे । शब्दमा
त्रे ॥ संरवणम् । रुशब्दे । उप
सर्गेरुवइतिभावेघञ् ॥

संरावी । त्रि॰ प्रशस्तशब्दविशिष्टे ॥

संरुद्ध : । त्रि॰ प्रतिबद्धे ॥ घिरग
यावृतिख्याते ॥

संरूढ : । त्रि॰ प्रौढे ॥ अङ्कुरिते ॥
सम्पूर्वाद्रुहिगत्यर्थेतिक्त: । ढत्वधत्व
ष्टुत्वढलोपदीर्घा : ॥

संरोध : पुं॰ क्षेपे ॥ रोधे ॥ सं
रोधनम् । रुधिर् । घञ् ॥

संलग्न : । त्रि॰ संयुक्ते ॥ सम्य
क्लग्न : ॥

संलय: । पुं॰ निद्रायाम् । शयने ॥
सम्यक्लीयतेऽत्र । लीङ्श्लेषणे ।
एरच् ॥ प्रलये ॥

संलाप : । पुं॰ प्रीत्यामिथोभाषणे
। अन्योन्यप्रीतिभाषणे ॥ संल
पनम । लप॰ । घञ् ॥ आ
लापएकेनापिक्रियते॰संलापस्तुपर
स्परभाषणमेवेतिभेद : ॥ उक्तिप्र
त्युक्तिमद्वाक्यंसंलापइतिकीर्त्यते
॥ इत्युज्ज्वलनीलमणि : ॥

संव : । पुं॰ शम्बे । वज्रे । कुलि

शौ। संवयते। वय०। अच्। संवत्। अ० वर्षे। वत्सरे॥ संवयति। वयगतौ। क्विप्। यलोपः। तुक्॥

संवत्सरः। पुं० वत्सरे। अब्दे॥ सम्यग्वसन्त्यत्र्त्तवोमासादयश्च। वसनिवासे। संपूर्वाच्चिदिसरप्रत्ययः। तस्यार्द्धधातुकत्वादिसन्नत: संवत्सरपरिवत्सरेडावत्सरानुवत्सरोदावत्सरेषुप्रथमवत्सरे॥ ततश्च यदाशुक्लप्रतिपदिसङ्क्रान्तिर्भवति तदासौरचान्द्रयोर्मासयोर्युगपदुपक्रमोभवति सससंवत्सरः। ततः सौरमानेन वर्षेषड्दिनानिवर्द्धन्ते चान्द्रमानेन ह्रसन्तीतिद्वादशदिनव्यवधानादुभयोरयथाङ्गावोभवति। एवंपञ्चवर्षाणिगच्छन्ति। तन्मध्येद्वौमलमासौभवतः षष्ठः संवत्सरोभवति। तदेवचान्तरभेदेन संवत्सरादिपञ्चकंसमामनन्ति॥ एषामुद्धारस्तु। शकाब्दात्पञ्चभिः शेषात्समाद्यादिषुवत्सराः। सम्परीदानुपूर्वाश्चतथोदापूर्वकामताइति॥ कालात्मशास्त्रेतिविषणौ॥

संवत्सरमुखी। स्त्री० ज्येष्ठशुक्लदशम्याम्। दशहरायाम्॥ यथा। ज्यैष्ठस्यशुक्लदशमीसंवत्सरमुखीस्मृता। तस्यांस्नानंप्रकुर्वीतदानञ्चैवविशेषतः। इतिब्रह्मपुराणम्॥

संवत्सरा। स्त्री० दुर्गायाम्॥

संवद्। अ० वर्षे॥ संवदतिभावान्। वद० णिच्॥

संवदनम्। न० संवादे॥ समालोचे॥ वशीकृतौ॥

संवननम्। न० वशक्रियायाम्। वशीकरणे॥ सम्पूर्वाद्वनुयाचने वशीकरणार्थः। ल्युट्॥

संवरः। पुं० अनेकान्तवादिनांसप्तपदार्थान्तर्गतपदार्थविशेषे॥ यथा। इन्द्रियसंयमलब्धप्रतिष्ठंध्यानम् आस्रवनिरोधात्मकत्वात् संवृणोत्यास्रवमितिसंवरश्चतुर्थः। वृङ्वृञ्भ्यां ग्रहवृ० द्रित्यादिना कर्मण्यप्॥

संवरणम्। न० गोपने॥ सम्यक्वरणवेष्टनम्॥ आवरणे॥

संवर्गः। पुं० प्राणे॥ वायौ॥ संवर्जनादर्थात्सङ्ग्रहणात् सङ्ग्रसनाद्वाऽग्न्यादीनां वायुः संवर्गः। संवृङ्क्ते। वृजि०। घञ्। कुत्वम्॥

संवर्गविद्या। स्त्री० वायूपासनविद्यायाम्॥ संवर्गाख्यविद्या॥

संवर्त्तः। पुं० प्रलये॥ संवर्त्ततेजगदत्र। वृतु०। हलश्चेतिघञ्॥ मुनिविशेषे॥ श्रुत्यादिप्रसिद्धेपर

महंसेऽग्नेरवतारे ॥ अश्वद्रुमे । कर्षफले ॥ योगविशेषे ॥ यथा । सममीरविचारैरप्रतिपद्धवासरे । संवर्त्तसंज्ञको योगो गर्हितः शुभकर्मसु ॥ मेघाधिपविशेषे । संवर्त्तसवहूदकः ॥

संवर्त्तकः । पुं॰ कालाग्निरुद्रे ॥ बलदेवस्य लाङ्गले ॥ और्वे । वाडवाग्नौ ॥ त्रि॰ प्रवर्त्तके ॥ संवर्त्तयति । वृतु॰ ण्वुल् ॥

संवर्त्तकी । पुं॰ बलदेवे । अच्युताऽग्रजे ॥ द्र॰ त्रि॰ शेषः ॥

संवर्त्तवापी । स्त्री॰ तीर्थविशेषे ॥

संवर्त्तिः । स्त्री॰ पद्मादिनवपत्रे । संवर्त्तिकायाम् ॥ संवर्त्तते । वृतु॰ । इपिषिरुहिवर्त्तिविदिच्छिदिकीर्त्तिभ्यश्चेतीन् ॥

संवर्त्तिका । स्त्री॰ पद्मादीनां नवदले ॥ पद्मस्य केसरसमीपस्थदले ॥ संवर्त्तिरेव । स्वार्थे कन् ॥ गुणास्तु । संवर्त्तिका हिमा तिक्ता कषाया दाहतट्प्रणुत् । मूत्रकृच्छ्रगुदव्याधिरक्तपित्तविनाशिनी ॥

संवर्द्धकः । पुं॰ संवर्द्धनकारिणि ॥

संवर्द्धनम् । न॰ सम्यग्वृद्धौ । संवर्द्धते तच्छीलः । वृधु वृद्धौ । अनुदात्तश्चेति युच् ॥ संदीपने ॥

संवर्द्धितः । त्रि॰ पुष्टे । सम्यग्वृद्धिविशिष्टे ॥

संवलनम् । न॰ मिश्रणे ॥

संवलितः । त्रि॰ मिलिते । मिश्रिते । एकत्रीकृते ॥

संवसथः । पुं॰ ग्रामे ॥ संवसन्त्यत्र । वस॰ । उपसर्गे वसइत्यथच् ॥

संवहः । पुं॰ सप्तवाय्वन्तर्गतप्रशस्तवायौ ॥ सतद्वहवायोरुपरिष्ठ इति सिद्धान्तशिरोमणिः ॥ वायोश्चतुर्थस्कन्धे ॥ यथा । धवन्तो नयउग्रभीमः च पञ्चसाह्वयः । अभियुग्नाथवाभेयश्चतुर्थः संवहोगणः ॥ ४ ॥

संवाटिका । स्त्री॰ शृङ्गाटके ॥

संवाता । पुं॰ संवहतरि ॥ वातेर्गत्यर्थात्कृत्प्रत्ययः ॥

संवादः । पुं॰ परस्परवचनाविरोधे ॥ वाचिके । सन्देशवाक्ये । समाचारे ॥ संवदनम् । वद॰ । घञ् ॥

संवादिनी । स्त्री॰ सदृश्याम् ॥ यथा । षड्जसंवादिनीतिरघुः ॥

संवार्य्यः । त्रि॰ संवरणीये ॥

संवासः । पुं॰ गृहे ॥ पुरवासिनां विहारार्थं पुरमध्ये वहिर्वाऽनावृतस्थाने । सन्निवेशे । निकर्षणे ॥

संवाहकः । पुं॰ अङ्गविमर्द्दके ॥

संवाहनम् । न॰ भारादेर्वाहने ॥ अङ्गमर्द्दने । पादमर्द्दनादौ ॥ वह

प्रापणे । स्वार्थे ण्यन्तात् ल्युट् । बाहनमाहितादिति निपातनाद्दीर्घं इत्येके ॥

संवाहित : । त्रि० सञ्चारिते ॥

संविग्न : । त्रि० उद्विग्ने । सम्भ्रान्ते ॥ ओविजीभयचलनयो : संपूर्व : । क्त : । ओदितश्चेति न : । श्वीदितइतिनेट् ॥

संवित्ति : । स्त्री० प्रतिपत्तौ ॥ जनापवादे ॥ विद्ज्ञाने । स्त्रियां क्तिन् ॥

संवित् । द० स्त्री० ज्ञाने । सम्भाषायाम् ॥ क्रियाकारे । आजौ । सङ्ग्रामे । नाम्नि ॥ अङ्गीकारे ॥ प्रतिज्ञायाम् ॥ आचारे । तोषणे ॥ संयमे ॥ संकेते । यथा । प्रवृत्तौ च निवृत्तौ च संविद : स्थापयेद्द्वयोरिति । कृतव्यवस्थायाम् ॥ यथा । संविदश्च व्यतिक्रमइति ॥ मनीषायाम् ॥ संवेदनम् । संविद्यतेऽनयावा । विद्ज्ञाने । विद चेतनादौ वा । सम्पदादित्वात् क्विप् ॥

संविदित : । त्रि० अङ्गीकृते । ऊरीकृते । संविद्यतेस्म । विद्ज्ञाने । क्त : ॥

संविधा । स्त्री० भोग्यवस्तुनि । सामग्र्याम् ॥ संविधीयतेऽनया । संविपूर्वात् धाञः आतश्चोपसर्ग इ-ति क : ॥

संविधानम् । न० उत्पादने ॥

संविभाग : । पुं० विभज्यप्रतिपादने ॥

संविद्यतीर्थम् । न० तीर्थविशेषे ॥

संविषा । स्त्री० अतिविषायां ॥

संवीक्षणम् । न० अन्वेषणे । अपहृतवस्तुनस्तात्पर्येणान्वेषणे । सम्यक्तात्पर्येणविविधप्रकारैरीक्षणम् ॥

संवीत : । त्रि० रुद्धे । आवृते । वस्त्रादिनावेष्टिते ॥ संवीयतेस्म । व्येञ् संवरणे । क्त : ॥

संवीताङ्ग : । त्रि० आच्छादितदेहे ॥

संवृत : । त्रि० सङ्कुचिते । यथा । नासंवृतमुख : कुर्याद्धास्यं जृम्भां तथा क्षुतमिति । निगूढे । गुप्ते । संवेष्टिते । सम्पूर्वात् वृञः क्त : ॥

संवृति : । स्त्री० वागिन्द्रियप्रयुक्ते व्यवहारे ॥ गोपने ॥ संवरणम् । वृञ् । क्तिन् ॥

संवृत्त : । त्रि० सञ्जाते । सम्यक्प्रवृत्ते ॥ सम्पूर्वात् वृतेः क्त : ॥ पुं० वरुणे ॥

संवृत्ति : । स्त्री० संवरणे ॥ अविद्याविषये लौकिके व्यवहारे । लौकिक्यां बुद्धौ ॥ अविद्यायाम् ॥ संव्रियते आच्छाद्यते तत्त्वं यया । विभ्रमे ॥ संवर्त्तनम् । वृतु०

क्षिन् ॥

संवेग : । पुं॰ सम्भ्रमे । हर्षादिना कर्मसु त्वरणे ॥ अद्भुतपरस्त्रकादि दर्शनात्सत्वरतायाम् ॥ संवेजनम् । ओविजी॰ घञ् । सम्यग्वेगे ॥

संवेद : । पुं॰ वेदने । अनुभवे ॥ विद्ज्ञाने । सम्पूर्व : । घञ् ॥

संवेदनम् । न॰ संवेदे ॥

संवेद्य : । त्रि॰ ज्ञेये ॥

संवेश : । पुं॰ स्वापे । निद्रायाम् ॥ स्त्रीरतिबन्धे ॥ पीठे ॥ संवेशनम् । विश॰ । घञ् ॥

संवेशनम् । न॰ मैथुने ॥ उपभोगस्थाने ॥

संव्यानम् । न॰ उत्तरीयवस्त्रे ॥ अंशुके : वस्त्रे ॥ संवीयतेऽनेन । व्येञ् संवरणे । ल्युट् ॥

संशप्तक : । पुं॰ समयात् सङ्ग्रामादनिवर्त्तिनि ॥ समयात्॰ कुलाचाराच्छपथाद्वा॰ सङ्ग्रामादनिवर्त्तिनोऽपराङ्मुखाअपलायमानायाक्रोशन्ति॰ ते संशप्तका : कथ्यन्ते ॥ नारायणस्यसेनाविशेषे ॥ शपनम् । शपथाक्रोशे । भाविक्त : । संशप्तं शपथं करोति । तत्करोतीति णिच् । ण्वुल्॰ कृत्वा ॥ सम्यक्॰ शप्तं सत्यं यस्ते तिवा ॥

संशम : । पुं॰ निरवशेषनाशे ॥ संशमनम् । शम॰ भावेघञ् ॥

संशमनम् । न॰ शमने । यथा । नशोधयतियद्दोषान्समान्नोदीरयत्यपि । समीकरोतिसंवृद्धांस्तत् संशमनमुच्यते ॥ नशोधयति॰ नोर्ध्वाधोमार्गाभ्यां पातयति । नोदीरयति॰ नवर्द्धयति ॥ इ॰भा॰प्र॰ ख : ॥

संशय: । पुं॰ सन्देहे । द्वापरे ॥ अस्यलक्षणं यथा । एकस्मिन्धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यज्ञानं॰ संशयइति । यथास्थाणुर्वापुरुषोवेति ॥ विचिकित्सायाम् ॥ योग : साधनीयोनवेत्युभयकोटिस्पृशिविज्ञाने ॥ अतद्रूपप्रतिष्ठत्वेन विपर्ययान्तर्गतोपिसन्नुभयकोटिस्पर्शित्वैककोटिस्पर्शित्वरूपावान्तरविशेषविवक्षयाचविपर्ययाद्भेदोबोद्धव्य : ॥ प्रतिबन्धके ॥ संशयंलक्षयतिगोतम : । समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यानुपलब्ध्यव्यवस्थातश्चविशेषापेक्षोविमर्श : संशय: । १ । २३ । संशयइतिलक्ष्यनिर्देश : विमर्शइत्यत्र विशब्दोविरोधार्थ : । मृशिर्ज्ञानार्थ : एकस्मिन्धर्मिणीतिपूरणीयम् । तेन॰एकधर्मिणिविरोधेन भावाभावप्रकारकंज्ञानम् संशय : । तच्चकारणमुखेनविशेषलक्षणान्या

ष० समानेत्यादि । उपपत्तिर्ज्ञानम् । तथाच० समानस्य विरुद्धकोटिद्वयसाधारणधर्मस्य ज्ञानादित्यर्थः । तथाच साधारणधर्मवद्धर्मिज्ञानजन्योऽसाधारणधर्मवद्धर्मिज्ञानजन्यश्चेत्यर्थः । विप्रतिपत्तिर्विरुद्धकोटिद्वयोपस्थापकः शब्दस्तस्मादित्यर्थः । यद्यपि शब्दस्य न संशायकत्वम् तथापि शब्दात् कोटिद्वयोपस्थितौ मानसः संशय इति वदन्ति उपलब्धेर्ज्ञानस्य अनुपलब्धेर्व्यतिरेकज्ञानस्य याऽव्यवस्था सद्विषयकत्वानिर्धारणं प्रामाण्यसंशय इति फलितोऽर्थः ॥ अन्येतु उपलब्ध्यव्यवस्था प्रामाण्यसंशयः । अनुपलब्धिरुपलब्धिभ्रमत्वम् तदव्यवस्था तत्संशय इत्याहुः । वस्तुतस्तु प्रामाण्यसंशयस्य न संशयहेतुत्वम् किन्तु गृहीताप्रामाण्यकज्ञानस्य विरोधितया सति प्रामाण्यसंशये तज्ज्ञानस्याविरोधितया साधारणधर्मदर्शनादित एव संशयोत्पत्तिरिति । उपलब्ध्येत्यादिकं तादृशस्थले संशयो भवतीत्येतावन्मात्रपरम् । चकारोऽव्याप्यसंशयस्य व्यापकसंशयहेतुत्वं समुच्चिनोतीति वदन्ति । विशेषापेक्ष कोटिस्मरणसापेक्ष । वस्तुतस्तु संशयधारावाहिकत्वं स्यादतआह । विशेषेति । विशिष्यं विशेषदर्शनम् अपेक्षते निश्चयकत्वेन । तथाच । विशेषदर्शननिवर्त्त्यत्वकथनम् खिन्नविशेषदर्शनजन्यसंशय इत्युक्तम् ॥ १।२३ । संशयनम् । शीङ् एरच् ॥

संशयात्मा । त्रि० इदमेवं भवति न वेति सर्वत्र संशयाक्रान्तचित्ते । संशये आत्मा मनो यस्य सः । संशयात्मा विनश्यति ।

संशयानः । त्रि० संशयापन्ने । संशययुक्ते ॥

संशयापन्नः । त्रि० संशयिनि ॥

संशयापन्नमानसः । त्रि० सन्देहके । संशयिते । सांशयिके ॥ संशयमापन्नं मानसं यस्य । यस्मिन् विषये वा ॥

संशयालुः । त्रि० संशयितरि ॥

संशयितः । त्रि० सन्देहविषये । विचिकित्सिते ॥

संशयिता । त्रि० सन्देहाश्रये । संशयकर्त्तरि । यथाहुः । अस्तिस्वयमित्यस्मिन्नर्थे कस्यास्ति संशयः पुंसः । अत्रापि संशयश्चेत् संशयिता यः स एव भवसि त्वम् ॥ ४ ॥

संशितः । त्रि० सम्यक्सम्पादिते ॥ संशितं व्रतम् । सम्यक् सम्पादितमित्यर्थः ॥ व्रतविषयकयत्नवति ॥ संशितो ब्राह्मणः । व्रतविषयकयत्नवानित्यर्थः ॥ सम्यक् शायते स्म

। शातनूकरणे । क्तः । शाच्छोरन्यतरस्यामित्यत्र० श्यतेरित्वम्० । व्रते नित्यमिति० नित्यमित्वम् व्यवस्थितविभाषात्वात्। व्रतविषयेश्यतेर्नित्यमित्वम् । सुनिश्चिते ॥ सम्यक्तनूकृते । सूक्ष्मे ॥

संशितव्रतः । त्रि० व्रतयत्ने ॥ सम्यक् शितानि तीक्ष्णीकृतानि० अतिदृढानि व्रतानि यस्य सतथा । श्यतेरित्वं व्रते नित्यम् ॥

संशुद्धः । त्रि० सम्यक् शुद्धिविशिष्टे ॥

संशुद्धिः । स्त्री० सम्मार्जने । शरीरादिमार्जने । शौचे ॥

संशुष्कः । त्रि० आतपादिना संशोषितवस्तुनि ॥

संशोकः । पुं० औष्म्ये ॥

संशोकजः । त्रि० स्वेदजे ॥ औष्म्याज्जायमाने यूकादौ ॥ तेषांस्वाण्डजेऽन्तर्भावः ॥ यद्वा । औष्म्याद्भूमिमुद्भिद्य जाते मशकादौ । तेषामुद्भिज्जेऽन्तर्भावः । तथा च संशोकजो नाण्डजोद्भिज्जाभ्यामतिरिच्यते ॥

संशोधनम् । न० संशुद्धौ ॥ स्थानाद्बहिर्नयेदूर्ध्वमधोवादोषसञ्चयम् । संशोधनं तदेवस्याद्देवदालीफलं यथा ॥

संशोधितः । त्रि० शुद्धीकृतवस्तुनि ॥

संश्चत् । न० कुहके । इन्द्रजाले । मायायाम् ॥ सञ्चिनोति । चिञ् चयने । संश्चत्तृपद्वेहदित्यतिः । निपातनात्० सुट्चकारलोपश्च ॥

संश्यानः । त्रि० शीतेन सङ्कुचिते ॥

संश्रयः । पुं० राज्ञामाश्रयाख्ये गुणे । अरिणापीड्यमानस्य बलवदाश्रयणे ॥ आख्यायाम् ॥ नवमेनन्दनोद्देशेनचैवरथसंश्रये० इतिरामायणे दृश्नाम् ॥ आश्रये ॥ बले ॥

संश्रवः । पुं० अङ्गीकृतौ । प्रतिज्ञाने ॥ सम्पूर्वाच्छृणोतेः० ऋदोरप् ॥

संश्रितः । त्रि० अनुजीविनि । आश्रिते ॥

संश्रुतः । त्रि० अङ्गीकृते ॥ संश्रूयते स्म । श्रु श्रवणे । क्तः ॥

संश्लिष्टः । त्रि० आश्लिष्टे । मिलिते ॥

संश्लेषः । पुं० उपगूहने ॥ संश्लेषणम् । श्लिष आलिङ्गने । घञ् ॥

संश्वत् । न० संश्चति । मायायाम् ॥ संश्चत्तृपद्वेहदित्यत्र० शुभंतिचन्द्रः सम्पूर्वाच्छ्यतेः संश्वदित्याह । संश्चत् कुहकेऽस्त्रियं संश्वत् तत्वे वतेसमे । इत्युणादिकोषश्च ॥

संसक्तः । त्रि० अन्योन्यश्लिष्टे । अव्यवहिते । संलग्ने ॥ संसज्यतेस्म । षञ्ज सङ्गे । क्तः ॥ लौहदारुमयैः पाशैर्दृढबद्धोविमुच्यते । स्त्रीधना

द्दिषुसंसक्तोमुच्यतेनकदाचन ॥

संसक्तिः । स्त्री॰ संश्लेषे ॥

संसत्॰द् । स्त्री॰ परिषदि । सभायाम् ॥ संसीदन्त्यस्याम् । षद्‌लृविशरणादौ । सम्पदादित्वात्क्विप् ॥

संसरणम् । न॰ असम्बाधचमूगतौ । रथादीनामसम्बाधगमने ॥ घण्टापथे । नगरस्योपनिर्गमे ॥ संसारे ॥ रणारम्भे ॥ समारम्भे ॥ प्राणिजन्मनि । पुनः पुनर्योनिसम्बन्धे ॥ गतौ । सम्यक्सरन्त्यनेन॰ सम्भूयसरन्त्यनेनाचवा । सृगतौ । करणादौल्युट् । बाहुलकाद्दाल्युट् । युवतुयुनः । घस्लुङपवादत्वात् ॥

संसर्गः । पुं॰ सङ्गे । सङ्गमे । समवायादिसम्बन्धे ॥ संसर्जनम्॰ संसृज्यतेवा । सृज॰ । घञ् ॥

संसर्गाभावः । पुं॰ सम्बन्धरहितत्वे ॥ न्यायमतेअभावपदार्थविशेषः । सतुभेदभिन्नाभावः । सचत्रिविधः । प्रागभावः १ ध्वंसः २ अत्यन्ताभावः ३ इतिभेदात् । यथा । अभावस्तुद्विधासंसर्गान्योन्याभावभेदतः । प्रागभावस्तथाध्वंसोप्यत्यन्ताभावएवच । एवंत्रैविध्यमापन्नः संसर्गाभावइष्यते । इ॰ भा॰ प॰ ॥ भेदत्वंतादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम् । विनाश्यभावत्वंप्रागभावत्वम् १ जन्याभावत्वम्ध्वंसत्वम् २ नित्यसंसर्गाभावत्वम्ध्वंसत्वम् २ नित्यसंसर्गाभावत्वमत्यन्ताभावत्वम् ३ । इतिसिद्धान्तमुक्तावली ॥

संसर्गी । त्रि॰ संसर्गविशिष्टे ॥ मत्वर्थीयइनिः ॥ सङ्गिनि ॥ सम्पूर्वात्सृजेः॰सम्पृचानुरुधेतिघिनुण् ॥

संसर्पः । पुं॰ मासविशेषे ॥ यथा । यदाचक्षमासोभवति॰ तदाक्षयमासस्यपूर्वोत्तरावधिमासौभवतः । तत्रपूर्वस्मिन्नधिमासे ॥ सचनमलमासः किन्तुशुद्धतुल्यः । उत्तरएवासंक्रान्तोमलमासः । तथाचज्योतिः । एकस्मिन्नपिवर्षेचेद्द्वौमासावधिमासकौ । पूर्वोमासः प्रशस्तःस्यादपरस्तुमलिम्लुचइति ॥ संसर्पणे ॥

संसर्पणम् । न॰ सम्यक्प्रकारेणगमने ॥

संसर्पी । त्रि॰ संसर्पविशिष्टे । सम्यग्गमनशीले ॥

संसारः । पुं॰ मृषाज्ञानसम्भूतवासनायाम् ॥ यथा । संसारवमिथ्याधीप्रभवावासनेति ॥ भवे । स्वादृष्टोपनिबद्धशरीरपरिग्रहे । जन्ममरणलक्षणे । प्रमातृताप्रमुखविकल्पात्मानर्थे ॥ अविद्यायाम् ॥ यथोक्तं शङ्कराचार्यैः । संसारः स्वप्रतुल्योहिरागद्वेषादिसङ्कुलः । स्व

कालिसत्ययुगादिप्रपञ्चेऽसत्ययुगेऽपीदि
ति ॥ अपिच । अयमतिचारितया
हतयासंसारोभातिरमणीयः । अ
बुधः परमार्थदर्शनक्षिमपिसा
रोणरमणीयइतिमिल्हणमिश्रः ॥
दुःखे ॥ कृच्छ्रेणामेध्यमध्येनिय
मिततनुभिः स्थीयतेगर्भवासे ।
कान्ताविश्लेषदुःखव्यतिकरविषमे
यौवनेचोपभोगः । वामाक्षीणाम
वज्ञाविहसितवसतिर्वृद्धभावोऽप्यसा
धुः संसारेरेमनुष्याः वदतयदिसु
खंस्वल्पमप्यस्तिकिञ्चित् ॥ संसरति
कालान्तरम् । सृ० । घञ् ० ॥
संसरणम् । वा ॥ दुःखमूलंहिसं
सारः सयस्यास्तिसदुःखितः ।
त्यागः कृतोयेनससुखीनापरः प्रि
ये ॥ प्रभवंसर्वदुःखानामालयं
सकलापदाम् । आश्रयंसर्वपापा
नांसंसारंवर्जयेत्प्रिये ॥ अध्यव
ध्वनघोरमखीकृतमहाविषम् । अ
यस्कखण्डनंदेविसंसारः सत्यचेतसा
म् ॥ आदिमध्यावसानेषुदुःखंस
र्वमिदंयतः । तस्मात्संत्यज्यसं
सारंतत्त्वनिष्ठः सुखीभवेत् ॥ इ
तिकुलार्णवे १ उल्लासः ॥

संसारगुरुः । पुं० प्रद्युम्ने । काम
देवे । मनोजन्मनि । रूपास्त्रे ॥ सं
सारस्यगुरुः ॥

संसारबन्धनिर्मुक्तिः । स्त्री० नाना
योनिसम्बन्धनिवृत्तौ ॥ संसारएव
बन्धः ० तस्यनितरांमुक्तिः ॥

संसारमार्गः । पुं० मिथ्याज्ञाने ॥
भगे । योनौ ॥

संसारबीजम् । न० कामकर्मप्रवृत्ति
कारणे० अज्ञाने ॥

संसारवृक्षः । पुं० अव्यक्तादिस्थावरा
न्तेद्रुमसदृशे ॥ यथा । कदलीस्तम्भ
वन्निःसारोऽनेकशतशाखाकाण्डबुद्धिवि
कल्पास्पदस्तत्वजिज्ञासुभिर्निर्द्धा
रितेदंतत्त्वो० वेदान्तनिर्द्धारितपर
ब्रह्ममूलसारो० ऽविद्याकामकर्मा
व्यक्तबीजप्रभवो० ऽपरब्रह्मविज्ञान
क्रियाशक्तिद्वयात्मकहिरण्यगर्भाङ्कु
रः० सर्वप्राणिलिङ्गभेदस्कन्धः
० तत्तृष्णाजलावसेकोद्भूतदर्पो० बु
द्धीन्द्रियविषयप्रवालाङ्कुरः० श्रु
तिस्मृतिन्यायविद्योपदेशपलाशो०
यज्ञदानतपआद्यनेकक्रियासुपुष्पः
सुखदुःखवेदनानेकरसः० प्रा
ण्युपजीव्यानन्तफलस्तत्तृष्णासलि
लावसेकप्ररूढजटीकृतदृढबद्धमू
लः सत्यनामादिसप्तलोकब्रह्मादि
भूतपक्षिकृतनीडः० प्राणिसुख
दुःखोद्भूतहर्षशोकजातनृत्यगीत
वादित्रक्ष्वेडितास्फोटितहसिताकृ
ष्टरुदितहामुञ्चमुञ्चेत्याद्यनेकशब्द
कृततुमुलीभूतमहारवो० वेदान्त
विहितब्रह्मात्मदर्शनासङ्गशस्त्रकृतो

च्छेदएवसंसारच्छेदोनिरूपितोवेदा न्तेष्वाचार्यैः । तथोक्तं श्रीकृष्णमिश्रैः । अमुष्यसंसारतरोरबोधमूलस्यचोन्मूलविनाशनाय । विश्वेश्वराराधनबीजजाततत्त्वप्रबोधान्नपरोऽभ्युपाय इति ॥

संसारहृत् । पुं॰ आत्मबोधे ॥

संसारहेतुः । पुं॰ आत्मनोऽविद्यायाम् ॥

संसारी । पुं॰ संसारविशिष्टप्राणिनि । भोक्तरि । संसारोऽस्यास्ति । इनिः । कर्तृत्वादिधर्मवति ॥

संसिद्धिः । स्त्री॰ सम्यक्सिद्धौ । प्रकृतौ । स्वभावे । मदोद्यायां स्त्रियाम् । मुक्तौ । मोक्षे । देहेन्द्रियसङ्घातस्यऽशुद्धिक्षयेणसम्यग्ज्ञानोत्पत्तियोग्यतायाम् । श्रवणादिसाध्यायांज्ञाननिष्ठायाम् ॥ फले । साङ्गयोगमनुष्ठायपरिसमापनंसंसिद्धिरितियोगिनः ॥ संसेधनम् । षिधुसंराद्धौ । क्तिन् ॥

संसृतिः । स्त्री॰ संसारे । प्रवाहे । संसारणं । सृ॰ । क्तिन् ॥

संसृष्टः । वि॰ संसर्गे । वमनादिनासंशुद्धे । विभागानन्तरंप्रीत्या पुनः संमिलितधने । यथा । विभक्तोयः पुनः पित्राभ्रात्राचैकत्र संस्थितः । पितृव्येणाथवाप्रीत्या सतुसंसृष्टउच्यते॰ इतिवृहस्पतिः । संसर्जनम् । सृज॰ । क्तः ॥

संसृष्टिः । स्त्री॰ काव्यालङ्कारविशेषे । यथा । सैषासंसृष्टिरेतेषांभेदेन यदिहस्थितिः । एतेषांशब्दार्थालङ्काराणांयथासम्भवमन्योन्यनिरपेक्षतया॰ यदिह॰ शब्दभागएव॰ अर्थविषयएव॰ उभयत्रापिवाऽवस्थानं॰ सैकार्थसमवायभावसंसृष्टिः । तत्रशब्दालङ्कारसंसृष्टिर्यथा । वदनसौरभलोभपरिभ्रमद्भ्रमरसम्भ्रमसम्भृतशोभया । चलितयाविदधेकलमेखलाकलकलोलकलोलदृशान्यया ॥ अर्थालङ्कारसंसृष्टिर्यथा । लिम्पतीवतमोङ्गानिवर्षतीवाञ्जनंनभः । असत्पुरुषसेवेवदृष्टिर्निष्फलतांगता ॥ पूर्वत्रपरस्परनिरपेक्षौयमकानुप्रासौसंसृष्टिंप्रयोजयतः । उत्तरत्रतुतथाविधे॰ उपमोत्प्रेक्षे । शब्दार्थालङ्कारयोः संसृष्टिर्यथा । सोणत्थि एत्थ गामे जो एवं महमहन्तलावण्णम् । तरुणाणंहिअअलुडिंपरिसक्कन्तींणिवारेइ ॥ नास्त्यत्रग्रामेयएतांस्फुरल्लावण्याम् । तरुणानांहृदयलुण्ठनंपरिसङ्क्रामन्तीनिवारयतीतिसंस्कृतम् ॥ हृदयलुण्ठनमितिरूपकम्॰ आयुष्टमितिवत् । पूर्वार्द्धेतुअनुप्रासः । एवंशब्दार्थालङ्कारयोः संसृष्टिरियम् ॥ अथानुप्रा

सोऽरूपकस्यान्योन्यानपेक्षे । संसर्गवतयोरेकवाक्ये छन्दसिवासमवेतत्वात् ॥

संसृष्टी । त्रि॰ संसृष्टत्वविशिष्टे ॥

संसेचनम् । न॰ सम्यगन्नादीनांउपभोगे ॥ तत्र निघण्ट्वादिप्रोक्तव्यतिरिक्तानांद्रव्याणांभक्षणं निषेधति । अज्ञातजातिगुणरूपविधानकानामन्नादिबीजरसपुष्पफलौषधानाम् । संसेवनंसुकृतसौख्ययशोभिवृद्ध्यै निःसंशयंनरवरोविदधीतनाच ॥

संस्कार: । पुं॰ अनुभवे । मानसकर्म्मणि । वासनायाम् ॥ प्रतियत्ने । उत्कृष्टगुणाधाने । संस्क्रियते॰ अनेन॰ ओतेनस्मार्त्तेनवाकर्म्मणा पुरुषइतिसंस्कार: । स्वोयस्वोयजातौसामान्यविशेषविहितवैदिकस्मार्त्तकनुष्ठानद्वाराऽदृष्टविशेषाधायकइतियावत् । तथ्रत्वयः तदर्थोक्तदिनशुद्ध्यादिरपिसंस्कारशब्देनोच्यते ॥ अथोक्तंश्रीमहानिर्वाणतन्त्रे । संस्कारेणविनादेविदेहशुद्धिर्नजायते । नासंस्कृतोधिकारीस्याद्दैवेपित्र्येचकर्म्मणि ॥ अतोविप्रादिभिर्वर्णै: स्वस्ववर्णोक्तसंस्क्रिया: । कर्त्तव्या: सर्वथायत्नैरिहामुत्रहितेप्सुभि: ॥ तेचदशषोडशाष्टचत्वारिंशद्भेदभिन्ना: प्रोक्तायथा । जीवसेक: पुंसवनंसीमन्तोन्नयनंतथा । जातनामौनिष्क्रमणमन्नाशनमतःपरम् ॥ चूडोपनयनोद्वाहा: संस्कारा: कथितादश । शूद्राणांशूद्रभिन्नानामुपवीतंनविद्यते ॥ तेषांनवैवसंस्कारा द्विजातीनांदशस्मृता: ॥ नित्यानिसर्वकर्म्माणितथानैमित्तिकानिच । काम्यान्यपिवरारोहेकुर्य्याच्छाम्भववर्त्मना ॥ षोडशयथा । गर्भाधानंपुंसवनंसीमन्तोन्नयनंतत: । जातकर्माभिधानञ्चनिष्क्रम: प्राशनंतथा ॥ चूडोपनयनंवेदव्रतानाञ्चचतुष्टयम् । गोदानंमेखलोन्मोक्षोविवाह: षोडशक्रमात् ॥ अष्टचत्वारिंशद्यथा । गर्भाधानमथापिपुंसवनकंसीमन्तजातक्रियानामान्नादनचौलकोपनयनश्रौतव्रतान्यप्यथ । चत्वारिस्नपनंविवाहकरणंपञ्चाभियज्ञाअपिसंस्था: सप्तचसप्तसप्तइतितेसंस्कारजाअप्यमी । देवताप्रतिष्ठायांषट्संस्कारायथा । जातनामौनिष्क्रमणमन्नप्राशनमेवच । चूडोपनयनञ्चैतेषट्संस्कारा: शिवोदिताइतिमहानिर्वाणतन्त्रम् ॥ संस्क्रियतेऽनेन । कृञ्॰घञ् ॥ व्युत्पत्तौ ॥ न्यायमतेगुणविशेषे ॥ सत्रिविध: वेगाख्यसंस्कार: १ अयंमूर्त्तपदार्थस्थायी॰ क्वचिद्वेगजन्य॰क्वचित्कर्म्मजन्यश्च । स्थितिस्थापकसंस्कार:२

अथ पृथिवीगुणः॰ वैशेषिकमते पृथिव्यादिचतुष्पदार्थानां गुणः॰ अयमतीन्द्रियः स्पन्दनकारणञ्च। भावनाख्यसंस्कारः २ अयमात्मनोऽतीन्द्रियगुणः॰ उपेक्षानात्मकनिश्चयजन्यः॰ अयं स्मरणप्रत्यभिज्ञयोः कारणञ्च॥ यथाह विश्वनाथतर्कालङ्कारः। संस्कारभेदो वेगोऽथ स्थितिस्थापकभावने। मूर्त्तमात्रे तु वेगः स्यात् कर्मजो वेगजः क्वचित्॥ स्थितिस्थापकसंस्कारः क्षितौ केचिच्चतुर्ष्वपि। ॰ अतीन्द्रियः स विज्ञेयः क्वचित् स्पन्दोऽपि कारणम्॥ भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः। उपेक्षाऽनात्मकस्तस्य निश्चयः कारणं भवेत्॥ स्मरणे प्रत्यभिज्ञायामप्यसौ कारणं भवेदिति॥ अयं जातकर्मादिक्रियाकलापः समयः उक्तकालक्रमेण शरीरसंस्कारार्थं स्त्रीणामपि भवति। तथाह मनुः। अमन्त्रिका तु कार्य्येयं स्त्रीणामावृदशेषतः। संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम्॥ वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः। पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिक्रियेति॥ आवृत्॰ जातकर्मादिक्रियाकलापः। गृह्यकृत्यमेव सायं प्रातः समिद्धोमादिरूपोऽग्निपरिचर्य्येत्यर्थः॥

संस्कारजः। त्रि॰ संस्कारात्जाते॥

संस्कारवर्ज्जितः। पुं॰ व्रात्ये॥ त्रि॰ गर्भाधानादिसंस्कारविधुरे॥

संस्कारस्कन्धः। पुं॰ वासनाप्रपञ्चे। रूपविज्ञानवेदनासंज्ञासंस्कारधानां वासनायाम्॥ रागद्वेषाभिनिवेशेषु। रागादयः क्लेशाः॰ उपक्लेशा मदमानादयो॰ धर्माधर्मौ चेति वा स्मृतिमिश्राः॥

संस्कारहीनः। पुं॰ व्रात्ये॥ त्रि॰ गर्भाधानादिसंस्कारवर्ज्जिते॥ संस्कारैरुपनयनादिभिर्गर्भाधानादिभिर्वा॰ हीनः॥

संस्कार्य्यः। पुं॰ कर्मशेषे॰ प्रोक्षादौ॥ त्रि॰ संस्कारार्हे॥

संस्कृतम्। न॰ लक्षणोपेते। पाणिन्यादिव्याकरणबोधिते। गीर्वाणवाण्याम्॥ संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः॥ त्रि॰ कृत्रिमे॥ शस्ते॥ भूषिते॥ संस्क्रियते स्म। क्तः॥ व्युत्पन्ने॥ अपनीतमले। शोधिते॥ कृतसंस्कारे॥ पक्वे॥

संस्कृतात्मा। पुं॰ दीक्षयादीक्षिते॥

संस्कृतिः। स्त्री॰ संस्क्रियायाम्॥ संस्करणम्। डुकृञ्॰। क्तिन्॥

संस्क्रिया। स्त्री॰ संस्कृतौ। शवदाहादिक्रियायाम्॥ मलापनयने॥ संस्कारायकरणम्। डुकृञ्॰। कृञः श चेति शः। रिङ् इयङ्॥ टाप्॥

योऽविप्रभिन्नश्वसस्तपर्णीत्रसंस्क्रिया॥म्। शैवेनवत्मनाकुर्यादेषधर्मः कलौयुगे।

संस्तर : । पुं॰ प्रस्तरे। पल्लवादिरचितशय्यायाम्। सांथरा॰ इ॰ भा॰ प्र॰ ॥ अध्वरे। यज्ञे ॥ संस्तीर्यते। स्तृञ् आच्छादने। ऋदोरप्॥

संस्तव : । पुं॰ परिचये। सङ्गतिस्तवने। संस्तवनम्। ष्टुञ् स्तुतौ। ऋदोरप्॥ सम्यक् स्तुतौ॥

संस्तवान : । त्रि॰ वाग्मिनि॥ संस्तौति। ष्टुञ्॰। सम्यानच्स्तुवश्छन्दसि। ल्यानच्॥

संस्ताव : । पुं॰ क्रतुषु द्विजन्मनां स्तुतिभूमौ। यत्र छन्दोगैः क्रियमाणायां स्तुतिभूमौ। यत्र स्तावकद्विजावस्थानभूमौ॥ समेत्य स्तुवन्त्यत्र। ष्टुञ्॰। यज्ञे समिस्तुवः इति अधिकरणे ल्युटोऽपवादो घञ्॥ संस्तवनं वा॥

संस्तुत : । त्रि॰ सम्यक् स्तुतिविषयीभूते। संस्तूयते स्म। ष्टुञ्॰। क्तः॥ सदृशत्वेन निरूपिते॥ परिचिते॥

संस्त्यानम् । न॰ संहतौ। उपचये॥

संस्त्याय : । पुं॰ सन्निवेशे॥ संस्थाने॥ विस्तृतौ। सङ्घाते॥ संस्त्यानम्। स्त्यै ष्ट्यै शब्दसङ्घातयोः॥ घञ्। आतो युक्॥ गृहे। यथा। संस्त्यायान प्रविशेयुरिति॥

संस्थ : । पुं॰ चरे॥ निजराष्ट्रवासिचरे॥ क्रतुभेदे॥ सन्तिष्ठतेऽनेन। ष्ठा॰। अङ्॥ त्रि॰ अवस्थिते॥

संस्था । स्त्री॰ स्थितौ॥ सादृश्ये॥ नाशे॥ न्याय्यपथस्थितौ। मर्यादायाम्॥ सन्तिष्ठतेऽनया। सम्यगवस्थानं वा। ष्ठा॰ आतश्चोपसर्गे इत्यङ्॥ व्यवस्थायाम्। समाप्तौ॥ व्यक्तौ॥ प्रलयचतुष्टये। यथा। नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः। संस्थेति कविभिः प्रोक्तश्चतुर्द्धाऽस्य स्वभावतः इति पुराणम्॥

संस्थानम् । न॰ आकृतौ॥ मृतौ॥ सन्निवेशे॥ चतुष्पथे॥ संस्थीयतेऽनेन। सं॰ संस्थितिर्वा। ष्ठा॰। भावाधिकरणादौ ल्युट्। चिह्ने॥ त्रि॰ शिवादौ॥ समीचीनं स्थानमस्य॥

संस्थापनम् । न॰ स्थिरीकरणे॥

संस्थित : । त्रि॰ मृते॥ व्यवस्थिते। सम्यक्स्थिते। उत्थिते। सन्तिष्ठते स्म। ष्ठा॰ गत्यर्थाकर्मकेति क्तः॥

संस्थिति: । स्त्री॰ तत्त्वे। संस्थाने॥ मृत्यौ॥

संस्पर्श : । पुं॰ स्पर्शे। त्वगिन्द्रियग्राह्यगुणविशेषे। यथा। आलापाद्गात्रसंस्पर्शात्॰ निःश्वा

स्यात्सङ्गमोऽजनात् । सङ्गशय्यासना
ध्यायात्पापं सङ्क्रमते नृणामिति-
च्छागलेयः ॥ सम्प्रयोगे । सम्ब
न्धे ॥ संस्पर्शनम् । स्पृश संस्प
र्शने । अकर्त्तरि च कारके संज्ञायां
मिति घञ् ॥
संस्पर्शजः । त्रि० विषयेन्द्रियसं
बन्धाज्जातभोगे । ये हि संस्पर्शजा
भोगा दुःखयोनय एव ते । आद्यन्तवन्तः
कौन्तेय न तेषु रमते बुधः ॥
संस्पर्शा । स्त्री० जनीकायाम् । जनी
नामगन्धद्रव्ये । स्पृशति । संस्पृ
श्यते वा । स्पृश० । पदरुजेति
घञ्० पचाद्यच्० कर्म्मणि घञ्
वा० ॥
संस्फालः । पुं० मेषे ॥
संस्फुटः । त्रि० फुल्ले । विकसिते
॥ स्फुटति । स्फुट विकसने । इ
गुपधेति कः ॥
संस्फेटः । पुं० युद्धे । रणे ॥
संस्फेटनम् । स्फिट अनादरे ।
घञ् ॥
संस्फोटः । पुं० युद्धे ॥ संस्फोट
नम् । स्फुटिर्० । घञ् ॥
संस्मरणम् । न० संस्कारजन्यज्ञाने ।
संस्मृतौ
संस्मृतिः । स्त्री० संस्मरणे ॥ स्त्रि
यांक्तिन् ॥
संस्वेदजम् । न० स्वेदजीवकविशे
षे ॥ तथाहि । उक्तं संस्वेदजं
शाकं भूमिच्छत्रं शिलीन्ध्रकम् । छि
त्रिंगोमयकाष्ठं पुष्पादिषु तदुद्भवे-
सर्वे संस्वेदजाः शीता दोषलाः पि
च्छिलाश्चते । गुरवश्छर्द्यतीसारज्व
रश्लेष्मामयप्रदाः ॥ श्वेताः शुचि
स्थलीकाष्ठवंशगोव्रजसम्भवाः । ना
तिदोषकरास्तेषु शेषास्तेभ्यो
विगर्हिताः ॥ त्रि० भवः शरी
रस्य संस्वेदाद्घर्मजाते दंशमश-
कादिरूपे भूतग्रामे ॥
संहतः । त्रि० सङ्गते । मिलिते
दृढे ॥ दृढसन्धौ ॥ संहन्यतेस्म
। क्तः ॥
संहतजानुः । त्रि० सज्ञौ । संह
तजानुके ॥
संहतजानुकः । त्रि० सञ्ज्ञौ ॥
संहते मिलिते जानुनी यस्य सः ॥
संहतलः । पुं० मिलितपाणिद्वये
। प्रतले । सिंहतले । विस्तृता
ङ्गुल्योर्मिलितयोर्वामदक्षिणयोः पा
ण्योः ॥ संहतं सङ्घट्टं लाति ।
ला० । आतोनुपसर्गे कः ॥
संहतिः । स्त्री० समूहे । वृन्दे ।
निकुरम्बे । कदम्बे ॥ अल्पानाम
पिवस्तूनां संहतिः कार्यसाधिका ।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तद-
न्तिनः ॥ संहतिः श्रेयसी पुंसां
स्वकुलैरल्पकैरपि । तुषेणापिप

रित्यक्ताः नप्ररोहन्तितण्डुलाः ॥ चनतायाम् । संहन्यते । हन्तेः क्तिन् ॥ घाते ॥

संहननम् । न० कलेवरे । गात्रे । शरीरे ॥ संहंति० संहन्यतेवा । हन० । कृत्यल्युटइतिल्युट् ॥ यद्वा । संहन्यन्तेऽस्मिन्भूतानि । करणेतिल्युट् ॥ दृढाङ्गत्वे ॥

संहननाङ्गः । त्रि० कठिनावयवे ॥ संहन्यतेनिबिडीभवन्ति० अङ्गानि यस्य सः ॥

संहर्षः । पुं० स्पर्द्धायाम् ॥ मुदि । सुखे ॥ घर्षणे । घृष्टौ ॥ प्रभञ्जने । पवने । संहर्षणम् । हृषतुष्टौ । घञ् ॥

संहारः । पुं० प्रलये ॥ सङ्कोचने सङ्क्षेपे ॥ नरकविशेषे ॥ हरणं हारः । हृञोभावेघञ् । सम्यक्हारोऽत्र ॥ यद्वा । संह्रियतेऽनेन । अध्यायन्यायेतिघञन्तः साधुः ॥ असिताङ्गादिभैरवात्मगतभैरवविशेषे ॥

संहारमुद्रा । स्त्री० विसर्ज्जनमुद्रायाम् ॥

संहितः । त्रि० सहिते ॥ योजिते ॥ सन्धीयतेस्म । डुधाञः क्तः । दधातेर्हिः ॥ मिलिते ॥

संहितपुष्पिका । स्त्री० मिश्रेयायाम् ॥

संहिता । स्त्री० मन्वादिप्रणीतधर्मशास्त्रे । पुराणसंहितासु ॥ पञ्चसंहितायथा । ब्रह्मणश्चशिवस्यापिप्रह्लादस्यतथैवच । गौतमस्यकुमारस्यसंहिताः परिकीर्त्तिताः ॥ चतस्रोयथा । ब्राह्मीभागवतीशैवीवैष्णवीचप्रकीर्त्तिताः । चतस्रः संहिताः पुण्याधर्मकामार्थमोक्षदाः ॥ षट्संहितायथा । आद्यासनत्कुमारोक्ताद्वितीयासूतसंहिता । तृतीयाशाङ्करीविप्राश्चतुर्थीवैष्णवीमता ॥ तत्परासंहिताब्राह्मीसौरान्त्यासंहितामतेति ॥ संधौवर्णानामतिशयितसन्निधौ । वर्णसंयोगे ॥ वेदैकदेशे ॥ सम्पूर्वाद्दधातेः कर्मणिक्तः । दधातेर्हिः ॥

संहूतिः । स्त्री० बहुभिर्विहिताह्वाने ॥ समाह्वानम् । सम्पूर्वात्० ह्वेञः स्त्रियांक्तिन् । वचिस्वपीति सम्प्रसारणम् ॥

संहृतः । त्रि० कृतसंहारेसङ्क्षिप्ते ॥

संहृतिः । स्त्री० संहारे ॥

संहृष्टः । त्रि० प्रहर्षिते ॥

सकटः । पुं० शाखोटवृक्षे ॥

सकटाक्षः । पुं० धराक्षे ॥ त्रि० कटाक्षसहिते ॥

सकण्टकः । पुं० शैवाले । पूती

कण्टे ॥ त्रि॰ कण्टकयुक्ते ॥

सकर:। त्रि॰ सहस्ते ॥ राजस्वविशिष्टे ॥ शुण्डयुक्ते ॥ सकिरणे ॥ करेणसहवर्त्तते य: स: ॥

सकरुण:। त्रि॰ सदये । करुणाविशिष्टे ॥

सकर्ण:। त्रि॰ श्रवणशीले । श्रुतितत्परे ॥ सावधाने ॥

सकर्म्मक:। पुं॰ कर्मयुक्तपचत्यादिधातुषु ॥

सकल:। पुं॰ सगुणशिवे ॥ यथा शारदातिलके । निर्गुण: सगुणश्चेति शिवो ज्ञेय: सनातन: । निर्गुण: प्रकृतेरन्य: सगुण: सकल: स्मृत इति ॥ कलाप्रकृतिस्तयासहवर्त्तते ॥ त्रि॰ सम्पूर्णे । सर्वस्मिन् ॥ कलाभियुक्ते । कलाभि: परिपूर्णे ॥

सकलप्रिय:। पुं॰ चणके ॥ त्रि॰ सर्वेषांप्रीतिविषये ॥

सकलाज्ञानम्। न॰ समष्ट्यज्ञाने ॥

सकषाय:। त्रि॰ सरागे ॥ कषाये कामक्रोधादिमलेनसहवर्त्तमाने ॥ कषायविशिष्टे । कसैला॰ इ॰ भा॰ प्र॰ ॥

सकाम:। त्रि॰ कामनाविशिष्टे । कामिनि ॥ पुंसोयाविषयापेक्षा सकामत्वमितिभण्यते । तेनयुक्तोदीनमना: सकाम: प्रोच्यतेबुधै: ॥ सकामाश्चैवनिष्कामाद्विविधाभुवि मानवा: । कामिनांफलमित्युक्तं चयिष्णुस्वर्गराज्यवत् । निष्कामानान्तुनिर्वाणंपुनरावृत्तिवर्ज्जितम् । सहकामेनवर्त्तते । सहग्रह: ॥

सकाश:। पुं॰ समीपे ॥ त्रि॰ काशयुक्ते ॥

सकुरुण्ड:। पुं॰ साकुरुण्डवृक्षे ॥

सकुल:। त्रि॰ कुलान्विते ॥

सकुल्य:। त्रि॰ सगोत्रे । सप्तमपुरुषानन्तरंदशमपुरुषपर्य्यन्तसन्तती ॥ दशाहेनसपिण्डास्तुशुध्यन्तिप्रेतसूतके ॥ त्रिरात्रेणसकुल्यास्तु॰ स्नात्वाशुध्यन्तिगोत्रजा: ॥ दायाधिकारिसकुल्यास्तु॰ पञ्चमपुरुषावधय: । यथाहबौधायन: । प्रपितामह:॰ पितामह:॰ पिता॰ स्वयं॰ सोदर्य्यभ्रातर: सवर्णाया: पुत्र॰ पौत्र॰ प्रपौत्र: एतानविभक्तदायादान्सपिण्डानाचक्षते । विभक्तदायादान्सकुल्यानाचक्षते सत्स्वङ्गजेषुतद्गामीह्यर्थोभवतीति ।

सकृत्। अ॰ सहार्थे । एकवारे ॥ एकवारम् । एकस्यसकृच्चेतिसुच् । संयोगान्तस्येतिसुचोलोप: । सकृदंशोनिपततिसकृत्कन्याप्रदीयते । सकृदाहददानीतित्रीण्येतानिसतांसकृत् ॥

सकृत्प्रज:। पुं॰ काके । वायसे ॥

सकृत्प्रजायस्यसः ॥ सिंहे ॥

सकृत्फला । स्त्री॰ कदल्याम् ॥ सकृत्फलान्यस्याः ॥

सकृद्गर्भः । पुं॰ खेसरे । खच्चर॰ इ॰ भा॰ प्र॰ ॥

सकृद्विभातः । त्रि॰ एकदैवसकृत्स्ना ऽभिव्यक्ते ॥ सदैवविभाति । सदा भारूपे ॥

सकृद्वीरः । पुं॰ एकवीरवृक्षे ॥

सक्तः । त्रि॰ अशिरते । लग्ने ॥ अभिनिवेशेनलग्ने । कर्त्तव्याभि मानेनफलाभिसन्धिनाचकर्म्मण्य- भिनिविष्टे ॥ सज्यतेस्म । सञ्ज सङ्गे । क्तः ।

सक्तचेताः । त्रि॰ आसक्तचित्ते ॥ यथा । अत्रध्यवन्धनंघोरमस्वीकृत महाविषम् । अगस्त्यखण्डनंदेवि संसारः सक्तचेतसाम् ॥

सक्तिः । स्त्री॰ सङ्गे ॥ षञ्जःक्तिन् ॥

सक्तुः । पुं॰ न॰ भृष्टिवचूर्णके । भृष्टयवादिचूर्णे । सत्तू॰ इ॰ भा॰ प्र॰ ॥ सचते । षचसेचने । सितनिगमिमसिसच्यविधाञ् क्रुषिभ्यस्तुन् ॥ अस्यलक्षणादयो यथा । धान्यानिभ्राष्टभृष्टानियन्त्र पिष्टानिसक्तवः ॥ तत्रयवसक्तवो यथा । यवजाः सक्तवः शीतादी पनःलघवःसराः । कफपित्त हरारूक्षालेखनाश्चप्रकीर्त्तिताः ॥ तेशीतावलदावृष्याबृंहणाभेदनास्त था । तर्प्पणामधुरारुच्याः परि णामेबलावहाः ॥ कफपित्तश्रम क्षुत्तृट्व्रणनेत्रामयापहाः । प्रश स्ताघर्म्मदाहाढ्य व्यायामार्त्तशरीरि णाम् ॥ चणकयवसक्तवस्तु । नि स्तुषैश्चणकैर्भृष्टैस्तुर्य्यांशैस्तथायवैः कृताः । सक्तवःशर्करासर्पिर्यु क्तायीष्मेतिपूजिताः ॥ शालिस क्तवोयथा । सक्तवःशालिसम्भू ताबह्निदालघवोहिमाः । मधुरा ग्राहिणोरुच्याः पथ्याश्चबलशुक्रदाः नभुक्त्वानरदैश्छित्वा नंनिशायांन- चाबहून् । नजलान्तरितान्नद्विः सक्तूनद्यान्नकेवलान् ॥ पृथक्- पानंपुनर्द्दानंसामिषंपयसानिशि । दन्तच्छेदनमुष्णञ्चसप्तसक्तुषुव र्ज्जयेत् ॥ अर्द्धचादिः ॥

सक्तुकः । पुं॰ विषप्रभेदे ॥ यद्ग्र न्थिः सक्तुकेनेवपूर्णमध्यः संस क्तुकः ॥

सक्तुफला । स्त्री॰ शमीवृक्षे ॥ स क्तुवत्फलमस्याः । अजादित्वा त्टाप् ॥

सक्थि । न॰ जानूर्द्ध्वभागे । ऊरौ । साथल॰ इ॰ भा॰ ॥ सजति॰ स ज्यतेवा । सञ्जसङ्गे । असिसञ्जिभ्यां क्थिन् ॥

सक्रियम् । न० व्यक्ते । परिस्पन्दवति
॥ तथाहि । बुद्ध्यादयउपात्तमुपा
त्तदेहत्वजन्ति० देहान्तरस्थोपादद
तद्गतितेषांपरिस्पन्दः । शरीरपृथि
व्यादीनाञ्चपरिस्पन्दः प्रसिद्धएव
॥ त्रि० क्रियासहिते ॥

सक्षण : । त्रि० कृतावसरे ॥

सक्षत्रम् । अ० क्षत्रियाणांयोग्ये क्षत्र
त्वे ॥ क्षत्रियाणांसम्पत्तिः अव्ययं
विभक्तीतिसम्पत्तावव्ययीभावः ।
सम्पत्तिश्चसमृद्धमानोत्तरपदस्यार्था
यप्रवृत्तिनिमित्तम् ॥

सक्षम : । त्रि० क्षमतायुक्ते ॥ क्षमा
विशिष्टे ॥

सक्षार : । त्रि० लवणयुक्ते ॥

सखा । पुं० मित्रे । सुहृदि । वयस्ये
। सवयसि । स्निग्धे । अन्वितेप्रति
विधस्थितेचैवप्रवर्त्तनम् । व्यसने
चापरित्यागश्चत्रिविधंसखिलक्षणम्
॥ अपिच । सन्त्यागासहनोबन्धुः
सदैवानुगतः सुहृत् । एकक्रियोभ
वेन्मित्रंसमप्राणः सखाभवेदिति
॥ समानः ख्यायतेलोकैः । ख्या
प्रकथने । समानेख्यः सचोदात्तइ
तीण्० सखडित्० यलोपः ० स
मानस्यतूदात्तः सहत्यादेशस्य ॥ स
हाये । अमात्यादौ ॥

सखिता ।) स्त्री०
सखित्वम् ।) न० सख्ये.

सखी । स्त्री० आली । वयस्यायाम् ॥
सख्यशिश्वीतिङीष् ॥

सख्यम् । न० मैत्र्ये । मित्रतायाम्
। साप्तपदीने । सौहार्दे ॥ दशाब्दा
ख्यंपौरसख्यंपञ्चाब्दाख्यंकलाभृता
म् । त्र्यब्दपूर्वंश्रोत्रियाणांस्वल्पे
नापिस्वयोनिषु ॥ इतिमनुः ॥ स
ख्युर्भावः कर्म वा । सख्युर्यः ।
सख्येनिषिध्यायथा । कृतघ्नेरेशठेस्त
ब्धेकामुकेचगतघृणे । निर्लज्जेनैव
कर्त्तव्यंसख्यंमतिमतासदेति । हि
ताशंसने ॥

सगद्गद : । पुं० भयेनहर्षेणवाअश्रुपूर्ण
नेत्रत्वे । सति० कफरुद्धकण्ठन
तथायोग्यचोमन्दत्वसकम्पादिवि
कारस्तस्मिन् ॥ त्रि० तद्वति ॥

सगन्ध : । पुं० अंशके । ज्ञातौ दा
यादे । त्रि० गन्धयुक्ते ॥

सगर : । पुं० अयोध्याधिपतौ० बाहु
राजपुत्रे० सूर्यवंशीयेनृपतिवरे ।
नामनिदानन्तु । सपत्न्यातुगरस्तस्यै
दत्तोगर्भजिघांसया । गरेणसहतेनैवजातस्तत्सगरोऽभवदिति ॥
अष्टह्रदे । त्रि० गरसहिते । स
विषे ॥

सगर्भ : । पुं० सोदरे ॥ समानोगर्भो
यस्य स : । सगर्भेतिनिर्देशात्समा
नस्य स : ॥ अभ्यन्तरितसूक्ष्मपत्ना
दियुक्तकुशादौ ॥

सगर्भा । स्त्री० गर्भवत्याम् ॥
सगर्भ्यः । पुं० सहोदरे ॥ समानेग
र्भेभवः । सगर्भसयूथेतियत् । स
गर्भेतिनिर्द्देशात् सः ॥ यद्वा । स
हतुल्ये गर्भे कुक्षौभवः ॥
सगुणः । पुं० गन्धादिविशिष्टे । वि
द्यादियुक्ते ॥ यथा । सगुणोपिगुं
णौघाविसहायोबलवत्तरः । तुषेणा
पिपरिभ्रष्टस्तण्डुलोनाङ्कुरायते ॥
मायाशवलितसर्वज्ञे सर्वशक्तियुक्ते ब्र
ह्मणि ॥
सगुणा । स्त्री० दुर्गायाम् ॥ गुणव
त्याम् ॥
सगोत्रम् । न० गोत्रे । कुले ॥ पुं०
सप्तमादूर्द्ध्वपुरुषे । त्रि० अभिन्नगो
त्रे । ज्ञातौ ॥ समानंगोत्रंकुलमस्य
ज्योतिर्जनपदेतिसमानस्यसः ॥
सग्धिः । स्त्री० सहभोजने । अदनम्
। अद० । स्त्रियांक्तिन् । बहुलंछं
दसीतिघस् । घसिभसोर्हलिचेत्युप
धालोपः । झलोझलीतिसलोपः ।
झषस्तथोर्धोधः । झलांजश्झशीति
घस्यगः । समानाग्धिः । समान
स्यच्छन्दसीतिसभावः ॥ सहग्धि
र्वा । सहस्यसः संज्ञायाम् ॥
सङ्कटः । त्रि० सम्बाधे । सङ्कीर्णे ।
अल्पावकाशे । वर्त्मादौ । सम्यक्क
टति० आवृणोति । कटेवर्षावरण
योः । पचाद्यच् ॥ यद्वा सम्बाधा

र्थात्संभवात्मुपार्थे० सम्प्रोदश्चेति
मटच् ॥ न० दुःखे ॥
सङ्कटा । स्त्री० देवीविशेषे ॥ योगिनी
प्रभेदे ॥
सङ्कटाक्षः । पुं० धवहक्षे ॥
सङ्कथनम् । न० सम्यग्भाषणे ।
सङ्कथा । स्त्री० परस्परभाषणे । सम्भा
षणे । मिथःप्रसङ्गोष्ठ्याम् ॥
सङ्करः । पुं० सम्मार्ज्न्यादिक्षिप्तधूल्या
दौ । अवकरे । सङ्कारे ॥ सङ्कीर्य
ते । कृविक्षेपे । ऋ
दोरप् ॥ व्यामिश्रत्वे । मिश्रित
त्वे ॥ परस्परात्यन्ताभावसमाना
धिकरणयोरेकाधिकरण्ये ॥ यथा
मूर्त्तत्वंमनसिवर्त्तते० भूतत्वंना
स्ति । आकाशेभूतत्वंवर्त्ततेमूर्त्त
त्वंनास्ति । पृथिव्यांभूतत्वंनास्ति
। पृथिव्यांभूतत्वंवर्त्तते० मूर्त्तत्व
ञ्चास्तीतिजातिसाङ्कर्यमिति ॥ सा
मान्यजातौ । वर्णसङ्करजातौ ॥ अ
लङ्कारविशेषे ॥ यथा । अविश्रान्ति
जुषामात्मन्यङ्गाङ्गित्वन्तुसङ्करः ।
एतएवालङ्कारायदात्मन्यनासादि
तस्वतन्त्रभावाः परस्परमनुग्राह्या
नुग्राहकतांदधति० सएषांसङ्कीर्यमा
णस्वरूपत्वात्सङ्करः । उदाहरण
म् यथा । आत्तेसीमन्तरत्ने मर
कतिनिहतेहेमताटङ्कपत्रेलुप्तायांमेख
लायांझटितिमणितुलाकोटियुग्मेगृ

हीते । शोणं बिम्बोष्ठकान्त्या त्वदरिमृगदृशामित्वरीणामरण्ये राजन् गुञ्जाफलानां स्रजइति शबरा नैव हारं हरन्ति ॥ अत्र तद्गुणमपेक्ष्याभ्रान्तिमता प्रादुर्भूतं तदाश्रयेण च तद्गुणः सचेतसां प्रभूतचमत्कृतिनिमित्तमित्यनयोरङ्गाङ्गिभावः ॥ अस्यान्ये भेदाः काव्यप्रकाशादिषु द्रष्टव्याः ॥

सङ्करी । स्त्री० सङ्कार्याम् ।

सङ्करीकरणम् । न० नवविधपापान्तर्गतपापविशेषे । यथाह विष्णुः । अथ पुरुषस्य कामक्रोधलोभाख्यं रिपुत्रयं भवति परिग्रहप्रसङ्गमविशेषाद् गृहाश्रमिणः । तेनायमाक्रान्तोऽतिपातकमहापातकानुपातकोपपातकेषु वर्त्तते जातिभ्रंशकरेषु सङ्करीकरणेषु अपात्रीकरणेषु मलावहेषु प्रकीर्णकेषु च । तथा । खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा । सङ्करीकरणं ज्ञेयं मीनाहिमहिषस्य चेति मनुः ॥ गर्दभतुरगोष्ट्रमृगहस्त्यजागमेषमत्स्यसर्पमहिषाणाम्प्रत्येकं वधः सङ्करीकरणं ज्ञेयमिति कुल्लूकभट्टः ॥

सङ्कर्षकः । त्रि० सङ्कर्षणकर्त्तरि ॥

सङ्कर्षणः । पुं० सीरपाणौ । बलभद्रे ॥ सम्यक् कर्षति शत्रुशरीरमायुधैः । कृष विलेखने । नन्द्यादित्वाल्ल्युः ॥ सम्यक् कृष्यते वा । कर्मणि ल्युट् ॥ गर्भस्य सम्यक् कर्षणाद्वा । यथोक्तं हरिवंशे । गर्भसंकर्षणात्सोऽपि सङ्कर्षणः स्मृत इति ॥ अहङ्काराधिष्ठातरि ॥ द्रष्टृदृश्ययोः सम्यक् कर्षणमेकीकरणं येन ॥ न० अन्यत्र स्थितस्यान्यत्र नयने ॥ आकर्षणे ॥ सम्यक् प्रकारेणाकर्षणम् ॥

सङ्कलनम् । न० क्रमादुत्क्रमतो वाऽङ्कयोगे । जोड़देना० इ० भा० प्र० कालशब्दसङ्ख्यानयोः । सम्पूर्वः । ल्युट् ॥

सङ्कलितः । त्रि० सङ्गृहे । सङ्गृहीते एकत्रीकृते । अङ्कान्तरेणैकीकृताङ्के । जोड़ दिया अङ्क इति भाषा ॥ सङ्कल्यते स्म । कालसङ्ख्याने । क्तः ॥ पुञ्जीकृतधान्यादौ ॥

सङ्कल्पः । पुं० मानसकर्म्मणि । इदमहं कुर्यामिति मनसो व्यापारे । इदं करिष्यामीत्यादिलक्षणेऽन्तःकरणपरिणामे ॥ इदं नीलमिदं पीतमिति विषयविवेचने ॥ इष्टसाधनताज्ञाने । समीचीनत्वेन भावने ॥ अहङ्करोमीति कर्त्तृत्वाभिमाने ॥ दृष्टेष्वपि विषयेषु अशोभनत्वाद्धर्मेण शोभनाध्यासे । अनेन कर्म्मणेदमिष्टफलं साध्यते इत्येवं विषयायां बुद्धौ ॥ तिथ्याद्युल्लेखपूर्वकनामगोत्राद्युच्चारणपूर्वके वाक्यविशेषे ।

काम्येकर्म्मणिसर्व्वत्रबुध: सङ्कल्प
माचरेत् । विधिवाक्यानुसारेण स
म्पूर्णसुकृतप्रदेइत्यागमोक्ते: ॥ य
था । स्मृत्वाविष्णुंतत्सदितिमास
पक्षतिथींस्तत: । समुल्लिख्यनिमि
त्तानिसङ्कल्पंरचयेत्सुधी: ॥ अत्र
हारीत: । मनसासङ्कल्पयति० वा
चाऽभिलपति० कर्म्मणाचोपपादय
तीति ॥ सङ्कल्पेनविनाराजन्यत्
किञ्चित्कुरुतेनर: । फलञ्चाल्पाल्प
कंतस्यधर्म्मस्यार्द्धक्षयोभवेत् ॥ सङ्क
ल्पनम् । क्लृप्सामर्थ्ये । भावेघञ्
॥ इच्छायाम् ॥ कामचेतौ ॥ सङ्क
ल्पमूल: कामोवैयज्ञा: सङ्क
ल्पसम्भवा: । व्रतानियमधर्म्माश्च
सर्व्वेसङ्कल्पजा: स्मृता: ॥ का
मजानामितेमूलंसङ्कल्पात्त्वंहि
जायसे । नत्वांसङ्कल्पयिष्यामि
समूलोनभविष्यसि ॥

सङ्कल्पजन्मा । पुं० मदने । काम
देवे ॥

सङ्कल्पसम्भव: ।)
सङ्कल्पमूल: ।) पुं० कामदेवे ॥
सङ्कल्पयोनि:)

संकसुक: । त्रि० अस्थिरे । चलस
त्त्वे ॥ दुर्ज्जने ॥ संकसति ।
कसगतौ । सविकसउकन् । सम्य
क्कान्ति[illegible]जनाच्छादा ॥

संकार: । पुं० [illegible]सत्कारे ॥
सम्मार्ज्जन्यवपुञ्जिते । अवकरे ।
संकीर्य्यते । कृविक्षेपेहिंसायांवा
: कर्म्मणिघञ् ॥

संकारी । स्त्री० नवदूषितकन्यायाम् ।
भुक्तकन्यायाम् । इतिमेदिनीहेमचन्द्रौ ॥

संकाश: । पुं० अन्तिके ॥ त्रि०
उत्तरपदस्थस्तुल्यार्थे ॥ यथा० प
द्मसंकाश: ॥ यथावा । सम्पद:
स्वप्नसंकाशायौवनंकुसुमोपमम् ।
तडिच्चपलमायुष्यंकस्यस्याज्जानतो
धृतिरिति ॥ संकाशते । काशृ
दीप्तौ । पचाद्यच् ॥

संकिल: । पुं० अग्निकुक्कुटे । द
ग्धोल्कायाम् ॥

संकीर्ण: । पुं० अम्बष्ठादिचण्डाल
पर्य्यन्तमिश्रितजातौ । तथाचाम
र: । आचण्डालात्तु संकीर्णा
अम्बष्ठकरणादय: । शूद्राविशोस्तुक
रणोऽम्बष्ठोवैश्याद्विजन्मनो: ॥
शूद्राक्षत्रिययोरुग्रो मागध: क्षत्रि
याविशो: । माहिष्योर्य्याक्षत्रिययो:
क्षत्तार्याशूद्रयो: सुत: ॥ ब्राह्म
ण्यांक्षत्रियात्सूत: तस्यांवैदेहको
विश: । रथकारस्तुमाहिष्यात्कर
ण्यांयस्यसम्भव: ॥ स्याच्चण्डाल
स्तुजनितोब्राह्मण्यांवृषलेनय: ।
इति ॥ मिश्रितरागे ॥ नानाजा
तीयवर्णे ॥ त्रि० निचिते ॥ अशु
द्धे ॥ जनादिभिर्निरवकाशे । सं

कुले । आकीर्णे ॥ संकीर्णं स्म । कॄ विक्षेपे । क्तः । ॠत इद्धातोः । रदाभ्यामिति नत्वम् ॥ संकटे ॥ परस्परविजातीये ॥

संकीर्तनम् । न॰ सम्यगुक्तौ । सम्यक्प्रकारेण देवतादिनामोच्चारणे ॥ यथा । श्रमायालं बलं वक्तुस्तमसो भास्करोदयः । शान्तिः कलेरघौघघ्नं नामसंकीर्तनं हरेरिति ॥ नामसंकीर्तनं नित्यं क्षुत्प्रस्खलितादिषु । वियोगशोकसम्प्रीतिसर्वानर्थनसंशयः । सम्यक्कीर्तनम् ॥

सङ्कीर्तित । त्रि॰ सम्यगुच्चरिते ॥

सङ्कुचितः । त्रि॰ सङ्कोचयुक्ते निद्राणे । मीलिते । मुद्रिते ॥ यथा । न स सङ्कुचितः पन्था येन वाली हतो गतः । समये तिष्ठ सुग्रीव मा वालिपथमन्वगाः ॥ सङ्कुचति । कुच सङ्कोचने । क्वचिच्चिकुचिकुटश्च : क्तिच् ॥

सङ्कुलम् । न॰ परस्परपराहतवाक्ये । क्लिष्टे । माता मे वन्ध्येति विरुद्धार्थवचने । यथा । यावज्जीवमहं मौनी ब्रह्मचारी पितामह- । माता च मम वन्ध्यासीत् स्मराभो लुपसोभवान् । इति ॥ संकुलति । कुल संस्त्याने । इगुपधत्वात्कः ॥ युद्धे ॥ त्रि॰ जनादि भिर्निरवकाशे । व्याप्ते । आकीर्णे । सङ्कीर्णे ॥ अविस्पष्टवाचि ॥

सङ्कृतिः । स्त्री॰ चतुर्विंशत्यक्षरायां वृत्तौ ॥

सङ्केतः । पुं॰ स्वाभिप्रायव्यञ्जकचेष्टाविशेषे । प्रक्षमे । परिभाषायाम् । शैल्याम् । समये । आकारे ॥ न्यायमते॰ सङ्केतार्थो यथा । सङ्केतो लक्षणा चार्थे पदवृत्तिः । वृत्त्या पदप्रतिपाद्योऽर्थ एव पदार्थ इत्यभिधीयते । इदं पदमिममर्थं बोधयत्विति॰ अस्माच्छब्दादयमर्थो बोद्धव्य इतीच्छा॰ सङ्केतरूपा वृत्तिः । तत्राधुनिकसङ्केतः परिभाषा । तयार्थबोधकं पदं पारिभाषिकम् । यथा शास्त्रकारादिसङ्केतितनदीवृद्ध्यादिपदम् । ईश्वरसङ्केतः शक्तिः॰ तयार्थबोधकं पदं वाचकम् । यथा गोत्वादिविशिष्टबोधकगवादिपदम् । तेनैव योगेन गवादिर्वाच्यः स एव मुख्यार्थ इत्युच्यते । इति शक्तिवादे गदाधरीटीका । सङ्केतनम् । कितनिवासे । घञ् ॥

सङ्केतनिकेतनम् । न॰ प्रियमेलनार्थाभिसारस्थले ॥

सङ्कोचः । पुं॰ मीनविशेषे ॥ वस्तुविषयस्य वाक्यादेरल्पविषय

यस्यापने ॥ यथा । सामान्यश
ब्दार्थस्य विशेषनिष्ठत्वं सङ्कोचः ॥ न॰
कुङ्कुमे ॥ सङ्कोचति॰ सङ्कु
च्यते वा । यद्वा । सङ्कोचयति सङ्
कोच्यते वा कुचसम्यक्‌ चर्मकौटिल्यप्र
तिष्टम्भविलेखनेषु । अच्॰ घञ्
वा । सङ्कुचतीति विग्रहे नस
म्यङ् । कुचसङ्कोचनवृत्त्यस्य कु
टादित्वे न गुणाभावप्रसङ्गात्‌ ॥
सङ्कोचनी । स्त्री॰ लज्जालुलता
याम् ॥
सङ्कोचपिशुनम् । न॰ कुङ्कुमे ॥
सङ्क्रन्दनः । पुं॰ दुश्च्यवने । इ
न्द्रे ॥ सम्यक्‌ क्रन्दयति । कदि
क्रदि वा ह्वाने रोदने च । ल्युः ॥
न॰ रोदने ॥
सङ्क्रमः । पुं॰ क्रमणे । जला
परिगमनार्थं काष्ठपाषाणादिभिर्नि
र्मिते॰ मार्गे ॥ सङ्क्रमत्वा
प्रोच्चयामि लोकानां संक्रमं यथा ।
दृष्टः सोऽत्र तथा स्वर्गसंक्रमो मे प्रदीय-
ताम् ॥ भानो राश्यन्तरप्रवेशे ।
संक्रमणे ॥ वृटेः सहस्रभागो
यः स कालो रविसंक्रमः पुं॰
न॰ दुर्गसञ्चरे । दुर्गद्वारे फलका
दिर्निर्मितसञ्चारमार्गे ॥ संक्रम
णम् । क्रमु॰ । घञ् । नोदा
त्तोपदेशस्य मान्तस्यानाचमेरिति न
वृद्धिः ॥

संक्रमणम् । न॰ संक्रान्तौ । सम्पूर्वा
त्क्रामेर्ल्युट् ॥ गमने ॥
संक्रान्तः । त्रि॰ ससङ्गे ॥ संक्रान्ति
विशिष्टे ॥ क्रमागतधनादौ ॥ प्रा
प्ते ॥ गते ॥
संक्रान्तिः । स्त्री॰ राश्यन्तरसंयोगा
नुकूलव्यापारे । सूर्यादीनां प्रायो
शितोऽपरराशौ संक्रमणे ॥ तत्र संज्ञा
विशेषा यथा । अयने द्वे विषुवे द्वे च
तस्रः षडशीतयः । चतस्रो विष्णु
पद्यस्तु संक्रान्त्यो द्वादश स्मृताः ॥
अपि च । वृषालिघटसिंहेषु विष्णु
पद्याकं संक्रमे । षडशीतिर्भवेत्सा-
पनृयुक्कन्याझषेषु च ॥ विषुवन्तुस
माख्यातं तुलामेषोभयोस्तथा । या
म्यायनं कर्कटे स्यान्मकरे चोत्तराय
णम् । संक्रमणम् । क्रमु॰ । स्त्रियां
क्तिन् । अनुनासिकस्येति दीर्घः ॥
संक्रामः । पुं॰ दुर्गसञ्चरे ॥
संक्लेदः । पुं॰ आर्द्रीभावे ॥
संक्लेशः । पुं॰ दुःखे ॥ संक्लेशन
म् । क्लिशू विबाधायाम् । घञ् ॥
संक्षयः । पुं॰ प्रलये ॥ नाशे ॥
संक्षिप्तः । त्रि॰ संहृते ॥ कृतसं
क्षेपे । संक्षेपयुक्ते ॥
संक्षुब्धः । त्रि॰ आकुले ॥ आकु
लीभूते ॥
संक्षेपः । पुं॰ सङ्ग्रहे ॥ स्वल्पे ॥
समासे ॥ स्तोकेन भूयसोऽभिधा

ने । सङ्क्षिप्यतेसङ्क्षेपणं वा । क्षिप० । घञ् ॥

सङ्क्षेपणम् । न० विस्तृतानां सङ्क्षेपणे । समसने सम्पूर्वात्क्षिपे ल्युट् ॥

सङ्क्षेपयोगः । पुं० ध्यानयोगभ्यसूचस्थानीयेयोगे ॥ यमाहार्जुनायश्री भगवान् । यथा । स्पर्शान्कृत्वाबहिर्बाह्यांश्चक्षुश्चैवान्तरेभ्रुवोः । प्राणापानौसमौकृत्वानासाभ्यन्तरचारिणौ ॥ यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः । विगतेच्छाभयक्रोधोयः सदामुक्तएवसः ॥

सङ्क्षेप्ता । पुं० हरौ ॥ त्रि० सङ्क्षेपकारके ॥ विस्तृतं सूक्ष्मरूपेणसङ्क्षिपति । क्षिपप्रेरणे । तृच् ॥

सङ्क्षोभः । पुं० सम्यक्चलने । चाञ्चल्ये ॥

सङ्ख्यम् । न० मृधे । आस्कन्दने । युद्धे ॥ सङ्ख्यानम् । चक्षिङ्० ख्याप्रकथनेवा । भावेकोवाहुलकात् । त्रि० सङ्ख्येये ॥

सङ्ख्या । स्त्री० विमर्शे । चर्चायाम् । विचारणायाम् । विचारे ॥ सम्यक्विवेकेनात्मकथने । सम्यगात्मबुद्धौ ॥ एकद्व्यादौ ॥ अत्राहामरसिंहः । सङ्ख्याः सङ्ख्येये ह्यादशस्वेकाद्यादशसु । विंशत्याद्याः सदैकत्वेसर्वाः सङ्ख्येयसङ्ख्ययोः

। सङ्ख्यार्थेद्विबहुत्वेस्तास्तासुचानवतेः स्त्रियः ॥ पङ्क्तेः शतसहस्रादिक्रमाद्दशगुणोत्तरमिति ॥ अस्यार्थः । आदश० दशशब्दमभिव्याप्य । आङ्मर्यादाभिविध्योरित्यव्ययीभावः । नपुंसकादन्यतरस्यामितिपक्षेटच् न । एकादिकोनवदशपर्यन्ताः० सङ्ख्याः सङ्ख्येये० त्रिलिङ्गाश्च । तेनसङ्ख्यासङ्ख्येययोः सामानाधिकरण्येनवृत्तिः । यथा० एकः पटः० एकाशाटी० एकंवस्त्रम् । ह्विशब्दोऽवधारणे० सङ्ख्येयएव० नतुसङ्ख्यायामित्यर्थः । तेन० एकोविप्रइत्यादिभवतिनतुविप्रस्यैकइत्यादि । किन्तु । द्व्येकयोर्द्विवचनैकवचनइतिसूत्रे० द्व्येकयोरितिनिर्देशात्सङ्ख्यामात्रेपिसम्भवः । तेनघटानांपञ्चेत्यपिस्यादितिसुभूतिः । वार्त्ताकुरेणागुणसमयुक्तेतिवैयाकरणसङ्गच्छते । विंशतिराद्यायासान्ताः सङ्ख्याः० सङ्ख्येयसङ्ख्यायोर्वर्त्तते० एकवचनान्ताश्च० यथा विंशतिर्गावः० गवां विंशतिः । विंशत्यादीनांयदासङ्ख्यार्थस्तदाद्विवचनबहुवचनेऽपिस्तः । यथा द्वे विंशती० गावः० गवां वा तिस्रो विंशतयइति । तासुविंशत्यानवतिमभिव्याप्यस्त्रीलिङ्गाः ।

भिन्नलिङ्गेनापिसमानाधिकरण्ये स्त्रीलिङ्गाः । यथाविंशत्यापुरुषैः कृतम् । विंशतिः कुण्डानीति । पङ्क्तेर्दशगुणोत्तरं क्रमात् । शतसहस्रादिविज्ञेयम् । यथा । एकं दशगुणितं पङ्क्तिरुच्यते । दशपङ्क्तयः शतम् । दशशतानिसहस्रम् । दशसहस्राण्ययुतमित्यादिज्ञेयम् ॥ यथाहलीलावत्याम् ॥ एकदशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमशः । अर्बुदमब्जं खर्वनिखर्वमहापद्मशङ्कवस्तस्मात् ॥ जलधिश्चान्त्यंमध्यं परार्द्धमितिदशगुणोत्तरासंज्ञा । सङ्ख्यायास्थानानांव्यवहारार्थं कृता पूर्वैरिति ॥ विष्णुपुराणेश्रीपराशरउवाच । स्थानात्स्थानंदशगुणमेकस्माद्गण्यतेद्विज । ततोऽष्टादशमेभागेपरार्द्धमभिधीयते ॥ परार्द्धद्विगुणंयत्तुप्राकृतः प्रलयोद्विज । तदाऽव्यक्तेऽखिलंव्यक्तंसहेतौलयमेतिवै ॥ इति ॥ न्यायमतेतु । अथागणनव्यवहारिकारणत्वम् । एकत्वंनित्यवस्तुनिनित्यमन्यत्रानित्यम् द्वित्वादिपरार्द्धपर्यन्तमपेक्षाबुद्धेर्जायते । एवमपेक्षाबुद्धिनाशेतेषांनाशः । पर्याप्तिसम्बन्धेनानेकाश्रयेति वृत्ति ॥ सङ्ख्यानम् । सङ्ख्यायतेऽनयावा । चक्षिङः ख्याञ् । …मघेत्यङ् ॥

सङ्ख्यातः । त्रि॰ कृतसङ्ख्ये । गणिते । सङ्ख्यायतेस्म । ख्या॰ । क्तः । चक्षिङादेशोवा । ख्याते ॥

सङ्ख्यानम् । न॰ सङ्ख्यायाम् । प्रकाशे ॥

सङ्ख्यावान् । पुं॰ पण्डिते । सुधियि ॥ सङ्ख्याविचारणाऽस्त्यस्य । मतुप् ॥ त्रि॰ सङ्ख्यायुक्ते ॥

सङ्ख्येयः । त्रि॰ सङ्ख्यायोग्ये । गणनीये । गण्ये ॥ सङ्ख्यातुंयोग्यः । ख्या॰ । यत् । ईत् ॥

सङ्गः । पुं॰ सङ्गमे । मेलने ॥ सङ्गदोषोयथा । निस्सङ्गएवमोक्षः स्याद्दोषाः सर्वेपिसङ्गजाः । सङ्गात्पतत्यधोज्ञानीचावश्यंकिमुताल्पवित् ॥ सङ्गः सर्वात्मनात्याज्यः सचेत्त्यक्तुमशक्यते । ससद्भिः सहकर्त्तव्यः सन्तः सङ्गस्यभेषजम् ॥ सत्सङ्गश्चविवेकश्चनिर्मलंनयनद्वयम् । यस्यनास्तिनरः सोन्धः कथंनस्यादमार्गगः ॥ इतिश्रीकुलार्णवतन्त्रम् ॥ सद्भिः सङ्गंप्रकुर्वीतसिद्धिकामः सदानरः । नासद्भिरिहलोकायपरलोकायवाहितमितिगरुडपुराणम् ॥ विष्णुपुराणमपियथा । मत्स्यस्यसङ्गादभवच्चयोमेसुताद्दिरागोमुषितोस्मितेन । निःसङ्गतामुक्तिपदंयतीनांसङ्गादशेषाः प्रभवन्तिदोषाः ॥ इति ॥ रागे ॥

फलाभिलाषे । आसंगे : अत्यन्तं सुखहेतुरेवेत्येवं शोभनाध्यासलक्षणो प्रीतिविशेषे ॥ अभिनिवेशे । अहमेवं करोमीतिकर्तृत्वरूपे । कर्तृत्वाभिनिवेशे ॥ सञ्जनम् । षञ्जसंगे । घञ् ॥ संगोऽप्रवृत्तिरितिवैद्या : । यथा । वातमूत्रपुरीषाणां संगोध्मानं क्लमोरुजा । जठरेवातजाद्यान्ये रोगा: स्यु र्वातनिग्रहात् ॥ रुजा जठरे॰ इतिसम्बन्ध : ॥ प्रतिबन्धे ॥

संगणिका । स्त्री॰ अप्रतिरूपकथायाम् । इ॰ चि॰ शेषसङ्कीर्णवर्ग : ॥

संगतम् । न॰ सौहृदे ॥ सुखजनकोक्तौ । हृदयङ्गमेयुक्तियुक्तवाक्ये । संगतियुक्ते ॥ सत्संयोगजेफले ॥ त्रि॰ तद्वति ॥ युक्ते ॥ उपसन्ने ॥ संगच्छतेस्म । गत्यर्थेतिकर्त्तरिक्त: ॥

संगति : । स्त्री॰ संगमे ॥ ज्ञाने ॥ उपोद्घातादिषट्के ॥ यथा । स प्रसंगउपोद्घातोहेतुताऽवसरस्तथा । निर्वाहकैक्यकार्यत्वे षोढासंगतिरिष्यते ॥ संश्लेषे ॥ सङ्घट्टने ॥ सम्पूर्वाद्गमे : क्तिन् ॥

संगतिका । स्त्री॰ वर्णवृत्तान्तरे ॥ यथा । सगणं पुर : कुरुशोभितं जगणद्वयं गुरुसंगतम् । फणिराजवक्त्रनिवेदिताभवतीहसंगतिकाहिसा ॥ यथा । अवधेहिकिञ्चिदनुत्तरंप्रहृदामिहेन्द्रपसत्वरम् । तवदिग्व्याप्तकीर्त्तिविलासिनीप्रतिभित्तिगेहनिवासिनी ॥

संगम : । पुं॰ संगे । मेलके ॥ नद्यादिमेलके ॥ स्त्रीपुंसयोर्मिथुनीभावे ॥ यथा । विदग्धस्यविदग्धेनसंगमोगुणवान्भवेत् । विदग्धायाइतिवा ॥ सचप्रथममध्यमोत्तमभेदात् त्रिविध : । यथाहव्यास : । त्रिविधंतत्समाख्यातंप्रथमंमध्यमोत्तमम् । अदेशकालभाषाभिर्निर्जनेचपरस्त्रिया : ॥ कटाक्षावेक्षणंहास्यंप्रथमंसाहसंस्मृतम् । १ । प्रेरणंगन्धमाल्यानांधूपभूषणवाससाम् । प्रलोभनञ्चान्नपानैर्मध्यमंसाहसंस्मृतम् । २ । सहासनंविविक्तेषु परस्परसमाश्रय : । केशाकेशिग्रहश्चैवसम्यक्संग्रहणंस्मृतमितिमिताक्षरा ॥ संगमनम् । ग्रहवृद्धिगतिगमेरप् ॥

संगर : । पुं॰ युद्धे । समरे ॥ आपदि ॥ क्रियाकारे ॥ संविदि । विषे ॥ अङ्गीकारे ॥ न॰ । शम्याफले । सांगर॰ इ॰ भा॰ प्र॰ ॥ संगरणम् ॰ संगीर्य्यतेवा॰ अनेनवा । गॄ शब्दे । ऋदोरप् । पुंसीतिघोवा । प्रतिज्ञायाम् ॥ यथा । सत्यसंगर : ॥

संगरहित : । त्रि॰ नि : संगे ॥ अ

हर्षेवमहायाचितकहुत्याद्यभिमान रूपोऽहङ्कारापरपर्यायोराजसोगर्व विशेष : संग : तेनशून्ये । संगेन रहित :॥

संगव : । पुं॰ पञ्चधाविभक्तदिनस्यद्वितीयांशे । प्रात : कालात् परस्मिन्मुहूर्त्तत्रये ॥ यथा । प्रात : कालो मुहूर्त्तांस्त्रीन् संगवस्तावदेवतु । मध्याह्न॰ स्त्रिमुहूर्त्त : स्यादपराह्णस्तत : परम् । सायाह्नस्त्रिमुहूर्त्त : स्याच्छ्राद्धं तत्रनकारयेदिति ॥ सम्बन्धे ॥

संगवर्ज्जित : । त्रि॰ नि : संगे सन्यासिनि ॥ संगेनवर्ज्जित : ॥ वास्तवस्तुस्पृहाहीने ॥

संगविवर्ज्जित : । त्रि॰ चेतनाचेतनसर्वविषयशोभनाध्यासरहिते ॥

संगी । त्रि॰ सक्ते । संगविशिष्टे ॥ यथा । आमृत्युतोनैवमनोरथानामन्तोऽस्तिविज्ञातमिदं मयाद्य । मनोरथासक्तिपरस्यचित्तं नजायतेवै परमार्थसंगि ॥

संगीतम् । न॰ तौर्य्यत्रिकं । प्रेक्षणार्थं नृत्यगीतवाद्ये । यथा । गीतवाद्यनृत्यत्रयं नाट्यं तौर्य्यत्रिकञ्चतत् । संगीतं प्रेक्षणार्थेऽस्मिन् शास्त्रोक्ते नाट्यधर्मिकेतिहेमचन्द्र : ॥ अपिच । तालवाद्यानुगं गीतं नटीभिर्यत्प्रगीयते । नृत्यस्यानुगतं रंगेतत् संगीतकमुच्यते ॥

संगीतशास्त्रम् । न॰ नृत्यगीतवाद्यानांशिक्षाशास्त्रं ॥ तत्तु॰ सोमेश्वरभरतहनुमत् कल्लिनाथमतभेदाच्चतुर्विधम् । अधुनातुहनुमन्मतं प्रचलितमस्ति । तस्याध्याया : सप्त । स्वराध्यायोरागाध्यायस्तालाध्यायोनृत्याध्यायोभावाध्याय : कोकाध्यायोहस्ताध्यायश्चेति ॥ अस्यमुहूर्त्तमाहकालिदास : । हरिभेचति येभगणेहरिभेहरिभेचमैत्रथवेध्रुवे हरिभे । हरिभेप्रविशाहयेन्ल्येसदङ्क्रिकिलारभ्यैन्नाम्यसङ्गीतशास्त्रम् । इति । हस्तोमृगश्चज्येष्ठाचमूलतिष्याश्रवणातथा । पञ्चानांहरिभानांहि अथर्वोध्यामनीषिभि : ॥

संगीति : । स्त्री॰ आलापे ॥ संगीते ॥

संगीर्ण : । त्रि॰ संविदिते । संश्रुते । उरीकृते । अङ्गीकृते ॥ सङ्गीर्यतेस्म । गॄ निगरणे । क्त : ॥

सङ्गुप्त : । पुं॰ बुद्धभेदे ॥ त्रि॰ संगोपनाश्रये ॥

संगूढ : । त्रि॰ सङ्कलिते । रेखादिना पुञ्जीकृतधान्यादौ ॥ संगुह्यतेस्म । गुह॰ । क्त : ॥

संगृहीत : । त्रि॰ एकत्रीकृते । सङ्कलिते ॥

संगोपनम् । न॰ सम्यग् गोपने ॥

संग्रहः । पुं॰ समाहृतौ । एककर्तृकाणामनेककर्तृकाणां वा एकाभिप्रायाणां वाक्यानां संग्रहणे ॥ इह दुर्द्रङ्गे ॥ यद्वे ॥ सङ्क्षेपे । विस्तृतार्थानां समासेन निबन्धने । यत्ने । संग्रहणम् । ग्रहवृद्दनिश्चिगमश्चेत्यप् ॥ सङ्क्षेपेण गृह्यन्ते नानास्थाने विप्रकीर्णा अर्था बुद्ध्यन्तेऽस्मिन्निति॰ बाहुलकादधिकरणेऽप् वा ॥ परमात्मनि । विष्णौ ॥ संगृह्णाति प्रलये सर्वं जगत् स्वात्मन्युपसंहरतीति संपूर्वाद्ग्रहेः पचाद्यच् ॥ ग्रन्थविशेषे ॥ इति कैयटः । सचलसश्लोकसङ्ख्योत्थादि कृतौ ग्रन्थकृतिप्रसिद्धिरिति विवरणम् ॥

संग्रहणम् । न॰ संग्रहे तीर्थारण्यादिनिर्जनदेशे परस्त्रिया सह सम्भाषणादौ । सहस्रपणदण्डे । यथा । परस्त्रियं योऽभिवदेत्तीर्थेऽरण्ये वनेऽपि वा । नदीनां वापि सम्भेदे स संग्रहणमाप्नुयात् ॥ उपचारक्रिया केलिः स्पर्शो भूषणवाससाम् । सह खट्वासनञ्चैव सर्वं संग्रहणं स्मृतम् ॥ स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत्तथा । परस्परस्यानुमते सर्वं संग्रहणं स्मृतम् ॥ सम्यक् गृह्यते ज्ञायते येन परस्त्रीभोगाभिलाष इति॰ सम्पूर्वात्॰ ग्रहेर्ल्युट् ॥

संग्रहणी । स्त्री॰ ग्रहणीरोगभेदे ॥ यथा । अन्त्यधिष्ठानमन्नस्य ग्रहणाद्ग्रहणी मता । अपक्वं धारयेत्तत्वपक्वं त्यजति चाप्यधस्तस्याः स्वरूपम् । सुश्रुतोपि । षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता । आमपक्वाशयान्तःस्था ग्रहणी साभिधीयते ॥ अस्याः प्रभेदः संग्रहणी । यथा । द्रवं घनं सितं स्निग्धं सकटीवेदनं शकृत् । आमं बहुसपैच्छिल्यं सशब्दं मन्दवेदनम् ॥ पक्षान्मासाद्दशाहाद्वा नित्यं चापि विमुञ्चति । अन्त्रकूजनमालस्यं दौर्बल्यं सदनं भवेत् ॥ दिवाप्रकोपो भवति रात्रौ शान्तिं व्रजति । दुर्विज्ञेया दुर्निवारा चिरकालानुबन्धिनी ॥ सा भवेदामवातेन तेन संग्रहणी मतेति ॥

संग्रहभोजनम् । न॰ चन्द्रसूर्योपरागकालभोजने ॥

संग्रामः । पुं॰ युद्धे ॥ संग्रामणम् । संग्रामयुद्धे । ण्यन्तः । एरच् ॥ सङ्गसते । ग्रसुचदने । ग्रसिरा चेति मन्त्वा ॥

सङ्ग्रामपटहः । पुं॰ रणतूर्ये ॥ शङ्खादिरणवाद्ये ॥

सङ्ग्राहः । पुं॰ फलकमुष्टौ फलकग्रहणस्थाने ॥ मुष्टिबन्धनक्रियायाम् । मुष्टिबन्धे ॥ यथा । षड्भिर्मल्लस्य सङ्ग्राहः ॥ सङ्ग्रह

णाम् । गृहउपादाने : समिमु हाविति गृहेर्घञ् ॥

सङ्ग्राही । पुं॰ कुटजवृक्षे ॥

सङ्घः । पुं॰ चये : समूहे ॥ सजातीयानां विजातीयानाञ्च जन्तूनां वृन्दे । यथा पक्षिसङ्घो भिक्षुसङ्घो वणिक्सङ्घः ॥ संहन्यते॰ परिच्छिद्यतेऽनेन संहननं वा । सङ्घोद्घौ गणप्रशंसयोरिति टिलोपोऽप्प्रत्ययो घत्वञ्च निपात्यते ॥

सङ्घचारी । पुं॰ मत्स्ये ॥ त्रि॰ बहुभि: सहगामिनी ॥

सङ्घजीवी । पुं॰ व्रातीने ॥

सङ्घटनम् । न॰ योजनायाम् ॥

सङ्घट्टः । पुं॰ अन्योन्यविमर्द्दे । घटने ॥

सङ्घट्टनम् । न॰ सङ्घट्टे ॥ मेलने ॥ घटने ॥

सङ्घट्टना । स्त्री॰ संघट्टने ॥

संघट्टा । स्त्री॰ लतायाम् ॥

संघट्टित: । त्रि॰ निर्विते ॥

संघट्टी । त्रि॰ पद्मभवे । पद्मो॰ द्व॰ पद्मका॰ द्व॰ भा॰ ॥

संघतिथ: । पुं॰ संघानां पूरणे ॥ बहुपूगगणसङ्घस्येति डट्॰ तिथुगागमविधानात्॰ सङ्घ्या संख्यात्वे पि डट् ॥

संघपुष्पी । स्त्री॰ शङ्खिपुष्प्याम् । धातक्याम् ॥

संघर्ष: । पुं॰ स्पर्द्धायाम् । पराभिभवेच्छायाम् ॥ संघर्षणे ॥ हृष्टसंघर्षस्तटस्थपीडाकरः । यथा वृषभकलहाद्वृक्षपादभङ्गः॰ ॥ वृषु सङ्घर्षे । घञ् ॥ संसर्पे ॥

संघाटिका । स्त्री॰ युग्मे ॥ कुट्टन्याम् ॥ जलकण्टके ॥ घ्राणे ॥

संघात: । पुं॰ घाते ॥ संहतौ । सङ्घे । यथा । सङ्घाता: स्वप्नवत्सर्वे इत्यागमविदामुपदेश: ॥ अप्रस्तुतावयवसमूहे ॥ श्लिष्टावयवत्वे । पञ्चभूतपरिणामे । सेन्द्रियशरीरे ॥ नरकविशेषे ॥ सम्यक्घातोऽत्र॰ सम्यक्घातयन्त्यत्रेति वा । यद्वा । संहन्यन्तेऽत्र । हन्तेर्घञ् । हनस्तोऽचिण्णलो: । हो हन्तेरिति घ: ॥ काफे ॥

संघातपत्रिका । स्त्री॰ शतपुष्पायाम् ॥

संघातवाद: । पुं॰ लोकायतिकानां नास्तिकानां वादे ॥ स यथा । अनादौ क्षणिकेऽलीकेनेश्वरादिरपेक्ष्यते । प्रत्यक्षसङ्घातभेदशक्तिभि: सर्वसिद्धित: ॥ यथौषधानां सङ्घातेमादेरारोग्यरसायनम् । तथैव भूतसङ्घाते चैतन्यकान्यजीवति ति ।

सङ्घुषित: । त्रि॰ सङ्घुष्टे । सङ्घु-

ष्यतेस्म । घुषिर् विशब्दने । स्नः कृष्यम् त्वरसङ्कुषास्वनामितिपर्व्वे इट् ॥

सङ्कुष्ट : । त्रि॰ सङ्कुचिते । संशब्दिते । सम्यग्घोषणाश्रये ॥ सङ्कुष्यतेस्म । घुषिर्॰ कृष्यमत्वर सङ्कुषास्वनामितिपर्व्वे इडभाव : ॥

सचल: । त्रि॰ अचलभिन्ने । अस्थिरे ॥

सचि : । स्त्री॰ शच्याम् ॥ सर्व्वेन्द्रियेषुसचते । अचसमवाये । सर्व्वधातुभ्यइन् ॥

सचिक्कण : । त्रि॰ क्लिन्ननेत्रे ॥

सचिव : । पुं॰ अमात्ये । मन्त्रिविशेषे ॥ कार्य्यसहाया : सचिवाबुद्धिसहायासमन्त्रिण : प्रोक्तादूतिभेद: ॥ अथसचिवा : तेचभेदा७५ध्याये ५४८श्लोकेद्रष्टव्या : । सहाये । चेटे । सचनम् । सच॰ । सर्व्वधातुभ्यइन् । सचिंवाति । वा॰ आतोनुपसर्गेक : ॥

सचिवामय : । पुं॰ विसर्परोगे ॥

सची । स्त्री॰ इन्द्राण्याम् ॥ कृदिकारादिक्तिङीष् ॥

सचीनन्दन: । पुं॰ जयन्ते । गौडदेशे त्वन्नकालोवैष्णवविशेषधर्म्मप्रवर्त्तकेचैतन्यदेवे ॥ यथाशाकेमुनिव्योमयुगेन्दुगण्ये १४०७ पुण्ये तिथौफाल्गुनपौर्णमास्याम् । भैलोक्यभाग्योदयपुण्यकीर्त्तिर्देव : सचीनन्दनआविरासीत् इतिचैतन्यचन्द्रोदयनाटकम् ॥

सचेतन : । त्रि॰ सप्राणे ॥

सचेता: । त्रि॰ अव्याकुलचित्ते ॥ प्रसन्नचित्ते ॥

सचेष्ट : त्रि॰ चेष्टयासहवर्त्तमाने ॥

सच्चारा । स्त्री॰ हरिद्रायाम् ॥

सच्चित् । न॰ ब्रह्मणि ॥

सच्चिदानन्दम् । न॰ ब्रह्मणि । नित्यज्ञानसुखस्वरूपे ॥ त्रि॰ साकारदेवविशेषणे ॥

सच्चिदानन्दलक्षणम् । त्रि॰ परमात्मनि ॥ सच्चिदानन्दै:॰ अनृतजडदु : खप्रतियोगिभिर्लक्ष्यते॰ विरुद्धधर्म्मत्यागलक्षणयाभागलक्षणयाज्ञायते॰ इतिसच्चिदानन्दलक्षणम् ॥ यद्वा । सन्तोसर्व्वदास्थायिनौयौचिदानन्दौज्ञानानन्दौतौलक्षणंस्वरूपमस्य ॥

सच्छाकम् । न॰ आर्द्रके ॥

सजम्बाल : । त्रि॰ पङ्किले । पङ्कविशिष्टे । जम्बालेनपङ्केनसहेति विग्रह : ॥

सजाति : । पुं॰ समानजातिस्त्रीपुंसयो: पुत्रे ॥ यथ. । सवर्णेभ्य: सवर्णासुजायन्तेहिसजातय. । अनिन्द्येषुविवाहेषुपुत्रा : सन्तानवर्द्धना : ॥ त्रि॰ समानजातौ ॥

सजातीय : । त्रि॰ समानजातीये ॥

जातौभवोजातीय:। समानस्य
तियोगविभागात्सादेश: ॥

सजू:। अ० सहार्थे ॥

सजू:। स्त्री० प्रीतियुक्तायाम्। सेवा
युक्तायाम्। जोषणम्० जुट्।
जुषप्रीतिसेवनयो:। भावेक्विप्। स
हजुषा वर्त्तते० यासा० सजू:।
बहुव्रीहौसहस्यसभाव:। ससजु
षोरु:। र्वोरितिदीर्घ:॥

सज्ज:। त्रि० सन्नद्धे। वर्मिते।
बद्धसन्नाहे॥ सज्जितस्य। षस्ज
गतौ। अच्॥ सम्भृते॥

सज्जन:। पुं० महाकुले। कुली
ने। आर्य्ये। अस्यलक्षणं यथा।
निजाचारपराहिंसोयेकुर्वन्तीविद्वस
म्मतम्। पापाभिलाषरहिता: स
ज्जनास्तेप्रकीर्त्तिताइतिपाद्मेक्रि
यायोगसारे १६ऽध्याय:। न०
उपरक्षणे। सैन्यरक्षणायनियुक्त
प्रहरिकादौ। गुल्मे। घट्टे।
त्रि० कुलीने। सति। सतांवा
सौजन्यस्य सज्जन्तेऽनेन० सत्०
शोभनंजन्यतेवाऽनेन। षस्जग
तौ० जनीप्रादुर्भावेवा। ल्युट्॥
महात्मनि॥

सज्जना। स्त्री० पल्याणाद्यारोपणे
नेभसज्जीकरणे। कल्पनायाम्।
षस्जगतौ। ण्यन्त: ण्यासश्रन्थेति
युच्। सस्य शुत्वेन श:० तस्यजश्
त्वेनज:॥

सज्जा। स्त्री० वेशे। सन्नाहे। साज
ना० इ० भा० प्र०॥

सज्जित:। त्रि० वशीकृते॥ भूषिते
। कृतसज्जे॥ वर्मिते। सन्नद्धे॥
षस्ज०। क्त:॥

सञ्च:। पुं० पुस्तकलेखनार्थपत्रचये
। साँची० इ० भा०॥ यथा। श्री
ताडीपत्रजीसञ्चे समेपत्रसुसञ्चिते।
त्रिचित्रकांविपाश्चैवचर्मणासम्पुटी
कृते। रक्तेनवाथकृष्णेनममूर्छन्याव
र्द्धितेनच। दृढसूत्रसुबन्धेनपश्चाद्वि
धकृतेनच॥ यस्तुवादृशसाहस्रीसं
हिता:मुपलेखयेत्। ददातिचाभियु
क्तायसयातिपरमांगतिमितिदेवीपु
राणेविद्यादानमाहात्म्यफलनामा
ध्याय:॥

सञ्चत्। पुं० प्रतारके॥

सञ्चय:। पुं० समूहे। निवहे॥ स
ञ्चीयते। चिञ्०। एरच्॥

सञ्चयनम्। न० सञ्चये॥

संचयी। त्रि० संचयशीले। सङ्ग्रहक
र्त्तरि॥ सञ्चयोऽस्यास्ति। इनि:
॥ संचयीनावसीदति॥

संचर:। पुं० सेतौ। मार्गे॥ देहे
॥ संचरन्त्यनेन। गोचरसंचरेत
साधु:॥

संचलनम्। न० कम्पने॥

संचाय्य:। पुं० क्रतौ। यज्ञे॥ सं

चीयतेऽसौ । सम्पूर्वाच्चिनोतेः० क्तीक्षुद्रपाख्यसञ्ज्ञायाम्विति स्त्र दाप्येनिपात्यते ॥

सञ्चारः । पुं० निर्गमे ॥ सञ्चरण म्० सञ्चरन्त्यनेनवा । चरगतौ । घञ् ॥ गमने ॥ यथा । सञ्चारो निगमान्तवीथिष्विति ॥ चकुतो भयसञ्चाराः प्रजाराजनिधार्मिके० इतिच ॥

संचारजीवी । त्रि० चरवार्थिनि ॥

संचारिका । स्त्री० युगले ॥ कुट्टन्याम् । दूत्याम् ॥ घ्राणे ॥ संचरति० संचारयतिवा । चर० । खुल ॥

संचारिणी । स्त्री० गोधापद्याम् ॥ संचरणशीलायाम् ॥

संचारी । पुं० धूपे ॥ वायौ ॥ भावविशेषे ॥

संचारितः । त्रि० संचारिते ॥

संचाली । स्त्री० गुञ्जायाम् ॥ यथा । संचालीप्रोच्यतेगुञ्जासाति स्त्रीरूपकं भवेत् ॥

संचितः । त्रि० रचिते ॥ संभृते । सम्पादिते ॥ भाविदेहारम्भके कर्मविशेषे ॥

संचितकर्म । न० ज्ञानोत्पत्तेः प्रागुत्पन्ने० अनारब्धफलिकर्मणि ॥ संचितंचतत्कर्मच ॥

संचिका । स्त्री० मूषिकपर्ण्याम् ।

मूषीकपर्ण्याम् ॥

संचिन्तितः । त्रि० सङ्कल्पेनकृते ॥

संचिन्वानः । त्रि० संचयंकुर्वाणे ॥ संचिन्वानककमेवैनंकामाना मविदग्धकम् । इत्कीविरचमाशा श्वसुरादायगच्छति ॥

संचेयः । त्रि० संचयनीये । संचितव्ये ॥

सञ्छन्नः । त्रि० आच्छादिते ॥

सज्जः । पुं० विधौ । ब्रह्मणि ॥ रुद्रे । शिवे ।

सञ्जननः । त्रि० उत्पादके ।

सञ्जयः । त्रि० रागद्वेषादिदोषाणां सम्यक्जेतरि ।

सञ्जवनम् । न० अन्योन्याभिमुखशालाचतुष्टयगृहे । चतुःशाले । सञ्जवन्त्यत्र । जुगतौसौत्रः । अधिकरणेल्युट् ॥

सञ्ज्ञा । स्त्री० अज्ञायाम् ॥ ज्ञाव्याम् ।

सञ्ज्वरः । त्रि० संज्वरे । सञ्ज्वर्यन्तात्क्तः ।

सञ्जिहानः । त्रि० परित्यजति ॥

सञ्जीवनम् । न० सञ्चरनेसम्यक्प्रकारेणप्राणधारणे ।

सञ्जीवनी । स्त्री० चुद्रचुपविशेषमृतसञ्चायाम् । रुदन्तिकायाम् यादवयोगान्तरे ॥ यथा । पत्रस्थे वगतश्चन्द्रोञ्चचोमचरविग्रहः । सञ्जीवनीसमाख्यायंमृत्युयोगाप

ज्ञापक : ॥

संज्ञम् । न० पीतकाष्ठे ॥ त्रि० सम्यग्जानुके । संहतजानुके ॥ संज्ञावति ।

संज्ञपनम् । न० मारणे ॥ मारणतोषणनिशामनेषुज्ञा । ज्ञपमिच्चेतिवा । भावेल्युट् ॥

संज्ञप्ति । स्त्री० मारणे ॥ विज्ञप्तौ ॥

संज्ञा । स्त्री० नामनि ॥ ययाप्रत्याय्यतेसासंज्ञेतिमहाभाष्यम् । पर्यायमित्ययावत् । नाथसंज्ञिनं बोधयति ॥ गायत्र्याम् ॥ चेतनायाम् । बुद्धौ ॥ रविपत्नीति ॥ हस्ताद्यैरर्थस्यसूचनायाम् ॥ संज्ञानम् । ज्ञापनबोधने । चातश्चोपसर्गइत्यङ् ॥ सम्यग्ज्ञायतेइति कर्मणिवाङ् ॥ सङ्केते ॥

संज्ञास्कन्ध : । पुं० नामप्रपञ्चे । देवदत्तादिनामधेये ॥ सविकल्पके ॥ सविकल्पप्रत्ययः० संज्ञासंसर्गयोग्यप्रतिभास : । यथा । डित्थः० कुण्डली० गौरो० ब्राह्मणोगच्छतीत्येवंजातीयकइतिवाचस्पतिमिश्रा : । सविकल्पप्रत्ययइत्यनेन० विज्ञानस्कन्धोनिर्विकल्पइतिभेदः स्कन्धयोर्ध्वनितइतिकल्पतरु : । गौरश्वइत्यादिशब्दसङ्कल्पितप्रत्ययइत्यामन्दगिरय : । गौरश्वइत्यादिशब्दादिविशिष्टवस्तुविषयकसविकल्पप्रत्ययइतिवर्त्तिकारा : ॥

संज्ञी । त्रि० संज्ञावति ॥ संज्ञयाय : प्रतीयतेससंज्ञीतिमहाभाष्य-कृत् । संज्ञास्यास्ति । व्रीह्यादित्वादिनि : ॥

संज्ञु : । त्रि० संहतजानुनि ॥ संहतेसंलग्नेजानुनीयस्य । प्रसम्भ्यांजानुनोर्ज्ञु : ॥

सञ्ज्वर : । पुं० अग्नितापे । सन्तापे ॥ संज्वरयति । ज्वररोगे । ण्यन्तात्० पचाद्यच् ॥

सटम् । न० व्रतिन : शिखायाम्-

सटा । स्त्री० । जटायाम् ॥ यथा । जटाजटिर्जटीजूटीजुटश्चन्तुसटंसटा । कोटीरंजूटकंहस्तंशिखायांव्रतिनामपीतिशब्दरत्नावली ॥ सटति । षटअवयवे । अच् ॥ केसरे ॥

सटाङ्क : । पुं० सिंहे ॥ व्रतिनि ॥ सटाअङ्कश्चिह्नंयस्य स : ॥

सटि : ।
सटिका । स्त्री० } गन्धाम् । गन्धपलाश्याम् । वनपादा० पञ्चहरिद्रा० इ० गौ० भा० प्र० ॥
सटी ।

सण्ड : । पुं० षण्डे ॥

सण्डिश : । पुं० सन्दंशे ॥

सण्डीनम् । न० खगगतिक्रियायाम् । पक्षिणोऽवादीपतने ॥

सङ्गतं डयनम् । डीङ् विहायसा गतौ । नपुंसके भावे क्तः । श्वीदितो निष्ठायामितीट्‌प्रतिषेधः । स्वादय ओदित इत्युक्त्या दित्वान्निष्ठानत्वम् ॥ सण्डीनं सम्यक्पतनमिति महाभारतम् ॥

सण्डीनडीनम् । न० खगानां भ्रमणमार्गे ॥

सण्डीनडीनम् । न० खगानां भ्रमणे उड्डगमने ॥

सत् । अ० आदरे ॥ आदरानादरयोः सदसती इति निपातसंज्ञा ॥

सत् । न० सत्ये । सदा स्थायिनि । अनृतशून्यब्रह्मणि । बाधाभावोपलक्षितस्वरूपसत्तात्मके । सत्स्वभावे वेदान्तसिद्धे परमेश्वरे । कालत्रयाबाध्ये ब्रह्मणि ॥ यद्विषया बुद्धिर्न व्यभिचरति तत्सदिति भाष्यम् ॥ त्रि० सत्ये । भावस्वाश्रये ॥ साधौ । नित्यानित्यवस्तुविवेकादिसाधनसम्पन्ने मुमुक्षौ । शिष्टे । वेदोक्तकारिणि वेदशास्त्रानुसारेण वर्त्तमाने । धीरे ॥ मान्ये ॥ प्रशस्ते ॥ धार्मिके ॥ विद्यमाने । अस्तीति विधिमुखेन प्रतीयमाने ॥ यत्सम्बन्धितया यद्भवति तत् तत्र सदित्युच्यते ॥ व्यक्ते । विधिमुखेन प्रमाणस्य विषये ॥ कर्मवैगुण्यापनोदनसमर्थे ॥ पृथिव्यप्तेजसु ॥ सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते । प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥ यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते । कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥ अस्ति । अस भुवि । लट् शत्रादेशः । श्नसोरल्लोपः ॥ सत्ताशालिनि । अस्तितामात्रवस्तुनि । शान्ते ॥ अस्ति ब्रह्मेति ब्रह्मास्तितत्त्वविदि ॥ आविर्भातात्मनुमिष्टोत्पाद्यमानोऽर्थविस्तृतः । अर्थे तस्मात् तदुत्पत्त्येवं सन्निव बहुधोच्यते ॥

सततम् । अ० सर्वदार्थे निरन्तरे ॥

सततम् । न० अनारते । अश्रान्ते । सन्तते । सन्तन्यते स्म । तनु विस्तारे । क्तः । अनुदात्तोपदेशेति नलोपः । समो वा हितततयोरिति पक्षे समो मलोपः ॥ क्रियान्तरैरव्यवधानमस्यार्थः । क्रियाविशेषणे अस्य क्लीवत्वम् । द्रव्यविशेषणे तु त्रिलिङ्गम् ॥ पुं० विषमज्वरविशेषे ॥ तल्लक्षणं यथा । अहोरात्रे सततको द्वौ कालावनुवर्त्तते । द्वौ कालौ अन्येद्युष्कः एककालं रात्रावेककालमायतो दोषाणामहोरात्रे प्रत्येकं द्वौ द्वौ प्रकोपकालौ ॥

सततगः । पुं० वायौ ॥ त्रि० सर्वदागमनशीले ॥ सततं गच्छति । गम् । डः ॥

सततविमुक्त : । त्रि० सर्वदैवमुक्ते० मकदाचिदपिबद्धे ॥

सततयायी । त्रि० सदाविनश्वरे ॥

सततोत्थित : । त्रि० निरन्तरमुद्युक्ते ॥ सततमुत्थित : ॥

सतत्त्वम् । न० स्वभावे । याथात्म्ये ॥ त्रि० तत्त्वेनसहिते ॥ तत्त्वेनवास्तवरूपेणसहवर्त्ततेइति ॥

सतर्क : । त्रि० सभये । तर्केणसहवर्त्तमाने ॥

सती । स्त्री० दाक्षायण्याम् । उमायाम् ॥ साध्व्याम् । पतिव्रतायाम् ॥ साध्व्याम् ॥ विद्यमानायाम् ॥ सौराष्ट्रमृदि ॥ प्रमाणान्तरबाधायोग्यायाम् ॥ द्वयं सत्यपत्नी । यथा । सत्यपत्नीसतीमुक्ता : पूजिताजगतीप्रिया । ययाविनाभवेल्लोकोऽयं धुतारहित : सदा ॥ यत्रसत्यमपित्रनास्ति० तत्राविश्वासात्० मनुष्य: स्नेहंनकरोति० इतिवस्तुतारहितोभवतीतियुक्तमेव ॥ प्रतिष्ठाच्छन्द : प्रभेदे ॥ नगिसती ॥ यथा । सुरपितवपदम् । ममतिसाननुसतो । अस्ति० एकस्मिन्पत्यौ । अस० । शतृ । श्नसोरल्लोप : । उगित्वान्ङीप् ॥

सतीन : । पुं० वंशे । कलाये । वायौ ॥

सतीनक : । पुं० वंशे ॥ कलाये । खण्डिके । मटरइ० भा० प्र० ॥ कलायत्रिपुट : प्रोक्त : सतीनोवर्त्तुलोमत : इतिव्याडि : ॥ सतिवोदून : प्रभु : । संज्ञायामितिसमास : । हलदन्तादित्यलुक् ॥ सतीनंवाहुकरोति । अन्येष्वपीतिड : ॥

सतीर्थ्य : । पुं० परस्परमेकगुरो : शिष्ये । सहाध्यायिनि । समानेतीर्थेगुरौवसति । समानतीर्थेवासीतियत् । तीर्थेये० इतिसमानस्यस : ॥

सतील : । पुं० सतीने ॥ वंशे० इ० मुद्राङ्कितावारावली ॥

सतीलक : । पुं० सतीनके । मटरइ० भा० प्र० कलाये ॥ तिलेन० तिलवत्कृष्णवर्णचिह्नेनसहवर्त्तते० इतिसतील : । निपातनादिकारस्यदीर्घ : । स्वार्थेक : ॥

सतीला । स्त्री० कलायविशेषे । निष्पावकायाम् । त्रिपुटे ॥

सतुषम् । न० तुषयुक्तसस्ये ॥ धान्ये ॥ यथा । सस्यंचैवगतंप्राहु : सतुषंधान्यमुच्यते । आमंवितुषमित्युक्तंस्विन्नमन्नमुदाहृतम् ॥

सतूर्य : । त्रि० वादित्रसहिते । तूर्य : तूर्यघोषै : सहित : ॥

सतृट् । त्रि० तृष्णायुक्ते । तृषिते ॥

सत्कदम्ब : । पुं० व्रजभुवि । कदम्बे ।

सत्कर्म्म । न० वेदविहितक्रियायाम् ॥ सत्कर्मयोग्यो न जनो नैवाप: शौचकारणम् । यस्मिन्ननुदिते तस्मिन् नमो देवाय भास्वते । इति विष्णुपुराणम् ॥

सत्काञ्चनार: । पुं० रक्तकाञ्चने ॥

सत्काण्ड: । पुं० चिल्ले ॥

सत्कार: । पुं० श्रद्धातिशये ॥ साधुरयं तपस्वी वा अयमित्थं वा क्रियमाणायां स्तुतौ ॥ कौमुद्यादिषु ॥ यथा । तस्मादेता: सदा पूज्या: भूषणाच्छादनाशनै: । भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु चेति । एता: • नार्य: ॥ पूजायाम् ॥

सत्कृत: । त्रि० कृतसत्कारे । पूजिते ॥ आदृते ॥

सत्कृति: । स्त्री० सत्क्रियायाम् । सत्कारे ॥

सत्क्रिया । स्त्री० सत्कारे । आदरस्य क्रियायाम् ॥ श्रद्धादिक्रियायाम् । संस्क्रियायाम् ॥

सत्तम: । त्रि० पूज्यतमे । साधीयसि । उत्तमे । अतिशोभने । अयमेषामतिशयेन सन् अतिशायने तमबिष्ठनाविति तमप् ॥

सत्ता । स्त्री० सजातीयविजातीयस्वगतभेदरहितानुभूतौ । विद्यमानतायाम् । साधुतायाम् । [illegible] विधिषि । इति भाषापरिच्छेद: ॥ भावितल ॥

सत्तामात्रम् । त्रि० केवलपरमात्मस्वरूपे ॥

सत्य: । पुं० श्रीरामे । दशमुखान्तके । विष्णौ ॥ यथा । श्रीरामेप्यन्तरे विष्णु: सत्यै: सह स धीमते । सत्यायामभवत्सत्य: सत्यरूपो जनार्द्दन इति कौर्म्मे ४८ ऽध्याय: ॥ अश्वत्थवृक्षे । नान्दीमुखश्राद्धदेवे । यथा । इष्टिश्राद्धे क्रतुर्दक्ष: • सत्यो नान्दीमुखे वसु: । नैमित्तिके कालकामौ • काम्ये च धुरिलोचनाविति ॥ तपोलोकादूर्द्ध्वतने लोके । सत्यलोके ॥ यथोक्तं मृगेन्द्रसंहितायाम् । तत: सत्याधिप: स्थानं सत्यलोक: स्वयम्भुव: । कोटीशयसम्पन्न: कोटयो नवसप्त च । सावित्रीमूर्त्तिमत्यास्ते यत्र वेदा: ससानुगा: ॥ ततस्तपोलोकानन्तरम् • सत्यत्वाद्बुद्धित्वात् • प्राप्तकस्याधिपत्यस्य ब्रह्मण: स्थानम् • इत्यर्थ: । न० कृतयुगे ॥ शपथे ॥ यथोक्तं श्रीमहानिर्वाणे । सत्यं ब्रवीमि सच्छल्प्यस्पृष्टाकोलगुरुहितम् । गङ्गातोयं देवमूर्त्तिं कुलशास्त्रं कुलामृतम् । देवीनिर्माल्यमथवा कथनं शपथो भवेत् । तथानृतं वदन् मर्त्य: कल्पान्तं नरकं व्रजेत् ॥ अपापत्वनिकायार्थ्यां त्यागो वा परवधविधा । तत्कार्यं सम्यगामप्यैं: स्वीकृतं

अपथेनयत् ॥ लोकारोहणमाच्छु
दृष्ट्यं तपसमेकमभोजनैः । अमेधा
पितमुखण्ड्यश्चादशाहंकथाशनैः
॥ कुलधर्मोऽपिसत्येनविधिनाचेन्न
सेवितः । सोऽधायश्रेयसेनस्यात्
कौलपापायकेवलम् ॥ इति ॥ स
त्ये । अव्यभिचारिणि । अनृतवि
रोधिनि । यथादृष्टार्थभाषणे । प्र
माणेनावबुद्धस्यार्थस्यतस्यैवभाप
णे । यथाच । यथातिष्ठन्तिपुण्यानि
सत्यमाश्रित्यपार्वति । तथाऽनृ
तंसमाश्रित्यपातकान्यखिलान्यपि
॥ अतः सत्यविहीनस्यसर्वपापा
श्रयस्यच ताडनाद्दमनाद्राजान
पापार्हः शिवाज्ञया ॥ अकुलच
णामृतं पाद्मे क्रियायोगसारे । यथा
र्थकथनं यच्चसर्वलोकसुखप्रदम् ॥
तत्सत्यमितिविज्ञेयंनसत्यंतद्वि
पर्ययमिति ॥ तस्याकाराश्चोक्ताम
हाभारतेराजधर्मे यथा । सत्यञ्चस
मताचैवदमश्चैवनसंशयः । अमा
त्सर्यंक्षमाचैवह्रीस्तितिक्षानसूय
ता ॥ त्यागोध्यानमथार्यत्वंधृति
श्चसततंदया । अहिंसाचैवराजे
न्द्रसत्याकारास्त्रयोदशेति ॥ सत्य
प्रशंसायथा । नहिसत्यात्परोध
र्मोनानृतात्पातकंपरम् । नहिमा
तुः परोबन्धुर्नगुरुर्मन्त्रदात्प
रः ॥ इ० ब्र० वै० पु० ॥ अपिच

सत्यः

महानिर्वाणतन्त्रे । प्रकृष्टेऽवकलौ
देविसर्वधर्मोद्दुर्बलाः । स्थास्य
त्येकंसत्यमात्रंतस्मात्सत्यमयोभवे
त् ॥ सत्यधर्मंसमाश्रित्ययत्कर्मकु
रुतेनरः । तदेवसफलंकर्मसत्यं
जानीहिसुव्रते ॥ नहिसत्यात्प
रोधर्मोनपापमनृतात्परम् । तस्मा
त्सर्वात्मनामर्त्यःसत्यमेकंसमाश्र
येत् ॥ सत्यहीनायथापूजासत्य
हीनोवृथाजपः । सत्यहीनंतपो
व्यर्थमूषरेवपनंयथा ॥ सत्यरूप
परब्रह्मसत्यंहिपरमंतपः । सत्य
मूलाःक्रियाःसर्वाःसत्यात्
परतरंनहि ॥ अतएवमयाप्रोक्तं
दुष्कृतेप्रबलेकलौ । कुलाचारोपि
सत्येनकर्त्तव्योऽव्यक्तभावतः ॥ गो
पनाद्धीयतेसत्यंनगुप्तिरनृतंवि-
ना । तस्मात्प्रकाशतः कुर्य्यात्
कौलिकः कुलसाधनम् । कुल
धर्मस्यगुप्त्यर्थंनानृतंस्यात्जुगुप्
सितम् । यदुक्तंकुलतन्त्रेषुनशस्तं
प्रबलेकलौ ॥ कृतेधर्मश्चतुष्पाद
स्त्रेतायांपादहीनकः । द्विपादो
द्वापरेदेविपादमात्रंकलौयुगे ॥ त
त्रापिसत्यंबलवत्तपःखंजंदया
पिच । सत्यपादेकृतेलोपेधर्मलोपः
प्रजायते । तस्मात्सत्यंसमाश्रि
त्यसर्वकर्माणिसाधयेत् ॥ कुलाचा
रंविनायवनाद्युपायः कुलेश्वरि

। तस्मान्नृतप्रविशस्त्वं तेनिम्नेय संभवेत् । इति ॥ अश्वमेधसहस्रञ्च सत्यञ्च तुलया धृतम् । अश्वमेधसहस्राद्धि सत्यमेकं विशिष्यते ॥ अमृतभाषणरूपवाग्व्यापारनिरोधि, अनवगतानुबन्धियथाभूतार्थवचने । प्रियहितयथार्थभाषणे ॥ अबाधिततात्पर्यविषयेतत्त्वावेदकेवेदाख्ये प्रमाणे ॥ तदुपजीविनिपुराणादौ ॥ प्रमाणमूलेऽबाधितार्थे वाक्ये ॥ सिद्धान्ते ॥ भूतपञ्चके ॥ सच्छब्देनपृथिव्यप्तेजांसि त्यशब्देनवाय्वाकाशौ । सच्चत्यञ्च अनयोः समाहारः ॥ समदर्शने । परमार्थरूपे । अद्वैतवस्तुनि परमब्रह्मणि ॥ द्वैताद्वैतयोः प्रमाणभूतवेदप्रतिपाद्यत्वात् कस्य सत्यत्वं कस्यासत्यत्वमित्याकाङ्क्षायामाहाचार्यः अद्वैतमेवसत्यं तस्मिन् द्वैतं नसत्यमध्यस्तम् । रजतमिव शुक्तिकायाम् मृगतृष्णायामिवोदकस्फुरणम् । आरोपितं यदिद्याद्वैतं वस्त्ववस्तुनिर्द्वैते । युक्तं नैव तदास्यात् सत्ये अध्यासो भवत्यसत्यानाम् यस्यारोपणं सुभयोः स्वरूपतिरिक्तस्यकस्यचिद्भावः । आरोपणं नशून्ये तस्माद्वैतसत्यताया ह्या ॥ एवञ्च नेह नानेति श्रुतिरेवप्रमाणमित्याह । प्रत्यक्षाद्यनवगतं श्रुत्याप्रतिपादनीयमद्वैतम् । द्वैतं नप्रतिपाद्यम् स्वतस्त्वयमेव लौकिकसिद्धत्वात् ॥ ५४ ॥ इति ॥ भूतपञ्चके । सच्छब्देनपृथिव्यप्तेजांसि । त्यच्छब्देनवाय्वाकाशौ । सच्चत्यच्चसत्यमितिव्याख्यानात् ॥ व्यञ्जकालितस्तः पूर्वमूर्द्ध्वमप्यकरूपकम् । सततमविनाशं वसत्यं तद्वस्तुकथ्यते ॥ त्रि॰ तथ्यवति ॥ अबाध्ये ॥ सति सत्सु वा साधुः तत्र साधुरिति यत् ॥ पारमार्थिके । यथा । सत्यस्य सत्यः परमेश्वरः । सत्यस्य भूतपञ्चकस्य सत्यः पारमार्थिकोऽनाशोऽव्यवधिष्यमाणरूपः ॥

सत्यकामः । पुं॰ जाबालर्षौ ॥ ईश्वरे ॥ सत्या अवितथाः कामा यस्य सः ॥

सत्यगङ्गा । स्त्री॰ कामरूपदेशप्रसिद्धायां नद्यां ॥

सत्यंकारः । पुं॰ अवश्यमयैतत्कर्त्तव्यमिति सत्यकरणे । सत्यापने ॥ सत्यस्यकरणम् । भावेघञ् । कारेसत्यागदस्येतिमुम् । समयकरणे ॥

सत्यंकारकृतः । त्रि॰ अवश्यमयैतत्कर्त्तव्यमिति सत्यंकृत्वा गृहीतं यं तस्मिन् । बयाना॰ साई॰ भा॰ प्र॰ ॥

सत्यतपाः । पुं॰ मुनिविशेषे ॥
सत्यधृतिः । पुं॰ ऋषिविशेषे ॥ त्रि॰ अवितथधैर्ये ॥ सत्याऽवितथविषयाधृतिर्यस्य ॥
सत्यनारायणः । पुं॰ स्कन्दपुराणप्रसिद्धे देवताविशेषमूर्तिविशेषे ॥
सत्यपरः । पुं॰ परमेश्वरे ॥ सत्यं परं श्रेष्ठं प्राप्तिसाधनं यस्मिन् सः ॥
सत्यफलः । पुं॰ बिल्ववृक्षे ॥
सत्यभामा । स्त्री॰ श्रीकृष्णस्याष्टमहिष्यन्तर्गतमहिषीविशेषे ॥ दुर्गायाम् ॥
सत्यभारतः । पुं॰ कृष्णद्वैपायने । वेदव्यासे ॥
सत्यम् । अ॰ अङ्गीकारे ॥ प्रश्ने ॥ अभ्युपगते ॥ प्रतिबोधे ॥ सत्ये ॥
सत्यमरा । स्त्री॰ प्लक्षद्वीपस्थमहानद्याम् ॥
सत्ययज्ञः । पुं॰ पौलुषिनाम्निमुनिविशेषे ॥
सत्ययुगम् । न॰ चतुर्युगानां प्रथमयुगे । कृते ॥ यथा । कृतं सत्ययुगं त्रेता नाम्ना द्वापरयुग्मगो । कलिश्च भारकः कर्मयुगमिति विकाण्डशेषः ॥
सत्ययोनिः । पुं॰ परमेश्वरे ॥ सत्यं स्वभूतपञ्चकं यस्य योनिः कारणम् ॥

सत्ययौवनः । पुं॰ विद्याधरे ॥
सत्यरतः । पुं॰ सत्यव्रतराज्ञः पुत्रे ॥ व्यासे ॥ त्रि॰ सत्यवादिनि ॥
सत्येरतः ॥
सत्यलोकः । पुं॰ सप्तलोकान्तर्गतलोकविशेषे ॥ यथा । षड्गुणेन तपोलोकात् सत्यलोको विराजते । अपुनर्मारकायत्र ब्रह्मलोको हि सस्मृतः ॥ जनलोकात् पितस्ये वषड्गुणेन । द्वादशकोट्युच्छ्रायेण तपोलोकान्तरं सत्यलोकः । अपुनर्मारकाः । पुनर्मृत्युशून्याः ॥
सत्यवचाः । पुं॰ ऋषौ ॥ त्रि॰ सत्यवादिनि ॥
सत्यवान् । पुं॰ नृपान्तरे ॥ त्रि॰ सत्यवादिनि ॥ सत्यमस्त्यस्मिन् मतुप् । मादुपधायाश्चेतिमतोर्वत्वम् ॥
सत्यवती । स्त्री॰ व्यासमातरि । काल्याम् ॥ नारदस्य पत्न्याम् ॥ ऋचीकमुनेर्भार्यायाम् ॥ सत्यविशिष्टायाम् ॥ उगित्वान्ङीप् ॥
सत्यवतीसुतः । पुं॰ व्यासे ॥
सत्यवाक् । पुं॰ ऋषौ ॥ काके ॥ त्रि॰ सत्यवादिनि ॥ सत्यावागस्य ॥
सत्यवाक्यः । पुं॰ भगवतीपुराणप्रसिद्धे मुनिविशेषे ॥ त्रि॰ सर्वावस्थास्वपि सत्यवचने ॥ सत्यं वाक्यमस्य ।

सत्यवादी । त्रि॰ यथार्थवक्तरि । सत्योद्ये ॥

सत्यवृत्त : । त्रि॰ अकपटचरिते ॥

सत्यव्रत : । पुं॰ ईश्वरे । सत्यं व्रतं सङ्कल्पोऽस्य ॥ सूर्यवंशीयस्य त्र्यारुणस्यात्मजे राजर्षिविशेषे । योऽसौ त्रिशङ्कुसंज्ञामवाप ॥ त्रि॰ सत्यसङ्कल्पे ॥

सत्यसङ्कल्प : । त्रि॰ अमोघवाञ्छिते । ईश्वरे ॥ सत्या : सङ्कल्पा यस्य ।

सत्यसङ्गर : । पुं॰ त्रिशिरसि । श्रीदे । कुबेरे ॥ कूटाक्षवर्जितेशूराणां युद्धे ॥ त्रि॰ सत्यप्रतिज्ञे ।

सत्यसन्ध : । पुं॰ कैकयीतनये । भरते । जनमेजये ॥ त्रि॰ सत्यप्रतिज्ञे ॥ सत्या सन्धा प्रतिज्ञा यस्य ॥

सत्यसन्धा । स्त्री॰ द्रौपद्याम् ॥

सत्या । स्त्री॰ दुर्गायाम् ॥ जनकात्मजायाम् । सीतायाम् ॥ व्यासमातरि । सत्यवत्याम् ॥ सत्यभामायाम् ॥ विनापि प्रत्ययमित्युत्तरपदलोप: ॥ सत्यभामिन्याम् । अविनाशिन्यां ॥

सत्याकृति : । स्त्री॰ सत्यापने । मयैतदवश्यं कर्त्तव्यमिति तथ्यकरणे । सत्यक्रिया॰ साङ्॰ भा॰ प्रसिद्ध नियमे ॥ सत्यस्य करणं । स्त्रियां क्तिन् । सत्यादृशपथे॰ डुतिडाच् ॥

सत्याग्नि : । पुं॰ अगस्त्यमुनौ । चण्डाकर्माग्नौ ॥

सत्यानृतम् । न॰ वाणिज्ये ॥ सत्यसहितमनृतम् । शाकपार्थिवादि: ॥

सत्यापनम् । न॰ सत्यङ्कारे । सत्याकृतौ ॥ सत्यस्य करणम् । सत्यापपाशेतिणिजापुकौ । भावेल्युट् ॥

सत्योद्यम् । न॰ सत्यवचो । सत्यस्य वदने ॥ वद : सुपिक्यप् चेति क्यप् ॥

सत्त्रम् । न॰ क्रतौ । यज्ञे ॥ सदादाने ॥ आच्छादने ॥ अरण्ये ॥ केतवे ॥ यज्ञविशेषे । गवायनादिक्रतुविशेषे ॥ यत्र यजमाना एव समाना ऋत्विगादिरूपेण॰ कर्म्म कुर्वन्ति॰ तस्मिन् यज्ञे सदन्विषे सततान्नदाने ॥ धने ॥ गृहे ॥ कर्म्मणि ॥ सीदन्त्यत्राऽनेनवा । षद्लृविशरणगत्यवसादनेषु । ष्ट्रन् ॥ गृधुमीख्यादिनाबोध : ॥ सत : साधून् त्रायतेवा । त्रैङ् पालने । आतोनुपसर्गेकइतिक : । नपुंसकत्वात्सम्बुद्धौ ॥

सत्त्रम् । अ॰ सहार्थे । सत्त्रायते । त्रैङ्पालने । अम् । यरोहित्वम् ॥

सत्त्रशाला । स्त्री॰ प्रतिश्रये । अन्नदानाद्युद्दवसिते ॥

सत्त्रा । अ॰ सहार्थे ॥ सत्त्राकलत्रैर्गार्हस्थ्यम् ॥ सत्त्रायते । त्रैङ्॰ । क्विप् ॥

सत्राजित् । पुं॰ कृष्णश्वशुरे ।

सत्त्रायणम् । न॰ बहुयजमानके॰ वैदिककर्म्मणि ॥

सत्त्रि: । पुं॰ गजे । हस्तिनि ॥ अब्दे । मेघे ॥ त्रि॰ जयशीले ॥

सत्त्रिजातकम् । न॰ व्यञ्जनविशेषे ॥ यथा । मांसं बहुघृतैर्भृष्टं सिक्ताचाम्बुनामुहु: । जीरकाद्यै: समायुक्तं परिशुष्कं तदुच्यते ॥ तदेव घृततक्राढ्यं प्रदिग्धं सत्त्रिजातकम् ॥

सत्त्री । पुं॰ गृहपतौ । सदान्नादिदानकर्त्तरि गृहस्थे ॥ नाशौचं सत्त्रिणां सत्ते॰ मकारूणां स्वकर्म्मणि ॥ ऋत्विजि ॥ सत्त्रं॰ यज्ञतन्त्रमस्यास्ति । अतइनिठनाविती नि: ॥

सत्त्व: । पुं॰ न॰ जन्तौ ॥ न॰ प्रकृतेर्गुणविशेषे । प्रीत्यात्मके सत्त्वगुणे ॥ ये तु प्रीतिर्न दु:खाभावादतिरिच्यते॰ एवं दु:खमपि न प्रीत्यभावादन्यदिति मन्यन्ते॰ तान् प्रत्यात्मयश्यम् । नेतरेतराभावा: सुखादय: ॰ अपि तु भावा: ० आत्मशब्दस्य भाववचनत्वात्॰ प्रीतिरात्माभावो येषां ते प्रीत्यात्मान: । भावरूपताचैषां गुणानामनुभवसिद्धा॰ परस्पराभावात्मकत्वे तु परस्पराश्रयापत्तेरेकस्याप्यसिद्धेरुभयासिद्धिरिति भाव: । सत्त्वं लघु प्रकाशकमिष्टं साङ्ख्याचार्य्यै: । यत् सुखहेतुस्तत् सुखात्मकं सत्त्वम् ॥ चेतोधर्म्मविशेषे ॥ यस्मिन् सति न कुतश्चिद्भयमुत्पद्यते न कस्यामप्यवस्थायाम् विषाद: समुपजायते तत् सत्त्वमिति व्याख्यातार: । तथाहि । एकाकिनी वनवासिनि अराजलक्षणनीतिशास्त्रे । सत्त्वोच्छ्रिते मृगपतौ॰ राजेति गिर: परिणमन्ति ॥ पिशाचादौ ॥ बले । पराक्रमे ॥ द्रव्ये ॥ स्वभावे ॥ आत्मत्वे ॥ व्यवसाये । असुषु । प्राणेषु । चित्ते ॥ रसे ॥ आयुषि ॥ धने । लिङ्गे ॥ यथा । अन्यदुच्छृङ्खलं सत्त्वमन्यच्छास्त्रनियन्त्रितम् । सामानाधिकरण्यं हि तेजस्तिमिरयो: कुत इति ॥ जीवात्मनि ॥ अन्त:करणे ॥ निर्विकारमनसि ॥ यथा । व्यसनेऽभ्युदये वापि यस्य विकारे सदा मन: । तत् तु सत्त्वमिति प्रोक्तमिति ॥ उत्साहशक्तौ ॥ चित्तधैर्य्ये ॥ सतोभाव: । तस्य भावस्त्वतलौ । सीदन्त्यस्मिन् गुणाद्या: । षद्लृ॰ । अन्येभ्योऽपि दृश्यन्त इति त्वन् ॥

सत्त्वतनु: । पुं॰ वासुदेवे ॥

सत्त्वरम् । न॰ शीघ्रे । अविलम्बिते । त्रि॰ तद्वति ॥ सह त्वरया वर्त्तते । सहस्य स: ॥ अविलम्बितक्रियाविशेषणत्वाद्द्रव्ये वर्त्तमानं क्लीवम् । द्रव्ये तु त्रिलिङ्गं ॥

सत्त्वविशाल: । पुं॰ भुव: प्रभृतिस

स्यान्तेलोके । त्रि० सत्त्वबहुले । ऊर्द्धंसत्त्वविशाल: ॥ सत्त्वेन विशाल: ॥

सत्त्वसंशुद्धि : । स्त्री० अन्त : करणस्य निर्मलतायाम् । श्रवणादिपरिपाकेणान्त : करणस्यासम्भावनाविपरीतभावनादिमलराहित्ये सम्यक्शुद्धि : संशुद्धि : सत्त्वस्य संशुद्धि : । तस्या : सम्यक्भगवत्तत्त्वस्फूर्त्तियोग्यता ॥

सत्त्वसङ्क्षय : । पुं० चित्तभङ्गे ॥ प्रारब्धकार्यासिद्ध्यादेर्विषाद : सत्त्वसङ्क्षय : ॥

सत्त्वसमाविष्ट : । त्रि० सत्त्वेनआत्मना० आत्मविवेकज्ञानेहेतुनाचित्तगतेनातिशयेन० सम्यग्ज्ञानप्रतिबन्धकरजस्तमोमलराहित्येन० आसमन्तात्फलाव्यभिचारेण० आविष्टे व्याप्ते ।

सत्त्वसम्पन्न : । त्रि० सद्भावापन्ने ।

सत्त्वस्थ : । त्रि० सत्त्ववृत्तिप्रधाने ॥ पुं० विष्णौ ॥ सत्त्वं सत्त्वगुणं प्रकाशात्मकमधितिष्ठतिपालनोपाधितयाविष्णुरूपेणेतिसत्त्वस्थोविष्णु: । यद्वासत्त्वेषुसर्वप्राणिषुअन्तरूपेणान्तर्यामिरूपेणचतिष्ठतीतिसत्त्वस्थ : । छा० । सुपिस्थइतिक : ॥

सत्पत्रम् । न० संवर्त्तिकायाम् ॥

सत्पथ : । पुं० अर्चितेऽध्वनि । संश्वासौपन्थाश्च । सन्महदितितत्पुरुष : । समासान्तश्च ॥

सत्पुत्र : । पुं० सदपत्ये ॥ सत्पुत्रेणातुजातेनवेणोपिवृद्धिंययौ । पुत्रान्नोनरकात्त्रात : सतेनसुमहात्मना ॥

सत्पुरुष : । पुं० पूज्यमानपुरुषे ॥

सत्प्रतिग्रह : । पुं० साधुजनदत्तद्रव्यग्रहणे ॥ सद्भ्य : साधुभ्य : प्रतिग्रहोदानग्रहणम् । यथा । सप्तवित्तागमाधर्म्यादायोलाभ : क्रियोजय : । प्रयोग : कर्मयोगश्चसत्प्रतिग्रहएवचेतिमनु : ॥

सत्प्रतिपक्ष : । पुं० तुल्यव्यक्तौ । प्रतियोगिनि ॥ न्यायमते० साध्याभावसाधकंहेत्वन्तरंयस्यतस्मिन् ॥ यथा । शब्दोनित्य : श्रवणत्वात् शब्दवत् शब्दोऽनित्य: कार्यत्वाद् घटवदिति ॥ यद्वा । ह्रदोवह्निमान्धूमात्० ह्रदोवह्न्यभाववान्पाषाणवदिति ॥

सत्फल : । पुं० दाडिमवृक्षे ॥ शोभनफलवतिवृक्षे ॥

सत्सङ्ग : । पुं० साधुसङ्गमे । सधर्मवत्निजनसमागमे । यथोक्तं कुलार्णवे । सत्सङ्गश्चविवेकश्चनिर्मलंनयनद्वयम् । यस्यनास्तिनर : सोन्ध: कथंनस्यादमार्गगइति ॥

सत्सार : । पुं० खादिरे । खदिरसा

रे । वृत्तविशेषे ॥

सथूत्कारम् । न॰ अम्बूकृते ॥ थूत्कारेण सह वर्त्तमाने ॥

सदंशक: । पुं॰ कर्कटे । कुलीरे ॥ त्रि॰ दंशयुक्ते ॥

सदंशवदन: । पुं॰ कङ्कपक्षिणि । रणालङ्करणे । आमिषप्रिये ॥

सदञ्जनम् । न॰ कुसुमाञ्जने ॥

सदनम् । न॰ वस्त्ये । भवने । गृहे ॥ सीदन्त्यत्र । षद्लृ॰ । अधिकरणे ल्युट् ॥ तोये । जले ॥ ग्लानौ ॥ यथा । दौर्बल्यं सदनं कार्श्यं कुक्षिशूलमथारुचिमिति ॥

सदव्यय: । त्रि॰ विनाशापचयोपलक्षितसर्वविकारशून्ये । सं स्वासौ अव्ययश्चेति कर्मधारय: ॥

सदश्व: । पुं॰ दान्ताश्वे ॥

सद: । स्त्री॰ न॰ सभायाम् ॥ सीदन्त्यस्याम् । षद्लृ॰ । असुन् ॥

सदसदात्मकम् । न॰ स्वरूपपररूपाभ्यां निरूप्यमाणे सर्वस्मिन् जगति । जगद्धि व्यवहारदृष्ट्या सत् । परमार्थदर्शनेनासत् । तत्स्वरूपम् । सदसती आत्मा स्वरूपं यस्य तत् ॥

सदसद्भ्यामनिर्वचनीयम् । न॰ अज्ञानस्योत्कृष्टलक्षणे ॥ नेदमसम्भवि । अज्ञानस्य सत्त्वे चिदात्मवद्बाधाभावप्रसङ्गात् । असत्त्वे च वन्ध्यासुतादिवदपरोक्षप्रतिभासानुपपत्ते: बाध्यप्रतीत्योरुभयोरप्रसिद्धत्वाद्युक्तं तस्यानिर्वचनीयत्वम् ॥

सदसद्योनि: । स्त्री॰ धर्म्माधर्म्ममिश्रत्वाद्ब्राह्मणादिमनुष्येषु । तेषु हि राजसंमिश्रं फलं भुज्यते । सदसती योनि: ॥

सदसद्वादी । पुं॰ अकलङ्कचितयप्रभृतिषु॰ अर्हत्सु ॥

सदसद्विकारम् । न॰ जगति ॥ सत् आकाशवायुरूपममूर्त्तभूतद्वयम् । असत् तेजोजलभूमिरूपं मूर्त्तभूतत्रयम् । तयोर्विकारं तत्परिणामरूपं यत् तत् ॥

सदस्पति: । पुं॰ सभाधिपतौ ॥ सदस: पति: ॥

सदस्य: । पुं॰ विधिदर्शिनि । सभायामन्यूनाधिकविचारके॰ ऋत्विग्विशेषे ॥ सदसि साधु: । तत्र साधुरिति यत् ॥ सभ्ये ॥ सदसि यज्ञसभायामृत्विग्भ्योऽन्ये मिलिताये ब्राह्मणास्ते सदस्या: ॥

सदा । अ॰ सर्वकाले । सर्वदार्थे ॥ सर्वस्मिन् काले सर्वैकान्यकिंयत्तद: काले दा । सर्वस्य सोऽन्यतरस्यां दि ॥

सदाकार: । पुं॰ आत्मनि । अस्तीत्येतन्मात्रव्यवहारकारणभूताकारो यस्य स: ॥

सदागति: । पुं॰ वाते । वायौ ॥

सदागतिरस्य ॥ नाकि ॥ निर्वाणे ॥ सदीश्वरे ॥ सूर्य्ये ॥

सदाचारः । पुं॰ प्रातःकृत्यादि नियमाचरणे मसाधुव्यवहारे । शिष्टाचारे ॥ यथमनुः । तस्मिन् देशेयआचारः पारम्पर्य्यक्रमागतः वर्णानांसान्तरालानांससदाचारउच्यते ॥ तस्मिन्देशे॰ ब्रह्मावर्तदेशे ॥ सतामाचारः ॥ सदाचारवतापुंसाजितौलोकावुभावपि । विशेषः कालिकापुराणादौ द्रष्टव्यः ॥ त्रि॰ तद्वति ॥

सदाचारवान् । त्रि॰ सदाचारविशिष्टे । सदाचारिणि ॥

सदातनः । पुं॰ विष्णौ ॥ त्रि॰ नित्ये ॥ सदाभवः । सायंचिर मित्यादिना॰ ट्युट्युलातुट्च ॥

सदातोया । स्त्री॰ एलापर्ण्याम् ॥ सदानीरायांसरितिति ॥

सदादानः । पुं॰ अभ्रमातङ्गे । ऐरावते । हेरम्बे । लम्बोदरे ॥ गन्धहस्तिनि । मत्तगजे ॥ न॰ नित्यदाने ॥ त्रि॰ सर्व्वदादानशीले ॥ सदादानंयस्य ॥

सदामः । पुं॰ समरे ॥

सदाननः । त्रि॰ शोभनवदने । सतृषाननंयस्य ॥

सदानन्दः । पुं॰ सदाशिवे ॥ सदाआनन्दः सन्॰ सर्व्वदास्थायीआनन्दोयस्य । सतः साधूनाआनन्दयतीतितथा ॥ त्रि॰ सतताल्हादयुक्ते ॥ यथा । ममानन्दे सदानन्दः सदानन्दोभविष्यति । ममानंदेनिरानन्दोपिरानन्दोभविष्यतीतिपुराणे भगवतीवाक्यम् ॥

सदानर्त्तः । पुं॰ खञ्जनखगे ॥

सदानीरवहा । स्त्री॰ करतोयायाम् ॥

सदानीरा । स्त्री॰ करतोयायांसरिति ॥ गौरीविवाहसमये॰ शङ्करकरगलितसम्प्रदानतोयप्रभवत्वात्॰ सदानीरंयस्याः परमसत्त्वात् । तथाचावस्मृतिः । प्रथमेकर्कटेदेवीत्र्यहंगङ्गारजस्वला । सर्व्वारक्तवहानद्यः करतोयाम्बुवाहिनीति ॥

सदापुष्पः । पुं॰ नारिकेलवृक्षे ॥ श्वेतार्के ॥ न॰ कुन्दे । माषे ॥

सदापुष्पी । स्त्री॰ अरुणार्के । पादिक्पुष्पिकायाम् ॥

सदाप्रदः । त्रि॰ सततदातरि ॥

सदाप्रसूनः । पुं॰ अर्कवृक्षे ॥ रोहितके ॥ कुन्दवृक्षे ॥

सदाफलः । पुं॰ स्कन्धफले ॥ उदुम्बरे । नारिकेले ॥ बिल्वे ॥ सदाफलानियस्मिन् ॥

सदाफला । स्त्री॰ विसन्धिपुष्पवृक्षे ॥ वार्त्ताकुविशेषे । सदावेङ्गन॰ इ॰ भा॰ ॥ सदाफलानिदीपयन्ती

रक्तपित्तप्रसादनी । काण्डूकच्छू
रोघ्नं च० वार्ताकीगुणवत्तरेति राज
वल्लभ: ॥
सदाभद्रा । स्त्री० गम्भार्याम् । भद्र
पर्णाम् ॥
सदामुदितम् । न० दानपदवाच्या
यां पञ्चम्यां सिद्धौ ॥ त्रि० सर्वदा
हृष्टे ॥
सदायोग: । पुं० स्वस्वरूपाविर्भावे ॥
सदायोगी । पुं० विष्णौ ॥ शिवे ॥
सदाविर्भूतस्वरूपे ॥ सदायोगो
ऽस्यास्ति । इनि: ॥ अन्येषां चित्त
वृत्तिनिरोधरूपयोगश्चात् स्वरूपा-
विर्भाव: । ईश्वरस्य तु स्वरूपानाव
रणात् स्वरूपयाथात्म्याविर्भाव:
सर्वदास्तीत्यर्थ: ॥
सदाशय: । त्रि० साध्वभिप्राये ॥
सत् आशयो यस्य ॥
सदाशिव: । पुं० महादेवे । शम्भौ
॥ सदा सर्वदा० शिवं कल्याणं य
स्य० यस्माद्वा ॥
सदृक्ष: । त्रि० सदृशे ॥ समानमात्म
नापश्यति० समान इव पश्यति वा
। दृशिर्प्रेक्षणे । त्यदादिष्विति च०
क्सोपि वाच्य इति क्स: । दृक्षे चेति
समानस्य सादेश: । रूढिरियं ना
वयवार्थो ग्राह्य: ॥
सदृक् । त्रि० सदृशे ॥ समानमा
त्मनापश्यति० समान इव पश्यति
वा । दृशिर्० । त्यदादिष्विति०
क्विन् । दृग्दृशवतुष्विति सभाव:
रूढिशब्दोयमिति नावदर्शनक्रिया
पेक्षास्ति ॥
सदृश: । त्रि० तुल्ये । समे । सदृक्षे
॥ समानमात्मना० समान इवाप
श्यति । दृशिर्० । त्यदादिष्वि
ति कञ् । दृग्दृशवतुष्विति सभा
व: । रूढिरियमिति नावदर्शनक्रि
यापेक्षास्ति ॥ उचिते ॥
सदृशन्दनमस्य । न० निष्यन्दे ॥
सदेश: । त्रि० निकटे ॥ देशान्विते
॥ समानो देशोऽस्य ॥
सद्गति: । पुं० ईश्वरे ॥ सन्ति
ब्रह्मवादिन: सन्त: ० तैर्गम्यते
प्राप्यते इति तथा ॥ स्त्री० शोभन
गतौ ॥ [illegible] ॥ स
तां गतिर्बुद्धिरस्य ॥ सतामस्तिब्र
ह्मेति विदुषां गति: प्राप्यं स्थानं स
द्गति: ॥
सद्गुरु: । पुं० कौले ॥ यथोक्तं महा
निर्वाणे । शाक्ते शाक्तो गुरु: श
स्त: शैवे शैवो गुरुर्मत: । वैष्णवे
वैष्णव: सौरे सौरो गुरुरुदाहृत:
॥ गाणपे गाणपश्चैव कौल: सर्वत्र सद्गु
रु: । अत: सर्वात्मना धीमान् कौ
लाद्दीक्षां समाचरेदिति ॥
सद्भाव: । पुं० अविद्यमानत्वशङ्कायां
विद्यमानत्वे । सत: सम्भावश्चयो

भावो धर्मः सत्त्वप्रमेयत्वादिस्तस्मिन् ॥ अस्तित्वे । देवदत्तस्य पुत्रादिकमस्तीत्यस्मिन्नर्थे ॥

सद्भूतः । त्रि॰ सत्ये ॥

सद्म । न॰ वेश्मनि । निकेतने । गृहे ॥ तोये । पानीये । नीरे ॥ सीदन्त्यत्र । षद्लृविशरणगत्यवसादनेषु ; मनिन् ॥

सद्यःकृतम् । न॰ नामनि ॥ त्रि॰ तत्कालकृते ॥

सद्यःप्राणकरः । त्रि॰ तत्क्षणात् बलकारकद्रव्यादौ ॥ यथा । सद्योमांसं नवान्नञ्च बाला स्त्री क्षीरभोजनम् । घृतमुष्णोदकञ्चैव सद्यःप्राणकराणि षट् ॥

सद्यःप्राणहरः । त्रि॰ तत्क्षणात् बलायुषोर्नाशकद्रव्यादौ ॥ यथा । शुष्कं मांसं स्त्रियो वृद्धा बालार्कस्तरुणं दधि । प्रभाते मैथुनं निद्रा सद्यःप्राणहराणि षट् ॥

सद्यःशुद्धिः । स्त्री॰ सद्यःशौचे ॥ यथा । देशान्तरमृते ज्ञातिसद्यः शुद्धियतोमृते ॥ इ॰ गारुडे १०७ अध्यायः ॥

सद्यःशोथा । स्त्री॰ कपिकच्छ्वाम् ॥

सद्यःशौचः । पुं॰ कार्वादिषु ॥ ते यथा । कारवः शिल्पिनो वैद्याः दासीदासास्तथैव च । राजानो राजभृत्याश्च सद्यःशौचाः प्रकीर्त्तिताः ॥ शिशिरोगरुडकूर्मपुराणशुद्धिविवेकादौ द्रष्टव्यः ॥

सद्यः । अ॰ तत्क्षणे । सपद्दीत्यर्थे ॥ समानेऽहनि॰ इत्यस्मिन्नर्थे॰ सद्यः परुत्परार्य्यैषमद्य इत्यादिना समानस्य सभावोऽद्यस् चाहनि निपात्यते ॥ यथा । सद्यो बलहरा नारी सद्यो बलकरं पयः । स्त्रियं गच्छेत् पयः पीत्वा ताम्बूलञ्च पुनः पिबेदिति ॥

सद्यस्कः । त्रि॰ नवीने । नूतने ॥

सद्योजातः । पुं॰ शिवे । वत्से ॥ त्रि॰ तत्क्षणोत्पन्ने ॥

सद्योनिः । पुं॰ देवे । सूरे ॥ सात्त्विकेऽफलभुजि ॥ सती योनिः ॥

सद्योभावी । पुं॰ तर्णके । गोवत्से ॥ त्रि॰ तत्क्षणभवनयोग्ये ।

सद्रूपः । त्रि॰ सत्साध्यस्वरूपे । सर्वदा स्थायिस्वरूपे ॥ सत् सदा स्थायी रूपं यस्य ॥

सद्वक्ता । पुं॰ सत्कथके । सन् चासौ वक्ता च ॥

सद्वृत्तम् । न॰ सच्चरित्रे । साधुस्वभावे ॥ त्रि॰ तद्युक्ते ॥ यथा । नासमञ्जसशीलैस्तु सहासीत कदाचन । सद्वृत्तसंनिकर्षो हि क्षणार्द्धमपि शस्यते ॥

सद्वृत्तिः । स्त्री॰ शास्त्राविरुद्धजीवने ॥ प्रमाणान्तरबाधायोग्यायां ब्रह्माकारायां वृत्तौ ॥ सती चासौ वृत्तिश्च

सतिसर्वदाक्षायिविनिवृत्तिर्वा ॥
सद्वृत्तिभाक् । त्रि॰ सद्वृत्तिविशिष्टे
। यथा । पथ्याशिनांशीलवतांनरा
णांसद्वृत्तिभाजांविजितेन्द्रियाणा-
म् । एवंविधानामिदमायुरर्वा
न्व्यंसदावृद्धमुनिप्रसाद : ॥
सधर्म्मचारिणी । स्त्री॰ गृहिण्याम् ॥
सधर्म्मा । त्रि॰ तुल्ये ॥ समानोधर्मो
यस्यस : ॥ धर्म्मादनिच्केवलात् ॥
सधर्म्मिणी । स्त्री॰ समानधर्म्मवत्या
म्भार्य्यायाम् । पत्न्याम् ॥ सह
धर्मोस्त्यस्या : ॰ कर्म्मसुपत्नीसहा
धिकारात् । धर्म्मशीलवर्णान्ताच्चे
ति॰ इनि : । वोपसर्जनस्येतिवा
स : ॥
सधर्म्मी । त्रि॰ समानधर्म्मचारिणि ।
सधवा । स्त्री॰ पतिवत्याम् ॥
सधि : । पुं॰ अग्नौ ॥ सहधारणे ।
सहस्थितौ ॥ धानंधि : । सहधि.
सधि : ॥
सधि : । पुं॰ वृषभे ॥ सहते । षह॰
। सहेर्धश्चेतीसन् ॥
सध्रीची । स्त्री॰ सख्याम् ॥
सध्रीचीन : । त्रि॰ समीचीने ॥ विभा
षाञ्चेरिति॰ ख : । सहस्रसध्रि: ॥
सध्र्यङ् । त्रि॰ सहचरे । सहगच्छति
। सहाञ्चति । ऋत्विगादिनाक्वि :
क्विन् । सहस्यसध्रि : । अनदिता
मितिनलोप: ॥

सन : । पुं॰ घण्टापाटलिवृक्षे ॥ पुं॰
स्त्री॰ हस्तिकर्णास्फाले ॥ दाने ।
सनोतिषणुदाने । प॰ अच् ॥ त्रि॰
अवखण्डिते ॥
सनक : । पुं॰ विष्णो : पारिषदभेदे
। ब्रह्मण : सुते । मुनिविशेषे ॥
सनत् । अ॰ नित्यार्थे ॥
सनत् । पुं॰ ब्रह्मणि । द्रुहिणे ॥
सनत्कुमार : । पुं॰ वैद्यसंहिताप्र
वर्त्तकब्रह्मण : पुत्रे । वेधसे ॥
सनत्॰ नित्यंकुमार : । यद्वा । स
नत्॰ ब्रह्मातस्यकुमारोऽपत्यम् ॥
तन्नामकारणमुक्तंहरिवंशे । यथोत्प
न्नस्तथैवाहंकुमारइतिविद्धिमा
म । तस्मात सनत् कुमारेतिनाम
नामप्रतिष्ठितम् । इति । जिना
नांद्वादशसार्वभौमान्तर्गतसार्वभौ
मविशेषे ॥ न॰ उपपुराणविशेषे ॥
सनन्द : । पुं॰ सनन्दने । ब्रह्मण :
पुत्रे । सयथा । सनकश्चसनन्दश्च
सनातनस्तथात्मभू : । सनत्कुमा
रश्चमुनीन्निष्क्रियान्ऊर्द्ध्वरेतस : ॥
अस्त्यादितिसम्बन्ध : ॥
सनन्दन : । पुं॰ ब्रह्मणश्चतुर्थपुत्रे ॥
यथा । धर्म्मभार्य्याऽहिंसाख्या
सापुत्रचतुष्टयम् । सम्प्राप्तमुनि
शार्दूलयोगशास्त्रविचारकम् ॥
ज्येष्ठ : सनत्कुमारोभूत्॰ द्वि
तीयश्चसनातन : । तृतीय : सन

कोनामचतुर्थस्सनन्दनइति ॥ सनत्कुमारे ॥
सनपर्णी । स्त्री॰ असनपर्ण्याम्
सना । अ॰ नित्ये ॥ सनति । षणसम्भक्तौ । आप्रत्ययः ॥
सनाखल: । पुं॰ सनखले ॥ यथा । महेन्द्रभीमविमलकुरुक्षेत्रगयाः खलाः । सनापदोत्तराः साहश्याः सनखलाः खग ।
सनात् । अ॰ नित्यार्थे ।
सनातन: । पुं॰ अच्युते । विष्णौ ॥ शिवे ॥ अजे । वेधसि ॥ पितृणामतिथौ ॥ दिव्यमनुष्ये । ब्रह्मणः पुत्रे । मुनिविशेषे ॥ परम्पराप्राप्ते॰उपाधिपरिच्छेदेपिवस्तुतः परमात्मस्वरूपत्वान्नित्ये॰आत्मज्ञानंविनाछेत्तुमशक्येसंसारवृक्षे ॥ त्रि॰ स्थिरे । सुनिश्चिते । सर्वदैकरूपे । अविनाशिनि श्रुते ॥ सनाभव: । सायञ्चिरांप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौतुट्च ॥ अनादिपरम्परागते । चिरन्तने ॥
सनातनी । स्त्री॰ लक्ष्म्याम् ॥ सरस्वत्याम् ॥ दुर्गायाम् । भवान्याम् ॥ निर्वचनन्तु । सर्वकालेसनाप्रोक्तंविद्यमानेतनोतिच । सर्वचसर्वकालेषुविद्यमानासमातनोति ॥ अपिच । निर्गुणस्यचनित्यस्यवाचकस्सनातनः । सदानित्यानिर्गुणायाकीर्त्तितासासनातनीति ॥ टित्वान्ङीप् ॥
सनत्कुमार: । पुं॰ ब्रह्मणः पुत्रे॰ सनत्कुमारे ॥ सनात्॰ नित्यंकुमारः ॥
सनाथ: । त्रि॰ सस्वामिके । नाथवति ॥
सनाथा । सनाथिका । स्त्री॰ पतिवत्याम् । जीवद्भर्तृकायाम् ॥
सनाभ: । पुं॰ सोदरेभ्रातरि ॥
सनाभि: । पुं॰ ज्ञातौ । सपिण्डे ॥ सहोदरे । समानोनाभिर्मूलपुरुषोऽस्य । ज्योतिर्जनपदेतिसमानस्यसः ॥ त्रि॰ तुल्ये । सदृशे ॥
सनामक: । पुं॰ शोभाञ्जने ॥ त्रि॰ समाननामवति ॥
सनि: । स्त्री॰ भक्तौ । दाने ॥ सनोति । षणुदाने । खनिकष्यज्यादिना॰ इन् ॥ सननंवा ॥ अध्येषणायाम् । गुर्वादिप्रार्थनयाकश्चिदर्थेनियोजने ॥ यथा । हेस्वामिन्मामभिषिक्तंकुरु । अपिच । तादिनायकुलाचारनलिनीकुलवल्लभ । त्वत्पादाम्भोरुहच्छायांदेहिमूर्ध्निकृपानिधे॰ इति ॥
सनित: । त्रि॰ प्रतिपन्ने ॥
सनिष्ठीवम् । न॰ सश्लेष्मवचसि । सनिष्ठेवे । निष्ठेवनम् । ष्ठिवुनिरसने । घञ् । लघूपधगुणः । ष्ट

षीदरादित्वादीकार: । सहनिष्ठी वेन० श्लेष्मकणादिनिर्गमनेनवर्त्ततेइतिसनिष्ठीवम् ॥ त्रि० तद्वति ॥

सनिष्ठेवम् । न० सश्लेष्मवचसि । अव्यक्तोक्ते ॥ निष्ठेवनम्० निष्ठेव: । ष्ठिवु० । घञ् । लघूपधगुण: । सहनिष्ठेवेनश्लेष्मकणादिनिर्गमनेनवर्त्ततइतिसनिष्ठेवम् ॥ अव्यक्तं सनिष्ठेवमित्यमर: ॥ त्रि० तद्वति ॥

सनी । स्त्री० सनिशब्दार्थे ॥

सनीड: । त्रि० निकटे । समीपे । उपकण्ठे ॥ समानंनीडंवासस्थानमस्य । सहनीडमेतिवा ॥

सनुतर् । अ० अन्तर्द्धाने ॥

सन्तत: । पुं० ज्वरविशेषे ॥ तल्लक्षणंयथा । सप्ताहंवादशाहंवाद्वादशाहमथापिवा । सन्तत्यायोऽविसर्गीस्यात्सन्तत: सनिगद्यतइति ॥ विकल्पोवातिकादिभेदात् । सन्तत्यानैरन्तर्य्येण । अविसर्गीअपरित्यागी ॥ न० सतते ॥ त्रि० तद्वति ॥ व्याप्ते ॥ विस्तीर्णे ॥ सन्तन्यतेस्म । तनु० । क्त: । अनुदात्तोपदेशेतिनलोप: । समोवाहिततत योरितिपक्षेमलोपाभाव: ॥

सन्ततम् । अ० सातत्ये ॥

सन्तताभ्यास: । पुं० स्वाध्याये ॥

सन्तति: । स्त्री० गोत्रे । अभिजने । सन्ताने ॥ पङ्क्तौ । पुत्रपौत्रादीनां पारम्पर्य्ये ॥ विस्तारे ॥ तनये ॥ दुहितरि ॥ सन्तन्यते । तनोतिविस्तारयति वा यांस्मिन् पारम्पर्य्ये ॥

सन्तप्त: त्रि० अध्वगमनादिनाश्रान्ते । तत्पर्य्याययथा । सन्तापितस्तुसन्तप्तोधूपितधूपायितौचदूनवत् इति ॥ सन्तप्यतेस्म । तपसन्तापे । क्त: । अकर्मकत्वात्कर्त्तरिवाक्त: ॥ परमोद्विग्ने ॥ अग्निजतापयुक्ते ॥

सन्तमसम् । न० विष्वग्ध्वान्ते । व्यापकान्धकारे ॥ समन्तात् सर्वत: ० तम: । अवसमन्धेभ्यस्तमसइत्यच् ॥

सन्तरणम् । न० तरणे । पारगमने । प्लवनपूर्वकदेशान्तरगमने ॥

सन्तर्द्दनम् । न० दृढसंश्लेषे ॥

सन्तर्पणम् । न० प्रीणने । तृप्तौ ॥ द्राक्षादाडिमखर्ज्जूरीकदलीशर्करालाजाचूर्णमध्वाज्यसम्मिलिते ॥ त्रि० तृप्तिकारके ।

सन्तर्पित: त्रि० सम्यक्प्रीणिते

सन्तान: पुं० सन्ततौ । विस्तारे ॥ गोत्रे । वंशे । अन्वाये ॥ अपत्ये ॥ सन्तन्यते । तनुविस्तारे ॥ घञ् ॥ सुरद्रुमे । कल्पवृक्षे ॥ सम्यक्तनोतिपुष्पाणिकल्पलतेति सूर्व्व०तनोतेरुपसङ्ख्यानात्क्त: ॥ सम्यक्तन्यन्तेपुष्पाण्यस्मिन्नित्यधि

कारणं इवक्षे तिघञ् वा ॥

सन्तानिका । स्त्री॰ मर्कटजालके ॥ छुरिकाफले । फेने ॥ क्षीरादिसारे । मला॰ कृ॰ भा॰ ॥ सन्तानिकागुरुः शीताहृष्यापित्तास्रवातनुत् । तर्पणी बृंहणी स्निग्धा बलासवलशुक्रदा ॥

सन्तापः । पुं॰ अग्निजतापे । सज्ज्वरे ॥ सन्तापयति । तपसन्तापे । णिच् तः । पचाद्यच् ॥ सम्यगुत्तापे । शोषाये ॥

सन्तापनः । पुं॰ स्मरशुगविशेषे ॥ त्रि॰ सम्यक् तापकारके ॥

सन्तापितः । त्रि॰ अध्वादिनाश्रान्ते । सन्तप्ते ॥ सन्ताप्यतेस्म । तपदाहे चुरादिः । क्तः । अकर्मकत्वात् कर्त्तरि वा क्तः ॥

सन्तारः । पुं॰ सन्तरणे ॥

सन्तिः । स्त्री॰ दाने ॥ अवसाने ॥ पुं॰ भृत्ये ॥

सन्तुष्टः । त्रि॰ उत्पन्नालम्प्रत्यये । निवृत्तस्पृहे । सन्तोषयुक्ते । यथा । अप्राप्तं हि परित्यज्य सम्प्राप्ते समतां गतः । अदृष्टखेदाखेदोयः सन्तुष्ट इति कथ्यत इति ॥ असन्तुष्टा द्विजा नष्टाः सन्तुष्टाश्च महीभुजः । सलज्जा गणिका नष्टा निर्लज्जाश्च कुलाङ्गना ॥ पुं॰ अश्वखुरनी । खुरद्र॰ भा॰ प्रसिद्ध ॥

सन्तृणः । त्रि॰ विद्धे । व्याप्ते ॥

सन्तोषः । पुं॰ विद्यमानभोगोपकरणादधिकस्यानुपादित्सारूपायां चित्तवृत्तौ । आनमने । यदृच्छालाभसन्तुष्टौ अलाभेचाविषादे । अलम्बुद्धौ । यथासम्भवभृत्यात्मवाग्व्यवहाराश्यकपरुषयत्नाद्यनुष्ठानमाचोचितधनानधिकायांस्पृहायाम् ॥ सन्तोषामृततृप्तानांयत् सुखं शान्तचेतसाम् । कुतस्तद्धनलुब्धानामितश्चेतश्चधावताम् ॥ धृतौ । स्वास्थ्ये ॥

सन्त्रासः । पुं॰ साध्वसे । भये ।

सन्दंशः । पुं॰ कङ्कमुखे । संदशतीति व्यासेसिद्धयन्त्रविशेषे । एकाङ्गानुवादेनविधीयमानयोरप्यङ्गयोरन्तरालेविहितत्वंसन्दंशः ॥ नरकविशेषे ॥

सन्दंशिका । स्त्री॰ सुचुम्याम् ॥ लौहयन्त्रविशेषे । कातरि॰ कु॰ गौ॰ दे॰ भा॰ प्र॰ ॥

सन्दर्भः । पुं॰ प्रबन्धे । रचनायाम् । ग्रन्थने ॥ प्रकरणे ॥

सन्दर्शनम् । न॰ साक्षात्कारे । संदृश्यते । दृशिर्॰ । ल्युट् ॥ सम्यक्प्रकारेणदर्शनंवा ॥

सन्दृष्टः । त्रि॰ सम्यक्प्रकारेणदृष्टे

सन्दानम् । न॰ दामनि । देहमकालिपादबन्धनरज्जौ ॥ सन्दीयते

सम्पूर्वाद्दाणवन्धनइत्यस्माल्लुट्। पुं॰ गजस्याष्ठीवतोऽधोभागे॥

सन्दानिका। स्त्री॰ परिखदिरे। विट्खदिरे॥

सन्दानितः। त्रि॰ बद्धे॥ सन्दान्यतेस्म॥ दामखण्डने। क्तः॥

सन्दानिनी। स्त्री॰ गोगृहे॥

सन्दावः। पुं॰ पलायने। प्रद्रावे॥ सन्द्रवनम्। द्रुगतौ। समि युद्रुदुवइतिघञ्॥

सन्दाहः। पुं॰ मुखतालव्योष्ठदाहे॥

सन्दिग्धः। त्रि॰ संशयग्रस्ते। संशययुक्ते॥ सन्दिह्यतेस्म। दिह॰। क्तः॥

सन्दिग्धमतिः। त्रि॰ सन्देहविषयीभूतबुद्धियुक्ते॥

सन्दिग्धार्थः। पुं॰ सन्देहविषयीभूतार्थे॥ त्रि॰ तद्विशिष्टे॥

संदितः। त्रि॰ बद्धे। अस्यपर्यायाः। बद्धसन्दानितंमूतमुद्दितंसन्दितंसितमिति॥ सन्दीयतेस्म। दो अवखण्डने। क्तः॥ सन्द्यतेस्म॰ वा॥ ग्रथिते॥

सन्दिष्टम्। न॰ वार्त्तायाम्। सन्देशे॥ त्रि॰ व्याहृते। उक्ते। कथिते॥

सन्दिष्टार्थः। त्रि॰ सन्देशहरे॥ इ॰ कश्चित्॥

संदिहानः। त्रि॰ सांशयिके। यथा। सन्दिहानः सांशयिकः संशयापन्नमानसः॥

सन्दिह्यमानः। त्रि॰ संशयविषयीभूते। सांशयिके॥

सन्दी। स्त्री॰ खट्वायाम्॥ निषद्या खट्विकासन्दीतिचिकाण्डशेषः॥

सन्दीप्तः। त्रि॰ प्रज्वलिते। अलउठा॰ इ॰ भा॰॥ यथायावत्तिष्ठतिदेहोयंतावत्तत्त्वंसमभ्यसेत्। सन्दीप्ते भवनेकोनुकूपंखनतिपार्वति॥ सन्दीप्यतेस्म। दीपीदीप्तौ। क्तः। ईदित्वान्नेट्॥

सन्दीप्यः। पुं॰ मयूरशिखाक्षुपे॥

सन्दृशः। त्रि॰ सन्दर्शनविषये॥ नसन्दृशेतिष्ठतिरूपमस्य॥

सन्देशः। पुं॰ संवादे। संदेसा॰ इ॰ भा॰॥ घोटकस्यद्वयोरप्यन्तरास्योमध्यवर्त्तिनोद्वौद्वौदन्तौ सन्देशावुच्येते॥ सन्दिश्यते। दिश॰ः हलश्चेतिघञ्॥

सन्देशवाक्। स्त्री॰ वाचिके। परेणोक्तार्थस्यपरम्प्रत्युक्तौ॥ सन्दिश्यतेइतिसंदेशः। संदेशार्थः॰ तस्यवाक्॥ सन्दिष्टोर्थोयये॰च्यते सा॥

सन्देशहरः। पुं॰ दूते॥ संदेशंवाचिकंहरति। हञ्॰। हरतेरनुद्यमनेऽच्॥

संदेशहारकः। पुं॰ दूते॥ संदेशहारकः।॰

सन्देहः। पुं॰ विचिकित्सायाम्। संशये। हृदयशङ्कौ। यथा। व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहादलक्षणमिति। नहि संदेहमात्रादलक्षणता भवति। पुनः प्रमाणान्तरेण निश्चयोत्पत्तेरिति। संदेहनम्। दिहउपचये। भावे अन्। देहमध्यभागे॥ सन्दिह्यते॰ उपचीयते ईर्तिवा। पृथिव्यादिभूतैरुपचिते शरीरे। अलङ्कारविशेषे। यथा। विषयो विषयीयत्र साहश्यात्मकविसम्मतात्। संदेहगोचरौयातौ संदेहालङ्कृतिस्तु सैति॥

सन्दोहः। पुं॰ निकरे। समूहे॥ सन्दुह्यते। दुग्धप्रपूरणे। घञ्॥

सन्द्रावः। पुं॰ पलायने। अस्यपर्यायायथा। प्रद्रावोद्रावसन्द्रावसन्दावाविद्रवोद्रवः। अपक्रमोपयानञ्चेति॥ सन्द्रवणम्। दुर्गतौ। समियुद्रुदुवइतिघञ्॥

सन्धा। स्त्री॰ स्थितौ॥ प्रतिज्ञायाम्॥ सन्धाति॥ सन्धानम्॰ अवस्था। डुधाञ्॰। आतश्चोपसर्गेइत्यङ्॥

सन्धाता। पुं॰ शौरी॥ कर्मफलैः पुरुषान्सन्दधाति। डुधाञ्॰। तृच्। सम्यक्तं संयोजयतिकर्मफलैः पुरुषान्वा। त्रि॰ सन्धानकर्त्तरि॥

सन्धानम्। न॰ अभिषवे। सुराकरणे। सुरोत्पत्तिप्रकारे। मदचुआनना॰ वं॰ भा॰॥ सङ्घट्टने। विश्लिष्टावयवसंयोजने। जोड़जोड़ना॰ वं॰ भा॰। सन्धीयते: डुधाञ्॰। ल्युट्॥ काञ्जिके॥ मदिरायाम्॥ अवदंशे॥ सौराष्ट्रे॥ धनुषिशरयोजने॥ यथा। तदाशुकृतसन्धानंप्रतिसंहर सायकम्। आर्त्तत्राणायवः शस्त्रंनप्रहर्त्तुमनागसि॥

सन्धानितः। त्रि॰ सन्धानविशिष्टे। सङ्घट्टिते॥ इतच्॥

सन्धानी। स्त्री॰ स्वर्णरूप्यान्यसद्मनि। कुप्यशालायाम्॥ संधाने। संधिकायाम्॥

संधार्य्यः। त्रि॰ अनुष्ठेये॥

संधिः। पुं॰ राज्ञांषड्गुणान्तर्गतगुणविशेषे। स्वर्णादिदानेनबलाधिभिः प्रीत्युत्पादनान्मैत्रीकरणे। पणबन्धेनकार्य्ये। अरिविजिगीषोर्व्यवस्थाकरणरूपे॰ ऐक्यसंधौ॥ उभयोर्मिलने॥ यथा। अभीष्टदृष्टिंपरित्रायअयंसस्यनिरीक्ष्यच। स्वामिनेकथयेत्सन्धिंमन्त्री हितकरप्रभो॥ तथाचोक्तं रामा

यथेमात्यवता । यथा । ततस्तु सुमहाप्राज्ञो माल्यवान्नाम राक्षसः । रावणाग्रजः श्रुत्वा मातुः पैतामहोऽब्रवीत् ॥ विद्यास्वभिविनीतो यो राजा राजन्नयानुगः । स शास्ति चिरमैश्वर्यमरींश्च कुरुते वशे ॥ सन्दधानो हि कालेन विगृह्णंश्चारिभिः सह । स्वपक्षवर्द्धनं कुर्वन् महदैश्वर्यमश्नुते ॥ हीयमानेन कर्त्तव्यो राज्ञा सन्धिः समेन च । न शत्रुमवमन्येत ज्यायान् कुर्वीत विग्रहम् ॥ अधिकबलस्तु शत्रुं नावमन्येत नोपेक्षेत॰ किन्तु तेन सह विग्रहं कुर्वीत । हीयमानः समश्च सन्धिं कुर्यादित्यर्थः ॥ तन्मह्यं रोचते सन्धिः सह रामेण रावण । यदर्थमभियुक्ताः स्म सा च तस्मै प्रदीयताम् ॥ तस्य देवर्षयः सर्वे गन्धर्वाश्च जयैषिणः । विरोधं मा गमस्तेन सन्धिस्तेन च रोच्यतामिति सन्धीयते पूर्वोत्तररूपेऽस्मिन्निति सन्धिः संयोगे । श्लेषे । सन्धाने ॥ सन्धानम् । भावे किः ॥ पर्वसन्धौ ॥ सन्धीयते दानादिक्षमस्मिन् । डुधाञ्॰ । उपसर्गे घोः किः ॥ सुरङ्गायाम् ॥ भगे ॥ योनौ ॥ सङ्कटे । एकपर्यन्जीविनासङ्के । सावकाशे ॥ रूपकाणां मुखाद्यङ्गे । नाट्याङ्गे ॥ यथा । मुखं प्रतिमुखं गर्भोऽवमर्शश्चोपसंहृतिरिति सन्ध्यवहृति । भेदे ॥ व्याकरणे तु॰ वर्णद्वयमेलने । संहितायाम् ॥ तत्र वचनम् यथा अर्द्धमात्रोच्चारणकालेनाव्यवहितयोर्वर्णयोर्द्रुततरोच्चारणं सन्धिरिति । सन्धिविधायकसूत्रविहितकार्यं वा ॥

सन्धिका । स्त्री॰ अभिषवे । मद्यसन्धाने ॥

सन्धिचोरः । पुं॰ चोरविशेषे । कुम्भिले । हारके ॥

सन्धिजा । स्त्री॰ पुष्पविशेषवृक्षे ॥ त्रिसन्ध्यौ ॥

सन्धिजीवकः । त्रि॰ कुत्स्याविभशान्वेषिणि । पार्श्वके ॥

सन्धितः । त्रि॰ संधियुक्ते मिलिते ॥

सन्धित्सुः । त्रि॰ सन्धातुमिच्छौ । दधातेः सन्नन्तादुप्रत्ययः ॥

सन्धिनालः । पुं॰ सुगन्धिद्रव्यविशेषे । नखे । शङ्खे ॥

सन्धिनी । स्त्री॰ कृतमैथुनायां गवि । वृषभाक्रान्तायाम् ॥ अकालदुग्धायाम् । दोहकालेऽप्यः । शीघ्रादित्वादिनिः । अवश्यं सन्धत्ते वा । आवश्यके णिनि

सन्धिपूजा । स्त्री॰ शारदीयमहापूजाङ्गतत्तीयपूजायाम् ॥ यथा । अष्टमीनवमीसन्धौ तृतीया खलु कथ्यते । तत्र पूज्या त्वहं पुत्र योगिनीग

असंयुता ॥ अपिच । अष्टम्यांसंधियोगेसकलपरिजनैः पूजयेत्सस्वभावैरिति ॥

संधिबंधः । पुं॰ भूमिचम्पके ॥

संधिबंधनम् । न॰ शिरायाम् ॥

संधिला । स्त्री॰ सुरुङ्गायाम् । गूढमार्गे । सुरङ्ग॰ इ॰ भा॰ प्र॰ ॥ नद्याम् ॥ मन्दिरे । शोकसि ॥

संधिवल्ली । स्त्री॰ चित्रसन्धिपुष्पे ॥

संधिवेला । स्त्री॰ कालविशेषे । अहोरात्रादिमिलनकालरूपे ॥

संधिहारकः । पुं॰ कुम्भिले । संधिचौरे ॥

संधुक्षितः । त्रि॰ प्रदीप्ते ॥

सन्ध्यम् । न॰ स्वप्नस्थाने ॥ संध्यं स्वप्नस्थानमितिवेददर्शनात् ॥

सन्ध्या । स्त्री॰ पितृप्रस्वाम् ॥ नदीविशेषे ॥ युगसन्धौ ॥ चिन्तायाम् संश्रवे ॥ सीम्नि ॥ संधाने ॥ कुसुमान्तरे ॥ दुर्गायाम् ॥ अहोरात्रसंधौ ॥ यथा । अहोरात्रस्य यः संधिः सूर्यनक्षत्रवर्जितः । सा तु संध्या समाख्याता मुनिभिस्तत्वदर्शिभिरिति ॥ कालभार्येयम् । यथा कालस्य तिस्रो भार्याश्च संध्या रात्रिर्दिनानि च । याभिर्विना विधाता च सङ्ख्यां कर्त्तुं न शक्यतइति ॥ संध्यारात्रिदिनानामपि कालाधीनत्वात् स्त्रीसहायत्वात् स्त्रीत्वम् ॥ प्रातर्मध्याह्नसायाह्नरूपकालविशेषे ॥ त्रिकालविहितेकर्मविशेषे ॥ अतोऽत्रमहानिर्वाणतन्त्रे । संध्यात्रैकालिकी कार्या वैदिकी तान्त्रिकी क्रमात् । उपासनाया भेदेन पूजां कुर्याद्यथाविधि ॥ ब्रह्ममन्त्रोपासकानां गायत्रीजपनात् प्रिये । ब्राह्मणत्वं ततस्तस्य संध्या भवति वैदिकी ॥ अन्येषां वैदिकी संध्या सूर्योपस्थानपूर्वकम् । अर्घ्यदानं दिनेशाय गायत्रीजपनं तथा ॥ अष्टोत्तरसहस्रं वा शतं वा दशधापि वा । जपानां नियमो भद्रे सर्ववार्ह्निककर्मणि ॥ शूद्रसामान्यजातीनामधिकारोऽस्ति केवलम् । आगमोक्तविधौ देवि सर्वसिद्धिस्ततो भवेत् ॥ प्रातः सूर्योदयः काले मध्याह्नस्तदनन्तरम् । सायं सूर्यास्तसमये त्रिकाला नामयं क्रमः । इति ॥ तत्काले॰ उपास्या॰ अधिदेवता॰ संध्या । तथाच याज्ञवल्क्यः । संधौ संध्यामुपासीत नास्तगे नोद्गते रवाविति ॥ उपासनोपक्रमनाहसंवर्त्तः । प्रातः संध्यां सनक्षत्रामुपासीत यथाविधि । सादित्यां पश्चिमां संध्यामर्द्धास्तमितभास्करामिति ॥ गायत्रीमभ्यसेत्तावद्यावदादित्यदर्शनमेतत्त्वनुदितहोमीतरविषयम् । सन्ध्याकर्मोप

संध्या

सा तु स्वयं हि मे विधीयत इति दक्षोक्तेः ॥ मध्याह्नसन्ध्याया अष्टममुहूर्त्तकालमाह स्मृतिः । पूर्व्वा परे तथा सन्ध्ये सन्ध्यार्द्धं प्रकीर्त्तिते । सप्तसूर्य्येऽपि मध्याह्ने मुहूर्त्तः सप्तमोऽपरीति ॥ विशेषमाह व्यासः । गायत्री नाम पूर्व्वाह्णे सावित्री मध्यमे दिने । सरस्वती च सायाह्ने सैव सन्ध्या त्रिषु स्मृता ॥ प्रतिग्रहादन्नदोषात् पातकादुपपातकात् । गायत्री प्रोच्यते तस्माद्गायन्तं त्रायते यतः ॥ सवितृद्योतनात् सैव सावित्री परिकीर्त्तिता । जगतः प्रसवित्रीत्वाद्वाग्रूपत्वात् सरस्वतीति ॥ एतत् सन्ध्यात्रयं प्रोक्तं ब्राह्मण्यं यदधिष्ठितम् । यस्य नास्त्यादरस्तत्र न स ब्राह्मण उच्यत इति । सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्व्वकर्म्मस्विति च स्मृतिः । सन्ध्याहीनः शूद्रवद्बहिष्कर्त्तव्यः । यथाह मनुः । न तिष्ठति तु यः पूर्व्वां नोपास्ते यश्च पश्चिमाम् । स शूद्रवद्बहिष्कार्य्यः सर्व्वस्माद्द्विजकर्म्मणः ॥ इत्यनेनैव प्रत्यवायेन सन्ध्योपासनस्य नित्यता । नित्यत्वेऽपि सर्व्वदोपचितपापक्षयस्य फलत्वमपीष्टमिति कुल्लूकभट्टो गौडः । अत्र शातातपः । अब्राह्मणास्तु षट् प्रोक्ता ऋषिणा तत्त्ववादिना । आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी ॥ तृतीयो बहुयाज्यः स्याच्चतुर्थो ग्रामयाजकः । पञ्चमस्तु भृतस्तेषां ग्रामस्य नगरस्य च ॥ अनादित्यान्तु यः पूर्व्वां सादित्यां चैव पश्चिमाम् । नोपासीत द्विजः सन्ध्यां स षष्ठोऽब्राह्मणः स्मृतः ॥ राजभृतो राजसेवकः । ग्रामादेर्भृतो भरणीयः ॥ जननमरणाशौचे तन्निषेधो यथा । सन्ध्यां पञ्चमहायज्ञान् नैत्यिकं स्मृतिकर्म्म च । तन्मध्ये हापयेत्तेषां दशाहान्ते पुनः क्रिया ॥ सायंसन्ध्यानिषेधकालो यथा । सङ्क्रान्त्यां पक्षयोरन्ते द्वादश्यां श्राद्धवासरे । सायंसन्ध्यां न कुर्व्वीत कृते च पितृहा भवेत् ॥ इति ॥ तत्काले शयनादिनिषेधो यथा । स्वप्नमध्ययनं स्नानमुद्वर्त्तं भोजनं गतिम् ॥ उभयोः सन्ध्ययोर्नित्यं मध्याह्ने चैव वर्ज्जयेदिति ॥ अस्या गुणफलमाह शातातपः । अनृतं मद्यगन्धञ्च दिवा मैथुनमेव च । पुनाति वृषलस्यान्नं बहिः सन्ध्या ह्युपासिता ॥ गृहेषु प्राकृती सन्ध्या गोष्ठे शतगुणा स्मृता । नदीषु शतसाहस्री ह्यनन्ता शिवसन्निधौ ॥ प्राकृती एकगुणा ॥ कालपरिमाणमाह याज्ञवल्क्यः । ह्रासवृद्धी तु सततं दिवसानां यथाक्रमम् । सन्ध्या मुहूर्त्तमात्रं हि ह्रासे वृद्धौ च सा समेति ।

समाप्तिकालं चाह । जपन्नासीत सावित्रीं प्रत्यगातारकोदयात् । सन्ध्यां प्राक् प्रातरेवं हि तिष्ठेदासूर्यदर्शनात् ॥ प्रत्यक् पश्चिमाभिमुखः । प्राक् पूर्वाभिमुखः । आसीतेति सायं जपे आसनतीर्थम् । तिष्ठेदिति प्रातर्जपे ऊर्द्ध्वत्वार्थम् । मध्याह्नसन्ध्याजपेप्यूर्द्ध्व एव ॥ सम्यग् ध्यायन्त्यस्याम् । ध्यैचिन्तायाम् । आतश्चोपसर्गे इत्यङ् ॥ यद्वा । सन्दधाति । डुधाञ् । अन्यत्वाद्युक् । आतोलोपः । तीर्थविशेषे ।

सन्ध्यांशः । पुं॰ युगसन्धौ ॥ पश्चात्स्थविवरणं युगे ॥

सन्ध्याकालः । पुं॰ मुहूर्त्तमात्रे ॥ सन्ध्याकाले प्रणवव्याहृतित्रयोपेतां सावित्रीं ब्राह्मणादिर्जपेत् ॥ सन्ध्यायाः कालः ॥ आहारं मैथुनं निद्रां सन्ध्याकाले विवर्ज्जयेत् । कर्म चाध्ययनं चापि तथा दानप्रतिग्रहौ ॥

सन्ध्याचलः । पुं॰ शैलविशेषे । सन्ध्यां वशिष्ठः कृतवान्॰ तच्चयस्माद्विधेः सुतः । अतः सन्ध्याचलं नाम तस्याग्रे यं ति देवताः ॥ स च दक्षिणस्यां काष्ठायां चोभकाख्यशैलादैशान्यां वर्त्तते ॥

सन्ध्यानाटी । पुं॰ शम्भौ । शिवे ॥

सन्ध्यापुष्पी । स्त्री॰ जात्याम् । मालत्याम् । सुमनायाम् ।

सन्ध्याबलः । पुं॰ राक्षसे ॥

सन्ध्याबलिः । पुं॰ शिवालयोत्सृष्ट वृषे ॥ ये शिवायतने त्सृष्टास्ते सन्ध्याबलयो वृषाः ॥

सन्ध्याभ्रम् । न॰ स्वर्णगैरिके ॥ सान्ध्य मेघे ॥

सन्ध्यारागः । पुं॰ लोहिते । न॰ सिन्दूरे ॥

सन्ध्यारामः । पुं॰ विधातरि ॥

सन्ध्यालक्षणम् । न॰ सन्ध्यास्वरूपे । यथा । अर्द्धास्तमितानुदितात् सूर्यादस्पष्टभं नभो यावत् । तावत्सन्ध्याकालश्चिह्नैरेतैः फलं वाच्यम् ॥ चिह्नानि फलानि च॰ वाराहीसंहितायाम् द्रष्टव्यानि ॥

सन्ध्योपासनम् । न॰ सन्ध्यायां ब्रह्मणोऽभिन्नायागायत्र्याध्याने ॥ यथा । न भिन्नां प्रतिपद्येत गायत्रीं ब्रह्मणा सह । साहमस्मीत्युपासीत विधिना येन केन चिदिति व्यासः ॥ सन्ध्यायाः सन्ध्याकालाधिष्ठात्र्या गायत्री देव्या उपासनं ध्यानम् ॥ यथा । ब्रह्मणोपासिता सन्ध्या विष्णुना शङ्करेण च । कस्तां नोपासयेद्देवीं सिद्धिकामो द्विजोत्तमः ॥ इति याज्ञवल्क्येन देवीत्वे नकीर्त्तनात् सन्ध्यारूपाया देव्याः प्राणायामादिनोपासनमाराधनमित्यर्थः ॥ यद्वा । सन्ध्येति प्राणायामादिकर्म नाम उपासनं

सिद्धनमनुष्ठानमित्यावद्दित्यर्थः ॥

सन्न: । पुं॰ पियालवृक्षे । त्रि॰ अवसादसंयुते । शीर्णे ॥

सन्नक: । पुं॰ पियालवृक्षे ॥

सन्नकद्रु: । पुं॰ पियालवृक्षे । चारद्रु॰ भा॰ प्र॰ ॥ सन्नोलीन: कद्रु: पिङ्गलवर्णोऽस्य ॥

सन्नत: । त्रि॰ सम्यक् प्रह्वीभूताङ्गे । संनमितस्य । नम॰ । क्त: ॥

सन्नति: । स्त्री॰ ध्वनौशब्दे । प्रणतौ । नम्रतायाम् ॥ यथा । हरिवंशे । यवक्री: श्री: स्थितानव । यच्छ्रीस्तवसन्नति: । सन्नतिश्चैस्तथाश्रीस्वनित्यं कृष्णे महात्मनि ॥ सम्यक् ॰ नति: ॥ अनुकूल्ये ॥

सन्नद्ध: । त्रि॰ युद्धायसज्जे । धृतसन्नाहे । अस्यपर्यायायथा । सन्नद्धोवर्मित: सज्जोदंशितोव्यूढकङ्कट: । इति ॥ व्यूहरचनयास्थिते ॥ सन्नह्यति॰ सन्नह्यतेस्मवा । गहबन्धने । अकर्म्मकत्वात्॰ कर्त्तरि॰ कर्म्मणिवाक्त: । मन्त्रादिसंयुते ॥ सज्जाते ॥ यथा । तबैवसन्नद्धमनोज्ञपल्लवेतिरघु: ॥

सन्नद्रु: । पुं॰ पियाले ॥

सन्नय: । पुं॰ समवाये । समूहे । पृष्ठरक्षयिबले । अनुसैन्ये ॥ सन्नयनम्सन्नीयतेवा । सन्नयतिवा । णीञ् प्रापणे । एरच् । पचादच्वा ॥

सन्नहनम् । न॰ कवचादिधारणे ॥

सन्नाह: । पुं॰ कवचे । वर्म्मणि ॥ संवर्मयति॰ सन्नह्यत्यात्मनेसव्यतोत्यमो । सन्दंशते॰ दंशयते॰ सन्नाहेपदपञ्चकम् ॥

सन्नाय्य: । पुं॰ सन्नाय्योर्म्ये । युद्धार्हणी ॥

संनिकर्ष: । पुं॰ संनिधाने । समीपे । निकटे ॥ अतिशयितसंनिधौ ॥ समस्याने ॥ न्यायमतेन॰ विषयेन्द्रियसम्बन्धे ॥ सचज्ञानस्यकारणम् ॥ संनिकर्षणम् । कृष॰ । घञ् ॥

संनिकर्षणम् । न॰ संनिधौ । संनिकर्षे ॥ कृषिल्युट् ॥

संनिकृष्ट: । त्रि॰ समीपे । संनिकष्यतेस्म । कृषि: क्त: ॥

संनिभम् । न॰ संनिधाने । संनिधौ ॥

संनिधानम् । न॰ संनिधौ । निकटे ॥ आश्रये ॥ यथादिपापांसन्निधानमिति ॥ न॰ तदस्थाने ॥ सम्यङ् निधीयतेऽस्मिन् । ल्युट् ॥

सन्निधि: । पुं॰ संनिधाने । अन्तिके ॥ इन्द्रियगोचरे । प्रत्यक्षे ॥ वाक्यार्थज्ञानहेतौ । पदानामविलम्बेनोच्चारणे ॥ प्रहरेप्रहरेऽसंनिहितोच्चारितानि॰ गामानयेत्यादिपदानि नप्रमाणम्॰ सांनिध्याभावात् ।

संनिधानम् । डुधाञ् । उपसर्गयोः क्तिः ॥

संनिपतनम् । न॰ सम्यङ्निपाते ॥

संनिपातः । पुं॰ सङ्गमे । मेलने ॥ तालविशेषे ॥ यथा । एकएवगुरुर्यत्र संनिपातः स उच्यत इति ॥ त्रिदोषजनितव्याधौ ॥ यथा । व्युल्बणैकोल्बणैः षट् हीनमध्याधिकैश्च षट् । समैश्चैको विकारास्ते संनिपातास्त्रयोदश॰ इति चरकेण त्रयोदश संनिपाता उक्ताः । ते यथा । वातोल्बणः १ । पित्तोल्बणः २ । कफोल्बणः ३ । वातपित्तोल्बणः ४ । वातश्लेष्मोल्बणः ५ । पित्तश्लेष्मोल्बणः ६ । एवं षट् । अधिकवातो मध्यपित्तो हीनकफः १ । अधिकवातो मध्यकफो हीनपित्तः २ । अधिकपित्तो मध्यवातो हीनकफः ३ । अधिकपित्तो मध्यकफो हीनवातः ४ । अधिककफो मध्यवातो हीनपित्तः ५ । अधिककफो मध्यपित्तो हीनवातश्चेति षट् ६ । समैर्वातपित्तकफैस्त्वल्बण एकः १ । एवं त्रयोदश संनिपाताः ॥ संनिपतनम् । पत्लृ॰ । घञ् ॥ समूहे ॥

संनिपातज्वरः । पुं॰ त्रिदोषज्वरे ॥ त्रिदोषजनकैर्वातपित्तश्लेष्मामगैर्गताः । वह्निर्निरस्य कोष्ठाग्निं रसगा ज्वरकारिणः ॥ अथाह । संनिपातज्वरकालस्य कश्चिद्दोषमिच्छति । चिकित्सकोऽथ यस्तं तस्मात्कोऽपि प्रतापवान् ॥ त्रिदोषाजगरग्रस्तं मोचयेद्यस्तु वैराट् । आत्मापि तस्य दातव्यः किं पुनः कनकादयः ॥ इति तिम्मराजः ॥

संनिपातनुत् । संनिपातारिः । पुं॰ नेपालनिम्बे । तृणनिम्बे । ज्वरान्तके ॥

संनिबद्धः । त्रि॰ संयोजिते । सम्यग्बन्धनयुक्ते ॥ संनिपूर्वो बधेः क्तः ॥

संनिभः । त्रि॰ सदृशे ॥ संनिभाति । भा॰ । आतश्चोपसर्ग इति कः ॥

संनिरोधः । पुं॰ लये ॥

संनिवायः । पुं॰ समुदाये ॥

संनिविष्टः । त्रि॰ स्थिते ॥ उपविष्टे ॥

संनिविष्टोद्भवः । पुं॰ उपविष्टस्याभिभावे ॥

संनिवृत्तः । त्रि॰ प्रत्यागते ॥

संनिवृत्तिः । स्त्री॰ सम्यङ्निवर्त्तने ॥

संनिवेशः । पुं॰ पुरादौ गृहादिरचनापरिच्छिन्नप्रदेशे । निकर्षणे ॥ पुरादेर्बहिर्विहारभूमौ ॥ नगरादिबहिः स्वैरविहाराथभूमिषु । तत्रैव निगदितः संनिवेशो निकर्षणमिति शब्दरत्नावली । संनिविशन्तेऽत्र । विश॰ । हलश्चेति घञ्

। सम्यङ्निवेशने । रचनायाम् ॥

संनिहितम् । न० कुरुक्षेत्रे० सरोविशेषे । वि० समीपस्थे । निकटे ॥

संनिहितातीर्थम् । न० तीर्थविशेषे ॥

संनीतिः । स्त्री० सम्यङ्न्याये ॥ सम्प्रापणे ॥

सन्मानम् । न० आदरे ॥ यथा । असन्मानात्तपोवृद्धिः सन्मानात्तु तपः क्षयः । अर्चितः पूजितो विप्रो दुग्धा गौरिव गच्छतीति ॥ अपिच । तथा चरेत वै योगी सतां धर्ममनुस्मरन् । जना यथाऽवमन्येरन् गच्छेयुर्नैव सङ्गतिमिति ॥ सच्च तन्मानश्च ॥ महतां धने ॥ यथा । संसारे पुनिमग्नानां स्वस्मिन् पूज्यत्वमानिनाम् । ईश्वरात्कामकामानां सन्मानं महतां धनं ॥

सन्मार्गः । पुं० सदाचारे । श्रुत्यनुसारिणि स्मृत्युक्तधर्मे ॥ वेदमार्गे ॥ सतां स्वतःप्रमाणभूतानामप्रामाण्यकारणरहितानां वेदानां मार्गः० ब्रह्मपरत्वम् ॥

संन्यस्तः । त्रि० सम्यक्त्यागविशिष्टे० संन्यासिनि ॥ सम्यङ्न्यस्तानि० आत्मातिरिक्तानि येन । सम्यक्त्यक्ते । समर्पिते ।

संन्यासः । पुं० त्यागे । सर्वकर्मतत्फलपरित्यागे । सर्वकर्मणां भगवति समर्पणे । सफलकाम्यकर्मत्यागे । आत्यन्तिकत्यागरूपे चतुर्थाश्रमे ॥ यथा । यदा मनसि वैराग्यं जायते सर्ववस्तुषु । तदैव संन्यसेद्विद्वानन्यथा पतितो भवेत् ॥ अपिच । चित्तशुद्धकर्महेतुत्वात्तत्त्यागो ज्ञानसाधनम् । एषणात्रयसंन्यासो वित्तत्यागेन लभ्यते ॥ ज्ञानस्य हेतुः संन्यास इति शास्त्रेषु डिण्डिमः ॥ स च त्रिविधो यथा । संन्यासस्त्रिविधः प्रोक्तो विद्वद्विविदिषाश्रमैरिति । तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्तीति श्रुतौ० ब्राह्मणादुत्वच० मा ब्राह्मणः प्रव्रजेद्गृहादित्यत्र च० ब्राह्मणशब्दस्त्रैवर्णिकपरः । तेन० ब्राह्मणः क्षत्रियो वापि वैश्यो वा प्रव्रजेद्गृहादिति स्मृतेरविरोधः । तत्रैव निर्णयश्चाचार्याणाम् । यच्चतुर्थाश्रमरूपं दण्डधारणादिलिङ्गधारणं तत्तु विप्राणामेव । यस्तु सर्वकर्मत्यागलक्षणस्तत्फलत्यागरूपो वा संन्यासः स तु त्रैवर्णिकसाधारण इति ॥ एतदेव स्पष्टमुक्तं श्रीमहानिर्वाणतन्त्रे । चत्वारः कथिता वर्णा आश्रमा अपि सुव्रते । आचाराश्चापि वर्णानामाश्रमाणां पृथक् पृथक् ॥ कृतादौ कलिकाले तु वर्णाः पञ्च प्रकीर्त्तिताः । ब्राह्मणः क्षत्रियो वैश्यः शूद्रः सामान्य एव च ।

एतेषां सर्ववर्णानामाश्रमोहोमहेश्व
रि । तेषामाचारधर्मांश्च शृणुष्वा
वहितामिते ॥ पुरैव कथितं तावत्
कलिसम्भवचेष्टितम् । तपःस्वा
ध्यायहीनानां नृणामप्यायुषामपि
क्लेशप्रयासाशक्तानां कुतो देहपरिश्र
मः । ब्रह्मचर्याश्रमो नास्ति वानप्र
स्थोऽपि न प्रिये । गार्हस्थो भैक्षुकश्चै
व आश्रमौ द्वौ कलौ युगे । गृहस्थस्य
क्रियाः सर्वा आगमोक्ताः कलौ
शिवे । नान्यमार्गैः क्रियासिद्धिः
कदापि गृहमेधिनाम् । भैक्षुकेऽप्या
श्रमे देवि वेदोक्तं दण्डधारणम् । क
लौ नास्त्येव तत्त्वज्ञे यतस्तच्छ्रौतसं-
स्कृतिः ॥ शैवसंस्कारविधिनाऽवधू
ताश्रमधारणम् । तदेव कथितं भ
द्रे संन्यासग्रहणं कलौ । विप्राणा
मितरेषाञ्च वर्णानां प्रबलेकलौ उ
भयत्राश्रमे देवि सर्वेषामधिकारिता
सर्वेषामेव संस्काराः कर्त्तव्याश्चैव
वर्त्मना । विप्राणामितरेषाञ्च क
र्मलिङ्गं पृथक्पृथक् । आगमा
नो गृहस्थः स्यात्संस्कारादाश्रमी
भवेत् । गार्हस्थ्यं प्रथमं कुर्यात्यथा
विधि महेश्वरि ॥ तत्त्वज्ञाने समु
त्पन्ने वैराग्यं जायते यदा । तदा स
र्वं परित्यज्य संन्यासाश्रममाश्रयेत् ॥
विद्यामुपार्ज्य वैवाह्ये धनं दारांश्च यो
वने । प्रौढेऽप्यर्थान्विकर्माणि चतुर्थे

प्रव्रजेत्सुधीः ॥ मातरं पितरं वृद्धं
भार्याञ्चैव पतिव्रताम् ॥ शिशुञ्च तन
यं त्यक्त्वा नावधूताश्रमं व्रजेत् ॥ मा
तॄः पितॄन् शिशून् दारान् स्वजना
न् बान्धवानपि । यः प्रव्रजति हि
त्वैतान् स महापातकी भवेत् ॥ मा
तरः पितरः साध्वी नारी बालश्च बान्ध
वाः । समर्प्य स्वपितादीन्नयो
गच्छेद्भिक्षुकाश्रमे ॥ ब्राह्मणेऽवि
प्रभिन्नेषु सर्ववर्णेषु संस्क्रियाः ।
शैवे महत्त्वमाकुर्याद्देवधर्म्मः क
लौ युगे । इति ॥ अपि च । अवधूता
श्रमे देवि कलौ संन्यास उच्यते । कृ
त्वा पञ्चाश्च । ब्रह्मज्ञाने समुत्पन्ने
विरते सर्वकर्मणि । अध्यात्मवि
द्यानिपुणः संन्यासाश्रममाश्रये
त् ॥ विहाय वृद्धौ पितरौ शिशुं
भार्यां पतिव्रताम् । त्यक्त्वाऽसमर्थान्
बन्धून् प्रव्रजन्नारकी भवेत् । ब्रा
ह्मणः क्षत्रियो वैश्यः शूद्रः सा
मान्य एव च । कुलावधूतसंस्कारे
पञ्चानामधिकारिता ॥ सम्यङ्
न्यासः सन्न्यासः । सन्न्यस्तवान्
शिवादिवत् । ... न्या
सस्त्याग । संन्यास इत्यर्थः । य
थामुकूलं मालविकाग्निमित्रे कालिदासः । सन्न्या
सः श्रुतियुक्तविशिष्टवर्णे वैरस्ये
कमिरत्नोऽन्तपूजितम् । कौरिक्षे
श्रेयसे दर्शितं सिद्धये सर्वमिच्छ

ज्ञखरकरेषुचोत्तरास् ॥ नीरिक्तस्थिरसदने कुम्भराशिवर्ज्जितेस्थिरराश्युदयेसतीष्वर्थ: ॥

सन्यासी । पुं० चतुर्थाश्रमिणि । अवधूते । अस्यपर्य्यायायथा । भिक्षु: परिव्राट् कर्म्मन्दीपाराशर्य्यपिमस्करीति ॥ ज्ञानसन्यासिन: केचिद्वेदसन्यासिनोऽपरे । कर्म्मसन्यासिनस्त्वन्ये त्रिविधा: परिकीर्त्तिता: ॥ य: सर्वसङ्गनिर्म्मुक्तोनिर्द्वन्द्वश्चाविनिर्भय: । प्रोच्यतेज्ञानसन्यासी स्वात्मन्येवव्यवस्थित: ॥ वेदमेवाभ्यसेन्नित्यं निराशीनिष्परिग्रह: । प्रोच्यतेवेदसन्यासीमुमुक्षुर्विजितेन्द्रिय: ॥ यस्त्वग्नीनात्मसात्कृत्वाब्रह्मार्पणपरोद्विज: ज्ञेय: सकर्म्मसन्यासीमहायज्ञपरायण: ॥ त्रयाणामपिचैतेषांज्ञानीत्वभ्यधिकोमत: । नतस्यविद्यतेकर्म्मनलिङ्गाद्यादिपश्चित: ॥ युगभेदेसन्यासिनांनामान्याचार्य्यस्ययथा । आदौवेदान्ताचार्य्योब्रह्मा । द्वितीयाचार्य्योविष्णु: । तृतीयाचार्य्योरुद्र: । चतुर्थाचार्य्योवशिष्ठ: पञ्चमाचार्य्य: शक्ति: । षष्ठ: पराशर: । सप्तमोव्यास: । अष्टम: शुक: । नवमोगौड: दशमोगोविन्द एकादश श्रीशङ्कराचार्य: ॥ सत्ययुगे आचार्य्यत्रयंब्रह्मविष्णुरुद्रो: । त्रेतायामाचार्य्यत्रयं वशिष्ठशक्तिपराशरा: द्वापरस्याचार्य्यद्वयंव्यासशुकौ । कलावाचार्य्यत्रयं गौडगोविन्दशङ्कराचार्य्या: ॥ शङ्कराचार्य्यस्यचत्वार शिष्या:स्वरूपाचार्य्य: पद्मपादाचार्य:त्रोटकाचार्य: पृथ्वीधराचार्य्यश्चेति । अथदशनामानि । स्वरूपाचार्य्यस्यशिष्यौतीर्थाश्रमौ । पद्माचार्य्यस्यवनारण्यौ । त्रोटकाचार्य्यशिष्या: गिरिपर्वतसागरा: । पृथ्वीधराचार्य्यस्यशिष्यत्रयं सरस्वतीभारतीपुरीचेतिशङ्कराचार्य्यरचितसम्प्रसूत्रम् ॥ अपिच । तीर्थाश्रमवनारण्यगिरिपर्वतसागरा: । सरस्वतीभारतीचपुरीतिदशकीर्त्तिता: ॥ तेषांलक्षणानियथा । त्रिवेणीसङ्गमेतीर्थे तत्त्वमस्यादिलक्षणे । स्नायात्तत्त्वार्थभावेनतीर्थनामासउच्यते ॥ १ ॥ आश्रमग्रहणे प्रौढ आशापाशविवर्ज्जित: । यातायातविनिर्मुक्तएतदाश्रमलक्षणम् ॥ २ ॥ सुरम्येनिर्झरेदेशेवनेवासंकरोतिय: । आशापाशविनिर्मुक्तो वननामासउच्यते ॥ ३ ॥ अरण्येसंस्थितोनित्यमानन्दनन्दनेवने । त्यक्त्वासर्वमिदंविश्वमारण्यलक्षणंकिल ॥ ४ ॥ वासोगिरिवरेनित्यं गीताभ्यासेहितत्पर: । गम्भीराचलबुद्धिश्चगिरिनामासउच्यते ॥ ५ ॥

वसेत् पर्व्वतमूलेषु प्रौढो योऽध्यानधा
रणात् । सारात् सारं विजाना
ति पर्व्वतः परिकीर्त्तितः ॥ ६ ॥
वसेत् सागरगम्भीरो वनरत्नपरिग्रहः
। मर्य्यादाञ्च न लङ्घेत सागरः परि
कीर्त्तितः ॥ ७ ॥ स्वरज्ञानवशो
नित्यं सुरवाद्यौकवीश्वरः । संसा
रसागरे साराभिज्ञो यो हि सरस्वती
॥ ८ ॥ विद्याभारेण सम्पूर्णः स
र्व्वभारं परित्यजेत् । दुःखभारं
न जानाति भारती परिकीर्त्तितः
॥ ९ ॥ ज्ञानतत्त्वेन सम्पूर्णः पू
र्णतत्त्वपदे स्थितः । परब्रह्मरतो नि
त्यं पुरीनामा स उच्यते ॥ १० ॥
इति शङ्करविजये श्रीविद्यारण्य
स्वामिनः ॥ अस्य धर्म्माचरणादि
कं मनुस्मृतौ ब्रह्मवैवर्त्तगरुडकूर्म्म
पुराणादिषु द्रष्टव्यम् । विधानन्तु श्री
महानिर्व्वाणतन्त्रे श्रीसदाशिवेनोक्तं
तत् ततोऽवगन्तव्यम् ॥ सन्न्या
सोऽस्यास्ति । अत इनिः ॥ अस्या
मग्निविधिमाह शौनकः । सर्व्वसङ्ग
निवृत्तस्य ध्यानयोगरतस्य च । न त
स्य दहनं कार्य्यं नैव पिण्डोदकक्रिया
॥ निदध्यात् प्रणवेनैव विले भिक्षोः
कलेवरम् । प्रोक्षणं खननञ्चैव सर्व्वं
तेनैव कारयेत् इति ॥

सन्मुखः । त्रि॰ अभिमुखे ॥

सपक्षः । त्रि॰ निश्चितसाध्यवति ।
साध्यवत्त्वनिश्चयविषये । यथा धूम
वत्त्वे॰ महानसम् ॥ अनुकूले । स
मानः पक्षः । इति विग्रहे॰ स
मानस्येति योगविभागात् समादेशः
॥ यद्वा । सशब्दः सदृशवचनः ।
तेनास्वपदविग्रहो बहुव्रीहिः॰ स
मानः पक्षोऽस्य॰ इति सपक्षः ॥

सपणः । पुं॰ ग्लहे ॥ पणेन सह वर्त्त
माने॰ व्यवहारविशेषे ॥ यथा यद्य
हमत्र पराजितो भवामि॰ तदा शतं
दास्यामीति ॥

सपत्राकरणम् । न॰ अत्यन्तपीडने ॥
सपत्रनिष्पत्रादतिव्यथने इति डाच् ॥

सपत्राकृतः । पुं॰ हतमृगादौ ॥
त्रि॰ अत्यन्तपीडिते ॥

सपत्राकृतिः । स्त्री॰ अत्यन्तदुःखे
। निष्पत्राकृतौ ॥

सपत्नः । पुं॰ शत्रौ ॥ सपत्नीव ॥ व्य
न् सपत्न इति निर्द्देशादकारः । इ
वार्थे अन् प्रत्ययो वा ।

सपत्नारिः । पुं॰ वेणुवंशे ॥ शत्रोः
शत्रौ ॥ सपत्नस्य अरिः ॥

सपत्नी । स्त्री॰ समानपतिकायाम् ॥
समानः एकः पतिर्यस्याः॰ इति
विग्रहे॰ सपत्न्यादिषु समानस्य स
भावो निपात्यते । नित्यं सपत्न्या
दिष्विति ङीप् ॥

सपत्नीकः । पुं॰ पत्नीसहिते ॥ सह प
त्न्या वर्त्तते इति तथा नद्यृतश्चेति

रूप् ॥

सपदि । अ० तत्क्षणे । शीघ्रे । स म्प्रत्यस्मिन् । पदगतौ । कृन् । पृषोदरादित्वात् समोऽस्य लोपः ॥

सपर्य्या । स्त्री० पूजायाम् । पर्य्यायास्तु । पूजा नमस्याऽपचितिः सपर्य्याऽर्च्चाः समाहृति । सपर्य्यम् । सपर्य्यपूजायाम् । कण्ड्वादिभ्यो यक् । अप्रत्ययात् ॥

सपादः । त्रि० चरणयुक्ते । चतुर्थभागयुक्ते ॥

सपादपीठः । त्रि० पादपीठयुक्तसिंहासनादौ ।

सपादमत्स्यः । पुं० मीनराशिविशिष्टमत्स्ये । सपादमत्स्योऽभिधाकर्म्मादः च्छ कारकः । वातपित्तकरश्चापि रुचिकृत् परमो मतः ॥

सपादशाण्डः । पुं० न० सुगन्धिविशेषे । चाणो० इ० भा० ॥

सपिण्डः । पुं० समानो । सप्तपुरुषावधिज्ञातौ ॥ यथा । प्रपितामहः । पितामहः । पिता । स्वयंसोदर्य्यभ्रातरः । सवर्णाया पुत्रः पौत्रः प्रपौत्रः । एतानविभक्तदायादान् सपिण्डान् प्रचक्षते । येषां मद्ये पिण्डदातायेषां तनुपिण्डदातारस्तेऽविभक्तपिण्डकाः पदायमग्न्येविभक्तदायादाः । सपिण्डाः । समानः पिण्डो देहो मूलपुरुषो निवापो वा । वान्त्य न सपिण्ड इति निर्द्देशात् समानश स् ॥ यथा । सहपिण्डेन वर्त्तते इति तथा ॥ सपिण्डतातु पुरुषे सप्तमे विनिवर्त्तते । सवायोर्यविवाहवाभेदासिविधः । तथागौचसपिण्डस्य सम्बन्धंयथा । सप्तपुरुषान्त० गन्तत्वे सतिगोत्रवैक्यसमिदात्वमेतु स्वान्यतरसम्बन्धे सपिण्डत्वमन्यतरवत्त्वम् । दत्तकन्यानां तु भर्तृसापिण्ड्येन सापिण्ड्यामृषदत्तानांपि चवधिसप्तपुरुषसापिण्ड्यम् ॥ विवाहसपिण्डास्तु । पितृपितृबन्धुपेक्षया सप्तमपुरुषावधयः मातामहमातृबन्धुपेक्षया पञ्चमपुरुषावधयश्च । यथा । पञ्चमात् सप्तमादूर्द्ध्वं मातृतः पितृतः क्रमात् । सपिण्डतानिवर्त्तेत सर्व्ववर्णेष्वयं विधिः ॥ दायसपिण्डास्तु । त्रिपुरुषाऽवधयः । तेच पितृपितामहप्रपितामहाः । तेषां पुत्रपौत्रप्रपौत्रदौहित्राः । मातामहप्रमातामहवृद्धप्रमातामहाः । तत्पुत्रपौत्रप्रपौत्राश्चेति दायभागः ॥

सपिण्डता । स्त्री० सापिण्ड्यं यथा । पितृमातृबन्धुर्थोया : पिताया : पिण्डभागिनः । पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषमिति ॥ तमेवाक्ते वेव सपिण्डता । सपिण्डतातु पर्व्वनिवर्त्तते : साप्तपौरुषी ।

तेनमातामहादीनामेकपिण्डसंबन्धे
पिनसपिण्डता ॥ सपिण्डस्यभावः
। तल् । टाप् ॥

सपिण्डीकरणम् । न० श्राद्धविशेषे ।
प्रेतपिण्डस्य पितृपिण्डेनसहमिश्री
करणे ॥ तच्चपूर्णेसंवत्सरेसपि
ण्डीकरणमितिमुख्यकल्पः । तदशक्तौ
नवमोमासः तदशक्तौषष्ठोमासः
तत्राप्यशक्तौत्रिपक्षः तत्राप्यशक्ता
वशौचापगमेप्रथममासस्यद्वादशभि
र्दिनैर्द्वादशमासिकानिश्राद्धानिनि
र्वर्त्त्यत्रयोदशाहः सपिण्डीकरणका
लः ॥ सपिण्डीकरणविषयेकूर्मपु
राणंयथा । सपिण्डीकरणंप्रोक्तंपू
र्णेसम्वत्सरेपुनः । कुर्य्याच्चत्वारिपा
त्राणिप्रेतादीनांद्विजोत्तमाः ॥
प्रेतार्थंपितृपात्रेषुपात्रमासेचयेत्त
तः येसमानाइतिद्वाभ्यांपिण्डा
नप्येवमेवहि ॥ सपिण्डीकरणश्रा
द्धंदेवपूर्वंविधीयते । पितृनावाह
येदत्रपृथक्पिण्डंचनिर्दिशेत् । येस
पिण्डीकृताप्रेतानतेषांस्यात्पृथक्
क्रिया । यस्तुकुर्य्यात्पृथक्पिण्डंपितृ
हासोपिजायते० इति ॥

सपीतकः । पुं० राजकोषातक्याम् ॥

सपीतिः । स्त्री० आत्मीयेनजनेनसह
मिलित्वैककालकृतेपाने । तुल्यपा
ने । पानम् । पापानेस्त्रियांक्तिन्
। घुमास्थेतीत्वम् । समानापीति
। समानस्यच्छन्दसीतिसभावः । स
हपीतिर्वा । सहस्यसः संज्ञायां ॥

सपीतिका । स्त्री० हस्तिघोषायाम् ॥

सपुत्रः । त्रि० पुत्रेणसहवर्त्तमाने ॥

सप्तकः । पुं० सप्तसङ्ख्यायाम् ॥
त्रि० सप्तसङ्ख्याविशिष्टे ॥ सप्त
भिः क्रीतेवस्तुनि ॥ सङ्ख्यायाअ
तिशदन्तायाः कन्नित्यार्हीयेष्वर्थे
षुकन् ॥

सप्तकी । स्त्री० मेखलायाम् । काञ्च्या
म् । कटिभूषणे ॥ सपति । षप
समवाये । बाहुलकात्तन् । स्वार्थे
कन् ॥ यद्वा । सप्तभिरनेकाभिः
किङ्किणीभिर्वा० सप्तस्वरान्वा० का
यति । कैशब्दे । आतोनुपसर्गे
कः । गौरादित्वान्ङीष् ॥

सप्तगङ्गम् । न० तीर्थविशेषे ॥

सप्तगोदावरम् । न० सप्तानांगोदावरी
णांसमाहारे ॥ तीर्थविशेषे ॥

सप्तच्छदः । पुं० सप्तपर्णवृक्षे । का
ण्डेकाण्डेसप्तच्छदाअस्य । सङ्
ख्याशब्दस्यवृत्तिविषयेवीप्सार्थत्व
म् । न० तत्पुष्पे ॥

सप्तजिह्वः । पुं० अनले । अग्नौ ॥ सप्त
काल्यादयोजिह्वाआहुतिग्रसनार्थाः
यस्यसः । तथया । कालीकराली
चमनोजवाचसुलोहिताचयासुधूम्र
वर्णा । स्फुलिङ्गिनीविश्वरुचीचदे
वीलेलायमानेतिचसप्तजिह्वाः इति

सुगन्धकम् ॥ उत्तरार्द्धे॰ उद्यत्प्रदीप्तांशुकपीतयोनिःसप्तैवकीलाः कथिताश्चजिह्वाः॰इतिपाठान्तरमन्यत्र॥

सप्तज्वालः । पुं॰ अग्नौ ॥

सप्ततन्तुः । पुं॰ यज्ञे । सवे । अध्वरे ॥ सप्तभिश्छन्दोभिरग्निजिह्वाभिर्वा॰ तन्यते । तनु॰ । सितनिगमीतितुन् ॥ यद्वा । सप्तजिह्वाश्छन्दांसिवा॰ तन्यन्तेऽत्र ॥ सप्ततन्तवः संस्थायस्यवा ॥

सप्ततिः । स्त्री॰ दशाधिकषष्टिसङ्ख्यायाम् ७० । सत्तर॰ इ॰ भा॰ प्र॰ ॥ सङ्ख्येये ॥ सप्तदशतः परिमाणमस्य । पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतमितिनिपातनात् प्रकृतेः सप्तभावस्तिप्रत्ययश्च ॥

सप्ततितमः । त्रि॰ । सप्ततेः पूरणे ॥ तस्यपूरणे डट् । विंशत्यादिभ्यस्तमडन्यतरस्यामितिडटस्तमडागमः ॥

सप्तदशः । त्रि॰सप्तदशानांपूरणे॥डट्॥

सप्तदश । त्रि॰ । सङ्ख्याभेदे । सप्ताधिकदशसु १७ ॥ सङ्ख्येये ॥

सप्तदशावयवम् । न॰ लिङ्गशरीरे ॥ सप्तदशअवयवायस्य : । तेयथा । ज्ञानेन्द्रियपञ्चकम्॰ बुद्धिमनसी कर्मेन्द्रियपञ्चकम् प्राणादिपञ्चवायवइति ॥

सप्तदीधितिः । पुं॰ । स्वर्द्दीधितौ ।

अग्नौ ॥

सप्तद्वीपपतिः । पुं॰ । सप्तद्वीपानामधिपतौ ॥ द्वीपास्तु॰ जम्बूशाककुशक्रौञ्चद्वयोर्द्वीपशब्दे द्रष्टव्याः ॥

सप्तद्वीपा स्त्री॰ । वसुमत्याम् । भूमौ ॥ यथा । मनोः स्वायम्भुवस्यासन्दशपुत्रास्तुतत्समाः । यैरियंपृथिवीसर्वासप्तद्वीपासपत्तना ॥ ससमुद्राकरवतीप्रतिवर्षंनिवेशितेति ॥ अस्याः परिमाणमुक्तंशैवतन्त्रे । कोटिद्वयंद्विपञ्चाशल्लक्षाणिचततः परम् । पञ्चाशत्सहस्राणि सप्तद्वीपाससागरा ॥ ततोहिममयीभूमिर्दशकोट्योवरानने । देवानांक्रीडनार्थायसा कालोऽस्ततः परमिति ॥ सप्तद्वीपायस्यांसा ॥

सप्तधा । अ॰ सप्तप्रकारे ॥

सप्तधातुः । पुं॰ शरीरे । सप्तधातवस्त्वगादयोयस्मिन् ॥

सप्त । त्रि॰ सङ्ख्याविशेषे । सातइतिभा॰ प्र॰ ॥ सङ्ख्येये । यथासप्तसमुद्राः ॥ सपति । षप समवाये । सप्यशूभ्यांतुट्चेतिकनिन् ॥

सप्तनाडीचक्रम् । न॰ स्वरोदयोक्ते वृष्टिज्ञानार्थंपञ्चनखाङ्कितसप्तनाडिकसर्पाकारचक्रे ॥

सप्तनामा । स्त्री॰ आदित्यभक्ता

याम् ॥

सप्तपत्रः । पुं॰ सप्तच्छदे ॥ मुद्गरवृक्षे । सप्तसप्तपत्रा यस्य ।

सप्तपदार्थवादः । पुं॰ आर्हतानांवादे । यथा । जीवाजीवात्मकंविश्वं॰ चेतनःस्वशरीरवत् । परिणामावयवानजीवः षड्विधः स्मृतः ॥ महीधरादिरेकःस्यात्पञ्चधा चास्रवादिकः ; आस्रवः संवरो निर्जरोबन्धोमोक्षएवच ॥ इन्द्रियाख्यविषेकादिः कैशोलुञ्चादिभिस्तपः । जन्मान्यूर्ध्वंगतिश्चेतिपञ्चानामर्थउच्यते । स्यादस्तीत्यादिनासप्तभङ्गीन्यायेनवादिनः । सप्तैवक्रमशोऽपाश्यमतथंसाधयेत्सुधीरिति ॥

सप्तपदी । स्त्री॰ विवाहाङ्गसप्तपदीगमने । सप्तानांपदानांसमाहारः । द्विगोरितिङीप् ॥

सप्तपर्णः पुं॰ छतवनीतिख्यातेवृक्षे । पर्यायास्तु । सप्तपर्णोविशालत्वक्शारदोविषमच्छदइति ॥ सप्तपर्णोव्रणश्लेष्मवातकुष्ठासृजन्तुजित् ॥ दीपनः श्वासगुल्मघ्नः स्निग्धोष्णस्तुवरःसरः इतिगुणाः ॥ काण्डेकाण्डेसप्तसप्तपर्णान्यस्य । क्वचित्सङ्ख्याशब्दस्यवृत्तिविषयेवीप्सार्थत्वमितिकेयटादिव्याख्यानात् ॥

न॰ मिष्टान्नविशेषे ॥ यथा । द्राक्षादाडिमखर्जूरमृदिताम्रंसशर्करम् । लाजचूर्णंसमध्वाज्यंसप्तपर्णमुदाहृतम् ॥

सप्तपर्णी । स्त्री॰ लज्जालौ ॥

सप्तपलाशः । पुं॰ सप्तपर्णद्रुमे ॥ सप्तसप्तपलाशानिपत्राणिपर्वसुयस्य ः ॥ न॰ सप्तपर्णपुष्पे ॥

सप्तपातालम् । न॰ सप्तसङ्ख्याकाधोभुवने ॥ यथा । अतलंवितलञ्चैवनितलञ्चगभस्तिमत् । महाख्यंसुतलञ्चाग्र्यंपातालंसप्तमंविदुरिति । नामान्तराण्यपियथा । आभासंपरतालाख्यंवितलंचगभस्तिमत् । महातलंरसाकञ्चपातालंसप्तमंमतं इति ॥ एतेषामधिपायथा । सप्तस्वेतेषुदैत्येन्द्रभुजङ्गक्षणदाचराः । सप्तसप्तसमाख्यातास्तानप्यथनिबोधमे ॥ दैत्याः शङ्कुश्रुतिः पूर्वंप्रह्लादः शिशुपालकः कर्णान्धुकौहिरण्याक्षोवृद्धिर्भीमबलिस्तथा ॥ काद्रवेयाः कुटिलकोवासुकिः कम्बलस्तथा । कर्कोटकोथकालाङ्कोदर्शस्तक्षकस्तथा ॥ विकटाद्योद्भिताश्चयमाख्योविकटाननः करालोभीमनिर्ह्रादःपिङ्गलश्चेतिराक्षसाः इति ॥

सप्तपुरुषः । स्त्री॰ सप्तवस्करायाम् । सप्तपुत्रायाम् ॥

सप्तप्राणाः । पुं० ब० सप्तेन्द्रियेषु ॥ यथा । अन्तःकरणत्वान्मनस एकत्वेन० पञ्चकर्म्मेन्द्रियाणामेकत्वसङ्ख्यया च हे० पञ्चबुद्धीन्द्रियाणि० सङ्कलनया सप्तेन्द्रियाणि० सप्तप्राणपदवाच्यानि भवन्तीति ॥ शीर्षण्येषु सप्तप्राणेषु ॥

सप्तभङ्गी । स्त्री० अनेकान्तवादिनां न्यायविशेषः ॥ देहग्रहणात् पूर्ब्बं जीवः किमस्ति० उत नेति यः पर्य्यनुयुङ्क्ते० तम्प्रति० अनेकान्तवादिभ्युपगन्तव्यः । यथा । स्यादस्ति० स्यान्नास्ति० स्यादस्ति च नास्ति च० स्यादवक्तव्यः० स्यादस्ति चावक्तव्यश्च० स्यान्नास्ति चावक्तव्यश्च० स्यादस्ति च नास्ति चावक्तव्यश्चेति । अत्र हि यद्यत्पर्य्यनुयोज्यं तत्तत्सदसत्तया समाधेयम् । तत्र वाच्यतयाऽवाच्यतयापि च विरोधः स्थानिस्तु घटनीयः । इति सप्तभङ्गी सोऽयं बहुवाचतामञ्जीयमिह किन्तत् ॥ यतस्यादस्ति स्यान्नास्ति स्यादिति प्रदुर्गलिभिर्भ्राम्यति जगत्सर्व्वमिति ॥

सप्तभद्रः । पुं० शिरीषवृक्षे ॥

सप्तभूराद्यः । पुं० ब० प्राणिनां कर्म्मज्ञानफलोपभोगस्थानविशेषेषु० यथापाठक्रममुपर्य्युपरिवर्त्तमानेषु० भूर्भुवः स्वर्म्महर्जनतपः सत्येषु ॥

सप्तमः । त्रि० सप्तानां पूरणः ॥ डट् । तस्य मडागमः ॥

सप्तमी । स्त्री० तिथिविशेषः । सा तु० कृ० भा० प्र० ॥ तत्रोत्पन्नजनस्य फलं यथा । कन्या प्रजोद्भैरि कुलेभसिंहे विशालनेत्रः प्रथितप्रभावः । देवद्विजाचाररसिको महात्मा स्यात् सप्तमीजः किल वित्तहर्त्ता ॥ व्रतादौ षष्ठीयुता ग्राह्या ॥ ङ० षोस्० सुप्० इति चक्रे ॥ टित्त्वान्ङीप् ॥

सप्तरक्तम् । न० शरीरस्य रक्तवर्णविशिष्टेषु सप्तावयवेषु ॥ तच्च सामुद्रवाक्यं यथा । पाणिपादतलौ रक्तौ नेत्रान्तरनखानि च । तालुकाधरजिह्वाश्च सप्तरक्तं प्रशस्यते इति ॥

सप्तर्षयः । पुं० ब० मरीच्यादिमुनिषु० चित्रशिखण्डिषु । यथोक्तं पाद्मे सृष्टिखण्डे । सप्तर्षिमण्डलं तस्माद्दृश्यते सर्व्वतोपरि । तत्र सप्तर्षयः सन्ति विनियुक्ताः प्रजासृजा ॥ मरीचिरत्रिः पुलहः पुलस्त्यः क्रतुरङ्गिराः । वशिष्ठश्च महाभाग । ब्रह्मणो मानसाः सुताः ॥ सप्त ब्रह्माण इत्येते उच्यन्ते ब्रह्मवादिभिः । सम्भूतिरनसूया च क्षमा प्रीतिश्च सन्नतिः ॥ अरुन्धती तथा लज्जा तत्पत्न्यो लोकमातरः । एतासां तपसा

चैतद्धार्यते भुवनत्रयम् । सन्ध्यात्रयमुपासीना गायत्रीजपतत्पराः । तस्मिंल्लोके वसन्त्येते ब्राह्मणा ब्रह्मवादिनः इति पाद्मे ११ऽध्यायः ॥

सप्तला । स्त्री० नवमालिकायाम् ॥ सप्तलाति । ला० । आतोऽनुपेति कः ॥ चर्मकषायाम् । सातलायाम् ॥ गुञ्जायाम् ॥ पाटलायाम् ॥

सप्तवाहनः । पुं० आदित्ये ॥ सप्ताश्वा वाहनान्यस्य । सप्तनामकएकोऽश्वो वाहनमस्य वा ॥ एकोऽश्वो वहति सप्तनामेति श्रुतेः ॥ वहति० आदित्यरथम् ॥

सप्तशती । स्त्री० सप्तशतिकायाम् ॥ सप्तशतमन्त्रात्मकदेवीमाहात्म्ये ॥ गीतायाम् ॥ सप्तानां शतानां समाहारः । द्विगोरिति ङीप् ॥

सप्तशलाकः । पुं० विवाहोपयोगि वेधविशेषे ॥ यथा । ऊर्ध्वगाः सप्तरेखास्तु तिर्यक् सप्त विलिख्य च । कृत्तिकादिषु तु सप्तस्वाग्निता मुसंलिखेत् ॥ चन्द्ररेखायुनक्षत्रं यदि तिष्ठति चेत्तदा । वेधः सप्तशलाकाख्यो विवाहं तत्र वर्जयेत् ॥ यद्रेखायां चन्द्रस्तिष्ठति सा चन्द्ररेखा । तत्स्थितं नक्षत्रं तस्मिन् यदि सूर्यादीनामन्यतमो वा कश्चिद्ग्रहस्तिष्ठति । तदा सप्तशलाकाख्यो वेधः स्यात् । तत्र विवाहं वर्जयेदिति ॥ यस्याः शशी सप्तशलाकभिन्नः पापैरपापैरथवा विवाहे । रक्तांशुकेन रुदती मानाश्मशानभूमिं प्रमदा प्रयातीति फलं ॥

सप्तशिरा । स्त्री० नागवल्ल्याम् ॥ ताम्बूल्याम् ॥

सप्तशृङ्गः । पुं० हिमाचले ॥ सप्त शृङ्गाणि । दक्षिणदेशप्रसिद्धे गिरिविशेषे ॥ तत्र प्रसिद्धे अम्बिकास्थाने ॥

सप्तसप्तिः । पुं० दिवाकरे । सूर्ये ॥ सप्त गायत्र्यादीनि छन्दांसि सप्तयोऽश्वा यस्य सः ॥ यथा । हयाश्च सप्त छन्दांसि तेषां नामानि मे शृणु । गायत्री च बृहत्युष्णिग् जगती त्रिष्टुबेव च । अनुष्टुप् पङ्क्तिरेतानि छन्दांसि हरये हरेरिति विष्णुपुराणम् । सप्ताश्वरूपाश्छन्दांसि वहन्ते वातरंहस इति मत्स्यपुराणञ्च ॥

सप्तसमिधः । स्त्री० बहुवचनान्तः० सप्तप्राणानां सप्तसु विषयेषु ॥ विषयैर्हि समिध्यन्ते प्राणाः ।

सप्तसागरः । पुं० महादानविशेषे ॥

सप्तसारस्वतम् । न० तीर्थविशेषे ॥

सप्तसूः । स्त्री० सूतवस्करायाम् । सप्तपुत्रप्रसूतायाम् ॥

सप्तस्रोतः । न० तीर्थप्रभेदे । दक्षिणे न हिमवतश्च सप्तर्षीणामाश्रमे ॥ यथा

स्रोतोभिः सप्तभिर्यैरेवधुनी सप्तधाव्यधात् । सप्तानां प्रीतयेनाम्नास प्तस्रोतः प्रचक्षते ॥

सप्तांशुपुंगवः । पुं० शनिग्रहे ॥

सप्तार्चिः । पुं० दग्धमनसि । शुक्रे । अग्नौ । वैश्वानरे ॥ सप्तार्चिषो ग्रहस्य ॥ चित्रकवृक्षे ॥ शनिग्रहे ॥ त्रि० क्रूरचक्षुषि ॥ सप्तार्चीषिः० सप्तप्राणानां दीप्तयः स्वविषयानुद्योतनानीत्यर्थः ॥

सप्तावर्त्तः । पुं० तीर्थविशेषे ॥

सप्ताश्वः । पुं० हरिदश्वे । उष्णरश्मौ । सूरे । सूर्ये ॥ सप्ताश्वाः सन्त्यस्य ॥ अर्कवृक्षे ॥

सप्ताश्ववाहनः । पुं० सूर्ये ॥

सप्तिः । पुं० घोटके । पोतौ । तुरगे ॥ सपति सेनायां समवैति । षपसमवाये । क्तिच् । बाहुलकात् तिवा ॥

सप्तेन्द्रियम् । न० सप्तप्राणेषु ॥

सप्तोपधातवः । पुं० ब० सप्तसङ्ख्यकोपधातुषु ॥ यथा । माक्षिकं तुत्थकाभ्रे च नीलाञ्जनशिलाऽऽलकाः । रसकश्चेति विज्ञेया एते सप्तोपधातवः ॥ शरीरस्य सप्तधातुभवसप्तोपधातुषु ॥ यथा । स्तन्यं रजश्च नारीणां काले भवति गच्छति । शुद्धमांसभवः स्नेहः स वसा परिकीर्त्तिता ॥ स्वेदो दन्तास्तथा केशा तथैवौजश्च सप्तमम् । इति धातुभवा ज्ञे या एते सप्तोपधातवः इति ॥

सफलः । त्रि० फलिते । फलवति ॥

सबलः । त्रि० सैन्ययुक्ते ॥ सामर्थ्यवति ॥ बलेन सह वर्त्तते इति ॥

सबलिः । पुं० दिनावसाने । उत्सूरे । विकाले ॥ त्रि० बलिसहिते ॥

सबाधः । त्रि० पीडायुक्ते । निषेधयुक्ते ॥ बाधया० बाधेन च सह वर्त्तमानः ॥

सब्रह्मचारी । पुं० समानवेदव्रताचारिणि । यथाऽमरः । एकब्रह्मव्रताचारा मिथः सब्रह्मचारिणः इति । ब्रह्म वेदस्तदध्ययनार्थं व्रतमप्युपचाराद्ब्रह्म० एकस्मिन्ब्रह्मणि व्रताचरणं येषां ते मिथः परस्परं० सब्रह्मचारिणो भवन्तीत्यर्थः ॥ समानं ब्रह्म चरति । व्रते इति णिनिः । चरणे ब्रह्मचारिणीति० समानस्य सः ॥ समाने ब्रह्मणि चरति वा ॥

सभर्त्तृका । स्त्री० पतिवत्याम् ॥ सह भर्त्ताऽस्ति यस्याः । नद्यृतश्चेति कप् ॥

सभा । स्त्री० गोष्ठ्याम् । समज्यापरिषद्गोष्ठीसभासमितिसंसदः । आस्थानी क्लीवमास्थानं स्त्रीनपुंसकयोः सदः ० इत्यमरः ॥ सह भान्ति येऽस्यां वा । भा दीप्तौ । सुपीति कः । अन्येष्वपीति डो वा । भिदादिरङ् वा ॥ समानो भावस्स्यामिति वा ।

समासस्येतियोगविभागात्• सभा याश्चेतिनिर्देशाद्वासमासस्यसादेशः । अस्यालक्षणं यथा । यस्मिन्देशे निषीदन्तिविप्रावेदविदस्त्रयः । राज्ञश्चाधिकृतोविद्वान् ब्रह्मणस्तांसभां विदुरितिमनुः ॥ चत्वारोवेदधर्म्मज्ञाः पर्षत्त्रैविद्यमेववा । साब्रूते यंसधर्मः स्यादेकोवाध्यात्मवित्तमः • इतियाज्ञवल्क्यः ॥ विद्वत्संहतौ • भाः प्रकाशस्तयासहवर्त्तते• इत्यर्थः ॥ ग्रामनगरादौनियतजनसमूहस्थाने ॥ सामाजिके । सभ्ये ॥ द्यूते ॥ मन्दिरे । राज्ञोऽमात्यादिदर्शनगृहे ॥ अनुविधेयस्त्वेयः सभ्यपुरुषवतीजनतासभा । अनुविधेयोराजादिः • स्त्रेयान्मध्यस्थः ॥

सभागः । त्रि• सभाकृते ॥ अन्यैः पूज्यमाने ॥ भजनंभागः • पूजा• तेन । सहभागेनवर्त्तमानः ॥ •भागसहिते ॥

सभाजनः । पुं• सख्ये ॥ न• गमनागमनादिसमयेसुहृदादेरालिङ्गनादिव्यवश्रस्वागतादिनानन्दोत्पादने । आनन्दने । आप्रच्छने ॥ सभाज प्रीतिसेवनयोः । ल्युट् ॥

सभाजितः । त्रि• पूजिते ॥

सभाज्यः । त्रि• पूज्ये । भजनीये ॥

सभापतिः । पुं• सभाधिपतौ ॥ यथा । श्रीमहाप्रभुरेसावाहरनामासभापतिरिति ॥

सभारचना । स्त्री• राजमन्दिरनिर्म्मितौ ॥ यथा । चापाकृतिन्यस्तनृपासनोदरा सतौ तिकीर्णा नृपगौरवोचिता । निबद्धसौरैर्विदधीतमन्त्रिणां नरै रनूचानरसामरैः सभा ॥

सभासत्•द् । पुं• सभास्तारे । सभ्ये । सामाजिके । सभासदानाह । श्रुताध्ययनसम्पन्नाः कुलीनाः सत्यवादिनः । राज्ञासभासदः कार्य्याः शत्रौमित्रेचयेसमाइतियाज्ञवल्क्यः ॥ श्रुताध्ययनसम्पन्नाः • धर्म्मशास्त्रज्ञाः । कुलीनाः • साङ्कर्य्यदोषशून्यमातापितृवंशपरम्पराकाः ॥ सभायामधिकृतत्वेनलोकानां धर्म्माधर्म्मविलोकनार्थंसीदन्तिउपविशन्ति । षद्लृ• । सत्सूद्विषेति क्विप् ॥ सभाः द्विधाः सामान्याः सब्राह्मणपुरोहितः । ससभ्यः प्रेक्षकोराजास्वर्गेतिष्ठतिधर्म्मतः ॥ तत्रब्राह्मणाअनियुक्ताः • सभ्यास्तु नियुक्ताइतिभेदः । तत्रनियुक्तानांयथावस्थितार्थकथनेऽपियदिराजान्यथाकरोतितदाऽसौनिवारणीयोऽन्यथादोषः । यथाह कात्यायनः । अन्यायेनापितंयान्तंयेनुयान्तिसभासदः । तेपितद्भागिनस्तस्माद्बोध

नीय : सतैर्नृपइति ॥

सभास्तार : । पुं॰ सभासदि ।
सभांस्तृणाति । स्तृञ् आच्छाद
ने । कर्मण्यण् ॥

सभिक : । पुं॰ द्यूतकारके । प्र
तिभूत्वादिनाद्यूतप्रयोजके ॥ स
भाद्यूतमाश्रयत्वेनास्यास्ति । व्री
ह्यादित्वाट्ठन् ॥

सभोचित : । पुं॰ पण्डिते ॥ त्रि॰
सभायोग्ये ॥

सभ्य : । पुं॰ सभासदि ॥ यथा ।
सभ्येनावश्यवक्तव्यं धर्मार्थसहितं व
च : । शृणोतियदिनोराजास्यात्तु
सभ्यस्तदाऽनृण : इति ॥ श्रोता
पनोदाद्यर्थयाचकै : प्रवितेऽग्न
विशेषे ॥ सभायांसाधु : । सभा
याय : ॥ कुलीने ॥ साधौ ॥
त्रि॰ प्रत्ययिते । विश्वासपात्रे
॥ सभासम्बन्धिनि ॥

सम् । अ॰ शोभनार्थे ॥ समार्थे ॥
सङ्गार्थे ॥ प्रकृष्टार्थे ॥ सर्वतो
भावे ॥ समुच्चये ॥

सम : । त्रि॰ समाने । तुल्यार्थे ॥
साध्वर्थे ॥ सर्वशब्दार्थे ॥ रा
गद्वेषादिरहिते । समति । ष
मवैक्लव्ये । पचाद्यच् । सर्वार्थे
सर्वनामसंज्ञा ॥ अवक्रे । नि
पातानुपातयोरनारम्भात् ॰ सर्वेषुभ
तेष्वात्मौपम्येनसर्वत्रसुखंदुःखञ्च

पश्यतितस्मिन् ॥ न॰ सम्पूर्णे
। सत्ताप्रकाशाभ्यांसर्वाभिन्ने॰ नि
र्विशेषे॰ सर्वविकारशून्ये॰ कूट
स्थे॰ नित्ये॰ एकस्मिन्॰ सर्वत्रैक
रूपे॰ प्रतिदेहमेकस्मिन्॰ ब्रह्मणि
॥ समस्थाने ॥ सदृशमर्थे ॥ अल
ङ्कारविशेषे ॥ यथा । समंयोग्य
तयायोगोयदिसम्भावितःक्वचित् ।
इदमनयो : श्लाघ्यमितियोग्यतया
सम्बन्धस्यनियतविषयमध्यवसानस्ये
त्तदासमम् । तत्सद्योगेऽसद्यो
गेच । उदाहरणम् । धातु : शि
ल्पातिशयनिकषस्थानमेषामृगाक्षी
रूपेदेवोप्ययमनुपमोदत्तपत्र : स्मर
स्य । जातंदैवात्सदृशमनयो :
सङ्गतंयत्तदेतच्छृङ्गारस्योपनतम
धुनाराज्यमेकातपत्रम् ॥ यथावा ।
चित्रंचित्रंबतबतमहच्चित्रमेतद्वि
चित्रंजातोदैवादुचितरचनासंवि
धाताविधाता । यन्निम्बानांपरिणत
फलस्फीतिरास्वादनीयायच्चैतस्याः
कवलनकलाकोविद : काकलोक :
॥ नक्षत्रविशेषाणांसंज्ञायाम् ॥
यथा । समंमदुत्तिप्रसुशवोऽग्नि
मघाचिपूर्वासपभमितिपच्चदशमच
वेषु ॥ पुं॰ विष्णौ । मयाश्र
यासद्भक्तेइतितथा । सर्वथा
लेषुसर्वविकाररहितत्वाद्वा । राशि
विशेषाणांसंज्ञाविशेषे ॥ यथा ।

क्रूरोग्रसौम्य: । पुरुषाङ्गनाच । ओजोऽयुग्मं विषम: समश्च । च रस्थिरद्व्यात्मकनामधेया मेषादयोऽमी क्रमश: प्रदिष्टा: ॥ मानस्य प्रकारविशेषे ॥ सतुयदा गीतवाद्ययो स्तालो गानकर्त्तुर्इ स्पादादि वाल गस्य एकदा समभाविनपततितदा भवतीति सङ्गीतशास्त्रम् ॥

समकक्ष: । त्रि॰ तुल्ये । समे ॥

समकन्या । स्त्री॰ विवाहोपयुक्तायाम् ॥ इतिधनञ्जय: ॥

समकोल: । पुं॰ अब्भक्षे । द्विरसने । सर्पे ॥ इ॰ त्रि॰ शेष: ॥

समक्षम् । अ॰ अक्ष्णो: समीपे ॥ अक्ष्णोसमीपं योग्यं वा । अव्ययं विभक्तीतिसमीपे॰ यथार्थेवाऽव्ययीभाव: । प्रतिपरेतिटच् ॥

समगन्धक: । पुं॰ कृत्रकधूपे ॥

समगन्धिकम् । न॰ उशीरे ॥

समग्र: । त्रि॰ समस्मिन् । सर्वस्मिन् । विश्वस्मिन् । अशेषे । सम्पूर्णे ॥ सङ्गतमग्रमस्य ॥ समं ग्रसते वा । अन्येष्वपीतियसेड: ॥ शोभनाग्रके ॥ सहाग्रेणफलेनविद्यतेय त्तत्र ॥

समङ्क: । पुं॰ मूषके ॥ सम्यक् प्रकारेणछिद्रादिकरणेन॰ अङ्कयति॰ चिह्नयतिवस्त्रादिकम् । अचि॰ । अच् ॥

समङ्गा । स्त्री॰ मञ्जीठइ॰ प्र॰ ओषधौ । पर्यायास्तु । मञ्जिष्ठाविकसाजिङ्गीसमङ्गाकालमेषिका । मण्डूकपर्णीभण्डीरीभण्डीयोजनवल्ल्यपीति ॥ लज्जालौ । नमस्कार्याम् । गण्डकार्याम् ॥ समन्ततोऽङ्गति । अगि॰ । पचाद्यच् ॥

समचित्त: । त्रि॰ हर्षविषादशून्यमनसि । आत्मविदि ॥ समं चित्तं यस्य स: ॥ एकविषयकान्त: करणवत्ति ॥

समज: । पुं॰ पशूनांवृन्दे ॥ संवीयतेऽत्रवा । अज॰ । समुदोरज: पशुष्वित्यप् ॥ मूर्खसंहतौ ॥ न॰ विपिने ॥

समज्ञा । स्त्री॰ यशसि । कीर्त्तौ ॥ सम्यक् : सर्वैर्ज्ञायते । ज्ञा॰ । घञर्थे क: ॥

समज्या । स्त्री॰ परिषदि । सभायाम् ॥ समजन्त्यस्याम् । अज॰ । संज्ञायांसमजेतिक्यप् । अजे: व्यघञपोरिति वीभावेन ॥

समञ्जसम् । न॰ उचिते । न्याये ॥ सम्यगञ्जोऽत्र । अचप्रत्यन्ववपूर्वात्सामलोम्नइत्यच् । यथा । सङ्गतमञ्जसातत्त्वमत्र । क्लीबनपुंसकेइतिह्रस्वत्वम् । त्रि॰ समीचीने ॥ अभ्यस्ते ॥ अविरुद्धे । युक्ते ॥ न्याय्ये । स्वस्थवपुषि ॥

समशठ : । पुं॰ शाकभेदे । गण्डीरे ॥

समता । स्त्री॰ साम्ये । समत्वे ॥ समत्वमाराधनमच्युतस्येतिप्रह्लादवचनम् ॥ समवर्त्तित्वे । मध्यस्थत्वे ॥ चित्तस्यरागद्वेषादिरहितावस्थायाम् । तल् ॥

समतिक्रान्त : । त्रि॰ अनुस्नाते ॥

समतीत : । त्रि॰ चिरविनष्टे ॥

समत्र्यम् । न॰ समभागासुगुडशुण्ठीहरीतकीषु ॥

समदर्शनम् । न॰ समालोकने ॥

समदर्शी । त्रि॰ सम्यग्दर्शिनि । ज्ञानिनि । सदेकरूपवस्तुदर्शनशीले । पण्डिते ॥ समं ब्रह्मद्रष्टुंशीलंयस्य । णिनि : ॥

समदृक् । पुं॰ ज्ञानिनि । ब्रह्मात्मैक्यज्ञानवति ॥ समं ब्रह्मपश्यति । दृशिर्॰ । क्विप् ॥ यदीयाहारेवा कुसुमशयनेवाहृषदिवामणौवालोष्टेवावलवतिरिपौवासुहृदिवा । तृणेवास्त्रैणेवाममसमदृशोयान्तुदिवसा : क्वचित्पुण्यारण्ये शिवशिवशिवेतिप्रलपत : ॥

समदृष्टि : । स्त्री॰ सर्वत्रतुल्यदर्शने ॥ यथा । दु : खेसुखेचविप्रेन्द्रयादृष्टिवर्त्ततेसदा । तथारात्रौचमित्रेचसमदृष्टिस्सास्मृतेतिपद्मपुराणे क्रियायोगसारे १६८ध्याय : ॥

समधिक : । त्रि॰ अधिके । अतिरिक्ते सम्यगधिक : ॥

समधिगत : । त्रि॰ प्राप्ते । अधिगते ॥ सम्यगधिगत : ॥ अधिगतपरमार्थान्पण्डितान्मावमंस्थास्तृणमिवलघुलक्ष्मीर्नैवतान्संरुणद्धि । अभिनवमदलेखाश्यामगण्डस्थलानांनभवतिबिसतन्तुर्वारणं वारणानां ॥

समधुर : । त्रि॰ मधुररसयुक्ते ॥ समासभावे ॥ मधुरेणसहवियते ॥ समाधुर्भारोयस्यस: , स्वल्पूरित्य: ॥

समन्त : । पुं॰ समन्ततोर्थे ॥ सीमनि ॥

समन्तत : । अ॰ चतुर्दिगभिव्याप्ते । परित : । सर्वत : । विष्वक् ॰ ॥ समन्तात् । आद्यादित्वात्तसि: ॥

समन्तदुग्धा । स्त्री॰ स्नुहीद्रुमे । सीहुण्डे ॥ समन्ताद्दुग्धमस्या : ॥

समन्तपञ्चकम् । न॰ कुरुक्षेत्रे ॥

समन्तभद्र : । पुं॰ सुगते । बुद्धे । समन्तंभद्रंयस्यस : । समन्तात्सर्वत : पुण्यसम्भारतो॰ ज्ञानसम्भारतश्चभद्र : श्रेष्ठ : । पञ्चमीतियोगविभागात्समास: । पृषोदरादि: ॥

समन्तभुक् । पुं॰ अनले । अग्नौ ॥

समन्तात् । अ॰ समन्ततोर्थे ॥

समन्यु : । त्रि॰ सक्रोधे ॥

समन्वय: । पुं॰ लिङ्गै: शास्त्रस्यतात्पर्यसम्बन्धे ॥ भिन्नानांसरूपतायाम् ।

सम्यगन्वय : ॥

समन्वारम्भणम् । न॰ समनुगमने ॥

समन्वित : । त्रि॰ सम्यगन्विते । संयुक्ते ॥

समन्वितलय : । पुं॰ एकताले ॥ सम्यक् अन्वितौ लयौ नृत्यगीतवाद्यानां साम्यं येषां स : ॥ सम्यगन्वितौ द्रुतमध्यमलयौ यस्मिन् ॥

समपद : । पुं॰ रतिबन्धविशेषे ॥ यथा । योषित् पादौ हृदि न्यस्य करान्यां पीडयेत् स्तनौ । यथेष्टं ताडयेद्योनिं बन्ध : समपद : स्मृतइति ॥ न॰ युद्धकाले धन्विनां पादन्यासविशेषे । धन्विनां पादयोस्तुल्यरूपतया धारणे ॥ धन्विनां स्थाने ॥

समपर्य्यासनम् । न॰ परिवर्त्तने ॥

समपादम् । न॰ धन्विनां पादयोस्तुल्यरूपतया धारणे ॥

समबुद्धि : । त्रि॰ सर्व्वत्र रागद्वेषशून्ये ॥ क : कौटक् कर्म्मा॰ कृत्यव्यापृतबुद्धौ ॥

समभिव्याहार : । पुं॰ सहिते ॥

समभिव्याहृत : । त्रि॰ सहोच्चरिते ॥ सहिते ॥

समभिहार : । पुं॰ आभीक्ष्ण्ये । पौन : पुन्ये ॥ भृशार्थे ॥ समभिहरणम् । हृञ्॰ । घञ् ॥ सम्यगभिहारो वा ॥ विप्रकीर्णानां द्रव्याणां राशीभावे । शेषशेषिवाचकपदयो : सहोच्चारणे ॥

समभूमि : । स्त्री॰ समानस्थाने । भागे ॥

समम् । अ॰ सहार्थे । साकम् । सत्रम् ॥ समति । षम॰ । अम् ॥

समय : । पुं॰ काले । दिष्टे । अनेहसि ॥ सम्यगेति । इण् गतौ । पचाद्यच् ॥ कार्यकाले ॥ समयेऽस्मिन् मुपकारिक्रतम् । सर्व्वं समयेकृतमुपकार्यं भवति ॥ शपथे ॥ आचारे ॥ सिद्धान्ते ॥ विधि । संविदि ॥ क्रियाकारे ॥ निर्द्देशे ॥ सङ्केते ॥ भाषायाम् ॥ सम्पदि ॥ नियमे ॥ अवसरे ॥ समयनम्॰ समीयन्तेऽनेन वा॰ समेति वा । इण्॰ इगतौ वा । एरच्॰ पुंसीतिघो वा । पचाद्यज् वा ॥ सङ्गमे ॥

समयक्कार : । पुं॰ सङ्केते ॥

समयज्ञ : । त्रि॰ कालज्ञे ॥ समयं जानाति । ज्ञा॰ । क : ॥

समयभेदी । त्रि॰ संविदुत्क्रमकारिणि ॥

समया । अ॰ अन्तिके । निकटे ॥ मध्ये ॥ समेति॰ समयनं वा । इण्॰ । आ : समिण् निकषिभ्याम् ॥ कालविज्ञापने ॥

समयाचार : । पुं॰ समयोचिताचरणे ॥ तन्त्रविशेषे ॥

समयाध्युषित:। पुं॰ सूर्यनक्षत्रवर्ज्जितेकाले॥ समय: अध्युषितो यस्मिन्॥

समयी। पुं॰ भगवत्याचरणभक्तिभावप्रतिपादकशास्त्रनिष्ठे॥

समर:। पुं॰ न॰ युद्धे। रणे॥ समरणम्। ऋगतौ॰ भ्वादि:। ऋदोरप्॥

समरभ:। पुं॰ रतिबन्धविशेषे॥ यथा। स्वजङ्घाद्वयसंयुक्तं कृत्वा योषित्पदद्वयम्। स्तनौ धृत्वा रमेत् कामी बन्ध: समरभ: स्मृत इति॥

समरविजया। स्त्री॰ यात्राप्रभेदे॥ समरविजयाचयात्राचायोगविलग्नस्थितौ शयोगेषु॥ स्थितौऽयोगेषु॰ राजयोगेषु। सालम्भसूक्ष्मजलवशेनमवधितिथ्याभावाद्द्रष्टव्या॥

समर्थ:। त्रि॰ हिते॥ शक्ते। शक्तिसम्पन्ने॥ संबद्धे। उपायकुशले। समर्थयते॰ समर्थ्यते वा। अर्थ उपयाच्ञायाम्। पचाद्यच्॰ अच् वा। सम्बद्धार्थे॥

समर्थता। स्त्री॰ सामर्थ्ये॥

समर्थनम्। न॰ अनुचितोचितनिश्चये॥ सम्प्रधारणायाम्॥ अर्थयते: सम्पूर्वात्॰ ल्युट्॥ चोद्यपरिहारे॥

समर्थना। स्त्री॰ समर्थने॥ युच्॥

समर्थयिता। त्रि॰ प्रतिपादयितरि॥

समर्थित:। त्रि॰ कृतसमाधाने॥

समर्द्धक:। त्रि॰ वरदातरि। वरदे। इष्टार्थप्रदेदेवतादौ॥ समृध्नोति। ऋधुवृद्धौ। ण्वुल्॥

समर्पणम्। न॰ सम्यगर्पणे। आदरेणार्पणे। सौंपना॰ इ॰ भा॰ प्र॰॥

समर्पित:। त्रि॰ कृतसमर्पणे॥ सम्प्रोते। सम्प्रवेशिते॥ स्थापिते॥

समर्य्याद:। पुं॰ समीपे॥ त्रि॰ मर्यादासहिते॥ समानामर्यादास्य। सहमर्यादयेति वा॥ हेमचन्द्रस्तु। समर्यादं मर्यादासहितेपि च। मुख्यानुयायिनि शिष्टोपकृतस्यानुवर्त्तने। दोषेत्यादे॰ क्लीबाह॥

समल:। त्रि॰ मलिने। आविले॥

समवतार:। पुं॰ तीर्थे॥

समवर्त्ती। पुं॰ परेतराजि। धर्मराजे। पितृपतौ। यमे॥ त्रि॰ तुल्यवर्त्तनशीले॥ समं वर्त्तितुं शीलमस्य। सुप्यजातावितिणिनि:॥

समवसर्ग्या। स्त्री॰ रज्ज्वाम्॥ समवसृज्यते। सृज॰। समवपूर्वाश्वेतियत्। चजोरितिकुत्वम्॥

समवस्थित:। त्रि॰ अविनाशिनि। जन्मादिविनाशान्तभावविकाराशून्यतया॰ सम्यक्तयाऽवस्थिते॥

समवकार:। पुं॰ नाटकभेदे॥

समवाय:। पुं॰ समूहे॥ कस्याश्चि

तृक्रियायां मेलने । सम्बन्धविशेषे ॥ यथा । घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः । तेषु जातेश्च सम्बन्धः समवायः प्रकीर्त्तितः ॥ अवयवावयविनोः गुणगुणिनोः क्रियाक्रियावतोः जातिव्यक्त्योः नित्यद्रव्यविशेषयोश्च यः सम्बन्धः स समवाय इत्यर्थः ॥ यथा च । श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः । कर्णविवरवर्त्याकाशस्य श्रोत्रत्वात् शब्दस्याकाशगुणत्वात् गुणगुणिनोश्च समवायात् । स च नित्यसम्बन्धः । सम एकत्र ॥ समवायते । अय । घञ् ॥

समवायिकारणम् । न० उपादानकारणे ॥ यत्समवेतं कार्य्यमुत्पद्यते तत् समवायिकारणम् । यथा तन्तवः पटस्य पटश्च स्वगतरूपादेः । यथा वा परमाणुर्द्व्यणुकस्य कपालद्वयं घटस्य । सर्व्वसमवायिकारणं द्रव्यमेव । समवायेनास्य सत्त्वात् । तत्तत्कारणञ्च ॥

समवेतः । वि० मिलिते । सङ्गते ॥ समवायसम्बन्धेन वृत्तौ ॥ यथा । यत्समवेतं कार्य्यं भवति ज्ञेयन्तु समवायिजनकं तत् ॥

समवेतसमवायः । पुं० सन्निकर्षविशेषे ॥ यथा । शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः । श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात् ।

समसुप्तान् । त्रि० सम्यक्प्रकारेण व्याप्तिविशिष्टे ॥

समष्टिः । स्त्री० सामान्ये । समस्तव्याप्तौ ॥ यथा । समस्तत्वेन संव्याप्तिः समष्टिरितिकीर्त्तितेति अपि च । समष्टिरीशः सर्व्वेषां स्वात्मतादात्म्यवेदनात् । तदभावात् ततोऽन्ये तु ज्ञायन्ते व्यष्टिसंज्ञयेति । सङ्केते ॥

समष्टिलः । पुं० क्षुपविशेषे । भण्डीरे । नद्याम्रे । पञ्चगन्धके । कोकाये । कण्टकिफले । उपदंशे । कोकुर्वा० इ० भा० ।

समष्टिला । स्त्री० गण्डीरे । गण्डदूर्व्वा० इ० प्र० शाके ॥ सम्यगष्टिलाबीजं यस्याः ॥

समष्ठ्यत्थानम् । न० सकलोत्थाने ॥

समष्ठलः । पुं० समष्टिले ॥

समष्ठिला । स्त्री० समष्टिलायाम् ॥ समेतिष्ठति । मिथिलादयश्चेति साधुः ॥

समष्ठीला । स्त्री० समष्ठिलायाम् ॥

समसनम् । न० समासेनादानामैक्यसाधने । अनेकस्य पदस्य एकपदीभवने ॥ सङ्क्षेपणे । असुक्षेपणे । सम्पूर्व्वाल्ल्युट् ॥

समसुप्तिः । स्त्री० कल्पान्ते । महा

प्रलये । तुल्यगमने ॥

समस्तः । त्रि॰ सर्व्वावयवविशिष्टे । सकले । समग्रम् । पूर्णे । समस्यतेस्म । अस॰ । क्तः ॥ सं-मकरणे ॥ सफले ॥ पुञ्जीकृते । नि:क्षिप्ते ॥

समस्थः । त्रि॰ धनधान्यादियुक्ततया सम्यगवस्थिते ॥ समेतिष्ठति । स्था॰ । सुपिस्थइतिकः ॥ समभावेन स्थिते । समाने ॥

समस्थली । स्त्री॰ गङ्गयमुनयोर्मध्यस्थल्याम् ॥ अन्तर्वेदि समस्थलीतिहेमचन्द्रः ॥

समस्या । स्त्री॰ श्लोकस्यैकेनपादेन॰ अन्यान्पादान्पूरयितुं पृष्टे । समासार्थायाम् ॥ समसनमन्योन्याश्रयस्येप-वाम् । अस॰ । क्यप्॰संज्ञापूर्व्वकत्वाद्वृद्ध्यभावः ॥ सुमीर्षीकितवा-च्यापिशयकाननागरेः । सार-नारायणयेन्द्रेतादाराह्लादितः ॥

समा । स्त्री॰ अलङ्कारविशेषे ॥ सा-समालङ्कृतिर्योगोयस्त्वेनानुरूपयो-रितिलक्षणात् ॥

समाः । स्त्री॰ शरदि । संवत्सरे । वत्सरे । हायने ॥ समन्ति॰ विक्लवं कुर्व्वन्तिसर्व्वम् । दमष्टमदैक्लव्ये । पचाद्यच्॰ टाप् । प्रायेणायंबहुवचनान्तः ॥

समांशहारी । त्रि॰ समभागार्हे ॥ यथा । समांशहारिकीमातापुत्राणां-

अभ्युप्तैपताविति दायतत्त्वम् ॥ पताविति प्रयोगस्तुप्रामादिकएव ॥

समांशिकः । त्रि॰ समभागार्हे ॥ यथा । यदिकुर्य्यात् समानंशान्पत्न्यः कार्य्याः समांशिकाः । न दत्तं स्त्रीधनं यासांदत्ते त्वर्द्धं प्रकीर्त्तितमिति दायतत्त्वम् ॥

समांशी । त्रि॰ तुल्यभागिनि ॥ यथा । ज्येष्ठं वाश्रेष्ठभागेन सर्व्वे वाप्युः समांशिनइति दायतत्त्वम् ॥

समांसमीना । स्त्री॰ प्रतिवर्षप्रसूतायां गवि ॥ समायांसमायां विजायते । समांसमां विजायतेइतिखः । उत्तरपदेयविभक्त्योर्लोपः॰ पूर्व्वपदस्यलोपएव ॥

समाकर्षः । पुं॰ सम्यगाकर्षणे ॥

समाकर्षी । पुं॰ दूरगामिगन्धे । निर्हारिणी ॥

समाकुलः । त्रि॰ संशयिते ॥

समाकृष्टः । त्रि॰ सम्यगाकृष्टे ॥

समाक्रान्तः । त्रि॰ सम्यक्कृताक्रमणे । व्याप्ते ॥ अधिष्ठिते ॥

समाख्या । स्त्री॰ नाम्नि । संज्ञायाम् ॥ कीर्त्तौ । यशसि ॥ योगलभ्यार्थे ॥ विनियोगविधेः सहकारिभूतप्रमाणविशेषे ॥ समाख्यायौगिकः शब्दः । साचद्विविधा । वैदिकीलौकिकीच । तत्र॰ हौतुश्चमसभक्षणाद्वत्त्वं॰ होतृचम

श्रुतिः वेदिक्यासमाख्यया । य
ज्ञश्चैतस्मात्तत्पदार्थानां लौकिक्या
अर्थवमितिसमाख्ययेति सङ्क्षेपः
। अमर्ष ॥

समागतः । त्रि॰ सम्प्राप्ते ॥ आग
मनाश्रये । सम्यगागमनविशिष्टे ॥

समागमः । पुं॰ संयोगे ॥ सम्यगा
गमने ॥ संप्राप्तौ ॥

समाघातः । पुं॰ वधे ॥ युद्धे ॥
समाहननम् । घञ् । हनस्तोऽचि
ण्णलोः । हो हन्तेर्ञ्णिन्नेषु घः ॥

समाचयनम् । न॰ राशीकरणे ॥

समाचरणम् । समाचारे । समाङ्
पूर्वाच्चरेर्ल्युट् ॥

समाचारः । सम्यगाचरणे । वर्णाश्र
मादिधर्माणामाचरणे ॥ समाच
रणम् । समाङ्चरेर्भावे घञ् ॥
व्रतग्रन्थे ॥

समाजः । पुं॰ पशुभिन्नानां समूहे
। यथा॰ समाजो ब्राह्मणानां॰ स
माजः क्षत्रियाणाम् ॥ अनेकेषां
प्रामाणिकजनानां वासस्थाने ॥ स
भायाम् । उत्सवेषु सङ्घाते ॥ सं
चीयतेऽत्र । अज॰ घञ् । अघञ
पोरित्युक्तेर्वीभावो न । समजिव्रज्यो
र्घञिति क्यप्निषेधः ॥ हस्तिनि ॥
इत्यनेकार्थकोषः ॥

समाज्ञा । स्त्री॰ ख्यातौ ॥ समाज्ञा
यते । समाङ्पूर्वात्ज्ञावबोधने॰
इत्यस्मादातश्चोपसर्गे इत्यङ् ॥

समादरः । पुं॰ सम्माने ॥

समादानम् । न॰ सङ्ग्रहे । समी
चीनग्रहणे ॥ सौगताह्निके । सौ
द्धानां नित्यकर्मणि ॥ सम्भाषा
याम् ॥

समाधानम् । न॰ ब्रह्मणि मनसः स्थि
रीकरणे । अवधाने । प्रणिधाने
। चित्तैकाग्र्यानुमन्तव्यं समाधान
मितिस्मृतमित्युक्तः ॥ निगृही
तस्य मनसः श्रवणादौ तदनुगुणवि
षये च समाधिः समाधानमिति लक्ष
णलक्षिते ॥ श्रवणादिः नित्यवादिश्र
वणमननादिमत्तयथार्थः । तदनुगु
णस्य च॰ गुरुशुश्रूषापुस्तकसम्पादन
तद्रक्षणादिः श्रवणाद्यनुगुणो विषये
निर्दिश्यते॰ नपुनःसुखशासद्रव्या
न्नादिसङ्ग्रहादेरपेक्षणाद्यनुकूल
त्वात्तदर्थमठारम्भप्रतिग्रहादावप
चित्तसमाधिः कर्तव्य इत्युपदिश्य
ते । दण्डमाच्छादनं कौपीनं परिग्र
हेच्छेष विसृजेदिति सन्यासकालिन्या
जितस्य दण्डकौपीनाद्यतिरिक्तस्य॰
विनाप्रतिप्रसवशास्त्रं सङ्ग्रहानुप
पत्तेरित्यर्थः ॥ योगयोगसामर्थ्ये
। तत्परतायाम् । सम्यक्आधानम् ॥

समाधिः । पुं॰ समर्थने । समर्थन
मशक्ये॰ अध्यवसायो दुर्घटस्य घ
टनं वा । नीवाके ॥ नीवाकोऽयना

भावद्युतिस्वामी । धान्यादिषु मूल्योत्कर्षपूर्व्वकोऽनादरद्युतिसुभूतिः ॥ नियमे । अङ्गीकारे । मौनव्रतादौ । सिद्धान्ते । इन्द्रियरोधे एकाग्रभक्तियोगे । ध्याने । काव्यगुणविशेषे अलङ्कारप्रभेदे । यथा । समाधिः सुकरं कार्य्यं कारणान्तरयोगतः साधनान्तरोपकृतेन कर्त्रा यदक्लेशेन कार्य्यमारभ्यमाधीयते स समाधिर्नाम । उदाहरणम् । मानमस्या निराकर्त्तुं पादयोर्मे पतिष्यतः । उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितमिति ॥ समाधीयतेऽस्मिन् मनोऽनेनैः । डुधाञ् । उपसर्गे घोः किरित्यधिकरणे किः ॥ कारणसामग्र्याम् ॥ ध्याने । चित्तस्यैकात्मनानिश्चलावस्थाने ॥ स च समाधिर्द्विविधः । सविकल्पको निर्विकल्पकश्चेति । तद्विवरणं सविकल्पकनिर्विकल्पकशब्दे द्रष्टव्यम् । ध्यानमेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः । सर्व्वथा विजातीयप्रत्ययानन्तरितः सजातीयप्रत्ययप्रवाहः । स तु चित्तभूमिभेदेन द्विविधः । सम्प्रज्ञातोऽसम्प्रज्ञातश्चेति । चित्तस्य पञ्चभूमयो भवन्ति । क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति । समाधीयतेऽस्मिन् सर्व्वमितिव्युत्पत्त्या समाधिरन्तः

करणम् परमात्मा वा ॥ [illegible] व्यवस्थानं समाधिरितिगीयते ॥ द्विविधो हि समाधिर्भवति । तत्पूर्व्वको बाधपूर्व्वकश्चेति । तत्र तदनन्यत्वमारम्भणशब्दादिभ्य इतिन्यायेन कारणव्यतिरेकेण कार्य्यस्यासत्त्वात् पञ्चीकृतपञ्चमहाभूतकार्य्यं व्यष्टिरूपं समष्टिरूपविराट्कार्य्यत्वात् तद्व्यतिरेकेण नास्ति । तत्रापि पृथिवी शब्दस्पर्शरूपरसगन्धाख्यपञ्चगुणा तथा समष्टिरूपमपि पञ्चीकृतपञ्चभूतात्मकं कार्य्यम् अपञ्चीकृतपञ्चमहाभूतकार्य्यत्वात् । सा च पृथिवी गन्धेतरचतुर्गुणाकार्य्यत्वात् तद्व्यतिरेकेण नास्ति । तास्तु चतुर्गुणा आपो गन्धरसेतरत्रिगुणात्मकतेजःकार्य्यत्वात् तद्व्यतिरेकेण न सन्ति तदपि त्रिगुणात्मकं तेजो गन्धरसरूपेतरद्विगुणवायुकार्य्यत्वात् तद्व्यतिरेकेण नास्ति । सोऽपि द्विगुणात्मको वायुः । शब्दमात्रगुणाकाशकार्य्यत्वात् तद्व्यतिरेकेण नास्ति । स च शब्दगुण आकाशो बहु स्यामिति परमेश्वरसङ्कल्पात्मकाहङ्कारकार्य्यत्वात् तद्व्यतिरेकेण नास्ति । तदपीश्वररूपं महत्तत्त्वं मायापरिणामत्वात् तद्व्यतिरेकेण नास्ति । तदपि मायाख्यकारणं जडत्वेनचेत

न्येऽध्यस्तत्वात्, तद्व्यतिरेकेणा
स्तीत्यनुसन्धानेन, विद्यमानेतिका
र्य्यकारणात्मकेप्रपञ्चे, चैतन्यमा
त्रगोचरोयः समाधिः, सलयपू
र्व्वकउच्यते। तत्वतत्त्वमस्यादिवेदा
न्तमहावाक्यार्थज्ञानाभावेनाऽविद्या
तत्कार्य्यस्याक्षीणत्वात्, एवञ्चित्तवे
पिकारणसत्वेन, पुनः कृत्स्नप्रप
ञ्चोत्थानात्, अयं सुषुप्तिवत् सबी
जः समाधिरमुख्यः। मुख्यस्तु,
तत्वमस्यादिमहावाक्यार्थसाक्षात्का
रेण, अविद्यायानिवृत्तौसर्गक्रमेण
तत्कार्य्यनिवृत्तिरनाद्यविद्यायाः पु
नरुत्थानाभावेनतत्कार्य्यस्यापिपु
नरुत्थानाभावान्निर्बीजोबाधपूर्व्व-
कः समाधिः। सएव, सर्व्वाणी
न्द्रियकर्म्माणिप्राणकर्म्माणिचापरे।
आत्मसंयमयोगाग्नौजुह्वतिज्ञानदी
पितइत्यनेनश्लोकेनप्रदर्शितः। त
थाहि। सर्व्वाणिनिखिलानिस्थूल
रूपाणिसंस्काररूपाणिच। इन्द्रि
यकर्म्माणि, इन्द्रियाणांश्रोत्रत्वक्
चक्षूरसनघ्राणाख्यानांपञ्चानां, वा
क्पाणिपादपायूपस्थाऽऽख्यानांवा
ह्यानाम्, आन्तर्य्योश्चमनोबुद्ध्योः
कर्म्माणि, शब्दश्रवणस्पर्शग्रहणरूप
दर्शनरसग्रहणगन्धग्रहणानि, वच
नादानगमनविहरणोत्सर्गानन्दा-
ख्यानिच, सङ्कल्पाध्यवसायौच।

एवं प्राणकर्म्माणिच, प्राणानां, प्रा
णापानव्यानोदानसमानाख्यानांप
ञ्चानांकर्म्माणि, बहिर्न्नयनमधोनय
नमाकुञ्चनप्रसारणाद्यशितपीतस
मानयनमूर्द्ध्वनयनमित्यादीनि। अ
नेनपञ्चज्ञानेन्द्रियाणि, पञ्चकर्म्मे
न्द्रियाणि, पञ्चप्राणाः, मनोबु
द्धिश्चेतिसप्तदशात्मकं लिङ्गमुक्तम्,
तच्चसूक्ष्मभूतसमष्टिरूपं, हिरण्य
गर्भाख्यमित्यविवक्षितमितिवेदितुं
सर्व्वाणीतिविशेषणम्। आत्मसंय
मयोगाग्नौ, आत्मविषयकः सं
यमोधारणाध्यानसम्प्रज्ञातसमाधि
रूपस्तत्परिपाकेसतियोगो, निरो
धसमाधिः। यं, पतञ्जलिः सू
त्रयामास। व्युत्थाननिरोधसंस्का
रयोरभिभवप्रादुर्भावौनिरोधलक्ष
णचित्तान्वयोनिरोधपरिणामइति
। व्युत्थानं, क्षिप्तमूढविक्षिप्ताख्यं
भूमित्रयम्, ततसंस्काराः स
माधिविरोधिनः तेयोगिप्रयत्नेन
प्रतिदिनंप्रतिक्षणञ्चाभिभूयन्ते,
तद्विरोधिनश्चनिरोधसंस्काराः प्रा
दुर्भवन्ति, ततश्चनिरोधक्षणा
न्वितान्वयोनिरोधपरिणामइति।
तस्यफलमाह। ततः प्रशान्तवाहि
तासंस्कारादिति। समेषुजसोः
अयानमविक्षेपशून्यत्वेनसुखसत्व
रूपंचित्तंप्रशान्तमित्युच्यते। पूर्व्व

पूर्व्वप्रशमसंस्कारपाटवेन तद्बाधिक्यं प्रशान्तवाहितेति । तत्कारणञ्च सूचयामास । विरामप्रत्ययाभ्यासपूर्व्वः संस्कारशेषोऽन्य इति । विरामो वृ॰ त्त्युपरमः तस्य प्रत्ययः कारणं वृत्त्युपरमार्थः पुरुषप्रयत्नस्तस्याभ्यासः पौनःपुन्येन सम्पादनम्॰ तत्पूर्व्वकस्तज्जन्योऽन्यः सम्प्रज्ञातादिलक्षणोऽसम्प्रज्ञातइत्यर्थः । एतादृशोऽयमात्मसंयमयोगः स एवाग्निस्तस्मिन्॰ ज्ञानदीपिते॰ ज्ञानं वेदान्तवाक्यजन्यो ब्रह्मात्मैक्यसाक्षात्कारः॰ तेनाविद्यातत्कार्य्यनाशद्वारादीपिते ज्वलितेऽर्थात् पूर्व्वोक्ते समाधौ समस्तलिङ्गशरीरमपरिशुद्धतिप्रविलापयन्तीत्यर्थः ॥ तदेकतानतामेति स समाधिर्व्विधीयते ॥ तत्॰ ध्यानम्॰ ऐकतानताम्॰ ध्येयैकनिर्भासत्वम्॰ यदाऽभ्येति॰ तदा॰ समाधिरिति शास्त्रेषु प्रदिश्यते ॥ अथवान्तु । निर्व्विकारतया वृत्त्या ब्रह्माकारतया पुनः । वृत्तिविस्मरणं सम्यक् समाधिर्ज्ञानसंज्ञकः ॥ अपिच । ध्यातृध्यानेपरित्यज्य क्रमाद्ध्येयैकगोचरम् । निवातदीपवच्चित्तं समाधिरभिधीयतइति । पुनश्च । नित्यं शुद्धं बुद्धियुक्तं सत्यमानन्दमद्वयम् । तुरीयमक्षरं ब्रह्म अहमस्मि परं पदम् । अहमेव ब्रह्म च स्थानं समाधिरिति गीयते ॥ इ॰ गा॰ ४४ ॥ अपिच । तस्यैव कल्पनाहीनं स्वरूपग्रहणं हि यत् । मनसा ध्याननिष्पाद्यं समाधिः सोऽभिधीयते ॥ इ॰ वि॰ पु॰ ६ अंशः ७ । इन्द्रियगुणसमाहारमनात्मत्वेनपश्यतः । अतः शीतलतायस्य समाधिरितिकथ्यते ॥ इतियोगवाशिष्ठे उपशमप्रकरणम् ॥ समाधीयतेऽनेनास्मिन्वा॰ समाधानमनेनवा । समाङ्पूर्व्वाद्धाञोऽधिकरणादौ॰ उपसर्गेघोः किः ॥

समाधिविघ्नः । पुं॰ लयविक्षेपकषायरसास्वादलक्षणेषु चतुर्षु ॥

समाधिस्थः । त्रि॰ व्युत्थितचित्तः ॥ समाधियुक्तः ॥ यथा । मनः सङ्कल्परहितमिन्द्रियार्थानचिन्तयन् । यस्य ब्रह्मणि संलीनं समाधिस्थः सकीर्त्तितः ॥ ध्यायतः परमात्मानमात्मस्थं यस्य योगिनः । मनस्तन्मयतां याति समाधिस्थः सकीर्त्तितः ॥ इतिगारुडे गीतासारे २४॰ अध्यायः ॥

समानः । पुं॰ हृन्नाभिसर्व्वसन्धिवर्त्ती वायुविशेषः । शरीरमध्यगतेऽशितपीतान्नपानादिसमीकरणकारी वायौ । नाभिसंस्थिते ॥ यथा । पीतं भक्षितमाघ्रातं रक्तपित्तकफानिलम् । समंनयतिगात्रेषु समानो

नामसमाहृतइति । अट्टउक्तल्लवर्णेषु ॥ समानशब्देनपूर्व्वाचार्य्यैर्निर्द्दिष्टाइकोऽभिधीयन्ते इअसमानाइतिवचनादितिकैयटः । वचनादिति । यथा॰ अइउऋ ऋऌ ऌ इअसमानाइतिपूर्व्वव्याकरणवचनादित्यथ इतिविवरणम् । त्रि॰ सतौ । साधौ ॥ समे । तुल्ये । ऊनातिरिक्तवर्ज्जे ॥ एकस्मिन् ॥ सममानात्दनित्यनेन । अन॰ । इति ॥ सतिघञ् ॥ समतिवा सम॰ । ·ाकौल्यवयोवचनशक्तिषुचासम् । आगमशासनमनित्यमितिसुमन ॥ सहमानेनवर्त्ततइतिवा । वोपसर्ज्जनस्येतिसभावः ॥ समानं मानमस्येतिवा । समानश्छन्दसीतिसः ।

समानकालीनः । त्रि॰ समकालोत्पत्तिके ॥ यथा । गोषुदुह्यमानासु आगतः॰ दुग्धास्वागतइत्यादौ समानकालीनत्वंभाषते । तेनगोविषयकवर्त्तमानदोहनकालीनगमनानुकूलकृतिमान् । एवंगोविषयकातीतदोहनसमानकालीनातीतगमनानुकूलकृतिमानितिबोधः ॥

समानयानकर्म्मा । पुं॰ सन्धेः प्रभेदे ॥ यथा । तात्कालिकफललाभार्थमुत्तरकालीनफललाभार्थंवाउभयराजान्तरेणसहान्यंप्रतियानादिकर्म्मक्रियते॰ ससमानयानकर्म्मासन्धिर्ज्ञेयः ॥

समानाधिकरणः । पुं॰ समानविषये ॥

समानाभिहारः । पुं॰ समानगुणानांमिश्रणे ॥ यथा॰ तोयदमुक्तजलबिन्दूनां॰ जलाशयेसमाभिहारः यथागोमाहिषादिदुग्धपतितानांगव्यदुग्धानाम् ॥

समानालङ्कृतिः । स्त्री॰ अलङ्कारविशेषे ॥ यथा । समानालङ्कृतिर्योगोवस्तुनोरनुरूपयोरिति ॥

समानिका । स्त्री॰ वर्णवृत्ताकरे ॥ हारमेकवायदासङ्कलाभवेत्तदा । सप्तवर्णनिर्म्मितासासमानिकामता ॥ यथा । पद्मचारुचञ्चलानीलनीरजस्त्विषा ॥ चालिमन्मनोहृतंषण्मवादमोदितम् ॥ अनुष्टुब्भेदेपि । स्त्रीरजौसमानिकातु । यथा । वद्धकुण्डपादपद्ममस्तिहत्तडागसत्म । धीः समानिकापरेणमोचिताचमत्सरेण ॥

समानोदकः । पुं॰ चतुर्द्दशपुरुषपर्य्यन्तेजन्मनामस्मृतिपर्य्यन्तेच ॥ गोत्रजमात्रे ॥

समानोदर्य्यः । पुं॰ सहोदरे । सोदर्ये ॥ समानेउदरेशयितःस्थितः । समानोदरेशयितओचोदात्तइतियत् । विभाषोदरइतिपा

द्विकत्वात्सादेशेन ॥

समापः । पुं॰ देवयजने ॥ समाचापीयस्मिन् । ऋक्पूर्व्यः ॥

समापकः । त्रि॰ समापनकर्त्तरि ॥ समापयति । ण्वुल् ॥

समापत्तिः । स्त्री॰ यदृच्छयासङ्गतौ ॥

समापनम् । न॰ परिच्छेदे ॥ समाप्तौ ॥ वधे ॥ समाधाने ॥ लब्धे । प्राप्ते ॥

समापन्नः । त्रि॰ समाप्ते ॥ प्राप्ते । क्लिष्टे ॥ वधे ॥

समापय्य । अ॰ समाप्तिंप्रापय्येत्यर्थे ॥

समापिका । स्त्री॰ वाक्यसमापकक्रियायाम् ॥ तत्रतिवाद्योभवन्ति । यथा । देवदत्तोगच्छति । क्वचित् क्तान्तादिपदेनापिवाक्यसमाप्तिः । यथा । नाम्नाहृष्टः शिवोजने । क्वचित्तव्याद्यन्तक्रिययापिवाक्यसमापकत्वम् । यथा । मया काशिंगन्तव्यम् । याकादन्तक्रियाऽसमापिका॰ तत्रक्त्वाद्योभवन्ति । यथा । गच्छन्भुङ्क्ते । भुक्त्वाव्रजति पीत्वास्वपिति ॥

समापितः । त्रि॰ कृतसमापने ॥ यथा । आरब्धंमलमासात्प्राक् यत्कर्म्मनसमापितम् । आगतेमलमासेपितत्समाप्यंनसंशयइतिमलमासतत्त्वम् ॥

समाप्तः । त्रि॰ समाप्तिंगते । समाप्तिविशिष्टे ॥ यथा । समाप्ते यद्विनाशीयात्प्रयैतदन्यथाकृतम् । यतस्तदन्यथाभूतंततएवसमापयेदितितिथ्यादितत्त्वं ॥

समाप्तिः । स्त्री॰ अवसाने ॥ समर्थने ॥ समापनम् । आप्लृ॰ । क्तिन्नाबादिभ्यः ॥ परिप्राप्तौ ॥

समाप्तिका । स्त्री॰ समाप्त्यर्थे ॥

समाप्त्यर्था । स्त्री॰ समस्यायाम् ॥

समाप्यः । त्रि॰ समापनीये ॥

समायोगः । पुं॰ संयोगे ॥ समवाये ॥ प्रयोजने ॥ समायोजनम् । युजिर्॰ । घञ् ॥ युद्धे॰ । रतौ॰ ; अन्वये॰ । वशीकरणसाधने ॥

समारतः । त्रि॰ उपरते ॥

समारम्भः । पुं॰ उपक्रमे । आत्वारम्भे । यथा । समारम्भाभग्नाः॰ कलिकलितवारांस्तवध्रुवः पिपासोस्तुच्छेस्मिन्द्रविणमृगतृष्णार्णवजले । तथापिप्रत्याशाविरमतिनतेऽद्यापिशतधानजीर्णंजीर्णेतोमिपतमस्मिन्याबधटितमिति ॥ कौर्म्म॰ विटीर्णम् ॥ समारभ्यते । रभेर्घञ् । रभेरशब्लिटोरिति नुम् ॥

समारोपितः । त्रि॰ विपर्य्ययुक्ते ॥ सम्यक्कृतारोपणे । सम्यक्

लिप्ते ॥ सम्यक् आरोपित : ॥

समारोह : । पुं॰ सम्यगारोहणे । नीचादूर्द्ध्वगमने ॥ सोपाने ॥ समारुह्यतेऽनेन॰ समारोहणम् । समारोहतिवा । रुहे : कर्म्मणि॰ भावे वाघञ् । पचाद्यच्वा ॥

समालम्बी । पुं॰ भूतृणे ॥

समालम्भ : । पुं॰ विलेपने । कुङ्कुमादिविलेपे ॥ समालम्भनम् । डुलभष् प्राप्तौ । घञ् । उपसर्गात्खल् घञोरिति नुम् । घातने ॥

समालम्भनम् । न॰ विलेपे ॥ घातने ॥ सम्यक् स्पर्शने ॥

समालिङ्ग : । पुं॰ समालिङ्गने ॥

समाली । पुं॰ कुसुमाकरे ॥

समावर्त्त : । पुं॰ विष्णौ । संसारचक्रस्य सम्यगावर्त्तकइतितथा । जननमरणादिरूपसंसारचक्रमज्ञजीवान् प्रति सम्यगावर्त्तयन् समावर्त्त इत्यर्थ : । समाङ्पूर्व्वाद्वृतेर्ण्यन्तात् पचाद्यच् । समावर्त्तनम् । हतु॰ । भावेघञ् ॥

समावर्त्तनम् । न॰ साङ्गाधीतवेदस्य गुरोरनुज्ञयागृहागमे । वेदाध्ययनानन्तरगार्हस्थ्याधिकारप्रयोजककर्म्मणि ॥ सम्पूर्व्वाद्वर्त्तेर्ल्युट् ॥

समावाय : । पुं॰ समुदाये । समूहे ॥

समावास : । पुं॰ स्थाने ॥

समाविष्ट : । त्रि॰ आक्रान्ते ॥

समावृत्त : । पुं॰ लब्धानुज्ञे । साङ्गवेदाध्ययनानन्तरं त्वमिदानीं गृहस्थो भवेति गार्हस्थ्याय गुरोः प्राप्तानुज्ञे ॥ समावर्त्ततेस्म । वृतु॰ । गत्यर्थेतिक्त : ॥

समावेदनम् । न॰ निवेदने ॥

समावेश : । पुं॰ विन्यासे ॥ एकत्रसहावस्थाने ॥

समावेशित : । त्रि॰ सहावस्थिते ॥ प्रविष्टे ॥

समाश : । पुं॰ सहभोजने ॥

समाश्रय : । पुं॰ वासस्थाने ॥ सम्यक्॰ आश्रय : । सम्यगाधारे । सहाये ॥

समाश्रित : । त्रि॰ सम्यक् शरणागते ॥ सम्यक् प्रकारेणाश्रित : ॥

समाश्वस्त : । त्रि॰ सञ्जातविश्वासे ॥

समाश्वास : पुं॰ सम्यगाश्वासे ॥

समास : । पुं॰ सङ्क्षेपे । समर्थने ॥ ऐकपद्ये । पदयो : पदानांवाएकीकृतौ । समसने । समसनम्॰ पदयो : पदानांवा॰ एकपदीकरणम् समास : सङ्क्षेप : । भावे घञ् । सचानेकपदैक्यम् । सचतुर्द्धा॰ प्रधानार्थस्यचातुर्विध्यात् । तथाचोक्तं महाभाष्ये । क्वचित्समास : पूर्व्वपदार्थप्रधान : ॰ क्वचिदुत्तरपदार्थप्रधान : ॰ क्वचि

द्वन्यपदार्थप्रधानः० क्वचिदुभयपदार्थप्रधानइति ॥ पुनश्चद्विविधो नित्योऽनित्यभेदात् । अविग्रहोनित्यसमासः० अस्वपदविग्रहोवा० समस्यमानयावत्पदरहितविग्रहइतियावत् ।। तद्भिन्नोऽनित्यः ॥ अपिच । कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्चवृत्तयः । परार्थाभिधानंवृत्तिः० परशब्दस्य योऽर्थस्तस्याभिधानमितियावत् । वृत्त्यर्थबोधकंवाक्यंविग्रहः । सद्विधा । लौकिकोऽलौकिकश्च । परिनिष्ठितत्वात्साधुर्लौकिकः । प्रयोगानर्होऽसाधुरलौकिकः । यथाराज्ञः पुरुषः । राजन्ङस्० पुरुषसु० इति । अविग्रहोनित्यसमासोऽस्वपदविग्रहोवा । समासश्चतुर्द्धेतिप्रायोवादः० अव्ययीभावतत्पुरुषबहुव्रीहिद्वन्द्वाधिकारबहिर्भूतानामपिसहसुपेतिविधानात् । पूर्वपदार्थप्रधानोऽव्ययीभावः० उत्तरपदार्थप्रधानस्तत्पुरुषः० अन्यपदार्थप्रधानोबहुव्रीहिः । उभयपदार्थप्रधानोद्वन्द्वः इत्यपिप्रायोवादः प्रायोभिप्रायः । सूपप्रति० उन्मत्तगङ्गमित्याद्यव्ययीभावे० अतिमालादौतत्पुरुषे० द्वित्राः सपुत्रइत्यादिबहुव्रीहौ० दन्तोष्ठमित्यादिद्वन्द्वेचाभावात् । तत्पुरुषविशेषः कर्मधारयः० तद्विशेषोद्विगुः । अनेकपदत्वंद्वन्द्वबहुव्रीह्योरेव० तत्पुरुषस्यक्वचिदेवेत्युक्तम् ॥ किञ्च । सुपांसुपातिङानाम्नाधातुनाऽथतिङांतिङा । सुबन्तेनेतिविज्ञेयः समासः षड्विधोबुधैः ॥ सुपा० राजपुरुषः । तिङा० पर्यभूषत् । नाम्ना० कुम्भकारः । धातुना० कटप्रूः अजस्रम् । तिङां० तिङा० पिबतखादत । तिङांसुपा० कृन्तविचक्षणेतियस्यांक्रियायांसाकृन्तविचक्षणा । एहीडादयोन्यपदार्थेइति० मयूरव्यंसकादौपाठात् ॥ समासः । समुदाये । समूहे ॥

समासक्तः । त्रि० सम्यगासक्ते । संयुक्ते ॥

समासञ्जनम् । न० समासङ्गे । मेलने संयोगे ॥

समासत्तिः । स्त्री० संनिकर्षे ॥

समासन्नः । त्रि० प्रत्यासन्ने । निकटवर्त्तिनि ॥ समासीदतिस्म । षद्लृ० । गत्यर्थेतिक्तः । समासाद्यतेस्मवा ॥

समासवान् । पुं० तुन्ने । नन्दिवृक्षे ॥ त्रि० समासाश्रये । समासविशिष्टे ॥

समासादितः । त्रि० आहृते । प्राप्ते ॥

समासाद्यः । त्रि० प्राप्ये । गम्ये ।

व्याप्तुं शक्ये । समीसाद्यते । यद्
लृ० । ऋदृलोर्थ्यत् ।

समासार्था । स्त्री० समस्यायाम् । पूरणकृतपदाकाङ्क्षायाम् । कविशक्तिपरीक्षार्थमपूर्णतयैव पठ्यमानायाम् । यथा । शतचन्द्रं नभस्तलमिति । तत्र० दामोदरकराघातविह्वलीकृतचेतसा । दृष्टं चाणूरमल्लेनेत्यादिना० सा० पूर्यते ॥ समासोर्थोयस्याः ।

समासोक्तिः । स्त्री० अर्थालङ्कारभेदे ॥ यथा । परोक्तिर्भेदकैः श्लिष्टैः समासोक्तिः । प्रकृतार्थप्रतिपादकवाक्येन० श्लिष्टविशेषणमाहात्म्यान्नतु विशेष्यस्य सामर्थ्यादपि० यदप्रकृतस्यार्थस्याभिधानं सा समासोक्तिः ॥ उदाहरणम् । लहिऊणतुभुवाहुफंसं जीएसकोविउल्लासो । जय लच्छीतुहविरहे णहोज्जलादुव्वलाणं सा ॥ अत्र जयलक्ष्मीशब्दस्य केवलं कान्तावाचकत्वं नास्ति । प्राकृतस्य संस्कृतन्तु । लब्ध्वा तव बाहुस्पर्शं यस्याः सकोप्युल्लासः । जयलक्ष्मीस्तव विरहे खलूज्ज्वला दुर्बलाननु सेति ॥ अत्र बाहुस्पर्शलाभप्रयुक्तोल्लासादिसाधारणविशेषणबलाज्जयलक्ष्मीस्तत्कान्तोनायिकावृत्तान्तरूपतया गम्यत इति समासोक्तिरलङ्कारः ॥

समाहरणम् । न० समाहारे ॥

समाहारः । पुं० । समुच्चये । सुसमुदायकरणे । एकत्रकरणे । बहूनां भिन्नानां वाक्यव्यापारेण बुद्ध्या वा पञ्चमूलीत्रिभुवननवद्राणीकरणे ॥ सङ्क्षेपे ॥ समूहे । संहृतप्रधाने चार्थ विशेषे ॥ यथा कृष्णोपानहम् वाक्त्वचम् । शमीदृषदमिति ॥ अत्र संहतेरेकत्वादेकवचनं नित्यक्लीबतावभवतो ॥ समाहरणम् । हृञ् । घञ् । सम्यगाहारे ॥

समाहितः । त्रि० यतात्मनि । अनन्यमनसि । समाहितत्वमेकाग्र्यं मनसः श्रवणादिषु ॥ समाधिस्थे ॥ उक्तसिद्धान्ते ॥ आहिते ॥ निर्विवादीकृते ॥ प्रतिज्ञाते । संश्रुते । अङ्गीकृते ॥ समाधीयते स्म । क्तः । दधातेर्हिः ॥ सम्यगाहितः स्थितो वा ॥ सावधाने ॥ अलङ्कारान्तरे ॥

समाहृतः । त्रि० सम्मेलिते ॥

समाहृतिः । स्त्री० सङ्ग्रहे । समाहरणम् । भावेक्तिन् ॥ एककर्तृकाणामनेककर्तृकाणां वा एकाभिप्रायाणां वाक्यानां समाहरणे ॥ सङ्क्षिप्यते० सङ्क्षेपेण प्रतिपाद्यतेऽनया । क्तिन् ॥

समाह्वयः । पुं० आहवे । सङ्गरे ॥ आह्वाने ॥ प्राणिद्यूते । पशुभिः

पञ्चभिर्गायते ॥ तस्यनिषिद्धत्वं यथा । द्यूतंसमाह्वयञ्चैवराजाराष्ट्रान्निवारयेत् । राज्यान्तकरणावेतौ द्वौदोषौपृथिवीक्षिताम् ॥ प्रकाशमेतत्तास्कर्य्यं यद्देवनसमाह्वयौ । तयोर्नित्यंप्रतीघातेनृपतिर्यत्नवान्भवेत् ॥ अप्राणिभिर्यत्क्रियतेतल्लोकेद्यूतमुच्यते । प्राणिभिः क्रियतेयस्तुसविज्ञेयः समाह्वयः ॥ द्यूतंसमाह्वयञ्चैवयः कुर्यात् कारयेतवा । तान्सर्वान्घातयेद्राजाशूद्रांश्चद्विजलिङ्गिनइति ॥ स समाह्वयोऽस्त्यस्य । ऋअस्त्यर्थायाम् । पुंसीतिघः । बाहुलकात्नास्वम् ॥

समाह्वा । स्त्री॰ गोजिह्वायाम् । गोजियालता॰ इ॰ भा॰ प्रसिद्धा ॥

समित् । अ॰ निन्दायाम् ॥

समित् । स्त्री॰ युद्धे । आयोधने । रणे ॥ समयनम् । इणगतौ । सम्पदादित्वात्क्विप् । तुक् ॥

समितः । त्रि॰ सङ्गते ॥ सम्यक् इतः ॥

समिता । स्त्री॰ गोधूमचूर्णविशेषे । मयदा॰ इ॰ भा॰ प्र॰ ॥ यथा । गोधूमाधवलाधौताः कुट्टिताः शोषितास्ततः । प्रोक्षितायन्त्रनिष्पिष्टाश्चालिताः समितास्मृतेतिराजनिर्घण्टः ॥

समितिः । स्त्री॰ आजौ । सम्पराये । अभ्यामर्दे । सङ्ग्रामे ॥ सभायाम् ॥ सङ्गमे ॥ साम्ये ॥ संहतौ ॥ सहविद्यमानामिलितेवासमितिः प्रमाऽस्याम् । समयनम्॰ समीयतेवाऽस्याम् । इणगतौ । क्तिन् । समयन्त्यस्यांवा ॥

समितिञ्जयः । पुं॰ श्रीहरौ ॥ समितौयुद्धेजयति । जिजये । संज्ञायांभृतवृजीत्यादिना खच्मुमागमः ॥ समितिंयुद्धंजयतीतिवा ॥

समितिनन्दनः । त्रि॰ युद्धोत्सुके ॥ नन्दतीतिनन्दनः । समितौयुद्धे नन्दनः ॥

समिथः । पुं॰ वह्नौ ॥ समेति । इण॰ समीणइतिथक् ॥ सङ्ग्रामे सम्यगेतिजयायअत्र ॥

समिद्धः । त्रि॰ प्रज्वलिते । सम्यग् दीप्ते । समिद्धेन्धनाहुतीञ्जुहोतीतियथा ॥

समिद्वरः । पुं॰ किंशुकवृक्षे ॥

समित् । स्त्री॰ अग्निसन्दीपनार्थं तृणकाष्ठादौ । इन्धने । एधसि । समिन्धने । ईन्धन॰ इ॰ भा॰ प्र॰ ॥ समिध्यतेऽनया । ञिइन्धीदीप्तौ । सम्पदादित्वात्करणेक्विप् । नलोपः ॥ होमीयकाष्ठे ॥ तल्लक्षणं यथा । प्रादेशमात्राःसमिधः सवल्काश्च । [illegible] । समिधः

कल्पयेत्प्राज्ञः सर्वकर्मसु सर्वदेति मत्स्यपुराणम् ॥ छन्दोगपरिशिष्टेपि । नाङ्गुष्ठादधिकान्यूनासमित्स्थूलतयाक्वचित् । ननिर्मुक्तत्वचा चैव नसकीटा नपाटिता ॥ प्रादेशान्नाधिकानोनानतथास्याद्विशाखिका । नसपत्रानिर्वीर्याहोमेषुचविजानतेति ॥ निषिद्धलक्षणं यथा । विशीर्णाविदलाह्रस्वावक्राः स्थूलाद्विधाकृताः । कृमिदष्टाश्चदीर्घाश्चसमिधोनैवकारयेत् ॥ अत्र दोषोयथा । विशीर्णायुःक्षयं कुर्याद्विदलापुत्रनाशिनी । ह्रस्वानाशयतेपत्नींवक्रावन्धुविनाशिनी ॥ कृमिदष्टारोगकरीविद्वेषणकरीद्विधा । पशून्मारयतेदीर्घास्थूलाचार्थविनाशिनीतितन्त्रम् ॥ नवग्रहाणांसमिधोयथा । अर्कः पलाशः खदिरस्त्वपामार्गोथपिप्पलः उदुम्बरः शमीदूर्वाः कुशाश्चसमिधः क्रमादिति ॥

समिध : । पुं॰ असितार्च्चिषि । अग्नौ ॥

समिन्धनम् । न॰ समिधि ॥

समिरः । पुं॰ वायौ ॥ इ॰ ह॰ चन्द्रः ॥

समी । स्त्री॰ शम्याम् । बीजगुप्त्याम् ॥ समति । षम॰ । अच् । गौरादिः ॥

समीकम् । न॰ साम्परायिके । युद्धे ॥ समनम् । षम॰ । अनीकादयश्चेतिकन् ॥ सम्यगयनंवा । ईगत्यांश्री । बाहुलकात्कः ॥

समीक्षम् । न॰ साङ्ख्यशास्त्रे ॥

समीक्षणम् । न॰ सम्यङ्निरूपणे ॥ प्रेक्षणे ॥ सम्यक्प्रकारेणईक्षणं दर्शनम् ॥

समीक्षा । स्त्री॰ तत्त्वे ॥ बुद्धौ ॥ निभालने । समीक्षणे । दर्शने ॥ मीमांसाशास्त्रे ॥ सम्यगीक्षणमनयावा ॥ ईक्ष॰ । गुरोश्चहलः । टाप् ॥ यत्ने ॥

समीक्ष्यः । त्रि॰ समीक्षणीये । दर्शनीये ॥

समीक्ष्यमाणः । त्रि॰ प्रेक्ष्यमाणे ॥

समीषः । पुं॰ समुद्रे । अकूपारे ॥ संयल्लिखस्मिन् ॥ इण॰ । समीणादूतिचट्दीर्घत्वञ्चधातोः ॥

समीची । स्त्री॰ मृग्याम् । एण्याम् ॥ वन्दनायाम् ॥ टित्वान्ङीप् ॥

समीचीनम् । न॰ सत्ये । ऋते । तथ्ये ॥ त्रि॰ तद्वति ॥ सम्यगेव । विभाषाञ्चेरदिक्स्त्रियामितिखः । सम : समि ॥ शोभने ॥

समीनः । त्रि॰ समाम्॰ अभीष्ट॰ भृत॰ भूत॰ भाविनि । समायाः खः ॥ मीनसहिते ॥

समीपः । त्रि॰ अव्यवहिते । निकटे

॥ सङ्गताऽपायोयस्मिन् । कृतक् पूरित्य : समासान्त : । दृव्यन्तरुपसर्गेभ्योपईत् ॥

समीपकम् । न॰ निकटे ॥

समीपता । स्त्री॰ समीपत्वे । सामीप्ये । नैकट्ये ॥

समीर : । पुं॰ मारुते । श्वसने । स्पर्शने । वायौ ॥ सम्यगीरयतिगच्छति । ईरयतिप्रेरयतिवा । ईरगतौ कम्पनेच । पच् । स्वार्तिनवच्चे ॥ समीरुणे ॥

समीरण : । पुं॰ श्वसने । नभस्वति । वाते । पवने ॥ सम्यगीरयति॰ गच्छति॰ सम्यगीरयतिप्रेरयतिवा । ईर॰ । युच्॰ ल्युर्वा ॥ पथिके । पान्थे ॥ फणिज्झके । मरुवके । मरुवा॰ इ॰ प्र॰ पुष्पवृक्षे ॥

समीरसार : । पुं॰ विल्वे ॥

समीरित : । त्रि॰ उद्दीपिते ॥ क्षिप्ते ॥ समीर्यतेस्म । ईर्॰ । क्त : ॥

समीहन : । पुं॰ विष्णौ ॥ सृष्ट्याद्यर्थं समीहते । ईह॰ । नन्द्यादित्वाल्ल्यु : ॥

समीहा । स्त्री॰ वाञ्छायाम् ॥ सम्यगीहनमनया । ईह॰ । गुरोश्चेत्य: ॥

समीहित : । त्रि॰ वाञ्छिते ॥ सम्यक् ईहित : ॥

समुख: । त्रि॰ वाग्मिनि । वावदूके ॥

समुचित : । त्रि॰ यथायोग्ये । सम्यगुचित : ॥

समुच्चय : । पुं॰ सहावस्थानलक्षणे॰ एकाधिकरण्ये ॥ समाहारे, राशीकरणे । यथा । राशीद्वयोर्बहूनाञ्चसमाहार: समुच्चय : । चार्थविशेषे । परस्परनिरपेक्षस्यानेकस्यैकस्मिन्नन्वये ॥ यथागार्ग्यौशात्यश्चपचतिपठतिचचैत्र : ॥ समुच्चयनम् । चिञ्॰ । एरच् ॥ इन्दे ॥ अर्थालङ्कारभेदे । यथा । तत्सिद्धिहेतावेकस्मिन्यत्रान्यत्तत्करंभवेत्॰ समुच्चयोऽसौ ॥ तत्र प्रस्तुतस्यकार्यस्य॰ एकस्मिन्साधकेस्थिते॰ साधकान्तराणियत्रसम्भवन्तिससमुच्चय : उदाहरणम् । दुर्वारा : स्मरमार्गणा : प्रियतमोदूरेमनोऽप्युत्सुकंगाढंप्रेमनवंवयोऽतिकठिना : प्राणा : कुलंनिर्मलम् । स्त्रीत्वंधैर्यविरोधिमन्मथसुहृत्काल : कृतान्तोऽक्षमीनोसख्यश्चतुरा : कथंनुविरह : सोढव्यइत्थंशठ : ॥ अत्रविरहासहत्वंस्मरमार्गणाएवकुर्वन्ति॰ तदुप्रियतमदूरस्थित्याद्युपात्तम् । एषएवसमुच्चय:॰ सद्योगे॰ऽसद्योगे॰ सदसद्योगेचपर्यवस्यतीतिनपृथग्लक्ष्यते । तथाहि । कुलममलिनंभद्रामूर्त्तिर्मतिः श्रुतशालिनीभुजबलमलंस्फीतालक्ष्मी : प्रभुत्वमखण्डितम् । प्र

कृतिसुभगा द्यौतेभा बाऽमीभिरयं जनो व्रजति सुतरां दर्पं राजंस्त एव तव क्षुभाः ॥ अवसतां योगः॰ उक्तोदाहरणे त्वसतां योग : शशी दिवसधूसरो॰ गलितयौवना कामिनी॰ सरो विगतवारिजं॰ मुखमनक्षरं स्वाकृते । प्रभुर्धनपरायणः॰ सततदुर्गत : सज्जनो नृपाङ्गणगत : खलो॰ मनसि सप्त शल्यानि मे ॥ अत्र शशिनि धूसरे शल्ये शल्यान्तराणीति शोभनशोभायोग : ॥ द्वितीय : समुच्चयो यथा । सत्त्वन्यायुगपद्या गुणक्रिया : । गुणौ च क्रिये गुणक्रिया : । क्रमेणोदाहरणम् । विदलितसकलारिकुलं तव बलमिदमभवदाशु विमलञ्च । प्रखलमुखानि नराधिप मलिनानि च तानि जातानि ॥ अयमेकपदे तया वियोग : प्रियया चोपगत : सुदु : सहो मे । नववारिधरोदयादहोभिर्भवितव्यञ्च निरातपत्वरम्यै : कलुषञ्च तवाहितेष्वकस्मात् सितपङ्करुहसोदरश्रि- चक्षु : । पतितञ्च महीपतीन्द्र तेषां वपुषि प्रस्फुटमापदां कटाक्षै : ॥ बहूनां समाहारे ॥ खलेकपोतन्यायेन बहूनां कार्यसाधने । कारणानां समुद्योग : सहितीय: समुच्चय: ।

समुच्छेद : । पुं॰ विनाशे ॥

समुच्छ्रय : । पुं॰ विरोधे । वैरे ॥ उत्सेधे । उन्नतौ ॥ सम् उत् ऊर्द्ध्वं श्रयणम् । श्रिञ्॰ । एरच् ॥

समुच्छ्राय : । पुं॰ समुच्छ्रये ॥ सम्यगुच्छ्राय : ॥

समुच्छ्रित : । त्रि॰ उच्चे ॥

समुज्झित: । त्रि॰ त्यक्ते ॥ समुज्झ्यते स्म । उज्झ उत्सर्गे । क्त : ॥

समुत्कीर्ण : । त्रि॰ सम्यगुल्लिखिते । विद्धे ॥

समुत्क्रम : । पुं॰ ऊर्द्ध्वगमने ॥ सम्यगुत्क्रमे ॥

समुत्क्रोश : । पुं॰ कुररपक्षिणि ॥ सम्यगुत्क्रोशति । क्रुश॰ । अच् ॥

समुत्त : । त्रि॰ क्लिन्ने ॥ समुनत्ति । उन्दी क्लेदने । अकर्मकत्वात् कर्त्तरि क्त : । नुदविदेतिपक्षे नत्वाऽभाव : ॥

समुत्थ : । त्रि॰ समुद्भवे ॥ समुत्थिते ॥

समुत्थनम् । न॰ समुद्योगे ॥ व्याधीनां निर्णये ॥ ऊर्द्ध्वगमने ॥ सम्यक्प्रकारेणोत्थाने । उठावना॰ उभाकर्ना॰ इ॰ भा॰ ॥ यथा । इन्द्रध्वजसमुत्थानं प्रमादाद्भ्रष्टतां यदि । तदाद्वादशमे वर्षे कर्त्तव्यं नान्तरा पुन : ॥

समुत्थित : । त्रि॰ सम्यगुत्थिते ॥

समुत्पतनम् । न॰ कूर्दने ॥

समुत्पन्न : । त्रि॰ समुद्भूते ॥

समुत्पिञ्ज : । त्रि० अत्यन्तव्याकुले ॥ समुत्पिञ्जते । पिजिहिंसायाम् । अच् ॥ पुं० भृशमाकुलसैन्ये । पिञ्जले ॥

समुत्सुक : । त्रि० अनुरक्ते । सम्यगुत्कण्ठिते ॥ सम्यगिष्टार्थोद्युक्ते ॥

समुद् । त्रि० सानन्दे ॥ मुदासह वर्त्तते इ० ॥

समुदक्त : । त्रि० कूपादेरुद्धृतजलादौ । उद्धृते । समुदच्यतेस्म । अञ्चु० । क्त : ॥

समुदय : । पुं० सङ्घे । गणे । समूहे ॥ संयुगे । रणे । युद्धे ॥ समुद्गमे ॥ समुदीयते० समुदयतेवा । इण० । अयगतौवा । एरच्० । पचाद्यच्वा ॥ समेत्योदये ॥ राशांधान्यहिरण्याद्युत्पत्तिस्थाने ॥ समुदयन्ति० उत्पद्यन्ते० अस्मादर्था : । एरच् ॥ दिने । न० लग्ने ॥

समुदागम : । पुं० समन्ताज्ज्ञाने ॥

समुदाचार : । पुं० अभिप्राये । आशये ॥

समुदाय : । पुं० समूहे ॥ युद्धे ॥ समुदायते । अयगतौ । आङ्पूर्व : । अच् । समुदयनम् । अवदानादौ घञ्वा ॥ पृष्ठस्थायिबले ॥ उद्गमे ॥

समुदित : । त्रि० समुत्थिते समुन्नते ॥ सम्यक्प्रकारेणकथिते ॥

समुद्दीयनम् । न० पक्षिणांपरस्परस्पर्द्धयागमने

समुद्ग : । पुं० समुद्गके ॥ समुद्गच्छति । गम्लृ० । अन्येष्वपीतिड : ॥ यमकभेदे ॥ पादाभ्यास : समुद्ग : स्यादस्यभेदास्त्रयोमता: ॥ त्रि० मुद्गसहिते ॥

समुद्गक : । पुं० सम्पुटके । भूषणाद्याधारे ॥ समुद्गच्छति । गम्लृ० । अन्येष्वपीतिड : । स्वार्थेकन् ॥

समुद्गत : । त्रि० उत्पत्तिशाली ॥

समुद्गम : । पुं० ऊर्ध्वगतौ ॥ उत्पत्तौ ॥

समुद्गयमकम् । न० चित्रकाव्यप्रभेदे ॥ यथा । अयशोभिदुरालोकेकोपधामरणाहते ॥ अयशोभिदुरा० लोके० कोपधा० मरणाहते ॥ अस्यार्थ: । अय: शुभावहोविधि:० अयशोभी० भाग्यवान् । सचासौदुरालोक:० तेजस्वित्वाद्दुर्दर्शश्चेतिविशेषणसमास:० तस्मिन् । कोपधामकोपाश्रय : कुपितइत्यर्थ: । अतएवरणाहत:० रणार्थीत्यर्थ: । कोपधामचासौ० रणाहतश्चतस्मिन्० एवंविधेवीरेलोके । अयशोभिदुरा० स्वाम्यनादरनिमित्ता

पक्षोर्मिनिर्मुक्तिका० उपधा० उपा
यः० मरणादृते० प्राणत्यागंविने
त्यर्थः । का० नकारोपेक्षार्थः ॥

समुद्गीतम् । त्रि० उच्चैर्गीते ॥

समुद्गीर्णः । त्रि० वमिते ॥ उत्तो
लिते । कथिते ॥

समुद्धतः । त्रि० अविनीते ॥ स
मुद्गीर्णे ॥ समुद्धन्निम्म० स
मुद्धन्यतिस्मवा । हन्तेर्गत्यर्थत्वा
त्कर्त्तरिक्तः कर्मणिवा ॥

समुद्धरणम् । न० उद्धरणे ॥ स
म्यगुद्ध्रियते । उद्धरतेर्ल्युट् ०
भावेवा ॥ वान्तान्ने ॥ उन्नये ॥
भुक्तोज्झितोन्मूलितयोः स्यादुद्ध
रणमुन्नयेऽपितिरभसः ॥

समुद्धर्त्ता । त्रि० उद्धारकर्त्तरि ॥
श्रीगुरौ ॥ सम्यगनायासेन० उत्०
ऊर्ध्वे सर्वबाधावधिभूतेशुद्धेब्रह्म-
णिधर्त्ता० धारयिता ॥ उन्मूलयि
तरि ॥ यथा ॥ अनन्माणांसमुद्ध
र्त्तुरितिरघु : ॥

समुद्धृतः । त्रि० समुत्क्षीर्णे ॥
अपनीते ॥ उत्थापिते ॥ यथा ।
जलौघमग्नासचराचराधरा विषाण
कोट्याखिलविश्वमूर्त्तिना । सम्
द्धृतायेनवराहरूपिणासमेस्वयम्भू-
भंगवान्प्रसीदतु ॥ सम्यक्प्रका
रेणउद्धृतः ॥

समुद्भवः । पुं० उत्पत्तौ ॥ कारणे

सम्यगुद्भवः ॥ समुद्भवत्यस्मात्वा ॥
अपादानार्थे ॥ भुवोऽप्रदेरप् ॥

समुद्भूतः । त्रि० समुत्पन्ने ॥

समुद्रः । पुं० अम्भोधौ । तत्पर्या
याः । समुद्रो० ऽब्धिरकूपारः० पा
रावारः० सरित्पतिः । उदन्वानु
दधिः० सिन्धुः० सरस्वान्० साग
रो० र्णवः । रत्नाकरो० जल
निधि० र्यादःपति० रपाम्पतिरि
ति । समुनत्ति० उन्दी० । स्फा
यीतिरक् ॥ चन्द्रोदयेसम्यक्उन्द
न्ति क्लिद्यन्तिआपोयत्रवा । अपा
म्बसमुन्दनसमुद्रइतिस्मृतइ०
वायुपुराणम् ॥ समीचीनाः० उ
द्राः० जलचरविशेषायस्मिन्नितिवा
॥ सहमुद्रयामर्यादयावर्त्तते० इ
तिवा । परमात्मनि ॥ समुत्पद्य
भूतानिद्रवन्तिलयंगच्छन्त्यस्मिन्नि-
तिव्याख्यानात् ॥ सङ्ख्याविशेषे
॥ अन्त्यादिमध्यंदशगुणः समुद्रइति
रामायणटीकायांमाहेश्वरव्याख्या
नात् ॥ ढगणस्यद्वितीयपर्याये
आदिगुरुत्रिकले० SI० । त्रि० मु
द्रयासहितेपवादौ ॥

समुद्रकफः । पुं० समुद्रफेने ॥ स
मुद्रस्यकफइव ॥

समुद्रकान्ता । स्त्री० नद्याम् ॥ समु
द्रस्यकान्ता । समुद्रः कान्तोयस्या
वा ॥ पृक्कायाम् ॥

समुद्रगा । स्त्री॰ नद्याम् ॥

समुद्रगृहम् । न॰ जलयन्त्रालये । फुहारिकाघर॰ इ॰ भा॰ विशेषः ॥

समुद्रचुलुकः । पुं॰ अगस्त्यमुनौ ॥ समुद्रश्चुलुकोगण्डूषोऽस्य ॥

समुद्रदयिता । स्त्री॰ नद्याम् ॥

समुद्रनवनीतम् । न॰ पीयूषे ॥ चन्द्रे ॥ समुद्रस्यनवनीतमिव ॥

समुद्रनेमिः । स्त्री॰ समुद्रमेखलायाम् । भूमौ ॥ समुद्रोनेमिरिवनेमिरस्याः ॥

समुद्रफलम् । न॰ अब्धिफले । औषधविशेषे ॥ तद्गुणायथा । फलंसमुद्रस्यकटूष्णकारि॰ वातापहंभूतनिरोधकारि । त्रिदोषदावानलदोषहारिकफामयभ्रान्तिनिरोधकारीतरा॰ नि॰ घण्टः॰ ॥

समुद्रफेनः । पुं॰ फेने । अब्धिकफे । डिण्डीरे ॥ समुद्रफेनश्चक्षुष्योलेखनःशीतलःसरः । कषायोविषपित्तघ्नःकर्णरुक्कफहृल्लघुः ॥

समुद्रमेखला । स्त्री॰ भुवि । अचलायाम् । विश्वम्भरायाम् ॥ स्थिरायाम् ॥ समुद्रोमेखलायस्याः ॥

समुद्रयात्रा । स्त्री॰ पोतेनसमुद्रगमने । समुद्रयात्रादयःकलौ निषिद्धायथा । समुद्रयात्रास्वीकारःकमण्डलुविधारणम् । द्विजानामसवर्णासुकन्यासूपयमस्तथा । देवरेणसुतोत्पत्तिर्मधुपर्केपशोर्वधः । मांसादनंतथाश्राद्धेवानप्रस्थाश्रमस्तथा ॥ दत्तायाश्चैवकन्यायापुनर्दानंपरस्यच । दीर्घकालंब्रह्मचर्यंनरमेधाश्वमेधकौ ॥ महाप्रस्थानगमनंगोमेधश्चतथामखः । इमान्धर्मान्कलियुगेवर्ज्यानाहुर्मनीषिणइतिबृहन्नारदीयम् । अपिच । एतानिलोकगुप्त्यर्थंकलेरादौमहात्मभिः । निवर्त्तितानिकर्माणिव्यवस्थापूर्वकंबुधैरिति ॥

समुद्रयानम् । न॰ पोते । वहित्रे ॥ यथा । समुद्रयानेरत्नानिमहामूल्यानिसाधुभिः । रत्नपरीक्षकैःसार्द्धमानयिष्येबहूनिचेतिवराहपुराणम् ॥

समुद्रयायी । त्रि॰ समुद्रवहित्रादिनाद्वीपान्तरगामिनिजने ॥ समुद्रयायीवन्दीचतैलिकःकूटकारकः इतिमनुः ॥ समुद्रयायिभिःसार्द्धंसंविदंसूच्यनिर्गतइतिवराहपुराणं ॥

समुद्ररसना । स्त्री॰ पृथ्व्याम् ॥ समुद्रोरसनाकाञ्चीयस्याः ॥

समुद्रलवणम् । न॰ काँडके । त्रिकू

टे । सामुद्रे ॥ समुद्रस्य लवणम् । समुद्रजलजातं लवणं वा ॥

समुद्रवह्निः । पुं॰ वाडवे । वडवानले ॥

समुद्रविजयः । पुं॰ अर्हत्पितरि ॥

समुद्रसिन्धुसङ्गमः । पुं॰ । तीर्थविशेषे ॥

समुद्रसुभगा । स्त्री॰ गङ्गायाम् ॥

समुद्रा । स्त्री॰ शम्यां ॥ शम्यां ॥

समुद्रान्तम् । न॰ जातीफले ॥ अब्ध्यावसाने ॥

समुद्रान्ता । स्त्री॰ तुण्डिकेय्याम् कार्पास्याम् ॥ समुद्रोऽन्तोयस्याः ॥ यद्वा । मुद्रयासहवर्त्तमानोऽन्तः समीपेयस्याः । आच्छादकत्वात् ॥ दुरालभायाम् । यासे । यवासे ॥ समुद्रोऽन्तोऽस्त्यस्याः । अर्श आद्यच् ॥ समुद्रोऽन्तोऽस्यावा ॥ मरुन्मालायाम् ॥ पृक्कायाम् ॥ समुद्रोंतोऽस्याः ॥

समुद्राम्बरा । स्त्री॰ पृथिव्याम् । अचलायाम् ॥ समुद्रोम्बरं वसनं यस्याः ॥

समुद्रायणा । स्त्री॰ नद्याम् । सरिति । समुद्रोऽयनं गतिर्यस्याः ॥

समुद्रारः । पुं॰ ग्राहविशेषे ॥ सेतुबन्धे ॥ तिमिङ्गिले ॥

समुद्रेकः । पुं॰ प्रादुर्भावे ॥

समुन्दनम् । न॰ आर्द्रीभावे । तेमे । स्तेमे । उन्दी॰ ल्युट् ॥

समुन्नः । त्रि॰ आर्द्रे । समुनत्ति । उन्दी॰ अकर्मकत्वात् कर्त्तरि क्तः । नुदविदेति पक्षे नत्वम् । सम्यगुन्नं क्लिन्नं वा ॥

समुन्नतः । त्रि॰ समुन्नद्धे ॥ स्तम्भविशेषे । दू॰ धरणिः ॥

समुन्नतिः । स्त्री॰ समुच्छ्रये । उत्सेधे ॥ अतिवृद्धौ ॥

समुन्नद्धः । त्रि॰ समुद्धृते ॥ पण्डितम्मन्ये ॥ गर्विते । दृप्ते ॥ ऊर्ध्वबद्धे ॥ प्रभौ ॥

समुन्नयः । पुं॰ समुच्छ्रये

समुन्नाहः । पुं॰ उच्छ्रये ॥

समुपक्रमः । पुं॰ आरम्भे ॥ समुपक्रमणम् । क्रमु॰ । घञ् ॥

समुपजोषम् । अ॰ आनन्दे । काल्यार्थे ॥ समुपजोषणम् । जुषीप्रीतिसेवनयोः । अम् प्रत्ययः ॥

समुपस्थितः । त्रि॰ प्राप्ते ॥

समुपेतः । त्रि॰ सम्प्राप्ते ॥

समुपेयिवान् । त्रि॰ सम्यगुपगते ॥

समुल्लसत् । त्रि॰ सम्यगुल्लासयुक्ते ॥ यथा । दरस्मितसमुल्लसद्वदनकान्तिपूरामृतैर्भवानलविभर्जितानन्निशमूर्जयन्तीनरान् । चिदेकमयचन्द्रिकाचयचमत्कृतिं तन्वतीतनोतु ममशंतनोः सपदिशन्तनोरङ्गना ॥

समुल्लिखन् । त्रि॰ पादादिनाभूमि

खननकर्त्तरि ॥

समुल्लेखः । पुं० सम्यक्कथने । सम्यगुच्चारणे ॥

समूढः । त्रि० पुञ्जिते । भुग्ने ॥ सद्योजाते ॥ अनुप्लुते ॥ शोधिते ॥ दमिते ॥ ऊढे ॥ विवाहिते ॥

समूरुः । पुं० अजिनयोनौ । हरिणप्रभेदे ॥ शोभनावूरू यस्य ॥

समूलः । त्रि० सप्रमाणके । मूलसहिते ॥ मूलेनसहवर्त्तमानइति तथा ॥

समूहः । पुं० व्यूहे । सन्दोहे । व्रजे । समुदाये । समूच्चये ॥ ऊह० घञ् ॥

समूहद्वारः । पुं० द्वारनिकुरम्बे ॥

समूहगन्धम् । न० जवादिनि । गन्धाढ्य ॥

समूहनी । स्त्री० ऊहन्याम् । सम्मार्जन्याम् ॥

समूहितः । त्रि० एकत्रीकृते ॥

समूह्यः । पुं० यज्ञाग्नौ । परिचाय्ये । उपचाय्ये ॥ समुह्यते० समूह्यतेवा । वह्नप्रापणे० ऊहवितर्केवा । अग्नौपरिचाय्योपचाय्यसमूह्याइतिसाधुः । अग्निधारणार्थेस्थलविशेषे ॥

समृद्धः । त्रि० अधिकद्धर्ौ । समृद्धियुक्ते ॥ समृध्नोतिस्म । ऋधुवृद्धौ । अकर्मकत्वात्कर्त्तरिक्तः ॥

समृद्धिः । स्त्री० महद्धर्ौ । एधायाम् । धनसम्पत्तौ । अपेक्षितार्थसम्पत्तौ ॥ समर्द्धनम् । ऋधु० । क्तिन् ॥

समेतः । त्रि० मिलिते । संयुक्ते ॥ यथा । श्रीनाथेनसमेतःस्वच्छन्दंकुरुकेलिमिति ॥ अपिच । नामसमेतंकृतसङ्केतंवादयतेमृदुवेणुमिति ॥

समेत्य । अ० मिलित्वेत्यर्थे ॥

समेधितः । त्रि० सम्यग्वर्द्धिते ॥

समोदकम् । न० मथिताम्बुदधिनि । उदश्विति ॥ सममुदकंयस्मिन् ॥

समोसा । पुं० स्वनाम्नेवलोकभाषायाम् सूदशास्त्रे अप्रसिद्धेखाद्यविशेषे ॥ निर्माणप्रकारोयथा ; मण्डकस्यकृतापट्टीपूरणेनप्रपूरिता । वेष्ट्यशृङ्गाटकाकारंसम्भिंलिप्येत्कनिष्ठया । घृतेपचेत्समोसेतिनाम्नाअष्टोतिसूपकः ॥ सुरुच्यंवातजिद्वल्यंवृष्यंपित्तापहंगुरु । शिखिषोषगुणोयेयोहिमांसभेदात्सजायते ॥

सम्पत्तिः । स्त्री० विभवोत्कर्षे । लक्ष्म्याम् । सम्पदि ॥ साचेशानपत्नी यथा । ईशानपत्नीसम्पत्तिःपूजिताचसुरैर्नरैः । सर्वलोकादरिद्राश्चजगत्सुचययाविनेतिभागवतम् ॥ इष्टप्राप्तौ ॥ सम्पदनमनयावा । पदगतौ । स्त्रियांक्तिन् । मुक्तौ । ऋद्धिनामौषधौ ॥ गुणोत्कर्षे ॥

सम्पत्, द॰ । स्त्री॰ भूतौ ॥ गुणोत्कर्षे ॥ हारभेदे ॥ सम्पद्यतेऽनयेति वा । पद॰ । सम्पदादित्वात् क्विप् ॥ अथ सम्पद उच्यन्ते स्वल्पेकर्मणि कर्मणा : । महतश्चिन्तनं सम्पत्तया प्राप्यं महाफलम् ॥ इतीयतारायाम् ॥ वासनाः सन्ततौ शरीरारम्भकाः सौगुण्यादिकर्मभिरभिव्यक्ता वासनाः । सा द्विधा । दैवी॰ आसुरीति भेदात् । अनयोर्विस्तारस्तु भगवद्गीतायां षोडशाध्याये यथा । श्रीभगवानुवाच । अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः । दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् । अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् । दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥ तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता । भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥ दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च । अज्ञानञ्चाभिजातस्य पार्थ सम्पदमासुरीम् ॥ दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता । मा शुचः सम्पदं दैवीमभिजातोऽसि पाण्डव ॥ द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च । दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥ प्रवृत्तिञ्च निवृत्तिञ्च जना न विदुरासुराः । न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥ असत्यमप्रतिष्ठन्ते जगदाहुरनीश्वरम् । अपरस्परसम्भूतं किमन्यत् कामहैतुकम् ॥ एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः । प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ॥ काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः । मोहाद्गृहीत्वाऽसद्ग्राहान् प्रवर्त्तन्तेऽशुचिव्रताः ॥ १० ॥ चिन्तामपरिमेयाञ्च प्रलयान्तामुपाश्रिताः । कामोपभोगपरमा एतावदिति निश्चिताः ॥ आशापाशशतैर्बद्धाः कामक्रोधपरायणाः । ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ॥ इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथम् । इदमस्तीदमपि मे भविष्यति पुनर्द्धनम् ॥ असौ मया हतः शत्रुर्हनिष्ये चापरानपि । ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी ॥ आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया । यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥ अनेकचित्तविभ्रान्ता मोहजालसमावृताः । प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ॥ आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः । यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्व्वकम् ॥ अहङ्कारं बलं दर्पं कामं क्रोधञ्च संश्रिताः । मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥

तानहं द्विषतः क्रूरान् संसारेषु न
राधमान् । क्षिपाम्यजस्रमशुभाना
सुरीष्वेव योनिषु ॥ आसुरीं योनि
मापन्ना मूढा जन्मनि जन्मनि । मा
मप्राप्यैव कौन्तेय ततो यान्त्यधमां ग
तिम् ॥ २० ॥ त्रिविधं नरकस्येदं
द्वारं नाशनमात्मनः । कामः क्रो
धस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्
॥ एतैर्विमुक्तः कौन्तेय तमोद्वारै
स्त्रिभिर्नरः । आचरत्यात्मनः श्रे
यस्ततो याति परां गतिम् ॥ यः शा
स्त्रविधिमुत्सृज्य वर्त्तते कामचारतः
। न स सिद्धिमवाप्नोति न सुखं न परां
गतिम् ॥ तस्माच्छास्त्रं प्रमाणन्ते का
र्य्याकार्य्यव्यवस्थितौ । ज्ञात्वा शा
स्त्रविधानोक्तं कर्म कर्त्तुमिहार्हसि
॥ २४ ॥ इति ॥

सम्पदम् । न० समपदयुगे ।

सम्पद्यमानः । त्रि० मिलिते ॥

सम्पया । स्त्री० अलक्ते । लाक्षारसे ।

सम्पन्नः । त्रि० सम्पत्तिसहिते । समृद्धे ॥ साधिते ॥ सङ्गते । एकीभूते ॥ विशिष्टे ॥ सम्पद्यतेस्म । पद० । क्तः । रदाभ्यामिति नत्वम् ॥

सम्परायः । पुं० समीके । युद्धे ॥ आपदि ॥ उत्तरकाले ॥ सम्यक् परेत्यास्मिन् यतेइतिसम्परायः० परलोकस्तस्मिन्० इतिव्याख्यातारः

॥ सम्परायणम् । इण० । परच् अय० इगतौवा । घञ् ॥

सम्परायकम् ।) न० युद्धे ॥
सम्परायिकम् ।)

सम्परेतः । त्रि० मृते ॥

सम्पर्कः । पुं० मेलके ॥ रतौ । सुरते ॥ सम्बन्धे । संयोगे ॥

सम्पर्की । त्रि० सम्पर्कविशिष्टे ॥

सम्पाकः । पुं० आरग्वधे ॥ सम्यक् पाके ॥ त्रि० तर्कके । याचके ॥ धृष्टे ॥ सम्यक् पाकोऽस्य ॥ सम्यक् पचनम्० सम्यक् पच्यतेऽनेनवा । डुपचष्० । करणे तिघञ् ॥

सम्पाटः । पुं० तर्कौ ॥ इ० अ० माला ॥

सम्पातः । पुं० पक्षिगतविशेषे । पतने ॥ सम्भूयपतने ॥ सच्चारे ॥ सम्यक् पतनम् । पतॢ० । घञ् ॥ सम्यक् पतन्त्यनेनेतिव्युत्पत्त्या० कर्म्मणः क्षये ॥

सम्पातिः । पुं० पक्षिराजे । अरुणात्मजे० जटायुषोज्येष्ठभ्रातरि ॥ सम्यक् पातिः । पातेरतिः ॥

सम्पातिकः । पुं० सम्पातौ ॥

सम्पादकः । त्रि० निष्पादके । सम्पन्नकर्त्तरि ॥ धनादिसङ्ग्राहके ॥

सम्पादनम् । न० निष्पादने । कर्म्मणि ॥

सम्पादितः । त्रि० योजिते ॥ स

स्थिते ॥

सम्पीडः । पुं॰ पीडने ॥

सम्पीडनम् । न॰ सम्यक्प्रकारेणव्यथने ॥

सम्पुटः । पुं॰ कुरुवके ॥ समुद्गके ॥ पिटके । एकजातीयोभयमध्यवर्त्तिनि ॥ रतिबन्धविशेषे ॥ यथा । सम्प्रसार्य्योभयोपादौ शय्यागतकपोलकः । भगलिङ्गस्य संयोगाद्रमते सम्पुटोहिसः ॥

सम्पुटकः । पुं॰ समुद्गके । भूषणाद्यावपने । उब्वा॰ ह॰ भा॰ प्र॰ । सम्पुच्यते । पुटसंश्लेषणे । क्वुन् ॥

सम्पूर्णः । पुं॰ रागजातिविशेषे ॥ यथा । औडवः पञ्चभिः प्रोक्तः स्वरैः षड्भिस्तुषाडवः । सम्पूर्णः सप्तभिः प्रोक्तोरागजातिस्त्रिधामतेति ॥ त्रि॰ न्यूनत्वदोषरहिते । कृत्स्ने । परिपूर्णे ॥ साङ्गे ॥ सम्पूर्य्यतेस्म । पूरी॰ । णिच् । कर्त्तरि॰ कर्म्मणिवाक्तः ॥

सम्पृक्तः । त्रि॰ खचिते । मिश्रिते । आरब्धे । कबरे । मिश्रे ॥ संयुक्ते ॥ संसृष्टे । सम्पृच्यतेस्म । पृची॰ । क्तः ॥

सम्प्रज्वालः । पुं॰ तपोविशेषलब्धसं ज्ञकैदानप्रस्थविशेषे ॥

सम्प्रज्ञातः । पुं॰ समाधिप्रभेदे ॥ त्रि॰ सम्यक्प्रकर्षेणज्ञाते ॥

सम्प्रज्ञातसमाधिः । पुं॰ सविकल्पकसमाधौ ॥ ब्रह्माहमस्मीतिचिन्तयतो॰ यावच्चेतोव्यापृतिस्तावत्सम्प्रज्ञातसमाधिः ॥

सम्प्रतापनः । पुं॰ कुम्भीपाके ॥

सम्प्रति । अ॰ अधुनार्थे ॥ सम्॰ प्रति॰ एतयोः समाहारद्वन्द्वः ॥ न्याय्ये ॥

सम्प्रतिः । पुं॰ पूर्वकल्पस्याईद्भेदे ॥

सम्प्रतिपत्तिः । स्त्री॰ उत्तरविशेषे । साध्यस्यसत्यकथने ॥ श्रुत्वाभियोगंप्रत्यर्थीयदितंप्रतिपद्यते । सातु सम्प्रतिपत्तिः स्याच्छास्त्रविद्भिरुदाहृता ॥ निश्चये ॥ उत्पत्तौ ॥

सम्प्रतिपन्नः । त्रि॰ सम्यग्ज्ञाते ॥

सम्प्रतिष्ठा । स्त्री॰ स्थितौ ॥

सम्प्रतीतिः । स्त्री॰ सम्यक्ख्यातौ ॥ सम्यक्ज्ञाने ॥

सम्प्रत्ययः । पुं॰ आदरे । भक्त्यतिशये ॥ ज्ञाने । निश्चये ॥ यथासंज्ञासम्प्रत्ययायसंज्ञात्वनिश्चयायेतितदर्थः ॥

सम्प्रदाता । त्रि॰ दातरि । सम्प्रदानकर्त्तरि ॥

सम्प्रदानम् । न॰ दानपात्रे । चतुर्थीकारके । त्यागोद्देश्ये ॥ सम्यक्प्रकर्षेणदीयतेऽस्मै तत् ॥ सम्यक्प्रकृष्टदानंवा ॥

सम्प्रदायः । पुं॰ गुरुपरम्परागतस
दुपदेशे । आम्नाये ॥ आगमोक्ता
वैष्णवसम्प्रदायायथा । श्रीशिवउवा
च । वैखानसः सामवेदादौ श्रीराधा
वल्लभीतथा । गोकुलेशो महेशानित
थावृन्दावनी भवेत् ॥ पाञ्चरात्रः प
ञ्चमः स्यात्षष्ठः श्रीवीरवैष्णवः
। रामानन्दी हरिव्यासी निम्बार्कश्च
महेश्वरि ॥ ततो भागवतो देवि दश
भेदाः प्रकीर्त्तिताः । शिखी मु
ण्डी जटी चैव वहिश्चिह्नदण्डी क्रमेण च ॥
एकदण्डी महेशानि वीरशैवस्तथैव च
। सप्तपाशुपताः प्रोक्ता दशधा वै
ष्णवा मताः । एतेषां शासनं देवि
शृणुष्वैकमना अधि । वेदेष्टिसर्वसं
व्याप्य स्तुतिसर्वैष्णव : ॥ वैखा
नसादिदोषाद्यैर्भूषितः स्मार्त्तवै
ष्णवः । श्रीराधावल्लभं देवि शृणुष्व
त्वेकमनाम्बि ॥ वैष्णवाचारनिर
तो विष्णुतत्त्वैकपारगः । अनन्यचे
ताः शान्तात्मा विष्णुचिन्तापरायणः
॥ श्रीराधावल्लभो देवि गोकुलेशं शृणु
प्रिये । नानाभूषणसम्पन्नो नाना
सुगन्धिभूषितः । गवांकुलं प्रीण
यिता केलिकृष्णस्वरूपधृक् । शरीर
मर्थं प्राणांश्च तन्निवेदनकारकः ॥
अन्तः शक्तिपरो देवि बहिर्वैष्णवरू
पधृक् । गन्धर्वाचारनिरतो ललितावे
ष्टनतत्परः ॥ सम्प्रदायी गोकुले

शः सर्वसिद्धिकरो भुवि । वृन्दाव
नाख्यं देवेशि शृणुष्वैकमनाम्प्रतम्
॥ विगताशः प्रसन्नात्मा विष्णुभक्ति
परायणः । कामिनीसङ्गचपलो व
नक्रीडाविनोदधृक् ॥ सोगन्ध्य
भूषिततनुः स्त्रीध्यानैकपरायणः
। विष्णुसारूप्यतत्त्वज्ञः प्रोक्तो वृन्दा
वनी शिवे ॥ पाञ्चरात्रो महेशानित
थैववीरवैष्णवः । पूर्वमेव महेशा
नि कीर्त्तितः परमेश्वरि ॥ रामक्ति
रितविख्यातामः शिवः परिकी
र्त्तितः । सदानन्दी शान्तचित्तः प्र
सन्नात्मा विचारधृक् ॥ सर्वत्रसम
रूपश्च रामानन्दी प्रकीर्त्तितः । हरि
व्यासं महेशानि यथावद्वधारय ॥
पापसंहरणाशक्तो विष्णुभक्तो जिते
न्द्रियः । यमादिनियमैर्युक्तो भक्त्या
चारपरायणः ॥ स्वोपयोगफलत्यागी
परकार्यपरायणः । हरिव्यासो
महेशानि शिवभक्तिस्वरूपधृक् ॥ नि
म्बार्काख्यं सम्प्रदायं शृणुष्वैकमना
म्प्रतम् । नित्यार्चनक्रमासक्तः
स्वतन्त्रैकपरायणः ॥ वाह्यपूजा
दिनिरतो नान्यभक्तः प्रसन्नधीः ।
आर्यपक्षान्वितः स्वच्छः स्वच्छन्दा
चारतत्परः ॥ स्वतन्त्रस्मार्तविद्द
षी निम्बार्को भगवान् हरिः ॥ अथ
भागवतं देवि कथयामि शृणु प्रिये ।
विष्णुभक्त्यैकनिपुणो विजितात्मा

प्रसन्नधीः ॥ स्मातंगर्गान्वितोदेवि तदन्याचारतत्परः । मार्ध्वपद्मान्वितोदेवितथास्वरूपवेशधृक् ॥ शैवश्च पौतस्यसञ्जातपुनः स्मानपरायणः । केवलंविष्णुतत्त्वज्ञः प्रोक्तोभागवतः शिवे ॥ इतिश्रीमर्क्तिसङ्गमतन्त्रे १ खण्डे ८ पटलः ॥ पद्मपुराणोक्ता वैष्णवसम्प्रदायभेदा यथा । श्रीमन्नारायणोब्रह्मानारदोव्यासएवच । श्रीलमध्वपद्मनाभोनृहरिर्माधवस्तथा ॥ अक्षोभ्यजयतीर्थश्चज्ञानसिन्धुर्महानिधिः । विद्यानिधिश्चराजेन्द्रोजयधर्ममुनिस्तथा । पुरुषोत्तमोब्रह्मण्योव्यासतीर्थमुनिस्तथा । श्रीमांल्लक्ष्मीपतिः श्रीमान्माधवेन्द्रपुरिस्तथा ॥ सम्प्रदायविहीनायेमन्त्रास्तेनिष्फलामताः । अतः कलौभविष्यन्तिचत्वारः सम्प्रदायिनः ॥ श्रीमाध्विरुद्रसनकावैष्णवाः क्षितिपावनाइति ॥ सम्प्रदानम् । दुदाञ्० । घञ्० आतइतियुक् ॥

सम्प्रधारणम् । न० विचारे ॥ सम्प्रश्ने ॥

सम्प्रधारणा । स्त्री० उचितानुचितनिर्णये । समर्थने । इदमुचितमेवेति निश्चये ॥ सम्प्रधारणम् । धृञ्० । ण्यन्तः । ण्यासेतियुच् ॥

सम्प्रमोषः । पुं० विस्मरणे ॥

सम्प्रयोगः । पुं० रते ॥ निधुवने ॥ ॥ यन्त्रणे । सम्बन्धे ॥ कार्मणे । वशीकरणादिकर्मणि ॥ त्रि० प्रार्थिते ॥

सम्प्रयोगी । पुं० कलाकेली । कामे । कामुके ॥ सम्प्रयोजने ॥

सम्प्रश्नः । पुं० संप्रधारणे ॥

सम्प्रसादः । पुं० सुषुप्तिस्थाने ॥ सम्यक्प्रसीदत्यस्मिन् । षद्लृ० । घञ् ॥ विदुषि ॥ प्राणे ॥

सम्प्रसाधनम् । न० परिष्कीकरणे ॥ शोभाजनके ॥

सम्प्रहारः । पुं० गतौ ॥ युद्धे । रणे सम्प्रहरणम् । हृञ्० । घञ् ॥ हनने० इतिधरणि ॥

सम्प्रहृष्टः । त्रि० पुलकिते । पुलकितगात्रे ॥

सम्प्राप्तः । त्रि० समागते ॥ सम्यक्प्रकारेणप्राप्तः ॥

सम्प्राप्तिः । स्त्री० सम्यक्प्रापणे ॥

सम्प्रैषः । पुं० नियोगे । विधौ ॥

सम्प्लवः । पुं० एकीभावेनेतरेतरवमीभावे ॥ व्यामिश्रणे ॥ महापूरे ॥ वारिपूरे ॥ प्रलये ॥ सङ्क्षोभोद्भूते ॥ यथा । मेघः सम्प्लवते ॥ सम्प्लवनम् । प्लुङ्० । ऋदोरप् ॥ सम्प्लवतेवा । पचाद्यच् ॥

सम्प्लवोपलः । पुं० चन्द्रकान्ते ॥

सम्फालः । पुं० मेषे ॥

सम्फुल्लः । त्रि० विकचे । विकसिते । प्रफुल्ले ॥ सम्फलति । ञिफ

वाविग्रहार्थे । ओत : क्त :, चादि तस्य चेतोऽभाव : । उतफुल्लसम्फुल्लयोरुपसङ्ख्यानमिति • तस्यल : ॥

सम्बद्ध : । त्रि • बंधनविशिष्टे । सम्यक् प्रकारेणबद्ध : । सम्बन्धयुक्ते ॥ सं-बद्ध्यतेस्म । बध • । क्त : ॥

सम्बन्ध : । पुं • सङ्गते । न्याये । दूत्त्य जय : । संयोगादौ ॥ वादिना • समवायस्तादात्म्यं विषयविषयिभा वश्चेतिगृहीत ॥ सम्पर्के । सचत्रि विध : । विद्याज्ञयोनिज : प्रीति जश्चेतिभेदात् ॥ संसर्ग ॥ यथा । एकपदार्थेऽपरपदार्थसम्बन्ध : सं सर्गमर्यादयाभासते • सच • प्रतियो ग्यनुयोग्याधाराधेयविषयविषय य भावादिरितिप्रथमव्युत्पत्तिवादीय गादाधरी ॥ सम्बन्धोबहुविधोजन्य जनकसेव्यसेवकबोध्यबोधकप्रतिपा द्यप्रतिपादकादिभेदात् ॥ प्रश्ले षे । संश्लेषे ॥ षष्ठ्यर्थे ॥ तृतीया नुबन्धे ॥ यथावेदान्तिनांप्रत्यग्ब्रह्म णोरेकाप्रमेयस्य • तत्प्रतिपादकोप निषत्प्रमाणस्य च • बोध्यबोधकभा वलक्षण : सम्बन्ध : ॥ सम्बन्धान्ये ॥ यथा । पदयो : सामानाधिकरण्यम पदार्थयोर्विशेषणविशेष्यभाव : • प्रत्यगात्मपदार्थयोर्लक्ष्यलक्षणभाव श्चेति । तदुक्तम् । सामानाधिक रण्यञ्चविशेषण विशेष्यता । लक्ष्य लक्षणसम्बन्ध : पदार्थप्रत्यगात्मना मिति ॥ दायविभागोपयोगिनि ॥ सद्विविध : । यथा, सम्बन्धोद्विवि धोज्ञेयोविवाहाज्जन्मनस्तथा । त त्रौद्वाहिकसम्बन्धादपरोबलवत्तर • इति ॥ बन्धनम् • बन्ध : । बन्धे हलश्चेतिघञ् । सम्यकबन्ध : ॥ यावत : कुरुतेजन्तु : सम्बन्धान् मनस : प्रियान् । तावंतोस्यनिख न्यंतेहृदयेशोकशङ्कव : ॥ स्वदेहम पिजीवोयंमुक्त्वायातिकुलेश्वरि । स्त्रीमातृपितृपुत्रादिसम्बन्ध : केन हेतुना ॥ त्रि • शक्ते ॥ हिते ॥ स-म्बध्यते । कर्मणिघञ् ॥

सम्बन्धी । त्रि • सम्बन्धविशिष्टे । गुण वति । संयुजि । मातृपक्षे । श्व-शुरादौ । जामातृश्यालकादौ ॥ सम्बन्धोऽस्यास्ति । इनि : ।

सम्बर : । पुं • दैत्यविशेषे । हरिणवि शेषे ॥ मत्स्यभेदे । शैलप्रभेदे ॥ जिनान्तरे ॥ सेतौ ॥ न • सलि-ले । जले ॥ बौद्धव्रतविशेषे ॥ सं यमे । संवयति । पम्बसम्बन्धने । बाहुलकादरन् ॥

सम्बरारि : । पुं • मनसिजे । कामदे वे । सम्बरस्यदैत्य • विशेषस्यअरि : ॥

सम्बरी । स्त्री • भतमूल्याम् ॥ मम्बर्य्याम् ॥

सम्बरोद्भवम् । न • गडलवणे ॥

सम्बल: । पुं॰ न॰ पाथेये ॥ जले ॥

सम्बाकृतम् । त्रि॰ शम्बाकृते । द्वितीयाकृते । सम्यक्कृते । शम्बमस्य अस्ति । शम्बा:। अच । सम्बाकृतम् । डाजितिकश्चित् ॥

सम्बाध: । पुं॰ सङ्कटे ॥ भगे योनौ ॥ भये । सम्यक्बाधतेऽत्र । बाधृ लोडने । हलश्चेति घञ् ॥ अन्योन्यपीडायाम् ॥ सम्बाधनम् । भावे घञ् वा । सम्बाध्यतेऽत्र । घञन्तस्यापि विशेषनिघ्नत्वम् । सम्बाधमनुशन्त्यङ्गुतिभाष्यप्रयोगादिष्यते । सम्बाधं ब्रह्मदितःभूत्वतत्सम्बतिमाघ: ॥

सम्बाधनम् । न॰ द्वा: सङ्गमे ॥ शूलाये ॥ द्वारपाले ॥ धूतमोदनिकर ॥

सम्बुद्ध: । त्रि॰ सम्बुद्धधाति ॥ अवर्णाद्यजन्त: । यथा । अनेनाकाशकल्पेन धर्मान् योगगतोपमान् । ज्ञेयोऽभिन्नेन सम्बुद्धस्तं वन्दे द्विपदांवरम् ॥ सम्बातौ । पुं॰ बुद्धे । समन्तभद्रे । सुगते ॥

सम्बुद्धि: । स्त्री॰ सम्यग्बुद्धौ ॥ सम्बोधनप्रथमायाएकवचने ।

सम्बोध: पुं॰ सम्यग्बोधे ॥ सम्बोधने ॥

सम्बोधनम् । न॰ आमन्त्रणे । अभिमुखीकरणे । अन्यत्रव्यासक्तस्य॰ कार्यान्तरे नियोजनार्थं साभिमुख्यविधाने ॥ यथा॰ हे देवदत्त॰ हे भट्टोद्धुतिव्याकरणम् ॥ हे श्रुत॰ हे लते॰ हे फल॰ इत्यादावचेतनेऽप्युपचार: ॥

सम्भक्ति: । स्त्री॰ संभजने भज॰ क्तिन ॥

संभली । स्त्री॰ कुट्टन्याम् । सम्यङ्नार्य्यन्यपतिमङ्गं भलते । भल परिभाषणे । पचाद्यच् । गौरादि: ॥

संभव: । पुं॰ हेतौ । कारणे ॥ सम्भवत्यस्मात् । अकर्त्तरि च कारकेत्यधिकारादपादानार्थे॰ ऋदोरप् ॥ उत्पत्तौ ॥ मेलके । आधेयस्याधारानतिरिक्तत्वे । आधाराधियैकरूप्ये । भू॰य: सहचाराधीनज्ञाने ॥ यथ:सम्भवतिग्राह्मणे॰ विद्यासंभवत॰ सहस्रे शतम् । यथा खार्यां द्रोणाढकप्रस्थाद्यवगम: ॥ विष्णौ ॥ स्वेच्छया समीचीनं भवनमस्य । समीचीनोभवोजन्मास्येति वा । धर्मसंस्थापनार्थाय संभवामीतिवचनात् ॥ उत्पन्ने ॥ संभवति । भू॰ । पचाद्यच् । सङ्गते ॥ अपाये । भवत्कस्याश्चिदन्तरे ॥

सम्भार: । पुं॰ समभृतौ ॥ सङ्गणे । सम्भ्रियते । भृञ्॰ । अकर्त्तरिचेतिघञ् । साधने । उपकरणे ॥ सम्पूर्णत्वे ।

सम्भावनम् । न॰ शक्त्युत्कर्षप्रकाशनायात्युक्तौ ॥ यथा अपि स्तुयाद्विष्णुम् । अवाङ्मनसगोचरं विष्णुमपि स्तुयादित्यधिकोक्तिः ; एतादृशशक्त्यन्वयीयस्त्वमे सामर्थ्यमस्तीत्यत्र किं वक्तव्यमिति भावः ॥ सम्भाव्यते । ण्यन्तः । ण्यासश्रन्थो युच् । सम्भावनं॰ क्रियासु योग्यताध्यवसाय इति मुग्धबोधव्याकरणम् ॥ अलङ्कारविशेषे ॥ यथा । सम्भावनं यदीदं स्यादित्यूहोऽन्यस्य सिद्धये । यदि शेषो भवेद्वक्ता कथिताः स्युर्गुणास्तव ॥

सम्भावना । स्त्री॰ योग्यतायाम् ॥

सम्भावनीयः । त्रि॰ सम्भावनायोग्ये । संभाव्ये ॥

सम्भावितः । त्रि॰ मानिते । बहुमानं प्राप्ते । प्रतिष्ठां प्राप्ते । बहुमते ॥ यथा । मृत्युर्भवति मरणं किन्तु सम्भावितानामिति ॥ चिन्तिते ॥

सम्भाव्यः । त्रि॰ सम्भावितुं योग्ये । सम्भावनीये ॥

सम्भाषणम् । न॰ आभाषणे ॥ सम्पूर्व्वभाषधातोर्ल्युट् ॥ न म्लेच्छाशुच्यधार्मिकैः सह सम्भाषेत ॥

सम्भाषा । स्त्री॰ सम्भाषणे ॥

सम्भिन्नः । त्रि॰ संयुक्ते ॥ सङ्कुचिते ॥ सम्यग्भेदविशिष्टे ॥

सम्भुः । पुं॰ जनितरि ॥ यजमाने ॥ सम्भवति । भू॰ । विप्रसम्भ्यो डु संज्ञायामिति डुः ॥

सम्भूतः । त्रि॰ उत्पन्ने ॥ सम्भवति स्म । भू॰ । क्तः ॥

सम्भूतविजयः । पुं॰ श्रुतकेवलिसंज्ञकबौद्धविशेषे ॥

सम्भूतिः । स्त्री॰ हिरण्यगर्भाख्यायां देवतायाम् ॥ सम्यग्भूतिरैश्वर्यं यस्याः । सम्भवनं वा । सम्भूतिः । सम्भवमात्रे ॥ यथा । कामान्मातापिता चैनं यदुत्पादयतो मिथः । सम्भूतिं तस्य तां विद्याद्यद्योनावभिजायत इति मनुः ॥ यद्योनौ मातृकुक्षावभिजायते अङ्गप्रत्यङ्गानि लभते । तत्तस्य सम्भवमात्रं पश्वादिसाधारणं । यतः । आचार्यस्त्वस्य यां जातिं विधिवद्वेदपारगः । उत्पादयति सावित्र्या सा सत्या साऽजराऽमरेति मनुः ॥

सम्भूयसमुत्थानम् । न॰ मिलित्वैकमत्या वणिगादीनां कर्म्मकरणे ॥ आदिना नटनर्त्तकप्रभृतयो गृह्यन्ते ॥ तत्तु विवादपदविशेषः ॥

सम्भृतः । त्रि॰ सम्यग्धृते ॥ संहृते ॥ पूर्णे ॥ सम्यक्पुष्टे ॥ जनिते ॥ सम्यग्भारिते । भृञ्॰ । क्तः ॥

सम्भृतिः । स्त्री॰ सम्भारे । सम्यक्पोषणे ॥ सम्यग्भरणे । सम्यग्धा

रणे ॥

सम्भेद : । पुं॰ सिन्धुसङ्गमे । सरितोर्मिथ : सङ्गमे । नद्योर्नद्योर्नद्यो समुद्रयोश्चमेलके ॥ सम्भिद्यन्ते मिलन्त्यत्र । भिदिर्॰ । इलर्थे तिघञ् ॥ स्फुटने ॥ सङ्गे । मेलने ॥

सम्भोग : । पुं॰ भोगे । रते । निधुवने । सुरते ॥ स्त्रीणांसम्भोगएवमण्डनम्॰ तदभावेसर्वमण्डनस्याप्यमण्डनत्वम् । जिनशासने ॥ शुण्डायाम् ॥ हर्षे ॥ शृङ्गारविशेषे ॥ तल्लक्षणंयथा । दर्शनस्पर्शनादीनि निषेवेतेविलासिनौ । यत्रानुरक्तावन्योन्यंसम्भोग : समुदाहृतइंतस्याह्लादपर्णम् ॥

सम्भोगी । पुं॰ केलिनागरे ॥ त्रि॰ सम्भोगवति ॥ सम्भोगोविद्यतेऽस्य । इनि : ॥

सम्भोजनी । स्त्री॰ बहुपुरुषभोजनात्मिकायांमोक्षाम् ॥ यथाहमनु : । सम्भोजनीसाऽभिहितापैशाचीदक्षिणाद्विजै : । इहैवास्तेतुसालोके गौरन्धेवैकवेश्मनीति ॥ सम्भुज्यतेयया । भुज॰ । ल्युट् । ङीप् । दक्षिणादानक्रियेत्यर्थ : ॥

सम्भोज्य : । त्रि॰ संभोजयितव्ये ॥

सम्भ्रम : । पुं॰ भयादिजनितत्वरायाम् । संवेगे ॥ साध्वसे । भये ॥ आदरे ॥ अप्राप्तप्राप्तौहिसम्भ्रमोऽभवत्यनाप्तकामस्य ॥ सम्भ्रमणम् । भ्रमुचलने ॥ भावे॰घञ् । नोदात्तोपदेशस्येति वृद्धि : ॥ महाभ्रमे । सूचे ॥ इत्यजयपाल : ॥

सम्भ्रान्त : । त्रि॰ संविग्ने ॥

सम्मत : । त्रि॰ निर्णीते ॥ अनुमते । सम्मानभाजि । महाजनाङ्गीकृते ॥

सम्मति : । स्त्री॰ अभिलाषे ॥ अनुज्ञायाम् ॥ अभिप्रायस्यवेधने ॥ पूजने ॥ यथा॰देवदेवस्त्योसि । अवबाध्यादिरामन्त्रितस्तेतिसम्मतौ द्वित्वम् ॥

सम्मद : । पुं॰ हर्षे ॥ त्रि॰ तद्वति ॥ मदीहर्षे । प्रमदसम्मदौहर्षइत्यप् ।

सम्मर्द : । पुं॰ रुग्वाधे । परस्परपीडायाम् । भीड॰ इ॰ भाषा॰ प्र॰ ॥

सम्मर्द्दज : । पुं॰ गन्धद्रव्यभेदे ॥ यथा । सगन्धकारोबिल्वगन्धनीतिलकंतथा । प्रभृतीनांरसोयोऽसौनिष्पीड्य परिगृह्यते । ससम्मर्दीद्भवतोगन्ध : सम्मर्द्दजइतीष्यतइति ॥

सम्माद : । पुं॰ मत्तविशेषे ।

सम्मानम् । न॰ समादरे । गौरवे । यथा । सम्मानाद्ब्राह्मणोनित्यमुद्विजेतविषादिव । अमृतस्येवचाकाङ्क्षेदवमानस्यसर्वत : ॥ इति ॥

सम्मानित : । त्रि॰ समादृते । गौरविते ॥

सम्मार्जक : । त्रि॰ सम्यङ्मार्जन

कर्त्तरि ॥

सम्मार्ज्जनम् । न॰ संशुद्धौ । संशोधने । मलापनयने ॥ सम्यङ्मार्ज्जनम् ॥

सम्मार्ज्जनी । स्त्री॰ शोधन्याम् । वर्द्धन्याम् । सोहनी॰ बढनी॰ इ॰ भा॰ ॥ सम्मार्ज्यतेऽनया । मृज् शुद्धौ । करणे ल्युट् । मृजेर्वृद्धिः ॥

सम्मार्ज्जितः । त्रि॰ विरजस्के । मांजा॰ इ॰ भा ॥ सम्यङ्मार्ज्जितः ॥

सम्मितः । त्रि॰ सदृशे ॥ परिच्छिन्ने । मिते । मिणा॰ मिन॰ इ॰ भा॰ ॥ सम्यङ्मितः ॥

सम्मिश्रः । त्रि॰ संयुक्ते ॥

सम्मुखः । त्रि॰ अभिमुखे । अग्रपृष्ठे ॥

सम्मुखीनः । पुं॰ दर्पणे । समंसर्वंमुखं॰ सम्मुखम् : समस्य दृश्यात्तलोपो निपातसिद्धः । सर्वस्य मुखस्य दर्शनः । यथा मुखसम्मुखस्य दर्शनः खइतिखः ॥

सम्मूढः । त्रि॰ सम्यङ्मोहयुक्ते । मुग्धे ॥

सम्मूर्च्छजः । पुं॰ दंशादौ ॥

सम्मूर्च्छनम् । न॰ अभिव्याप्तौ ॥ उच्छ्राये । मोहे ॥ मुर्च्छामोहसमुच्छ्राययोः । ल्युट् । उपधायाश्चेति दीर्घः ॥

सम्मूर्च्छोद्भवः । पुं॰ मत्स्यादौ ॥

सम्मूर्च्छा । स्त्री॰ सकलेन्द्रियमनसां स्वविषयग्रहणाशक्तिहेतावस्थाविशेषे ॥

सम्मूर्च्छितः । त्रि॰ सम्पिण्डिते ॥ संहृतकरणे । विज्ञानशून्ये ॥ प्रतिफलिते ॥

सम्मृष्टः । त्रि॰ संशोधिते । शुद्धान्ने ॥ संमृज्यतेस्म । मृज् शुद्धौ । कर्म्मणि क्तः ॥ मक्षिकाद्यपनयनेनशोधितेव्यञ्जनादौ ॥

सम्मोदः । पुं॰ प्रीतौ ॥

सम्मोहः । पुं॰ विवेकायोग्यत्वे । कार्य्याकार्य्यविवेकाभावे ॥ विकृतसात्त्वे ॥ सम्मोह्यतेऽनेन । सम्पूर्वान्मुहेर्घञ् ॥

सम्मोहनम् । न॰ अस्त्रविशेषे ॥ सम्मोह्यतेऽनेन । मुहवैचित्त्ये । ल्युट् ॥

सम्मोहा । स्त्री॰ वर्णवृत्तान्तरे ॥ यथा । दीर्घाहारः सम्मोहासारः । वर्णाः पञ्चैवं नागाधीशोक्तम् ॥ यथा । दूरं याता लोके रावण्यानी । कृष्णो मायावी निर्वेदाभावी ॥

सम्मोहितः । त्रि॰ जातसम्मोहे । सम्यङ्मोहविषयीकृते ॥ स्वरूपावरणेनविक्षिप्ते ॥

सम्यग्ज्ञानम् । न॰ एकरूपेज्ञाने । औपनिषदेज्ञाने । यथाग्निरुष्णइतिज्ञानंवस्तुतत्त्वादेकरूपम्॰ एवंनिर्विशेषचैतन्यात्मकोऽहमिति

ज्ञानम् सम्यग्ज्ञानम् ॥

सम्यग्दर्शनम् । न० यथार्थात्मदर्शने । शास्त्रोपपत्तिभ्यामवधारितेऽद्वयात्मदर्शने ॥ कर्मज्ञानसमुच्चयवादानाम् न्यैकात्म्यबुद्धिरेव सम्यग्दर्शनमित्यात्मभाष्यकारः ॥

सम्यक् । अ० दृढे । प्रशंसायाम् ॥

सम्यक् । त्रि० मनोज्ञे ॥ सङ्गते ॥ सत्यवचने । स्तुते ॥ संशयादिशून्ये ॥ अर्थेन सह सम्यगञ्चति सङ्गच्छतेति सम्यक् । अञ्च० स्त्विगादिना० क्विन् । समः समीति सम्यादेशः ॥

सम्यग्व्ययः । पुं० आयतुरीयांशव्यये ॥

सम्राट् । पुं० राजसूययागकर्त्तरि । राजसूयिनि । चतुरब्धिसीमावच्छिन्नायाभूमेरीश्वरे । चक्रवर्त्तिनि । सार्वभौमे नृपवरे ॥ द्वादशराजमण्डलस्येश्वरे ॥ कियत्परिमाणायाभूमेराज्ञो नृपान्येभ्योऽस्य दाज्ञयाशास्ति० तस्मिन्नृपे । राज्ञभाज्ञयाशासके ॥ यथाह येनेष्टं राजसूयेन० मण्डलस्येश्वरश्च यः ॥ शास्ति यश्चाज्ञया राज्ञः स सम्राडित्यमरः ॥ सम्यक्० राजति ॥ राजृ० । क्विप् । मोराजि समः क्वौ ।

सयावसानम् । न० तीर्थविशेषे ॥

सयोनिः । पुं० इन्द्रे ॥ त्रि० समानयोनौ ॥

सरः । पुं० वाटेरे । दध्यग्रे । दध्युत्तरे । दध्युपरिस्थसमाजे ॥ गतौ ॥ वाणे ॥ लवणे ॥ निर्झरे ॥ नीरे । जले । सरोवरे ॥ त्रि० सारके । भेदके ॥ सरति । सृ० । अच् । दध्यग्रपर्यायो भागो घनः स्नेहसमन्वितः । स तोके सरइत्युक्तोदधिनोमण्डस्तुमस्त्विति ॥ सरः स्वादुर्गुरुर्दृष्यो वातवह्निप्रणाशनः सीमस्तो वस्तिप्रवसन : पित्तश्लेष्मविवर्द्धनः ॥

सरःकाकः । पुं० हंसे ॥

सरःकाकी । स्त्री० वरटायाम् । हंस्याम् ।

सरकः । पुं० न० शीधुपाने । शीधुपात्रे । इक्षुशीधुनि । अच्छिन्नाध्वगपङ्क्तौ । अच्छिन्नाध्वगानां पङ्क्तिर्यस्मिन् । सरक० सडक० इ० भा० प्र० वर्त्मनि ॥ न० गगने । आकाशे ॥ तीर्थविशेषे ॥ सरसि ॥ त्रि० गन्तरि । गतिशीले ॥ स्त्रियते । सृङ् गतौ । क्रुञादिभ्यः संज्ञायांवुन् । सरति । स्त्रगतौ । प्रसृत्वः समभिहारेवुन० वृत्तिवाद्युन् ॥

सरघा । स्त्री० मधुमक्षिकायाम् ॥ रङ्घणम् । रघिगतौ । खजेघचे

तिचित्करणादन्येभ्योपीतिच : आगमशास्त्रस्यानित्यत्वान्ननुम् । सह रघेणगत्यावर्त्तते ॥

सरणम् । न॰ नवनीते ॥

सरजा : । स्त्री॰ मलिनायाम् । रजस्वलायाम् ॥ इ॰ चि॰ शेष : ॥

सरट् । पुं॰ वायौ ॥ वारिदे ॥ सरघायाम् ॥ सरति । सृ॰ । सर्त्तेरटि : ॥

सरट : । पुं॰ कृकलासे । सरति । सृ॰ । शकादिभ्योऽटन् ॥

सराट : । पुं॰ वायौ ॥ मेघे ॥

सरटु : । पुं॰ सरटे ॥

सरणम् । न॰ गमने ॥ लौहमले ॥

सरणतस्कोल : । सृ॰ । लुचङ्क्रम्येत्यादिना युच् ॥ धावने ॥ भावेल्युट् वा ॥

सरणा । स्त्री॰ गन्धालिकायाम् । प्रसारण्याम् ॥ चिहतायाम् ॥ सरति । सृ॰ । बाहुलकात् युच् । टाप् ॥

सरणि : । स्त्री॰ पङ्क्तौ । मार्गे । पद्धतौ । श्रयणे ॥ सरन्त्यनया । सृगतौ । अर्त्तिसृधृधमीत्यनि : ॥

सरणी । स्त्री॰ कटसारायाम् ॥ पथि । पङ्क्तौ ॥ ङीप् ॥ सरनाईं॰ इतिहिमगिरिप्रसिद्धेनिष्पद्यानविशेषे ॥

सरण्ड : । पुं॰ धूर्त्ते ॥ सरटे ॥ भूषणविशेषे ॥ सरति । सृ॰ । अण्डन्कृसृभृवृञ इत्यण्डन् ॥ कामुके ॥ खगे ॥

सरण्यु : । पुं॰ वारिवाहे ॥ मातरिश्वनि ॥ सरति । ससर्त्ति वा । सृ॰ । यजुशिविभ्योऽन्युजागुणश्च इत्यन्युच् ॥ सरण्यु : शीघ्रगामीतिवेदभाष्यम् ॥ जले ॥

सरत् । पुं॰ तन्तौ ॥ सूत्रे ॥

सरथ : । त्रि॰ रथेनसहवर्त्तमाने ॥

सरद्वान् । पुं॰ गौतममुनौ ॥

सरपत्रिका । स्त्री॰ पद्मपत्रे ॥

सरभसम् । त्रि॰ ससत्त्वरे ॥

सरमा । स्त्री॰ कुक्कुर्याम् ॥ देवशुन्याम् ॥ राक्षसीभेदे । विभीषणस्यपत्न्याम् ॥ सरति सृ॰ । बाहुलकादम : ॥ काश्यपस्यस्त्रीविशेषे । भ्रमरादीनांमातरि ॥ त्रि॰ श्रीयुते ।

सरयु : । पुं॰ पवने । वाते ॥

सरयु : । स्त्री॰ नदीविशेषे ॥ सरति । सृ॰ । सर्त्तेरयु : ॥

सरयू : । स्त्री॰ नदीप्रभेदे । सरति । सृ॰ । सर्त्तेरयूरित्येके ॥ सरयूसलिलंस्वादुबलपुष्टिप्रदायकं ॥

सरल : । पुं॰ पीतद्रौ । पूतिकाष्ठे ॥ अस्यगुणा : । सरलोमधुरस्तिक्त : कटुपाकरसोलघु : । स्निग्धोष्ण : कर्णकण्ठाक्षिरोगरक्षोहर :

स्मृतः । कफानिलस्वेदयुकाकासालक्ष्मीव्रणापहः ॥ स्मृति ॥ देवदारुविशेषे ॥ बुद्धे ॥ अग्नौ ॥ सरति । सृ० बाहुलकात् कलच् । ऋषादित्वाद्वाकलः । बाहुलकाद्गुणः ॥ त्रि० उदारे ॥ ऋजौ । अवक्रे ॥ यथा । सरलाविरलायन्ते घनायन्ते कलिद्रुमाः । नश्यन्तीनवपुन्नागा अस्मिन् संसारकानने ॥

सरलद्रवः । पुं० वृकधूपे । श्रीवेष्टे ॥ सरलस्यदेवदारोः द्रवः ॥

सरला । स्त्री० सर्वानुभूत्याम् । त्रिपुटायाम् । त्रिवृति । श्वेतत्रिधारेति ख्यातौषधौ ॥ सरति । सृ० । बाहुलकात् कलन् । टाप् ॥

सरलाङ्गः । पुं० श्रीवेष्टे ॥

सरलायिका । स्त्री० सानेय्याम् ॥

सरः । न० नीरे ॥ तडागे । सञ्जानञोभयजलाश्रये । अस्य जलगुणाः । सारसं लघुतृष्णाघ्नं बल्यं स्वादुकफापहमिति ॥ देवखातजलाशये ॥ स्त्रियते । सृगतौ । कर्मण्यसुन् ।

सरसम् । न० सरसि ॥ रसवतिमांसे ॥ त्रि० रससंयुक्ते ॥

सरसम्प्रतम् । न० सुष्ठाम् । त्रिकटे ॥

सरसा । स्त्री० द्राक्षायाम् ॥ रसविशिष्टायाम् ॥

सरसिजम् । न० पद्मे ॥ सरसिजातम् । जनजनने । जनीप्रादुर्भावे वा । सप्तम्यां जनेर्डः । तत्पुरुषकृति ङेरलुक् ॥

सरसी । स्त्री० कासारे । सरसि ॥ स्त्रियते । सृ० । कर्मण्यसुन् । गौरादित्वान् ङीष् ॥ प्रकृतिच्छन्दः २१ प्रभेदे ॥ तल्लक्षणोदाहरणे यथा । नजभजजाजरौयदि तदा गदिता सरसी कवीश्वरैः ॥ चिकुरकलापशैवलकलापरगदामुलसद्रसोर्मिषु स्फुटवदनाम्बुजासु विलसज्जघनालवालबलिषु । कुचयुगचक्रवाकमिथुनानुगतासु कलाकुतूहली व्यरचयदच्युतो व्रजमृगीनयनासरसीषु विभ्रमं ॥

सरसीकः । पुं० सारसपक्षिणि ॥

सरसीरुहम् । न० पद्मे । नलिने । सारसे ॥ सरस्यां रोहतीति । रुह० । इगुपधेति कः । तत्पुरुषे कृतीत्यलुक् ॥

सरस्वान् । पुं० सागरे । अर्णवे ॥ नदे । सरो नीरं गतिर्वाऽस्त्यस्मिन् । भूम्नि मतुप् । तसौ मत्वर्थ इति भत्वान्नपदकार्यम् ॥ त्रि० रसिके ॥

सरस्वती । स्त्री० वाण्याम् । वाचि ॥ वाग्देव्याम् । पर्यायास्तु । ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वतीति ॥ अस्या ध्यानं यथा । वाणीम्

पूर्णनिशाकरोज्ज्वलमुखीं कर्पूरकुन्दप्रभां चन्द्रार्द्धाङ्कितमस्तकां निजकरैः संबिभ्रतीमादरात् । वीणामक्षगुणं सुधाढ्यकलशं विद्याञ्च तुङ्गस्तनीं दिव्यैराभरणैर्विभूषिततनुं हंसाधिरूढां भजे ॥ नदीविशेषे । प्लक्षसमुद्भवायाम् ॥ वाक्प्रदायाम् । ब्रह्मसुतायाम् ॥ अस्या जलगुणा यथा । सरस्वत्या जलं स्वादु पूतं सर्वरुजापहम् । रुच्यञ्च दीपनं पथ्यं देहकान्तिकरं लघु ॥ सा तु देशभेदेन सप्तनाम्नी यथा । पुष्करे पितामहयज्ञे समाहूता॰ सुप्रभा १ नैमिषे सत्रयाजिभिरृषिभिराहूता॰ काञ्चनाक्षी २ गयदेशे गयराजयज्ञ आहूता॰ विशाला ३ उत्तरकोशलायामौद्दालकमुनियज्ञे समाहूता॰ मनोरमा ४ ऋषभद्वीपे कुरुक्षेत्रे कुरुराजयज्ञे समाहूता॰ ओघवती ५ गङ्गाद्वारे दक्षप्रजापतियज्ञे समाहूता॰ सुरेणुः ६ हिमालये ब्रह्मणः पुनर्यज्ञे समाहूता॰ विमलोदा ७ तत्र सप्तसरस्वत्यः समागताः । अतस्तत्तीर्थं सप्तसारस्वतनाम्ना प्रसिद्धमिति महाभारते शल्यपर्व ॥ स्त्रीरत्ने ॥ गवि ॥ नदीषु ॥ मनुपत्न्याम् ॥ ज्योतिष्मत्याम् ॥ ब्राह्म्यामोषधौ ॥ सोमवल्ल्याम् ॥ दुर्गायाम् ॥ बुद्धिशक्तिविशेषे ॥ सरोऽस्त्यस्याः । सरांसि सन्त्यस्यां वा । मतुप् । ङीप् ॥ तीर्थविशेषे ॥

सरस्वतीसङ्गमः । पुं॰ तीर्थविशेषे ॥

सरस्वतीसागरसङ्गमः । पुं॰ तीर्थविशेषे ॥

सरस्वत्यरुणासङ्गमः । पुं॰ तीर्थविशेषे ॥

सरहस्यः । त्रि॰ मन्त्रदेवताज्ञानसहिते ॥

सरा । स्त्री॰ त्रिवृतायाम् ॥ गन्धालिकायाम् । प्रसारण्याम् ॥ झरे ॥

सरागः । त्रि॰ रागसहिते ॥

सरावः । पुं॰ शरावार्थे । सेर॰ इ॰ भा॰ प्र॰ कुडवद्वयपरिमाणे । मानिकायाम् ॥ मृत्पात्रविशेषे । वर्द्धमानके ॥ यथा । वरं सरावहस्तस्य चाण्डालागारवीथिषु । भिक्षार्थमटनं कार्य्यं राज्यं नान्यच-नीरिषु ॥ सरणम् । सृ॰ । ऋदोरप् । सरति वा । अच् । सरं सरावाऽर्हति । अव । अण्॰ अज्ञा ॥

सरिः । पुं॰ स्त्री॰ निर्झरे । उत्से ॥ सरणम् । सृ॰ । अच् इः ॥

सरिका । स्त्री॰ हिङ्गुपत्र्याम् ॥

सरित् । स्त्री॰ नद्याम् । तरङ्गिण्याम् ॥ सरति । सृ॰ । हृसृरुहियुषिभ्यइतिसंज्ञारिति ॥ सू॰ ॥

सरितान्नाथः । (पुं॰ समुद्रे ॥
सरिताम्पतिः । (

सरितांवरा । स्त्री॰ गङ्गायाम् ॥ यथा । त्वं देवसरितांनाथः त्वं देवि सरितांवरे । उभयोः सङ्गमेस्नात्वामुच्यामिदुरितानिवै ॥ इतिगङ्गासागरसङ्गमस्नानमन्त्रः ॥

सरित्पतिः । पुं॰ समुद्रे । पारावारे । सरितांपतिः ॥

सरिद्वरा । स्त्री॰ गङ्गायाम् । विष्णुपद्याम् ॥ सरित्सु वरा ॥

सरिन्नाथः । पुं॰ समुद्रे ॥

सरिमा । पुं॰ अनिले । वायौ ॥ सरति । सृ॰ । हृभृधृसृस्तृशृभ्य इमनिच् ॥

सरिलम् । न॰ सलिले । जले ॥ रलयोरैक्यम् ॥

सरिषपः । पुं॰ सर्षपे । कटुस्नेहे ।

सरी । स्त्री॰ निर्झरे ॥

सरीसृपः । पुं॰ सर्पे । पृदाकौ । आशीविषे ॥ कुटिलं सर्पति । सृप् । नित्यंकौटिल्येगताविति यङ् । पचाद्यच् यङोऽचिचेति यङोलुक् ॥ वृश्चिकादौ ॥

सरीसृपम् । त्रि॰ अतिशयेनचलति ।

सरूपः । त्रि॰ सदृशे ॥ समानं रूपमस्य । ज्योतिर्जनपदेतिसमानस्य सः ॥

सरोजम् । न॰ अब्जे । पद्मे ॥ सरसिजातम् । जनी॰ सप्तम्यांजनेर्डः । तत्पुरुषेकृतिबहुलमितिङेर्लुक् ॥

सरोजखण्डः । पुं॰ पद्मवने ॥ सरोजानांसमूहः । कमलादिभ्यः खण्डः ॥

सरोजन्म । न॰ पद्मे ॥

सरोजी । पुं॰ ब्रह्मणि । सुरज्येष्ठे ॥ लोकनाथे । बुद्धभेदे ॥

सरोजिनी । स्त्री॰ कमलाकरे । पद्मखण्डे ॥ पद्मे ॥ कासारे ॥ सरोजानिसन्त्यस्याम् । पुष्करादिभ्यादिनिः ॥

सरोत्सः । पुं॰ सारसखगे ॥

सरोधः । त्रि॰ रुद्धे ॥ रोधेनसहवर्त्तमानः ॥

सरोरुट् ।) पुं॰
सरोरुहम् ।) न॰ अम्बुजे ॥

सरोरुहासनः । पुं॰ ब्रह्मणि । कमलासने ॥

सरोवरः । पुं॰ पद्माकरे । तडागे ॥

सर्गः । पुं॰ स्वभावे । निर्मोचे ॥ निर्मोचस्त्यागोमोचाभावोवा । मोचाभावेयथा । इहैवतैर्जितः सर्गोयेषांसाम्येस्थितंमनः ॥ निश्चये ॥ यथा । गृहाणशस्त्रं यदिसर्ग एषते॰ इति ॥ अध्याये । मोहे । उत्साहे ॥ अनुमतौ ॥ सृज्यते । सृज विसर्गे । कर्मणिघञ् ॥ सृष्टौ ॥ यथा । सर्गश्चप्रतिसर्गश्चेति ॥ कौमारआर्षः प्राजापत्योमानवइत्यादिभेदैः पुराणेषुविस्तरेणोक्ते॰ द्वैतप्रपञ्चे । स्थूलदेहोत्पत्तौ । अचे

तनसृष्टौ ॥ सृज्यन्ते येषुसृष्टव्याः प्राणिनाइतिव्युत्पत्त्या० पृथिव्यादिलोकाः सर्गपदवाच्याश्च ॥ अव्याकृतगुणक्षोभान्महतस्त्रिवृतोऽहम् । भूतसूक्ष्मेन्द्रियार्थानांसम्भवःसर्ग उच्यते ॥ इतिश्रीविष्णुभागवतम् ॥

सर्गक्रमः । पुं० प्रकृतेर्महदाद्युत्पत्तिक्रमे ॥ यथा । प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद्गणस्तुषोडशकः । तस्मादपिषोडशकात्पञ्चभ्यःपञ्चभूतानीति ॥ सर्गस्योत्पत्तेःक्रमः ॥

सर्गबन्धः । पुं० महाकाव्ये ॥ सर्गाणांबन्धोयत्र ॥

सर्ज्जः । पुं सालवृक्षे । सखुआ० इतिख्याते ॥ सृजति । सृजेरिगुपधलक्षणः ॥

सर्ज्जकः । पुं० पीतसाले । आसने । बन्धूकपुष्पे । विजयसार० इ० भा० प्र० वृक्षे ॥ सृजति । सृजविसर्गे । ण्वुल् । यद्वा । सर्ज्यते । षर्जअर्जने क्वुन् ॥ शि० सृष्टिकर्त्तरि ॥

सर्ज्जगन्धा । स्त्री० रास्नायाम् ॥

सर्ज्जतैलम् । न० सर्ज्जस्नेहे । रालतेल इ० भा० ॥ तैलंसर्ज्जरसोद्भूतंविस्फोटव्रणनाशनम् । कुष्ठपामाकृमिहरंवातश्लेष्मामयापहम् ॥

सर्ज्जनम् । न० विसर्ज्जने ॥ सृष्टौ ॥

सर्ज्जनिर्यासः ।) पुं० राले । धूनके
सर्ज्जमणिः ।)

सर्ज्जरसः । पुं० धूनके । यक्षधूपे । सर्ज्जस्यसालस्यरसः ॥ वाद्यभाण्डविशेषे ॥

सर्ज्जिः ।) स्त्री०) सर्ज्जिकाक्षारे । सर्ज्जी० इ० भा
सर्ज्जिका ।))

प्र० सर्ज्जिकाल्पगुणातस्माद्विशेषाद्गुल्मशूलहृत्० । तस्मात्० यवक्षारात् ॥

सर्ज्जिकाक्षारः । पुं० कापोते । सुवर्च्चके । सौवर्चले । रुचके । सर्ज्जी० साजी० इ० भा० प्र० सर्ज्जिकारजसः क्षारः । शाकपार्थिवादिः । सर्ज्जिकांदग्ध्वाक्रियमाणः क्षारइत्यर्थः ॥

सर्ज्जिक्षारः । पुं०) सर्ज्जिकाक्षारे ॥
सर्ज्जी । स्त्री०)

सर्ज्जूः । स्त्री० वणिजि । विद्युति ॥ सर्ज्जति । षर्जअर्जने । कृषिचमितनिधनिसर्ज्जिखर्ज्जिभ्यऊः ॥ अभिसारे ॥ हारे ॥

सर्ज्यः । पुं० सर्ज्जरसे ॥

सर्प्पः । पुं० अहौ । नागेभ्योपकृष्टे । अस्यपर्याया यथा । सर्प्पः पृदाकुर्भुजगोभुजङ्गोऽहिर्भुजङ्गमः । आशीविषोविषधरश्चक्रीव्यालः सरीसृपः ॥ कुण्डलीगूढपाच्चक्षुःश्रवाःकाकोदरःफणी । दर्व्वीकरोदी

र्व्वपृष्ठोद्गमन्दशूकोबिलेशय: ॥ उरग: पन्नगोभोगीजिह्मग:पवनाशनइति ॥ सर्पति । सृप्लृगतौ । पचाद्यच् ॥ नागकेशरे । अमरसुधाविरचितच्छन्दोजातिविशेषे ॥ पञ्चमाच्छद्वितीयभेदेऽ ।ऽ० ॥ षष्ठमात्रस्य षष्ठप्रभेदे० ॥ऽऽ० ॥ सर्प्प । गमने ॥

सर्प्पकङ्कालिका । स्त्री० वृक्षभेदे ॥ सर्प्पकङ्कालिका० तीक्ष्णा० विषदंष्ट्रा० विषापहेतिपर्याया: ॥

सर्प्पकङ्काली । स्त्री० सहायाम् । सर्प्पकङ्कालिकायाम् ॥

सर्प्पगन्धा । स्त्री० अहिभुजि । रक्तपत्रिकायाम् ॥ वृक्षविशेषे । छत्राकी० सर्प्पगन्धाचरसनाचपलङ्कषेति पर्याया: ॥

सर्प्पग्रह: । पुं० सर्पग्रहणतुण्डौ ॥

सर्प्पघातिनी । स्त्री० सर्पकङ्काली भेदे । सर्प्पसहायाम् । सर्पाङ्ग्यां ॥

सर्प्पन् । त्रि० गच्छति ॥

सर्प्पतृण: । पुं० नकुले ॥ इ० हे० न्द्र: ॥

सर्प्पदंष्ट्र: । पुं० दन्तीवृक्षे ॥

सर्पदंष्ट्रा । स्त्री० वृश्चिकाल्याम् ॥

सर्प्पदंष्ट्रिका । स्त्री० अजशृङ्ग्याम् ॥

सर्प्पदण्डा । स्त्री० सैंहल्याम् ॥

सर्प्पदण्डी । स्त्री० गोरक्ष्यां ॥

सर्प्पदन्ती । स्त्री० नागदन्त्यां ॥

सर्प्पदमनी । स्त्री० बन्ध्याकर्कोटक्याम् ॥

सर्प्पनामा । स्त्री० सर्पघातिन्याम् ॥

सर्प्पनिर्मोचन: । पुं० धूपविशेषे ॥ यथा, कार्पासास्थिभुजङ्गस्यतथानिर्मोचनंभवेत् । सर्प्पनिर्मोचनोधूप: प्रशस्त: सततंगृहे ॥

सर्प्पपुष्पी । स्त्री० नागदन्त्याम् ॥

सर्पफणज: । पुं० सर्पफणजातमणौ ॥

सर्पभुक् । पुं० मयूरे ॥ सर्पान्भुङ्क्ते । भुज० । क्विप् ॥ द्विमुखाहौ ॥ त्रि० सर्पभक्षके ॥

सर्पराज: । पुं० अहिराजे । वासुकौ ॥ सर्पाणांराजा । राजाह:सखिभ्यष्टच् ॥

सर्पलता । स्त्री० नागवल्ल्याम् ॥

सर्पविद्या । स्त्री० गारुडे ॥ सर्पाणांविद्या ॥

सर्पसत्रम् । न० जनमेजयारब्धेसर्पनाशकेयज्ञविशेषे ॥

सर्पसत्री । पुं० जनमेजये ॥

सर्पसहा । स्त्री० सर्पघातिन्याम् ॥

सर्पसुगन्धा । स्त्री० रास्नायाम् ॥

सर्पहा । पुं० नकुले ॥ इ० हे० न्द्र: ॥

सर्पाक्षम् । न० रुद्राक्षे ॥

सर्पाक्षी । स्त्री० कन्दविशेषे । गन्ध

नाकुल्याम् ॥ वृक्षविशेषे । गण्डाल्याम् ॥ अस्या : गुणा: । सर्पाक्षी कटुकातिक्तासोष्णाकृमिनिकृन्तनी । वृश्चिकोन्दुरुसर्पाणांविषघ्नी व्रणरोपणीति ॥ सर्पानक्षति । अक्षू व्याप्तौ । कर्म्मण्यण् । ङीप् ॥ सर्पाक्षीनागफणीतिभावमिश्र : ॥

सर्पाख्य : । पुं॰ महिषकन्दभेदे । नागकेसरे । त्रि॰ सर्पनामके ॥

सर्प्पाङ्गी । स्त्री॰ सर्प्पघातिन्याम् ॥ सैंहल्याम् । रास्नायाम् ॥

सर्प्पादनी । स्त्री॰ व्यालगन्धायाम् ॥

सर्प्पाराति : । पुं॰ गरुडे ॥ सर्पाणामराति : ॥

सर्प्पारि : । पुं॰ नकुले ॥

सर्प्पावास : । पुं॰ श्वेतचन्दने ॥ पाताले ॥ सर्प्पाणामावास : ॥ बहुव्रीहिर्वा ॥

सर्प्पाशन : । पुं॰ मयूरे ॥

सर्प्पाह्वय : । पुं॰ नागकेशरे ॥

सर्प्पिणी । स्त्री॰ सर्पस्त्रियाम् ॥

सर्पिर्द्दर्वी । स्त्री॰ तीर्थविशेषे ॥

सर्प्पि : । न॰ आज्ये । घृते ॥ सर्पति । सृप्लृ॰ । अर्चिशुचिहुसृपिच्छादिच्छर्दिभ्यइसिरितीसि : ॥

सर्प्पी । स्त्री॰ सर्पिण्याम् ॥ जातित्वान् ङीष् ॥

सर्प्पेष्टम् । न॰ श्रीखण्डचन्दने ॥

सर्म्म : । पुं॰ गमने ॥ सरति । सृ॰ । अर्त्तिस्तुसुहुस्रितिमन् ॥

सर्व्व : । पुं॰ ईश्वरे । शिवे । हरे ॥ विष्णौ । हृषीकेशे । हरौ ॥ यथा । असतश्चसतश्चैवसर्वस्यप्रभवाप्ययात् । सर्वस्यसर्वदाज्ञानात्सर्वमेतंप्रचक्षते ॥ असत : कारणात्मकस्य॰ सत : कार्यात्मकस्यसर्वस्यप्रपञ्चस्यप्रभवाप्ययात्उत्पत्तिप्रलयस्थानत्वात् । तथाचसर्वोपादानतयासर्वात्मकत्वात्सर्वइत्यच्युतेइत्यर्थ : ॥ सर्वति । सर्वहिंसायाम्॰ इत्यत : सर्वगताविल्यतोवा॰ वबयोरभेदात्॰ पचाद्यच् । सरति । सृगतौ । सर्वनिघृष्वेतिसाधुर्वा सृतमनेनविश्वंवा । पूर्ववत् ॥ न॰ । नामरूपात्मकेजगति ॥ त्रि॰ । विश्वस्मिन् । समस्मिन् । अशेषे । निरवशेषे । । कृत्स्ने ॥ यथा । सर्वरत्नमयोमेरु : सर्वाश्चर्यमयंनभ : । सर्वतीर्थमयीगङ्गासर्वदेवमयोहरिरितिवह्निपुराणं ॥

सर्व्वंसहा । स्त्री॰ वसुमत्याम् । भुवि । भूमौ ॥ सर्वंसहते । षहमर्षणे । पू : सर्वयोरितिखच् । अरुर्द्विषदितिमुम् ॥ सर्वंसहावसुमतीसहतेनत्विदंद्वयम् । अकार्यपादघातश्चदीपतापस्तथैवच ॥ यतोभूमौ निराधारोदीपोनसंस्थाप्य : ॥ त्रि॰ सर्वसहिष्णौ ॥

सर्व्वकर्त्ता । पुं॰ स्रष्टरि । ब्रह्मणि ॥
सर्व्वकर्म्मसन्न्यासः । पुं॰ देहादिव्यापाराणामविद्ययात्मन्यक्रियेसमारोपितानांविद्ययाबाधे ॥ सर्व्वकर्म्मणां सम्यङ्न्यासः ॥
सर्व्वकर्म्मीणः । त्रि॰ पुरुषे ॥ सर्व्वंकर्म्माणिव्याप्नोति । तत्सर्व्वादेरिति खः ॥
सर्व्वकेशी । पुं॰ नटे ॥ सर्व्वकेशोऽस्यास्ति । सर्व्वादित्वेति॰ इनिः ॥
सर्व्वक्षारः । पुं॰ बहुक्षारे । महाक्षारे । सावनद्र॰ भा॰ प्र॰ । मलवस्त्रविशोधने ।
सर्व्वगः । पुं॰ शङ्करे ॥ ब्रह्मणि । विभौ ॥ आत्मनि ॥ सर्व्वंगच्छति । गम्लृ॰ । अन्यात्यन्तेति डः ॥ न॰ सलिले ॥ त्रि॰ सर्व्वगामिनि ॥
सर्व्वगतः । त्रि॰ विभौ ॥ सर्व्वानुस्यूतिसम्भावे ॥ यच्चकिञ्चिज्जगत्यस्मिन्दृश्यतेश्रूयतेपिवा । अन्तर्व्वहिश्चतत्सर्व्वंव्याप्यनारायणः स्थितः ॥ सर्व्वगतत्वंसर्व्वाव्यवधानमात्रमितिव्याख्यातारः । व्यापित्वमितियावत् ॥
सर्व्वगन्धम् । न॰ कुङ्कुमादिगन्धद्रव्यवृन्दे ॥ यथा । कुङ्कुमागुरुकर्पूरकस्तूरीचन्दनेषु ॥ चतुर्जातकादौ ॥ यथा ॥ चतुर्जातककर्पूरकक्कोलागुरुकुङ्कुमम् । लवङ्गसहितञ्चैवसर्व्वगन्धंविनिर्द्दिशेदिति ॥
सर्व्वगा । स्त्री॰ प्रियङ्गौ ॥
सर्व्वग्रन्थः । पुं॰) सर्व्वग्रन्थिकम् । नं॰) पिप्पलीमूले ॥
सर्व्वङ्कषः । त्रि॰ खले ॥ सर्व्वङ्कषति । कषहिंसायाम् । सर्व्वकूलाभ्रेतिखच् । अरुर्द्विषदितिमुम् ॥
सर्व्वजनीनः ।) सर्व्वजनीयः ।) त्रि॰ सार्व्वजनिके ॥ सर्व्वस्मात्सौजनस्य । पूर्व्वकाले कितितत्पुरुषः । सर्व्वजनायहितः । सर्व्वजनाद्वञ्खञ्च ॥ षष्ठीतत्पुरुषात्तु॰ छः ॥
सर्व्वजित् । पुं॰ वत्सरविशेषे ॥ तत्फलंयथा । उद्यतोऽपर्णोमेघो जलंनैवोपजायते । महार्घंसर्व्वजिद्वर्षेसर्व्वमेववरानने ॥ त्रि॰ सर्व्वजयकर्त्तरि ॥
सर्व्वजीवः । पुं॰ ईश्वरे ॥ सर्व्वान्जीवयति । जीव॰ । अच् ॥
सर्व्वज्ञः । पुं॰ शिवे । ईश्वरे ॥ सर्व्वंजानाति । सर्व्वविषयावच्छिन्नचैतन्यलक्षणज्ञानवानिति । ज्ञा॰ । आतोनुपसर्गेकः ॥ यद्वा । सर्व्वज्ञायस्यस्वात्मनः सर्व्वस्यापरोक्षत्वात् ॥ यद्वा । सर्व्वज्ञायस्मात्॰ सर्व्वज्ञायेनवा ॥ सर्व्वस्यासौज्ञश्चेतिवा ॥ आनन्दमये ॥ यथा । अशेषप्राणिवुद्धीनांभासनात्तवसंस्थिताः ता

भिः क्रोडीकृतं सर्व्वं तेन सर्व्वज्ञवृद्धि वितः ॥ तत्र सौषुप्तेऽज्ञानेकार रएभूतेकाऽभूतानां सर्व्वप्राणिबुद्धीनां वासनानि वसन्ति तामिर्व्वासनाभिः सर्व्वं जगत् क्रोडीकृतम् विषयीकृतम् तेन सर्व्वबुद्धिवासनाश्रयज्ञानोपाधिकत्वेन सर्व्वज्ञत्वमुच्यते इत्यर्थः ॥ परमार्थपण्डिते ॥ जिनेन्द्रे ॥ बुद्धे । सुगते । त्रि॰ सकलज्ञातरि ॥

सर्व्वज्ञत्वम् । न॰ सर्व्वज्ञतायाम् ॥ परमार्थतोऽसङ्गस्यापि चैतन्यस्याध्यासिकसम्बन्धज्ञानद्वारा सर्व्वावभासकतायाम् ।

सर्व्वज्ञा । स्त्री॰ दुर्गायाम् ॥ सर्व्वज्ञा सर्व्ववेत्तृत्वात्क्षान्तित्वात्क्षान्तिरुच्यते । इति देवीपुराणम् ॥

सर्व्वज्ञानमयमठः । त्रि॰ सर्व्वज्ञमयि॰ ब्रह्मणि॰ सगुणे निर्गुणे च॰ यत्र ज्ञानं त्रिविधम्॰ प्रमाणतः प्रमेयतश्च॰ प्रयोजनतश्चतत्र मठः॰ सर्व्वप्रकारेणायोग्ये ॥

सर्व्वतः पाणिपादम् । न॰ चैतन्ये ॥

सर्व्वतः शुभा । स्त्री॰ प्रियङ्गुवृक्षे ।

सर्व्वतः श्रुतिमत् । न॰ चैतन्ये ॥

सर्व्वतन्त्रम् । न॰ सकल शास्त्रे ॥

सर्व्वतन्त्रसिद्धान्तः । पुं॰ गौतमोक्तसिद्धान्तविशेषे ॥ तथाहि । सर्व्वतन्त्राविरुद्धस्तन्त्रेऽधिकृत स र्व्वतन्त्रसिद्धान्तः ॥ अस्यार्थः । सर्व्वतन्त्राविरुद्धः॰ सर्व्वशास्त्राभ्युपगत इति यावत् । वस्तुतो यथाश्रुत एवार्थः । अन्यथा॰ तन्त्रेऽधिकृत इत्यस्य वैयर्थ्यापत्तिः॰ अतएव घ्राणाद्यादेरसदुत्तरत्वमपि सर्व्वतन्त्र सिद्धान्तः । न च तन्त्रेऽधिकृत इति स्पष्टार्थं लक्षणे तु न देयमेवेति वाच्यम् । मनस इन्द्रियत्वस्यापि सर्व्वतन्त्र सिद्धान्ततापत्तेः । नव्यास्तु स्वस्योपलक्षणमात्रत्वात्॰ वादिप्रतिवाद्युभयाभ्युपगतः कथानुकूलोऽर्थः सइतिवदन्तीति ॥ २८ ॥

सर्व्वतः । अ॰ समन्ततोऽर्थे ॥ सर्व्वस्मात् । पञ्चम्यास्तसिल् ॥

सर्व्वतापनः । पुं॰ कामदेवे ॥ त्रि॰ सर्व्वतापके ॥

सर्व्वतिक्ता । स्त्री॰ काकमाच्याम् ॥

सर्व्वतीर्थवरह्रदः । पुं॰ तीर्थविशेषे ॥

सर्व्वतोभद्रः । पुं॰ चित्रकाव्यविशेषे ॥ तदुदाहरणम् यथा ।

स	का	र	ना	ना	र	का	स
का	य	सा	द	द	सा	य	का
र	सा	ह	वा	वा	ह	सा	र
ना	द	वा	द	द	वा	द	ना

॥ अस्यार्थः ॥

पुनः कीदृशीसेना॰ सकाराः स

यक्षाः सोत्साहाः नाना नाना विधाश्च ये घोराः चर्मांस मुखाः तेषां कासाः गतिभेदाः कायाः विग्रहाश्च तेषां सादं ददति, द्युतिसादृशाः नाशका रकाः सायकायस्यासा तथोक्ता । रसेन रागेण आच्छवो यस्याः सा रसाच्छवा रक्तरागिणीत्यर्थः । बाहुसाराणां बाहुश्रेष्ठानां येनादाः द्वेषादिदोषाः तेषां शादं कलहं ददाति दूतिशाददानि ते सहकलायमानानि बादनानि वाद्यानि यस्यांसा बाहुदारनादशाददवादवा । अतएव तेषां तुल्यतोक्तिरतिशयोक्तिः । सर्वतोभ्रमणात् सर्वतोभद्राख्यश्चित्रबन्धः । अतएव दण्डी । तद्दृष्टं सर्वतोभद्रम्भ्रमणं यदि सर्वतस्तदिति ॥ निम्बे ॥ विष्णुरथे ॥ व्यूहविशेषे । सर्वतोभद्रमत्र । सर्वतोभद्रं यस्यासा । न. देवोद्यानविशेषे । हर्षोत्सर्गव्रतप्रतिष्ठादिषुपूजाधारमण्डलविशेषे ॥ तच्च शारदादितन्त्रेषु द्रष्टव्यम् ॥ पुं. न. ईश्वरसद्मविशेषे । चतुर्द्वारालिन्दशोभिराजगृहान्तरे ॥ चतुःशालश्चतुर्द्वारः सर्वतोभद्रसंज्ञितश्चतुष्कः ।

सर्व्वतोभद्रा । स्त्री. गम्भार्याम् ॥ नटयोषिति ॥ सर्वतोभद्रं यस्याः ।

सर्वतोमुखः । पुं. विधौ । ब्रह्मणि । हर्षे । रुद्रे । शिवे ॥ चैतन्ये । आत्मनि ॥ अग्नौ ॥ ब्राह्मणे ॥ स्वर्गे । न. अम्बुनि । जले ॥ आकाशे । खे । सर्वतोमुखान्यस्य । सर्वदिग्गमनात् ॥

सर्व्वत्र । अ. सर्वस्मिन्काले ॥ सर्वस्मिन्देशे । सर्वस्मिन्दिशि ॥ सप्तम्यास्त्रल् ॥ सर्वत्रखलुदृश्यन्ते साधवो धर्मचारिणः । शूराः शरण्याः सौमित्रे तिर्यग्योनिगतेष्वपि ॥

सर्व्वत्रगः । पुं. वायौ । त्रि. सर्वव्यापिनि । सर्वकारणे ॥ सर्वत्रगच्छति गम् ड । डप्रकरणे सर्वत्रपन्नयोरुपसङ्ख्यानं डः ॥

सर्व्वत्रगामी । पुं. अनिले ॥ त्रि. सर्वदिग्देशकालेषु गमनकर्त्तरि

सर्व्वत्रसमदर्शनः । त्रि. सर्वस्मिन्नरिमित्रादौ समं दर्शनं यस्य तस्मिन् ॥

सर्व्वथा । अ. हेतौ ॥ बाढे । सर्व्वप्रकारेणेत्यर्थे ॥ सर्वैः प्रकारैः । प्रकारवचने थाल् ॥ यथा । विद्यते नखलु कश्चिदुपायः सर्वलोकपरितोषकरो यः । सर्वथा स्वहितमाचरणीयं किं करिष्यति जनो बहुजल्पः । प्रतिज्ञायाम् ॥ भृशे ॥

सर्व्वथावर्त्तमानः । त्रि. सर्वथा प्रारब्धकर्मवशाद्विधर्मातिक्रम्यवर्त्तमाने

सर्व्वदमनः। पुं॰ शकुन्तलात्मजे॰ भरते ॥ कार्त्तवीर्य्ये ॥

सर्व्वदर्शनः। पुं॰ विष्णौ ॥ सर्व्वाणि दर्शनात्मकान्यक्षीणियस्य सर्व्वात्मकत्वात् ॥

सर्व्वदर्शी। पुं॰ विष्णौ ॥ सर्व्वेषां प्राणिनां कृताकृतं सर्व्वं पश्यति स्वाभाविकेन बोधेनेति तथा ॥ बुद्धे ॥ त्रि॰ सर्व्वज्ञे ॥ सर्व्वं द्रष्टुं शीलमस्य। सुप्यजातौ णिनिस्ताच्छील्ये ॥

सर्व्वदा। अ॰ सर्व्वस्मिन् काले ॥ सर्व्वैकान्यकिंयत्तदः काले दा ॥

सर्व्वदुःखक्षयः। पुं॰ मोक्षे ॥ सर्व्वदुःखानां क्षयो विनाशोऽस्मिन्॰ इति तथा ॥ सर्व्वपीडानाशे।

सर्व्वदृक्। त्रि॰ सर्व्वज्ञे अखिलस्य पदार्थस्यावलोकयितरि। सर्व्वं पश्यति। दृशिर्॰। क्विप् ॥ ईश्वरे ॥ सर्व्वमतीतानागतादि॰ पश्यति स्वरूपबोधेनेति तथा। क्विन्प्रत्ययश्चेत्यत्र बहुव्रीह्याश्रयणात् कुत्वम् ॥

सर्व्वदेवमुखः। पुं॰ अनले। अग्नौ।

सर्व्वधातमः। त्रि॰ सर्व्वस्य धारयितृतमे ॥

सर्व्वधारी। पुं॰ वत्सरविशेषे ॥ तत्फलं यथा। कोद्रवाः शालिमुद्गाश्चकङ्गुमाषास्तथैव च। सुलभं जायते सुस्थं जगत् सर्व्वधारिणि ॥ त्रि॰ सर्व्वधारणशीले ॥

सर्व्वधुरावहः। पुं॰ सर्व्वधुरीणे ॥ सर्व्वा चासौ धूश्च॰ सर्व्वधुरा। पूर्व्वकालैकसर्व्वेतिसमासः। ऋक्पूरित्यः। वहतीति॰ वहः। अच्। सर्व्वधुराया वहः ॥

सर्व्वधुरीणः। पुं॰ रथशाङ्गलादिसर्व्वभाराणां वाहकेगवादौ। सर्व्वधुरावहे ॥ सर्व्वधुरां वहति। खः सर्व्वधुरादिति खः ॥

सर्व्वनाम। न॰ सर्व्वादिपञ्चत्रिंशत्सु ॥ तानि यथा। सर्व्व॰ विश्व॰ उभ॰ उभय॰ डतर॰ डतम॰ अन्य॰ अन्यतर॰ इतर॰ त्वत्॰ त्व॰ नेम॰ सम॰ सिम॰ पूर्व्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्। स्वमज्ञातिधनाख्यायाम्। अन्तरं बहिर्योगोपसंव्यानयोः। त्यद्॰ तद्॰ यद्॰ एतद्॰ इदम्॰ अदस्॰ एक॰ द्वि॰ युष्मद्॰ अस्मद्॰ भवतु॰ किम्॰ इति ॥

सर्व्वनियन्ता। त्रि॰ परमेश्वरे। चिदात्मनि ॥ परमार्थतोऽसङ्गस्याऽपि चैतन्यस्य॰ आध्यासिकसम्बन्धसम्बद्धाध्यानद्वारा सर्व्वजीवप्रवर्त्तकत्वेन॰ सर्व्वनियन्तृत्वमिति ज्ञेयम् ॥

सर्व्वन्दमः। पुं॰ शाकुन्तलेये॰ भ

रते ॥

सर्व्वपथीणः । पुं॰ सारथौ ॥ सर्वं पथानं व्याप्नोति । तत्सर्वादे पथ्यङ्गकर्मपात्रपात्रं व्याप्नोतीति खः ॥

सर्व्वपथीनः । पुं॰ रथे ॥ सर्वपथान्व्याप्नोति । तत्सर्वादेरिति खः ॥

सर्व्वपात्रीणः । पुं॰ ओदने ॥ सर्वपात्रं व्याप्नोति । तत्सर्वादेरिति खः ॥

सर्व्वपूर्णत्वम् । न॰ सम्भारे ॥

सर्व्वभक्षः । त्रि॰ सर्व्वभक्षणकर्त्तरि ॥

सर्व्वभक्षा ।) स्त्री॰ गलस्तन्याम् ।
सर्व्वभक्ष्या ।) छाग्याम् । अजायाम् ॥ इ॰ हे॰ रुद्रः ॥

सर्व्वभूतगुहाशयः । पुं॰ चिदात्मनि॰ परमेश्वरे ॥ सर्वभूतानांशयरूपगुहायां॰ गुहासु बुद्धिषु शेते । शीङोधिकरणेशेतेरित्यच् ॥

सर्व्वभूतप्रणेता । पुं॰ लोकात्मनि परमेश्वरे ॥ यथाहुः । द्यांमूर्द्धानंयस्य विप्रावदन्ति॰ खंवैनाभिंचन्द्रसूर्य्यौ चनेत्रे । दिशः श्रोत्रे विद्धिपादौ क्षितिंचसोचिन्त्यात्मासर्वभूतप्रणेता । इति ॥

सर्व्वभूतात्मकः । त्रि॰ प्रत्यगभिन्नपरमात्मनि ॥

सर्व्वभूतात्मभूतात्मा । पुं॰ आत्मज्ञानिनि ॥ यथा । जडाजडात्मकं सर्वमात्ममात्रंप्रपश्यति । सएवसर्वभूतात्मभूतात्माप्रोच्यतेबुधैरिति सर्वभूतस्यात्मभूतश्च॰ आत्मास्वरूपम्यस्य ॥

सर्वभूताशयस्थितः । त्रि॰ आत्मनि॰ चैतन्यानन्दघनेचिन्मात्रे ॥ सर्वभूतानामाशयेहृदि शेतात्यामिरूपेण॰ प्रत्यगात्मरूपेणचस्थितोयः सएवसः ॥

सर्वभृत् । त्रि॰ नामरूपात्मकसकलजगतो धारके॰ पोषकेच॰ चिदात्मनि॰ ॥ मायया॰ सदात्मना॰ सर्वंकल्पितं॰ धारयति॰ पोषयतिच॰ निरधिष्ठानभ्रमायोगात् । डुभृञ्धारणपोषणयोः । क्विप् । तुक् ॥

सर्वमङ्गला । स्त्री॰ दुर्गायाम् ॥ सर्वेभ्यः सर्वेषांवामङ्गला ॥ सर्वाणिमङ्गलानियस्याइतिवा ॥ सर्वाणिहृदयस्थानिमङ्गलानिशुभानिच । ददातिचेप्सितांल्लोकेतेनसासर्वमङ्गले-तिदेवीपुराणम् ॥ अपिच । मङ्गलं मोक्षवचनमाङ्शब्दोदातृवाचकः । सर्वान्मोक्षान्याददातिसिनसासर्वमङ्गला ॥ हर्षेसम्पद्दिकल्याणेमङ्गलंपरिकीर्त्तितम् । तान्ददातिचयादेवी साएवसर्वमङ्गला ॥ इ॰ ब्र॰ वै॰ पु॰ ॥ अन्यच्च । सर्वमङ्गलशब्दश्च सम्पूर्णार्थस्यवाचकः । आकारोदातृवचनस्तस्मात्सासर्वमङ्गला ॥ ॥ इ॰ ब्र॰ वै॰ पु॰ श्रीकृष्णजन्मखण्डे २७ अध्यायः ॥

सर्व्वमयः । त्रि॰ सर्व्वात्मके ॥

सर्व्वमूल्यम् । न॰ कपर्द्दके ॥

सर्व्वमूषकः । पुं॰ अनेहसि ॥ काले ।

सर्व्वमेधः । पुं॰ सर्व्वस्वदक्षिणे॰ विश्वजिदाख्ये यज्ञे ॥

सर्व्वम्भरिः । पुं॰ प्राणे ॥ सर्व्वं बिभर्त्ति । सर्व्वस्यमुमागमोभृञ् डुनिनिपातनात् ॥

सर्व्वयोगविनिस्मृतः । त्रि॰ असङ्गे । सर्व्वसम्बन्धविनिर्गते ॥ योगशब्देन सम्बन्ध उच्यते । सर्व्वे च ते योगाः सम्बन्धास्तेभ्यो विनिस्मृतः विनिर्गतः ॥

सर्व्वरत्नकम् न॰ कवचविशेषे ॥

सर्व्वरसः । पुं॰ सर्ज्जरसे । धूनके ॥ वीणाप्रभेदे ॥ लवणरसे ॥ सर्व्वे रस्यते । रसआस्वादने । अदन्तोयम् । घञ्॰ अच्वा ॥ सर्व्वे रसा यस्मिन्वा ॥ परमानन्दे॰ आत्मनि ॥ सर्व्वे रसाः सुखानि विद्यन्ते यस्मिन् सः ॥ पण्डिते ॥

सर्व्वरसाग्रः । पुं॰ मण्डे ॥ रसस्यासावयवः । रसस्याग्र इति वा ॥ अग्रोरसः॰ रसाग्रः । राजदन्तादित्वात् । सर्व्वस्य रसाग्रः ॥

सर्व्वरसोत्तमः । पुं॰ लवणरसे ॥

सर्व्वर्त्तुपरिवर्त्तः । पुं॰ वत्सरे ॥

सर्व्वलिङ्गी । पुं॰ पाषण्डे । वेदविरुद्धाचारे॰ सर्व्ववर्णाश्रमचिह्नधारिणि ॥ नानाव्रतधरा नानावेषाः पाषण्डिनो मताः ॥ सर्व्वाणि व्रतानि लिङ्गानि च । सर्व्वेषां लिङ्गानि सन्त्यस्य । अतइनिः ॥

सर्व्वलोहः । पुं॰ लौहमयनाराचे । प्रक्ष्वेडने । समस्तधातौ ॥

सर्व्ववर्णिका स्त्री॰ गम्भार्य्याम् ॥

सर्व्ववल्लभः । त्रि॰ सर्व्वप्रिये ॥

सर्व्ववल्लभा । स्त्री॰ असत्यामनार्य्याम् ॥

सर्व्ववाच्यः । त्रि॰ सर्व्वनिन्दावाग्विषये ॥

सर्व्वविक्रयी । पुं॰ प्रतिषिद्धद्रव्याणां विक्रेतरि ॥

सर्व्ववित् । पुं॰ परमेश्वरे ॥ त्रि॰ विदितात्मतत्त्वे ॥ सर्व्वं वस्तु वेत्ति॰ विन्दति वा । विद॰ विद्लृ वा । सत्सूद्विषेत्यादिना क्विप् ॥

सर्व्वविषयातीतः । त्रि॰ सर्व्वान्तर्य्यामिणि । सर्व्वमविद्यातत्कार्यात्मकं विषयमतीत्यावस्थितः ॥

सर्व्ववेदाः । पुं॰ विश्वजिदाद्यष्टरि । सर्व्वस्वदक्षिणोपेतयागकर्त्तरि ॥ यथाहामरः । सर्व्ववेदाः सयेनेष्टो यागः सर्व्वस्वदक्षिण इति ॥ सर्व्वं वेदयति॰ लम्भयति॰ ऋत्विग्भ्य इति सर्व्ववेदाः । विद्लृलाभे । ण्यन्तः । असुन् ॥

सर्व्ववेशी । पुं॰ नर्त्तके । नटे । सर्व्वेषां वेशः सोऽस्यास्ति । इनिः । सकलवेशधारिणि । बहुरूपी॰ इ॰ भा॰ ॥

सर्व्वव्यापी । त्रि॰ आकाशवत्सकलपदार्थव्यापनशीले ॥ यथा । सर्व्वव्यापिनमात्मानं ज्ञात्वा धीरो न शोचतीति ॥

सर्व्वशः । अ॰ सर्व्वप्रकारेणेत्यर्थे ॥

सर्व्वशाखामलम् । न॰ नक्षत्रविशेषेषु ॥ यथा । भरणीकृत्तिकापित्र्यविशाखाश्लेषभानि च । सर्व्वशाखामलं प्रोक्तं व्रतं तत्र विवर्ज्जयेत् ॥

सर्व्वशास्त्रवित् । त्रि॰ महानिर्व्वाणागमज्ञे ॥

सर्व्वशान्तिकृत् । पुं॰ दौः खम्नी । शाकुन्तलेये ॥ त्रि॰ सर्व्वशान्तिविधायिनि ॥

सर्व्वसंसर्गलवणम् । न॰ औषरके ॥

सर्व्वसङ्गतः । पुं॰ षष्टिकाधान्ये ॥ त्रि॰ सर्व्वप्रिये । सकलसङ्गतियुक्ते ।

सर्व्वसत्त्वसमुद्भवा । स्त्री॰ प्रावृषि ॥ सर्व्वेषां प्राणिनां समुद्भव उत्पत्तिर्जीवनं तस्य यस्याम् ॥

सर्व्वसन्नहनार्थकः । पुं॰ सर्व्वसैन्यसन्नहने । सर्व्वाभिसारे ॥ सर्व्वेषां सन्नहनम्॰ सर्व्वसन्नहनम् । सर्व्वसन्नहनमर्थोऽस्य सः ॥

सर्व्वसन्नाहः । पुं॰ सर्व्वात्मनि ॥

सर्व्वसहः । पुं॰ गुग्गुलौ ॥ त्रि॰ सकलसहिष्णौ ॥

सर्व्वसाक्षी । पुं॰ परमात्मनि ॥ सर्व्वेषां शुभाशुभकर्म्मणां॰ साक्षी॰ साक्षाद्द्रष्टा ॥ त्रि॰ सर्व्वविषयद्रष्टरि ॥

सर्व्वसिद्धिः । पुं॰ श्रीफले बिल्वे ॥ त्रि॰ सिद्धियुक्ते ॥

सर्व्वसुखप्रदः । पुं॰ परमात्मनि ॥ भगवति ॥

सर्व्वस्वम् । न॰ समस्तधने ॥

सर्व्वस्वी । पुं॰ गोपकन्यायां नापिताज्जातसङ्करजातौ ॥ त्रि॰ सर्व्वस्वविशिष्टे ॥

सर्व्वहरः । त्रि॰ सर्व्वसंहारकारिणि ॥

सर्व्वहितम् । न॰ मरिचे ॥ त्रि॰ सर्व्वेषां हितकारिणि ॥

सर्व्वाकारः । त्रि॰ समस्तदेहाद्याकारविशिष्टे॰ भगवति ॥ यथाहुराचार्य्याः । सर्व्वाकारो भगवानुपास्यते येन येन भावेन । तत्तद्भावं भूत्वा चिन्तामणिवत्समभ्येतीति ॥ सर्व्वोपादानकारणत्वात् सर्व्वाकारत्वम् ॥

सर्व्वाङ्गम् । न॰ सकलावयवे ॥

सर्व्वाङ्गसुन्दरः । पुं॰ औषधविशेषे ॥ यथा । रसगन्धकतुल्यांशो दो भा

गोटङ्कणस्य च । मौक्तिकं विद्रुमं शङ्खमभ्रकं समांशतः ॥ हेमभस्मार्द्धभागञ्च सर्व्वं खल्वे विधापयेत् । निम्बुद्रवस्य योगेन पिष्टिकां कारयेद्भिषक् ॥ पञ्चाङ्गपुटं दत्त्वा शीतलं समुद्धरेत् । हेमभस्मसमं तीक्ष्णं तीक्ष्णार्द्धं दरदं मतः ॥ एकीकृत्य समस्तानि सूक्ष्मचूर्णानि कारयेत् । ततः पूजां प्रकुर्व्वीत भक्षयेद्दिवसे शुभे ॥ सर्व्वाङ्गसुन्दरो ह्येष रोगराजनिकृन्तनः । वातपित्तज्वरे घोरे सन्निपाते सुदारुणे ॥ अर्शःस्वग्रहणीरोगे मेहे गुल्मे भगन्दरे । निहन्ति वातजान् रोगान् श्लैष्मिकांश्च विशेषतः ॥ पिप्पलीमधुसंयुक्तं घृतयुक्तमथापि वा । भक्षयेत् पर्णखण्डेन सितया चार्द्रकेण वा ॥ गुडूचीसत्त्वसहितं प्रमेहे च विशेषतः । रसरत्नाकरः प्रोक्तः सिद्धयोगो रसोत्तमः ॥ राजिकाहिङ्गुतैलाम्लं नरगाव्यं विवर्ज्जयेत् । इति भैषज्यरत्नावल्यां सर्व्वाङ्गसुन्दरो रसः ॥

सर्व्वाङ्गीणः । पुं॰ तापे ॥ सर्व्वाङ्गानि व्याप्नोति । तत् सर्व्वादेरिति खः ॥ त्रि॰ सर्व्वावयवसम्बन्धयुक्ते ॥

सर्व्वातिथिः । पुं॰ विश्वरक्षितरि ॥ सर्व्वातिथिपूजके ॥ सर्व्वे॰ अतिथयो यस्य सः ॥

सर्व्वात्मा । पुं॰ सर्व्वस्वरूपे ॥ सर्व्वप्रयमे ॥

सर्व्वात्मता । स्त्री॰ सर्व्वस्य आत्मभेदे ॥ भावे तल् ॥

सर्व्वाध्यक्षः । त्रि॰ सर्व्वस्मिन्नधिकृते ॥ सर्व्वप्रत्यक्षे ॥ सर्व्वनियन्तरि ॥

सर्व्वानुकारिणी । स्त्री॰ शालपर्ण्याम् ॥

सर्व्वानुकारी । त्रि॰ सर्व्वसमे ॥

सर्व्वानुभूतिः । स्त्री॰ श्वेतत्रिवृतायाम् ॥ सर्व्वैरनुभूतयोऽस्याम् ॥ सर्व्वैरनुभूयते वा । कर्म्मणि क्तिन् ॥ सकलज्ञाने । पुं॰ भूतार्हद्विशेषे ॥ भाव्यर्हद्विशेषे ॥

सर्व्वान्नभक्षकः । त्रि॰ उदरपिशाचे । सर्व्वान्नभोजिनि ॥

सर्व्वान्नभोजी । त्रि॰ सर्व्वान्नीने ॥ सर्व्वेषामन्नानि॰ सर्व्वान्नानि । सर्व्वान्नानि भोक्तुं शीलमस्य । सुपीति णिनिः ॥

सर्व्वान्नीनः । त्रि॰ सर्व्ववर्णान्नभक्षके । सर्व्वान्नभोजिनि ॥ सर्व्वान्नानि भक्षयति । अनुवादसर्व्वान्नेति खः ॥ भिक्षौ ॥

सर्व्वाभिसन्धकः । पुं॰ परगुणासहनतया सर्व्वाधिक्षेपके । वैडालव्रतिकादौ ॥ यथाह मनुः । धर्म्मध्वजी सदा लुब्धश्छाद्मिको लोकदम्भकः । वैडालव्रतिको ज्ञेयो हिंस्रः सर्व्वाभिसन्धकः इति ॥

सर्व्वाभिसन्धी । पुं॰ वैडालव्रतिके ।

छत्रतापसी ॥ त्रि॰ सर्व्वाभिसंधान विशिष्टे ॥

सर्व्वाभिसार: । पुं॰ सर्व्वौघे । सर्व्वसन्नहनार्थके । चतुरङ्गसैन्यसन्नाहे ॥ सर्व्व॰ अभिसरणम् । स॰ । भावेघञ् ॥

सर्व्वार्थसाधिका । स्त्री॰ दुर्गायाम् । त्रि॰ सकलप्रयोजनसाधके ॥

सर्व्वार्थसिद्ध: । पुं॰ बुद्धभेदे । शाक्यमुनौ । शौद्धोदनौ । त्रि॰ लब्धार्थे । समस्तप्रयोजनसिद्धियुक्ते ॥ सर्व्वार्थेषु संसिनिष्पन्न । सिद्धशुक्लकपक्षे॰ चेतिसमास: ॥ सर्व्वार्थ: सिद्धोऽस्येति वा ॥

सर्व्वार्थसिद्धि: । स्त्री॰ योगविशेषे । सर्व्वार्थसिद्धिसंज्ञके ॥ सर्व्वार्थानांसिद्धि: ॥

सर्व्वार्थसिद्धिसंज्ञक: । पुं॰ योगभेदे ॥ यथा । मूलोत्तराकरतुरङ्गमपुष्पभानिसूर्ये॰ ह्यौन्दुर्विधभेच गुरु: यथाक्रे । सार्पोन्दुताश्रनत पान्त्यभमेवभौमे॰ वह्नीन्दुमैत्रकरभानिविधिश्चसौम्ये ॥ मैत्रान्त्यपुष्यतुरगादितिभानिजीवे॰ इयन्त्यमैत्रतुरगादितयश्च शुक्रे । ब्राह्म्यानिलश्रवणभानिशनैश्चराहे॰ सर्व्वार्थसिद्धिसहित: कथितोहियोग: ॥

सर्व्वार्थानुसाधनी । स्त्री॰ सर्व्वार्थसाधिन्याम् । अम्बायाम् । दुर्गायाम् ॥

यथा । धर्म्मादीश्चिन्तितान् यस्मात् सर्व्वलोकेषुयच्छति । ततोदेवीसमाख्यातासासर्व्वार्थानुसाधिनीतिदेवीपुराणे ४५ ऽध्याय: ॥

सर्व्वावसर: । पुं॰ नि:संपाते । अर्द्धरात्रे ॥ सर्व्वेषामवसरोऽस्मिन् ॥ ब॰ वि॰ शेष: ॥

सर्व्वाशी । त्रि॰ निषिद्धभोजनादिशीले ॥

सर्व्वाश्चर्य्यमय: । त्रि॰ अनेकाद्भुतप्रचुरे ॥

सर्व्वाश्रमनमस्कृत: । पुं॰ अन्त्याश्रमे । पारमहंस्ये ॥

सर्व्वासा । स्त्री॰ देशविशेषे ॥

सर्व्वाह्ण: । पुं॰ समस्तदिने ॥

सर्व्वीय: । त्रि॰ सार्व्वे । सर्व्वस्मैहितम् । सर्व्वास्मैचेतिपक्ष: ॥

सर्व्वेन्द्रियगुणाभासम् । त्रि॰ चक्षुरादीन्द्रियाणि ॥ सर्व्वेषांबहि: करणानांश्रोत्रादीना॰ मन्त: करणयोश्चबुद्धिमनसोर्गुणै॰ रध्यवसायसङ्कल्पश्रवणवचनादिभिस्तत्तद्विषयतयाऽवभासतइव॰ सर्व्वेन्द्रियव्यापारैर्व्यापृतमिवयत् ॥ तत्सर्व्वेन्द्रियाणिगुणावतद्विषयानाभासतेतिवा ॥

सर्व्वेशान: । पुं॰ परमेश्वरे ॥ सर्व्वेषामीशान: ॥

सर्व्वेश्वर: । पुं॰ परशिवे ॥ परमार्थतोऽसङ्कस्यापिचैतन्यस्य॰ आध्यासि

कसमस्तवस्तुद्धाज्ञानस्वरः सर्वम
यादाधारकपस्तुरूपत्वेनपरमेश्वर
त्वम् । सर्वेषाम्॰ ईश्वरः । स्वा
मीन्द्रमये ॥ यथा । अयंयतःसृजतेवि
श्वंतदन्यथयितुंपुमान् । नकोऽपि
शक्तस्तेनायंसर्वेश्वरइतिश्रुतः ॥
यथावा । नारायणमात्मानंज्ञात्वा
सर्गस्थितिप्रलयहेतुम् । सर्वज्ञः
सर्वभूतः सर्वः सर्वेश्वरोभव
तीति ॥

सर्व्वौघः । पुं॰ सर्वसन्नहनार्थके ।
सर्वस्वयोधः ॥ गुरुविशेषे ॥

सर्व्वौषधिः । स्त्री॰ ओषधिवर्गविशे
षे ॥ यथा । कुष्ठंमांसीहरिद्रेद्वेमु
राशैलेयचन्दनम् । वचाकर्पूरमु
स्ताख्याः सर्वौषध्यः प्रकीर्त्ति
ताः ॥

सर्षपः । पुं॰ सरिषपे । तुभे । कटु
स्नेहे ॥ सरतिस्नेहोऽस्मात् । सृ॰
। सर्त्तेरपः शुक्चेत्यपः पुगागम
श्च ॥ सर्षपस्तुरसेपाकेकटुःस्निग्धः
सतिक्तकः । तीक्ष्णोष्णः कफवा
तघ्नोरक्तपित्ताग्निवर्द्धनः ॥ रक्षोह
रोजयेत्कण्डुकुष्ठकोष्ठक्रिमिग्रहा
न् । यथारक्तस्तथागौरः किन्तुगौ
रोवरोमतः ॥ स्थावरविषप्रभेदे ॥
लिक्षाषट्कपरिमाणे ॥ यथा । जा
लान्तरगतेभानौयच्चाणुदृश्यतेरजः
। तैश्चतुर्भिर्भवेल्लिक्षालिक्षाषड्भि
स्तुसर्षपः ॥

सर्षपतैलम् । न॰ सर्षपजातस्नेहे ।
स्नेहेतैलेच ॥ दीपनंसार्षपंतैलं
कटुपाकरसंलघु । लेखनस्पर्शवी
र्योष्णंतीक्ष्णंपित्तास्रदूषकम् ॥ क
फमेदोनिलार्शोघ्नंशिरःकर्णामया
पहम् । कण्डूकोठक्रिमिश्वित्रकुष्ठदु
ष्टव्रणप्रणुत् ॥ तद्वद्राजिकयोस्तैलं
विशेषान्मूत्रकृच्छ्रकृत् । राजिक
योः कृष्णराजिकाऽरक्तराजिका॰
तयोः ॥

सर्षपनालम् । न॰ सार्षपेकाण्डे ॥
तीक्ष्णोष्णंसार्षपंनालंवातश्लेष्म
व्रणापहम् । कण्डूक्रिमिहरंदद्रु
कुष्ठघ्नंरुचिकारकम् ॥ पाकप्रका
रोयथा । सार्षपः कोमलोदण्डः
स्विन्नस्तक्रेणपीडितः । ततस्तैले
सहिङ्गुराढ्येभर्जितः सैन्धवा
न्वितः ॥ इति ॥

सर्षपशाकम् । न॰ सार्षपेशाके ॥
कटुकंसार्षपंशाकंबहुमूत्रमलंगुरु
। अम्लपाकंविदाहिस्यादुष्णंरूक्षं
त्रिदोषकृत् ॥ सक्षारंलवणंतीक्ष्णं
स्वादुशाकेषुनिन्दितम् ॥

सर्षपी । स्त्री॰ खञ्जनिकायाम् ॥

सलम् । न॰ जले ॥ सलति । सल॰
। अच् ॥

सललितम् । त्रि॰ सविलासे ॥

सलिरम् । न॰ जले ॥ सलति । सल॰ ।

सलिकलीति• डुलच्। रलयोरैकत्वम्॥

सलिलम्। न• जले। उपादानाख्यायां द्वितीयायां तुष्टौ॥ सलति• गच्छति निम्नदेशम्। सलगतौ। सलिकल्यनिमहिभडिभगिडशगिड-पिगिडतुण्डकुकिभूभ्यइलच्॥ सलिलव्यञ्जकदेशादगागले द्रष्टव्याः। कश्चिद्विशेषो वापिकालिदासेनोक्तो यथा। अथार्जुनोदुम्बरसिन्दुवाराः पर्णप्रशोलातिविशालशाखाः। वल्मीकपार्श्वाः स्फुरगाश्मवत्ता स्वनिर्दिश्यमलं समाशु॥ येषामतिशीतलमसत्त्वपुष्करिणीसास्वादु सान्द्रसलिलाकिलशीघ्रवार्ता। इत्थं विलोक्य वसुधामिह कूपवापीकासारकुण्डखननं विदधीत शश्वत्॥ नीचगतजलदेशमाह। सिंधुप्रतानमरुकाण्वगीडर्गेशेनिम्नंधरान्तरगमम्बुनिसर्गभावात्। धाराक्तकुण्ठतरवस्तु विनिस्तृणोर्व्यां तद्द्वन विकृतिमद्गुणमाहुरार्याः॥ शुभजलस्थानमाह। यामादुदीरितदिरित्युशमोजभागेच्चे च भमण्डलविभागवतिप्रशस्तम्। वाच्यं वनं तदिहगर्भकवीन्द्र भागे निम्नाद्रि भूमितटिनीनगदिक्षु गिराभिरिति॥

सलिलकुन्तल :। पुं• शैवाले। सलिलस्य कुन्तल इव॥

सलिलकोष्ठ :। पुं• जलगृहे। जल मन्दिरद्व• भा• प्र•॥

सलिलज :। त्रि• जलोत्पन्ने॥ न• पद्मे॥

सलिलनिधि :। पुं• समुद्रे॥ यथा। पीत्वा गज्जन्त्यपस्ते दिशि दिशि जलदास्त्वं शरण्यो गिरीणां सुत्रामा वा सभाजाममरविटपिनां जन्मभूमिस्त्वमेवागाम्भीर्यं किन्नु ताद्दक्तव यि सलिलनिधे किन्तु विज्ञापयामः सर्वोपायेन मैत्रावरुणिमुनिकृपा द्दष्टयः कांक्षणीयाः॥ जलानां निधिः॥

सलिलेन्धन :। पुं• वाडवाग्नौ॥ सलिलमिन्धनं यस्य॥

सलील:। त्रि• लीलया सह वर्त्तमाने।

सलोकता। स्त्री• समानलोकतायाम्॥

सल्लकी' स्त्री• गजभक्ष्यायाम्। शल्लक्याम्। सत्कृत्य लक्यते स्वाद्यते गजै :। लक•। क्वुन्। गौरादि॥

सल्लक्ष्यम्। न• प्रत्यगभिन्ने ब्रह्मणि॥ सच्चतल्लक्ष्यश्चेति तथा॥

सव :। पुं• यज्ञे। सोमोयत्राभिषूयते रसार्थं खण्ड्यते वा दाध्वरेसवः॥ सव्याने॥ सूयते सोमोऽत्र। षुञ्•। ऋदोरप्॥ यद्वा। सूयतेऽनेन वा। षू प्रेरणे। अप्•घो वा। न• जले॥

सवनम्। न• यज्ञस्नाने। सूत्याया

...। अभिषवे ॥ अध्वरे ॥ सोमनिर्दलने ॥ षुञ् अभिषवे । ल्युट् ॥ प्रसवे ॥ पुं० काले । समये ॥ चन्द्रमसि ॥ सवति० सुनोति० सुवति वा । सुषुलूञ्लोयुच् ॥

सवया : । पुं० वयस्ये । स्निग्धे ॥ समानं वयोऽस्य । ज्योतिर्जनपदेति समानस्य स : ॥

सशर : । पुं० सलिले ॥ शिवे ॥

सवर्ण : । त्रि० सदृशे ॥ तुल्यवर्णे । समानजातौ ॥ यथा । पाणिग्रहणसंस्कार : सवर्णासूपदिश्यते० इति ॥ समानो वर्णोऽस्य ॥ ज्योतिर्जनपदेति स : ॥ तुल्यास्यप्रयत्ने वर्णे ॥

सवर्णा । स्त्री० मनिमातरि । छायायाम् ॥

सवर्णाख्यम् । न० तीर्थविशेषे ॥

सवल्ला । स्त्री० त्रिवृति ॥

सवासक : । पुं० वर्णवृत्तान्तरे ॥ द्विजगणसहितभगणानुप्रासक : अथ तिस्त्रः सक्रमितिगुणनायक ॥ यथा : गिरिवरनन्दिनिकुंजरतनिकामानि । विदितनतौ सायकानुसुचक्र धामपि ॥

सविकल्पक : । पुं० सज्ञातसमाधौ ॥ तथाहि : सविकल्पको नाम ज्ञातृज्ञानादिविकल्पभेदानपेक्षयाऽद्वितीयवस्तुनि तदाकाराकारितायाश्चित्तवृत्तेरवस्थानम् । अत्रोदाहरणम् । तदा मृण्मयगजादिभानेऽपि मृद्भानवत् द्वैतभानेऽप्यद्वैतवस्तु भासते० इति । तदुक्तम् । दृशिस्वरूपं गगनोपमं परं सकृद्विभातं त्वजमेकमक्षरम् : अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्तमिति ॥ त्रि० सविकल्पसहिते ॥

सविकार : । त्रि० विकारसहिते महाभूतादिघृत्यन्ते ॥ विकारेण सहित : ॥ कार्यकारणोपादानतया सर्वकार्यतादात्म्यापन्ने ब्रह्मणि ॥

सविकाश : । त्रि० सप्रकाशे ॥

सविकास : । त्रि० विकासेन सह वर्तमाने ॥

सविग्रह : । त्रि० मूर्तिमति ॥

सविता । पुं० सूर्ये । सर्वभावानां प्रसवितरि ॥ यथाह यास्क : । सविता सर्वभूतानां सर्वभावान् प्रसूयते । सवनात् पावनाच्चैव सविता तेन चोच्यत इति ॥ वह्निपुराणेऽपि यथा । धीवद्वाच्योक्षराणां प्रवृत्ति दर्शितवर्त्मा । स एष भगवान् विष्णु : सविता स तु कीर्तित : ॥ सर्वलोकप्रसवनात् सविता स तु कीर्तित : । यतस्तद्देवता देवी सावित्रीत्युच्यते तत इति ॥ विष्णुधर्मोत्तरेऽपि । रसानां प्रसवात् दानात् सविता इत्यभिधीयते । प्रजानां प्रसवनात् सवितेत्य-

भिधीयतइति ॥ सूयति ॥ सुव ति॰ कर्माणिलोकंप्रेरयति । षूप्रेरणे । तृच् । अकर्त्तृचे ॥

सवितृदैवतः । पुं॰ हस्तनक्षत्रे ॥ सविता दैवतंयस्य ॥

सवितम् । न॰ प्रसवसाधने ॥ सूयतेऽनेन । षू॰ । अर्त्तिलूधूसूखनेतीत्र : ॥

सवित्रिय : । सूर्यसम्बन्धीये ॥

सवित्री । स्त्री॰ जनन्याम् । तृजन्तात्॰ङीप् ॥

सविध : । त्रि॰ अन्तिके । निकटे ॥ समाना विधाऽस्य॰ सहविधयेतिवा ॥ सप्रकारे ॥

सविस्मय : । त्रि॰ आश्चर्ययुक्ते । वीक्षापन्ने ॥ विस्मयेनसहवर्त्ततइति तथा ॥

सवेश : । त्रि॰ निकटे ॥ वेशान्तिके समानोवेशोऽस्य॰सहदेशेनेतिवा ॥

सव्य: । पुं॰ विष्णौ ॥ त्रि॰वामे । प्रतीपे प्रतिकूले । दक्षिणे ॥ सूयते । षू॰ । अचोयत् ॥ यथा । सुनोति । बाहुलकाद्य : ॥

सव्यभिचार : । पुं॰ हेत्वाभासान्तरे ॥ यथा । अनैकान्तिक : सव्यभिचार : । सचत्रिविध: । साधारणाऽसाधारणानुपसंहारिभेदात् ॥

सव्यलीक : । त्रि॰ सापराधे ॥

सव्यसाची । पुं॰ अर्जुने । पार्थे ॥ सव्येनवामेनहस्तेनापि॰शरान्॰ सचितुंसन्धातुंशीलंयस्य । णिनि : ॥

सव्येष्ठ : । पुं॰ सारथौ ॥ सव्येतिष्ठति । सुपिस्थइतिक : । स्थास्थिन्स्थृणामितिष : । हलदन्तादित्यलुक् ॥

सव्येष्ठा । पुं॰ सूते ॥ सारथौ ॥ सव्येवामेतिष्ठति । ष्ठा॰ । सव्येस्थश्छन्दसीति॰ क्वः : ॰ डित्त्व । अम्बाम्बेत्यत॰ स्थास्थिन्स्थृणामुपसङ्ख्यानात्षत्वम्॰ सुषामादित्वाद्वा । हलदन्तादित्यलुक् । सव्येष्ठरौ॰ सव्येष्ठरइत्यादिरूपाणि ॥

सशस्य : । त्रि॰ शस्ययुक्तेभूम्यादौ ॥

सशस्या । स्त्री॰ नागदन्त्याम् ॥

सश्मश्रु : । स्त्री॰ श्मश्रुयुक्तस्त्रियाम् । नरमानिन्याम् ॥

ससत्त्व : । त्रि॰ प्राणियुक्ते ॥

ससत्त्वा । स्त्री॰ गर्भिण्याम् ॥

ससन्देह : । पुं॰ अर्थालङ्कारप्रभेदे ॥ यथा । ससन्देहस्तुभेदोक्तौ॰ तदनुक्तौचसंशय : । भेदोक्तौयथा । अयंमार्त्तण्ड : किंसखलुतुरगै : सप्तभिरित: कृशानु:किंसर्वा: प्रसरतिदिशोनैवनियतम् कृतान्त : किंसाक्षान्महिषवहनोऽसाविति चिरंसमालोक्याजौत्वांविदधति विकल्पान्नृपतिभटा: ॥ भेदोक्ताविस्यशेनन्नौ

अस्तमयं निश्चयगर्भो याबल्लिश्चयान्तो
पि सन्देहः स्वीकृतः । यथा। इन्दुः
किंक्वकलङ्कः सरसिजमेतत् किमम्बुकु
वगतम् । ललितसविलासवचनै र्मु
खमिति हरिणाक्षि निश्चितं परतः ॥
किन्तु निश्चयगर्भ इत्यनावनिश्चयः
प्रतीयमानत्वेऽपि चिन्तोभट्टोद्भटेन ।
तदनुक्तौ यथा । अस्याः सर्गविधौ
प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकरसः स्वयं नु मदनो मासो
नु पुष्पाकरः । वेदाभ्यासजडः क
थं नु विषयव्यावृत्तकौतूहलो निर्मा
तुं प्रभवेन्मनोहरमिदं रूपं पुराणो
मुनिः ॥ त्रि॰ सन्देहसहिते ॥

ससुरः । त्रि॰ सदेवे । सुरासहिते ।
सुरेण॰ सुरया वा॰ सह वर्त्तते इति ॥

सस्मितः । त्रि॰ ईषद्धास्ययुक्ते ॥ य
था । सस्मिताननसरोजमञ्जनैरिङ्ग
मानमतिलोलकुन्तलम् । रोचनो
ज्ज्वलितभालमस्तु मे कैशवं मनसि
शैशवं वपुरित्यनुमितो जगदीशः ॥

सस्यम् । न॰ शस्ये । वृक्षादिफले ॥
धान्ये ॥ शस्त्रे ॥ गुणे ॥ सस्ति ।
षसषस्तिस्वप्ने । मोच्छासस्तिभ्योयः ॥

सस्यकः । पुं॰ मणिभेदे । नालिकेरा
न्तः सस्याभमणौ । असौ । खड्गे
॥ वत्से ॥ साधौ ॥ सस्येन गुणेन
परिज्ञातः सस्यकः । सस्येनपरि
ज्ञात इति कन् ॥

सस्यमारी । पुं॰ महामूषके ।

सस्यसंवरः । पुं॰ सालवृक्षे ॥ सस्यैः
संव्रियते । वृञ् । ग्रहवृद्रित्यप् ॥

सस्यसंवरणः । पुं॰ सालवृक्षे । स
खुशा॰ इ॰ भा॰ प्र॰ ॥

सस्वेदः । त्रि॰ स्वेदसहिते ॥

सस्वेदा । स्त्री॰ दूषितायाम्कन्याया
म् ।

सह । अ॰ साकल्ये ॥ विद्यमाने ॥
सादृश्ये । यौगपद्ये । सार्द्धम्॰
साकम्॰ समम्॰ समित्यर्थे ।
सहिते ॥ समृद्धौ । सम्बन्धे ॥
सहते । षहमर्षणे । पचाद्यच् ।

सहः । पुं॰ न॰ बले । पुं॰ मार्ग
शीर्षे । न॰ पांशवे॰ लवणे ॥
त्रि॰ क्षमे ॥ क्षान्ते ॥ सहते॰
क्षमते । षह॰ । पचाद्यच् ॥

सहकारः । पुं॰ अतिसौरभाम्रे ॥
सहार॰ इ॰ भा॰ प्र॰ ॥ सहका
रयति॰ मेलयति हन्दम् । अच् ।
तुषारादयश्चेत्यादौ वा साधुः ॥ सा
हाय्ये ।

सहकारी पुं॰ प्रत्यये ॥ त्रि॰ सह
कार्य्यं कृतिः ॥

सहकारित्वम् । न॰ तद्भिन्नत्वे सति
तज्जन्यजनकत्वे॰ इति नैयायिकाः ॥

सहगमनम् । न॰ । अनुगमने ॥ यथा
॥ अष्टौ लोकपालाश्चादित्यचन्द्रानि
लाग्न्याकाशभूमिजलहृदयावस्थिता

त्सर्वामिपुरुषयमदिमराविसन्ध्याध मीयूयंसाक्षिणोभवत॰ज्वलच्चितारोहणेनपतिदेहेनसहगमनमहंकरोमीत्यनुगमनेसङ्कल्पः॥

सहचरः। पुं॰ नीलझिण्ट्याम्॥ पीतझिण्ट्याम्। पीयावांसाइ॰ भा॰ प्र॰॥ त्रि॰ अनुचरे॥ सहचरति। चर॰। पचाद्यच्॥ वयस्ये॥ प्रतिबन्धकी॥

सहचरितः। त्रि॰ सहानुष्ठिते॥ सहेचारिते॥

सहचरी। स्त्री॰ नीलझिण्ट्याम्॥ पीतझिण्ट्याम्। झिण्टोमात्रे॥ भार्यायाम्। पत्न्याम्॥ वयस्यायाम्॥ सहचरति। चर॰। पचादौ चरडितिटित्वनिपातनात्॰ङीप्।

सहजः। पुं॰ निसर्गे। स्वभावे॥ तृतीयभवने॥ त्रि॰ सहोत्थे। सहसम्भवे। सहोदरे॥ सहतुल्ये॰ उदरे॰ जात॰। जनी॰। अन्येष्वपीतिडः॥

सहजन्मा। पुं॰ सोदरे॥ सहसमाने उदरेजन्मयस्यसः॥

सहजमित्रम्। न॰ स्वाभाविकेसुहृदि। यथा। अरिर्मित्रमुदासीनोऽनन्तरस्तत्परःपरः। क्रमेणमण्डलं चिन्त्यंसामादिभिरुपक्रमैः॥ अरिः॰ शत्रुः। मित्रम्॰ सुहृद्॰। उभयविलक्षणः॰ उदासीनः।

तेत्रयस्त्रिविधाः। सहजाः॰ कृत्रिमाः॰ प्राकृताश्चेति॥ सहजंमित्रम्॰ भागिनेयपैतृष्वस्रीयमातृष्वस्रीयादिरितिमिताक्षरा॥

सहजा। स्त्री॰ भगिन्याम्। सहोदरायाम्॥ प्रकृतिप्रभेदे। आत्मनासहैवजातायाम्॥ यथापश्वादीनामाकाशगमनादिलक्षणाप्रकृतिःसहजा॥ टाप्॥

सहजातः। त्रि॰ सहोदरे॥ यमजे॥

सहजारिः। पुं॰ स्वाभाविकेशत्रौ॥ यथा। सहजारिःसापत्न्यपितृव्यतत्पुत्रादिरितिमिताक्षरायामाचाराध्यायः॥

सहड्डकम्। न॰ अस्थिसहितेपक्वमांसे। सास्थिरक्तमांसे। हडमांसइतिप्रसिद्धे॥ यथा। छागादेर्मांसमस्थ्यादेःकुट्टितंखण्डितंपुनः। शुद्धमांसविधानेनपचेदेतत्सहड्डकम्॥ सहड्डकंगुणैरन्यैःशुद्धमांसगुणंस्मृतमितिभावप्रकाशः॥

सहदेवः। पुं॰ पञ्चमपाण्डवे। माद्रीतनये। नकुलानुजे॥ जरासंधसुते॥ त्रि॰ देवेनसहिते॥

सहदेवा। स्त्री॰ बलायाम्॥ दण्डोत्पले। शारिवौषधौ॥ महदेवायाम्। अर्जन्मातरि।

सहदेवी। स्त्री॰ महाबलायाम्। पीतपुष्पायाम्॥ यथा। ज्वरंहंति

शिरोवचासहदेव्याजटाभ्रुवम् ॥ ज्वरं विषमज्वरम् ॥ सर्पाक्ष्याम् ॥ पीतदण्डोत्पलायाम् ॥ सहदेवस्यभार्यायाम् ॥

सहदेवीगण: । पुं॰ प्रतिष्ठायाम् देवस्नानार्थमोषधीसमूहे ॥ यथा । पञ्चगव्यै: स्नापयेच्च सहदेव्यादिभिस्तत: । सहदेवीबलाचैव शतमूलीशतावरी ॥ कुमारीचगुडूचीच सिंहीव्याघ्रीतथैवच । याओषधीतिमन्त्रेणस्नानमेषधिमङ्गलै: ॥

सहधर्म्मिणी । स्त्री॰ वेदविधानेनोढायाम् । पत्न्याम् । द्वितीयायाम् । भार्य्यायाम् ॥ सहधर्म्मोऽस्त्यस्या: ॰ पत्न्यासहकर्म्मस्वधिकारात् । धर्म्मशीलवर्णान्ताच्चेतीनि: । वोपसर्ज्जनस्य ॥

सहनम् । न॰ क्षमायाम् । प्रतीकारानिच्छायाम् ॥ यथा । सहनं सर्व्वदु:खानां तितिक्षासाऽशुभामतेति ॥ त्रि॰ क्षमयान्विते । सहिष्णौ । क्षमिणि ॥ सहतेक्षौ ष: । षह॰ अनुदात्तेतश्चेतियुच् । नन्द्यादित्वाल्ल्युर्वा ॥

सहनर्त्तनम् । न॰ एकत्रमण्डलाकारनृत्यकरणे ॥

सहनशील: । त्रि॰ सहिष्णौ ॥

सहपांशुक्रिल: । त्रि॰ वयस्ये ॥

सहपानम् । न॰ सपीतौ ॥

सहभावी । त्रि॰ सहायी ॥

सहभोजनम् । न॰ बहुभि: सम्मिल्यैकपात्रभोजने । सग्धौ ॥ सह॰ भोजनम् । सुप्सुपेतिसमास: ॥

सहमरणम् । न॰ मृतस्वामिनासह ज्वलच्चितारोहणेनप्राणत्यागे ॥

सहमान: । त्रि॰ सहिष्णौ ॥

सहमाना । स्त्री॰ त्रैलोक्यात्मन: क्षीरसमुद्रदक्षिणदिग्भागे ॥ सहन्तेऽस्यां पापकर्म्मफलानियमपुर्य्यां प्राणिन इति तथा ॥

सहयज्वा । त्रि॰ कर्म्माधिकृते ॥ यज्ञेनविहितकर्म्मकलापेन॰ सहवर्त्ततइति ॥

सहयायी । त्रि॰ मिलितगामिनि । स॰यो॰ हू॰ भा॰ ॥

सहयुध्वा । त्रि॰ कारितयुद्धे ॥ सहयोधितवान् । युध॰ सहेचेतिक्वनिप् ॥

सहरमा । स्त्री॰ मुद्गपर्ण्यां ॥

सहर्ष: । त्रि॰ हर्षयुक्ते ॥

सहवास: । पुं॰ सहावस्थाने ॥ यथा । नसंवसेच्चपतितैर्न्नचाण्डालैर्न्नपुक्कसै: । नमूर्खैर्न्नावलिप्तैश्च नान्त्यैर्न्नान्त्यावसायिभिरितिमनु: ॥

सहवासी । त्रि॰ एकस्थानेयौगपद्येनावस्थानकर्त्तरि ॥ यथा । सहवासीविजानातिचेष्टितंसहवासिनामिति ॥

सहा: । पुं॰ मार्गशीर्षे । मार्गे ॥

हिमस्पर्शी । सहते । षह० । अ
सुन् ॥

सहः । न० बले ॥ मानसपाटवे ॥
ज्योतिषि ॥ सहते० सह्यतेऽनेना
था । षह० । असुन् ॥

सहसः । त्रि० सहासे ॥ हसेनसह
वर्त्ततइति ॥

सहसा । अ० हठादर्थे ॥ अविमर्शे ॥
यथा । सहसाविदधीतनक्रियामवि
वेकः परमापदांपदम् । वृणतेहि
विमृश्यकारिणंगुणलुब्धाः स्वय-
मेवसम्पदः ॥ अतर्किते । आक
स्मिके । अकस्मादर्थे ॥ सहसानि
स्मृतोभावोयोस्यनित्यंहृदिस्थि-
तः । नाकारोगूहितुंशक्योवृहस्प
तिसमैरपि ॥ तत्क्षणादर्थे ॥ दि
वः प्रसूनंसहसापपातेतियथा ॥
सहते । षह० । असाप्रत्ययः ॥

सहसानः । पुं० मयूरे ॥ यज्ञे ॥
त्रि० क्षमायुक्ते ॥ सहते । षह० ।
ऋञ्जिवृधिमन्दिसहिभ्यः किदित्य
सानच् ॥

सहस्यः । पुं० पौषमासे । सहसिब
लेसाधुः । तत्रसाधुरितियत् ।

सहस्रम् । न० दशशते० १००० । अ
नन्ते ॥ शिश्नंशतंसहस्रञ्चसर्वम
क्षयवाचकमितिमहाभारतम् ॥

सहस्रकाण्डा । स्त्री० श्वेतदूर्वायाम् ॥

सहस्रकिरणः । पुं० सूर्ये ॥ सहस्रं
किरणायस्य ॥

सहस्रगुः । पुं० आदित्ये । भानौ ॥ स
सहस्रंगवोरश्मीनांयस्यसः ॥ अत्र
यादवः । तासांशतानिचत्वारिरश्मी
नांवृष्टिसर्ज्जने ॥ शतत्रयंहिमो-
त्सर्गेतावद्घर्मस्यसर्ज्जने ॥ आनन्दा
श्चहिमेध्याश्चनूतनापूतनाइति । च
तुःशतंवृष्टिवाहास्ताः सर्वाश्चामृ
ताःस्मृताइति ॥

सहस्रजित् । पुं० हरौ ॥ सहस्रा
ण्यसुराणांजयति । जि० । क्विप् ॥

सहस्रणीः । पुं० भीष्मे । गाङ्गेये ॥
सहस्रंरथिनोनयति० पालयति ।
णीञ्० । सत्सूद्विषेतिक्विप् ॥

सहस्रतमः । त्रि० सहस्रस्यपूरणे ॥
नित्यंशतादीतिडटस्तमडागमः ॥

सहस्रदंष्ट्रः । पुं० पाठीनमत्स्ये ॥ स
हस्रंदंष्ट्रायस्यसः ॥

सहस्रदंष्ट्री । स्त्री० पाठीने । वोदा
लमत्स्ये ॥

सहस्रदः । त्रि० बहुप्रदे ॥ सहस्रं
ददाति । डुदाञ्० । कः ॥

सहस्रदोः । पुं० कार्त्तवीर्य्यार्ज्जुने ॥
॥ सहस्रंदोषोबाहवोयस्यसः । ष
त्वस्यासिद्धत्वाद्रुत्वविसर्गौ ॥

सहस्रधारः । पुं० विष्णुचक्रे ॥

सहस्रधारा । स्त्री० देवतास्नानार्थंस
हस्रच्छिद्रयुक्तपात्रगलितजलधारा
याम् ॥ यथा । सहस्रधारयादेवी०

स्थापयामिसुरेश्वरीमिति ॥

सहस्रनयनः । पुं॰ इन्द्रे ॥ सहस्रं नयनान्यस्य ॥

सहस्रनेत्रः । पुं॰ इन्द्रे ॥ विष्णौ ॥ सहस्रंनेत्राण्यस्य ॥

सहस्रपत्रम् । न॰ कमले । पद्मे । नलिने ॥ सहस्रम्बहूनिपत्राण्यस्य ॥

सहस्रपात् । पुं॰ विष्णौ ॥ सहस्रं पादायस्य । सङ्ख्यासुपूर्वस्येति पादस्यान्तलोपः ॥

सहस्रपादः । पुं॰ कारण्डे ॥ मार्त्तण्डे ॥ यज्ञपुरुषे । विष्णौ ॥

सहस्रभित् । न॰ कस्तूर्याम् ॥ अम्लवेतसे ॥

सहस्रभुजः । पुं॰ विष्णौ ॥ कार्त्तवीर्यार्जुने ॥

सहस्रभुजा । स्त्री॰ दुर्गायाम् ॥ महालक्ष्म्याम् ॥

सहस्रमरीचिः । पुं॰ सूर्ये ॥

सहस्रमूर्द्धा । पुं॰ श्रीहरौ ॥ विष्णौ ॥ सहस्राणिअपरिमितानि मूर्द्धानोऽस्य ॥

सहस्रमूली । स्त्री॰ द्रवन्त्यामौषधौ ॥

सहस्रमौलिः । पुं॰ विष्णौ ॥ अनन्ते ॥

सहस्ररश्मिः । पुं॰ सूर्ये ॥

सहस्रवदनः । पुं॰ शेषे ॥ विष्णौ ॥

सहस्रबाहुः । पुं॰ कार्त्तवीर्यार्जुने ॥ बाणासुरे ॥

सहस्रवीर्य्या । स्त्री॰ दूर्वायाम् ॥ सहस्रंवीर्याण्यस्याः ॥ महाशतावर्याम् ॥

सहस्रवेधम् । न॰ काञ्जिकविशेषे । चुक्रे ॥

सहस्रवेधी । पुं॰ अम्लवेतसे । चुक्रे ॥ कस्तूर्याम् । न॰ रामठे । हिङ्गुनि ॥ त्रि॰ सहस्रवेधकर्त्तरि ॥ सहस्रंवेधितुंशीलमस्य । विध विधाने । सुपीतिणिनिः ॥

सहस्रशिखरः । पुं॰ विन्ध्याचले ॥

सहस्रा । स्त्री॰ अम्बष्ठायाम् ॥

सहस्रांशः । पुं॰ सहस्रतमेभागे ॥

सहस्रांशुः । पुं॰ भानौ । हंसे । तपने ॥ सहस्रमंशवोयस्य ॥

सहस्राक्षः । पुं॰ आखण्डले । इन्द्रे ॥ विष्णौ सर्व्वलोकसाक्षिणि ॥ सहस्रमक्षीण्यस्य । सहस्राण्यपरिमितान्यक्षीण्यस्य वा॰ । बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात्षच् ॥

सहस्रारः । पुं॰ न॰ शिरोवस्थिताधोमुखसहस्रदलकमले ॥

सहस्रार्च्चिः । पुं॰ विष्णौ । सूर्य्ये सहस्राण्यर्च्चींषियस्य सः । सहस्राण्यनन्तान्यर्च्चींषि भासोयस्य विश्वरूपधरस्यविष्णोरिति ॥

सहस्री । पुं॰ सहस्रसङ्ख्यसैन्ययुक्ते ।

साहस्रं ॥ सहस्रं वत्समस्यच । तपः सहस्राभ्यामिनीनौ० इतीनि : ॥ बलिनोऽपि सहस्रं चसाहस्रास्ते सहस्रिण : ॥

सहा । स्त्री० नखभेषजी । दण्डोत्पलायाम् । सहदेवायाम् ॥ सुद्गपर्ण्याम् ॥ घृतकुमार्याम् ॥ उर्व्याम् । भूमौ ॥ सहते । षह० । अच् । टाप् ॥ सेवन्त्याम् ॥ शुक्लजिण्टयाम् ॥ स्वर्णकङ्कान्याम् ॥ रास्नायाम् ॥ स्वर्णचौर्याम् ॥ तरणीपुष्पे ॥ पीतदण्डोत्पलायाम् ॥

सहाचर : । पुं० पीतझिण्टाम् । कटसारिका० कटसरैय्या० इ० भा० प्र० ॥ सहचरे ॥ सहआचरति । चर० । अच् ॥

सहाय : । पुं० चक्रवाके ॥ त्रि० सहचारिणि । अनुचरे । अभिसरे ॥ सहअयते० अयतिवा । अय० । इ गतौवा । पचाद्यच् ॥ राज्ञः सहायथा । सहस्रायतथापुष्टा : सततं प्रतिमानिता : । राज्ञासहाया: कर्त्तव्या : पृथिवीं जेतुमिच्छतेति मात्स्ये १८८ अध्याय : ॥ अपीत्तं देवीभागवतेव्यासेन । शक्तायेत्थं मतिर्दत्ताहरिणावधातिने । प्रविष्टा यपर्वविष्णु : सहाय : प्रत्यपद्यत । यथापदिसहायोऽभूद्वासुदेव : कथ्यत्र । समयेस्वजन : सर्व : सं सारेस्मिन्नराधिप : ॥ दैवेविसु खतांप्राप्तेनकोऽप्यस्तिसहायवान् । पिता माता तथा भार्या भ्राता वाथ सहोदर : ॥ सेवको वापि मित्रं वा पुत्रश्चैवतथौरस : । प्रतिकूलेगते दैवेनको प्येतिसहायतामिति ॥

सहायता । स्त्री० सहायौघे । सहायानां समूह : । गजसहायाभ्यामिति तल् ॥ साहाय्ये ॥ सहायस्यकर्म भावोवा । तल् ॥

सहायत्वम् । न० साहाय्ये ॥

सहार : । पुं० आम्रवृक्षे । रसाले ॥ महाप्रलये ॥ इतिहलायुध : ॥

सहारी । पुं० वर्णवृत्तान्तरे ॥ आद्यन्तवर्णा : पञ्चाचवर्णा : । लघ्वेकधारीत्युच्य : सहारी ॥ यथा । कंसादिकंतुं धर्मं कहेतुम् । वंदेऽब्जमाभम् इन्दीवराभम् ॥

सहारोग्य : । त्रि० नीरुजि ॥

सहित : । त्रि० सहिते । संयुक्ते ॥ सन्धीयतेस्म । डुधाञ् : क्तः । दधातेर्हि : । समोहितततयोर्वालोपः ॥ सम्यग्धिते । हितेनसहवर्त्तमाने ॥

सहिता । त्रि० सोढरि । सहमशीले ॥ सहते । षह० । तृच् । तीषसहेतिवेट् ॥

सहिष्णु : । त्रि० सहने । क्षन्तरि ।

तितिक्षौ क्षमिणि । सहनशीलः । यथा । सहते शीतोष्णादीनि । सह॰ । अलङ्कृञिति॰ इष्णुच् ॥

सहिष्णुता । स्त्री॰ क्षमायाम् ॥

सहुरिः । पुं॰ आदित्ये । दिवाकरे ॥ स्त्री॰ क्षितौ ॥ सहते । षह॰ जसिसहोरुरिन् । सहुरिः सहनशीलइतिवेदभाष्यम् ।

सहृदयः । त्रि॰ प्रशस्तचित्ते । हृदयालौ ॥ सहहृदयेन । तेनसहेतिबहुव्रीहिः । प्राणिमात्रस्यतथात्वादत्र॰ प्रशस्तपरत्वं हृदयशब्दस्य ॥

सहृल्लेखम् । न॰ विचिकित्सितान्ने ॥ यथा । विचिकित्सातुहृदयेयस्मिन्नन्ने प्रजायते । सहृल्लेखन्तु विज्ञेयं॰ पुरीषन्तुस्वभावतइति प्रायश्चित्तविवेकः ॥

सहोक्तिः । स्त्री॰ अर्थालङ्कारविशेषे ॥ यथा । सासहोक्तिः सहार्थस्यबलादेकंद्विवाचकम् । एकार्थाभिधायकमपिसहार्थबलादुभयस्यावगमकंसासहोक्तिः ॥ यथा । सह॰ दिअस॰णिसाहिं॰ दीहरा॰ सासदण्डा॰सहमणिवलएहिं॰ बाहधारा॰ गलन्ति । सुहअ॰ तुह॰ विओए॰ उव्वेअणाए॰ सोहअतणुलदाए॰ दुव्वला॰ जीविदासा ॥ अस्यसंस्कृतन्तु । सहदिवसनिशाभिर्दीर्घाः श्वासदण्डाः॰ सहमणिवलयैर्बाष्पधारागलन्ति । सुभग॰ तववियोगे॰ तस्याः॰ उद्वेगशीलायाः॰ सहच॰ तनुलतायाः॰ दुर्बला॰ जीविताशेति ॥ दूत्यानायकंप्रतीयमुक्तिः । श्वासानांघनप्रचुरतयादण्डत्वेननिरूपणम्॰ काश्यान्मणिकङ्कणगलनम्॰ आशायादुर्बलत्वंकादाचित्कत्वम् । श्वासदण्डादिगतंदीर्घत्वादिशब्दंदिवसनिशादिगतन्तु॰ सहार्थसामर्थ्यंतत्प्रतिपद्यते । अत्रसहोक्तिरलङ्कारः । अपिच । सहोक्तिः सहभावश्चेद्भासतेजनरञ्जन । दिगन्तमगमत्तस्यकीर्त्तिः प्रत्यर्थिभिः सहेति ॥ लक्षणान्तरमपि । सहार्थेनान्वयोयत्रभवेदतिशयोक्तितः । कल्पितौपम्यपर्यन्तासासहोक्तिरिहोच्यतइति ॥

सहोटजः । पुं॰ मुनीनांपर्णशालायाम् । पर्णोटजे । यथा । मुनीनामुचिताकुर्यांपर्णोटजसहोटजाविति हारावली ॥

सहोढः । पुं॰ द्वादशपुत्रान्तर्गतपुत्रविशेषे ॥ यथा । यागर्भिणीसंस्क्रियतेज्ञाताज्ञातापिवासती । वोढुः सगर्भोभवतिसहोढइतिचोच्यतइतिमनुः ॥ संस्क्रियते॰ प

रिणीयति । अहायादेश्चयम् ॥ स
हि । ह्यतेस्म । बहु० । क्त : सम्प्रसा
रणम् । गुण : ॥ त्रि० कठेनसह
वर्त्तमाने ॥

सहोत्थ : । पुं० तृतीयभंगे ।

सहोदर : । पुं० सहजे । सोदरे भ्रा
तरि ॥ सहउदरेण वर्त्तते । वोप
सर्जनस्य ॥ सह० समानम्० उ
दरं यस्येति वा ॥

सहोर : । त्रि० साधुनि ॥ सहते ।
षह० । किशोरादयश्चेतीरन् ।

सह्य : । पुं० मलयाद्रिसमीपवर्त्ति
निशैलविशेषे । न० आरोग्ये ॥
साम्ये । त्रि० सहनीये । सोढ
व्ये । सुमधुरे ॥ सह्यते० सोढुं
शक्यो वा । षह० । शकिसहोश्चे
तियत् ॥ गोदावरीभीमरथीकृष्णा
वेण्यादिकास्तथा । सह्यपादोद्भवा
नद्य : स्मृता : पापभयापहा : ॥

सा । स्त्री० लक्ष्म्याम् ॥ दुर्गायाम् ॥

सांयात्रिक : । पुं० पोतवणिजि । व
हित्रगामिनि वणिग्जने ॥ संयात्रा
द्वीपान्तरगमनाय सम्भूय यात्रा सा प्र
योजनमस्य । तदस्य प्रयोजनमिति
ठञ् ॥

सांयुगीन : । त्रि० रणोत्सुके । युद्ध
कुशले ॥ संयुगे रणे साधु : । प्रति
जनादिभ्य : खञ् ॥

सांराविणम् । अ० न० समन्तात्छब्दे
। हट्टशब्दध्वनौ ॥ संहूतौ ॥

सांवत्सर : । पुं० गणके ॥ अस्यलक्ष
णमाह वराहमिहिर : । तत्र सांवत्स
रोऽभिजात : प्रियदर्शनो० विनी
तवेश :० सत्यवागनसूयक :० स
म० सुसंहितोपचितगात्रसन्धिरवि
कलश्चार० करचरणनखनयनचिबु
कदशनश्रवणललाटभ्रूत्तमाङ्गो वपु
ष्मान् गम्भीरोदात्तघोष :० प्राय शरी
राकारानुवर्त्तिनो हि गुणा दोषा
श्च भवन्ति ॥ १ ॥ तत्र गुणा : शुचि
र्दक्ष : प्रगल्भो वाग्मी प्रतिभानवा
न् देशकालवित् सात्त्विको न परिषद्भी
रु : सहाध्यायिभिरनभिभवनीय :
कुशलोऽव्यसनी शान्तिकपौष्टिका-
भिचारस्नानविद्याभिज्ञो विबुधार्च्च
नव्रतोपवासनिरत : स्वतन्त्राश्चर्यो
त्पादितप्रभाव : पृष्टाऽभिधाय्यन्यत्र
दैवात्ययात् ग्रहगणितसंहिताहोरा-
ग्रन्थार्थवेत्ता ॥ २ विशेषोऽपरोऽस्यां
सांवत्सरसूत्रे द्रष्टव्य : ॥ संवत्सरं
वेत्ति । तदधीते तद्वेदेत्यण् ॥ न०
फले ॥ पर्व्वणि ॥ सन्धिवेलादिपु०
संवत्सरात्फलपर्व्वणोरिति शैषिको
ऽण् ॥

सांवत्सरिक : । त्रि० संवत्सरसम्बन्धि
नि ॥ कालाट्ठञिति शैषिके त्वर्थे
ठञ् ॥ संवत्सरं व्याप्य भूते ॥ प्रतिव
र्षं कर्त्तव्ये श्राद्धादिकर्म्मणि ॥

सांवर्त्तक: । पुं॰ प्रलयाग्नौ ॥ प्रलय कर्त्तरि ॥

सांसाद्रिक: । पुं॰ गेयाविशेषे ॥ वृ॰ अ॰ धर: ॥

सांशयिक: । त्रि॰ संशययुक्ते । संश यापन्नमानसे । सन्दिग्धे ॥ संश यमापन्न: । संशयमापन्नइतिठ क् ॥

सांसर्गिक: । त्रि॰ संसर्गनिमित्ते ॥

सांसारिक: । त्रि॰ संसारसम्बन्धिनि ॥ सांसारिकसुखासक्तं ब्रह्मज्ञोस्मी तिवादिनम् । कर्मब्रह्मोभयभ्रष्टं तं त्यजेदन्त्यजं यथा ॥

सांसिद्धिक: । पुं॰ अणिमादिगुणविशेषे ॥ यथा । विशिष्टधर्मसंस्कारसमुद्भूतेपि तच्चेतसाम् । गुण: सांसिद्धिको भातिदेहापायेपिपूर्ववत् ॥ विशिष्टे नेष्टापूर्तादिधर्मसंस्कारेणसम्यगुद्भू तेपितंप्रतिचितंचेतोयेषांतेषांनपरंदेह संयोगे॰ यावद्देहापायेपिप्रागुक्तो गुण: प्रकाशतेससांसिद्धिकोनाम- बोद्धव्य: ॥ सम्यक्सिद्धि: संसि द्धि: । तत्रभव: । ठक् ॥

सांसिद्धिकी । स्त्री॰ प्रकृतौ यथा योगिनांसिद्धानामणिमाद्यैश्वर्यं- प्राप्तिप्रकृति: । सांसिद्धिकीस्वा भाविकीसहजाप्रकृतायथा । प्रकृ ति: सैतिविज्ञेयास्वभावंनजहाति या ॥

सांख्यानिक: । त्रि॰ समीचीनस्याभि व्यवहर्त्तरि । संख्यानैर्व्यवहरति । कठिनान्तेतिठक् ॥

सांहितिक: । त्रि॰ संहिताभिज्ञे ॥ संहितामधीतेवेदवा । क्रतूक्था दीतिठक् ॥

साकम् । अ॰ सहार्थे ॥ सहवचन म् । अमप्रत्यय: ॥ सहस्येतिस: । आभीचण्यंणमुल्वा ॥

साकमप्रस्थाप्य: । पुं॰ यागविशेषे ॥ साकम्प्रस्थाप्येनयजेतपशुकाम: ॥

साकल्यम् । न॰ अशेषतायाम् ॥ स कलस्यभाव: । ष्यञ् ॥

साकार: । त्रि॰ आकारविशिष्टे ॥ यथा साकारमनन्तं विद्धि । साका रापिनिराकारामाययाबहुरूपिणी तिच ॥ अपिच । साकारञ्चनिराकारं सगुणंनिर्गुणंप्रभुम् । सर्वाधारञ्च सर्वञ्चस्वेच्छारूपंनमाम्यहमिति ॥

सकुरुण्ड: । पुं॰ वृक्षविशेषे । यन्थि फले: कबुरफले ॥

साकेतम् । न॰ अयोध्यायाम् ॥

साक्तुक: । पुं॰ यवे ॥ सक्तुषुसाधु: । गुडादिभ्यष्ठञ् ॥ न॰ सक्तूनां समूहे ॥ अचित्तहस्तिधेनोष्ठक् ॥

साचर: । त्रि॰ अचरयुक्ते ॥

साचात् । अ॰ प्रत्यक्षे ॥ यथासाचा दृष्टा । सह॰ अचि॰ साच: । तमत ति । क्विप् ॥ तुल्ये ॥ यथासाचा

लक्ष्मीः तुल्यार्थैः साक्षाच्छब्दयोगे। तुल्यार्थैरतुलोपमाभ्यामिति। तृतीयाप्रयोगतश्चित:। साक्षाल्लक्ष्मीरित्यादिप्रथमान्तप्रयोगेतु। प्रत्यक्षार्थकएवप्रतिभाति। लक्ष्म्याःसाक्षादिति। लक्ष्म्यातुल्यैतिवत्। लक्ष्मीसाक्षादितिभवतिच

साक्षात्कारः। पुं। इन्द्रानीमित्यमेयस्य परीक्षाने॥ प्रत्यक्षकरणे॥ साक्षात्करणम्। कृञोघञ्॥

साक्षी। त्रि। प्रत्यक्षदर्शने। दृष्टं॥ साक्षादिन्द्रियार्थसन्निकर्षं विनैवेक्षतेपश्यतिप्रकाशयतीति। निर्विकारे। आत्मनि॥ स्वप्रकाशज्ञानमात्रस्वरूपोप्यात्माऽविद्योपहितः सन्। साक्षीत्युच्यते। यथा बुद्ध्यादिविकाराः। मर्त्त्यादिक्रियाः। स्त्रीसाक्षितोऽविकारिणः धीविक्रियासहस्राणां साक्ष्यतोहमविक्रियइति॥ यथा। नेनस्वरूपबोधेनपश्यतिसर्वमितिसाक्षी। वृत्तिव्यवधानमन्तरेणस्वाध्यस्तं सर्वं स्वरूपचैतन्येनपश्यतीत्यर्थः। साक्षाद्द्रष्टरिसंज्ञायामिति। इनिः॥ शून्यवादिभिरपिशून्यसिद्धयेसाक्ष्यभ्युपेय। किमुवक्तव्यमितरैरस्याद्। प्रत्यक्षसाक्ष्यतिरेकेणमाभावोपिप्रसिद्धाति। किमुभावोजगत्यस्मिन्साक्षीचानन्यसिद्धिकः। अभावोपि।

शून्यमपीत्यर्थः॥ पुरैपौराणपश्यन्नरयुवतिनामाकृतिमयान्सुवेशान्स्वर्णालङ्करणकलितांश्चित्रसदृशान्। स्वयंसाक्षीद्रष्टेत्यपिचकलयंस्तैःसहरमन्मुनिर्व्यामोहंभजतिगुरुदीक्षाक्षततमः॥ साक्षाद्द्रष्टरि। सर्वप्राणिनांसाक्षाच्छुभाशुभद्रष्टरि॥ चेतनत्वेनाविषयत्वेनचसाक्षित्वंद्रष्टृत्वञ्च। चेतनोहिद्रष्टाभवति। यस्मैप्रदर्श्यतेविषयःससाक्षी॥ तथालोके। अर्थिप्रत्यर्थिनौ। विवादविषयंसाक्षिणोदर्शयतः। एवंप्रकृतिरपिस्वचरितंविषयंपुरुषायदर्शयतीतिपुरुषःसाक्षी। नचाचेतनोवा। विषयोवा। शक्योविषयंदर्शयितुमिति। चैतन्यादविषयत्वाच्चभवतिसाक्षी। अतएवद्रष्टापिभवतीतिसाङ्ख्यविदः॥

साक्ष्यम्। न। साक्षिकर्म्मणि॥ यथा। समक्षदर्शनात्साक्ष्यंश्रवणाच्चैवसिद्ध्यतीतिमनुः॥

साख्यम्। न। सख्ये।

सागरः। पुं। समुद्रे। अब्धौ। सगरपुत्रैःखातेजलाशये॥ सगरस्यायम्। सगरेणावतारितत्वात्। तस्येदमित्यण्॥ क्षीरोदादिव्यपमयासागरव्यपदेशइतिवृद्धाः॥ मृगविशेषे॥ दशपद्मस

ङ्ख्यायाम् ॥

सागरगा । स्त्री॰ नद्याम् ॥

सागरगामी । त्रि॰ सिन्धुगे । समुद्रयायिनि ॥

सागरगामिनी । स्त्री॰ नद्याम् ॥ सूक्ष्मैलायां ॥

सागरनेमि :) पुं॰ पृथिव्याम् ॥
सागरमेखला :) स्त्री॰

सागरोनेमिर्मेखलावायस्या : ॥

सागरानूप: । पुं॰ समुद्रतीरप्रदेशे ॥ सागरस्यानूप : ॥

सागराम्बरा । स्त्री॰ धरायाम् । धरित्र्याम् ॥ सागरोऽम्बरं वस्त्रम् यस्या : ॥

सागरालय : पुं॰ अप्पती । वरुणे ॥

सागरोत्थम् न॰ समुद्रलवणे । त्रि॰ सिंधुजे ॥

सागुरु : । पुं॰ शिंशपायां ॥

साग्र : । त्रि॰ अग्रेणसहिते ॥

साङ्कर्य्यम् । न॰ सङ्करतायाम् ॥ जातिसाङ्कर्यम् ॰ पङ्क्तिसाङ्कर्यमिति । तत्र पङ्क्तिसाङ्कर्यदोषा यथा । नसंशयेत्पतितैर्नचाण्डालैर्न पुक्कसै : । नमूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभि : ॥ एकशय्यासनं पङ्क्तिभाण्डपक्वान्नमिश्रणम् । याजनाध्यापने योनिस्तथैव सहभोजनम् ॥ सहाध्यायस्तु दशम : सहयाजनमेव च । एकादशसमुद्दिष्टा दोषा : साङ्कर्यसंज्ञिता : ॥ समीपे चाप्यवस्थानात्पापं संक्रमते नृणाम् । तस्मात्सर्वप्रयत्नेन साङ्कर्यं परिवर्जयेत् ॥ पङ्क्तिसाङ्कर्यदोषवारणोपाया यथा । एकपङ्क्त्युपविष्टा ये न स्पृशन्ति परस्परम् । भस्मना कृतमर्यादा न तेषां सङ्करो भवेत् ॥ अग्निना भस्मना चैव सलिलेन विशेषत : । द्वारेण स्तम्भमार्गेण षड्भि : पङ्क्तिर्विभिद्यत इति कूर्मे १५ अध्याय : ॥

साङ्काश्यम् । न॰ नगरविशेषे ॥ सङ्काशेन निर्वृत्तं नगरम् । सङ्काशादिभ्योण्य : ॥

साङ्कृति : । पुं॰ मुनिविशेषे । वैयाघ्रपद्यगोत्रप्रवरे ।

साङ्ख्य: । पुं॰ कपिलमुनिकृतदर्शनविदि कापिले ॥ सङ्ख्यां प्रकुर्वते चैव प्रकृतिञ्च प्रचक्षते । तत्त्वानि चतुर्विंशत्तेन साङ्ख्या: प्रकीर्त्तिता : ॥ औपनिषदे पुरुषे ॥ सम्यक्ख्यायते॰ सर्वोपाधिशून्यतया प्रतिपाद्यते॰ परमात्मतत्त्वमनयेति॰ सङ्ख्या॰ उपनिषद्॰ तयैवतात्पर्यं परिसमाप्त्या प्रतिपाद्यते य : साङ्ख्य : । स औपनिषद : पुरुष एव । सन्यासे । सङ्ख्या सम्यगात्मबुद्धि : ॰ तां वहतीति॰ ज्ञानान्तरङ्गसाधनतया स साङ्ख्य : ॰ स च सन्यास : ॥ न॰ वेदान्तशास्त्रे ॥ निरतिशयपुरुषार्थं प्राप्त्यर्थं सर्वा

मथं विवस्थं स्वख्यातव्याः जीवो ब्रह्म तयोरैक्यं तद्बोधोपयोगिनश्च श्रवणाद्यः पदार्थाः तेसङ्ख्यायन्ते व्युत्पाद्यन्तेऽस्मिन् ॥ आत्मज्ञाने ॥ शुद्धात्मतत्त्वविज्ञानं साङ्ख्यमित्यभिधीयते इति व्यासस्मृतिः ॥ ज्ञानशास्त्रे षड्दर्शनान्तर्गतदर्शनविशेषे । कापिले ॥ पञ्चमः कपिलो नाम सिद्धेशः कालविप्लुतम् । प्रोवाचासुरये साङ्ख्यं तत्त्वग्रामविनिर्णयम् ॥ इति श्रीभागवतम् ॥ साङ्ख्यं सङ्ख्यात्मकत्वाच्च कपिलादिभिरुच्यते । इति मत्स्यपुराणम् ॥ सम्यक् ख्यायते प्रकाश्यते वस्तुतत्त्वमनयेति सङ्ख्या सम्यग्ज्ञानं तस्यां प्रकाशमानमात्मतत्त्वं साङ्ख्यमिति श्रीधरस्वामी ॥ अपि चाहुः । साङ्ख्यं हि कपिलमुनिना संसारविमुक्तिकारणं प्रोक्तम् । एताः सप्ततिरार्या भाष्यञ्चाप्यत्र गौडपादकृतम् ॥ एतत् पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ । आसुरिरपि पञ्चशिखाय तेन च बहुधा कृतं तन्त्रम् । शिष्यपरम्परयागतमीश्वरकृष्णेन चैतदार्याभिः । सङ्क्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धान्तम् ॥ सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य । आख्यायिकाविरहिताः परवादविवर्जिताश्चापि ॥ इति साङ्ख्यप्रवचनभाष्यम् ॥ अस्याध्ययने प्रारम्भशुद्धिमाह कालिदासो यथा । चिदुम्भोश्रवोयुग्मभैः सद्ग्रहाणां समारञ्जितं साङ्ख्यशास्त्रादिशास्त्रम् । मृदुक्षिप्रशम्भूङ्शम्भूङ्युक्तैर्दिने प्वैवतद्बोधसिद्धिं तनोतीति ॥

साङ्ख्यमतम् । न० षष्टितन्त्रादौ ॥ साङ्ख्यानां मतम् ॥ यथा । त्रिगुणं यत्प्रधानं तत्पुरुषार्थेन हेतुना । प्रवर्त्ततेवासनात्त्वकर्तृ प्रि० स्तच्चेतिकापिलाः ॥ नान्तःकरणमेवात्मा किन्त्वन्यः सर्वगतः स्वप्रकाश० सुखभोगापवर्गानुगुण्येन हेतुना यत्प्रधानरक्तितदात्मनैव स्थितमन्तःकरणं तत् सधर्म्मकं प्रवर्त्तते तदेश्रुत्यावासनात्वैनोच्यत इति वदन्तीत्यर्थः ॥

साङ्ख्ययोगः । पुं० चिन्तनविशेषे । निदिध्यासनपूर्वभाविना श्रवणमननरूपेण नित्यानित्यविवेकादिपूर्वकेण इमे गुणत्रयपरिणामाश्चानात्मनः सर्वे मिथ्याभूताः तत्साक्षीभूतो नित्यो विभुर्निर्विकारः सत्यः समस्तजडसम्बन्धशून्य आत्माहमित्येवं वेदान्तवाक्यविचारजन्ये चिन्तने ॥

साङ्गः । त्रि० अङ्गसहितः ॥ अङ्गेन अङ्गैर्वा सहितः ॥

साङ्गतिकः । त्रि॰ लौकिकेषु विचित्रपरिहासकथादिभिः सङ्गत्याश्रयार्थिनि । सङ्गतीभवे ॥

साङ्गमः । पुं॰ सङ्गमे ॥

साङ्गुष्ठा । स्त्री॰ गुञ्जायाम् ॥

साङ्गोपाङ्गः । त्रि॰ सम्पूर्णे ॥ अङ्गोपाङ्गैः सहितः ॥

साङ्ग्रहसूत्रिकः । त्रि॰ सङ्ग्रहसूत्राभिज्ञे ॥ सङ्ग्रहसूत्रमधीते॰ वेद वा । क्रतूक्थादिसूत्रान्ताट्ठक् ॥

साङ्ग्रहिकः । त्रि॰ सङ्ग्रहाभिज्ञे ॥ उक्थादित्वात् ठक् ॥

साङ्ग्रामिकः । त्रि॰ सङ्ग्रामोपयोगिरथादौ ॥ सङ्ग्रामे साधुः ॥ गुडादिभ्यष्ठञ् ॥

साङ्घट्टिकः । त्रि॰ सङ्घट्टज्ञे ॥ सङ्घट्टं वेद । उक्थादित्वाट्ठक् ॥

साङ्घातिकः । त्रि॰ मारात्मके ॥ अस्मभात् पीडनेन घाते ॥ सङ्घाते साधुः । गुडादिभ्यष्ठञ् ॥

साचि । अ॰ वक्रे । तिरोऽर्थे । तिर्यगर्थे ॥ सचनम् । अवसमशाये । इञजादिभ्यः ॥

साचिशाटिका । स्त्री॰ श्वेतपुनर्नवायाम् ॥

साचिव्यम् । न॰ साहाय्ये ॥ सचिवस्य कर्म भावो वा । ष्यञ् ॥

साञ्जनः । पुं॰ कृकलासे ॥

साटोपः । त्रि॰ ससम्भ्रमे ॥

साट्टः । त्रि॰ । साग्ने ॥

सातत्यम् । न॰ अविच्छिन्नतयावर्त्तमाने । सततस्य भावः । ष्यञ् ।

सातवाहनः । पुं॰ शालिवाहननृपे ॥

सातिः । स्त्री॰ दाने ॥ अवसाने । समापने सननम्॰ सानम् । अमुदाने॰ षोऽन्तकर्मणि क्तिन् । ऊतियूतीत्यादिना॰ इतेरीत्वाभावो निपात्यते । सनोतेर्वा॰ जनसनखनेत्यात्वम् । सनुताद्वा । क्तिच् क्तौ चेति क्तिच् ॥

सातिसारः । त्रि॰ अतिसाररोगयुक्ते । अतिसारकिणि ॥ सह अतिसारेण वर्त्तते ॥

सातीनकः । पुं॰ कलाये । सतीनक एव । प्रज्ञाद्यण् ॥

सात्म्यः । त्रि॰ हिते ॥

सात्त्यः । त्रि॰ सत्यशीले । सत्यंशीलमस्य । छत्रादिभ्योणः । स्त्रियां॰ तास्त्रीनिकेणपीति॰ ङीपि॰ हलस्तद्धितस्येति यलोपे॰ सात्ती॰ । सांचो॰ दू॰ भा॰ ॥

सात्यकिः । पुं॰ पार्थशिष्ये । युयुधाने ॥

सात्वतः ।) सात्वतेयः ।) पुं॰ माठरे । बादरायणे । वेदव्यासे ।

सात्वान् । त्रि॰ उपासके ॥ भगवद्भक्ते ॥ सच्छब्देन॰ सत्त्वमूर्त्तिर्भ॰म

वान्‌ । सत्त्वगुणयुक्तवाविद्यतेयस्य । मतुप्‌ । स्वार्थेऽण्‌ । वृद्धिः । आर्षत्वाद्‌णोऽभावः । यथा । सूतजानासिभद्रन्ते भगवान्‌सात्वतांपतिरिति ॥ सात्वतंनामतन्त्रम्‌ । तत्करोतितदाचष्टइतिणिचि कृते । क्विप्‌ चेति क्विप्‌प्रत्ययेटेरिति टिलोपे कृतेपदं सात्वदिति सात्वतांपतिरितिनामभाष्यम्‌ ॥ तथाच । सात्वतांसात्वततन्त्रमाचक्षाणानांपतिः पालकइतिव्याख्येयम्‌ ॥

सात्वतः । पुं । कामपाले । मधुप्रिये । बलदेवे । रामे । हरौ । हिमाङ्के । श्रीकृष्णे ॥ इत्यादि । उपासके । भगवद्भक्ते ॥ यथोक्तंपाद्मे उत्तरखण्डे : सत्त्वंसत्त्वाश्रयंसत्त्वगुणंसेवेतकेशवम्‌ : योऽनन्यत्वेन मनसासात्वतसमुदाहृतः ॥ विहायकाम्यकर्मादीन्‌भजेदेकाकिनं हरिम्‌ । सत्यंसत्त्वगुणोपेतोभक्त्यातंसात्त्वतंविदुः ॥ मुकुन्दपादसेवासंतन्नाममन्त्रपरोपिच । कीर्त्तनेचरतोभक्तोनाम्नः स्मरणे हरेः । वन्दनाचनयोभक्तिरनिशंदास्यसख्ययोः । रतिरात्मार्पणेयस्यदृढानन्तस्यसात्त्वतः । इति ९९ अध्यायः ॥ सत्त्वत्वाद्‌स्वार्थिकः : प्रधान । विजन्मनि । सुधन्वाचा-

र्ये । यादवे ॥ सत्त्वतोपत्यंपुमान्‌ उत्सादिभ्योऽञ्‌ ॥ पुंभूम्नि । देशविशेषे ॥ यथा । यदवस्तुदशार्हाः सात्वताः कुकुरान्धकाः इति त्रिकाण्डशेषः ॥ न । पञ्चरात्रतन्त्रे ॥

सात्त्वततन्त्रम्‌ । न । वैष्णवतन्त्रे ॥ पञ्चरात्रागमे ॥ सात्त्वतानाम भगवदुपासकानांतन्त्रम्‌ ॥

सात्वतसंहिता । स्त्री । महापुराणेश्रीभागवते । यस्यां वै श्रूयमाणायांकृष्णे परमपूरुषे । भक्तिरुत्पद्यते पुंसः शोकमोहभयापहा ॥

सात्वती स्त्री । शिशुपालमातरि । कृष्णस्यपितृष्वसरि । सात्वतोऽपत्यंस्त्री । उत्सादिभ्योऽञ्‌ । ङीप्‌ ॥ नाट्यवृत्त्यन्तरे ॥

सात्वतीसूनुः । पुं । चैद्ये । शिशुपाले ॥

सात्त्विकः । पुं । ब्रह्मणि । विधातरि ॥ विविधभावान्तर्गतभावविशेषे ॥ तल्लक्षणंयथा । सत्त्वोत्कटेमनसियेप्रभवन्तिभावास्तेसात्त्विकाइतिविदुर्मुनिपुङ्गवास्ते ॥ तेयथा । स्तम्भः स्वेदोथरोमाञ्चः स्वरभङ्गोथवेपथुः । वैवर्ण्यमश्रुप्रलयइत्यष्टौसात्त्विकागुणाः ॥ प्रलयोमूर्छा ॥ यथान्तरे ॥ यथा । अफलाकाङ्क्षिभिर्यज्ञोविधिदृष्टोय

दृश्यते । यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥ आहारप्रभेदे । यथा । आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्द्धनाः । रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ॥ सत्त्वगुणप्राधान्येन स्थितः ॥ नगण० ॥१० ॥ त्रि० सत्त्वगुणाढ्ये ॥ सत्त्वेन मानोद्धृत्या निर्वृत्तः ॥ तेन निर्वृत्तमिति ठञ् ॥ सत्त्वभवो वा । अध्यात्मादित्वात् ठञ् वा ॥

सात्त्विकधनम् । न० शुद्धधने ॥ यथा । श्रुतशौर्यतपःकन्याशिष्ययाज्यान्वयागतम् । धनं सप्तविधं शुद्धं मुनिभिः समुदाहृतम् ॥ श्रुतेनाध्ययनेन शौर्येण जयादिना कन्यागतं कन्यया सहागतं श्वशुरादेर्लब्धम् शिष्यागतं गुरुदक्षिणादिना याज्यागतं आर्त्विज्यलब्धम् अन्वयागतम् दायादिभ्यो लब्धम् शुद्धं सात्त्विकमित्यर्थः ॥

सात्त्विकी स्त्री० दुर्गायाम् ॥ पूजाविशेषे । यथा । शारदीयं चण्डिकापूजा त्रिविधा परिगीयते । सात्त्विकी राजसी चैव तामसी चेति तत् शृणु । सात्त्विकी जपयज्ञाद्यैर्नैवेद्यैश्च निरामिषैः । माहात्म्यं भगवत्याश्च पुराणादिषु कीर्त्तितम् । पाठस्तस्य जपः प्रोक्तः पठेद्देवीमनास्तथे

ति ॥ देवीप्रकृतौ ॥

सादः । पुं० सन्नतायाम् । अवसादे ॥ सदनम् । षद्लृ० । घञ् ॥ कार्श्ये । कृशत्वे ॥ यथा । शरीरसादादसमग्रभूषणेति रघुः ॥

सादनम् । न० गृहे । सदने ॥ स्वार्थे ण्यन्तात् सदेर्ल्युट् ॥ मज्जने ॥

सादनी । स्त्री० कटुक्याम् । रक्ताङ्गाम् ॥ ङीप् ॥

सादिः । पुं० सारथौ ॥ योधे । योद्धरि । सीदति । षद्लृ० । वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ् ॥ त्रि० सादियुते ॥

सादितः । त्रि० स्तम्भिते । विध्वस्तीकृते ॥

सादी । पुं० अश्वारोहे । अश्ववार० इ०भा०प्र० । मातङ्गारोहे ॥ रथारोहे ॥ अवश्यं सीदति सादयति वा । षद्लृ० । आवश्यके णिनिः । ग्रह्यादिः ॥

सादृश्यम् । न० उपमायाम् । तुल्यत्वे । सदृशत्वे । तद्भिन्नत्वे सति तद्गतभूयोधर्म्मवत्त्वे ॥ यथा । चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वादिमत्त्वं मुखे चन्द्रसादृश्यम् । तत्पर्यायो यथा । तमन्वेत्यनुबध्नाति तच्छीलं तत् निषेधति । तस्य चानुकरोतीति शब्दाः सादृश्यवाच

का : इति दृग्डौ ॥ सदृशस्य भावः : गुणवचनब्राह्मणादिभ्यः ष्यञ् ॥ स्त्रियां षित्त्वात् ङीषि॰ सादृशी ॥ ष्यञः षित्करणादीकारो बहुलमिति वामनसूत्राद्वैकल्पिकः ॥

साद्धान्तः । पुं॰ राद्धान्ते ॥

साद्यस्कः । पुं॰ सोमयागविशेषे ॥

साधकः । त्रि॰ साधनकर्त्तरि । निष्पादके ॥ अवगाद्यनुष्ठातरि ॥ साध्नोति । साधसंसिद्धौ ण्वुल् ॥ पुं॰ पुत्रजीवद्रुमे ॥ षष्ठतारायाम् ॥

साधकतमम् । न॰ करणे । क्रियासिद्धौ प्रकृष्टोपकारके ॥ हेतौ ॥ त्रि॰ अतिशयसाधके । अतिशायने तमप् ॥ प्रकृष्टं साधकं साधकतमम् ॥

साधनम् । न॰ करणकारके ॥ साध्यते॰ कर्म निष्पाद्यतेऽनेन । साध॰ । ल्युट् ॥ मृतसंस्कारे । सैन्ये ॥ सिद्धौषधौ ॥ गतौ ॥ निवर्त्तने । निवृत्तौ । उपाये ॥ साध्यमुद्दिश्य साधनं निरूप्यते ॥ मेढ्रे ॥ दापने ॥ अनुगमे । धने ॥ मारणे । वधे । प्रमाणे ॥ मैत्रे ॥ मोहने ॥ जवे । वेगे ॥ मन्त्रसिद्धिकरणे ॥ सिद्धौ ॥ मोक्षसाधकोपायविशेषे । साधनचतुष्टये ॥ यथा । नित्यानित्यवस्तुविवेकः॰ इहामुत्रार्थफलभोगविरागः॰ शमदमादिषट्कसम्पत्तिः॰ मुमुक्षुत्वञ्चेति ॥ साध॰ । भावकर्मकरणादौ ल्युट् ॥ साधयति वा । नन्द्यादित्वाल्ल्युः ॥ तपसि । यथा । तपोभिः प्राप्यतेभीष्टं नासाध्यं हि तपस्यतः । दुर्भगत्वं तथा लोको वहते सति साधने ॥ अल्पसाधनैरधिकारम्भो न सुकरः ॥

साधननिर्मुक्तः । त्रि॰ साधनाभ्यासरहिते ।

साधना । स्त्री॰ आराधनायाम् ॥

साधनाव्यापकत्वम् । न॰ साधनवन्निष्ठात्यन्ताभावप्रतियोगितायाम् ॥

साधनीयः । त्रि॰ साध्ये ॥

साधन्तः । त्रि॰ भिक्षुके । साध्नोति । साध॰ तृभूवहिवसोत्यादिना॰ झच्॰ षित् ॥

साधयन्ती । स्त्री॰ मांसिक्षायाम् ॥

साधर्म्यम् । न॰ समानधर्म्मत्वे ॥

साधर्म्यवैधर्म्यसमौ । पुं॰ न्यायमते जातिविशेषलक्षणे ॥ यथाह गौतमः । साधर्म्यवैधर्म्याभ्यामुपसंहारे तद्धर्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ । २ ॥ उदाहरणे साध्यस्योपसंहरणे॰ वादिनाकृते॰ तद्धर्म्मस्य साध्यरूपधर्म्मस्य योऽविपर्ययो व्यतिरिक्तस्य साधर्म्यवैधर्म्याभ्यां विरुद्धाभ्यामापत्त्यनपि साध्याविद्युपपादनं ततो हेतोः साधर्म्यवैधर्म्यसमावुच्येते । तदयमर्थः ।

वादिना अन्वयेन व्यतिरेकेण वा साध्ये साधिते प्रतिवादिना साधर्म्येणाप्रयोजकहेतुना तदभावापादनं साधर्म्यसमा । वैधर्म्येणाप्रयोजकहेतुना तदभावापादनं वैधर्म्यसमा । तत्र साधर्म्यसमा यथा । शब्दोऽनित्यः कृतकत्वात् घटवत् व्यतिरेकेण वा व्योमवत् इत्युपसंहृते नैतदेवम् यद्यनित्यघटसाधर्म्यादनित्यः आकाशवैधर्म्याद्वाऽनित्यः स्यात् नित्याकाशसाधर्म्यादमूर्त्तत्वान्नित्यः स्यात् इति । वैधर्म्यसमा यथा । शब्दोऽनित्यः कृतकत्वात् घटवत् अकार्यवृत्तित्वादनाशित्वम् अनित्यघटवैधर्म्यादमूर्त्तत्वान्नित्यः अनयोश्च दूषणम् अत्र साधर्म्यत्वमात्रं वैधर्म्यत्वं च न गमकतौपयिकमित्यसमानतन्त्रप्रतिपन्नदेशनाम इत्येतेऽनैकान्तिकादिशब्दाभारीतिवाक्ति केतुअनैकान्तिकपदद्वयेगात् एतत् प्रतिपाद्यपरम् । एकान्तः साध्यसाधकत्वाऽभावात् ॥

साधारणः । पुं॰ वस्तुविशेषः ॥ स तु फलं यथा । तोयपूर्णा भवेन्मेघा वर्षन्त्येव दिने दिने । निरुपद्रवास्सर्वत्र राजानः सर्वसाधारणे प्रिये । ४४ ॥ आह्लादनपूतपत्रसम्पन्नदेशे । यथा । मिथ्याविज्ञस्तु यो देशः सहि साधारणः स्मृतः । तस्मिन् देशे य उदकं तत्तु साधारणं स्मृतम् ॥ साधारणाम्बु मधुरं दीपनं शीतलं लघु । तर्पणं रोचनं तृष्णादाहदोषत्रयप्रणुत् ॥ त्रि॰ समानः । अनेकसम्बन्धिन्येकस्मिन् । सामान्ये ॥ अनेकसाधिकवस्तुनि ॥ यथा । साधारणं समाश्रित्य यत् किञ्चिद्दाहमायुषम् । शौर्यादिना प्रोतिधनं भ्रातारस्तत्र भागिनः ॥ सर्वे । तत्तदितरमनुष्याश्च ते ॥ सहसाधारणो नरः मे । वीरसज्जनस्तोति ॥ स भावः । अन्नोऽसाधारणाश्चामितिवृद्धोऽसत् ॥ साधनसंसिद्धेः । आरणीनदकाकुलः ॥ स्त्रियां साधारणी ॥ हेत्वाभासविशेषे ॥ यथा । अनैकान्तो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः । कालात्ययापदिष्टश्च हेत्वाभासास्तु पञ्चधा ॥ आद्यः साधारणस्तु स्यात् असाधारणकोऽपरः । तथैवानुपसंहारी त्रिधानैकान्तिको भवेत् ॥ यः सपक्षे विपक्षे इसतु साधारणो मतः । यस्तूभयस्माद्व्यावृत्तः स त्वसाधारणो मतः ॥ तथैवानुपसंहारी केवलान्वयिपक्षकः ॥

साधारणत्वम् । न॰ असाधारणभिन्नत्वे ॥

साधारणधर्म्मः । पुं॰ चतुर्वर्णधर्म्म

र्त्तव्ये । यथा । प्रजनार्थंस्त्रिय : सृष्टा : सन्तानार्थंचमानवा : । तस्मात्साधारणोधर्म्म: श्रुतौपत्न्यासहोदित : ॥ अपिच । अहिंसासत्यमस्तेयंशौचमिन्द्रियसंयम: । दम : क्षमार्जवन्दानंसर्वेषांधर्मसाधनमिति ॥ आत्मज्ञानंतितिक्षाचधर्म्म : साधारणोनृपेतिच ॥

साधारणस्त्री० । स्त्री०वेश्यायाम् ॥

साधारणानैकान्तिक : । पुं० हेत्वाभासान्तरे । साध्याभाववद्वृत्तौ ॥ यथापर्वतोऽग्निमान्० प्रमेयत्वादिति । प्रमेयत्वस्यवह्न्यभाववतिह्रदे विद्यमानत्वात् ॥ साध्यवदन्यवृत्तौ । यथा । शब्दोनित्य : ० नि : स्पर्शत्वात् नचविरुद्धसङ्कीर्णदोष : ० उपधेयसङ्करेऽप्युपाधेरसङ्करात् ॥

साधारणी । स्त्री० सदृशायाम् । समानायाम् ॥ कुञ्चिकायामितिहेमचन्द्र : ॥

साधारण्यम् । न० साम्ये ॥ कुञ्चिकायाम् । इतिहेमचन्द्र : ॥

साधारिका । स्त्री० घटिकायाम् । नाडिकायां ॥

साधिका । स्त्री० साधनकर्त्र्याम् ॥ सुषुप्तौ ॥ सुप्तस्तुसाधकेतिहैम : ॥

साधित : । त्रि० दापिते । धनादिना वशीकृते । धनादिप्रदापिते ॥ प्रदापितधने ॥ साध्यतिस्म । साध० । क्त : ॥ सिद्धे ॥

साधिमा । पुं० साधुत्वे ॥ साधोर्भाव : । इमनिच् ॥

साधिष्ठ : । त्रि० अतिशयेनबाढे । अतिदृढे । आर्य्ये ॥ न्याय्ये ॥ शोभनतमे । अयमेषामतिशयेनबाढ : । अतिशायिनेतमविष्ठनाविति ष्ठन् । अन्तिकशाढयोर्नेदसाधौ ॥

साधिष्ठान : । त्रि० जीवे । अधिष्ठानेन कूटस्थेनचैतन्येनसहिते ।

साधीयान् । त्रि० अतिबाढे ॥ अतिशोभने । अतिसाधौ ॥ अयमनयोरतिशयितोबाढ : साधुर्वा । द्विवचनेतीयसुन्० अंतिकशाढयोरिति बाढशब्दस्यसाधादेश : । टेरिति साधोष्टिलोप : ॥

साधु: । त्रि० उत्तमकुलोत्पन्ने । अस्य पर्यायायथा । महाकुलकुलीनार्य्यसभ्यसज्जनसाधवइति । वार्द्धुषिके ॥ चारौ । शोभने । मनोज्ञे । स्वभावसुन्दरे ॥ प्रवीणे । योग्ये ॥ स्वधर्म्मवर्त्तिनि ॥ अपकारिष्वप्युपकारशीले ॥ अद्रोहिणि ॥ पुण्यकारिणि ॥ वेदमार्गस्थे ॥ शास्त्रविहितकारिणि ॥ सर्वहिते ॥ नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयसम्पन्नेमुमुक्षौ ॥ कुलधर्माश्रिते ॥

सर्व्वपूज्ये ॥ यथा । शास्त्रैर्व्विविधा-
वेदैः शैवैः सौरैर्गाणपतैरपि । कौ
लधर्म्माश्रितः साधुः पूजनीयो
नियत्नतः ॥ साध्नोति परकार्य्यम् ।
धर्म्मम् अर्थम् । कामम् । मोक्षं
वा । साध । कृवापेत्युण् ॥ पुं ।
व्याकरणेन प्रतिपादिते शास्त्रीयश-
ब्दे ॥ यद्यपि साधूनेव भाषेतेति नि-
श्रूयते तथापि फलनिर्द्देशाभावे त-
न्निर्द्देशादेवेष्टशविधिः कल्प्यते ।
साधूनेव भाषेत नापशब्दानिति ।
मन्त्रोहीनः स्वरतो वर्णतो वेति द-
र्शनात् ॥ मुनौ ॥ जिने ॥

साधुजः । त्रि । उत्तमकुलोद्भवे ।
साधौ ॥

साधुधीः । स्त्री । वरवत्सलायाम् ।
श्वश्रूम् ॥ सुन्दरबुद्धौ ॥ त्रि ।
तद्वति ॥ साध्वी धीर्यस्याः ॥ कर्म्म
धारयो बहुव्रीहिर्व्वा ॥

साधुनिन्दितः । त्रि । प्रशस्ये । सा
धुभिर्निन्दिते । साध्वसम्मत इति या
वत् ॥

साधुपुष्पम् । न । प्रपौण्डरीके । स्थ
लपद्मे । साधु च तत्पुष्पञ्च ॥ उत्त
मप्रसूने ॥

साधुभावः । पुं । असाधुत्वशङ्कायां
साधुत्वे ॥

साधुवादः । पुं । सतामनुमोदने ॥
साधुवादोपपन्नं ह्येतद्दति यथा ॥ सा
धीकृतरि ॥

साधुवाहः । पुं । विनीताश्वे ॥ सा
धुश्चासौ वाहश्च ॥

साधुवाही । पुं । विनीताश्वे । सुशि
क्षिततुरगे ॥ साधु वहनशीलः ।
वह । सुपोतिणिनिः ॥ त्रि । शो
भनाश्वयुक्ते ॥

साधुवृक्षः । पुं । कदम्बद्रुमे ॥ बहुफ
लर्धे ॥ साधुश्चासौ वृक्षश्च ॥ मनो
ज्ञतरौ ॥

साधुवृत्तः । त्रि । सुचरित्रे । साधू
नामिव समानसुखदुःखाभ्यां सुवृ
त्तं वृत्तम् ॥

साधुवृत्तिः । स्त्री । उत्तमजीविकाया
म् ॥ सद्व्यवहारे ॥ सुन्दरवर्त्तने ॥
साध्वी चासौ वृत्तिश्च ॥ साधौ वृत्ति
र्वा ॥ त्रि । तद्वति ॥ साध्वी वृत्ति
र्यस्य ॥

साधुसङ्गमः । पुं । मनोनिग्रहस्यो
पायविशेषे । यस्तु बोधितमपि तत्त्वं
न सम्यग्बुध्यते । यो वा विस्मरति । त
योः साधुसङ्गमरूपोपायः । साध
वोहि पुनः पुनर्व्वोधयन्ति । स्मारय
न्ति च ॥

साधुसमागमः । पुं । साधुसङ्गमे ॥
यथा । त्यज दुर्ज्जनसंसर्गं भज साधु
समागमम् । कुरु पुण्यमहोरात्रं स्मर
नित्यमनित्यतामिति ॥

साधूतम् । न । वह्निसङ्घाते ॥ प

ण्यशीध्याम् ॥ मातरवे ॥ इत्यम यपालः। पाठान्तरे॰ साध्वतम पि ॥

साध्यः। पुं॰ गणदेवताविशेषे ॥ साध्यं सिद्धिः। साध॰। कर्त्तरि ण्यत्॰ इति भावे ण्यत्। सोऽस्त्यस्य। अर्श आद्यच्। साध्या द्वादश विख्याताः पुराणेषु पुरातनैः। ते यथा। मनोमन्ता प्राणस्तथैवापानोऽथ वीर्यवान्। नारायणो नरश्चैव हंसश्चित्तस्तथा विभुः॥ प्रभुश्च द्वादशैवैते साध्याः प्रोक्ताः पुरातनैरिति ॥ विष्कम्भाद्यन्तर्गतयोगविशेषे ॥ तत्रोत्पन्नस्य फलं यथा। असाध्यसाध्यः किल साध्यजातः शूरोऽतिधीरो विजितारिपक्षः। बुद्ध्या ह्युपायैः परिसाधितार्थः परं कृतार्थः सुतरां विनीतः ॥ स्मरे। कामे ॥ देवे। सुरे ॥ त्रि॰ साधनीये ॥ कृच्छ्रोपायः सुखोपायो द्विविधः साध्य उच्यते ॥ साधनार्हाभिमते ॥ साध्यतेऽत्र। सतु पक्षः। यथा। प्रतिज्ञादोषनिर्मुक्तं साध्यं सत्कारणान्वितम्। निश्चितं लोकसिद्धश्च पक्षं पक्षविदो विदुः ॥ साध्यं साधनार्हाभिमतं पक्षं विदुः। यद्यप्यन्यत्साध्यं व्याप्यम्॰ तद्विशिष्टधर्मी पक्ष इति भेदः। तथाप्यत्र वाक्प्रत्याय्यपर्यायादिधर्मविशेषविशिष्टस्य पक्षत्व याधर्मिणोऽधर्मपदैरेव साध्यत्वात् साध्यपक्षयोरभेदाभिधानमिति व्यवहारतत्त्वम् ॥ व्याप्ये ॥ साध्यतेऽनेनेति व्युत्पत्त्यापक्षे ॥ यथा ॰ पर्वतो वह्निमानित्यत्र पर्वतः ॥ साधयितुं योग्ये ॥ यथा पर्वतो वह्निमानित्यत्र वह्निः साध्यः ॥ साध्यस्य वस्तुनोऽभावे साधनैः किं प्रयोजनम् ॥

साध्यतावच्छेदकम्। न॰ अनुमितिविधेयांशभासमानधर्मे ॥

साध्यव्यापकत्वम्। न॰ साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वे ॥

साध्यसमः। पुं॰ हेत्वाभासान्तरे ॥ यथाहगौतमः। साध्याविशिष्टश्च साध्यत्वात् साध्यसमः ॥ ४८ ॥ साध्येन वह्न्यादिना॰ अविशिष्ट॰ कुतश्चेत्यत आह॰ साध्यत्वादिति॰ साधनीयत्वादित्यर्थः। यथाहि॰ साध्यं साधनीयं॰ तथा हेतुरपि चेत्॰ साध्यसम इत्युच्यते। अत एव चासिद्ध इति व्यवह्रियते। अयञ्चाश्रयासिद्धिस्वरूपासिद्धिव्याप्यत्वासिद्धिभेदात्॰ त्रिविधः। आश्रयासिद्धिश्च॰ पक्षे पक्षतावच्छेदकाभावः। यथा काञ्चनमयः पर्वतो वह्निमानित्यादौ। स्वरूपासिद्धिः॰ पक्षे हेतुतावच्छेदकावच्छिन्नस्याभावः। यथा ह्रदो द्रव्यं धूमादित्यादौ

साध्यसमः

। व्याप्यत्वासिद्धिश्च। व्यभिचरितसामानाधिकरण्यस्याभावः। न च स्वरूपासिद्धेरेवसूचनाल्लघ्वत्वप्रतीतेर्निर्भयेल्लघ्वत्वमितिवाच्यम्। हेतुरितिपदं च अपूरणीयम्। हेतुपदस्य गमकहेतौ व्याप्तिविशिष्टपक्षधर्मस्य बोधकम्। व्याप्तिविशिष्टपक्षधर्मत्वं च अवापूर्यताम्। तथा च। तस्य किञ्चिदंशसाध्यत्वेनैव साध्यसमत्वम्। अतएवसाध्ये साध्यतावच्छेदकाभावः साधने साधनतावच्छेदकाभावश्च व्याप्यत्वासिद्धिः। यथा। पक्षतावच्छेदकाभावपक्षतावच्छेदकवद्भेदादेरन्यतमत्वेनाश्रयासिद्धित्वम्। यथाच। पक्षे हेत्वभावहेतुमद्भेदादेरन्यतमत्वेन स्वरूपासिद्धित्वम्। तथा साध्यतावच्छेदकाभावादेरन्यतमत्वेन व्याप्यत्वासिद्धित्वं। चितयान्यतमत्वस्यासिद्धिसामान्यलक्षणं नीलधूमत्वादेरपिव्याप्यत्वासिद्धावन्तर्भावं वदन्ति। तेषामयमाशयः। व्याप्तिर्हि साध्यसम्बन्धितावच्छेदकरूपा। गुरुधर्मश्च साध्यसम्बन्धितानवच्छेदकोऽतो नीलधूमत्वादेः साध्यसम्बन्धितानवच्छेदकत्वान्न व्याप्तिस्वरूपत्वम्। तथाच साध्यतावच्छेदकाभावादिरिव। साधनतावच्छेदके व्याप्यतानवच्छेदकत्वमपि

सामन्तः

भवतिव्याप्यत्वासिद्धिरिति। ४८।

साध्यसिद्धिपादः। पुं। व्यवहारस्य चतुर्थपादे। सपनिर्णयपादः। यथा। प्रत्यर्थिनोऽग्रतोलेख्यमिति। भाषापादः प्रथमः। श्रुतार्थस्योत्तरंलेख्यमित्युत्तरपादोद्वितीयः। ततोऽर्थीलेखयेत्सद्यःप्रतिज्ञायापादस्तृतीयः। तत्सिद्धौसिद्धिमाप्नोतीतिसाध्यसिद्धिपादश्चतुर्थः। यथा। भाषोत्तरक्रियासाध्यसिद्धिभिः क्रमशस्तिभिः। आक्षिप्तचतुरंशस्तु चतुष्पादभिधीयते। इतिमिताक्षरा॥

साध्वसम्। न। भये॥ साधून्अस्यति। अस०। अजितिमुकुटः तन्न। अणः प्रसङ्गात्। तस्मात्। साधूनाम्असः॥ सम्भ्रमे॥

साध्वी। स्त्री। दुर्गायाम्॥ मेदायाम्॥ पतिव्रतायाम्॥ तल्लक्षणमाहहारीतः। आर्तार्तेमुदिताहृष्टे प्रोषितेमलिनाकृशा। मृतेम्रियेतयापत्यौसाध्वीज्ञेयापतिव्रतेति॥ मनुरपि। पतिंयानाभिचरति मनोवाग्देहसंयता। साभर्तृलोकानाप्नोतिसद्भिःसाध्वीतिचोच्यते। इति॥ वोतोगुणवचनादिति ङीष्॥ शोभनायाम्॥

सामन्तः। पुं। गुच्छकरञ्जे॥ धुवकप्रभेदे॥ यथा। अष्टादशाक्षरे

र्य्यायशीघ्रप्रदेशभुवः । कष्टस्क संस्त्रकीतासिसाभस्त्रीर्वीरशिरसि ॥ त्रि० साह्लादयुक्ते ॥

सानन्दूरः । पुं० तीर्थविशेषे ॥

सानसिः । पुं० काञ्चने । सनोति षणु दाने । सानसिवर्णसीत्यादि नासिप्रत्ययश्च धातोर्वृद्धिश्च ॥ त्रि० सम्भजनीये ॥

सानिका । स्त्री० वाद्यविशेषे । सनाई० इतिलोकप्रसिद्धे ॥ वंशी- वाद्ये ॥

सानुः । पुं० न० स्त्री० । प्रस्थे । पर्वतस्य समभूभागे ॥ वने ॥ वात्यायाम् ॥ मार्गे ॥ अग्रे ॥ कोविदे ॥ सनोति । षणु० । दृसनिजनी तिञुण् ॥ अर्के ॥ पल्लवे ॥

सानुक्रोशः । त्रि० सदये ॥

सानुजः । पुं० तुम्बुरुवृक्षे । तोयापत्रे ॥ न० प्रपौण्डरीके ॥ त्रि० अनुजेन सहवर्त्तमाने ॥ सानुजं रा ममीक्षे ।

सानुबन्धः । त्रि० सपरिवारे ॥ अवि च्छिन्ने । सानुसृते ॥

सानुमान् । पुं० पर्वते ॥ सानवो वि द्यन्तेऽस्य । मतुप् ॥

सानेयिका । स्त्री० सानेय्याम् ॥

सानेयी । स्त्री० वंश्याम् ॥ इ० अ० र० स्त्री० ॥

सान्तपनम् । न० कृच्छ्रसान्तपनाभिधे व्रतविशेषे ॥ यथा । गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम् ॥ गोमूत्रादिषड्द्रव्याण्येकीकृत्यैकस्मिन्नहनि भक्षयेत् नान्यत् किञ्चिदद्यात् । अपरेद्युश्चोपवास इत्येतत् सान्तपनं कृच्छ्रं स्मृतमित्यर्थः ॥ सन्तपति, तप० । ल्युः । तस्येदं कर्म । अण् ॥

सान्तरः । त्रि० विरले ॥ अन्तरेण सहितः ॥

सान्त्वम् । न० अत्यर्थमधुरवाक्ये । कर्णमनःप्रीतिजनके ॥ सामनि । प्रियशब्दार्थप्रदानसम्बन्धादिभिः क्रोधोपशमने । द्रव्यं दास्यामि तुभ्यं मा भैषीरित्यादिसमाधा- नोक्तौ ॥ सान्त्वयति । षान्त्व सामप्रयोगे । चुरादिरदन्तः । एरच् । घञ् वा ॥ दाक्षिण्ये ॥

सान्त्वनम् । न० प्रणये ॥ सामोपाये ॥ षान्त्व० । ल्युट् ॥

सान्त्वना । स्त्री० प्रणये ॥ प्रणयः सान्त्वनानेतिकोषान्तरम् ॥ सामनि

सान्त्वनावादः । पुं० प्रियवचने ॥

सान्दीपनिः । पुं० मुनिविशेषे ॥ अस्त्रादिविद्याभिज्ञे अवन्तिपुरवासिनिकाश्रीरामकृष्णयोर्गुरौ । सन्दीपनस्यापत्यम् । अतइञ् ॥

सान्दृष्टिकम् । पुं० व्यापारानन्तरं

आयमानि॰सद्यः फलि। सन्दृष्टौप्रयत्नेभवम्। अध्यात्मादित्वाट्ठञ्। समानदृष्टिविषये।

सान्द्रम्। न॰ वने। त्रि॰ घने। निविडे। मृदौ। स्व॰ अन्यते। अद्रिवन्धने। बाहुलकाद्रक्।

सान्द्रपुष्पः। पुं॰ विभीतकवृक्षे।

सान्द्रस्निग्धः। त्रि॰ घनस्निग्धे। मेदुरे।

सान्धिकः। पुं॰ शौण्डिके। त्रि॰ सन्धिकर्त्तरि।

सान्धिवेलम्। न॰ संधिवेलायाम्भवे। सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्।

सान्ध्यः। पुं॰ स्वप्ने। सन्धिभवे। सन्ध्यायाम्भवः। सन्धिवेलादित्वादण्।

सान्ध्यकुसुमा। स्त्री॰ त्रिसन्धिपुष्पवृक्षे।

सान्नहनिकः। त्रि॰ योधानांसन्नाहप्रवर्त्तके। सन्नहनंप्रयोजनमस्य। तदस्यप्रयोजनमितिठक्।

सान्नाय्यम्। न॰ होतव्यद्रव्ये। हविषिसम्यङ्नीयतेहोमार्थमग्निम्प्रति। णीञ्। पाय्यसान्नाय्येतिण्यदायादेशः समोदीर्घश्चनिपात्यते।

सान्निध्यम्। न॰ नैकट्ये। निकटे। सन्निधिरेव। चतुर्वर्ण्यादित्वात्स्वार्थेष्यञ्।

सान्निपातिकः। त्रि॰ सन्निपातजरोगे। सन्निपातसम्बन्धिरोगे। सन्निपातात्आगतम्। ...

सान्निपातिकः। त्रि॰ सन्निपातजरोगे। सन्निपातग्रन्थमनङ्कीपनवे। सन्निपातादिठञ्।

साम्यासिकः। पुं॰ भिक्षौ। पारावारिणि।

सान्वयः। त्रि॰ सम्बन्धिनि। कुलसहिते। पुत्रपौत्रादिसहिते। यथा। योनधोत्क्षिपिवेदमन्यत्कुलवित्तमम्। सजीवन्नेवशूद्रत्वमाशुगच्छतिसान्वयः।

सापत्नः। पुं॰ सपत्नीतनये। सपत्न्याअपत्यम्। शिवादिभ्योऽण्। तत्रसपत्नीतिपाठेपिलिङ्गविशिष्टपरिभाषया॰ सपत्नीशब्दादपिसामान्यचिन्तया॰ढकंबाधित्वाऽणितिबोध्यम्। वैरिणस्तनये। तस्यापत्यमित्यण्॰ शिवादित्वात्।

सापत्नेयः। त्रि॰ सपत्न्यास्तनये। सपत्न्याअपत्यम्। स्त्रीभ्योढक्।

सापत्नेयी। स्त्री॰ सपत्न्यादुहितरि।

सापत्रपा। स्त्री॰ लज्जायाम्।

सापराधः। त्रि॰ कृतापराधे।

सापिण्डः। पुं॰ सपिण्डे। प्रज्ञादिभ्यश्चेतिस्वार्थेऽण्।

सापिण्ड्यम्। न॰ सपिण्डतायाम्।

साप्तपदीनम्। सख्ये। मित्रत्वे। सप्तभिः पदैरवाप्यते। साप्तपदीनंसख्यमितिसाधु।

साफल्यम्। न॰ सफलतायाम्।

सामान्याप्तिः। स्त्री॰ साम्यप्राप्तौ।

सामकः । पुं॰ तर्कुशाणे ॥ सामाभिज्ञे ॥ साममधीते॰ वेदवा । क्रमादिभ्योवुन् ॥ न॰ मूलकर्णे ॥

सामगः । त्रि॰ ब्राह्मणविशेषे । छान्दोगे ॥ सामगायति । गै शब्दे । गापोष्टगितिटक् । टाप्ङीबर्थः । तेनस्त्रियांसामगी ॥

सामगर्भः । पुं॰ विष्णौ ॥

सामग्री । स्त्री॰ कारणसमूहे ॥ यथा । सामग्रीचेन्नफलविरहोव्याप्तिरेवेति तत्त्वम्भू॰ पदाङ्कदूतः ॥ द्रव्ये ॥

सामग्र्यम् । न॰ समुदायत्वे ॥

सामजः । पुं॰ गजे ॥ कुञ्जरे ॥ त्रि॰ सामोत्थे । सामार्थे ॥

सामञ्जस्यम् । न॰ औचित्ये । युक्तियुक्ते ॥

साम । न॰ सहस्रशाखिपितृदेवताकेवेदविशेषे ॥ गीतिविशिष्टायामृचि ॥ ऋच्यध्यूढं सामोच्यते ॥ वाक्यविशेषस्यांगीतौ ॥ सामपदन्तुगीतिमात्रस्यैवाभिधायकमित्यन्यत् । चतुर्णांवेदानांमध्येगानमाधुर्येणातिरमणीयत्वाद्विष्णोर्विभूतिः सामेत्युच्यते । राज्ञांशत्रुवशीकरणोपायविशेषे । सान्त्वे । प्रियवादार्थप्रदानसम्बन्धादिभिः शत्रोः क्रोधोपशमने ॥ यथा । परस्परोपकाराणांदर्शनं गुणकीर्त्तनम् । सम्बन्धस्यसमाख्यानमायत्याः सम्प्रकाशनम् ॥ वाचापेशलयासाधुतवाहमितिचार्पणम् । इतिसामविधानज्ञैः सामपञ्चविधं स्मृतम् ॥ स्यतिपापं॰ रोषं वाऽनेनवा । षोऽन्तकर्म्मणि । सातिभ्यांमनिन्मनिणाविति मनिन् ॥ सान्त्वनम् । सामसान्त्वप्रयोगे । बाहुलकात्कनिन्वा ॥ त्रि॰ शोभने । अनवद्ये ॥

सामनः । पुं॰ सामवति ॥ सामास्यास्ति । पामादित्वान्नः ॥

सामनी । स्त्री॰ पशुबन्धनरज्जौ ॥

सामन्तः । पुं॰ प्रतिवासिनि । संलग्नोऽन्तएकदेशोऽस्य । प्रादिभ्योधातुजस्येतिसमासः । समन्तायाः स्वदेशाव्यवहितभूमेरयम् । तस्येदमित्यण् ॥ माण्डलिके ॥ चतुर्द्दिके ॥ त्रि॰ सहाये ॥

सामन्यः । पुं॰ सामविदि ॥ सामसुसाधुः॰ प्रवीणो॰ योग्योवा । तत्रसाधुरितियत् । येचाभावकर्म्मणोरितिप्रकृतिभावः ॥

सामयिकः । त्रि॰ समयोचिते । समयेकार्यकर्त्तरि ॥ समयः प्राप्तोऽस्य । समयस्तदस्यप्राप्तमितिठञ् ॥ विनयादित्वात्स्वार्थेठग्वा । समयोत्थे ॥

सामयोनिः । पुं॰ ब्रह्मणि । द्रुहिणे । कुञ्जरे । गजे । त्रि॰ सा

सौख्ये ॥
सामरस्यम् । न० ऐकरस्ये ॥
सामर्थ्यम् । न० योग्यतायाम् ॥ श
क्तौ ॥ विशेष्यविशेषणभावावगाह्यु
पस्थितिजनकत्वरूपे. एकार्थीभावे
॥ परस्पराकाङ्क्षारूपायांव्यपेक्षा
याम् ॥
सामर्षः । त्रि० सरोषे ॥
सामवायिकः । पुं० अमात्ये । म
न्त्रिणि ॥ त्रि० समवायसम्बन्धि
नि ॥ समवायेत्यर्थे ॥ सामूहिके
॥ समवायंसमवैति । समवाया
न्समवैतीतिठक् । इहसमवपूर्वस्ये
तेरर्थः प्रविश्यैकदेशीभवनम् ।
तद्गुणभूतंप्रवेशंप्रति० प्रकृत्यर्थ
स्यकर्मताबोधाय । विशेष्यानुरो
धेनतु० लिङ्गेसमीपायेचप्रयुज्य
ते । कुटुम्बेचसमवेताइतियथा ॥
सामवित् पुं० उद्गातरि ॥ सामा
निवेत्ति । विद्० । क्विप् ॥
सामवेदः । पुं० कृष्णाधिपेवेदवि
शेषे ॥
सामाजिकः । पुं० सभासदि । स
भास्तारे ॥ समाजंसमवैति । स
मवायान्समवैतीतिठक् ॥ समा
जंरक्षतिवा । रक्षतीतिठक् ॥
सामाधिपतिः । पुं० भौमयष्टे ॥
सामानाधिकरण्यम् । न० पदयोः
सम्बन्धविशेषे । पदयोरेकार्थनिष्ठ

त्वे ॥ सचसम्बन्धोभिन्नप्रवृत्तिनि
मित्तानांशब्दानामेकस्मिन्नर्थेतात्प
र्यसम्बन्धः । यथासोऽयंदेवदत्तइति
वाक्येतत्कालविशिष्टदेवदत्तवाच-
कसशब्दस्य० एतत्कालविशिष्टदे
वदत्तवाचकायंशब्दस्यच० एकस्मि
न्पिण्डेतात्पर्यसम्बन्धः ॥ यथो
क्तमाचार्यैः । एकवृत्तिरर्थेशब्दानां
भिन्नवृत्तिनिमित्तानाम् । सामानाधि
करण्यमभवतीत्येवंवदन्तिलाक्षणि
काइति ॥ एकविभक्त्यन्तानांपदानां
विशेषणविशेष्यभावेनैकार्थनिष्ठत्वे ।
तच्चमुख्यगौणभेदेनद्विविधंयथा ।
सामानाधिकरण्येक्वचिंस्त्वैक्येमुख्य
तांव्रजेत् । स्वच्छिद्रमुत्पलंनीलमि
त्यादौतद्विलक्षणात् ॥ अन्यत्वान्य
थासम्पत्त्यातुसिंहःपुरुषोयथा ।
सामानाधिकरण्यंगौणंसिंहः पु
मानिति ॥ समानमधिकरणंययो
स्तयोर्भावः ॥ एकाश्रयत्वे ॥ अ
न्यदुष्णत्वंसत्त्वमन्यच्छायानिबन्धि
तम्० सामानाधिकरण्यंहितेजस्ति
मिरयोः कुतः ॥
सामान्यः पुं० पञ्चमेवर्षे । वर्षस
ङ्घरे ॥ यथोक्तंमत्स्यनिर्वाणे । च
त्वारः कथितावर्णाआश्रमाश्चदिस
न्तते । आचाराव्यवस्थितासाम
साश्चापृथक्पृथक् ॥ कृतादौकलि
कान्तेतुवर्णाः पञ्चप्रकीर्तिताः ।

ब्राह्मणः क्षत्रियो वैश्यः शूद्रः सामान्य एव चेति ॥

सामान्यम्। न॰ जातौ ॥ तद्द्विविधम्। यथा। सामान्यं द्विविधं प्रोक्तं परञ्चापरमेव च। द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते। परभिन्ना च या जातिः सैवापरतयोच्यते। व्यापकत्वात् परापि स्याद्व्याप्यत्वादपरापि च। द्रव्यत्वादिकजातिस्तु परापरतयोच्यते। इति भाषापरिच्छेदः ॥ तल्लक्षणं यथा। नित्यत्वे सत्यनेकसमवेतत्वमिति। अनेकसमवेतत्वं संयोगादीनामप्यस्ति॰ अतः सत्यन्तम्। नित्यत्वे सति समवेतत्वं गगनपरिमाणादीनामप्यस्ति॰ अत उक्तमनेकेति। नित्यत्वे सत्यनेकवृत्ति सामान्यमुपेत्य समवेतत्वमुक्तम्। एकव्यक्तिवृत्तिस्तु न जातिः। यत उक्तम्। व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः। रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः ॥ एकव्यक्तिकत्वादाकाशत्वं न जातिः। तुल्यवृत्तिकत्वाद् घटत्वं कलसत्वं न जातिद्वयम्। सङ्कीर्णत्वाद्भूतत्वं मूर्त्तत्वं न जातिः। अनवस्थाभयात् सामान्यत्वं न जातिः। विशेषव्यावृत्तस्वभावस्य रूपहानिः स्यादतो विशेषत्वं न जातिः। समवायसम्बन्धाभावात् समवायो न जातिः। द्रव्यादित्रिकवृत्तिरिति। परत्वमधिकदेशवृत्तित्वम्॰ अपरत्वमल्पदेशवृत्तित्वम्। सकलजात्यपेक्षयाऽधिकदेशवृत्तित्वात् सत्तायाः परत्वम्। एतद्बोधनाय द्रव्यादीति। तदपेक्षया चान्यासां जातीनामपरत्वम्। परभिन्ना सत्ताभिन्ना। व्यापकत्वात् परापि स्याद्द्रव्यत्वादपरापि च। पृथिवीत्वाद्यपेक्षया व्यापकत्वात्॰ अधिकदेशवृत्तित्वात्॰ द्रव्यत्वं परत्वम्। सत्ताऽपेक्षयाऽल्पदेशवृत्तित्वात्॰ द्रव्यत्वम्॰ अपरत्वञ्च। तथा च धर्मद्वयसमावेशादुभयमविरुद्धम्। इति मुक्तावली ॥ नित्यमेकमनेकानुगतं सामान्यम्। तच्च द्रव्यगुणकर्म्मवर्त्ति॰ इति तर्कसङ्ग्रहः ॥ सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकतेति लक्षणलक्षितकाव्यालङ्कारविशेषे ॥ यथा। प्रस्तुतस्य यदन्येन गुणसाम्यविवक्षया। ऐकात्म्यं बध्यते योगात् तत्सामान्यमिति स्मृतम्। अतादृशमपि तादृगमय विवक्षितुं यत्प्रस्तुतार्थेन सम्पृक्तमपरित्यक्तनिजगुणमेव तदेकात्मतया निबध्यते॰ तत् समानगुणनिबन्धनात्॰ सामान्यम्। उदाहरणम्। मलयजरसविलिप्ततनवो नवहारलताविभूषिताः सिततर

रदनपङ्क्तयश्च कचरुचोरुचिरामलां शुभ्राः । ससम्भ्रमिततधाम्निभव-लयतिधरामविभाव्यताङ्गताः प्रियवसतिं प्रयान्ति सुखमेवनिरस्तभयोऽभिसारिकाः ॥ अत्रप्रस्तुततदन्ययोरन्यूनानतिरिक्ततयानिबद्धं धवलत्वमेकात्मताहेतुः । अतएव पृथग्भावेनानयोरुपलक्षणम् ॥ यथावा । वैचक्षचातुल्यरुचांवधूनांकर्णायतोगरुडतलागतानि । भृङ्गाः सहेलं यदिनापतिष्यन् कोवेदयिष्यन्नवचम्पकानि ॥ अत्रनिमित्तान्तरजनितापिनानात्वप्रतीतिः प्रथमप्रतिपन्नं नहीदं मन्युदमितुमुत्सहते प्रतीतत्वात्तस्यप्रतीतेश्चबाधायोगात्

सामानाम् । वि॰ साधारणे । अविशेषे । तुल्यतायाम् ॥ अनेकसम्बन्ध्येकवस्तुनि ॥ उत्सर्गे ॥

सामानाच्छलम् । न॰ छलप्रभेदे ॥ सम्भवतोऽर्थस्यातिसामानायोगादसम्भूतार्थकल्पनासामानाच्छलम् । ५३ ॥ सामानाविशिष्टसम्भवदर्थाभिप्रायेणोक्तस्य॰ अतिसामानायोगादसम्भवदर्थकल्पनया॰ दूषणाभिधानं सामानाच्छलम् । यथ ब्राह्मणोयं विद्याचरणसम्पन्नइत्युक्ते॰ ब्राह्मणत्वं न विद्याचरणसम्पदं साधयतीति कल्पयित्वा॰ परो वदति कुतो ब्राह्मणत्वेन॰ विद्याचरणसम्पत॰ व्रात्ये व्यभिचारात् । ५३ ॥

सामान्यतोदृष्टम् । न॰ अदृष्टस्वलक्षणसामान्यविषयेशीतोऽनुमाने ॥

सामान्यलक्षणा । स्त्री॰ अलौकिकसन्निकर्षविशेषे ॥ सतु॰ व्याप्यव्यापकसामान्यज्ञानम् । यथा एकघटदर्शनेसकलघटस्य नंभवतीइदृशघटत्वादिज्ञानम् । तत् प्रमाणंयथा । अलौकिकः सन्निकर्षस्त्रिविधः परिकीर्त्तितः । सामान्यलक्षणाज्ञानलक्षणायोगजस्तथा ॥ आसत्तिराश्रयाणान्तुसामान्यज्ञानमिष्यते । तदिन्द्रियजतद्धर्मबोधसामग्र्यापेक्ष्यते ॥ इति भा॰ ॥

सामान्यविधिः । पुं॰ अनाभ्यविधौ ॥ यथा । नहिंस्यात्सर्वभूतानीति ॥

सामान्यशासनम् । न॰ सामान्याधिकारे ॥ राजलेख्यविशेषे ॥

सामान्या । स्त्री॰ नायिकाभेदे याचान्तरे ॥ कथितं तद्यशासरसं त्वभिमतफलदाभवेत्सामान्या ॥

सामानाभिनयः । पुं॰ वागङ्गसत्त्वजेऽभिनये ॥ यथा । सामानाभिनयोनामज्ञेयोवागङ्गसत्त्वजः इति ॥

सामासिकः । पुं॰ साङ्ख्यपिके ।

समाससमूहे ॥

सामि । अ० अर्द्धे ॥ निन्दायाम् ॥ सामयति । सामसान्त्वप्रयोगे । अदन्तः ॥

सामिधेनी । स्त्री० धाय्यायाम् । अग्निज्वालनार्थमृचि । ऋक्सामिधेनी धाय्या च या स्यादग्निसमिन्धने ॥ समिधामाधानी । समिधाम आधाने योग्यत्वात् । पित्त्वान्ङीप् । यस्येत्यङ्क्तिलोपः ॥ समिध ॥

सामिधेनः । पुं० मन्त्रविशेषे ॥ समिधामाधानः । समिधामाधाने योग्यः ॥

सामीची । स्त्री० वन्दनायाम् ।

सामीप्यम् । न० सान्निध्ये । देशकालाभ्यांकृतायाम् प्रत्यासत्तौ । अव्यवहितत्वे ॥ समीपमेव । चतुर्वर्णादित्वात् ष्यञ् ॥

सामुद्रम् । न० देहलक्षणे ॥ लवणविशेषे । करके । वशिरे ॥ अस्य गुणा यथा । सामुद्रं मधुरं पाकेऽमतितीक्ष्णमगुरु । नात्युष्णं दीपनं भेदि सक्षारमविदाहि च । श्लेष्मलं वातनुत्तिक्तमरूक्षं नातिशीतलम् ॥ समुद्रोदके ॥ सामुद्रमुदकं क्षारं सर्वदोषप्रकोपणम् ॥ समुद्रफेने ॥ धाराजलप्रभेदे ॥ तत्र सक्षारलवणं शुक्रदृष्टिबलापहम् । विसस्रं दोषलं तीक्ष्णं सर्वकर्मसु गर्हितम् ॥ सामुद्रन्त्वाश्विनेमासि गुणैर्गाङ्गवदादिशेत् । यतोऽगस्त्यस्योदये व्यर्थं कुर्यात् सकलं जलम् । निर्मलं निर्विषं स्वादु शुक्लं स्याददोषलम् ॥ तत् सामुद्रजलम् । अपि च । फुत्कारविषवातेन नागानां श्वासचारिणाम् । वर्षासु सविषं तोयं दिव्यमप्याश्विनं विना ॥ त्रि० समुद्रोत्पन्नवस्तुनि । समुद्रे भवम् । तत्र भवइत्यण् ॥

सामुद्रकम् । न० समुद्रलवणे ॥ समुद्रोक्तस्त्रीपुंलक्षणग्रन्थे । तीर्थविशेषे ॥ त्रि० । स्त्रीपुंसयोश्चिह्नवेत्तरि ॥

सामुद्रिकः । त्रि० स्त्रीपुंसयोश्चिह्नज्ञे ॥ वेत्ता स्त्रीपुंसयोश्चिह्नं सामुद्रिक उदाहृत इति हारावली ॥ समुद्रसम्बन्धिनि ॥ समुद्रचारिणि ॥

सामूहिकः । त्रि० सामवायिके । समूहमन्वेति । समवायान् समवैतीति ठक् ॥

साम्परायः । पुं० परलोके ॥ परलोकसाधने । सम्परायः परलोकः । तत्प्राप्तिप्रयोजनेगाह्योऽयं साधनविशेषे ॥

साम्परायिकम् । न० युद्धे । सङ्ग्रामे । समरे ॥ त्रि० पारलौकिके ॥ यथा । प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते । न साम्परायिकं तस्य दुर्मतेर्विद्यते फलम् ॥ पारलौकि-

कैसाधने ॥ सम्परायणम् । अयग
तौन्दगतौवा । घञ् । सतेविनया
दित्वात् स्वार्थे ठक् ॥ सम्परायाय
प्रभवति । सन्तापादित्वाट्ठञ् ॥
साम्परायार्थे । सम्परायमर्हति ।
तदर्हतीतिठक् ॥

साम्प्रतम् । अ० अधुनार्थे । इदानी
म् ॥ उचितार्थे सम्प्रतनम् ।
तनुविस्तारे डम् । पृषोदरादि
त्वात् समो दीर्घः ॥ यद्वा । सम्० प्र
ति० एतयोः समाहारद्वन्द्वः ।
तस्मात् प्रज्ञाद्यण् । गणपाठा
न्मान्तत्वम् ॥

साम्प्रतिकम् । न० समे ॥ न्याय्ये ॥
सम्प्रतिशब्दाद्विनयादित्वात् स्वार्थे
ठक् ॥

साम्बम् । न० उपपुराणविशेषे ॥

साम्बरम् । न० गडलवणे ॥

साम्बरी । स्त्री० मायायाम् ॥ शाम्ब
रीसाम्बरीमाया० मायाकृन्द्रजालेन
टै० इ० शब्दरत्नावली ॥

साम्भवी । स्त्री० रक्तलोध्रे ॥

साम्मातुरः । पुं० भाद्रमातुरे ॥ स
तीतनये ॥ सम्मातुरपत्यम् । मा
तुरुत्सङ्ख्यासम्भद्रपूर्वायाः ॥

साम्मुख्यम् । न० सायाङ्ग्यापिन्या
न्तिथौ । साम्मुख्यंनामसायाह्न
व्यापिनीदृश्यतेयदीतिस्कान्दोक्तेः :
॥ सम्मुखस्ते ॥

साम्यम् । न० तुल्यत्वे । समतायाम् ॥
भाण्डानामविषयोगत्वात्
मानप्रतिपक्षत्व । यतस्तत्त्वानतौ
विप्रोत्तानात्साम्यमुच्यते ॥ नि
र्विशेषे । सर्वभूतेषु विषमसमेष्व
पि समभावस्त्वसाम्यः समभावे ॥
समानस्यभावः ष्यञ् ॥

साम्राज्यम् । न० सार्वभौमपदे । द
राजत्वाधिपत्ये ॥ यथा । इष्ट्वा
धिपत्यंराज्ञ्यात्० साम्राज्यंदृश्यत
इति । यतलचञ्चभष्टेद्याविनिमयासा
साम्यम् उच्यतइतिवरदानत्वेहितो
यः पटलः ॥ सम्राजोभावः ।
ष्यञ् ॥

सामिधेनीमन्त्रम् । न० अरादिनाम
निगमस्कन्दे । गन्धाक्षे ॥ इ०
रा० नि० वट् ॥

सामाधिकम् । न० महापारेवते ॥

सायंसन्ध्या । स्त्री० पितृप्रसूनाम् ॥

सायन्तनोपास्यदेवतायाम् ॥

सायम् । अ० निशामुखे । दिनान्ते ॥

सानम् । धा० अम् । युगागमः ॥

सायः । पुं० काण्डे । शरे । वा
णे ॥ दिनान्ते । विनाशे ॥ स्य
ति० समाप्तयतिदिनम् । षि०
श्याद्व्येतिवः ॥ घञ्वा । आतो
युक् ॥

सायकः । पुं० शरे ॥ खड्गे ॥ स्य
ति । षि० । ण्वुल् । युक् ॥

सायकपुङ्खा। स्त्री॰ शरपुङ्खायाम्॥

सायङ्कालः। पुं॰ सायाह्ने॥

सायम्। अ॰ निशामुखे। दिनान्ते॥ सानम्। षो॰। अम्। युगागमः॥

सायम्प्रातिकः। त्रि॰ सायम्प्रातर्भवे॥ कालाट्ठञ्॥

सायन्तनः। त्रि॰ सायङ्कालसम्बन्धिनि॥

सायाह्नः। पुं॰ विकालके। दिनान्ते। पञ्चधाविभक्तस्याह्नः पञ्चमे भागे। यथा। सायाह्ने त्रिमुहूर्त्तं स्यात्श्राद्धं तत्र न कारयेत्। राक्षसी नाम सा वेला गर्हिता सर्वकर्म्मसु॥ अह्नः सायम्। सङ्ख्याविसायेति ज्ञापकात्समासः। सायमोह्नमलोपश्चेति भाष्यात् साधुः॥

सायिका। स्त्री॰ क्रमस्थितौ॥

सायुज्यम्। न॰ सयुग्भावे। एकदेहत्वे ऐक्ये॥ सयुजो भावः। ब्राह्मणादित्वात् ष्यञ्॥

सायोत्सवः। पुं॰ विकाले।

सारः। पुं॰ बले॥ स्थिरांशे॥ यथा। बेद्यान्यनेकशास्त्राणि चाल्पायुर्विघ्नकोटयः। तस्मात्सारं विजानीयात् क्षीरं हंस इवाम्भसः॥ मज्जनि। मज्जायाम्॥ वज्जवारे॥ रोगे। इति धरणी॥ दाडिमे॥ वायौ॥ पाशके॥ नवनीते॥ द्रव्ये। काव्यालङ्कारविशेषे॥ यथा। उत्तरोत्तरमुत्कर्षो भवेत् सारः परावधिः॥ परः पर्य्यन्तभागोऽवधिर्यस्य धाराधिरोहितया तत्तद्वोत्कर्षस्य विश्रान्तः। उदाहरणम्। राज्ये सारं वसुधा॰ वसुधायाम् पुरम्॰ पुरे सौधम्। सौधे तल्पं तल्पे वराङ्गनाऽनङ्गसर्वस्वम्। न॰ जले। धने॥ न्याय्ये। नवनीते॥ विपिने। लोहसारे। यथा। चमाभ्रक्षिखरःकार्य्यः ग्रहण्यन्यस्य नलिपिते। लोहस्य यं च मूर्च्छायितत्सारमभिधीयते॥ लोहसारोह्रस्य इन्यात् ग्रहणीमतिसारकम्। अर्शःसर्वाङ्गजं वातं शूलञ्च परिणामजम्॥ छर्द्दिं च पीनसं पित्तं श्वासं भगशुव्यपोहति। त्रि॰ वरे। श्रेष्ठे॥ यथा। असारे खलु संसारे सारमेतत् चतुष्टयम्। काश्यां वासः सतां सङ्गो गङ्गाम्भः शिवपूजनम्॥ हठे॥ विरम्मिष्ठन् सरति कालान्तरम्। सृ॰। सृ स्थिरे॰ इति घञ्॥ सारः शबलपीतयोरिति विश्वः॥

सारकः। पुं॰ तरलप्रवृत्तिहेतौ। जयपाले॥ त्रि॰ विरेचके॥ सारति। सृ॰। णवुल्॥

सारखदिरः। पुं॰ दुष्खदिरे। घनतरौ॥

सारगन्धः। पुं॰ चन्दने॥

सारग्राही । त्रि॰ सारग्रहणकर्त्तरि ॥

सारघम् । न॰ मधुनि ॥ सरघाभिः कृतम् । सरघायामित्यण् ॥

सारङ्गः । पुं॰ एणे । हरिणे ॥ चातके ॥ मतङ्गजे ॥ विहगान्तरे ॥ चञ्चरीके ॥ छत्रे ॥ राजहंसे ॥ चित्रमृगे ॥ वाद्यभेदे ॥ शङ्खे ॥ चित्रवर्णे ॥ नानावर्णे ॥ मयूरे ॥ कामदेवे ॥ धनुषि ॥ केशे ॥ स्वर्णे ॥ आभरणे ॥ पद्मे ॥ शङ्खे ॥ चन्दने ॥ कर्पूरे ॥ पुष्पे ॥ कोकिले ॥ मेघे ॥ भूमौ ॥ रात्रौ ॥ दीप्तौ ॥ सिंहे ॥ न॰ सारङ्गमांसे ॥ यथा । सारङ्गजाङ्गलं स्वादु मधुरं लघु ग्राह्यदमिति राजनिघण्टः ॥ वर्णवृत्तान्तरे ॥ कर्णध्वजं जाङ्गलं चामरदेहि वक्र सताल सदृमं प्रबोधि ह । सर्पाधिराजाधिराजस्तद्वृत्तमूरीकारितोह सारङ्गमेतद्धि ॥ यथा । अद्यापि नैव खलु मीनं कृतं कर्म यातं तनुः क्वापि लभ्यनवैरम् । निन्दारदेहात्मजस्य वृन्देन चेतो रतिं विन्दति चेन्मुकुन्देन ॥ त्रि॰ चित्रवर्णवति । शबले ॥ भगवद्भक्ते ॥ यथा । प्रियेऽनिवासोयम्भोरः पानपात्रं मुखं द्वयाम् । वाहवे सा कपालानां सारङ्गाणां पदाम्बुजमिति ॥ सरति । स॰ । शब्दोर्दृ शिष्टेऽच्छत्वम् ॥ सारं गच्छतीत्या ।

गम् स्रु॰ । खच् ॥ सारमङ्गं यस्य । अक्ष्यादिः ॥ सङ्गारङ्गे चवा । सारङ्गायतिवा । गैशब्दे । गापिष्टक् ॥

सारङ्गकः । पुं॰ हारिणिके ॥ सारङ्गान् हन्ति । पक्षिमत्स्यमृगान् हन्तीति ठक् ॥

सारङ्गिका । स्त्री॰ वर्णवृत्तान्तरे ॥ द्विजवरकर्णैर्भगणविरचितयस्याचरणम् । जगदभिरामं हितवामव तिहिसारङ्गिकया ॥ यथा । प्रथमतराधारमणं नमत पदाधाममनम् । चतुरमदापाहरणं यदुकुलचूडाभरणम् ॥

सारङ्गी । स्त्री॰ वर्णवृत्तान्तरे । यस्या मादौ कृत्वा कर्णौ द्वाहारं तातक्कम॰ विद्युन्मालापादं दद्यादन्तेहारं बद्धृतम् । नागाधीशेनोक्तं तस्याः सारङ्गीत्याख्यातं सन्तिलक्षुत्वा रीमाभिप्रायः सर्वेषां गानाचित्ति ॥ यथा । इन्दीवरगण्ये गोधुकृपर्णेगीपायन्तं गोवृन्दं बलेः साकं बालक्रीडालोलं वन्दे गोविन्दम् । आभीरीणामौपन्यस्थ्यालापारासः कर्षन्नकेलीकुञ्जसन्मञ्जुश्रीराधादृष्टौ दृष्ट्वाम् ॥ शबलायाम् ॥ चन्द्रतीवोपिनिषेप ॥

सारजम् । न॰ नवनीते ॥

सारणः । पुं॰ अतीसाररोगे ॥ रा

चयमन्विधि । इगकन्धरदूते ॥
आम्रातकी ॥ भद्रवल्लायाम् ॥ न०
गन्धभेदे ॥ मलनिर्गमने ॥
सारणि : । स्त्री० क्षुद्रनद्याम् ॥ प्र
सारण्याम् ॥
सारिणी । स्त्री० प्रसारण्याम् ॥ सु
स्पनद्याम् ॥
सारण्ड : । पुं० सर्पाण्डे ॥
सारत : । पुं० मुनौ ॥ त्रि० अर्ण
नवहवर्त्मनि ॥
सारतरु : । पुं० कदलीवृक्षे ॥ ष्टु०
ष०स्थ : ॥
सारत : । अ० बलात्तदूर्थ्ये ॥ प
श्वम्य सलिल ॥
सारथि : । पुं० सूते । नियन्तरि ॥
अश्वलक्षण यथा । निमित्तशकुन
ज्ञानीहयशिक्षाविशारद : । हयायु
र्वेदतत्त्वज्ञोभूरिभागविशेषवित् ॥
स्थानमनोमहिमत्त्व : सर्वेषाञ्च
प्रियंवद : शूरश्चकृतविद्यश्च सारथ
परिकीर्त्तितइति ॥ सरथश्वान् ।
अ० । अन्तर्भाविण्यर्थ : । सर्वाणां
र्थ तिगर्थम् ॥
सारथ्यम् । न० सारथे : कर्मणि०
भावेच । पुरोहितादित्वाद्यक् ॥
सारद : । त्रि० सारदातरि ॥
सारद्रुम : । पुं० खदिरे ॥
सारपाद : । पुं० धामनिवृक्षे ॥
सारभृत् । त्रि० सारग्राहिणि ॥

सारमिति : । स्त्री० वेदे । श्रुतौ ।
सारस्यवयघर्ष्भमित : ॥
सारमुषिका । स्त्री० देवदाल्याम् ॥
सारमेय : । पुं० कुक्कुरे । सरमा
या अपत्यम् । स्त्रोभ्योढक् ।
सारमेयादन : । पुं० नरकविशेषे ॥
सारमेयी । स्त्री० शुन्याम् । ढग
न्तात्ङीप् ॥
सारलोहम् । न० लौहसारे ॥ कृ०
तिभूरियोग : ॥
सारव : । त्रि० सरयूजातवस्तुनि ॥
सारवाभव : । तत्रभवत्यण् । दा
ण्डिनायनेतियलोप : ॥ स्त्रियां
टिड्ढेतिङीपि० सारवी ॥
सारवान् । त्रि० समरे ॥
सारवती । स्त्री० छन्दोभेदे । यथा
। चेद्गगा भतयं क्रमत० स्याद्गुरुर
न्तगतोवमत : । अश्ववसन्तउप
धिना० सारवतीकविभि : कथि
ता । सारविशिष्टायां ॥
सारस : । पुं० स्वनामख्यपक्षिविशे
षे । पुष्कराख्ये ॥ अस्यश
कुनंयथा । इष्टयोमद्य : सक
लाभादिवनातुमारपदनृदविनोद
नेन । श्रुयाम्यपृष्ठे निनदनगच्छे
तुमितृष्णाभीष्टंश्चपयस्मात् ।
वामेनयो पतृक्तलाभकारीमन्द-
सथायेन्द्रसोर्थजवध्यौ । य : सा
सारसभ्यायुगपदिहरात : स्नोविच

रेवक्रमतोऽपि वामः ॥ स्वैरिन्नव्यः कथितोऽयं कारी० क्रौञ्चद्वयस्याप्ययमेव वर्गः ॥ इति वसन्तराजः ॥ छन्दो ॥ हंसे ॥ न० सरसीरुहे । पद्मे । भौमपानीयविशेषे ॥ यथा भट्टाः : शैवलराज्जीयवसंस्वच्छ-तिष्ठति । तत् सरोजलसञ्छन्नं तदम्भः सारसं स्मृतम् ॥ सारसं सलिलं बल्यं तृष्णाघ्नं मधुरं लघु । रोचनं तुवरं रूक्षं बद्धमूत्रमलं हितम् ॥ त्रि० सरोजाते ॥ सरसिभवः । अण् ॥

सारसनम् । न० सन्नवनामोरस्त्रे । कञ्चुकाद्यर्थिमध्यकायनिबद्धपट्टिकादौ ॥ यथा । कञ्चुकोवारबाणोऽस्त्री० यत्तु मध्ये सकञ्चुकाः । बध्नन्ति तत् सारसनमधिकाङ्गोऽथशीर्षकम् इत्यमरः ॥ काञ्च्याम् । मेखलायाम् । कटिभूषणे ॥ स्त्री काञ्च्यां पञ्चपन्यमे । सारमुत्कृष्टं सनमस्य पञ्चसम्मतौ । घः । स सारसनेनाल्पशब्देनवा । सारं सनोतिवा । षणु दाने कर्मण्यण् । शीलविषयाद्यच् । यद्वा । सारंबलं सनोति० दीप्यतेऽनेन । अपमतदी प्त्याद्यादिषु । करणे ल्युट् । श स्त्रध्यादि ॥

सारसिका । स्त्री० सारस्याम् ॥ स्वार्थे कः ॥

सारसी । स्त्री० लक्ष्मणायाम् । सारसस्त्रियाम् ॥

सारस्वतः । पुं० देशविशेषे ॥ बिल्वदण्डे ॥ कल्पविशेषे ॥ यथा ॥ सारस्वतस्य कल्पस्य मध्ये येऽत्र नरामराः । तद्वृत्तान्तोद्भवं लोके तन्मात्स्यमिहोच्यते ॥ इति मात्स्ये ५०८ ध्यायः ॥ सरस्वतीनदीपुत्रे मुनिविशेषे ॥ इति कश्चित् । सारस्वतदेशीये ब्राह्मणे ॥ स च पञ्चविधगौडेषु प्रसिद्धः । यथा । सारस्वताः कान्यकुब्जा इति ॥ न० ब्राह्मीघृते ॥ त्रि० सरस्वतीतीरवासिनि ॥ सरस्वतीतीरसम्बन्धिनि ॥ सारस्वतदेशसम्बन्धिनि ॥

सारस्वताः । पुं० भूम्नि० देशविशेषे । विकर्णिकेषु ॥ यथा । कश्मीरास्तु मधुमताः सारस्वतास्तु विकर्णिकाः इति हेमचन्द्रः ॥

सारस्वतकल्पः । पुं० स्वायम्भुवमाहात्म्ये कातन्त्रोक्ते जःडाहरे सरस्वत्युपासनाप्रकरणे ॥

सारस्वतव्रतः । पुं० न० मत्स्यपुराणोक्ते व्रतविशेषे ॥

सारस्वती । स्त्री० इष्टिविशेषे ॥ याज्ञिकाः । पठन्ति । आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेदिति प्रायश्चित्तीया मा भूमेत्यध्येयं व्याकरणमिति महाभाष्यम्

सारा । स्त्री० स्नुहीप्रभेदे ॥ दूर्वाया म् कृष्णत्रिवृतायाम् ॥
सारार्थ : । वि० निष्कृष्टार्थे ॥
सारल : । पुं० तिले ॥
सारि : । पुं० स्त्री० पाशकी ॥
सारिका । स्त्री० शारिकाख्यखगे । पीतपादायाम् । गोराटिकायाम् ॥ सरति । सृ० । ण्वुल् । प्रत्यय स्थादितीत्वम् ॥ वृत्तान्तरे ॥
सारिणी । स्त्री० कपिलशिंशपायाम् ॥ कार्पासिकायाम् ॥ दुरालभा याम् ॥ प्रसारण्याम् ॥ रक्तपुनर्न वायाम् ॥ सहदेव्याम् ॥ कृत्रिमा जनिर्घराट : ॥
सारी । त्रि० बलयुक्ते । सबले ।
सारिष्ठ : । त्रि० अतिशयेनसारे ॥
सारी । स्त्री० सप्तलायाम् ॥
सारु । न० वर्णवृत्तप्रभेदे ॥ हारदण्ड धारिसारु ॥ यथा । नन्दनन्दनम् भजामि ॥
सारुण : । त्रि० अरुणवर्णयुक्ते ॥
सारुणा । स्त्री० जपायाम् ॥
सारूप्यम् । न० सरूपतायाम् ॥
सारोष्ट्र : । पुं० देशभेदे ॥ सारवष्ट्रोय स्मिन् ॥
सारोष्ट्रिक: । पुं० विषविशेषे ॥ सा रोष्ट्रे देशेभव : । अध्यात्मादित्वाट्ठ ञ् ॥
सार्गल : । त्रि० सप्रतिबन्धे ।

सार्घ : । पुं० जन्तुसङ्घे ॥ वणिक् समूहे ॥ समूहमात्रे ॥ यात्रिक जनानांसङ्घाते ॥ त्रि० सधने ॥ सफले । अभिधेयसहिते ॥ सरति । सृ० । सर्त्तिशि दिभ्यन् ॥ अर्थेनसहवर्त्तमानोवा ॥ वापोष्विवसरन्तीषुवनेषुपवने ष्विव । सार्थी : स्वैरंतदीयेषुचैरु र्वेश्मस्विवाद्रिषु ॥
सार्थक : । त्रि० सप्रयोजने ॥ अर्थे नसहवर्त्तमान : । सार्थक : ॥
सार्थवाह : । पुं० वणिजि ॥ सार्थं वहति । वह० । कर्म्मण्यण् ॥
सार्थिम : । त्रि० सार्थेस्थिते । सार्थी तिख्याते ॥
सार्द्र : । त्रि० आर्द्रे ॥ पर्यायास्तु । आर्द्रसार्द्रक्लिन्नतिमितस्तिमित समुन्नमुत्तस्वेति ॥ सहआर्द्रगुणे नेतितथा ॥
सार्द्ध : । त्रि० अर्द्धसहिते ॥ अर्द्धेनस हवर्त्तमान : ॥
सार्द्धम् । अ० साकमर्थे । सत्रम् । समम् । सहार्थे ॥ ऋध्यति । ऋधु वृद्धौ । बाहुलकात्कम् । सहऋद्ध वर्त्तते ॥
सार्प्प : । पुं० अश्लेषानक्षत्रे ॥ स र्पोदेवताख्य । सास्यदेवतेत्यण् ॥
सार्प्पराज्ञी । स्त्री० सर्पराजस्यवासु की : पत्न्याम् ॥

सार्प्पिष:। त्रि॰ सर्पि: सम्बन्धिनि। सर्पिषा संस्कृते॥ अण्॥

सार्पिष्क:। त्रि॰ घृतसंस्कृते॥ सर्पिषा संस्कृतं। तेन संस्कृतमिति ठक्॥ सार्पिष्कन्दाधिकं सर्पिर्दधिभ्यां संस्कृतं क्रमादिति हेमचन्द्र:॥

सार्व्व:। पुं॰ अर्हति। जिने॥ त्रि॰ सर्वहिते॥ सर्वस्मै हित:। सर्वपुरुषाभ्यां णढञाविति ण:॥

सार्व्वजनिक:। त्रि॰ सर्व्वजनीने॥ सर्वोजन:। पूर्वकालैकेति समास:। सर्वजनाय हित:। सर्वजनाट्ठञ् खश्चेति ठञ्॥

सार्व्वभौम:। पुं॰ सर्वपृथ्वीपतौ। चक्रवर्त्तिनि। कान्यकुब्जदेशे॥ उत्तरदिग्गजे॥ सर्वस्याम् भूमौ विदित:। तत्र विदित इत्यण्। अनुशतिकादित्वादुभयपदवृद्धि:॥ सर्वभूमेरीश्वरो वा। तस्येश्वर इत्यण्॥ सर्वभूमेर्निमित्तं संयोग उत्पातो वा। सर्वभूमिपृथिवीभ्यामणञाविति अण्॥

सार्व्वजनीन:। त्रि॰ सर्व्वजने साधौ॥ खञ्॥

सार्व्वलौकिक:। त्रि॰ सर्वलोकविदिते॥ सर्व्वलोके विदित:। लोकसर्वलोकाट्ठञ्। अनुशतिकादि:॥

सार्षपम्। न॰ सर्षपशाके॥ गुणा यथा। कटुकं सार्षपं शाकं बहुमूत्रमलं गुरु। अम्लपाकं विदाहि स्यादुष्णं रूक्षं त्रिदोषकृत्॥ सक्षारं लवणं तीक्ष्णं स्वादुशाकेषु निन्दितम्॥ सर्षपतैले॥ दीपनं सार्षपं तैलं कटुपाकरसं लघु। लेखनं स्पर्शवीर्य्योष्णं तीक्ष्णं पित्तास्रदूषकम्॥ कफमेदोनिलार्शोघ्नं शिर:कर्णामयापहम्। कण्डूकोष्ठकृमिश्वित्रकुष्ठदुष्टव्रणप्रणुत्॥ तद्वद्राजिकयोस्तैलं विशेषान्मूत्रकृच्छ्रकृत्॥ राजिकयो:॰ कृष्णराजिकारक्तराजिकयो:॥

साष्टिंता। स्त्री॰ समानर्द्धित्वे। समानैश्वर्य्ये॥

साल:। पुं॰ वृक्षमात्रे॥ प्राकारे॥ सर्ज्जपादपे। सत्युषा॰ इ॰ भा॰ प्र॰॥ सल्यते। चलगतौ। कर्म्मणि घञ्॥ न॰ धूनके॥

सालग्राम:। पुं॰ शालग्रामे॥

सालन:।)
सालनिर्यास:।) पुं॰ धूनके सर्ज्जरसे॥

सालपर्णी। स्त्री॰ सालपर्ण्याम्। विदारिगन्धायाम्॥ इ॰ अ॰ र॰ लौ। साल: पर्णमस्या:। सालशब्दस्य शालपर्णसदृशेलक्षणा। पाककर्णेति ङीष्॥

सालपुष्पम्। न॰ स्थलपद्मे॥

सालरस:। पुं॰ रासे। धूनके॥

सालवेष्टः । पुं॰ धूनके ॥
सालशृङ्गम् । न॰ प्राचीराग्रे ॥
सालसारः । पुं॰ तरौ । हिङ्गुनि ॥
सालिका स्त्री॰ शारिकायाम् ॥ षल॰ । ग्वुल् । ह्रस्वम् ॥
सालोक्यम् । न॰ एकलोकवासे । सलोकतायाम् ॥
साल्मकः । पुं॰ पक्षिविशेषे । गृध्रके । क्षुद्रचूडे ॥
साल्वः । पुं॰ देशविशेषे । तद्देशस्थे पुंभूम्नि॰ कारकुक्षीयेषु ॥ साल्वास्तु कारकुक्षीया मरवस्तु दशेरकाः इति हेमचन्द्रः ॥ पुं॰ नृपतिविशेषे ॥ न॰ मूलविशेषे ॥ साल्वस्य मूलम् । पुष्पमूलेषु बहुलमित्यणो लुक् ॥ अविप्रामाण्यात्साल्वशब्दस्य वस्त्वेऽपि बिल्वादित्वं यथा दिल्लं मा बोध्यम् ॥ त्रि॰ साल्वदेशजे ॥ साल्वेषु भवः । कच्छादिभ्यश्चेत्यण् ॥ यथा॰ साल्वः पदातिव्रजति ॥
साल्वकः । त्रि॰ साल्वदेशजे ब्राह्मणादौ ॥ गवि ॥ यवाग्वाम् ॥ साल्वेषु जातः । अपदातौ साल्वादिति॰ गोयवाग्वोश्चेति वुञ् ॥
साल्वती । स्त्री॰ नाम्नत्र्याम् ॥
साल्वहा । पुं॰ श्रीकृष्णे ।
साल्वेयः । पुं॰ नृपान्तरे ॥ तस्यापत्ये ॥ साल्वेयस्यापत्यं॰ राजा वा । साल्वेयगान्धारिभ्यां चेत्यञ् ॥
सावधानः । त्रि॰ समाहितात्मः कर्णे ॥ अवधानेन सह वर्त्तमानः ॥ सचेतने ॥
सावन । पुं॰ यज्ञकर्मान्ते । यजमाने ॥ प्रचेतसि । वरुणे ॥ दिवसविशेषे । यथा । खरमरीच्युदयद्वयजान्तरं यदिह सावनसंज्ञदिनस्फुटम् ॥ अपिच । अहोरात्रेणचैकेन सावनो दिवसः स्मृत । इति ॥ त्रिंशद्दिनात्मको मासि ॥ त्रिंशतासौरदिवसैः सावनः परिकीर्त्तितः ॥ न॰ सवनसम्बन्धिदिने । सोमयागे सवनत्रयस्याहोरात्रसाध्यत्वात् तत्सम्बन्धिदिनं सावनमिति माधवाचार्यः ॥
सावयवम् । न॰ व्यक्तौ ॥ अवयवेन मवयवो मिथः संश्लेषः मिश्रणं संयोगस्तद्वत् अप्राप्तिपूर्विका प्राप्तिः संयोगः तेन सह वर्तत इति सावयवम् । तथाहि॰ पृथिव्यादय परस्परं संयुज्यन्ते एवमन्येपि । नतु प्रधानस्य बुद्ध्यादिभिः संयोगस्तादात्म्यात् । नापि सत्त्वरजस्तमसां परस्परं संयोगोऽप्राप्तेरभावात् ॥ त्रि॰ अवयवविशिष्टे ॥
सावरः । पुं॰ मृगविशेषे ॥ न॰ तन्मांसे ॥ यथा । मांसं सावरसम्भूतं पाचितं मधुपाचने । वैसवारो जया

क्षीरविकृतेश्चवसम्भृते ॥ बलपुष्टिकरंरुच्यंविष्टम्भिगुरुपाचनम् । सावरंपललंशीतंसुस्वादुकफकृन्मतम् ॥ रसेपाकेचमधुरंरक्तपित्तनिवारणम् तद्भुक्त्वाशर्कराभूयोभक्षणायप्रकल्पते ॥ भावप्रकाशेपि । सावरंपललंस्निग्धंशीतलंगुरुवृष्यमतम् । रसे पाकेचमधुरंकफदंरक्तपित्तहृत् ॥ त्रि० यवरेणसंहिते ॥

सावर्ण्यः । पुं० अष्टममनौ ॥ यथोक्तं देवीभागवते । छायासंज्ञासुतो योऽसौ द्वितीयः कथितो मनुः । पूर्वजस्य सवर्णोऽसौ सावर्ण्यस्तेन कथ्यते ॥ इति ॥

सावर्णिः । पुं० सूर्यतनये । अष्टममनौ ॥ अष्टमेऽन्तर आयाते सावर्णिर्भविता मनुः ॥ सवर्णाया अपत्यम् । अत इञ् । इत्यधिकारे बाह्वादिभ्यश्चेति इञ् ॥ यद्वा । अग्रजस्य वैवस्वतमनोः समानो वर्ण इति सावर्णिः । यथोक्तं विष्णुपुराणे । छायासंज्ञासुतो योऽसौ द्वितीयः कथितो मनुः । पूर्वजस्य सवर्णोऽसौ सावर्णिस्तेन कथ्यते इति ॥ गोत्रविशेषे ॥ यथा । वात्स्यसावर्णिगोत्रयोरौर्वच्यवनभार्गवजामदग्न्याप्नुवतः प्रवरा इत्युद्वाहतत्त्वं ॥

सावर्णिकः । पुं० मन्वन्तरान्तरे ॥ सावर्णः कः प्रकाशो यस्मिन् ॥ अष्टममनौ । सावर्णिकोनाममनुर्भवान् भुवि भविष्यतीत्युक्ते ॥

सावित्रः । पुं० शङ्करे ॥ वसौ ॥ ब्राह्मणे ॥ सूर्ये ॥ गर्भे ॥ न० यज्ञोपवीते ॥ सवितुरयम् । तस्येदमित्यण् ॥

सावित्री । स्त्री० शाल्वदेशीयसत्यवद्राजपत्न्याम् । मद्रदेशीयाश्वपतिराजकन्यायाम् ॥ ब्रह्मपत्न्याम् । सवितुः पृश्न्यामपत्न्यां जातायाम् । उमायाम् ॥ तन्नामकारणं यथा । त्रिदशैरर्चिता देवी वेदयोगेषु पूजिता । भास्करस्वरूपा तु सावित्री तेन सा स्मृतेति देवीपुराणे ४४ ऽध्यायः ॥ गायत्र्याम् ॥ सर्वलोकप्रसवनात् सवितासतु कीर्त्यते । यतस्तद्देवता देवी सावित्रीत्युच्यते ततः ॥ वेदप्रसवनाच्चापि सावित्री प्रोच्यते बुधैरिति वह्निपुराणे ब्राह्मणप्रशंसानामाध्यायः ॥ सन्ध्यायामन्यच्चसमयेच त्यक्तसावित्रीजपः सायंप्रातर्होमादिरूपया स्वकीयक्रियया च स्वकाले त्यक्तो ब्राह्मणः क्षत्रियो वैश्योऽपि सत्यमेव निन्दां गच्छति तस्मात् स्वकाले सावित्रीजपस्वक्रिया न त्यजेत् सवितुरियम् । अण् । ङीप् । प्लक्षद्वीपप्रसिद्धायां नद्याम् ॥

सावित्रीव्रतम् । न॰ ज्येष्ठकृष्णचतुर्द्दश्यामुक्तीकर्त्तव्ये नियमविशेषे । वटसावित्री॰ इ॰ भाषाप्रसिद्धे ॥

सावित्रीसूत्रम् । न॰ यज्ञोपवीते ॥

साशङ्कः । त्रि॰ सभये ॥

साशूकः । पु॰ कम्बले । इ॰ हारावली ॥

साश्रुधीः । स्त्री॰ श्वश्र्वाम् इ॰ त्रि॰ शेषः ॥

सासः । पुं॰ चापविशेषे ॥ असिना धनुषा सह वर्त्तते । तेन सहेति बहुव्रीहिः ॥

सासिः । त्रि॰ सखड्गे ॥ सहासिना वर्त्तते । तेन सहेति तुल्ययोग इति बहुव्रीहिः ॥

सासुसूः । पुं॰ सवाणे ॥ असुसूभिर्वाणैः सहिते ॥

सास्थितान्नर्दम् । न॰ कांस्ये ॥ इ॰ त्रि॰ शेषः ॥

सास्ना । स्त्री॰ गलकम्बले । गवाङ्गलस्थितकम्बलाकृतिमांसे ॥ सस्ति । षस स्वप्ने । रास्नासास्नेति साधुः ॥

साहङ्कारः । त्रि॰ गर्वयुक्ते ॥

साहचर्य्यम् । न॰ साहित्ये । एकस्मिन्नन्वयित्वे । सामानाधिकरण्ये एकाधिकरणवृत्तित्वे ॥ सहचरस्य भावः । ष्यञ् ॥

साहसः । पुं॰ अग्निविशेषे ॥ यथा । प्रायश्चित्ते विधुरश्च वपुःकथने तु साहसः । लक्ष्मीमेतु बर्हिः स्यात्कोटिर्होमे हुताशनः ॥ इति तिथ्यादितत्त्वम् ॥ दमे । दण्डविशेषे ॥ सविविधौ यथा । प्रथमः साहसः स्मृतः । मध्यमः पञ्चविंशश्च सहस्रन्त्वेव चोत्तमः ॥ लोभात् सहस्रं दण्ड्यन्तु मोहात्पूर्वन्तु साहसम् । भयाद्द्वौ मध्यमौ दण्ड्यौ मैत्र्यात्पूर्व्वं चतुर्गुणमिति मानवे साक्षिप्रकरणे ८ ऽध्यायः ॥ न॰ बलात्कारकृतकार्य्ये । बलात्समक्रियमाणे पारुष्यादौ ॥ तथाच नारदः । सहसा क्रियते कर्म यत्किञ्चिद्बलदर्पितैः । तत्साहसमिति प्रोक्तं सहो बलमिहोच्यते ॥ मनुष्यमारणं स्तेयं परदाराभिमर्षणम् । पारुष्यमनृतञ्चेति साहसं पञ्चधा स्मृतमिति ॥ दुष्कृतकर्म्मणि ॥ अविमृष्यकृतौ । पश्चाद्दोषमनालोच्य करणे ॥ द्वेषे ॥ औशानपेक्षितकर्म्मणि । सहसि बले भवम् । तत्र भव इत्यण् ॥ शास्त्रत्यागे

साहसाङ्कः । पुं॰ विक्रमादित्यभूपतौ ॥ साहसिके ॥

साहसिकः । पुं॰ चौरे । अविचार्यकारिणि ॥ बलेन परदारधनादिग्रहणकारिणि ॥ अवराद्युतःक्षमान कार्या । यथाह मनुः । ऐन्द्रं स्थान

मभिप्रेप्सुर्यशश्चाक्षयमव्ययम् । नोपेक्षेत क्षणमपि राजा साहसिकं नरम् ॥ वाग्दुष्टात्तस्कराच्चैव दण्डेनैव च हिंसतः । साहसस्य नरः कर्त्ता विज्ञेयः पापकृत्तमः ॥ साहसे वर्त्तमानन्तु यो मर्षयति पार्थिवः । स विनाशं व्रजत्याशु विद्वेषं चाधिगच्छति ॥ न मित्रकारणाद्राजा विपुलाद्वा धनागमात् । समुत्सृजेत् साहसिकान् सर्वभूतभयावहानिति ॥ सहसा बलेन वर्त्तते । ओजस्सहोम्भसा वर्त्तत इति ठक् ॥

साहसिक्यम् । न॰ सहसाप्रवर्त्तने ॥ साहसिकस्य कर्म्म । ब्राह्मणादित्वात् ष्यञ् ॥

साहसी । त्रि॰ साहसान्विते ॥

साहस्रः । पुं॰ सहस्रसङ्ख्याकगजादिसैन्यवति ॥ सहस्रं बलमस्य । अण् चेत्यण् ॥ न॰ सहस्रद्वन्द्वे सहस्राणां समूहः । भिक्षादिभ्योऽण् ॥ सहस्रमाने ॥ स्वार्थेऽण् । यथा । हरिस्ते साहस्रं कमलबलिमाधाय पदयोर्यदेकोने तस्मिन्निजमुदहरन्नेत्रकमलमिति ॥ त्रि॰ सहस्रगुणाधिके ॥ यथा । विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः । उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृत इति ॥ सहस्रेण क्रीते ॥ शतमानविंशतिकसहस्रवसनाद्-ण् ॥ सहस्रसम्बन्धिनि ।

साहस्रकम् । न॰ तीर्थविशेषे ॥

साहस्रवम् । न॰ तीर्थविशेषे ॥

साहायकम् । न॰ साहाय्ये ॥ सहायस्य कर्म भावो वा । सहायाद्वेति वुञ् । योपधाद्गुरूपोत्तमाद्वुञिति वा ॥

साहाय्यम् । न॰ सहायतायाम् ॥ सहायस्य कर्म भावो वा । ब्राह्मणादित्वात् ष्यञ् ॥ साहाय्यं करयामासेति यथा ॥

साहित्यम् । न॰ मेलने ॥ सहितस्य भावः । ष्यञ् ॥ तल्लक्षणं यथा । परस्परसापेक्षाणां तुल्यरूपाणां युगपदेकक्रियान्वयित्वं साहित्यमिति श्राद्धविवेकः ॥ एकक्रियान्वयित्वं वा ॥ मनुष्यकृतरघुभट्टिमाघादिग्रन्थे । काव्ये ॥

साह्वम् । न॰ साहाय्ये ॥ सह्वशब्दः सहायवाची । राक्षसानां वधे साह्वं लङ्कायाश्च प्रधर्षणे कृतिरामायणवचनात् ॥ सहितत्वे । मेलने ॥

साह्वयः । पुं॰ समाह्वये ॥

सिंहः । पुं॰ मृगेन्द्रे । पञ्चास्ये । कण्ठीरवे ॥ महासिंहे ॥ हिनस्ति । हिंसि हिंसायाम् । पचाद्यच् । पृषोदरादिः ॥ सिंहः प्रमुखानां पाले मुहूर्त्तमाह । श्यामो ष्णशृङ्गिमनुष्याकृतीनामग्निमै

अलघुभगर्कमैन्द्रैः । कर्म-
पालनमुखैर्हिंसपूर्वैः पुण्डरीकमु
खैर्हिंसनखानाम् ॥ इति ॥ प-
ञ्चमराशौ ॥ तल्लग्नोत्पन्नस्य फलं यथा
॥ सिंहलग्ने समुद्भूतो भोगी शत्रु
विमर्दनः । स्वल्पोदरोऽल्पपुत्रश्च
सोत्साही गजविक्रमः ॥ उत्तरस्थः
स्मृतः श्रेष्ठे ॥ रक्तशोभाञ्जने ॥
चर्तांध्वजी ॥ सिद्धति । षिचक्ष
रणे । सिचेः संज्ञायांहनुमीक-
च ॥

सिंहकेलिः । पुं॰ पूर्वजिने । म
ञ्जुघोषे ॥

सिंहकेशरः । पुं॰ बकुले ॥ सिंह
सटायाम् ॥

सिंहतलः । पुं॰ संहतले । सव्यद
क्षिणयोः पाण्योर्मिलितयोर्विस्तृ
ताङ्गुल्योः । प्रतले ॥ सिंहस्येव
तलमच ॥

सिंहतुण्डः । पुं॰ सीहुण्डे । स्नुह्या
म् ॥

सिंहद्वारन् । न॰ प्रवेशद्वारे । प्रवेश
ने । सिंहपौल॰ इ॰ भा॰ प्र॰ ॥
द्वाराग्रे स्तम्भापरिच्छिते । तोरणे ॥

सिंहध्वनिः । पुं॰ सिंहशब्दे ॥

सिंहनादः । पुं॰ युद्धसैन्यानांयोऽ
हङ्काररवः ससिंहनादः । क्ष्वेडा
याम् ॥ सिंहवन्नदनम् । नद॰
। घञ् ॥ सिंहनादोभटानांहि

सिंहवन्नदनंस्मृतम् ॥ गजयूथ
दर्शनात्॰ तद्भङ्गाय॰ यथासिंहस्य
नादस्तथा॰ परबलभङ्गाय॰ स्फोत्सा
हविवृद्धयेचयोरावः ससिंहनादः
॥ कलहंसाख्येछन्दोभेदेगुणगुली ॥

सिंहनादिका । स्त्री॰ दुरालभायाम् ॥

सिंहपर्णी । स्त्री॰ वासके ॥

सिंहपुच्छः । पुं॰ वासके ॥

सिंहपुच्छिका । स्त्री॰ चित्रपर्णिका
याम् । चाकुलिया॰ इ॰ गौ॰
भा॰ ॥

सिंहपुच्छी । स्त्री॰ पृश्निपर्ण्याम् ॥ सिं
हपुच्छाकारपुष्पत्वात् । उपमाना
त्पच्च चपृच्छाञ्चेतिङीष् ॥ माष
पर्ण्याम् ॥ वासके ॥

सिंहपुष्पी । स्त्री॰ पृश्निपर्ण्याम् ॥

सिंहमुखी । स्त्री॰ वासके ॥

सिंहयाना । स्त्री॰ दुर्गायाम् ॥

सिंहरथा । स्त्री॰ दुर्गायाम् ॥

सिंहलः । पुं॰ जम्बुद्वीपस्थोपद्वीपप्र
प्रभेदे । सिलोन॰ इ॰ गौ॰ दे॰
प्र॰ । देशविशेषे ॥ यथा ॥ दक्षिणे
ऽवन्तिमाहेन्द्रमलयाद्र्यम्बुकाः
चित्रकूटमहारण्यकाञ्चीसिंहलकोङ्क
णा इति ॥ देशान्तरेपिच । मरुदे
शात्पूर्वभागेकामाद्रेर्दक्षिणेशिवे ।
सिंहलाख्योमहादेशः सर्वदेशोत्तमो
त्तमः इति ॥ न॰ पित्तलि ॥ रङ्गे

त्वचे ॥ दालचीनी० इ० भा० ॥

सिंहलस्था । स्त्री० सैंहल्याम् ॥ त्रि० सिंहलदेशवासिनि ॥

सिंहलस्थानः । पुं० तालवृक्षसदृशवृक्षविशेषे । प्रोतफले ॥

सिंहलीलः । पुं० रतिबन्धविशेषे ॥ यथा । लिङ्गोपरि स्थितानारीभूमौ दत्त्वापदद्वयम् । हृदयेदत्तहस्ता च सिंहलीलः प्रकीर्त्तितः ॥ लिङ्गोपरिस्थितानारीकान्तोरस्थपदद्वया । हृदयेदत्तहस्ता च सिंहलीलोप्यसावपि ।

सिंहवाहिनी । स्त्री० दुर्गायाम् ॥ यथा । सिंहमारुह्यकल्पान्ते निहतोमहिषोयथा । महिषघ्नीततोदेवीकन्यायांसिंहवाहिनी ॥

सिंहविक्रान्तः । पुं० अश्वे ॥ त्रि० सिंहतुल्यविक्रमवति ॥

सिंहविन्ना । स्त्री० माषपर्ण्याम् ॥

सिंहविलोकितम् । न० मात्रावृत्तान्तरे ॥ शृणु सिंहविलोकितमुत्तमवरं वरयमकमनोहरचरणधरम् । धरणीपतिमानसमधिकलितच्छलवेदचतुष्कलगणललितम् ॥ यथा । दिवसादवसादिततिमिरघनं घनजावलिवोधनिसर्गधनम् । धनदेन्द्रकृतान्तपाशिनमितम्मितभुवनतलंनमदिवसकृतम् ॥ सिंहावलोकिते ॥

सिंहसंहननः । त्रि० वराहरूपोपेते ॥ सिंहसंहननः समञ्जयोर्हिसर्वाङ्गसुन्दरः ॥ सिंहस्येवसंहननंदेहोऽस्य । हटिशब्दीयम् ॥ न० सिंहस्य सम्यग्वधे ॥

सिंहसेनः । पुं० श्रुतार्हत्पितरि ॥

सिंहा । स्त्री० धमन्याम् ॥ नाड्याम् ॥

सिंहाणम् । न० मण्डूरे । लोहमले । सिंहमानयति । आन० । कर्म्मण्यण् । पृषोदरादिः ॥

सिंहाधिपः । पुं० सूर्य्ये ॥

सिंहानम् । न० मण्डूरे ॥ सिंहवदनमिति । अन० अच् ॥

सिंहासनम् । न० हैममयेराजासने । सिंहवदासने ॥ सिंहाकारमासनम् । सिंहद्वयासनम्वा ॥ परासनस्थो ये राजा येराज अनिरासनः सपरैर्हन्यते सिंहैरिवमत्तोगजाधिपः ॥ पुं० रतिबन्धभेदे । यथा । स्वजङ्घाद्वयबाहुभ्यां वेष्टयापदद्वयम् । स्तनौधृत्वारमेत्कामीबन्धः सिंहासनोमतः ॥

सिंहास्यः । पुं० वासके ॥ सिंहास्यमस्य । सिंहास्यसदृशपुष्पत्वात् ॥ त्रि० सिंहसमानमुखे ॥

सिंहिका । स्त्री० राहुमातरि ॥ कश्यपस्य गृहिणी तु सिंहिका राहुनामतनयामजीजनत् । पूर्वजो हरिनिकृत्तकन्धरो देवतैरजनि पातितः

सिंहिकात्मजः ।) पुं॰ राहौवि
सिंहिकासूनुः ।)

धुन्तुदे ॥ वास्तुपुरुषे ॥

सिंहनी । स्त्री॰ मात्रावृत्तान्तरे । यदिगाथातुर्यपदं विंशतिमात्रं चगाथिनीभवति । फणिपतिपिङ्गलभणितंतदुदीरितन्तु सिंहिनीवृत्तम् । यथा । पर्याप्ताजलधाराविरमति मचञ्चलोचनेजलधारा । जगमुःप्रसादमाशास्तदपिनमेभवतिजीविताशा ॥

सिंही । स्त्री॰ कण्टकार्याम् । वार्त्ताकी । वासके ॥ राहुमातरि ॥ हिनस्ति । हिंसी॰ पचाद्यच् । पृषोदरादिः । गौरादिः ॥ सुवर्णवर्णवराटके । मुद्गपर्ण्याम् ॥

सिंहीलता । स्त्री॰ वृहत्याम् ॥

सिंहोद्धता । स्त्री॰ शक्करीछन्दोभेदे १४ । वसन्ततिलके ॥

सिकता । स्त्री॰ सिकतिले॰ देशे ॥ सिकताऽस्त्यत्र । देशेलुविलचौचेति॰ सिकताशर्कराभ्याञ्चेतिविहितस्याणोलुप् ॥ इति ॥

सिकताः । स्त्री॰ भूम्नि ॥ वालुकायाम् ॥ सिच्यते । षिच्क्षरणे । बाहुलकादतच् । पृषोदरादिः ॥

सिकतामयम् । न॰ वालुकामयदेशे । सैकते ॥ सिकतानांविकारः । मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोरितिमयट् ॥

सिकतावान् । त्रि॰ वालुकाबहुलेदेशे सैकते ॥ पङ्कप्रायमृदधिकेदेशे ॥ सिकताऽस्त्यत्र । मतुप् ॥

सिकतिलः । त्रि॰ सिकतावति ॥ सिकताऽस्त्यत्र । देशेलुविलचौचेति॰ इलच् ॥

सिक्तः । त्रि॰ अभिषिक्ते । कृतसेचने । सेकाश्रये ॥ सिचेः क्तः ॥ एकोमुनिः कुम्भकुशाग्रहस्तआम्रस्यमूलेसलिलंददानः । आम्रश्चसिक्तः पितरश्चतृप्ताएकाक्रियाद्व्यर्थकरीप्रसिद्धा ॥

सिक्थः । पुं॰ भक्तपुलाके । ग्रासे ॥ न॰ मधूच्छिष्टे । मेण॰ सिथा॰ इ॰ भा॰ प्र॰ गोम॰ इतिच । नील्याम् ॥ सिञ्चति । सिच्यतेवा । षिच॰ । पातृतुदिवचिरिचिसिचिभ्यस्थक् ॥

सिक्थकम् । न॰ सिक्थे ॥ स्वार्थेकः ॥

सिक्थवर्त्तिका । स्त्री॰ मधूच्छिष्टवर्त्तिकायाम् । सिक्थदीपे । सिक्थस्यवर्त्तिका ॥

सिङ्घाणम् । न॰ सिङ्घाणे ॥

सिक् । स्त्री॰ वस्त्रे ॥

सिचयः । पुं॰ वस्त्रे ॥ जीर्णवस्त्रे ॥

सिध्मन् । त्रि॰ स्नपयति ॥ षिचेः मन्प्रत्ययः ॥

सिञ्चिता । स्त्री॰ पिप्पल्याम् ॥

सितः । पुं॰ शुक्रग्रहे ॥ अवदाते । गौरवर्णे ॥ बाणे । शरे ॥ न॰ चन्दने । रूप्ये ॥ मूलके ॥ त्रि॰ समाप्ते । अवसिते ॥ शुक्लवर्णविशिष्टे । धवले ॥ बद्धे । बंधा॰ ज्ञ॰ भा॰ ॥ ज्ञाते । सीयतेस्म । षिञ् बन्धने । क्तः । इति ॥ षो॰ क्तः । द्यतिस्यतीमास्थां षा ॥ सितोसितो । अच्छिद्यृषिभ्य : क्तः ॥ समाप्ते ॥

सितकण्टा ।)
सितकण्टारिका) स्त्री॰ श्वेतकण्टकार्याम् ॥

सितकण्ठः । पुं॰ दात्यूहपक्षिणि ॥

सितकरः । पुं॰ चन्द्रे । कर्पूरे ॥

सितकर्णी । स्त्री॰ वासके ॥

सितकुञ्जरः । पुं॰ इन्द्रे ॥ इन्द्रगजे ॥

सितगङ्गा । स्त्री॰ कामरूपप्रसिद्धनदीविशेषे । स्वर्धायाम् ॥ इ॰ कालिकापुराणम् ॥

सितगुञ्जा । स्त्री॰ श्वेतगुञ्जायाम् । काकपीली ॥

सितचिह्नः । पुं॰ वालुकागड॰मत्स्ये ॥

सितच्छत्रम् । न॰ नृपच्छत्रे ॥

सितच्छत्रा । स्त्री॰ शतपुष्पायाम् ॥ सितं बद्धं शुभ्रं वा छत्रमस्याः ॥

सितच्छत्रितः । त्रि॰ श्वेतच्छत्रयुक्ते ॥

सितच्छदः । पुं॰ हंसे ॥ श्वेतच्छदविशिष्टे ॥ त्रि॰ सिताः शुभ्राः छदा यस्य ॥

सितच्छदा । स्त्री॰ श्वेतदूर्वायाम् ॥

सिततुरगः । पुं॰ अर्जुनाख्यपाण्डवे ॥

सितदर्भः । पुं॰ श्वेतकुशे ॥

सितदीप्यः । पुं॰ श्वेतजीरके ॥

सितधातुः । पुं॰ कठिन्याम् ॥

सितपक्षः । पुं॰ हंसे । शुक्लपक्षे । त्रि॰ तद्वति ॥

सितपर्णी । स्त्री॰ अर्कपुष्पिकायाम् ॥

सितपाटलिका । स्त्री॰ काष्ठपाटलायाम् ॥

सितपुङ्खा । स्त्री॰ श्वेतशरपुङ्खायाम् ॥

सितपुष्पः । पुं॰ तगरवृक्षे ॥ श्वेतरोहिते ॥ काशे ॥ न॰ कैवर्त्तीमुस्तके ॥

सितपुष्पा । स्त्री॰ मल्लिकायाम् ॥

सितपुष्पी । स्त्री॰ श्वेतापराजितायाम् ॥ नागदन्त्याम् ॥

सितमरिचम् । न॰ शिग्रुबीजे ॥ शुभ्रमरिचे ॥

सितमाषः । पुं॰ राजमाषे ॥

सितरञ्जनः । पुं॰ पीतवर्णे ॥

सितरश्मिः । पुं॰ चन्द्रे ॥

सितवर्षाभूः । पुं॰ पुनर्नवायाम् ॥

सितशाखी । पुं० अर्जुने ॥

सितशिंशपा । स्त्री० श्वेतशिंशपायाम् ॥

सितशिम्बिकः । पुं० गोधूमे ॥

सितशूरणः । पुं० वनजीले ॥

सितसर्षपः । पुं० [illegible]षे । सिद्धार्थे ॥

सितसायका । स्त्री० श्वेतशरपुङ्खायाम् ॥

सितसारः । पुं० शालिञ्चशाके ॥

सितसारकः । पुं० तिन्दुके ॥ शालिञ्चे ॥

सितसिंही । स्त्री० श्वेतकण्टकार्याम् ॥

सितसिन्धुः । स्त्री० गङ्गायाम् ॥

सिता । स्त्री० शर्करायाम् ॥ सिनोति । षिञ् बन्धने । अञ्जिघृसिभ्यः क्तः । टाप् । शुभ्रवर्णत्वाद्वा ॥ खण्डन्तु सिकतारूपं सुश्वेतं शर्करा सिता । सिता सुमधुरा रुच्या वातपित्तास्रदाहहृत् ॥ मूर्च्छाच्छर्दिज्वरान् हन्ति सुशीता शुक्रकारिणी ॥ मल्लाम् ॥ तेजन्याम् ॥ जरायाम् ॥ गिरिजातापराजितायाम् ॥ बाकुच्याम् ॥ त्रायमाणायाम् ॥ मद्ये ॥ पिङ्गायाम् ॥ विदार्याम् ॥ सितकण्टकार्याम् ॥ श्वेतदूर्वायाम् ॥ चन्द्रिकायाम् ॥ कुटुम्बिन्याम् ॥ गङ्गायाम् ॥

सितांशुः । पुं० चन्द्रे ॥ कर्पूरे ॥

सितांशुतैलम् । न० कर्पूरतैले ॥

सिताखण्डः । पुं० मधुशर्करायां ॥

सिताङ्कः । पुं० वालुकागडमत्स्ये ॥

सिताङ्गः । पुं० श्वेतरोहिते ॥

सिताजाजी । स्त्री० श्वेतजीरके ।

सितादिः । पुं० गुडे ॥ सितायाः आदिः ॥

सितानन । पुं० गरुडे ॥

सितापाङ्गः । पुं० मयूरे ॥

सिताब्जम् । न० श्वेतकमले ॥

सिताभः । पुं० कर्पूरे ॥

सिताभ्रः । पुं० हिमवालुकायाम् । कर्पूरे ॥ सितं श्वेत्य० बन्धनं वा० चन्द्रं वा० अभ्र त । अभ्रगतौ । कर्मण्यण् ॥ शुक्लत्वात् । सिताभ्रमिवेव वा ॥

सिताभ्रकम् । न० कर्पूरे ॥

सिताम्बरः । पुं० श्वेतवस्त्रपरिहितव्रतिनि ॥ त्रि० शुक्लवस्त्रवति ॥

सिताम्भोजम् । न० शुक्लपद्मे । पुण्डरीके । सितं शुक्लं तदम्भोजञ्च ॥

सितार्जकः । पुं० श्वेततुलस्याम् । कुठेरके ॥

सितालता । स्त्री० श्वेतदूर्वायाम् ॥

सितालर्कः । पुं० श्वेतमन्दारे ॥

सितालिकटभी । स्त्री० शुक्तिकायां
वृक्षे ॥

सिताम्बर : । पुं० सूचीपत्रके । श्वे
ताम्बरके । सितं वासो यस्य तादृशे
मुनिवर्ये ॥

सितावरी । स्त्री० वाकुच्याम् ॥

सितासित : । पुं० बलभद्रे । हला
युधे ॥

सिताह्वय: । पुं० श्वेतशिग्रौ ॥ श्वे
तरोहिते ॥

सितेक्षु : । पुं० श्वेतेक्षौ ॥

सितेतर : । पुं० कृष्णशालौ ॥ कु
लत्थे ॥ कृष्णे । त्रि० कृष्णवर्ण
वति ॥

सितेतरगति : । पुं० वह्नौ ॥

सितोद : । पुं० सरोविशेषे ॥ वि
पुलाख्यस्याद्रेर्मूले वैभ्राजाख्यं वनं त
त्र सितोदं नाम सर: । यदर्क का
न्तिभिरङ्गैर्मण्डितं सुरैरासेव्यते ।
तदुक्तम् । वैभ्राजं वै पुलिनमूले सितो
दश्च सरोत्तम: । देवैर्निषेव्यते क
न्न: कमलैरंशुमत्प्रभैरिति ॥ सि
तमुदकं यस्य । उत्तरपदस्य चेत्युद
कस्योदादेश: ॥

सितोदक : । पुं० सितोदे ॥ स्वा
र्थे क: ॥

सितोदर : । पुं० कुवेरे ॥

सितोपल : । पुं० स्फटिके ॥ शि
लाधातौ ॥ सितावमणि । मि

श्री० चीला० इ० भाषाप्रसिद्धा ॥

सितोपला । स्त्री० शर्करायाम् ॥
शर्कराविकारभेदे । मिश्रीतिलो
कविश्रुते ॥ सितोपलासरालघ्वी-
वातपित्तहरी हिमा । यथायथाऽस्य
नैर्मल्यं मधुरत्वं तथातथा ॥ स्नेह
लाघवशैत्यानि सरत्वञ्च तथातथा ॥

सिद्ध: । पुं० व्यासादौ ॥ देवयोनि
विशेषे । अणिमादिगुणोपेते वि
श्वावसुप्रभृतौ ॥ विष्कम्भादियो
गान्तरगतयोगविशेषे ॥ तत्काल
स्य फलं यथा । जितेन्द्रिय: सर्व
कलानिधानो गौरोऽतिशूरो मधुरो
विनीत: । सत्त्वोपपन्न: कृतभू
रिभोगो यस्य प्रसूतौ किल सिद्धयोग
। इति ॥ गुडे षसेधात् इति
सिद्ध: षिधु हिंसासंराद्ध्यो: । ग
त्यर्थाकर्मकेति कर्त्तरि क्त: । सि
द्धिरस्यास्तीति वा । अर्श आद्यच् ॥
कृष्णधत्तूरे ॥ व्यवहारे ॥ क्ली० ।
शब्दं शृणोमीत्यादिव्यवहारेण प्रसि
द्धे । न० सैन्धवलवणे ॥ त्रि०
योगिनि ॥ जन्मनैव विनाप्रय-
त्नं धर्मज्ञानवैराग्यैश्वर्यातिशयं
प्राप्ते ॥ पूर्णमनोरथे ॥ अधिग
तपरमार्थे । पुत्रभृत्यादिभि:
सहायै: सम्पन्ने ॥ प्रसिद्धे ॥
नित्ये । यथा सिद्धा द्यौ: सिद्
धा पृथिवी० सिद्धमाकाशमिति

॥ कार्य्येष्वविघ्नत्वंते । तद्यथासि
द्धमोदनः सिद्धः सूपः सि
द्धायवागूरिति ॥ मुक्ते ॥ नि
ष्पन्ने । पक्वे ॥ सिध्यतिस्म ।
षिधु संराद्धौ । क्तः । सिद्धे
साधनाप्रयोगः ॥ सर्व्वभूतादौवि
शुद्धेपरमेश्वरे ॥ उत्पत्त्या
लब्धात्मकंघटादिसिद्धमित्युच्य
ते० परमात्मातु० सर्व्वदालब्धस
त्ताकः सर्व्वेषुप्रमाणाभावा
दितिनित्यनिष्पन्नरूपत्वान्नित्यसिद्
धइत्युच्यते ॥ सिद्धिर्मोक्षोज्ञानं
वातद्भवमोक्ष्वरस्ततः सिद्धइ
त्यनन्याधीनसिद्धत्वात्सिद्धोवा
॥ सिद्धिविशिष्टे ॥

सिद्धकः । पुं० शालवृक्षे ॥ सिन्धु
वारे ॥

सिद्धकामेश्वरी । स्त्री० कामाख्यायाः
पञ्चमूर्त्त्यन्तर्गतप्रथममूर्त्तौ ॥

सिद्धकेरलः । पुं० केरलदेशान्तर्ग
तदेशविशेषे

सिद्धगङ्गा । स्त्री० मन्दाकिन्याम् ॥

सिद्धजलम् । न० काञ्जिके । पक्व
तोये ।

सिद्धदेवः । पुं० शिवे ।

सिद्धधातुः । पुं० पारदे ॥

सिद्धपीठः । पुं० सिद्धस्थाने ॥
यथा । ज्ञानोलचनलियंतङ्ठोमेवा
कोटिसङ्ख्यकः । महाविद्याजपः
कोटिः सिद्धपीठः प्रकीर्त्ति
तइति ॥

सिद्धपुरम् । न० भूगोलस्याधोदेश
विशेषे ॥ तच्चोत्तरकुरुवर्षस्यनिर
च्छदेशेऽस्ति ॥ यथा । लङ्कापुमध्ये य
मकोटिरस्याः प्राक्पश्चिमेरोमक
पत्तनञ्च । अधस्ततः सिद्धपुरंसु
मेरुः सौम्येऽथयाम्येबडवानलश्च
॥ कुवृत्तपादान्तरितानितानिस्था
नानिषट्गोलविदोवदन्ति ॥

सिद्धपुरी । स्त्री० सिद्धपुरे ॥

सिद्धपुष्पः । पुं० करवीरवृक्षे ॥

सिद्धप्रयोजनः । पुं० गौरसर्षपे ॥
त्रि० लब्धकार्य्ये ॥ सिद्धंप्रयोज
नंयेन० यस्यवा ॥

सिद्धमन्त्रः । पुं० सिद्धिप्रापमन्त्रे

सिद्धमोदकः । पुं० तवराजोद्भवख
गुडे ॥

सिद्धयोगिनी । स्त्री० योगिनीविशेषे ॥

सिद्धरसः । पुं० पारदे । रसे ॥ त्रि०
व्याडिप्रभृतिषु ॥ सिद्धश्चासौर
सश्च ॥ सिद्धोरसोयेषाम् ॥

सिद्धविद्या । स्त्री० दुर्गायाम् ॥ म
हाविद्यायां ॥

सिद्धसङ्घः । पुं० कपिलादिसिद्धा
नांसमूहे ॥

सिद्धसलिलम् । न० काञ्जिके ॥

सिद्धसाधनः । पुं० गौरसर्षपे ॥
न० सिद्धस्यवस्तुनः साधने । सा

ध्यवस्त्वानिश्चयेसत्त्वेप्यनुमाने ॥

सिद्धसिन्धुः । स्त्री॰ धर्म्मद्रव्याम् । गङ्गायाम् । आकाशगङ्गायाम् ॥ सिद्धानांसिन्धुः ॥

सिद्धसेनः । पुं॰ कार्त्तिकेये ॥

सिद्धसेवितः । पुं॰ भैरवे ॥ त्रि॰ कपिलादिसिद्धोपासिते ॥

सिद्धा । स्त्री॰ ऋद्ध्याख्यौषधौ ॥ सिद्धिरस्त्यस्याम् । अर्शआद्यच् टाप् ॥ योगिनीविशेषे ॥

सिद्धान्तः । पुं॰ वक्तृतात्पर्यविषयावधारणे ॥ पूर्वपक्षंनिरस्यसिद्धपक्षस्थापने । वादिप्रतिवादिभ्यां निर्णीतेर्थे ॥ सिद्धान्तंलक्षयति गोतमोयथा । तन्त्राधिकरणाभ्युपगमसंस्थितिः सिद्धान्तइति ॥ अस्यार्थः । तन्त्रंशास्त्रंतदेवाधिकरणंज्ञापकतयायस्य॰ तादृशोयोभ्युपगमः॰ तस्यसमीचीनतयाऽसंशयरूपतयास्थितिः॰ तथाचशास्त्रितार्थनिश्चयः सिद्धान्तः । अत्र चाभ्युपगम्यमानोर्थः सिद्धान्तइति भाष्यम् । अभ्युपगमः सिद्धान्तइतिवार्त्तिकटीका । नचात्रविरोधः शङ्कनीयः । आचार्यैः परिहृतत्वात् । तथाचविसूत्रीनिबन्धः । अर्थाभ्युपगमयोगुणप्रधानभावस्याविवक्षितत्वात्॰ अर्थाभ्युपगमोऽभ्युपगम्यमानोवार्थः सिद्धान्तः॰ तेनसूत्रभाष्यवार्त्तिकटीकासुनविरोधः । अत्रचभाष्यानुसारात्सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमः सिद्धान्तान्यतमः सिद्धान्तइति सूत्रार्थइतितुनयुक्तम् अग्रिमसूत्रानुत्थानापत्तेः । तंचसिद्धान्तत्वेनद्वयमनुगम्यतंत्राधिकरणाभ्युपगमान्यतमसिद्धान्तइतिकश्चित् ॥ २६ ॥ सिद्धान्तंविभजते । सर्वतन्त्रप्रतितन्त्राधिकरणाभ्युपगमसंस्थितीनामर्थान्तरभावात् ॥ २७ ॥ सचतुर्विधइतिशेषः । सर्वतन्त्रादिसंस्थितीनामर्थान्तभावात्॰ भेदादित्यर्थः ॥ २७ ॥ राद्धान्ते ॥ सिद्धोऽन्तोनिश्चयोयस्मिन् ॥ नरशिवज्योतिषन्येषु । ब्रह्मसूर्यसोमबृहस्पतिगर्गनारदपराशरपुलस्त्यवशिष्ठसिद्धान्तेषु ॥

सिद्धान्ताचारः । पुं॰ वामाचारादुत्तमआचारविशेषे ॥ यथा । आत्मानंदेवतांमत्वायजेद्देवीमनन्यसैः । सदाशुद्धः सदाशान्तः सिद्धांताचारउच्यते॰ इत्याचारभेदतन्त्रम् ॥

सिद्धान्ती । पुं॰ मीमांसके ॥ सिद्धान्तोविद्यतेऽस्य ॥ इनिः ॥

सिद्धापगा । स्त्री॰ स्वर्णद्याम् । गङ्गायाम् ॥

सिद्धायिका । स्त्री॰ जिनशासनदेव

तविशेषे ॥

सिद्धार्थः । पुं॰ विष्णौ ॥ सिद्धो निर्वृत्तो निष्पन्नः काम्यमानोऽर्थोऽस्य । आप्तकामत्वादिति ॥ स्कन्दे । सितसर्षपे ॥ शाक्यसिंहे । शौद्धोदनौ ॥ वृत्तार्हत्पितरि ॥ जिनमतप्रसिद्धौ चैत्ये ॥ सिद्धार्थोऽस्मादस्य ॥ वत्सरविशेषे ॥ तत्फलं यथा । तोयपूर्णाः स्मृता मेघा बहुसस्या च मेदिनी । निष्ठुरा पार्थिवा देवि सिद्धार्थे वत्सरानने ॥ ५२ ॥ त्रि॰ प्रसिद्धार्थे ॥

सिद्धार्था । स्त्री॰ वृत्तार्हन्मातरि ॥

सिद्धासनम् । न॰ ब्रह्मणि ॥ सिद्धं यत्सर्वभूतादिविश्वाधिष्ठानमव्ययम् । यस्मिन्सिद्धाः समाविष्टास्तद्वै सिद्धासनं विदुः ॥ सिद्धश्च तदासनश्च । सिद्धानामासनं वा । कर्मधारयतत्पुरुषाभ्याम्॰ ब्रह्मवैवर्त्ते ॥ योगिनामासनविशेषे ॥ यथा । योनिस्थानकमङ्घ्रिमूलघटितं कृत्वा दृढं विन्यसेन्मेढ्रे पादमथैकमेव हृदये कृत्वा समं विग्रहम् । स्थाणुः संयमितेन्द्रियोऽचलदृशा पश्यन्भ्रुवोरन्तरे तिष्ठेदेतदतो हि योगिसुखदं सिद्धासनं प्रोच्यते॰ इति ॥ योनिस्थानकमिति । एकं पादमूलं लिङ्गमूले॰ द्वितीयं पादमूलं तथा ध्वजस्यार्थः ॥

सिद्धिः । स्त्री॰ निष्पत्तौ ॥ पादुकायाम् ॥ अन्तर्धौ ॥ वृद्धौ ॥ ऋद्धौ नामौषधौ ॥ दुर्गायाम् ॥ सम्पत्तौ ॥ योगे ॥ साङ्ख्यानामष्टविधसिद्धौ । यथा । ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः सुहृत्प्राप्तिः । दानञ्च सिद्धयोऽष्टौ । सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः ॥ विहन्यमानस्तु दुःखत्रित्वात्तद्विघातास्त्रय इति । इमा मुख्यास्तिस्रः सिद्धयः । तदुपायतया चेतरा गौण्यः पञ्च सिद्धयः । ता अपि हेतुहेतुमत्तया व्यवस्थिताः । तत्राद्याध्ययनलक्षणा सिद्धिर्हेतुरेव । मुख्यास्तु हेतुमत्य एव । मध्यमास्तु हेतुहेतुमत्यः ॥ पुम्प्रकृत्यादिविषया बुद्धिर्या सिद्धिरत्र सा । पुंस्यात्मनि॰ प्रकृतावव्यक्ते॰ आदिग्रहणाद् व्यक्ते च या बुद्धिर्विज्ञानं सा सिद्धिरित्युच्यते ॥ यात्रायोगान्तरे ॥ यथा वर्गोत्तमगते लग्ने शुभे वाथ बलान्विते । सिद्धिसंज्ञोऽमृतायोगो यायिनां सिद्धिदायकः । इति ॥ राज्ञां गुणित्रयसाध्यासु पुरुषार्थलाभात्मिकासु॰ प्रभुसिद्धिमन्त्रसिद्ध्युत्साहसिद्धिषु ॥ सहायाः साधनोपाया विभागो देशकालयोः विनिपातप्रतीकारः सिद्धिः पञ्चाङ्गमिष्यते ॥ तथा च । कर्मणामारम्भोपायः । पुरुषद्रव्यसम्पत् । देशकालविभागः । विनिपातप्र

नीकार:। कार्यसिद्धिरस्त्वेति नीतिशास्त्रविद:॥ मोक्षे॥ सत्त्वशुद्धिद्वाराज्ञानोत्पत्तौ॥ ब्रह्मभावलक्षणायाम्। पुरुषार्थप्राप्तियोग्यतारूपायामन्त:करणशुद्धौ। ज्ञाननिष्ठालक्षणायाम्॥ सिद्ध्यति। षिधु संराद्धौ। क्तिच्। यद्वा। कारणे क्तिन्॥

सिद्धिद:। पुं॰ प्रत्यगभिन्नब्रह्मापरोक्षज्ञानद्वारा स्वस्वरूपावस्थानलक्षणमुक्तिप्रदे श्रीगुरौ॥ परमेश्वरे॥ सिद्धिम् फलं कर्तृभ्य: स्वाधिकारानुरूपतो ददाति। डुदाञ्॰। आतद्वातिक:॥ भैरवे॥ त्रि॰ सिद्धिदातरि॥

सिद्धियोग:। पुं॰ शुभयोगविशेषे॥ यथा। शुक्रे नन्दा बुधे भद्रा॰ शनौ रिक्ता॰ कुजे जया। गुरौ पूर्णा च संयुक्ता॰ सिद्धियोग: प्रकीर्त्तित:॥

सिद्धियोगिनी। स्त्री॰ योगिनीविशेषे। वह्निपुराणोक्तामुद्गलस्यप श्चामृतकन्यासु

सिद्धिस्थानम् न॰ पुण्यस्थानविशेषे॥

सिद्धेश:। पुं॰ कपिलमुनौ॥ सदाशिवे॥ सिद्धानामीश:॥

सिद्धेश्वर:। पुं॰ शिवे॥

सिद्धेश्वरी। स्त्री॰ देवीविशेषे

सिद्धौघ:। पुं॰ गुरुक्रमविशेषे॥

सिध्मम्। न॰ किलासरोगे। सिद्धवा॰ इ॰प्र॰॥ सिध्यति। षिधु संराद्धौ। बाहुलकान्मक्॥

सिध्मा। पुं॰ न॰ किलासरोगे॥ सिध्मा किलासं त्वक्पुष्पं सिध्ममिति हेमचन्द्र:। किलासं सिध्म इत्यमर:॥

सिध्मल:। त्रि॰ किलासिनि॥ सिध्ममस्यास्ति। सिध्मादिभ्यश्चेति लच्॥

सिध्मला। स्त्री॰ मत्स्यविकृतौ। मत्स्यचूर्णे॥

सिध्मवान्। त्रि॰ सिध्मले॥ सिध्ममस्त्यस्य। मतुप्॥

सिध्य:। पुं॰ पुष्यनक्षत्रे॥ सिध्यन्त्यस्मिन् कार्याणि। षिधु॰। पुष्यसिद्ध्यौ नक्षत्रे इति क्यपि निपातित:॥

सिध्र: पुं॰ वृक्षे॥ साधौ॥ सिध्यति। षिधु॰। स्फायितञ्चीतिरक्॥

सिध्रका। स्त्री॰ सीध इति भाषाप्रसिद्धे वृक्षे। सेधति॰ सिध्यते वा। षिधु॰। बहुलमन्यत्रापीति॰ स्फायितञ्चीति वा रक्। तत: स्वार्थे कन्। क्षिपकादित्वादित्वाभाव:॥

सिध्रकारण्यम्। न॰ देवोद्याने

सिध्रकावणम्। न॰ सिध्रकारण्ये॥ सिध्रकाणां वनम्। वनम्पुरगामिश्रकेत्युत्तरपदस्थस्य नस्य णत्वम्॥

सिन:। पुं॰ ग्रासे॥ पिण्डीक्रियमाणो ग्रासो यदा दध्यादिव्यञ्जनस्य ग्राहन्यनेनुकूलो भवति तदा कर्मण: कर्त्तृत्वम्। तथाच सिनोतेर्ग्रासक

संकर्षेतिनिष्ठातस्यनः ॥ कार्ये ॥ सिनोति । षिञ्० । कृणषिञ्तनक् ॥ त्रि० शुक्लगुणविशिष्टे ।

सिनी । स्त्री० शुक्लगुणवत्याम् ! श्वेतासितासिनीश्येनीतिव्याडिः ॥

सिनीवाली । स्त्री० दृष्टेन्दुकलामायाम् ॥ चतुर्दशीयोगदृष्टचन्द्रासती० अमा० सिनी० वालीपदवाच्य भवति । एतद्विषयानामन्यर्त्तैसालक्ष्मीः । तद्योगात्सिनीचन्द्रकला । अस्या इत्वादिनि: । सिनीवलति । वल० । कर्म्मण्यण् । ङीप् ॥ दुर्गायाम् । इ० मे० नी० ॥

सिन्दुकः पुं० । सिन्दुवारे ॥ स्यन्दते । स्यन्द प्रस्रवणे । स्यन्दे : सम्प्रसारणञ्चेत्युः । बाहुलकात् बधोन । स्वार्थसंज्ञायांवाकन् ॥ श्वेतनीलपुष्पभेदात्सिन्दुकोद्विविधोमतः ।

सिन्दुवारः । पुं० निर्गुण्ड्याम् । सिन्दुके । म्यौंडी० सञालू० बहुला० इ० भा० प्र० ॥ निसिन्दा० इन्द्रसुर० इ० गौ० दे० भा० ॥ सिन्दुं वृणोति० वारयति वा । वृञ् वरणे वृञ् आवरणे वा । कर्म्मण्यण् ।

सिन्दूरः । पुं० वृक्षविशेषे ॥ न० रक्तवर्णचूर्णविशेषे । नागसम्भवे । सीमन्तके ॥ तद्धारणात्स्त्र्याम्यायुषोडशविभूषणयथोक्तं काशीखण्डे । हरिद्राकुङ्कुमञ्चैव सिन्दूरं कज्जलं तथा । कार्पासकञ्च ताम्बूलं माङ्गल्याभरणं शुभम् ॥ केशसंस्कारकबरीकरकर्णविभूषणम् । भर्त्तुरायुष्यमिच्छन्ती दूषयेन्न पतिव्रतेति ॥ अस्य पर्य्यायादयो यथा । सिन्दूररक्तरेणुश्च नागगर्भश्च सीसजम् । सीसोपधातुः सिन्दूरं गुणैस्तत्सीसवन्मतम् ॥ संयोगजप्रभावेण तस्याप्यन्ये गुणाः स्मृताः । सिन्दूरमुष्णं वीसर्पकुष्ठकण्डूविषापहम् ॥ भग्नसन्धानजननं व्रणशोधनरोपणम् ॥ अस्य शोधनं यथा । दुग्धाम्लये गतस्तस्य विशुद्धिर्गदिता बुधैरिति ॥ स्यन्दते । स्यन्द० । स्यन्दे सम्प्रसारणञ्चेत्यूरन् ॥

सिन्दूरकारणम् । न० सीसके ॥

सिन्दूरतिलकः । पुं० मतङ्गजे । हस्तिनि ॥

सिन्दूरतिलका । स्त्री० सधवायां नार्य्याम् ॥

सिन्दूरपुष्पी । स्त्री० सिन्दूरीतिख्याते पुष्पक्षुपविशेषे । तृणपुष्प्याम् । करक्तदायाम् ॥ अस्या गुणाः । कटुत्वम्० तिक्तत्वम्० कषायत्वम्० श्लेष्मवातशिरोऽर्त्तिभूतनाशित्वम्० चण्डीप्रियत्वञ्चेति ॥ सिन्दूरवत् पुष्पाण्यस्याः । पाककर्णेतिङीष् ।

सिन्दूररसः। पुं॰ रससिन्दूराभिधौषधे।

सिन्दूरितः। त्रि॰ सिन्दूरवत्कृते॥ सिन्दूरवच्छब्दात् तत्करोतीतिण्यन्तात्कर्मणि क्तः। णाविष्ठवद्भावात्॰ विन्मतोर्लुक्॥

सिन्दूरी। स्त्री॰ रोचन्याम्॥ रक्तचेलिकायाम्॥ धातक्याम्॥ सिन्दूरीविषपित्तास्रतृष्णावान्तिहरी हिमा॥

सिन्धुः। पुं॰ अब्धौ। समुद्रे॥ स्यन्दन्ते॰आपोऽत्र। स्यन्द॰। स्यन्देः सम्प्रसारणं धश्चेत्युः॥ वमथौ॥ रामेणभरतायार्पितदेशविशेषे॥ काश्मीरदेशप्रसिद्धेनदविशेषे॥ गजमदे॥ सिन्धुवारवृक्षे॥ रागविशेषे॥ श्वेतटङ्कने॥

सिन्धुः। स्त्री॰ नद्यां। सरिति॥ नदीविशेषे॥ तज्जलगुणायथा। शतद्रोर्विपाशायुज सिन्धुनद्याः सुशीतं लघुस्वादुसर्वामयघ्नम्। जलं निर्मलं दीपनं पाचनञ्च प्रदत्ते बलं बुद्धिमेधायुषञ्च॥

सिन्धुकः। पुं॰ सिन्दुके। निर्गुण्डाम्॥ सिन्धुशब्दात्स्वार्थे संज्ञायां वाकन्। गुणायथा। सिन्धुकः स्मृतिदस्तिक्तः कषायः कटुकोलघुः। केश्योनेत्रहितोहन्तिशूलशोथाममारुतान्॥ क्रिमिकुष्ठारुचिघ्नश्चक्षुष्यास्त्रिलापितद्विधा॥ सिन्धुवारजलं जन्तुवातघ्नं श्मष्टं लघु॥ त्रि॰ सिन्धुषुजाते॥ सिन्धुपक्षराभ्यां कन्॥

सिन्धुकफः। पुं॰ समुद्रफेने॥

सिन्धुप्रभवः। पुं॰ तीर्थविशेषे॥

सिन्धुरम्। न॰ श्वेतटङ्कने॥

सिन्धुखिलः। पुं॰ सिन्धुदेशे॥

सिन्धुजम्। न॰ सैन्धवलवणे॥ सिन्धुषुजातम्॥ सप्तम्यांजनेर्डः॥ त्रि॰ समुद्रजाते॥

सिन्धुजन्मा। पुं॰ चन्द्रे॥ न॰सैन्धवलवणे॥

सिंधुजा। स्त्री॰ लक्ष्म्याम्॥

सिंधुडा। स्त्री॰ मालवरागभार्यायाम्॥

सिंधुनन्दनः। चन्द्रे॥

सिंधुपुत्रः। पुं॰ चन्द्रे॥ मर्कटेन्दौ॥

सिंधुपुष्पः। पुं॰ शङ्खे॥

सिंधुमन्थजम्। न॰ सैन्धवलवणे॥

सिंधुरः। पुं॰ हस्तिनि॥

सिंधुरद्वेषी। पुं॰ सिंहे॥

सिंधुरवदनः। पुं॰ श्रीगणेशे॥

सिंधुराजः। पुं॰ समुद्रे॥

सिंधुलवणम्। न॰ सैंधवे॥

सिंधुवारः। पुं॰ उत्तमाश्वे॥ सिंधुवारे। निर्गुण्डाम्॥ सिंधुवा रोविषघ्नः प्रव्रणकुष्ठक्षयापहः॥ सिंधुं वृणोति॰ वारयतिवा। वृञ्

आच्छादनेभ्य । कर्मण्यण् ॥
सिंधुवारक : । पुं॰ सिंधुवारे ॥
सिन्धुवारित : । पुं॰ सिन्धुवारे ॥
त्रि॰ समुद्रेणवारिते ॥
सिन्धुवेषण : । पुं॰ गम्भार्याम् ॥
सिन्धुसङ्गम: । पुं॰ संभेदे । सिन्ध्वो: सङ्गमोमेल : ॥
सिन्धूत्तमम् । न॰ तीर्थभेदे ॥
सिन्धूद्भवम् । न॰ सैन्धवलवणे ॥ सिन्धुषुउद्भवोऽस्य ॥
सिन्धूपलम् । न॰ सैन्धवलवणे ॥
सिप्र : । पुं॰ चन्द्रे । हिमांशौ ॥ निदाघसलिले । स्वेदे ॥ न॰ सरोविशेषे ॥ यथोक्तङ्कालिकापुराणे । ततोहिमवत : प्रस्थे प्रतीच्यन्त : पुरस्यच । सिप्रंनामसर : पूर्णंदृष्टशुद्धहिरण्यदयइति ॥
सिप्रा । स्त्री॰ नद्यन्तरे ॥ सिप्राख्यात्सरसोयस्मान्निर्गतासामहानदी । अत : सिप्रेतितन्नामपुरैवब्रह्मणाकृतमितिकालिकापुराणम् ॥ साचोज्जयिनीदेशेवर्त्तते । तस्या स्रोत्पत्ति : कालिकापुराणे २३ अध्यायेद्रष्टव्या ॥
सिम : । त्रि॰ समस्मिन् । सर्वशब्दार्थे ॥ सिनोति । षिञ्॰ । अविसिभ्यषिभ्य : किदितिमन् ॥
सिम्बा । स्त्री॰ शम्याम् । शिम्बायाम् । बीजगुप्तायाम् । सेम॰ इ॰ भा॰ प्र॰ ॥ फली॰ इ॰ प्र॰ च ॥ समति । षमवैक्लव्ये । उल्ल्वादय श्चेतिसाधु: ॥
सिम्बि : । स्त्री॰ शिम्बायाम् । सिम्बायाम् । नखनामगन्धद्रव्ये ॥
सिम्बी । स्त्री॰ शिम्ब्याम् ॥
सिर : । पुं॰ पिप्पलीमूले ॥
सिरा । स्त्री॰ नाड्याम् । अम्बुवाहिन्यांनाड्याम् । सोर॰ इ॰ भा॰ प्र॰ सिनोति । षिञ्॰ । बहुलमन्यत्रापीतिरक् ॥
सिराल : । पुं॰ सिरासन्तते ॥
सिरिण्टिका । स्त्री॰ चुद्रकुटुम्बिन्याह्वयक्षुपे । दुराधर्षायाम् ॥
सिलक : । पुं॰ शलावतीपत्ये॰ ऋषिविशेषे ॥
सिल्लकी । स्त्री॰ शल्लकीवृक्षे ॥
सिषाधयिषा । स्त्री॰ साधनेच्छायाम् ॥ यथा । सिषाधयिषयाशून्यासिद्धिर्यत्रनविद्यते । सपक्षस्तत्रवृत्तित्वज्ञानादनुमितिर्भवेत् ॥
सिषिचा । स्त्री॰ सेक्तुमिच्छायाम् ॥
सिसृक्षन् । त्रि॰ स्रष्टुमिच्छति ॥
सिह्लुण्ड : । पुं॰ स्नुहीवृक्षे ॥ सीतिहुण्डसी । हुण्डिवर्णे । पचाद्यच् ॥ सिंहतुण्डस्यायमपभ्रंशइतिस्वामी॰ पृषोदरादि: ॥ अस्यगुणायथा । सिह्लुण्डोरेचनस्तीक्ष्णोदीपन : कटुकोगुरु: । शूलामाष्ठी

लकाध्मानकफगुल्मोदरानिलान् उन्मादमेहकुष्ठार्शःशोथमेदोऽश्मपाण्डुताः । व्रणशोथज्वरप्लीहक्रिमिदूर्वामिपं हरेत् ॥ उष्णवीर्यं स्मृता चौरं सुगन्धं कटुकं लघु । गुल्मनाशकृच्छिन्नास्वापित्तघ्नं वातरोगिणाम् । हितमेतद्विरेकार्थे येचान्ये दोषरोगिणः ॥

सिहुण्डदलम् । न० स्नुहीपत्रे ॥ तच्छाकगुणा यथा । सिहुण्डस्य दलं तीक्ष्णं दीपनं रोचनं हरेत् । आध्मानाष्ठीलिकागुल्मशूलशोथोदराणि च ॥

सिह्लः । पुं० तुरुष्के । पिण्डके । यावने । लोबान० इ० भा० प्र० ॥ सिह्यति । सिहप्रीतौ । अस्माभिर्वितर्क्यर्थः । बाहुलकात् । पृषोदरादि० ॥

सिह्लकः । पुं० सिह्ले । नागौरी गंद० इ० भा० लोबान० इ० यवनभाषाप्रसिद्धे ॥ सिह्लकः कटुकः स्वादुः स्निग्धोष्णः शुक्रकान्तिकृत् । हृद्यः पाण्डुस्वेदकुष्ठज्वरदाहग्रहापहः ॥

सिह्लकी । स्त्री० सल्लक्याम् ॥ सिह्ले ।

सिह्लभूमिका । स्त्री० शल्लक्याम् ॥

सिह्लसारः । पुं० तुरुष्के ॥ धूम्रवर्णे । पीतसारे ॥

सीकरः । पुं० शीकरे ॥ धनपालादिमतेदन्त्यादिः ॥

सीता । स्त्री० लाङ्गलपद्धतौ हलरेखायाम् ॥ जनकनन्दिन्याम् । मैथिल्याम् । वैदेह्याम् ॥ सीता लाङ्गलपद्धतिः । तदुत्पन्नत्वात् सीतेति निर्द्दिश्यते ॥ यथा । अथमे कृषतः क्षेत्रं लाङ्गलादुत्थिता ततः । क्षेत्रं शोधयता लब्धा नाम्ना सीतेति विश्रुतेति रामायणे ६६ सर्गः ॥ स्वर्गगङ्गायाम् ॥ यथा । पूर्वस्मात् सीतातुशैलयात्यन्तरिच्चगा । ततश्च पूर्वे वर्षे वामभद्राश्वेन निसार्णवम् ॥ सातुभद्राश्ववर्षगङ्गा । यथा श्रीभागवते ; सीतातुब्रह्मसदनात्केशवाचलादिगिरिशिखरेभ्योऽधोऽधः प्रस्रवन्तीगन्धमादनमूर्द्धसु पतित्वान्तरेणभद्राश्वंवर्षं प्राच्यां दिशिक्षारसमुद्रमभिप्रविशतीति ॥ शिवे ॥ दुर्गायाम् ॥ सत्याधि देवतायाम् ॥ मदिरायाम् ॥ 'गङ्गास्रोतसि काञ्चनमालायाम्' ॥ सीयते । षिञ्० । क्तः । पृषोदरादिः ॥

सीताद्रव्यम् । न० काष्ठकुद्दालादौ ॥

सीतापतिः ।) पुं० रामचन्द्रे । दाशरथौ ॥
सीतायाः पतिः ।)

सीत्कारः । पुं० मनुष्याणांसुख नुरागशब्दे ॥ यथा । शब्दोगुणानु

रागोत्य : प्रपाद : सीत्कृतं नृणामिति हेमचन्द्रः ॥ दन्तनिष्पीडनायां । सीरितिशब्दे ॥

सीत्कृतम् । न॰ सीत्कारे सुरतध्वनौ ॥

सीत्यम् । न॰ धान्ये ॥ त्रि॰ हल्ये । हलेनकृष्टे चेत्रे ॥ सीतयासमितं • सङ्गतं • निम्नोन्नतादिरहितङ्कृतं • समीकृतमितियावत् । नौवयोधर्मे तियत् ॥

सीदमान : । त्रि॰ अवसीदति ॥

सीद्यम् । न॰ आलस्ये ॥

सीधु : । पुं॰ शीधुशब्दार्थे ॥

सीधुगन्ध : । पुं॰ बकुले ॥

सीधुपुष्प : । पुं॰ कदम्बे ॥ बकुले ॥

सीधुपुष्पी । स्त्री॰ धातक्याम् ॥

सीधुरस : । पुं॰ आम्रवृक्षे ॥

सीधुसञ्ज्ञ : । पुं॰ बकुलद्रुमे ॥

सीप : । पुं॰ तर्पणाद्यर्थं ताम्रादिनिर्मितेजलपात्रे । अर्घा॰ कोषा॰ इ॰ भा॰ प्र॰ ॥

सीम् । अ॰ सर्वतोभवे ॥

सीमा । स्त्री॰ आघटे । मर्यादायाम् । सीमायाम् । ग्रामादीनामवधारितान्तभागे । सीम॰ इ॰ भा॰ प्र॰ ॥ स्थितौ ॥ क्षेत्रे । अण्डकोषे ॥ सीयते । षिञ् • । नामन्सीमन्नित्यादिनानिपातित : । मन्नन्तत्वात् ङीप् । सीमानौ॰ सीमान : •

इत्यादि ॥

सीमन्त : । पुं॰ सीमन्तोन्नयनसंस्कारे ॥ पुं॰ न॰ केशवेशे । केशरचनाभेदे ॥ केशेषुवर्त्मनि । मूर्द्धजमध्यपद्धतौ ॥ सीमन्तमस्त्रियांस्त्रीणांकेशमध्येतुपद्धतिरितिवैजयन्ती । सीम्नोऽन्तः । शकन्ध्वादिः ।

सीमन्तक : । पुं॰ नरकावासे ॥ यथा । लक्षपञ्चैवनरकावासाः सीमन्तकादयइति हेमचन्द्रः ॥ न॰ सिन्दूरे ॥

सीमन्तित : । त्रि॰ सीमन्तिनीकृते ॥ सीमन्तशब्दान्नत्वन्तात् • ततःकरोतीतिण्यन्तात्कर्मणिक्तः । गाविष्ठवद्भावे • विन्मतोर्लुक् ॥

सीमन्तिनी । स्त्री॰ नार्य्याम् ॥ सीमन्तोऽस्त्यस्याः । अतइनिः । नान्तलक्षणोङीप् ।

सीमन्तोन्नयनम् । न॰ गर्भाधानात् • षष्ठेऽष्टमेवामासिकर्त्तव्ये • संस्कारविशेषे ॥ यथा । मासिषष्ठेऽष्टमेवापिकर्त्तव्ये पुंसवनेऽदिते । रिक्ताद्योनेतिथौकुर्यात्सीमन्तोन्नयनंस्त्रियाः ॥

सीमा । स्त्री॰ आघटे । मर्यादायाम् । सीमनि । ग्रामादीनामवधारितान्तभागे । सीम॰ इ॰ भा॰ प्र॰ ॥ स्थितौ ॥ क्षेत्रे ॥ अण्डकोषे ॥ षिनोति॰ सीयतेवा । षिञ् • । नामन्सीमन्नित्यादिनानिपातित :

मवद्गतिनङीप् । डाबुभाभ्यामिति पक्षे डाप् । सीमे॰ सीमा : ॰ इ त्यादिविध्यम् ॥ वेलायाम् ॥

सीमाविवादः । पुं॰ ग्रामादीनां सीमाविषयककलहे ॥ सीमाविषयको विवादः सीमाविवादः । सीमा चतुर्विधा । जनपदसीमा॰ ग्रामसीमा॰ क्षेत्रसीमा॰ गृहसीमेति भेदात् ॥

सीमिकः । पुं॰ वृक्षविशेषे ॥ वाल्मीके ॥ सूक्ष्मकृमिजातौ । वृक्षपत्रविभागकृतिकोटे ॥ स्यमति । स्यमुशब्दे । स्यमेः सम्प्रसारणश्चेति किकन् ॥

सीरः । पुं॰ अर्के । सूर्य्ये ॥ हले । लाङ्गले ॥ सिनोति॰ सीयतेवा । षिञ्॰ । शुसिचिमीनांदीर्घश्चेति॰ क्रन्॰ दीर्घत्वञ्च ॥

सीरकः । पुं॰ शिशुमारे ॥ अर्के ॥ हले ॥

सीरध्वजः । पुं॰ चन्द्रवंशीयनृपविशेषे ॥

सीरपाणिः । पुं॰ बलभद्रे । कालिन्दीभेदने ॥ सीरोलाङ्गलंपाणावस्य ॥

सीराङ्गम् । न॰ कालाधारे ॥

सीरी । पुं॰ बलदेवे ॥

सीलन्ध्रः । पुं॰ मत्स्यविशेषे । सिलिन्दा॰ इ॰ गौ॰ दे॰ भा॰ प्र॰ ॥ तद्गुणायथा । सीलन्ध्रः श्लेष्मलोवृष्योविपाकेमधुरोगुरुः । वातपित्तहरोहृद्यआमवातकरस्मृतः ॥

सीवनम् । न॰ सेवने । स्यूतौ । तुन्नवायकर्म्मणि । सीवना॰ इ॰ भा॰ ॥ षिवुतन्तुसन्ताने । ल्युट् पृषोदरादित्वाद्दीर्घः ॥ षिवुसिव्योर्ल्युटिवादीर्घइतिस्वामी ॥

सीवनी । स्त्री॰ लिङ्गमण्यधः सूत्रे । लिङ्गाधादगुह्यपर्य्यन्तसीवने ॥

सीसम् । न॰ सीसके । योगेष्टे । नागे । सीसा॰ इ॰ भा॰ प्र॰ धातौ ॥ सिनोति । षिञ्॰ । क्विप् । अनित्यत्वान्नतुक् । ईस्यति । षो॰ । अतोनुपेतिकः । सिच॰ तत्॰ ईसश्च॰ सीसम् ॥ अस्यगुणा यथा । सीसंरङ्गगुणंज्ञेयंविशेषान्मेहनाशनम् ॥ नागस्तुनागशततुल्यबलंददातिव्याधिंविनाशयतिजीवनमातनोति । वह्निंप्रदीपयतिकाममवलंकरोतिमृत्युञ्चनाशयतिसन्ततसेवितः सः ॥ पाकेनहीनौकिलवंगनागौकुष्ठानिगुल्मांश्चतथातिकष्टान् । पाण्डुप्रमेहानिलमन्दशोथभगन्दरादीन्कुरुतः प्रभुक्तौ ॥ अस्यशोधनमारणविधिर्य्यथा । तस्यसाहजिकादोषावंगस्यैवनिदर्शिताः । शोधनंचापितस्यैव॰ भिषग्भिर्गदितंपुरा ॥ ताम्बूलरस

ष्पिष्टशिलालेपात् पुनः पुनः । द्वाविंशद्भिः पुटैर्नागो निरुत्थं भस्म जायते ॥ शिलासमः शिला । अन्यच्च । अश्वत्थचिञ्चात्वक्चूर्णं चतुर्थांशेन निःक्षिपेत् । मृत्पात्रे विद्रुते नागे लोहदर्व्या प्रचालितः ॥ यामैकेन भवेद्भस्म तत्तुल्यास्यान्मनःशिला । काञ्जिकेन द्वयं पिष्ट्वा पचेद्दृढपुटेन च ॥ स्वाङ्गशीतं पुनः पिष्ट्वा शिलया काञ्जिकेन च । पुनः पचेच्छरावाभ्यामेवं षष्टिपुटैर्मृतिः ॥ अपि च । तैलतक्रे गवां मूत्रे काञ्जिके च कुलत्थके । त्रिधा त्रिधा विशुद्धिः स्यात् स्वर्णादीनां समासतः ॥ मारणम्पुनः । कुण्डं नागपत्राणां कुर्यात् स्यात् पलार्द्धकम् । तण्डुलीयरसैर्यामं वासारसैस्तथा । सम्मर्द्य चक्रिकां कृत्वा घर्मे संशोष्यतां पुनः । शरावसम्पुटे कृत्वा पचेद्वन्योपलैर्भिषक् ॥ एवं सप्तपुटैर्नागो भस्मीभवति निश्चितम् । हिगुल्लोऽयं भवेद्वन्यात् प्रतिष्ठानं खिलानपौति वैद्यदर्पणः ॥

सीसकम् । न॰ सीसे ॥ स्वार्थे कः ॥

सीसपत्रकम् । न॰ सीसके ॥

सीहुण्डः । पुं॰ स्नुह्याम् । सिहुण्डे ॥ सीति हुण्डते । हुडि वरणे । पचाद्यच् ॥ सिंहतुण्डस्यापभ्रंशो वा इति स्वामी । पृषोदरादिः ॥

सु । अ॰ पूजायाम् ॥ भृशार्थे ॥ निर्भरे । अतिमात्रे ॥ अनुमतौ ॥ कृच्छ्रे ॥ समृद्धौ । अनायासे ॥ सूयते॰ सवति वा । सुगतौ । क्विप्॰ तुगभावः ॥ ऊर्वी ॥

सुकण्टका । स्त्री॰ घृतकुमार्याम् ॥

सुकण्डुः । पुं॰ कण्डुरोगे ॥

सुकथा । स्त्री॰ नैमिषारण्याधिष्ठात्री देवतायां ॥

सुकन्दः । कशेरुणि ॥ धरणीकन्दे ॥

सुकन्दकः । पुं॰ पलाण्डौ ॥ शोभनमतीवशा॰ कन्दयति॰ भक्षकस्य अतिभ्रंशकरत्वात् । कादिरोदने । अच् । स्वार्थे कन् । गवूलचा ॥ धरणीकन्दे ॥ वाराहीकन्दे ॥

सुकन्दी । पुं॰ सूरणे ॥

सुकम् । अ॰ अतिशये ॥

सुकरः । त्रि॰ सुखकरे । सुखेन कर्तुं शक्ये । सुसाध्ये ॥ ईषद्दुःसुष्विति॰ भावे॰ कर्मणि वा॰ अकृच्छ्रार्थे खल् ॥ अल्पसाधनैरधिकारम्भोऽनसुकरः ॥

सुकरा । स्त्री॰ सुशीलायाङ्गवि । अचण्डाम् ॥ सुसुखङ्करोति । अच् ॥ सुक्रियतेऽसौ । ईषद्दुःसुष्विति खल् ॥

सुकर्णः । पुं॰ हस्तिकर्णे ॥ त्रि॰ शोभनकर्णवति ॥

सुकर्णकः । पुं॰ हस्तिकन्दे ॥ त्रि॰

सुन्दरकर्णवति ॥

सुकर्णिका । स्त्री० मूषाकर्ण्याम् ॥

सुकर्णी । स्त्री० इन्द्रवारुण्याम् ॥

सुकर्म्मा । पुं० विष्कम्भाद्यन्तर्गतयोगविशेषे ॥ तज्जातफलं यथा । परोपकारी कुशलः कलासु हर्षेण युक्तो नितरां यशस्वी । प्रसूतिकाले यदि चेत् सुकर्म्मा नरः सुकर्म्मा भवति प्रसिद्धः । देवानां शिल्पिनि । विश्वकर्म्मणि ॥ त्रि० सत्क्रिये । शोभनकर्म्मकरणशीले ॥

सुकलः । त्रि० दातृभोक्तरि मानवे । यत्कदापि ददाति भुङ्क्ते चेतत् । दाताभोक्ता० इ० भा० प्र० ॥ सुकल्यते । कलशब्दसङ्ख्यानयोः । ईषद्दुःसुष्विति खल् । शोभनाकलायस्येति वा ॥

सुकल्पः । त्रि० अतिनिपुणे ॥

सुकाण्डः । पुं० कारवेल्ले ॥ त्रि० शोभनकाण्डवति० वृक्षादौ ॥

सुकाण्डी । स्त्री० काण्डीरे । काण्डवेल्लीति० गौ० भा० प्र० लतायाम् ॥

सुकाण्डी : । पुं० भ्रमरे ॥

सुकामा । स्त्री० त्रायमाणायाम् । बलेति० बहुलेति च० गौ० भा० प्र० ॥

सुकाली । पुं० बर्हिषदात्मजेषु० शूद्राणां पितृषु ॥

सुकालुका । स्त्री० डोडीक्षुपे । इ० रा० नाटः ॥

सुकाष्ठकम् । न० देवकाष्ठे ॥

सुकाष्ठा ।)
सुकाष्ठिका ।) स्त्री० कट्व्याम् ॥ काष्ठकदल्याम् ॥ इ० रा० नाटः ॥

सुकुन्दनः । पुं० बर्व्वरे ॥

सुकुमारः । पुं० पुण्ड्रेक्षौ वनचम्पके ॥ चवे ॥ श्यामाके ॥ त्रि० कोमले । मृदौ ॥ सुष्ठु कुमारयति । कुमारक्रीडायाम् । चुराद्यदन्तः । पुंसीति घः । घरज्वा ॥ यद्वा । सुकाम्यते । कामेः किदुच्चोपधाया ह्रस्वारन् ॥

सुकुमारकः । पुं० शालौ ॥ सुन्दरबालके ॥ न० तमालपत्रे ॥

सुकुमारतरः । त्रि० अतिपेलवे ॥

सुकुमारतरा । स्त्री० अतिपेलवायाम् । प्रकृतौ ॥ यथाह । प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति । या दृष्टास्मीति पुनर्न दर्शनमुपैति पुरुषस्येति ॥

सुकुमारा । स्त्री० कदल्याम् ॥ मालत्याम् ॥ नवमालिकायाम् ॥ लाक्षायाम् ॥ पृक्कायाम् ॥ त्रिसन्धि-पुष्पे ॥

सुकुमारी । स्त्री० नवमालिकायाम् ॥

सुकृत् । त्रि० पुण्याढ्ये ॥ धार्म्मिके ॥ सुष्ठु कृतवान् । डुकृञ० । सुकर्म्मपापेति कृञः क्विप् । तुक् ।

सुकृतम् । न॰ शुभे ॥ स्वर्गादिप्राप्तौ । पुण्ये ॥ त्रि॰ सुविहिते । सुविधाने ॥ सुष्ठु कृतम् । प्रादिसमासः ॥ सुष्ठु क्रियते स्मेति वा । क्तः ॥

सुकृतिः । स्त्री॰ सत्कर्म्मणि । शोभनाकृतिः ॥

सुकृती । त्रि॰ पुण्यवति । धन्ये ॥ सुकृतमस्यास्ति । अतइनिः ॥

सुकेतुसुता । स्त्री॰ ताडकायाम् ॥

सुकेसरः । पुं॰ बीजपूरे ॥

सुकेशी । स्त्री॰ अप्सरोविशेषे ॥ त्रि॰ शोभनकेशयुक्ते ॥

सुकोमलः । त्रि॰ अतिमृदुले ॥ अतिमनोज्ञे ॥

सुकोमला । स्त्री॰ सिन्दूरीतिप्रसिद्धे पुष्पे ॥

सुकोली । स्त्री॰ क्षीरकाकोल्याम् ॥

सुकोशः) पुं॰ कोशाम्रे । क्षुद्राम्रे ॥
सुकोशकः)

सुखसुगः । पुं॰ खट्वाङ्गे ॥ हरि॰-हि॰ चन्द्रः ॥

सुखम् । न॰ आत्मवृत्तिगुणविशेषे ॥ मुदि । प्रीतौ ॥ हर्षे । सम्मदे । आनन्दे । शर्म्मणि । सर्वेषामनुकूलवेदनीये ॥ स्वर्गे । नाके । त्रिदिवे ॥ वृद्धिनामौषधे ॥ जले ॥ न्यायमते॰ धर्म्मजन्ये जगताङ्काम्ये ॥ यत् सुखन्तु जगतामेककाम्यं धर्म्मेणजन्यते । अधर्म्मजन्यं दुःखं स्यात्प्रतिकूलं सचेतसाम् ॥ तच्च मनोगोचरत्वं यथा । मनोग्राह्यं सुखं दुःखमिच्छाद्वेषौ मतिः कृतिरिति भा॰प॰द॰ ॥ सुखं चतुर्विंशतिगुणान्तर्गतगुणविशेषः । तत्तु नित्यं जन्यञ्च । नित्यं परमात्मनो विशेषगुणान्तर्वर्त्ति । जन्यसुखं जीवात्मनो विशेषगुणान्तर्वर्त्ति । तच्च शुभादृष्टजन्यम्॰ धनमित्रलाभारोग्यमिष्टान्नपानपुरीषोत्सर्गपुत्रादिजन्मतत्पाणिग्रहस्त्रीकान्तासम्भोगादिजन्यञ्च । तस्य द्विक्षणस्थायित्वं स्वोत्तरोत्पन्नानुभवनाश्यत्वात् । सुखाद्युपरागेणैवात्मनो मानसबोधः । सुखं तदुपायश्चेष्टः । बालस्य स्तन्यपानप्रवृत्तौ सुखसाधनत्वज्ञानं हेतुः तच्च सुखस्यैवेष्टत्वम् । दुःखजनककण्टकगमनादिप्रवृत्तौ सुखोपायो धनं तदेवेष्टं॰ तत्साधनत्वज्ञानमेव हेतुः । यागादिप्रवृत्तावपि पारलौकिकसुखसाधनत्वज्ञानङ्कारणम्॰ सुखोपायस्वर्गादिरूपेष्टसाधनत्वज्ञानमपि कारणम् । सुखस्य कालावच्छेद्यत्वं शरीरावच्छेद्यत्वञ्च स्वपतोऽव्याप्यवृत्तित्वम्॰ शरीरैकदेशावच्छेदेन दुःखसम्भवेऽप्यन्यदेशावच्छेदेन सुखसम्भवात्॰ एकक्षणावच्छेदेनैव तु दुःखसम्भवेऽपि॰

सर्गान्तरावच्छेदेनसुखसम्बन्धाच्च॰
तत्तुविस्फोटकवतोमिष्टान्नभोजना
दौद्रष्टव्यमितितार्किकाः ॥ * ॥ सुख
रूपेब्रह्मणि ॥ यःस्मानन्दलक्षणयान
दे ॥ सर्वतोनिवृत्तिकेनचित्तेनलय
विक्षेपविलक्षणे । चित्ते पिवृत्तिसत्त्वा
त्॰तयेवमनसि पिलरूपेणाऽसत्त्वा
त्॰सर्ववृत्तिशून्येनसूक्ष्मेणमनसा
सुखानुभवेसमाधौ ॥ धर्मसाधार
णकारणकेऽनुकूलवेदनीये । निरु
पाधीच्छाविषयीभूतधर्मसाधारण
कारणिकायाञ्चित्तवृत्तौ । परमा
त्मसुखस्य ज्ञिकायाम् । मोक्षानन्दे ॥
मोक्षनानन्तराह्लादे । हर्षे ॥ त
च्चसात्त्विकादिभेदात्त्रिविधम् ।
यथा । अभ्यासाद्रमतेयत्र दुःखा
न्तञ्चनिगच्छति । एतद्विवृणोति ।
यत्तदग्रे विषमिवपरिणामेऽमृतोप
मम् । तत्सुखं सात्त्विकम्प्रोक्त
मात्मबुद्धिप्रसादजम् ॥ विषयेन्द्रि
यसंयोगाद्यत्तदग्रेऽमृतोपमम् ॥
परिणामेविषमिवतत्सुखं राजसं-
स्मृतम् ॥ यदग्रेचानुबन्धे चसुखं
मोहनमात्मनः । निद्रालस्यप्रमा
दोत्थं तत्तामसमुदाहृतम् ॥ आ
त्मगुणे ॥ आत्मतत्त्वरूपे ॥ शो
भनानिपरिपुष्टानि॰ खानीन्द्रिया
ण्यस्मिनतत् ॥ यद्वा । सुखयति ।
सुखदुःखतत्क्रियायाम् । चुरा

दिः । पचाद्यच् ॥ त्रि॰ धर्मभेदेन॰
सुखविशिष्टे ॥ यथा । त्रिषुद्रव्ये
पापपुण्यसुखादिचेत्यमरः । पापपु
ण्यशब्दौसुखादयश्चसप्तगुणेय
दोलिङ्गाः उपचारात्तद्वतिद्रव्ये वि
शेष्ये वर्तमानाश्चत्रिलिङ्गाः । यथा ।
पापात्क्रतुमतीकन्यापापोराजाप्यर
क्षः । पापंव्याधकुलंहिंस्रंपापोविप्रस्त्व
सेवकः ॥ पुण्यंतीर्थंनदीपुण्याप्याश्र
मःपुण्यएवच । सुखाभूमिः सुखो
वासः सुखं कर्मोकुलं मतम् ।
सुखसाध्ये ॥ धर्मिणि ॥ सुखहे
तौ ॥ सुखदुःखसाधनानामस्थि
रत्वंसुखस्यमनोविलासमात्ररूपत्व
ञ्चोक्तं विष्णुपुराणे । यथा । वस्त्वे
कमेवदुःखायसुखायेर्ष्यागमायच ।
कोपायचयतस्तस्माद्वस्तुवस्त्वात्मकङ्
कुतः ॥ तदेवप्रीतयेभूत्वापुनर्दुः
खायजायते । तदेवकोपायततः प्र
सादायचजायते ॥ तस्माद्दुःखात्म
कंनास्तिनचकिञ्चित्सुखात्मकम्
। मनसः परिणामोयंसुखदुः
खोपलक्षणः इति २ अंशे ६ ऽध्यायः
॥ सर्वकामविहीनोऽतः सुखंसर्वव्य
वस्थितमित्यन्यच्च ॥ दुःखाबिं
सुखंप्राप्य नवदन्तिसुखं किलेतिदेवी
भागवतम् ॥ सर्वंपरवशंदुःखंस
र्वमात्मवशंसुखम् । एतद्विद्यात्
समासेनलक्षणंसुखदुःखयोः ॥

सुखकरः। त्रि॰ सुकरे॥

सुखङ्करी स्त्री॰ लताविशेषे। जीवन्त्याम्॥ सुखकर्त्रीम्॥

सुखङ्घुणः। पुं॰ शिवखट्वाङ्गे॥ इ॰ त्रि॰ शेषः॥

सुखचरः। त्रि॰ सुखगामिनि॥

सुखचारः। पुं॰ उत्कृष्टाश्वे॥

सुखजातः। त्रि॰ जातसुखे॥

सुखदः। पुं॰ परमात्मनि। विष्णौ॥ सद्वृत्तानां सुखं मोक्षलक्षणं ददाति। इ॰ अ॰। असद्वृत्तानां सुखं द्यति खण्डयतीति वा। दो॰। जात इतकः। त्रि॰ सुखप्रदे। न॰ विष्णोः स्थाने॥

सुखदा। स्त्री॰ गङ्गायाम्॥ सद्यःपातकसंहन्त्री सद्यो दुःखविनाशिनी। सुखदा मोक्षदा गङ्गा गङ्गैव परमा गतिः॥ शमीवृक्षे॥ सुखदस्यम्। स्वर्वेश्यायाम्॥

सुखदोह्या। स्त्री॰ सुखसन्दोह्यायां गवि॥ सुखेन दुह्यते। दुह॰। ऋहलोर्ण्यत्॥

सुखमोदा। स्त्री॰ शल्लकीवृक्षे॥

सुखरात्रिः। सुखरात्रिका। स्त्री॰ दीपान्वितामावास्यारात्रौ॥ यथा। तुलाराशिगते भानावमावास्यां नराधिपः। स्नात्वा देवान् पितॄन् भक्त्या सम्पूज्याथ प्रणम्य च॥ कृत्वा तु पार्वणश्राद्धं दधिक्षीरगुडादिभिः। ततोऽपराह्णसमये घोषयेन्नगरे नृपः॥ लक्ष्मीः सम्पूज्यतां लोका उल्काभिश्चाभिचेष्टताम्॥ * ॥ दर्शश्चेत्प्रदोषव्याप्त्या निर्णयः। तुलासंस्थे सहस्रांशौ प्रदोषे भूतदर्शयोः। उल्काहस्ता नराः कुर्युः पितॄणां मार्गदर्शनम्॥ उभयतः प्रदोषप्राप्तौ परदिन एव। दण्डैकरजनीयोगे दर्शः स्यात्तु परेऽहनि। तदा विहाय पूर्वेद्युः परेऽह्नि सुखरात्रिका। उभयप्रदोषव्याप्तावपि उल्कादानं परदिने पूर्वोक्तपार्वणानुरोधात्। भूतहे प्रकुर्वन्ति उल्काग्रहणं चेतसः। निराशाः पितरो यान्ति शापं दत्त्वा सुदारुणम्॥ अत्रैव लक्ष्मीः पूर्वाह्णे सौपूज्या। अमावास्याय दारावौ दिवाभागे चतुर्दशी। पूजनीया तदा लक्ष्मीर्विज्ञेया सुखरात्रिका॥ उल्काग्रहणादिपितृकृत्यं स्वात् प्राचीनावीतिना दक्षिणामुखेन कर्त्तव्यम्॥ तथा च मनुः। प्राचीनावीतिना सम्यगपसव्यमतन्द्रिणा। पित्र्यमानिधनात्कार्यं विधिवद्दर्भपाणिनेति॥ उल्काग्रहणमन्त्रो यथा। शस्त्राशस्त्रहतानाञ्च भूतानां भूतदर्शयोः। उज्ज्वलज्योतिषा देहं दहेयं व्योमवह्निनेति। दानमन्त्रो यथा। अग्निदग्धाश्च ये जीवा

शेष्यद्गधाः कुलेमम। उज्ज्वलज्योतिषाद्गधास्ते यान्तु परमां गतिमिति। विसर्ज्जनमन्त्रो यथा। यमलोकं परित्यज्य आगता ये महालये। उज्ज्वलज्योतिषा वर्त्म प्रपश्यन्तो व्रजन्तु ते॥ इति॥

सुखलुब्धः। पुं॰ देहिनि॥ यथा। मांसलुब्धो यथा मत्स्यो लौहशङ्कुं न पश्यति। सुखलुब्धस्तथा देही यमबाधां न पश्यतीति कुलार्णवतन्त्रम्॥

सुखवर्च्चकः। पुं॰ सर्ज्जिकाक्षारे। सुखं वर्च्चयति। वर्च्च दीप्तौ। क्रुन्॥

सुखवर्च्चाः। पुं॰ सर्ज्जिकाक्षारे॥ सुखेन वर्च्चो यस्मात्॥

सुखवासः। पुं॰ तरमु॰ इ॰ प्र॰ फलविशेषे।

सुखवासनः। पुं॰ मुखवासनगन्धद्रव्ये। यथा। मुखवासकरो गन्धश्चमेदो मुखवासनः। सुखवासनकुले केशभवासनद्रव्यपौतिशब्दरत्नावली॥

सुखसंविक्तिः। स्त्री॰ सुखानुभावे।

सुखसन्दोह्या। स्त्री॰ सल्लक्याम्। सुखतायाम्। सुखेनसन्दुह्यते। दुह॰। कर्म्मणि ण्यत्।

सुखा। स्त्री॰ प्रचेतसः पुर्य्याम्॥ अमरेन्द्रमुखरत्याम्॥ शोभनेन्द्रियाणाम्॥

सुखाधारः। पुं॰ स्वर्गे। त्रि॰ सुखाधारे॥

सुखायतः। पुं॰ उत्कृष्टाश्वे। सुशिक्षितेश्वे॥ यथा। सुखायतः शुभमुखः सुखचारः सुखायन इति शब्दमाला॥

सुखायनः। पुं॰ उत्कृष्टघोटके॥ सुखेन अयनं गमनं येन॥

सुखालुका। स्त्री॰ बहुफलवृक्षाम्। जीवन्त्याम्॥

सुखावती। स्त्री॰ बुद्धपत्नी॥

सुखावतीश्वरः। पुं॰ बुद्धभेदे॥

सुखावहः। पुं॰ भर्त्तरि॥ त्रि॰ सुखदातरि॥

सुखाशः। पुं॰ वरुणे। प्रचेतसि॥ सुखभोजने॥ तरम्बुजे। पर्य्यायो यथा। स्यात् कालिन्दं कालिन्दफलः सुखाशोराजतैमिषः। लताफनसनाटाम्लौ सितद्युतिरिति त्रिकाण्डशेषः॥

सुखासनम्। न॰ नरयानविशेषे। खासा॰ इ॰ भा॰ प्र॰॥ सुखेन आसनं यस्मात्।

सुखितः। त्रि॰ सुखं कृतः कृते॥ सुखं सञ्जायतस्य। इतच्॥

सुखी। त्रि॰ सर्व्वथा नीरोगे॥ निरामयस्थिते॥ तपस्वि ज्ञिनि॥ सुखमस्त्यस्य। सुखादिभ्यश्चेति॰ इनिः॥ दुःखमूलं हि संसारः समस्यास्ति स दुःखितः। तस्य त्यागः कृतो येन स सुखी नापरः प्रिये।

इति श्रीकुलार्णवतन्त्रम् ॥ ब्रह्मादितृणपर्य्यन्तं मायया कल्पितं जगत् । सत्यमेकं परं ब्रह्म विदित्वैवं सुखी भवेदिति महानिर्व्वाणतन्त्रम् ।
विदित्वा गुरोर्मुखादध्यात्मविद्यायाः श्रवणादिभिः ॥

सुखोत्सवः । पुं॰ भर्त्तरि । पत्यौ ॥ सुखस्योत्सवोऽस्मिन् ॥

सुखोदकम् । न॰ सुखोष्णे । सुखजनकोष्णजले ॥

सुखोर्ज्जिकः । पुं॰ सर्ज्जिकाक्षारे ।

सुखोष्णम् । न॰ सुखोदके ॥

सुगः । पुं॰ गन्धर्व्वे ॥ सुष्ठु गायति । गै॰ कः ॥ न॰ विष्ठायाम् ॥ त्रि॰ सुगमे ॥ सुखेन गच्छत्यत । उणाद्यर्थे॰सुदुरोरधिकरणइति गमेर्डः ॥

सुगतः । पुं॰ सर्व्वज्ञे । वणिक्सन्नानात्मवादिजिने । बुद्धे । शोभनं गतं ज्ञानमस्येति सुगतः ॥ सुष्ठु अपुनरावृत्तये गत इति वा ॥ सुखेन संसाराद्गतो वा ॥

सुगतिः । पुं॰ अतीतकल्पार्हद्भेदे ॥ स्त्री॰ शोभनगतौ ॥ पुण्यात्मनां शरीरान्ते प्राप्यस्थाने ॥ यथा । सुवृत्तः शीलसम्पन्नः प्रसन्नात्मात्मविद्बुधः । प्राप्येह लोके सम्मानं सुगतिं प्रेत्य गच्छतीति ॥

सुगन्धः । पुं॰ कर्पूरादिगणे ॥ यथा । कर्पूरो मृगनाभिश्च कक्कोलोऽपि तथा । गन्धसारमगुरुश्चैव श्रीखण्डं पीतचन्दनम् ॥ कालीयकं रक्तशाङ्गं पतङ्गमगुरुद्वयम् । देवदारुश्च सरलस्तगरः पद्मकं पुरः ॥ सर्ज्जो निर्य्यासवीरोलः कुन्दुरुश्च शिलारसः । शिल्हकश्चलकश्चैव जातीपत्री फलं तथा ॥ एलाद्वयं दारुचीनीत्वक् पत्रं नागकेशरम् । वालुकं वीरणं मांसी कुङ्कुमं रोचनान्वितम् ॥ सुगन्धो वीरणं वालं जटामांसी मुरा घनः । शटी चर्च्चूरपृक्का च सुगन्धोयं गणो मतः ॥ रक्तशिग्रौ ॥ चणके ॥ गन्धके ॥ भूतृणे ॥ न॰ भद्रजीरके ॥ गन्धतृणे ॥ श्वेतचन्दने ॥ नीलोत्पले ॥ ग्रन्थिपर्णे ॥ कृष्णजीरके ॥ कातृणे ॥ पुं॰ तीक्ष्णगन्धे । रक्ततुलस्याम् ॥ त्रि॰ समवायातिरिक्तसम्बन्धेन सद्गन्धविशिष्टे ॥

सुगन्धकः । पुं॰ गन्धके ॥ रक्ततुलस्याम् ॥ कर्कोटः । इ॰ भा॰ प॰ फलशाके ॥ तत्पर्य्याया यथा । कर्कोटकः किलासघ्नस्तिक्तपत्रः सुगन्धकः इति हेमचन्द्रः । कांकरोल इ॰ गौ॰ दे॰ भा॰ ॥ शालीविशेषे ॥

सुगन्धतैलनिर्य्यासम् । न॰ गन्धद्रव्यविशेषे । जवादिनि । मृगधर्म्मजे । खट्टाशे ॥

सुगन्धपत्रा ।)
सुगन्धपत्रिका ।) स्त्री॰ रुद्रजटा-

याम् ॥

सुगन्धभूतृणम् । न० गन्धतृणे ॥

सुगन्धमूला । स्त्री० रास्नायाम् ॥ स्थलपद्मिन्याम् ॥ सुगन्धीमूलेय-स्याः ॥

सुगन्धा । स्त्री० रास्नायाम् ॥ शोभनो गन्धः । कुगतीतिसमासः । सुगन्धोऽस्त्यस्याः । अर्श आद्यच् ॥ शल्याम् ॥ गङ्गापत्याम् ॥ वन्ध्याककीटक्याम् ॥ नवमालिकायाम् तुलस्याम् ॥ मधुकर्कटिकायाम् ॥ शतपुष्पायाम् ॥ स्वर्णयूथ्याम् ॥ रुद्रजटायाम् ॥ चनकमूले ॥ सल्लक्याम् ॥ माधव्याम् ॥ तीर्थविशेषे ॥

सुगन्धामलकम् । न० सर्वौषधिभिः शुष्कामलकत्वग्योगे ॥ यथा । सर्वौषधिसमायुक्ताः शुष्कास्त्वामलकत्वचः । यद्वा तदाय योगः स्यात् सुगन्धामलकाभिधः ॥ इतिराजनिर्घण्टः ॥

सुगन्धिः । पुं० शोभनगन्धे । सुरभौ । घ्राणतर्पणे । इष्टगन्धे ॥ तुम्बुरुवृक्षे । तीक्ष्णकल्के ॥ परमात्मनि ॥ इतिमोक्षधर्मटीकायांनीलकण्ठः ॥ सहकारे ॥ न० एलवालुके । तैलेये ॥ कुस्तुम्बुरौ ॥ धान्याके ॥ सुलके ॥ कशेरुणि ॥ गन्धतृणे ॥ पिप्पलीमूले ॥ त्रि० सुगन्धयुक्ते । शोभनोगन्धोऽस्य । गन्धस्येदुत्पूतिसुसुरभिभ्यइतीत्त्वम् ॥ गन्धस्येत्त्वे तदेकान्तग्रहणंनाद्रियन्ते केचन । यथा । कण्डूयतः कटभुवङ्करिणोमदेनस्कन्धं सुगन्धिमनुलीनवतानगस्येति माघे० सुगन्धिंशोभनगन्धमित्यर्थात् ॥

सुगन्धिकः । पुं० सिह्लके । तुरुष्के महाशालौ ॥ गन्धके ॥ न० कह्लारे ॥ पुष्करमूले ॥ गौरसुवर्णे । वारिजे । पत्रशाकविशेषे ॥ सुपर्णे ॥ उशीरे ॥

सुगन्धिकुसुमम् । न० सुगन्धिपुष्पे पुं० पीतकरवीरे ॥ शोभनगन्धवन्तिपुष्पाण्यस्य ॥

सुगन्धिकुसुमा । स्त्री० पृक्कायाम् ॥

सुगन्धिता । स्त्री० सौरभ्ये ॥ शोभनोगन्धोयस्य० तस्यभावः । तल् । टाप् ॥

सुगन्धितोयम् । न० । सुगन्धिजले । केतकादिपानीये ॥

सुगन्धित्रिफला । स्त्री० जातीफले न० पूगफलेनचसंयुक्तेलवङ्गकलिकाफले ॥

सुगन्धिनी । स्त्री० आरामशीतलायाम् ॥

सुगन्धिमूलम् । न० उशीरे ॥

सुगन्धिमूषिका । स्त्री० छुछुन्दर्याम् ॥

सुगम : । त्रि॰ सुखेनगमनीयेस्थाना
दौ ॥ सुखेनगम्यतेप्राप्यते । ग
म्लृ॰ । ईषद्दुःसुषुखल् ।
यथासुगम : पन्था : ॥

सुगरम् । न॰ रङ्गमे । हिङ्गुले ॥

सुगहन : । त्रि॰ निविडे ॥

सुगहनावृत्ति : । स्त्री॰ कुम्बायाम् ।
यज्ञस्थाने॰ यसप्रख्यादिदृशं नवा
रणायनिविडवेष्टने ॥ सुगहनानि
रवकाशावृत्ति : ॥

सुगृह : । पुं॰ चञ्चुसूचीखगे । पीततु
ण्डे । यथा॰ हृ॰ भो॰ प्र॰ ॥ न॰
शोभनालये ॥ त्रि॰ शोभनगृहवति ॥

सुगृहीत : । त्रि॰ सुन्दररूपेणकृतग्र
हणे ॥

सुगृहीतनामा । पुं॰ शुभकाम्यया प्रा
त : स्मर्त्तव्ये युधिष्ठिरादौ ॥

सुग्रन्थि : । पुं॰ ग्रन्थपर्णप्रभेदे । चो
रके ॥ शोभना : ग्रन्थयोयस्मिन् ॥

सुग्रीव : । पुं॰ कपिपुङ्गवे । सूर्य्य
पुत्रे । किष्किन्धाधिपे । श्रीरा
ममित्रे ॥ विष्णोरथहये ॥ देवी
म्प्रतिशुम्भनिशुम्भाभ्यांप्रेषितेदूतवि
शेषे ॥ हस्तार्हत्पितरि । शोभ
नाग्रीवायस्य स : ॥ शिवे । इन्द्रे ॥
राजहंसे ॥ असुरविशेषे ॥ पर्व्व
तविशेषे ॥ अस्त्रविशेषे ॥ नाग
प्रभेदे ॥ त्रि॰ शोभनग्रीवायुक्ते ॥

सुग्रीवी । स्त्री॰ कश्यपपत्नीविशेषे ॥

सुग्रीवेश : । पुं॰ श्रीरामचन्द्रे ॥

सुघोष : । पुं॰ विष्णौ । नारायणे ॥
शोभनोघोष : शब्दोवेदात्मकोयस्य ॥ नकुलस्यपाण्डवस्यशङ्खे ॥

सुचक्षु : । पुं॰ उदुम्बरे ॥ न॰ शोभ
ननेत्रे ॥ वेदान्तजन्यज्ञाने ॥ यथा
। एवंविधंत्वांसकलात्मनामपिस्वा
त्मानमात्मात्मतयाविचक्षते । गुर्व्व
र्कलब्धोपनिषत्सुचक्षुषायेतेतर
न्तीवभवानृतांबुधिम् ॥ त्रि॰ उ
त्कृष्टाक्षे ॥ आत्मविदि ॥ शोभने
चक्षुषीयस्य स : ॥ सुष्ठुशोभनस्तत
त्त्वचक्षुर्येनवा ॥

सुचञ्चु : । पुं॰ महाचञ्चुशाके ॥

सुचतुर : । त्रि॰ शोभनानिचत्वारि
यस्य॰ तस्मिन् ॥ अचतुरविचतुरे
त्यादिनासाधु : ॥

सुचरित्र : । त्रि॰ सुशीले ॥ शोभ
नंचरित्रमस्य ॥

सुचरित्रा । स्त्री॰ साध्व्याम् ॥ शो
भनंचरित्रमस्या : ॥

सुचर्म्मा । पुं॰ भूर्जवृक्षे त्रि॰ सु
चर्म्मवति ॥ शोभनंचर्मास्य ॥

सुचारु : । त्रि॰ मनोहरे ॥

सुचित्रम् । न॰ शोभनचित्रे ॥

सुचित्रक : । पुं॰ मत्स्यरङ्गविहङ्गमे
॥ चित्रसर्पे । मातुलाहौ ॥ त्रि॰
सुन्दरचित्रयुक्ते ॥

सुचित्रबीजा । स्त्री॰ विडङ्गे ॥

सुचिक्का । स्त्री० चिचिण्टायाम् ॥
सुचिरायुः । पुं० सुरे । देवे ॥ मार्कण्डेयादौ ॥ शोभनं चिरायुर्यस्य ॥
सुचुक्रिका । स्त्री० तिन्तिडाम् ॥
सुचुटी । स्त्री० सन्दंशिकायाम् ॥ इति सन्दंशिकाशब्दार्थे मेदिनीकरः ॥
सुचेलम् । न० शोभनवस्त्रे ॥ शोभनचेलम् ॥ त्रि० शोभनवस्त्रवति ॥
सुचेलकः । पुं० तद्वस्त्रे । पटे ॥ सुचेलोऽस्य । स्वार्थे कन् ॥ त्रि० तद्वति ॥
सुच्छत्री । स्त्री० शतद्रुसरिति ॥ इ० म० र० मी० ॥
सुजनः । पुं० कुलीने ॥ सदाचारे । साधौ । सज्जने ॥ यथा । दुर्जनस्पर्शदोषेण सुजनोऽपि विनश्यति । प्रसन्नं जलमिवाशु : कर्दमैः कलुषीकृतम् ॥
सुजनता । स्त्री० सौजन्ये ॥
सुजलम् । न० कमले ॥ शोभने जले ॥ त्रि० शोभनजलयुक्ते ॥
सुजल्पः । पुं० वाक्यविशेषे ॥ यथा । यत्रार्जवात् सगाम्भीर्यं सदैन्यं सहचापलम् । सोत्कण्ठश्च हरिः स्पृष्टः स सुजल्पो निगद्यते ॥ इत्युज्ज्वलनीलमणिः ॥
सुजातः । त्रि० सुन्दरे
सुजाता । स्त्री० सौराष्ट्रमृत्तिकायाम् । तुवर्याम् ॥
सुजिह्वः । पुं० हव्यवाहने ॥
सुजीवन्ती । स्त्री० स्वर्णजीवन्त्याम् ॥
सुज्ञः । त्रि० विज्ञे ॥ सुशोभनं जानाति । ज्ञा अवबोधने । आतश्चोपसर्ग इति कः ॥
सुज्ञेयः । त्रि० सुष्ठु विज्ञेये ॥ सुखेन ज्ञातुं योग्यः । ज्ञा० । अचो यत् । ईद्गुणौ ॥
सुडीनम् । न० पक्षिणः सुकुमारपाते ॥
सुतः । पुं० आत्मजे । तनये । पुत्रे ॥ मातृपितृस्वभावस्तत्स्वभावे सुतस्य भवतः । यथोक्तं वह्निपुराणे । शीलं सञ्जायते पुत्रो मातुस्तातस्य वै सुतः । यथाशीला भवेन्माता तथाशीलो भवेत्सुतः ॥ यद्वर्णे विभवे भूमिस्तद्वर्णं सलिलं भवेत् । मातॄणां शीलदोषेण पितृशीलगुणेन च ॥ विभिन्नास्तु प्रजाः सर्वाः भवन्ति भवशीलिनामिति ॥ सूयते स्म । सौति । वा । षुञ् अभिषवे । षूप्रसवैश्वर्ययोर्वा । क्तः ॥ नृपे । पार्थिवे ॥
सुतजीवकः । पुं० पुत्रजीवे ॥
सुतनुः । स्त्री० नार्य्याम् ॥ त्रि० सुकृशे ॥ स्वङ्गे ॥
सुतपादिका । स्त्री० हंसपद्याम् । गोधापद्याम् ॥
सुतपाः । पुं० सूर्ये ॥ मुनिविशेषे

। मुनौ ॥ नरनारायणरूपेभगवति बदरिकाश्रमेसुशोभनंमनसश्चेन्द्रियाणाञ्चैकाग्र्यरूपंतपोऽस्येतिसुतपानरनारायण: ॥

सुतराम् । अ० अत्यन्ते । अतिशये ॥ अवधारितार्थप्रतिपादके ॥ यथा । शृणुद्विजमहाबुद्धेश्रमेणापिस्मृतोहरि: । ददातिमोक्षंसुतरांकिम्पुनर्दम्भवर्ज्जनादिति ॥ द्विवचनविभज्येत्यादिना • सुशब्दात्तरप् । किमेत्तिङव्ययेत्यादिनाम्प्रत्यय. । तद्धितश्चासर्वविभक्तिरित्यव्ययसंज्ञा ॥

सुतङ्करी । स्त्री० देवदालीलतायाम् ॥

सुतर्दन: । पुं० ताम्राक्षे । कोकिले ॥

सुतल: । पुं० अट्टालिकाबन्धे ॥ नागलोकप्रभेदे ॥

सुतस्करा । स्त्री० सप्तपुत्रप्रसवायाम् ॥

सुतश्रेणी । स्त्री० मूषिकपर्ण्याम् ॥ सुतानांश्रेणिरस्या: ॥ पुत्रवृन्दे ॥

सुता । स्त्री० स्वापत्ये । कन्यायाम् ॥ दुरालभायां ॥

सुतात्मज: । पुं० पौत्रे ॥ दौहित्रे ॥ सुतस्यसुतायावाआत्मज: ॥

सुतात्मजा । स्त्री० पौत्र्याम् ॥ दौहित्र्याम् ॥ सुतस्यसुतायावाआत्मजा ॥

सुतारम् । न० द्वितीयायामशब्दाख्यायासिद्धौ ॥

सुतारका । स्त्री० बुद्धशासनदेवीविशेषे ॥

सुतिक्त: । पुं० भूनिम्बे । किराततिक्ते ॥ पर्पटे । पित्तपापडा० इ० भा० प्र० ॥

सुतिक्तक: । पुं० पारिभद्रे । भूनिम्बे ॥

सुतिक्ता । स्त्री० कोशातक्याम् । भृङ्गफलिकायाम् ॥

सुतिक्तिका । स्त्री० कोशातक्याम् ॥

सुती । त्रि० पुत्रवति ॥

सुतीक्ष्ण: । पुं० शिग्रौ ॥ श्वेतशोभाञ्जने ॥ रामायणप्रसिद्धमुनिविशेषे ॥ नाम्नासुतीक्ष्णश्चरितेनदान्त: ॥ त्रि० अतिशयेनखरे ॥

सुतीर्थकम् । न० । तीर्थविशेषे ॥

सुतुङ्ग: । पुं० नारिकेलागमे ॥ ग्रहाणामुच्चांशविशेषे । अत्यन्ततुङ्गे ॥ त्रि० अतिशयोच्चे ॥

सुतृण: । पुं० कुन्दरे । उखर्वले । मृगवल्लभेतृणविशेषे ॥

सुतेजन: । पुं० धन्वङ्गे । धन्वनवृक्षे ॥

सुतेजा: । पुं० सुतेजस्त्वगुणविशिष्टेद्युलोके ॥ स्वर्गे ॥ प्राक्कल्पार्हद्विशेषे स्त्री० आदित्यभक्तायाम् ॥ त्रि० तेजसान्विते ॥

सुतेला । स्त्री० महाज्योतिष्मत्याम् ।

सुत्या । स्त्री॰ अभिषवे । सोमलताकण्डने ॥ अभिषवदिने ॥ सवनम्॰ सूयते सोमोऽस्मिन्॰ अस्यां वा । षुञ् अभिषवे । संज्ञायां समजेति क्यप् ॥

सुत्रामा । पुं॰ गोत्रभिदि । इन्द्रे ॥ सुष्ठु त्रायते॰ पालयति । त्रैङ् पालने । आतोमनिन्॰ सर्वधातुभ्योमनिन्वा ॥

सुत्वा । पुं॰ अभिषवस्नाने । यज्ञाङ्गस्नानकर्त्तरि ॥ सुतवान् । षुञ्॰ । सुयजोर्ङ्वनिप् । तुक् ॥

सुत्वरी । स्त्री॰ मातरि ॥ ङ्वनिबन्तात्॰ वनोरचेति ङीब्रौ ॥

सुदग्धा । स्त्री॰ दग्धाख्यतृणे । सुदग्धिकायां ॥ मेरुजम्बुद्रुमे ॥

सुदग्धिका । स्त्री॰ कुरुह॰ इ॰ गौ॰ दे॰ भा॰ प॰ वृक्षे । दग्धरुहायाम् । भस्मरोहायाम् ॥

सुदण्डः । पुं॰ वेत्रे ॥

सुदण्डिका । स्त्री॰ गोरच्याम् ॥

सुदन् । त्रि॰ शोभनदन्तविशिष्टे ॥ शोभनादन्तायस्य सः । वयसिदन्तस्य दतृ । नुम् ॥

सुदर्भा । स्त्री॰ तृणविशेषे । इक्षुदर्भायाम् ॥

सुदर्शनः । पुं॰ । हरिचक्रे ॥ अस्य लक्षणं यथा । द्वादशारन्तुषट्कोणं वलयत्रयसंयुतम् । चक्रं स्यात्तदक्षिणावर्त्तः शंखश्चीहरेः स्मृतद्रुति ॥ जिनानांबलदेवे ॥ हस्ताहंतृपितरि ॥ शोभनंदर्शनमस्य । भक्तैः सुखेनदृश्यतेवा । भाषायांशासियुधिदृशिधृषिमृषिभ्यो युच् ॥ गन्धर्वे ॥ जम्बूद्वीपे ॥ सुदर्शनोकारत्वात् ॥ मेरौ ॥ वंशे ॥ रोगभेदे ॥ न॰ शक्रनगरे ॥ अवगमने ॥ त्रि॰ सुदृश्ये ॥

सुदर्शनचूर्णम् । न॰ भावप्रकाशोक्तज्वररोगस्यौषधविशेषे ॥

सुदर्शनद्वीपः । पुं॰ न॰ जम्बुद्वीपे ॥

सुदर्शना । स्त्री॰ आज्ञायाम् ॥ ओषधिप्रभेदे । सोमवल्याम् । ह षपर्ण्याम् । सुदर्शनगुलञ्चइ॰ पद्मगुलञ्च॰ इ॰ गौ॰ दे॰ भा॰ प्र॰ ॥ सुदर्शनास्वादुरुष्णाकफशोफास्रवातजित् ॥ मेरुजम्ब्वाम् ॥ सुरोविशेषे ॥

सुदर्शनी । स्त्री॰ अमरावत्याम् ॥

सुदलः । पुं॰ क्षीरमोरटे ॥

सुदला । स्त्री॰ तरुण्याम् । गम्भार्य्याम् । सेवन्त्याम् । शालपर्ण्याम् ॥

सुदान्तः । पुं॰ शाक्यमुनिशिष्यविशेषे । त्रि॰ तपःसहे ॥

सुदामा । पुं॰ वारिधरे । मेघे ॥ पर्वतविशेषे ॥ गोपविशेषे समुद्रे ॥ श्वेतद्वीपे । ऐरावते ॥ श्रीकृष्णा

मित्रेब्राह्मणविशेषे ॥ त्रि॰ सुदात रि ॥ सुष्ठुददाति । डुदाञ्॰ । आतोमनिन् ॥
सुदामा । स्त्री॰ नदीविशेषे । टाप् ॥
सुदायः । पुं॰ हरणे । अन्यादान काले॰ व्रतभिक्षादौवदीयमानद्रव्ये । सुष्ठुदीयते । डुदाञ्॰ । घञ् । युगागमः ॥
सुदारुः । पुं॰ पारिपात्रकपर्व्वते ॥ सुदारुःपारिपात्रकइतिहेमचन्द्रः ॥ न॰ शोभनदारुणि ॥
सुदि । अ॰ शुक्लपक्षे ॥
सुदिनम् । न॰ शुभदिवसे ॥ त्रि॰ प्रशस्ते ॥ यथा । सुदिनासुसभा सुकार्य्यमेतत्प्रविचिन्त्येतविशेषतः स्वयमितिप्रयोगः ॥
सुदीर्घः । त्रि॰ अतिविस्तारे ॥
सुदीर्घघर्मा । स्त्री॰ अमनपर्य्याम् ॥
सुदीर्घफलिका । स्त्री॰ वार्त्ताकुविशेषे । सिङ्गाबैंगन॰ इतिगौ॰ दे॰ भा॰ प्र॰ ॥
सुदीर्घा । स्त्री॰ चीनाकर्कट्याम् ।
सुदुर्द्दर्शः । त्रि॰ अत्यन्तंद्रष्टुमशक्ये ॥ सर्व्वथादर्शनायोग्ये परमात्मनि ॥ तस्याहदृष्टरूपत्वात् ॥
सुदुर्ल्लभः । त्रि॰ अतिदुष्प्राप्ये । दुःखेनापिलब्धुमशक्ये ॥ यथा । बहूनांजन्मनामन्ते ज्ञानवान्मांप्रपद्यते । वासुदेवः सर्व्वमितिसम हात्मासुदुर्ल्लभइति ॥ सुष्ठुतिमा त्रंदुर्ल्लभः ॥
सुदुश्चरः । त्रि॰ अतिशयदुःखेना चरणीये ॥
सुदुष्करः । त्रि॰ सर्व्वथाकर्त्तुमशक्ये ॥ अत्यन्तक्लेशकरे ॥
सुदुस्तरः । त्रि॰ अतिदुःखेनतर णीये ॥
सुदूरः । त्रि॰ दवीयसि । दविष्ठे । अतिदूरे ॥ यथा । सुदूरमपिगन्तव्यंयत्रमाहेश्वरोजनः ॥
सुदूरपराक्रम : । त्रि॰ अतिदूरनिरा क्रमे ॥
सुदृढम् । न॰ अतिदृढे । गाढे ॥ त्रि॰ तद्वति ॥
सुदृढत्वक् । स्त्री॰ काश्मर्य्याम् ॥
सुदृक् । त्रि॰ शोभननेत्रयुक्ते ॥
सुदृश्यः । त्रि॰ सुन्दराकृतौ ॥
सुदेवी । स्त्री॰ नाभेर्भार्य्यायाम् । मेरु जंव्वाम् ॥
सुदेष्णः । पुं॰ मत्स्यदेशे । उत्तमदेशे ॥
सुद्युम्नः । पुं॰ वैवस्वतमनोःपुत्रे ॥ त्रि॰ बहुधने । अतिबलशालिनि ॥
सुधन्वा । पुं॰ विश्वकर्म्मणि । त्वष्ट रि । नरविशेषे ॥ त्रि॰ धन्व नि । प्रौढधानुष्के ॥ शोभनंध नुर्यस्य सः । धनुषश्चेत्यनङ् ॥
सुधन्वाचार्य्यः । पुं॰ व्रात्याद्वैश्या त्सवर्णायांजाते॰ जातिविशेषे ।

कारुषि । यथाहमनुः । वैश्यात्तु जायते व्रात्यात् सुधन्वाचार्य एव च । कारुषश्च विजन्मा च मैत्रः सात्वत एव चेति ॥

सुधर्म्मः । पुं० जिनगणाधिपविशेषे ॥

सुधर्म्मा । त्रि० धर्म्मशालिनि ॥ कुटुम्बिनि ॥

सुधर्म्मा । स्त्री० देवसभायाम् । शोभनो धर्म्मोऽस्याम् । धर्म्मादनिच् केवलात् । डाबुभाभ्यामिति पक्षे टाप् । अनो बहुव्रीहेरिति ङीब् न । सुधर्म्म० सुधर्म्मा इत्यादि । डाबभावे । सुधर्म्माणौ० सुधर्म्माण इत्यादि ॥

सुधा । स्त्री० पीयूषे । अमृते । मद्ये । सुरायाम् ॥ सुखेन धीयते । धेट् पाने । आतश्चोपसर्ग इति कर्म्मण्यङ् । लेपने । क्षुरायाम् । मूर्व्याम् ॥ स्नुह्याम् ॥ गलोट्टिकायाम् ॥ गङ्गायाम् ॥ शालपर्ण्याम् ॥ विद्युति ॥ गुडूच्याम् ॥ जले ॥ तोये ॥ रसे ॥ धात्र्याम् ॥ आमलक्याम् ॥ पुष्परसे । मधुनि ॥ हरीतक्याम् ॥ सुष्ठु दधाति पुष्णाति । डुधाञ्० । क्विप् ॥

सुधांशुः । पुं० इन्दौ । चन्द्रे ॥ सुधायुक्ता अंशवो यस्य सः ॥

सुधांशुतैलम् । न० कर्पूरतैले ।

सुधांशुरत्नम् । न० मौक्तिके ॥ इन्दुकान्ते ॥

सुधाकरः । पुं० चन्द्रे ।

सुधाक्षारः । पुं० सौधमूर्धनि । चूना० इ० भा० प्र० ॥ सुधाक्षारोऽग्निसङ्काशः पाकोक्तौ दीविदारणः ॥

सुधाङ्गः । पुं० चन्द्रमसि ॥

सुधाजीवी । पुं० पलगण्डे । लेपके । राज० इ० भा० ॥ सुधया लेपनेन जीवति० तच्छीलः णिनिः ॥

सुधाधारः । पुं० चन्द्रे । इन्दौ । अमृतपात्रे ॥ सुधाया आधारः ॥

सुधानिधिः । पुं० चन्द्रे ।

सुधाभुक् । पुं० गीर्वाणे । देवे । सुधां भुङ्क्ते । भुज० । क्विप् ॥

सुधामय । पुं० सौधे । राजसदने । त्रि० अमृतात्मके ॥

सुधामोदकः । पुं० यवासशर्करायाम् ॥

सुधामोदकजः । पुं० तवराजोद्भवखण्डे ॥

सुधावर्षी । पुं० विधातरि । विश्वसृजि । बुद्धभेदे ।

सुधावासः । पुं० चन्द्रे । न० त्रपुषि ॥

सुधास्रवा । स्त्री० ऋपुष्प्याम् ॥

सुधासंज्ञयोगः । पुं० अमृतसिद्धियोगे । यथा । हस्ताश्वजद्वैज्य०

अथ निजपदं निजपदं क्रमोद० हा
समारे । प्रमेयम् । भवेदस्यधि
षुण्णसुधिया • कश्चित्पुण्यं मनोचित
देवं सुधासं प्रयोग : ॥

सुधासिन्धु : । पुं० अमृतार्णवे ॥

सुधासूति : । पुं० चन्द्रे ॥ यथा ।
प्रदीपज्वालाभिर्दिवसकरनीराजन
विधि : • सुधासूतेश्चन्द्रोपलजल
लवैरर्घ्यघटना । स्वकीयैरम्भोभि:
सलिलनिधिसौहित्यकरणं • त्वदी
याभिर्वाग्भिस्तव जननि वाचां स्तुति
रियमिति ॥ मलि । यज्ञे ॥ पद्मे ॥

सुधास्रवा । स्त्री० अधोजिह्विकाया
म् । गलशुण्डिकायाम् । घण्टि
कायाम् । रूडानाड्याम् । रुद
क्षीरवं ॥

सुधाहर : ।) पुं० गरुडे ॥ देवे ॥
सुधाहृत् ।)

सुधिति : । पुं० स्त्री० स्वधितौ । प
रशौ ॥

सुधी : । पुं० विदुषि । सति । को
विदे । पण्डिते । न्यायगृहीतमो
क्षार्थयाश्के ॥ सुष्ठु ध्यायति । ध्यै
• । ध्यायती : क्विपिसम्प्रसारणम्
॥ स्त्री० सुन्दरबुद्धौ ॥ सुष्ठु धी:
त्रि० शोभनबुद्धियुक्ते ॥

सुधूप : । पुं० सरलद्रवे ॥

सुधूम्य: । पुं० स्वादुनामगन्धद्रव्ये ॥

सुधोद्भव : । पुं० धन्वन्तरौ । दिवो
दासि ॥

सुधोद्भवा । स्त्री० हरीतक्याम् ॥

सुनन्द । पुं० श्रीकृष्णस्य पार्षदविशेषे ॥
द्वादशविधराजगृहान्तर्गतगृहवि
शेषे ॥ समदैर्घ्यं राज्ञ : सप्तहस्तमि
तैकपञ्चाशद्धस्त : परिणाहश्चत्वारिं
शद्धस्तश्च ॥ यथा । बदरं बोध्यते
मानं तस्यातिनेवकल्पना । राज्ञ :
सप्तहस्तमेवन्तु दैर्घ्ये सर्ववर्णि: क्षिपे
त् ॥ आयामिनं सुनन्द : स्याद्द्वात्रि
ंशत्सप्तभि : । परिणाहश्चतुर्भि
र्वा राजहस्तै : प्रतिष्ठित : । पञ्चा
धिदेवताभौमी रक्षती मा वसुन्धराम्
द्वाराणि मणिबोधरत्नचित्राणि ता
मिष ॥ रत्नपट्टावलीगेह : सकला
र्थप्रसाधक : । अवस्थित्वा महीपा
ल : सुचिरं पाति मेदिनीमिति यु
क्तिकल्पतरु : ॥ दैर्घ्ये ५१ प्रस्थे
४० ॥ न० हलभृन्मुसले ॥

सुनन्दा : स्त्री० रोचनायाम् ॥ उ
मायाम् ॥ अङ्गनायाम् ॥ ननन्या
म् ॥ उमासखीभेदे ॥ अर्कपत्रौष
ध । इत्यमरः० हृ० गौ० दे०
भा० प्र० ॥

सुनन्दिनी । स्त्री० समुद्भवपिपीलि
न्दसि ॥

सुनयम : पुं० मृगे ॥ त्रि० शोभननेत्र
युक्ते ॥ शोभनेनयनेयस्य स : ॥

सुनयना । स्त्री० नार्याम् ॥

सुरेन्द्राधिपः । पुं॰ यगणे । ऽऽ ॥

सुनाकृतः । पुं॰ कर्पूरके ॥ द्र॰ प्र॰ चन्द्रिका ॥

सुनाभः । पुं॰ मैनाकाचले ॥

सुनामद्वादशी । स्त्री॰ द्वादशमासी यद्द्वादशीकर्त्तव्यव्रतविशेषे ॥

सुनारः । पुं॰ शुनीस्तन्ये ॥ सर्पाण्डे ॥ चटके । कलविङ्के ॥

सुनालः । पुं॰ उशीरे ॥ लामज्जके ॥

सुनालकः । पुं॰ वकद्रुमे ॥ त्रि॰ सुन्दरनालयुक्ते ॥

सुनासिका । स्त्री॰ काकनासायाम् ॥ शोभननासायाम् ॥ त्रि॰ तद्युक्ते ॥

सुनासीरः । पुं॰ इन्द्रे ॥ नासते । शास्त्रशब्दे । बाहुलकादीरन् । सुष्ठु नासीरं सेनामुखम् । नासीरात्र्यसरो वायस्य सः ॥

सुनिर्य्यासा । स्त्री॰ जिङ्गिन्याम् ॥

सुनिश्चलः । पुं॰ वृक्षविशेषे ॥

सुनिषण्णम् । न॰ सुनिषण्णकशाके । अम्लशिखिकासदृशे॰ चौपतिया॰ इ॰ प्र॰ जलप्रभवशाके । चतुष्पत्र्याम् ॥ अस्य गुणा यथा । चाङ्गेरीसदृशः पत्रैश्चतुर्दलइतीरितः । शाकोजलान्वितेदेशेचतुष्पत्रीतिचोच्यते ॥ सुनिषण्णोहिमोग्राही मोहदोषत्रयापहः । अविदाहीलघुः स्वादुः कषायोरूक्षदीपनः ॥ वृष्योरुच्योज्वरश्वासमेहकुष्ठभ्रमप्रणुत् ॥ सिताबरशाके । श्रीवारके ॥ त्रि॰ सूपविष्टे ॥

सुनिषण्णकम् । न॰ शाकविशेषे । चितुष्के । सुनिषण्णे ॥

सुनीतिः । स्त्री॰ ध्रुवमातरि । शोभननये ॥ त्रि॰ शोभननीतियुक्ते ॥

सुनीथः । त्रि॰ धर्मशीलके ॥ नीतिमति ॥ पुं॰ वटौ ॥ ब्राह्मणे ॥ सुष्ठु नयति । णीञ्॰ । हनिकुषिनीरम्यादिना क्थन् ॥

सुनीथा । स्त्री॰ मृत्योः कन्यायाम् । वेणस्य मातरि ।

सुनीलः । पुं॰ नीलरत्ने ॥ दाडिमे ॥ सुन्दरनीलवर्णे ॥ म॰ लामज्जके ॥

सुनीलकः । पुं॰ नीलरत्ने ॥ नीलासने ॥ दाडिमे । नीलभृङ्गराजे ॥ न॰ वीरणाङ्गे ॥

सुनीला । स्त्री॰ तृणविशेषे । चणिकायाम् । गोदुग्धायाम् ॥ अतस्याम् ॥ विष्णुक्रान्तायाम् । अरतीतृणे ॥

सुनीलिका । स्त्री॰ सुनीलायाम् ॥

सुनेपाली । स्त्री॰ पिण्डखर्ज्जूरिकाप्रभेदे ॥ तद्गुणा यथा । सुनेपाली सुमृदुलाबलिष्ठीनफलाधमा । सुनेपालीश्रमभ्रान्तिदाहमूर्च्छासपित्तहृत् । सुखेमानीतिलोके ॥

सुन्दः । पुं॰ रामायणप्रसिद्धवानरविशेषे । राक्षसविशेषे ॥ करुणाकरे परमेश्वरे । सुष्ठु उनत्ति । आर्द्रीकरोति । उन्दी॰ । पचाद्यच् । शकन्ध्वादिः ॥

सुन्दरः । पुं॰ कामदेवे । सुन्दरी॰ इति॰ गौ॰ दे॰ भा॰ प्र॰ वृक्षे ॥ त्रि॰ रुचिरे । चारुणि । शोभने । मञ्जुले ॥ सुन्द्रियते । दृङ् आदरे । शश्वदाद्रिस्यप् । पृषोदरादिः ॥ यद्वा । सुष्ठु उनत्ति॰ चित्तं द्रवीकरोति । उन्दी क्लेदने । बाहुलकाद् रः । शकन्ध्वादिः ॥

सुन्दरिका । स्त्री॰ तीर्थविशेषे ॥

सुन्दरी । स्त्री॰ रूपलावण्यसम्पन्नायां नार्याम् ॥ द्रुमान्तरे । त्रिपुरसुन्दर्यां देव्याम् । योगिनीविशेषे ॥ हरिद्रायाम् ॥ काकमाच्याम् ॥ छन्दोविशेषे ॥ अयुजोर्यदि सौ जगौ युजोः सभरालगौ यदि सुन्दरी तदा । यथा । यदवोचदवेक्ष्य मानिनी परितः स्नेहमयेन चक्षुषा । अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयम् ॥ वर्णवृत्तान्तरेऽपि । कुसुमगन्धरसैरभिभूषिता चरणसङ्गतनूपुरमण्डिता । करमुद्रणलसद्वलयान्विता क्षुरति कस्य न चेतसि सुन्दरि । यथा । न सुलभा शरदिन्दुमुखी प्रिया मनसि कामिनि चेष्टितमोहरम् । मलयमारुतचालितमालतीपरिमलप्रसरोद्धतवासरः ॥ सुन्दरशब्दस्य गौरादित्वात् ङीप् । पार्वत्याम् ॥

सुन्वन् । त्रि॰ सोमयाजिनि । सोमाभिषवकर्त्तरि ॥ सुनोतेर्लटः शतादेशः ॥

सुपक्वः । पुं॰ सुगन्धाम्रे ॥ त्रि॰ शोभनपरिणते । परिपक्वे ॥

सुपक्वकः । पुं॰ सहकाराम्रे ॥

सुपत्रः । पुं॰ पक्षिराड्वृक्षे । आदित्यपत्रे । न॰ तेजपत्रे । पत्रके ।

सुपत्रकः । पुं॰ शिग्रौ ॥

सुपत्रा । स्त्री॰ पालङ्क्याम् ॥ शतावर्याम् ॥ शम्याम् ॥ रुद्रजटायाम् । शालपर्ण्याम् ॥

सुपत्रिका । स्त्री॰ जतुकायाम् ॥

सुपथः । पुं॰ शोभनवर्त्मनि । सत्पथे ॥ यथा । सत्पथस्त्वतिपन्थाश्च सुपन्थाः सुपथोऽपि चेति शब्दरत्नावली ॥

सुपन्थाः । पुं॰ अर्चितेऽध्वनि । सत्पथे । अतिपथि ॥ सुः पूजायाम् । कुगतीति समासः । नपूजनादिति समासान्तनिषेधः । ख्यातसमासान्तनिर्देशात्॰ पथः सङ्ख्याव्ययादेरिति न क्लीबत्वम् ॥

सुपथ्यः । त्रि॰ अपीडाकारिभोजनादौ ॥

सुपथ्या । स्त्री॰ श्वेतचिल्लयाम् ॥

सुपद्मः । पुं॰ व्याकरणविशेषे ॥ पुं॰ न॰ शोभनारविन्दे ॥

सुपद्मा । स्त्री॰ वचायाम् ॥

सुपर्णः । पुं॰ पन्नगाशने । गरुडे ॥ कनकमयत्वात्॰ शोभनेपर्णे यस्य सः ॥ स्वर्णचूडे । चाषे ॥ कृतमालके । राजवृक्षे ॥ सुष्ठुपर्णान्यस्य ॥ भगवतिवासुदेवे ॥ शोभनानिपर्णानिच्छन्दांसि॰ संसारतरुरूपिणोस्य प्रवृद्धोपस्थेऽद्रिविशेषे ॥ श्येनप्रभेदे । वेगगानस्य विषयः सुपर्ण इतिव्याख्यातारः ॥ सप्तपर्णे ॥

सुपर्णकः । पुं॰ आरग्वधे । सप्तच्छन्दवृक्षे ॥ गरुडे ॥

सुपर्णकेतुः । पुं॰ विष्णौ ॥

सुपर्णा । स्त्री॰ कमलिन्याम् ॥ विनतायाम् ॥

सुपर्णाख्यः । पुं॰ नागकेशरे । तीर्थविशेषे ॥ यथा । उत्पलाख्योसुपर्णाख्ये । इति ॥

सुपर्णिका । स्त्री॰ स्वर्णजीवन्त्याम् ॥ पलाश्याम् ॥ बाकुच्याम् ॥ रेणुकायाम् ॥ शालपर्ण्याम् ॥

सुपर्णी । स्त्री॰ कमलिन्याम् ॥ विनतायाम् ॥

सुपर्णीतनयः । पुं॰ गरुडे । तार्क्ष्ये ॥

सुपर्व्वा । पुं॰ सुमनसि । देवे । सुरे ॥ सुष्ठुपर्वं अमावास्यादिचरितम्॰ अकुल्यादिर्यान्थः उत्सवो वा यस्य ॥ शरे ॥ वंशे ॥ पर्वणि ॥ धूमे ॥

सुपर्व्वा । स्त्री॰ श्वेतदूर्वायाम् ॥

सुपर्व्वाङ्गना । स्त्री॰ देवललनायाम् ॥ यथा । सुपर्व्वाङ्गनागानगम्भीरतानलमत्स्वर्ङ्गशोभाविपश्चोरवेण । कथन्किङ्किणीनादपूर्णेनतूर्णं सुखेनाम्बसम्पूर्णघूर्णांकरोषि ॥

सुपाकिनी । स्त्री॰ गन्धपत्रायाम् ॥

सुपाक्यम् । न॰ विड्लवणे ॥

सुपात्रम् । न॰ दानयोग्यव्यक्तौ शोभनभाजने ॥ त्रि॰ उत्तमपात्रयुक्ते ।

सुपानः । त्रि॰ पानयोग्ये । सुखेनपीयते । पा॰ । कर्मणिखल्युट् ॥

सुपार्श्वः । पुं॰ प्लक्षवृक्षे ॥ वृत्तःश्रेदे । सम्पातेः पुत्रे॰ पक्षिविशेषे । पश्चात्तत्सहस्रयोजनोच्छ्राये॰ चतुर्वर्णमेरोः सौम्यादिग्भि॰ तस्यदाक्षिण्येस्थितैः विष्कम्भशैले । तावत्सहस्रयोजनोन्नतमाश्रयोधपादपोऽस्ति ॥

सुपार्श्वकः । पुं॰ गर्दभाण्डे । कन्दरालो । कपीतने । प्लक्षे । बोलच॰ पौलखच॰ निर्गुण्डी॰ गौंडी॰ इ॰ प्र॰ वृक्षे ॥ शोभनम्॰ पार्श्वमस्य ॥ भाण्डविशेषे ।

सुपिङ्गला । स्त्री० जीवन्त्याम् ॥ ज्योतिष्मत्यां ॥

सुपीतम् । न० गर्जरे ॥

सुपुटः । पुं० कोलकन्दे ॥ विष्णुकन्दे ॥

सुपुत्रिका । स्त्री० लताविशेषे । जतुकायाम् । जतुकायाम् । तिर्य्यक्फलायाम् ॥

सुपुष्करा । स्त्री० स्थलपद्मिन्याम् ।

सुपुष्पः । पुं० राजतरुण्याम् । हरिद्रौ । शिरीषे ॥ रक्तपुष्पके । पालितामन्दार० इ० गौ० दे० भा० प्र० ॥ न० लवङ्गे ॥ प्रपौण्डरीके । तूले । तूदे । पार्श्वपिप्पलाभिधे ॥ स्त्रीणांरजसि ॥ आहुल्ये ॥

सुपुष्पिका । स्त्री० पाटलायाम् ॥ जीर्णदारुणि ॥

सुपुष्पी । स्त्री० श्वेतापराजितायाम् ॥ कदल्याम् ॥ जीर्णफञ्ज्याम् । जीर्णदारुणि ॥ द्रोणपुष्प्याम् ॥ मिश्रेयायाम् ॥ शतपुष्प्याम् ॥

सुपूरः । पुं० बीजपूरे ॥

सुपूरकः । पुं० बकपुष्पवृक्षे ॥

सुपूर्व्वप्रवेशः । पुं० यात्रानिवृत्त्यनन्तरकृतगृहप्रवेशे ॥ यात्रावसानेतुसुपूर्व्वसंज्ञः ॥

सुपेशलः । त्रि० अतिरम्ये । सुन्दरे ॥

सुपेशा । त्रि० सुकुमारे । कोमले ॥ सुरूपे ॥

सुप्तम् । न० स्वापिकायाम् । सुषुप्तौ ॥ त्रि० निद्रिते । निद्राणे । शयितेसूता० इ० भा० ॥ अस्त्वेवोधनेविधिनिषेधौयथा । क्षुधितस्तृषितः कामीविद्यार्थीकृषिकारकः । भाण्डारीचप्रवासीचसप्तसुप्तान्प्रबोधयेत् ॥ मक्षिकाभ्रमरीसर्पोराजाबालकस्तथा । परश्वापिचमूर्खश्चसप्तसुप्तान्नबोधयेत्इति ॥ स्वापितस्म । ञिष्वप्शये । क्तः । सम्प्रसारणम् ॥

सुप्तघातकः । त्रि० दुःशीरे । हिंस्रे ॥ इ० त्रि० ष० ॥

सुप्तजनः । पुं० अर्द्धरात्रे ॥ निद्रितेजने ॥

सुप्तज्ञानम् । न० सुप्तविज्ञाने । स्वप्ने ॥

सुप्तिः । स्त्री० स्पर्शाज्ञतारुजि ॥ विस्रम्भे ॥ शयने ॥ निद्रायाम् । स्वापे विज्ञानविरतौ ॥ अस्याःस्त्रैविध्यमुक्तंयथा । आहारादिविभेदेन० सात्त्विकीराजसीतथा । तामसीतिविधासुप्तिः सापराप्यमृष्यते विधा ॥ सुखमस्वाप्समद्याद्दुःखमस्वाप्समद्यनु । गाढमूढोहम

स्वाप्समित्युक्तिः सार्वलौकिकोक्तिः ॥ ञिष्वप्शये । क्तिच् । सुप्तःसुप्ति नजानातिनासुप्तेस्वप्नजागरौ ॥

सुप्तोत्थितः । त्रि॰ सुप्तादुत्थाउत्थिते । आदौसुप्तः पश्चादुत्थितः ॥

सुप्रजाः । पुं॰ सत्सन्तानवति ॥ नित्यमसिच्प्रजामेधयोः ॥

सुप्रतिभा । स्त्री॰ मदिरायाम् ॥ प्रगल्भतायाम् । प्रागोत्कर्षे ॥

सुप्रतिष्ठा । स्त्री॰ शोभनप्रतिष्ठायाम् ॥ पञ्चाक्षरायांवृत्तौ ॥ साविधा । पङ्क्तिप्रियाच ॥

सुप्रतिष्ठितः । पुं॰ उदुम्बरे ॥ त्रि॰ शोभनप्रतिष्ठायुक्ते ॥ सुस्थिरे ॥ यशस्विनि ॥

सुप्रतीकः । पुं॰ ईशानदिग्गजे ॥ शिवे ॥ कामदेवे ॥ शोभनाङ्गे ॥ त्रि॰ साधौ ॥ शोभनाङ्गविशिष्टे शोभनाः प्रतीकाः अवयवायस्य ॥ यद्वा । सुप्रपूर्वादिणोऽलीकादित्वात्कीकन् । तृणस्तुट्च ॥

सुप्रभः । पुं॰ जिनविशेषे । शुक्लले ॥ त्रि॰ सुन्दरप्रभायुक्ते ॥

सुप्रभा । स्त्री॰ वाकुच्याम् ॥ अग्निजिह्वाविशेषे ॥ सुप्रभापद्मरागाभाऽरुण्यांदिशिसंस्थितेतितन्त्रसारः ॥ शोभनदीप्तौ ॥

सुप्रभातम् । न॰ शुभसूचकप्रातःकाले ॥

सुप्रभाता । स्त्री॰ शोभनप्रभातयुतायांरात्रौ ॥ प्लक्षद्वीपस्थसरिति ॥

सुप्रयुक्तः । त्रि॰ शोभनप्रयोगविशिष्टे ॥

सुप्रयुक्तशरः । पुं॰ कृतहस्ते ॥

सुप्रयोगविशिखः । पुं॰ कृतहस्ते । सुशिक्षितबाणमोक्षे । सम्यक्कृतशराभ्यासे ॥ शोभनप्रयोगोऽस्य सुप्रयोगः । सुप्रयोगोविशिखोऽस्य ।

सुप्रलम्भः । त्रि॰ सुखलभ्ये ॥

सुप्रलापः । पुं॰ सुवचने । सुष्ठूक्तौ ॥ सुष्ठुप्रकृष्टं लपनम् । घञ् ॥

सुप्रसन्नः । पुं॰ कुबेरे ॥ कृष्णार्जके ॥ त्रि॰ सुप्रसादयुक्ते ॥

सुप्रसन्नकः । पुं॰ कृष्णार्जके ॥

सुप्रसरा । स्त्री॰ प्रसारण्याम् । गन्धालिकायामलतायाम् ॥

सुप्रसादः । पुं॰ शिवे ॥ विष्णौ ॥ शोभनप्रसादोऽस्य ॥ अपचारवतांशिशुपालादीनामपिमोक्षप्रदात्-त्वात्॥ सुप्रसन्नतायाम् ॥ त्रि॰ प्रसन्नमुखे ॥

सुप्रातः । पुं॰ सुप्रभाते ॥ शोभनंप्रातरस्य । सुप्रातसुश्वेत्यादिना॰ बहुव्रीहावच्प्रत्ययान्तोनिपातितः ॥

सुप्रिया । स्त्री॰ सुभगायाम् । भर्त्तुःप्रियायाम् । सुकन्यायाम् ॥ मघाऽऽदमपरिच्छन्यवद्दासिंहेशुक

भवेत्। तथाऽन्यैः कन्यकाचोढा सुभगा सुप्रिया भवेत् इति मात्स्य: ॥

सुफलः। पुं॰ दाडिमे। बदरे। मुद्गे। कर्णिकारे। राजतरौ। आरग्वध विशेषे। छोटसोनालु॰ इ॰ गौ॰ दे॰ भा॰ प्र॰ ॥ कपित्थे ॥ सत्फले ॥ त्रि॰ शोभनफलवति। सुष्ठु शोभनानि फलान्यस्य ॥

सुफला। स्त्री॰ कूष्माण्डामोषधौ ॥ इन्द्रवारुण्याम् ॥ काश्मर्याम् ॥ कदल्याम् ॥ कपिलद्राक्षायाम् ॥

सुफेनम्। न॰ समुद्रफेने ॥

सुबन्धः। पुं॰ तिले ॥

सुबलपुत्री। स्त्री॰ गान्धार्याम् ॥

सुवल्लरी। स्त्री॰ पुत्रदाव्याम् ॥

सुवल्ली। स्त्री॰ वाकुच्याम्। सोमराज्याम् ॥ शोभना वल्लिरस्याः ॥ कटुव्याम् ॥

सुब्रह्मण्यः। पुं॰ ऋत्विग्विशेषे ॥ गुहे ॥ केरलादिदेशप्रसिद्धे सर्पाधिकृतदेवे॰ तत्रत्ये सर्पराजे च ॥

सुब्रह्मण्या। स्त्री॰ निगदविशेषे ॥

सुब्रह्मवासुदेवः। पुं॰ ब्रह्मरूपवासुदेवसुते ॥

सुभगः। पुं॰ चम्पके ॥ अशोके ॥ रक्ताम्लाने। टङ्कणे ॥ त्रि॰ हृष्टे ॥ सुन्दरे चक्षुष्ये ॥ शोभनम्॰ भगं शौर्यं स्य ॥

सुभगा। स्त्री॰ दुर्गायाम् ॥ पतिप्रियायाम्। सुप्रियायाम् ॥ शालिपर्ण्याम् ॥ वनमल्लयाम् ॥ हरिद्रायाम् ॥ सुवर्णकदल्याम्। चम्पककदल्याम्। चम्पाकला॰ इ॰ भा॰ प्र॰ ॥ नीलदूर्वायाम्। प्रियङ्गौ ॥ कस्तूर्याम् ॥ तुलस्याम् ॥ कैवर्तिकायाम् ॥ शोभनम्॰ भगं शौर्यं स्याः ॥

सुभगासुतः। पुं॰ सौभागिनेये ॥ सुभगायाः सुतः ॥

सुभङ्गः। पुं॰ नारिकेलवृक्षे ॥

सुभद्रः। पुं॰ विष्णौ। राजभेदे ॥ त्रि॰ सुमङ्गलयुक्ते ॥

सुभद्रकः। पुं॰ विमाने। बिल्ववृक्षे ॥

सुभद्रा। स्त्री॰ श्रीकृष्णभगिन्याम् ॥ घृतमण्डायाम् ॥ श्यामालतायाम् ॥ काश्मर्याम्। गम्भार्याम् ॥

सुभद्राणी। स्त्री॰ त्रायन्त्याम्। बटुना इ॰ गौ॰ दे॰ भा॰ प्र॰ ॥

सुभद्रिका। स्त्री॰ दुर्गायाम् ॥

सुभद्रेशः। पुं॰ अर्जुने ॥

सुभानु। पुं॰ वत्सरविशेषे ॥ तत् फलं यथा। सुभिक्षं क्षेममारोग्यं विप्रस्वनिरुपद्रवम्। व्यवहारो भवेद्दृष्टः सुभानौ देवपूजिते ॥ १७ ॥

सुभाषितः। पुं॰ बुद्धे ॥ न॰ सुवचने ॥ हितोपदेशवचने ॥ यथा स्वर्गापवर्गसिद्ध्यर्थं भाषितं यत् सु

शोभनम् । वाक्यं मुनिवरैः शान्तैस्तदिदं यत्सुभाषितमिति ॥

सुभिक्षः । त्रि॰ सुलभभक्ष्यद्रव्ये ॥ सुलभभक्ष्ययुक्तकालादौ ॥

सुभिक्षा । स्त्री॰ धातकीपुष्प्याम् ॥ शोभनायाम् ॥ भिक्षायाम् ॥ त्रि॰ लब्धान्ने ॥ सुष्ठु भिक्ष्यते॰ । भिक्ष याच्ञादौ । घञ् ॥

सुभीरवः । पुं॰ पलाशवृक्षे ॥

सुभूः । त्रि॰ सुजन्मनि ॥

सुभूता । स्त्री॰ त्रैलोक्यात्मनः कोशस्योदग्भागे ॥ भूतिमद्भिरीश्वरकुबेरादिभिरधिष्ठितत्वात् ॥

सुभूतिकः । पुं॰ बिल्ववृक्षे ॥

सुभूमः । पुं॰ कार्त्तवीर्ये ॥

सुभृशम् । अ॰ गाढमित्यर्थे ॥

सुभ्राता । त्रि॰ स्निग्धभ्रातरि । शोभनः स्निग्धो भ्राता यस्य सः । नद्यृतश्चेति कप् तु न भवति । वन्दिते भ्रातुरिति निषेधात् ॥

सुभ्रूः । स्त्री॰ योषिति ॥ त्रि॰ शोभनभ्रूविशिष्टे ॥

सुमम् । न॰ पुष्पे ॥

सुमङ्गलम् । न॰ पुष्पादिद्रव्ये ॥ त्रि॰ सदाचारे ॥ अतिशयधर्मवति ॥

सुमङ्गला । स्त्री॰ वायसोल्याम् । स्कन्दमातरि ॥

सुमतः । त्रि॰ अनुमते । सुन्दरज्ञानविषये ॥

सुमतिः । पुं॰ भरतात्मजे ॥ दत्तार्हद्विशेषे । भूतार्हद्विशेषे ॥ स्त्री॰ शोभनमतौ । विष्णुयशसः पत्न्याम् । कल्किमातरि ॥ त्रि॰ सुबुद्धौ । निपुणे ॥

सुमदनः । पुं॰ आम्रवृक्षे ॥

सुमदात्मजा । स्त्री॰ स्वर्गानन्दायाम् । अप्सरसि ॥

सुमधुरः । पुं॰ जीवशाके ॥ न॰ अत्यर्थमधुरवाक्ये । सान्त्वे ॥ त्रि॰ अतिशयमधुररसयुक्ते ॥

सुमनः । पुं॰ गोधूमे ॥ सुष्ठु मन्यते । मन ज्ञाने । अच् ॥ धत्तूरे ॥ त्रि॰ मनोहरे ॥

सुमनःपत्रिका । स्त्री॰ जातीपत्र्याम् जावित्री॰ इ॰ भा॰ प्र॰ ॥

सुमनःफलम् । न॰ जातीफले ॥ पुं॰ कपित्थवृक्षे ॥

सुमनाः । पुं॰ देवे । सुरे । धीरे । पण्डिते ॥ शोभनं मनो यस्य सः ॥ पूतीकरञ्जे ॥ महाकरञ्जे ॥ निम्बे ॥ गोधूमे ॥ देवप्रायेणायम्भूम्नि ॥ त्रि॰ प्रशस्तमनसि ॥

सुमनाः । स्त्री॰ सुमनसः स्त्री॰ भूम्नि॰ पुष्पे ॥ सुमनाः पुष्पमालत्योः स्त्रियां स्मितमिदिन्यादेरेकत्वम् । विश्वाश्मशानसुमनासृणवल्लभनीयेतिश्च कोशोऽस्य ॥ स्त्रियः सुमनसः ॥

पुष्पम् प्रसूनं कुसुमं सुमनमित्यमरोक्तेः। भूम्नि स्त्रियः सुमनसः इति रत्नकोशात् बहुत्वमपि॥ सुष्ठु मन्यते आभिः। मन॰। असुन्॥ यद्वा। शोभनं मनोऽस्याम्॥ मतप्त्याम्॥

सुमनः। न॰ पुष्पे॥ पुष्पं सुमनः कुसुममिति नाममाला। अप्रस्तावेऽयं धिसुमनसोतिप्रयोगबाहुक्लीबत्वेऽनुकूलः। क्लीबत्वं छान्दसमित्येके॥

सुमना। स्त्री॰ मालत्याम्। जातीपुष्पे च। अस्य लीतिभाषाप्रसिद्धे- सुमनायाश्च पञ्चाङ्गीति सुश्रुते दर्शनादाबन्तापि॥

सुमनोरजः। न॰ परागे॥ सुमनसां रजः॥

सुमन्तुः। पुं॰ मुनिविशेषे। अथर्वाङ्गिरसानुधारके व्यासशिष्ये॥

सुमन्त्रः। पुं॰ कल्किदेवस्य ज्येष्ठे भ्रातरि॥ यथा कल्केर्ज्येष्ठास्त्रयः शूराः कविप्राज्ञसुमन्त्रकाः। तातमातृप्रियकरा गुरुविप्रप्रतिष्ठिता इति कल्किपु॰ २८॰अ:॥ दशरथभूपतेः सारथौ॥

सुमन्त्रा। स्त्री॰ दुर्गायाम्॥

सुमर्षणः। त्रि॰ सुसहे॥ सुखेन मृष्यते। मृष॰। भाषायां शासियुधीत्यादिना खलर्थे युच्॥

सुमालतिका। स्त्री॰ वर्णवृत्तविशेषे॥ यदा जगणौ हि भवेदमलद्युः फणौ भितनोऽतिसुमालतिकेति॥ यथा। मनोज्ञमरेण विषज्जतरेण। व्रजादिनतेन भवहृयितेन॥

सुमित्रः। पुं॰ ईश्वरे॥ सुष्ठु मित्रं जीवपक्षिणः सखा॥ हस्तार्णं तृपितरि। इक्ष्वाकुवंशीयवृहद्बलान्वये सुरथराजपुत्रे॥ न॰ हिते॥

सुमित्रभूः। पुं॰ जिनचक्रवर्त्तिविशेषे। सगरे॥

सुमित्रा। स्त्री॰ लक्ष्मणशत्रुघ्नयोर्जनन्याम्। दशरथराजपत्न्याम्। लक्ष्मणप्रस्वाम्॥

सुमित्रानन्दवर्द्धनः। पुं॰ लक्ष्मणे॥ सुमित्राया आनन्दं वर्द्धयति। नन्द्यादित्वाल्ल्युः॥

सुमुखः। पुं॰ गरुडात्मजे॥ नागविशेषे॥ शाकभेदे॥ पण्डिते॥ हेरम्बे॥ वनबर्बरिकायाम्॥ बर्बरे। सितार्जके॥ प्राग्दक्षिणपश्चिमद्वारगृहे॥ भगवति वासुदेवे॥ शोभनं मुखमस्य॥ न॰ नखक्षतविशेषे॥ उत्तमाङ्गे॥ त्रि॰ पण्डिते। मनोज्ञे सुन्दरे॥ सुन्दराननविशिष्टे। सुन्दरवदने॥

सुमुखा। स्त्री॰ तार्क्ष्यवध्वाम्॥

सुमुखी। स्त्री॰ देव्यन्तरे॥ तार्क्ष्यवध्वाम्। त्रिष्टुप्छन्दो ११ भेदे॥

नजजलगैर्गदितासुमुखी । यथा । तरणिसुतातटकुञ्जगृहेवदनविधुस्मितदीधितिभिः । तिमिरमुदस्य मुखंसुमुखीहरिमवलोक्यचुचुम्बचिरम् ॥ सुन्दरवदनायाम् ॥ स्वाङ्गाच्चोपसर्ज्जनादसंयोगोपधादिति ङीष् ॥

सुमुष्टि : । पुं० विषमुष्टिवृक्षे । डोडिकायाम् ॥

सुमूल : । पुं० श्वेतशोभाञ्जने ॥

सुमूलकम् । न० गर्ज्जरे ॥

सुमूला । स्त्री० शालपर्ण्याम् ॥ पृश्निपर्ण्यां ॥

सुमेखल : । पुं० मुञ्जे ॥ त्रि० शोभनमेखलायुक्ते ॥

सुमेधा : । स्त्री० ज्योतिष्मत्याम् । त्रि० सुबुद्धौ । विदुषि । शोभना मेधाप्रज्ञायस्यस : । नित्यमसिच्प्रजामेधयोरित्यसिच्समासान्त: ॥

सुमेरु : । पुं० पर्वतविशेषे । मेरौ । हेमाद्रौ । रत्नसानौ । सुरालये । मिनोतिक्षिपति० उच्चत्वाज्ज्योतींषि । डुमिञ्प्रक्षेपणे । मिपीभ्यांरु : । सुमेरुरित्युपसर्गान्तरनिवृत्त्यर्थम् ॥

सुम्नम् । न० सुखे ।

सुम्पलुराठ : । पुं० कर्पूरके ॥

सुम्भ: । पुं० देशविशेषे ॥ असुरभेदे ।

सुम्यम् । न० रज्जौ । सुपूजितंमौ

यते । मौञ्ज्गत्याम् । एरच् । बाहुलकाद्यत् ॥ सुमेपूर्व्वे साधुर्वा । तत्रसाधुरितियत् ॥

सुयन्त्रित : । त्रि० आत्मीयनियमिते विप्रादौ ॥

सुयामुन : । पुं० वत्सराजे । प्रासादे ॥ अद्रिविशेषे ॥ अच्युते । श्रीकृष्णे ॥ शोभनायमुनासम्बन्धिन : परिवेष्टारोऽस्य ॥ यामुना: परिवेष्टार : पद्मासनादय : शोभनायस्येतिवा ॥

सुयोजित : । त्रि० नियुक्ते ॥

सुयोधन : । पुं० दुर्योधने ॥ सुखेन युध्यतेसस्सुयोधन : । भाषायांशासियुधिदृशिधृषिमृषिभ्योयुच् ॥

सुर : । पुं० अमरे । निर्ज्जरे । देवे । सुरति । षुरप्रसवैश्वर्ययो : । तुदादि : । इगुपधेतिक : ॥ यथा । क्षीरसमुद्रोत्थासुरा० साअस्ति० अस्येत्यर्थे० अर्शआद्यच् ॥ सुरापरिग्रहादासुर : । तथाचार्षे रामायणे । वरुणस्यततः कन्यावारुणी रघुनन्दन । उत्पपातरसात्तस्मान्मार्गमाणापरिग्रहम् ॥ १६ ॥ दितेः पुत्रानतांरामजगृहुर्वरुणात्मजाम् । अदितेस्तुसुताप्रीतास्तामगृह्णन्तवैसुरा : ॥ २७ ॥ सुरापरिग्रहाद्देवा : सुराइत्यभिविश्रुता : । अपरिग्रहणात्तस्या दैतेया

त्वासुरास्तथैवार्षे रामायणे आदिकाण्डे अमृतोत्पत्तिनामनि षट्चत्वारिंशदध्याये प्रोक्ताः ॥ शोभनं राजते । राज् दीप्तौ । अन्येभ्योऽपि दृश्यते इति डः ॥ यद्वा । सुनोति । षुञ् । सुसूधाञ्गृधिभ्यः क्रन् ॥

सुरकः । पुं॰ वह्निविशेषे ॥ सुराश्चासौ अग्निः । सुरायाश्च शिखिशिखन ॥

सुरकरीन्द्रदर्पापहा । स्त्री॰ गङ्गायाम् ॥ यथा । भगीरथपथानुगा सुरकरीन्द्रदर्पापहा महेशमुकुटप्रभा गिरिशिरःपताकासिता । सुरासुरनरोरगैरजभवाच्युतैः संस्तुता विमुक्तिफलदायिनी भगवती त्वयं राजते ॥ इति कल्किपुराणे ३४ ऽध्यायः ॥

सुरकारुः । पुं॰ विश्वकर्मणि ॥

सुरकृता । स्त्री॰ गुडूच्याम् ॥

सुरक्तः । पुं॰ रक्तचन्दने । त्रि॰ मधुरकण्ठे ॥ अत्यन्तानुरक्ते ॥ शोभनरागयुक्ते ॥

सुरक्तकः । पुं॰ कोशाम्रे । स्वर्णगैरिके ।

सुरगणः । पुं॰ इन्द्रादिदेवगणे ॥

सुरगण्डः । पुं॰ रोगविशेषे । वरगण्डे ॥

सुरगुरुः । पुं॰ बृहस्पतौ ॥

सुरग्रामणीः । पुं॰ इन्द्रे ॥

सुरङ्गः । पुं॰ नागरङ्गे ॥ भूमौ गुप्तमार्गात्मकगर्तविशेषे ॥ न॰ पत्तङ्गे । बक्रम॰ इ॰ भाषा॰ प्र॰ । हिङ्गुले ।

सुरङ्गकृत् । पुं॰ खनकइति ख्याते सन्धिचौरे भूमौ गुप्तमार्गकर्तरि ॥

सुरङ्गदम् । न॰ पत्तङ्गे ॥

सुरङ्गधातुः । पुं॰ गैरिके ॥

सुरङ्गयुक् । पुं॰ सुरङ्गयापहर्त्तरि । कुड्यभेदिनि ॥

सुरङ्गा । स्त्री॰ लताविशेषे । कैवर्त्तिकायाम् । दृढाक्षयाम् ॥ तिर्यग्भूखाते । सन्धौ । सिंध॰ इ॰ सुरङ्ग॰ इति च भाषाप्रसिद्धे ॥ सुबहुरन्ध्येऽस्त्रामृतलसा । रङ्गरागे । इत्यपि विजा ॥ अजो रितकुर्च्ये ॥

सुरङ्गिका । स्त्री॰ मूर्वायाम् ॥

सुरङ्गी । स्त्री॰ काकनासायाम् ॥ रक्तशोभाञ्जने॰ इति रत्नमाला ॥

सुरजःफलः । पुं॰ पनसवृक्षे ॥

सुरजनी । स्त्री॰ रात्रौ ॥

सुरज्येष्ठः । पुं॰ ब्रह्मणि ॥ सुराणां सुरेषु वा ज्येष्ठः ॥

सुरञ्जनः । पुं॰ गोपदले । गुवाकवृक्षे ॥

सुरतम् । न॰ निधुवने । मैथुने ॥ सुरतं द्विविधम् । बाह्यमाभ्यन्तरञ्च । तत्र बाह्यं प्रेक्षणभाषणाश्लेषणचुम्बनाद्यनेकविधम् । आभ्यन्तरञ्चासनादिभेदेनापि ॥ त्रि॰ दया

युक्ते ॥ अभिरतौ ॥
सुरतकण्टकः । पुं॰ रतकीले ॥ *
सुरतताली । स्त्री॰ दूत्याम् ॥ शिरः
स्रजि ॥
सुरतरङ्गिणी । स्त्री॰ गङ्गायाम् ॥
यथा । आगतावततरैवहिमानीसि
व्यतांसुरतरङ्गिणीसदा । क्षण
वर्त्म निगुणान् कलयन्तीजीवनेषुच
यथन्त्यनुरागम् ॥
सुरतरुः । पुं॰ देवतरौ ॥ अश्वत्थ
द्रुमे ॥
सुरता । स्त्री॰ देवत्वे ॥ देवतायाम्
॥ पूर्वंभाषितम् । अपरञ्चदेवा
नामिति॰ देवशब्दोर्थपरः ॥ यद्वा
। सुराणांसमूहः । गजसहाया
भ्याञ्चेतिवार्त्तिके॰ चकारादन्यत्रा
पितल् ॥
सुरतोषकः । पुं॰ कौस्तुभमणौ ॥
त्रि॰ देवप्रीतिकारके ॥
सुरथः । स्वारोचिषेऽन्तरेचैवचंशसमु
द्भवेन्नृपतिश्वरे । सचचन्द्रवंशीयः
। यथोक्तंब्रह्मवैवर्त्ते । श्रीनारायण
उवाच । अविघ्नब्रह्मणः पुत्रस्तस्य
पुत्रोनिशाकरः । सचकृत्वाराजसू
यं द्विजराजोऽभवत्त । गुरुपत्न्या
स्ताराया तस्य भूबुधः सुतः । बुध
पुत्रश्चैवचत्पुदःसुरथसमद्भुति ॥
सुरदारु । न॰ देवदारुणि ॥
सुरदीर्घिका । स्त्री॰ मन्दाकिन्याम्
वियद्गङ्गायाम् ॥ सुराणांदीर्घिका
॰ वापीव ॥
सुरदुन्दुभिः । स्त्री॰ तुलस्याम् ॥
पुं॰ रा॰ नटः ॥
सुरद्रुमः । पुं॰ मन्दारादिदेवतरौ ॥
सुराणांद्रुमः ॥ देवनले ॥
सुरद्विट् । पुं॰ असुरे । पूर्वदेवे ॥
सुरान्द्वेष्टि । द्विषअप्रीतौ । स
त्सूद्विषद्रुहदुहेत्यादिनाक्विप् ॥
सुरधनुः । न॰ इन्द्रायुधे । शक्रधनु
षि ।
सुरधूपः । पुं॰ धूनके ॥
सुरनदी । स्त्री॰ गङ्गायाम् ॥
सुरनन्दा ।
सुरनन्दिका । } स्त्री॰ नदीविशेषे ॥
सुरनायकः । पुं॰ इन्द्रे ॥
सुरनालः । पुं॰ देवनाले । नला-
ख्ये ।
सुरनिम्नगा । स्त्री॰ गङ्गायाम् ॥
सुराणांनिम्नगा । अम्भादि ॥
सुरनिर्म्मम् । न॰ पवके ॥
सुरपतिः । पुं॰ इन्द्रे । बलारातौ
सुराणांपतिः ॥ आदिगुरुविकत्वि
॰ ऽ । ॰ ॥ प्रथम नक्षत्रतुर्थप्रभे
दे॰ ऽ । ऽ ॰ ॥
सुरपत्तनम् । न॰ स्वर्गे ॥
सुरपथम् । न॰ व्योम्नि ॥
सुरपर्ण्म् । न॰ देवपर्णे ॥
सुरपर्णिकः । पुं॰ सुरपुन्नागे ॥

सुरपर्णिका । स्त्री॰ पुन्नागे ॥

सुरपर्णी । स्त्री॰ पलाश्याम् ।

सुरपादप : । पुं॰ कल्पवृक्षे ॥

सुरपुन्नाग : । पुं॰ पुन्नागभेदे । न॰ मेरौ ॥

सुरपुरी । स्त्री॰ अमरावत्याम् ॥

सुरप्रिय : । पुं॰ अगस्त्यवृक्षे ॥

सुरप्रिया । स्त्री॰ जात्याम् । स्वर्णरम्भायाम् ॥

सुरभि: । पुं॰ चम्पके ॥ वसन्ते ॥ जातीफले ॥ सुगन्धौ ॥ चैत्रमासे ॥ कणगुग्गुलौ ॥ धूनके ॥ कदम्ववृक्षे ॥ वकुलद्रुमे ॥ गन्धतृणे ॥ शमीवृक्षे ॥ न॰ स्वर्णे ॥ गन्धोपले । गन्धपाषाणे ॥ साधुगन्धे ॥ सुन्दरे । स्त्री॰ शल्लक्यामोषधौ । गजभक्षायाम् ॥ मातृभिदि ॥ मुरायाम् ॥ गवि । रुद्रजटायाम् ॥ नवमालिकायाम् । नखाख्याम् ॥ जात्याम् । अपेतराक्षस्याम् । तुलस्याम् ॥ बर्बरीतुलस्याम् ॥ छायायाम् । मेदिन्याम् ॥ सुरायाम् । गवांमातरि ॥ यथा । गवामधिष्ठातृदेवी गवामाद्या गवाम्प्रसूः । गवाम्प्रधाना सुरभिः गोलोके सा समुद्भवा ॥ त्रि॰ सुगन्धौ ॥ कान्ते । शोभने ॥ विख्याते ॥ सचिवे ॥ धीरे ॥ सुष्ठु रभते॰ रभ्यते वा॰ सुष्ठु रभन्ते रभसयुक्ता भवन्त्यनया वा । रभ राभस्ये । सर्वधातुभ्य इन् । आगमानित्यत्वान्नुम् ॥

सुरभिका । स्त्री॰ स्वर्णकदल्याम् ॥

सुरभिगन्धा । स्त्री॰ माहल्याम् । चंविलो॰ इ॰ भा॰ प्र॰ ॥

सुरभिगन्धि: । त्रि॰ शोभनगन्धविशिष्टे । सुरभिर्गन्धोऽस्य । गन्धस्येदुत्पूतिसुसुरभिभ्यः ॥

सुरभित: । त्रि॰ वासिते ॥

सुरभित्रिफला । स्त्री॰ सुगन्धित्रिफलायाम् ॥

सुरभित्वक् । स्त्री॰ बृहदेलायाम् ॥

सुरभिदारु: । पुं॰ सरलवृक्षे ।

सुरभिपत्रा । स्त्री॰ जम्ब्वाम् ॥ राजजम्बूवृक्षे ॥

सुरभिवल्कलम् । न॰ गुडत्वचि ॥

सुरभिस्रवा । स्त्री॰ शल्लक्याम् ॥

सुरभी । स्त्री॰ आमोदमाने ॥ सुरभौ । गवांप्रस्वां ।

सुरभीरसा । स्त्री॰ शल्लकीवृक्षे ॥

सुरभूरुह: । पुं॰ देवदारुणि ॥ कल्पवृक्षादौ ॥

सुरमृत्तिका । स्त्री॰ तुवर्याम् । काच्याम् । सौराष्ट्रमृत्तिकायाम् । फटकरी॰ इ॰ भा॰ ॥

सुरमेदा । स्त्री॰ महामेदायाम् ॥

सुरराज: । पुं॰ इन्द्रे । सुराणांराजा । टच् ॥

सुरर्षि: । पुं॰ नारदादौ ॥ नारदा

द्याः सुरर्षयइत्यमरः। सुराणामेव ऋष्यादिपुरुषत्वादृषयश्च॥ षष्ठीसमासोऽयं॥ ब्रह्मर्षिदेवर्षिराजर्षिमहर्षिपरमर्षिकाण्डर्षिश्रुतर्षिभेदात् सप्तप्रकाराऋषयः। तत्रनारदाद्याः सुरर्षयः॥

सुरलता। स्त्री॰ महाज्योतिष्मत्याम्॥

सुरला। स्त्री॰ पुरन्दरायाम्। गङ्गायाम्॥

सुरलोकः। पुं॰ द्यवि। दिवि। स्वर्गे॥ सुराणांलोकः॥

सुरवर्त्म। न॰ खे। आकाशे॥ सुराणांवर्त्म। सुरानभूमिस्पृशोऽन्तरीक्षगास्तेन॥

सुरवल्लभा। स्त्री॰ श्वेतदूर्वायाम्॥

सुरवल्ली। स्त्री॰ तुलस्याम्॥

सुरवैरी ।)
सुरशत्रुः।) पुं॰ असुरे। दानवे॥

सुरशाखी। पुं॰ कल्पवृक्षे॥

सुरश्रेष्ठः। पुं॰ ब्रह्मणि॥

सुरश्रेष्ठा। स्त्री॰ ब्राह्म्याम्॥

सुरसः। पुं॰ गोक्षुरसे॥ सिन्धुवारे॥ न॰ पर्णासे॥ बोले॥ त्वचि॥ दालचीनीतिभा॰ प्र॰ वल्कले॥ गन्धतृणे॥ त्रि॰ स्वादौ॥ शोभनोरसोऽस्य॥

सुरसखः। पुं॰ इन्द्रसचिवे॥ गन्धर्वे॥

सुरसद्म। न॰ स्वर्गे॥

सुरसम्भवा। स्त्री॰ श्वादिस्वभक्षायाम्॥

सुरसरित्। स्त्री॰ गङ्गायां॥

सुरसर्षपः। पुं॰ देवसर्षपे॥

सुरसा। स्त्री॰ रास्नायाम्॥ नागमातरि॥ तुलसीभेदायाम्। वर्वरीतुलस्याम्॥ तुलस्याम्। पर्णासे॥ सुरसास्त्रीतुपर्णासे। इतिशब्दरत्नावली॥ पर्णासेतुनपुंसकमितिमुद्राङ्किताभेदिनी। पर्णासेपुंनपुंसकमितिहस्तलिखिताभेदिनी। सुरसस्तुविषुखादौपर्णासेननपुंसकमितिचकस्याश्चिन्मेदिन्याःपाठः पर्णासिसुरसास्त्रियामितितुवङ्गः॥ ब्राह्म्याम्॥ महाशतावर्याम्॥ कापित्थपर्ण्याम्॥ मिश्रेयायाम्॥ काश्मीरप्रसिद्धायांगन्धपत्र्यामितिभावप्रकाशः॥ भारतवर्षस्थनदीप्रभेदे॥ अतिधृतिच्छन्दः १८ प्रभेदे॥ म्रौभ्नौयौनौगुरुचेत्स्वरमुनिकरणैराहसुरसाम्। यथा। कामक्रीडासक्तोमधुसमयसमारम्भरभसात्कालिन्दीकूलकुञ्जविहरणकुतुकाकृष्टहृदयः। शिविन्दीवक्षीमामधररसमुधाम्प्राप्य सुरसांशङ्के पीयूषपानप्रचयकृतसुखंव्यस्मरद्दसौ॥ शोभनोरसोयस्याः॥

सुरसाष्टः। पुं॰ वृषगणविशेषे॥

यथा । निर्गुण्डीतुलसीब्राह्मीबृह-
तीकण्टकारिका । पुनर्नवेतिमुनि-
भिः सुरसाष्टः प्रकीर्त्तितः ॥
सुरसिन्धुः । स्त्री॰ गङ्गायाम् ॥
सुरसुन्दरी । स्त्री॰ देवाङ्गनायाम् ।
दुर्गायाम् । योगिनीविशेषे ॥
सुरा । स्त्री॰ चषके । सुरापानपात्रे
मस्थि । अनुतर्षणे ॥ अमरः :
। यत्पानपात्रं भूपानां तज्ज्ञेयं चष-
कं बुधैः । काञ्चनं राजतं वा स्फा-
टिकं चाश्ममेव च ॥ तत् सूरासु
दिव्योर्व्व चतुर्णां पृथ्वीभुजाम् ।
इत्यन्यसम्मतं तेषां निर्णयः पाठ-
सम्मतः ॥ सुमुष्टिसम्मितं रत्नै-
श्चतुर्वर्णसमन्वितम् । माणि-
क्यं चाथ फालं वा सर्वेषां प्रयुज्यते ॥
काष्ठजं धातुजं शैलजं नाङ्गालादिम-
हीभुजाम् । यदन्यत् तीयपा-
मादिपात्रं पृथ्वीभुजां भवेत् ॥ ए-
वं तत्पानिनियम इति भोजस्य निश्च-
य इति ॥ मद्ये ॥ तत्पर्य्याय-
यथा । सुरा हलिप्रिया हाला परिस्रु-
द्वरुणात्मजा । गन्धोत्तमा प्रसन्नेरा
कादम्बर्य्यः परिस्रुता । मदिराक-
श्यमद्ये इति ॥ सुष्ठु रातियाम् ।
रा दाने । सु॰ अतो वराय न्यनया
वा । रै शब्दे । आतश्चोपसर्गे इ-
त्यङ् ॥ शोभनं राजन्तेऽनया वा ।
राजृ दीप्तौ । अन्येभ्योऽपीति डः :

॥ गौडी पैष्टी तथा माध्वी त्रिविधा-
चोत्तमा सुरा । सैव नाना विधा प्रो-
क्ता तालखर्ज्जूरसम्भवा ॥ तथा देश-
विभेदेन नाना द्रव्यविभेदतः । बहु-
धेयं समाख्याता प्रशस्ता देवताश्च ये ।
येन केन समुत्पन्ना येन केनाहृतापि-
वा । नात्र जातिविभेदोऽस्ति शोधि-
ता सर्वसिद्धिदेति कह्वानिर्णयत-
न्त्रम् ॥ अन्यथापि परिपक्वान्नमन्ना-
न्नसमुत्पन्ना सुरा मतेति । अपि च ।
गौडी पैष्टी तथा माध्वी फलोत्था च सु-
रा स्मृतेति ॥ शालिपिष्टकादिष्टादि-
कृतं मद्यं सुरा स्मृता । सुरा शुर्भी-
लत्तन्यपुष्टिभेदं . कल्पद्रु ॥ या
हिणीशोथगुल्मा शोथ इत्येमूत्रकाश्च
नुत् ॥ सुराशब्दः पैष्टीमात्रे मु-
ख्यो गौड्यादिमदिरासु गौणवृत्त्यापि
सुराशब्दप्रयोगोपपत्तेः । अतएव
भविष्यपुराणे सुरा च पैष्टी मुख्या
कानतस्यास्त्वितरे समे इति ॥ सा च
दिव्याप्रसन्नाकृतसुरादिभेदाद्बहुवि-
धा भवति । समुद्रमथनोत्पन्नादि-
व्येति परिकीर्त्तिता । उक्तञ्च रामा-
यणे । मैरेयासवमाध्वीकाः पु-
ष्पासवफलासवाः । वासव कैश्च वि-
विधैर्दृष्टास्तैस्तैः पृथक्पृथगिति ॥
तथाः पानेप्रायश्चित्तयथा । ब्रह्मघ्न-
श्च सुरापश्च स्तेयी च गुरुतल्पगः ।
सेतं दृष्ट्वा विशुद्ध्यन्ते ततः संयोगी च

पञ्चमः ॥ ततो धेनुशतं दद्याद्ब्राह्म
णानाञ्च भोजनम् । इति गारुडे
२२६ अध्यायः ॥ तत्रानेकशास्त्री
यः । सुरापानदूषणम्प्राप्य
विद्वान् संज्ञानाशञ्चैव महाघोर-
म् । दृष्ट्वा कचञ्चापि तथाभिरूपं पीतं
तथा सुरया मोहितेन ॥ समन्युरुत्थाय
महानुभावस्तदोशना विप्रहितं चिकी
र्षुः । काव्यः स्वयं वाक्यमिदं जगाद सु
रापानम्प्रति वै जातशङ्कः ॥ यो ब्रा
ह्मणोऽद्यप्रभृतीह कश्चिन्मोहात् सुरां
पास्यति मन्दबुद्धिः । अपेतधर्म्मा ब्रह्म
हा चैव स स्यादस्मिन् लोके गर्हितः
स्यात् परे च ॥ मया चेमां विप्रधर्म्मोक्ति
सीमां मर्य्यादां वै स्थापितां सर्व्वलोके
सन्तो विप्राः शुश्रुवांसो गुरूणां देवा
दैत्याश्चोपशृण्वन्तु सर्व्वे ॥ इति मा
त्स्ये २५ अध्यायः ॥ ब्राह्मणक्षत्रिय
विशां त्रिविधसुरापानप्रायश्चित्तादि
यथा । सुरां पीत्वा द्विजो मोहादग्नि
वर्णां सुरां पिबेत् । तया स्वकाये नि
र्दग्धे मुच्यते किल्बिषात्ततः ॥ गो
मूत्रमग्निवर्णं वा पिबेदुदकमेव वा ।
पयो घृतं वामरणाद्गोशकृद्रसमेव वा
॥ कणान् वा भक्षयेदब्दं पिण्याकं वा
सकृन्निशि । सुरापानापनुत्त्यर्थं वा
लवासा जटी ध्वजी ॥ सुरा वै मलम
न्नानां पाप्मा च मलमुच्यते । त
स्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पि

बेत् ॥ गौडी पैष्टी च माध्वी च विज्ञे
या त्रिविधा सुरा । यथैवैका तथा स
र्व्वा न पातव्या द्विजोत्तमैः ॥ यक्ष
रक्षःपिशाचान्नं मद्यं मांसं सुरास
वम् । तद्ब्राह्मणेन नात्तव्यं देवानाम
श्नता हविः ॥ अमेध्ये वा पतेन्मत्तो
वैदिकं वाप्युदाहरेत् । अकार्य्यम
न्यत् कुर्य्याद्वा ब्राह्मणो मदमोहितः
॥ यस्य कायगतं ब्रह्म मद्येनाप्लाव्य
ते सकृत् । तस्य व्यपैति ब्राह्मण्यं
शूद्रत्वञ्च स गच्छति ॥ एषा विचित्रा
भिहिता सुरापानस्य निष्कृतिः ॥ इति
मानवे ११ अध्यायः ॥ अथ ईश्वरः
कुलार्णवे । पेयं मद्यं पलं खाद्यं
समालोक्य प्रियामुखम् । इत्यवा
चरणं जप्यं परं ब्रह्म परम्पदम् ॥
गुरुकारुण्यसुलभमीदृशं कुलदर्शन
म् । लब्ध्वा एव जानन्ति नेतरे भुक्ति
मुक्तिदम् ॥ गुरूपदेशरहिता महा
न्तः सन्ति केचन । मोहयन्ति जनान्
कांश्चित् स्वयमप्येव मोहिताः ॥
दुराचारपराः केचित् स्वयं तिष्ठ
न्ति पामराः । यथाभूता भवेत्तेषां से
वकाः स्युस्तथाविधाः ॥ बहवः
कौलिकं धर्म्मं मिथ्याज्ञानविडम्बकाः
। स्वबुद्ध्या कल्पयन्तीत्थं पारम्पर्य्य
विवर्ज्जिताः ॥ मद्यपानेन मनुजो
यदि सिद्धिं लभन्ति वै । मद्यपान
रताः सर्व्वे सिद्धिं यान्तु समीहिताम् ।

मांसभक्षणमात्रेणयदिपुण्यागतिर्भ
वेत् । लोकेमांसाशिन: सर्वेपुण्य
वन्तोभवन्तिच ॥ स्त्रीसम्भोगेनदेवि
यदिसोक्षं व्रजन्तिचेत् । सर्वेपि
जन्तवोलोकेमुक्ता : स्यु : स्त्रीनिषे
वका : ॥ कुलमार्गीमहादेविनमया
निन्दित : क्वचित् । आचाररहि
तायेवनिन्दितास्तेनचेतरे ॥ अन्य
थाकौलिकेधर्मेह्याचार : कथितो
मया । विचरन्त्यन्यथा देविमूढा:
पण्डितमानिन : ॥ कृपाणधारागम
मनाद्व्याघ्रकण्ठावलम्बनात् । भुज
ङ्गधारणान्नूनमशक्यङ्कुलवर्त्त न
म् ॥ अयापानन्तुदेवेशिसुरापानं त
दुच्यते । तन्महापातकं ज्ञेयं वेदा
दिषुनिरूपितम् ॥ अनाघ्रेयमना
लोक्यमस्पृश्यञ्चाप्यपेयकम् । मद्यं
मांसं पशूनान्तुकौलिकानांमहत्फ
लम् ॥ अमेध्यानिद्विजातीनांमद्या
न्येकादशैवतु । द्वादशन्तुसुराम
द्यं सर्वेषामधमं स्मृतम् ॥ सुरावै
मलमन्नानाम् पाप्माचमलमुच्यते ।
तस्माद्ब्राह्मणराजन्यौवैश्यश्चनसुरा
म्पिबेत् ॥ सुरादर्शनमात्रेणकुर्या
त्सूर्यावलोकनम् । तत्सङ्गाघ्राण
मात्रेणप्राणायामत्रयंचरेत् ॥ आजा
नुभ्यांभवेत्स्नानं सौन्यभ्युपवसेद्दश
। ऊर्द्ध्वं नाभेस्त्रिरात्रन्तुमद्यस्पर्शने
विधि: । सुरापाणे कामकृतेज्वलन्तीं

तांविनि:क्षिपेत् । मुखे तयाविनिर्द
ग्धोमृत : शुद्धिमवाप्नुयात् ॥ म
द्यस्पर्शादिदोषस्यप्रायश्चित्तमितिस्मृ
तम् । अविधानेनयोहन्यात्आत्मा
र्थं म्प्राणिनम् प्रिये ॥ निवसेन्नरके
घोरेदिनानिपशुरोमभि: सम्मिता
निदुराचारस्तिर्य्यग्योनिषुजायते ॥
अनुमन्ताविशसितानिहन्ताक्रयवि
क्रयी । संस्कर्त्ताचोपहर्त्ताचखा
दिताऽष्टौचतेसमा : ॥ धनेनक्रयि
कोहन्ति खादिताचोपभोगत :
। घातकोवधबन्धाभ्यामित्येषत्रिवि
धोवध : ॥ मांसच्छेदनं कृत्वासु
रादर्शनवच्चरेत् । तस्मादविधिना
मद्यं मांसं सेवेतनक्वचित् ॥ विधि
वत्सेवितंदेवितरसात्वम्प्रसीदसि
। नाशयत्यविधानन्तु सत्यमेतद्वरा
नने ॥ त्वयं वाप्यऽविधानेनच्छेदये
न्नकदाचन । विधिनागांद्विजं वापि
हत्वापापैर्नलिप्यते ॥ बहुनाऽत्र
किमुक्तेनसारमेवं शृणुप्रिये । भो
गस्तुक्तिसुखोपाय : कुलशास्त्रेषु
गोपित : ॥ यन्मुसुक्षो : फलं देवि
कनककोविसौरभम् । कुलज्ञोऽप्यू
र्द्ध्वंवित्प्राज्ञोजनस्तत्त्वादनुत्तम:
॥ कुलशास्त्राणिसर्वाणिमयैवोक्ता
निपार्वति । प्रमाणानिमसन्देहो
नहन्तव्यानिहेतुभि : ॥ देवताभ्य:
पितृभ्यश्चमधुवातात्कृतायते । स्वा

द्दिष्ठयामदिष्ठया। क्षीरं सर्पिर्मधूदकम् ॥ हिरण्यपात्रस्थाहीति। बभ्रन्ते पुरुषं परम्। सद्योदीप्यतन्त्याद्याः प्रमाणं श्रुतयः प्रिये ॥ इतिश्रीकुलार्णवे द्वितीयोल्लासः ॥ श्रीमहानिर्वाणतन्त्रे पिष्टीसद्राशिव आहयथा। सुरा द्रवमयी तारा जीवनिस्तारकारिणी। जननी भोगमोक्षाणां नाशिनी विपदां रुजाम् ॥ दाहिनी पापसङ्घानां पावनी जगतां प्रिये। सर्वसिद्धिप्रदा ज्ञानबुद्धिविद्याविवर्द्धिनी ॥ मुक्तैर्मुमुक्षुभिः सिद्धैः साधकैः क्षितिपालकैः। सेव्यते सर्वदा देवैरात्मस्वाभीष्टसिद्धये ॥ सम्यग्विधिविधानेन सुसमाहितचेतसा। पिबन्ति मदिरां मर्त्या अमर्त्या एव ते क्षितौ ॥ प्रत्यक्षतत्त्वस्वीकाराद्विधिनाद्याल्किवीन्द्रः। नज्ञानेपञ्चतत्त्वनां सेवनात् किं फलं भवेत् ॥ इयञ्चेद्वारुणी देवि निपीता विधिवर्ज्जिता। नृणां विनाशयेत् सर्वं बुद्धिमायुर्यशो धनम् ॥ अत्यन्तपानान्मद्यश्च चतुर्वर्गप्रसाधिनी। बुद्धिर्विनश्यति प्रायो लोकानामपचेतसाम् ॥ विभ्रान्तबुद्धयो मुग्धाः कार्याकार्यमजानतः। स्वाऽनिष्टञ्च परानिष्टं जायतेऽस्मात् पदे पदे ॥ अतो नृपो वा चक्रेशो मद्यमादक्षवस्तुषु। अत्यासक्तजनान् कायधन-

दण्डेन शोधयेत् ॥ सुराभेदाद्वाक्तिभेदान्नृन्यूनेनाप्यधिकेन वा। देशकालविभेदेन बुद्धिभ्रंशो भवेन्नृणाम् ॥ अत एव सुरापाणादतिपानमलच्यते। सञ्चलद्वाक् पाणिपद्दृग्भिरतिपानं विचारयेत् ॥ नेन्द्रियाणि वशे यस्य मदविह्वलचेतसः। देवता गुरुमर्यादालङ्घिनो भयरूपिणः ॥ निखिलानर्थयोग्यस्य पापिनः शिवघातिनः। दृष्ट्वा ज्ञात्वा हरेदर्थान्स्ताड्येत् स पार्थिवः ॥ विचलत्पादवाक्पाणिं भ्रान्तमुन्मत्तमुद्धतम्। तमुग्रं यातयेद्राजा द्रविणस्वाहरेत्ततः। अपवाग्वादिनमत्तं लज्जाभयविवर्ज्जितम्। धनादानेन तं शास्त्यात्मजाप्रीतिकरोन्नृपः ॥ शताभिषिक्तः कौलश्चेदतिपानात् कुलेश्वरि। पशुरेव स मन्तव्यः कुलधर्मबहिष्कृतः ॥ पिबन्ति शयं मद्यं शोधितं वाप्यशोधितम्। त्याज्यो भवति कौलानां दण्डनीयोऽपि भूभृतः ॥ ब्राह्मी भार्यां सुरां मत्ताः पाययन्तो द्विजातयः। शूद्रायुर्भार्यया सार्द्धं सप्ताहं कणभोजनात् ॥ असंस्कृतसुरापानात् शुद्ध्येदुपवसंस्त्र्यहम्। भुक्त्वाप्यशोधितं मांसमुपवासद्वयं चरेत् ॥ असंस्कृतं मीनमुद्रे खादयन्नुपवसेद् द्वः। अवैधं पञ्चमं कुर्वन्नराधो

दण्डेनशुद्ध्यति ॥ अपिच । वीरघातीतथापापीवीराणांस्त्रीगमस्तथा । स्तेयीमद्यपानसक्तिनस्तत्संसर्गीचपञ्चमः ॥ कुलवर्त्म कुलद्रव्यं कुलसाधकमेवच । येनिन्दन्तिदुरात्मानस्तेगच्छन्त्यधमांगतिम् ॥ नृत्यन्तिरुद्रडाकिन्योनृत्यन्तिरुद्रभैरवाः । मांसास्थिचर्वणानन्दाः सुराकौलद्विषांनृणाम् ॥ दयालवः सत्यशीलाः सदापरहितैषिणः तान्गर्ह्यन्तोनरकान्निष्कृतिंयान्तिनकश्चिदिति ॥ सुरामांसादिभिर्देवीगङ्गापिसुप्रसीदति । अत्र प्रमाणंसीतायाः वाक्यंसुस्पष्टमुच्यते । तथाहि । मध्यन्तुसमनुप्राप्यभागीरथ्यास्त्वनिन्दिता । वैदेहीप्राञ्जलिर्भूत्वातांनदीमिदमब्रवीत् ॥ पुत्रोदशरथस्यायंमहाराजस्यधीमतः । निदेशंपालयत्वेषगङ्गे त्वदभिरक्षितः । चतुर्दशहिवर्षाणिसमग्राण्युष्यकानने । भ्रात्रासहमयाचैवपुनःप्रत्यागमिष्यति ॥ ततस्त्वांदेविसुभगेक्षेमेणपुनरागतायक्ष्येप्रमुदितागङ्गेसर्वकामप्रदायिनि । त्वंहित्रिपथगेदेविब्रह्मलोकंसमीक्षसे । भार्याचोदधिराजस्यलोकेऽस्मिन्सम्प्रदृश्यसे ॥ तांत्वांदेविनमस्यामिप्रशंसामिचशोभने । प्राप्तराज्येनरव्याघ्रेशिवेनपुनरागते ॥ गवांशतसहस्रञ्चवस्त्राण्यन्नञ्चशोभने । ब्राह्मणेभ्यःप्रदास्यामितवप्रियचिकीर्षया ॥ सुराघटसहस्रेणमांसभूतौदनेनच । यक्ष्येत्वांप्रयतादेविपुरींपुनरुपागता ॥ यानित्वत्तीरवासीनिदैवतानिचसन्तिहि । तानिसर्वाणियक्ष्यामितीर्थान्यायतनानिच ॥ पुनरेवमहाबाहुर्मयाभ्रात्राचसङ्गतः । अयोध्यांवनवासात्प्रविशत्वनघोऽनघे ॥ तथासम्भाष्यमाणासासीतागङ्गामनिन्दिता । दक्षिणादक्षिणन्तीरंक्षिप्रमेवाभ्युपागमत् ॥ इत्यार्षेरामायणे अयोध्याकाण्डेद्विपञ्चाशत्सर्गः ॥ पुनश्च । कालिन्दीमध्यमायातासीतात्वेनामवन्दत । स्वस्तिदेवितरामित्वांपारयेन्मेपतिव्रतम् ॥ यक्ष्येत्वांगोसहस्रेणसुराघटशतेनच । स्वस्तिप्रत्यागतेरामेपुरीमिक्ष्वाकुपालिताम् ॥ कालिन्दीमथसीतातुयाचमानाकृताञ्जलिः । तीरमेवाभिसम्प्राप्तादक्षिणांवरदर्शिनी ॥ इत्यार्षेरामायणेअयोध्याकाण्डेपञ्चपञ्चाशत्सर्गः ॥

सुराकरः । पुं० नारिकेलद्रुमे ॥ मद्योत्पत्तिस्थाने ॥ यथा । आकराः ; भूरयः सर्वंवर्जयित्वासुराकरम् ॥

सुराग्र्यम् । न० अमृतेसुराणामग्र्यं

श्रेष्ठम् ॥

सुरा[illegible] । स्त्री॰ देवपत्न्याम् ॥ सप्त [illegible]

सुरा[illegible] : । पुं॰ बृहस्पतौ ॥ सुराणामाचार्य : ॥

सुराजक : । पुं॰ भृङ्गराजे ॥

सुराजा । पुं॰ शोभनेनृपे ॥

सुराजीवी । पुं॰ शौण्डिके ॥

सुरानन्द : । पुं॰ हरौ । सुराम् आनन्दयत्यमृतप्रदानेनेतितया । क्लीबे सुरया॰ सुरायाबानन्दोऽस्य ॥

सुराप : । त्रि॰ मद्यपे । सुरापानकर्त्तरि ॥ सुरांपिबति । पा॰ । गापोष्टगित्यत्र॰ पिबते : सुराशी॰ध्वोरितिवार्त्तिकेन टक् । टित्वात्स्त्रियांङीप् । सुरापी ॥ ब्रह्महागाय तैयच्च सुराप : स्याबदन्तक : । सुवर्णहारीकुनखीदुश्चर्मागुरुतल्पग : ॥

सुरापगा । स्त्री॰ गङ्गायाम् ॥

सुरापाणम् । न॰ मद्यपाने ॥ सुराया : पानम् । षष्ठ्ंशे ॥ वाभावकरणयोरितिपत्वम् ॥

सुरापाणा : । पुं॰ भूम्नि॰ प्राच्येषु । पूर्वदेशस्थेषु ॥ पीयतइतिपानम् । कर्म्मणिल्युट् । सुरापानंयेषाम् । पानन्देशे॰ इ॰ णत्वम् ॥

सुरापानम् । न॰ सुरापाणे । मद्यपाने ॥ सुराया : पानम् । वाभावकरणयोरितिपत्वाभाव : ॥ ब्रह्मोज्झतावेदनिन्दाकौटसाक्ष्यं सुहृद्वध : । गर्हितान्नाद्ययोर्जग्धि : सुरापानसमानिषट् ॥

सुराभाग : । पुं॰ सुराग्रे । सुरायाअग्रभागे ॥

सुरामण्ड : । पुं॰ सुरायाअग्रभागे । कारोत्तरे ॥ सुरायामण्ड : ॥

सुरारि : । पुं॰ दैत्ये । सुराणाम् अरि : ॥

सुरारिहा ।)
सुरारिहन्ता ।) पुं॰ विष्णौ । श्रीहरौ ॥ सुरारीन्हन्ति । सुरारीणांहन्ता ॥

सुरार्हम् । न॰ हरिचन्दने ॥

सुरालय : । पुं॰ सुमेरुशैले ॥ स्वर्गे । सुराणामालय : ॥ सुरायानिलये ।

सुराश्रय : । पुं॰ इन्द्रे ॥

सुराष्ट्र : । पुं॰ देशविशेषे । सूरत॰ इ॰ भा॰ प्र॰ ॥ शोभनोपवर्त्तने ॥

सुराष्ट्रज : । पुं॰ कृष्णमुद्गे ॥ विषविशेषे ॥ न॰ तुवरिकायाम् । सौराष्ट्रमृदि ॥ सुराष्ट्रेजातम् । जनी॰ । सप्तम्यांजनेर्ड : ॥ त्रि॰ तद्देशजाते ॥

सुराष्ट्रजा । स्त्री॰ तुवरिकायाम् । सौराष्ट्र्याम् ॥ टाप् ॥

सुराष्ठ : । पुं॰ देवदारुणि ॥ मरुवके ॥ हरिद्रुवृक्षे ॥

सुरी । स्त्री॰ देवाङ्गनायाम् ॥ पुरः सुरीणांभणकिवमानवौ ॥

सुरुङ्ग : । पुं॰ शोभाःङ्गने ॥

सुरुङ्गा । स्त्री॰ सुरुङ्गायाम् । सन्धिलायाम् । सन्धौ । सौध॰ इ॰ प्र॰ खातविशेषे ॥

सुरुङ्गाहि : । पुं॰ सन्धिचौरे । कुजम्भिले ॥

सुरुक् । त्रि॰ अतिकमनीये ॥

सुरूपः । त्रि॰ शोभनरूपयुक्ते । सुन्दरे । रुचिरे । मनोज्ञे । मनोरमे । शोभनं रूपं यस्य : ॥ विदुषि । विपश्चिति । न॰ तूले ॥

सुरूपा । स्त्री॰ भार्ग्याम् । शालपर्ण्याम् ॥ सुन्दर्याम् । रुचिरायाम् । मनोरमायाम् । शोभनंरूपंयस्याः ॥

सुरूहक : । पुं॰ गर्दभाश्वे । इ॰ हे॰चन्द्र : ॥

सुरेज्य : । पुं॰ वृहस्पतौ ॥

सुरेज्या । स्त्री॰ तुलस्याम् ॥

सुरेन्द्र : । पुं॰ इन्द्रे ॥

सुरेन्द्रजित् । पुं॰ गरुडे ॥ सुरेन्द्रं जयति । जि॰ । क्विप् । तुक् ॥ इन्द्रजिति ॥

सुरेभ : । पुं॰ देवहस्तिनि ॥ शोभनवर्णे । न॰ रङ्गे । मृदङ्गे ॥

सुरेवट : । पुं॰ रामपूगे मुनिपूगे ।

सुरेश : । पुं॰ भगवति । विष्णौ ॥ शिवे ॥ सुराणामीश : स्वामी ।

सुरेशलोक : । पुं॰ ब्रह्मलोके ॥ यथा । नयचवैकुण्ठकथासुधापगानसाधवोभागवतास्तदाश्रया : । नयचयज्ञेशमहामहोत्सवा : सुरेशलोकोपिनवैससेव्यतामितिदेवीभागवतं ॥

सुरेश्वर : । पुं॰ इन्द्रे ॥ शिवे । शङ्कराचार्यशिष्यविशेषे । वार्त्तिककारे ॥

सुरेश्वरी । स्त्री॰ दुर्गायाम् । मन्दाकिन्याम् ॥ सुराणामीश्वरी ॥

सुरेष्ट : । पुं॰ बकवृक्षे । शिवमल्लयाम् ॥ शाले ॥ सुरपुन्नागे ॥

सुरेष्टा । स्त्री॰ ब्राह्म्याम् ॥

सुरोत्तम : । पुं॰ सूर्य्ये ॥ त्रि॰ देवश्रेष्ठे ॥

सुरोत्तर : । पुं॰ चन्दने ॥

सुरोद : । पुं॰ सुरासिन्धौ । सुरासमुद्रे ॥ सुरा॰ उदकं यस्य । उत्तरपदस्थेत्युदकस्योदादेश : ॥

सुलक्षण : । त्रि॰ शोभनलक्षणविशिष्टे ॥

सुलक्षणा । स्त्री॰ उमाया : सखीविशेषे ॥

सुलभ : । पुं॰ विष्णौ ॥ यथा । पत्रेषुपुष्पेषुफलेषुतोयेष्वक्रीतलभ्येषुसदैवसत्सु । भक्त्यैकलभ्ये पुरुषेपुराणे मुक्त्यैकथं नक्रियतेप्रयत्न : इति महाभारतम् ॥ त्रि॰ अनायासप्राप्ये । सुखेनलभ्यते॰ इति । ईष

दृ : सुप्रीतिलभे : खल् ॥

सुलभा स्त्री॰ तुलस्याम् ॥ धूम्रपत्रायाम् ॥ माषपर्ण्याम् ॥

सुललाटः । त्रि॰ शोभनभालविशिष्टे । ललाटे यस्य दृश्यन्ते चतुस्त्रिद्व्येकरेखिका इत्युक्तमचतुर्लेखासौ भाग्यविशिष्टे ॥

सुललितम् । न॰ मात्रावृत्तविशेषे ॥ द्विजवरयुगमिह रचय विलघुकगणमथ कलय । सुललितकलितरसपदि सरसिजमुखि भवति यदि । अगतिविदितसुललितमिति वरफणिपतिरिति वदति ॥ यथा । प्रविचल कुवलयनयन जलनिधिकृतवरशयन । दितितनयनिवहदमन शमनविविधभयशमन । मयि वरमुपनय सुचिरमभिनव जलधररुचिर ॥ त्रि॰ अतिसुभगे ॥ सुकोमले ॥

सुलेखा । स्त्री॰ दुर्गायाम् ॥

सुलोचनः । पुं॰ श्रीकृष्णे ॥ शोभनं लोचनं नयनं चास्य ॥ मृगे । हरिणे ॥ त्रि॰ शोभननेत्रविशिष्टे ॥ शोभने लोचने यस्य सः ॥

सुलोचना । स्त्री॰ सुनेत्रायाम् ॥ माधवराजपत्न्याम् ॥

सुलोमशा । स्त्री॰ काकजङ्घायाम् ॥ त्रि॰ शोभनलोम[illegible] ॥

सुलोमा । स्त्री॰ मांसच्छदायाम् ॥ ताम्रवल्ल्याम् ॥

सुलोहकम् । न॰ पित्तले ॥

सुलोहितः । पुं॰ सुन्दररक्तवर्णे ॥ त्रि॰ तद्वति ॥

सुलोहिता । स्त्री॰ अग्निजिह्वाविशेषे ॥

सुवक्त्रः । पुं॰ वनबर्बर्याम् ॥ न॰ सुन्दरानने । त्रि॰ तद्वति ॥

सुवचनम् । न॰ सुप्रलापे । शोभनोक्तौ ॥ शोभनं वचनम् ॥

सुवचाः । त्रि॰ वाग्मिनि ॥ सुष्ठु वक्ति । वच॰ । सर्वधातुभ्योऽसुन् ॥ यद्वा । मिथुनेऽसिः । उपसर्गविशिष्टो धातुर्मिथुनम् । तस्मात् सोपपदादसिः । स्वरभेदः ॥

सुवदनः । पुं॰ श्रीगणेशे । शोभनं वदनमस्य ॥ त्रि॰ सुन्दराननवति ॥ न॰ शोभनानने ॥

सुवदना । स्त्री॰ सुन्दराननविशिष्टायां नार्याम् ॥ कृतिच्छन्दः २॰ प्रभेदे ॥ ज्ञेया सप्ताश्वषड्भिर्मरभनययुता भ्लौ गः सुवदना ॥ यथा । प्रत्याहृत्येन्द्रियाणि त्वदितरविषयाण्यासाद्य नयना॰ त्वां ध्यायन्तो निकुञ्जे परतरपुरुषं हर्षोत्थपुलकाः । आनन्दाश्रुप्लुताक्षी वसति सुवदना योगैकरसिका॰ कामार्त्तिं न्यक्कृत्य कामाननु नरकरिपो राधा मम सखी ॥ सुष्ठु शोभनं वदनं यस्याः सा ॥

सुवन : । पुं॰ दिवानाथे । सूर्य्ये । वह्नौ ॥ सूते॰ सूयते वा । षूङ्प्राणिगर्भविमोचने । भूसूधूभ्रस्जिभ्यश्छन्दसीति क्युन् ॥

सुवया : । स्त्री॰ प्रौढायाम् ॥

सुवर्च्चक : । पुं॰ सर्ज्जिकाक्षारे ॥

सुवर्च्चला । स्त्री॰ सूर्य्यपत्नीविशेषे । महावलायाम् । अतस्याम् ॥ ब्राह्म्याम् । आदित्यभक्तायाम् । हुलहुल॰ इ॰ प्र॰ शाके ॥ अस्या गुणा यथा । सुवर्च्चला हिमा रूक्षा स्वादुपाकरसा गुरुः । अपित्तला कटुः क्षारा विष्टम्भकफवातजित् ॥ अन्यच्च तिक्ता कषायोष्णा सरा रूक्षा लघुः कटुः । निहन्ति कफपित्तास्रश्वासकासारुचिज्वरान् ॥ विस्फोटकुष्ठमेहास्रयोनिरुक्कृमिपाण्डुताः ॥

सुवर्च्चा : । त्रि॰ दीप्तमति ॥ अतितेजस्विनि । शोभनं वर्च्चो यस्य सः ॥

सुवर्च्चिक : । पुं॰ सर्ज्जिकाक्षारे ॥

सुवर्च्चिका । स्त्री॰ जतुकायाम् । तरुवल्ल्याम् । जतुकायाम् । निशान्धायाम् ॥ सर्ज्जिकाप्रभेदे । सोरा॰ इ॰ भा॰ प्र॰ ॥ सुवर्च्चिकासर्ज्जिकावद्बोद्धव्या गुणतो जनैः ॥

सुवर्च्ची । स्त्री॰ सर्ज्जिकाक्षारे ॥

सुवर्ण : । पुं॰ स्वर्णकर्षे । विस्ते । हेम्नोऽक्षे । हेम : षोडशमाषेषु ॥ षोडशभिर्माषैः परिमितेपरिमाणविशेषे ॥ सुवर्णालौ ॥ सुवर्णनामनियन्त्रे ॥ धत्तूरे । लङ्कादिद्वीपवत् समुद्रान्तर्वर्त्तिनि द्वीपविशेषे । कणगुग्गुलौ ॥ न॰ सोना॰ इ॰ भा॰ प्र॰ धातुश्रेष्ठे । तत्पर्य्यायाः यथा । स्वर्णं सुवर्णं कनकं हिरण्यं हेमहाटकम् । तपनीयं शातकुम्भं गाङ्गेयं भर्म्म कर्व्वुरम् ॥ चामीकरं जातरूपं महारजतकाञ्चने । रुक्मं कार्त्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियामिति ॥ तच्चधायं त्वं सर्वदेवतात्मकत्वञ्चोक्तं रामायणे॰ महाभारते च परशुरामं प्रति वशिष्ठवाक्यम् । सर्व्वरत्नानि निर्म्मथ्य तेजोराशिसमुत्थितम् । सुवर्णमेभ्यो विप्रेन्द्र रत्नं परमनुत्तमम् ॥ एतस्मात् कारणाद्देवगन्धर्व्वोरगराक्षसाः । मनुष्याश्च पिशाचाश्च प्रयता धारयन्ति तत् ॥ तथा । तस्मात् सर्व्वपवित्रेभ्यः पवित्रं परमं स्मृतम् ॥ तथा । अग्निर्व्वै सकला देवाः सुवर्णञ्च तदात्मकम् । तस्मात् सुवर्णं ददता दत्ताः स्युः सर्व्वदेवताः ॥ तस्मात् पादेन धार्य्यम् ॥ अस्योत्पत्तिर्हेम॰ गुणाश्च स्वर्णे द्रष्टव्याः ॥ कृष्णागुरुणि ॥ हरिचन्दने ॥ स्वर्णगैरिके । वित्ते । धने ॥ नागकेशरे ॥ पुं॰ न॰ हेम्नोऽक्षे । अशीतिरत्तिकापरिमितेस्वर्णे ॥ त्रि॰

उत्कृष्टवर्णे ॥ शोभनोवर्णः स्तुतिर्वासुष्ठुवर्ण्यतेवा । वर्णवर्णने । ग्यन्तः । एरच् ॥

सुवर्णकः । पुं॰ आरग्वधवृक्षे ॥ पुष्पैः शोभनोवर्णोऽस्य ॥ न॰ पित्तले ॥

सुवर्णकदली । स्त्री॰ काञ्चनकदल्याम् । चम्पकरम्भायाम् । चम्पा केला॰ इ॰ भा॰ प्र॰ ॥

सुवर्णकारः । पुं॰ स्वर्णकारे ॥

सुवर्णकेतकी । स्त्री॰ हेमकेतक्याम् ॥

सुवर्णगैरिकम् । न॰ गैरिकप्रभेदे । स्वर्णधातौ । सुरक्ते । सन्ध्याभ्रे । बानोमाटी॰ पौलागिरु॰ इ॰ भा॰ प्र॰ ॥ सुवर्णगैरिकन्त्वन्यत्ततोरक्ततरंहितत् । ततोगैरिकात् ॥ अस्यगुणाः । गैरिकंमधुरंशीतं कषायंव्रणरोपणम् । विस्फोटाशोऽग्निदाहघ्नंवरंस्वर्णादिकंशुभम् ॥

सुवर्णनकुली । स्त्री॰ महाज्योतिष्मत्याम् ॥

सुवर्णपुष्पः । पुं॰ राजतरुण्याम् ॥

सुवर्णप्रसरम् । न॰ एलवालुके ॥

सुवर्णमाक्षिकम् । न॰ स्वर्णमाक्षिके ॥

सुवर्णयूथी । स्त्री॰ सुगन्धायाम् । हेमपुष्पिकायाम् । सोनजुही॰ इ॰ भा॰ प्र॰ ॥

सुवर्णवणिक् । पुं॰ अम्बष्ठाद्वैश्यकन्यायांजातेवर्णसङ्करजातिविशेषे । कृषवणिग्विशेषस्वसंसर्गात्स्वर्णकारित्वा । स्वर्णचौर्यादिदोषपतितोव्रात्यापतः ॥

सुवर्णवर्णः । पुं॰ विष्णौ । त्रि॰ स्वर्णवर्णे ॥ सुवर्णस्येववर्णोऽस्य ॥

सुवर्णवर्णा । स्त्री॰ काञ्चन्याम् । हरिद्रायाम् ॥

सुवर्णविन्दुः । पुं॰ विष्णौ हरौ ॥ विन्दवोऽवयवाः सुवर्णसदृशाअस्य ॥ शोभनंवर्णमक्षरम्॰ विन्दुश्च यस्मिन्मन्त्रेतदात्मकोवा ॥

सुवर्णा । स्त्री॰ स्वर्णक्षीर्याम् ॥ हरिद्रायाम् ॥ वाह्यालके ॥

सुवर्णाख्यः । पुं॰ नागकेशरे । धत्तूरे ॥

सुवर्णी । स्त्री॰ आखुपर्ण्याम् ॥

सुवसनम् । न॰ कालिङ्गे ॥

सुवल्लिः । स्त्री॰ सोमराज्याम् ॥ शोभनावल्लिरस्याः ॥

सुवल्ली । स्त्री॰ सोमराज्याम् ॥ कटव्याम् ॥

सुवसन्तः । पुं॰ मधूत्सवे । चैत्राह्वाम् ॥

सुवसन्तकः । पुं॰ वासन्त्याम् । मदनोत्सवे ॥

सुवहः । त्रि॰ सुखवाह्ये ॥ सुखेन वहति । वह॰ । पचाद्यच् ॥ पुं॰

वायो : प्रभेदे ॥

सुवहा । स्त्री॰ गोधापद्याम् ॥ सुष्ठु वहत्यामोदम् । वह॰ । अच् । टाप् ॥ शल्लकीद्रुमे ॥ एलापर्ण्याम् ॥ तुलस्याम् ॥ वीणायाम् ॥ रास्नायाम् ॥ शेफालिकायाम् ॥ त्रिवृतायाम् ॥ नीलसिन्धुवारके ॥ रुद्रजटायाम् ॥ हंसपद्याम् ॥ मुसल्याम् ॥

सुवास : । पुं॰ शोभनगन्धे ॥ उत्तमनिवासे ॥

सुवासा: । त्रि॰ । निर्म्मलवाससि ॥

सुवासिनी । स्त्री॰ ऊढाल्पवय : स्त्रियाम् । चिरण्ट्याम् ॥ सुष्ठु वसति पितृगेहे॰ तच्छीला । सुप्यजातौ णिनिस्ताच्छील्ये इति णिनि : । अवीतांस्ता नार्च्चये । विवाहिताश्च देवेशि बाला एवकुमारिका : । सुवासिन्यो महाप्रौढा : संयशोनास्ति सुव्रते । इति ।

सुविक्रम : । पुं॰ सुष्ठु पादविन्यासे ॥ विक्रमस्य सौष्ठवं नाम गजसिंहादिगतिसदृशत्वम् । त्रि॰ तद्वति ।

सुविज्ञ : । त्रि॰ अतिनिपुणे ॥

सुविग्रथ : । त्रि॰ सम्यग्ज्ञातुं शक्ये ॥

सुविदत्रम् । न॰ कुटुम्बे ॥ सुष्ठु वेत्ति । विदल्लाभे । सुविदे: कत्रः ॥

सुविदित : । त्रि॰ प्रख्याते ॥

सुविधि : । पुं॰ उत्तमविधाने ॥ अर्हद्विशेषे ॥

सुविनीत: । त्रि॰ अतिविनयविशिष्टे

सुविनीता । स्त्री॰ सुकरायाम् ॥

सुवीजम् । न॰ खसखसे । त्रि॰ साधुवीजे ॥

सुवीर : । पुं॰ देशविशेषे । त्रि॰ सुष्ठुवीरे । शोभनाविविधाङ्कुरागतयोऽस्य ॥ शोभनवीर्य्योपेते ॥

सुवीरकम् । न॰ सौवीराञ्जने । पुं॰ एकवीरवृक्षे ॥

सुवीरजम् । न॰ सौवीराञ्जने । सुवीरेजातम् । जनी॰ । ड: ॥

सुवीराम्लम् । न॰ काञ्जिके । सुवीरेषु॰ अभिषुतमम्लम् । शाकपार्थिवादि: ॥

सुवीर्य्यम् । न॰ वदरे ॥ उत्तमवीर्ये । त्रि॰ तद्वति ॥

सुवीर्य्या स्त्री॰ नाडीहिङ्गुनि ॥ वनकार्पास्याम् ॥ महाशतावर्य्याम् ॥

सुवृत्त: । पुं॰ शूरणे ॥ त्रि॰ सदाचारनिष्ठे ॥ सुष्ठु वर्त्तुले । परिवर्त्तुले ॥

सुवृत्ता । स्त्री॰ काकलीद्राक्षायाम् ॥ शतपत्र्याम् ॥

सुवृष्टि : । स्त्री॰ सम्यग्हितशोभनवर्षणे ॥

सुवेगा । स्त्री॰ महाज्योतिष्मत्याम् ॥

सुवेल : । पुं॰ त्रिकूटाचले । त्रि॰

प्रशते ॥ शान्ते ॥

सुवेश : । पुं॰ श्वेतेक्षौ ॥ त्रि॰ उचितशृङ्गारसम्पन्ने ॥

सुव्रत : । पुं॰ स्रीहरौ ॥ शोभनंव्रतमस्य । यथा । सकृदेवप्रपन्नाय तवास्मीति च याचते । अभयं सर्वथा तस्मै ददाम्येतद्व्रतंममेति ॥ यद्वा । शोभनंव्रतयतिभुङ्क्ते सुदामादत्तपृथुकादीनीति॰ सुष्टुव्रतयतिभोजनान्निवर्त्ततेनरनारायणरूपेणतपश्चरन्निति वा । व्रताज्जीवजनेनिवर्त्तवितिणिजन्तात्पचाद्यच् ॥ शिवमत्स्याम् ॥ भाविकल्पीयार्हद्विशेषे ॥ वर्त्तमानकल्पीयार्हद्विशेषे ॥ त्रि॰ शोभनव्रतयुक्ते । सद्व्रते ॥

सुव्रता । स्त्री॰ सुखसंदोह्यायाङ्गवि ॥ शोभनंव्रतमस्याः ॥ सद्व्रतायाम् ॥ शच्याम् ॥ वर्त्तमानकल्पीयार्हन्मातरि ॥

सुशर्म्मा । पुं॰ भारतादिप्रसिद्धेक्षत्रियविशेषे ॥ शोभनंशृणाति । शृ॰ । अन्येभ्योपिदृश्यतइतिमनिन् ॥ मिथुनेमनिरितिमनिर्वा ॥

सुशल्य : । पुं॰ खदिरे ॥

सुशाक : । पुं॰ तण्डुलीये ॥ पिण्डायाम् ॥ चञ्चौ । पत्रशाकविशेषे । विजलायाम् । चञ्चुपर्णे ॥ न॰ आर्द्रके ॥

सुशान्ता । स्त्री॰ कालिकापुराणप्रसिद्धायाम्शशिध्वजराजपत्न्यां ॥

सुशिख : । पुं॰ वह्नौ ॥ त्रि॰ उत्तमशिखादति ॥

सुशिखा । स्त्री॰ मयूरशिखायाम् ॥

सुशीत : । पुं॰ प्लक्षवृक्षे ॥ न॰ पीतचन्दने ॥

सुशीतलम् । न॰ गन्धतृणे ॥ वपुषे । खीरा॰ क्षाकडो॰ इ॰ प्र॰ ॥ कत्तृणे ॥ त्रि॰ । अतिशीतगुणविशिष्टे ॥

सुशीता । स्त्री॰ शतपत्र्याम् ॥

सुशील : पुं॰ विष्णोर्दूतविशेषे ॥ त्रि॰ सद्वृत्ते । शोभनशीलयुक्ते ॥ शोभनंशीलंयस्यसः ॥

सुशीला । स्त्री॰ श्रीकृष्णस्याष्टमहिष्यन्तर्गतमहिषीविशेषे ॥ इतिपद्मपुराणम् ॥

सुश्राव्यम् । न॰ नलरामयुधिष्ठिरादीनांयशसि ॥ शोभनवाक्ये ॥

सुश्री : । त्रि॰ सुंदरे ॥ शोभनाश्रीर्यस्य ॥

सुश्रीक : । त्रि॰ शोभनश्रीविशिष्टे ॥

सुश्रीका । स्त्री॰ शल्लक्यां ॥

सुश्रुत : । पुं॰ विश्वामित्रमुनिपुत्रे॰ चिकित्साशास्त्रकर्त्तरि ॥ चिकित्साग्रन्थविशेषे । सुश्रुतेनकृतंतन्त्रं सुश्रुतंबहुभिर्यत : । तस्मात्तत् सुश्रुतंनामविख्यातंक्षितिमण्डले ॥

सुशुश्रुवान् । त्रि॰ सुश्रुतवति ॥ शृणो

ति : क्रमुः ॥

सुषमः । त्रि० चारौ । रुचिरे । शोभने । सुन्दरे ॥ समे ॥ सुशोभनं समं सर्व्वमस्य । सुविनिर्दुर्भ्य इति षः ॥

सुषमा । स्त्री० परमायांशोभायाम् । अनन्तशोभायाम् ॥ जिनानाङ्कालभेदे ॥ वर्णवृत्तविशेषे । कर्णौ द्विलघुः कर्णौ भगणः शेषे गुरुश्चापूर्णे चरणः । यस्यां भविता वा लिपरमा सैषा सुषमाख्योव्यक्ता सुषमा ॥ यथा । राणीनयने कीलौकालहेप्रयान् वदकिङ्किणीकुरुते । धन्यारमणी सर्व्वसहतेदुःखं सुखं तस्यास्तन्मनुते ॥ शोभनं समं सर्व्वमनया । सुविनिर्दुर्भ्यः सुपिसूतिसमाइति षत्वम् ॥

सुषवी । स्त्री० कारव्याम् । कृष्णजीरके ॥ जीरके ॥ कारवेल्ले ॥ सुखं सुवति । षू प्रेरणे । अच् । गौरादिः । उपसर्गात्सुनोतीति षत्वम् । सुषवणं वा । ऋदोरप् । सोऽस्त्यस्याः । पिप्पल्यादिः ॥ क्षुद्रकारवेल्ले । इति राजनिर्घण्टः ॥

सुषिः । स्त्री० छिद्रे ॥ सुष्ठु स्यति । षो० । उपसर्गे घोः किरिति वाहुलकात् किः ॥

सुषिरम् । न० विवरे । विले । छिद्रे सुषिरे ॥ सुषिरस्त्यस्य । जषसुषि

सुष्कमधीरः ॥

सुषीमः । पुं० सर्पविशेषे ॥ चन्द्रकान्तमणौ ॥ त्रि० शिशिरे । शीतगुणयुक्ते ॥ चारौ । रम्ये । मनोज्ञे ॥ सुष्ठु सीमा मर्यादा यस्य । सुषामादिषु चेति षत्वम् ॥

सुषुप्तः । पुं० न० स्वप्नान्ते ॥ सुषुप्त्यां तमोऽज्ञानं बीजं स्वप्नप्रबोधयोः ॥ सुषुप्त्यवस्थायाम् ॥ यथा ॥ योजागरे बहिरनुक्षणधर्म्मिणोऽर्थान् भुङ्क्ते समस्तकरणैर्हृदि तत्सदृक्षान् । स्वप्ने सुषुप्त उपसंहरते स एकः स्मृत्यन्वयात्त्रिगुणवृत्तिदृगिन्द्रियेशः । इति श्रीभा० ११ स्कं० ११ ऽध्यायः ॥ त्रि० सुषुप्तियुक्ते ॥

सुषुप्तस्थानः । पुं० प्राज्ञे ॥ सुषुप्तं स्थानमस्य ॥

सुषुप्तिः । स्त्री० सर्व्वोपरमावस्थायाम् । अहं किमपि न जानामि सुखेन मया निद्राऽनुभूतेत्येवं प्रकारे सत्त्वप्रधानेऽज्ञाने ॥ तस्यानामान्तरङ्कारणशरीरम् । आनन्दमयकोष इति ॥ सर्व्वस्य स्थूलसूक्ष्मोपाधेः कारणोपाधौ लीनत्वं सुषुप्तित्वमिति तल्लक्षणम् ॥ शोभना सुप्तिः सुषुप्तिः ॥

सुषुप्सुः । त्रि० स्वप्तुमिच्छौ ॥ स्वपेः सन्नन्तादुप्रत्ययः । रुदविदेत्या

दिनासन : क्षारादिस्वपीत्यादि
नासम्प्रसारणम् ॥

सुषुम्णा । स्त्री० नाडीविशेषे ॥ सा च । इडापिङ्गलयोर्मध्ये वर्त्तमाना० पृष्ठवंशान्तर्गतनाडी० सुषुम्णेत्युच्यते ॥ शोभनं सुम्नं सुखं यस्याम् ॥ पृ० ॥

सुषेण : । पुं० करमर्दे ॥ विष्णौ ॥ सुग्रीववैद्ये ॥ तारायाःवालिभार्यायाः पितरि ॥ वेतसे ॥ शोभना सेना यस्य । एतिसंज्ञायामगादिति षत्वम् । रषाभ्यामिति णत्वम् ॥

सुषेणिका । स्त्री० कृष्णत्रिवृतायाम् ॥ सुष्ठु सेनयति । सेनाशब्दात् सत्यापपाशेति णिच् । पचाद्यच् । एतिसंज्ञायामगादिति षत्वम् । णत्वम् । स्वार्थे कन् ॥

सुषेणी । स्त्री० त्रिवृति ॥

सुषोमा । स्त्री० नदीभेदे ॥

सुष्ठु । अ० प्रशंसने ॥ अत्यर्थे ॥ सुतिष्ठति० सुस्थानं वा। ष्ठा० । अपदुस्सुसुस्थ इति कुः । सुषामादित्वात् षत्वम् ॥

सुसंयत । त्रि० कृतसंयमे । यथाविधिसंयमविशिष्टे ॥

सुसंवृत : । त्रि० सिद्धे ॥ अतिनिगूढे । आचारनिर्द्दारविहारयोगाः सुसंवृताधर्म्मविदा तु कार्य्याः ॥

सुसंस्कृत : । त्रि० घृतादिनानाद्रव्ये णप्रयत्नतः सुपक्वे व्यञ्जनादौ । प्रयत्ने ॥ सुष्ठु संस्क्रियते स्म । कर्म्मणि क्तः । सम्परिभ्यामिति सुट् ॥

सुसंस्थान : । त्रि० शोभनाकृतौ ॥

सुसत्या । स्त्री० जनकभार्य्यायाम् ॥

सुसम्पत्०द् । स्त्री० परभागे ॥

सुसमृष्ट : । त्रि० अलङ्कृते ॥

सुसह : । त्रि० दुःसहभिन्ने ॥

सुसाध्य : । त्रि० सुकरे ॥

सुसार : । पुं० रक्तखदिरे ॥ मणिविशेषे ॥ त्रि० अतिशयसारवति ॥ शोभन : सारोऽस्य ॥

सुसारवत् । न० स्फाटिके ॥

सुसिकता । स्त्री० शर्करायाम् ॥ शोभनवालुकायाम् ।

सुसीमा । स्त्री० साधुसीम्नि ॥ षष्ठार्हन्मातरि ॥

सुसेव : । त्रि० सुष्ठु सेवितुं योग्ये ॥

सुस्थ : । त्रि० नीरोगे । स्वस्थे ॥

सुस्थता । स्त्री० आरोग्ये ॥

सुस्थिर : । त्रि० चाञ्चल्यरहिते । स्थिरतरे ।

सुस्ना । स्त्री० खञ्जकारी । खिसारी० इ० प्र० शमीधान्ये ॥ सुस्नोद्वातलारूक्षाकषायाविषदागुरुरिति-राजनिघण्टः ॥

सुस्नात : । पुं० यज्ञान्तस्नानकृति । त्रि० सुन्दररूपेण कृतस्नाने ॥

सुस्नातक : । पुं० शोभनस्नातके ॥

सुस्मितः । त्रि॰ सुन्दरेषद्धास्ययुक्ते ॥
सुस्वादुः । त्रि॰ सुमधुरे ॥
सुहस्तिः । पुं॰ बौद्धभेदे ॥
सुहितः । त्रि॰ विहिते ॥ तृप्ते ॥
सुहिता । स्त्री॰ अग्नेर्जिह्वाविशेषे ॥
सुहृत्तमः । त्रि॰ उपकारानपेक्ष्योपकारके ॥
सुहृत्प्राप्तिः । स्त्री॰ सम्यक्काव्यार्थसिद्धौ । सुहृद्गुरुशिष्यसब्रह्मचारिणां संवादकानां प्राप्तिः । न्यायेन स्वयं परोक्षितमप्यर्थं तावन्न श्रद्दधाति । यावद्गुरुशिष्यसब्रह्मचारिभिः सह न संवाद्यते ॥
सुहृत् । पुं॰ मित्रे । सदैवानुगते चाकरः स्वपरभूरिकार्याणां प्रायशोऽपि सुहृदः सहवासः ॥ शस्तचित्ते । प्रत्युपकारनिरपेक्षतयोपकारिणि । प्रत्युपकारमनपेक्ष्य पूर्वं स्नेहं सम्बन्धमुद्दिश्य वोपकर्त्तरि । कृतोपकारे ॥ सम्बन्धिनि । शोभनं हृदयमस्य । सुहृद्दुर्हृदाविति साधुः ॥ सहाये ॥ यथाहस्तुविचारः । चन्द्रश्चन्दनमिन्दुधामधवलाः ल्योहिरेफावलीझङ्कारोऽम्बुधरा विलासिविपिनोपान्तावसन्तोदयाः । मन्दध्वानधनोद्याद्रिदिवसा मन्दाः कदम्बानिलाः शृङ्गारप्रमुखाः स्वकामसुहृदो नार्योजितायाजिताः ॥ कामस्य सुहृदः सखायो मार्योजितार्याजिताः । सर्वेषां तदुपरञ्जकत्वात् ॥ सर्वान्तर्यामिणि ॥
सुहृदयः । त्रि॰ सुचेतसि । सहृदये । हृदयालौ ॥ शोभनं हृदयमस्य । मित्रत्वाविनयानहृदयस्य हृद्भावः ॥
सुहृद्गुणः । पुं॰ शुचितादौ मित्रस्य गुणे । यथा । शुचितात्यागिताशौर्यं समानसुखदुःखिता । अनुरागश्च दाक्षिण्यं सत्यता च सुहृद्गुणाः ॥
सुग्रीवः । पुं॰ वानरविशेषे ॥ चन्द्रवंशीयहर्य्यदिपुराजपुत्रे ॥
सुह्मः । पुं॰ जातिविशेषे ॥ पुं॰ भूम्नि॰ नीवृद्विशेषे ॥ सुह्मानां निवासो जनपदः ॥ सुह्माः । अणो लुप् । लुपि युक्तवद्भावः ॥
सूः । पुं॰ प्रसवे सवनम् षूङ् प्राणिप्रसवे । क्विप् ॥
सूकः । पुं॰ बाणे ॥ वाते ॥ उत्पन्ने ॥
सूकरः । पुं॰ वराहे । शूकरे । कुम्भकारे ॥ मृगविशेषे ॥ सवनम् । षूङ् प्राणिगर्भविमोचने । सम्पदादिः । सुवं प्रसवं करोति । कृञो हेत्विति टः ॥
सूकरी । स्त्री॰ क्षुपविशेषे ॥ वाराहक्रान्तायाम् ॥ शूकरस्त्रियाम् ॥
सूक्ष्मम् । न॰ प्रवचने ॥ त्रि॰ गम्भी

रार्थे ॥ शोभनोक्तिविशिष्टे ॥ वेदोक्तस्तोत्रमन्त्रादौ ॥

सूक्तवाकः । पुं॰ इदं द्यावापृथिवीभद्रमभूदित्यादिकेमन्त्रे ॥ मन्त्रमात्रे । सुभाषिते ॥ सूक्तं वक्ति । वच॰ । घञ् ॥

सूक्ता । स्त्री॰ चित्राख्यायाम् । शारिकायाम् ॥

सूक्तिः । स्त्री॰ शोभनोक्तौ ॥

सूक्ष्मः । पुं॰ अणौ ॥ कतके । सूक्ष्मात्मनि ॥ जातिक्रियादिप्रवृत्तिनिमित्तशून्यत्वात्मनोवागादीन्द्रियाणामगोचरे परमात्मनि ॥ आत्मा सूक्ष्मोऽणुपरिमाण इति कश्चित् । तन्न । युगपदशेषशरीरव्यापिवेदनानुसन्धानासिद्धेः ॥ न॰ कैतवे ॥ शाठ्ये अध्यात्मे । सूक्ष्मशरीरे ॥ अलङ्कारविशेषे ॥ यथा । कुतोपि लक्षितः सूक्ष्मोऽप्यर्थोऽन्यस्मै प्रकाश्यते । धर्मेण केनचिद्यत्र तत्सूक्ष्मं परिचक्षते ॥ कुतोऽप्याकारादिङ्गिताद्वा सूक्ष्मः स्थूलमतिसंवेद्यः । उदाहरणम् । वक्त्रस्यन्दिस्वेदबिन्दुप्रबन्धैर्दृष्ट्वा भिन्नं कुङ्कुमं कापि कण्ठे । पुंस्त्वं तन्व्या व्यञ्जयन्तीव वयस्या स्मित्वा पाणौ खड्गलेखां लिलेख ॥ अत्राकृतिमालोक्य कयापि वितर्कितं पुरुषायितमसिलतालेखनेन वैदग्ध्यादभिव्यक्तिमुपनीतं पुंसामेव कृपाणपाणितायोग्यत्वात् । यथा वा । सङ्केतकालमनसं विटं ज्ञात्वा विदग्धया । ईषन्नेत्रार्पिताकूतं लीलापद्मं निमीलितम् ॥ अत्र जिज्ञासितः सङ्केतकालः कयाचिदिङ्गितमात्रेण विदितो निशासमयशंसिना कमलनिमीलनेन लीलया प्रतिपादितः ॥ त्रि॰ अल्पे । स्तोके ॥ इन्द्रियागोचरे ॥ सूच्यते । सूचपैशुन्ये । सूचेः स्मन् ॥

सूक्ष्मकृष्णफला । स्त्री॰ मध्यमजम्बूवृक्षे ॥

सूक्ष्मतण्डुलः । पुं॰ खसखसे ॥

सूक्ष्मतण्डुला । स्त्री॰ पिप्पल्याम् ॥

सूक्ष्मदर्शी । त्रि॰ प्रण्डिते ॥ कुशाग्रीयमतौ । प्रत्युत्पन्नमतौ ॥ विशेषज्ञे । इन्द्रियेभ्यः परा ह्यर्था इत्यादिप्रकारेण सर्वविशेषसूक्ष्मतापारम्पर्यदर्शनेन परं सूक्ष्मं द्रष्टुं शीलं यस्य तस्मिन् ॥

सूक्ष्मदलः । पुं॰ देवसर्षपे ॥

सूक्ष्मदला । स्त्री॰ दुरालभायाम् ॥

सूक्ष्मदारु । न॰ क्लिलिङ्गे ॥ तनुकाष्ठे ॥

सूक्ष्मपत्रः । पुं॰ धान्यके ॥ वनजीरके ॥ देवसर्षपे ॥ लघुबदरे ॥ सुरपर्णे ॥ वनबर्वर्याम् ॥ लोहितेक्षौ ॥ ताम्रचूडे । कुक्कुरद्रौ । कुकुरौ धा॰ इ॰ भा॰ प्र॰ ॥ बाबलहृषे

। स्वर्णपुष्पे । न० वितुन्नके । सूक्ष्मपत्रे ।

सूक्ष्मपत्रकः । पुं० सूक्ष्मपत्रे । स्वार्थे कः ।

सूक्ष्मपत्रा । स्त्री० क्षुद्रजम्ब्वाम् ॥ जीवन्त्याम् । दीर्घपत्रायाम् । डिण्डाम् ॥

सूक्ष्मपत्रिका । स्त्री० शतपुष्पायाम् ॥ शतावर्याम् । क्षुद्रोपोदिकायाम् । दुरालभायाम् । आकाशमांस्याम् ॥ लघुब्राह्म्याम् ॥

सूक्ष्मपत्री० स्त्री० आकाशमांस्याम् ॥

सूक्ष्मपर्णी । स्त्री० जीर्णदारुणि । जीर्णफञ्ज्याम् ॥ डिण्डाम् ॥

सूक्ष्मपर्णी । स्त्री० रामदूत्याम् । नागदन्तिकायां ॥

सूक्ष्मपिप्पली । स्त्री० वनपिप्पल्याम् ॥

सूक्ष्मपुष्पी । स्त्री० यवतिक्तायाम् ॥ गर्भे ।

सूक्ष्मप्रयत्नः । पुं० हिरण्यगर्भे ।

सूक्ष्मफलः । पुं० भूकर्बुदारे ॥

सूक्ष्मफला । स्त्री० तामलक्यां ॥

सूक्ष्मबदरी । स्त्री० भूबदर्यां ॥

सूक्ष्मभुवनाष्टकम् । न० अमरपुरविशेषेषु ॥ यथा । सूक्ष्मामरपुराण्यष्टौ वृतौ पैशाचमादितः । राक्षसंयाक्षगान्धर्वं माहेन्द्रसमदर्शिमत् ॥ सौम्यं प्राजेश्वरं ब्राह्मं दीप्तपरमया श्रियेति । वृत्तितत्त्व० सूक्ष्मभुवनाष्टकम् । तेषु पैशाचमादितद्ध्यादौ पैशाचम् । ततो राक्षसादि । ब्राह्मं० दीप्तं परमया श्रियेति । महर्षिमतो माहेन्द्रादप्यतिशयाय । अधिककान्ति ॥ इ० स्मृ० स० ता ॥

सूक्ष्मभूतम् । न० अपञ्चीकृताकाशादिभूते ॥

सूक्ष्ममक्षिकः । पुं० मशके ॥

सूक्ष्ममूला । स्त्री० जयायाम् । वैजयन्तिकायाम् । भा० हि० द्र० प्र० पुष्पवर्गे सूक्ष्ममूलमथा: ॥

सूक्ष्मबदरी । स्त्री० भूबदर्याम् ॥

सूक्ष्मवल्ली । स्त्री० जतुकायाम् ॥ ताम्रवल्ल्याम् ॥

सूक्ष्मवर्त्म । न० ग्रन्थगमने ॥

सूक्ष्मशीलः । पुं० खसखसे ॥

सूक्ष्मव्रणः । पुं० किणे ॥

सूक्ष्मशरीरम् । न० सप्तदशावयवे लिङ्गशरीरे ॥ विज्ञानमयमनोमयप्राणमयकोशाः० ज्ञानेच्छाक्रियाशक्तिप्रधानाः एतत्कोशत्रयमिलितमेतत्० सूक्ष्मशरीरमित्युच्यते । यथाह भगवतो हिमाद्रिं प्रति देवीगीतायाम् । ज्ञानेन्द्रियाणि पञ्चैव पञ्चकर्मेन्द्रियाणि च । प्राणादिपञ्चकञ्चैव धिया च सहितं मनः ॥ एतत्सूक्ष्मशरीरं स्यान्मम लिङ्गं यदुच्यते । इति । सूक्ष्मस्थूल० शरीरञ्च ॥

सूक्ष्मशर्करा । स्त्री॰ वालुकायाम् ॥
सूक्ष्मशाखः । पुं॰ आलवर्बुरे ।
सूक्ष्मशालिः । पुं॰ धान्यविशेषे । सूचिशालौ ॥
सूक्ष्मषट्चरणः । पुं॰ पक्ष्मयूके ॥
सूक्ष्मा । स्त्री॰ यूथिकायाम् ॥ वालुकायाम् ॥ क्षुद्रैलायाम् ॥ करुण्याम् । सूचेः अनिकृतेटाप् ॥ आम्रातकेश्वराधिवासिन्यामम्बायाम् ॥
सूक्ष्मेघणम् । न॰ शिल्पविद्याप्रसिद्धग्रन्थविशेषे ॥
सूक्ष्मैला । स्त्री॰ उपकुञ्चिकायाम् । त्रिपुट्याम् । त्रुटौ । छोटीइलायची॰ इ॰ भा॰ ॥ अस्या गुणा यथा । एलासूक्ष्मा कफश्वासकासार्शोमूत्रकृच्छ्रहृत् । रसे तु कटुका शीता लघ्वी वातहरी मता ॥
सूचः । पुं॰ दर्भाङ्कुरे ॥ सूच्यति । षिवु तन्तुसन्ताने । सिवेष्टेरूचेति षट् ॥
सूचकः । पुं॰ सीवनद्रव्ये । बौद्धके ॥ शुनि । पोतौ । बिडाले ॥ काके । वायसे । बुद्धे । सिद्धे ॥ पिशाचे ॥ कथके ॥ सूक्ष्मशालौ ॥ सूत्रधारे ॥ त्रि॰ पिशुने । दुर्जने । कर्णेजपे । परदोषप्रकाशके । परस्य सतामसतां दोषाणां ख्यापके ॥ सूचयति । सूच पैशुन्ये॰ द ण्वादिरदन्तः । ण्वुल् ॥

सूचनम् । न॰ गन्धने ॥ ज्ञापने ॥ सूच॰ । ल्युट् ॥
सूचना । स्त्री॰ व्यधने । वेधने दृष्टि । दृष्टौ ॥ गन्धने । अभिनये । टाप्
सूचिः । स्त्री॰ व्यधिन्याम् । सूच्याम् । सुइ॰ इ॰ भा॰ प्र॰ ॥ नृत्यप्रभेदे ॥ शिखायाम् । सूच्यतेऽनया । सूच॰ । अचइः ॥ अल्प गर्ते ॥
सूचिकः । पुं॰ सौचिके । तुन्नवाये ॥
सूचिका । स्त्री॰ सूच्याम् । सीवन द्रव्ये ॥
सूचिकाधरः । पुं॰ गजे । हस्तिनि ॥
सूचिकापुष्पः । पुं॰ केतक्याम् ॥
सूचिकाभरणम् । न॰ औषधविशेषे ॥
सूचिकामुखम् । न॰ जलकरङ्के । जलजे शङ्खे । त्रि॰ सूच्यास्ये ।
सूचितः । त्रि॰ ज्ञापिते ॥ सङ्क्षेपतो दर्शिते । सूच॰ क्तः ॥
सूचिपत्रकः । पुं॰ शितावरशाके ॥
सूचिपुष्पः । पुं॰ केतकवृक्षे ॥
सूचिरोमा । पुं॰ शूकरे ॥
सूचिवान् । पुं॰ गरुडे ॥ इ॰ म॰ र॰ लौ ॥
सूचिवदनः । पुं॰ नकुले । मशके ॥ सूचितुल्यं वदनं यस्य ॥
सूचिशालिः । पुं॰ सूक्ष्मशाली ॥

सूची । स्त्री॰ सीवनसाधने ॥ आङ्गिकाऽभिनयान्तरे । अङ्गहारचेष्टायाम् ॥ स्त्रियाः करणं ॥ सीव्यतेऽनया । षिव् तन्तुसन्ताने । सिवेष्टेरूचेतिचट् । टित्वान्ङीप् ॥ त्रि॰ पिशुनइति॰ श्रीधरस्वामिनः ॥

सूचीदलः । पुं॰ सितावरे ॥

सूचीपत्रा । स्त्री॰ गण्डदूर्वायाम् ॥ जलस्थायाम् ॥

सूचीपाशः । पुं॰ सूचीसन्धानहेतुभूते छिद्रे ॥

सूचीपुष्पः । पुं॰ केतक्यां ॥

सूचीमुखः । पुं॰ शुक्लदर्भे ॥ व्यूहविशेषे ॥ न॰ हीरके ॥ नरकान्तरे ॥ त्रि॰ सूच्यास्ये ॥

सूचीरोमा । पुं॰ सूकरे । त्रि॰ सूचीतुल्यरोमविशिष्टे ॥ सूचीसदृशानि रोमाणियस्य सः ॥

सूचीव्यूहः । पुं॰ सूच्याकारेव्यूहविशेषे ॥ पिपीलिकापङ्क्तिरिवायथास्थितेन॰ संघतरूपतया॰ यत्र यत्र॰ सैनिकावस्थानं॰सधीप्रपवीरपुरुषमुखः सूचीव्यूहः । सेनायतोभयेसतियायात् ॥

सूच्यग्रः । पुं॰ खरच्छदे । उलूखड॰ इ॰ गौ॰ दे॰ भा॰ प्र॰ तृणविशेषे ॥ न॰ दर्भे ॥ सूच्यग्रभागे ॥

सूच्यग्रस्थूलकः । पुं॰ तृणविशेषे ॥ यथा । सूच्यग्रस्थूलकोदर्भोऽतूर्णास्यष खरच्छदइतिरत्नमाला ॥

सूच्यास्यः । पुं॰ मूषिके ॥ मशकप्रभेदे ॥ त्रि॰ सूचीतुल्यमुखे ॥

सूच्याह्वः । पुं॰ सितावरे ॥

सूतः । पुं॰ सारथौ ॥ सुवतिगमयतिस्माश्वान् । षू॰ । गत्यर्थत्वात्क्तः ॥ त्वष्टरि । तक्ष्णि ॥ ब्राह्मण्यांक्षत्रियाज्जाते ॥ यथा । क्षत्रियाद्विप्रकन्यायांसूतोभवतिजातितइति । अयंविवाहासम्भवात् कन्याग्रहणं स्त्रीमात्रप्रदर्शनार्थम् । ब्राह्मण्यांक्षत्रियाज्जातःसूतनामासजायते ॥ पितामहर्द्देवस्य पृथोर्वैण्यस्ययज्ञे सूत्यांसोमाभिषवभूमौ सौत्येऽहनिसमुत्पन्नेनारायणांशे॰ पुराणानांवक्तरि । पौराणिके ॥ यथोक्तंविष्णुपुराणे । इस्तेतुदक्षिणेचक्रंदृष्ट्वातस्यपितामहः । विष्णोरंशंपृथुंमत्वापरितोषंपरंययौ ॥ तस्यवैजातमात्रस्ययज्ञेपैतामहेशुभे । सूतः सूत्यांसमुत्पन्नः सौत्येऽहनिमहामतिः ॥ तस्मिन्नेवमहायज्ञेजज्ञेप्राज्ञोऽथमागधः । प्रोक्तौतदामुनिवरैस्तावुभौसूतमागधौ ॥ स्तूयतामेषनृपतिः पृथुर्वैण्यः प्रतापवान् । इति १ अंशे १३ ऽध्यायः ॥ वन्दिनि ॥ सूर्ये ॥

पुं० न० पारदे ॥ त्रि० प्रसूते ॥ प्रेरिते ॥ सुवति० सुयतिस्म वाभिषवे न । षू प्रेरणे । क्त: ॥

सूतक: । पुं० न० पारदे । रसे ॥ न० जनौ । जन्मनि ॥ जननाशौचे ॥ यथा । यावन्नच्छिद्यते नालं तावन्नाप्नोति सूतकम् । छिन्ने नाले तत: पश्चात् सूतकन्तु विधीयते ॥ अपिच । मृतेन सूतकं गच्छेन्नेतरस्सूतकेन तु ॥ द्वयमनुरपि । शावस्योपरि शावे तु सूतकोपरि सूतके । शेषाहोभिर्विशुद्धि: स्यादुदक्यां सूतकं विनेति ॥ मरणाशौचे ॥ यथा । सर्वेषामसंस्पृश्यं तत्रस्थास्सूतके सति । मध्येपि सूतके दद्यात् पिण्डान्प्रेतस्य त्वष्टमयद्द्विति ॥ प्रतिबन्धके ॥ यथा । व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्च्चने जपे । आरब्धे सूतकं न स्यादनारब्धे तु सूतकमिति ॥

सूतका । स्त्री० सूतिकायाम् । सूता शब्दात् स्वार्थे कन् । सूतकापुत्रिका वृन्दारकाणां वेति साधु: ॥

सूतकागृहम् । न० सूतिकागृहे ॥ सूतकाया गृहम् ॥

सूततनय: । सूतनन्दन: । सूतपुत्र: । सूतपुत्रक: । } पुं० कर्णे । कुन्त्या ज्येष्ठाऽपत्ये ॥

सूतराट् । पुं० पारदे । रसे ॥

सूति: । स्त्री० प्रसवे ॥ सोमाभिषवभूमौ ॥

सूतिका । स्त्री० सूतकायाम् । नवप्रसूतायाम् ॥ तदन्नभोजने प्रायश्चित्तं यथा । चाण्डालान्नं भूमिपान्नं मद्यजीविस्त्रजीविनाम् । शौण्डिकान्नं सूतिकान्नं भुक्त्वा मासं व्रती भवेदिति शङ्ख: ॥

सूतिकागारम् । सूतिकागृहम् । सूतिकागेहम् । सूतिकाभवनम् । } न० । प्रसवालये । अरिष्टे ॥ तस्याकृतिर्यथा ।

सूतिकावास: । पुं० अष्टहस्तायतं चारुचतुर्हस्तविशालकम् । प्राचीद्वारमुदग्द्वारं विदध्यात् सूतिकागृहम् ॥ तत्रापि शावानां वासोऽयथा । सर्वभगानप्रतिघान् सूतिकागृहसेविन: । पृष्ठत: पाणिपादांश्च पृष्ठयोर्वानुसरेत: । एवंविधानुपिशाचांश्च दृष्ट्वा ब्रह्मानुकम्पया । अन्तर्द्धानं वरं प्रादात् कामशायित्वमेव चेति वह्निपुराणम् ॥ अपिच । सूतिकावासनिलया जन्मदा नाम देवता: । तासां यागनिमित्तन्तु शुद्धिर्जन्मनि कीर्त्तिता । षष्ठेह्नि रात्रौ यागन्तु जन्मदानान्तु कारयेत् । इति सूते वस्त्रार्थे कन् । सूतिकापुत्रिके तिपर्व्वाऽसद्रूक्ष्म । सूतिकाया: ०

आगारं॰ गृहम्॰ गेहम्॰ भवनम्॰ आवासो वा ॥

सूतिकारोगः। पुं॰ नवप्रसूतायाव्याधिभेदे ॥

सूतिकाषष्ठी। स्त्री॰ सूतिकागारेजातबालकस्यषष्ठदिनेपूज्यदेवीविशेषे॥

सूतिगृहम्। न॰ सूतिकागारे ॥

सूतिमासः। पुं॰ जन्ममासे। वैजनने॥ सूतेः प्रसवस्यमासः॥ सूतिमासोवैजननोनवमोदशमोपि चेतिजटाधरः॥

सूत्कटम्। न॰ गुडत्वचि। त्वक्पत्रे। चोचे

सूत्थानः। वि॰ दक्षे। चतुरे॥ सु॰ उत्थानमुद्योगोऽस्य॥ न॰ शोभनोत्थाने॥

सूत्या। स्त्री॰ यज्ञस्नाने। अभिषवे। सवने॥ युवत्याम्॥ सूतयुवत्याभितिष्ठङ्देशः॥ सोमलतारसपाने॰ सूतिकर्षित्भरतः॥

सूत्रम्। न॰ सूतञ्॰ भा॰ प्र॰ वस्त्रारम्भके। तन्तौ॥ व्यवस्थायाम्॥ शास्त्रादिसूत्रग्रन्थे॥ पदसाधकग्रन्थे॥ सूत्रलक्षणन्तु। यथा। संज्ञाचपरिभाषाचविधिर्नियमएवच। प्रतिषेधोधिकारश्चषड्विधंसूत्रलक्षणम्॥ अपिच। अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम्। अस्तोभमनवद्यञ्चसूत्रंसूत्रविदोविदुरिति॥ सूचनात्सूत्रमुच्यतइतिच॥ सूत्र्यते। सूत्रवेष्टने॰ अदन्तः। घञ्॥ सीव्यतेनेनवा। षिवु॰। सिविमुच्योष्टेरूचेतिचकारात्॰ किष्ट्रन्चप्रत्ययः॥ भूतकारणे॥ यथा। अण्डारम्भकभूतानामपञ्चीकृतभूतत्वम्। सूत्रङ्कारणमित्यर्थे तदागमैकगम्यते॥ अण्डारम्भकपञ्चभूतकारणस्यापञ्चीकृतपञ्चभूतत्कार्यात्मकसूत्रस्यागमैकगम्यत्वात्तत्कार्यगम्यत्वम्। तत्सम्मृतिम्प्रमाणयति। अचिन्त्याः खलुयेभावानतांस्तर्केणयोजयेत्। सूत्रान्तर्याम्यपराणितांकिंकानानुमन्वते॥ तर्काभासोभवेत्तत्रहेतुदृष्टान्तवर्जनादिति॥ पत्रपाशपवित्रसूत्रकृचाः पुंसिचेतिपुंस्त्वमपि॥

सूत्रकण्ठः। पुं॰ विप्रे। द्विजन्मनि॥ खञ्जरीटखगे॥ कपोते॥

सूत्रकोणः। पुं॰ डमरौ॥

सूत्रगण्डिका। स्त्री॰ एषण्याम्॥

सूत्रतन्तुः। पुं॰ सूत्रे॥

सूत्रतर्कुटी। स्त्री॰ तर्क्याम्। तकुवा॰ इ॰ भा॰॥

सूत्रधारः। पुं॰ इन्द्रे॥ शचीपतौ॥ नान्द्यन्तरसञ्चारिणि॰ नटविशेषे॥ सतुरङ्गभूमिंपरिक्रम्य-नाटकीयकथासूत्रसूचकः। तल्लक्षणं यथा। चतुरोद्यनिपुणा

सोऽनेकभूषासमावृत : । नाना भाषणतत्त्वज्ञो नानानाट्यार्थतत्त्ववित् ॥ नानागतिप्रचारज्ञो रसभावविशारद : । वेषोपचारचतुरो नानाशिल्पकलान्वित : । छन्दोऽभिधानतत्त्वज्ञ : सर्वशास्त्रविचक्षण : । तद्गीतानुगणक : कलातालावधारण : ॥ अवधार्यप्रयोक्तॄणामुपदेशक : । एवंगुणगणोपेत सूत्रधार : स उच्यते ॥ शिल्पकारिप्रभेदे । त्वष्टरि । रथकारे । बढइ । इ० दे० भा० । छुतार० इ० गौ० दे० भा० प्र० ॥ सूत्रं धरति । धञ् । कर्म्मण्यण् ॥

सूत्रपुष्प : । पुं० कार्पासे ॥

सूत्रभित् । पुं० सौवनकृति : सौचिके । तुन्नवाये ॥

सूत्रमध्यभू : । पुं० धूनके । यक्षधूपे ॥

सूत्रयन्त्रम् । न० वापसूत्राद्यकार्ष्ठे । सूत्रवेष्टनकाष्ठे । तांत० इ० गौ० भा० प्र० ॥ यथा । आवापनं सूत्रयन्त्रं यत्सूत्रैरभिवेष्ट्यते ॥ इति शब्दमाला ।

सूत्रला । स्त्री० तर्कुट्याम् ॥ इ० हा० लो० ॥

सूत्रवीणा । स्त्री० वीणाप्रभेदे । लावुक्याम् ॥ इति हारावली ॥

सूत्रवेष्टनम् । न० तन्तुवायोपकरणे । वसरि । तासनी० इ० गौ० भा० प्र० ॥ सूत्रस्य वेष्टनम् ॥ सूत्रं वेष्ट्यतेऽनेनेति वा ॥ इति तु स्वामी ॥

सूत्रात्मा । पुं० समष्टिलिङ्गशरीराभिमानिनि चैतन्ये । हिरण्यगर्भे ॥ सर्वत्रानुस्यूतत्त्वात् सूत्रात्मा ॥ वायौ ॥ यथा । योगाङ्गैर्हि : स्थितो वायु : सूत्रात्मेति श्रुतीरित : ॥

सूत्रामा । पुं० दैत्यभिदि । इन्द्रे सुष्ठु० उत्० अत्यर्थम् पुन:पुनस्त्रायते । वेडुपालने । आतो मनिन्निच्यादिना मनिन् ॥

सूत्राली स्त्री० गलघर्ने । गलमेखलायाम् ॥ इति हारावली ॥

सूत्री । पुं० काके । अस्य पर्याया यथा । काकैतुकरटारिष्ट बलिपुष्टसकृत्प्रजा : । ध्वांक्षात्मघोषपरभृद्बलिभुग्वायसा अपीत्यमर: । काकोरतज्वर: सूत्रीश्राबकोगूढमैथुन : । कारव : परमृत्युश्चलुण्टाकोमौकुलिर्द्विक : । मक्रज : सकृत्प्रजा काणोऽपक्रष्टोनगरीवक : । एन्द्रिवनाडीजङ्घविकाणेक्काकवाचका : ॥ त्रि० सूत्रविशिष्टे ॥

सूत्रोद्देश : । पुं० भूमिकायां ॥

सूद : । पुं० सूपकारे वल्लवे । आरालिके ॥ व्यञ्जने ॥ सारथ्ये ॥ लोध्रे ॥ अपराधे ॥ पापे ।

सूयते• सूदयतिवा । षूदत्तरणे एरच् । पचाद्यच् ॥

सूदनम् । न• हनने ॥

सूदशाला । स्त्री• रसवत्याम् । पाकस्थाने । महानसे ॥ रसोइ• इ• भा• ॥ सूदानांसूपकाराणांशाला ॥

सूदाध्यक्ष: । पुं• पाकशालाध्यक्षे । पौरोगवे ॥ तल्लक्षणं यथा । अनाहार्य: शुचिर्दक्षस्त्रिविधिज्ञोऽतिविशारद: । सूदशास्त्रविशेषज्ञ: सूदाध्यक्ष: प्रशस्यते ॥ इतिमात्स्ये १८९ऽध्याय: ॥

सूनम् । न• प्रसवे । पुष्पे ॥ पुं• किरणे । सूर्ये ॥ वि• पुष्पिते ॥ जाते ॥ सवनम्• सूयतेवा । षूङ् प्राणिप्रसवे । भावेकर्मणिवाक्त: । स्वादयओदितइतिनिष्ठानत्वम् ॥

सूना । स्त्री• पुत्र्याम् ॥ अधोजिह्वायाम् । गलशुण्डिकायाम् । घण्टिकायाम् ॥ जन्तुवधस्थाने । यथा । पञ्चसूनागृहस्थस्य चुल्लीपेषण्युपस्कर: । कण्डनीचोदकुम्भश्च बध्यतेयास्तुवाहयन् । सूने१• सूना• हिंसास्थानगुणयोगात् ॥ शुण्डायाम् वेश्यायाम् । सुनोत्यस्याम् । षुञ् अभिषवे । सुञोदीर्घश्चेतिन: ॥ यद्वा । सवनम्• सूयतेवा । षूङ् प्राणिगर्भविमोचने भावेकर्मणिक्त: । स्वादयओदितइतिनिष्ठानत्वम् ॥

सूनु: । पुं• पुत्रे ॥ अनुजे ॥ अर्के । रवौ ॥ सूयते । षूङ्प्राणिप्रसवे । सुव: किदितिनु: ॥ स्त्री• कन्यायाम् ॥

सूनू: । स्त्री• कन्यायाम् ॥

सूनृतम् । न• प्रियसत्योक्तौ । सत्यप्रियवाक्ये ॥ इन्द्रोभवानितिप्रियम्• नसत्यम् । काणोभवानितिसत्यम्• नप्रियम् ॥ मङ्गले ॥ सुष्ठुनृत्यन्त्यनेन । नृतौ• । घञर्थेक: । अन्येषामपीतिदीर्घ: ॥ वि• तद्वति ॥

सूनृता । स्त्री• प्रियसत्येवचसि । ऋते ॥ ऋतञ्चसूनृतावाण्युक्ता ॥

सून्मद: । वि• उन्मत्ते ॥

सून्माद: । वि• उन्मन्दिष्णौ ॥ उन्मत्ते । उन्मादरोगविशिष्टे ॥ सु• अतिशयितउन्मादोऽस्य । सोपसर्गत्वान्मदेर्घञ् ॥

सूप: । पुं• सूदे ॥ भाण्डे ॥ व्यञ्जने । दाल्याम् ॥ यथा । दलितन्तुशमीधान्यं दालिर्दालीस्त्रियामुभे । दालीतुसलिलेसिद्धालवणार्द्रकहिङ्गुभि: । संयुक्तासूपनाम्नीस्यात् कथ्यन्ते तद्गुणा अथ ॥ सूपोविष्टम्भकोरूक्ष: शीतस्तुसविशेषत: । निस्तुषोभृष्टसिद्ध: सलाघवं सुतरांभजेत् ॥ शोभनाआपोऽस्मिन् । अक्

सूरित्यः ॥ कुसुयुभ्यश्चेत्यपचातउत् ॥ अट्नीरित्यत्रदीर्घनिर्देशादन्यत्राप्यूदितिवा ॥ यद्वा । सवतिरसम् । षुप्रसवादौ । सुशूभ्यां निच्चेतिपोदीर्घश्च ॥

सूपकारः । पुं० पाककर्त्तरि । बल्लवे । आरालिके ॥ औदनिके ॥ तल्लक्षणं यथा । कुलीनोकारतत्त्वज्ञोवत्सलानृमिष्टपाचकः । शूरश्च कठिनश्चैवसूपकारः सउच्यते ॥ अपिच । पितृपैतामहोदक्षः शास्त्रज्ञोमिष्टवाचकः । शौचयुक्तोथभक्तश्चसूपकारः सउच्यते ॥ भवेयुर्धार्मिकाः स्निग्धाः सूपकाराः प्रमागताः । धृतोष्णीषाश्चशुचयस्तथावैयवशीर्षिताः ॥ अन्येपितथयेकेचित्तत्रस्युःपरिचारकाः । तेपिचैवंविधाएवतदध्यक्षोपितादृशःस्मृ-ति ॥ सूपंकरोति । कृ० । कर्मण्यण् ॥ शूद्रपाकोपजीविनि ॥

सूपकारपतिः । पुं० पाचकाध्यक्षे ॥ तल्लक्षणं यथा । सूपकारपतिस्तत्र प्रायोवैद्यगुणान्वितः । तत्तद्द्रव्यगतत्वज्ञस्तत्प्राशनतत्परः । जीवनंजीवनामन्नंतद्युक्तंविधिपाचितम् । तदेवाविधिनाभुक्तंपरिणामेविषोपमम् ॥ सूपकाराणांपतिः ॥

सूपधूपनम् । न० हिङ्गुनि ॥

सूपपर्णी । स्त्री० मुद्गपर्ण्याम् ॥

सूपश्रेष्ठः । पुं० मुद्गे ॥

सूपाङ्गम् । न० हिङ्गुनि ॥

सूप्यः । पुं० वैदले । शमीधान्ये ॥

सूमम् । न० पुं० क्षीरे ॥ नभसि ॥ सूते । षूङ्प्राणिगर्भविमोचने । सूयतेवा । षूङ्प्राणिप्रसवे । इषियुधीन्धिदसिश्याधूसूभ्योमक् ॥ पुं० चन्द्रे ॥

सूर । पुं० सूर्ये । रवौ ॥ सुवति प्रेरयतिकर्मणिलोकम् । रप्रे । सुर्णे । सुसूधांगृधिभ्यः क्रन् ॥ यादवे । वसुदेवजनके । तत्तार्हत्पितृविशेषे ॥

सूरणः । पुं० अर्शोघ्ने । शूरणे । कन्दे ॥ सूर्यते । सूरीहिंसायाम् । बहुलमन्यत्रापीतियुच् । कर्त्तरिल्युड्वा ॥ बाहुलेसूरणंनायात् ॥

सूरतः । त्रि० कृपालौ ॥ सुष्ठुरमते । रम० । क्तः । बाहुलकात् पूर्वपदस्यदीर्घः ॥ सूरोकर्दमवत पतिवा । डः ॥ उपशान्ते ॥ सौरमेः तोरमेः पूर्वपदस्यचदीर्घः । क्तित्वादनुनासिकलोपः ॥

सूरसूतः । पुं० अरुणे । गरुडाग्रजे ॥ सूरस्यरवेः सूतः सारथिः ॥

सूरिः । पुं० धीरे ॥ पण्डिते । सङ्ख्यावति ॥ सूते० सूयतेवा । षू

ङ् प्राणिगर्भविमोचने । प्राणिप्रसवे वा । सूङः क्तिः ॥ यादवे ॥ सूर्य्ये ॥

सूरी । पुं॰ पण्डिते । विदुषि ॥ सूरः सूर्य्योऽस्त्युपास्यतयाऽस्य । अत इनिठनाविती निः ॥ न॰ धूमे ॥

सूरी । स्त्री॰ कुन्त्याम् । पृथायाम् ॥ सूर्य्यपत्नी । पुंयोगादिति ङीष् । सूर्य्यतिष्यागस्त्येति यलोपः ॥ राजसर्षपे । राजिकायाम् ॥

सूर्क्षणम् । न॰ आदरे ॥ सूर्क्ष आदरे । ल्युट् ॥

सूर्त्त्यः । पुं॰ माषे ॥

सूर्पः । पुं॰ प्रस्फोटने ॥ शोधितभाजने ॥ कुम्भपरिमाणे । द्रोणद्वयपरिमाणे । इति वैद्यकपरिभाषा ॥ सर्त्ति । सृ गतौ । सृशृभ्यामूच्चेति दशपादीस्थपाठात् पः ॥

सूर्पणखी । स्त्री॰ रावणस्य भगिन्याम् ॥ सूर्पं शोधितभाजनम् । नखविदूषणे । सूर्प्यवच्छोधितभाजने नयस्यादिसत्क्रियानखर्या तदूषयतीति सूर्पणखी ॥

सूर्पपर्णी । स्त्री॰ मुद्गपर्ण्याम् ॥ पूर्वपदादिति णत्वम् ।

सूर्पारकम् । न॰ तीर्थविशेषे । रामतीर्थे ॥

सूर्म्मी । स्त्री॰ अयः प्रतिमायाम् ॥ शोभनाऊर्म्मिः । बहुव्रीहिर्वा । सर्वतोऽक्तिन्नर्थादिति॰ गौरादित्वाद्वा ङीष् ॥ सूर्म्मीं ज्वलन्तीमालिङ्ग्य म्रियेत गुरुतल्पगः ॥

सूर्य्यः । पुं॰ अर्कपर्णे ॥ सूरे । अर्य्यम्णि । आदित्ये । तपने । सवितरि । रवौ ॥ अस्य दृष्ट्यादिभिः पूजोक्ता वराहपुराणे । यथा । उदयाग्निः सूर्त्तं सर्वं यस्तु भक्त्या नरो द्विजः । दृष्ट्वा चताञ्जलिभिस्तं तद्भिः पूजयेच्छुचिः । तस्यभावप्रपन्नस्याशुभं यत्समुपार्ज्जितम् । तत्क्षणादेव निर्दग्धं भस्मीभवति तत्स्यतदिति ॥ रश्मीनां प्राणानां रसानाञ्च स्वीकरणात् सूर्य्यः ॥ यद्वा । सरत्याकाशे । सृ॰ । कर्त्तरि क्यप् । निपातनादुत्त्वम् । उरपरत्वाद्धलि चेति दीर्घः ॥ यद्वा । सुवति॰ कर्म्मणि लोकं प्रेरयति । षू प्रेरणे । कर्त्तरि क्यप् । निपातनात् क्यपो रुडागमः । उभयत्र राजसूयसूर्य्येत्यादिना निपातनम् ॥ यत्तेजनयति सर्वं जगदिति वा । षूङ् प्राणिगर्भविमोचने । पूर्ववन्निपातनम् सर्वावभासके ॥ पौर्णमासीचन्द्रे ॥ यथा । परीतन्तु दिवाप्रोक्तं विपरीतन्तु शर्वरी । पौर्णमासीगतश्चन्द्रः सूर्य्य इत्यभिधीयत इति ॥

सूर्य्यकान्तः । पुं॰ अग्निमणौ । अग्निगर्भे । सूर्य्यमणौ । सूर्य्याश्मनि । पुष्पक्षुपविशेषे । सूर्य्यमणौ

। पुष्परक्ते । पत्रपुटे ॥ स्फटिके ॥ सूर्य्यः कान्तोऽस्य ॥

सूर्य्यकान्तिः । स्त्री॰ पुष्पविशेषे ॥ यथा । सूर्य्यकान्तिस्तामवर्णाभोडू पर्य्यायस्तस्यपीतिशब्दचन्द्रिका ॥ सूर्य्यद्युतौ ॥

सूर्य्यकालः । पुं॰ दिने ॥

सूर्य्यकालानलचक्रम् । न॰ स्वरोदयप्रसिद्धे मानवानांशुभाशुभज्ञानार्थं मनुष्यघटितचक्रविशेषे ॥ विवादेयुद्धरोगार्त्ते गमनेतथा ॥ सूर्य्यकालानलंचक्रं ज्ञातव्यन्तुप्रयत्नतः ॥

सूर्य्यगृहम् । न॰ सिंहराशौ ॥ अत्राहकालिदासः । पञ्चाननाख्योहियथैभचक्रं पञ्चाननाख्योस्तितथाभचक्रे । एनं हरिः पालयितुंसमेत्यकृतंतदिन्त्योतदगारमाद्यैरिति ॥ सूर्य्यस्यगृहम् ॥

सूर्य्यग्रहः । पुं॰ सूर्य्योपरागे । सूर्य्यग्रहणे ॥ यथा । सूर्य्यग्रहः सूर्य्यवारेसोमेसोमग्रहोभवेत् । चूडामणिरितिख्यातस्तत्रानन्तफलंस्मृतम् ॥

सूर्य्यग्रहणम् । न॰ सूर्य्योपरागे ॥ तत्कारणमुक्तं वह्निपुराणे । सूर्य्येन्द्वोरुपरागस्तुगोलकच्छाययाभवेत् । अन्योन्ययोस्तयोरेवव्यामयोरंतरकारणात् ॥ ग्रासमोक्षौतुजायेते

तस्मात् पूर्व्वपश्चिमौ । तत्रपुण्यफलाकाङ्क्षी कर्त्तारःस्नानदानयोरिति ॥

सूर्य्यजः । पुं॰ यमे पितृपतौ ॥ शनैश्चरे ॥ सुग्रीववानरे ॥ कर्णे । कुन्त्यात्मजे ॥ सूर्य्याज्जातः । जनी॰ । डः ॥

सूर्य्यजा । स्त्री॰ कालिन्द्याम् । यमुनायाम् ॥

सूर्य्यतनयः । पुं॰ यमे ॥ शनिग्रहे ॥ कर्णे ॥ सुग्रीववानरे ॥

सूर्य्यतनया । स्त्री॰ कालिन्द्याम् । यमुनायाम् ॥ सूर्य्यस्यतनया ॥

सूर्य्यतीर्थम् । न॰ तीर्थविशेषे ॥

सूर्य्यपत्रः । पुं॰ अर्कपर्णे । आदित्यपत्रे ॥ सूर्य्याभानितीक्ष्णानिपर्णानिपत्राण्यस्य ॥

सूर्य्यपुत्रः । पुं॰ सूर्य्यजे सूर्य्यतनये ॥

सूर्य्यपुत्री । स्त्री॰ यमुनायाम् । यथा । यमस्वसर्नमस्तेस्तुयमुने लोकपूजिते । वरदाभवमेनित्यं सूर्य्यपुत्रिनमोस्तुते ।

सूर्य्यफणिचक्रम् । न॰ स्वरोदयोक्तेमनुजानांसर्व्वकार्य्यशुभज्ञापकेचक्रविशेषे ।

सूर्य्यवल्ली । स्त्री॰ अर्कपुष्पिकावृक्षे ॥

सूर्य्यभक्तः । पुं॰ बन्धूके ॥ त्रि॰ अर्कपूजके ॥

सूर्य्यभक्ता। स्त्री॰ सुवर्च्चलायाम्। आदित्यभक्तायाम्। हुलहुल॰ इ॰ भा॰॥

सूर्य्यमणिः। पुं॰ सूर्य्यकान्तमणौ॥ पुष्पवृक्षविशेषे। मचत्पुटे। पुष्परक्ते॥

सूर्य्यमण्डलम्। न॰ अर्कविम्बे॥ सूर्य्यस्य मण्डलम्॥

सूर्य्यमण्डलभेदी। पुं॰ परिव्राजि योगिनि युद्धरणेऽभिमुखो भूत्वा हत स्तस्मिन्॥

सूर्य्यमता। स्त्री॰ आदित्यभक्तायाम्॥

सूर्य्यमुखी। स्त्री॰ सूर्य्यमुखीतिख्याते पुष्पवृक्षे। सूर्य्यमुख्याः हरितप्रको टयोनिरूक्ताभिप्रागडुताम्। अर्कवृत्तिभेदः॥

सूर्य्ययोगः। पुं॰ सौरभुवने॥

सूर्य्यवंशः। पुं॰ सूर्य्यसन्ताने।

सूर्य्यसञ्ज्ञम्। न॰ कुङ्कुमे॥

सूर्य्यसारथिः। पुं॰ अरुणे।

सूर्य्यहृदयम्। न॰ सूर्य्यस्तवविशेषे

सूर्य्या। स्त्री॰ सूर्य्यदेवताया मन्त्रे। ऋषिति सूर्य्यस्त्रीदेवता। सूर्य्या देवतायांचाप्। इन्द्रवारुण्यामोषधौ। विशालायाम्॥ नवोढायाम्।

सूर्य्यार्घ्यम्। न॰ सूर्य्यसम्प्रदानकार्घ्यम्।

सूर्य्यालोकः। पुं॰ आतपे॥

सूर्य्यावर्त्तः। पुं॰ हुलहुल॰ इति प्रसिद्धक्षुपविशेषे। सुवर्च्चलायाम्॥ सूर्य्यावर्त्तोविवस्वद्धृ:। सुतचि था॰ इ॰ गौ॰ दे॰ भा॰ प्र॰ शाकविशेषे अस्य पर्य्याययथा। पार्षतेयश्चक्रभोवशिरः कपिपिप्पली। आमातासौक्ष्यतत्प्रोक्तः सूर्य्यावर्त्तःसितोऽपरइतिरत्नमाला॥ वराहकालोकथित: सूर्य्यावर्त्तस्तुधाब्धिकेरितिह रात्रौशिरोरोगविशेषे॥ यथा। सूर्य्योदयं याप्रतिमन्दमन्दमक्षिभ्रुवं रुक्समुदेतिगाढम्। विवर्द्धतेचांशुमतासहैवसूर्य्यावर्त्तोविनिवर्त्ततेच। शीतेनशान्तिंलभतेचकिञ्चिदुष्णेनजन्तुःसुखमाप्नुयाद्वा। सर्वात्मकं कष्टतमं विकारं सूर्य्यावर्त्तमुदाहरन्ति॥ सूर्य्योदयमितिलक्षीकृत्यारभ्येतियावत्। सूर्य्यावर्त्तौ॰ सूर्य्यछायागतौ॥ इति॥

सूर्य्यावर्त्ता। स्त्री॰ आदित्यभक्तायाम्॥

सूर्य्याश्मा। पुं॰ सूर्य्यकान्तमणौ।

सूर्य्याश्वः। सूर्य्यघोटके। सूर्य्याश्वेवाताटहरितोसमाविति त्रिकाण्डशेषः॥

सूर्य्याह्वम्। न॰ ताम्रे॥ पुं॰ अर्कवृक्षे॥ त्रि॰ सूर्य्यनामके॥

सूर्य्येन्दुसङ्गमः। पुं॰ दर्शे। अमा

चग्नायाम् ॥ सूर्य्येन्दूसङ्गच्छेतोच स्मिन् । घः ॥

सूर्य्योढः । पुं॰ सूर्य्यास्तकालप्राप्तेऽतिथौ ॥ यथा । सूर्य्योढस्तु स सम्प्राप्तो यः सूर्य्येऽस्तङ्गतेऽतिथिरितिहेमचन्द्रः । अप्रणोद्योऽतिथिः सायंसूर्य्योढो गृहमेधिनेतिमनुः । सूर्य्येण ऊढः प्रापितः ॥ अस्तंगतसूर्य्ये ॥ यथा । दिवातिथौतुविमुखेगतेयत् पातकंभवेत् । तदेवाष्टगुणंरात्रौ सूर्य्योढेविमुखेगतइतिविष्णुपुराणम् ॥

सूर्य्योदयः । पुं॰ भानोः प्रकाशे । सयथादेवीभागवते । पञ्चपंच ५५ उषःकालः सप्तपंचा ५७ रुणोदयः । अष्टपंच ५८ भवेत्प्रातः शेषः सूर्य्योदयः स्मृतइति । तत्रग्रयनंनिषिद्धं यथा । सूर्य्योदयेचास्तमितेच शायिनंविमुंचतिश्रीरपिचक्रपाणिनमिति ॥

सृकः । पुं॰ वाणे ॥ कुमुदे । करवे ॥ उत्पले । पद्मे वाते । वायौ ॥ सरति॰ सर्पति वा । सृगतौ । सृवृभूशुषिमुषिभ्यःकक् । सृकंसरणशीलमितिवेदभाष्यम् ॥

सृकण्डुः । पुं॰ कण्डुरोगे ॥

सृका । स्त्री॰ शब्दवत्यांरक्तमय्यांमालायाम् ॥ चकुत्सितायांकर्मम य्यांगतौ ॥ टाप् ॥

सृकालः । पुं॰ सृगाले ॥

सृक्कम् । न॰ सृक्किणि ॥

सृक्कणी । न॰ २ ओष्ठयोः प्रान्तभागे । सृजतिलालादि । सृजविसर्गे । बाहुलकात्कनिन् । अत्वम् ॥ प्रान्तावोष्ठस्यसृक्कणीदुत्यमरः । ओष्ठस्योतिज्ञाताविकल्पचनं ॥

सृक्क ।) न॰ सृक्किणि ॥
सृक्वा ।)

सृक्कि । न॰ सृक्कणि ॥ दुत्यरुणोभरतश्च ॥

सृगः । पुं॰ भिन्दिपाले ॥ सरति । सृ॰ बाहुलकात्॰ गक् ॥

सृगालः । पुं॰ गोमायौ । जम्बुके । सियाल॰ दू॰ भा॰ प्र॰ मृगधूर्त्तके ॥ सृजतिमायाम् । सृज॰ । बाहुलकात्कालन् । न्यङ्क्वादिः । असृगालातिवा । कः । पृषोदरादिः ॥ सृगंनलातिवा । पूर्व्ववत् ॥ दैत्यविशेषे ॥

सृङ्का । स्त्री॰ सृकायाम् ॥ सृतौ ॥

सृङ् । पुं॰ सृष्टिकर्त्तरि ॥ सृजेः क्विप् ॥ सृजौसृज॰ दूत्यादिरूपाणि ॥

सृजकाधरः । पुं॰ सर्ज्जकाधारे ॥

सृज्यमानः । त्रि॰ सद्यलभूतसङ्के ॥

सञ्जयः । पुं॰ पाण्डवानांसेनापतौ ॥

सृणिः । पुं॰ चन्द्रे ॥ सूर्य्ये ॥ वायौ ॥ सरति । सृ॰ जनिदेत्या

हिमासर्त्तः क्विन् ॥ अग्नौ । पुं० स्त्री० चक्षुषि ॥ सृणिः स्त्रियामित्यमरः । सृणिः स्यादङ्कुशेपुमानिति शाश्वतः । तेनोभयलिङ्गोयमङ्कुशे ॥ सरतिअन्तरंगच्छति वाऽनयावा । सृ० । सृवृषिभ्यां कित् इति निः ॥

सृणिका । स्त्री० लालायाम् ॥ संज्ञायां कन् ॥

सृणीका । स्त्री० लालायाम् ॥ सरति । सृ० । सर्त्तेर्नुम्चेति ईकन् ॥

सृत । त्रि० गते ॥ सृधातोः क्त प्रत्ययेननिष्पन्नः ॥

सृतिः । स्त्री० गमने ॥ मार्गे ॥ सरत्यनया । सृगतौ । क्तिन् ॥

सृका । याम् । कुत्सितायां मृढजनप्रवृत्तायांगतौ ॥

सृत्वा । पुं० विसर्पे ॥ पश्चिधिः ॥ हरौ ॥ प्रजापतौ । सरति । सृ० । शीङ्क्रुशीत्यादिनाक्वनिप् । तुक् ॥

सृत्वरः । त्रि० गमनशीले ॥ सरतितच्छीलः । सृ० इण्नशजिसर्त्तिभ्यः क्वरप् ॥

सृत्वरी । स्त्री० गमनकर्त्र्याम् ॥ टिड्ढेतिङीप् ॥

सृदरः । पुं० । सर्पे ॥

सृदाकुः । पुं० वायौ ॥ वज्रे ॥ ज्वलने ॥ अग्नौ ॥ प्रतिसूर्य्यके ॥ दाकाग्नावितिहैमः ॥ सरत्यत्यर्थम् । सृ० । सर्त्तेर्दाकुचेति काकुप्रत्ययः ॥

सृदाकुः । स्त्री० नद्याम् ॥

सृपाटः । पुं० सृपाख्याम् ॥

सृपाटिका । स्त्री० चञ्च्वाम् ॥

सृपाटी । स्त्री० मानभेदे । गौरादित्वान्ङीष् ॥ रक्तधारायाम् ।

सृप्तः । त्रि० गते । प्रविष्टे ॥

सृप्यमाणः । त्रि० पच्यमाने ॥ सृप्यमाणपर्य्यायास्मन्पतन्त्युपरिगाः खगाः ॥

सृपः । पुं० चन्द्रे । निशाकरे ॥ सर्पति । सृप्लृगतौ । स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपि [illegible] ।

सृमरः । पुं० मृगविशेषे ॥ यस्य गौलमाले: कान्तकचमाश्चर्य्यं क्रियते सचमरिषाकृतिर्भवति । सरणशीलः । सृगतौ । सृघस्यदः क्मरच् ।

सृष्टः । त्रि० निर्म्मिते । रचिते । युक्ते ॥ निश्चिते ॥ प्रचुरे । प्राज्ये । भूषिते ॥ मुक्ते । त्यक्ते । सर्ज्जनम् । सृज० । भावेक्तः ॥

सृष्टिः । स्त्री० सर्गे । निर्माणे । निर्मितौ ॥ स्वभावे । त्यागे ॥ सर्ज्जनम् । सृज० क्तिन् । सृज्यतेइतिकर्म्मणिवाक्तिन् ॥

सृष्टिप्रदा । स्त्री० गर्भदात्र्योषधौ ।

सेः। स्त्री० गत्युत्कभार्यायाम्। हु नाङ्गामिनसवत्सर्समाना। वीपस र्जनर्द्धिसः।

सेकः। पुं० सेचने। धारे। सेच नम्। षिच०। घञ् अभिषेके।

सेकद्रोणी। स्त्री० सेकपात्रे। सेक स्य० सेकायवाद्रोणी।

सेकपात्रम्। न० सेकद्रोण्याम्। सेक्ते। नौस्थजलनिस्सारणपात्रे। येननावीजलमुद्ध्रियते। सिंच नी० हु० गौ० भा०। सेकस्यपात्रम्॥

सेकभाजनम्। न० सेकपात्रे। सेकस्य भाजनम्।

सेक्किमम्। न० मूलके।

सेक्ता। पुं० भर्त्तरि। त्रि० सेचन कर्त्तरि। सिञ्चति। षिच०। तृच्॥

सेक्त्रम्। न० सेकपात्रे। सिच्यतेऽनेन। षिच करणे। दाम्नीशसयुयु जीतिकरणे ष्ट्रन्।

सेचकः। पुं० मेघे। त्रि० सेक्तरि। सिञ्चति। षिच०। ण्वुल्।

सेचनम्। न० सेकपात्रे॥ क्षरणे॥ सेके। सिच्यतेऽनेन। षिच०। करणेतिल्युट्॥ रक्षणे॥

सेटुः। पुं० चिञ्जाणे। कलापनसि गेण्डुम्बायाम्॥

सेतिका। स्त्री० अयोध्यायाम्॥

सेतुः। पुं० आलौ। व्यवस्थापके। अच्छेद्य इत्यमुच्छेदकं इमितिव्यवस्थाहेतौ मृदादिमये। डौली० मेंड० भिंडली० हु० भा० प्र०। पिंगडली। सख्यार्थजलधारणे। उदकसन्तानस्य विधातरि। जलबन्धे। संवरे। बन्ध० हु० भा० प्र० पुल० हु० भा० प्र० नदीसङ्क्रमे। साँको० इ० गौ० भा०॥ सेतौ च्छ्यमुक्तं नारदेन। सेतुश्च द्विविधो ज्ञेयः खेयोबन्ध्यस्तथैव च। तोयप्रवर्त्तनात्खेयो बन्ध्यः स्यात्तन्निवर्त्तनादिति॥ धर्ममर्यादायाम्। अस्त्रीयनियमे॥ मर्यादायाम्। कुमारके। वरुणवृक्षे॥ मन्त्रविशेषे। सिनोति० सीयते वा। षिञ् बन्धने। सितनीतितुन्। तितुत्रेतिनेट्॥

सेतुकः। पुं० वरुणद्रुमे।

सेतुबन्धः। पुं० लङ्कागमनार्थं श्रीरामकृतसमुद्रबन्धनसेतौ। समुद्रोपरि बन्धे। सेतुबन्धेशु श्रीमहाकालिदासः। अथारिवारीशतमौ अत रक्षाकुप्रबाधिधजमायवासरान्। यमाय माल्यस्फुजितौ निरालुलानुयान्त्य विशाङ्गवसेतुबन्धने॥ पादेशुभात्पञ्चतुपञ्चचांशिस मोदरेपञ्चपरांशकेषु। पादेस दापञ्चमिताः परस्मिंस्ताराबराः

सेतुबन्धमूर्द्धसंस्था: ॥ लग्नशुद्धिमाह । लेयेतिमीनाबुलिमेनियेऽप्लिपि हिपुंसिलग्ने समदन्स्वरायने । चतुष्टयेविक्रमकेलिलाभगेरसाधुभिः सेतुनिबन्धनंश्रियै ॥ इति १८ अध्याय: ॥

सेतुभेदी । पुं॰ दन्तीवृक्षे ॥

सेतुवृक्ष : । पुं॰ वरुणद्रुमे ॥

सेत्रम् । न॰ बन्धनद्रव्ये । निगडे । षिडोङ् ॰ भा॰ प्र॰ ॥ सीयतेऽनेन । षिञ् बन्धने । दाम्नीशसेतिष्ट्रन् ॥

सेदिवान् । त्रि॰ निषण्णे । षद्लृ॰ । भाषायांसदवसश्रुवइति॰ लिट: क्वस्वादेश : लिटिधातोरितिद्वित्वे ॰ अतएकहलमध्यइति॰ एत्वाभ्याससलोपौ । इट् ॥ क्रियामुणित शेषेडिति॰ वसोरितिसम्प्रसारणे वलादित्वाऽभावान्नेट् । सेदुषी ॥

सेदु : । पुं॰ नाटाम्रे । राजर्षिमिशे । तरम्बुजे ॥

सेना । स्त्री॰ ध्वजिन्याम् । वाहिन्याम् । पृतनायाम् । सैन्ये । इन्द्रपत्न्याम् ॥ सिनोति । षिञ्॰ । कृवृजृसिद्रुपन्यनिस्वपिभ्योनिदिति नन् । टाप् ॥ सहइनेनस्वामिनावा ॥

सेनाग्रग: । पुं॰ सेनापतौ ॥ सेनाया अग्रे गच्छतिगमड्॰ । ड: ॥

सेनाग्रणी : । पुं॰ सेनाग्रेसरे ॥

सेनाङ्गम् । न॰ हस्त्यादिचतुष्टे ॥ तद्यथा । हस्त्यश्वरथपादातं सेनाङ्गस्याच्चतुष्टयमिति ॥ अत्र॰ नाविकाटविकादीनांपदातावन्तर्भाव: । नौकानांरथेष्वन्तर्भाव: । महिषादीनां गजाश्वेष्वन्तर्भाव: । सेनाया अङ्गम् ॥

सेनानायक : । पुं॰ बलाध्यक्षे । सेनापतिरुद्रभक्तषु कश्चिन्नपंथी ॥

सेनानिवेश : । पुं॰ शिविरे ॥

सेनानी : । पुं॰ अग्निभुवि । गुहे । कार्त्तिकेये । सेनापतौ ॥ पृतनाधिपे ॥ सेनांनयति । णीञ्॰ । सत्सूद्विषेतिक्विप् ॥

सेनानुचारी । पुं॰ सेनाग्रगे ॥ सेनामनुचरतीत्यर्थ:करोति । णिनि : ॥

सेनापति : । पुं॰ सैन्यपे । वाहिनीपतौ ॥ चतिरङ्गबलस्यैक : पति : सेनापतिरुच्यते । तल्लक्षणं यथा । कुलीन : शीलसम्पन्नोधनुर्वेदविशारद : । हस्तिशिक्षाश्वशिक्षासु कुशल : श्लक्ष्णभाषण : ॥ निमित्तशकुनज्ञानेवेत्ताचैवचिकित्सिते । कृतज्ञ : कर्मणांशूरस्तथाक्लेशसहोऽजुरू : । व्यूहतत्त्वविधानज्ञ : फल्गुसारविशेषवित् । राज्ञा सेनापति: कार्योब्राह्मण : क्षत्रियोऽथवेति मात्स्येराजधर्मे : । कार्त्तिकेये ।

महासेने । षडानने । गुहे । स्कन्दे । सेनाया : वाहिन्या : पति : ॥

सेनामुखम् । न० तिस्रपुपत्तिषु ॥ यथा । एकेभैकरथात्र्यश्वापत्ति : पञ्चपदातिका । पत्त्यङ्गैस्त्रिगुणै : सर्वै : क्रमादाख्यायथोत्तरम् ॥ सेनामुखं गुल्मगणौ वाहिनी पृतना चमू : । अनीकिनी दशानीकिन्यक्षौहिणीति । तेन सेनामुखे० इभा : त्रि ३ , रथा : ३ । अश्वा : ९ । पदातय : पञ्चदश । समस्तसङ्ख्यया ३० भवन्ति । एतत्परिमाणपरिमितासेनासेनामुखमुच्यते सेनाया : मुखमुपक्रम : ॥

सेनारक्ष : । पुं० सैनिके । प्रहरिशाटी । प्रहरिया० इ० भा० प्र० ॥ सेनां रक्षति रक्षापालने । कर्म्मण्यण् ॥

सेनिका । स्त्री० वर्णवृत्तविशेषे ॥ हारगण्डखकुण्डलेनमण्डितायापयोधरेणवीणयाङ्किता । रूपनूपुरेण चापि दुर्लभा सैनिका भुजङ्गराजवल्लभा ॥ यथा । सायुधाष्टबाहुराजिमण्डिता रक्तबीजरक्तपानपण्डिता । चण्डमुण्डशुम्भदम्भखण्डका मङ्गलानि मे ददातु चण्डिका ॥

सेपुरम् । न० वाह्लीकग्रामविशेषे ।

सेर : । पुं० तुरुष्कपरिकल्पितयालिकप्रसिद्धसंज्ञया विख्याते धान्यमानविशेषे ॥ यथा । पादोनगद्याणकतुल्यटङ्कैर्द्विसप्ततुल्यै : कथितोऽत्र सेर इति लीलावती ॥

सेराह : । पुं० पीयूषवर्णाश्वे ॥ स तु दुग्धवच्छुक्लवर्णः । इ० हेमचन्द्र : ॥

सेव : । पुं० सेवने । सेवते । सेव० पचाद्यच् ॥ न० सेविवदरे ॥ यथा । सुष्टप्रमाणं वदरं सेवमाहुर्भिषग्वरा : । सेवं समीरपित्तघ्नं बृंहणं कफकृद्गुरु । रसे पाके च मधुरं शिशिरं रुचिशुक्रकृत् ॥

सेवक : । पुं० प्रसेवे ॥ त्रि० अनुजीविनि परिकर्म्मणि । परिकरे । भृत्ये । सेवाकर्त्तरि ॥ स्निग्ध : स्थिरश्च बलवान् सेवायां सेवको मत : ॥ अस्य प्रभुसन्निधौ प्रश्नकरणासमर्थत्वं यथा ॥ किङ्कर : किङ्करो वापि सर्वथा प्रष्टुमीश्वरम् । योऽयं सेवानिरत : स कं पृच्छति तं विना ॥ सेवते । सेवसेवने ण्वुल् ॥

सेवकालु : । पुं० दुग्धपुच्छाम् । निशाभङ्गायाम् । दुग्धपेया० इ० गौ० भा० प्र० वृत्ते ॥

सेवती । स्त्री० कुमार्याम् । भङ्गेष्टायां । तरुण्याम् ॥

सेवनम् । न० उपास्ती । चित्तानुवृत्ती । सेवनायाम् ॥ सूच्यादि

नावश्यादिसीवने । स्यूतौ । षिवु तन्तुसन्ताने ल्युट् । सेवसेवनेवा ॥

सेवना । स्त्री० परिचर्य्यायाम् । सेवायाम् ॥

सेवनी । स्त्री० सूच्याम ॥ शरीरावयवसंयोगविशेषे ॥ यथा । सेवन्यः सप्त तासान्तु भवेयुः पञ्च मस्तके । एका शेफसि जिह्वायामेका विच्छिन्नताः क्वचिदिति भावप्रकाशः ॥

सेवन्ती । स्त्री० शतपत्र्याम् ॥

सेवा । स्त्री० । सेवने । भक्तौ ॥ सेव्यचित्तानुवृत्तौ । सर्वभावेन सेव्यानुकूलकारितायाम् । श्ववृत्तौ । वेतनग्रहणेनाज्ञाकरणं सेवेति व्याख्यातारः । सेवा तु दीनदृष्टिसन्दर्शनस्वामितर्ज्जनतीव्रक्रियादिधर्म्मयोगात् श्ववृत्तेरभिन्नेति । ब्राह्मणेन सा न कार्य्या । सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्ज्जयेदिति मनुवचनात् ॥ सेवनम् । सेवृ । गुरोश्च हलः । टाप् ॥ सेवनमाराधनमुपभोग आश्रयणञ्चेति । यथा दिष्ट्या सेवते । सुखसेवते । तीर्थं सेवते साधुरिति ॥ परस्मैपदप्रयोगस्तु । नीचं समुन्नमपि सेवति नीचएव । स्वाधीने विभवेऽप्यहो नरपतिं सेवन्ति किं मानिनः । इत्याद्युदाहरन्ति ॥

सेवि: । न० सेवे । सेविते । सुष्टिप्रमाणबदरे ॥

सेविका । स्त्री० दुग्धपक्वाल्पपिष्टके । सिमञो० सेवौं० इ० भाषा० प्र० ॥ यथा । समिताबर्त्तिताः क्षुद्राः सूक्ष्मा यवसन्निभाः । शुष्काः क्षीरेण संसाध्याः भोज्याः घृतसितान्विताः ॥ सेविका तर्पणी बल्या गुर्वी पित्तानिलापहा । ग्राहिणी सन्धिकृद्रुच्या तांश्च देयातिमात्रया ॥

सेविकामोदकः । पुं० लड्डुकविशेषे । सेवकालड्डू० इ० भा० प्र० ॥ तत्प्रक्रिया यथा । घृताढ्यासिता कृत्वा सूक्ष्माणि तानि तु । निपुणो भर्जयेदाज्ये खण्डपाकेन योजयेत् । युक्तेन मोदकान् कुर्य्यात्ते गुणे सेविकायथा ॥

सेवितम् । न० सेवबदरे । सेवफले ॥ त्रि० समुपासिते गुर्व्वादौ । परिचरिते ॥ अनुष्ठिते ॥ उपभुक्ते ॥ आश्रिते ॥

सेव्यः । पुं० अश्वत्थवृक्षे ॥ हिज्जलद्रुमे ॥ न० उशीरे । वीरणमूले । त्रि० सेवार्हे । सेवितुमर्हः । षिवुसेवने । ण्यत् ॥

सेव्या । स्त्री० वन्दाके ॥

सैंह: । त्रि० सिंहसम्बन्धिनि ॥ सिंहस्यायम् । अण् ॥

सैंहली । स्त्री० सिंहलिपिप्पल्याम् ।

सर्पदण्डायाम् । कुरुव्याम् ॥ त्रि० सिंहलद्वीपजे ॥

सैंहिक: । पुं० राहौ ॥ इ० श० र० वली ॥

सैंहिकेय: । पुं० विधुंतुदे । राहौ । स्वर्भानौ ॥ सिंहिकाया अपत्यम् । ढक् ॥

सैकतम् । न० वालुकामयतटे । सिकतामये । त्रि० सिकतामये । सिकतावति । सिकतिले । सिकता: सन्त्यस्मिन् । सिकताशर्कराभ्यां चेति मत्वर्थेऽण् ॥ सिकतैववा । शर्करायाण् ॥

सैकतिक: । पुं० सन्न्यस्ते ॥ क्षपणके । न० मातृयात्रायाम् ॥ मङ्गलसूत्रे ॥ त्रि० भ्रान्तिजीविनि । सन्देहजीविनि ॥

सैकतेष्टम् । न० आर्द्रके ॥ त्रि० सैकतिलप्रिये ॥

सैतवाहिनी । स्त्री० नदीविशेषे । बाहुदायाम् ॥ सितानि वाहनानि यस्य अर्जुनस्य तस्येयम् । तस्येदमित्यणि टिड्ढेति ङीप् ॥ यद्वा सितस्य अर्जुनस्य इयं सैती । सैती चासौ वाहिनी नदी च ॥

सैद्धान्तिक: । त्रि० सिद्धान्तज्ञे ॥

सैनापत्यम् । न० सेनापते: कर्मणि ॥ पत्यन्तपुरोहितादिभ्यो यक् ॥ यद्वा । दित्यदित्यादित्य पत्युत्तरपदाण्ण्य: ॥ सेनापतिस्स्वाम्यस्मिन् ॥ सेनापते: कर्म० सेनापतेरिदं वा ॥

सैनिक: । पुं० सेनारक्षे । प्रहरकादौ ॥ सेनां रक्षति । रक्षतीति ठक् ॥ सैन्ये । सेनायां समवेते ॥ सेनां समवैति । सेनाया वेतियश्चोऽभावे० ठक् ॥

सैन्धव: । पुं० जयद्रथनृपे । सिन्धुदेशजाश्वे ॥ सिन्धुरभिजनोऽस्य । सिन्ध्वादित्वादण् ॥ पुं० न० लवणोत्तमे । माणिमन्थे । सिन्धुजे ॥ अस्य गुणा यथा । सैन्धवं लवणं स्वादु दीपनं पाचनं लघु । स्निग्धं रुच्यं हिमं वृष्यं सूक्ष्मं नेत्र्यं त्रिदोषहृत् ॥ सैन्धवं द्विविधं ज्ञेयं सितरक्तमिति क्रमात् । रसवीर्यविपाकेषु गुणाढ्यं कथितं सितम् ॥ अपि च । पूर्वाह्णकालेष्वान्नप्रायशीलं वर्जितम् । शूलानाहविबन्धघ्नं लवणं सैन्धवं वरम् ॥ त्रि० सिन्धुदेशभवे । सिन्धुजे ॥ सिन्धुजातो मनीषा ॥ कच्छादिभ्यश्चेत्यण् । अणञौ चेतरा ॥ पुं० सिंधुदेशे ॥ स्वार्थेऽण् । लङ्काप्रदेशमारभ्य मक्कां परमेश्वरि । सैन्धवाख्यो महादेश: पर्वतेतिष्ठतिप्रिये ॥

सैन्धी । स्त्री० तालादिमद्ये । हालायाम् ॥ सैन्धी शीता कषायाम्लापि

तद्दारविनाशिनी । यातद्दाराणि
घंष्टेनरासंहितवर्जिता ॥
सैन्यम् । न० बले । सेनायाम् । से-
नैव । चतुर्वर्णादित्वात् ष्यञ् । त्रि०
सेनासमवेते । सैनिके । सेनांसम
वैति । सेनायांवेति ण्य : । सेना-
यांसमवेतायेसैन्यास्ते सैनिकाश्चवे
इत्यमरः । निजितस्यस्वरथूपा
दातंसेना० तत्रयेसमवेताएकदेशो
भूतास्तेसैन्याः सैनिकाश्च ॥
सैन्यनिपातिका । स्त्री० चक्रपद्याया
म् । मोरचाइतियस्यायवनभाषा ।
सैन्यपृष्ठम् । न० प्रतिग्रहे । यत्रस्थि
तोराजास्वसैन्यंप्रतिगृह्णाति ॥
सैरन्ध्री । स्त्री० सैरिन्ध्र्याम् । सीरंधर
ति । धृञ् ० । मूलविभुजादित्वा
त्कः । बाहुलकाद्लुक् । सीरन्ध्र
स्येयम् । तस्येदमित्यण् । शिल्प
कारणात्कर्षकस्येयम् ॥ यद्वा ।
सैरं स्वाच्छन्द्यं धरति । प्राग्वत्
कः । पृषोदरादिः । गौरादिः ।
चतुःषष्टिकलाभिज्ञाशीलरूपादि
सेवनी । प्रसाधनोपचारज्ञासैर
न्ध्रीपरिकीर्तिताइतिकाश्यः ॥ द्रौ
पद्याम् ॥
सैरिकः । पुं० हालिके० वृषे । लाङ्ग
लिके । त्रि० सीरसम्बन्धिनि । सी
रेणचरति । तेनदीव्यतिखनतीति
ठक् सीरस्येदंवा । हलसीराट्ठक् ॥
सैरिन्ध्रः । पुं० वागुरावृत्तौ० सङ्कीर्ण
जात्यन्तरे ॥ यथाहमनुः । प्रसाध
नोपचारज्ञमदासंदासजीवनम् ।
सैरिन्ध्रं वागुरावृत्तिं सूतेदस्युरयो-
गवे० इति ॥
सैरिन्ध्री । स्त्री० सैरन्ध्र्याम् । परवे
श्मस्थशिल्पकृत्स्ववशस्त्रियाम् ॥ सै
रन्ध्रीपरवेश्मस्थास्ववशाशिल्पकारि
केत्यमरः । चतुःषष्टिकलाभिज्ञा
शीलरूपादिसेविनी । प्रसाधनोप
चारज्ञासैरन्ध्रीपरिकीर्तितेतिका
श्यः ॥ वर्णसङ्करसम्भूतस्त्रियाम् ॥
महिषीकायाम् ॥ द्रौपद्याम् । नि
त्ययौवनायाम् । याज्ञसेन्याम् ॥
सीरंधरति । धृञ् ० । मूलविभुजा
दित्वात्कः । बाहुलकाद्लुक् ।
सीरन्ध्रस्येयम् । तस्येदमित्यण् ।
शिल्पकरणात्कर्षकस्येव । पृषो
दरादिः ॥ यद्वा । सैरं स्वाच्छन्द्यं
धरति । प्राग्वत्कः । पृषोदरा
दिः । गौरादिश्च ॥
सैरिभः । पुं० लुलाये । महिषे ।
कासरे । सीरोऽस्त्येषाम् । मत
इनिः । सीरिणांकर्षकाणामिभ
इव । मत्स्यादिः । प्रज्ञाद्यण् ॥
यद्वा । सारस्यसूर्यस्यइभइव० पुत्र
वाहनत्वात् । पूर्ववत् । यमभव
ने । स्वर्गे ॥
सैरीयः । पुं० झिण्ट्याम् । सीरेभ

ब : । तत्रभवइत्यण् । कर्ष : । सैरिभक : । कृताच्छ : ॥ सैरीय : कफवातहृत् ॥

सैरीयक : । पुं॰ झिण्टाम् ॥ संज्ञायांकन् ॥

सैरेय : । पुं॰ झिण्टाम् ॥ सैरिभव : । नद्यादिभ्योढक् ॥

सैरेयक : । पुं॰ झिण्टाम् ॥ सैरेयशब्दोत्संज्ञायांकन् ॥ अस्यगुणायथा । सैरेय : कुष्ठवातास्रकफकण्डुविषापह : । तिक्तोष्णोमधुरोदन्त्य : सुस्निग्ध : केशरञ्जन : ॥ इति ॥

सैवालम् । न॰ शैवाले ॥

सोढ : । त्रि॰ क्षान्ते । सहिष्णौ ॥ सह्यतेस्म । षहमर्षणे । क्त : । सहिवहोरोदवर्णस्य ॥

सोढा । त्रि॰ तितिक्षासंयुक्ते । सहितरि ॥ शक्ते ॥ सहते । षहमर्षणे । तृन्तृचौवितिवत् ॥

सोत्कण्ठ : । त्रि॰ उत्कण्ठायुक्ते । उत्के । उन्मनसि ॥

सोत्प्रास : । पुं॰ सशब्दहासे । आच्छुरितके ॥ स्यादाच्छुरितकं हास : सोत्प्रासइत्यमर : । उत्प्रासनम् । असुक्षेपणे । असुगतिदीप्त्यादानेषु वा । घञ् । उत्सहित : सोत्प्रास : । उत्प्रासेनाधिक्येनक्षेपणेनवासहित : सोत्प्रास : ॥ न॰ सोल्लुण्ठे । प्रियवाक्ये ॥

सोदक : । पुं॰ पिण्डप्रदातारंपुरुषमारभ्यदशमपुरुषान्तेषु ॥ यथा । पिण्डदात्सप्तपुरुषा : सपिण्डा : कथिता : प्रिये । सोदकादशमान्ता : स्यु स्तत : श्चैवलगोत्रजाइति ॥

सोदय : । त्रि॰ उदयेनसहवर्त्तमाने वृद्धियुक्ते । लाभसमेत॰ इ॰ भाषा ॥

सोदर : । पुं॰ सहोदरे ॥ सहउदरेणवर्त्तते । वोपसर्जनस्येतिस : । सहसमानमुदरंयस्येतिवा ॥ लग्नात्तृतीयस्थाने ॥

सोदरा । स्त्री॰ सहोदरायांभगिन्याम् । टाप् ॥

सोदर्य्य : । पुं॰ समानोदर्ये । सगर्भ्ये । सहजे ॥ समानेउदरेशयित : स्थित : । सोदराद्य : । विभाषोदरे॰ इतिसमानस्यस : ॥

सोनह : । पुं॰ लशुने ॥ इ॰ श॰ र॰ लौ ॥

सोन्माद : । त्रि॰ उन्मादिनि । सोन्मादे । सहोन्मादेनवर्त्तते । वोपसर्जनस्य ॥

सोपकरण : । त्रि॰ उपकरणेनसहवर्त्तमाने । उपकरणविशिष्टे ॥

सोपकार : । त्रि॰ उपकारविशिष्टे ॥

सोपधम् । त्रि॰ सच्छद्मदानादौ ॥

सोपपदा । स्त्री॰ अनध्यायविशेषे ॥ यथा । सिताज्यैष्ठेद्वितीयाचआश्विनेदशमीतथा । चतुर्थीद्वादशी

माधिरता:सोपपद्वा : स्मृता : ॥ इति ॥

सोपप्लव : । पुं॰ राहुग्रस्ते॰ इन्दौ ॥ राहुग्रस्तपूषणि । राहुग्रस्तेस्त्रि न्दौच॰ पूष्णिच । सोपप्लवोपर क्तावाविच्यमर : । राहुकर्तृकग्रह णकर्मीभूतचन्द्रपूषणोच । उपर क्त ॥ सहउपप्लवेनराहुणा॰ इति सोप्लव : । तेनसहेतितिसमास : । वोपसर्जनस्येतिसहस्यस : ॥ त्रि॰ आपद्गते ॥

सोपमर्द : । त्रि॰ तिरस्कारसहिते ॥

सोपवास : । त्रि॰ उपवासविशिष्टे ॥

सोपाक : । पुं॰ चण्डालेनपुक्कस्यांज निते ऽन्त्यजविशेषे । भक्षोतिप्रसि द्धे ॥ मारवोचिताप्रधे॰ राजा देशेनमारणम्॰ तेनाप्युहत्ति : । यथा॰। चण्डालेनतुसोपाकोमूल व्यसनवृत्तिमान् । पुक्कस्यांजायते पाप : सद्वासज्जनगर्हित : ॥ इ ति मनु : ॥

सोपाधि : । त्रि॰ उपाधियुक्ते ॥ प्रतिग्रहभेक्षादिनादानादौ ॥

सोपानम् । न॰ पाषाणादिरचिते॰ सौधाद्यारोहणे । आरोहणे । पैठो॰ इ॰ भा॰ प्र॰ । सहवित्र मानउपरिगमनेनगमनमनेन । आ रोहणस्यसोपानं पैठोइतिसमाह्वये । सोपानेकाष्ठघटितेसि : श्रेणि

स्वर्धिरोहिणोतिचरत्नावली ॥

सोमाञ्जन : । पुं॰ शोभाञ्जने ॥

सोम : । पुं॰ शिवे ॥ उमयासहि त : । हिमदीधितौ । चन्द्रे ॥ सोमेऽमावास्यायामस्तोदयमारभ्य स्नानकालपर्यन्तंभोगोभूतस्नानार्हा नात्सोमसहस्रदानफलंप्रभवतीत्या हव्यास : । मिनोवालोकहर्षापि यद्विसोमदिनेभवेत् । गोसहस्रफ लंदद्यात्स्नानंयन्मौनिनाकृतमि- ति । अमृतंसौति॰ सोम : । षुप्रसवैश्वर्ययो : । अर्तिस्तुसुहु सृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्निसिमन् ॥ वानरे ॥ कुबेरे ॥ पितृदेवे । यमे ॥ समीरणे ॥ व सुप्रभेदे । नीलवर्मी ॥ कर्पूरे ॥ सोमलतौषधौ ॥ सोमलतारसे ॥ सोमनतासाधनकेयागे ॥ दिव्यौ षध्याम् ॥ अमृते ॥ पर्वतविशे षे ॥ न॰ नीरे । जले ॥ काञ्जि के ॥ स्वर्गे ॥

सोमगर्भ : । पुं॰ विष्णौ ॥ सोमो गर्भोऽस्य ॥

सोमज : । पुं॰ बुधे ॥ न॰ दुग्धे ॥ त्रि॰ चन्द्रजे । सोमाज्जात : । जनी॰ । ड : ॥

सोमतीर्थम् । न॰ प्रभासतीर्थे ॥

सोमधारा । स्त्री॰ देवपथे । नभ : सरिति ।

सोमः । पुं॰ चन्द्रे । इन्दौ । अमृतं सौतीति । षु प्रसवने । नामन्सीमन्सोमन्नित्यादयश्चोणादौ निपातितः सोमान्तः ॥

सोमपः । पुं॰ सोमपीतिनि यागे पीतसोमलतारसे । सोमं पिबति । पापाने । पातोऽनुपेति कः ।

सोमपत्र : । पुं॰ उलपे । सोमतृणे ॥

सोमपाः । पुं॰ सोमपे । यज्ञे सोमलतारसपानकर्त्तरि । सोमं पिबति पा॰ क्विप् । भृगोः पुत्रेषु॰ ब्राह्मणानां पितृषु ।

सोमपीती । पुं॰ यागे पीतसोमरसे । सोमपे ॥ सोमश्च पीतम् । सोमपीतमस्यास्ति । इनिः ॥

सोमपीथः । पुं॰ सोमपाने ॥

सोमबन्धुः । पुं॰ कुमुदे ॥ सोमो बन्धुरस्य ॥ सूर्य्यबुधयोः । यथा । मित्राणि सूर्य्यस्य शशिभौमजीवाः॰ सूर्य्येन्दुजौ॰ सूर्य्यभवास्तु जीवाः । आदित्यशुक्रौ॰ रविचन्द्रभौमाः॰ बुधार्कजौ चन्द्रजभार्गवौ चेति॰ ज्योतिस्तत्त्वम् ॥

सोमभूः । पुं॰ बुधग्रहे ॥ जिनराजभेदे ॥ त्रि॰ सोमवंशोद्भवे ॥ सोमाद्भवति । भू॰ क्विप् ॥

सोमयागः । पुं॰ सोमलतारसपानाद्युक्ते वार्षिकयज्ञविशेषे ॥

सोमयाजी । पुं॰ सोमयागकर्त्तरि ॥

सोमयोनि । न॰ चन्दनविशेषे ॥ यथा । सुशीतलं चन्दनं यत्तैलपर्णिक मुच्यते । उभौ तु वक्ष्यपर्यायौ सोमयोनि॰ शिलोद्भवमिति शब्दचन्द्रिका ॥

सोमराजः । पुं॰ चन्द्रे । द्विजराजे । सोमश्चासौ राजा च । टच् ॥

सोमराजिका । स्त्री॰ सोमराजिनि । बाकुच्याम् ॥

सोमराजी । पुं॰ ओषधिविशेषे । तत्पर्य्याया यथा । अवल्गुजः सोमराजी सुवल्ली सोमवल्लिका । कालमेषी कृष्णफला बाकुची पूतिफल्यपीति ॥ सोमराज॰ इ॰ इ कुच॰ इ॰ च॰ गौ॰ दे॰ भा॰ ॥ सोमइव । सोमेनवा॰ राजति । राज॰ । उपमानइति वा सुप्यजातौ णिनिस्ताच्छील्ये इति वा णिनिः ॥

सोमराजी । स्त्री॰ सोमलतायाम् ॥ बाकुच्याम् । सोमराजिनि । मात्रावृत्तछन्दोभेदे ॥ यत्कारद्वयेन प्रस्तारिताः । भवेत्सोमराजीति याथङ्खनारीद्वयासोमराजीस्व पिङ्गलच्छन्दसाम् । यथा । हरेसोमराजीसमाते यशोभीः । जगन्मण्डपस्थानस्थावरम् । कौण् ।

सोमलता । स्त्री॰ स्वनामप्रसिद्धायां लतायाम् । तस्याः पर्य्यायाश्च यथा । सोमवल्ली सोमलता सोमाख्या द्विजप्रिया । सोमवल्ली वि-

दोषघ्नी कटुस्तिक्तारसायनीति ॥ अपि च। सोमवल्ली महागुल्मा यज्ञश्रेष्ठा धनुर्लता। सोमार्हा गुल्मवल्ली च यज्ञवल्ली द्विजप्रिया। सोमक्षीरा च सोमा च यज्ञाङ्गा रुद्रसंख्यया। सोमवल्ली कटुः शीता मधुरा पित्तदाहहृत्। तृष्णाविशोषशमनी पावनी यज्ञसाधनीति रा° नि° घण्टः ॥ ब्राह्मीषधी ॥

सोमवल्लिका। स्त्री° गुडूच्यां॥ सोमवल्लयाम्॥

सोमवंशः। पुं° युधिष्ठिरे अजातशत्रौ चन्द्रवंशे॥ सोमस्य वंशः॥

सोमवल्कः। पुं° कट्फले। खदिरे। रोठाकरञ्जे॥ करञ्जे॥ सोमवद्वल्को वल्कलमस्य॥

सोमवल्कलः। पुं° कदरे। श्वेतखदिरे॥ सोमवद्वल्कलमस्य॥

सोमवल्लरी। स्त्री° ब्राह्म्यामोषधौ॥ सोमस्य वल्लरी॥ सोमलतायाम्॥

सोमवल्लिका। स्त्री° सोमराजिनि॥ सोमस्य वल्ली। स्वार्थे कन्॥

सोमवल्ली। स्त्री° वत्सादन्याम्। छिन्नरुहायाम्। गुडूच्याम्॥ सोमस्य वल्ली॥ वाकुच्याम्। सोमलतायाम्॥ सोमवल्ली त्रिदोषघ्नी कटुस्तिक्तारसायनी॥ पातालगरुड्याम्। ब्राह्म्याम्॥ सुदर्शनायाम्॥

सोमवारः। पुं° सोमस्याभोग्यदिने॥

सोमविक्रयी। पुं° सोमलतारसविक्रयकर्त्तरि॥

सोमवृक्षः। पुं° कट्फलवृक्षे॥ श्वेतखदिरे॥

सोमशकला। स्त्री° शशाङ्कल्याम्॥ चन्द्रखण्डविशिष्टायाम्॥

सोमसञ्ज्ञम्। न° कर्पूरे॥

सोमसदः। भूम्नि° पितृगणान्तरे॥ विराट्सुताः सोमसदः साध्यानां पितरः स्मृताः॥

सोमसवनः। पुं° प्लक्षीकसाल्यद्रुमे॥ सोमोऽमृतं सवतीति। युच्॥

सोमसारः। पुं° खदिरे॥

सोमसिद्धान्तः। पुं° बौद्धविशेषे॥

सोमसिद्धान्ती। पुं° सोमसिद्धान्तवेत्तरि। कापालिके॥ तत्स्वरूपादिकं यथा। नरास्थिमालाकृतचारुभूषणः श्मशानवासी नृकपालभोजनः। पश्यामि योगाञ्जनशुद्धदर्शनो जगन्मिथो भिन्नमभिन्नमीश्वरात्॥ अपि च। मस्तिष्कान्त्रवसाऽभिघारितमहामांसाहुतीर्जुह्वतां वह्नौ ब्रह्मकपालकल्पितसुरापानेन नः पारणा। सद्यः कृत्तकठोरकण्ठविगलत्कीलालधारोज्ज्वलैरर्च्यो नः पुरुषोपहारबलिभिर्देवो महाभैरव इति॥

सोमसिन्धुः । पुं० राहुमूर्द्धभिदि । विष्णौ ॥

सोमसुता । स्त्री० नर्म्मदायाम् ॥

सोमसूत्रम् । न० देवालयाज्जलनिर्गमस्थाने ॥ यथा । शिवप्रदक्षिणे मर्त्त्यैश्चन्द्रक्रमेणतु । सव्यासव्यक्रमेणैव सोमसूत्रं न लङ्घयेत् ॥

सोमाख्यम् । न० रक्तोत्पले ॥

सोमालः । त्रि० कोमले ॥

सोमाश्रमः । पुं० तीर्थविशेषे ॥

सोमेश्वरः । पुं० काश्यां सोमकर्त्तृकप्रतिष्ठिते शिवे ॥

सोमोद्भवा । स्त्री० रेवायाम् । नर्म्मदायाम् । सोमात् सोमवंशजात् पुरूरवस उद्भवति सोमावतारित्वात् ॥ यद्वा । सोमोऽमृतमुद्भवत्यस्याः स्वर्गप्रदत्वात् । अप् ॥ सोमाद्रुद्रादुद्भवति वा । पचाद्यच् । सोमोद्रिविशेष उद्भवोयस्या वा ॥

सोम्यः । पुं० उपद्वीपभेदे ॥ त्रि० प्रियदर्शने ॥ सोमदेव । शाखादिभ्यो यः ॥

सौरट्टा । स्त्री० मात्रावृत्तान्तरे । तत्तु सौरट्टा द्वतममसुरगपतिरितिवदिति । यद्दोहाविपरीतमिदमन्नद्दिसुदमुपनयति ॥ यथा । अभिनवजलनिधिनीलममलकमलदलशोभनम् । सखिपश्यामिष्टापिमञ्च मथनं भववोधनम् ॥

सोल्लुण्ठः । पुं० सोल्लुण्ठने ॥

सोल्लुण्ठनम् । न० सोपपूर्वदुष्टो । स्तुतिपूर्वकेदुर्वादे । सम्मुखस्यादिवोखवाक्ये ॥ लुण्ठति । लुठ आलस्ये प्रतिघाते च । ल्युट् । लुण्ठनेन सहितम् ॥

सोल्लुण्ठोक्तिः । स्त्री० सव्यङ्गोक्तौ ॥

सौकर्य्यम् । न० अनायासे ॥ सुकरस्य क्रियायाम् ॥

सौकुमार्य्यम् । न० मार्द्दवे ॥

सौक्ष्म्यम् । न० सूक्ष्मतायाम् ॥ सूक्ष्मस्यभावः । ष्यञ् । अवयवभावे । गुणविशेषे । अतः सत्त्वल्परूपत्वं भावानां सौक्ष्म्यमुच्यते ॥

सौखरात्रिकः । त्रि० सुखरात्रिप्रश्नकर्त्तरि ॥ सुखरात्रिं पृच्छति । पृच्छतौ सुस्नातादिभ्य इति ठक् ॥

सौखशायनिकः । त्रि० सुखशयनप्रश्नकर्त्तरि ॥ सुखशयनं पृच्छति । पृच्छतौ सुस्नातादिभ्य इति ठक् । अनुशतिकादिः ॥

सौखसुप्तिकः । त्रि० वैतालिके । वैतालिका बोधकरा अर्थिकाः सौखसुप्तिकाः । इ० हे० चन्द्रः ॥

सौखिकः । त्रि० सुखार्थिनि । सौखीन इति भाषाप्रसिद्धे । इ० म० भा० राजधर्म्मः ॥

सौख्यम् । न० सुखे । सुखमेव । स्वार्थे ष्यञ् । अकिञ्चिदपिकुर्वाणः

सौध्येद्ं : स्वान्यपौ इति ॥

सौगन्धिकम् । न॰ तीर्थविशेषे ।

सौगत : । पुं॰ बौद्धविशेषे । शून्य वादिनि । माध्यमिके ॥ सुगतीसु बुद्धोमर्त्तिमर्त्यनोधीस्य । भक्तिरि त्यण् ॥

सौगन्ध्यम् । न॰ कत्तृणे । सौगन्धि के ॥

सौगन्धिक : । पुं॰ गन्धपाषाणे । ग न्धके । सुगन्धव्यवहारिणि । गन्ध वणिजि । गन्धौतिभाषाप्रसिद्धे । नपुंसकविशेषे । नासायोनौ । य: पूतियोनौजायेतस्विसौगन्धिको भवेत् ॥ न॰ कल्हारे । श्वेतोत्पले ! सौवीर॰ भा॰ प्र॰ ॥ पद्मरागम णौ ॥ कत्तृणे ॥ नीलोत्पले । इति राजनिर्घण्ट : ॥ सुगन्ध्येव । स्वा र्थे॰ विनयादिभ्यष्ठक् ॥ शोभनो गन्धोस्य॰ शोभनोगन्धोयस्य । सुग न्ध: प्रयोजनमस्य । प्रयोजनमिति ठञ्वा ॥

सौगन्धिका । स्त्री॰ पद्मभेदे ॥ इ॰ म॰ भा॰ वनपर्व ॥

सौचक्यम् । न॰ सूचकस्यकर्मभाव यो : पुरोहितादित्वाद्यक् ॥

सौचि : । पुं॰ सौचिकी ॥

सौचिक : । पुं॰ सूचिजीविनितुन्न वाये ॥ वर्णसङ्करप्रभेदोयम् । क वर्ण्यसूचकन्यायांशौण्डिकादेवसौ चिकइतिपराशरपद्धतिवचनात् ॥ सूचीशिल्पमस्य । शिल्पमिति- ठक् ॥

सौचिक्यम् । न॰ सौचिकस्यकर्मभा वयो : ॥ पत्यन्तपुरोहितादिभ्यो यक् ॥

सौजन्यम् । न॰ सौहार्दे । सुजनतो याम् ॥ यथा । सौजन्यं॰ वरवंश जन्म॰ विभवो॰ दीर्घायु॰ रारो ग्यताविज्ञत्त्वंविनयित्व॰ मिन्द्रिय वश्य : ॰ सत्पात्रेभिरुचि : । स म्मन्नो॰ रसुत : ॰ प्रियाप्रियतमा ॰ भक्तिश्चनारायणे॰ सत्पुण्येन विनाभयोदशगुणा : संसारिणाम् दुर्लभा : ॥

सौज्ञम् । न॰ सारथ्ये ॥ सूतस्यक र्मभावोवा । ष्यञ् ॥

सौत : । पुं॰ ब्राह्मणे ॥ नियतप्रयो गाभावेधातुविशेषे ॥ त्रि॰ सूतस म्बन्धिनि ॥

सौत्रामणी । स्त्री॰ सुरायहप्रधाने [illegible] दिकेयागविशेषे । सौत्रामण्यांसुरा ग्राहान्गृह्णीयादितिश्रुतिविधि ति ॥ सौत्रामण्यांकुलाचारैर्ब्राह्मणः प्रपिबेत्सुराम् । [illegible] : पौत्रापतितस्तुर्[illegible]भवेत् ॥

सौदामनी । स्त्री॰ तडिति । विद्युति सुदाम ऐरावतगज : । सुदाम्ना॰ए कादिक् । तेनैकादिगित्यण् । प

क्षितिप्रकृतिभावाद्विलोपाभावोपीन भवत:। यद्वा। सुदामापर्वत: सुदाम्न:पर्वतादागत इत्यण्। पूर्वपदस्य प्रकृतिभावो। स्फटिकादिमयपर्वतप्रभाभवाद्दिविद्युदिति स्फुटाभवतीत्यर्थात्। सुदामामाला। तत्प्रभवाभा। सौदामनी। मालाकारेत्यर्थ:। तडिद्विशेषे॥ अप्सर:प्रभेदे। देवविशेषे। इत्यजय:॥

सौदायिकम्। न० स्त्रीधनविशेषे॥ यथाह कात्यायन:। ऊढया कन्यया वापि पत्यु: पितृगृहेथवा। भर्तु: सकाशात्पित्रोर्वा लब्धं सौदायिकं स्मृतम्॥ सौदायिकं धनं प्राप्य स्त्रीणां स्वातन्त्र्यमिष्यते। यस्मात्तदानृशंस्यार्थं तैर्दत्तं तत्प्रजीवनम्॥ सौदायिके सदा स्त्रीणां स्वातन्त्र्यं परिकीर्तितम्। विक्रये चैव दाने च यथेष्टं स्थावरेष्वपीति॥ सुदायेभ्य: पितृमातृभर्तृकुलसम्बन्धिभ्यो लब्धं सौदायिकम्। स्वार्थे कन्० अनेकधर्मम्। इति दायतत्त्वम्॥

सौदास:। पुं० इक्ष्वाकुवंशीयअयोध्याधिपतौ। कल्माषपादे। मित्रसहे॥

सौध:। पुं० न० राजसदने। सुधालेपोऽस्यास्ति। ज्योत्स्नादित्वाद ण्॥ सुधयाऽवलिप्तं वा। रौप्ये॥ त्रि० सुधासम्बन्धिनि॥ पुं० दुग्धपाषाणे॥

सौधभूषणम्। न० कटप्रकारायाम्। भू मा० हृ० भावप्र०।

सौन:। त्रि० सूनायांभवे।

सौनन्दम्। न० बलभद्रमुसले॥

सौनन्दी। पुं० बलदेवे। सौनन्दमस्यास्ति। इनि:॥

सौनिक:। पुं० वधस्थानाधिकारिणि। वैतंसिके। मांसिके। शाकुनिके। सूनया चरति। ठक्।

सौनिकी। स्त्री० शौनकीयेष्ट्याम्॥

सौन्दर्य्यम्। न० सुन्दरतायाम्॥ तल्लक्षणं यथा। अङ्गप्रत्यङ्गकानां य: सन्निवेशो यथोचितम्। सुश्लिष्टसन्धिबन्ध: स्यात्तत्सौन्दर्य्यमुदाहृतमित्युज्ज्वलनीलमणि:॥ सुन्दरस्य भाव:। ष्यञ्॥

सौपर्णम्। न० मरकते॥ शुण्ठ्याम्॥ गारुत्मतास्त्रे॥ त्रि० सुपर्णसम्बन्धिनि॥

सौपर्णी। स्त्री० पातालगरुडीलतायाम्॥

सौपर्णेय:। पुं० गरुत्मति। गरुडे॥ सुपर्ण्या अपत्यम्। स्त्रीभ्यो ढक्॥

सौपर्णेयी। स्त्री० सुपर्ण्या: पुत्र्याम्॥ सुपर्ण्या अपत्यं स्त्री। स्त्रीभ्यो ढ

क् । टिट्ढाणञिति ङीप् ॥

सौप्तिकम् । न० रात्रिमारणं । रात्रियुद्धे ॥ महाभारतस्य पर्व्वविशेषे ॥ त्रि० सुप्तिसम्बन्धिनि ॥

सौभम् । न० खसञ्चारिपुरे ॥ हरिश्चन्द्रपुरे ॥

सौभगम् । न० सुभगत्वे ॥

सौभद्रः । पुं० सुभद्रातनयेऽभिमन्यौ ॥ सुभद्राया अपत्यम् । ऋष्यन्धकवृष्णिकुरुभ्यश्च इत्यण् ॥ सङ्ग्रामविशेषे ॥ सुभद्राप्रयोजनमस्य । सङ्ग्रामे प्रयोजनयोद्धृभ्य इत्यण् ॥ ग्रन्थविशेषे ॥ सुभद्रामधिकृत्य कृतो ग्रन्थः । अधिकृत्य कृते ग्रन्थे इत्यण् ॥ त्रि० सुभद्रासम्बन्धिनि ॥

सौभद्रेयः । पुं० अभिमन्यौ ॥ सुभद्राया अपत्यम् । स्त्रीभ्यो ढक् ॥ विभीतकवृक्षे ॥

सौभरम् । न० सामविशेषे ॥

सौभरिः । पुं० पुराणप्रसिद्धे परमहंसे । मुनिविशेषे । *

सौभागिनेयः । पुं० सुभगासुते ॥ सुभगाया अपत्यम् । कल्याण्यादीनामिनङ् इति ढक् इनङ् देशश्च । हृद्भगसिन्ध्वन्ते पूर्व्वपदस्य च इत्युभयपदवृद्धिः ॥

सौभागिनेयी । स्त्री० सुभगात्मजायाम् ॥

सौभाग्यम् । न० विष्कम्भाद्यन्तर्गतयोगविशेषे ॥ तज्जातफलं यथा । सौभाग्यजन्मा सुभगो मनुष्यः श्लाघ्यो जनानां धनवान् गुणज्ञः । उदारचित्तो बलवान् विवेकी महाभिमानी प्रियभाषणश्चेति ॥ सिन्दूरे ॥ टङ्कणे ॥ सुभगत्वे ॥ तल्लक्षणं यथा । अल्पनिद्रोऽल्पभुग्वाग्मी मितभाष्यनसूयक इति ॥ सुभगस्य कर्म्म भावो वा । ष्यञ् । हृद्भगसिन्ध्वन्ते पूर्व्वपदस्य चेत्युभयपदवृद्धिः ॥ व्रतविशेषे ॥

सौभाग्यकरणम् । न० वाक्यव्यवहृतौ ॥ यः सार्व्वजन्यं सुभगत्वमिच्छेद्गुणान् स सर्व्वस्य वदेत्परोक्षम् । प्राप्नोति दोषानसतोऽप्यनेकान् परस्य यो दोषकथां करोति ॥

सौभाग्यचिन्तामणिः । पुं० सारकौमुद्युक्तौषधविशेषे ॥

सौभाग्यशुण्ठी । स्त्री० पाकविशेषे ॥ यथा । नागरस्य पलान्यष्टौ घृतं देयञ्च तत्समम् । क्षीरं च प्रस्थसंयुक्तं खण्डस्यार्द्धशतं पलम् ॥ पचेन्मृद्वग्निना सम्यक् यथा पाको भवेत्तदा । चूर्णं दद्यात् त्रिजातस्य त्रयो भागश्चपलोन्मितम् ॥ भक्षयेत्प्रातरुत्थाय शुचिरक्ष्णुतत्समाहृतम् । सूर्य्यावर्त्तं हनुस्तम्भं मन्यास्तम्भं गलग्रहम् ॥ अवलम्बं कारं हृद्यं बलोपालननाशनम् । अनया तत्प्रशमनं सौभाग्यकरमुत्तममित्ति पाकावली ॥

सौभ्रात्रम् । न० सुभ्रातृणां भावे ॥ यु

बादित्वादण् ॥
सौमदत्ति: । पुं॰ क्षत्रियविशेषे । भूरिश्रवसि ॥ सोमदत्तस्याऽपत्यम् । अतइञ् ॥
सौमनसा । स्त्री॰ जातिपत्र्याम् ॥
सौमनसायनी । स्त्री॰ जातिपत्र्याम् । मालतीपत्रिकायाम् । जातिको॰ इ॰ भा॰ प्र॰ ॥
सौमनस्यम् । न॰ शोभनमनोभवे ॥ कुसुमसमहे ॥ श्राद्धे पिण्डदाना नन्तरं ब्राह्मणहस्ते पुष्पदानमन्त्रे
सौमनस्यवान् । त्रिं॰ प्रीतिमति ॥
सौमनस्यायनी । स्त्री॰ मालतीकलिकायाम् ॥ यथा । मालतीपुष्पकलिकां सौमनस्यायनीं विदुरिति त्रिका ण्डशेषः ॥
सौमिक: ॰ सोमरससाध्येऽग्नि ष्टोमा॰
सौमित्रो ॰ इ॰ है॰ च॰
सौमिल: । पुं॰
सौमित्रि: । पुं॰ रामानुजे ॥ सुमित्राया अपत्यम् । बाह्वादित्वादिञ् ॥
सौमी । स्त्री॰ ऋग्विशेषे ॥ सोमो देवताऽस्याः । सोमाट्ट्यण् । ङीप् । यलोप: ॥
सौमेधिक: । पुं॰ सिद्धे ॥
सौमेरव: । त्रि॰ सुमेरुसम्बन्धिनि ॥
सौमेरुकम् । न॰ सुवर्णे ॥
सौम्य: । पुं॰ सोमात्मजे । बुधे ॥ वत्सरविशेषे ॥ तत्फलं यथा । सुभिक्षं क्षेममारोग्यं सस्यवृद्धिर्निरुपद्रवम् । सौम्यदृष्टिर्भवेद्राजा सौम्ये सौख्यं प्रकीर्त्तितमिति ॥ ४३ ॥ भास्करे ॥ द्युतिधरणीविप्रे ॥ उदुम्बरदले ॥ भूखण्डविशेषे ॥ कृच्छ्रव्रतविशेषे ॥ न॰ मृगशिरो नक्षत्रे ॥ तीर्थविशेषे ॥ करमध्ये सौम्यतीर्थम् ॥ त्रि॰ अनुग्रे ॥ साधौ ॥ मनोज्ञे ॥ सोमदैवते ॥ सोमवृक्षे ॥ सोमस्य: । शाखादिभ्यो य । तत: प्रत्ययाण् ॥ सोमो देवताऽस्य । सोमाड्ड्यण् ॥ यथा । सोमदेवसौम्य: । ततश्चतुर्वर्णादित्वात्ष्यञ् ॥
सौम्यकृच्छ्र: । पुं॰ व्रतविशेषे ॥ यथा । पिण्याकाचामतक्राम्बुसक्तूनां प्रतिवासरम् । एकैकमुपवासश्च कृच्छ्र: सौम्योऽयमुच्यते ॥
॰॰॰री । स्त्री॰ भ्रातृपत्न्याम् ॥
॰॰॰ पुं॰ शुभग्रहे ॥ यथा ॥ ॰॰॰ सौराराः पापाः सौम्यास्तथापरे । पापयुक्तो बुधः पापो राहुकेतू च पापदौ ॥
सौम्यता । स्त्री॰ प्रियदर्शनतायाम् ॥
सौम्यत्वम् । न॰ सौमनस्ये ॥ स

वंशीकल्पितेषिल्वे ॥ प्रतिषिद्धचिन्तने ॥

सौम्यधातुः । पुं॰ कफे । श्लेष्मणि ॥

सौम्यवपुः । न॰ अनुग्रहशरीरे ॥

सौम्या । स्त्री॰ अनुग्रायाम् ॥ मनोज्ञायाम् ॥ दुर्गायाम् । गौर्याम् ॥ शालपर्ण्याम् ॥ महाज्योतिष्मत्याम् ॥ गुञ्जायाम् ॥ उत्तरदिशि ॥ ब्राह्म्याम् ॥ मल्लिकायाम् ॥ रुद्रजटायाम् ॥ शट्याम् ॥ महेन्द्रवारुण्याम् ॥ मधुयष्ट्याम् ॥

सौम्याः । स्त्री॰ बहुत्वे॰ मृगशिरःशिरःस्थासु पञ्चतारकासु । इल्वलासु ॥

सौम्यायनम् । न॰ उत्तरायणे ॥

सौरः । पुं॰ शनैश्चरे ॥ मासविशेषे । सूर्यैकराशिभोगावच्छिन्नमासे ॥ यथा । आदित्यराशिभोगेन सौरो मासः प्रकीर्त्तित इति । एकस्मात्सङ्क्रमाद्रासङ्क्रान्तिः सौरोऽभिधीयत इति च ॥ दिनविशेषे ॥ वर्षविशेषे । तुम्बुरुवृक्षे ॥ त्रि॰ सूर्यसम्बन्धिनि ॥ न॰ उपपुराणविशेषे ॥ त्रि॰ सूर्योपासके ॥ सूर्यस्यायमण् । तस्येदमित्यण् ॥

सौरजः । पुं॰ तुम्बुरुवृक्षे ॥ फलविशेषे ॥ त्रि॰ सौरजाते ॥

सौरदिनम् । न॰ सौरदिवसे ॥

सौरनक्तम् । न॰ व्रतविशेषे ॥ यथा । हस्तयुक्ते चार्कदिने सौरनक्तं समाचरेत् । स्नात्वा त्वर्कं समभ्यर्च्य नीरोगो बहुजीवति ॥ आत्मनो द्विगुणच्छायं यदा सन्तिष्ठते रविः । सौरनक्तं विजानीयान्न नक्तं निशि भोजनमिति नारसिंहे ६४ अध्यायः ॥

सौरभम् । न॰ कुङ्कुमे ॥ बोले ॥ सुगन्धितायाम् ॥ विषमवृत्तान्तरे ॥ अयमुद्गतासदृशो यदि तृतीयमन्यथा । जायते रनभगैर्ग्रथितं कथयन्ति सौरभमिदं तदीदृशम् ॥ यथा । परिभूतफुल्लकमलपत्रनयनचितगन्धविभ्रमा । कामघ्नन्दहरतीह हरेर्मुखपद्मसौरभकलातपाङ्गता ॥

सौरभेयः । पुं॰ वृषे ॥ सुरभ्या अपत्यम् । स्त्रीभ्यो ढक् ॥

सौरभेयी । स्त्री॰ सौरभ्याम् । गवि । उत्तमायाम् ॥ सुरभ्याः स्त्र्यपत्यम् । ढक् । ङीप् ॥

सौरभ्यम् । न॰ मनोज्ञत्वे ॥ सौगन्ध्ये । सुगन्धितायाम् ॥ गुणगौरवे ॥ पुं॰ कुवेरे ॥

सौरमासः । पुं॰ सूर्यैकराशिभोगावच्छिन्नकाले ॥ यथा । एकराशौ रविर्यावत्कालं मासः स भास्करः । अयमृभिः सौरमासैरयनं परिकीर्त्तितम् ॥

सौरसम्वत्सरः । पुं॰ सूर्य्यस्य द्वादश राशिभोगावच्छिन्नकाले । यथा । सौरसंवत्सरस्यान्ते मानेन शशिजेन तु एकादशातिरिच्यन्ते दिनानि भृगुनन्दन ॥

सौरसेनः । पुं॰ देशविशेषे । यथा । मागधाद्दक्षभागे तु विन्ध्यात् पश्चिमतः शिवे । सौरसेनाभिधो देशः सूर्य्यवंशप्रकाशकः ॥

सौरसेयः । पुं॰ कार्त्तिकेये । स्कन्दे ॥ सुरसाया अपत्ये ॥

सौरसैन्धवः । त्रि॰ गङ्गासम्बन्धिनि ॥ सुरसिन्धोरयम् । अण् । हृद्भगसिन्ध्वन्ते पूर्व्वपदस्य च इत्युभयपदवृद्धिः ॥

सौराष्ट्रः । पुं॰ देशविशेषे ॥ कोङ्कणात् पश्चिमतीर्थे समुद्रप्रान्तगोचरम् । हिङ्गुलाजान्तको देवि द्वियोजनदेशकः । सौराष्ट्रदेशो देवेशि साक्षात् गुर्ज्जराभिधः ॥ कुन्दुरुकि ॥ न॰ कांस्ये ॥

सौराष्ट्रकम् । न॰ पञ्चलोहे ॥

सौराष्ट्रमृत्तिका । स्त्री॰ काच्याम् । तुवर्य्याम् । फटकरी॰ इ॰ भा॰ प्र॰ ।

सौराष्ट्रा । स्त्री॰ तुवर्य्याम् ॥

सौराष्ट्रिकः । पुं॰ विषप्रभेदे । सोमलखार॰ संखिया॰ इ॰ भा॰ प्र॰ ॥ सुराष्ट्रविषयेषु जातस्सौराष्ट्रिक उच्यते ॥ त्रि॰ सुराष्ट्रजे सुराष्ट्रदेशविशेषभवः । धन्वः त्वादित्वात् ठञ् ॥

सौराष्ट्री । स्त्री॰ सौराष्ट्रमृत्तिकायाम् ॥ स्फटिकाया गुणाः सर्व्वे सौराष्ट्र्या अपि कीर्त्तिताः । सुराष्ट्रे भवा । अण् । ङीप् ॥ सौराष्ट्री कफपित्तघ्नी विसर्पव्रणनाशिनी ॥

सौरिः । पुं॰ शनैश्चरे । शनिग्रहे ॥ सूरस्यार्कस्यापत्यम् । अत इञ् । श्रीकृष्णे । सूरो यादवेन्द्रस्य आनपोतिमधुमाधवी । स च वसुदेवस्यापिता । तदपत्यार्थे शौरिः कृष्णः । इति । स्वार्थे पिन्तादेराकृतिगणत्वात् इञ् असनवृक्षे ॥ धौ दृश्यमन्ता याम् ॥

सौरकः । पुं॰ स्वर्गे । न॰ सुरानिर्म्मलधने ॥

सौरिरत्नम् । न॰ नीलमणौ ॥

सौरी । स्त्री॰ रश्मौ । सूर्य्यकिरणे ॥ सूर्य्यस्येयम् । अण् । ङीप् । सूर्य्यतिष्येति यलोपः ॥

सौव॰ । त्रि॰ स्वकीये ॥ स्वस्येदम् । अण् ॥

सौवर्चलम् । न॰ सर्ज्जिकाक्षारे ॥ सुवर्च्चलाया इदम् । तस्येदमित्यण् ॥ सञ्चर॰ इ॰ प्र॰ लवणे । कृष्णलवणे । अर्के । रुचिके । सुष्ठु वर्च्चते । वर्च्चदीप्तौ । दृषादित्वात् कलच् ।

प्रज्ञाद्यण् ॥

सौवर्णः । त्रि० सुवर्णस्य विकारे कटकादौ ॥ तस्य विकार इत्यर्थे जातरूपेभ्यः परिमाणेऽण् ॥

सौवर्णभेदिनी । स्त्री० प्रियङ्गौ ।

सौबली । स्त्री० गान्धार्य्याम् । सुबलस्यापत्याम् ॥

सौवस्तिकः । पुं० पुरोहिते ॥ त्रि० स्वस्तिकृति ॥

सौविदः । पुं० राज्ञामगारे अन्तश्चाराधिकृते । सौविदल्ले । कञ्चुकिनि । स्थापत्ये ॥ यहि : सञ्चरन्तीनाम : पुरस्त्रीणां प्रेक्षकपुरुषान्तर वारणाय राज्ञामागारे ये वेत्रधरा नियुक्तास्ते वर्हिर्मन्तकाः सौविदल्लादि शब्दवाच्याः । सुष्ठु वेत्ति । विद ज्ञाने । इगुपधेति कः । सुविद एव : प्रज्ञादित्वात् स्वार्थेऽण् । यद्वा । सुविदत्राः स्त्रियस्तासामयं रक्षकः । तस्येदमित्यण् ॥

सौविदल्लः । पुं० सौविदे ॥ सुष्ठु दन्त विद्वांसमपि० लान्तिवशवर्त्तिनं कुर्वन्ति सुविदल्लाः । तासामयं रक्षकः । तस्येदमित्यण् ॥

सौवीरः । पुं० देशान्तरे । कुमालके ॥ शूरसेनात्पूर्वभागे गण्डक्याः पश्चिमे । सौवीरदेशादेशेऽपि सर्वदेशाधमाधमः ॥ न० काञ्जिके ॥ यथा । सौवीरन्तु यवैरामैः पक्वैर्वा निस्तुषैः कृतम् । गोधूमैरपि सौवीरमाचार्य्याः केचिदूचिरे । सौवीरन्तु ग्रहण्यर्शः कफघ्नं भेदि दीपनम् । उदावर्त्ताङ्गमर्द्दास्थिशूलानाहेषु शस्यते ॥ स्रोतोऽञ्जने । सौवीराञ्जने ॥ बदरीफले । महद्बदरे ॥ यथाहुः । पच्यमानं सुमधुरं सौवीरं बदरं महत् । सौवीरं बदरं शीतं भेदनं गुरुशुक्रलम् । बृंहणं पित्तदाहास्रक्षयतृष्णानिवारणमिति ॥ सुवीरदेशे भवम् । तत्र भवइत्यण् ॥

सौवीरकम् । न० सुवीराम्ले । काञ्जिके ॥ पुं० बदरवृक्षे ॥

सौवीरसारम् । न० स्रोतोऽञ्जने ॥

सौवीराञ्जनम् । न० स्रोतोऽञ्जने । सुरमा इति भा० प्र० ॥ सौवीरस्य तदञ्जनञ्च ॥ यथा । सौवीराञ्जनमिदमम्बकयुगोस्ते विन्यस्तं कनकशलाकयाचयत् । तन्नूनं मलिनमपि त्वदभिरूपाक्ष्णोर्द्वाव्यभिलषणीयतामियायेति शाङ्करीमानसोल्लासा ॥

सौशब्दः । पुं० गुणविशेषे ॥ तल्लक्षणं यथा । सुप्तिङ्परव्युत्पत्तिः सौशब्दमिति ॥

सौष्ठवम् । न० सुष्ठुतायाम् ॥ सुष्ठु भावः । उद्गात्रादित्वादञ् ॥

सौस्नातिकः । त्रि० सुस्नातप्रश्नकर्त्तरि ॥ सुस्नातं पृच्छति । पृच्छतौ सुस्नातादिभ्य इति ठञ् ॥

सौहार्द्दः । पुं० मित्रतनये ॥ सुहृ

देयपत्यं तस्यापत्यमित्यण्। हृद्भ
गसिन्ध्वन्ते पूर्वपदस्य चेत्युभयपद
वृद्धिः॥ न० सौजन्यं।
श्रीमनहृदयत्वं॥ सख्यं। मैत्र्या
म्॥ सुहृदयस्यभावः कर्म्म वा।
मित्रं सुहृदादेशः॥

सौहार्द्दम्। न० सौहार्द्दं। सख्यं॥
सुहृदयस्यभावः। ष्यञ्। ब्राह्मी
कष्यञ्रोगेष्विति हृदादेशः॥

सौहित्यम्। न० तृप्तौ॥ सुहितस्यभा
वः कर्म्म वा। पुरोहितादित्वा
दक्॥ पर्य्याप्तौ॥

सौहृदम्। न० सौहार्द्दं। सख्यं॥
सुहृदः कर्म्मभावो वा। युवादि
त्वादण्॥ प्रेमणि॥

सौहृद्यम्। न० सौहार्द्दं॥ सुहृदय
स्यभावः। ष्यञ्। ब्राह्मीकष्यञ्
रोगेष्वितिपक्षे हृदादेशाभावः॥

स्कन्दः। पुं० कार्त्तिकेये। महासेने
। पार्व्वतीनन्दने॥ सेनापतीनांम
ध्ये देवसेनापतिः कार्त्तिकेयोभगव
द्विभूतिः॥ स्कन्दतिगच्छति० शो
षयतिवादैत्यान्। स्कन्दिर्गतिशो
षणयोः। पचाद्यच्। तथाचवा
युपुराणम्। स्कन्दितादानवगणा
स्तेनस्कन्दः प्रतापवानिति॥ दे
व्याहारपालविशेषे॥ नृपतौ॥ पु
राणविशेषे॥ शरीरे॥ पारदे॥
बालग्रहविशेषे॥

स्कन्दनम्। न० रेचने॥ क्रमणे॥
गमने। शोषणे॥

स्कन्दपुराणम्। न० स्कान्देमहापुरा
णविशेषे॥ तच्चोक्तसंख्योकाशीदे
वीभागवतेयथा। एकाशीतिसह
स्राणिस्कन्दाख्यंपरमाद्भुतमिति॥

स्कन्दांशकः। पुं० पारदे॥

स्कन्धः। पुं० देहावयवविशेषे। भु
जशिरसि। अंसे॥ यथालक्षणं य
था। कदलीस्तम्भसङ्काशाः स्क
न्धायेषांनराः। राजानस्तेभविष्य
यामहाश्रीश्रामहाबलाः॥ निर्मा
सरोमबहुलानिर्द्धनस्यप्रकीर्त्तिताः
इतिसमुद्रः। स्कन्द्यते। स्कन्दि
र्०। कर्म्मणिघञ्। स्कन्देस्वसा
इति० बाहुलकादनसुन्यपिध:
पृषोदरादित्वं॥ नृपतौ॥ सम्परा
ये॥ व्यूहे। समूहे॥ काये॥ प्र
काण्डे॥ यथा। अक्षोप्रकाण्डः
स्कन्धः स्यान्मूलाच्छाखावधिस्त
रोरिति। आचार्य्ये॥ छन्दोभेदे
॥ विज्ञानादिपञ्चसु॥ तेच० वि
ज्ञानवेदनारूपसंज्ञासंस्कारसंज्ञ
काः पञ्चवैनाशिकानांमयेप्रसि
द्धाः॥ ग्रन्थपरिच्छेदे॥ पथि॥
कंशिरोदधाति। डुधाञ्०। पा
तोनुपेतिकः। पारस्करादित्वा
त्सुट्॥ वास्कन्द्यते० आरुह्यते।
स्कन्दिर्०। कर्म्मणिघञ्॥ पृषो

दरादि : ॥

स्कन्धकम् । न० मात्रावृत्तान्तरे ॥ स्कन्धकमितितत् कथितं यच्चतु-ष्कलगणाष्टकेनार्द्धं स्यात् । तत्तुल्यमपरमर्द्धं भवति चतुःषष्टिमात्रिकशरीरमिदम् ॥ यथा । चयमेति विमलविद्युत्करालकरवालललितजलधरकाल : । उद्भवघनगर्जिततर्जितपथिकाङ्गनानिवहहृदयतल : ॥

स्कन्धचाप : । पुं० वंशादिनिर्मितेशिक्याधारे । विहङ्गिकायाम् ॥

स्कन्धज : । पुं० वटे ॥ शल्लक्यादौ ॥ पवर्णीनयद्वाद्या : स्कन्धजा: सल्लकीमुखा:० इति हेमचन्द्र : ॥

स्कन्धतरु : । पुं० स्कंधफले ॥

स्कंधदेश : । पुं० आसने । द्विरदस्कंधे ॥ स्कन्धप्रदेश : ॥ स्कंधमात्रे ॥

स्कंधफल : । पुं० नारिकेले ॥ स्कन्धे फलान्यस्य ॥ उदुम्बरवृक्षे ॥

स्कन्धफला । स्त्री० खर्जूर्य्याम् ॥

स्कन्धबन्धना । स्त्री० मधुरिकायाम् ॥

स्कंधमल्लक : । पुं० कङ्कखगे ॥

स्कन्धरुह : । पुं० वटवृक्षे ॥

स्कन्धवाह : । पुं० शकटादिवाहकवृषे । शङ्के । चलधूर्त्तिले ॥

स्कन्धवाहक : । पुं० वृषे ॥

स्कंधशाखा । स्त्री० वृक्षस्यमुख्यशाखायाम् । शाखायाम् ॥ स्कंधजा शाखा ॥

स्कंधशृङ्ग : । पुं० महिषे ॥ इतिकश्चित् ॥

स्कंध : । न० वृक्षमूलाच्छाखावधिकभागे । प्रकाण्डे ॥ अंसे ॥ स्कन्द्यते । स्कन्दिर् ० । स्कन्देश्चस्वाङ्गेइत्युनधञान्तादेश : ॥

स्कन्धाग्नि : । पुं० वडवाग्नौ । समिन्धने : स्थूलयज्ञाग्निभेदे ॥

स्कंधामल : । पुं० बृहत्काष्ठाग्नौ ॥

स्कंधावार : । पुं० कटके ॥ सैन्यस्थितौ ॥ राजधान्याम् ॥

स्कंधिक : । पुं० स्कंधवाहकवृषे ॥

स्कंधी । पुं० द्रुमे ॥

स्कन्नम् । त्रि० हस्तादित : पतिते । अस्यपर्याया यथा । स्रस्तं ध्वस्तं भ्रष्टं० स्कन्नं० पन्नं च्युतं गलितमिति ॥ स्कन्द्यते स्म । स्कन्दिर् ० । कर्मणिक्त : गत्यार्थाकर्मकेतिकर्त्तरि क्तो वा ॥ कठिनीभूते ॥

स्कोटिका । स्त्री० हापुत्रिकाखगे ॥

स्कोनगरम् । न० वाह्लीकग्रामविशेषे ॥

स्खदनम् । न० विद्रावणे । स्खद स्खदने । ल्युट् ॥

स्खलत् । त्रि० चलति ॥

स्खलनम् । न० रिङ्गणे ॥ बालाभ्यां हस्तपादाभ्यांचलने ॥ निनिमि

संस्खलितः पतने ॥ पिच्छिलादौपतने ॥ धर्मादिस्खलने ॥ स्खल सञ्चलने । भावेल्युट् ॥

स्खलितम् । न० कूटयुद्धादिनायुद्धमर्यादास्खलने । छले । छलिते ॥ भ्रंशे ॥ स्खलनम् । स्खल० । क्तः ॥

स्खालित्यम् । न० व्यभिचारे ॥

स्तनः । पुं० वक्षस्थउपाङ्गे । कुचे । पयोधरे । वक्षोजे ॥ स्तनौपुंसस्त्रीनार्योः विशेषउभयोरयम् । यौवनागमनेनार्याः पीवरीभवतः स्तनौ ॥ गर्भवत्याः प्रसूतायाः स्तनौक्षीरपूरितौ ॥ नरोमशौस्तनौपीनौघनावविषमौशुभौ ॥ स्तनमर्दनस्त्वकारस्तौषधंयथा । कुष्ठनागबलाचूर्णं नवनीतसमन्वितम् तत्रैवायुवतीनाञ्च कुर्यात्मनोहरं-स्तनम् ॥ स्तनयति कथयति शोभादयम् ० स्तनतीत्युच्यते वाप्राम्-कैः । स्तनशब्दे । अच् । पुंसी तिचोवा ॥

स्तनम् । त्रि० शब्दायमाने ॥ स्तन० । घटः शब्दादेशः ॥

स्तननम् । न० ध्वनिमात्रे ॥ मेघगर्ज्जे ॥ कुन्थिते ॥

स्तनंधयः । त्रि० अतिबालके । उत्तानशये ॥ स्तनंधयति । धेट् पाने । नासिकास्तनयोर्ध्माधेटोरितिखश् । अरुर्द्विषदितिमुम् ॥

स्तनंधयी । स्त्री० स्तनपायाम् । अतिबालिकायाम् । उत्तानशयायाम् ॥ धेटष्टित्वान्ङीप् ॥

स्तनयः । पुं० अतिशिशौ ॥ अर्भके ॥ स्तनौपिबति । पा० आतोनुपेतिकः ॥

स्तनया । स्त्री० डिम्भायाम् । स्तनंधय्याम् ॥ टाप् ॥

स्तनभरः । पुं० स्तनाभोगे ॥

स्तनभवः । पुं० रतिबंधविशेषे ॥ यथा । स्वजङ्घाद्वयमध्ये तु कृत्वा योषित्पदद्वयम् । स्तनौधृत्वारमेत् कामीबंधः स्तनभवः स्मृतः ॥

स्तनमुखम् । न० चूचुके ॥

स्तनयित्नुः । पुं० वारिधरे । मेघे । मुस्तके ॥ स्तनिते । मृतौ । रोगे ॥ अशनौ ॥ विद्युति ॥ स्तनयति । स्तनगदौदेवशब्दे० चुरादावदन्तः । स्तनिहृषिपुषिगदिभ्योणेरित्नुच् । अयामन्तेतिणेरयादेशः ॥

स्तनवृन्तम् ।) न०
स्तनाग्रिखा ।) स्त्री० स्तनमुखे ॥
स्तनाग्रम् ।) न०

स्तनान्तरम् । न० हृदये ॥

स्तनाभोगः । पुं० कुचभरे । स्तनभरे ॥ कुचपरिपूर्णतायाम् ॥

स्तनालिङ्गनम् । न० कण्ठसूत्रे ॥ तल्लक्षणंयथा । उरसिदयितमुच्चै

राद्रिशिखरशालीस्तनयुगम् पथस्त्रीय त्स्तनाभिमर्दनंतदति ॥

स्तनितम्। न॰ गर्जिते। मेघनिर्घोषे॥ स्तनगदीदेशब्दे। भावेक्तः॥ त्रि॰ शब्दिते॥

स्तनितफल:। पुं॰ विकङ्कटकवृक्षे॥

स्तन्यम्। न॰ दुग्धे॥ स्तनेभवम्। शरीराऽवयवत्वाद्यत्।

स्तब्ध:। त्रि॰ साभिमाने। अविनीते। अप्रगतस्वभावे। अनम्रे। गुरुदेवतादिष्वप्यनम्रे॥ स्तम्भिते। जडीकृते॥ स्तभ॰। क्तः॥

स्तब्धरोमा। पुं॰ वराहे। सूकरे। घोणिनि॥ स्तब्धानि॰ अनम्राणि रोमाणियस्य॥

स्तम्ब:। पुं॰ गुल्मे। स्कन्धरहिते॰ आकाण्डद्रुमे॥ तृणयवादिगुच्छे॥ व्रीह्यादीनामप्रकाण्डे॥ आलाने। तिष्ठति॰ अचला। ष्ठा॰। स्थस्तोम्बजवकाविस्त्वम्बच्॰ तिष्ठते: स्तादेशश्च॥ तृणादौ॥

स्तम्बक:। पुं॰ स्तम्बे॥ स्वार्थे॰ यावादिभ्य: कन्॥

स्तम्बकरि:। पुं॰ धान्ये॥ स्तम्बङ्करोति। स्तम्बशकृतोरिन्। व्रीहिवत्सयोरितिवक्तव्यम्॥ त्रि॰ स्तम्बकर्त्तरि॥

स्तम्बकार:। पुं॰ गुच्छकारके॥

स्तम्बघ्न। पुं॰ स्तम्बघ्ने॥

स्तम्बघन:। पुं॰ स्तम्बघ्ने। तृणादिगुच्छोन्मूलनसाधने। स्तम्बघ्नस्तुस्तम्बघन: स्तम्बोयेनुनिहन्यते॰ इत्यमर:। स्तम्बस्त्वंबोरुश्च। सहन्यतेयेन। स्तम्बेकाचित्यप्प्रत्ययेहनोघभादेश:॥ नीवारादिग्रहणार्थं स्तवं [illegible]पात्रे।

स्तम्बघ्न:। पुं॰ तृणाद्युन्मूलकखनित्रादौ। स्तम्बघने॥ स्तम्बोहन्यते॰ येन। स्तम्बेकचेतिक:॥ नीवारादिग्रहणार्थं कृतवंशपात्रे॥

स्तम्बपू:। स्त्री॰ पुरीभेदे। ताम्रलिप्ते। विष्णुगृहे। तमोलुक्॰ इ॰ भा॰ प्र॰ देशे॥

स्तम्बहननम्। } न॰
स्तम्बहननी। } स्त्री॰ स्तम्बघ्ने॥

स्तम्बेरम:। पुं॰ हस्तिनि। हस्तावले। द्रुमे। स्तंबेरमते। रमु॰। स्तम्बकर्णयोरमिजपोरित्यच्। हस्तिसूचकयोरितिवक्तव्यम्। अन्यत्र स्तम्बरन्ता। तत्पुरुषेकृतीति॰ हलदन्तादितिबाहुरलुक्॥

स्तम्भ:। पुं॰ स्थूणायाम्। थम्भ॰ भा॰॥ जडत्वे। चलनाभावे॥ स्तभ्नाति। स्तन्भुरोधने। पचाद्यच्। भावेघञ्वा॥ गतिनिरोधे। निष्प्रति[illegible]याम्॥ गर्वे।

स्तम्भकार:। पुं॰ वेष्टने। त्रि॰ स्थूणाकारके॥ जाड्यकारके॥

स्तम्भन :। पुं० कामबाणविशेषे। यथा। उन्मादनः शोषणश्च तापनः स्तम्भनस्तथा। सम्मोहनश्च पञ्चैते विख्याताः कामसायकाः॥ न० मन्त्रयुक्तादिरोधने॥ अभिचारकर्मविशेषे। प्रवृत्तिरोधे। यथा। प्रवृत्तिरोधः सर्वेषां स्तम्भनं समुदाहृतमिति॥

स्तम्भित :। त्रि० स्पन्दरहिते। जडीभूते॥ स्तम्भः सञ्जातोऽस्य। इतच्॥ जडीकृते॥

स्तरिमा। पुं० तल्पे। शय्यायाम्॥ स्तृणोति। स्तृञ् आच्छादने। हृभूस्तृभ्य इमनिच्॥

स्तरी। स्त्री० धूमे। स्तृणाति। स्तृञ् आच्छादने। अवितृस्तृतन्त्रिभ्य ईः॥

स्तव :। पुं० स्तोत्रे। नुतौ। स्तुतौ॥ स्तूयतेऽनेन० स्तवनं वा। ष्टुञ् स्तुतौ। ऋदोरप्॥

स्तबक :। पुं० गुच्छे। पुष्पकलिकादिविन्यस्ते। पुष्पादिसङ्घाते॥ स्तोके। ग्रन्थपरिच्छेदे। समूहे॥ स्तूयते। स्तु०। कुञादिभ्यो वुन्॥ यथा। तिष्ठति। शा० अस्तोकस्तबकावित्यस्य:० तिष्ठतेः स्तादेशश्च॥

स्तबक्ष :। पुं० स्तब[illegible]॥

स्तबकफल :। पुं० तेव : फलं। वि भवल० रु० भा० प० द०॥

स्तवेय्य :। पुं० इन्द्रे। इत्युणादिकोष :॥

स्तव्य :। त्रि० विष्णौ। सर्वैः स्तूयते० मस्तोताव्ययचित्। स्तोतुमर्हः। अर्हे कृत्यतृचश्चेति यत्।

स्ताव :। पुं० स्तवने। प्रस्तावे॥

स्तावक :। त्रि० स्तवकर्त्तरि। स्तुतिकारके। स्तौति। ष्टुञ्। ण्वुल्॥

स्तिभि :। पुं० समुद्रे॥ स्तभ्नाति। स्तन्भु०। क्मितमौत्यादिभिन्। अतइन्। अनुनासिकलोप :॥

स्तिमित :। त्रि० अचञ्चले। निश्चले॥ आर्द्रे। क्लिन्ने॥ तिम्यति स्म। ष्टिम आर्द्रीभावे। अकर्मकत्वात् कर्त्तरि क्तः॥ स्तिमितः० आर्द्रे च साविगुण्ठितमिवेति मेदिनी॥ च पञ्च॥ यथा। माघ : स्तिमिते दीर्घैर्यामैः कालमातुरः। तावत्कालं सलघुममन्यो यातम् विरलव त्॥

स्तिभि :। पुं० समुद्रे॥ स्तभ्नाति स्तम्भुरोधने। क्मितमियमिस्तम्भामतश्चेति० इन्॥ आधायाम्॥

स्तोभि :। पुं० अध्वर्यौ॥ स्तृणाति। स्तृञ्। अनुपूर्व आरभ्य : क्लिन्॥ रुधिरे॥

स्तुत :। त्रि० ईडिते। नुते।

पर्य्यायिणि । प्रशंसिते । अभिष्टुते ।
स्तु नतौ । स्तु + क्त । : ॥

स्तुतिः । स्त्री० सतीगुणानांकथने । गुणोत्कर्षप्रतिपादिकायांवाचि । साधारिण्यर्थं प्रशंसार्थकेवाक्ये । स्तूयतेऽनया । स्तु + अ० । क्तिन् ॥ आदरेयथास्तौतिधनवन्तंयथेच्छया । तथाचेद्विश्वकर्त्तारं कोनमुच्येतबन्धनात् ॥

स्तुतिपाठकः । पुं० भाट० इ० प्र० सहचरजातौ । बन्दिनि । प्रातर्गेये । राजादेर्यशादेर्वीर्यादिनास्तुतिकर्त्तरि । स्तुतेः पाठकः ॥

स्तुतिग्रन्थः । पुं० भोगावल्याम् । । बन्दिपाठे ॥

स्तुतिव्रतः । पुं० स्तुतिपाठके ॥

स्तुत्यः । त्रि० स्तव्ये । स्तवनीये । यथा । प्रत्यक्षे गुरवः स्तुत्याः परोक्षे मित्रबान्धवाः । कर्मान्ते दासभृत्याश्च पुत्रा नैव मृताः स्त्रियः ॥ स्तोतुंयोग्यः । स्तु + अ० । एति स्तुशास्वृदृजुषः क्यपितिक्यप् । तुक् ॥

स्तुत्या । स्त्री० विद्रुमलतिकायाम् । सौराष्ट्रमृत्तिकायाम् । तुवर्याम् । टाप् ॥

स्तुनकः । पुं० छागे । इ० म० चं० खा ॥

स्तुभः । पुं० छागे । स्तुभ्नोति । स्तुभ्

भुग्नेऽपि । मूलविभुजादित्वात् क प्रत्ययः तुमर्थीपीनयान् ॥

स्तुषेय्यः । त्रि० स्तोतव्ये । स्तूयते । इ० अ० । स्तुवः कर्म्मण्यच्छन्दसि । छान्दसोयम् ॥

स्तूपः । पुं० मृदादिकूटे । राशीकृत मृत्तिकादौ । समुच्छ्राये । स्तौति । इ० अ० । स्तुवो दीर्घश्चेति पः ॥

स्तेनः । पुं० चौरे । तस्करे । प्रच्छन्नवञ्चके । प्रत्यक्षवञ्चकास्त्वेते नाटविकादयस्तु मनुः । यः परस्वं परोक्षेद्यमिति विभिन्ने च भोनान : परस्वे स्वत्वहेतुमन्तरेण वस्त्वमारोपयति० स्तेनस्तुतिभिः प्रसिद्धम् ॥ स्तेनयति । स्तेन चौर्य्ये । पचाद्यच् ॥ परमं यत्नमातिष्ठेत्स्तेनानांनिग्रहे नृपः । स्तेनानांनिग्रहादस्य यशो राष्ट्रं च वर्द्धते ॥ म० स्तेये । चौरस्य कर्म भावयोः ॥

स्तेमः । पुं० आर्द्रीभावे । क्लेदने । समुन्दने । स्तेमनम् । स्तिम आर्द्रीभावे । घञ् ॥

स्तेयम् । न० चौरस्य भावः कर्म वा : चौर्य्ये । यथा स्त्रीयमाणं परद्रव्यमुक्तम् ॥ स्तेनस्य भावः । प्रच्छन्नं वा प्रकाशं वा निशायामथवा दिवा । यत्परद्रव्यहरणं स्तेयं तत्परि

कौसितम् । अपिच । अन्यायेनप
रस्वस्वहरणं स्तेयमुच्यते • इति ॥
स्तेनस्य भावः कर्म्म वा । स्तेनाद्यन्न
लोपश्च ॥ महापातकेषु ब्राह्मणसु
वर्णहरणे ॥ निःक्षेपस्यापहर
णं नराश्वरजतस्य च । भूमिवज्रमणी
नाञ्च रुक्मस्तेयसमं स्मृतम् ॥

स्तेयफलः । पुं • कण्टकफले । तेजः
फले ॥

स्तेयी । पुं • चौरे । स्वर्णकारे ॥ स्ते
यमस्यस्य । अतइनिः ॥

स्तेनम् । न • स्तेये ॥

स्तैन्यः । पुं • चौरे ॥ न • स्तेनस्य भा
वे • कर्म्मणि च । चौर्ये । स्तेनस्य
भावः कर्म्म वा । स्तेनाद्यन्नलोपश्चेत्य
च • स्तेनादिति योगविभागात् ष्यञ् ॥

स्तैमित्यम् । न • जडतायाम् ॥ श
रीरस्याद्रचर्म्मावगुण्ठितत्वमिति वै
द्याः ॥

स्तोकः पुं • चातके ॥ त्रि • अल्पे ॥
स्तुच्यते । ष्टुचप्रसादे । घञ् । न्यङ्
क्वादित्वात् कुत्वम् ॥ स्तूयते वा ।
बाहुलकात् तुञः कः ॥

स्तोककः । पुं • चातके । स्तोकं कं
जलमस्य ॥ स्तोकं कायति वा । कै
शब्दे । आतोनुपेतिकः ॥

स्तोतव्यः । त्रि • स्तवनीये । स्तुत्ये ॥

स्तोता । त्रि • स्तवकर्त्तरि ॥ स्तौति
ष्टुञ् । तृच् ॥

स्तोत्रम् । न • स्तवे ॥ स्तूयतेऽनेन
ष्टुञ् • । दाम्नीशसेति करणे ष्ट्रन् । ति
तुत्रेतिनेट् ॥ प्रगीतमन्त्रसाध्यायां
स्तुतौ । उद्गात्रादिना गीयमानेऋ
ग्जाते । प्रगीतमन्त्रसाध्यगुणिनि
ष्ठगुणाभिधानं स्तोत्रमिति याज्ञिकानां
व्यवहारः ॥

स्तोभः । पुं • न • अर्थशून्ये वर्णे ॥
स्तोभः स्यात्साम विच्छेदे हेलने स्त
म्भनेऽपि चेति हेमचन्द्रः । साङ्केत्यं
पारिहास्यं वा स्तोभं हेलनमेव वा । वै
कुण्ठनामग्रहणमशेषाघहरं विदुरि
त्यत्र • स्तोभः गीतालापपूरणार्थंक्ष
तमिति श्रीधरस्वामिनः ॥

स्तोभितः । त्रि • प्रोत्साहिते ॥

स्तोमः । पुं • समूहे ॥ यज्ञे । स्तो
त्रे ॥ स्तूयतेऽनेन । ष्टुञ् • । अ
र्त्तिस्तुसुहीति मन् । सोमयागेछन्दो
गैः क्रियमाणायां पञ्चादिसंख्यका
यां स्तुतौ । मन्त्रसमूहे ॥

स्तोमक्षारः । पुं • सर्वक्षारे ॥

स्तोमवल्ली । स्त्री • काण्डीरे । ना
सासंवेदने । काण्डवेल • इ •
गौ • भा • प्र • लताप्रभेदे ॥

स्तौपिकम् । न • बुद्धद्रव्ये । चोवा •
इ • भा • प्र • ॥

स्त्यानम् । न • स्निग्धे ॥ प्रतिध्वानौ
॥ घनत्वे ॥ आलस्ये ॥ स्त्यैष्ट्यै
शब्दसङ्घातयोः । क्तः । अकर्म्म

स्यतायाम् । गुरुणाशिष्यमाणस्या प्यासनादिकमानष्टतायामिति यथा वत् । निश्चये

स्त्येनः । पुं॰ चौरे ॥ पमृते । सु धायाम् । स्त्यायति । स्त्यै॰ । स्त्या स्त्याहृञ्विभ्य इनच् ॥

स्त्री॰ । स्त्री॰ स्तनकेशवत्याम् । अ स्याः पर्यायो यथा । योषिदा लाबोषा नारी सीमन्तिनी वधूः । प्रतीपदर्शिनी वामा वनिता महिला तथेति ॥ स्त्यायति गर्भोऽस्याम् । स्त्यै॰ । स्त्यायतेर्ड्रट् । टिलोपः । यलोपः । टिड्ढेति ङीप् ॥ वृषक र्कटकन्याद्विकमकरमीनराशिषु । अत्युक्तभेदे ॥ गौस्त्री । यथा । गोपस्त्रीभिः । कर्योरिमे । देवति र्यङ्मनुष्येषु पुन्नामा भगवान् हरिः । स्त्रीनाम्नो लक्ष्मीर्मैत्रेय नानयो र्विद्यते परमिति विष्णुपुराणम् ॥ प्रजनार्थं महाभागाः पूजार्हा गृहदीप्तयः । स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन ॥

स्त्रीकरणम् । न॰ रतबन्धे ॥

स्त्रीगवी । स्त्री॰ धेनौ ॥

स्त्रीचित्तहारी । पुं॰ प्रियो ॥ त्रि॰ नारीमनोहारिणि ॥

स्त्रीचिह्नम् । न॰ भगे । योनौ ॥ स्त्री णामवाच्यदेशस्य क्लिन्नता डीवणस्य च । अभेदेपि मनोभेदात्तन : प्राये

गजन्यते ॥ धर्मखण्डं द्विधाभि न्नमपामीन्द्रः स्वपितम् । येरमन्ते नमस्तेभ्यः सर्वसकिमतः परम् ॥ नारीलक्षणे ॥ क्रिया चिह्नम् ।

स्त्रीचेष्टितम् । द॰ स्त्रीणां व्यवहारे ॥ मासानुगतिविपरीतचेष्टितत्वमुक्तं य था । धर्मो वै यो विनिगूहितेन वि दूरस्थं मे महिषोत्सवान । विपरीद ग्ध नचनं पुरेणदेवी विरक्ता किलका भिराजमिति ॥ तस्या विविक्तं ब्रह्म वैवर्त्ते प्रकृतिखण्डे १४ ऽध्याये द्रष्टव्यम् ॥

स्त्रीचौरः । पुं॰ कामुके । रतहिण्ड के ॥ त्रि॰ योषिदपहारि ॥ स्त्रि याः चौरः ॥

स्त्रीजितः । पुं॰ स्त्रैणे । स्त्रीवशी भूते ॥ वस्तुगत्या स्त्रीजितो यो निन्दि तः सर्वथैव हि । यथा । सनिन्द्य स्याप्यशुचिः पुमांश्च स्त्रियाजि तः । निन्दन्ति पितरो देवा वान्ध वाः स्त्रीजितं नरम् । स्त्रीजितं न नमाता पिता भ्राता च निन्दतीति ॥ अपिच । शुध्येद्विप्रो दशाहेन जा तके मृतके यथा । भूमिपो द्वादशाहे न वैश्यः पञ्चदशाहतः । शूद्रो मा सेन वेदेषु मातृवद्दीनसङ्करः । अ शुचिः स्त्रीजितः शुध्येच्चितादाह मकालतः ॥ न गृह्णन्ति स्वधां तस्य पितरः पिण्डतर्पणम् । न गृह्ण

नित्यदेवाश्रितस्थपुष्पफलादिकम् ॥ अनेन किं किं तपसा जपहोमप्रयत्नैः । विद्यया चैव यज्ञमाः स्त्रीभिर्यस्य मनोहृतमिति श्रीदेवीभागवते तुलस्युपाख्यानम् ॥ तस्य स्वर्गोपि निषिद्धः । यथा । स्त्रीजितस्य स्वर्गमार्गं पापस्य पुण्यं प्रणश्यति । न भूमौ पातकी पापात् पापिनां स्त्रीजितात् परः ॥ इति । स्त्रियाजितः ॥

स्त्रीधनम् । न । स्त्रीस्वस्वामिकीभूतधने । यस्मिन् धने पतिनिरपेक्षतया स्त्रिया अधिकारस्तस्मिन् ॥ तद्विधाः । पितृमातृसुतभ्रातृदत्तमध्यग्न्युपागतम् । आधिवेदनिकं बन्धुदत्तं शुल्कान्वाधेयकमिति ॥ मनुः । अध्यग्न्यध्यावाहनिकं दत्तञ्च प्रीतिकर्म्मणि । भ्रातृमातृपितृप्राप्तं षड्विधं स्त्रीधनं स्मृतम् ॥ नारदोपि । अध्यग्न्यध्यावाहनिकं भर्त्तृदायस्तथैव च । भ्रातृदत्तं पितृभ्याञ्च षड्विधं स्त्रीधनं स्मृतम् ॥ याज्ञवल्क्यः । पितृमातृपतिभ्रातृदत्तमध्यग्न्युपागतम् । आधिवेदनिकाद्यञ्च स्त्रीधनं परिकीर्त्तितम् ॥ तदेव मन्वर्थस्थितसङ्ख्यस्त्रीधनकीर्त्तनान्न षट्त्वसङ्ख्याविवक्षिता । किन्तु स्त्रीधनकीर्त्तनमात्रपराणि मुनिवचनानि । तदेतत्स्त्रीधनं यद्वृत्तैः स्वातन्त्र्येण दान विक्रय भोगान् कर्त्तुमधिकरोति । यदिदं किञ्चित् सङ्क्षिप्यात्र कात्यायनः । प्राप्तं शिल्पैस्तु यद्वित्तं प्रीत्या चैव यदन्यतः । भर्त्तुः स्वाम्यं भवेत्तत्र शेषं तु स्त्रीधनं स्मृतम् । अन्यत इति । पितृमातृभर्त्तृकुलव्यतिरिक्तात् । यल्लब्धम् । शिल्पं न चायदर्जितम् । तत्र भर्त्तुः स्वाम्यम् । स्वातन्त्र्यम् । अनापद्यपि भर्त्ता ग्रहीतुमर्हति । तेन स्त्रिया अपि धनं न स्त्रीधनमस्वातन्त्र्यात् । एतद्व्यतिरिक्तधनन्तु स्त्रिया एव दानाद्यधिकारात् ॥ कुलार्णवसेतौ श्रीमहानिर्वाणे श्रीसदाशिवः । पितृभिः श्वशुरैर्वापि दत्तं यद्धर्म्मसम्मतम् । स्वकृत्योपार्जितं यच्च स्त्रीधनं तत् प्रकीर्त्तितमिति ॥ स्त्रियाः । धनम् ॥ न भर्त्ता नैव च सुतो न पिता भ्रातरो न च । आदाने वा विसर्गे वा स्त्रीधने प्रभविष्णव इति दायभागः । प्रभविष्णवः । प्रभवः ॥

स्त्रीधर्म्मः । पुं । ऋतौ । पुष्पे । आर्त्तवे । रजसि ॥ स्त्रीणामनुष्ठेये ॥ तत्र मनुः । बालया वा युवत्या वा वृद्धया वापि योषिता । न स्वातन्त्र्येण कर्त्तव्यं किञ्चित्कार्यं गृहेष्वपि ॥ बाल्ये पितुर्वशे तिष्ठेत् पाणिग्राहस्य यौवने । पुत्राणां भर्त्तरि प्रेते न भजेत्

स्त्री स्वतन्त्रताम् ॥ पित्रा भर्त्रा सुतै-
र्वापि नेच्छेद्विरहमात्मनः । एषां
हि विरहेण स्त्री गर्ह्ये कुर्य्यादुभे कुले ॥
सदा प्रहृष्टया भाव्यं गृहकार्य्येषु दक्ष-
या । सुसंस्कृतोपस्करया व्यये चा-
मुक्तहस्तया ॥ यस्मै दद्यात् पिता
त्वेनां भ्राता वानुमते पितुः । तं शु-
श्रूषेत जीवन्तं संस्थितञ्च न लङ्घयेत्
॥ मङ्गलार्थं स्वस्त्ययनं यज्ञश्चासां प्र-
जापतेः ॥ प्रयुज्यते विवाहेषु प्रदानं स्वा-
म्यकारणम् ॥ अनृतावृतुकाले च म-
न्त्रसंस्कारकृत् पतिः । सुखस्य नि-
त्यं दातेह परलोके च योषितः ॥ वि-
शीलः कामवृत्तो वा गुणैर्वा परिव-
र्ज्जितः । उपचर्य्यः स्त्रिया साध्-
व्या सततं देववत् पतिः ॥ नास्ति स्त्री-
णां पृथग्यज्ञो न व्रतं नाप्युपोषितम् ।
पतिं शुश्रूषते येन तेन स्वर्गे महीयते ॥
पाणिग्राहस्य साध्वी स्त्री जीवतो वा-
मृतस्य वा । पतिलोकमभीप्सन्ती
नाचरेत् किञ्चिदप्रियम् ॥ कामन्तु
क्षपयेद्देहं पुष्पमूलफलैः शुभैः ।
न तु नामापि गृह्णीयात् पत्यौ प्रेते
परस्य तु ॥ आसीतामरणात् क्षान्ता
नियता ब्रह्मचारिणी । यो धर्म एक-
पत्नीनां काङ्क्षन्ती तमनुत्तमम् ॥
अनेकानि सहस्राणि कुमारब्रह्मचा-
रिणाम् । दिवं गतानि विप्राणाम-
कृत्वा कुलसन्ततिम् ॥ मृते भर्त्तरि
साध्वी स्त्री ब्रह्मचर्य्ये व्रते स्थिता । स्व-
र्गं गच्छत्यपुत्रापि यथा ते ब्रह्मचारि-
णः ॥ अपत्यलोभाद्या तु स्त्री भर्त्ता-
रमतिवर्त्तते । सेह निन्दामवाप्नो-
ति पतिलोकाच्च हीयते ॥ नान्योत्प-
न्ना प्रजास्तीह न चाप्यन्यपरिग्रहे । न
द्वितीयश्च साध्वीनां क्वचिद्भर्त्तोपदि-
श्यते ॥ पतिं हित्वापकृष्टं स्वमुत्कृ-
ष्टं या निषेवते । निन्द्यैव सा भवेल्लो-
के परपूर्व्वेति चोच्यते ॥ व्यभिचारा-
त्तु भर्त्तुः स्त्री लोके प्राप्नोति निन्द्य-
ताम् । शृगालयोनिं प्राप्नोति पाप-
रोगैश्च पीड्यते ॥ पतिं या नाभिच-
रति मनोवाग्देहसंयता । सा भर्तृ-
लोकमाप्नोति सद्भिः साध्वीति चो-
च्यते ॥ अनेन नारी वृत्तेन मनोवाग्-
देहसंयता । इहाग्र्यां कीर्त्तिमाप्नो-
ति पतिलोकं परत्र च ॥ इति मानवे
धर्म्मशास्त्रे पञ्चमोऽध्यायः ॥

स्त्रीधर्म्मिणी । स्त्री० ऋतुमत्याम् ॥
स्त्रीधर्म्मो रजोऽस्त्यस्याः । अतइ-
निठनाविति इनिः । ङीप् ॥

स्त्रीधवः । पुं० पुरुषे ॥

स्त्रीपरः । पुं० कामुके । षिड्गे ॥

स्त्रीपण्योपजीवी । पुं० सम्भोगार्थम-
न्यस्मै स्त्रियं दत्त्वा तद्धनोपजीविनि ॥

स्त्रीपुंसौ । पुं० स्त्रीमिथुने । द्वन्द्वे ॥
स्त्री च पुमांश्च । अचतुरेत्यः ॥

स्त्रीपुंसलक्षणा । स्त्री० पेटायाम् ॥

स्त्रीपुंसयोर्लक्षणं चिह्नं स्तनश्मश्रु निर्णयश्चामसा ॥

स्त्रीपुंसधर्मः । पुं० स्त्रीपुंसयोर्व्यवहारे । स च मानवेन नवमाध्याये द्रष्टव्यः ॥

स्त्रीपूर्वः । पुं० स्त्रीजिते ॥

स्त्रीप्रसाधः । पुं० कुटुम्बिनि ॥ स्त्रीप्रमाणोऽप्यत्र । अथ पुरुषप्रमाणीरित्यपि ॥

प्रशंसा । स्त्री० नारीश्लाघायाम् । सा यथा । जये धरित्र्याः पुरमेव सारं पुरे गृहं सद्मनि चैकदेशः । तत्रापि शय्या शयने वरा स्त्री रत्नोज्ज्वला राज्यसुखस्य सारम् ॥ रत्नानि विभूषयन्ति योषा भूष्यन्ते वनिता न रत्नकान्त्या । चेतो वनिता हरन्त्यरत्ना नो रत्नानि विनाङ्गनाङ्गसङ्गम् ॥ आकारं विनिगूहतां रिपुबलं जेतुं समुत्तिष्ठतां तन्त्रं चिन्तयतां कृताकृतशतव्यापारशाखाकुलम् । मन्त्रिप्रोक्तनिषेविणां क्षितिभुजामाशङ्किनां सर्वतो दुःखाम्भोनिधिवर्त्तिनां सुखलवः कान्तासमालिङ्गनम् ॥ श्रुतं दृष्टं स्पृष्टं स्मृतमपि नृणां ह्लादजननम् न रत्नं स्त्रीभ्योऽन्यत् क्वचिदपि कृतं लोकपतिना । तदर्थं धर्मार्थौ सुतविषयसौख्यानि च ततो गृहे लक्ष्म्यो मान्याः सततमबला मानविभवैः ॥ येऽप्यङ्गनानां प्रवदन्ति दोषान् वैराग्यमार्गेण गुणान् विहाय । ते दुर्जना मे मनसो वितर्कः सद्भाववाक्यानि न तानि तेषाम् ॥ प्रब्रूत सत्यं कतरोऽङ्गनानां दोषोऽस्ति यो नाचरितो मनुष्यैः । धार्ष्ट्येन पुम्भिः प्रमदा निरस्ता गुणाधिकास्ता मनुनात्र प्रोक्तम् ॥ सोमस्तासां ददच्छौचं गन्धर्वः शिक्षितां गिरम् । अग्निश्च सर्वभक्षत्वं तस्मान्निष्कसमाः स्त्रियः ॥ ब्राह्मणाः पादतो मेध्या गावो मेध्याश्च पृष्ठतः । अजाश्वा मुखतो मेध्याः स्त्रियो मेध्यास्तु सर्वतः ॥ स्त्रियः पवित्रमतुलं नैता दुष्यन्ति कर्हिचित् । मासि मासि रजो ह्यासां दुष्कृतान्यपकर्षति ॥ जामयो यानि गेहानि शपन्त्यप्रतिपूजिताः । तानि कृत्याहतानीव विनश्यन्ति समन्ततः ॥ जायया वा जनित्र्या वा सम्भवः स्त्रीकृतो नृणाम् । हे कृतघ्नाः स्त्रियो निन्दां कुर्वतां वः कुतः शुभम् ॥ दम्पत्योर्व्युत्क्रमे दोषः समः शास्त्रे प्रतिष्ठितः । नरा न समवेक्षन्ते तेनात्र वरमङ्गनाः ॥ बहिर्लोम्ना तु षण्मासान् वेष्टितः खरचर्मणा । दारातिक्रमणे भिक्षां देहीत्युक्त्वा विशुध्यति ॥ न शतेनापि वर्षाणामपैति मदनाशयः । तत्राशक्त्या निवर्त्तन्ते नरा धैर्येण योषितः ॥

अष्टौ धाष्ट्यमसाधुतां निन्दतामनघाः
स्त्रियः । मुखतः मित्रवीरा कांति
इव चौरेतिजल्पताम् ॥ पुरुषघट्
सानिकामिनीनां कुरुतैयमिनिर्दिष्टाम
तानि पश्यात् । सुतान् सृजतवा कृता
गता सुमनग स्वप्राणमिसम्प्रसिद्ध-
म् ॥ स्त्रीरत्नमे गोविन्दनाथ युधानि
स्त्रीपि सम्प्रत्यर्पणी यद्वरोसी । राज्य
स्य सारोऽप्यमनल्पनाथतत्त्वात्सत्रा-
ह्वौपमघास्रियम् ॥ कामिनीप्रथ
मयौवनान्वितां मन्दवल्गु मृदुपीडि
तस्तनाम् । उत्पलीसमवलम्ब्य
यारतिः सान धातुभुवनेऽस्तिमेष
तिः । तदेवमुनि सिद्धधवारणै
मीन्यमाद्यपरसेव्यसेवनात् । ब्रू
तधात्तु भवनेस्त्रि किंसुखं यद्वः स
मस्तनुव्यनमियम् ॥ चाम्रक्षौ
टाश्चमिदंमिह दृष्टपुंस्त्रीप्रयोगेण ज
गत्समस्तम् । क्रौडावका यत्र चतुर्मुख
त्वमीशोऽपि लीमा कमितीयुवस्था ॥
वृहत्पाराशरसंहितायाम् ७१ अध्या
यः ॥

स्त्रीप्रियः । पुं० षट्पदातिथौ । आ
म्रवृक्षे ॥

स्त्रीमुखपः । पुं० दोहदे ॥

स्त्रीयात्रा । स्त्री० योषित्प्रयाणे ।
यथा । कुलीरकन्याघटसंस्थितैरवौ
सितसुरेरिप्रथमाश्विनीपराम् । वि
हाय याम्यानिलसुधाशीशिषबि
शीशोऽन्यदशोषमुक्तम् ॥ प्रथमाप्र
तिपत् । उत्तरा० उत्तरापथम् ॥

स्त्रीरोगः पुं० नारीणामामये ॥

स्त्रीलज्जा । स्त्री० पिपीलिकाया
म् ॥

स्त्रीवधम् । न० योषितां समूहे ॥
स्त्रीणां समाजः भाला चेति नपुंसकत्व
म् ॥

स्त्रीस्वभावः । पुं० मर्दलके । सौ
विदल्ले ॥ योषितां शीले ॥ यथा ।
एषा हि प्रकृतिः स्त्रीणामासृष्टेरघुन
न्दन । समस्थमनुरज्यन्ति विषमस्थं
त्यजन्ति च ॥ शतह्रदानां लोलत्वं
शस्त्राणां तीक्ष्णतां तथा । गरुडानि
लयोः शैघ्र्यमनुगच्छन्ति योषितः ॥
रामायणे वनकाण्डे च यथा । हृ
दयं क्षुरधाराभं शरत्पद्मोत्सवं मुख-
म् । सन्धिप्रसंसुमधुरं वचनं
स्वार्थसिद्धये ॥ प्रकोपे विषतु
ल्यं तदनु कामिनीसहितम् । दु
र्ज्ञेयं तद्धि भर्त्रा यन्निगूढं कामकेवल
म् ॥ तद्यातासां मनोविन्यं प्रवर्त्तं सोऽह
संपरम् । इदं कार्यं च्छलातृका
र्यं सम्मत्याय दुरत्यया ॥ पुंसश्चाष्ट
गुणः कामः शक्त्या सोऽपि गद्गुणः
। आहारो द्विगुणो नित्यं मैथुनं
चतुर्गुणम् ॥ कोपः पुंसः ष
ड्गुणश्च व्यवसायश्चानिश्चितम् ।
यश्चैते दोषनिवहाः काष्ठा तथापि

तामह ॥ क्वाक्रीडाकिंसुखंपुंसि।
वित्तम् चाग्रयथेसमनि । तेनः प्रच
ष्टं सम्भोगेहिवालापेवच : वय : ॥
धनवचस्त्वतिप्रीतोरस्या।सम्भोवपुः
वय :। साहित्येपोवपं नष्टं बवहि
मानमायनम् ॥ सर्वनामस्त्रियश्चा
सैवस्मन्नारीषुकिंसुखम् ॥ यावद
गोचतिवस्त्रोसश्रोके।योग्यतापरः।
पुमान्नारींस्त्रीकर्त्तुं समर्थस्तावदे
वहि ॥ रोगिणं निर्गुणं वृद्धंधंयो
षित्रापिचतिप्रियम् । सो काचारत
यातस्मै दद्यात्याहारमल्पकमिति ॥

स्त्रैण :। त्रि० स्त्रीसम्बन्धिनि ॥ स्त्रि
या इदम्० स्त्रीषुभवः० स्त्रीभिः कर
ति० स्त्रीभ्योहितोवा । स्त्रीपुंसा
भ्यांनञ्स्नञाविति नञ् ॥ स्त्रिया
म्० स्त्रैणी ॥

स्त्र्यागारम् । न० स्त्रीणांगृहे ॥

स्थः । पुं० स्थले ॥ तिष्ठत्यस्मिन् ।
स्था० । घञर्थे क : ॥

स्थग :। त्रि० धूर्त्ते ॥

स्थगनम् । न० अपिधाने । अन्तर्धौ

स्थगित :। त्रि० आच्छादिते । संवी
ते । रुद्धे ॥ स्तब्धे ॥

स्थगितगी :। त्रि० स्तब्धवाचि ॥

स्थगी । स्त्री० ताम्बूलपात्रविशेषे ।
ताम्बूलकरङ्के । पानवट्टा० इ०
भाषा० प्रसिद्धे ॥

स्थगिलम् । न० स्थलसीमनि । अ-

स्थरे ॥

स्थगिलशायी । त्रि० अस्वरशायिनि ॥
स्थगिले० शेते । शीङ् शयने । व्र
ते० णिनिः ॥

स्थगु । न० गडौ ॥

स्थण्डिलम् । न० चत्वरे । यज्ञे ।
अजिरे । अनिम्नोन्नतायांपरिष्कृता
यांभूमौ ॥ यज्ञार्थंपरिष्कृतायांभु
वि ॥ यज्ञेपरिष्कृतस्याग्निस्थानात्स्थ
ण्डिलचत्वरे । वृत्तिचन्द्ररत्नावली
॥ होमनिमित्ताऽग्निस्थापनार्थंपरि
मितभूमौ । यथा । रम्ये परिष्कृ
तेदेशेतुषाङ्गारादिवर्जिते । हस्तमा
त्रप्रमाणेनस्थंडिलं रचयेत्सुधीरि
तिमहानिर्वाणतन्त्रम् ॥ ब्रह्मचर्य
स्थितानामपि। तस्मात्सम्यक्परीक्ष्ये
वकर्त्तव्यं शुभवेदिकम् । हस्तमात्रं
स्थण्डिलंवासञ्चिप्रेहोमकर्मणो
ति ॥ क्रियायोगसारेपि । कुण्डमे
वंविधंनस्यात्स्थण्डिलंवासमाश्रये
दिति । शारदातिलकेपि । नित्यं
नैमित्तकं काम्यंस्थण्डिलेवासमाच
रेत् । हस्तमात्रन्तुतत्कुर्याच्चतुरस्रं
समन्ततइति ॥ केवलायांशुभभूमौ
॥ स्थलस्थितम् । स्थलस्थाने । ति
ष्ठत्यस्मिन्निति वा । स्था० । मिथि
लादयश्चेतिसाधु ॥

स्थण्डिलशायी । पुं० स्थाण्डिले ॥
यः स्थण्डिलेव्रतवशाच्छेतेस्थण्डिल

शाय्यसौ । स्थण्डिलेकुशाद्यास्तीर्य्य शेतेऽसौ । व्रती० इतिमेदिनी ॥

स्थण्डिलसितकम् । न० वेद्याम् ॥ इ० हा० ली ॥

स्थण्डिलेशय: । पुं० स्थाण्डिले ॥ व्रतेनस्थण्डिलेशेते । शीङ्० अधिकरणे शेतेरित्यच् । अलुक् ॥

स्थपति: । पुं० वृहस्पतौ । वृहस्पतिसवकर्त्तरि ॥ जीवेष्टियाजके । स गीष्पतीष्ट्यास्थपतिरित्यमर: । सम्बेतिसम्बन्ध: ॥ कुबेरे । कञ्चुकिनि । सौविदे ॥ यज्वनि ॥ क्षत्रभेदे । शिल्पिविशेषे । राज० था बो० इ० भा० प्र० ॥ तल्लक्षणं यथा । वास्तुविद्याविधानज्ञोलघुहस्तोजितश्रम: । दीर्घदर्शीचशूरश्च स्थपति: परिकीर्त्तित: इति ॥ स्थानंस्थ: । सुपिस्थ इत्यच० स्थ इतियोगविभागात्क: । स्थस्यपति: । यद्वा । तिष्ठन्त्यस्मिन् । ष्ठा० । घञर्थे क: । स्थस्यासौपतिश्च ॥ वि० प्रधाने ॥

स्थपुट: । त्रि० विषमोन्नते ॥ विषमसञ्चारिणि ॥

स्थलम् । न० जलशून्याकृत्रिमभूभागे । स्थल्याम् ॥ स्थलति । ष्ठल० । पचाद्यच् ॥ वस्त्रगृहे ।

स्थलकन्द: । पुं० अग्राम्यकन्दे । वनशोलूइतिभाषाप्र० ॥

स्थलकमलम् । न० स्थलपद्मे ॥

स्थलकुमुद: । पुं० करवीरे ॥ इ० रा० शट: ॥

स्थलपद्म: । पुं० माणके । मानकच्० इ० भा० ॥ न० पुष्पप्रभेदे । छत्रपत्रे । तमालके ॥ प्रपौण्डरीके ॥ स्थलपद्मं साधुपुष्पं दृष्टिकृत्पुण्डरीयकमित्यमर: ॥

स्थलपद्मिनी । स्त्री० स्थलपद्मे ॥

स्थलपाकजम् । न० पक्कमांसविशेषे ॥ यथा स्थलेनपक्कं यन्मांसं तज्ज्ञेयं स्थलपाकजम् ॥

स्थलमञ्जरी । स्त्री० अपामार्गे ॥

स्थलविहङ्गम: । पुं० मयूरादौ ॥ सथलचरविहङ्गम: ॥

स्थलशृङ्गाट: ।
स्थलशृङ्गाटक: । पुं० गोक्षुरे ॥

स्थलसीमा । पुं० सर्यादे ॥

स्थला । स्त्री० पुरुषेणसंस्कृतायां भूमौ । स्थलति । ष्ठल० । पचाद्यच् । टाप् ॥

स्थली । स्त्री० अकृत्रिमायांभूमौ ॥ जानपदेतिङीष् ॥

स्थलेरुहा । स्त्री० घृतकुमार्य्याम् । दग्धायां ॥ वि० स्थलजाते ॥ स्थलेरोहति । रुह० । इगुपधेति क: । तत्पुरुषेकृतीत्यलुक् ॥

स्थलेशय: । पुं० मृगादौ ॥ स्थलेशेते । अधिकरणे शेतेरित्यच् ॥

ऽस्य. ग्रथवासिस्थलुक् । त्रि० स्थलशायिनि ॥

स्थविः । पुं० स्थापके । तन्तुवाये । तिष्ठति । ष्ठा० । कृषि घृष्विच्छविस्थविकीकिदिविरिति क्रिन्० निपातनात्साधुः ॥ नाके । स्वर्गे ॥

स्थविरः । पुं० । ब्रह्मणि । सुरज्येष्ठे ॥ न० शैलेये । अश्मपुष्पे ॥ त्रि० वृद्धे । यथा । नतेनवृद्धो भवति येनास्य पलितं शिरः । यो वै युवाप्यधीयानस्तं देवाः स्थविरं विदुरिति मनुः । अचले । तिष्ठति । ष्ठा० । अजिरशिशिरेतिकिरच्० तिष्ठतेर्वुक्० ह्रस्वश्च ।

स्थविरा । स्त्री० वृद्धायाम् । महाश्रावण्याम् ॥

स्थविष्ठः । त्रि० अतिस्थूले । स्थूलतमे । अयमेषामतिशयेन स्थूलः । स्थूलदूरेतीष्ठनि साधुः । वैराजवपुषि स्थविते भगवद्रूपे ॥

स्थवीयान् । त्रि० स्थूलतरे । अयमनयोरतिशयेन स्थूलः । ईयसुन् । स्थूलदूरेत्यादिना पूर्वस्य गुणलोपौ ॥

स्थाणुः । पुं० शम्भौ । द्रुमे । निश्चले । प्रलयेऽपि तिष्ठति एकरूपेण । ष्ठा० । स्थो णुरिति णुप्रत्ययः । स्थितिशीलानि पृथिव्यादीनि तिष्ठन्त्यस्मिन्निति वा । कीले । गन्धद्रव्यविशेषे । जीवके । पुं० न० शाखापत्रादिरहिततरौ । ध्रुवे । अचले । त्रि० स्थैर्यान्विते । स्थिरे । अविकारिणि । सदैकरूपे ॥

स्थाणुप्रिया । स्त्री० कुरुक्षेत्रवर्तिन्यामन्वायां ॥

स्थाणुवटतीर्थम् । न० तीर्थविशेषे ॥

स्थाणुतीर्थम् । न० तीर्थविशेषे । काश्यां : शिवस्य लिङ्गेन परिचितं तीर्थम्० स्थाणुतीर्थम् ॥ काश्यां स्थाणुसंज्ञके ।

स्थाण्डिलः । पुं० स्थण्डिलशायिनि । स्थण्डिले शयितुं नियमोऽस्य । स्थण्डिलाच्छयितरि व्रते इत्यण् ।

स्थापत्यकम् । न० अलङ्कारादिषु च तेमाकीटादौ यथा च स्थापक हिनस्ते स्थापयामिते । माकीटमयूकीपानाहरयुक्तागरुस्फटकाः । यज्ञस्य सेव्वरीमदुकवचका कस्तूरावपीति । कुङ्कुमाद्वैरितन्माचेन्द्रयतस्थान्तरे० माकीटादिस्थापकं कृतमित्यर्थः ॥

स्थाण्वीया । स्त्री० स्थाणुतीर्थाधिष्ठात्र्यादेव्याम् ।

स्थाण्वीश्वरः । पुं० कुरुक्षेत्रस्थे शिवलिङ्गविशेषे ।

स्थातव्यः । पुं० स्थानीये ।

स्थानम् । न० सादृश्ये । अवकाशे ।

स्थितौ । यसक्तौ । अन्यसन्धौ । आज
नि । राज्ञोऽष्टवर्गस्यापचयोपचयाभा
वेन संस्थितौ । अष्टवर्गस्यापचयः
क्षयः । तस्यैवोपचयो वृद्धिः । त
स्यैवापचयोनाप्युपचयः स्थानम् ।
तदुक्तम् । क्षयः स्थानञ्च वृद्धिश्च
वर्गो नीतिविदाम् । क्षयवृद्ध्यो
रभावेन स्थानमुक्तं मनीषिभिरिति
॥ राज्ञा चिन्तनीये पुरदण्डकोषपुरा
ष्ट्रे पुचतुर्षु ॥ तिष्ठत्यस्मिन्निति । स्था +
। अधिकरणे ल्युट् । तत्र दण्डोऽस्मिन्
ति । दण्डोऽस्य स्वरूपपदार्थः ।
तेषां पोषणं रक्षणादि राज्ञा चिन्तनी
यम् । कोषोऽर्थनिचयः । तस्याय
व्ययादि । पुरस्य रक्षणादि । राष्ट्रं
देशः । तस्यापि मनुष्यपश्वादिधा
रणापमस्वादि चराजा चिन्तयेत् ॥
मीचे ॥ तिष्ठत्यस्मिन् नतु कदा
चिच्च्यवते । स्था + अधिकरणे ल्यु
ट् ॥ सधार्ये ॥ गृहे ॥ देशसाम्या
न्यस्थानमिति मीमांसकाः । त
द्विविधम् पाठसादेश्यमनुष्ठान
सादेश्यञ्च । स्थानञ्च क्रमश्च स्थान
क्रमम्, । पाठसादेश्यमपि द्विवि
धम्, । यथासङ्ख्यपाठः सन्नि
धिपाठश्चेति । तत्रैन्द्राग्नमेकादश
कपालं निर्वपेत् । वैश्वानरं द्वाद
शकपालं निर्वपेदित्येवं क्रमविहि
तेषु । इन्द्राग्नीरोचनादिवेत्यादौ

नांयाज्यानुवाक्यामन्त्राणां यथासङ्
ख्यं प्रथमस्य प्रथमं द्वितीयस्य द्वितीय
मित्येवं रूपो विनियोगो यथासङ्
ख्यपाठात् । प्रथमपठितमन्त्रस्यैव
मध्याकाङ्क्षायां प्रथमतो विहितं
कर्म्म प्रथममुपस्थितं समानदेशत्वा
त् । एवं द्वितीयमन्त्रस्यापि वैकल्पिका
ङ्गानां प्राकृताङ्गानुवादेन विहितानां
सद्य अपठितानां विकृत्यर्थत्वं सन्नि
धिपाठात् । यथा । धामच्छिनामाना
म । तेषां हि मध्याकाङ्क्षायां प्रकृ
तं विकृत्यपूर्वं भाव्यत्वेनाश्वम्
ध्यते । उपस्थितत्वात् । स्तनन्तफल
त्वेऽपि कुतस सन्निधिपाठाद्वर्ज्याय्यत्तः
। पशुधर्माणामग्नीषोमीयार्थत्वम
नुष्ठानसादेश्यात् । औपवसथ्येऽङ्गि ।
अग्नीषोमीयः पशुरनुष्ठीयते । तस्मिन्न
ह्न्येव दिने । तेधर्मा पठ्यन्ते । अतस्ते
षां तन्मध्याकाङ्क्षायामनुष्ठेयत्वे
नोपस्थितपशुरूपवर्गेश्वरात्यत्वे न
सम्बध्यन्ते । सम्बन्धोन समाख्यातः
प्रकृतम् । अत एव शुन्धध्यमन्त्रः सा
न्नाय्यपात्रम् । पाठसादेश्यात् ।
न तु पौरोडाशिकमिति समाख्यया पु
रोडाशपात्रमिति ॥ सम्बन्धविशे
षे पदमितिवरुणप्रघासेषु : । य
था । पितृस्थानीयः । पितुरिव स्था
नमस्येति बहुव्रीहि : ॥ स्थीयतेऽ
त्र । स्था + अधिकरणे भावे वा ल्युट् ।

। तिष्ठन्त्यस्मिन्नित्यस्मादिति व्युत्पत्त्या क्वचित् स्थानशब्दोऽयं वाच्यो ॥ निकटे ॥ स्वधर्मानुष्ठायिनामसम्यग्वृत्तिनाञ्च स्थानविशेषप्राप्तिर्यथा । वर्णानामाश्रमाणाञ्च सम्यग्धर्मानुपालिनाम् । असम्यग्वृत्तिनां लोकान् ब्रह्मा चक्रे यथा यथा ॥ प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रियावताम् । क्षत्रियाणां तथा चैन्द्रं सङ्ग्रामेष्वनुवर्त्तिनाम् ॥ वैश्यानां मारुतं स्थानं स्वधर्ममनुवर्त्तिनाम् । गान्धर्वं शूद्रजातीनां परिचर्य्यानुकारिणाम् ॥ अष्टाशीतिसहस्राणां यतीनामूर्द्ध्वरेतसाम् । स्मृतं तेषान्तु यत् स्थानं तदेव गुरुवासिनाम् ॥ सप्तर्षीणाञ्च यत् स्थानं स्मृतं तद्वनौकसाम् । प्राजापत्यं गृहस्थानं गृहधर्मानुवर्त्तिनाम् ॥ न्यासिनान्तु परस्वध्यायोगिनाममृतं स्मृतम् । एकान्तवासिनां ब्रह्मध्यायिनां परमं पदम् ॥ तामिस्रमन्धतामिस्रं महारौरवरौरवम् । असिपत्रवनं घोरं कालसूत्रमवीचिमत् ॥ वेदकनिन्दकानान्तु यज्ञस्याघातकारिणाम् । स्थानमेतत् समाख्यातं स्वधर्म्मं विनिवर्त्तिनाम् ॥ इति वह्निपुराणे सर्गकथननामाध्यायः ॥

स्थानकम् । न० आलवाले ॥ नगरे ॥

स्थानचञ्चला । स्त्री० वर्वराख्ये ॥

स्थानच्युतः । त्रि० स्थानभ्रष्टे ॥ यथा । स्थानस्थितस्य पद्मस्य मित्रे वरुणभास्करौ । स्थानच्युतस्य तावेव क्लेदशोषणकारकौ ॥ इति ग० पु० ॥

स्थानपालः । पुं० स्थानरक्षके ॥

स्थानभ्रष्टः । त्रि० पदच्युते ॥ यथा । स्थानस्थितानि० पूज्यन्ते पूज्यन्ते च पदस्थिताः । स्थानभ्रष्टा न पूज्यन्ते केशा दन्ता नखा नराः ॥ इति गारुडेऽध्यायः ११५ ॥

स्थानाध्यक्षः ।)
स्थानिकः ।) त्रि० स्थानरक्षके ॥

स्थानी । त्रि० स्थानविशिष्टे । स्थानीवति ॥

स्थानीयम् । न० पुर्य्याम् । पत्तने । निगमे । नगरे ॥ प्राकारादिना दुर्गं योजनविस्तीर्णं नगरं स्थानीयम् । स्थानाय हितम् । तस्मै हितमिति० छः ॥ त्रि० स्थानभवे ॥ स्थानसम्बन्धिनि ॥

स्थाने । अ० कारणार्थे । हेतौ । युक्ते ॥ सादृश्ये । साम्ये स्थानस्य कारणम् । स्थानशब्दात्० तत्करोतीति णिजन्तादिप्रत्ययः ॥

स्थापकः । त्रि० स्थापनकर्त्तरि ॥ स्थापयति । स्था० । णिजन्तात् ण्वुल् ॥

स्थापत्यः । पुं० राज्ञामन्तागारे वहीरक्षाधिकृते । सौविदल्ले । कञ्चुकिनि । तिष्ठन्ति पुरुषाः । वजयर्थे

कः । स्थामांदारोणांपतिः पाल
कः । स्थपतिरिव । चतुर्वर्णादित्वा
त्स्वार्थे ष्यञ् ॥ न० स्थपतेर्भावे ॥
स्थापनम् । न० रोपणे । निवेशने ॥
पुंसवने ॥ समाधौ ॥ स्थितिहेतु
प्रयत्ने ॥ स्थापयति । छा० । ल्यु
ट् ॥
स्थापना । स्त्री० स्थापने । निवेशने ॥
मनुष्याद्याश्रयत्वे ॥
स्थापनी । स्त्री० पाठायामोषधौ ॥
स्थापितः । त्रि० निश्चिते ॥ न्यस्ते ॥
स्थाप्यः । त्रि० रक्षितधने । न्यास-
धने ॥
स्थाम । न० सामर्थ्ये ॥ तिष्ठत्यनेन ।
छा० । सर्वधातुभ्यो मनिन् ॥
स्थायी । पुं० भावभेदे । रत्यादिभावे
षु ॥ यथा । रतिर्हासश्च शोकश्च क्रो
धोत्साहौ भयन्तथा । जुगुप्सा विस्म
यशमौ स्थायिभावाः प्रकीर्त्ति
ताः ॥ समवेयः समुद्भूतः स्वा
न्ते यश्चावतिष्ठते । भावः स्थायीस
विज्ञेयो व्यभिचारी ततोऽन्यथेति ॥
त्रि० स्थिरे । स्थितिमति ॥ योऽपि
राजा स्वदेशे दुर्गं कृत्वा तिष्ठति स-
स्थायीत्युच्यते ॥ तिष्ठति । छा० ।
स्थाच्छादित्वाण्णिनिः । आतोयुक्
चिण्कृतोरितियुक् ॥
स्थायुकः । पुं० एकग्रामाध्यक्षे ॥
स्थातुंशीलमस्य । छा० । लषप

तपदस्थोभूभृष्विष्णुषाञ् ॥ त्रि०
स्थिरे ॥
स्थालम् । न० स्वर्णादिनिर्मितभोजन
पात्रे । थाल० इ० भा० प्र० ॥ तिष्ठ
त्यन्न । छा० । स्थाचतीत्यालच् ॥
स्थाली । स्त्री० ओदनादिपचनपा-
त्रे । पिठरे । उखायाम् । कु-
ण्डे । हांडी० इ० भा० प्र ॥ तिष्ठति
छा० । स्थाचतिमृजीरालच् शालजा
लीयचः । जातेरितिङीप् ॥ पा
टलावृक्षे ॥
स्थालीपाकः । पुं० भाजनपक्वान्ना
दौ ॥ मांसाष्टकाश्राद्धे स्थालीपाकस्य
मांसप्रतिनिधित्वं यथा गोभिलः ।
अपिवा स्थालीपाकं कुर्वीतेति । त
द्विधानन्तु । स्थालीपाकं पशुस्थाने कु
र्याद्यद्यानुकल्पिकम् । श्रपयेत्तं सव
त्सायास्तरुण्यागोः पयस्यनु । वृ
तिश्छन्दोगपरिशिष्टोक्तं ग्राह्यम् । अ
न्विति० ओदनचरौः पचेत् ॥
स्थालीपुरीषम् । न० स्थालीलग्नेद
ग्धान्ने ॥
स्थालीपुलाकः । पुं० न्यायविशेषे
॥ यथा । स्थालीस्थस्तण्डुलाएकस
र्वेषिक्लिन्नाभिमतः । समकाला
भिसंयोगाभिस्वात् प्रतिपन्नवत् ।
कृतिस्थालीपुलाकन्यायेन यथैकस्लि
ङ्गस्य पक्वेदेनापूर्वे शाकस्यना
त् । प्रतिमूलंहस्तमर्द्दनादिनासकु

टितत्वेन स्थालीमितमन्नमासत्वम् ॥

स्थालीबिलम् । न० पाकपात्रस्याभ्यन्तरे । स्थाल्याः मध्यभागे ॥

स्थालीबिलीय ।) त्रि० पाकयोग्य
स्थालीबिल्य ।) तण्डुलादौ ॥ स्थालीबिलमर्हतीति । स्थालीबिलादिति० क्रमेण छयतौ ॥

स्थालीवृक्षः । पुं० नन्दीवृक्षे । अश्वत्थभेदे । बेलियापीपर० इ० भा० प्र० ॥

स्थावरः । पुं० पर्वते ॥ न० धनुषि । कोदण्डे ॥ त्रि० जङ्गमेतरे । अचलवस्तुनि ॥ स्थितशीले ॥ स्थानशीलः । स्थेशभासपिसकसो वरच् ॥

स्थावरजङ्गमः । पुं० एकमधानसाधर्म्यसंपद्यातसमष्टौ । धाना० इ० भा० प्र० ॥ स्थावरजङ्गमाश्च ॥

स्थावरादि । न० वत्सनाभविषे ॥

स्थाविरम् । न० वृद्धत्वे ॥ तत्तु सप्ततिवर्षात् परं भवति । यथा । आषोडशाद्भवेद्बालस्तरुणस्तत उच्यते । वृद्धः स्यात् सप्ततेरूर्ध्वं वर्षीयान्नवतेः परं ॥ परमितस्मृतिः ॥ स्थविरस्य भावः कर्म वा । युवादित्वादण् ॥

स्थासकः । पुं० चार्चिक्ये ॥ आत्मादर्पणेषु ॥ बुद्बुदाकारमण्डले ॥ हस्तावस्य तस्यनिर्माणमुद्राया म् । सांवा० इ० भा० प्र० ॥ तिष्ठति । ष्ठा० । बाहुलकात् मः । स्वार्थे कन् ॥

स्थास्नुः । त्रि० स्थिरतरे ॥ स्थानशीलः । ग्लाजिस्थश्च ग्स्नुः ॥ स्थायिनि ॥ शाश्वते वृक्षे ॥

स्थिकः । पुं० कटिप्रोथे ॥ इ० श० र० मा० ॥

स्थितः । त्रि० प्रतिज्ञातवति । सप्रतिज्ञे ॥ ऊर्ध्वे । निश्चले । स्थिरे । वर्त्मसागे । सत्युत्थिते ॥ ष्ठा० । क्तः । द्यतिस्यतिमास्थामित्तिकारान्तादेशः ॥ मर्यादया स्थिते ॥ निवृत्तिगतिकीयोषितः स्थितः प्रोच्यते जनः ॥

स्थितधीः । त्रि० स्थितप्रज्ञे । स्थिरा निश्चला धीर्यस्य सः ॥

स्थितप्रज्ञः । त्रि० असम्मूढे । परमात्मनिमग्ने विदुषि ॥ स्थिता प्रतिष्ठिता च आत्मानात्मविवेकजा प्रज्ञा यस्य सः ॥ स्थिता निश्चला । अहं ब्रह्मास्मीति प्रज्ञा यस्य वा । यथ श्रीदृश्यवति । अत्र भगवान् । प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् । आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः । वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥

स्थितिः। स्त्री॰ अवस्थाने। ऊर्द्ध्वावस्थाने॥ मर्यादायाम्। न्यायपथस्थितौ। संस्थायाम्॥ ईश्वरेच्छानिरुद्धस्य सर्वलोकस्य स्वगोचरे नियोगस्थापने। विद्यमानतायाम्। सृष्टिप्रलययोर्मध्ये॥ सीमनि॥ स्थानम्। ष्ठा॰। स्थागापापचोभावे॰ क्तिन्॥ तिष्ठत्यनया। बाहुलकादधिकरणे क्तिन्॥

स्थितिस्थापकः। पुं॰ संस्कारविशेषे। अन्यथाकृतस्य पुनस्तदवस्थापादके घटादिपृथिवीवृत्तौ॥

स्थिरः। पुं॰ शनैश्चरे। मोक्षे। देवे॥ नगे। पर्वते॥ वृक्षे॥ कार्त्तिकेये॥ धववृक्षे॥ वृषे॥ वृषसिंहवृश्चिककुम्भराशिषु॥ न॰ नक्षत्रविशेषेषु। यथा। उत्तरात्रयरोहिण्योर्भास्करश्च ध्रुवं स्थिरम्। तत्र स्थिरं बीजगेहं शान्त्यारामादिसिद्ध्यतीति॥ त्रि॰ कठिने॥ अचले॥ दृढप्रयत्ने। रसाद्यंशेन चिरकालस्थायिनि शरीरे। तिष्ठति। ष्ठा॰। अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिराः। इति किरच्॰ टिलोपः॥ षड्भावविकाररहिते सदेकरूपे॥

स्थिरकर्म्मा। त्रि॰ आफलोदयकारिणि॥

स्थिरगन्धः। पुं॰ चम्पके॥ त्रि॰ स्थिरस्थायिसौरभयुक्ते। स्थिरो गन्धो यस्मिन्॥ *

स्थिरगन्धा। स्त्री॰ पाटलायाम्॥ केतक्याम्॥

स्थिरचक्रः। पुं॰ मञ्जुघोषाभिधेजिनविशेषे। त्रि॰ सुस्थसैन्ये॥

स्थिरच्छदः। पुं॰ भूर्जपत्रे॥ स्थिराः छदा यस्य॥

स्थिरच्छायः। पुं॰ देवद्रुमे॥ स्थिरा अचञ्चला छाया यस्य सः॥ वृक्षमात्रे। छायावृक्षे॥

स्थिरजिह्वः। पुं॰ मत्स्ये॥

स्थिरजीविका। स्त्री॰ स्थिरवृत्तौ। शाल्मलौ॥ त्रि॰ स्थिरवृत्तिमति॥

स्थिरजीविता। स्त्री॰ शाल्मलिवृक्षे॥

स्थिरतरः। त्रि॰ स्थास्नौ। स्थेयसि। अतिस्थिरे॥ अतिशयेन स्थिरः। द्विवचनविभज्येति तरप्॥ एकरूपतयातिस्थिरे॥

स्थिरदंष्ट्रः पुं॰ भुजङ्गमे। वराहाकृतिविष्णौ। ध्वनाविच्छयः॥

स्थिरदारुः। पुं॰ शाकवृक्षे॥

स्थिरपत्रः। पुं॰ हिन्ताले।

स्थिरपुष्पः। पुं॰ चम्पके॥ बकुले॥

स्थिरपुष्पी। स्त्री॰ तिलकद्रुमे॥

स्थिरफला। स्त्री॰ कुष्माण्डाम्॥

स्थिरबुद्धिः। त्रि॰ स्थिरप्रज्ञे। लब्धश्रवणमननफले॥ सुस्थिरा निश्चला सन्न्यासपूर्वकवेदान्तवाक्यविचार

परिपाकेणसर्वसंशयशून्यत्वेननि
र्विचिकित्सानिश्चितान्नह्मणिबुद्धि
र्यस्य ॥
स्थिरमतिः। स्त्री॰ निश्चलायांबुद्धौ
॥ परमार्थवस्तुविषयायांमतौ ॥
त्रि॰ तद्वति ॥ स्थिरापरमार्थव
स्तुविषयामतिर्यस्य ॥
स्थिरयोनिः। पुं॰ द्रुमे ॥
स्थिरयौवनः। पुं॰ विद्याधरे ॥ त्रि॰
चिरस्थायितरुणावस्थे ॥ स्थिरंयौव
नमस्य ॥
स्थिररङ्गा। स्त्री॰ नील्याम् ॥
स्थिररागा। स्त्री॰ दारुहरिद्रायाम् ॥
स्थिरश्रीः। पुं॰ विष्णौ ॥ त्रि॰ नि
श्चलश्रीविशिष्टे ॥ स्थिराश्रीर्यस्मि
न्॰ यथवा ॥ स्थिरोपायोहिपुरु
षः स्थिरश्रीरेवजायते। रचितुं
नैवशक्नोतिचपलश्चपलांश्रियमिति
मत्स्यपुराणम् ॥
स्थिरसाधनकः। पुं॰ सिन्धुवारवृक्षे ॥
स्थिरसारः। पुं॰ शाकवृक्षे ॥
स्थिरा। स्त्री॰ भुवि। धरित्र्याम्।
विश्वम्भरायाम् ॥ शालपर्ण्याम् ॥
शाल्मलिवृक्षे ॥ तिष्ठति। ष्ठा॰।
अजिरशिशिरेत्यादिनाकिरच्॰ टि
लोपः। टाप्। काकोल्याम् ॥
स्थिराङ्घ्रिपः। पुं॰ हिन्तालवृक्षे ॥
स्थिरायुः। स्त्री॰ शाल्मलिद्रुमे ॥ स्थि
रमायुर्यस्याः ॥ षष्टिवर्षसहस्रा
णिवनेजीवतिशाल्मलिरितिवचना
त् ॥
स्थूणा। स्त्री॰ गृहस्याधारभूतेस्तम्भे
काष्ठमयीलिङ्गर्णिकास्थूणाभवति
। थूणी॰ इ॰ भा॰ प्र॰ गृहपूर्वः
स्थूणाशब्दः क्लीवे। यथागृहस्थू
णमिति ॥ सूर्म्याम् ॥ तिष्ठति।
ष्ठा॰। रास्नासास्नेतिसाधुः ॥
रुगन्तरे ॥ इतिहेमचन्द्रः ॥
स्थूरः। पुं॰ मनुष्ये ॥ तिष्ठति।
ष्ठा॰। स्थः किञ्चेत्यूरम् ॥ स्थू
रस्थरायइतिमन्त्रेतुयोगपुरस्कारात्
स्थिरस्येत्यर्थः ॥
स्थूरी। पुं॰ खररुत्रभयतपृष्ठेनभा
रवाहकेऽश्वे ॥
स्थूलः। पुं॰ शिराजि॰ पनसे ॥
न॰ कूटे। समूहे ॥ त्रि॰ निष्प्र
ज्ञे ॥ जडे ॥ उपचितावयवे। पी
ने। पीवृ। पीवरे। मोटा॰
इ॰ भा॰ ॥ स्थूलशरीरे। आ
त्मनउपाधिविशेषे ॥ स्थूलोदेहो
ऽहम्प्रत्ययादात्मेतिलोकायतभेदः
। तत्र। मृतसुषुप्तयोरपिसङ्घा
ताविशेषाच्चैतन्यप्रसङ्गात्। एकै
कस्यचभूतस्यचैतन्यादर्शनात्।
सङ्घातस्यचावस्तुत्वात् ॥ स्थूलय
ति। स्थूलपरिबृंहणे। चुरादिः
न्तः। पचाद्यच्।
स्थूलकः। पुं॰ तृणविशेषे। सूच्य

ये। खरच्छदे। उलुखड॰ इ॰ गौ॰ दे॰ भा॰ प्र॰ ॥ त्रि॰ स्थूले।

स्थूलकङ्गुः। पुं॰ वरकधान्ये ॥

स्थूलकणा। स्त्री॰ स्थूलजीरके ॥

स्थूलकण्टकः। पुं॰ जालबर्बुरे ॥

स्थूलकण्टकिका। स्त्री॰ शाल्मलिवृक्षे ॥

स्थूलकण्टा।
स्थूलकण्टिका। } स्त्री॰ बृहत्याम् ॥

स्थूलकन्दः। पुं॰ हस्तिकन्दे ॥ शूरणे ॥ मानकन्दे ॥ रक्तलशुने। रक्तशुने ॥

स्थूलकायः। पुं॰ स्थूलशरीरे ॥

स्थूलकाष्ठधृक्। पुं॰ बृहत्काष्ठाग्नौ। स्कन्धानले।

स्थूलकाष्ठाग्निः। पुं॰ स्कन्धाग्नौ।

स्थूलक्ष्वेडः। पुं॰ बाणे ॥

स्थूलकेश्वरः। पुं॰ सिद्धस्थानविशेषे ॥ स्थूलाख्यात्स्थूलकेश्वरी॰ इति देवीगीता ॥

स्थूलग्रन्थिः। स्त्री॰ वचाप्रभेदे। महाभरा॰ इ॰ भा॰ ॥

स्थूलचञ्चुः। पुं॰ महाचञ्चुशाके।

स्थूलचापः। पुं॰ तूलपरिष्कारार्थे धनुषि। तूलचापे ॥ इ॰ श॰ र॰ लौ ॥

स्थूलजीरकः। पुं॰ कृष्णजीरके। उपकुञ्चिकायाम्। कालीजी॰ मं गरैला॰ इ॰ भा॰ प्र॰ ॥

स्थूलतालः। पुं॰ हिन्ताले ॥

स्थूलत्वचा। स्त्री॰ काश्मर्याम्। गम्भार्याम्।

स्थूलदण्डः। पुं॰ देवनले ॥

स्थूलदर्भः। पुं॰ मुञ्जे ॥

स्थूलदला। स्त्री॰ घृतकुमार्याम् ॥

स्थूलनालः। पुं॰ देवनले ॥

स्थूलनासः।
स्थूलनासिकः। } पुं॰ सूकरे ॥ त्रि॰ पीननासायुक्ते ॥

स्थूलपटः। पुं॰ स्थूलशाटके। पटति। पटगतौ॰ पटविस्तारे वा। पचाद्यच्। स्थूलश्चासौ पटश्च ॥ त्रि॰ स्थूलवस्त्रवति। यथा। कृतघटाः स्थूलपटाश्च गोधूमशालिनः। प्रलयेऽपि न सीदन्ति यदि कन्या न जायते ॥

स्थूलपट्टः। पुं॰ कर्पासे ॥

स्थूलपट्टाकः। पुं॰ स्थूलवस्त्रे ॥

स्थूलपादः। पुं॰ हस्तिनि। व्याधिना स्थूलचरणे ॥

स्थूलपुष्पः। पुं॰ वकद्रुमे ॥

स्थूलपुष्पिका। स्त्री॰ गिरिजापराजितायाम् ॥

स्थूलप्रपञ्चः। पुं॰ विराजि।

स्थूलफलः। पुं॰ शाल्मलिवृक्षे ॥

स्थूलफला। स्त्री॰ शणपुष्प्याम् ॥

स्थूलभद्रः। पुं॰ श्रुतकेवलिनामनि

जेनभेदे ॥

स्थूलभुक् । न० व्यष्ट्युपहितचैतन्ये । विश्वशब्दाभिधेये ॥ स्थूलान् विषयान् भुङ्क्ते । भुज० । क्विप् ॥

स्थूलभूतम् । न० पञ्चीकृताकाशादिभूते अपञ्चीकृतानामेव भूतानां परस्परव्यवहृतौ प्राणिनिकायव्यवहारनिर्वाहकतदीयधर्माधर्म्मापेक्षपरमेश्वरसान्निद्ध्यादिनिमित्तापेक्षयाविभागेन मिलितानां स्थूलतापत्तौ । पञ्चीकृतभूते ॥

स्थूलमरिचम् । न० कक्कोले ।

स्थूलमूलम् । न० चाणक्यमूलके ।

स्थूललक्ष : । त्रि० वदान्ये । स्थूलैर्म्महद्भिर्लक्ष्यते । लक्ष० । कर्म्मणि घञ् ॥

स्थूललक्ष्य : । त्रि० दानशौण्डे । बहुप्रदे । वदान्ये ॥ स्थूलं कृत्वा लक्ष्यमस्य ॥ स्थूलैर्म्महद्भिर्लक्ष्यते वा । लक्ष० । कर्म्मणि यत् ॥

स्थूलवर्त्मकृत् । पुं० ब्रह्मगर्त्याम् ॥

स्थूलवल्कल : । पुं० रक्तलोध्रे ॥

स्थूलवृत्तफल : । पुं० मदनवृक्षविशेषे । स्निग्धपिण्डीतके ॥

स्थूलवैदेही । स्त्री० गजपिप्पल्याम् ।

स्थूलशर : । पुं० महाशरे । शरेपचे ॥

स्थूलशरीरम् । न० आत्मन उपाधिविशेषे । अन्नमयकोषे ॥ यथा । रसादिपञ्चीकृतभूतसम्भवं भोगालयं दुःखसुखादिकर्म्मणाम् । शरीरमाद्यन्तवदादिकर्म्मजं मायामयं स्थूलमुपाधिरात्मनः ॥

स्थूलशाटकः । पुं० स्थूलवस्त्रे । वराशौ ॥ शटति शटक आटौ वाहुल० । स्थूलश्चासौ शाटकश्च ॥

स्थूलशाटका ।)
स्थूलशाटिका) स्त्री० स्थूलवस्त्रे
स्थूलशाटिः ।)
। वराशौ ॥

स्थूलशालिः । पुं० महाशालौ । स्थूलतण्डुले ॥

स्थूलशिराः । पुं० ऋषिविशेषे । न० वृहन्मस्तके । त्रि० तद्युक्ते ॥ स्थूलं शिरोयस्य सः ॥

स्थूलशीर्षिका । स्त्री० क्षुद्रपिप्पलिकायाम् ॥

स्थूलषट्पदः । पुं० वरोलि । वोलता० कु० गो० भा० प्र० ॥

स्थूलस्कन्धः । पुं० लकुचे ।

स्थूलहस्तः । पुं० करिशुण्डायाम् । हस्तिहस्ते ॥ त्रि० पीनभुजे ।

स्थूला । स्त्री० स्थूलैलायाम् । कृष्णपिपीलिकायाम् । गन्धपत्रायाम् ॥ एर्व्वारौ ॥ गजपिप्पल्याम् ॥ स्थूलकेशरभायादिष्याम् ॥

स्थूलांशा । स्त्री० गन्धपत्रायाम् ॥

स्थूलाम्रः । पुं॰ महाराजाम्रे ॥

स्थूलास्यः । पुं॰ सर्पे ॥ त्रि॰ वृहन्मुखे ।

स्थूलैरण्डः । पुं॰ महैरण्डे ॥ स्थूलैरण्डोगुणाढ्यः स्याद्रसवीर्यविपाकेषु ॥

स्थूलैला । स्त्री॰ वृहदेलायाम् ॥ अस्यागुणायथा । स्थूलैलाकटुकापाकेरसेचानलकृल्लघुः । रूक्षोष्णा श्लेष्मपित्तास्रकण्डूश्वासतृषापहा ॥ हृल्लासविषवस्त्यास्यशिरोरुग्वमिकासनुत् ॥

स्थूलोच्चयः । पुं॰ गण्डोपले । गण्डाश्मनि । स्थूलोपले ॥ असाकल्ये । अकात्स्न्ये ॥ वरण्डे ॥ गजानांमध्यमगतौ ॥ नीचैर्गतम्॰ स्थूलोच्चयः॰ वीथिमार्गइतिति स्तोहस्तिगतयः ॥ उच्चयनम् । वि अ॰ । एरच् । स्थूलस्योच्चयः । गजानांदन्तरन्ध्रे ॥

स्थेमा । पुं॰ स्थैर्ये । स्थिरस्यभावः पृथ्वादित्वादिमनिच् । प्रियस्थिरेतिस्थादेशः ॥

स्थेयः । पुं॰ विवादपदस्यनिर्णेतरि । अक्षदर्शे । प्राड्विवाके ॥ तिष्ठत्यस्मिन्विवादपदनिर्णयार्थम् । ष्ठा॰ । बाहुलकादधिकरणे॰ अचोयत् । ईद्यति ॥ पुरोधसि । त्रि॰ प्रतिस्थिरे ॥

स्थेयान् । त्रि॰ स्थास्नौ । स्थिरतरे ॥ अयमनयोरतिशयेनस्थिरः । द्विवचनविभज्योपपदेतरबीयसुनाविती यसुनि॰ प्रियस्थिरेतिस्थादेशः ॥ स्त्री॰ स्थेयसी ॥

स्थेष्ठः । त्रि॰ स्थिरतमे । अयमेषामतिशयेनस्थिरः । अतिशायनेतमबिष्ठनाविती ष्ठनि॰ प्रियस्थिरेतिस्थादेशः ॥ सुस्थिरे ॥

स्थैर्य्यम् । न॰ स्थिरत्वे । अचञ्चलत्वे । मोक्षसाधनेप्रवृत्तस्याऽनेकविधविघ्नप्राप्तावपितदपरित्यागेनपुनः पुनर्यत्नाधिक्ये ॥ स्थिरस्यभावः । ष्यञ् । स्तब्धत्वे ॥

स्थोरी । पुं॰ भारवाहितुरगे ॥

स्थौणेयम् । न॰ ग्रन्थिपर्णप्रभेदे । कुक्कुरौधाख्यौषधौ । गांठियाला॰ इ॰ गौ॰ दे॰ भा॰ प्र॰ ॥ अस्यप्रभेदागुणाश्चयथा । इतरासुगन्धिस्थौणेयंथुनेर॰ इतिलोके । स्थौणेयकंबर्हिबर्हंशुकबर्हंचकुक्कुरम् । शीर्णरोमाशुकश्चापिशुकपुष्पंशुकच्छदम् । स्थौणेयकंकटुस्वादुतिक्तंस्निग्धंत्रिदोषनुत् । मेधाशुक्रकरंरुच्यंरक्षोघ्नंज्वरजन्तुजित् ॥ हन्तिकुष्ठास्रतृड्दाहदौर्गन्ध्यतिलकालकान्॰ इतिभा॰ प्रकाशः ॥

स्थौणेयकम् । न॰ सुगन्धद्रव्यभेदे ।

वर्हिशिखे । स्थौणेये ॥

स्थौरी । पुं॰ खरत्वषभवत्पृष्ठेनभारवाहकेऽश्वे । पृष्ठ्ये । स्थूलस्येदम् । तस्येदमित्यण् । रलयोरैक्यम् । स्थौरं बलमस्यास्ति । इनिः ॥

स्थौललक्ष्यम् । न॰ बहुप्रदत्वे ॥ *

स्थौल्यम् । न॰ स्थूलत्वे ॥ स्थूलस्य भावः । ष्यञ् ॥

स्नपनम् । न॰ अभिषिञ्चने ॥ स्नाने ॥ यथा । पूजनात्स्नपनं श्रेष्ठं स्नपनात्तर्पणं स्मृतम् । तर्पणाच्चाम्बसदामन्तुमहिषासुरनिपातनमिति- दुर्गोत्सवप्रकरणे तिथ्यादितत्त्वम् ॥

स्नपितः । त्रि॰ क्षालिते ॥ सिक्ते ॥ स्नातेर्ण्यन्तात्क्तः । अर्त्तिह्रीत्यादिनापुक् । मितांह्रस्वः ॥ आप्लुते ॥

स्नवः । पुं॰ स्रवे । स्रवणे । क्षरणे ॥ स्नवनम् । आप्रस्रवणे । ऋदोरप् ॥

स्नसा । स्त्री॰ स्नायौ ॥

स्नातः । त्रि॰ आप्लुते । कृतस्नाने ॥ यथा । स्नातोऽधिकारी भवति दैवे पैत्रे च कर्म्मणि । अस्नातस्य क्रियाः सर्वाः भवन्ति हि यतोऽफलाः ॥ प्रातः समाचरेत्स्नानमतो नित्यमतन्द्रितः ॥ इति प्रायश्चित्ततत्त्वम् । स्नात्वा कर्म्माणि कुर्वीत । शिरः स्नातश्च कुर्वीत दैवं पित्र्यमथापि वेति स्मृतिः ॥ आप्लवे । भावे क्तः ॥

स्नातकः । पुं॰ आप्लुतव्रतिनि । समाप्तवेदपाठे॰ अगृहस्थे । आश्रमान्तरगते समाप्तवेदव्रते । कृतस्नाने ॥ अत्र हारीतः । त्रयः स्नातका भवन्ति । विद्यास्नातको॰ व्रतस्नातको विद्याव्रतस्नातकश्चेति । तत्र यः समाप्य वेदमसमाप्य व्रतानि समावर्त्तते॰ स विद्यास्नातकः । यः समाप्य व्रतानि॰ असमाप्य वेदं समावर्त्तते स व्रतस्नातकः । य उभयं समाप्य समावर्त्तते स विद्याव्रतस्नातको भवति ॥ अत्र भवन्ति त्रयः पक्षाः । यथा । मन्त्रब्राह्मणात्मकं वेदमधीत्यावबुद्ध्य च स्नायादित्येकः पक्षः । साङ्गवेदमधीत्यावबुद्ध्य च स्नायादित्यपरः । ग्रन्थमात्रमप्यधीत्य यस्तु विद्यास्त्वभ्यस्य स्नायादिति तृतीयः पक्षः । यस्तु विद्याविरहेणाग्रन्थमात्रेऽधीतेन स्नायादिति निषिधः । यतो वेदाध्ययनं वेदविहिताग्निहोत्रादिकर्माद्यनुष्ठानप्रयोजनमिति ॥ स्नातिस्म । आ॰ । गत्यर्थाकर्म्मकेति क्तः । संज्ञायां कन् ॥ यावादिषु॰ स्नातवेदसमाप्ताविति पाठाद्वा कन् ॥ गृहस्थब्राह्मणे ॥

स्नानम् । न॰ मज्जने । आप्लावे । आप्लवे ॥ स्नानं षड्विधं भवति । यथा

ति शङ्खः । नित्यं नैमित्तिकं काम्यं क्रियाङ्गं मलकर्षणम् । क्रियास्नानं तथा षष्ठं षोढा स्नानं प्रकीर्त्तितमिति ॥ विशिष्टं स्नानं तत एवावगम्यताम् । तथाच स्मृतिः ॥ आग्नेयादिप्रभेदेन तच्च प्रोक्तं चतुर्विधम् । यथा । आग्नेयं भस्मना स्नानमवगाह्यन्तु वारुणम् । आपोहिष्ठेति च ब्राह्मं वायव्यं गोरजः स्मृतमिति ॥ ष्णा शौचे । भावे ल्युट् ॥ स्नानं तर्पणपर्य्यन्तं स्नाह्नान्तं देवपूजनम् । आह्निकस्य विसन्ध्यान्तं विप्राणाञ्च श्रुतौ श्रुतम् ॥ तत्र प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टकरं हितम् । सर्व्वमर्हति पूतात्मा प्रातःस्नायी जपादिकमिति दक्षः । दृष्टं कर्म्माधिकारः । अदृष्टं जपादिद्वारा परलोकसिद्धिः ॥

स्नानतृणम् । न० कुशे ॥

स्नानीयम् । न० स्नानसाधने चूर्णादौ ॥ स्नायतेऽनेन । ष्णा० । कृत्यल्युटो बहुलमित्यनीयर् ॥

स्नान्ती । स्त्री० जलमवगाहमानायाम् ॥

स्नायी । त्रि० स्नानकर्त्तरि ॥

स्नायुः । स्त्री० वायुवाहिन्यां नाड्याम् ॥ वस्नसायाम् ॥ स्नाति । ष्णा० । बाहुलकादुण् । आतो युक् चिण्कृतोः ॥

स्नाय्वर्म्म । न० नेत्ररोगप्रभेदे । तल्लक्षणं यथा । स्थिरं प्रस्तारि मांसाढ्यं शुष्कं स्नाय्वर्म्म पञ्चममिति माधवकरः ॥

स्नावा । पुं० रसिके ॥ स्नाति । ष्णा० । स्नामदिपद्यर्त्तिपॄशकिभ्यो वनिप् । धीवावत् ॥

स्नावरी । स्त्री० नद्याम् ॥ स्नान्त्यस्याम् । ष्णा० । वनिप् । वनोर चेति ङीब्रौ ॥

स्नावा । स्त्री० शिरायाम् ॥ स्नु प्रस्रवणे । स्नावयति शरीरमिति ज्वाला ॥

स्निग्धः । पुं० बहुवारे । रक्तैरण्डे ॥ सरलवृक्षे ॥ मधके ॥ न० समूहगन्धे । जवादिके ॥ सिक्थके ॥ त्रि० स्नेहयुक्ते । चिक्कणे । मसृणे ॥ सहजेनागन्तुकेन वा स्नेहेन युक्ते । प्रिये । वत्सले ॥ स्निह्यति स्म । ष्णिह प्रीतौ । अकर्म्मकत्वात् कर्त्तरि क्तः । वा द्रुहेति वः ॥ मतिबुद्धिपूजार्थेभ्यश्चेति चाद्वर्त्तमाने क्तः ॥

स्निग्धकन्दा । स्त्री० द्रोणपर्ण्याम् । भूमिकदल्याम् ॥

स्निग्धतण्डुलः । पुं० षष्टिशालौ ॥

स्निग्धता । स्त्री० स्नेहे । प्रियत्वे ॥

स्निग्धदारु । न० देवदारुणि ॥ देवदारुप्रभेदे पूतिकाष्ठे ॥ सरलवृक्षे ॥

स्निग्धपत्रः । पुं० गर्जरतृणे ॥ पूत

करञ्जे । गुच्छकरञ्जे ॥

स्निग्धपत्रा । स्त्री० बदर्याम् ॥ पालङ्क्याम् । काश्मर्याम् ॥

स्निग्धपर्णी । स्त्री० गम्भार्याम् ॥

स्निग्धपिण्डीतकः । पुं० मदनवृक्षविशेषे । स्थूलवृक्षफले ॥

स्निग्धफला । स्त्री० कर्कटीप्रभेदे । वालुङ्क्याम् । मूत्रलायाम् ॥

स्निग्धा । स्त्री० मेदायाम् ॥

स्नुः । पुं० प्रस्थे । सानौ । पर्वतसमभूभागे । स्नौति जलम् । आति वा । आप्रस्रवणे० आशौचे वा । मितद्र्वादित्वात्० डुः ॥ स्त्री० स्नायौ ॥

स्नुक्छरः । पुं० चौरकस्नुकीवृक्षे ॥

स्नुतः । त्रि० स्रुते । च्युतजलादौ । स्नुयतेस्म० । क्त० क्तः ॥

स्नुषा । स्त्री० सुतस्त्रियाम् । पुत्रवध्वाम् ॥ स्नौति । स्नु० । स्नुव्रश्चिकृत्यृषिभ्यः किदिति सः ॥ स्नुह्याम् ॥

स्नुक् । स्त्री० स्नुह्याम् ॥ स्नुह्यति । ष्णुह उद्गिरणे । क्विप् । वाद्रुहेति कुत्वम् । तदभावे हो ढ इति ढत्वे स्नुट् स्नुड् ॥

स्नुहा । स्त्री० स्नुहीवृक्षे ॥ भागुरिमते० स्नुहष्टाप् ॥

स्नुहिः । स्त्री० स्नुह्याम् । स्नुह्यति । ष्णुह० । सर्वधातुभ्य इन् ।

स्नुही । स्त्री० सिहुण्डे ॥ इन्नन्तात् स्नुहेः कृदिकारादक्तिनः इति पक्षे ङीष् ॥

स्नेहः । पुं० सौहृदे । प्रेम्णि । प्रियतायाम् ॥ तामसोयं चित्तवृत्तिविशेषः० यस्मिन् सत्यन्यदीये हानिवृद्धी स्वस्मिन्नारोप्येते । अन्यविषयः प्रेमापरपर्यायः स्नेहः ॥ यथा । स्मृत्वा वियोगजं दुःखं त्यज स्नेहं प्रिये जने । अतिस्नेहपरिष्वङ्गाद्वर्त्तिरार्द्रापि दह्यते इति । स्नेहयति प्रीणयति पुरुषम् । ष्णिह० । पचाद्यच् । स्निह्यन्ति पुरुषा यस्मिन् । अधिकरणार्थे० घञ् ॥ घृतादिरसविशेषे ॥ यथा स्नेहश्चतुर्विधः प्रोक्तो घृतं तैलं वसा तथा । मज्जा च० तं पिबेन्मर्त्यः किञ्चिदभ्युदिते रवौ ॥ स्थावरो जङ्गमश्चैव द्वियोनिः स्नेह उच्यते । तिलतैलं स्थावरेषु जङ्गमेषु घृतं वरम् इति ॥ द्रव्याश्रितश्चतुर्भिर्वा० यमकस्त्रिवृतो महान् ॥ न्यायमते० स्पर्शादिविषयो भाव इति० गुणविशेषे० जलमात्रवृत्ती ॥ जलीयपरिमाणवयं नित्योऽन्यत्वनित्यः । तैलादावस्य प्रकर्षोऽस्य ततस्तेषां दाहो भवति । यथोक्तं भाषापरिच्छेदे । स्नेहो जले स नित्योयमनित्योऽवयविन्यसौ । तैलान्त

रितत्प्रकर्षाद्दृढजस्यानुकूलतेति ॥ स्नेहनम् । णिच्० । भावे घञ् ॥ स्निह्यतेऽनेनवा ॥ स्नेहस्तु दुःखमूलत्वमुक्तं गारुडे ११४ऽध्याये । यत्स्नेहाद्भयं तत्स्नेहात् दुःखभाजनम् । स्नेहमूलानि दुःखानि तस्मिंस्त्यक्ते महत्सुखमिति ॥ स्निग्धतायाम् ॥ यथा । स्नेहः पञ्चसु लक्ष्यो वाग्जिह्वा दन्तनेत्रनखसंस्थः । सुतधनसौभाग्ययुताः स्निग्धैस्तैर्निर्धना रूक्षैरिति ॥

स्नेहा । पुं० व्याधिप्रभेदे ॥ सुहृदि ॥ चन्द्रे ॥ स्निह्यति । णिह्० । श्वन्नुक्षन्पूषन्प्लीहन्नित्यादिना० कनिन्० निपातनाद्गुणत्वम् ॥

स्नेहनम् । न० तैलमर्द्दने । म्रक्षणे । अभ्यङ्गे ॥ स्निह्यतेऽनेन । णिह्० । ल्युट् ॥

स्नेहपात्रम् । न० कुत्वाम् । चर्ममयतैलादिभाण्डे ॥ स्नेहस्य तैलघृतादेः पात्रम् ॥

स्नेहप्रियः । पुं० प्रदीपे ॥ त्रि० तैलादिप्रिये ॥

स्नेहफलः । पुं० तिले । पापघ्ने

स्नेहभूः । पुं० श्लेष्मणि । त्रि० स्निग्धभूमौ ॥

स्नेहरङ्गः । पुं० तिले ॥

स्नेहवती । स्त्री० मेदायाम् ॥ स्नेहोऽस्त्यस्याम् । रसादिभ्यश्चेति मतुप् । ङीप् ॥

स्नेहषयशः । पुं० प्रिये । प्रदीपे ।

स्नेहवस्तिः । स्त्री० अनुवासनवस्तौ । तैलपिचकारी० इ० भा० ॥ यथा । वस्तिर्द्विधाऽनुवासाख्यो निरूहश्च ततः परः । यः स्नेहैर्दीयते स स्यादनुवासननामकः ॥

स्नेहबीजः । पुं० पियालवृक्षे ॥ त्रि० स्नेहकारणे ॥

स्नेहाशः । पुं० प्रदीपे । दीपे ॥

स्नेही । पुं० वयस्ये ॥ त्रि० स्नेहयुक्ते ॥

स्नेहुः । पुं० व्याधिभेदे ॥ चन्द्रे ॥ स्निह्यति । णिह्० । भृस्वृस्निहीत्यादिना उः ॥

स्पन्दः । पुं० स्पन्दने । प्रस्फुरणे ॥ स्पन्दते । स्पदि किञ्चिच्चलने । पचाद्यच् ॥

स्पन्दनम् । न० स्पन्दे । किञ्चिच्चलने ॥

स्पर्द्धकः । त्रि० स्पर्द्धाकरे ॥

स्पर्द्धा । स्त्री० सङ्घर्षणे । पराभिभवेच्छायाम् ॥ स्पर्द्धते शलिनं शलौ ॥ साम्ये ॥ क्रमसमुन्नतौ ॥ स्पर्द्ध सङ्घर्षे । भिदाद्यङ् ॥

स्पर्द्धालुः । त्रि० स्पर्द्धायुक्ते ॥ स्पर्द्धालाति । ला० । मितद्र्वादित्वात्० डुः ॥

स्पर्शः । पुं० रुजायाम् ॥ सन्तापे ॥

सन्तापे । स्पृशति । स्पृशबा धनस्पर्शनयोः । पदरुजेत्यत्र० स्पृश उपतापइतिकर्त्तरि घञ् ॥ यथा, स्पर्शनं स्पर्शः भावे घञ् ॥ दाने । स्पर्शके । कादिमावसानवर्णाक्षरे । उपतापे । रोगविशेषे । स्पर्शके ॥ मणिविशेषे । पारस० इ० भा० प्र० ॥ त्वगिन्द्रियविषये । स्पर्शने । त्वगिन्द्रियमात्रग्राह्ये गुणविशेषे ॥ सत्रिविधः । शीतोष्णानुष्णाशीतभेदात् । पृथिव्यप्तेजोमात्रवृत्तिः । तत्र शीतो जले । उष्णस्तेजसि । अनुष्णाशीतः पृथिवीवाय्वोः । रूपरसगन्धस्पर्शाः पृथिव्यां पाकजाः० अनित्याश्च । जलादावपाकजाः० नित्याः अनित्याश्च । नित्यगता नित्याः० अनित्यगता अनित्याः अथाहुः । कठिनः पार्थिवः स्पर्शः शीतोष्णौ जलवह्निजौ । मृदुर्वायोरिति स्पर्शविशेषाः प्रकीर्त्तिताः ॥ स्पर्शसामान्ये स्पर्शविशेषाणां लयइति ॥ इन्द्रियैः स्पृश्यन्ते० इति व्युत्पत्त्या० शब्दादिविषयेषु ॥ माचा मा० । ० ॥ स्पर्शनम् । स्पृश स्पर्शने । अन्तर्विशारकेस ङ्गः चारमिलिचः ॥ पुराणे० एकादशविधः स्पर्श उक्तो यथा । उष्णः शीतः सुखदुःखः स्निग्धो विशदपथश्च । खरो मृदुश्च श्लक्ष्णश्च लघुगुरुरितिक्रमात् ॥ कामिनस्तु । शब्दादीनाम्पञ्चानाम्मध्ये स्पर्शसुखं वरम् । । आनन्दरसमूलं वै नान्यदस्ति सुखं किलेत्याहुः ॥

स्पर्शकः । पुं० स्पर्शे ॥ त्रि० स्पर्शनकर्त्तरि ॥

स्पर्शज्ञानम् । न० त्वाचप्रत्यक्षे ॥

स्पर्शनः । पुं० श्वसने । वायौ ॥ स्पृशति । स्पृश० । बहुलमन्यत्रापीतियुच् ॥ न० दाने । स्पर्शे ॥ स्पृशेर्भावे ल्युट् ॥

स्पर्शमणिः । पुं० स्पर्शे । पारस० इ० प्र० मणौ ।

स्पर्शमणिप्रभवम्० । न० काञ्चने । स्वर्णे ॥

स्पर्शलज्जा । स्त्री० लज्जालुवृक्षे ॥

स्पर्शशुभा । स्त्री० शतमूल्याम् ॥

स्पर्शस्पन्दः । पुं० भेके ॥

स्पर्शा । स्त्री० कुटलायां ॥

स्पर्शानन्दा । स्त्री० रतिमदायाम् ॥ अप्सरःसु । स्पर्शेन० स्पर्शेवाआनन्दोऽस्याः ॥

स्पर्शितः । त्रि० प्रतिपादिते ॥

स्पशः । पुं० सम्पराये । युद्धे ॥ प्रणिधौ । चरे । हेरिके । अस्य पर्यायाः यथा । यथार्हवर्णः प्रणिधिरपसर्पश्चरः स्पशः । चारश्च गूढपुरुषइति ॥ स्पशति । स्प

शस्पर्शनबन्धनयोः । पचाद्य
च् ॥

स्पष्टः । त्रि॰ स्फुटे । प्रव्यक्ते ।
उल्बणे । प्रकटे ॥ स्पृश्यतेस्म
। स्पश॰ । ण्यन्तात्क्तः । वा
दान्तेतिसाधुः ॥

स्पष्टीकृतः । त्रि॰ व्यक्तीकृते ।

स्पाशनः । पुं॰ स्पर्शे । स्प
र्शनेनगृह्यते शीघ्रकृत्यच् ॥

स्पाशितः । त्रि॰ स्पष्टे ॥ स्पश॰ णि॰
क्तः । वादान्तेतिसाधुः ॥

स्पृक्का । स्त्री॰ सुगन्धिद्रव्यविशेषे ।
शाकभेदे । पृक्कायाम् ॥ गुणास्तु ।
स्पृक्कास्वादीहिमावृष्यातिक्तानिखि
लदोषनुत् । कुष्ठकण्डूविषस्वेददा
हाश्रीज्वररक्तहृत् ॥ स्पृशति । स्पृ
शस्पर्शने । बाहुलकात् कक् ॥

स्पृशा । स्त्री॰ भुजङ्गघातिनीवृक्षे ।
कङ्कालिका॰ इ॰ गौ॰ दे॰ भा॰
प्र॰ ॥

स्पृशी । स्त्री॰ कण्टकार्याम् ॥ स्पृ
शति । स्पृश॰ । इगुपधेतिकः ।
गौरादिः ॥ *

स्पृश्यः । त्रि॰ स्पर्शनीये ॥

स्पृष्टः । त्रि॰ कृतस्पर्शे ॥

स्पृष्टास्पृष्टम् । न॰ परस्परस्पर्शने ॥

स्पृष्टास्पृष्टि । अ॰ परस्परस्पर्शने । कृ
च्छ्रभेदो॰ इच्छ्राछ्रुत॰ इ॰ भा॰ ॥
यथा । तीर्थविवाहेयात्रायांसङ्ग्रा
मेदेशविप्लवे । नगरग्रामदाहेषुस्पृ
ष्टास्पृष्टिनदुष्यति ॥ आपद्यपिचक
ष्टायांभयेपीडितेतथा । माता
पित्रोर्गुरोश्चैवनिदेशेवर्त्तनात्तथा
॥ स्पृष्टास्पृष्टि॰ इत्यव्ययंक्रियाव्य
तीहारे । तथेतिनदुष्यतीत्यर्थः ॥

स्पृष्टिः । स्त्री॰ स्पर्शे । पृक्तौ ॥ स्पर्श
नम् । स्पृशेः क्तिन् ॥

स्पृहणीयः । त्रि॰ श्लाघ्ये ॥ कमनीये
। मनोहरे ॥

स्पृहयालुः । त्रि॰ सस्पृहे । स्पृहाशी
ले । लोभिनि ॥ स्पृहयति॰ त
च्छीलः । स्पृहेर्त्सायाम् । स्पृहि
गृहीत्यालुच् ॥

स्पृहा । स्त्री॰ दोहदे । इच्छायाम् ।
काङ्क्षायाम् ॥ भिदादेराकृतिग
णत्वात्स्पृहेरङ् ॥ धर्माविरोधेन
प्राप्तीच्छायाम् ॥ उक्तञ्चैषुपरध
नेषुदृष्टेनाद्येषु॰ येनकेनाप्युपाये
नोपादित्सायाम् ॥ इर्षाविशेषायां
चित्तवृत्तौ ॥ सुखानुभवकाले॰ त
ज्जातीयसुखस्यकारणं धर्ममननुष्ठा
यहृद्येवतदाकाङ्क्षारूपायांतामस-
स्यांचित्तवृत्तौ ॥ भ्रान्तिरेषा ॥
तस्यानिन्दाप्रशंसेयथा । नपीवनं
ब्राह्मणानांतपः कल्पतरुस्तथा ।
तपस्याकामधेनुश्च तस्मात्तपसिस्पृ
हा ॥ ऐश्वर्यंचश्रियाश्चाश्चर्याणि
चतथाविद्याम् । शूद्राणांविप्रसेवा

यां स्पृहा वेदेष्वभिनन्दिता ॥ क्षत्रियाणां स्वतपस्विस्पृहातीव प्रशंसिता । ब्राह्मणानां विद्यादिपुस्पृहातीव विनिन्दिता ॥ क्षत्रियाणां स्वधर्मे रणे मृत्युर्न गर्हितः । स्वेस्पृहा ब्राह्मणानां किं दैवविडम्बना ॥ तपोधनानां विप्राणां स्वलानां युगे युगे । शान्तिरस्त्यशनं कर्म विप्रधर्मे न सङ्करः ॥ इति ब्रह्मवैवर्त्ते गणपतिखण्डे ३५ ऽध्यायः ॥

स्पृह्यः पुं० फलपूरे । मातुलुङ्गके । त्रि० स्पृहार्हे । वाञ्छनीये ॥

स्प्रष्टा त्रि० उपतापके । उपतप्तरि । स्पृशति । स्पृश संस्पर्शने । तृच् । अनुदात्तस्येत्यागमः ॥ स्पर्शनम् । कृत्यल्युटो बहुलमिति भावेऽल्युट् ॥ सन्मे ॥ सन्नापि ।

स्फटः पुं० स्फटायाम् ॥ स्फुटति ॥ स्फुट विकसने चुरादिः । भिज-भावे पच अच् । पृषोदरादिः ॥

स्फटा स्त्री० फणायाम् । स्फट ॥ टाप् ॥

स्फटिकः पुं० स्वनामख्यातप्रसिद्धे मणौ । सूर्यकान्ते । भासुरे । शालिपिष्टे । धौतशिले ॥ अस्य गुणादयो यथा । स्फटिकः समशीतोष्णः पित्तदाहार्तिदोषनुत् । तस्याक्षमालाजपतो दत्ते कोटिगुणं फलम् ॥

परीक्षा च यथा । यद्गाङ्गतोयविन्दुच्छवि विमलतमं निस्तुषं नैव च्छायाञ्जिग्धं शुद्धान्तरालं मधुरमतिहिमं पित्तदाहास्रहारि । पाषाणैर्यन्निघृष्टं स्फुटितमपि निजां स्वच्छतां नैव जह्यात् तज्जात्यं जातुलभ्यं शुभमुपदिशन्ति शैवं रत्नम् ॥ इति राजनिघण्टः ॥ अपि च । मुक्ताविद्रुमवज्रेन्द्रवैदूर्यस्फटिकादिकम् । मणिरत्नं सरं शीतं कषायं स्वादु लेखनम् ॥ चक्षुष्यं धारणात् तच्च पापालक्ष्मीविनाशनम् ॥ इति राजवल्लभः ॥ तस्योत्पत्तिपरीक्षे यथा । कावेरिविन्ध्ययवनचीननेपालभूमिषु । लाङ्गलौव्यकिरन्मेदो दानवस्य प्रयत्नतः ॥ आकाशशुद्धं तैलाढ्यमुत्पन्नं स्फटिकं ततः । मृणालशङ्खधवलं किञ्चिद्वर्णान्तरान्वितम् ॥ न तत्तुल्यं हि रत्नानां तथा पापप्रणाशनम् । संस्कारं शिल्पिना यद्वै मूल्यं किञ्चिल्लभेत ततः ॥ इति गारुडे ७८ ऽध्यायः ॥ तथा । हिमालये सिंहले च विन्ध्याटविसटे तथा । स्फटिकं जायते चैव नानारूपं समप्रभम् ॥ हिमाद्रौ चन्द्रसङ्काशं स्फटिकं तद्द्विधा भवेत् । सूर्यकान्तं तथैकं चन्द्रकान्तं तथापरम् ॥ सूर्यांशुस्पर्शमात्रेण वह्निं वमति तत्क्षणात् । सूर्यकान्तं तदाख्यातं स्फटिकं रत्नवेदिभिः ॥

पूर्णेन्दुकरसंस्पर्शादमृतं स्रवति क्षणात्। चन्द्रकान्तं तदाख्यातं दुर्लभं तत्कलौ युगे॥ अशोकपल्लवच्छायं दाडिमीबीजसन्निभम्। विन्ध्याटवितटे देशे जायते मन्दकान्तिकम्॥ सिंहले जायते कृष्णमाकरे गन्धनीलके। पद्मरागभवे स्थाने द्विविधं स्फटिकं भवेत्॥ अत्यन्तनिर्मलं स्वच्छं स्रवतीश्जलं शुचि। ज्योतिर्ज्वलनमाश्लिष्टं मुक्ताज्योतीरसं-द्विज॥ तदेव लोहिताकारं राजावर्त्तमुदाहृतम्। आनीलं तत्तु पाषाणं प्रोक्तं राजमयं शुभम्। ब्रह्मसूत्रमयं यत्तु प्रोक्तं ब्रह्ममयं द्विज॥ इति स्फटिकपरीक्षा। इति भोजराजकृतयुक्तिकल्पतरुः॥

स्फटिका। स्त्री॰ स्फट्याम्। रङ्गदायाम्। स्फटिकायाम्। फटकरी॰ इ॰ भा॰ ॥॰ पाषाणे॥

स्फटिकाचलः। पुं॰ स्फटिकाद्रिभृति। कैलासे॥

स्फटिकात्मा। पुं॰ स्फटिके॥

स्फटिकाभ्रः। पुं॰ कर्पूरे॥

स्फटिकारिः। स्त्री॰ स्फटिकायाम्॥

स्फटिकारिका।)
स्फटिकारी।) स्त्री॰ स्फटिकायाम्॥

स्फटी। स्त्री॰ स्फटिकायाम्॥

स्फुरणम्। न॰ स्फुरणे॥ स्फा(स्फुरण

इत्यकारोपधं केचित्पठन्ति॰ स्वार्थे कन्। दस्मादाच्॥

स्फटिकम्। न॰ स्फाटिकोपले॥

स्फाटिका। स्त्री॰ स्फटिकोपले। फटकरीति ख्याते पाषाणे॥ अस्या गुणा यथा। स्फाटिका तु कषायोष्णा वात पित्तकफव्रणान्। निहन्ति श्वित्र-वीसर्पान्योनिसङ्कोचकारिणीति॥

स्फाटिकोपलः। पुं॰ स्फटिकायाम्। स्फटिके॥

स्फाटिकाद्रिभृत्। पुं॰ कैलासे॥

स्फातिः। स्त्री॰ वृद्धौ। स्फायनम्। स्फायीवृद्धौ। क्तिन्॥ * ॥

स्फायितः। त्रि॰ वृंहिते॥

स्फारः। पुं॰ विकटे॥ करकादेर्बुद्बुदे॥ त्रि॰ विपुले। विशाले॥ यथा। तस्मिन्विशदपर्णे स्फारे समस्ता वस्तुदृष्टयः। इमास्ताः प्रतिबिम्बन्ति सरसीव तटद्रुमाः॥ स्फायते। स्फायी॰। स्फायितञ्चीति रक्॥ यद्वा। स्फुरणम्। स्फुर सञ्चलने। घञ्। स्फुरतिस्फुलत्योर्घञोत्थं वात्वम्॥

स्फिग्घातनकः। पुं॰ कट्फले॥

स्फिग्देशः। पुं॰ बालधिमूलप्रदेशे॥

स्फिक्। स्त्री॰ कटिप्रोथे। कटिदेशस्थमांसपिण्डे। स्फायते। स्फायी॰। बाहुलकात्क्विप्प्रत्ययः॥

स्फेटति । स्फिट हिंसायाम् । क्विप् । स्फिगपूतेति निपातनात् टस्य चइति मुकुटः ॥

स्फिरः । त्रि० प्रचुरे ॥ स्फायते । स्फायी० । अजिरशिशिरेति किरच् टिलोपश्च ॥

स्फीतः । त्रि० समृद्धे ॥ विकसिते ॥ स्फायतेस्म । स्फायी० । क्तः । स्फायः स्फीनिष्ठायाम् ॥ कथं स्फीतिकाम इति स्फीतमाचष्टे० इतिण्यन्तादचः । अल्लोपणिलोपौ ॥

स्फुट् । स्त्री० ईश्वरी ॥ पादस्फोटे । स्फुटति । स्फुट० । क्विप् ॥

स्फुटः । त्रि० व्यक्ते । स्पष्टे । स च घटादीनां विषयेन्द्रियसन्निकर्षजन्यत्वरितद्यथार्थप्रमात्वभेदाद्भवतीति प्रसिद्धमेव । प्रफुल्ले ॥ व्याप्ते ॥ सिते । शुक्ले । स्फुटति । स्फुट विकसने । इगुपधेति कः ॥ स्फुटिते । भिन्ने ॥

स्फुटता । स्त्री० विशदार्थतायाम् ॥

स्फुटनम् । न० विदरे । विदरणे ॥ स्फुट० । कुटादि० । ल्युट् । विकसने ॥

स्फुटबन्धनी । स्त्री० ज्योतिष्मत्याम् । पारावताङ्घ्र्याम् ॥

स्फुटलः । पुं० तुम्बुरुवृक्षे । शूलघ्ने ॥

स्फुटा । स्त्री० फणायाम् ॥ स्फुट० । कः । टाप् ॥

स्फुटिः । स्त्री० पादस्फोटामये । विपादिकायाम् ॥ निर्भिन्नकर्कटीखण्डे । इर्वारुशुक्तिकायाम् । फुट० इ० भा० प्र० ॥

स्फुटितः । त्रि० विकचे । विकसिते । दीर्णे । भिन्ने ॥ अस्फुटत् । स्फुट० । क्तः ॥

स्फुरः । पुं० फलके ॥ स्फुरणे ॥

स्फुरणम् । न० स्फुरणे । फरकना इति भाषा । यथा० अङ्गस्फुरणं नेत्रस्फुरणम् ॥ किञ्चिच्चलने ॥ भाने ॥ कम्पने ॥ स्फुरस्फुरणे सञ्चलने च । कुटादिः । ल्युट् ॥

स्फुरन् । त्रि० कम्पनयुक्ते । दीप्यमाने ॥

स्फुरितम् । न० स्फुरणे । त्रि० मनसः कल्पनायाम् । उल्लसिते ॥ उज्ज्वले । प्रतिफलिते ॥

स्फुर्जकः । पुं० कालस्कन्धे । तिन्दुके ॥

स्फुर्जथुः । पुं० वज्रपतनजनितध्वनौ ॥ स्फूर्जथौ ।

स्फुलम् । न० तम्बू० इ० प्र० वस्त्रवेश्मनि ॥

स्फुलिङ्गः । त्रि० अग्निकणे । चिनगारी० इ० भा० ॥ स्फु० इत्यनुकरणशब्दः । स्फुना० फुत्कारेण०

लिङ्गति० गच्छति । लिङ्गिगतौ । पचाद्यच् ॥

स्फुलिङ्गा । स्त्री० अग्निकणजातौ ॥ जातावपिनङीष् । अजादिषुपाठात्० टाप् ॥

स्फुलिङ्गनी । स्त्री० अग्नेर्जिह्वाविशेषे ॥

स्फूत्कारः । पुं० फूत्कारे ॥

स्फूर्जकः । पुं० तिन्दुकवृक्षे । तेंदू० इ० भा० प्र० ॥ स्फूर्जति । टुओस्फूर्जावज्रनिर्घोषे ॥ ण्वुल् ॥

स्फूर्जथुः । पुं० वज्रनिष्पेषे । वज्रपातजध्वनौ ॥ स्फूर्जनम् । टुओस्फूर्जा० । ट्वितोथुच् । मेघनादे । ताडूलीये ॥

स्फूर्जनः । पुं० तिन्दुके ॥

स्फूर्त्तिः । स्त्री० स्फुरणे ॥

स्फूर्त्तिमान् । त्रि० पाशुपते ॥ यथा । पान्थार्थिकः पाशुपतस्त्विद्रूपः स्फूर्त्तिमान्मतः । इतिच काण्डशेषः । स्फूर्त्तिविशिष्टे ॥

स्फेमा । पुं० स्फिरत्वे । प्रचुरतायाम् ॥ स्फिरस्यभावः । पृथ्वादित्वादिमनिच् । प्रियस्थिरेत्यादिनास्फादेशः ॥

स्फेयः । त्रि० प्रचुरतरे । स्फिरतरे ॥ द्वयमनयोरतिशयेनस्फिरम् । ईयसुन् । प्रियस्थिरेतिस्फादेशः ॥

स्फेरम् । त्रि० भूयिष्ठे ॥

स्फेष्ठः । त्रि० अतिशये । भूयिष्ठे ॥ अयमेषामतिशयेनस्फिरः । इष्ठन् । प्रियस्थिरेतिसाधुः ॥

स्फैयकृतः । पुं० स्फ्याकृतोपत्ये ॥ अण् ॥

स्फोटः । पुं० स्फोटके । विस्फोटे । पिडके ॥ शब्दव्यापारे । स्फुट्यते० व्यज्यतेवर्णैः० स्फुटत्यर्थोऽस्मादितिवा । स्फुटविकसने । घञ्० अज्वा ॥

स्फोटकः । पुं० फोडाइतिख्याते० रोगे । पिडके ॥ स्फोटति स्फुटिर्विशरणे । ण्वुल् ॥

स्फोटनम् । न० विदारणे ॥

स्फोटनी । स्त्री० मणिशङ्खादिवेधोपकरणे । आस्फोटन्याम् ॥ स्फोट्यतेऽनया । स्फुटभेदनेचुरादिः । करणेल्युट् ॥

स्फोटवीजः ।) स्फोटवीजकः ।) पुं० वातारीभल्लातके ॥

स्फोटायनः । पुं० मुनिविशेषे । कक्षीवति । स्फोटप्रतिपादनपरे० वैयाकरणे । स्फोटोऽयनं परायणंयस्यसः ॥

स्फोटिका । स्त्री० खञ्जनिकायाम् । हापुत्रिकायां ॥

स्फ्यः । पुं० यज्ञाङ्गभूते० खड्गा

कारकाणि

स्म । अ० अतीते ॥ पादपूरणे । प्रसिद्धौ । स्मयते ॥ ष्मिङ् ईषद्धसने । अन्येभ्योऽपीति डः ॥

स्मित । त्रि० हास्ययोग्ये ॥

स्मयः । पुं० अद्भुते ॥ गर्व्वे ॥ स्मयनम् । ष्मिङ्० । एरच् ॥

स्मरः । पुं० कामे । पञ्चशरे ॥ स्मरयति० उत्कण्ठयति । स्मृ आध्याने । पचाद्यच् । स्मर्य्यतेऽनेन वा । पुंसि संज्ञायां घः ॥ अन्तःकरणधर्म्मे स्मरणाख्ये ॥ स्मरणम् । भावे घो वा ॥

स्मरकूपकः । पुं० भगे । स्मरागारे । योनौ ॥

स्मरगृहम् । न० भगे । स्त्रीचिह्ने ॥

स्मरचक्रः । पुं० रतिबन्धविशेषे ॥ यथा । धृत्वा वामकरेणाङ्घ्रिं स्वपादस्योपरिस्थितम् । दृढस्वरमतिकामो स्मरचक्रः प्रकीर्त्तितः ।

स्मरच्छत्रम् न० योनौ ।

स्मरणम् । न० चिन्तायाम् । स्मृतौ ॥ आध्याने ॥ स्मृ चिन्तायाम् । ल्युट् ॥ अलङ्कारविशेषे ॥ यथा । यथानुभवमर्थस्य दृष्टे तत्सदृशे स्मृतिः । स्मरणम् ॥ यः पदार्थः केनचिदाकारेण नियतो यदा कदाचिदनुभूतोऽभूत् । सकालान्तरे स्मृतिप्रबोधाधायिनि तत्समाने वस्तुनि दृष्टे सति यत्तस्य वस्तुनः स्मरणं तदेतत् स्मरणम् । उदाहरणम् । निम्ननाभिकुहरेषु यदम्भः प्लावितं चलदृशां लहरीभिः । तद्भवैः कुहरतैः सुरनार्य्यः स्मारिताः सुरतकण्ठरुतानाम् । यथा वा । करतलगलितजलोदा० यथा मुनिविसि आधरपुटस्य । सम्भरितपयस्त्रस्य स्मरणमहकस्य स्मारि मस्तम् । अन्यसंक्रान्तं यथा । करद्युगपवीतयशोदास्तनमुखविनिवेशिताधरपुटस्य । स्मृतपाञ्चजन्यचुम्बनमन्यत्तस्य रोमाञ्चमिति ॥

स्मरणापत्यतर्पकः । पुं० कच्छपे ॥

स्मरदशा । स्त्री० कामावस्थायाम् ॥ सा दशविधा यथा । नयनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽथ सङ्कल्पः । निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः ॥ उन्मादो मूर्च्छा मृतिरित्येता स्मरदशा दशैव स्युरिति ॥

स्मरदायी । त्रि० कामोद्दीपके ॥

स्मरध्वजः । पुं० वाद्ये । शिश्ने ॥ न० योनौ ।

स्मरधूला । स्त्री० ज्योत्स्नायां रात्रौ ॥

स्मरप्रिया । स्त्री० कामपत्न्याम् । रतौ ॥

स्मरमन्दिरम् । न० भगे । योनौ ॥

स्मरलेखनी । स्त्री० शारिकापक्षिणि ॥

स्मरवल्लभः । पुं० अनिरुद्धे ॥

स्मरवीथिका । स्त्री॰ वेश्यायाम् ॥

स्मरवृद्धिः । स्त्री॰ कामवृद्ध्याख्यौषधौ । मदनायुधे ॥ स्मरस्य वृद्धिर्यया ॥

स्मरसखः । पुं॰ वसन्ते ॥ कामोद्दीपकत्वात् ॥ स्मरस्य सखा । टच ॥

स्मरसहः । त्रि॰ कामोद्दीपके ॥ सहते । षह॰ । पचाद्यच् । स्मरस्य सहः ।

स्मरस्तम्भः । पुं॰ उपस्थे । मेढ्रे ॥ स्मरस्य स्तम्भ इव स्तम्भः ॥

स्मरस्मर्य्यः । पुं॰ गर्द्दभे ।

स्मरहरः । पुं॰ शिवे । स्मरं हरति । हरतेरनुद्यमनेऽच् ।

स्मरागारम् । न॰ भगे ॥

स्मराङ्कुशः । पुं॰ कररुहे । नखे ।

स्मराम्रः । पुं॰ राजाम्रे ॥

स्मरासवः । पुं॰ लालायाम् । मुखसुरे । मद्यप्रभेदे ।

स्मेरकः । पुं॰ अश्वे ।

स्मर्त्तव्यः । त्रि॰ स्मरणीये ॥ यथा । स्मर्त्तव्यः सततं विष्णुर्विस्मर्त्तव्यो न जातुचित् । सर्वे विधिनिषेधाः स्युरेतयोरेव किङ्कराः ॥

स्मायः । पुं॰ गूढहसिते ॥

स्मारकः । त्रि॰ स्मरणकारके ॥

स्मार्त्तः । त्रि॰ स्मृतिशास्त्रविदि ॥ स्मृतिविहिते ॥ स्मृतिसम्बन्धिनि ॥ न॰ स्मृतिशास्त्रोक्तकर्म्मणि । यथा । श्रौतं कर्म्म स्वयं कुर्य्यादन्योऽपि स्मार्त्तमाचरेत् । अशक्तौ श्रौतमप्यन्यः कुर्य्यादाचारमन्ततः ॥

स्मार्त्तयज्ञः । पुं॰ यज्ञविशेषे ॥ स च तुर्विधो यथा । देवयज्ञः पितृयज्ञो भूतयज्ञस्तथैव च । मनुष्ययज्ञ इत्येवं स्मार्त्तयज्ञश्चतुर्विधः ॥

स्मितम् । न॰ ईषद्धास्ये ॥ तल्लक्षणं यथा । ईषद्विकसितैर्दन्तैः कटाक्षैः सौष्ठवान्वितम् अलक्षितद्विजद्वारमुत्तमानां स्मितं भवेदिति ॥ स्मिङ् ईषद्धसने । भावे क्तः ॥ त्रि॰ विकसिते ॥

स्मितदृक् । त्रि॰ स्मेराक्षे ॥

स्मृतः । त्रि॰ स्मृतिविषये । कृतस्मरणे ॥ यथा । आह्निके पितृकार्य्ये च मासश्चान्द्रमसः स्मृतः । विवाहादौ स्मृतः सौरो यज्ञादौ सावनो मतः ॥

स्मृतिः । स्त्री॰ धर्म्मसंहितायाम् । मन्वादिप्रणीतधर्म्मशास्त्रे ॥ स्मर्य्यतेऽनुष्ठानप्रकारोऽनया । स्मृतिश्चिन्तायाम् । स्त्रियाम् क्तिन् । वेदार्थस्मरणपूर्व्वकं रचितत्वाद्वा ॥ स्मा स्त्रमाचे । स्मरन्ति वेदमनयेति स्मृतिः ॥ महर्षिभिर्वेदार्थस्मरणं स्मृतिः । तद्योगाद्ग्रन्थोऽपि स्मृतिः ॥ स्मरणे । स्मर्त्तव्यानुसन्धा

मे ॥ धृतौ ॥ इच्छायाम् ॥ अनुभूतविषयज्ञाने ॥ स्वाश्रयाश्रितक्रियाजन्यसंस्कारजन्यज्ञानं स्मृतिरिति रघुमञ्जरी ॥ शास्त्राचार्योपदिष्टार्थानुस्मरणे ॥ अनुभवजन्यसंस्कारजन्यज्ञाने ॥ यथा । विभुर्बुद्ध्यादिगुणवान् बुद्धिस्तु द्विविधा मता । अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधेति भाषापरिच्छेदः ॥ सा स्मृतिर्द्विधा । यथार्था च अयथार्था च । तत्र प्रमाजन्या यथार्था अप्रमाजन्याऽयथार्था ॥ अनुभूतविषयाऽसम्प्रमोषप्रत्यये ॥ पूर्वानुभवसंस्कारजज्ञाने । चिरानुभूतार्थस्मरणशक्तौ ॥ एतज्जन्मनि पूर्वानुभूतार्थविषयायां उक्तौ ॥ योगिनां जन्मान्तरानुभूतार्थविषयापि स्मृतिर्भवति ॥ अनुभूतप्रियादीनामर्थानां चिन्तनं स्मृतिः । तत्र कम्प भ्रूक्षेप श्वासनिःश्वसितादयः ॥ तत्पर्यायाः । चिन्ता । आध्यानम् । चिन्तिया । ध्यानम् । स्मरणम् । चर्चेति । स्मरणम् स्मृ च ध्याने । क्तिन् ॥

स्मृतिमान् । त्रि॰ पूर्वानुभूतार्थविस्मरणशीले । स्मृतिविशिष्टे ॥ स्मृतिरस्त्यस्मिन् वा । मतुप् ॥

स्मृतिविभ्रमः । पुं॰ स्मृतेर्विचलने ॥

स्मृतिविरुद्धः । त्रि॰ धर्मशास्त्रविपरीते ॥ यथा कूर्मपुराणे हिमालयं प्रति देवीवाक्यम् । यानि शास्त्राणि दृश्यन्ते लोकेऽस्मिन् विविधानि च । श्रुतिस्मृतिविरुद्धानि निष्ठा तेषां तु तामसी ॥ करालभैरवञ्चैव यामलं वाममयत्कृतम् । एवं विधानि चान्यानि मोहनार्थानि तानि वै ॥ मया सृष्टानि चान्यानि मोहायैषां भवार्णवे ॥ इति ॥ जीवप्रवृत्तिकारीणि कानिचित्कथितानि चेत्समशानिर्वाणसन्तम् ॥

स्मृतिशास्त्रम् । न॰ धर्मसंहितायाम् ॥

स्मृतिहेतुः । पुं॰ स्मरणबीजे । वासनायाम् । संस्कारे । भावनायाम् ॥

स्मेरः । पुं॰ हासे । त्रि॰ प्रकाशयुक्ते ॥ ईषद्धसनशीले ॥ अयं तेन चोलः । ष्मिङ् ईषद्धसने । नमिकम्पिस्म्यजसकमहिंसदीपो रः ॥

स्मेराक्षः । त्रि॰ स्मितदृष्टि ॥

स्यदः । पुं॰ जवे । वेगे ॥ सवेगगतिवचनेऽस्यप्रयोगः स्यन्दतेऽनेन । स्यन्दनं वा स्यन्दू प्रस्रवणे । स्यदो जवइति घञन्तो निपातितः ॥ वेगाख्यगुणे ॥

स्यन्दः । पुं॰ स्यन्दने ॥

स्यन्दनः । पुं॰ तिनिशवृक्षे । नेमि

नि । रथद्रौ । अतिमुक्तके । अतो
तकल्प'ऽस्त्रि हृदे ॥ न० स्रुतौ । च
रणे । नीरे । सलिले ॥ पुं० न०
रथे ॥ त्रि० जवने । स्यन्दते स्य
न्द० । बहुलमन्यत्रापीतियुच् ।
चलनशब्दार्थादकर्मकाद्युच्० इ
तिशायुच् ॥ यद्वा । स्यन्दते०
प्रद्रवति । स्यन्द० । नन्द्यादि
त्वाल्ल्युः ॥

स्यन्दनद्रुमः । पुं० तिनिशवृक्षे ॥

स्यन्दनारोहः । पुं० रथिनि । रथा
रूढयोद्धरि । स्यन्दनमारोहय
ति । रुह० । कर्मण्यण् ॥

स्यन्दनाह्वयः । पुं० तिमिशे ॥ ति
न्दुके । स्यन्दनमाह्वयो यस्य सः

स्यन्दनिः । पुं० तिनिशद्रुमे ॥

स्यन्दनिका । स्त्री० क्षुद्रनद्याम् ।

स्यन्दनी । स्त्री० लालायाम् । मूत्र
नाड्याम् ॥

स्यन्दी । त्रि० स्रवणशीले ॥

स्यन्दनी । स्त्री० लालायाम् ॥ अव
श्यं स्यन्दते । स्यन्द० । आवश्यके
ति णिनिः ॥

स्यन्नः । त्रि० स्रुते जलादौ । स्यन्दते
स्म । स्यन्द० । क्तः । रदाभ्यामि
ति णत्वम् ॥

स्यन्नम् । त्रि० स्रुते । रीणे ॥

स्यमन्तकः । पुं० श्रीकृष्णहस्तमणौ
। मणिः स्यमन्तको हस्ते भुजमध्ये
तु कौस्तुभद्युतिरिमचन्द्रः । सौरभा
द्रपदीयचतुर्थ्यां चन्द्रदर्शने स्यमन्त-
कोपाख्यानं श्रुत्वा वक्ष्यमाणमन्त्रा
भिमन्त्रितं जलं पिबेत् । मन्त्रस्तु ।
सिंहः प्रसेनमवधीत् सिंहो जाम्ब
वता हतः । सुकुमारक मा रोदी
स्तव ह्येष स्यमन्तकः इति ॥

स्यमीकः । पुं० मुनिविशेषे ॥ पा
दपे । वृक्षे । नाके । वल्मीके
॥ स्यमति । स्यम् शब्दे । स्यमे
रीट् चेति कन् ॥

स्यमीका । स्त्री० नीलिकायाम् ॥

स्याद्वादी । पुं० जिने ॥

स्यालः । पुं० पत्नीभ्रातरि । श्याले
॥ स्यामयति । स्यम वितर्के चुरा
दिः । अच् पृषोदरादिः ॥

स्यूतः । पुं० प्रसेवे । वस्त्रवणादि
निर्मितथैलादिति ख्याते ॥ त्रि० ऊ
ते । प्रोते । बुना० इ० भा० ॥
कृतसीवने । सीव्यतिस्म । षिवु
तन्तुसन्ताने । क्तः च्छ्वोरित्यूठ् । य
णादेशः ॥

स्यूतिः । स्त्री० सूच्यादिनावस्त्रा
दिसीवने । सेवने । सीवना० इ०
भा० प्र० ॥ षिवेः क्तिन् । ऊठ्
। सन्ततौ ॥

स्यूनः । पुं० किरणे ॥ सूर्ये ॥
धौतकटे ॥ सीव्यतेऽनेनेति । षि
वु० । सिवेष्टयूच्चेतिनः । दीर्घो

वारणसामर्थ्यादिगुणः ॥

स्यूमः । पुं॰ किरणे ॥ सूत्रतन्तौ ॥ सीव्यति षिवु॰ । अविसिविसिशुषिभ्यः किदिति मन् । च्छ्वोरित्यूठ् ॥

स्रोगवा । स्त्री॰ मागमापत्येषु ॥ यथा । चतुर्नरस्य मेषात्मिमेया । खाः स्रिखण्डिनः । सौदामिनमम गाचाणिमागमाः स्रोगवाश्चेति ॥ मागमाः कर्कटी प्रोक्ता तदपत्यानि स्रोगवाः ॥

स्रोगविः । पुं॰ कर्कटपुच्छे ॥ चाक्षीरात्स्रोगविरिति षिकाण्डशेषः ॥

स्योतः । त्रि॰ स्यूते ॥

स्योमः । पुं॰ किरणे ॥ सूर्ये ॥ धीतकटे । सीव्यति । षिवु॰ । बाहुलकान्मः । यस्य ऊठ् । आगमरूपस्यायम् । गुणश्च ॥ न॰ आनन्दे । त्रि॰ समीचीने । सुखकारिणि ॥

स्योनाकः । पुं॰ श्योनाके । पर्णे ॥ स्योनमाकाति॰ अस्यति वा॰ । अच्॰ । पचाद्यच्॰ घञ् वा ॥

स्रंसनम् । न॰ अङ्गगतदोषत्वाविनयने ॥ स्रंसु अधःपतने ॥ स्रंसेर्ल्युट् ॥

स्रंसमानः । त्रि॰ गलति ॥

स्रंसी । पुं॰ पीलुवृक्षे ॥ स्रंसयति मलम् । स्रंसु अधःपतने । पाग्रहादिणिनिः ॥

स्रंसनीफलः । पुं॰ भण्डीरे । शिरीषवृक्षे ॥

स्रकः । स्त्री॰ कोणे ॥

स्रक्सुगन्धः । पुं॰ भूमिजम्ब्वाम् ॥

स्रग्धरा । स्त्री॰ प्रकृतिच्छन्दः २१ प्रभेदे ॥ तल्लक्षणं यथा । म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयम् ॥ यथा वा । कर्णाताटङ्कयुक्तं वलयमपि सुवर्णं च मञ्जीरयुग्मं पुष्पं गन्धं च मालां हृदि च वरचिरान्‌पुरस्तान् युक्ताम्बुङ्कारं दधाना सुन्नलितरसनारूपवत्कुण्डलाभ्यां मुग्धा कीर्णा निचितं तरलयति बलात् स्रग्धरा कामिनीव ॥ यथा । अन्यप्रीताशिग्रमालावलयितविलसत्‌बाहुदण्डप्रचण्डावेगव्यालोलमुण्डावलिकलिततरत्तारकाटोपकण्ठः । क्रूरं त्रोतः समुद्गतगहनचलद्घर्घरध्यानमुग्धं उत्कृष्टं सत्तमाङ्के दधति च भिरः कन्दुकक्रीडितानि ॥

स्रग्विणी । स्त्री॰ जगतीच्छन्दः १२ प्रभेदे ॥ तल्लक्षणं यथा । कीर्त्तितैषा चतूरेफिका स्रग्विणी । यथा । इन्द्रनीलोपलेनैव या निर्मिता शातकुम्भद्रवालङ्कृता शोभते । नव्यमेघ

ष्टपि : पीतवासा हरेर्मूर्त्तिरास्तां जयायोरसि स्रग्विणी ॥ मालास्याम् ॥

स्रग्वी । पुं॰ भूततन्मात्ररूपां वैजयन्त्याख्यां स्रजं बिभ्राणे हरौ ॥ त्रि॰ कुसुममालाधारिणि ॥ स्रगस्त्यस्य । अस्मायामेधास्रजो विनिरिति विनिः ॥

स्रक्‚ग् । स्त्री॰ मूर्द्धन्यस्तपुष्पदामनि ॥ माल्ये ॥ सृज्यते॰ सृज्यतेऽसौ । सृज विसर्गे । ऋत्विगित्यादिना॰ कर्म्मणि॰ कर्त्तरि वा क्विन्॰ अमागमश्च । कुत्वम् ॥ अतिशक्वरीच्छन्दः १५ प्रभेदे : तल्लक्षणं यथा । स्रगियमपि चरसनवरविरतयति : । यथा । अयि सहचरि॰ रुचिरतरगुणमयी स्रग्दिमवसतिरनपगतपरिमला । स्रगिव निरसतिलकनुतमरसा सुमुखि मुदितदनुजदलनहृदये ॥

स्रज्वा पुं॰ प्रजापतौ ॥ पटसङ्घे ॥ रज्जौ ॥

स्रव : । पुं॰ स्रवे । स्रवणम् । स्रुगतौ । ऋदोरप् ॥ वारिप्रवाहे । यथा हेमचन्द्रः । निर्झरस्तु झरः सरिः । उत्सः सवः प्रस्रवणमिति ॥

स्रवणम् । न॰ सच्छिद्रदृतेः शनैः शनैर्जलनिर्गमे । क्षरणे ॥ स्रु॰ । ल्युट् ॥ मूत्रे ॥

स्रवत्तोया । स्त्री॰ रुदन्त्यां ॥

स्रवद्गर्भा । स्त्री॰ पतितगर्भायाङ्गवि । अवतोकायाम् ॥ पतितगर्भायाम् ॥ स्रवन् गर्भो यस्याः ॥

स्रवद्रङ्ग : । पुं॰ पणयन्त्यौ । हाट॰ बजार॰ दू॰ भा॰ प्र॰ ॥

स्रवन्ती । स्त्री॰ नद्याम् । सरिति । निम्नगायाम् ॥ स्रवति । स्रु॰ । लटः शतृ । उगितश्चेति ङीप् । शप्श्यनोर्नित्यमिति नुम् ॥ गुल्मस्थाने ॥ ओषधिभेदे ॥ सरन्त्याम् ॥

स्रवा । स्त्री॰ मूर्वायाम् । मुरहरा॰ दू॰ भा॰ प्र ॥ स्रवति । स्रु॰ । अच् । गुणावादेशौ । टाप् । जीवन्त्यामोषधौ ॥ जीवन्त्याम् ॥

स्रष्टा । पुं॰ प्रजापतौ । निर्म्मातरि । वेधसि । शम्भौ । शिवे ॥ विष्णौ ॥ सृजति । सृज विसर्गे । तृच् । सृजिदृशोरित्यम् ।

स्रस्त : । त्रि॰ च्युते ॥ स्रस्यते स्म । स्रंसु अवस्रंसने । गत्यर्थाकर्म्मकेति कर्त्तरि क्तः ।

स्रस्तकम् । न॰ च्युते ॥

स्रस्तर : । पुं॰ न॰ वीरणकटे । पल्लवादिशये ॥ पुं॰ कुशमुष्टौ ॥

स्राक् । अ॰ द्रुते । झटित्यर्थे ॥ स्रेघाकि । सम्पदादित्वात् क्विप् । स्रामकति । वक्रकुटिलायां गतौ ।

क्षिप् ॥

स्राम : । त्रि० एकनेत्रे ॥ यस्यसदाच स्रुङ्नासिकाभ्यांस्रवतितस्मिन् ॥

स्राव : । पुं० स्रवणे ॥ आगर्भाधाना च्चतुर्थमासपर्यन्तं गर्भस्यक्षरणे ॥

स्रावकम् । न० मरीचे ॥

स्रावणी । स्त्री० ऋद्धिवृक्षे ॥

स्रावित : । त्रि० गालिते ॥

स्रुग्दारु । न० व्याघ्रपादवृक्षे । विकङ्कते ॥

स्रुघ्न : । पुं० आगराख्ये० नगरे । तदुपान्तदेशे ॥ मथुरायामिव० मथुरावत्स्रुघ्नप्राकारादितिकौमुदी ॥

स्रुघ्नी । स्त्री० सर्जिकाक्षारे ॥

स्रुक्•ग् । स्त्री० खादिरेहवनपात्रविशेषे ॥ तद्भेदायथा । ध्रुवोपभृज्जुहूर्नातुस्रुवोभेदा : स्रुच : स्त्रियस्त्यमर : । तत्रवटपत्राकृतिर्ध्रुवा । उपभृच्चक्राकारा । जुहूरर्द्धचन्द्राकृति : । वैकङ्कतीध्रुवाप्रोक्ता आश्वत्थीचोपभृन्मता । जुहू : पालाशकात्वन्यखदिरश्रुवोमत : ॥ स्रुशाद्रिकन्तुयज्ञादौपात्रमित्यभिधीयते । स्रुव : पुमानेकहस्तोवाहुमात्रास्रुगीरिता । तद्विशेषा : शरावाद्या : स्त्रीजुहूपभृद्ध्रुवेतिशब्दरत्नावली ॥ स्रवतिघृतादिकम् । स्रुस्रवणेस्रुव : कश्चिच्चेतिचिक्प्रत्यय : ऊकारश्चारणा

थे : । कवृत् । कुत्सम् ॥

स्रुत : । त्रि० क्षरितेजलादौ । क्ते । रीये । च्युते ॥ स्रुगतौ । क्त :

स्रुता । स्त्री० हिङ्गुपत्र्याम् ॥

स्रुव : । पुं० यज्ञपात्रविशेषे । स्रुचि ॥ स्रवति । स्रु० । अच् । संज्ञापूर्वकत्वान्नगुण : । उवङ् ॥ यद्वा । स्रवतिघृतादिकम् । स्रुस्रवणे । स्रु : क : ॥

स्रुवा । स्त्री० होमपात्रान्तरे । स्रुचि ॥ मूर्वायाम् ॥ शल्लक्याम् ॥ टाप् ॥

स्रुवावृक्ष : । पुं० विकङ्कते । स्वादुकण्टके ॥ स्रुवायावृक्ष : ॥

स्रू : । स्त्री० होमपात्रविशेषे । यज्ञोपकरणे ॥ स्रवे ॥ निर्झरे ॥ स्रवत्यतोघृतादिकम् । स्रुस्रवे । क्विप्वचिप्रच्छिश्रिस्रुद्रुप्रज्ञ्वांदीर्घोऽसम्प्रसारणञ्चेतिक्विब्दीर्घो ॥

स्रोतम् । न० स्रोतसि ॥

स्रोतईश : । पुं० समुद्रे ॥ स्रोतसामीश : ॥

स्रोत : । न० स्वतोम्बुसरणे ॥ प्रवाहे । वेगेनचलज्जले ॥ इन्द्रिये ॥ शरीरस्थनवच्छिद्रेषु ॥ स्रवति । स्रुगतौ । स्रुरीभ्यांतुट्चेत्यसुन्० तुडागमश्च ॥

स्रोतस्वती । स्त्री० नदीमात्रेसरि

ति । दीप्त्यवत्याम् । स्रोतांसि सन्त्यस्याः । तदस्यास्तीति मतुप् । मादुपधायाश्चेति वत्वम् । उगितश्चेति ङीप् ॥

स्रोतस्विनी । स्त्री॰ सरिति । स्रोतांसि सन्त्यस्याः । अस्मायामेधास्रजो विनिः । नान्तत्वान्ङीप् ॥

स्रोतोऽञ्जनम् । न॰ सौवीरे । कापोताञ्जने । यामुने । अस्य लक्षणादयो यथा । तत्र स्रोतोऽञ्जनं कृष्णं सौवीरं श्वेतमीरितम् । वल्मीकशिखराकारं भिन्नमञ्जनसन्निभम् । घृष्टन्तु गैरिकाकारमेतत् स्रोतोऽञ्जनं स्मृतम् । स्रोतोऽञ्जनसमं ज्ञेयं सौवीरं तत्तु पाण्डुरम् ॥ स्रोतोऽञ्जनं स्मृतं स्वादु चक्षुष्यं कफपित्तनुत् । कषायं लेखनं स्निग्धं ग्राहि च्छर्दिविषापहम् ॥ हिध्मक्षयास्रहृच्छोतसिध्मीय सदा बुधैः । स्रोतोऽञ्जनगुणाः सर्वे सौवीरेऽपि मता बुधैः ॥ किन्तु सौवीरञ्जनयोः श्रेष्ठं स्रोतोऽञ्जनं स्मृतम् ॥ इति भावप्रकाशः । स्रोतोऽञ्जनन्तु तद्विद्यादञ्जनाभं यदञ्जनमिति मदनपालः ॥ अपि च । स्रोतोऽञ्जनं मतं श्रेष्ठं विशुद्धं सिन्धुसम्भवम् । दृष्टेः काण्डमलस्ररदाहकृद्रक्तजापहम् ॥ अन्योऽक्पावहस्व वसच्छतेमारुतातपौ । नेत्ररोगा न जायन्ते तस्मादञ्जनमाचरेत् स्रोतोऽञ्जनं कृष्णसुरमेति प्रसिद्धम् । अज्यते नयनमनेन चक्षुष्यत्वात् । अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु । करणे ल्युट् । स्रोतसि सोऽञ्जनं स्रोतोऽञ्जनम् ॥

स्रोतोभेदकः । पुं॰ प्रवहज्जलानां सेतुभेदादिना देशान्तरनेतरि ॥

स्रोतोवहा । स्त्री॰ नद्याम् ॥

स्वःसिन्धुः । स्त्री॰ गङ्गायाम् ॥

स्वः । पुं॰ आत्मनि ॥ ज्ञातौ । पुं॰ न॰ धने ॥ न॰ द्वितीयभवने । त्रि॰ आत्मीये । स्वनति । स्वनशब्दे अन्येभ्योऽपीति डः ॥

स्वकः । त्रि॰ स्वीये । आत्मीये ॥

स्वकम्पनः । पुं॰ वायौ ॥

स्वकर्म्मकृत् । त्रि॰ निजकार्य्यकर्त्तरि ॥

स्वकीयः । त्रि॰ आत्मसम्बन्धिनि । स्वीये । निजे । आत्मीये ॥ स्वस्येदम् । गहादिषु स्वस्येति छः कुगागमश्च ॥

स्वकुलक्षयः । पुं॰ मत्स्ये ॥ निजवंशनाशे ॥ त्रि॰ तत्कर्त्तरि॰ तद्विशिष्टे च ॥

स्वगतम् । न॰ मनोगते । त्रि॰ आत्मप्राप्ते ॥ आत्मनोगते ॥

स्वगुप्ता । स्त्री॰ आत्मगुप्तायाम् । शुकशिम्ब्याम् ॥ लज्जालौ ॥

स्वगृहः । पुं॰ कलिङ्कारपक्षिणि ॥

पुं॰ न॰ निजालये ॥

स्वङ्ग : । त्रि॰ सुरूपे । सुन्दराङ्गवि शिष्टे । सिद्धसंहनने । शोभना निशास्त्रीशचलचलितान्यङ्गान्य- स्य ॥ न॰ शोभनावयवे ॥

स्वच्छ : । पुं॰ स्फटिके ॥ न॰ मौक्तिके ॥ त्रि॰ प्रकाशगुणादोपस म्बस्वशुन्ये परमात्मनि ॥ निर्मले । यथा । आसनंवसनंपात्रंशय्या यानंनिकेतनम् । गृह्यकंवस्तुजातञ्च स्वच्छं तत्स्वच्छमश्नुतेदूर्तिव्याधिशू- न्ये ॥

स्वच्छटी । स्त्री॰ अङ्गुलिमोटने । अङ्गुलिसन्देशे ॥

स्वच्छन्द : । त्रि॰ स्वतन्त्र । स्वतन्त्रो पावृत : स्वैरीस्वच्छन्दोनिरवग्रहइ त्यमर : ॥ स्व : आत्मच्छन्दोऽभि लाषोऽस्य ॥

स्वच्छन्दचारी । त्रि॰ स्वच्छन्दवि हरणशीले ॥

स्वच्छपत्रम् । न॰ अभ्रके ॥ स्वच्छम् त्पत्रयस्य ॥

स्वच्छमणि : पुं॰ स्फटिके ॥

स्वच्छवालुकम् । न॰ विमलोपरसे । निर्मले ।

स्वच्छा । स्त्री॰ श्वेतदूर्वायां

स्वज : । पुं॰ प्रस्वेदे । पुत्रे । न॰ रक्ते ॥ त्रि॰ स्वजाते ॥

स्वजन : । पुं॰ ज्ञातौ । सगोत्रे ॥ स्वआत्मीयश्चासौजनश्च ॥ आत्मी येबन्धुवर्गे ॥ आश्रितशाश्वतादौ ॥

स्वजा । स्त्री॰ कन्यायाम् ॥

स्वतन्त्र : । त्रि॰ स्वच्छन्दे । निरव- ग्रहे ॥ यथा । सभयादभयंप्राप्तस्त दर्थंयततेचय : । सपुन : सभयं गन्तुंस्वतन्त्रोनेच्छतीति ॥ न॰ स्वस्वतन्त्रागमेषु । तन्त्रविशेषे ॥ स्वकीयशास्त्रे ॥

स्वतन्त्रप्रज्ञ : । पुं॰ व्यासादिषु । स्मृ त्यपेक्षामन्तरेणपौरुषपर्यालोचनया श्रुतिशब्देरर्थप्रतिपत्तिसम- र्थेष्विन्द्रय : ॥

स्वत : । अ॰ आत्मनइत्यर्थे ॥

स्वत्वम् । न॰ शास्त्रसम्मतयथेष्टविनि योगार्हत्वे । सप्तपदार्थातिरिक्तपदा र्थे ॥

स्वदनम् । न॰ अशने ॥ आस्वादे ॥ लेहे ॥

स्वदृष्टान्त : । पुं॰ स्वपक्षे । स्व : स्वी य : दृष्टान्तोयत्र ।

स्वधर्म : । पुं॰ स्ववर्णाश्रमाचारा- रे । यंस्वर्गमोक्षसंपादनायविहि त : सस्वधर्म : । स्व : स्वकीयो- धर्म : ॥

स्वधा । अ॰ पितृभ्योदीयमानेऽन्ने । पितॄणामन्ने ॥ पितृदाने ॥ यथा । पितॄणांसुरपक्षीचमुनिभिर्मनु भिर्नरै : । पूजितापितृदानेहिनि

अफलंचययाविभीतिभागवतम् ॥ पि त्र्यदानमन्त्रे । देवहविर्दाने ॥ यथा स्वाहादेवहविर्दानेश्रौषट्वौषट्व षट्स्वधेत्यमरः । अत्रपितरोदेवता इतिस्मृतेस्तेपिदेवाः ॥ स्वमात्मा नंशरीरपोषयतीतिस्वधा ॥ स्वधा पितृणामन्नमितिश्रुतिः ॥ देवपि तृहविर्दाने । स्वद्यतेऽनेन । ष्वद आस्वादने । आप्रत्ययः । पृषोद रादित्वाद्दस्यधः ॥

स्वधा । स्त्री॰ पितृदाने ॥ स्वधाऽस्त्य स्याम् । अच् । टाप् । पितृपत्न्या म् ॥ स्वाभृधत्तेइतिव्युत्पत्तेः । नमः स्वधायैस्वाहायै॰ इतिप्रयो गश्च ॥

स्वधाप्रियः । पुं॰ कृष्णतिले ॥

स्वधाभुक् । पुं॰ पितृगणे । दिव्य पितरि ॥ देवे ॥

स्वधाम । न॰ स्वरूपविस्फुरणे ॥

स्वधायी पुं॰ पितृषु ॥ स्वधागमन शीलः । सुप्यजातौणिनिस्ताच्छी ल्ये ॥

स्वधावाचनम् । न॰ श्राद्धयोग्यकाल विशेषे ॥ यथा । ऊर्द्ध्वंमुहूर्त्तात् कुतपाद्यन्मुहूर्त्तचतुष्टयम् । मु हूर्त्तपञ्चकञ्चैवस्वधावाचनमिष्य ते ॥ कुतपादूर्द्ध्वंमुहूर्त्तंचतुष्ट यं॰ मुहूर्त्तपञ्चकस्यकुतपात्पूर्व म्॰ अर्द्धादिकंमुहूर्त्तकुतपस्य ।

स्वधाशोच्यतेऽच । वच॰ । अधिक रणेल्युट् ॥

स्वधितिः । पुं॰ स्त्री॰ कुठारे । य था । द्वयोः कुठारःस्वधितिः परशुश्चपरश्वधइत्यमरः ॥ स्वधि यति । धिधारणे । क्तिच् ॥ छेद नीयमांसस्यशस्त्रविशेषे ॥

स्वनः । पुं॰ शब्दे । निनादे । निन दे । ध्वनौ ॥ स्वननम् । स्वनश ब्दे । स्वनहसोर्वेतिपक्षेऽप् ॥

स्वनचक्रः । पुं॰ रतिबन्धविशेषे । यथा । धृत्वाबाहूतथाकण्ठंपाद- तोपिशिरःस्थितः । गाढस्वकाम येत्कामीस्वनचक्र प्रकीर्त्तितइति रतिमञ्जरी ।

स्वनितम् । त्रि॰ ध्वनिते ॥ न॰ ग र्ज्जिते । मेघशब्दे ॥ स्वन्यतेस्म । स्वन॰ । क्तः ॥

स्वनिताह्वयः । पुं॰ तण्डुलीयशाके । अल्पमारिषे ॥

स्वनुष्ठितः । त्रि॰ सर्वाङ्गोपसंहारेण सम्पादिते ॥

स्वनोत्सहः । पुं॰ गण्डके ॥

स्वन्तः । त्रि॰ अन्ततोऽतरकाले । शुभो दर्के ॥

स्वपन । त्रि॰ निद्रामनुभवति ॥ स्वपि ति । ञिष्वप्॰ । लट : अत्वा देश : ॥

स्वपतिः । पुं॰ आढ्ये । निजभर्त्तरि ॥

स्वपनम् । न॰ निद्रायाम् । ञिष्वप् शये । ल्युट् ॥

स्वपिण्डा । स्त्री॰ पिण्डखर्ज्जूर्याम् ॥

स्वप्नः । पुं॰ निद्रायाम् । शयने । स्वापे ॥ प्रसुप्तस्य विज्ञाने । आशयवासनामये । जागरितसंस्कारजः प्रत्ययः सविषयः स्वप्नइत्युक्तलक्षणो यन्तःकरणस्याद्धविकाशेयथा- । जाग्रदवस्थायांयद्दृष्टंयच्छ्रुतं तज्जनितवासनयानिद्रासमयेयं प्रपञ्चो यत्प्रतीयतेसास्वप्नावस्थेतिवासुदेवसरस्वती ॥ तथाच । बाह्येषुकरणेषूपसंहृतेषुजागरितवासनानुसारेणमनसस्तदर्थाभासाकारावभासनंस्वप्नशब्दितम् ॥ यथाहुः । इन्द्रियाणामुपरमेमनोऽनुपरतंयदि । सेवतेविषयानेवतद्विद्यात्स्वप्नदर्शनमिति ॥ सचसप्तविधोयथा । दृष्टः श्रुतोऽनुभूतश्चप्रार्थितः कल्पितस्तथा । भाविकोदोषजश्चेतिस्वप्नः सप्तविधः स्मृतइति ॥ स्वप्नजाग्रदादिकल्पमयात्सप्तविध्यमाह । स्पष्टस्मृतिरथास्पष्टस्मृतिरस्मृतिरित्यमी । स्वप्नभेदाः । स्वप्नमध्येजाग्रत्स्वप्नसुषुप्तयइति ॥ सन्ध्यंतृतीयंस्वप्नस्थानमितिश्रुतिः ॥ स्वपित्यनेन । ञिष्वप् शये । कृभृजसिद्रुपन्यनिस्वपिभ्योनिदितिनन् ॥ स्वप्नोऽन्यथाग्रहणंसर्पइवरज्ज्वामितिभाष्यम् । यथा रज्जुः सर्पोगृह्यमाणोऽन्यथागृह्यते॰ तथात्मनिदेहादिग्रहणमन्यथाग्रहणम्॰ आत्मनोदेहादिवैलक्षण्यस्यश्रुतियुक्तिसिद्धत्वात् ॥ अन्यथागृह्णतः स्वप्नोनिद्रातत्त्वमजानतः । विपर्यासेतयोः क्षीणेतुरीयंपदमश्नुते ॥

स्वप्नकृत् । पुं॰ सुनिषण्णके ॥ जीवे ।

स्वप्नक् । त्रि॰ शयालौ । निद्राशीले । स्वप्नशीलः । ञिष्वप्॰ । स्वपितृषोर्नजिङ् ॥

स्वप्नदृक् । पुं॰ जीवे ॥ स्वप्नान्पश्यति । दृशिर्॰ । क्विप् ॥

स्वप्नस्थानः । पुं॰ तैजसे । स्थूलप्रपञ्चलयस्थानस्वप्नव्यष्ट्युपहितचैतन्ये ॥ स्वप्नःस्थानमस्य ॥

स्वप्नान्तः । पुं॰ स्वप्नमध्ये । स्वप्नविच्छेदे ॥ सुषुप्तिस्थाने । स्वप्नस्यान्तोऽवसानंयस्मिन् ॥

स्वप्रकाशः । पुं॰ अन्यानपेक्षप्रकाशे । चन्द्रसूर्यादिप्रकाशनिरपेक्षे॰ स्वयमेवभासमानेद्रष्टरि । दृश्यानां जडानांबुद्ध्यादीनांदर्शनंस्वप्रकाशंद्रष्टारंविनानघटते । यथोक्तंलक्ष्मीधरिसूरिभिः । नप्रकाशेदमित्युक्तिर्यत्प्रकाशैकबन्धना । स्वप्रकाशंतमात्मानमप्रकाशः कथंस्पृशेदिति ॥ स्वेनात्मनैवप्रकाशते । काशृ दीप्तौ । पचाद्यच् ॥

स्वप्रमाणकः । त्रि० स्वतः सिद्धे ॥

स्वभावः । पुं० स्वकीयधर्मविशेषे । संसिद्धौ । प्रकृतौ । स्वरूपे । निसर्गे । स्वभावपर्यायान्तरं कथ्यतेनसहाऽसहासदसहाकर्म निष्पद्यते । जन्मान्तरकृतधर्माधर्मादिशुभाशुभसंस्कारे । इदानीन्तनजन्मारम्भके प्राक्तनसंस्कारे ॥ सत्त्वसात्त्विकादिभेदात्त्रिविधः अनाद्यविद्यायाम् ॥ स्वतएवाविर्भावे ॥ यथा । वह्निर्हि स्वनपेक्षोऽतु स्वभावोऽयं प्रकीर्तितः । निसर्गः स्वस्वरूपस्य लोकेऽपि भवति द्विधा । निसर्गः सृष्टाभ्यासजन्यः संस्कार उच्यते । स्वजन्यस्तु स्वतः सिद्धः स्वरूपं भावधूम्यतद्युज्ज्वलनो यथाः । स्वो भावः सत्ता यस्य स स्वभावः अनन्याधीनसत्ताकः ॥

स्वभावोक्तिः । स्त्री० अर्थालङ्कारविशेषे । यथा । स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम् । अथोक्तदेकाश्रययोः रूपंवर्णः स्वस्य नस्य । उदाहरणम् । पश्चादङ्घ्रीप्रसार्य्य त्रिकनतिविततं द्राघयित्वाङ्गमुच्चैरासज्याभुग्नकण्ठो मुखमुरसि सटां धूलिधूम्रां विधूय । घासग्रासाभिलाषादनवरतचलत्प्रोथतुण्डस्तुरङ्गो मन्दं शब्दायमानो विलिखति शयनादुत्थितः क्ष्मां खुरेणेति ॥ स्वभावोक्तिरलङ्कारो यथावद्वस्तुवर्णनमिति लक्षणान्तरम् ॥

स्वभूः । पुं० विष्णौ । हरौ ॥ ब्रह्मणि । प्रजापतौ । परमेष्ठिनि ॥ स्वतोभवति । भू इति क्विप् ॥

स्वमेकः । पुं० संवत्सरे ॥ यथा । स्वमेकमेकं वरदात्वशाभवति चण्डिका । रुधिरेणोरणस्थे हतपितामिधिवत्पेतिपुराणम् ॥ स्वमेकं संवत्सरीयव्योमासद्रुतिस्मृतिः ॥

स्वयंहारिका । स्त्री० स्त्रीविशेषे ॥

स्वयङ्कृतः । त्रि० आत्मनाकृते ॥ स्वयङ्कृतेति तत्पुरुषः ॥

स्वयङ्गुप्ता । स्त्री० शूकशिम्ब्याम् ।

स्वयङ्ग्रहः । पुं० प्रार्थनांविनाग्रहणे ॥

स्वयन्दत्तः । पुं० द्वादशविधपुत्रान्तर्गतपुत्रविशेषे ॥ यथाहमनुः । मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात् । आत्मानं स्पर्शयेद्यस्मै स्वयन्दत्तस्तु स स्मृत इति ॥ आत्मानं स्वयं ददाति तवाहं पुत्रो भवामीति । स्वयन्दत्तः उपनतः स्वयं प्राप्त इति यावत् ॥

स्वयम् । अ० आत्मनेत्यर्थे । आप० उ० भा० प्र० ॥ सुष्ठु अयते । अय गतौ । अम् ॥

स्वयमुपस्थितः । त्रि० स्वयमागते ॥

स्वयम्प्रकाशः । त्रि० स्वतः साधना

न्तरनिरपेक्षतयाऽवभासमाने ।

स्वयम्प्रभः । त्रि॰ स्वयम्प्रकाशे स्वयंप्रभाप्रकाशिनि । पुं॰ चतुर्थे भाविभाव्यर्हद्गणे चतुर्थोऽर्हति ॥

स्वयम्भूः । पुं॰ विरिञ्चौ । इति हरूपकोषः ॥

स्वयम्भुवा । स्त्री॰ क्षुपविशेषे । धूम्रपत्रायाम् ॥

स्वयम्भूः । पुं॰ चतुरानने । ब्रह्मणि । काले । परमात्मनि । परमेश्वरे । परमात्मा हि स्वयं भवति स्वेच्छया शरीरपरिग्रहं करोति । न त्वितरजीववत् कर्म्माधीनदेहः । यद्वा । स्वयमेवोत्पन्नो भवति भवोद्भवपरतन्त्रो जनकरहितत्वात् । स्वयमेव भवति । भुवड् इति रूपम् ॥ अर्हद्विशेषे । जिने । जिनचक्रवर्त्तिविशेषे । रुद्रतनये । माषपर्ण्याम् ॥

स्वयम्भूः । स्त्री॰ माषपर्ण्याम् । लिङ्गिन्याम् । इ॰ रा॰ नि॰ व॰ ॥

स्वयम्वरः । पुं॰ विवाहविशेषे । स्वयम्वरे । यत्र कन्या परीक्षां कृत्वा स्वयमेव कामिनी वरं वृणोति तत्र । स च त्रिविधः । स्वयम्वरस्त्रिविधो विद्वद्भिः परिकीर्त्तितः । राज्ञां विवाहयोग्यो वै नान्येषां कथितः किल ॥ इच्छास्वयम्वरश्चैको द्वितीयश्च पणाभिधः । यथा रामेण भग्नं वै त्र्यम्बकस्य शरासनम् ॥ तृतीयः शौर्य्यशुल्कश्च शूराणां परिकीर्त्तितः इति ॥ शौर्य्यशुल्कः शौर्य्यमेव शुल्कं यस्मिन् । यस्य शौर्य्यं वर्त्तते तेन सर्वान् राज्ञो जित्वा कन्या हरणीयेति देवीभागवते तृतीयस्कन्धे १८ ऽध्यायः ॥

स्वयम्वरा । स्त्री॰ स्वयंवरायाम् । स्वेच्छया कृतपतिवरणायाम् योषायाम् । पतिंवरायाम् । वर्य्यायाम् ॥ स्वयं वृणोति पतिम् । वृङ् सम्भक्तौ । संज्ञायां भृतॄवृजिधारिसहितपिदम इति खच् ॥

स्वः । अ॰ परलोके । स्वर्गे । नाके । त्रिदिवे । सुरलोके । यथा । यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपनीतं यत्तत् सुखं स्वःपदास्पदम् ॥ आकाशे । नभसि । व्योम्नि । शोभने । स्वृ शब्दोपतापयोः । स्वर्य्यते स्तूयते । इति स्वः । अन्येभ्योऽपि दृश्यन्त इति वचनात् कर्म्मणि विच् ॥ यद्वा । स्वरति अप्राप्त्या उपतापयति । इति कर्त्तव्युत्पत्तिर्द्रष्टव्या ॥

स्वरः । पुं॰ अच्प्रत्याहारे । उदात्तानुदात्तस्वरितेषु । स्वरति । स्वृ शब्दोपतापयोः । पचाद्यच् । स्वराश्च तद्धर्म्मत्वात् उदात्तादयोऽपि स्वरा उच्यन्ते । उक्तञ्च । उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः ।

चतुर्थः प्रचयो नीचोऽवरो सौ छान्दसः स्मृत इति ॥ उदात्तादिभिः स्वयं राजन्त इति नानोक्त्यां ॥ स्वर इति कण्ठगतं माधुर्य्यमिति भगवत्पूज्यपादाः ॥ श्रुत्यारम्भेऽनुरणने ॥ तदुक्तम् । श्रुत्यनन्तरभावी यः स्निग्धोऽनुरणनात्मकः । स्वतो रञ्जयति श्रोतृचित्तं स स्वर उच्यत इति ॥ शब्दे ध्वनौ ॥ यथा । करिवृषरथौघभेरीमृदङ्गसिंहाब्दनिस्वनाभूपाः । गर्दभजर्जररूक्षस्वरा धनसौख्यसंत्यक्ता इति ॥ नासासमीरणे ॥ निषादादिसप्तसु ॥ ते यथा । निषादर्षभगान्धारषड्जमध्यमधैवताः । पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ॥ आह नारदः । षड्जं रौति मयूरस्तु गावो नर्दन्ति चर्षभम् । अजा विरौति गान्धारं क्रौञ्चो नदति मध्यमम् । पुष्पसाधारणे काले कोकिलो रौति पञ्चमम् । अश्वस्तु धैवतं रौति निषादं रौति कुञ्जर इति ॥ सप्तस्वरोऽयं श्रुतिस्थाने स्वनन् हृदयरञ्जन इत्यन्ये ॥

स्वरतः । अ० स्वरेणेत्यर्थे ॥ आद्यादित्वात्तसिः ॥ यथा । दुष्टः शब्दः स्वरतो वर्णतो वेति ॥

स्वरपत्तनम् । न० सामवेदे ॥ इ० चि० शेषः ॥

स्वरभङ्गः । पुं० गलरोगविशेषे ॥

स्वरभङ्गी । पुं० पक्षिविशेषे ॥

स्वरभेदः । पुं० स्वरभङ्गरोगे ॥

स्वरमण्डलिका । स्त्री० वीणाविशेषे ॥

स्वरनासिका । स्त्री० वंश्याम् ॥

स्वरसः । पुं० वस्त्रनिष्पीडितरसे ॥ यथा । अहतात्तत्क्षणाकृष्टाद्द्रव्यात्क्षुण्णात्समुद्भवेत् । वस्त्रनिष्पीडितो यस्तु स्वरसो रस उच्यते ॥ अहतः कीटाग्निधूमादिभिरनुपहतः ॥ शिलापिष्टकल्के ॥ यथा । क्षीरसः स्वरसः प्रोक्तः कल्कोऽदृषदि पेषित इति ॥ कषायविशेषे ॥ यथा । सद्यः समुद्धृताद्द्रव्याद्यन्त्रादिपीडनात् । यो रसस्त्वभिनिर्याति स्वरसः स प्रकीर्तित इति ॥ अपि च । पिष्टः कल्को विनीयस्तु स्वरसः पीडितो रसः । क्वाथः कषायो निर्यूहो निर्यासो वेष्टकस्तथेति रत्नमाला ॥

स्वरा । स्त्री० ब्रह्मणो ज्येष्ठपत्न्याम् । गायत्रीसपत्न्याम् ॥

स्वरांशः । पुं० सङ्गीते स्वरस्यार्द्धपादे वा ॥

स्वराट् । पुं० स्वतो भासमाने सवितरि ॥ इन्द्रियानपेक्षस्वतःसिद्धज्ञाने परमेश्वरे ॥ स्वेनैव राजते । राजृ दीप्तौ ॥ सत्सूद्विषेत्यादिना क्विप् ॥

स्वरापगा । स्त्री॰ मन्दाकिन्याम् ॥

स्वरालुः । पुं॰ वचायाम् ॥

स्वरितः । पुं॰ मध्यस्वरे । उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिंस्तस्मिन्नपि ॥ शब्दनिष्ठधर्मविशेषे । स्वरः सप्त तीव । द्रुतच् ॥

स्वरुः । पुं॰ शम्बे । कादिन्याम् । वज्रे ॥ यूपखण्डे । यूपितच्छमात्प्रथमपतितशकले ॥ यूपैकदेशप्रादेशमात्रकाष्ठे ॥ अध्वरे ॥ शरे । बाणे ॥ स्वरति॰ स्वर्तेवा । स्वृ शब्दोपतापयोः । शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च - त्युः ॥

स्वरुचिः । त्रि॰ स्वच्छन्दे । स्वतन्त्रे ॥ स्त्रीस्वेच्छायाम् ॥

स्वरूः । पुं॰ स्वरौ । वज्रे ॥ शोभना निरूरूंषिधारा यस्य सः ॥

स्वरूपम् । न॰ स्वभावे । निसर्गे ॥ स्वस्य रूपम् । स्वमेव रूपं यस्य वा । परमानन्दप्रकाशो ह्यात्मनः स्वरूपम् । येन धर्मेण व्यपदिश्यते तेन तत्स्वरूपम् ॥ त्रि॰ प्राज्ञे । विदुषि ॥ मनोज्ञे ॥ प्रागरूपसुरूपाभिरूपावुधमनोज्ञयोरित्यमरः ॥

स्वरूपलक्षणम् । न॰ अध्यासाधिष्ठानत्वेन सत्यं सर्वज्ञं ॥

स्वरूपस्थितिः । स्त्री॰ समाधिविशेषे ॥ यथा । संशान्तसर्वसङ्कल्पा याशिलावद्वस्थितिः । जाग्रन्निद्राविनिर्मुक्ता सा स्वरूपस्थिति परेति ॥

स्वरूपासिद्धः । पुं॰ हेत्वाभासविशेषे ॥ यथा । शब्दो गुणश्चाक्षुषत्वादिति । अत्र चाक्षुषत्वं शब्दे नास्ति । शब्दस्य श्रावणत्वात् ॥ स्वरूपेणासिद्धः ॥

स्वरूपासिद्धिः । स्त्री॰ साध्यसमाख्यहेत्वाभासभेदे । पक्षे हेतुतावच्छेदकावच्छिन्नस्याभावे । यथा । ह्रदो द्रव्यं धूमादित्यादौ ॥ स्वरूपस्यासिद्धिः ॥

स्वरेणुः । स्त्री॰ सूर्यपत्नीविशेषे । संज्ञायाम् । यममातरि ।

स्वरोदयः । पुं॰ स्वरज्ञापकग्रन्थविशेषे ॥

स्वरोदयवित् । त्रि॰ दिक्परमार्थवादिनि ॥ सर्वदिशः परमार्थत्वात् । भ्रान्तिमात्रमेतत् । तद्विदामपि पराजयदर्शनात् ॥

स्वर्गः । पुं॰ नाके । त्रिदिवे । त्रिविष्टपे । देवलोके । सुखाधारे ॥ सुष्ठु अर्ज्यते । अर्जअर्जने । कर्मणि घञ् । न्यङ्क्वादित्वात्कुत्वम् । सामवेदे । दुःखविरोधिनि सुखविशेषे । उत्कृष्टसुखे ॥ स च स्वर्गः स्वसत्तयासमूलघातमपहन्ति दुःखम् । नचैषक्षयी । तथाहि श्रूयते । अपाम सोमममृता अभूमेति

अश्वमेधे कृतोऽमृतस्य सम्भवः । यन्नदुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपनीतञ्च सुखं तत् स्वःपदास्पदम् ॥ स्वर्ग्यतेऽस्मिन्निति वा । स्वर्ज गतिस्थानादौ ॥ इति घञ् ॥ मनः प्रीतिकरः स्वर्गो नरकस्तद्विपर्ययः । नरकस्वर्गसंज्ञे वै पापपुण्ये द्विजोत्तमाः ॥ पारिभाषिकस्वर्गो यथा । मनोऽनुकूलः प्रमदारूपवत्यः स्वलङ्कृताः । चारुः प्रासादपृष्ठेषु स्वर्गः स्याच्छुभकर्मणाम् इति गारुडे १०८ अध्यायः ॥

स्वर्गगामी । त्रि॰ स्वर्गगमनकर्त्तरि ॥ यथा । सर्व्वहिंसानिवृत्ता ये सर्व्वदुःखहराश्च ये । सर्व्वस्याश्रयभूता ये ते नराः स्वर्गगामिनः ॥

स्वर्गङ्गा । स्त्री॰ मन्दाकिन्याम् ॥

स्वर्गद्वारम् । न॰ तीर्थविशेषे ॥

स्वर्गपतिः । पुं॰ इन्द्रे । पुरन्दरे ।

स्वर्गपरः । पुं॰ स्वर्गप्रधाने ॥ स्वर्ग एव उर्व्वश्याद्युपेतत्त्वेन परः उत्कृष्टो यस्य सः ॥

स्वर्गलोकः । पुं॰ वैकुण्ठे ॥ स्वर्गीयते इति स्वर्गः । स्वर्गश्चासौ लोकश्च ॥ यजमाने । स्वर्गो लोको यस्य सः ॥

स्वर्गलोकेशः । पुं॰ इन्द्रे ॥ शरीरे ॥

स्वर्गवधूः । स्त्री॰ सूर्व्वश्यायाम् ॥

स्वर्गसरित् । स्त्री॰ मन्दाकिन्याम् ।

स्वर्गसरिद्वरा ।)
स्वर्गापगा ।) स्त्री॰ भागीरथ्याम् ।

स्वर्गीयः । पुं॰ हरौ ॥ स्वर्गीयत इति स्वर्गीयः ॥

स्वर्गिगिरिः । पुं॰ सुमेरौ ॥

स्वर्गी । पुं॰ देवे । सुरे । त्रि॰ स्वर्गगामिनि ॥ तल्लक्षणन्तु । दयाभूतेषु सम्वादः परलोकं प्रतिक्रिया । सत्यं परहिताधिक्यं वेदप्रामाण्यदर्शनम् ॥ गुरुदेवर्षिपूजा च केवलं साधुसङ्गमः । सत्क्रियाभ्यसनं मैत्री स्वर्गिणां लक्षणं विदुरिति ॥

स्वर्गिवधूः । स्त्री॰ अप्सरसि ॥

स्वर्गिगिरिः । पुं॰ मेरौ । सुरालये ॥

स्वर्गौकाः । पुं॰ अमरे । सुरे ॥

स्वर्ग्यः । त्रि॰ स्वर्गलोकप्राप्तिसाधनभूते ॥ स्वर्गस्य निमित्ते । स्वर्गाय हिते ॥ स्वर्गस्य निमित्तं संयोग उत्पातो वा । गोद्व्यचोऽसङ्ख्यापरिमाणाश्वादेर्यत् ॥

स्वर्णम् । न॰ लोहवरे । भृङ्गारे । अस्य पर्यायो यथा । स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम् । तपनीयं शातकुम्भं गाङ्गेयं भर्म कर्व्वुरम् । चामीकरं जातरूपं महारजतकाञ्चने । रुक्मं कार्त्तस्वरं जाम्बूनदम् अष्टापदोऽस्त्रियामिति ॥ अस्य परीक्षादि यथा । दाहेऽतिरक्तमथ यच्च सि

संछिद्यायां काश्मीरकान्तिवद्विभाति निकषपट्टे । स्निग्धं गौरवमुपैति यत्तु लायाम् जानीत देवकाञ्चनं मृदु रक्तपीतम् ॥ तच्चैकं रसवेधजं तदपरं जातं स्वयं भूमिजं किञ्चान्यद्बहुलोहसङ्करभवं चेति त्रिधा काञ्चनम् । तद्वाद्यं किल पीतरक्तमपरं रक्तं ततोऽन्यद्यथा गौराभं तदिति क्रमेण गदितं स्यात् पूर्वपूर्वोत्तमम् ॥ अस्योत्पत्तिप-रोचे तु द्रष्टव्ये हेमनिस्फुटे । गुणानुभावप्रकाशोऽत्रानुपठामि मारणादिकम् । यथा । सुवर्णं शीतलं वृष्यं बल्यं गुरु रसायनम् । स्वादु तिक्तं तुवरं पाके च स्वादु पिच्छिलम् । पवित्रं बृंहणं नेत्र्यं मेधास्मृतिमतिप्रदम् । हृद्यमायुष्करं कान्तिवाग्विशुद्धिस्थिरत्वकृत् ॥ विषद्वयक्षयोन्मादत्रिदोषज्वरशोषजित् ॥ बलं सवीर्यं हरते नराणां रोगव्रजं पोषयतीह काये । असौख्यकार्यं च सदा सुवर्णमशुद्धमेतन्मरणञ्च कुर्यात् ॥ असम्यङ्मारितं स्वर्णं बलं वीर्यञ्च नाशयेत् । करोति रोगान् मृत्युञ्च तद्धन्याद्यत्नतस्ततः ॥ मारणयोग्यं सुवर्णमाह । दाहे रक्तं सितं छेदे निकषे कुङ्कुमप्रभम् । तारशुल्वोज्झितं स्निग्धं कोमलं गुरु हेम सत् ॥ उत्तमम् । तच्छु-

तं कठिनं रूक्षं विवर्णं समलं दलम् । दाहे छेदेऽसितं श्वेतं कषे स्फुटलघु त्यजेत् ॥ अथ शोधनम् । पत्तलीकृत्य पत्राणि हेम्नो वह्नौ प्रतापयेत् । निषिञ्चेत्तप्ततप्तानि तैले तक्रे च काञ्जिके ॥ गोमूत्रे च कुलत्थानां कषाये तु त्रिधा त्रिधा । एवं हेम्नः परेषाञ्च धातूनां शोधनं भवेत् ॥ अथ मारणम् । सुवर्णस्य द्विगुणं सूतमम्लेन मर्दयेत् । तद्गोलकसमं गन्धं निदध्यादधरोत्तरम् ॥ सुवर्णस्य पतितनूकृतपत्रस्य : गन्धं गन्धकचूर्णं ॥ गोलकञ्च ततो रुद्ध्वा शरावदृढसम्पुटे । त्रिंशद्वनोपलैर्दद्यात् पुटान्येवं चतुर्दश ॥ निरुत्थं जायते भस्म गन्धो देयः पुनः पुनः । रुद्ध्वा सरसकुट्टितचिञ्चाम्लत्वक्कया । वनोपलं गोइठा इति लोके । निरुत्थं यत् पुनर्न जीवति ॥ अथवान्यप्रकारेण हेम्नो मारणमुच्यते । काञ्चने गलिते नागं षोडशांशेन निःक्षिपेत् । चूर्णयित्वा तथाम्लेन घृष्ट्वा कृत्वा तु गोलकम् ॥ गोलकेन समं गन्धं दत्त्वा चैवाधरोत्तरम् । शरावसम्पुटे धृत्वा पुटे त्रिंशद्वनोपलैः । एवं सप्तपुटैर्हेम निरुत्थं भस्म जायते । अथापि पूर्ववद्गन्धः प्रदातव्यः पुनः पुनः ॥ काञ्चनाररसैर्घृष्ट्वा समसूतक-

गन्धयोः । कज्जलीं हिङ्गुलवचाभिर्विलेपये
त्समयातया ॥ काञ्चनारत्वचः क
ल्कैर्मूषायुग्मं प्रकल्पयेत् । धृत्वा
तत्सम्पुटे गोलं मृन्मूषासम्पुटे च त
त् । निधाय सन्धिरोधं कृत्वा सं
शोष्य गोलकम् । वह्निं खरतरं कुर्या
द्देवं दद्यात् पुटत्रयम् ॥ निरुत्थं जा
यते भस्म सर्वकर्मसु योजयेत् । का
ञ्चनारप्रकारेण लाङ्गलीहन्ति काञ्चन
म् ॥ लाङ्गलीकलिहारी ॥ ज्वाला
मुखी तथा हन्यात् तथाऽश्मन्तकः
शिला । शिलासिन्दूरयोश्चूर्णं-
समयोरर्कदुग्धकैः ॥ सप्तधाभा
वनां दद्याच्छोषयेच्च पुनः पुनः
। ततस्तु गलिते हेम्नि कल्कोऽयं दीय
ते समः ॥ पुनर्धमेदतितरां यथा
कल्को विलीयते । एवं वेलात्रयं
दद्यात् कल्कं हेम्नि भिषग्वरः ॥ सु
ष्ठु कर्णीति । उत्तापयति । पचाद्य
च् ॥ यद्वा । वर्णनम् । घञ् ।
शोभनोऽर्णोऽस्य ॥ धत्तूरे ॥ गन्धशा
के । गौरसुवर्णशाके ॥ नागके-
शरे ॥

स्वर्णकणः । पुं॰ कणगुग्गुलौ ॥

स्वर्णकायः । पुं॰ गरुडे । त्रि॰ सु
वर्णमयशरीरे ॥

स्वर्णकारः । पुं॰ स्वनामख्यातसङ्कर
जातिविशेषे । नाडिन्धमे । स्याकरा
इ । तदुत्पत्तिस्तु । विश्वकर्मा च शू

द्रायां वीर्याधानं चकार सः । ततो
बभूवुः पुत्राश्च नवैते शिल्पकारि
णः ॥ मालाकारः कर्मकारः श
ङ्खकारः कुविन्दकः । कुम्भकारः
कांसकारः षडेते शिल्पिनां वराः ॥
सूत्रधारश्चित्रकरः स्वर्णकारस्तथैव च ।
पतितास्ते ब्रह्मशापादयाज्या वर्णसङ्क
राः ॥ स्वर्णकारः स्वर्णचौर्याद्ब्राह्मणा
नां हिरण्यतः । बभूव सद्यः पति
तो ब्रह्मशापेन कर्मणा इति ब्रह्मवैवर्त्ते
ब्रह्मखण्डे १०ऽध्यायः ॥ स्वर्णं
करोति । कृञ् + अण् । कर्मण्यण् ॥

स्वर्णकृत् । पुं॰ स्वर्णकारे ॥

स्वर्णकेतकी । स्त्री॰ हेमकेतक्याम् ।
कनकप्रसवायाम् । हैम्याम् ॥
अस्या गुणाः यथा । सुवर्णकेत
की स्वन्या लघुपुष्पा सुगन्धिनी । के
तकीकुसुमं वर्ण्यं केशदौर्गन्ध्यनाश
नम् । हैमाभं मदनोन्मादवायुकृत्
सौख्यकारि च ॥ तस्यास्तनोति शि
शिरः कटुः पित्तकफापहः ।
रसायनकरो बल्यो देहदार्ढ्यकरः
परः ॥

स्वर्णक्षीरी । स्त्री॰ ओषधिविशेषे ।
पट्पद्याम् । हैमवत्याम् । हि
मावत्याम् । चोकं इति लोके इति
भावप्रकाशः ॥ अस्याः पर्यायाः
यथा । स्वर्णक्षीरी स्वर्णदुग्धा
स्वर्णाह्वा कनकक्षीरी तथा । सुवर्णहिम

दुग्धीत्यहिमक्षीरीचकाञ्चनी ॥ स्वर्णक्षीरीहिमातिक्ताकृमिपित्तकफापहा । मूत्रकृच्छ्राश्मरीशोफदाहज्वरहरापरैति ॥ स्वर्णमिवपीतत्वात्क्षीरमस्या:, गौरादि: ॥

स्वर्णगैरिकम् । न० सुवर्णगैरिके । सोनागेरू० इ० भा० प्र० ॥

स्वर्णग्रीवा । स्त्री० कामरूपदेशप्रसिद्धनद्याम् ॥ यथा । यानिर्गतापूर्वभागात्तस्माद्गिरिवरान्नदी । स्वर्णग्रीवेतिविख्यातासागङ्गासदृशीफले ॥ तस्मात्स्नात्वाकर्णकलात् ॥

स्वर्णचूड: । पुं० चाषे । किकीदिवौ ॥

स्वर्णजम् । न० त्रपुणि । मृदङ्गे । रङ्गे ।

स्वर्णजाति: । स्त्री० पीतमालत्याम् ।

स्वर्णजीवन्ती । स्त्री० जीवन्तीभेदे । हैमाह्वायाम् । हेमजीवन्त्याम् । हिमाश्रयायाम् ॥

स्वर्णतुला । स्त्री० नाराच्याम् ॥

स्वर्णधातु: । पुं० स्वर्णगैरिके ॥

स्वर्णद्री । स्त्री० मन्दाकिन्याम् ॥ स्व: स्वर्गस्थनदी । पूर्वपदात् संज्ञायामगइतिणत्वम् ॥ कामरूपप्रसिद्धायांसितगङ्गायाम् ॥ यथा । नद्या: स्वर्णश्रिया: पूर्वंनदीकामाख्ययातता । कामाख्यया: पूर्वभागेनदी सोमासनाह्वया ॥ सोमासनाया: पूर्वस्यांनदीनाम्नातृषीद्धवा । तत: पूर्वेकामरूपपीठाच्चोजगतांप्रसू: ॥ जगन्मायामहामायादेवीदिक्करवासिनी । एतायां: कथितानद्य: सकलादक्षिणस्तथा: ॥ तासुस्नात्वाचपीत्वाप: स्वर्गलोकमवाप्नुयात् । प्राग्दिक्करवासिन्या: सदावहतिस्वर्णद्री ॥ सितगङ्गाह्वयालोकेसाधात्गङ्गाफलप्रदा । साभूमिपीठसंस्थातुदेवीदिक्करवासिनी ॥ चम्पकलै: प्लावयन्तीयातिप्रत्यहतांसुरै: । सितगङ्गाजलेस्नात्वासाद्दृष्ट्वाशम्भुंहरिंविधिम् ॥ दृष्ट्वाललितकांताख्यांपुनर्योनौनजायत इतिकालिकापुराणे ८२ऽध्याय: ॥ दक्षिकाल्याम् ॥

स्वर्णदीधिति: । पुं० अग्नौ ॥

स्वर्णदुग्धा । स्त्री० स्वर्णक्षीर्याम् ॥

स्वर्णद्रु: । पुं० आरग्वधे ॥

स्वर्णपक्ष: । पुं० गरुडे ॥

स्वर्णपद्मा । स्त्री० मन्दाकिन्याम् ॥

स्वर्णपाठक: । पुं० टङ्कणे । सोहागाविशेषे ॥

स्वर्णपारेवतम् । न० रूपापारेवते ॥

स्वर्णपुङ्ख: । पुं० शरविशेषे ॥

स्वर्णपुष्प: । पुं० आरग्वधे ॥ चम्पके ॥

सुवर्णपुष्पा । स्त्री॰ कलिकार्याम् ॥ सातलायाम् ॥

सुवर्णपुष्पी । स्त्री॰ राजवर्षे ॥ पीतिकायाम् ॥ सुवर्णाख्याम् ॥ सातलायाम् । कलिकार्याम् ॥ सुवर्णक्षीर्याम् ॥ सुवर्णकेतक्याम् ।

सुवर्णप्रस्थः । पुं॰ जम्बुद्वीपोपद्वीपभेदे ।

स्वर्णफला । स्त्री॰ पीतरम्भायाम् । त्रि॰ पीतफलके ॥

स्वर्णवणिक् । पुं॰ वर्णसङ्करजातिभेदे । सुवर्णवणिजि ॥ यथा । स्वर्णकारः स्वर्णवणिक्कायस्थश्च व्रजेश्वर । नरेषु मध्ये ते धूर्त्ताः कृपाहीना महीतले ॥ हृदयं क्षुरधाराभं तेषां नास्ति सादरम् । अतेषु सज्जनः कोऽपि कायस्थो नेतरौ चलाविति ब्रह्मवैवर्त्तपुराणम् ॥

स्वर्णभूषणः । पुं॰ आरग्वधे ॥ त्रि॰ हेमाभरणविशिष्टे ॥

स्वर्णभृङ्गारः । पुं॰ स्वर्णभृङ्गराजे ॥ हेमकलसे ॥

स्वर्णमहा । स्त्री॰ नदीविशेषे ॥

स्वर्णमाक्षिकम् । न॰ उपधातुविशेषे ॥ तन्नामानि गुणाश्च यथा । स्वर्णमाक्षिकमाख्यातं तापीजं मधुमाक्षिकम् । तीक्ष्णं माक्षिकधातुश्च मधुधातुश्च सम्मृतः ॥ किञ्चित्सुवर्णसाहित्यात् स्वर्णमाक्षिकमीरितम् । उपधातुः सुवर्णस्य किञ्चित् स्वर्णगुणान्वितम् ॥ तथा च काञ्चनाभावे दीयते स्वर्णमाक्षिकम् । किन्तु तस्यानुकल्पत्वात् किञ्चिदूना गुणास्ततः ॥ न केवलं स्वर्णगुणा वर्त्तन्ते स्वर्णमाक्षिके । द्रव्यान्तरस्य संसर्गात् सन्त्यन्येऽपि गुणा यतः ॥ सुवर्णमाक्षिकं स्वादु तिक्तं वृष्यं रसायनम् । चक्षुष्यं वस्तिरुक्कण्ठपाण्डुमेहविषोदरम् ॥ अर्शः शोथं विषं कण्डुं त्रिदोषमपि नाशयेत् । अशुद्धस्यास्य दोषमाह । मन्दानलत्वं बलहानिमुग्रां विष्टम्भितां नेत्रगदान् सकुष्ठान् । तथैव मालां व्रणपूर्विकाञ्च करोति तापीजमशुद्धमेतत् ॥ शोधनन्तु । माक्षिकस्य त्रयो भागा भागैकं सैन्धवस्य च । मातुलुङ्गद्रवैर्वाथ जम्बीरस्य द्रवैः पचेत् ॥ चालयेल्लोहजे पात्रे यावत् पात्रं सुलोहितम् । भवेत् ततस्तु संशुद्धिं स्वर्णमाक्षिकमृच्छति ॥ अथ मारणम् । कुलत्थस्य कषायेण घृष्ट्वा तैलेन वा पुटेत् । तैलेन वाजमूत्रेण म्रियते स्वर्णमाक्षिकमिति भावप्रकाशः ॥

स्वर्णयूथी । स्त्री॰ पीतयूथिकायाम् । पीतिकायाम् । हेमपुष्पिकायां ॥

सुवर्णरेताः । पुं॰ वह्नौ ॥

सुवर्णलता । स्त्री॰ ज्योतिष्मत्याम् ॥

सुवर्णवर्णा । स्त्री॰ हरिद्रायाम् ॥

त्रि॰ सुवर्णसदृशवर्णयुक्ते ॥

स्वर्णवल्कल: पुं॰ श्योनाके ॥

स्वर्णवल्ली । स्त्री॰ लताविशेषे । रक्तफलायाम् । काकवल्ल्याम् ॥ स्वर्णवल्लीशिर: पीडांचिदोषाम् छर्दितुग्धदा ॥

स्वर्णबिन्दु: । पुं॰ विष्णौ । हरौ ॥ बिन्दवोऽवयवा: स्वर्णसदृशा यस्य: ॥ शोभनवर्णमक्षरं बिन्दुर्यस्मिन्मन्त्रे तदात्मकत्वाद्वा ॥

स्वर्णशेफालिका ।)
स्वर्णशेफाली ।) स्त्री॰ राजवृक्षे ॥

स्वर्णाङ्ग: । पुं॰ लतमाले । आरग्वधे ॥

स्वर्णारि । न॰ गन्धके ॥

स्वर्णाह्वय: । पुं॰ नागकेशरे ॥

स्वर्णाह्वा । स्त्री॰ स्वर्णक्षीर्याम् ॥

स्वर्णुली । स्त्री॰ क्षुपान्तरे । हेमपुष्प्याम् ॥

स्वर्भानव: । पुं॰ गोमेदमणौ । पिङ्गस्फटिके ॥

स्वर्भानु: । पुं॰ राहौ । स्वर् आकाशे विपरीतलक्षणया भाति । भा॰ । दभाभ्यानु: । तुभादि ॥

स्वर्भानुसूदन: । पुं॰ सूर्ये ॥

स्वर्यात: । त्रि॰ मृते ॥

स्वर्लोक: । पुं॰ स्वर्गे । तदूनकोटि: स्वर्लोक: स्वर्गस्य समाश्रय: ॥ पञ्चाशीतिलक्षोच्छ्राय स्वर्गस्य पर्यायां सूर्यादिमुख्यानामास्पदं स्वर्लोकसु- स्त्वथ: ॥

स्वर्वधू: । स्त्री॰ स्वर्वेश्यायां ॥

स्वर्वापी । स्त्री॰ गङ्गायाम् ॥

स्वर्वेश्या । स्त्री॰ उर्वशीप्रधानास्वप्सरस्सु । ताश्च । घृताचीमेनकारम्भाउर्वशीचतिलोत्तमा । सुकेशी मञ्जुघोषाद्या: कथ्यन्तेऽप्सरसो बुधैरिति ॥ स्व: स्वर्गस्य वेश्या ॥

स्वर्वैद्यौ । पुं॰ २ अश्विनीसुतयो: । नासत्ययो: ॥ स्व: स्वर्गस्य वैद्यौ एनयो: सर्वपर्यायाणि द्विवचनान्ता: । एकत्वविवक्षायामेकवचनान्ताश्च । तथोक्तं मार्कण्डेयपुराणे । नासत्यश्चैव दस्रश्च स्मृतौ द्वौनामतावश्विनाविति ॥

स्वर्णीम: । पुं॰ दानवविशेषे ॥

स्वलोला । स्त्री॰ स्वाचारे ॥

स्वल्प: । त्रि॰ अत्यल्पे ॥

स्वल्पकेशरी । पुं॰ कोविदारे ॥

स्वल्पकेशी । पुं॰ भूतकेशे ॥

स्वल्पतपा: । पुं॰ तीर्थस्नानादिमात्रतपोवृत्तौ ॥

स्वल्पपत्र: ।)
स्वल्पपत्रक: ।) पुं॰ गौरशाके । मधूले । गिरिजे ॥

स्वल्पपर्णिका । स्त्री॰ मेदायाम् ॥

स्वल्पफला । स्त्री॰ क्षुपप्रभेदे । कच्छुघ्न्याम् । सोमराजी ।

स्ववान् । त्रि० धनिनि । स्वमस्यास्ति मतुप् ॥

स्ववशः । त्रि० अपराधीने । स्वतन्त्रे । स्वस्मिन् वशः आयत्तः ॥

स्ववासिनी । स्त्री० सुवासिन्याम् । चिरण्ट्याम् । स्वेषु पित्रादिषु वस्तुं शीलमस्याः । सुप्यजाताविति णिनिः ॥

स्ववीजः । पुं० आत्मनि । न० निजकारणे ॥ स्वीयवीर्य्ये ॥

स्वसंवित् । स्त्री० स्वरूपसम्यग्ज्ञाने ॥

स्वसा । स्त्री० भगिन्याम् । सुष्ठु अस्यति० अस्यतेर्वा । असु क्षेपणे । सावसेर्ऋन् ॥

स्वसुखम् । न० स्वरूपभूतपरमानन्दे ॥

स्वस्तनः । त्रि० स्वर्गभावे ॥

स्वस्ति अ० मङ्गलेसमीहितसाधने । समीहितसम्पत्तौ । पुण्ये ॥ आशंसायाम् ॥ आशीर्वादे ॥ दानस्वीकारमन्त्रे । यथा । स्वस्तिदैवी वायुपत्नी प्रतिगृह्णातु पूजिता । आदानस्य प्रदानस्य निष्फलस्य यथाविनो हिदेशो भागस्तम् ॥ अस्यति० असतिवा । असक्षेपे० असुक्षेपणे वा । सुपूर्व्वकात् । क्तिच् । बाहुलकात्तिम्री । यद्वा । अस्ति । असभुवि । साजसेरतिति: । बहुलवचनान्नभूभावः ॥

स्वस्तिकः । पुं० मङ्गलद्रव्ये । तण्डुलचूर्णनिर्म्मितत्रिकोणाकाराधिवासद्रव्ये ॥ चतुष्के ॥ पिष्टकप्रकारे ॥ रततालिके । जिनानां चतुर्विंशतिचिह्नान्तर्गतचिह्नविशेषे ॥ रसोनके ॥ राजादीश्वरसद्मविशेषे ॥ चतुष्पथे ॥ सर्पाणां फणास्थनीलरेखाविशेषे ॥ पुं० न० राजादीश्वराणां सद्मविशेषे । तल्लक्षणं यथा । प्रागुत्तरद्वाररहितः स्वस्तिकाख्योधनप्रदस्मृतः ॥ अपिच । स्वस्तिकं प्राङ्मुखं यत्स्यादलिन्दानुगतं भवेत् । तत्पार्श्वानुगतौ चान्यौ तत्पर्य्यन्तगतोऽपरः ॥ इति । मिताक्षरायां ॥ अभिप्रेतार्थस्याविनाशे । अष्टाङ्गयोगस्य तृतीयाङ्गविशेषे ॥ तद्यथा । जानूर्व्वोरन्तरे सम्यक् कृत्वा पादतले उभे । ऋजुकायो विशेद्योगी स्वस्तिकं तत् प्रचक्षते ॥ इति । स्वस्ति क्षेमं कायति । कै शब्दे । आतोऽनुपसर्गे कः । मूलविभुजादिर्वा ॥

स्वस्तिमुखः । पुं० ब्राह्मणे ॥ लेखे । पत्रे ॥ त्रि० वन्दिनि ॥ स्वस्ति मुखेऽस्य ॥

स्वस्तिवाचनम् । न० विहितमङ्गलकर्म्मारम्भे मन्त्रविशेषाणां पाठे । मन्त्रोच्चारणपूर्व्वकतण्डुलविकिरणे ।

यथाह व्यासः। सम्पूज्य गन्धपुष्पाद्यैर्ब्राह्मणान् स्वस्ति वाचयेत्। धर्मकर्मणि माङ्गल्ये सङ्ग्रामाद्भुतदर्शने॥ इति। स्वस्त्यर्थं स्वस्तिवाचनम्॥

स्वस्त्ययनम्। न॰ अभिप्रेतार्थस्य प्राप्तौ॥ स्वस्तिप्रकाशकमन्त्रविशेषे॥ स्वस्तिरुद्वाच्यतेऽयनम्॥ स्वस्ति क्षेमम्॰ इयते प्राप्यतेऽनेन। इण्॰। ल्युट्॥

स्वस्थः। त्रि॰ सुस्थे। प्रकृतिस्थे॥ यथा। समदोषः समाग्निश्च समधातुमलक्रियः। प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते॥ क्रियाऽक्षमे। हीनसमक्रियः॰ शरीरानुरूपकर्मा॥ स्वात्मनि स्थिते। उपसंहृतदेहमनोव्यापारे। स्वस्वरूपस्थे॥ वरदे॥

स्वस्त्रीयः। पुं॰ भगिनीपुत्रे। भागिनेये॥ स्वसुरपत्यम्। स्वसुश्छः॥

स्वस्त्रीया। स्त्री॰ भागिनेय्याम्॥

स्वा। स्त्री॰ आत्मीयायाम्॥

स्वाक्षरम्। न॰ स्वीयाक्षरे। सही इ॰ स्वहाथा॰ इ॰ चभाषा प्र॰॥

स्वागतम्। न॰ कुशलप्रश्ने॥ शुभागमने॥ सुखेनागतम्॥ स्वागतं वा। त्रि॰ स्वयमागते॥

स्वागता। स्त्री॰ त्रिष्टुप् ११ प्रभेदे तल्लक्षणन्तु। स्वागतेति रनभाद्गुरुयुग्ममिति॥ अपि च। हारिणीकनकुण्डलयुक्ता पुष्पयुक्तकरयुगा वलयश्रीः। वर्णिताऽहपतिवक्त्रसहस्रैः स्वागता हरति कस्य न चेतः॥ यथा। पङ्कजं तदपि पाथसि मग्नं चन्द्रमाः सघननान्तरितोऽभूत्। तन्मुखेन्दुतुलया विनिमोदं हन्त नैव सहते हतवेधाः॥ स्वयमागतायाम्॥

स्वागतिकः। त्रि॰ स्वागतवादिनि॥ स्वागतमित्याह। ठक्। स्वागतादीनाञ्चेत्यैजागमाभावः॥

स्वाङ्गः। पुं॰ विष्णौ॥ स्वात्मैवाङ्गं सहकार्यं स्वजगत्सृष्ट्यादाविति स्वाङ्गः॥

स्वाङ्गि। पुं॰ स्वङ्गात्मजे॥ स्वङ्गस्यापत्यम्। अत इञ्। स्वागतादित्वान्नैजागमः।

स्वाङ्गिकः। पुं॰ मार्दङ्गिके॥

स्वाच्छन्द्यम्। न॰ स्वच्छन्दतायाम्॥

स्वातन्त्र्यम्। न॰ अपराधीनतायाम्। परस्परानुमतिनिरपेक्षे॥ यथा। प्रभुः स्वातन्त्र्यमापन्नो यदोच्छति करोति तत्। पाणिनेर्दीर्घ क्षायमनाचस्यलीनदौ॥ इति॥ स्वतन्त्रस्य भावः॥ ष्यञ्॥ त्रि॰ स्वाधीनताविशिष्टे॥

स्वातिः। स्त्री॰ सूर्यपत्न्यन्तरे॥ खड्गे॥ पुं॰ स्त्री॰ पञ्चदशनक्षत्रे॥ तत्राजातस्य फलं यथा। का

न्दर्पकृपप्रभयासमेतः कान्त्याजन
प्रीतिरतिप्रसन्नः। स्वातिः प्रसू
तीयदिमानवमस्यमहाकृतिः प्राप्त
विभूतियोगः॥ त्रि॰ स्वात्यांजा
ते॥ श्रविष्ठाफल्गुनीत्यणोलुक्॥
स्वाती। स्त्री॰ पस्वरगर्वे॥
स्वातीपथः। पुं॰ छायापथे। स्वाती
वीथ्याम्॥
स्वातीवीथी। स्त्री॰ सूर्यादीनांमध्य
मार्गमध्यमवीथ्याम्। यथा। सू
र्यादीनांत्रयोमार्गादक्षिणोत्तरमध्य
माद्धस्युपक्रम्य॰ तथाश्वापिफ
ल्गुन्योर्मघायैवर्षिभिर्मता। हस्त
चित्रातथास्वातिर्मध्यवीथ्यभिवि
श्रुतंस्वस ज्येष्ठाविशाखानुराधाव
थिराजगवीमता। एतास्वीयत्र
स्तिस्रोमध्यमोमार्गउच्यतद्युतिमा-
युपराधात्॥
स्वात्मा। पुं॰ स्वकीयात्मनि॥
स्वात्मामृतरसास्वादः। पुं॰ स्वात्मैवा
मृतरसः अमृतद्रवस्तस्यास्वादने।
स्वादः। पुं॰। रसग्रहणे आस्वादनम्।
स्वाद॰। घञ्॥
स्वादनम्। न॰ चर्वणे। स्वादनमन्न
भक्षणमाहारोभोजनंस्वदनमित्यह
लायुधः। प्रीतिकरणे॥
स्वादितः। त्रि॰ आस्वादिते॥
स्वादिमा। पुं॰ स्वादुतायाम्। स्वादो
र्भावः। इमनिच्॥

स्वादुः। पुं॰ मधुररसे। यथा। म
धुरस्तुरसज्येष्ठोगल्पस्व। दुर्मधु
लकटुतिक्तमथास्तः॥ गडोले।
गुडे। जीवकौषधौ। सुगन्धिद्र
व्यभेदे। चगुरुसारे। स्त्री॰ द्राक्षा
याम्॥ त्रि॰ मिष्टे। रसनाकर्षि
णि। मधुरे। मनोज्ञे। सुन्दरे
॥ स्वदते। ष्वद् आस्वादने। कृवापे
त्युण्॥
स्वादुकण्टकः: पुं॰ विकङ्कते। गोक्षु
रके। कण्टकोऽस्यास्ति। अर्श
आद्यच्। स्वादुश्चासौकण्टकश्च।
स्वादुः कण्टकोयस्य वा॥
स्वादुकन्दा। स्त्री॰ विदार्याम्॥
स्वादुका। स्त्री॰ नागदन्त्याम्॥
स्वादुखण्ड। पुं॰ गुडे। मधुरभा
गे॥
स्वादुगन्धा। स्त्री॰ विदार्याम्॥
स्वादुङ्कारम्। न॰ स्वादूकृत्यस्यर्थे
॥ स्वादुमिणमुल्॥
स्वापर्णी। स्त्री॰ दुग्धिकायाम्॥
स्वादुपाका। स्त्री॰ काकमाच्याम्॥
स्वादुःपाकोऽस्याः॥
स्वादुपिण्डा। स्त्री॰ पिण्डखर्जूर्या
म्॥
स्वादुपुष्पः। पुं॰ कटभ्याम्।
स्वादुफलम्। न॰ बदरीफले॥
स्वादुफला। स्त्री॰ द्राक्षायाम्।
कोली॥

स्वादुमज्जा । पुं० शैलपीलौ । पर्वतपीलौ ॥

स्वादुमस्तका । स्त्री० खर्ज्जूर्य्याम् ॥

स्वादुमांसी । स्त्री० काकोल्याम् ॥

स्वादुमूलम् । न० गर्ज्जरे ॥

स्वादुरसा । स्त्री० काकोल्याम् । शतावर्य्याम् । द्राक्षायाम् ॥

स्वादुलता । स्त्री० विदार्य्याम् ॥

स्वादुः । पुं० स्वादुखर्ज्जूरिकायाम् ॥ स्वादु० उभयलिङ्गम् । उत्तरपदस्थः [illegible] ॥

स्वादुखण्डः । [illegible] । मधुराम्ले ।

स्वाद्वी । स्त्री० द्राक्षायाम् । स्वदते । स्वद आस्वादने । कृवापाजिमिस्वदीत्युण् । वोतोगुणवचनादितिङीष् ॥ खर्ज्जूर्य्याम् ॥

स्वाधिष्ठानम् । न० षट्चक्रान्तर्गतद्वितीयचक्रे ॥ स्वशब्देनपरं लिङ्गं स्वाधिष्ठानं ततोविदुः । परलिङ्गस्याधिष्ठानं यतस्तस्मात्स्वाधिष्ठानमुच्यतइत्यर्थः ॥

स्वाधीनः । त्रि० स्वतन्त्रे । अपराधीने । स्ववशे ॥ यथा । श्वासोत्कम्पतरङ्गिणिस्तनतटे बिम्बाधरस्पन्दिते स्वाधीने विभवे तथा पि कृपणा याचन्त इत्यद्भुतम् ॥ इतिशान्तिशतके शिल्हणमिश्राः ॥ अपिच । स्वाधीनस्य तु साफल्यं नपराधीनवृत्तिता । येपराधीनकर्म्माणो जीवन्तोपिचतेमृताः ॥ इति गारुडे ११५ ऽध्यायः ॥ स्वस्मिन्नधि । सप्तमीशौण्डैरिति समासः । ततः स्वार्थे० खड्प्रत्ययः ॥

स्वाधीनपतिका । स्त्री० स्वाधीनभर्तृकायाम् ॥ स्वाधीनपतिका सा तु यामनुस्मृत्य वल्लभः । स्वाधीनः पतिर्यस्याः । कप् ॥

स्वाध्यायः । पुं० वेदे । जपे ॥ स्वाभिमतप्रणवादिमन्त्रजपे । ब्रह्मयज्ञे ॥ वेदाध्ययने । फलदृष्ट्यर्थं वेदपर्य्यन्ताध्ययने । अदृष्टार्थं वेदाध्ययनरूपे ब्रह्मयज्ञे ॥ उपनिषद्ग्रन्थाभ्यासे ॥ मोक्षशास्त्राणामध्ययने । सुष्ठु आ अधीयते । आ अध्ययनम् । इङ् अध्ययने । इङश्चेति घञ् ॥ स्वस्य अध्ययनं वा ॥

स्वाध्यायवान् । पुं० यथाविधि वेदाभ्यासपरे ॥ स्वाध्यायप्रत्ययोप्यत्र ।

स्वाध्यायवान् । पुं० स्वाध्यायविशिष्टे ॥

स्वाध्यायाभ्यसनम् । न० यथाविधि

वेदाभ्यासे ॥ स्वाध्यायस्याभ्यसनं ॥

स्वाध्यायी । पुं० पणवणिजि ॥ स्वाध्याययुक्ते ॥ स्वाध्यायिस्त्वस्य । इनि: ॥

स्वाध्वरिक: । त्रि० स्वध्वरादिनि ॥ शोभनोऽध्वर: स्वध्वर: । स्वध्वरमित्याह० तेनचरतिवा । ठक् । स्वागतादीनाञ्चेत्यैजागमोन ॥

स्वान: । पुं० निर्घोषे । निस्वने । शब्दे ॥ स्वननम् । स्वनशब्दे । स्वनहसोर्वेतिपक्षे घञ् ॥

स्वानुभव: । पुं० आत्माकारान्त:करणसाक्षात्कारे ॥

स्वान्तम् । न० हृदि । मानसे । मनसि । चित्ते ॥ गह्वरे ॥ स्वन्यतेस्म । स्वन० क्षुब्धस्वान्तध्वान्तेत्यत्रअनिट्कमेतन्निपातितम् ॥ स्वस्यान्तोऽवच्छेदोभवतियेनेतिवा ॥

स्वाप: । पुं० निद्रायाम् । कारणभावेनावस्थाने । शयने । शय्यायाम् । अज्ञाने । तत्त्वाप्रतिबोधे । दृग्भङ्गस्त्वरद्दृग्भङ्गस्पर्शेति हिप्रकारनिरूपितोवावस्थाभेदे । रुग्भेदे । स्पर्शाज्ञतायाम् ॥ स्वपनम् । ञिष्वप्शये । घञ् ॥ धात्वोरुक्तार्थस्वराणांसंविशेदुपदिनाप्यनुवंशम् । नोत्तरापरश-

रामचननोनैवचार्द्धचरण: श्रियमिच्छन् ॥

स्वापतेयम् ।) न० धने । वित्ते
स्वापतेयकम् ।)

॥ स्वस्यपति: स्वपति: । स्वपतौ धनस्वामिनोसाधु । पथ्यतिथिवसतिस्वपतेर्ढञ् । स्वागतादित्वान्नैजागम: ॥

स्वायन: । पुं० न० अस्त्रविशेषे । पुं० श्रीहरौ । विष्णौ ॥ स्वापयतिस्वमायया आत्मज्ञाविधुरान्करोति । ञिष्वप्शये । अस्मात्तात्ल्युट् । औणादिकोयुज्वा ॥

स्वाप्यय: । पुं० सुषुप्तौ । स्वस्मिन्नप्यय: ॥

स्वाभाविक: । त्रि० स्वभावसिद्धे । स्वभावतउत्पन्ने ॥ स्वभावोऽनादिरविद्या० तत्कार्ये । सहजे । अकृतके ॥ स्वभावेभव: । स्वभावादागतोवा । ठक् ॥

स्वाभाविकी । स्त्री० प्रकृतौ । द्रव्यस्वभावतएवसिद्धायांप्रकृतौ ॥ यथाऽग्न्यादीनामुष्णप्रकाशादिलक्षणास्वाभाविकीप्रकृति: ॥

स्वाभास: । त्रि० रमणीये ॥ सुष्ठु आभासते । भास० । पचाद्यच् ॥ पुं० कुवेरे ॥ स्वेनधनेनआभासते ।

स्वाभाव्य: । पुं० हरौ । स्वभा

धर्मे च स्वभाव्योऽसाध्यो नित्यनिष्पन्न
रूपत्वात् ॥
स्वामिजङ्घी । पुं० परशुरामे ॥
स्वामिता । स्त्री० स्वामित्वे ॥ स्वा
मिनोभावः । तस्यभावस्त्वतलौ ॥
स्वामी पुं० कार्त्तिकेये । विशाखे ।
शिखिवाहने । पत्यौ । भर्त्तरि ।
गुरौ । श्रीनाथे ॥ यथा । गुरुं
मामानभाषितजपकालाद्दते शिवे ।
श्रीनाथदेवस्वामीतिविवादेवोधर्मेव
देत् ॥ हरे ॥ हरौ ॥ परम
हंसे ॥ वात्स्यायनमुनौ ॥ प्राक्
स्त्रीयाहङ्कदे ॥ नृपे । भूपे ॥
त्रि० अधिपतौ । अस्यपर्य्यायास्तु ।
स्वामीत्वीश्वरः पतिरीशिता । अ
धिभूर्नायकोनेताप्रभुः परिवृढोधि
पद्धति ॥ स्वमैश्वर्य्यमस्यास्तिस्वामि
न्नैश्वर्य्यं इत्यामिनच् ० निपात्यते ॥
स्वाम्यम् । न० आधिपत्ये ॥
स्वायम्भुवः । पुं० प्रथममनौ ।
ब्रह्मणः पौत्रे ॥ स्वयम्भुवोऽपत्य
म् । अण् । संज्ञापूर्वकस्यवि
धेरनित्यत्वान्नगुणः ॥
स्वायम्भुवी । स्त्री० ब्राह्मीमोषधौ ॥
स्वारः । पुं० उपतप्तरि ॥ स्वर
ति । स्वृशब्दोपतापयोः । अच् ।
स्वरणं वा प्रज्ञाद्यण् ॥ भावेवा
घञ् ॥
स्वारस्यम् । न० स्वभावे ॥ स्वर
स्यभावः । ष्यञ् ॥
स्वाराट् । पुं० इन्द्रे । नमुचिसू
दने ॥ स्वः स्वर्गे राजते ।
स्वेषुदेवेषु० स्वेनधनेनवा० आरा
जते । सत्सूद्विषेतिक्विप् । रा
रोतिलोपे० ढ्रलोपइतिदीर्घः ।
जान्तः ।
स्वाराज्यम् । न० स्वातन्त्र्ये । स्व
राड्भावे ॥ ष्यञ् ॥
स्वारामगुच्छकम् । न० ग्रन्थिपर्णे
॥ ऐन्द्रपदे ॥
स्वारोचिषः । पुं० द्वितीयमनौ ॥
स्वरोचिषोऽपत्यम् । अण् ॥
स्वार्थः । पुं० स्वप्रयोजने ॥ स्वी
याभिधेये ॥ स्वकीयधने । स्वी
यवस्तुनि ॥
स्वार्थदर्शनः । त्रि० निजार्था
वलोकने ॥ स्वस्यात्मनोर्थंपश्य
तीतितथा ॥
स्वार्थानुमानम् । न० स्वानुमि
तिहेतौ ॥ तथाहि । स्वयमे
वभूयोदर्शनेनयथाधूमस्तत्राग्निरि
तिमहानसादौव्याप्तिंगृहीत्वा० प
र्वतसमीपङ्गतः ० तद्गतेचाग्नौस
न्दिहानः पर्वतेधूमंपश्यन्व्याप्तिं
स्मरतियत्रधूमस्तत्राग्निरिति । त
दनन्तरंवह्निव्याप्यधूमवानयंपर्व
तइतिज्ञानमुत्पद्यते । अयमेवलि
ङ्गपरामर्शइत्युच्यते । तस्मात्प

र्तीयवह्निमान् धूमितत्वादित्यनुमि
तिरुत्पद्यते । तदेतत्स्वार्थानुमा
नम् ॥

स्वाश्रयः । त्रि॰ अनन्याश्रये ॥

स्वास्थ्यम् । न॰ आरोग्ये ॥ स्व
स्थेऽवस्थाने । सन्तोषे ॥ स्व
स्थस्यभावः । ष्यञ् ॥

स्वाहा । अ॰ देवहविर्दानमन्त्रे ॥ स्वा
दते । स्वादयाऽऽस्वादने । आप्रत्यय
। पृषोदरादित्वाद्ध्रस्वः ॥ सुष्ठु
आहूयतेऽनेनवा । डाप्रत्ययः ॥

स्वाहा । स्त्री॰ अग्नेः पत्न्याम् । अ
ग्नाय्याम् ॥ यथा । स्वाहादेवीवह्नि
पत्नीप्रतिविश्वेषु पूजिता । ययावि
नाहविर्दानं नगृह्णीतुं सुराः क्षमा इ
ति देवीभागवतम् ॥ सुष्ठु आहूय
न्ते देवा अनया । अन्येभ्योऽपीति डः
। टाप् ॥ स्वाहाऽस्त्यस्यावा । अर्श
आद्यच् ॥ स्वान् आजिहीतेवा ॥
वृत्तभक्तिविशेषे । तारिण्याम् ॥

स्वाहापतिः । पुं॰ अग्नौ ॥ वृ॰ ध
रणौ ॥ *

स्वाहाप्रियः । पुं॰ वैश्वानरे । वह्नौ
॥ स्वाहाप्रियायस्य । अपूर्णीप्रिया
दिष्विति निषेधात्पुंवद्भावः ॥

स्वाहाभुक् । पुं॰ त्रिदशे । देवता-
याम् ॥

स्वित् । अ॰ प्रश्ने ॥ वितर्के । नानाप
क्षावमर्शे ॥ पादपूरणे ॥ सुष्ठु एति

॰ अग्रतिश्रा । धूञ् गतौ॰ धूगतौ
वा । क्विप्॰ तुक् ॥

स्विदितः । त्रि॰ स्वेदिते ॥

स्विन्नः । त्रि॰ प्रस्विन्ने । स्वेदाप्लुते ।
घर्मयुक्ते ॥ स्विन्नोघर्मार्पितोऽजनद्दृ
तिहलायुधः ॥ पक्वे ॥ यथा । अ
ग्न्यंशेतगतप्राप्तः सतुषं धान्यमु
च्यते । आमं वितुषमित्युक्तं स्विन्न
मन्नमुदाहृतमिति अश्विनः ॥

स्विष्टम् । न॰ सम्यग्यजने ॥ त्रि॰ स
म्यक्पूजिते ॥

स्विष्टकृत् । पुं॰ पूर्णाहुत्यन्ते क्रियमा
णे होमविशेषे । सु॰ सुष्ठु शोभनं
इष्टं सर्वमपि करोति । उ कृञ्॰
क्विप् तुक् ॥

स्विष्टकृत् । पुं॰ होमविशेषे ॥ शोभ
नादृष्टः स्विष्टः । तां करोति ।
कृञ् ः क्विप् तुक् ॥

स्वीकारः । पुं॰ अङ्गीकारे । स्वीकर
णम् । च्व्यन्तस्वशब्दपूर्वात् कृञो
भावे घञ् ॥ यावतास्वास्वनिर्वा
हः स्वीकुर्यात् तावदर्थवित् । आ
धिक्ये न्यूनतायाञ्च च्यवतेपरमार्थ
तः ॥

स्वीकृतः । त्रि॰ अङ्गीकृते ।

स्वीयः । त्रि॰ आत्मीये ॥ प्राक् क्री
तात्छः ॥

स्वीया । स्त्री॰ स्वामिन्येवानुरक्ता
यां नायिकायां ॥

स्वृद्ध: । त्रि० सुसमृद्धे ॥

स्वेच्छा । स्त्री० आत्मेच्छायाम् । यदृच्छायाम् । स्वैरितायाम् ॥ स्वच्छन्दता ॥

स्वेच्छाचारी । त्रि० स्वैरिणि ॥ स्वेच्छाचारोऽस्त्यस्य । इनि: ॥

स्वेच्छामृत्यु: । पुं० भीष्मे ॥ स्वेच्छया मृत्युर्यस्य स: ॥ स्वेच्छया मरणे ॥ त्रि० तद्वति ॥

स्वेच्छाविहारी । त्रि० स्वेच्छाचारिणि ॥ यथा । मन्दीभूतामृतं कर्तुं तत्प्रयाह्नं निवारितुम् । स्वेच्छाविहारिणं मन्त्रैस्तावारयितुं क्षम: ॥ मन्त्रकोषम् ॥

स्वेद: । पुं० घर्मे । घर्माम्बुनि । श्रमादिना देहान्निस्सृते जले । पसीना इ० भा० । सर्वपार्थिवद्रव्याणां स पेन्नक्लेदरूप: ॥ स्वेदने । भावर० हु० गौ० दे० भा० प्र० । प्रस्वेदस्तैलतापि ॥ सचतुर्विधो यथा । स स्वेदश्चतुर्विध: प्रोक्तस्तापोष्म स्वेदसंज्ञित: उपनाहो द्रवस्वेद: सर्ववातार्त्तिहारिण: । तापस्वेद: ० उष्मस्वेदश्च० तप्ताङ्गसंस्थित: । उपनाह: ० उपनाह: स्वेद: । स्वेदौ तापि भ्मोप्राय: स्म प्रघ्नौ समुद्दीरितौ । उपनाहस्तु वातघ्न: पित्तरोगिद्रवोहित: । द्रवो द्रवस्वेद: ॥ स्विद्यत्यनेनाङ्गम् । ञिष्विदा गात्रप्रक्षरणे । घञ् ॥

स्वेदक: । पुं० अयस्कान्तप्रभेदे ॥ त्रि० स्वेदकृति ॥

स्वेदज । त्रि० क्रिमिदंशादिजन्तुषु ॥ यथा । स्वेदजं दंशमशकयूकामक्षिकमत्कुणम् । ऊष्मणश्चोपजायन्ते यच्चान्यत् किञ्चिदीदृशम् ॥ स्वेदजनकत्वात् धर्म: स्वेद: । तस्माज्जात: । पञ्चम्यामिति ड: ॥ स्वेदमुद्भिद्य जायमानं दंशमशकादि० तदुद्भिज्जोऽस्त्रमभवात् । यथा स्वेदजं यूकादि० तच्चाण्डजोऽस्त्रमभवतीति नाण्डजोद्भिज्जाभ्यां स्वेदजानि तिरिच्यते ॥

स्वेदनम् । न० स्वेदे ॥ दोलायन्त्रे ॥ यथा । निबद्धमौषधं सूतं भूर्जे तत् त्रिगुणाम्बरे रसपोट्टलिकां काष्ठे दृढं बद्ध्वा गुणेन हि । सन्धानपूर्णकुम्भान्त: स्थालम्बनसंस्थितम् । अधस्तात् ज्वालयेद्वह्निं तत्तदुक्तक्रमेण हि ॥ दोलायन्त्रमिदं प्रोक्तं स्वेदनाख्यं तदेव हि । सन्धानं काञ्जिकादि ॥ अपि च । साम्बुस्थालीमुखाबद्धवस्त्रे स्वेद्यं निधाय च । पिधाय पच्यते यत्र तद्यन्त्रं स्वेदनं स्मृतम् ॥ इ० भा० प्र: ॥ *

स्वेदनिका । स्त्री० कन्दौ ॥ भर्जनपात्रे ॥ भर्जनशालायाम् ॥

स्वेदनी। स्त्री० कन्दी॥ कन्दुशालायाम्॥ स्विद्यतेऽस्याम् अधिकरणे ल्युट्। ङीप्॥

स्वेदमलोज्झितदेहः। पुं० सर्वज्ञप्नोयजिनोत्तमे॥ स्वेदमलरहितशरीरे॥ त्रि० तद्वति॥

स्वेदावरोधः। पुं० प्रस्वेदाभिगमे॥ दोषैर्गाढतराग्नेराच्छन्नतायाम्॥ स्विद्यतेऽनेनेति स्वेदोऽग्निः। तस्यावरोधः॥

स्वैरः। त्रि० स्वच्छन्दे। स्वतन्त्रे॥ मन्दे॥ स्वेनस्वातन्त्र्येणादृतः ईरितवा। ईरगतौ कम्पने च। ईरयतेर्वा। पचाद्यच्। स्वादीरेरिणोरिति वृद्धिः॥

स्वैरिणी। स्त्री० सवर्णेरतायाम्। व्यभिचारिण्याम्। भार्याः पञ्चविधास्तु। पुंश्चलीधर्षणीबन्धक्यसती कुलटेत्वरी। स्वैरिण्यपांशुला च स्यात्॥ तद्विशेषस्तु। स्वैरिणीयः पतिं त्यक्त्वाभजत्यं कामतः श्रयेत्। चतुर्विधाः समाख्याता नारदेन सुरर्षिणा॥ यथा। स्त्रीप्रसूताऽप्रसूता वा पत्यावेव तु जीवति। कामात् समाश्रयेदन्यं प्रथमा स्वैरिणी तु सा॥ कौमारं पतिमुत्सृज्य या त्वन्यं पुरुषं श्रिता। पुनः पत्युर्गृहं यायात् सा द्वितीया प्रकीर्त्तिता॥ मृते भर्त्तरि तु प्राप्तान् देवरादीनपास्य या। उपगच्छेत्परं कामात् सा तृतीया प्रकीर्त्तिता॥ प्राप्ता देशाद्धनक्रीता क्षुत्पिपासातुरा च या। तवाहमित्युपगता सा चतुर्थी प्रकीर्त्तितेति॥ स्वस्येच्छया० स्वैरस्वातन्त्र्येण वा। स्वेनात्मना वा ईरितुं शीलमस्याः। ईरगतौ। सुप्यजातौ णिनिः। नान्तलक्षणो ङीप्। स्वादीरेरिणोरिति वृद्धिः॥ महाभारते चादिपर्वणि० चतुःपुरुषगामिनी स्वैरिणीत्युक्ता॥

स्वैरिता। स्त्री० अन्यानपेक्षणे। यदृच्छायाम्। स्वच्छन्दतायाम्॥ स्वैरिणो भावः। तल्॥

स्वैरी। त्रि० [illegible] स्वेन ईरितुं शीलमस्य। ईरगतौ। सुप्यजाताविति णिनिः। स्वादीरेरिणोरिति वृद्धिः॥ परदारगमनशीले॥

स्वैरिन्ध्री। स्त्री० सैरिन्ध्र्याम्॥ स्वैरं स्वच्छन्दा धरतीति तथा॥ पृ० रभसः॥

स्वोपार्जितम्। न० स्वयमर्जितधने॥ तदुक्तं श्रीमहानिर्वाणतन्त्रे। पुत्रं वित्तस्वविद्याचनाश्रयेदरोरिणम्। जीवन्तु पितुर्यस्मात् किं मन्यास्त्वपैतृकं वसु॥ पृथगर्थैः पृथग्भिन्नैर्मनुजैर्यदुपार्जितम् सर्वं तत्पितृसङ्क्रान्तं तदा स्वोपार्जितं कुतः॥ यतो मनुष्ये स्वायासैर्यन्

यद्धनमर्ज्जितम् । स्वोपार्ज्जितं
तदेवस्यात्सततस्वामीनचापरः इ
ति ॥ त्रि॰ स्वार्जितधनादौ ॥ ष
ष्ठविष्णुसूत्रम् । पिताचेत्पुत्रान्
विभजेत्तस्यस्वेच्छास्वयमुपात्तेऽर्थे ।
पैतामहेतुपितापुत्रयोस्तुल्यंस्वामि
त्वमिति ॥

(**—*‡*‡*—**)

हकारस्यप्रारम्भः

ह । अ॰ सम्बोधने ॥ पादपूरणे ॥
विनिग्रहे ॥ नियोगे ॥ त्रपायाम्
आक्षेपणे ॥ कुत्सायाम् ॥ एति
ह्यार्थे ॥ प्रसिद्धौ ॥ हन्ति । हन
हिंसागत्योः । अन्येभ्योपीति ड
॥ हन्तावद्योतकोऽयंनिपातइतिवै
दिकाः ॥

हः । पुं॰ शिवे ॥ सलिले ॥ शून्ये ॥
धारणे ॥ मङ्गले ॥ गगने ॥ नकु
लीशे ॥ रक्ते ॥ नाके ॥ स्वर्गे ॥ पा
पहरणे ॥ चन्द्रे ॥ हरौ ॥ हंसे ॥
रणे ॥ रोमाञ्चे ॥ वाजिनि ॥ ह
र्षे ॥ हकारे ॥ सकोपवारणे ॥
शुष्के ॥

हंसः । पुं॰ मानसौकसि । श्वेतग
रुति । चक्राङ्गे ॥ अस्यमांसगुणा
यथा । स्निग्धंहिमगुरुवृष्यंमांसंज
लपक्षिणान्तुवातघ्नम् । शीघ्रविपचं

समांसंवृष्यतमंतिमिरहरणंचेति
रा॰ निर्घण्टः ॥ अस्यशकुनन्तु ।
काष्ठासुसर्वासुपदृश्यमेनहंसश्च
शब्देनतुसर्वसिद्धिः । नामानिहं
सश्रृणोतियस्तुप्रयान्तिनाशंदुरि
तानितस्य ॥ चौरैः समंदर्शनमा
द्यशब्दे निधिर्द्वितीयेऽथभयंतृतीये
। युग्मंचतुर्थे नृपतिप्रसादः स्या
त्पञ्चमेहंसरवैनराणामितिवसन्त
राजः ॥ निर्लोभनृपे ॥ विष्णौ ॥
अर्के ॥ परमात्मनि ॥ मत्सरे ॥
योगिभेदे ॥ मन्त्रभेदे ॥ शरीरस्थम
रुद्विशेषे । प्राणवायौ ॥ ब्राह्मणे ॥
अश्वमेधीयाश्वे ॥ यथा । किमयं
दीयतेहंसः सतिसैन्येचतुर्विधे ॥
इत्यादिपुराणम् । अयतः स्थित
श्रेष्ठे । गुरौ ॥ शिवे ॥ विशुद्धे ॥
पर्वते ॥ गन्धर्वविशेषे ॥ जीवे ॥
चतुर्विधावधूतान्तर्गतावधूतवि
शेषे । यथा । श्रीदेव्युवाच । द्वि
विधाचाश्रमौप्रोक्तौगार्हस्थोभैक्षु
कस्तथा । किमिदंश्रूयतेचित्रमव
धूताश्चतुर्विधाः ॥ एतद्वेदितुमि
च्छामितत्त्वतः कथयप्रभो । चतु
र्विधाऽवधूतानांलक्षणंसविशेषतः
॥ श्रीसदाशिवउवाच । ब्रह्ममन्त्रो
पासकायेब्राह्मणाः क्षत्रियादयः ।
गृहाश्रमेवसन्तोपिज्ञेयास्तेयतयः
प्रिये ॥ पूर्णाभिषेकविधिनासंस्कृ

तावेव मान्याः । ये चावधूतास्ते
श्रेष्ठाः पूजनीयाः कुलार्चिते ॥
ब्रह्मावधूताः ये चापि सूद्राश्रमाचा
रवर्त्तिनः ॥ विदध्युः सर्व्वकर्म्मा
णि मद्दत्तोरितवर्त्मना ॥ विनाब्र-
ह्मार्पितं चैतत्तथा चक्रार्पितं विना
। निषिद्धमन्नं तोयञ्च न गृह्णीयुः
कदाचन ॥ ब्रह्मावधूतकौलानां कौ
लानामभिषेकिणाम् । प्रागेव कथि
तं धर्म्मं नीचाराश्च वरानने । स्नानं
सन्ध्याशनं पानं दानं दारपरिग्रहम्
। सर्व्वमागममार्गेण ब्रह्मावधू
तयोः ॥ उक्तावधूतो द्विविधः पू
र्णापूर्णविभेदतः । पूर्णः परम
हंसाख्यः परिव्राडपरः प्रिये ॥
कृतावधूतसंस्कारो यदि ज्ञानादृत्ता-
न्तदुर्व्वलः । तदा लोकालये तिष्ठन्ना
त्मानं संशोधयेत् ॥ रचन्मुद्रा
तिचिह्नञ्च कुर्व्वन् कर्म्माणि कौलवत्
। सदा ब्रह्मपरो भूत्वा साधयेज्ज्ञा
नमुत्तमम् ॥ ओंतत्सन्मन्त्रमुच्चा
र्य्य सोऽहमस्मीति चिन्तयन् । कुर्य्या
दात्मोचितं कर्म्म सदा वैराग्यमाश्रि
तः ॥ कुर्व्वन् कर्म्माण्यनासक्तो नलि
नीदलनीरवत् । यतेतात्मानमुद्ध
र्त्तुं तत्त्वज्ञानविवेकतः ॥ कृत्यपक्व
स्योत्तमम् । चतुर्णामवधूतानां तुरी
योऽहंसउच्यते । त्रयोऽन्ये योगभो
गाढ्या मुक्ताः सर्व्वे शिवोपमाः ॥

हंसो न कुर्य्यात् कौसङ्गं नवाधातुपरि
ग्रहम् । प्रारब्धमश्नन् विहरेन्निषेध
विधिवर्ज्जितः ॥ खनेत् सर्व्वजा
तिचिह्नानि कर्म्माणि गृहमेधिनाम्
। तुरीयो विचरेत् क्षोणीं निःसङ्क
ल्पो निरुद्यमः ॥ सदात्मभावसन्तु
ष्टः शोकमोहविवर्ज्जितः । नि
र्निकेतस्तितिक्षुः स्यान्निःशङ्को
निरुपद्रवः ॥ नार्पणं भक्ष्यपेयानां
न तस्य ध्यानधारणाः । मुक्तो विर
क्तो निर्द्वन्द्वो हंसाचारपरो यतिः ॥
इति ते कथितं देवि चतुर्णां कुलयोगि
नाम् । लक्षणं सविशेषेण साधूना
मात्मरूपिणाम् ॥ एतेषां दर्शनस्प
र्शालापपरितोषणात् । सर्व्व
तीर्थफलावाप्तिर्जायते मनुजन्मना
म् ॥ पृथिव्यां यानि तीर्थानि पुण्यक्षे
त्राणि यानि च । कुलसन्यासिनां देहे स
न्ति तानि सदा प्रिये ॥ इति श्रीमहानिर्व्वा
णतन्त्रे १४ उल्लासः ॥ हन्ति गच्छति ।
सूषांक्षिं शंवा । हम॰ । पचाद्यच् । भ
वेद्वर्णागमाद्धंस इति सिद्धम् ॥ हन्ति
। वृतवद्दहनीति सोवा । कृतविशि
षि ॥ पिङ्गलदिष्टाभादिविशिष्टः
कर्णयुतो सौभामिनि हंसः ॥ यथा
। एतिवमक्षे घातिदिनाक्षे । किंस
खिकान्तः कोपि कृतान्तः ॥
हंसकः । पुं॰ पादकटके । पादवल
ये । हंसइव कायति मधुरध्वनित्वा

त् । कर्णमध्ये । यस्याभ्योपरीतिष्ठः
॥ हंसद्वयवाहंसाकृतित्वात् ।
हंसप्रतिकृतावितिकन् । स्वार्थे वा
कन् ॥ राजहंसे ॥ तालप्रभेदे ।
यथा । लघुगुरुलघुयुक्तस्ताली
हंसकः स्मृतइति ॥

हंसकलाकः । पुं॰ रतिबन्धविशेषे ॥
यथा । नारीपादद्वयं कृत्वाकान्तस्यो
रुयुगोपरि । कटिमान्दोलयेद्यस्मादु
क्तोयं हंसकीलकः ॥

हंसकेरलः । पुं॰ रामेश्वरवेङ्कटेश
सन्देशे ॥

हंसगः । पुं॰ सुरज्येष्ठे । परमेष्ठि
नि ॥

हंसगद्गदा । स्त्री॰ मधुरभाषिण्याम्
। मधुरनिस्वनायाम् ॥

हंसगामिनी । स्त्री॰ ब्रह्माण्याम् ।
हंसीर्गामिनि : । नारीविशेषे
। हंसस्यगमनमिव । गल्भ॰ । कर्त्त
र्युपमानेणिनिः ॥

हंसडिम्बः । पुं॰ हंसबीजे ॥

हंसदहनम् न॰ अगुरुणि ।

हंसनादिनी । स्त्री॰ नारीविशेषे ।
यथा । गजेन्द्रगमनातन्वी कोकिलाला
नादिता न्वता नितम्बगुर्विणीयासा
कथ्यते हंसनादिनी ॥

हंसपदी । स्त्री॰ हंसपदीविशेषे ।
मधुस्रवायाम् । हंसपाद्याम् । त्रि
पद्याम् ॥ गोधापद्याम् ॥ यथा ।
हंसपदीगुरुः शीतावन्तिरक्तविष
व्रणाम् । विसर्पदाहातिसारलू
ताभूतादिरोगिणी ॥

हंसपादः । पुं॰ हिङ्गुले ॥ यथा ।
जपाकुसुमसंकाशो हंसपादो मणीत्त
मः ॥ पुं॰ हंसचरणे ॥

हंसपादिका । स्त्री॰ हंसपद्याम् ।
गोधापद्याम् ॥

हंसपादी । स्त्री॰ गोधापद्याम् ॥

हंसमाला । स्त्री॰ कादम्बे । हंसस
मूहे ॥

हंसमाषा । स्त्री॰ माषपर्ण्याम् ॥

हंसरथः । पुं॰ ब्रह्मणि । द्रुहिणे ॥
हंसोरथोऽस्य ॥

हंसलोमशः । पुं॰ न॰ कासीसे ॥

हंसलोहकम् । न॰ पित्तले ॥

हंसवती । स्त्री॰ हंसपादीलतायामा
म् ॥ त्रि॰ हंसयुक्ते ।

हंसवाहनः । पुं॰ ब्रह्मणि । सुरज्ये
ष्ठे ॥ हंसोवाहनमस्य ।

हंसबीजम् । न॰ हंसडिम्बे । यथा ।
। हंसबीजं परं वृष्यं हंसस्य बालमा
मनम् । पाणिलघुतरं प्रोक्तं सर्वाम
यविनाशनमितिराजनिर्घण्टः ॥

हंसाङ्घ्रिः । पुं॰ गोधापद्याम् ॥
हिङ्गुले ।

हंसाधिरूढा । स्त्री॰ सरस्वत्याम् ॥

हंसाभिख्यम् । न॰ रूप्ये ॥

हंसारूढ । पुं॰ कमलासने । ब्रह्मणि ।

हंसारूढा । स्त्री॰ ब्रह्माण्याम् ॥

हंसिका । स्त्री॰ हंस्याम् ॥ हन्ति । हन॰ । हंसिमशिभ्यां सिकन् ॥

हंसिनी । स्त्री॰ शिखरिण्याः प्रभेदे । यथा । निर्गीरसुधीरसंयुक्तं गालितं दधि । शर्करैलामसाहारसयुक्तं हंसिनी भवेत् ॥ हंसीशिखरिणीरुच्या शुभावह्निविकाशिनी । सुशीतजननी चैव कफपित्तविनाशिनी ॥

हंसी । स्त्री॰ हंसयोषिति । वरटायाम् ॥ हंसन्याम् । आकृति २२ प्रभेदे । तल्लक्षणन्तु । मौ गौ नाश्चत्वारो गो वसुभुवनयतिरितिभवति हंसी । यथा । सार्द्धं कान्तेनैकान्ते सौ विकचकमलमधुसुरभिपिबन्ती कामक्रीडाकूतस्फीतप्रमदसरसभरमलघुरसन्ती । कालिन्दीयेपद्मारण्ये पवनपतनपरितरलपरागे कंसारातेः पश्यस्वेच्छं सरभसगतिरिह विलसति हंसी ॥ वृत्तान्तरेऽपि । यथा । श्रावेहर्षोन्नमनगणतः पक्षाहो घीविपुलफणतः । हंसोऽप्याताम्रुतिरसयति स्म श्लोकेषां नमयति मन्तः ॥

हंसोदकम् । न॰ अंशूदके । यथा । नादेयं नवमृद्घटेषु निहितं सन्तमसकांशुभिर्यामिन्यान्तु निविष्टमिन्दुकिरणैर्मन्दानिलान्दोलितम् । एलाद्यैः परिवासितं श्रमहरं पित्तोष्णदाहे विषमूर्च्छारक्तमदात्ययेषु विहितं शंसन्ति हंसोदकमिति राजनिघण्टुः ॥

हंहो । अ॰ प्रश्ने ॥ दम्भे । दर्पे ॥ सम्बोधने ॥

हक्कः । पुं॰ गजसमाह्वाने ॥

हक्कारः । पुं॰ आह्वाने ॥

हञ्जा । अ॰ नाट्योक्तिनीचचेटीसम्बोधने ॥

हञ्जिः । पुं॰ क्षुति । क्षवे ॥

हञ्जिका । स्त्री॰ भार्ग्याम् ॥ भनक्ति रोगान् । भञ्जो आमर्द्दने । ण्वुल् । पृषोदरादिः ॥

हञ्जी । स्त्री॰ फञ्जिकायाम् । भार्ग्याम् ॥ हन्ति रोगान् । पचाद्यच् । पृषोदरादिः । गौरादिः ॥

हञ्जे । अ॰ नाट्योक्त्या चेटीसम्बुद्धौ ॥ हिनोति । हिशिगत्यमादरयोः । बाहुलकादेप्रत्ययः । हृतेऽस्कारोऽडप्यसौपि ॥

हटपर्णिका । स्त्री॰ शैवाले ॥

हट्टः । पुं॰ क्रयविक्रययोः प्रसिद्धस्थाने । आपणे । हाटइतिभाषा प्रसिद्धिः ॥

हट्टचौरः । पुं॰ प्रसह्यचौरे । बन्दीकारे । चिल्लाभे ॥

हट्टवणिक् । पुं॰ हट्टवाणिज्यवृत्तिख्यातेनगमविशेषे ॥

हट्टविलासिनी । स्त्री॰ गन्धद्रव्यविशेषे । धमन्याम् । अञ्जनकेश्याम् । हरिद्रायाम् । हट्टे विलसति॰ तच्छीला । लसक्रीडायाम् । सुपी ति णिनि : ॥

हट्टाध्यक्ष : । पुं॰ अधिकर्मिके ॥

हट्टी । स्त्री॰ क्षुद्रहट्टे । पुरतन्याम् ॥

हठ : । पुं॰ प्रसभे । बलात्कारे ॥ अम्बुपर्ण्याम् । प्रश्न्याम् । हठनम् । हठप्लुतिशठत्वयो : । पुंसीति॰ खनोघचेतिवाघ : ॥

हठनिग्रह : । पुं॰ मूढानुगृहीतनिग्रहविशेषे ॥ तथाहि । चक्षु : श्रोत्रादीनि ज्ञानेन्द्रियाणि॰ वाक्पाण्यादीनि कर्मेन्द्रियाणि च॰ तत्तद्गोलकमात्रोपरोधेन हठान्निगृह्यन्ते । तद्दृष्टान्तेन मनोऽपि हठेन निगृहीष्यामीति मूढस्य भ्रान्तिर्भवति । न चैतत्तथा निगृहीतुं शक्यते॰ तद्गोलकस्य हृत्कमलस्य निरोद्धुमशक्यत्वात् । अत : क्रमनिग्रह एव युक्त : ॥

हठपर्णी । स्त्री॰ अम्बुताले । शैवाले ॥

हठयोग : । पुं॰ पातञ्जलोक्तप्रसिद्धेऽष्टाङ्गयोगे । योगस्वरोदयोक्ते योगे । यथा । इदानीं हठयोगस्तु कथ्यते हठसिद्धिद : । कृत्वासनं पावनाय शरीरे रोगहारकम् । पूरकं कुम्भकञ्चैव रेचकं वायुना भजेत् । इत्थं क्रमोत्क्रमं कृत्वा पवनं साधयेत्सदा । धौत्यादिकर्म षट्कञ्च संकुर्याद्धठसाधक : । एतन्नाडीन्तु देवेशि वायुपूर्णं प्रतिष्ठितम् ॥ ततो मनो निश्चलं स्यात्ततश्चानन्दमेव हि । हठयोगान्महाकाल : स्यान्मन : शून्यभेदयोर्धि ; इदानीं हठयोगस्य द्वितीयं भेदकच्छृणु । आकाशे नासिकाग्रे तु सूर्यकोटिसमं स्मरेत् । श्वेतं रक्तं तथा पीतं कृष्णमित्यादिरूपत : । एवं ध्यात्वा चिरायु : स्याद्ज्ञानमनवर्ज्जित : ॥ शिवतुल्यो महात्मासौ हठयोगप्रसादत : । हठाज्ज्योतिर्मयो भूत्वा ह्यमरो वशी-वै भवेत् ॥ अतोऽयं हठयोग : स्यात् सिद्धिद : सिद्धसेवितइति ॥

हठालु : ।)
हठालुका ।) स्त्री॰ कुम्भिकायाम् ॥

हठी । त्रि॰ हठविशिष्टे ॥

हठी । स्त्री॰ वारिपर्ण्याम् ॥

हडि : । पुं॰ बन्धनसाधनकाष्ठयन्त्रविशेषे ॥ यथा । निगडो लोहबन्धेऽस्त्रीहडि : काष्ठमयन्त्रण॰ इति शब्दमाला ॥

हडिक : । पुं॰ मलाकर्षिणि॰ नीचजातिविशेषे । हाडि॰ इ॰ गौ॰ भा॰ ॥

हड्डम् । न॰ अस्थनि ॥

हड्डक : । पुं॰ हडिक ॥

हड्डजम् । न॰ मज्जनि ॥

हड्डि : ।)
हड्डिक : ।} पुं॰ हडिकेमलियहौ ॥
हड्डिप : ।)

हण्डा । अ॰ कुत्सिताह्वाने । नीचसम्बोधने ॥ यथा हण्डे तिचेटकाह्वानंमध्याह्वानंहलेतिच । हण्डे तिकुत्सिताह्वानमार्योमारिषउच्यतइति भागुरि : ॥ हण्डाहञ्जाहलाशब्दाश्चय : सम्बोधनाचका : ॥ पाचविशेषे ॥

हण्डिका । स्त्री॰ हाण्डी॰इतिप्र॰मृत्पात्रे । उखायाम् ॥

हण्डिकासुत : । पुं॰ कृपणे । छोटीहांडी॰चू॰भा॰ ॥ इतिचिकाण्डशेष : ॥

हण्डी । स्त्री॰ हण्डिकायाम् ॥

हण्डे । अ॰ नाट्योक्त्यानीचांप्रत्याह्वाने ॥ हिण्डते । हिण्डिगत्यनादरयो : । बाहुलकादेप्रत्यय : इतोऽकारश्च ॥

हत : । त्रि॰ हननक्रियाकर्मभूते । नष्टे प्रमापिते ॥ आशारहिते । भग्नमनसि । मनोहते । प्रतिहते । प्रतिबद्धे ॥ आहते । गुणिते । ताडिते ॥ हन्यतेस्म । हन॰ । क्त : ।

हतक : । पुं॰ नीचलोके ॥

हताश : । त्रि॰ निर्दये ॥ आशारहिते ॥ पिशुने ॥ हताआशायस्मात्॰

इत्यादिविग्रह : ॥ वन्ध्ये ॥

हति : । स्त्री॰ अपकर्षे ॥

हतौजा : । त्रि॰ निस्तेजस्के ॥

हनु : । पुं॰ व्याधौ ॥ अस्त्रे ॥ हन्ति॰चोहारमन्यं॰वा । हन॰ । कृहनिभ्यांक्नुः । अनुनासिकोपदेशित्यादिनाऽनुनासिकलोप : ॥ हन्तरि ॥

हत्या । स्त्री॰ हनने । वधे ॥

हथ : । त्रि॰ विषमे ॥ हन्ति । हन॰ । हनिकुषिनीरमिकाशिभ्य : क्थन् ॥ ॥

हन : । त्रि॰ हननकर्तरि ॥

हननम् । न॰ प्राणवियोगफलकव्यापारे । वधे ॥ मारणे ॥

हनु : । स्त्री॰ हट्टविलासिन्याम् ॥ मृत्यौ ॥ अस्त्रे । गदे ॥ अनङ्गदे । रक्तरोगे । हरिद्रायाम् ॥ नखौषधौ । नृत्यारम्भे ॥ आयुधे ॥ पुं॰स्त्री॰कपोलावयवे । कपोलाधोभागे ॥ हन्ति । हन॰ शृस्वृस्निहीत्य : ।

हनुग्रह : । पुं॰ हनुस्तम्भाख्येवातव्याधौ ॥

हनुमान् । पुं॰ वायुजे । हनुमति । आञ्जनेये । योगचरे । रामदूते । महावीरे ॥ अतिशयितौहनूविद्येतेऽस्य । अतिशायनेमतुप् ॥

हनुस्तम्भ : । पुं॰ अनुग्रहे ।

हनू : । स्त्री॰ हनुशब्दार्थे ॥ इत्यम

रटीकायांभरतः॥

हनूमान्। पुं०। वातात्मजे। महावीरे॥ यथा। जयत्यतिबलो रामो लक्ष्मणश्च महाबलः। राजा जयति सुग्रीवो राघवेणाभिपालितः॥ दासोऽहं कोशलेन्द्रस्य रामस्याक्लिष्टकर्मणः। हनूमान् शत्रुसैन्यानां निहन्ता मारुतात्मजः॥ न रावणसहस्रं मे युद्धे प्रतिबलं भवेत्। शिलाभिस्तु प्रहरतः पादपैश्च सहस्रशः॥ अर्द्दयित्वा पुरीं लङ्कामभिवाद्य च मैथिलीम्। समृद्धार्थो गमिष्यामि मिषतां सर्व्वरक्षसामिति॥ अतिशयितो हनुरस्यास्ति। अतिशायने मतुप्। अन्येषामपि दृश्यत इति पाणिनिसूत्रेण दीर्घः॥ शरादीनाञ्चेति दीर्घ इति रघुव्याख्याने मल्लिनाथः॥

हनूषः। पुं०। राक्षसे। हन्ति०। हन०। ऋहनिभ्यामूषन्॥

हन्त। अ०। वाक्यारम्भे। खेदे। शोके। यथा। कालिनस्यायतैर्नानाकार्यैः संसारसम्भवैः। सुखदुःखैर्मोहन्त न वेत्ति हितमात्मन इति। विषादे। अवसादे॥ हर्षे॥ सम्भ्रमे॥ यथार्थे॥ दाने॥ अनुकम्पायाम्॥ निश्चये॥ प्रसादे॥ अनुमतौ। इदानीमर्थे॥ हन्ति। हन०। बाहुलकात्॥ आर्त्तौ। वादे। अन्तकल्पने।

हन्तकारः। पुं०। अतिथये दानार्थभोज्यविशेषे॥ यथा। भिक्षाञ्चया चतादद्यात्परिव्राड्ब्रह्मचारिणाम्। ग्रासप्रमाणभिक्षा स्यादग्रं ग्रासचतुष्टयम्॥ अग्रं चतुर्गुणं प्राहुर्हन्तकारं द्विजोत्तमाः। भोजनं हन्तकारं वा अथ भिक्षामथापि वा। अदत्वा तु न भोक्तव्यं यथाविभवमात्मन इति। हन्तशब्दे। इति मार्कण्डेये मदालसोपाख्यानम्॥

हन्ता। त्रि०। हननक्रियाकर्त्तरि। वधौ। घातके। हन्ति। हन्०। तृच्॥

हन्नः। त्रि०। कृतपुरीषोत्सर्गे। गूने॥ हदतिस्म। हदपुरीषोत्सर्गे। क्तः॥

हन्यमानः। त्रि०। ताड्यमाने॥

हपुषा। स्त्री०। हबुषायाम्॥

हबुषा। स्त्री०। हपुषायाम्। हौहवेर० कू०। हाउबेर० कू०। अप्रसिद्धैषफलविशेषे। तच्च फलं द्विविधम्। मत्स्यसदृशं विस्रगन्धं प्रथमम्। अश्वत्थफलसदृशं मत्स्यगन्धमपरम्। गुणा यथा। हबुषा दीपनी तिक्ता कटूष्णा तु वरा गुरुः। पित्तोदरसमीरार्शोग्रहणीगुल्मशूलहृत्। एराप्येतद्गुणा प्रोक्ता रूपभेदे द्वयोरपि॥

हम्। अ०। रुषोक्तौ। रोषभाषणे॥ अनुनये॥ अनुशये। प्रश्ने। असूयायाम्॥ स्मृतौ। अपाकृतौ॥

हम्बा । स्त्री० हम्भायाम् ॥

हम्भा । स्त्री० गोध्वनौ । रम्भायाम् ॥

हय: । पुं० घोटके । तुरगे । अश्वे । वाजिनि । तथस्मिन्नश्वितालचणोः सन्तियथोत्तमा हयाः । हयति । हयगतौ । अच् ॥ हिनोतिमा । अच् ॥ शरीररथस्याकर्षणादिन्द्रियेषु ॥ धनूरामी ॥

हयकातरा ।)
हयकातरिका ।) स्त्री० अश्वकातरायाम् ॥ यथा । कातराहयपर्यायैः कातरान्ताः प्रकीर्त्तिताः । अश्वकातरिकातिक्ताकातघोण्टीपनीपरा ॥ इ० रा० नि० घट: ॥

हयगन्धम् । न० काचलवणे ॥

हयगन्धा । स्त्री० अश्वगन्धायाम् । अजमोदायाम् ॥

हयग्रीव: । पुं० वेदोद्धारार्थं विष्णोरवतारविशेषे । असुरभेदे ।

हयग्रीवहा । पुं० विष्णौ ॥

हयङ्कष: । पुं० मातलौ ॥

हयद्वीप: । पुं० लङ्कादिद्वीपवत्समुद्रान्तर्वर्त्ति निद्वीपविशेषे ॥

हयनम् । न० पुरुषस्कन्धवाह्ये घोटोलाख्ये यानविशेषे । कर्णीरथे ॥ हयगतौ । ल्युट् ॥

हयपुच्छी । स्त्री० माषपर्ण्यामोषधौ ॥ हयपुच्छमिवपर्णान्यस्याः । गौरादि: ॥

हयप्रिय: । पुं० यवे ॥ इति हेमचन्द्र: ॥

हयप्रिया । स्त्री० अश्वगन्धायाम् ॥ खर्ज्जूर्य्याम् ॥ इति राजनिर्घण्ट: ॥

हयमार: । पुं० करवीरे ॥

हयमारक: । पुं० करवीरे ॥ हयानां मारक: ॥

हयमारण: । पुं० अश्वत्थवृक्षे ॥

हयवाहन: । पुं० सूर्यपुत्रे । रैवन्ते ॥ त्रि० हयारोहे ॥ हयोवाहनोयस्यस: ॥

हयवाहनशङ्कर: । पुं० रक्तकाञ्चने ॥

हयशाला । स्त्री० मन्दुरायाम् । अश्वालये ॥

हयशीर्ष: । पुं० विष्णौ ॥

हया । स्त्री० अश्वगन्धायां ।

हयाध्यक्ष: । पुं० अश्वाध्यक्षे ॥ तल्लक्षणन्तु । हयशिक्षाविधानज्ञस्तच्चिकित्सितपारग: । अश्वाध्यक्षो महीभर्त्तुः स्वासनश्चप्रशस्यत इति ॥

हयानन्द: । पुं० मुद्गे ॥

हयायुर्वेद: । पुं० अश्वचिकित्साशास्त्रे ॥

हयारि: । पुं० करवीरे ॥ महिषे ॥

हयाशना । स्त्री० शल्लकीवृक्षे ॥

हयाह्वया । स्त्री० अश्वगन्धायाम् ॥

हयी । स्त्री० वाम्याम् । अश्वायाम् । वडवायां । घोटी० इ० भा० प्र० ।

स्त्रीविषयादित्यत० शोपधप्रतिषे
धेगवयहयमुकयमनुष्यमत्स्यानाम
प्रतिषिधवृत्तिर्ङीष् ।।
हयेष्टः । पुं० यवे ।।
हयोत्तमः । पुं० कुलीनाश्वे । श्रा
जानेये । वाताश्वे ।।
हरः । पुं० स्मरहरे । शम्भौ । शङ्क
रे । हरतिसर्वंहेतुकंसंसारदुःख
म् । हृञ्हरणे । पचाद्यच् ।। वै
श्वानरे ।। वानरयूथपतिविशेषे ।।
त्रि० नाशके ।।
हरगौरी । स्त्री० अर्द्धनारीश्वरमू
र्त्तौ ।।
हरचूडामणिः । पुं० चन्द्रे ।। शिव
शिरोरत्ने ।।
हरणम् । न० सुदाये । यौतकादीनां
द्रव्ये । यौतकादिधने ।। दोष्णि ।
भुजे ।। हृतौ ।। भाज्याङ्काङ्गाज
काङ्कद्वाराभागहरणे ।। क्रियते ।
हृञ्हरणे । कर्मणिल्युट् ।। हर
णम्० प्रापणम्स्वीकारः स्तेयंना
शनश्चेतिवैयाकरणाः । उदाहर
न्तिचैते । भारंहरति० प्रापयति ।
अंशंहरति० स्वीकरोति । स्वर्णंह
रति० चोरयति । पापंहरति० ना
शयतीति ।
हरतेजः । न० पारदे ।।
हरवल्लभा । स्त्री० पार्वत्याम् ।।
हररूपः । पुं० महेश्वरे । शिवे ।।

जातिद्रु० श० र० को० ।
हरबीजम् । न० पारदे ।।
हरशेखरा । स्त्री० गङ्गायाम् ।
हराक्षम् । न० रुद्राक्षे ।।
हराद्रिः । पुं० कैलासे ।।
हरिः । पुं० ब्रह्मणि । भूम्नि । ई
श्वरे ।। ब्रह्मदातरिश्रीगुरौ ।। हर
त्यविद्यामात्मज्ञानप्रदानेनेतिनिरु
क्तेः । विष्णौ ; नारायणे ।। य
था । हरावभक्तिः स्मर्त्तॄणांहविभा
गंक्रतुष्वहम् । वर्णश्चमेहरिश्चैष
तस्माद्धरिरहंस्मृतः । हरति ।
हृञ्० । अचहू : । हृपिपीत्यादि
नेन्वा ।। चन्द्रे ।। अर्के । भानौ
। यमे ।। अनिले । वाते ।। इन्द्रे
।। सिंहे ।। अंशौ । अश्वे । वा
जिनि ।। शुके । अहौ । सर्पे ।।
कपौ । वानरे ।। भेके ।। हरे ।
शिवे ।। अजे । परमेष्ठिनि ।। लो
कान्तरे । वर्षविशेषे ।। मयूरे ।।
कोकिले । हंसे ।। अग्नौ । भर्त्तृ
हरौ ।। त्रि० कपिलवर्णे । पि
ङ्गे ।। हरिद्वर्णे ।। पीतवर्णे ।।
श्रीकृष्णरूपगुणवर्णनयास्वर्गवो-
धाधिकारङ्कृहचेद्दलमन्यशास्त्रैः ।
तत्प्रेमभाववलभक्तिविलासनीम-
हासिन्धुचेद्यदिरतिः किमुकामि
नीभिः । तंचेतसाविभजतांब्रज
बालकेन्द्रं वृन्दावनक्षितितलंयमुना

अलम्ब । तल्लोकनाथपदपङ्कजधूलि भिर्विलिप्तं वपुः किलबथाऽगुरुचन्दनाद्यैः ॥ इतिपाद्मेपातालखण्डे १२ ऽध्यायः ॥

हरिकः । पुं॰ पीतहरितवर्णाश्वे । । हालके ॥

हरिकेलीयाः । पुं॰ भू॰ बङ्गदेशेषु ॥ त्रि॰ तद्देशस्थे ॥

हरिकेशः । पुं॰ शिवे ॥ शिवभक्तेयक्षविशेषे ॥

हरिक्रान्तः । पुं॰ अश्वे ॥ इ॰ का गडविशेषः ॥

हरिक्रांता । स्त्री॰ विष्णुक्रान्तायाम् ॥

हरिचम् । न॰ हरिहरर्चे चे । पुन्हाश्रमे । ददरिर्चे च॰ इ॰ भा॰ प्र॰ ॥

हरिगन्धनम् । न॰ हरिचन्दने ॥ ॥

हरिगीतम् । न॰ मात्रावृत्तप्रभेदे ॥ तल्लक्षणन्तु । इन्द्रासनं प्रथमं विसर्जं यतदनुसन्तनुषट्कलम्॰ इहतदनुपञ्चकलत्रयं किलकुरुविरामेकुण्डलम् ! अष्टाधिकाभिरहर्विंशतिं चकला: कलावतिसुन्दरं॰ हरिगीतमितिहरिगीतकंवरवृत्तमतिरसमन्दिरम् ॥ यथा । सखिबम्भ्रमीमियतोभृशं जगदेवशून्यमवेच्यते- परिभिद्यतेममहृदयममं नशमं सम्प्रतिवोच्यते । परिहीयतेवपुराभृशं नलिनीवहिमकरसङ्गता॰ कदतीपरं वदतीतिसा सुदतीरतीशवश

हृता ॥

हरिगृहं । न॰ एकचक्रे । शुंभपुर्य्याम् । हरिमंदिरे

हरिचक्रम् । न॰ सुदर्शने ॥ सिंहौघे ॥

हरिचन्दनम् । न॰ गोशीर्षे । तैलपर्णिके ॥ अस्यगुणायथा । हरिचन्दनन्तुदिव्यं हिमं तदिहदुर्लभं मनुजैः । पित्तादिपवित्रापिवमथुश्रमशोथमान्द्यसेदोहादिति ॥ पारिभाषिकहरिचन्दनन्तु । घृष्टस्तुलसीकाष्ठं कर्पूरागुरुयोगतः । अथवाकेशरैर्योज्यं हरिचन्दनमुच्यते ॥ ज्योत्स्नायाम् ॥ कुङ्कुमे ॥ अतिशीतपीतचन्दने ॥ कान्तौ ॥ पद्मकेशरे ॥ पुं॰ न॰ सुरतरुविशेषे ॥ चन्दयति॰ आह्लादयति । चदिआह्लादने । ण्यन्तः । नन्द्यादित्वाल्ल्युः । हरेश्चन्दनोहरिचन्दनः ॥ हरेरिन्द्रस्यचन्दनम् । हरिः कपिलवर्णं चन्दनं वा ॥

हरिणः । पुं॰ सारङ्गे ॥ अस्यपर्यायाः । मृगेकुरङ्गवातायुहरिणाजिनयोनयङ्गति । ताम्रवर्णीयम् ॥ अस्यमांसगुणायथा । हरिणः शीतलोबद्धविशम्बोदीपनोलघुः । रसेपाकेचमधुरः सुगन्धिः सान्निपातहेति ॥ त्रि॰ विशदे । पाण्डुवर्णवति । धवले ॥ हरतिमनः॰ ह्रियतेगीतेनवा । हृञ्॰ श्यास्त्याहृञविभ्यइनच् ।

हरिणनर्त्तकः । पुं॰ किन्नरे । मृगाः नर्त्तके ॥

हरिणप्लुता । स्त्री॰ अर्द्धसमवृत्तप्रभेदे ॥ विषमे सगणत्रितयं लगौ अथ समे नगणौ भगणौ गुरुः । यथा स्मरवह्निमन्त्रदीपिता कृशकुशा रमला हरिणप्लुता ॥

हरिणहृदयः । त्रि॰ भीरौ ॥

हरिणाक्षी । स्त्री॰ रमण्याम् । मृगलोचनायाम् । हट्टशिलासलीलामग स्वदृश्ये ॥

हरिणाङ्कः । पुं॰ चन्द्रे । शशिनि ॥

हरिणी । स्त्री॰ मृग्याम् । एण्याम् ॥ हरिणस्त्री । पुंयोगादिति ङीष् । हरितायाम् ॥ वर्णादनुदात्तादिति ङीब्नौ ॥ नारीभेदे । चारुचित्रिणीति ॥ सुवर्णप्रतिमायाम् । स्वर्णयूथ्याम् ॥ मञ्जिष्ठायाम् ॥ सुरभ्यायाम् ॥ अत्यष्टिच्छन्दः १७ प्रभेदे । तल्लक्षणं यथा । नसमरसलागः षड्भिर्वेदैर्हयैर्हरिणी मता । यथा । अभवितहरिणीन्सौम्यौसलीगौरमाम्बुधिविष्टपेरिति ॥ यथा । व्यञ्चतसखिधिर्न बनीरस्याम्बु हंसहरिणीगणात् । नवमृगमदश्यामस्फीतप्रफुल्लसहस्रयनश्रियाम् । यदयमनिशं दूर्वाश्यामे मुरारिकलेवरे व्यक्तिरहदधिकं प्रकाशं तनोति विलोचनम् ॥

हरित् । पुं॰ अश्वविशेषे । नीलपीतमिश्रितवर्णे । पालाशे । हरिते । हरावृतिभाषाप्रसिद्धे । मुद्गे ॥ स्त्री॰ दिशि । हरिद्रायाम् ॥ पुं॰ न॰ तृणे ॥ त्रि॰ हरिद्वर्णविशिष्टे ॥ हरति॰ हरन्ति विनयन्त्यनया वा । हृञ्॰ । दृन्करुहियुषिभ्य इतिरिति इतिः ॥

हरितः । पुं॰ हरिद्वर्णे । पालाशे । हरा॰ वृ॰ भा॰ प्र॰ ॥ मन्यामक्षितृणे ॥ न॰ स्थौणेयके ॥ त्रि॰ हरिद्वर्णयुक्ते ॥ हरति । हृञ्॰ हृश्याभ्यामितन्निति इतन् ॥

हरितकम् । न॰ शाके ॥ शिग्रौ ॥ हरितो वर्णोऽस्यास्ति । अर्श आद्यच् । स्वार्थे कन् ॥ ह्रियते वा । हृञ्॰ । हृश्याभ्यामितन् । कन् ।

हरितपत्रिका । स्त्री॰ पाठ्याम् ॥

हरितशाकः । पुं॰ शिग्रौ ॥

हरिता । स्त्री॰ दूर्वायाम् । अयस्याम् । शब्दा॰ कृ॰ प्र॰ पुष्पकर्णे ॥ हरिद्रायाम् ॥ पाठ्याम् ॥ कपिलद्राक्षायाम् ॥ नीलदूर्वायाम् ॥ वर्णादनुदात्तात्तोपधात्तो न इति पक्षे ङीप्नकारादेशयोरभावः ॥

हरितालम् । न॰ धातुविशेषे । पिञ्जरे । पीतके । ताले । आले । हरितालके । तत्तु हरेर्वीर्यम् ।

यथोक्तम् । हरितालं हरेर्वीर्य्यं लक्ष्मीवीर्य्यं मनःशिला । पारदं शिववीर्य्यं स्यादभ्रकं पार्वतीरजः ॥ इति ॥ तन्निरूपणं यथा । हरितालं द्विधा प्रोक्तं पत्राख्यं पिण्डसंज्ञकम् । तयोराद्यं गुणैः श्रेष्ठं ततो हीनगुणं परम् । स्वर्णवर्णं गुरु स्निग्धं सपत्रञ्चाभ्रपत्रवत् । पत्राख्यं तालकं विद्याद्गुणाढ्यं तद्रसायनम् । निष्पत्रं पिण्डसदृशं स्वल्पसत्त्वं तथा गुरु । स्त्रीपुष्पहारकं स्वल्पगुणं तत्पिण्डतालकम् ॥ हरितालं कटु स्निग्धं कषायोष्णं हरेद्विषम् । कण्डूकुष्ठास्यरोगास्रकफपित्तकचव्रणान् ॥ हरति च हरितालं चारुतां देहजातां सृजति च बहुतापानङ्गसङ्कोचपीडाम् । वितरति कफवातौ कुष्ठरोगं विदध्यादिदमशितमशुद्धं मारितञ्चाप्यसम्यक् ॥ अशुद्धस्यास्य दोषमाह । अशुद्धं तालमायुर्हन्ति कफमारुतमेहकृत् । तापस्फोटाङ्गसङ्कोचान् कुरुते तेन शोधयेत् ॥ अथास्य शोधनविधिः ॥ तालकं कणशः कृत्वा तच्चूर्णं काञ्जिके क्षिपेत् । दोलायन्त्रेण यामैकं ततः कूष्माण्डजे रसे ॥ तिलतैले पचेद्यामं यामञ्च त्रिफलारसे । दोलायन्त्रे चतुर्यामं पक्वं शुध्यति तालकम् । अथ मारणम् । सदलं तालकं शुद्धं पौनर्नवरसेन तु । खल्वे विमर्द्दयेदेकं दिनं पश्चाद्विशोषयेत् ॥ संशोष्य गोलकं तस्य कुर्य्यात्तच्च शोषयेत् । ततः पुनर्नवाक्षारैः स्थाल्यामर्द्धं प्रपूरयेत् ॥ तत्र तद्गोलकं धृत्वा पुनस्तेनैव पूरयेत् । आकण्ठं पिठरं तस्य पिधानं धारयेन्मुखे ॥ स्थालीं चुल्ल्यां समारोप्य क्रमाद्वह्निं विवर्द्धयेत् । दिनान्यन्तरशून्यानि पञ्च वह्निं प्रदीपयेत् ॥ एवं तन्म्रियते तालं मात्रा तस्यैव रक्तिका । अनुपानान्यशेषाणि यथायोग्यं प्रयोजयेत् ॥ इति । तालकं हरते रोगान् कुष्ठमृत्युज्वरापहम् । शोधितं कुरुते कान्तिं वीर्य्यं वृद्धिं तथायुषः ॥ हरितं वर्णमालाति । ला आदाने । आतोऽनुपसर्गे कः ॥

हरिताल पुं० पीतवर्णपक्षिविशेषः । हरियाल० इ० गौ० भा० प्र० ॥ तन्मांसगुणा यथा । हरितालोत्पटकः स्यात्कषायो मधुरो लघुः । रक्तपित्तप्रशमनस्तृषाग्निवातकोपनः ॥

हरितालकम् । म० हरिताले । स्वार्थे कः ॥

हरितालिका । स्त्री० हरिताल्याम् । भाद्रशुक्लचतुर्थ्याम् । दूर्व्वायाम् ॥

हरिताली । स्त्री० दूर्व्वायाम् ॥ आकाशरेखायाम् ॥ खड्गलतायाम् ।

स्वर्णध्यायाम् ॥ भाद्रशुक्लचतुर्थ्याम् । यथा । भाद्रे मासि सिते पक्षे वसुदेवतसंयुता । हरितालीचतुर्थी स्यात्स्वर्णगौरीप्रीतिदा सदा । भाद्रे मासि सिते पक्षे चतुर्थ्यामभियोगतः । ददाति किल्विषघ्नोऽरंहृष्टस्तोत्रसंशयः ॥ कश्चिच्चामलक्षेषु हरीसूर्ये चतुर्थिका । हरितालीसमाख्याता रुद्राणीप्रीतिदा सदा ॥

हरिताश्मन् । न० तुत्थे । नीलाश्मनि ॥

हरिताश्म । न० तुत्थे ॥ पुष्परागे ॥

हरितोषणम् । न० भगवत्प्रीतिकरे सर्वभूतदयालक्षणे कर्मविशेषे ॥ हरेराराधने ॥ हरेस्तोषणं येन ॥

हरित्पर्णम् । न० मूलके ॥

हरिदर्भः । पुं० हरित्कुशे ॥ मरुवके ॥

हरिदश्वः । पुं० रवौ । सूर्ये ॥ हरन्ति शीघ्रं गन्तव्यदेशं प्रापयन्तीति हरितो हरिन्नामकाः अश्वाः यस्य सः ॥ अर्कवृक्षे ॥

हरिदासः । त्रि० भगवद्भक्ते ॥

हरिदेवः । पुं० श्रवणर्क्षे ॥ हरिर्देवोऽस्य सः ॥

हरिद्रवः । पुं० नागकेशरचूर्णे ॥

हरिद्रा । स्त्री० निशाख्यायाम् । काञ्चन्याम् । पीतायाम् । वरवर्णिन्याम् । हलदी० इ० भा० प्र० ॥ अस्या गुणास्तु । हरिद्रा कटुका तिक्ता रूक्षोष्णा कफपित्तनुत् । वर्ण्या त्वग्दोषमेहास्रशोथपाण्डुव्रणापहा ॥ चिःस्वगन्धिहरिद्राऽन्या सा शीता वातलामता । पित्तघ्नी मधुरा तिक्ता सर्वकण्डूविनाशिनीति ॥ हरिद्रवति विशेषं द्रातीति । द्रा कुत्सायां गतौ । आतोऽनुपसर्गे कः । हरिं हरिद्वर्णं वा । हरितं द्रवति वा । द्रुगतौ । अन्येभ्योऽपीति डः ॥ हरितं राति इति वा ॥ टाप् ॥

हरिद्राङ्गः । पुं० हरितालपक्षिणि ॥ हरिद्राङ्गान्यस्य ॥

हरिद्राभः । पुं० पीतवर्णे । गौरे ॥ असनवृक्षे ॥ कर्पूरे ॥ त्रि० पीतवर्णवति ॥ हरिद्रेवाभा दीप्तिरस्य ॥

हरिद्रारागः । त्रि० अस्थिरस्नेहे । अलसौहृदे ॥ हरिद्रारागइवरागोऽस्य । हरिद्रारागश्चाचिरस्थायित्वात्तथैति भावत् । यथा । छन्माज्ञानुरागोऽपि हरिद्रारागउच्यते इति हलायुधः ॥

हरिद्रुः । पुं० द्रुमे । वृक्षे ॥ दारुहरिद्रायाम् ॥ वृक्षविशेषे । पीतदारुणि । पीतकाष्ठे । हलदुया० इ० भा० प्र० ॥ हरित्पिङ्ग० पीतो वा द्रुरस्य । यद्वा हरिभिर्द्रूयते । द्रुगतौ । हरिमितयोर्द्रुवः

इतिकुः ॥

हरिद्वारम् । न० तीर्थविशेषे । गङ्गाद्वारे । मायापुर्याम् ॥

हरिनामा । पुं० मुद्गे ॥

हरिनाम । न० श्रीहरेराख्याने ॥

हरिमेचम् । न० श्रीहरेरुच्छिष्टे । श्वेतपद्मे ॥

हरिनेत्रः । पुं० पेचके । घूके ॥

हरिन्मणिः । पुं० गारुत्मते । मरकतमणौ ॥ हरिद्वर्णमणिः । शाकपार्थिवादिः ॥

हरिन्मुद्गः । पुं० शारमुद्गे ॥

हरिपदम् । न० विषुवस्थाने ॥ रवेः सङ्क्रान्तिविशेषे ॥ यथा । दासखिलङ्क्रमतोऽस्यनमभवेद्दक्षिणपद मिति । २ । ५ । ८ ११ ॥

हरिपर्णम् । न० मूलके ॥

हरिप्रस्थः । पुं० इन्द्रप्रस्थे ॥

हरिप्रियः । पुं० कदम्बवृक्षे ॥ विष्णुकन्दे ॥ पीतभृङ्गराजे ॥ बन्धूके ॥ शङ्खे ॥ करवीरे ॥ न० उशीरे ॥ कृष्णचन्दने । कालीयके ॥

हरिप्रिया । स्त्री० लक्ष्म्याम् । पद्मालयायाम् ॥ हरेः प्रिया ॥ तुलस्याम् ॥ वनखर्जूरे ॥ गङ्गादिनदीषु ॥ यथा । गङ्गासरस्वतीलक्ष्मीश्चैतास्तिस्रः प्रिया हरेः । तुलसीसहितास्तास्तु चतस्रः कीर्तिताः शुभाः ॥ इतिदेवीभागवतम् ॥

हरिवालुकम् । न० एलवालुके । ऐलेये ॥ हरिवर्णवालुकम् ॥ पुं० हारीतपक्षिणि ॥

हरिभक्तः । पुं० हरिसेवके ॥ तल्लक्षणं यथा । सर्वजीवेषु यो विष्णुं भावयेत्समताधिया । हरौ करोति भक्तिञ्च हरिभक्तः स च स्मृतः ॥

हरिभद्रम् । न० हरिवालुके ॥

हरिभुक् । पुं० मयूरे ॥ सर्पे ॥

हरिमा । पुं० काले ॥ हरति । हृञ् । हृभृधृसृस्तृशृभ्य इमनिच् ॥

हरिमन्थः । पुं० अग्निमन्थे । गणिकारिकायाम् ॥ चणके ॥ हरिभिर्मथ्यते । मन्थ विलोडने ॥ कर्मणि घञ् ॥

हरिमन्थकः । पुं० चणके ॥ स्वार्थे कः ॥

हरिमन्थजः । पुं० चणके ॥ हरीन् मन्थं जनयति । जनी० अन्येष्वपीति डः ॥

हरिमन्दिरम् । न० विष्णोरायतने । तिलकविशेषे ॥ यथा । तिलकन्तु ऊर्द्ध्वपुण्ड्रं स्यान्मध्यच्छिद्रं हि नारद । यदि शुभ्रं ललाटे तद्विद्धि तं हरिमन्दिरम् ॥ हरेः सर्वावताराणां मत्स्यादीनां निषेवतः । उपासनां तिलकञ्च हरिमन्दिरमिति पद्मपुराणम् ॥ अपि च । नासिकायास्त्रिभागेन भागेमानेन यो भवेत् । मध्ये ।

दष : श्यामं मृगमनुगमनौषिषः :
इति ॥

हरिय : । पुं॰ पीतवर्णहये ॥

हरिलोचन : । पुं॰ तिर्यग्यने । कुलीरे ॥

हरिवंश । पुं॰ महाभारतीयपर्वविशेषे ॥ श्रीकृष्णान्वये ॥

हरिवाच् । पुं॰ इन्द्रे । त्रि॰ हरिविशिष्टे ।

हरिवर्षम् । न॰ निषधहेमकूटयोर्मध्यवर्त्तमानवर्षविशेषे ॥ यथा । निषधाद्धरिवर्षं यच्चास्यस्मात् हेमकूटत इति ॥ अपिच । दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयोऽयुतयोजनोत्सेधा हरिवर्षकिम्पुरुषभारतानां यथा सङ्ख्यमिति श्रीभागवतम् ॥

हरिवल्लभा । स्त्री॰ लक्ष्म्याम् ॥ तुलस्याम् । जयायाम् । अजयायाम् ॥

हरिवासर : । पुं॰ न॰ द्वादश्याःप्रथमे पादे ॥ यथा । द्वादश्याः प्रथमः पादो हरिवासरसंज्ञकः । तमतिक्रम्य कुर्वीत पारणं विष्णुतत्परः॰ इति ॥ इति विष्णुधर्म्मोत्तरसंहिता ॥

हरिवाहन : । पुं॰ गरुडे ॥

हरिविक्रम : । पुं॰ हरेः पराक्रमे ॥ योपिदेकपदेन समुच्छ्रितेनायतेन हरिविक्रमाद्ययहतन्नचित्तक्रियाणि

शेषे ।

हरिवीजम् । न॰ हरिताले ॥

हरिवृषम् । न॰ हरिवर्षे ॥

हरिशयनम् । न॰ हरेर्निद्रायाम् ॥ तच्चाषाढशुक्लैकादशीतः प्रसिद्धम् ॥

हरिश्चन्द्र : । पुं॰ नृपतिविशेषे । स ताचोभक्तौ । त्रिशङ्कुजे ॥ ऋषिविशेषे ॥ प्रस्कण्वहरिश्चन्द्रावृषी इति साधुः ॥ चन्द्रिका देवीस्थानतीर्थविशेषे ॥ इति देवीगीता । शुभेश्वरो हरिश्चन्द्रस्त्वागमः ॥

हरिश्चन्द्रपुरम् । न॰ सौभे । खपुरे । जह्नेपुरे । हरचन्द्रावलो॰ इ॰ भा॰ प्र॰ ॥

हरिषेण : । पुं॰ जिनचक्रवर्त्तिविशेषे । हरिसुते ॥ यथा । हरिषेणो हरिसुतो जयो विजयनन्दनः । ब्रह्मसूनुर्ब्रह्मदत्तः सर्वेप्येवाकुवंशजाः ॥ हरि॰ सेनापत्यपि । एतसंज्ञोयाः मगाद्दितिषः ॥

हरिसुत : । पुं॰ स्मरे । कामे । मीनकेतने ॥ हरिषेणे ॥

हरिहय : । पुं॰ इन्द्रे । अधिपतौ ॥ हरिर्हयो यस्य ॥ पक्षविशेषे ॥ यथा । चक्रवीथवल्लरीमामिसुरवाभानियच्छतु । हरिः सवर्णतोऽश्वस्तु पीतकौषेयसप्रभ इति शालिहोत्रः ॥ सूर्ये ॥

हरिहर: । पुं॰ संयुक्तहरिहरमूर्त्तौ ॥

यथा। हरिहरमनुसरमाधोपारंप यातुमिच्छसि चेज्जनुजलधेः। रूपत भयतद्दसि वस्तुतएकं भजानामि॥

हरिहरक्षेत्रम्। न० हरिक्षेत्रे॥

हरिहरात्मकः। पुं० शिववृषभे॥ गरुडे॥

हरीतकी। स्त्री० स्वनामप्रसिद्धे पथ्यावृक्षे। तत्फले॥ तत्पर्य्यायो यथा। अभया त्वव्यथा पथ्या वयस्था पूतनाऽमृता। हरीतकी हैमवती चेतकी श्रेयसी शिवेति। अथ प्रभेदा गुणाश्च यथा। हरोऽपयमृतोत्पन्ना सप्त भेदैरुदीरिता। तस्या नामानि वर्णाश्च कथ्यन्ते च यथाक्रमात्॥ विजया रोहिणी चैव पूतना चामृताऽभया। जीवन्ती चेतकी चेति नाम्ना सप्तविधा स्मृता। अलाबुवृत्ता विजया सुवृत्ता रोहिणी मता। स्वल्पत्वक् पूतना ज्ञेया स्थूलमांसाऽमृता स्मृता पञ्चास्रा चाभया प्रोक्ता जीवन्ती स्वर्णवर्णभाक्। त्र्यस्रा तु चेतकी विद्यात् दिव्या सा रूपलक्षणम्॥ विन्ध्याद्रौ विजया हिमाचलभवा स्याच्चेतकी पूतना-सिन्धौ स्याद्रोहिणी तु विजया जाता प्रतिष्ठानके। चम्पायाममृताऽभया च जनिता देशे सुराष्ट्राह्वये जीवन्तीति हरीतकी निगदिता सा सप्तभेदा बुधैः॥ सर्वप्रयोगे विजया च रोहिणी क्षतेषु लेपेषु तु पूतनोदिता। विरेचने स्यादमृता गुणाधिका जीवन्तिका स्याद्धि च जीर्णरोगजित्॥ स्याच्चेतकी सर्वरुजापहारिका नेत्रामयघ्नीमभयां वदन्ति ताम्। इत्थं यथा रोगमयं प्रयोगमासाद्य या गुणाख्यानकादाचिदन्यथा॥ चेतकी तु धृता हस्ते यावत्तिष्ठति देहिनः। तावद्विरिच्यते वेगैस्तत्प्रभावान्न संशयः॥ सप्तानामपि जातीनां प्रधानं विजया स्मृता। सुखप्रयोगसुलभा सर्वव्याधिषु शस्यते॥ क्षिप्ता प्सु निमज्जति यावमात्रेण या गुणवती भिषक्प्रवरैः। यस्याश्च भूमौ निमज्जनं सा गुणाढ्या ख्याता॥ हरतिप्रसभं व्याधीन् भूयस्ताङ्कयतिवपुः। हरीतकी तु सा प्रोक्ता [illegible] ॥ हरीतकी तु तथाप्यन्यानुरसगतं गच्छति। शैवेन कषायेण वीर्येण गुर्वीत्याने व गच्छति। इति राजनिघण्टुः॥

अपि च भावप्रकाशे। नवा स्निग्धा घना वृत्ता गुर्वी क्षिप्ता च याम्भसि। निमज्जेत् सा प्रशस्ता च कथिताति गुणप्रदा॥ नवादिगुणयुक्तत्वं तथैकत्र द्विकर्षता। हरीतक्याः फले यत्र द्वयं तच्छ्रेष्ठमुच्यते॥ चर्विता वर्द्धयत्यग्निं पेषिता मलशोधिनी। स्विन्ना संग्राहिणी पथ्या भृष्टा प्रोक्ता त्रिदोषनुत्॥ उन्मीलिनी बुद्धिबलेन्द्रियाणां निर्मूलिनी पित्तकफानिलानाम्।

विस्रंसिनीमूत्रकृच्छ्रमलानां हरीतकीश्यामसुभोजनेन ॥ पन्नपानकृतान् दोषान् वातपित्तकफोद्भवान् । हरीतकी हरत्याशु भुक्तस्योपरि योजिता ॥ लवणेन कफं हन्ति पित्तं हन्ति सशर्करा । घृतेन वातजान् रोगान् सर्वरोगान् गुडान्विता ॥ सिन्धूत्थशर्कराशुण्ठीकणामधुगुडैः क्रमात् । वर्षादिष्वभया प्राश्या रसायनगुणैषिणा ॥ अध्वातिखिन्नो बलवर्जितश्च रूक्षः कृशो लङ्घनकर्षितश्च । पित्ताधिको गर्भवती च नारी विमुक्तरक्तस्त्वभयां न खादेत् । इति ॥ अस्याः सेवने दिनमधुर्दधिमांसकालिदासः । कृष्णाभयानागरपूर्वसेन्धवारम्भो विधेयो लघुभेन्व्यभेमृगे । प्रवक्षयेकेन्दसितिक्र्यवारूरैः पूर्णाजयानन्दवतीषु धीमहीति ॥ हरीतक्याः फलं हरीतकी । विकारावयवयोरुत्पन्नस्य प्रत्ययस्य हरीतक्यादिभ्यश्चेति लुप् । लुपि युक्तवद्व्यक्तिवचने । हरीतक्यादिषु व्यक्तिरिति लिङ्गमेव प्रकृतिवन्न सङ्ख्या ॥ पथ्यामलकी तुवरुष्णी वातपित्तज्वरे गुरुः ॥ अस्यापाकः पाकाच्छल्यादिवर्गीयः ॥

हरीश्वरः । पुं॰ हनूमति ॥ वालिवानरे ॥ सुग्रीवे ॥

हरीषा । स्त्री॰ पक्वमांसप्रभेदे ॥ यथा । पाकपात्रे तु हतिमांसखण्डानि निःक्षिपेत् । पानीयं प्रचुरं सर्पिः प्रभूतं हिङ्गु जीरकम् ॥ हरिद्रामार्द्रकं शुण्ठीं लवणं मरिचानि च । तण्डुलांश्चापि गोधूमान् जम्बीरार्धरसान्ष्कुन् ॥ यथा सर्वाणि वस्तूनि सुपक्वानि भवन्ति हि । तथा पचेत्तन्निपुणो हुमगडस्थितिर्यथा ॥ एषा हरीषा बलकृद्वातपित्तापहा गुरुः । शीतोष्णा शुक्रदा स्निग्धा सरा सन्धानकारिणी । इ॰ भा॰ प्र॰ ॥

हरेणुः । पुं॰ सतीने । कलाये । कलायस्त्रिपुटः प्रोक्तः सतीनो वर्त्तुलो मतः । हरेणुरपुटोऽन्येयो विशेषायमुदाहृतः ॥ हरति । हृञ्॰ । कृहृभ्यामेणुः ॥ स्त्री॰ रेणुकायाम् । भस्मगन्धिन्याम् । कुलयोषिति ॥

हरेणुकः । पुं॰ कलाये ॥

हर्त्ता । त्रि॰ हरणकर्त्तरि ॥ हरति । हृञ्॰ । तृच् ॥

हर्म्मं । न॰ जृम्भणे । इ॰ म॰ र॰ लौ ॥

हर्म्मितः । त्रि॰ क्षिप्ते । दग्धे ॥

हर्म्यम् । न॰ धनिनां वासः । काष्ठेष्टकादिनाकृतधवलगृहं ॥ यथा । रम्यं हर्म्यतलं न किं वसतये श्राव्यं न गीतादिकम् किं वा प्राणसमासमागमसुखं नैवाधिकं प्रीतये । किन्तु

प्राप्तपतत्पतङ्गपवनव्यालोलदीपाङ्कुरच्छायाचञ्चलमाकलय्य सकलं सन्तो वनान्तं गताः ॥ हरति मनः । हृञ्० । अन्नादिभ्यो यत्० मुटच् ॥

हर्यक्ष : । पुं० सिंहे ॥ हरिणी पिङ्गले अक्षिणी यस्य सः । बहुव्रीहौ षच् ॥ कुबेरे ॥

हर्यत : । पुं० वायौ ॥ अश्वे ॥ हर्यति । हर्य गतिकान्त्योः । भृमृदृशियजिपर्विपच्यमितमिनमिहर्षिभ्योऽतच् ॥ हर्यतः सर्वैः स्पृहणीय इति वेदभाष्यम् ॥

हर्यश्व : । पुं० इन्द्रे । हरिहये ॥ हू० कषित् ॥

हर्ष : । पुं० मुदि । प्रीतौ । धर्मिणि । सुखे ॥ स्वप्रियलाभेरोमाञ्चाश्रुपातादिहेतुरानन्दाभिव्यञ्जकश्चित्तवृत्तिविशेषो हर्षः ॥ हृष तुष्टौ ॥ घञ् ॥

हर्षक : । पुं० पर्वतविशेषे ॥ त्रि० हर्षकारके ॥

हर्षक्षय : । पुं० धातुक्षये ॥

हर्षण : । पुं० अक्षिरोगभेदे ॥ श्राद्धदेवे ॥ योगविशेषे ॥ तज्जातफलम् । सुचारुगात्रः स्फुटवाक्यनेत्रः शास्त्रप्रयत्नैर्विनयोपपन्नः । प्रसूतिकाले यदि हर्षणः स्यादमर्षयोगे न जनः कदाचित् ॥ न० हर्षे ॥ त्रि० हर्षके हर्षकारके ॥

हर्षमाण : । त्रि० विकुर्वाणे । प्रमनसि । हृष्टमानसे ॥ हर्षति । हृषु अलीके । ताच्छील्ये चानश् ॥

हर्षयित्नु : । पुं० पुत्रे । सुते ॥ न० काञ्चने । स्वर्णे ॥ हर्षयति । हृष तुष्टौ । तनिहृषिभ्यामित्नुच् । त्रि० हर्षणशीले ॥

हर्षस्वन : । पुं० किलकिलायाम् ॥ हू० वि० शेष : ॥

हर्षणी । स्त्री० विजयायाम् ॥

हर्षित : । त्रि० हृष्टे । सञ्जातहर्षे ॥ हृषु० । क्त : । हर्षः सञ्जातोऽस्य वा । इतच् ॥

हर्षुल : । पुं० मृगे ॥ कामिनि । कामुके ॥ हृष्यति । हृष तुष्टौ । हृषेरुलच् ॥

हलम् । न० लाङ्गले । गोदारणे । सीरे ॥ हलति । हल विलेखने । अच् ॥ अचगो योजने दोषादिः शौचयथा । अष्टागवं धर्महलं षड्गवं जीवितार्थिनाम् । चतुर्गवं नृशंसानां द्विगवं ब्रह्मघातिनामिति हारीतः ॥

हलदण्ड : । पुं० ईषायाम् । हलयुगयोर्मध्यकाष्ठे ॥

हलद्दी । स्त्री० हरिद्रायाम् । हू० रा० गट ॥

हलधर : ।) हलभृत् ।) पुं० बलदेवे ॥ हालिके ॥

हलपद्धतिः । स्त्री॰ लाङ्गलपद्धतौ । सीतायाम् । हलरेखायाम् । हलस्य पद्धतिः ॥

हलप्रवाह: । पुं॰ सीरकर्षणे ॥

हलभूति । स्त्री॰ कृषिकर्मणि ॥

हलभृतिः । पुं॰ मुनिविशेषे । उपवर्षे ॥ कृषिकर्मणि ॥

हलराख्यम् । न॰ बाहुल्ये । काश्मपुष्पके । तरवट॰ इ॰ काश्मीरभाषाप्र॰ ॥

हलरेखा । स्त्री॰ सीतायाम् ॥ हलस्य रेखा ॥

हल: । अ॰ नाट्योक्त्यां सख्याह्वाने ॥ समानाभिस्तथा सख्यौ हलाभाष्यः परस्परमिति भरतः ॥ हल॰ । आ बहुलकात् डाप्रत्ययः ॥

हला । स्त्री॰ सख्याम् ॥ पचाद्यच्, ततष्टाप् ॥ मद्ये । जले ॥ भूमौ ॥

हलायुधः । पुं॰ बलदेवे ॥ हलमायुधं यस्य ॥ हलश्च बलभद्रस्य गगनादागतं ज्वलदिति जरासन्धयुद्धोद्योगे विष्णुपुराणम् ॥

हलाहः । पुं॰ चित्रिताश्वे ॥

हलाहलः । पुं॰ ब्रह्मसर्पे ॥ हयमाली ॥ हषी । बुद्धभेदे ॥ पुं॰ न॰ विषप्रभेदे ॥ हलति जठरम् । हल॰ । अच् । नञ्‌र्ज्ञति॰ आहलति वा । अच् । आहलम्॰ आहलं वा । ततः कर्मधारयः ॥ स्त्री॰ अघ्नमायाम् ॥ वृष्ट्याम् ॥

हलिः । पुं॰ महाहले । जित्यायाम् । कृष्टसमीकरणार्थस्य काष्ठे ॥

हली । पुं॰ बलभद्रे ॥ हलोऽस्त्यस्य । सुखादिभ्यश्चेतीनिः ॥ कर्षके ॥

हलिनी । स्त्री॰ लाङ्गलिकायाम् ॥ हलसमूहे ॥

हलिप्रियः । पुं॰ कदम्बवृक्षे ॥ हलिनो बलदेवस्य प्रियः॰ सुराया अधिवासत्वात् ॥

हलिप्रिया । स्त्री॰ सुरायाम् । मदिरायाम् ॥ हलिनः सङ्कर्षणस्य प्रिया ॥

हली । स्त्री॰ कलिकार्याम् ॥

हलीनः । पुं॰ केतक्याम् । शाकवृक्षे ॥

हलीमकः । पुं॰ पाण्डुरोगप्रभेदे ॥ यदा तु पाण्डोर्वर्णः स्याद्धरितश्यावपीतकः । बलोत्साहक्षयस्तन्द्रा मन्दाग्नित्वं मृदुज्वरः ॥ स्त्रीष्वहर्षोऽङ्गमर्दश्च श्वासतृष्णारुचिभ्रमाः । हलीमकं तदा तस्य विद्यादनिलपित्ततः ॥ इति भावमिश्रः ॥ पाण्डोः पाण्डुरोगिणः ॥

हलीषा । स्त्री॰ लाङ्गलदण्डे ॥

हल्यम् । त्रि॰ हलकृष्टक्षेत्रे । कृष्टे ॥ हलेन कृष्टम्॰ हलस्य कर्षः । मतवत् हलादित्यत् ॥

हल्या । स्त्री० हलसमूहे ॥ हलानां समूहः । पाशादिभ्यो यः ॥

हल्लकम् । न० रक्तसंध्यके । रक्तसौधीतिख्याते । हेला० द्वि० गौ० भा० प्र० पुष्पे ॥ रक्तवर्णविकाल विकाशिपुष्पविशेषे । इत्यन्ये ॥ हलति । हलविलेखने । ण्वुल् ॥ यद्वा । हलनम् । सम्पदादित्वात् क्विप् । हलं लाति । ला दाने । आतोऽनुपसर्गे कः । संज्ञायां कन् ॥

हल्लनम् । त्रि० प्रचलायिते । द्वि० ज० धरः ॥

हल्लीषम् । न० योषितां मण्डलीनृत्ये ॥ स्त्रीणां हल्लीषं सहनर्त्तनमिति चि काण्डशेषः ॥

हल्लीषकम् । न० स्त्रीणां मण्डलिकानृत्ये । मण्डलेन तु यन्नृत्यं स्त्रीणां हल्लीषकन्तु तदिति हेमचन्द्रः ॥ एकस्य पुंसो बह्वीभिः स्त्रीभिः सह क्रीडने । तत्तु रासक्रीडा । यथा । गोपीनां मण्डलीनृत्यबन्धे हल्लीषकं विदुरिति कोषात् । तल्लक्षणं रासगोष्ठ्यां द्रष्टव्यम् ॥

हवः । पुं० आज्ञायाम् । निदेशे ॥ आह्वाने । हूतौ ॥ अध्वरे । सप्ततन्तौ ॥ ह्वानम् । ह्वेञ् स्पर्द्धायां शब्दे च । भावेऽनुपसर्गस्य अप् सम्प्रसारणञ्च ॥ हूयतेऽत्रेति वा ॥ आहवे । इति वेदविदः । आहूयन्ते परस्परं युद्धार्थं योद्धारोऽत्र ॥

हवङ्गः । पुं० कांस्यपात्रे दधिमिश्रितान्नभक्षणे । इति कश्चित् ॥

हवनम् । न० होमे ॥

हवनायुः । पुं० अग्नौ ॥

हवनी । स्त्री० हवनकुण्डे ॥

हवनीयम् । त्रि० हविषि । होमीय द्रव्ये ॥ हूयते । हु० । अनीयर् ॥

हविषी । स्त्री० होमकुण्डे ॥

हविरशनः । पुं० अग्नौ ।

हविर्गन्धा । स्त्री० शम्यां ॥

हविर्गृहम् ।
हविर्गेहम् । } न० यज्ञगृहे । होत्रीये ॥

हविर्भुक् । पुं० अङ्गिरसः पुत्रे क्षत्रियाणां पितरि ॥ अग्नौ ॥ हवींषि भुङ्क्ते । भुज० । क्विप् ।

हविर्भूः । स्त्री० पुलस्त्यस्य पत्न्याम् ॥

हविर्मन्थः । पुं० अग्निमन्थे । श्रीपर्णे ॥

हविष्कृत् । स्त्री० देवानामर्थे या हविः सम्पादयति तस्याम् ॥

हविष्मत् । पुं० हविर्भुजि । त्रि० आज्यादिमति ॥ ध्यानभावनावति ॥

हविष्यम् । न० हवनीये ॥ भोज्यभेदे ॥ मुन्यन्नादिषु ॥ घृते ॥ हविषे हितम् । उगवादिभ्यो यत् ॥

हविष्यान्नम् । न० हविष्ये । व्रतादा

यज्ञीयद्रव्यविशेषे ॥ हविष्यञ्चत
दन्नञ्च ॥

हविः । न० होतव्यद्रव्ये । सान्नाय्ये
। देवतोद्देशेनाग्नौ त्यज्यमानद्रव्ये
। त्यागप्रवर्त्तकक्रियायाः साक्षात्
कर्मकारके ॥ तद्द्विविधम् । पुरो
डाशरूपमाज्यरूपञ्च ॥ घृते । सर्पि
षि ॥ हविषां परिणामोऽयं यदेतद
खिलं जगत् ॥ हूयते । हुदानाद
नयोः । अर्चिशुचिहुसृपीत्यादिना इ
सिः ॥ मुन्यन्नानि पयः सोमो मां
सं यच्चानुपस्कृतम् । अक्षारलवण
ञ्चैव प्रकृत्या हविरुच्यते इति मनुः ॥

हवुषा । स्त्री० हपुषायाम् ॥

हवै । अ० वृत्तार्थस्मरणार्थौ निपा-
तौ ॥ प्रसिद्धार्थावद्योतकौ वैदे नि
पातौ ।

हव्यम् । न० देवेऽन्ने । हवनीये ।
हूयन्ते प्रीयन्ते देवा येन० हूयते०
प्रक्षिप्यते वा । हु० । अचोयत् ।
गुणावादेशौ ॥

हव्यपाकः । पुं० चरौ ॥ पच्यते ।
पचेः कर्मणि घञ् । हव्यञ्च तत्०
पाकश्च यद्वा । भावे घञ् । पच
नम्० पाकः । हव्यस्य पाकः ०
पाकाऽधिकरणम् ॥

हव्यवाहः । पुं० अग्नौ ॥

हव्यवाहनः । पुं० अग्नौ ॥ हव्यं वा
हयति । ण्यन्ताद्वहेर्ल्युः ॥

हव्याशः ।
हव्याशनः । पुं० अग्नौ ॥
हव्येशः ।

हसः । पुं० हास्ये ॥ हसनम् । ह
सेर्हसने । स्वनहसोर्वेत्यप् ॥

हसत् । त्रि० हास्यं कुर्वति ॥ हसेर्ल
टः शतृ ॥

हसनम् । न० हास्ये ॥ हसे० । ल्युट् ॥

हसनी । स्त्री० अङ्गारधान्याम् ॥ ह
सति । हसे० । कृत्यल्युटोबहुलमिति ल्यु
ट् । टिड्ढेति ङीप् ॥

हसनीमणिः । पुं० पर्परीके । अ
ग्नौ ॥

हसन्तिका । स्त्री० हसन्त्याम् । अङ्गा
रधान्याम् ॥

हसन्ती । स्त्री० अङ्गारधान्याम् ॥ मल्लि
काप्रभेदे ॥ शाकिनीविशेषे ॥ हस
ति । हसे० । लटः शतृ । उगितश्चे
ति ङीप् । शप्श्यनोर्नित्यमिति नुम् ॥

हसितम् । न० अट्टहास्ये ॥ हास्ये ॥
त्रि० विकसिते । फुल्ले ॥ हसि० ।
नपुंसके भावे क्तः ॥

हस्तः । पुं० करे । पञ्चशाखे । शये
। पाणौ । शब्द० र० भा० प्र० ॥
करिकरे शुण्डायाम् । सं० ह०
र० भा० प्र० ॥ मानभेदे । चतुर्विं
शत्यङ्गुलमितेसप्रकोष्ठकरे ॥ यथा
। यवानां तण्डुलैरेकमङ्गुलं चाष्ट
भिर्भवेत् । चतुर्विंशतिर्हस्त

चतुर्विंशद्भिरङ्गुलैरितिकालिकापुराणम् । द्रुमभेदे ॥ अयोदशर्क्षे । हस्तायाम् ॥ यथा । पुष्योहस्तोऽभिजमघ्याश्विनश्चश्रवणार्द्राः सर्वदिग्द्वारकाणीति ॥ केशात्परोऽग्रे ॥ यथा केशहस्तः ॥ अश्वसम् हस्तत्यर्थः । हसति ० हस्यतेऽचा । हसे ० । हसिमृग्रिणिभ्यस्तन् ॥ ष्टि ० हस्तायां जाते ॥ श्रविष्ठाफल्गुन्युत्यणोलुक् । न ० चर्मप्रसेविकायां ॥

हस्तधारणम् । न ० परित्राणे । प्रहर्तुमुद्यतस्य हस्तस्य धारणं रोधः । रथकस्य पृष्ठहस्तस्थापनं वा ॥ भुजग-हर्षे ॥

हस्तपुच्छम् । न ० कन्धुषि । कल्मषे । हार्थीक्ता ० शू ० भा ० प्र ० ॥

हस्तवारणम् । न ० परित्राणे । मारणोद्यतस्य निवारणे ॥ हस्तेन ० - हस्तस्य वा ० वारणम् ॥ करेणनिषेधे ॥

हस्तविम्बम् । न ० चन्दनादिना देहविलेपनविशेषे । स्थासके ॥

हस्तसिद्धिः । स्त्री ० भृतौ । वेतने । हस्ताभ्यां साध्या सिद्धिः ॥

हस्तसूत्रम् । न ० करसूत्रे । कङ्कणा ० इति विवाहे प्रसिद्धे ॥

हस्ता । स्त्री ० अश्विन्यादौ त्रयोदशर्क्षे ॥ तत्र जातस्य फलं यथा । दाता यशस्वी सुतरां मनस्वी भूदेवदेवार्चनतत्परश्च नयनः । प्रसूतिकाले किल यस्य हस्ता हस्ते स्थिता तस्य समस्तसम्पत् ॥

हस्ताङ्गुलिः । स्त्री ० करशाखायां ॥

हस्तामलकम् । न ० करस्थितामलकीफले । करस्थितस्वच्छजले । वेदान्तार्थविशेषे । पुं ० शङ्कराचार्यशिष्यविशेषे ॥

हस्तावसेचनम् । न ० उत्तरापोशाने ॥

हस्तास्त्रम् । न ० प्रहरणे । हथियार इ ० भा ० प्र ० ॥

हस्तिकन्दः । पुं ० बृहत्कन्दविशेषे । कुष्ठहन्तरि ० गजकन्दे ॥

हस्तिकन्दकः । पुं ० हस्तिकन्दे । स्वार्थे कः ॥

हस्तिकरञ्जः । पुं ० महाकरञ्जे ॥

हस्तिकर्णः । पुं ० उरुबूके । एरण्डे । रक्तैरण्डे । स्वनामख्यातेपलाशभेदे ॥ हस्तिकर्णः परं वृष्यो मेधायुर्बलवर्द्धनः ॥ हस्तिकन्दे ॥ गणदेवताभेदे ॥

हस्तिकर्णकः ।
हस्तिकर्णदलः । पुं ० हस्तिकर्णाभिधपलाशे । किंशुके ॥

हस्तिकारवी । स्त्री ० अजमोदायां ।

हस्तिकोलिः । गोरघोरटायाम् ॥

हस्तिगिरिः । पुं ० काञ्चीदेशे ॥

हस्तिघोषा । स्त्री ० कोशातकीभेदे । महाकोशातक्याम् । तुनिया ० घोयातोरई ० इ ० भा ० ॥

हस्तिचारिणी । स्त्री॰ महाकरञ्जे ॥

हस्तिचेष्टितम् । न॰ गजेङ्गिते ॥ तद्यथा । तत्रादौ दन्तकल्पनविधानम् । दन्तस्य मूलपरिधिं द्विरायतं प्रोज्झ्य कल्पयेच्छेषम् । अधिकमनूपचराणां न्यूनं गिरिचारिणां किञ्चित् ॥ कल्पितदन्तस्य लक्षणन्तु । श्रीवत्सवर्द्धमानच्छत्रध्वजचामरानुरूपेषु । छेदे दृष्टेष्वारोग्यविजयधनवृद्धिसौख्यानि ॥ प्रहरणसदृशेषु जयो नन्द्यावर्त्ते प्रनष्टदेशाप्तिः । लोष्टे तु लब्धपूर्वस्य भवति देशस्य सम्प्राप्तिः ॥ स्त्रीरूपेऽस्वविनाशो भृङ्गारेऽभ्युत्थिते सुतोत्पत्तिः । कुम्भेन निधिप्राप्तिर्यात्राविघ्नञ्च दण्डेन ॥ ४ ॥ कृकलासकपिभुजङ्गेष्वसुभिक्षव्याधयो रिपुवशित्वम् । गृध्रोलूकध्वाङ्क्षश्येनाकारेषु जनमरकः ॥ ५ ॥ पाशेऽथवा कबन्धे नृपमृत्युर्जनविपत्स्रुते रक्ते । कृष्णे श्यावे रूक्षे दुर्गन्धे चाशुभं भवति ॥ शुभच्छेदलक्षणन्तु । शुक्लः समः सुगन्धिः स्निग्धश्च शुभावहो भवेच्छेदः । गलनम्लानफलानि च दन्तस्य समानि भङ्गेन । अथ शुभाशुभमाह । मूलमध्यदशनाग्रसंस्थिता देवदैत्यमनुजाः क्रमात्ततः । स्फीतमध्यपरिपेलवं फलं शीघ्रमध्यचिरकालसम्भवम् ॥ अथ विशेषफलमाह । दन्तभङ्गफलमत्र दक्षिणे भूपदेशबलविद्रवप्रदम् । वामतः सुतपुरोहितेभपान् हन्ति साटविकदारनायकान् ॥ पुनरपि । आदिशेदुभयभङ्गदर्शनात् पार्थिवस्य सकलं कुलक्षयम् । सौम्यलग्नतिथिभादिभिः शुभं वर्द्धते शुभमथोऽन्यथा भवेत् ॥ दन्तभङ्गस्य विशेषफलमाह । क्षीरमिष्टफलपुष्पपादपेष्वापगातटविघट्टनेन वा । वाममध्यरदभङ्गखण्डने शत्रुनाशकृदतोऽन्यथापरम् ॥ ११ ॥ अथ नागचेष्टितमाह । स्खलितगतिरकस्मात्त्रस्तकर्णोऽतिदीनः श्वसिति मृदु सुदीर्घं न्यस्तहस्तः पृथिव्याम् । द्रुतमुकुलितदृष्टिः स्वप्नशीलो विलोमो भयकृदहितभक्षी नैकशोऽसृक्छकृत्कृत् ॥ १२ ॥ शुभचेष्टितमाह । वल्मीकस्थाणुगुल्मक्षुपतरुमथनः स्वेच्छया हृष्टदृष्टिर्यायाद्यात्रानुलोमं त्वरितपदगतिर्वक्त्रमुन्नम्य चोच्चैः । कक्ष्यासन्नाहकाले जनयति च मुहुः शीकरं बृंहितं वा तत्काले वा मदाप्तिर्जयकृदथ रदं वेष्टयेद्दक्षिणं च ॥ प्रवेशनं वारिणि वारणस्य ग्राहेण नाशाय भवेन्नृपस्य । ग्राहं गृहीत्वोत्तरणं द्विपस्य तोयात्स्थलं वृद्धिकरं नृपस्य ॥ १४ ॥ इति वाराह्यां ९२ऽध्यायः ॥

हस्तिच्छाया । स्त्री॰ गजच्छायायाम् । कुञ्जरच्छायायाम् ॥

हस्तिजिह्वा । स्त्री॰ नाडीविशेषे । यथा । हस्तिजिह्वोत्पलप्रख्या नाडी तस्याः पुरः स्थिता । तस्या इडायाः । सव्यभागस्थम् ऊर्द्ध्वादिपादाङ्गुष्ठान्तमाश्रिता । हस्तिजिह्वाख्या नाडी दक्षिणचक्षुषि स्थितेति ॥

हस्तिदन्तः । पुं॰ मूलके । मूलौ॰ इ॰ प्र॰ मूलि ॥ नागदन्ते । खूंटी इ॰ भा॰ प्र॰ ॥ हस्तिनो रदे ॥

हस्तिदन्तकम् न॰ मूलके ॥

हस्तिदन्तफला स्त्री॰ एर्वारौ । ककडी इ॰ भा॰ प्र॰ ॥ हस्तिदन्तवत्फलान्यस्याः ॥

हस्ती । पुं॰ महामृगे । पीलौ । अस्य पर्यायास्तु । दन्ती दन्तावलो हस्ती । द्विरदोऽनेकपो द्विपः । मतङ्गजो गजो नागः कुञ्जरो वारणः करी ॥ इभः स्तम्बेरमः पद्मीति ॥ हस्तः शुण्डोऽस्यास्ति । हस्तात् जातावितीनिः ॥ हस्तिनापुरस्य निर्माणकर्त्तरि सुहोत्रराजपुत्रे ॥ यथा । अथ तस्य सुहोत्रस्य पुत्रः सुहोत्राद्धस्तीति विष्णुपुराणम् । नारीभेद् कामुकीसम्मतगजराजगमना कुम्भकामुकी तनुपरवे हस्तिनोदतीति कालिकापुराणम् ॥

हस्तिनखः । पुं॰ अवरोधपाली । पूर्द्वारिमृत्कूटे । पुरद्वाराऽऽवरणार्थं सेतुमानमिव मृत्कूटे । दुर्गपुरद्वारसमीपे युद्धार्थं यदुन्नतमन्तः सोपानयुक्तमृत्कूटं यत्र स्थित्वा॰ विपक्षे पुरकोट्टादिकं क्षिप्यते तत्र हस्तिनखरूमन्ये । पूर्वं पुरद्वारि यद्भस्तिनखवत्स्तम्भं स्म नित्यमरः । हस्तिनीनखरूप । हस्तिनानखवत्तद्रुतिवा । खनुकवद्वारणे । अन्ये त्वपीतिरुः ॥

हस्तिनपुरम् ।
हस्तिनापुरम् । न॰ गङ्गातीरस्थे हास्तिनपुरे ॥ हस्तीनामराजा॰ तेन निर्मितत्वात् ॥

हस्तिनी । स्त्री॰ गजयोषायाम् । करिण्याम् ॥ धेनुकायाम् । वशायाम् ॥ भाद्रपदादौ हस्तिनीप्रसूतौ तद्दानम् हकालिदासः । भावीतदा पिकारभेकलभः करिण्याश्चेयं प्रसूयतद्धस्तिक्युक्तिभौ नभसि । अकाव्ये नरपतेर्विदिभूमिदेवे तद्दानमस्ति तदुपशमनायेत॰ इति ॥ नारीजातिविशेषे ॥ तल्लक्षणं यथा । स्थूलाधरस्थूलनितम्बभागा स्थूलाङ्गुली स्थूलकुचा सुशीला । कामोत्सुका गाढरतिप्रिया च नितम्बखर्वा खलु हस्तिनीसैति ॥ हट्टविलासिन्याम् । हस्तिशुण्ड्याम् ॥

हस्तिनीदुग्धम् । न॰ हस्तिन्याः क्षीरे ॥ तद्गुणा यथा । वृंहणं हस्तिनीदुग्धं मधुरं तुवरं गुरु । वृष्यं बल्यं हिमं स्निग्धं चक्षुष्यं स्थिरताकरमिति ॥

हस्तिलक्षणम्

हस्तिनीपुरम् । न० हस्तिनापुरे ॥

हस्तिपः । पुं० हस्तिपके ॥ हस्तिनं पाति । पा० । आतोनुपेतिकः ॥

हस्तिपकः । पुं० हस्त्यारोहे । आधोरणे । निषादिनि ॥ स्वार्थे कन् ॥

हस्तिपदः । पुं० हस्तिकन्दे ॥

हस्तिपर्णिका । स्त्री० राजकोषातक्याम् ॥

हस्तिपर्णी । स्त्री० राजकोषातक्याम् । मेनुषा० इ० भा०प्र० ॥ एर्वारौ । कर्कट्याम् ॥ मोरटायाम् ॥

हस्तिमदः । पुं० गजमदे । दाने ॥

हस्तिमल्लः । पुं० सुरद्विपे । ऐरावते । अभ्रमातङ्गे ॥ विनायके । विघ्नराजे ॥ शङ्खनागे ॥

हस्तिमुखः । पुं० गणेशे ॥ हस्तिवन्मुखं यस्य ॥

हस्तिरोहणकः । पुं० महाकरञ्जे ॥

हस्तिलक्षणम् । न० गजस्वरूपे ॥ तन्निरूपणं यथा । भद्रो मन्दो मृगो मिश्रश्चतस्रो गजजातयः ॥ तत्रादौ भद्रलक्षणम् । मध्वाभदन्ताः सुविभक्तदेहा न चोपदिग्धा न कृशाः क्षमाश्च । गात्रैः समैश्चापसमानवंशा वराहतुल्यैर्जघनैश्च भद्राः ॥ मन्दलक्षणं यथा । वक्षोऽथ कक्ष्यावलयः श्लथाश्च लम्बोदरस्त्वग्बृहती गलश्च । स्थूला च कुक्षिः सह मेचकेन सैंही च दृग्मन्दमतङ्गजस्य ॥ २ ॥ मृगसङ्कीर्णलक्षणन्तु । मृगास्तु ह्रस्वाधरबालमेढ्रास्तन्वङ्घ्रिकण्ठद्विजहस्तकर्णाः । स्थूलेक्षणाश्चेति यथोक्तचिह्नैः सङ्कीर्णनागा व्यतिमिश्रचिह्नाः ॥ ३ ॥ अथ तेषामुन्नतिदैर्घ्यपरिणाहानां प्रमाणमाह । पञ्चोन्नतिः सप्त मृगस्य दैर्घ्यमष्टौ च हस्ताः परिणाहमानम् । एकद्विवृद्धावथ मन्दभद्रौ सङ्कीर्णनागोऽनियतप्रमाणः ॥ अथ तेषां वर्णमदलक्षणमाह । भद्रस्य वर्णो हरितो मदश्च मन्दस्य हारिद्रकसन्निकाशः । कृष्णो मदश्चाभिहितो मृगस्य सङ्कीर्णनागस्य मदो विमिश्रः ॥ ५ ॥ गजानां शुभलक्षणान्याह । ताम्रोष्ठतालुवदनाः कलविङ्कनेत्राः स्निग्धोन्नताग्रदशनाः पृथुलायतास्याः । चापोन्नतायतनिगूढनिमग्नवंशास्तन्वेकरोमचितकूर्मसमानकुम्भाः ॥ ६ ॥ विस्तीर्णकर्णहनुनाभिललाटगुह्याः कूर्मोन्नतैर्द्विनवविंशतिभिर्नखैश्च । रेखात्रयोपचितवृत्तकराः सुवालाधन्याः सुगन्धिमदपुष्करमारुताश्च ॥ दीर्घाङ्गुलिरक्तपुष्कराः सजलाम्भोदनिनादबृंहणाः । बृहदायतवृत्तकन्धरा धन्या भूमिपतेर्मतङ्गजाः ॥ ८ ॥ अथाशुभलक्षणान् गजानाह । निर्मदाभ्यधि

कटीनमखाङ्गान् कुब्जवामनकमेष
विषाणान् । दृश्यकोषफलपुष्कर
हीनान् श्यावनीलशबलासिततालू
न् ॥ स्वल्पवक्त्ररुहमत्कुणषण्ढा
न् हस्तिनीश्च गजलक्षणयुक्ताम् । ग
र्भिणीश्च नृपतिः परदेशं प्रापयेदति
विरूपफलांस्ते ॥ १० ॥ अतिकुब्जा
दीनां लक्षणमितु । सङ्क्षिप्तवक्षो
जघनः पृष्ठमध्यसमुन्नतः । प्रमा
णहीनस्तनुभिः सकुब्जो वारणा
धमः ॥ नानाच्छायासंयुक्तोयो
लिङ्गस्तोभवेद्गजः । वामनः सस
माख्यातो भर्त्तुर्नार्थयशःप्रदः ॥
सर्वलक्षणसम्पूर्णो दन्तैस्तु परिवर्जि
तः । मत्कुणः ससमाख्यातः
सङ्ग्रामे प्राणघातकः ॥ पादयोः स
न्निकर्षः स्याद्यस्यनागस्य गच्छतः
। सङ्घट्टोऽध्वनियुक्तः षण्डलक्षणेन
पूजितः । अनन्ताभ्यधिकं यस्य वि
स्तारोगात्रनान्तरम् । त्रिकटः सवि
निर्दिष्टो दुर्गतिनिन्दितोगजः ॥
इति वाराह्यां ६२ अध्यायः ॥

हस्तिलोध्रः ।) पुं॰ लोध्रे ॥ इति
हस्तिलोध्रकः ।)
राजनिर्घण्टः ॥

हस्तिवाहः । पुं॰ अङ्कुशे ॥

हस्तिविषाणी । स्त्री॰ कदल्याम् ॥

हस्तिशाला । स्त्री॰ चतुरे । गजगृहे
पीलुस्थाने ॥

हस्तिशुण्डा ।) स्त्री॰ क्षुपविशेषे । ह
हस्तिशुण्डी ।)
स्तिन्याम् । भूरुण्ड्याम् । हाती
शुंड़ा॰ इ॰ गौ॰ भा॰ प्र॰ । अ
स्थिसंहारे ॥ यथा । वज्रवल्ल्यस्थि
संहारो हस्तिशुण्डी वनालिकेतिहा
रावली ॥

हस्तिश्यामाकः । पुं॰ हातिश्यामा
इतिगौडप्रसिद्धशस्ये ॥

हस्ते । अ॰ पाणौ ॥

हस्तेकरणम् । न॰ पाणिग्रहणे । वि
वाहे ॥

हस्त्यध्यक्षः । पुं॰ गजाध्यक्षे ॥ तल्ल
क्षणं यथा । हस्तिशिक्षाविधानज्ञो
वन्यजातिविशारदः । क्लेशक्षमस्त
थाराज्ञो हस्त्यध्यक्षः प्रशस्यते ॥ इ
तिमात्स्ये १८९ अध्यायः ॥

हस्त्यायुर्वेदः । पुं॰ हस्तिचिकित्सा
शास्त्रे । गजायुर्वेदे ॥

हस्त्यारोहः । पुं॰ हस्तिपके । निषा
दिनि ॥ तल्लक्षणन्तु । एतैरेवगु
णैर्युक्तः स्थानासनविशेषतः । ह
स्त्यारोहोनरेन्द्रस्य सर्वकर्मविशस्य
तेइतिमात्स्ये १८९ अध्यायः । ए
तैर्हस्त्यध्यक्षगुणैः ॥ हस्तिनमा
रोहति । रुहेः कर्मण्यण् ॥

हस्त्यालुकम् । न॰ कुञ्जरालुके । दी
र्घतायुक्ते महाशरीरे कन्दविशेषे ।

हस्रः । त्रि॰ मूर्खे । हसति । हसि॰

। स्फायितशोणितवत् ॥

हहलम् । न० हालाहले ॥ इ० श० चं० का ।

हहः । पुं० हाहानामगन्धर्वे ।

हा । अ० विषादे ॥ शुचि । शोके ॥ आर्त्तौ । पीडायाम् । दुःखे । कुत्सायाम् ॥ विस्मये ॥ आर्त्तौ ॥ जहाति । पीडाक्षयेऽगे ॥ क्विप् ॥ यथा । प्रारब्धव्ये नियोगी आगतव्येप्रमुग्धाः । विस्मृतव्यो भवस्यावेहानरः शोकहतः ॥

हाकलि : । स्त्री० मात्राछन्दप्रभेदे ॥ लक्षणन्तु । द्विजगणसगणभगणका लितामत्तचतुर्दशकलकलितः । अन्तेगुरुमुपधायददाकलिरेषाभवतितदा ॥ यथा । कौमुदकुमुदवध्रूवदनास्मितपीयूषसमिनमदना । चपलविलोचनभिलषरमौहरति नयाम्ममयनस्मरको ॥

हाडः । पुं० शिवस्यपार्श्वदभे ॥

हाटकः । पुं० न० स्वर्णे । हेमनि । काश्मनि । हटति । हटदीप्तौ । ण्वुल् ॥ हाटकनिभाः । धनूरे । त्रि० स्वर्णनिर्मिते ॥

हाटकीशः । पुं० पातालाधिपतीश्वरे ॥ हाटकाख्यपातालविशेषस्यईशः ॥

हाटकेश्वरः । पुं० गौड़ावरीतीरस्थे शिवविशेषे ॥

हातव्यः । त्रि० त्यक्तव्ये ॥ यथा । बीभत्स्यविषयाज्जुगुप्सिततमः कायोऽदयोगास्थरप्रायोबन्धुभिरध्वनीव पथिकैर्योगोवियोगावहः हातव्यो यमसारपथविरसः संसारइत्यादि कंसव सत्यैविविवचैतसिपुनः कस्यापिपुण्यात्मनः ॥

हानम् । न० गतौ । वेतने ॥ प्रमथने ॥ पुं० राक्षसे ।

हानम् । न० त्यागे । उत्सर्गे ॥ आकस्मिकोपरमे ॥

हानि : । स्त्री० अल्पत्वे ॥ अपचये । क्षतौ ॥ आयुषः खण्डशोऽपि न लभ्यः स्वर्णकोटिभिः । सचेन्निष्फलतां याति का नो हानिस्ततोऽधिका ॥ विनाशे ॥ हानम् । ओहाक्त्यागे । ग्लाम्लाहाभ्योनिः ॥ यद्वा । हीयते । ओहाक् । विहि शिक्षयुद्रग्लाहात्वरिभ्योनिदिति निः ॥

हानुः । पुं० दन्ते ॥ इति शब्दमुक्तावली ॥

हाम्बम् । न० मृतौ । मरणे ॥ हम्बि । हन० । भसन्निगतिनमिभ्योम्बः । इति ऊन् ।

हापनीयः । त्रि० वक्तुं योग्ये ।

हापितः । त्रि० वर्जिते । हानिङ्गमिते ॥

हापुत्रिका ।) स्त्री० पक्षिविशेषे ॥
हापुत्री ।)

तत्पर्य्याया यथा । अथ सर्षपौ॰ खञ्जनिका तुलिका॰ स्फोटिकेति च काण्डशेषः ॥ गोभण्डीरः वक्रकीरो हापुत्री राजभट्टिकेति हारावली ॥

हाफिका । स्त्री॰ जृम्भणे । जृम्भायाम् । उपपुष्पिकायाम् । जम्भाई॰ ई॰ भा॰ ॥

हायनः । पुं॰ वर्च्चिषि । ज्वालि । वह्नेः शिखायाम् ॥ व्रीहिप्रभेदे । नीवाराद्याविति मुकुटः । षष्टिकादिरिति स्वामी । शालिजातिविशेषे॰ इति भिषक् ॥ पुं॰ न॰ संवत्सरे । शरदि । वर्षे ॥ जहातित्यमत्युदकम् । ओहाक् त्यागे । भावान् जिहीतेर्व्याप्नोति वा । ओहाङ् गतौ । हश्वश्रीहिकालयैरित्युभयतण्युट् ।

हारः । पुं॰ मुक्तावली । मुक्तादामनि । युधि । सङ्ग्रामे । संयुगे । गुरुवर्णे॰ऽ॰ ॥ सुयोधधानरस्यश्वशुरे । न॰ हरेश्चरिते ॥ त्रि॰ मनोहरे । मनो ह्रियतेऽनेन । हृञ्॰ । घञ् ॥ यद्वा । हारयति मनः । स्वार्थण्यन्तादच् ॥ हरणम् । भावे घञ् ॥

हारकः । पुं॰ कितवे । चौरे ॥ गद्यभेदे ॥ विज्ञानविशेषे ॥ शाखोटवृक्षे ॥ भालाङ्के ॥ त्रि॰ हरणकर्त्तरि । हरति । हृञ्॰ । ण्वुल् । ह्रियते । बाहुलकात्कर्म्मणि वा ण्वुल् ॥

हारहारा । स्त्री॰ कपिलद्राक्षायाम् ॥

हारहूरम् । न॰ मद्ये । पुं॰ हेमचन्द्रः ॥

हारहूरा । स्त्री॰ द्राक्षायाम् ॥

हारहूरका । स्त्री॰ गोस्तन्याम् ॥

हारावली । स्त्री॰ पुरुषोत्तमकृतकोषविशेषे ॥ हारपङ्क्तौ ॥

हारिः । स्त्री॰ पथिकसन्तौ । पथिकपङ्क्तौ ॥ द्यूतादौ पराजये ॥ त्रि॰ मनोज्ञे । रुचिरे । शुभे । हरति । हृञ्॰ । बाहुलकादिञ् ॥

हारिकण्ठः । पुं॰ कोकिले ॥ त्रि॰ हारान्वितगले ॥

हारिणिकः । पुं॰ मृगयौ ॥ हरिणान् हन्ति । पक्षिमत्स्यमृगान् हन्तीति ठक् ॥

हारिणी । स्त्री॰ अत्यष्टिच्छन्द १७ प्रभेदे ॥ तल्लक्षणन्तु । वेदत्वैश्वैर्म्भनमयलागश्चेत्तदा हारिणी । यथा । यस्यानित्यं स्तनकलशयोर्ग्गालिनीहीचनेरागः स्तीयोऽधरकिसलयेलाक्षारसास्वादनम् । गौरीकान्ति प्रकृतिरुचिरा रम्याङ्गरागच्छटा सा कांसारिजानकथरा धाम मे हारिणी ॥ हारवत्याम् ॥

हारितः । पुं॰ पक्षिविशेषे । हारी

ते ॥ हारमित : ॥

हारितक्रम् । न० शाके ॥

हारिद्र : । पुं० कदम्बवृक्षे । नीपे ॥ विषविशेषे ॥ यथा, हारिद्रातुल्य मूलो योहारिद्र : समुदाहृत : ॥ हरिद्रावर्णे ॥ त्रि० हरिद्रारञ्जिते ॥ हरिद्रयारक्तम् । हरिद्रामहारजना भ्यमञ् ॥

हारिद्रव : । पुं० मैत्रायणीयानांशाखा प्रभेदे ।

हारिद्रुमत : पुं० गौतमगोत्रेमुनिवि शेषे ॥ हरिद्रुमतोऽपत्यम् । अण् ॥

हारी । त्रि० हारविशिष्टे ॥ हारोस्त्य स्य । इनि : ॥ हर्त्तरि ॥ अवश्यं ह रति । हृञ् । णिनि : ॥

हारी । स्त्री० मौक्तिके । यथा । मुक्ता मुक्ताफलंशुक्तिबीजंहारीचमौक्तिक मितिशब्दरत्नावली ॥

हारीत : । पुं० धर्मशास्त्रप्रवर्त्तकेमु निविशेषे ॥ कैतवे । छद्मनि ॥ पक्षि विशेषे । हरितोहारीतलटुतिलो कप्रसिद्धे ॥ अस्यमांसगुणायथा । हारीतोरूक्षउष्णः स्याद्रक्तपित्तक फापह : । स्वेदस्वरकर : प्रोक्तश्चव ह्निकरस्तथा ॥ हारीतोरक्तपीतः स्याद्धारितोऽपिसकथ्यते ॥ हारी मीत : ॥ हारोस्त्यस्मिन् यद्वा । हृ निः । हारिमनोहरमितं गमनम स्य ॥ यद्वा । हारयति । क्विप् । ए

तिस्म । इंगतौ । गत्यर्थेतिक्त : । हारयासावीतश्च ॥

हारीतक : । पुं० हारीतखगे ॥ स्वा र्थेक : ॥

हार्द्दम् । न० प्रेमणि । स्नेहे ॥ अ भिप्राये ॥ हृदयस्यकर्म । युवादि त्वात् । हायनान्तयुवादिभ्योऽणित्य ण् । हृदयस्यहृल्लेखेतिहृदादेश : ॥ हृदमर्यण् वा ॥

हार्द्दी । त्रि० स्नेहवति ॥

हार्य्य : । पुं० कलिद्रुमे । विभीतके । हरणीयाङ्गे । भाज्ये ॥ शरणे ॥ त्रि० हर्त्तव्ये ॥ हर्त्तुंयोग्य : । हृ ञ् । ऋहलोर्ण्यत् ॥

हाल : । पुं० बलदेवे ॥ शालिवाह नभूपतौ ॥ हले ॥ हलति । ह लविलेखने । ज्वलितिकसन्तेभ्यो ण : ॥

हालक : । पुं० पीतहरितवर्णाश्वे ।

हालहलम् । न० पुं० हालाहलेविषे ॥ हालेहलति० जठरम् । हल० । पचाद्यच् । हलमिवहलतिवा । अच् । पृषोदरादि । मधुतिष्ठति वाचियोषितांहृदयेहालहलमेवहि षम् । अतएवनिपीयतेऽधरोहृदयं मुष्टिभिरेवताड्यते ॥

हालहाल : । पुं० म० हालाहले ॥

हाला । स्त्री० सुरायाम् । बलदेवप्रि यायाम् । वरुणात्मजायाम् ॥ ह

लब्धम् । हल॰ । ज्वलतीतिणः ॥ हल्यतेऽनयासा । हलस्येतिघञ् ॥ हालाहलंहन्तिचैकं हालातु सामगीरुपम् । तालमद्यं ॥

हालास्थानम् । न॰ चिदम्बराभिधेदेश्याः स्थानि ॥

हालाहलः । पुं॰ न॰ विषप्रभेदे । तत्स्वरूपन्तु । गोस्तनाभफलोगुच्छस्तालपत्रच्छदस्तथा । तेजसायस्यदह्यन्ते समीपस्थाद्द्रुमादयः किष्किन्धायांहिमालये । दक्षिणाब्धितटेदेशेकोङ्कणेपिचजायते ॥ हालेनवाहलति । हल॰ पचाद्यच् ॥ हालाहलोनैवविषं विषं रमादरं जनाव्यत्ययमेवमन्वते । येनगेनजागर्त्तिनिपीयतंचिवः सुखन्तरांमुह्यतिनिद्रयाहरिः ॥

हालाहलः । पुं॰ कीटविशेषे । चञ्चुनिकायाम् । कुटिलकीटके ॥

हालाहलधरः । पुं॰ सर्प्पे । हालाहलस्यधरोधारकः ॥

हालाहला । स्त्री॰ चञ्चुनिकायाम् । गिरिकायाम् । बालमूषिकायाम् ॥

हालाहली । स्त्री॰ मदिरायाम् ॥

हालिकः । पुं॰ कर्षकृषके । सैरिके । हलेनखनति । तेनदीव्यतिखनतीतिठक् ॥ हलंवहति॰ हलस्यायंवा । हलसीराट्ठक् ॥

हालिनी । स्त्री॰ स्थूलपल्ल्याम् ॥

हाली । स्त्री॰ कनिष्ठशालिकायाम् । यथा । कनिष्ठाश्यालिकाहालीयम्भिकाकेलिकुञ्चिकेतिहेमचन्द्रः ॥ मदिरायाम् ॥

हालुः । पुं॰ दन्ते ॥

हावः । पुं॰ आह्वाने । स्त्रीणांविलासादौ । नारीणांशृङ्गारभावसूक्रियासु । यथा । स्त्रीणांविलासोविव्वोको विभ्रमोललितं तथा । हेलालीलेत्यमीहावाः क्रियाशृङ्गारभावजाः ॥ शृङ्गारात्॰ रत्यादेः॰ भावान्मनोविकाराज्जाताः क्रियाश्चेष्टाश्चशृङ्गाराख्याविलासादिकाहावशब्दवाच्यादृत्यर्थः ॥ हवनम् । हुदानादनयोः । कश्चिदपवादविषयेव्युत्सर्गोऽभिनिविशते॰ दृश्यवविषयेघञ् । इतिशब्दः प्रकारे । तेनान्येपिवोध्याः । लीलाविलासोविच्छित्तिर्विभ्रमः किलकिञ्चितम् । मोट्टायितंकुट्टमितविव्वोकोललितंतथा । विहृतञ्चेतिमन्तव्यादशस्त्रीणांस्वभावजाइति ॥ हूयन्तेरागिणोऽनेनेतिहावः । यद्वाहूयन्तेरागिणः कामाग्नावनेनेतिहावः । अधिकरणेकरणेवाघञ् ॥ यथोक्तम् । युवानोऽनेनहूयन्ते नारीभिर्मदनानले । अतोनिरुच्यतेहावस्तेविलासादयोमताइति ॥ हाक

ऽङ्गवायतिशोषयति वेशोषणे । डः ॥

हासः । पुं० हास्ये ॥ हसनम् । हसे हसने । स्वनहसोर्वेतिपक्षे घञ् ॥ प्रकाशे ॥

हासिका । स्त्री० हासे । हासो० द्र० भा० ॥ हसे० । धात्वर्थनिर्देशे ण्वुल् । प्रकाशे ॥

हास्तिकम् । न० गजतायाम् । करिसमूहे ॥ हस्तिनांसमूहः । अचित्तहस्तिधेनोष्ठक् ॥ हस्तिनीनांसमूहो वा ॥ भस्याढेतद्धितेपुंवद्भावः ॥ त्रि० हस्त्यारोहे ॥ हस्तिनाचरति० गच्छति । चरतीतिठक् ॥

हास्तिनम् । न० हस्तिनापुरे ॥ हस्तिदघ्न । गजपरिमाणे ॥ हस्तिप्रमाणमस्य । पुरुषहस्तिभ्यामण् चेत्यण् । द्वनण्यनपत्येतद्धितप्रकृतिभावः ॥

हास्तिनपुरम् । न० हस्तिनापुरे ॥

हास्तिनायनः । पुं० हस्तिनोगोत्रापत्ये ॥ नडादित्वात्फक् । हास्तिनायनेतिटिलोपाभावः ॥

हास्यम् । न० रसविशेषे । हसे हासे । यथा । विकृताकारवाग्वेशचेष्टादेः कुहकाद्भवेत् । हास्योहासः स्थायिभावः श्वेतः प्रथमदैवतः ॥ विकृताकारवाक्चेष्टं यदालोक्यहसेज्जनः । तदत्रालम्बनंप्राहुस्तच्चेष्टोद्दीपनंमतम् ॥ अनुभावो

क्षिसङ्कोचवदनस्मेरतादिकः निद्रालस्यावहित्याद्या अत्रस्युर्व्यभिचारिणः ज्येष्ठानांस्मितहसितेमध्यानांविहसितावहसितेच । नीचानामपहसितं तथातिहसितंस्तथषड्भेदाः ॥ ईषद्विकासिनयनंस्मितंस्यात्स्पन्दिताधरम् । किञ्चिल्लक्ष्यद्विजंतत्रहसितंकथितंबुधैः । मधुरस्वरंविहसितंसांशशिरःकम्पमवहसितम् । अपहसितंसास्राक्षंविक्षिप्ताङ्गंभवत्यतिहसितम् । हसे० । ऋहलोर्ण्यत् ॥ त्रि० परिहसनीये ॥

हाहलम् । न० हालाहले ॥

हाहा । अ० विस्मये । शोके ॥

हाहाः । पुं० गन्धर्वविशेषे ॥ हाहाहूहूश्चैवमाद्यागन्धर्वास्त्रिदिवौकसमित्यमरः । हाहूतिशोकव्यञ्जकशब्दंजहाति । ओहाक्त्यागे । विच् । असिद्धः । अन्युत्पत्तिपक्षे० असि० हाहान् । आतोधातोरित्यस्याप्रवृत्तेः ॥

हाहाकारः । पुं० शोकध्वनौ ॥ हाहाशब्दे । हाहाकरणम् । भावेघञ् ॥

हाहालम् । न० हालाहले ॥

हाहाः । पुं० देवगन्धर्वे ॥ सान्तोयम् । गन्धर्वोहाहसिप्रोक्तोगन्धर्वोगायनेपिचेतिसान्तसाङ्कः । गन्धर्वप्रीतिहासोरितिशापकृतिः ॥

हाहाहूहू : । पुं॰ गन्धर्वे ॥

हि । अ॰ पादपूरणे ॥ हेतौ । विशेषे । अवधारणे । प्रश्ने । हेत्वपदेशे । सम्भ्रमे ॥ असूयायाम् ॥ अप्यर्थे ॥ विषादनुभवप्रसिद्धौ । हिनोति । हि गतौ । विच् । संज्ञापूर्वकत्वान्न गुणाभावः । चिपितुगभावोऽथवा । भावेऽप्रत्ययौ ॥

हिंसकः पुं॰ व्याघ्रे । हिंस्रपशौ । अथर्ववेदज्ञब्राह्मणे ॥ शत्रौ ॥ त्रि॰ हिंसाकर्त्तरि । नृशंसे । घातुके ॥ हिनस्तीति हिंसकः । हिसि हिंसायाम् । निन्दहिंसक्लिशेति वुञ् ॥ शरणागतबालस्त्रीहिंसकान्संवसेन्नतु । चीर्णव्रतानपि सदा कृतघ्नसहितानिमान् ॥

हिंसा । स्त्री॰ चौर्यादिकर्मणि ॥ आदिनावधनाशताडनादीनां ग्रहः । घाते । वधे । अथास्याः प्राणिवधे ॥ साक्षात्कारितानुमोदितभेदेन त्रिविधा । कायवाङ्मनोभिः प्राणिनां पीडने । प्राणवियोगच्छेदे । स्वाभिप्रायप्रकटने अपरवित्तच्छेदने ॥ कायक्लेशं मनोदुःखं वधं वा प्राणिनां तु यः । प्रवर्त्तयति तत्सा हिंसेति समासतः । इति देवलः ॥ हिंसनम् । हिसि॰ । गुरोश्च हलः ॰ टाप् ॥ एतेगुरावरण्ये वानिवसन्नात्मवानृद्विजः । नाऽवेदविहितां हिंसामापद्यपि समाचरेत् ॥ कथं तर्हि तुल्ये हिंसात्वे वैदिकीदोषा- दिशुद्धिं सा ना धर्माय इत्यत आह । यावेदविहिता हिंसा नियतास्मिंश्चराचरे । अहिंसामेव तां विद्याद्वेदाद्धर्मो हि निर्बभौ । इति मनुः ॥ या श्रुतिविहिता कर्मविशेषदेशकालादिनियता । अस्मिन् जगति स्थावरजङ्गमात्मनि॰ अहिंसामेव तां जानीयात्॰ हिंसाजन्याधर्मविरहात् । दैवपशुहननम्॰ अधर्म॰ प्राणिहननत्वात्॰ ब्राह्मणहननवदित्याद्यनुमानम्॰ उपजीव्यशास्त्रबाधादेवनप्रवर्त्तते । दृष्टान्तीकृतब्राह्मणहननस्याप्यधर्मत्वे । शास्त्रमेवोपजीव्यम् । वेदाद्धर्मो हि निर्बभौ । यस्मादनन्यप्रमाणको धर्मो वेदादेव निःशेषेण प्रकाशतां गत इति कुल्लूकभट्टः ॥ यज्ञार्थं ब्राह्मणैर्वध्याः प्रशस्ता मृगपक्षिणः । भृत्यानाञ्चैव वृत्त्यर्थमगस्त्यो ह्याचरत्पुरा ॥ बभूवुर्हि पुरोडाशा भक्ष्याणां मृगपक्षिणाम् । पुराणेष्वपि यज्ञेषु ब्रह्मक्षत्रसवेषु च ॥ इति मनुः ॥ पुरातनेष्वपि ऋषिकर्त्तृकयज्ञेषु भक्ष्याणां मृगपक्षिणां मांसैः पुरोडाशा अभवन् । तस्मात्॰ यज्ञार्थमधुनातनैरपि मृगपक्षिणो वध्या इति कुल्लूकभट्टः ॥

हिंसाकर्म्म । न० अथर्ववेदोक्तमन्त्रयन्त्रादिनिष्पादितमारणोच्चाटनादिक्रियायाम् । अभिचारे ॥ हिंसाफलं कर्म्म । शाकपार्थिवादिः ॥

हिंसात्मकः । त्रि० हिंसास्वभावे ॥

हिंसारुः । पुं० व्याघ्रे ॥

हिंसालुकः । पुं० खादुकशुनि । कटखना० खाणया० कुत्ताइ० भा० ॥

हिंसितः । त्रि० प्राप्तहिंसे । हिंसां प्राप्ते ॥ यथा । यस्तु कन्यां पिता दद्यात् स्वाम प्रयच्छति तां तु नः । अष्टौ पितृगणास्तेन हिंसिता नात्र संशयः ॥ इ० वाराहपु० ॥

हिंसीरः । पुं० व्याघ्रे ॥ त्रि० खले । दुष्टे । हिनस्ति । हिंसि० । हिंसीरज्जीरचौ । स्वरभेदः ॥

हिंस्रः । पुं० घोरे ॥ भीमसेने ॥ हरे ॥ त्रि० हिंसाशीले । शरारौ । घातुके ॥ हिंस्राणां हिंसने दोषाभावो यथा । कृपा कार्य्या सतां शश्वद् हिंस्रेषु च जन्तुषु । हिंसायां नहि दोषश्च हिंस्राणां सुव्रजेश्वर । इ० ब्र० वै० कृ० जन्मखण्डे ८५ अध्यायः ॥ हिनस्ति । हिंसि० । नमिकम्पिस्म्यजसकमहिंसदीपो रः ॥

हिंस्रकः । पुं० हिंस्रपशौ । व्याडे ॥ स्वार्थे कः ॥

हिंस्रपशुः । पुं० हिंसकजन्तौ । व्याडे । हिंसके ॥

हिंस्रा । स्त्री० हीस० इ० भा० प्र० वचे । काकादन्याम् ॥ जटामांस्याम् ॥ वसायाम् ॥ हिनस्ति । हिंसि० । रः । टाप् । इगवेडुकायाम् ॥ नाड्याम् ॥

हिक्का । स्त्री० ऊर्द्ध्ववातप्रवृत्तौ शब्दविशेषे ॥ रोगोपसर्गविशेषे ॥ रोगविशेषे ॥ अस्याविप्रकृष्टनिदानमाह । विदाहिगुरुविष्टम्भिरूक्षाभिष्यन्दिभोजनैः । शीतपानाशनस्थानरजोधूमैस्तथानिलैः ॥ व्यायामकर्म्मभाराध्ववेगाघातापतर्पणैः । हिक्काश्वासश्च कासश्च नृणां समुपजायते ॥ अपतर्पणम् । अनशनादि । सम्प्राप्तिमाह । वायुः कफेनानुगतः पञ्च हिक्काः करोति हि । अन्नजां यमलां क्षुद्रां गम्भीरां महतीं तथा ॥ सामान्यलक्षणन्तु । मुहुर्मुहुर्वायुरुदेति सस्वनो यकृत्प्लिहान्त्राणि मुखादिवाक्षिपन् । सदोषवानाशु हिनस्त्यसून् यतस्ततस्तु हिक्केत्यभिधीयते बुधैरिति ॥ हिनस्तीति हिक्का । पृषोदरादित्वात् रूपसिद्धिः । हिगिति कायति । शब्दं करोतीति वा ॥ हिक्कनम् । हिक्क अव्यक्ते शब्दे । गुरोश्च हलः । टाप् ॥ यद्वा । हिक्कयते । हिक्क हिंसाम् । पचाद्यच् ॥

हिक्कारः । पुं० सामभक्त्यन्तरे । पाश्च

भक्तिकस्य नाम्नः प्रथमायाम् भक्तौ ॥

हिङ्गु । न० मूलविशेषस्य निर्यासे धूपनी ॥ अस्य पर्यायो गुणाश्च यथा । सहस्रवेधि जतुकं बाह्लीकं हिङ्गु रामठम् ॥ हिङ्गूष्णं पाचनं रुच्यं तीक्ष्णं वातबलासहृत् । रसे पाके च कटुकं स्निग्धं सर्वाग्निदीपनम् ॥ शूलगुल्मोदरानाहकृमिघ्नं पित्तवर्द्धनमिति ॥ हिनोति । हिगतौ वृद्धौ च । हिंसां गच्छतिवा । मृगय्वादिः ॥ वंशपत्र्याम् ।

हिङ्गुनाडिका । स्त्री० नाडीहिङ्गुनि । रामठ्याम् ॥

हिंगुनिर्य्यास : पुं० निंबवृक्षे ॥ हिङ्ग्वाकारो० हिङ्गुगन्धो वा निर्य्यासो यस्य ॥ हिङ्गुरसे ॥

हिङ्गुपत्र : । पुं० इङ्गुदीवृक्षे । हिंगोटा इ० भा० प्र० ॥ हिङ्गुन : पत्रमिव पत्रं यस्य ॥

हिङ्गुपत्री । स्त्री० कारव्याम् । पृथ्वीकायाम् । त्वक्पत्र्याम् ॥ अस्या गुणा यथा । हिङ्गुपत्री भवेद्रुच्या तीक्ष्णोष्णा पाचनी कटुः । हृद्वस्तिरुग्विबन्धार्शःश्लेष्मगुल्मानिलापहा ॥ हिङ्गुपत्रमिव पत्रमस्याः ॥ हिङ्गुन : पत्रे ॥

हिङ्गुपर्णी । स्त्री । वंशपत्र्याम् ॥

हिङ्गुल : । पुं० न० कुरुविन्दे । हंसपादे ॥ अस्य नामानि० लक्षणानि० गुणाश्च यथा । हिङ्गुलं दरदं म्लेच्छं चित्रासं चूर्णपारदम् ॥ दरदस्त्रिविधः प्रोक्तश्चर्म्मारः शुकतुण्डकः । हंसपादस्तृतीयः स्याद्गुणवानुत्तरोत्तरः ॥ चर्म्मारः शुक्लवर्णः स्यात् सपीतः शुकतुण्डकः । जपाकुसुमसङ्काशो हंसपादो महोत्तमः ॥ तिक्तं कषायं कटु हिङ्गुलं स्यान्नेत्रामयघ्नं कफपित्तहारि । हृल्लासकुष्ठज्वरकामलांश्च प्लीहामवातौ च गरं निहन्ति ॥ ऊर्द्ध्वपातनयुक्त्या तु कृष्टमस्य प्रपाचितम् । हिङ्गुलं तस्य सूतं तु शुद्धमेव न शोधयेत् ॥ शोधनविधिस्तु । मेषीक्षीरेण दरदमम्लवर्गैश्च भावितम् । सप्तधारातपे यत्नाच्छुद्धिमायाति निश्चितम् ॥ शोधितस्य गुणास्तूक्तास्तिक्तं कषायमित्यादिना ॥ हिङ्गुलाद्रसाकर्षणविधिर्यथा । निम्बूरसैर्निम्बपत्ररसैर्वा याममात्रकम् । घृष्ट्वा दरदमूर्द्ध्वन्तु पातयेत् सूतयुक्तिवत् । तत ऊर्द्ध्वपिठरीलग्नं गृह्णीयाद्रसमुत्तमम् । शुद्धमेव हितं सूतं सर्वकर्म्मसु योजयेत् ॥ इ० भा० प्र० म : । सिन्दूरे ॥

हिंगुला । स्त्री० देशविशेषे । यथा । अस्मिन्नृपं हिंगुलायां भैरवो भीमलोचनः । कोट्टवी सा महामाया त्रिगुणा या दिगम्बरी ॥ इति मन्त्रचूडा

महीपीठमाला ॥ वामनपुराण
मपि यथा । कन्याश्चैताः खेदसम्भा
तास्तास्त्वलिलिङ्गिरे तदा । ततस्ता
माह शालाकः प्रभामैश्वरमूर्त्तिमान्
शङ्करो वरदोऽसि कश्ये योर्थाय चोम
हत् त्वां पूजयिष्यन्ति सुराश्चर्षयः
पितरस्तथा ॥ यच्चहिस्याधरास्त्वैव
मानवांश्च शुभङ्करि । त्वांस्तोष्यन्ति स
दा देवि बलिपुष्पोत्करैः करैः ।
चर्चिकेति शुभं नाम यस्माद्रुधिरच
र्च्चिता । इत्येवमुक्ता वरदेन चर्च्चि
काभूतानुयाता हरिचर्मवासिनी-
महीसमस्ता हिचचारसुन्दरी स्थलं ग
ता हैङ्गुलमाद्यमुत्तममिति ॥

हिंगुलि: । पुं॰ हिंगुलौ ।

हिंगुलिका । स्त्री॰ कण्टकार्य्याम् ।
भण्टाक्याम् ।

हिंगुली । स्त्री॰ वार्त्ताक्याम् । सिं
ह्याम् । भण्टाक्याम् । हिंगुला
ति । ला॰ । आतोऽनुपेति कः ।
गौरादित्वात् ङीष् । बृहत्याम् ।
कण्टकार्य्याम् ॥

हिंगुलुः पुं॰ न॰ रङ्गद्रव्यविशेषे
। यथा । दारदन्तु हिंगुलुः स्याद्धि
ङ्गुलं रक्तपारदमिति त्रिकाण्डशे-
षः ।

हिंगुशाटिका । स्त्री॰ वंशपत्र्याम् ।

हिंगूलम् । न॰ चालुविशेषे । मधुमू
ले । मौचालू॰ इ॰ गौ॰ दे॰
भा॰ प्र॰ ॥

हिज्ज: । पुं॰ हिज्जले ।

हिज्जल: । पुं॰ इज्जले । निचुले ।
जलवेतसविशेषे ॥ यथा । इज्जलो
हिज्जलश्चापि निचुलश्चाम्बुजस्तथा ।
जलवेतसवद्ज्ञेयो हिज्जलोऽयं विशाप
ह: । इति भावप्रकाश: ॥ हिनो
ति हिगतौ वृद्धौ च । क्विप् ।
हित् जलमस्य ॥ स्थलवेतस इत्यन्ये
॥ समुद्रफलेति ख्यात इत्यपरे ॥

हिञ्जीरः । पुं॰ हस्तिपादबन्धे । नि
गडे । अन्दुके । इति हेमचन्द्रः ॥

हिडम्ब: ।) पुं॰ असुरविशेषे ।
हिडिम्ब: ।)

हिडिम्बजित् ।)
हिडिम्बनिसूदन: ।) पुं॰ भीमसेने ।
हिडिम्बभित् ।)

हिडिम्बा । स्त्री॰ हिडिम्बासुरभगि
न्याम् ।

हिडिम्बापति: ।)
हिडिम्बारमण: ।) पुं॰ हनूमति ।
रामदूते । अर्जुनध्वजे ॥

हिण्डनम् । न॰ भ्रमणे । रते ॥ या
ने ॥ क्रीडायाम् ॥
हिडिगत्यनादरयोः । ल्युट् ॥

हिण्डक: । पुं॰ लग्नाचार्य्ये ।

हिण्डिर: । पुं॰ हिण्डीरे ।

हिण्डी । स्त्री॰ शिखरवासिन्याम् ।
। दुर्गायाम् । इ॰ चि॰ शेषः ॥

हिण्डीप्रियतम : । पुं॰ शिवे ॥

हिण्डीर : । पुं॰ समुद्रफेने । अब्धिकफे । फेने । हिण्डीति शब्दमीरयति । ईरगतौ कम्पने च । पचाद्यच् । अथवा ॥ यद्वा । हिण्डते इतस्ततो गच्छति । हिडि॰ । बाहुलकादीरन् ॥ वार्त्ताकौ ॥ पुरुषे ॥ रुचके । अनलङ्गके ॥

हितम् । न॰ पथ्यवाक्ये । परिणामे सुखकरवाक्ये । त्रि॰ पथ्ये । उत्तरकालेष्टफलवति । अनुकूले ॥ गते ॥ धृते ॥ आप्ते । उपकर्त्तरि ॥ डुधाञ : क्त : । दधातेर्हि : ॥ अङ्गणे ॥

हितक : । पुं॰ शिशौ ।

हितकारी । त्रि॰ मङ्गलकारके ॥

हितप्रणी । पुं॰ चारे । हिते ॥

हितावली । स्त्री॰ औषधविशेषे । अङ्गारकुष्ठके ।

हितैषी । त्रि॰ हितार्थिनि । हितेच्छाकारिणि ॥ हितमिच्छतीति णिनि ॥ विमलं कलुषीभवच्च चेत : कथयत्येव हितैषिणं रिपुं च ॥

हितोक्ति : । स्त्री॰ पथ्यवचने ॥

हितोपदेश : । पुं॰ सत्परामर्शदाने । विष्णुशर्म्मकृतनीतिग्रन्थविशेषे

हिन्ताल : । पुं॰ वृक्षविशेषे । अस्य पर्यायगुणा यथा । हिन्ताल : स्थूलतालश्च वस्त्रपत्रोऽहल : । स्थिरपत्रो हि धालेख्य : स्थिरापत्रो स्थिराच्छद : । गर्भस्रावी मीलतालो भीषणो वृक्षनाटक : । अस्य सारो हन्ताल : स्वाद्वम्लगर्भाभिध : ॥ हिन्तालो मधुराम्लश्च कफकृत् पित्तदाहनुत् । अमदश्चापह : रोचकश्च शिरोवातदोषकृत् । इत्यराजविशेषायम् । अथ वसिष्ठ : । शुभा ताल हिन्तालास्तथा नारिकेलको । खर्जूरनारिकेलौ च समे ते तृणराजका इति । पुनर्वीटस्तु हिन्ताल : कौमारिविरटि तत्फलमिति चिकाण्डशेष : ॥ हीनोऽल्पस्ताल : । पृषोदरादि : ॥

हिन्दु : । पुं॰ कलौ । साम्प्रदायिकानां चतुर्वर्णानां संज्ञेयम् ॥ यथोक्तं मेरुतन्त्रे २३ प्रकाशे । पश्चिमाम्नायमन्त्रास्तु प्रोक्ता : पारस्यभाषया । अष्टोत्तरशताशीति येषां संसाधनात् कलौ ॥ पञ्चखाना : सप्तमीरा नव साहा महाबला : । हिन्दुधर्मप्रलोप्तारो जायन्ते चक्रवर्त्तिन : । हीनञ्च दूषयत्येव हिन्दुरित्युच्यते प्रिये । पूर्वाम्नाये नवशतं षडशीति : प्रकीर्त्तिता : । फिरङ्गभाषया मन्त्रास्तेषां संसाधनात् कलौ । अधिपा मण्डलानाञ्च संग्रामेष्वपराजिता : । इङ्गरेजा नव षट् पञ्च लण्डजाश्चापि भाविन : ॥

हिन्दोल: । पुं॰ श्रावणशुक्लपञ्चविहितभगवद्यात्राविशेषे । दोलयात्रेति प्रसिद्धे । षड्रागान्तर्गतरागविशेषे ॥ यथा । भैरव: कौशिकश्चैव हिन्दोलोदीपकस्तथा । श्रीरागोमेघरागश्चषडेतेपुरुषाह्वयाइति ॥

हिन्दोलक : । पुं॰ रागविशेषे । दोलायाम् । प्रेङ्खायाम् ॥

हिन्दोलनम् । न॰ दोलने ॥

हिन्दोला । स्त्री॰ दोलिकायाम् ॥

हिबुकम् । न॰ लग्नाच्चतुर्थभवने ॥

हिम : । पुं॰ चन्दनतरौ ॥ कर्पूरे ॥ चन्द्रे । हेमन्तर्तौ ॥ हिमालयपर्वते ॥ च॰ खवाष्पे । रजनीजले ॥ तत्पर्यायायथा । अवश्यायस्तुनीहारस्तुषारस्तुहिनं हिमम् । प्रालेयं मिहिकेति ॥ चन्दने ॥ नवनीते ॥ मौक्तिके ॥ पद्मकाष्ठे ॥ रङ्गे ॥ शीते ॥ त्रि॰ शीतले । हन्ति । हन॰ । हन्तेर्हिचेतिमक् ।

हिमक : । पुं॰ विकङ्कतवृक्षे ॥

हिमकर : ।)
हिमकिरण : ।) पुं॰ चन्द्रे । कर्पूरे ॥ हिमा : करा: किरणायस्य : ॥

हिमकूट : । पुं॰ शिशिरर्तौ ॥ हिमकदम्बे ॥

हिमगिरि : । पुं॰ हिमालयपर्वते ॥

हिमज : । पुं॰ मैनाकाचले । मेनकापुत्रे । हिमात्जात : ।जनी॰ । पञ्चम्यामितिड : ॥ च॰ ॥ हिमोद्भवे ॥

हिमजा । स्त्री॰ गौर्याम् । पार्वत्याम् ॥ हिमात्हिमालयात्जाता । जनी॰ । ड: । टाप् ॥ शच्याम् । इन्द्राण्याम् । क्षीरिण्याम् ॥

हिमझटि : । पुं॰ भूमिकायाम् । कुहेलिकायाम् ॥

हिमतैलम् । न॰ कर्पूरतैले ॥

हिमदुग्धा ।)
हिमदुग्धिका ।) स्त्री॰ क्षीरिण्याम् ॥

हिमदुर्दिनम् । न॰ पतद्धिमे । हिमनिपातितैनष्टखराद्यर्कादिने ।

हिमद्युति : । पुं॰ इन्दौ । चन्द्रे । हिमाद्युतिर्यस्य : ॥

हिमद्रुम : । पुं॰ महानिम्बे ॥

हिमनामा । पुं॰ कर्पूरे ॥ हिमस्यनामान्येवनामान्यस्य ॥

हिमप्रस्थ : । पुं॰ हिमगिरौ ॥

हिमवान् । पुं॰ उमागुरौ । नगाधिराजे । हिमालये । यतद्चन्द्रभागाद्या : हिमवत्पादनि:सृता: । सतांनिषेव्यो हिमवान् भोगिनामलयाऽचल : ॥ हिममस्मिन्नस्ति । मतुप् । वत्वम् ॥

हिमवत्सुत : । पुं॰ हिरण्यनाभे । मैनाकाचले ॥

हिमवत्सुता । स्त्री॰ उमायाम् ।

गौर्य्याम्। हिमवतः सुता॥ गङ्गायाम्॥ इ॰ ध॰ य॰ः॥

हिमवत्सुतावधः। पुं॰। भीमे तीर्थविशेषे॥

हिमवालुकः। पुं॰ कर्पूरे। इ॰ धाजनिघण्टः॥

हिमवालुका। स्त्री॰ कर्पूरे॥ हिमाचासौबालुकाच॥

हिमशर्करा। स्त्री॰ यावनाल्याम्॥

हिमशैलः। पुं॰ हिमवति। मेनाधवे॥ हिमप्रधानः शैलः॥

हिमशैलजा। स्त्री॰ पार्वत्याम्॥

हिमसंहतिः। स्त्री॰ महाहिमे। हिमान्याम्॥ हिमानां संहतिः॥

हिमहः। पुं॰ आदित्ये॥ वह्नौ॥ हिमं आडा हन्तीति हिमहः। डः॥

हिमहासकः। पुं॰ हिन्तालवृक्षे॥

हिमा। स्त्री॰ नागरमुस्तके। सूक्ष्मैलायाम्॥ रेणुकायाम्॥ पृक्कायाम्॥ भद्रमुस्तायाम्॥ चणिकायां॥

हिमांशुः। पुं॰ चन्द्रमसि॥ हिमाः अंशवोयस्य सः॥ कर्पूरे॥

हिमांशुभिख्यः। पुं॰ कर्पूरे। न॰ रौप्ये॥

हिमागः। पुं॰ हिमालये॥ हिमप्रधानोगः॥

हिमागमः। पुं॰ हेमन्ते॥ हिमस्यागमोयस्मिन्॥

हिमाचलः। पुं॰ हिमालये॥

हिमात्ययः। पुं॰ वसन्तर्तौ। हिमस्यात्ययोयस्मिन्॥

हिमाद्रिः। पुं॰ हिमशैले॥

हिमाद्रिजा। स्त्री॰ पार्वत्याम्॥ हिमाद्रेर्जाता। जनी॰। डः। टाप्॥ क्षीरिण्याम्॥

हिमाद्रितनया। स्त्री॰ पार्वत्याम्॥

हिमाद्रितनयापतिः। पुं॰ शिवे॥

हिमानी। स्त्री॰ हिमसंहतौ॥ महद्धिमम्। हिमारण्ययोर्महत्त्वइति ङीषानुकौ॥ यथा। आगतावत- चरैवहिमानीसेव्यताम् सुरतरङ्गि- णीसदा। कृष्णवर्त्मनिगुणानुकूल यन्तीजोवनेविपुलवन्यनुरागम्॥ यावनालशर्करायाम्॥

हिमारातिः। पुं॰ वीतिहोत्रे। धनञ्जये॥ किरणमालिनि। सूर्ये॥ हिमस्यारातिः॥

हिमालः। पुं॰ हिमशैले॥ हिमेन अलति। अलभूषणादौ॥ घञ्॥

हिमालयः। पुं॰ भारतवर्षस्यसीमापर्वते। उदगद्रौ। नगपतौ। मेनाधवे। उमागुरौ॥ स्थावराणां मध्ये भगवतोविभूतिरयम्॥ हिमस्यालयः॥ शुक्लखदिरे॥

हिमालयसुता। स्त्री॰ पार्वत्याम्॥

हिमालया। स्त्री॰ भूम्यामलक्याम्॥

हिमाह्वम्। न॰ उत्पले॥

हिमावती । स्त्री० स्वर्णक्षीर्याम् ॥ हिममस्त्यस्याः । मतुप् । शरादीनाञ्चेति दीर्घः ॥

हिमाश्रया । स्त्री० स्वर्णक्षीर्याम् ॥

हिमाह्वय : । पुं० कर्पूरे ॥

हिमिका । स्त्री० तृणोपरिपतितहिमे । इति कश्चित् ॥

हिमेलु : । त्रि० हिमार्त्ते । हिमकम्पिते ॥ हिमं न सहते । हिमाच्चेलुः ॥

हिमोत्तर : । त्रि० शीतले ।

हिमोत्तरा । स्त्री० कपिलद्राक्षायाम् ॥

हिमोत्पन्ना । स्त्री० यावनाल्याम् ॥

हिमोस्रा । स्त्री० शट्याम् ॥ चोरिकायाम् ॥

हिम्या : । पुं० भूम्नि हिमवति पर्वते ॥ प्रशस्तं हिममस्यास्मिन् वास्ति । अन्ये त्वोपिहृदयतद्दतिग्यप् ॥

हिरण्म् । न० रेतसि । स्वर्णे । वराटे । हिरण्यमिव वराटं इ० हेमचन्द्र : ॥

हिरण्मय : । पुं० सुरज्येष्ठे । ब्रह्मणि । विश्वसृजि । न० भारतवर्षादिनववर्षान्तर्गतवर्षविशेषे । त्रि० तेजोमये ॥ सुवर्णमये ॥ हिरण्यस्य विकारः । मयट् । दाण्डिनायनेतिटिलोपो निपात्यते । हिरण्यये० छन्दसि मलोपो निपात्यते । हिरण्यये मसविनेतिदर्शनात् ॥

हिरण्यम् । न० रेतसि । द्रव्ये । धात्तकुम्भे । स्वर्णे । वराटे । अक्षये ॥ मानभेदे । अकुप्ये ॥ रूप्ये । श्वेतपर्वतादुदीच्यां दिशि वर्त्तमाने वर्षविशेषे । हर्यति । हर्यतिकान्त्योः । हर्यते : कन्यन्हिरञ्च ।

हिरण्यक : । पुं० देवदत्तादिहिरण्यकाख्यायाम् । हिरण्ये कामः । धनहिरण्यात्कामइतिकन् ।

हिरण्यकशिपु : । पुं० कश्यपाद्दित्यांजातेदैत्यविशेषे । हिरण्यं कशिपुरस्य ।

हिरण्यकशिपुहा । पुं० विष्णौ ।

हिरण्यकामधेनु : । स्त्री० षोडशमहादानान्तर्गतमहादानविशेषे ॥

हिरण्यकोष : । पुं० घटिताघटितहेमरूप्ययोः ॥ यथा । हिरण्यकोशाः कुप्यानि हेमरूप्ये कृताकृते । इति हेमचन्द्र : । अमरस्तु० स्यात्कोषश्च हिरण्यञ्च हेमरूप्ये कृताकृते । ताभ्यां यदन्यत्तत्कुप्यमित्याह ॥

हिरण्यगर्भ : । पुं० ब्रह्मणि । लोकेशे । चतुरानने । हिरण्यं हिरण्मयमण्डम्० तद्गर्भ इव तदन्तर्वर्त्तित्वात् । यथाह मनु : । तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् । तस्मिन्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहइति ॥ यद्वा हिरण्यं हिरण्मयमण्डं गर्भोऽस्य ॥ अथवा० हिरण्यं हिरण्मयं सुवर्णप्रचुरम्० तत्तत्प्रकाशवहुलं ब्रह्मा

ण्डं गर्भे उदरे यस्य स हिरण्यगर्भः । विराड्देहान्तर्गतो राजपुरुषस्तदन्तर्यामिणश्चाभेदेनोपासनाद्धिरण्यगर्भोपासकैः कर्तव्येति विवक्षयेयं निरुक्तिः सङ्गच्छते । यथोपनयने । तेन यद्युरन्तमनन्ततयात्वमपि । यदन्तराण्डनिचयाननुसारवर्णाः । खद्भवरजांसि यान्ति वयसा सहयच्छुतयस्त्वयि विफलन्त्यतन्निरसनेन भवन्निधनादिति वेदस्तुत्यन्तर्गतत्वात् ॥ यद्वा । विराडपरनाम्नो हिरण्मयब्रह्माण्डस्य गर्भोऽभ्यन्तरवर्त्तित्वाद्वैराजपुरुषएव हिरण्यगर्भ इत्युच्यते इति । अथ वा हिरण्यं वेदलक्षणमक्षयद्रव्यं गर्भे उदरे यस्य सः । हिरण्मयमक्षयद्रव्यं वराटिकावर्णरेतसोरित्यभिधानादिति ॥ समष्टिलिङ्गशरीराभिमानिनि चैतन्ये । ज्ञानशक्तिमदन्तःकरणोपहितत्वात् ज्ञानशक्तिप्रधाने ॥ सूक्ष्मरूपे । प्राणे । सूत्रात्मनि । ईशे । ईश्वरे ॥ हिरण्यगर्भो नाम सूक्ष्मप्रपञ्चाभिमानी । सूर्यमण्डलान्तर्गतः सूक्ष्मसमष्टिदेहो लिङ्गात्मा ब्रह्मणोऽलिकानुगतेन्द्रियानुग्राहकः संसारिणोऽर्थान्तरमिति व्याख्यातारः ॥ मायोपाधिकः परमात्मा लिङ्गशरीरसमष्ट्यभिमानी न हिरण्यगर्भ इत्युच्यते ॥ अयस्मादिपुरुषआदिजीव ईश्वरश्चोच्यते । यथा । स वै शरीरी प्रथमः स वै पुरुष उच्यते । आदिकर्त्ता स भूतानां ब्रह्माग्रे समवर्त्तत इति स्मृतेः । विष्णौ ॥ शालग्रामविशेषे ॥ महादानविशेषे ॥

हिरण्यदंष्ट्रः । पुं॰ अमृतदंष्ट्रे । अभग्नदंष्ट्रे ॥

हिरण्यदः । पुं॰ समुद्रे । त्रि॰ स्वर्णदातरि ॥

हिरण्यदा । स्त्री॰ भूमौ ॥

हिरण्यनाभः । पुं॰ मैनाकाचले ॥ हिरण्यमिव नाभिरस्य । अच् प्रत्यन्वेत्यवाजितियोगविभागादच् ॥

हिरण्यबाहुः । पुं॰ शोणनदे । हिरण्यशोभावस्य ॥

हिरण्यरेताः । पुं॰ हुतभुजि अग्नौ ॥ हिरण्यं रेतोऽस्य ॥ सूर्ये । चित्रकवृक्षे ॥ शिवे ॥

हिरण्यवः । पुं॰ देवधने । न॰ निधिविशेषे ॥ त्रि॰ सहिरण्ये ॥ हिरण्यमस्त्यस्य । अन्येभ्योऽपीति वप्रत्ययः ॥

हिरण्यवर्णः । त्रि॰ शुद्धवर्णे ॥

हिरण्यवर्णा । स्त्री॰ नद्याम् ॥ इ॰ हे॰ चन्द्र ॥

हिरण्यवाहः । पुं॰ शोणनदे । हिरण्यं वहति । कर्मण्यण् ॥

हिरण्यग्रीवः । पुं॰ ब्रह्मोपास्यादिविशेषे ।

हिरण्यस्तूपः । पुं॰ ऋषिविशेषे । अङ्गिरसः पुत्रे ॥

हिरण्याक्षः । पुं॰ कश्यपाद्दित्यां समुत्पन्ने॰ आद्यदैत्यविशेषे ॥

हिरण्याश्वः । पुं॰ तुलापुरुषादिषोडशमहादानान्तर्गतमहादानविशेषे ॥

हिरण्याश्वरथः । पुं॰ षोडशमहादानान्तर्गतमहादानविशेषे ॥

हिरुक् । अ॰ विनार्थे ॥ हिरुक् कर्मणि मेऽथ ॥ मध्यार्थे ॥ हिनोति । हि गतौ । रुक् प्रत्ययः । सामीप्ये ॥ अधमार्थे ॥

हिलमोचि. । स्त्री॰ हिलमोचिकायाम् ॥

हिलमोचिका । स्त्री॰ ब्राह्म्याम् । आचार्याम् । चक्राङ्ग्याम् । हिलञ्चा॰ इ॰ गौ॰ भा॰ प्र॰ हिलसा इत्यभाषे । यथा । शोथं कुष्ठं कफं पित्तं हरते हिलमोचिका । हिलति । हिल भावकरणे । इगुपधेति कः । मोचयति । मुचेर्ण्वुल् । हिला चासौ मोचिका । कापि इति ह्रस्वः ॥ चुरा ॥

हिलमोची । स्त्री॰ हिलमोचिकायां ॥

हिल्लः । पुं॰ मरालिपक्षिणि ।

हिल्लोलः । पुं॰ तरङ्गे । नद्यादिजलस्य वायुना तिर्यगूर्द्ध्वगमने । रतिबन्धविशेषे ॥ यथा । हृदि कृत्वा स्त्रियः पादौ कराभ्यां धारयेत् कुचौ । यथेष्टं ताडयेद्योनिं बन्धो हिल्लोलसंज्ञकः ॥

हिल्वला । स्त्री॰ इल्वलायाम् ॥

हिबुकम् । न॰ लग्नाच्चतुर्थभवने ॥

ही । अ॰ दुःखहेतौ ॥ विषादे ॥ विस्मये ॥ यथा । हा विधिललितानां ही विचित्रो विपाकः ॥ हिनोति । हि॰ विच् । संज्ञापूर्वकत्वान्न गुणः । क्विपि तुगभावो वा । भावे वा प्रत्ययौ । पृषोदरादित्वात् दीर्घः ॥ हननमथवा बाहुलकाद्दीर्घः ॥ शेषे ॥

हीनः । त्रि॰ गर्ह्ये ॥ ऊने ॥ प्रतिवादिविशेषे ॥ यथाह नारदः । अन्यवादी क्रियाद्वेषी नोपस्थायी निरुत्तरः । आहूतप्रपलायी च हीनः पञ्चविधः स्मृत इति ॥ जहाति॰ हीयते स्म वा । ओहाक् त्यागे । आदिकर्मणि क्तः॰ कर्मणि वा । ओदितश्चेति नत्वम् । घुमास्थेतीत्वम् ॥

हीनक्रियः । त्रि॰ जातकर्मादिक्रियावर्जिते ॥

हीनवर्णः । त्रि॰ नीचजातौ ॥ यथा । हीनवर्णोपभुक्ता या त्याज्या वध्यापि वा भवेदिति ॥

हीनवादी । त्रि॰ विरुद्धार्थवादिनि ॥ यथाह नारदः । पूर्ववादं परित्यज्य योऽन्यमालम्बते पुनः । वादसंक्रमणाज्ज्ञेयो हीनवादी स वै नर इति ॥ वाक्यवर्जिते । अधरे ॥

हीनाङ्गः । त्रि॰ स्वभावतोऽङ्गबाधि

क्षांगी । विकलाङ्गी । अपोगण्डे ॥ तेनसहपरिहासनिषेधोयथा । जातिहीनंवित्तहीनंकुरूपंहीनमं दृषकम् । हीनाङ्गमतिरिक्ताङ्गंतेनदोषित्वनात्रिपि । इतिब्रह्मपुराणप्राह वेदोघार्थविनिश्चयमितिकालिका-पुराणे ४४ऽध्यायः ॥

हीनाङ्गी । स्त्री॰ क्षुद्रपिपीलिकायाम् ॥

हीरः । पुं॰ शङ्करे । शिवे । हरे ॥ प्रलयेकृत्स्नंहरति । हृञ्॰ । पचाद्यच् । पृषोदरादित्वादीत्वम् । वज्रे ॥ सर्पे । श्रीहर्षकवेः पितरि ॥ हारे । नगणे॰ ऽऽ।॰ ॥

हीरकः । पुं॰ रत्नमुख्ये । सूचीमुखे । दधीच्यस्थ्नि । हीरे । वज्रे हीरा॰ इ॰ भा॰ प॰ रत्ने ॥ अवयम्मेखितु योग्यं तद्वज्रे लिखितं मया । तत्रैवतस्माद्द्रष्टव्यं गुणनामादिवर्णनम् । मात्रावृत्ताक्षरे ॥ यथा । वह्निटगणमन्त्यरगणमेवचरणाधोभितम्॰ पञ्चमुद्रितनागनर्तति रवचरितमोहितम् । राजभवनकालेपठनएवरटनरञ्जनंहीरकइतिनामभवतिकामसर्वतिसज्जनम् ॥ यथः । ध्यानमटतसामपठतनामरटतकोधर्मधर्मं नयतमर्मं भजतकर्मं सृजतशोभनम् । दृशारभवनद्वारनमणासारचयमभासनातापदयति-

नापततति॰ कालमृपति शासना स्वार्थेकः ॥

हीरा । स्त्री॰ लक्ष्म्याम् । श्रियि । तैलपायिकायाम् ॥ पिपीलिकायाम् ॥ काश्मर्याम् ॥

हीराङ्गः । पुं॰ इन्द्रादिन्याम् । वज्रे कुलिशे ॥

हीलम् । न॰ रेतसि ; इतिकश्चित् ॥

हीलुकम् । न॰ शस्यविशेषे । गोलायाम् ॥

हीही । अ॰ विस्मये ॥ हास्ये ॥ यथा । अहल्यालोहितालोपनासु चरणोऽयम् : कुतोमामस्मात्क्ष्मितचामिन्नन्दनञ्चनीरंसद्दाभिमलम् । रत्नानांनिचयः प्रवाललतिकाश्चन्दनैः ; कश्चिन्मगडुकाःश्रिता नसन्तिनत्कोराकाराः हीहीकृतम् ॥

हुङ्कृतम् । न॰ हुङ्कारे ॥ वन्यवराहशब्दे ॥

हुङ्कृतिः । स्त्री॰ रवं घोरध्वनौ ॥

हुडः । पुं॰ । मेषे ॥ पांजिकाकाटा इ॰ गौ॰ दे॰ भा॰ प॰ । चौरादिनिवारणार्थंभूमिनिहितलौहमयतीक्ष्णाग्रकुशीर्षे ॥ लगुडे ॥ इ॰ महाभारतम् भाषयावुरज इतिख्यातियोः धगणाग्रयस्थाने ॥ वियमूत्रोत्सर्जनस्थाने ॥

हुडम्ब : । पुं० हुडुम्बे ॥

हुडु : । पुं० मेषे ।

हुडुक : । पुं० दात्यूहे ॥

हुडुक्क : । पुं० वाद्यप्रभेदे मदमत्ते ॥ दात्यूहपक्षिणि ॥ द्वारकीले । हुडका इ० गौ० दे० भा० प्र० लगुडविशेषे ।

हुडुत् । न० वृषशब्दे ॥

हुडुम्ब : । पुं० भृष्टचिपिटे । हुडुम् इ० गौ० दे० भा० प्र० ॥

हुण्ड : । पुं० व्याघ्रे ग्रामशूकरे ॥ मूर्खे ॥ राक्षसे ॥

हुत : । पुं० देवयज्ञाख्यहोमे ॥ त्रि० वषट्कृते । मन्त्रेणाग्नौ प्रक्षिप्ते घृतादौ । हवि : प्रक्षेपे ॥ हूयते । हु दानादनयो : । क्त : ॥ न० हवने होमे । अग्नौ हवि : प्रक्षेपक्रियायाम् ॥ नपुंसके भावे क्त : ॥

हुतभुक्प्रिया । स्त्री० अग्निपत्न्याम् ॥ स्वाहायाम् ॥ हुतभुज : प्रिया ॥

हुतभुक् । पुं० वैश्वानरे । वह्नौ ॥ हुतं भुङ्क्ते । भुज० । क्विप् ॥ चित्रकवृक्षे ॥ हुतं होमं भुनक्ति पालयति त्रिगुणमपि सगुणं करोति स्वनामोच्चारणादिति हुतभुक् ॥

हुतवह : । पुं० अग्नौ ॥ हुतस्य वह : ॥

हुताश : । पुं० अग्नौ ॥ हुतमश्नाति । अश० । कर्मण्यण् ॥

हुताशन : । पुं० अग्नौ ॥ हुतमश्नमस्य ॥ यथा । लक्षहोमे तु वह्नि : स्यात्कोटिहोमे हुताशन : । पूर्णाहुत्यां मृडो नाम शान्तिके वरद : सदा ॥ शिवे ॥

हुताशनी । स्त्री० होलिकायाम् ॥

हुति : । स्त्री० हवने हु० क्तिन्० ।

हुम् । अ० स्मृतौ ॥ अपाकृतौ ॥ अथ प्रश्ने ॥ अभ्यनुज्ञायाम् ॥ वितर्के ॥ भये । भर्त्सने । कोपे । हूयते । हु० । बाहुलकान्मु : ॥

हुलहुली । स्त्री० मुखघण्टायाम् । स्त्रीणां मङ्गलजनकमुखध्वनिविशेषे । हुलहुलु इ० गौ० दे० भा० प्र० ॥

हुहु : ।) पुं० गन्धर्वविशेषे ॥ यथा । हूहूर्हुहुश्चेति विधौ हूहूर्हुहुश्च कुत्रचिदिति शब्दरत्नावली ॥
हुहू : ।)

हू अ० आह्वाने । अवज्ञायाम् । अहङ्कारे ॥ शोके ॥

हूङ्कार : । पुं० हूमिति भयजनकध्वनिकरणे ॥

हूड : । पुं० मेषे ॥

हूण : । पुं० । म्लेच्छजातिविशेषे ॥ यथा । श्वपाकश्च पुक्कश

हुहुणीयवनमप्यपि । शौकवाद्यास्तु योषाः शिरणाध्याचारवर्जिताः ॥ म्लेच्छाः किरातशबरपुलिन्दाद्यास्तु तद्भिदेति जटाधरः ॥ देशविशेषे ॥ यथा । कामगिरेर्दक्षभागे मरुदेशात् तथोत्तरे । हूणदेशः समाख्यातः शूरास्तत्र भवन्ति च ॥

हूतम् । न० आह्वाने । नाम्नि ॥ त्रि० आहूते ॥

हूतिः । स्त्री० आकारणायाम् । आह्वाने ॥ ह्वानम् । ह्वेञ् : क्तिन् । वचिस्वपीतिसम्प्रसारणम् ॥

हूम् । अ० प्रश्ने ॥ वितर्के ॥ रुषोक्तौ ॥ अनुनये । स्मृतौ सम्भाव्ये ॥ अभ्युपगमे । कुत्सने ॥ प्राकाश्ये । हूयते । हु० । बाहुलकात् मः । पृषोदरादिः ॥ यद्वा । हवनम् । डुम्प्रत्ययः ॥

हूरवः । पुं० शृगाले ॥

हूर्च्छनम् । न० कौटिल्ये ॥

हूहु । पुं० गन्धर्वविशेषे ॥

हूहूः । पुं० देवगन्धर्वे ॥ हूहूरिति ख्यापयति । ह्वेञ् स्पर्द्धायां शब्दे च । क्विप् । वचिस्वपीतिसम्प्रसारणम् । हलः इति दीर्घः । अजादौ हूह्वौ हूह्व इत्यादिरूपाणि । अव्युत्पत्तिपक्षेण हूह्वौ हूहूव इत्यादि ॥

हृच्छयः । पुं० मदने । मन्मथे । कामदेवे ॥ हृदि शेते । शीङ् स्वप्ने । अधिकरणे शेतेरित्यच् ॥

हृच्छयालुः । पुं० कामदेवे ॥

हृच्छूलम् । न० हृदयशूले ॥ यथा ।
कफपित्तावरुद्धस्तु मारुतो रसमूर्च्छितः । हृदिस्थः कुरुते शूलमुच्छ्वासावरोधकम् । स हृच्छूलमिति ख्यातो रसमारुतकोपजः ॥

हृणिया । स्त्री० जुगुप्सने ॥

हृणीया । स्त्री० भर्त्सने । जुगुप्सने ॥ हृणीङ् कण्ड्वादिः । यक् । अप्रत्ययात् ।

हृतः । त्रि० मुषिते । आकृष्टे ॥ अपहारि । हृञ्० । क्तः । उपात्ते ॥

हृतिः । स्त्री० हरणे । देशाद्देशान्तरप्रापणायां ।

हृत्कम्पः । पुं० हृदयकम्पने ॥

हृत्पतिः । पुं० अन्तर्यामिणि ॥

हृत्स्थः । त्रि० बुद्धिस्थे ॥

हृत् । न० बुक्के । चित्ते । बुद्धौ । मानसे । अन्तःकरणे ॥ हृदयकमले ॥ नवमभवने ॥ हृदयस्य पद्दन्निति हृदादेशः । प्रभृतिग्रहणस्य प्रकारार्थत्वात् क्वचित् स्वार्थेऽपि ॥ यद्वा । हरति । ह्रियते वा हृञ् । ढुकौ : सुक् दुकौ चेति । बाहुलकात् केवलादपि दुक् ॥ यथा । अपक्वं पृथु तुच्छस्तनपाण्डु हृदयं स्मृतम् । विपरीतं सिरालम्बरोमशं तु :

कभागिनामिति ॥

हृदयम् । न० उरसि । वक्षसि । बुक्कायाम् । हृदयान्तर्गतमांसविशेषे । अग्रमांसे । मानसे । स्वान्ते । स्मृतिप्रत्ययास्पदे ज्ञाने । हरति० आहरति विषयान् । क्रियते विषयैर्वा । हृञो : सुक् दुकौ चेति कयन् दुगागमश्च ॥ परमात्मनि । हृदि अयम् ॥ हृदयकमले ॥ यथा । पङ्केजप्रतीकाशं रुचिरं चाप्यधोमुखम् । हृदयं तद्विजानीयाद्विश्वस्यायतनं महत् ॥ अपि च । हृदयं पुण्डरीकेण सदृशं स्यादधोमुखम् । जाग्रतस्तद्विकसति स्वपतस्तु निमीलति । आशयस्तत्र जीवस्य चेतनस्थानमुत्तमम् । अतस्तस्मिंस्तमोव्याप्ते प्राणिनः स्वपन्ति हि ।

हृदयग्रन्थिः । पुं० अहङ्कारे । चिज्जडग्रथनरूपेऽहङ्कारे विदहङ्कारतादात्म्यरूपे ॥ चिज्जडात्मकत्वात् ग्रन्थिरिव ग्रन्थिः ॥ हृदयमेव ग्रन्थिर्वा ॥ हृद्ग्रन्थे ॥

हृदयङ्गमम् । त्रि० सुखजनकोक्तौ । युक्तियुक्तवाक्ये । सङ्गते ॥ हृदयं गच्छति । गमश्चेति खच् ॥

हृदयजः । पुं० पुत्रे ॥ त्रि० हृदयउत्पन्ने ॥

हृदयज्ञः । त्रि० हृदयप्रिये ॥ हृदयाभिज्ञे ॥

हृदयदौर्बल्यम् । न० मनसोऽभ्यमश्चादिरूपेऽधैर्ये ॥ हृदयस्य दौर्बल्यम् ॥

हृदयवान् । त्रि० हृदयालौ ॥ मतुप् ॥

हृदयशल्यः । पुं० । सन्देहे ॥

हृदयशुद्धिः । स्त्री० अनश्वरेधि ॥ हृदयस्य शुद्धिः ।

हृदयस्थः । त्रि० सर्वान्तर्यामिणि ।

हृदयस्थानम् । न० भुजान्तरे । क्रोडे । उरसि ।

हृदयस्पृक् । त्रि० मनोज्ञे । हृदयं स्पृशति । स्पृश० । स्पर्शेऽनुदके क्विन् ॥

हृदयात्मकः ।)
हृदयात्मा ।) पुं० कङ्कखगे ॥

हृदयालुः । पुं० प्रशस्तचेतसि । सुहृदये । प्रशस्तं हृदयमस्यास्ति । हृदयाच्चालुरन्यतरस्यामित्यालुः ॥

हृदयाविध् । त्रि० पिशुने । हृदयमाविध्यति । क्विप् ॥

हृदयिकः । त्रि० प्रशस्तचेतसि । हृदयिनि । हृदयं प्रशस्तमस्यास्ति । ठन् ।

हृदयी । त्रि० प्रशस्तचेतसि । हृदयालौ ॥ हृदयं प्रशस्तमस्य । इनिः ॥

हृदयेशः । पुं० धवे । भर्तरि पत्यौ ॥

हृदयेशा । स्त्री० प्रेयस्याम् । भार्यायाम् । कान्तायाम् ॥

हृदामय: । पुं॰ हृद्रोगे ॥

हृदावर्त्त: । पुं॰ अश्वहृदयावर्त्ते । ओष्ठचक्रे ॥ इ॰ वि॰ शेष: ॥

हृदिस्पृक् । त्रि॰ मनोज्ञे । हृद्ये । हृदिस्पृशति । क्विप् ॥

हृदीकृत: । त्रि॰ हृदये प्रवेशिते ॥

हृद्गत: । त्रि॰ । वागवस्थाबहिरप्रकाशिते । अन्तर्गते ॥

हृद्गोल: । पुं॰ पर्वतविशेषे ।

हृद्गोलीय: । पुं॰ आयुधजीविविशेषे । हृद्गोलोऽभिजनोऽस्य । आयुधजीविभ्यश्छ: । पर्वते ॥

हृद्ग्रन्थि: । पुं॰ हृद्व्रणे ॥

हृद्य: । पुं॰ वशकृद्वेदमन्त्रे । हृदयस्य बन्धन: । बन्धने चर्षाविति यत् ॥ न॰ धवलजीरके ॥ गुडत्वचि ॥

हृद्य: । त्रि॰ हृज्ज्ञे । हृद्धिते । हृत्प्रिये ॥ हृदयङ्गमे । मनोज्ञे ॥ मनोहरे । दुर्गन्धाशुचित्वादिदृष्टादृष्टदोषशून्ये । हृदयस्य प्रियम् । हृदयस्य प्रियमिति यत् । हृदयस्य हृल्लेखेति हृदादेश: ॥

हृद्यगन्ध: । पुं॰ विल्वे । न॰ सौवर्च्चले ॥ स्वल्पजीरके ॥ त्री॰ सुगन्धे । सुरभौ ॥ हृद्यो मनोहरो गन्धोऽस्य ॥ हृद्यस्यापि गन्धस्य ॥

हृद्यगन्धा । स्त्री॰ मालत्याम् । जात्याम् ।

हृद्यगन्धि । न॰ क्षुद्रजीरके । हृद्योगन्धोऽस्य ॥

हृद्या । स्त्री॰ वृद्धिनामौषधौ ॥

हृद्रोग: । पुं॰ व्याधिप्रभेदे । हृदयपीडायाम् । हृदयरोगे । अस्य विप्रकृष्टनिदानन्तु । अत्युष्णगुर्व्वम्लकषायतिक्तश्रमाभिघाताध्ययनप्रसङ्गै: । संचिन्तनैर्वेगविधारणैश्च हृदामय: पञ्चविध: प्रदिष्ट: ॥ सम्प्राप्तिपूर्व्वकं लक्षणन्तु । दूषयित्वा रसं दोषा विगुणा हृदयं गता: । हृदि बाधां प्रकुर्व्वन्ति हृद्रोगं तं प्रचक्षते॰ इति । शुण्ठीसौवर्च्चलं हिङ्गु पीतं हृदयरोगनुत् ॥ कामे । यथा । हृद्रोगमाश्वपहिनोऽस्य विधेयधीरैरिति ॥ हृदयस्य रोग: । वा शोकष्यञ्रोगेष्विति हृदादेश: । कुम्भराशौ ।

हृद्रोगवैरी ।)
हृद्रोगारि: ।) पुं॰ अर्जुनवृक्षे ॥

हृद्वाटक: । पुं॰ जठरे । इ॰ श॰ चं॰ का॰ ॥

हृद्वाट्टक: । पुं॰ कोष्ठरोगे ॥

हृल्लास: । पुं॰ हिक्कायाम् । हिक्काहिक्काऽथ हृल्लास इति हेमचन्द्र: । हिक्काभिधे रोगे ॥ हृदयात् उल्लासनिर्गमे ॥ हृदयादीषद्व्यथासहिताम्बुपानीयोद्गिरणं हृल्लास इति तद्विद: ॥ हृदयस्य हृल्लेखयदण्लासेष्विति॰

हृद्दादेश: ॥

हृल्लेख: । पुं॰ तर्के ॥ ज्ञाने ॥ हृदयं लिखति । लिख॰ । कर्म्मण्यण् । हृदयस्य हृल्लेखेत्यादिना हृदादेश: ॥

हृल्लेखा । स्त्री॰ मायाबीजे ॥ औत्सुक्ये ॥ भुवनेश्वर्याम् ॥ ज्ञानिनां हृदयाम्भोजे हृल्लेखा परमेश्वरीति देवीगीता ॥ हृदि लिखि जागर्त्ति प्राणप्रक्रियेयं पर हृल्लेखा कथ्यते तस्मादिति भुवनेश्वरीरहस्यम् ॥

हृषित: । त्रि॰ विस्मिते ॥ प्रीते ॥ प्रहते ॥ हृष्टलोमनि ॥ प्रणते ॥ वर्मिते ॥ हर्षितस्म॰ हृष्यतिस्म वा । हृषु अलीके॰ हृष तुष्टौ वा । क्त: । हृषेर्लोमस्विति विकल्पे नेट् ॥

हृषी : पुं॰ अग्नेर्विमयो: ।

हृषीकम् । न॰ श्रोत्रादीन्द्रिये ॥ हृष्यत्यनेन । हृष॰ अनिहृषिभ्यां कित् ईकन् ॥

हृषीकेश: । पुं॰ विष्णौ ॥ सर्व्वेन्द्रियप्रेरकत्वेन सर्वान्तर्यामिणि । सर्वान्त:करणवृत्तिज्ञे । सर्वनिगूढाभिप्रायज्ञे ॥ हृषीकाणामिन्द्रियाणामीशोऽधिष्ठाता ॥ हृषीकाणि नियम्यात्मवत: प्रत्यक्षतां गत: । हृषीकेश इति ख्यातो नाम्ना तत्रैव संस्थित: ॥

हृषु: । पुं॰ हर्षे ॥ सूर्ये ॥ अग्नौ ॥ अजौ । राज्ञौ ॥ हृष्यति । हृष तुष्टौ हर्षितवा हृषु अलीके । पॄभिदिव्यधिगृधिधृषिहृषिभ्य इति पठित्वा॰ एष्वर्थे षु क प्रत्ययश्चेति केचिदिति मनोरमा ॥

हृष्ट: । त्रि॰ जातहर्षे । अस्य पर्यायो यथा । हृष्टमनास्तु मत: प्रसन्न: प्रमुदित: प्रीत इति ॥ रोमाञ्चिते । प्रतिहते । विस्मिते ॥ हर्षितस्म॰ हृष्यतिस्म वा । हृषु॰ वा । क्त: । हृषेर्लोमस्विति विकल्पितेट्कत्वात्॰ यस्य विभाषेति नेट् ॥

हृष्टमानस: । त्रि॰ सहर्षमानसे । हर्षमाणे । विकुर्वाणे । प्रमनसि ॥ हृष्टं मानसं यस्य स: ॥

हृष्टरोमा । त्रि॰ रोमाञ्चिते ॥ हृष्टानि रोमाणि यस्य स: ॥

हृष्टि: । स्त्री॰ आनन्दे । माने ॥

हृष्यत् । त्रि॰ रोमाञ्चिते ॥

हे । अ॰ सम्बोधने ॥ आह्वाने ॥ असूयादौ ॥ हिनोति । हि गतौ । विच् ॥ पादपूरणे ॥

हेक्का । स्त्री॰ हिक्कायाम् ॥ इ॰ वि॰ शेष: ॥

हेठ: । पुं॰ बाधायाम् । विहेठे ॥

हेडावुक्क: । पुं॰ अश्वविक्रयिणि । घोटकविक्रयकारिणि ॥

हेति: । स्त्री॰ रवेरर्चिषि । अस्त्रे ॥ वह्निज्वालायाम् ॥ हिनोति

हुतस्ततोगच्छति हि॰ । ऊतियूतिजूतिसातिहेतिकीर्त्तयश्चेति-क्तिन्नन्तानिपातिता । हन्ति॰ हन्यतेऽनयावा । क्तिन् । ऊतियूतीतिसाधुः ॥

हेतुः । पुं॰ कारणे । बीजे । निमित्ते । नियतपूर्व्वभाविनि । येन विनायन्नभवति तस्मिन् ॥ हिनोति व्याप्नोति कार्य्यम् । हिगतौ कर्म्मणिमनिगाभायाहिभ्यश्चेति-तुः ॥ फलसाधनयोग्ये पदार्थे ॥ हेतुंलक्षयति गौतमः उदाहरणसाधर्म्यात्साध्यसाधनंहेतुस्तथावैधर्म्यात् ॥ ३४ ॥ अत्रसाध्यसाधनं हेतुरिति सामान्यलक्षणम् । साध्यसाधनं साध्यसिद्ध्यनुकूलज्ञापकत्ववोधकवृत्त्यर्थः तथाचसाध्यतावच्छेदकावच्छिन्नसाध्यान्वितज्ञापकत्ववोधकः साध्यान्वितस्वार्थवोधकोऽवयव इतिफलितार्थः । तद्द्वैविध्यमाह उदाहरणसाधर्म्यात् तथा वैधर्म्यादिति । साधर्म्यमन्वयः वैधर्म्यं व्यतिरेकः । तद्व्याप्तिरितिफलितार्थः । उदाहरणसाधर्म्यम् उदाहरणवोध्यान्वयव्याप्तिस्तस्मैऽन्वयीहेतुर्ज्ञातव्यः उदाहरणेतिदृष्टार्थम् । तथाच ज्ञातान्वयव्याप्तिकहेतुवोधकोहेत्ववयवः । अज्ञातव्यतिरेकव्याप्तिकहेतुवोधकोहेत्ववयवः इतिफलितार्थः । एवमप्रतीतान्वयव्याप्तिकहेतुवोधकोहेत्ववयवोव्यतिरेकी हेतुः इत्थमेवप्रतीतान्वयव्यतिरेकव्याप्तिकहेतुवोधकोहेत्ववयवोऽन्वयव्यतिरेकीत्यपिसूचितमितिवदन्ति । साधने ॥

हेतुकः । पुं॰ कारणे ॥ स्वार्थेकः ॥ त्रि॰ तत्सम्बन्धिनि ॥

हेतुता । स्त्री॰ कारणतायाम् । हेतुत्वे ॥ सङ्गतिविशेषे । प्रत्यक्षप्रमायां हेतुतासङ्गतिः ॥ हेतोर्भावः । तस्यभावस्त्वतलावितितल् ॥

हेतुमान् । त्रि॰ व्यक्ते ॥ कारणवति युक्तियुक्ते । हेतुरस्त्यस्मिन्नस्यवामतुप् फले ॥

हेतुशास्त्रम् । न॰ तर्कशास्त्रे ॥

हेतौ । अ॰ निमित्तार्थे ॥

हेत्वाभासः । पुं॰ हेतुदोषे ॥ सपञ्चविधः । सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धवाधितभेदात् । यथोक्तं भाषापरिच्छेदे । अनैकान्तोविरुद्धश्चाप्यसिद्धः प्रतिपक्षितः । कालात्ययापदिष्टश्चहेत्वाभासास्तुपञ्चधा । आद्यः साधारणस्तुस्यात् असाधारणकोऽपरः । तथैवानुपसंहारी त्रिधानैकान्तिकोभवेत् । यः सपक्षेविपक्षे च भवेत्साधारणस्तु सः । यस्तूभयस्माद्व्यावृत्तः सचा

साधारणोमत: । तथैशानुपसंहारी केवलान्वयिपक्षक : । स : साध्यं व तिनैवास्तिसविरुद्धश्चउदाहृत : ॥ आश्रयासिद्धिरायाप्यात्स्वरूपासिद्धिरप्यथ । व्याप्यत्वासिद्धिरपराप्राहुरसिद्धिरतस्त्रिधा । पक्षाऽसिद्धिर्यत्रपक्षोभवेन्मणिमयोगिरि : ह्रदोद्रव्यंधूमवत्वादत्रासिद्धिरथापरा ॥ व्याप्यत्वासिद्धिरपरानीलधूमादिकेभवेत् । विरुद्धयो : परामर्शहेत्वो : सत्प्रतिपक्षता । साध्यशून्योयत्रपक्षस्त्वसौबाधउदाहृत । उत्पत्तिकालोनघटेगन्धादिर्यत्रसाध्यते । हेत । सव्यभिचारविरुद्धप्रकरणसमसाध्यसमातोतकालाहेत्वाभासहतिचार्थसूत्रम् ॥ हेतुलक्षणरहितैहेतुवद्भासमानोहेत्वाभास : ॥

हेम : । पुं० माषकपरिमाणे । हु० वेदाख्यपरिभाषा ।

हेमकन्दल : । पुं० प्रवाले ॥

हेमकान्ति : । स्त्री० दारुहरिद्रायाम् । त्रि० सुवर्णद्युतिमति ॥

हेमकार : । पुं० स्वर्णकारे । हेमकर्त्तरि ।

हेमकिञ्जल्क : । पुं० नागकेशरे ॥

हेमकूट : । पुं हिमालयादुत्तरे० कुलाचलाद्धिमवर्षहिमवद्भयोरिनवर्षोत्पर्वतेदीर्घेकिम्पुरुषवर्षसमर्यादागिरौ ॥ हेम : कूटोऽस्य ॥

हेमकेतकी । स्त्री० सुवर्णकेतक्याम् ॥ उष्णातिक्तारसास्ते याचवच्या हेमकेतकी ॥

हेमकेलि : । पुं० वह्नौ । इ० अ० माला ॥

हेमकेश : । पुं० शिवे ।

हेमक्षीरी । स्त्री० सुवर्णक्षीर्याम् ॥ मधुक्षीरसङ्गा : । गौरादि : ॥

हेमगन्धिनी । स्त्री० रेणुकाख्यगन्धद्रव्ये ॥ कुतिरत्नमाला ॥

हेमगौर : । पुं० । अशोकवृक्षे । किङ्किराते । त्रि० स्वर्णवद्गौरवर्णयुक्ते ॥

हेमज्वाल : । पुं० वह्नौ । अनले ।

हेमतारम् । न० अञ्जनविशेषे । नीलतुत्थे । मूषातुत्थे ॥

हेमदुग्ध : । पुं० उदुम्बरवृक्षे ।

हेमदुग्धक : । पुं० उदुम्बरवृक्षे । यज्ञाङ्गे । हेमवर्णदुग्धमस्य । क. ॥

हेमदुग्धा । स्त्री० स्वर्णक्षीर्याम् ।

हेमदुग्धी । पुं० यज्ञाङ्गे । उदुम्बरे ।

हेमदुग्धी । स्त्री० स्वर्णक्षीर्याम् ।

हेमा । पुं० बुधग्रहे ॥

हेम । न० काञ्चने । स्वर्णे । धत्तूरपुष्पादिके यथा । पुरारिनिजाश्रमस्यामाश्रमपीयूषनिजातात्मजानाम् । पद्मौविशेषकचकाचकाद्यलक्ष्मीसम्पन्नशैवना : । कन्दर्पदर्पविध्वस्तचेतसो

जातविद्रुमः । पतितं यत्र पृष्ठे रे तस्तद्धेमतामगात् । कृत्रिमञ्चापि भवति तद्रसेन्द्रस्य वेधतः ॥ स्वर्णं सुवर्णं कनकं हिरण्यं हेमहाटकम् ॥ तपनीयं कलधौतं गाङ्गेयं गर्भकाश्चनम् । चामीकरं शातकुम्भं तथाकार्तस्वरमुत्तमम् ॥ जाम्बूनदं जातरूपं महारजतमित्यपि । दाहे रक्तं सितं छेदे निकषे कुङ्कुमप्रभम् ॥ तारशुल्वोज्झितं स्निग्धं कोमलं गुरु हेम सत् । तच्छ्वेतं कठिनं रूक्षं विवर्णं समलं दलम् ॥ दाहे छेदे ऽसितं श्वेतं कषे त्याज्यं लघु स्फुटम् । दलं दोषयुक्तैः पत्रैः । स्फुटं यद्घनाहतं ॥ स्फुटतीति हि भावे तिष्ठति ॥ हिनोति गतौ वर्द्धने च । मनिन् ॥ धस्तूरे ॥ नागकेसरे ॥

(हेम)न्तः । पुं॰ ऋतुविशेषे । सहस हस्ययोः । पौषमाघपौषयोः ॥ हन्ति शीतत्वेन । हन्तेर्मुट्‌ चेति झच्प्रत्ययः । हन्तेर्हि चेति हि राहेशेमुडागमो गुणश्च ॥

हेमन्तनाथः । पुं॰ कपित्थे ॥

हेमपर्वतः पुं॰ सुमेरुगिरौ ॥

हेमपुष्पम् । न॰ अशोके । जवापुष्पे ॥ पुं॰ चम्पकवृक्षे ॥ हेमवर्णं पुष्पं यस्य ॥ लोध्रवृक्षे ॥

हेमपुष्पकः । पुं॰ चम्पकवृक्षे । हेमवर्णं पुष्पमस्य ॥ लोध्रे ॥ अशोके ॥

हेमपुष्पिका । स्त्री॰ स्वर्णयूथिकायाम् । पीतयूथिकायाम् । गणिका यूथिकाम्बष्ठा सा पीता हेमपुष्पिका ॥ हेमवर्णं पुष्पमस्याः । पाककर्णेति ङीष् । स्वार्थे कन् । ह्रस्वः ॥

हेमपुष्पी । स्त्री॰ स्वर्णयूथ्याम् । मुशल्याम् ॥ स्वर्णुल्याम् ॥ कपूरकाम् ॥ इन्द्रवारुण्याम् ॥ स्वर्णजीवन्त्याम् ॥ मञ्जिष्ठायाम् ॥ हेमवर्णं पुष्पमस्याः । पाककर्णेति ङीष् ॥

हेमफला । स्त्री॰ स्वर्णकदल्याम् ॥

हेममाला । स्त्री॰ यमपत्न्याम् । स्वर्णस्रजि ॥

हेममाली । पुं॰ सूर्ये ॥ कार्त्तवीर्ये ॥ त्रि॰ हेममालायुक्ते ॥

हेमयूथिका) हेमयूथी ।) स्त्री॰ स्वर्णयूथिकायाम् ॥

हेमरागिणी । स्त्री॰ वर्षभ्याम् । हरिद्रायाम् ॥

हेमलः । पुं॰ कलादे स्वर्णकारे ॥ कृकलासे । सरटे ॥ शिलान्तरे । कषपाषाणे । कसौटी॰ इति भा॰ प्र॰ ॥

हेमलता । स्त्री॰ स्वर्णजीवन्त्याम् ॥

हेमलम्बः । पुं॰ वत्सरविशेषे ॥ तत्फलं यथा । पीडान्ते सर्वशस्यानि टेशेदेशे शुभिस्मृति । हेमलम्बे प्रजाः सर्वाः चौर्यनीनाशसंशयः । ३१ ।

हेमवलम् । न॰ मौक्तिके ॥

हेमशङ्खः । पुं॰ विष्णौ ॥

हेमशिखा । स्त्री० स्वर्णक्षीर्य्याम् ॥

हेमसारम् । न० तुत्थे । इ० रसचन्द्रिका ॥

हेमसूत्रकम् । न० हारविशेषे ॥

हेमहस्तिरथ । पुं० महादानविशेषे ॥

हेमा । स्त्री० अप्सरसांभेदे ॥ सुन्दर्य्यां नार्य्याम् ॥

हेमाङ्ग : । पुं० गरुडे ॥ परमेष्ठिनि ॥ सुमेरौ ॥ सिंहे ॥ चम्पके विष्णौ ॥ न० हेमवर्णशरीरे ॥ त्रि० तद्वति । हेमेवाङ्गंवपुर्य्यस्य : ॥

हेमाद्रि : । पुं० सुरपर्वते । मेरौ ॥ हेमोऽद्रि : ॥ चिन्तामणिकामधेनुकल्पद्रुमनामकस्मृतिसङ्ग्रहकारकैतद्विषयेराजविशेषे ॥

हेमाद्रिजरत्न : । पुं० स्वर्णक्षीर्याम् ।

हेमाह्व : ।) हेमाह्वय : ।) पुं० वनचम्पके ॥ चम्पके ॥ धत्तूरे ॥

हेमाह्वया । स्त्री० स्वर्णजीवन्त्याम् ॥ हेमआह्वयोयस्या : ॥

हेमाह्वा । स्त्री० हेमक्षीर्याम् । चोके ॥ गुणायथा । हेमाह्वारेचनीतिक्तामादिन्युत्क्लेदकारिणी । क्रमिकण्डूविषानाहकफपित्तास्रकुष्ठनुदिति ॥ स्वर्णजीवन्त्याम् ॥

हेय : । त्रि० त्याज्ये । हातव्ये ॥ पुरुषश्चोद्देश्यसिद्धयेयदुपयुक्तमविरोधितदुपादेयंविपरीतन्तुहेयम् ॥ हातुर्शीय : । ओहाक्० । अचोयत् ईद्यति । गुण : ॥

हेर : । त्रि० मुकुटप्रभेदे ॥ हरिद्रायाम् ॥ आसुर्य्यांमायायाम् ॥ इ० कश्चित् ॥

हेरम्ब : । पुं० विनायके एकदन्ते । लम्बोदरे । विघ्नराजे । गणेशे ॥ हे शङ्करे० रवौ वाणिजसमीपे वारम्बते । रविशब्दे । पोष्ठीपध : । पचाद्यच् । तत्पुरुषेकृतीत्यलुक् । हेडयति स्तम्भते० इतिस्वामी ॥ महिषे ॥ शौर्य्यगर्विते । बुद्धविशेषे । हेरुके । बल्कोक्ते ।

हेरम्बजननी । स्त्री० दुर्गायाम् ।

हेरम्बहट्ट : । पुं० देशविशेषे ॥

हेरिक : । पुं० चरे ॥

हेरुक : । पुं० कामाख्यायांप्रसिद्धेशिवलिङ्गविशेषे । महाकालगणे ॥ बुद्धभेदे । बल्कोक्ते ।

हेलञ्ची । स्त्री० हिलमोचिकायाम् ॥

हेलनम् । न० अवज्ञायाम् । अवहेलने ॥ हेडृ अनादरे । ल्युट् । लडयोरैक्यम् ।

हेला । स्त्री० अवज्ञायाम् ॥ वरयोषितांविलासे । स्त्रीणांशृङ्गारभावजक्रियाविशेषे ॥ आङ्गारसूचकोहावोहेलाऽत्यैवानुभावनम् । अपिच । हाव एवभवेद्धेलाव्यक्त : शृङ्गारसूचक इति ॥ सुरतेप्रौढेच्छायाम् ॥ यदा

च । प्रौढेच्छायातिरूढानां नारीणां सुरते तथा । शृङ्गारशास्त्रतत्त्वज्ञैर्हेलासा परिकीर्त्तिता ॥ हिलभावकरणे । हेल अनादरे वा । डलयोरभेदः । भावेऽच् ॥

हेलाबुक्कः । पुं॰ अश्वविक्रयिणि ॥ इ॰ हारावली ॥

हेलिः । पुं॰ रवौ । सूर्ये ॥ हेलति । हेल॰ इन् ॥

हेलिः । स्त्री॰ हेलायाम् ॥

हेषा । स्त्री॰ हयशब्दे । ह्रेषायाम् ॥ हेषणम् । हेष शब्दे । गुरोश्च हलः ।

हेषी । पुं॰ अश्वे ॥ हेषा॰ अस्त्यस्य । अ ख्यादित्वादिनिः ॥

हैहै । अ॰ सम्बोधने । हूतौ । दूरात् सम्बोधने । हैचहैच ।

है । अ॰ सम्बोधने । आह्वाने । हिनोति । हिगतौ डैप्रत्ययः ॥

हैतुकः । त्रि॰ सद्युक्तिव्यवहारिणि ॥ यथाह मनुः । त्रैविद्यो हैतुकस्तर्की निरुक्तो धर्म्मपाठकः । त्रयश्चाश्रमिणः पूर्वे परिषत् स्याद्दशावरा ॥ हैतुहारासत्कर्मसु मन्देहकर्त्तारः । शुष्कतार्किके । यथा । पाषण्डिनो विकर्मस्थान्वैडालव्रतिकान्शठान् । हैतुकान्वकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेत् ॥ इति विष्णुपुराणे ३ अंशे १८ अध्यायः । पाषण्डादौ नास्तिकान्तु । अपि : स्वधर्मात्पाषण्डे । विकर्मस्थो निषिद्धकृत् । यस्य धर्मध्वजो नित्यं सुरध्वज इवोच्छ्रितः ॥ प्रच्छन्नानि च पापानि वैडालं नाम तद्व्रतम् । वैडालव्रतमस्यास्ति वैडालव्रतिकस्तु सः ॥ प्रियं वक्ति पुरोऽन्यत्र विप्रियं कुरुते भृशम् । व्यक्तापराधचेष्टश्च शठोऽयं कथितो बुधैः ॥ सन्देहकृद्धेतुभिर्यः सत्कर्मसु स हैतुकः । अर्वाग्दृष्टिर्नैष्कृतिकः स्वार्थसाधनतत्परः ॥ शठो मिथ्याविनीतश्च वकव्रतचरो द्विजः ॥ हेतुनाचरति । ठक् । फलाभिसन्धियुक्ते ॥ स्त्री॰ हैतुकी ॥

हैमः । पुं॰ भूनिम्बे । न॰ प्रातर्हिमे । हिमजले ॥ द्रव्यपाकप्रभेदे ॥ यथा । हिमशर्करयोर्द्रवीभूयाभिवर्षति । यत्तदेव हिमं हैमं जलमाहुर्मनीषिणः । हिमाम्बु शीतं पित्तघ्नं गुरु वातविवर्द्धनम् । इति भावप्रकाशः ॥ अन्ये तु । यो निशाधूमितमम्बु समुद्रस्य यद्घनीभूतम् । पवनानीतमुदीच्यां तद्धिममिति कथ्यते मुनिभिः ॥ हिमन्तु शीतलं रूक्षं दारुणं सूक्ष्ममप्यपि । न तु दूषयति शीतं न च पित्तं न वा कफमित्याहुः ॥ त्रि॰ हिमभवे ॥ हैमजाते । हेम्नो विकारे ॥

हैमनः । पुं॰ न॰ हेमन्तर्त्तौ ॥ पुं॰ मार्गशीर्षे ॥ हिमकालीनवर्षत्तक धान्ये । यथा । हैमनास्तु हिमात

ष्य : मधुराबद्धवर्चं सङ्गति ॥ त्रि० हेमन्तसम्बन्धिनि । हेमन्ते त्ये । हेमन्ते जात : • भव : • साधुर्वा । सर्वत्राणुचतलोपश्चेत्यण् ।

हैमन्तम् । न० । पुं० हैमन्तर्त्तौ ॥ त्रि० हेमन्तसम्बन्धिनि ॥ हेमन्तभवे ॥ सन्धिवेलेति • ऋत्वण् ॥

हैमन्तिकम् । न० शालिधान्ये । षा मनधान० इ० गौ० भा० प्र० ।

हैमवत : । पुं० विषप्रभेदे ॥ न० भारतवर्षे । यथा : नाम्ना दृंभारतं वर्षं हिमाद्रेस्तच्चदक्षिणे । तेन हैमवतं नामपरिख्याप्यं वमुद्धयेत् ॥ कुलावृत्तं सोमेरवं सुमेरो : परितो स्थितदिति ॥ त्रि० हिमवति जाते ॥

हैमवतवर्षम् । न० हैमवते । भारतवर्षे । यथा । एतद्धैमवतं वर्षं भारतीयत्र सन्तति : । हेमकूटं परं यत्र नाम्ना किम्पुरुषामतङ्गति ॥

हैमवती । स्त्री० उमायाम् । काल्याम् । पार्वत्याम् । हिमवतोऽपत्यं स्त्री । हिमवतो भवा वा । अण् । ङीप् ॥ गङ्गायाम् ॥ हिमवत : प्रभवति प्रकाशते • तत्र प्रथमं दृश्यतङ्गति यावत् । प्रभवतीत्यण् । स्वर्णक्षीर्याम् । पटुपर्ण्याम् । हिमावत्याम् ॥ इयं पीतक्षीरा नागजिह्वाकाराभवति । यथा । हैमवत्यौपयस्तस्या हिमवद्भूमिसम्भवा । सा नागजिह्विकाकाराम्मूलं वा विज्ञौषधमिति । हरीतक्याम् । श्वेतवचायाम् । हिमवति जाता • भवा वा । तत्र जातङ्गति • तत्र भवङ्गति वा अण् । चोरिण्याम् । रेणुकायाम् । अतस्याम् । कपिलद्राक्षायाम् ॥

हैमा । स्त्री० पीतयूथिकायाम् ॥

हैमी । स्त्री० पीतयूथिकायाम् । हैममय्याम् । स्वर्णकेतक्याम् । चोरिण्याम् । काञ्चनक्षीर्याम् । हिमाद्रिजायाम् ॥

हैयङ्गवीनम् । न० एकरात्रिपर्युषितात् दुग्धात् उत्पन्ने • ह्योगोदोहोद्भवे घृते । तत् हैयङ्गवीनं यत् • ह्योगोदोहोद्भवं घृतमित्यमर : । यथा । हविर्भुक्तं दुग्धोत्थं तत्स्याद्धैयङ्गवीनकम् । हैयङ्गवीनं चक्षुष्यं दीपनं रुचिकृत् परम् । बलकृद्बृंहणं वृष्यं विशेषात् ज्वरनाशनम् ॥ ह्योगोदोहस्य विकार : । हैयङ्गवीनं संज्ञायामिति ह्योगोदोहस्य हियङ्गुरादेशो विकारार्थे खञ्च निपात्यते । नवनीते ।

हैरण्यगर्भ : । पुं० स्वायम्भुवमनौ । हिरण्यगर्भस्यापत्यम् । अण् । हिरण्यगर्भोपासके ॥

हैरिक : । पुं० चौरे ॥

हैहय : । पुं० कार्त्तवीर्ये । एकवीरनृपे । हय्याऽपत्यम् । स्त्रीभ्यो ढक् । पृषोदरादि : । यद्वा । हेहयेन हैहया • नामैकदेशेन नामग्रहणात् । हेहा शब्दं कुर्वन् हयति गच्छतीति हेहय :

ध्वस्तस्यायं हैहयः। यद्वा। हेमन्त•
हेमन्तमिव दहनं हयति गच्छतीति हेह
यो विष्णुस्तस्यायं हैहय। देशविशे
षे॥ यथा। पश्चिमे हैहयास्ताद्रिम्ले
च्छा यासमलाद्य इति कूर्म्मचक्रम्॥

हैहयः। पुं• कार्त्तवीर्य्ये। इ• म•
र• लौ॥

हो अ• विस्मये। सम्बोधने। आ
ह्वाने। ह्वानम्। आह्वाङ्गतौ॥ डो
प्रत्ययः॥

होडः। पुं• तराम्बौबहने। भ• कु
डौ• धू• गौ• दे• भा• प्र• नौका
विशेषे॥ न• लोप्त्रे। चौरधने।

होडा। स्त्री• बालिकायाम्। वयसि
प्रथम इति ङप्यजाधित्वादिस्वा
टाप्।

होडा। पुं• चौरे। ऋकारान्त॥ इति
कश्चित्॥

होढम्। न• चौरकर्तृकहृतधने।

होता। पुं•। ऋग्वेदविदि। देवाना
माह्वानकर्त्तरि• ऋग्वेदर्त्विजि
॥ अग्नेर्देवानां ह्वातेति श्रुतिरग्नौ।
होमकर्त्तरि। जुहोति। हुदानाद
नयोः। नप्तृनेष्टृत्वष्टृहोतृपोतृ
भ्रात्रादिना साधुः। तन्त्रिधात्व
स्विच्चानुपसर्गस्येति तृन्वा॥

होत्रम्। न• हविषि। हूयते। हु•
। हुयामाश्रुभसिभ्यस्त्रन्।

होत्रा। स्त्री• ऋत्विजि॥ टाप्॥

स्तुतौ॥

होत्री। स्त्री• यजमानरूपायांशिवमू
र्त्तौ।

होत्रीयम्। न• होमालये। वि• हो
त्रसम्बन्धिनि।

होमः। पुं•। पञ्चमहायज्ञेषु दैवयज्ञः।
साध्यमात्रमनयोः॥ सावित्रघृतहो
मादौ। हवने। देवतोद्देशेनाग्नौ
हविःप्रक्षेपे। यागएवस्वस्व
मानद्रव्यस्याग्नौप्रक्षेपःद्धोमइत्यु
च्यते॥ अथानुकल्पश्चोक्तम्। ऋ
त्विक्पुत्रोगुरुर्भ्राताभागिनेयोऽथवि
ट्पतिः। एतैरेवहुतं यत्तुतद्धु
तं स्वयमेवहीति। हवनम् हु•।
अर्त्तिस्तुसुहुस्रितिमन्॥

होमकः। पुं• होतरि।

होमकुण्डम्। न• हवनस्थानम्।

होमधान्यम्। न• तिले।

होमधूमः। पुं• निगणे। इतिहेमच
न्द्रः॥

होमभस्म। न• वेष्टुते॥

होमाग्निः। पुं• यज्ञाग्नौ। महा
ज्वाले। महावीरे॥

होमिः। पुं• पावके। अग्नौ। घृ
ते॥

होमी। पुं• होमकर्त्तरि जुहोति।
हु•। उल्मुकाद्ये होमिनइतिजु
होतेर्मिनिः॥

होमीयः। वि• होतव्यद्रव्ये।

होम्यम् । न० घृते ॥ त्रि० होमीयद्रव्यमात्रे ॥

होम्यधान्यम् । न० तिले । पितृतर्पणे ॥

होरा । स्त्री० रेखाप्रभेदे । शास्त्रविशेषे । लग्ने ॥ राश्यर्द्धे ॥ तथाहि । विषमर्क्षेषु प्रथमा होरा : सूर्यस्य होरेति च : । द्वितीया : शशिनो बुधैः व्यत्ययाद्गणयेत् सदा । मेषमिथुनसिंहतुलाधनुःकुम्भेषु प्रथमार्द्धं सूर्यस्य० द्वितीयार्द्धे चन्द्रमसो होरा वृषकर्कटकन्यावृश्चिकमकरमीनेषु प्रथमा होरा चन्द्रस्य० द्वितीया सूर्यस्येत्यर्थः ॥ मार्त्तण्डमुहूर्त्तयुजि० समभे चन्द्रभान्वोस्तु होरे विषमे तदुत्क्रमम् । सार्द्धदण्डद्वयात्मककाले । घौसर० तुर्कि० शब्दोऽयं यवनभाषाप्रसिद्धः ॥ यथा । चतुर्विंशतिहोराभिरहोरात्रं प्रचक्षते पश्चिमादर्द्धरात्राद्वि होराणां विद्यते क्रमश इति वह्निपुराणम् ॥ होलति० हुल्यते वा । हुल हिंसासंवरणयोः । पचाद्यच्० घञ् वा । रक्षायै रक्षत्वम् ॥

होलकः । पुं० तृणाग्निना भृष्टार्द्धपक्वशमीधान्ये । होरहा० होला० इति लोकप्रसिद्धे । यथा । अर्द्धपक्वैः शमीधान्यैस्तृणभृष्टैश्च होलकः ॥ होलकोऽल्पानिलो मेदः कफदोषश्रमापहः । भवेद्यो होलको यस्य तत्तद्गुणो भवेत् ॥

होलाकः । पुं० स्वेदविशेषे । यथा । धीतीकां तु करीषाणां यथोक्तानां प्रदीपयेत् । शयनस्य प्रमाणेन शय्यामुपरि तत्र च ॥ सुदग्धायां विधूमायां यथोक्तामुपकल्पयेत् । स्वच्छन्नः सुखं तत्राभ्यक्तः स्विद्यति नातुरः । होलाकस्वेद इत्येष सुखः प्रोक्तो महर्षिणा ॥ धीतीका० शुष्कगोमयकृताग्निविशेषः । इति चरकसूत्रस्थानम् ॥

होलाका । स्त्री० वसन्तोत्सवे होलिकायाम् । होली इ० भा०

होलिका । स्त्री० फाल्गुन्याम् । भविष्यपुराणोक्तोत्सवे । अस्याः निर्णयमाह कालिदासः । हुताशनीं फाल्गुनपूर्णिमायां निशीथपूर्वां स्नानयेच्छुभार्थी । पश्चात्तमीतज्ज्वलमिद्धमन्यत् प्रत्यक्षविपद्यतिर्वा । सूर्यास्तकालादधिकैव पूर्णिमाऽधिका महाना कलया तदाकृते । ग्राह्यस्तदर्ज्ज्वलिता हुताशनी नन्दातिथौ स्यादृजसत्स्मृतः प्रिये । रिक्ताश्विता ग्रह्युतातपूर्णिमानियास्तगीतदृज्ज्वलभैरवाविह । विहितस्तु न ग्राह्यता यानदोषकृत्तथा पर गपरिपूर्णमा रजः ॥ ४५ ॥ पर्यन्तु । निशीथपूर्वमिध्यरात्रतथादिमां हुताशनीं नयेत् कुर्यात् । द्विकर्मकोनी : ॥

अपुन : पश्चात् समीतज्वलने • मध्य रात्रत. पश्चात् तस्यामिप्रासंगत् ज्वलनवतस्मिन् २ वा अथवादिवा दिने हुताशनोऽज्वलने सति पतति : प्रतिपत् वा नूपश्चिये राज्यलक्ष्मीर्हन्ति ॥ सूर्यास्तेति । यदा सूर्यास्तकालाव धि : सूर्यास्तसमयं यावत् पूर्णिमा एव निर्धारणे वा अथवा कलया अ शेन • अ धिका वा जना होना हुताशनो स्यात् तदा क्रमेण हे सति तत् ज्वलिता हुता शनोऽग्निलिका स्यात् । अपुन : रज सारेण नाशस्सव : श्रियै स्यात् । क स्मिन् नन्दातिथौ प्रतिपत्तिथौ ॥ रि क्तेति । ज्वलने होलिका ज्वलने रि क्तान्विता चतुर्दशीयुक्ता • उतप यद्युक्ता प्रतिपद्युक्ता पूर्णिमा नेया । रवौ सूर्येऽस्तगे सति • हुहोलिका याम् • तुं र वधारणे विष्टिभद्रादोषक्रम स्यात् । का ग्रातप्नस्यतया होलिका या मित्यभावात् । तथा उपरागं ग्रहणं दोषक्रमतया परिपूर्णिमा रजोदोष कुक्रमस्यादिति ॥ ४५ ॥ इतिज्यो तिर्विदाभरणे २१ ऽध्याय : ॥

हौहो । अ • सम्बोधने । हुतौ । आ कारणायाम् । अ : ह्वाने ॥

हौ । अ • सम्बोधने ॥ आह्वाने ॥

हौत्रम् । न • ऋत्विद्विहिते ॥ उद्गा त्रादिभ्योऽञ् ॥ होतु : कर्मभावयो : ॥ युवादित्वादण् ॥

हौम्यम् । न • घृते । त्रि • होमार्हे द्रव्ये ॥

हौम्यधान्यम् । न • तिले ॥ हौम्यस्वत दृधान्यञ्च ॥

ह्यः । अ • गतेऽह्नि । यातमह : । पृ षोदरादि : । एषमोह्य : श्वसोन्य तरस्यामिति निर्देशाच्चानुकूल: ॥

ह्यस्तनम् । त्रि • ह्योभूते । अतीतेऽह्नि जाते ॥ ह्योभवम् । ऐषमोह्य : श्व सोन्यतरस्यामिति पक्षे त्यप् त्यु लौ ॥

ह्यस्त्य । त्रि • ह्यस्तने ॥ ह्योभवम् । ऐ षमोह्य: श्वसोऽन्यतरस्यामिति त्यप् ॥

ह्योगोदोहिकम् । न • हैयङ्गवीने । दु ह्यतइति दोह : । गोर्दोह: । गोदो ह : । ह्यस • सुप् सुपेति समास : । ह्योगोदोहाद्भवति । भू • । अच् ॥

ह्रद : । पुं • अगाधजले । यत्रपाता लादुदकमागच्छति स्वयमेव स ह्रद : । तत्र जलगुणास्तु । ह्रदवारि वह्निजन नं मधुरं कफवातहारि पथ्यञ्चेति ॥ ह्रादते । ह्राद अव्यक्ते शब्दे । पचाद्य च् । पृषोदरादित्वाद्ध्रस्व ॥ धीरे ॥

ह्रदयह : । पुं • जलशूकरे । कुम्भीरे ॥

ह्रदालयेश : । पुं • सरोविशेषे । रैवा त्सर • इ • भा • प्र • । कोपद्या • इ • मह : पोनभा • ॰ • । यथा । ह्रदालया : सुरा : सर्वे तेषामीशो जगद्गुरु : । ह्रदालयेश्वराख्यस्तु तेरै वपरिसेवितइति स्कन्दपुराणम् ॥

ह्रदालयेश्वर:। पुं॰ ह्रदालयेशस्थशिवे ॥

ह्रदिनी। स्त्री॰ नद्याम्। सरिति ॥ ह्रदा: सन्त्यस्याम्। अतइनि:। ङीप् ॥

ह्रसिमा। पुं॰ ह्रस्वत्वे ॥ ह्रस्वस्यभाव:। पृथ्वादित्वादिमनिच्। स्थूलदूरेतिसाधु: ॥

ह्रसिष्ठ:। त्रि॰ अतिह्रस्वे। ह्रस्वतमे ॥ अयमेषामतिशयेनह्रस्व:। इष्ठनि स्थूलदूरेतिसाधु: ॥

ह्रसीयान्। त्रि॰ ह्रस्वतरे ॥ अयमनयोरतिशयेनह्रस्व:। ईयसुनिस्थूलदूरेतिसाधु: ॥

ह्रस्व:। पुं॰ द्व्यणुके ॥ एकमात्रवर्णे ॥ न॰ परिमाणविशेषे ॥ यथा। अणुदीर्घंमहद्ध्रस्वमितितच्चतुर्विधमिति ॥ गौरसुवर्णशाके। पुष्पकासीसे ॥ त्रि॰ प्रकृतपुरुषपरिमाणात्॰ न्यूनमनुष्ये। खर्वे। वामने। बौना॰ इ॰ भा॰ प्र॰ ॥ क्षुद्रवस्तुमात्रे। वामने। न्यचि। नीचे। खर्वे ॥ ह्रसति॰ ह्रस्यतेवा। ह्रसशब्दे। बाहुलकाद्व:। उल्वादिर्वा।

ह्रस्वकुश:। पुं॰ श्वेतकुशे ॥

ह्रस्वगर्भ:। पुं॰ कुशे ॥

ह्रस्वगवेधुका। स्त्री॰ नागबलायाम्। काँगहीतिख्यातायाम् ॥ गवेधूमीएधते। एध॰। बाहुलकादु: संज्ञायांकन्। ह्रस्वासौगवेधुकाच ॥

ह्रस्वजम्बु:। स्त्री॰ क्षुद्रजम्ब्वाम् ॥

ह्रस्वतण्डुल:। पुं॰ राजान्ने ॥

ह्रस्वदर्भ:। पुं॰ श्वेतकुशे ॥

ह्रस्वदा। स्त्री॰ शल्लक्याम् ॥ इतिराजनिर्घण्ट: ॥

ह्रस्वपत्र:। पुं॰ गिरिजमधूकागमे ॥

ह्रस्वपत्रिका। स्त्री॰ अश्वत्थ्याम् ॥

ह्रस्वप्लव:। पुं॰ क्षुद्रप्लवघ्ने। पुण्ड्रे। ह्रस्वपर्णे। पीवरे ॥ गुणास्तु। स्वादु: कटु: कषायश्चशिशिरोरक्तदोषजित्। मूर्च्छाभ्रमप्रलापघ्नोह्रस्वप्लवोविशेषतइति ॥

ह्रस्वफल:। पुं॰ मधुनालिकेरे ॥

ह्रस्वफला। स्त्री॰ भूमिजम्ब्वाम् ॥

ह्रस्वमूल:। पुं॰ रक्तेक्षौ ॥

ह्रस्वशाखाशिफ:। पुं॰ ह्रस्वशाखामूले। क्षुपे ॥ शाखाच॰ शिफामूलञ्चतेशाखाशिफे। ह्रस्वे शाखाशिफेयस्य स: ॥

ह्रस्वा। स्त्री॰ खर्वायाम्। वामन्याम् ॥ नागबलायाम् ॥ मुद्गपर्ण्याम् ॥ भूमिजम्ब्वाम् ॥

ह्रस्वाग्नि:। पुं॰ चित्रके ॥ इयाग्नौ ॥

ह्रस्वाङ्ग:। पुं॰ अष्टवर्गगतजीवकौषधौ। कूर्चशीर्षे ॥ ह्रस्वान्यङ्गान्यस्य ॥

ह्रस्वैरण्ड:। पुं॰ रक्तैरण्डे ॥

ह्राद:। पुं॰ स्तनिते। गर्जिते ॥ श

ब्दे । हिरण्यकशिपोः कनीयसि पुत्रे ।

ह्रादनिः । पुं॰ गर्जितशब्दे ।

ह्रादी । त्रि॰ सशब्दे ।

ह्रादिनी । स्त्री॰ वज्रे । ह्रादयत्यवश्यम् । ह्राद अव्यक्ते शब्दे । आवश्यके णिनिः । ह्रादः स्फूर्जथुरस्त्यस्या इति वा । ङीप् । तडिति । विद्युति । ह्रादोऽव्यक्तशब्दोऽस्त्यस्याः । इनिः । अव्ययवृत्तेरित्यस्य नित्यत्वं यस्मादिति वष्ठार्थः । शल्लक्याम् । गजभक्ष्यायाम् । सुवहायाम् । नद्याम् । ह्लादयत्यवश्यम् । ह्लादी सुखेच । आवश्यके णिनिः । रलयोरैक्यम् ।

ह्रासः । पुं॰ शब्दे । अभिलापे । ध्वनौ । यथा । शब्दाभिलापोऽप्यभिधाऽभिधानं वा वचोध्वनिः । ह्रासः कुहरितश्चेति मुद्राङ्कितत्रिकाण्डशेषः ॥ आरवे । चये । यथा । ह्रासश्चोपसततं दिनरात्र्योर्यथाक्रमम् । सन्ध्यामुहूर्त्तमाख्यातं ह्रासश्चोपसमेति ।

ह्रिबेरम् । न॰ हरिवेरे । ह्रीवेरे । इ॰ हि॰ च ।

ह्रीः । स्त्री॰ लज्जायाम् । अकार्य्यप्रवृत्त्या रम्भे तत्प्रतिबन्धिका या लोकलज्जा तस्याम् । ह्री लज्जायाम् । सम्पदादित्वात् क्विप् । पार्वत्याम् ।

ह्रीकः । पुं॰ काके । नकुले । सद्देवे । त्रि॰ लज्जिते । जिह्रेति । ह्री॰ । ह्रियो रश्च लोवेतिकन् ॥

ह्रीका । स्त्री॰ त्रपायाम् । लज्जायाम् । टाप् । त्रासे ।

ह्रीकुः । पुं॰ जतुके । त्रपुणि । वालि । मार्ज्जारे । त्रि॰ अप्रगल्भे । अप्रगल्भे । सलज्जे । लज्जिते । जिह्रेति । ह्री॰ । ह्रियः कुकरश्च लोवा । क्वित्त्वान्नगुणः ।

ह्रीकूः । स्त्री॰ भृङ्गि ।

ह्रीजितः । त्रि॰ सलज्जे । लज्जाशीले । लज्जिते । ह्रिया जितः ।

ह्रीणः ।)
ह्रीतः ।) त्रि॰ लज्जिते । सपत्रे ॥

अक्षेपोत् । ह्री॰ । क्तः । नुदविदोन्दत्राघ्राह्रीभ्योन्यतरस्यामिति निष्ठातस्य नो वा ।

ह्रीता । स्त्री॰ लज्जितायाम् । ह्रियः कर्त्तरि क्तः ।

ह्रीवेरम् । न॰ सुगन्धिवाला॰ इ॰ भा॰ प्र॰ गन्धवस्तुनि । तत्पर्य्यायो यथा । वालं ह्रीवेरवर्हिष्ठोदीच्यं केशाम्बुनामचेति । गुणास्तु । ह्रीवेरं शिशिरं ह्रासतृष्णातीसारनाशनमिति राजवल्लभः । ह्रीयुक्तं वेरमस्य ।

ह्रेपितः । त्रि॰ ह्रियं लज्जां प्रापितः । जिह्रेतेर्ण्यन्तात् कर्म्मणि क्तः । अर्त्तिह्रीत्यादिना पुगागमः । *

ह्रेषा । स्त्री० अश्वशब्दे । ह्रेषायाम् ॥ ह्रेषणम् । ह्रेषृशब्दे । गुरोश्च हलः । टाप् ।

ह्लादः । पुं० आह्लादे । प्रमोदे ।

ह्लादकः । त्रि० ह्लादकारिणि ॥ आकर्षादिभ्यः कन् ॥

ह्लादि: । त्रि० । आह्लादके ॥

ह्लादी । त्रि० । ह्लादविशिष्टे ।

ह्लादिनी । स्त्री० वज्रकायाम् । गजभक्ष्यायाम् ॥ ह्लादयत्यवश्यम् ; ह्लादि सुखे च । आवश्यके णिनिः ॥ शक्तिविशेषे । यथा । ह्लादिन्या संविदाश्लिष्टः सच्चिदानन्द ईश्वरः । स्वाविद्यासंवृतो जीवः संक्लेशनिकराकरः ॥

ह्लीकः । पुं० नकुले ॥ सहदेवे ॥ त्रि० लज्जिते । सत्रपे । जिह्रेति । ह्री० । ह्रियो रश्चलो वेतिकन् ॥

ह्लीका । स्त्री० त्रपायाम् । लज्जायाम् ॥ जिह्रेति । ह्रीलज्जायाम् । ह्रियो रश्चलो वेतिकन् । टाप् ॥

ह्लीकुः । पुं० जतुनि ॥ त्रपुणि ॥ बाले । मार्जारे । त्रि० लज्जिते ॥ अप्रशस्ते ॥ अप्रगल्भे ॥ जिह्रेति । ह्री० । ह्रियः कुक् रश्चलो वेति कुक् ॥

ह्लीकूः । स्त्री० धरित्र्याम् । भूमौ ॥

ह्लेषा । स्त्री० ह्रेषायाम् ।

ह्वरणम् । न० कौटिल्ये ॥ मूर्तीरूप्य

मिषन्नीवभुजगो विश्वं यदज्ञानतः प्रोन्मीलत्यथ तन्निमीलति तरां यज्ज्ञानतः सर्वतः ॥ ध्यात्वा निष्क्रियम् अद्वितीयममलं सच्चिद्घनं व्यापकं स्वात्मानं सकलाश्रयं श्रुतिशिरः सारं सदोपास्तताम् ॥ १ ॥ श्रीमच्चिद्घनदात्मकं हरिहरानन्दाभिधं निजश्रीमद्गुरुमजस्रमेकमतुलं संसारपाशच्छिदम् ॥ नत्वा तच्चरणाम्बुजन्मसुखपूर्णानन्दनाथो मुदे । साधूनां सुधियां चकार सुखदं शब्दार्थचिन्तामणिम् ॥ २ ॥ सत्त्यष्टाङ्कधरामितवर्षे चैत्राङ्गिरोनाम्नि माघासितसप्तम्यां शनौ समाप्तिं गतो ग्रन्थः ॥ श्रीसुखानन्दनाथस्य कृतिर्बुधजनहिता प्रीत्यै भूयाद्भगवती भवानी विश्वमायया: ॥ इति श्रीहरिहरानन्दनाथभारतीशिष्यब्राह्मणावधूतश्रीसुखानन्दनाथसङ्गृहीतः शब्दार्थचिन्तामणिः समाप्तः ।

श्रावण कृष्णसप्तम्यां द्विवेदाङ्कशशाङ्कमिति वैक्रमेऽब्दे शब्दार्थचिन्तामणिकोशः पण्डितवंशीधरवाजपेयिनोऽधिकारेण मुद्रितः

ॐ

तत्सत्

१८१७

श्रीएकलिङ्गो विजयते ।

॥ श्रीगणेशाय नमः ॥

राजवंशवर्णनम्

ब्रह्माण्डज्ञानावगम्यं निखिलनिधिकरं
सूर्यवंशोद्धरीयं नत्वा विख्यातकीर्ति
नृपतिकुलमणेर्बप्पनाम्नाधिपस्य ॥
तत्सूनोः कीर्तिमूर्तेः फतहपदयुतः
सिंहशब्दोऽपनाम्नि वंशश्रेणीं विशालां
रचयति सर्ववंश्यामलख्यातिदेशात्
॥ १ ॥ भानोर्वंशस्य मध्ये रघुकुल
तिलकः श्रीसुमित्रोऽभूत् जातो वंशे
तदीये नरपतिविजयः शत्रुविच्छिन्न
शक्तिः ॥ त्यक्त्वायोध्यां स भूपो यम
दिशि कृतवान् विस्तृतं स्वीयराज्यम्
देशे सौराष्ट्रभागे नगरमतिधनं वल्लभी
पौरसंज्ञम् ॥ २ ॥ तस्मिन्वंश्या
स्तदीया बहुसमयतया राज्यभाजो
बभूवुस्तेषामन्त्यो नृपालो कुटिलविधि
वशाद्यः शिलादित्यसंज्ञः ॥ युद्धे
नष्टस्तु सेनाकुलजनसहितः शत्रुपक्ष
स्य सैन्यात् तद्भार्या गर्भयुक्ता प्रमरकुल
भवानामपुष्पावतीश्चा ॥ ३ ॥
तामाख्युमंनुष्यामृदुलतनुतया पद्म
सौंदर्यदेहा कस्मायांचागतायां बहु
विपद्दिशि शैलेजन्मजातं स्थितम ॥
तत्पुत्रो दीर्घजीवी नृपचिरतनुबलोऽभिश
बादित्यनामा भाण्डेरे वेडरादौ नृपति
कुलमणिर्दीर्घराज्यं चकार ॥ ४ ॥
नागादित्यः क्षितीशोऽप्यकृत सुखतया

नागद्रायामराज्यं भोगादित्यो नृपालो ।
निजगुणविदितो नीतिविद्याप्रसिद्धः
। शीलादित्योऽपि भूपः स्वजनगण
स्थितौ दौर्घतौ शोभमहान्तावहारैर्द्रव्य
पूर्णं बहु न सुखतया चक्रतुस्तौ च राज्यम्
॥ ५ ॥ तीर्थं गङ्गेऽनाश्यं सकलजन
हितं तत्प्रभावात्प्रसिद्धं देवादित्यो
नृपोऽभूत्परमहितकरः कालभोजो
नृपालो ॥ गेहादित्यो नृपोऽभून्निखिल
जनहितस्तत्सुपुत्रो हि बापा श्रीमान्
धीरो नृपालो विपुलबलयुतो रावलेति
प्रसिद्धः ॥ ६ ॥ तस्मादप्यधिलीशा
विपुलरणमदा रावलाख्यातिमन्तो
बापाभूपेन चस्या विधुजवतुरगैर्विक्रमे
मानसिंहम् ॥ मोरीत्या तेगृहीतं प्रबल
नयतया चित्रकूटस्य राज्यं तस्मै रुद्रेण
दत्तं परमकरुणया मेदपाटीयराज्यम् ७
गौरीनाथप्रसादात् तदधिसमयात्
तद्वंशेऽस्मिन् राज्यं बापाभूपः सुरपं
गगनविधुगजैर्वैक्रमे शैरदेशे । स-
न्यासध्वस्तदेहो यमनियमरतश्चोर्ध्वलो
कं जगाम सर्वकोशैकलिङ्गौ बहुस
मयवशात्सोऽपि भूतसमाधिः ॥ ८ ॥
सोऽयं वर्धति धीरो बहुनृपतिगणास्त-
त्कुलेसं तमुख्याः तत्सुतः ख्यात-
कर्मा नयपटुगुणिकस्तस्य वंश्या चनेके ।
तानाहुर्गाहलोतान्सकलजनहितान्
तत्पुत्रो विभोजः तत्पुत्र शीलसंज्ञो
बहुधनविभवः कालभोजस्तु तस्य ॥ ९

॥ तत्सूनुर्विंहसिंहोनिखिलगुणनिधि
र्भर्तृहर्य्यांख्यभट्ट:सोदयोलोकविज्ञ:
सकलगुणनिधि:सर्वशास्त्रैकदक्ष:।
तत्पुत्रश्चाघसिंह : खलभिदसमहा
थैकपुत्रो विष्णाख्यस्तत्पुत्रोवैखुमाण :
परम हितरतस्मात्तटोभूत्सुवर्मा १०
नरवाहनसूनुश्चशूरविधुश्चन्द्रवी ॥
थेसर्वराज्यभोक्तारौ क्रमाब्देसमाभ
वन्११यशोकुमारएवासीत्सुचिवर्मा
तत:परं ॥ नरवर्माश्चसूनुश्च कीर्ति
वर्माचनन्तरम् ॥ १२ ॥ वैरडोऽ
भूत्ततत्पुत्रो वैरीसिंहस्ततोभवत् ॥
पश्चाद्विजयसिंहोभूद्‌ररिसिंहस्तथै
वच ॥ १३ चोडसिंहोस्यसूनुश्च
खलुविक्रमसिंहक : ॥ तत्सूनु :
क्षेमसिंहोथ सामंतासिंहएवच १४
तत : कुमारसिंहोभूत् तस्मान्मथ-
नसिंहक : ॥ पद्मसिंहोभवत्तस्य
तत्पुत्रोजैत्रसिंहक : ॥ १५ ॥
तेज : सिंहाभिध :पुत्र स्ततस्समर
सिंहक : ॥ विधुविलोकचन्द्राब्दा
द्‌तिबेदविभूमिकम् ॥ १६ ॥
उक्तवर्षो हराज्यस्य : तत्सूनु : कीर्ति
मान्भ्रवौ ॥ रत्नसिंहोन्नृपालोभूत्
महायुद्धंतदाभवत् ॥ १७ ॥ अति
मानीचदिल्लीशो प्यलाउद्दीननामा-
मक : ॥ खिलजीपदसंयुक्त चित्र-
कूटसमागमत् ॥ १८ ॥ तेनसार्कम
हद्युद्धंनवपंचचिचन्द्रके। रत्नसिं-
हस्यपुत्रोभूत् कर्णसिंहोमहाबली १९
तत्पुत्रोराहपस्तेन त्यक्तं चेरावल-
पदं ॥ महाराणाख्य पदवीगृहीता-
तेनभूभुजा ॥ २० ॥ नरपतिश्चत-
त्पुत्र स्ततोदिनकरोन्नृप : ॥ तस्मा-
त्क्षेमोयशस्कर्णो नागपालस्ततोभवत्
२१ पूर्णपालाभिध :पश्चात्पृथ्वीपा
लस्ततोभवत् ॥ भूणसिंहोभवत्तेन
चित्रकूटं हियुवत : २२ तस्मात्तेभा
चपुनर्नीतं नयबुद्धिविचारत : ॥
ततोभवद्भीमसिंह स्तत्सूनुरर्यसिं
हक : ॥ २३ ॥ लक्ष्मण:सतस्तौ
जातौ युद्धंतत्समयेभवत् ॥ तुग्ल
कोपाधियुक्तोदिल्लीशोहिमुहंमद: २४
महत्यासेनयासार्द्धं चित्रकूटसमा
ययौ ॥ दारुणं युद्धमभवत् तस्मि
न्नष्टा : सहस्रशा : २५ सैनिका :
स्त्रोयलोकाच चित्रकूटं तदागतं भ्रा
तरश्चाष्टसंख्याका स्तथैवाद्यसून
व : २६ एतेसर्वेरणेकृत्वा वीरतांस्व
र्गतिं गता : एकएवावशिष्टोयं हाद
शोजयसिंहक : ॥ २७ ॥ पश्चा
त्सजैत्रसिंहोभूत् सकृत्वावीरतांग
त : ॥ पश्चाद्‌जयसिंहोपि गत पव
समस्तके ॥ २८ ॥ प्रतीच्यां
मेदपाटस्य सन्तिपर्वतभूमय : ॥ त
त्रस्थितिंचकारासौ भिल्लानांचसहाय
त : ॥ २९ ॥ अरिसिंहस्यच : पुत्रौ
हम्मीरोहिमहाबली ॥ चित्रकूटग

ढंतैन ग्ले च्छान्नीतं बलात्पुन : ३०
तदाधिकारं कुर्वाणो बहुवारं समागत
म् । हम्मीरस्त : स्वेवसिंहोन्म्ले च्छान्स
जितवान्बली ॥ ३१ ॥ तत्सूनुर्ल
चसिंहोऽस्य चुंडाज्येष्ठोऽहि पुत्रक : ॥
गिरस्थानां पितुर्धृत्वा सतुराज्यं स्व
कंददौ ॥ ३२ ॥ मोकलायकनिष्ठा
यस्वभ्रातेच महामति : पितुराज्ञांस
मादाय यथा रामस्तथाकरोत् ॥ ३३ ॥
स्वयं मोकलसेवायां स्थित्वा कालं नि-
नायस : ॥ चंडावताख्यया ख्याताः स्त
द्वंश्यास्तु महीतले ॥ ३४ ॥ मोकलस्य
सुतो वीर : कुंभकर्ण : प्रतापवान्शून्यां
कवेद्चन्द्रे ब्दे वै क्रमे राज्यमाप स :
॥ ३५ ॥ युद्धे मांडुपतिं म्ले च्छं खि-
लजीमहमूदकं ॥ बलाज्जित्वा च सं-
गृह्य कारागारे न्यवेशयत् ॥ ३६ ॥
लोबहान्तं तदादत्वा पुनस्तं निरमो-
चयत् ॥ चित्रकूटे जयस्तंभ स्तम्भश्र-
ेयमहात्मन : ॥ ३७ ॥ पंचशून्ये-
षुचन्द्रे ब्दे निर्मित : सूचनायस : ॥
सर्वित्र्वर्तिताद्यापि तवसं तिष्ठते
स्वयम् ॥ ३८ ॥ गुर्जराधिपतिं म्ले च्छं
कुतबुद्दीननामकम् ॥ नागौराद्रि-
पतिं सर्वान्बहुवारं जिगाय स : ३९
कुंभकर्णस्य वांशावलवसंख्याप्रमा
णत : । चतुर्देववर्षैरम्ये निर्मितं
चावलं गढम् ॥ ४० ॥ कुंभलमेरकं
दीर्घं गढं सोऽपि विनिर्ममे । कुंभव-

कुसुखं कर्मकृतं तेन महीतले ॥ ४१ ॥
कुंभकर्णस्य पुत्रोऽभूदूदाभूपोऽभवत्तदा
। पंचहिपंचचंद्रे ब्दे हत्वा स्वपितरं
शठ : ॥ ४२ ॥ एतत्कुकर्मत : सर्वे
रुष्टास्तदधिकारिण : । स्वविपंच
विधोर्वर्षे मिलित्वा मेदपाटजै : ४३
पदच्युतश्च सकृतो देशान्निष्कासित :
पुन : । कुंभकर्णस्य च : पुत्रोऽहितो
ऽरायमल्लक : ॥ ४४ ॥ तं राज्ये
स्थापयामासुः सर्वे राज्याधिकारिण :
। पंचषट्कामचंद्रे ब्दे रायमल्लो
दिवंगत : ॥ ४५ ॥ रायमल्लज
संग्रामसिंहस्तत्पदे भवत् । यं सांगा
पितगुर्जरिका : सोऽतिवीरोद्भटो
भवत् ॥ ४६ ॥ मांडुदेशपतिं म्ले-
च्छं खिलजीमहमूदकं । युद्धे जि-
त्वा च रुद्ध्वा हि मोचयामास सादरम्
॥ ४७ ॥ तस्मै दत्तं धनं भूरि किरीटा
दिकभूषणम् । स्वस्थाने स्थापया
मास यथा च योगतश्च स : ॥ ४८ ॥
विंदाष्टरसवद्धेऽब्दे बयानाख्यमसंनि-
धौ । बाबराख्यादभूद्युद्धं तस्मिन्नव-
चाहतास्तदा : ॥ ४९ ॥ अस्मिन्वि-
द्धो महीपालो रणथंभोरके गढे ।
तस्मिन्वर्षे च तत्रैव दिवं यात : स-
भूमिप : ॥ ५० ॥ तत्सूनुरत्नसिंहो
हि राज्यं प्राप प्राज्ञित गजाहवश्च
चन्द्रेऽब्दे रसीक गमीहित : ॥ ५१
अनिष्टस्तस्य हि भ्राता विक्रमादित्य

लामकः । राज्यासनेसमारूढो
दुराचाररतः सदा । ५२ ॥
मयाष्टपंचचन्द्रेऽब्दे गुर्जरप्रतिपा-
लकः । बहदुराभिधेनात्र कश्चिच्चित्र
कूटं समारुधत् ॥ ५३ ॥ ततो
मनिवर्तमस्याद्रव्यं घसप्रसादितः
। पुनर्विध्वंकपत्तन्दौचित्रकूटमरी
धयत् । ५४ । तदाश्चिविक्रमादि
त्यः कनिष्टभ्रातसंयुतः । मातु
लालयबुंदाख्यं विप्रभीतः समाग
मत् ॥ ५५ । तन्मातास्मरवत्या-
ख्या चैकीकृत्य निजान्जनान् ।
सर्वान्नरत्यसमाराष्ट्रीतेनसाकंस्व-
येऽभवत् । ५६ । स्वखसुन्य
त्रिलोकाद्य कर्शियाः स्वर्गतारचौ
लयेऽद्रव्यसमराष्ट्रवियोद्ध्याघवक्षि
म् ॥ ५७ ॥ राज्ञीकर्मवतीवी
रास्वकृत्वाक्षवीरतां राज्ञामपेयसं
प्रपद्विवंशतासु निर्भया । ५८ ॥
चित्रकूटेऽधिकारेऽमूत्तदातद्दष्टभूप
तेः । कुमायुंनामदितुल्लोखिशवाये
मेदपाटके । ५९ । चित्रकूटेसमा
याते तस्माद्दुर्जराधिपः ॥ निजसि
न्धिसमाधावचित्रकूटाद्विनिर्गतः ६०
कुमायुंबादशाहस्तुसमुद्रतटपारगः
। ततोऽगनाबसंप्राप्तः तद्दासौनीव
यागतः ॥ ६१ ॥ पुरंगीजजनैस्सा
र्धं देवांतरिपनामकं ॥ कुंभीमगारस
द्दूर्णौविक्रमादित्यआगतः ॥ ६२ ॥

तत्रराज्यं चकाराशौतद्दुराचारतोऽज
नाः ॥ मेदपाटीयसैरुकानां जासैषा
नुमतिः परा ॥ ६३ ॥ तस्माच्च
राणमल्लस्यपृथ्वीराजी यदेहजः । सं
ग्रामस्याभ्रातुष्टदासौऽजावणवीर-
कः ॥ ६४ ॥ मिलित्वा विक्रमादि
त्यं द्राक्पंचत्वमिष्टाकरे ॥ अथान
दुष्टकर्माणमोश्वरेच्छावलीयसी ६५
धात्रीह्युदयसिंहस्यगोपमाश्चित्रकूट
तः ॥ निनाय तंमुतं वीराकुंभलमेधा
मतावरा ॥ ६६ ॥ तत्रासादेपुरा
ध्यक्षः स्वामिनंदुर्गरक्षकः सपादुद
यसिंहाख्यमदादाश्रयमाश्रयन् ६७ ।
तदानूदयसिंहायुवतुर्दशमितंस्थित
म् ॥ मेदपाटजनैः सर्वैर्वणवीरो
विवासितः ॥ ६८ ॥ उदयः स्था
पितो भूपो वेदर्हिरसचन्द्रके ॥ दि
ल्लीशीकपुरणाहस्तचित्रकूटेसमाययौ
॥ ६९ ॥ उदयश्चित्रकूटात्सगतः प
श्चिमपर्वते ॥ दुर्गाधिकारिणः स
र्वेराठौरेजयमल्लकः ॥ ७० ॥ चू
ण्डावतः सान्ददासिं राठौरैमरदास
कः ॥ चूण्डावतसाथाफत्ताख्यो
सिंयासौडसंज्ञकः ॥ ७१ ॥ रावत्
सोपचत्रूमानईश्वरीसंज्ञकोदयः ॥
अष्टसाहस्रसंख्याता चित्रकूटस्यसैनि
काः । ७२ । दयाहस्तचतुर्मासंतेषां
युद्धं पराक्रमम् ॥ सामद्ययालबुता
इष्टुहारानुदघाक्यचीकटाः ॥ ७३

। अतिवीरतयावीरायुयुधुस्तेरणाजिरे । तस्मिन्युद्धेराजपुत्रास्त्वन्येऽपिसिंहकादयः ॥ ७४ ॥ खखशून्यखुचत्वारः सर्वेवीरगतिंगताः । अकबरस्याधिकारोभूत् चित्रकूटाख्यदुर्गके ॥ ७५ । अष्टद्विषट्‌निशानाथेगोगुंदानामपत्तने । भूपालोदयसिंहश्चपरलोकंजगामसः ॥ ७६ ॥ प्रतापसिंहस्तत्सूनुर्महीपासनमग्रहीत् । लोकविरसचंद्राब्दे चित्रकूटेपुनर्गतः ॥ ७७ । अकबरोबहुसैन्येनसोतिष्ठदजमेरके । मानसिंहायराज्ञेबदत्वाश्रीतिसहस्रकम् ॥ ७८ ॥ सैन्यंपर्वतमार्गेणप्रेषयंश्चबहूद्यमम् । प्रतापसिंहयुद्धार्थंसंनिनायमहाबलो ॥ ७९ ॥ कारणांचेदमत्रास्तिप्रतापार्कस्यभाषणे । मानसिंहेनवैसाकं नकरिष्येहिभोजनम् ॥ ८० ॥ इमंनिषेधंसंश्रुत्यचाकबरस्तंहिप्रैषिषत् । प्रतापसिंहः संग्रह्यषड्विंशतिसहस्रकम् ॥ ८१ ॥ विपक्षसैनयासाकं हल्दीघाट्यांसमायुधत् । युद्धंहिप्रहरंघोरमस्त्रशस्त्रादिभिःपरम् ॥ ८२ ॥ प्रतापसिंहसैन्यस्यचाष्टदशसहस्रकाः । नष्टाविद्धारणोभूवन्विपक्षस्यततोधिकाः ॥ ८३ ॥ भग्नामृताश्वसंग्रामेप्रतापोभूपतिर्गतः । सप्ताहेमपियोदेहात्कबचंनोत्मृजन्नृप ॥ ८४ ॥

यस्यायुश्चगतंसर्वंघोरयुद्धांगणेसदा । पर्वताभ्यंतरेगच्छन्स्वतएवाकबरोगतः ॥ ८५ ॥ बहुसेनायुतोम्लेच्छस्तंवशंनानयन्नृपम् । लज्जितः पुनरायातोयोदिल्लीशोकबरोनृपः ॥ ८६ । विपक्षरसचन्द्राब्दे बलीवीरगणाग्रणीः । दर्शयन्निजवीरत्वंजित्वरिपून्दिवंगतः ॥ ८७ ॥ तत्पुत्रोमरसिंहाख्योराज्यासनमधिष्ठितः । नृपेणानेनदिल्लीशादकबराज्जहांगीरतः ॥ ८८ ॥ युद्धंघोरंमहज्जातंतत्सप्तदशवारकं । ततोजहांगीरशाहः शून्यसप्तरसेन्दुके ॥ ८९ ॥ बृहत्सैन्यंसमानायमेदपाटेसमाययौ । स्वयंतस्थौचाजमेरेपुत्रखुर्रमसंज्ञकम् ॥ ९० ॥ शाहजहांबदिष्यन्तियंसर्वसेनयायुतम् । बलिनोमरसिंहस्ययुद्धार्थं प्रैषिषत्तदा ॥ ९१ ॥ यस्मिन्सैन्येबभूवुर्हिराज्यसर्वाधिकारिणः । खुर्रमेनयुताः सर्वेसंस्थितास्युदयेपुरे । ९२ ॥ उदासामरसिंहोहि पर्वतेचैकवत्सरं । युद्धंकुर्वन्विपक्षाच्चसंस्थितोवीरमर्गतः ॥ ९३ । विधुसप्तरसेन्दब्दे खुर्रमेणाहिमिलन । कृतभूरिमहावीरात् सर्वाधिकारसंमतात् ॥ ९४ ॥ तनयोमरसिंहस्य कर्णसिंहाभिधोमहान् । खुर्रमेणाहि संयुक्त आजमेराख्यकेपुरे ॥ ९५

जहांगीर समायात: शाहस्तं प्रीति
तोषहोत्। राज्यस्तु निवार्थं ति
चैकं कृत्वा विद्दत्तवान् ॥ ९६
॥ इत्थं प्रीतिर्दृढाजाता परस्पर
सुखावहा। रससप्तषट् चन्द्रेब्दे
ऽमरसिंहो दिवंगत: ॥ ९७ ।
कर्णसिंहाभिध: पुत्रो राज्यंप्राप
प्रतिष्ठित:। तेन सर्व प्रकारेण
राज्यदेशौ सुरक्षितौ ॥ ९८ ॥
तदानीं युगपद्देवाल्कारणं गूढमखपि
। पितु: कोपात्तमायातं पालया
मासखुर्रमम् ॥ ९९ ॥ युगाष्ट
रसचन्द्रेब्दे कर्णसिंहो दिवंगत:
। तदपत्यो जगत्सिंहो राज्यं प्राप
सुसत्वकम् ॥ १०० ॥ तस्मिन्
काले राज्यदेशौ महतीं श्रियमापतु:
। नव ख सप्त चन्द्रेब्दे जगत्सिंह
स्तनुं जहौ ॥ १०१ ॥ तत्सूनु
राजसिंहोऽपि राज्यंप्राप स्वगौरवात्
। राजसिंहे नृपे जाते देशं माल
पुरादिकं लुलुण्ठ सुमहावीरो बाद
शाहो प्रभागकम् ॥ १०२ ॥ स
देशेराज सामुद्रं तडागं च चकार-
स:। गजेन्दु सप्त चन्द्राब्दात्
प्रारंभं कृतवान् नृप:। १०३ ॥
वि लोक सप्त चन्द्रेब्दे तत्पूर्तिं च
चकार स:। तडागं दृश्यते नैत्य
भारते बहुविस्तरम् ॥ १०४ ॥
आलमगीर स्तदागत्य बहु सेनासमा

स्वराजवंशवर्णनम्

युत:। मेदपाटे समागत्य बहु
वारं च राजत: ॥ १०५ ॥ युयु
धेन्नैव भूपोपि सप्त चि सप्तचन्द्र-
के। राजसिंहो दिवं यातो जयसिं
होनृपोऽभवत्। १०६। चत्तक्र-
युयुधे वीर आलमगीरेण गर्विता।
गज चि सप्तचन्द्रेब्दे समती रचि
कारिण: ॥ १०७ ॥ पश्चात्तु
तया संधिर्भूपति हठसत: ॥
१०८ ॥ स्वदेशे मध्यगे भागे जयं
सामुद्र नामकम्। तडागं बहु
विस्तारं कारया मास वै नृप:।
१०९ ॥ तद्वत्स न मभूद्देशे राज
पूर्वसमुद्रकं। पंचेषुसप्त चन्द्रे
ब्दे जयसिंहस्तनुं जहौ ॥ ११० ॥
द्वितीयो मरसिंहाख्यो राज्यासनेसु
संस्थित:। सप्ताष्ट सप्तचन्द्रे
ब्दे स्वर्गं प्राप नृपोत्तिम: ॥ १११
॥ संग्रामसिंह स्तत्स्थाने संस्थि-
तो युयुधेसकृत्। मल्हारराया-
श्रया आन्यद्युद्धं नचाभवत्।
११२ ॥ शून्यांक सप्त चन्द्रे
ब्दे भूपालोपि दिवंगत:। तत्पदे
च जगत्सिंहो राज बलबुद्धिमान्
॥ ११३ ॥ जयपत्तनभूपाला-
द्दीश्वरीसिंहनामत:। जयसिंहस्य
तनयात् युयुधे स्वसूनवे ॥ ११४
॥ तनयौ जयसिंहस्य चेश्वरो
सिंह चादिम:। कनिष्ठो माधवो

जातः तस्मै राज्य मदापयत् ११५
॥ ततो हालाहलं पीत्वा ज्येष्ठो
भ्राता ममारसः । अष्ट शून्या ष्ट
चन्द्राब्दे जगत्सिंहो दिवंगतः ॥
११६ ॥ भूपः प्रतापसिंहश्चो
द्वितीय स्तत्पदेभवत् । शून्येन्दु
गजचन्द्राब्दे भूपालः सतनुं जहौ ।
११७ ॥ राजसिंहो भवद्राज्ये
सप्तैक गज चन्द्रके । परलोकं
समागच्छत् पदेतस्यारिसिंहकः
११८ ॥ तद्राज्ञि प्राप्ति संजाताः
पंच द्वि गज चन्द्रके । माधवा
राव भूपाला दुर्जयिन्याम भूद्रणम्
॥ ११९ ॥ अस्मिन्रणांगणे
वीरा हतायुद्धे हितान्मृणु ।
शाहपुरीय राजेभू दुम्मेदासिंह
नामतः ॥ १२० ॥ सलूम-
रीयकोराबत् पाहाडसिंह संज्ञकः
पतिवीर तथायुद्धे चेद्दगौराहता
सवः ॥ १२१ ॥ बीजोलिर्याधिपो
रावोभिंसरो हंगराबत विद्योकारो
गहंगातोमाधवश्चिभूपते ॥ १२२
झालाजालिमसिंहश्च गरचन्द्रेनसं
युतः ॥ माधवाराबसंरुद्धः सेना-
सर्वाक्षयंगता ॥ १२३ ॥ रसद्विगजच
न्द्राब्दे माधवाख्येनभभुजा रुद्धो-
दयपुरं रीप्यं नीतं च पंष्टलक्षकम्
॥ १२४ ॥ इत्थं दृष्ट्वारिसिंहेन कृत
संधिर्विपक्षतः ॥ नवद्विगजचंद्राब्दे

वृंदाशव्योप्यपिगतः ॥ १२५ ॥
बुंदीशाजीतसिंहेन कुर्वताखेटकांक्ष-
लात् । साक्धानदशाऽभावे ह्यरि-
सिंहान्तपोहतः ॥ १२६ ॥ हम्मीर-
सिंहस्तत्सूनुस्त्वरितंतत्पदेस्थितः ॥
युगाश्वगजचन्द्राब्दे सहलोकांतरं-
गतः १२७ ॥ भीमसिंहः कनि-
ष्ठोस्यभ्रातातत्पदमास्थितः ॥ या-
वदादिक देशाश्च तेनवै वश्यकोकृ-
ताः ॥ १२८ ॥ युगाब्धिगजचन्द्राब्दे
पूर्तविभीनचात्यजत् । भीमसिंहोव
लास्तेषु स्वाधिकारंचकारह १२९ ।
पश्चान्मरहटीसैन्यात् चलदूयामसं-
निधौ । हडक्याखालसंभागे युद्धं
जातं स्वसेनया । १३० ॥ अस्मिन्यु
द्धेविपक्षीया: संहताबहवोमरा :
मेदपाटीयसैन्यस्य जातस्तपराज
यः ॥ १३१ ॥ विपक्षस्याधिकारश्च
पुनस्तत्रभूमहि ॥ चराबष्यस्तितस्मै
वसेंधयानामभूपतेः ॥ १३२ ॥
युगसप्ताष्टचन्द्राब्दे मेदपाटनृपालतः
दूग्लिंडीयमहीपस्य संधिपत्रंबभूव-
हि ॥ १३३ ॥ पक्षाष्टगजचन्द्राब्दे
भीमसिंहोदिवंगतः ॥ पुत्रोजवा-
नसिंहोऽपि राज्यं प्रापप्रतिष्ठितः
॥ १३४ ॥ गजाष्टगजचन्द्राब्दे सो-
जमेरंगतोनृपः ॥ इग्लंडाध्यक्षमे-
लार्थं सूर्यसाहस्रसेनया ॥ १३५ ॥
शून्यांकगजचन्द्राब्दे सगयाश्राद्धहेत

वे ॥ चान्यतीर्थादियात्रायै दत्त्वसाह-
सिनया ॥ १३६ ॥ गत्वा काशीप्रयाग
गाख्य मयोध्यां चित्रकूटकम् । द्वाद
शमासिकीं यात्रां कृत्वा हि पुनराग-
तः ॥ १३७ ॥ पञ्चाङ्कगजचन्द्रेऽब्दे
परलोकं गतश्च सः । तत्पदे भूपसर्दा
र । समं तस्य हि शालभो: ॥ १३८ ॥
जगन्मसिंहतुल्यो हि तीर्थयात्राञ्च-
कार सः ॥ नवाङ्कगजचन्द्रेऽब्दे
परलोकं गतो नृपः ॥ १३९ । त-
स्य राज्यासनं प्राप्तः स्वरूपासिंहभूप
तिः ॥ अनृणीकृतवान्राज्यं कोश -
वृद्धिं चकार सः ॥ १४० ॥ इस्थराज्ये
भूषां सर्वं वस्त्रं हण्य मकारयत्
सर्वप्रबन्धकं राज्यं कृतवानिन्द्रसन्नि
भम् ॥ १४१ युगचन्द्राङ्कचन्द्रेऽब्दे यदे
ङ्गलंडीयशासिनो प्रातिकूल्यं चक्रा रा
ज्ञि तद्रक्षा कृतापर ॥ १४२ ॥ इ-
ङ्गलण्डीयान् समायातान् जगम-
न्दिरमध्यतः स्थापयित्वा महाप्रीत्या
चारक्षत्सर्ववस्तुतः ॥ १४३ ॥
स्वरूपसिंहभूपोयं जातश्चेन्द्र समो
बली । कृतः स्वर्गोपमो देशो द्रव्यसं-
म्पाप्तिभावतः ॥ १४४ । अष्टचन्द्रा
ङ्कचन्द्रेऽब्दे सन्नृपः स्वर्गतिं गतः :
राज्यस्थः शंभुसिंहाख्यः शम्भुः
शम्भुरिवाभवत् ॥ १४५ ॥ सप्त द्व-
नवचन्द्रेऽब्दे अजमेरे पुरे गतः भा-
रतश्चभूपाला लार्डम्योनामहद्द-

ये ॥ १४६ ॥ कानॉटड्युकएडवर्ड :
सम्प्रयायो दयपुरम् । पदर्शीदत्तवा
न्दीर्घां । मेदपाटेशकीर्तये ॥ १४७ ॥
सुधांशुत्र्यंकचन्द्रेऽब्दे महीपः सोऽदि
वंगतः तत्पदे संस्थितो विज्ञो भूपः
सज्जनसिंहकः ॥ १४८ । र-
सेन्दुनवचन्द्रेऽब्दे नवम्यां चशुचेः
सिते श्रीशगौरमहाराज शम्भुसिं
हादभुत्त्वनः ॥ १४९ ॥ श्री-
सज्जनमहीपेन राज्यं प्राप्य हि सा-
दरं स्वल्पेन दिवसेनैव कृतं कार्यं-
सुविस्तरम् । १५० । देशप्रजा-
हितार्थाय देशभ्रमणलालसा ते-
षां चित्ते समायाता देशाचारसुदृ-
ष्टये १५१ ॥ इंडरेप्रथमो ह्याह :
पथ्रद्दिल्यंकचन्द्रके बंबई नगरे-
माना ह्लज्राजसमागमः ॥ १५२
अधीशयोर्द्वयोर्मध्ये जाता प्रीतिर्व-
रीयसी स्वचिन्ह यैं ह दत्तानि चाङ्गु
तानि परस्परम् ॥ १५३ ॥ शाह-
जादेन दत्तानि चैक सप्रेसरैफलम्
हीरकांगुलिका तस्यां चित्रं हि स्वस्व-
रूपकम् ॥ १५४ ॥ करवालं कीर-
चाख्यं स्वर्णस धनसंयुतं 'राजवंशी
यचित्राणां पुस्तकं महदद्भुतम् ॥ १५५
नक्शाख्यमुत्तमं दिव्य मेश्माद्रिम-
होत्सम प्रसन्नचित्तराजेन्द्र : सज्ज
नेशाय दत्तवान् ॥ १५६ ॥ इत्य-
मार्यपतिस्तस्मै बहुमौल्यान्यनेकशः

ऽस्त्रा भारत शस्त्राणि दिव्यानि
परिसंददे ॥ १५७ ॥ राजधान्यास
मायात लण्डनार्थं ब्रुकानिजम् । अ
त्याहरतयासांग प्रसन्नं कृतवान्नृ-
पः ॥ १५८ ॥ अस्मिन्नेव वत्सरे
चैव नृपः सौहनास्ति ख्याम् निष्का
स्यचेमं वागीरव्यं विषत्काशिकांपु-
रीम् ॥ १५९ ॥ नाथद्वारेचरी स्वा-
मी नाम्नागिरधर सदा निजकृत्ये
निरत्तास्व : कृतगोस्तिपदच्युतम-
म् ॥ १६० ॥ तस्मिन्नंतत्पदे का
र्षीत् स्वामिगोवर्धनाभिधम् विले
क्रोक्रिमगानाथे प्राप्रराज्याधिकार
क: ॥ १६१ ॥ प्रभुर्दिल्लीसमायात:
पोप्तायश्चहिभुज : तस्यां द्वि चाधिके
जाते गमागमसुहृतके ॥ १६२ ॥
एकविंशतिसंख्याक : शतघ्नगर्ज-
नध्वनि : राजकार्यध्वजाप्राप्ता लार्ड
हेटिननिर्मितम् । १६३ ॥ पुस्त
कागारकार्यस्य प्रशंसीप्रभुणात-
दा कृष्णगढे विवाहं च वर्षेऽस्मिन्कृ
तवान्नृप: । १६४ ॥ युगलो
कांकचन्द्राब्दे दुर्भिक्षं जीवभक्ष
चतुर्भ्य स्वाधिकारिभ्यो दत्ताज्ञाप्रभु
णाश्वरा ॥ १६५ ॥ क्षुधितेभ्य: सम
स्तेभ्यो देयमन्नमखंडित : द्रष्टव्यो मम
राज्यहि नभवेदन्नपीडित : । १६६ ।
जीर्णोद्धारे रुचिस्तस्य विलक्षण तदा
भवत् । यानि जीर्णानि जातानि

नवीनानीवचाकरोत् ॥ १६७ ॥
हिलचमुद्रयाकार्षीत् जयसामुद्रकी
र्तिं । वेदलोकांकचन्द्राब्दे कर्तुंदेश
प्रारब्धवान् ॥ १६८ ॥ अथ हूत :
स्मिथ नामाख्यो यशांकृत्वा विधा
नत : । अत्र मापक यंत्रैश्च नर्वे
याम्याहिमापिता : ॥ १६९ ॥ इत्थं
सर्वं प्रकारेण प्रबन्ध नियम : कृत:
। अस्मिन् संवत्सरे दिव्ये चैकासेना
सुशिक्षिता ॥ १७० ॥ स्थापिता
नामतस्यास्ति सज्जना पल्टनाभिधम्
। कृतस्तृतीय उद्वाहो भगिन्या
ईडरेशितु : ॥ १७१ ॥ आम्बे
गार्नरस्याथ सर्रोबर्ड टेम्पल : ।
राजधान्यां समायात : तस्मान्मानो
महान्कृत : ॥ १७२ ॥ बाण
लोकाङ्कचन्द्राब्दे सुप्रशस्तो जिला
भिध : कृतो भूपेन देशेऽस्मिन्
सप्तविंशतिसंख्यया ॥ १७३ ॥
जिलानां रक्षितारश्च तत्स्थाने
स्थापिता द्रुतम् । जिलाधिकारिणा
मदात्तासुल्यं पमासिकं ॥ १७४
शतपञ्च शतत्रयं पञ्चाशद् द्वि
शतंक्रमात् । भारतीयचर्योत्पत्ति
लंडनस्थ हिजायते ॥ १७५ ॥ कुम्ले
राडमुनिमासच स्वाधिकार : कृत :
पर : लब्धोत्पत्तिहयेन द्रव्यंदत्ते
हिभुजे : ॥ १७६ ॥ मेदपाटस्यभू
पाय दुर्गकार्यकर्तुमेचकम् । रौप्यं

ददातितद्धाने स्ततोजातामहर्षं-
ता ॥ १७७ ॥ करुणारूपभूपेन
पंचयुग्माब्धिवत्सरे । राजकीयकारस्य
ता : पीठाद्यानिस्त्वनल्पिका १७८
। रूपतेषु पञ्च वर्देषि काणं रौप्या
णि संचया ॥ रौप्यस्य षोडशांशोय
तत्पं च संहितानिहि । १७९ ॥
यत्नपुर्यांस्वसेनाये शिचाक्रांकृतवान्नृ
प : । राजधान्यांमहादीर्घां शुभल
चाणवाटिकाम् । १८० ॥ ऋतुल्यं
काशगांकाव्दे याचांकृत्वाहिभूभुजा ।
दृष्टा: स्वदेशभागाश्च तान्हित्रच्मिस
मामत : ॥ १८१ ॥ प्रथमंचित्रकूटं
चयत्नपुरंद्वितीयकम् । तृतीयंमाण्ड
लंमुख्य मार्द्दिभागंगतोन्नृप : १८२
षष्टसहस्रसेनाभि : सभ्यसुभटसंयु
त : । कश्चिद्ग्रामलदासस्य यामेढो
कलियाभिधे ॥ १८३ ॥ कविराजे
नसंस्नेहात् सर्वातिथ्यंकृतंपरम् ।
सेनासुभटसंयुक्तो नृपेहर्षाधिकोभ
वत् ॥ १८४ ॥ जहाजपुरमुख्याश्च
द्वाविंशत्कसहस्रकम् । रौप्यंनृपाय
संप्रीत्या दत्तवंतउपायनं ॥ १८५ ॥
स्वीकृत्यतत्प्रसन्नार्थं दत्तवानधिकंनृ
प : । स्थापनीयमिदंद्रव्यं तस्मा-
त्कार्योजलाश्रय : ॥ १८६ ॥ यतोभू
मि : कृषियोग्या स्वादुप्रदुपकारि
णी । इत्यंसर्वै : सदाभूमि : कार्या
चेदृशवाहणां ॥ १८७ ॥ शुल्काभूप

मुखानित्यं मोदमानाजनास्तदा ।
पर्वतस्यप्रशस्याय शैलसम्बन्धिनीस
भा ॥ १८८ ॥ स्थापिताभूभुजात
स्या : कृतोध्यचोनिजप्रिय : जानो
मुकुंदलालाख्य: स्वधर्मकुशलोमहा
न् । १८९ ॥ सेनाधिकारिणादूरे
पर्वतोपद्रवा : कृता : । अस्यप्रबन्ध
तोजाता स्वस्थतोतश्चसर्वथा १९०
निर्विघ्ना : पर्वताजाता : चलत्प
दृषतिकानना । यस्संसज्जननाम्ने
दं कृत्वायंचसुशोभनम् १९१ ॥
सज्जनोत्कीर्तिविन्यासं कृतवान्सज्ज
नोन्नृप : । तडागमध्यगेस्थामेजगन्नि
वासकंस्थलम् ॥ १९२ ॥ चात्यद्भुत
मिदंस्थानंयत्र मानस्य मानम् ।
तस्मिन्कारयितं स्थानं तत्सज्जन
विलासकम् । १९३ ॥ तस्मिन्
संवत्सरेचैवकविराजाय धीमते ।
मेदपाटेतिहासस्य रचना ज्ञाकृता
तदा ॥ १९४ ॥ उत्साहवृद्धि
मकरोत् धनंतत्र मनोजनै : ।
कर्तुमाज्ञाहि संदत्ता सर्वसा-
हित्य साधनात् ॥ १९५ ॥ सा-
मान्य रीतितस्यास्य शंभुसिंहा
ख्यसन्निधौ । नगनेत्राङ्क चन्द्राब्दे
प्रारंभो जात एवहि ॥ १९६ ॥
ऋतुलोकाङ्क भूम्यब्दे यस्य कार्या
लयंपरं । [illegible] सन्मानात्
स्थापितं चार्थत : परम् ॥ १९७ ॥

ताम्रपत्रेषु लिख्यं हि पाषाण मय
चित्रकम् । बहु प्रकार मुद्राढ्य
पुस्तकस्य सहस्रश : ॥ १९८ ॥
डुंगलगड पारसीकं च बहु गुर्जर
दैवकम् । तस्मिन्सहस्रशो मुद्रा:
कविश्यामल हस्तत : ॥ १९९ ।
भूपाज्ञया व्ययीभूता यस्मिन्चोत्तम
कर्मणि । तन्मुद्रणेपि चेत्यं हि
भविष्यति बहुव्यय : ॥ २०० ।
युधिष्ठिर महाराज काल पौराणि
कोभवत् । तथैवास्ति ह्यस्य
समये वर्ततेधुना ॥ २०१ ॥
यत्र विद्वज्जना : सर्वे स्वस्व कर्म
समुद्यता : । सप्त लोकाङ्कचन्द्राब्दा
प्रजादेश सुखाप्तये ॥ २०२ ॥
भूपेनेजलासखासस्य महद्राज सभा
कृता । तत्राष्टादश प्रौढा निय
ताश्च सभासद : ॥ २०३ ॥ पण्डि-
तो मोहनेलाल: सेक्रेटरिपदेकृत
। सम्मान्याथ व्यवस्थाच ह्युत्तमा
रीतितोभवत् ॥ २०४ ॥ अस्मिन्
वर्षे पिटव्यं हि कार्णोत : सत्तमा
ह्ययत् । रामसिंहस्य मृत्युं हि
श्रुत्वा शोका दनुत्तरो ॥ २०५ ।
श्रीमान् जयपुरे यात स्तस्मिन्नेवहि
वत्सरे । डूलिगडोया ज्ञयाभूप :
स्वदेशगहमोनुपान ॥ २०६ ॥ गण-
यित्वैव राजौहि संख्यासेकामकार
यत् । तस्मोच्च मेदपाटस्य यम

स्वराजवंशवर्णनम्

पश्चिमभागिन : ॥ २०७ ॥
भिल्ला उपद्रवं कर्तुं मुद्यता : क्रोध
कारिण : । सैवकाज्ञतवं तथ्यथाने
दारादिकान्वहून् ॥ २०८ ॥ वृत्तं
श्रुत्वा जवान्भूपो मातुलं मानसिंह
कम् । श्यामलं कविराजं च पदा
तिहयसेनया ॥ २०९ ॥ शतघ्नी
द्वयस युक्तं तत्र संप्रेषि पत्तदा ॥
। सेनया सहितौ प्राप्तौ ग्रामं
बारहपालकं ॥ २१० । तत पला
यितोभिल्ला सन्तानांचोत्तरक्रिया : ।
तत्रैवकारितानूनं भेषज्यार्थं हिप्रेष-
यत् ॥ २११ ॥ विद्धानप्राणावशेषां
श्च नगरेद्वयसंज्ञके । भस्मीकृतानि
रोहाणि भिल्लानामपकारिणाम् ॥
। २१२ ॥ गच्छन्त्य सेनयाभिल्लै :
पडूनाग्रामवासिभि : ॥ सान्मुख्य
त : कृतंयुद्धं छिन्न तत्रशिरोयुग-
म् ॥ २१३ ॥ प्रासादश्च मरुद्धास्य
प्रेषितानगरेद्वये ॥ पुरोमृषभदेव
स्य यातु ताधिकारिणौ ॥ २१४ ॥
अग्रेगातौनदास्तत्र पिप्पलीपालकां
तिके ॥ युद्धघोरं हलाजालं पंचाश
द्भिल्लकास्मृता : ॥ २१५ ॥ राजप
सीयसेनाया मेकोऽ लिक्षयोहत : ॥
मरविहोविलोयेभूत्याभनुंहर्षदाभ
वत् ॥ २१६ ॥ दैशीकृपावशाद्दानि
स्तत्रकाप्यभवन्नहि ॥ धाभिश्यामल-
दासस्य सुतातामासिक्षोथि :

॥ २१७ । पर्यामृषदेशश्च जाता
वांश नुकूलेका ॥ दशाधिकारिशि
[illegible] भूप [illegible] स्वरम् । २१८॥
[illegible] पर्वतसर्वतो
[illegible] ॥ [illegible] शशांकेब्दे लार्डी
[illegible] । २१९ । चित्रकू
ट [illegible] द नक्तिवे ।
[illegible] उत्सर्गश्च [illegible]
[illegible] २२० ॥ लोकानंदनिचे-
त [illegible] शिष्य त । चित्रकूट
गढावसात् वस्त्रकृम्याक्षिकाश :॥
॥ २२१ । जगत्कृत्वानरेन्द्रेण
स्थापिता [illegible] संतत : ॥ यूरोपीय
जनानांच [illegible] जलादिविधीभृगम्
। २२२ ॥ श्रीमज्जननरेन्द्र या चतु
र्लंच व्ययीकृतम् । नभलोकांकच-
द्रेन्द्रे दशानन्दसरस्वती । २२३ ॥
भूपाश्रयासमायात : परोपकृतत्का-
[illegible] ॥ सभासंस्थापितापाटी न स्या
सज्जनगामिनी । २२४ । [illegible]
[illegible] सर्वदा [illegible] : ॥
[illegible] स्थत्ये तत्कार्यकुश-
लो जन : । २२५ ॥ आतुरामद्रा-
साश्च छोरीनामकशालिका : । अ-
स्मिन्संवत्सरेचैव भावमरीमर्यादा
श्च २२६ श्रीरज्जनमहोपाध्याय
पुण्यप्रभावत : । जवामसिंहसंस्थाप्य
श्रीशभुसिंहकाराधि । २२७॥ न-
जात : कश्चित् [illegible] : स चैकाषो-
दिगत : ॥ शून्यवेदांकचन्द्रेब्दे-
सज्जनादिगढ कृत : ॥ २२८॥ वासं
दरभयेनापि पृथ्वीसिवडुसीस्वकै ।
स्वदेशेभेदपाटेऽस्मिन् दुर्जिनीयरमा
गतं । २२९ ॥ सनदीमतकांकर्तु
माटेशंश्रुतवान्नृप : संवत्सरस्थथा
स्यैवचैवमासिसमागत: । २३० । मक
देशेश्वरोधीमान् यशवन्तादयभूप-
ति: । शतमंवत्सरादूर्ध्वं गमनंजात
महतम् । २३१ ॥ तयाकृष्णागढा
धीशो नाम्नाशार्दूल सिंहक : ॥
समीचीनप्रकारेणा तिथ्यंबहुविधं
कृतम् ॥ २३२ । भूतरेपिचराजान
स्वागता : प्रीतिभावत : । नृपे
णालेनसर्वेषां वैमनस्यं निराकृतम्
। २३३ । सर्वत: स्वभावकृत :
[illegible] । विधुवेदांकचन्द्रे
ब्दे चित्रकूटाद्विरेलकम् । २३४ ॥
नायकारिभयत्यात् डवोकाय स्काच-
धि ॥ मूल्यंकर्तुं विचारेहिरेलप्रव
धकारका : ॥ २३५ । टामसेना
भिध : कार्येनियतोप्यध्यकारका : ।
विद्याशालातथाकार्या स्तथारुग्णो
पचालया : । २३६ । ग्रामीणा :
पण्डिता : संतु विद्ययुक्ता चरीग
का : । २३७ । राजशालाराजधान्यां
हि विद्या वैद्यकयो स्तथा । चिकि
त्सां तत्र कुर्वंति पाठयंति पठन्तिच
। २३८ । पुरुषा : पुरुषस्थाने ·यां

ति चौषु विधस्तथा साधयन्तिस्म कार्याणिश्रुतमाचारतस्तदा ॥ २३९ ॥ अस्मिन् संवत्सरे चैव श्रीमाल्लोधपुरं गत: । मार्गखिन्न शरीरोऽपिभूप: प्रभवशंवद: ॥ २४० ॥ डाक्टराणां चिकित्सात: सुस्थता सर्वभावत: । चित्रकूटस्य मार्गेण सर्व सभ्य गणै: सह ॥ २४१ ॥ पौष कृष्णस्य पञ्चम्यां राजधान्यां समागत: । तृतीय दिवसेऽकस्मान्मूर्च्छां प्राप्तो नरेश्वर: ॥ २४२ ॥ चतुर्घंटा मिता मूर्च्छाऽतिष्ठत्यस्याम चेतन: । चिकित्सा बहुला वैद्यै: सर्वोपायैस्तदाकृता: ॥ २४३ ॥ तत्समये समातिष्ठत् डाकृरा अकबरादिका: । एतादृशीं दशां दृष्ट्वा कृष्णसिंहो जवादत: ॥ २४४ ॥ रजीडसटस्य संस्थाने थिफर्ड डाकृरं तत: । समानयन्ति तूर्णंच व्यतिष्ठन्नधिकारिण: ॥ २४५ ॥ कविराज: श्यामलश्च पन्नालाल: प्रधानक: । श्रीमनोहरसिंहश्च जानीमुकुन्दलालक: ॥ २४६ ॥ चेष्टां प्राप्तो नृप: पश्चात् पौष कृष्णाद्दवासरात् । चित्तभ्रमोऽपि संजात: चतुर्दश्यामवर्द्धयत ॥ २४७ ॥ मनुष्यज्ञान राहित्यं गता निद्रापि वैरिणी । सर्व वैद्या स्ततो जाता

स्वरात्र्वंशवर्णनम्

निराशा जीवनात्प्रभो: ॥ २४८ ॥ परन्तु चार्द्ध रात्रेश्च शंकरस्य प्रसादत: । नृपोऽपि लब्धवान् निद्रां रोगो दूर तरंगत: ॥ २४९ ॥ पौष कृष्णस्य षष्ठ्यास्तु सायंकाले महीश्वर: । प्रसन्न: सर्वथा जातो नैर्वल्यं चावशेषितम् ॥ २५० ॥ दिवसस्यास्य मष्टस्य सगता सप्त घण्टिका । रात्रौ मूर्च्छांगतो भूपो व्याकुलश्च तदा भवत् ॥ २५१ ॥ सर्व डाकृर वैद्याश्च नानोपाय चिकित्सका: । निरुद्योग फला भूता रोगे भूपस्य चान्तिमे ॥ २५२ दयालु भूभुजा नूनं युग पत्सर्व लोकत: । स्नेहंत्यक्त्वायतिर्मार्गात कैलाशं गतवान्नृप: ॥ २५३ ॥ कैलाश वासमं प्राप्ते सर्वे बन्धु जनादय: । बेदले राव संज्ञश्च देलवाडीशकस्तथा ॥ २५४ ॥ बेगम राव संज्ञश्च मेजा रावतकस्तथा । श्रीकुराबड रावश्च कवि: श्यामलदासक: ॥ २५५ ॥ श्री भींडर महाराज: पन्नालाल प्रधानक: । चादयो निखिला: सर्वे खिन्ना रुदन्त आगता: ॥ २५६ ॥ कर्नेलवाल्टरा भिन्न: प्रबन्धं कृतवा निमम् । अन्त: पुरालय द्वारं गत्वा राज्ञीं न्यवेदयत् ॥ २५७ ॥ सर्वैर्बधु गणै

मुख्यै रधिकारि जनैस्तथा। गजसिंहस्य सत्पुत्र: फतहसिंहभूपति: ॥ २५८ ॥ सुप्रसन्न: कृतोविज्ञैर्महाराज्ञ्ये हि सूचिता:। इत्थं च सर्वै संमत्या राज्यास्पदं हि दत्तवान् ॥ २५९ ॥ सर्व लक्षणतो नूनं ज्ञायते सर्व रीतित:। प्रजा पालन कार्येयं चोत्तम: संभविष्यति ॥ २६० ॥ तदानीं सर्व लोकानां मुखतो वाग् सुनिसृता। चिरायुर्भवतात् क्रोश: श्रफतेसिंह भूपति: ॥ २६१ ॥

श्री १०८ श्रीमदार्यभूपभानु

श्रीमहाराणाश्रीफतहसिंह

विषयकम्

——*

संग्रामसिंह पुत्रा हि वीर धर्माधिकारिण:। तेषां मध्ये ऽर्जुनो धीर स्तत्सुनुश्शिवसिंहक: ॥ २६२ ॥ सूर्य मल्ल स्तदापत्यं तत्सूनुर्दलसिंहक:। तस्य पुत्रा स्त्रयस्सन्ति प्रथमो गजसिंहक:। २६३ ॥ सूर्तसिंहो द्वितीय स्तृतीय: फतहसिंहक:। गजसिंहस्य भ्रातुश्च दत्तकत्वेन संस्थित: ॥ २६४ ॥ श्रीमान् फतहसिंहाख्य स्ततसज्जन भूपते:। जातोहि दत्तकस्तस्मात् मेदपाटीय भूपति:

२६५ ॥ कथ्यते ततएवेदं भाग्यं हि कर्म मूलकम्। वर्तमानं कृतं कर्म भविष्ये भाग्यमुच्यते ॥ २६६ काले स्वल्पे पि भूपेन वर्तमानेन धीमता। लक्षशोथ करादीनि कार्याणि मुक्तानि हि ॥ २६७ तेषां मध्ये परं कार्यं मितिहासस्य मुद्रणम्। तदुत्कण्ठा कृता पश्चादधिकारं च दत्तवान्। २६८ ॥ कवि: श्यामलदासाय सर्व प्रकारतोऽखम्। तदुपकारि वस्तूनि कुर्वंति सज्जिता निहि ॥ २६९ ॥ कविराजेन विज्ञेन बहु ग्रन्थाविलोकिता:। ग्रन्थो यो रचित स्तस्मात्कोशे सारं समुद्धृतम् ॥ २७० ॥ इदानीं कवि राजस्य वंश कीर्तन मुच्यते। [illegible] स्तै: साकंमेदपाटीय भूभुजाम् ॥ २७१ ॥ श्यामलदासकवेर्वंशं संक्षिप्तं वच्मि कीर्तये। लाखा पुत्रो महाराणा मोकलो भूम्महाबलो ॥ २७२ ॥ मरुदेश रुणा ग्रामे विवाह कृतवांश्च स:। सांखला क्षत्री यस्य राजासोत्तस्य चारणा: ॥ २७३ ॥ यदा मण्डोवराधीशो जोधा राठौर भूपति:। सांखलान् क्षत्रियान्जित्वा रुणाराज्यं गृहीतवान् ॥ २७४ ॥ तदाते क्षत्रिया: सर्वे चित्रकूटे समा ययु:।

स्वराज्यवंशवर्णनम्

मेदपाटे तदा भूपः कुम्भाख्यो मो-
कलात्मज : ॥ २७५ ॥ तस्यैव
सांखलानां यः तद्राज्याय दत्तोन्तृपः
। युगः सोऽपि ग्रामयुक्तं ताणानाम
कपर्णनम् ॥ २७६ ॥ सांखल
क्षत्रियाणां च चारणा ज्ञातितस्तदा
। राठौरैण दधीवाडा ग्रामो नै
नीत एव हि ॥ २७७ ॥ शून्य
सप्तेषु चन्द्राब्दे तद्ग्राम चारणा-
द्गत : । राठौरस्या भवद्वैरं तदैवं
जात मद्भुतम् ॥ २७८ ॥ चल्ला र
भ्रातरो भूपन् सांखलानां च चार-
णा : । तेषां मेको महो पद्म द्वितो
यो माण्डनो भवत् ॥ २७९ ॥
देव स्तृतीय कान्हासो हरसिंह
श्चतुर्थक : । दधिवाडां परित्यज्य
मेदपाटे समागता : ॥ २८० ॥
तत्समये महाराणा कुम्भा ऽसीत्
भवत्तदा । रायमल्लस्य पुत्रो ऽसौ
सांगा नाम्ना महो पति : ॥ २८१
॥ पक्ष सप्तेषु चन्द्रस्य वैशाख
सित पञ्चके । सांगा नृपस्य सग्रा
म्यां सहस्रं द्वादश ददौ ॥ २८२ ॥
बीगहानुमितं भागं माण्डलि गढ
पर्गने । स्थापयामास सुग्रामं
ढोकलियेति नामत : ॥ २८३ ॥
देवाय धारता ग्रामो बरसिंहाय
गोठिया । सावरी माण्डलायैव
दत्तो भूपतिना स्वयम् ॥ २८४

स्वराज्यवंशवर्णनम्

यत्समयात्समायाता मेदपाटे बर-
स्थले । तदा रभ्य हि विख्याता
चारणा दधिवाडिया : ॥ २८५ ॥
दधिवाडां परित्यज्य मेदपाटे समा-
स्थिता : । अत स्तस्मात् समयाच्चैव
चारणा दधिवाडिया : ॥ २८६ ॥
अयं ढोकलिया ग्राम : स्थापितो
नेपसंज्ञिना । तत्पुत्र श्च शुक्ला ऽ
भूत् तस्मात् स्ततो ऽभवत् ॥ २८७
॥ ढोकलियाऽपि गतो ग्रामो युग
द्विरस चन्द्रके । माण्डल गढ
पर्गमं नीत मक्तेशा भूभुजा ॥ २८८
॥ ढोकलिया ऽपि ग्रामोयं प्राह
शासनतो गत : । तदन्तु मानत :
सम्वत् शून्य वेदाङ्ग चन्द्रमा : ॥
२८९ ॥ वेद पक्ष ख सप्ते वे
[illegible] सन्ध्यायाम् । एकस्थलेऽ
[illegible] : ॥
२९० ॥ [illegible]
[illegible] निजम् । निर्वा
[illegible] चतुरो
[illegible] : ॥ २९१ ॥ [illegible]
[illegible] : । तद्धां
गौरस्य स विधा भवत्पूर्वस्य प्रीतये
॥ २९२ ॥ नृपस्य करणसिंहस्य
चामुण्डादास धीमत : । चतुरा
पत्यकाले च ढोकलिया यथास्थित :
॥ २९३ ॥ जगत्सिंहस्य भूपस्य
समये शाहजहात्मज : । गृहीतो

मागडालो भागो दिल्ली गत्वा लभत्पुनः ॥ २९४ ॥ महाराणा जगत्सिंह: क्रुद्धश्चांगणदासत: । तस्मात्सद्भाटभि: सर्वैः सुन्दराद्यैः सुभाजितुम् ॥ २९५ ॥ ग्राम मुक्तगठ कोर्यस्मात राज्याधीनं हि पर्गनम् । तस्माच्चासणदासाधिकारे ग्राम एतस: ॥ २९६ ॥ जगतसिंहेन तन्नीतं पर्गनं माण्डलं यथा । तदा ढोकलियाग्रामोराजकोपाच्च निर्गत: ॥ २९७ ॥ पश्चाच्चासणदासस्य हरिदासो भवत् सुत: । सोऽतिकाष्ट सहन्खिन्न: कालं स्वीयं निनायच ॥ २९८ ॥ आलमगीर शाहेन नीतं माण्डल पर्गनम् । दिल्लीं गतो हरिदासो ग्राममन्न प्राप्तु: स्थित: ॥ २९९ ॥ स्वग्रामंठ कर्णानीत्वा चाजमेराधिकारिणा: । हरिदास प्रथम तु शून्य पश्चाद्रि चन्द्रत: ॥ ३०० ॥ पर सम्वतसरं भूपोऽमरसिंहो महामति: । त ग्रामं नीतवान् ठेका दालमगीरशाहत: ॥ ३०१ ॥ हरिदासस्तु भूपाय ददौ सम्वतसरं करम् । ग्राम ढोकलियायैव ठेकारौत्यनुसारत: ॥ ३०२ ॥ हरिदासस्य पुत्रो भूदर्जुन: प्रीतिवर्द्धक: । चक्रोक्त्यात जगदैवम मौनाच्चातिवसंबल: ॥ ३०३ ॥ वाक्यविद्द्विषोऽर्जुनस्तिष्ठन् शाहस्तत्पर्गनं ददौ । कुँवारसिंह ठौर च्चतथै तत्प्रसादत ॥ ३०४ ॥ जातोर्जुनाधिकारात्स्वदपं स्वल्प दिनात्मज: । माण्डलं पर्गनं नीत ममराख्येन भूभुजा ॥ ३०५ ॥ तदावेदाङ्क सप्तेन्दौ शून्यपश्चाब्दत: परम् । अर्जुनो मरसिंहाच्च स्वसुता करपीडने ॥ ३०७ ॥ निर्ग्यै ढोकलिया ग्रामं ददौ तस्मात सम्भागिने । तं ग्रामं स्वाधिकारे हि स्थापयामास चार्जुन: ॥ ३०८ ॥ अर्जुनस्यो भवत्पुत्र: केशरीसिंहनामत: । तत्पुत्रश्च मयाराम: कनीरामश्च तत्सुत: ॥ ३०९ ॥ भीमसिंहो महाराणा तस्मै ग्राम द्वयं ददौ । जयसिंहपुरं चैकं द्वितीय भालराभिधम् ॥ ३१० ॥ कनीरामस्य पुत्रोभूद्रामदोमी स्वदेहज: । कायमसिंह संज्ञश्च नीतिनाशास्त्र कोविद: ॥ ३११ ॥ तत्सुनु: कविराजोऽस्ति श्यामलो बुद्धिसागर: । सच्चनस्यन्त्यायं मुख्यमं वीचिक्षण: ॥ ३१२ ॥ शून्याद्रिगज चन्द्रेऽब्दे षष्टिवर्षात्मको महान् ॥ ॥ ३१३ ॥ कनीरामोदिवंयातोरामदानस्तदात्मज: । ग्रामढोकलियाना स्निविविं शतिवर्षोभव: ॥ ३१४ ॥ अधिकारी बभूवासौ सर्वप्रियकरो भवत् । तत्र: कायमसिंहाख्यो

अधिकारीतदाभवत् । ३१५ । सप्त रसनगीभृद्वेश्येष्टमासेसजन्मवान् । तस्य नवश्चत्वारः प्रथमोनारसिंह कः । ३१६ । दत्तकत्वेनयश्चासौ ग्रामे खेमपुरे गतः । द्वितीय: श्यामलो विप्रः स्वष्टनागेन्दु वर्षकै । ३१७ । द्वितीया षाढ कृष्णस्य सप्तम्यांका बजीजनत । तृतीयो व्रजलालश्च गोपालश्चतुर्थकः । ३१८ । कामसिंह देशांतः सप्तद्विनव चन्द्रकै । वैशाखस्य सिते पक्षे नवम्यामभवत्तदा । ३१९ । श्यामलः कवि राजोपि पितृस्थाने न्यवीविशत् । तस्योपरि महाराणा शम्भसिंहस्य दोर्घका । ३२० । कृपाजाता तथैवापि श्रीमत्सज्जनभूभुजः । श्रीमेदपाट प्रभुणा प्रसन्नत्वेहर्षिना । ३२१ । पदंदत्तं प्रतिष्ठाया: कविश्यामलधीमते । कविराजपदं चैव मभ्युत्थानं द्वितीयकम् ३२२ । तृतीयं स्वर्णं चाङ्के चतुर्थं पादभूषणम् । हेमादिकस्य तत्सर्वं बीटीदानंच पञ्चमम् । ३२३ । खासरुक्कायकरतः षष्ठंदत्तापि मुद्रिका । राणा श्रीसज्जनेन्द्रस्य चरणाज्ज प्रसादतः । ३२४ । कविराज पदस्यात श्यामलस्यैवमुद्रिका । श्रीमरेन्द्रस्य वैप्रीतिर्यथा

श्यामलधीमति । ३२५ । विश्वासभृता सत्याङ्गी मतथान्यच्छ्रया ते । सप्तमं रौप्य यष्टिर्हिचाष्टमं परिलेखनम् । ३२६ । पञ्चोपरि सदाशिल्पं नवमं बासनीकम् । हस्तिपौलस्य वाद्येच दशमं वाटिकास्थलम् । ३२७ । प्रभुणा स्थापितं नाम श्यामलाराम संज्ञकम् । मन्दिरं तस्यमध्येपि देवं रम्यं महत्तमम् । ३२८ । निर्मापित पुनस्तस्य जीर्णोद्धारोपि कारित: । चित्रकूटगढा धस्तात् गम्भीरीवेडचोभयो: । ३२९ । नद्योर्मध्येपि रेलस्य भूमिर्दत्ता हि पश्चिमे । तत्र श्यामलदासेन रचितं वाटिकापि का । ३३० । मन्दिरं कणिका देव्या निर्मितं परमाद्भुतं । रसलोकाङ्कचन्द्रेब्दे चाष्ट सह्य सैन्यत: । ३३१ । भूपो ढोकलिया ग्रामे सुभटै: सहसङ्गत: । दिनद्वयं बरातिश्च श्यामलेन कृतम्परम् । ३३२ । प्रभो: प्रसन्नता तस्मा ज्जातात्यन्ता धिकारिणौ । इत्यसर्व प्रकारेण मुख्यमत्वधिकारवान् । ३३३ ।

इति

॥ राजवंशस्य सूचीपत्रम् ॥

विषय :	पृष्ठं	पंक्तिः
मंगलाचरणम्	१०४१	१
महाराजासुमित्र	तथा	११
राजाविजय	तथा	१२
राजाशिलादित्य	तथा	१९
राज्ञीपुष्पावती	तथा	२२
राजाकेशवादित्य	तथा	२६
राजानागादित्य	तथा	२९
राजाभोगादित्य	तथा	३१
राजाआशादित्य	तथा	३३
राजादेवादित्य	तथा	३७
राजाकालभोजआदित्य	तथा	३८
राजागेहादित्य	तथा	३९
महाराजाबापारावल	तथा	४०
रावलपदवी	तथा	४१
रावलगुहिल	तथा	५६
रावलभोज	तथा	५८
रावलशील	तथा	५८
रावलकालभोज	तथा	५९
रावलभर्तृभट्ट	१०४२	३
रावलअघसिंह	तथा	५
रावलसमहायक	तथा	५
रावलखुमाण	तथा	६
रावलअल्लट	तथा	७
रावलनरवाहन	तथा	८
रावलशक्तिकुमार	तथा	१०
रावलशुचिवर्मा	तथा	१०
रावलनरवर्मा	तथा	११
रावलकीर्तिवर्मा	तथा	११

॥ राजवंशस्य सूचीपत्रम् ॥

विषय :	पृष्ठं	पंक्तिः
रावलवैरड	तथा	१२
रावलवैरिसिंह	तथा	१३
रावलविजयसिंह	तथा	१४
रावलअरिसिंह	तथा	१४
रावलचौंडसिंह	तथा	१५
रावलविक्रमसिंह	तथा	१६
रावलक्षेमसिंह	तथा	१७
रावलसामंतसिंह	तथा	१७
रावलकुमारसिंह	तथा	१८
रावलमथनसिंह	तथा	१८
रावलपद्मसिंह	तथा	१९
रावलजैत्रसिंह	तथा	२०
रावलतेजसिंह	तथा	२१
रावलसमरसिंह	तथा	२१
रावलरत्नसिंह	तथा	२५
रावलकर्णसिंह	तथा	३२
महाराणाराहप	तथा	३३
राणापदवी	तथा	३४
राणानरपति	तथा	३५
राणादिनकर	तथा	३६
राणा यशकर्ण	तथा	३७
राणानागपाल	तथा	३७
राणापूर्णपाल	तथा	३८
राणापृथ्वीपाल	तथा	३८
महाराणाभूणसिंह	तथा	३९
राणाभीमसिंह प्र०	तथा	४२
राणाजयसिंह	तथा	४२
राणालक्ष्मणसिंह	तथा	४२

॥ राजवंशस्य सूचीपत्रम् ॥

आशय:	पृष्ठ	पंक्ति:
महाराणा अरिसिंह	तथा	54
राणा अजयसिंह	तथा	53
महाराणा हम्मीरसिंह प्र०	तथा	60
राणा क्षेत्रसिंह	1043	4
राणा लक्षसिंह	तथा	5
राणा मोकल	तथा	8
महाराणा कुम्भकर्ण	तथा	14
महाराणा उदयसिंह	तथा	33
राणा रायमल्ल	तथा	40
महाराणा संग्रामसिंह	तथा	44
राणा रत्नसिंह	तथा	57
राणा विक्रमादित्य	तथा	60
तन्माता कर्मवती	1044	12
राणा उदयसिंह	तथा	40
महाराणा प्रतापसिंह प्र०	त० 1045	10
महाराणा अमरसिंह प्र०	तथा	40
महाराणा कर्णसिंह	तथा	58
महाराणा जगत्सिंह प्र०	त० 1046	15
महाराणा राजसिंह प्र०	तथा	20
महाराणा जयसिंह	तथा	35
राणा अमरसिंह द्वि०	तथा	47
राणा संग्रामसिंह	तथा	50
महाराणा जगत्सिंह द्वि०	तथा	55
राणा प्रतापसिंह द्वि०	1047	6
राणा राजसिंह द्वि०	तथा	8
राणा अरिसिंह द्वि०	तथा	11
राणा हम्मीरसिंह द्वि०	तथा	35
महाराणा भीमसिंह द्वि०	तथा	38

॥ राजवंशस्य सूचीपत्रम् ॥

आशय:	पृष्ठ	पंक्ति:
महाराणा जवानसिंह	तथा	55
महाराणा सरदारसिंह	1048	7
महाराणा स्वरूपसिंह	तथा	12
महाराणा शंभुसिंह	तथा	27
महाराणा सज्जनसिंह	तथा	37
महाराणा फतेसिंह	1054	13
तद्विषयकवर्णनम्	तथा	17
अतः परं कविराज	तथा	46

॥ इति वंशवर्णनम् समाप्तम् ॥

श्री १०८ श्रीमहाराणाफतहसिंह :

जितौशा : शौर्यार्थे कुशल जन
युक्ता अभिरता : सदा भोगाशक्ता
विविध सुहृत्साहित्य विषये : ।
सततायं हिन्दो नृप फतहसिंहो
ऽ इतनय : प्रजा शिक्षारक्षाकरण
पटु संस्थान नियत : ॥ १ ॥
नृपाणां [illegible]ना सुचितपरिपाटी
जनहिता प्रजा रक्षा सीमा सकल
जन पीयूष लहरी । तथेमांश्री
कुर्वन् नृपफतहसिंहस्य, मुदितो
प्रजा रक्षा शील : सकल वसुधा
पालन रुचि : ॥ २ ॥ दिनानां
संख्यानं विविध नर कर्मार्जन
विधेर्बहु स्वल्पं स्पष्टं नृप फतह
सिंहस्य बलिन : नृपाणां शूराणां
समरविजय श्रीरतिहिता जयश्री
न्यायश्रीरविकुलनृपश्रीपदरता ३

श्रीशब्दार्थचिन्तामणौ चतुर्थभागः

‡—‡—‡

शब्दार्थचिन्तामणिरस्तु पूर्णः शब्दार्थचिन्ताहतचित्तभाजाम् ।
विद्वद्गणानामथवामराणां चिन्तामणिश्चार्थकरो नराणाम् ॥ ४ ॥
इति शब्दार्थचिन्तामणिकोशः समाप्तः ॥

इत्यादि गौड़कुलोत्पन्न डीडवाल प्रथमोपनाम तुलाराम मिश्रात्मज श्रीधनपति मिश्रापरनाम्ना श्रीसद्गुरु कुलावधूत श्रीपरमहंस परिव्राजकाचार्य श्री महाहरिहरानन्द नाथ भारती शिष्येण ब्रह्मावधूत श्री सुखानन्दनाथापरनामधेयेन विरचिते शब्दार्थचिन्तामणौ यवर्गशवर्गयो चतुर्थभागः समाप्तिङ्गतः ॥

श्रीसुखानन्दनाथ तच्छिष्य श्री जगदीश मिश्रापरनाम ब्रह्मावधूत श्री जगदानन्दनाथ प्रीतिकामैः, श्रीमन्महाराजाधिराज रविकुलावतंस महिमहेन्द्र यावदार्यकुलकमल दिवाकरैः मेदपाटदेशाधीशैः रखिल भूपाल मौलिमणिभिः श्रीयुत महाराणा कैलाशवासि सज्जनसिंहै स्थापिते तत्पुत्र श्री १०८ श्रीयुत महाराणा श्री फतहसिंहै रक्षिते उदयपुरस्थ सज्जनयन्त्रालये मुख्यमन्त्रि कविराजिराज श्रीश्यामलदास प्रेरणया पण्डित वाजपेयि वंशीधरेण अकिञ्चनाजितदेव शर्मणा च शोधितः जीवनराम शम्भुनाथ श्यामसुन्दर गुलाबराम लक्ष्मीनाथ प्राणनाथ लालसिंह प्रभृतिभिर्हिन्दुभिः वर्णक्रमेणादर्शितः सर्दारबेग यवनेन मुद्रितः ॥

—···—

एकोनविंशत्यधिक द्विचत्वारिंशत्तमे सम्वत् १९४२ वैक्रमाब्दे
राजधान्युदयपुरे सज्जनयन्त्रालये मेदपाटेश्वर
कोशधनव्ययात् वाजपेयि वंशीधरस्य प्रबन्धतो
पञ्चम्यामाश्विन शुक्लायां संवत् १९४२
तदनुसारेण १३ अक्टूबरे सन् १८८५
ईसवीये मुद्रितः

अशुद्धिलेखः	शुद्धिलेखः	पृष्ठाङ्कः	[illegible]	पङ्क्तिः
ऽ ऽ - तुक्	०० ००	१	प्र०	१६
- त	यत्रात्रप्रययुक्तदेम :	१	द्वि०	१६
- यः	वटवृक्षे	१	०	१७
- य	दृश्यते	२	०	१४
- म	मां कृत्वा०	३	प्र०	१४
- षं	विशेषे	३	०	१५
- हे	मतिपूर्वपि०	३	०	२२
- मु	मखे	३	०	२६
- ष्टा	ज्योतिष्टोमा०	३	द्वि०	१८
- वृ	जुहुति	३	०	२८
ऽ - रिचच	परिचक्षते	४	प्र०	१२
- द्रौ	शूद्रासु	४	०	२४
० ष्टा	अग्रश्रेष्ठा । स्तो०	४	द्वि०	२५
- वृष्टो	अग्निजिह्वोद्भवैरासा	५	प्र०	१८
- घा	नरकोघोरः	५	०	२४
- ह्या	गुह्याप०	५	द्वि०	५
- हि	त्रोहिन्	५	०	१५
- स्फय	स्फ्यकपालादि०	५	०	२६
- स्फय	स्फ्यश्च कपालानि	५	०	२७
- हं - ल्यु	तत्कर्माहंतात्युपच्छ	६	प्र०	८
- ड्ग	सुग्भोड्गनिप	६	द्वि०	१४
- न् - न्	अहं देवान्नमामि०	७	प्र०	१
- ष्य	हविष्याग्नौ०	७	द्वि०	१८
- ख	खञ्जनरते	८	प्र०	३
- य । था	तथाशब्दस्तथशब्दो	८	द्वि०	२१
० भा	यथार्थानुभवः । पुं०	९	प्र०	२५
- थ	अथ गतं	१०	द्वि०	२४
- न	असाधून्	११	प्र०	२३
ऽ ऽ - असाधून्	० ० ० ०	११	०	२४
- घ । य	माधुर्यदृश्येतियमाः	१२	द्वि०	१८
- पि पि	प्रश्नरमयिनचिरमयि	१३	प्र०	१४
ऽ मिशौशो	अभियमिशोऽभ्यः	१४	द्वि०	१०
- ते	नृपतौ	१४	०	२२
- यो :	यापो :	१४	०	२८
- स्य	स्वल्पयशकीर्त्तितः	१५	प्र०	१०
- र्यो	स्वर्थोऽस्वकरोगुरुः	१५	०	१४
- रो	स्थैर्यकारोप	१५	०	१६
- घो	यौति	१५	०	२८
- न्हि	वह्निदीपनः	१५	द्वि०	२१
- प्र - चा	शौराइ०भो०प्र० ९ चारि	१५	०	२५
प	युगान्याम्	१५	०	२९
वृ	तृणांश्चये	१६	०	५
थि	पुष्पिकायाम्	१६	०	६
- स्म	यवनस्य	१६	०	११
- स्या	फलान्यस्य०	१६	०	१८
- ड	ढक्कायाम्	१८	प्र०	९
- ष्टे	विशिष्टे	१८	द्वि०	१५

अशुद्धिलेखः	शुद्धिलेखः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः
२१ - पङ्क्ष	पिङ्गला०	१८	०	२०
०ष्ठि	यष्टि.मधु ।	१९	०	२
- स्म	स्मार्ताग्नि	२०	प्र०	१७
- ण	अभिजित्	२०	द्वि०	२
- न्हा	चिह्नानि -	२०	०	२५
- णि	अस्मात्स्मृतमात्	२२	०	७
- स	सायात्रा	२३	०	२३
- स्व	तस्येद्मित्यण्	२४	प्र०	२२
- टा	स्त्रिं शच्छताभिध	२६	०	८
- म - तो	यामवती । स्तो	२६	०	२१
- स्	क्षआदिभ्यो वुन्	२७	द्वि०	१०
- य	पर्यन्तं	२७	०	१५
- त्या	वहियुज्यामिद्रित्थ सत्व्	२८	प्र०	२५
- श्रं	माक्षमुनिपुङ्ग	२८	०	२७
- स - मा	सायंसंदेवानां	३०	०	१०
- व	पुष्प पुत्रस्य	३१	०	२२
- गो	[illegible]	३२	द्वि०	५
- यु -	युधसम्पत्ति	३२	०	१५
- ध	युधि :	३३	प्र०	११
- व	[illegible] : स्यात्	३३	द्वि०	१८
-त्वम् । चि० गर्भ यंत्र्यात्स्य नवम्यु त्रितानपङ्क्तिभ्यः पूर्ववर्णवर्द्धयित्वा शब्दसंस्कृतमयमशुद्धि :		३४	प्र०	८
- थ	पुस्यें	३४	द्वि०	४
- पियुक्षयु	लुपियुक्षवत्	३४	०	१७
- र्स - त	हं-त०	३४	०	२५
- त्व	तत्त्वम्	३५	प्र०	४
- शा	चषालि	३५	०	८
- सु :	वपु :	३५	द्वि०	१३
- र्मा - धृ	सुकर्माचधृति :	३५	०	१८
- त्यड्ये	गरुड्ांशुद्धिर्भुवश्चैव	३५	०	२०
- यं	सम्यग्दर्शनोपाये	३५	०	२६
- त - भा	चित्तैकाग्रतयाभाज	३६	प्र०	२
- त्व । भा	तत्त्वस्यसानुभवा०	३६	०	३
- र्वृ	निर्वृत्ति०	३६	०	६
- द्राध्यो:	सिद्ध्यर्थसद्ध्यो:	३६	०	७
- त्व	तत्त्वमस्यादि	३६	०	१२
- द्व	ईश्वरसङ्कल्पे	३६	०	२१
- म्ये	आत्मौपम्येन०	३८	०	२०
- सु	देवतासु	३८	०	२०
- ष्ठ	दृष्टयोगिनो :	३८	द्वि०	३
-ऽद्रायियि	प्रद्रायिनो	३९	प्र०	५
श	हविनामोषधी	३९	द्वि०	७
- यु ०	युज् ०	४०	प्र०	६
- ष	कोशचतुष्टये	४०	०	८
-ऽमे :	गर्भाधानस्थाने	४१	०	७
- श	प्रदर्शनोया०	४१	द्वि०	२८
-ऽद्राकार वि	मुद्राविशेषे	४२	प्र०	१
- मा	मार्गेषु	४२	०	२४

अशुद्धिलेखः	शुद्धिलेखः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः
-ना-न्ति। ता	विज्ञानन्तिममसा तानपण्डिता :	४२	द्वि०	१
व :	सर्वभूतानां	४२	०	३
र्हि। त ऽ	मर्हति	४२	०	१२
न्धि। मि	संवन्धिनि	४३	प्र०	२४
- रि	निषेविणाम्	४३	द्वि०	८
- च	कुचे	४३	०	१०
- म्य	संवर्तयौवनायम्य	४३	०	२३
- थ	चतुर्थत्व०	४४	प्र०	१५
- त	नेत्रान्तानि	४४	द्वि०	३
- ष्ठी	धराष्ठीव	४४	०	४
- त	पित्तल :	४४	०	१४
- स्ता	स्नावर्णोप०	४४	०	२५
- ये	पार्श्वे	४५	प्र०	२०
- त। ङ्ग	पत्तङ्गे	४५	द्वि०	१
- वर्णे	हृत्ते	४५	०	१६
• ।-	रक्तपुष्प : । पु०	४७	प्र०	२
- कु	कन्दूरी०	४७	०	२२
- ङ्	कुङ्कुमे	४८	द्वि०	१८
- खाद	रक्तखदिरे	४८	प्र०	२
- र्च	रचिका :	५०	द्वि०	२
- ष्यो	भविष्योत्तरे	५१	प्र०	१०
- न्ध	दुर्गन्धे	५२	द्वि०	२८
- ज	रजस्वर्णम्	५३	प्र०	३
- णि	०निर्णिक्या०	५४	द्वि०	१०
- त	धावक	५४	०	१७
- गौरादित्वान्ङीष्	कृदिकारादिक्तिनः ष्	५५	प्र०	२२
- रञ्ज	रञ्जनम्	५५	द्वि०	२५
- न्हि	चतुर्थेऽङ्कि	५६	प्र०	१५
- ता	बहुलत्वाच्च	५६	द्वि०	२०
- त्या	रागीत्यादनर्थान्ये	५७	प्र०	२०
- ग	जनपद	५८	०	५
- पी- स्व	रक्तपीतस्व	६१	०	६
- स्य	गोलमस्य०	६२	द्वि०	४
- ष्य	पुष्पसंयुता	६२	०	२२
- प्रो	पोतने	६२	०	२५
- स्य	त्वाद्रां म्	६३	०	६
- प २ १	नित्यच्युतादि	६४	प्र०	१६
- स्यलग्न	लग्नलग्नस्य	६४	द्वि०	३
रु	रुतेष	६४	०	२०
- न्दू-स	०मन्दूरसरणी	६७	०	१४
- ल्या	वहनाग्यपोग०	६६	प्र०	३
- च	मधान्ये०	७०	०	८
- मो	सरमोनोभवद्	७५	द्वि०	२५
- का	मधुरकामत :	७६	प्र०	६
० स्य	राजसेन्द्र : पु०	७७	द्वि०	१
- त्व	व्युत्पत्त्या -	७७	०	२७
- ग	तेरागाद्वति -	७८	०	३
- ग्रा	विगर्ता -	७८	०	२८

अशुद्धिलेखः	शुद्धिलेखः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः	अशुद्धिलेखः	शुद्धिलेखः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः
- म	मालवीचिव -	७८	प्र०	१०	- मू	शूलातो	१०५	प्र०	११
- फ	मध्याङ्कका -	७८	द्वि०	५	- श्रो	श्रीक्षणस्य -	१०७	द्वि०	१
- का	अक्रोत्यानं -	७८	०	१८	० र ऽ	विरंसुः ।त्रि०	१०८	प्र०	१८
- दी	मन्दिरं -	८०	प्र०	२२	० म्ः ।	रिपुफम् । न०	१०८	द्वि०	६
-वि	निषण्णा०	८०	द्वि०	८	- ये	स्वादयमांदित :	१०८	०	२४
- त्रि	पद्मागाणांस्तोपु	८३	०	१२	- य	सम्पा	११०	०	१६
- थे	वैविकापुष्पं	८४	०	२	० रि	रौतिकम् । न०	११०	०	२५
श्रि :	राश्रि	८४	०	२५	० श्री	शोभायाम्	१११	०	२०
- से	षसिरधित	८६	प्र०	१४	० वि	दवो । स्तौ	११२	०	२६
- व	- स्वचक्रस्य	८६	०	१८	- थैः	कन्दिविद्विप्यांछिदित्वथः	११३	प्र०	२४
ता०म्	चिचताम्	८६	द्वि०	२४	- द्रा	नद्राप्रकारा०	११३	द्वि०	७
- णा	विक्षणत्वं	८८	प्र०	२६	- स्प	वलस्य.छाधिकंय :	११५	प्र०	६
- न्या	राज्यवेशे	८८	द्वि०	८	- श्रु	श्रु.कश्क०	११५	द्वि०	५
-विराज०	विराटजं	८८	०	२१	- श्र	शहविसायाम्	११६	प्र०	२४
- ल्प	चरतल्प.धौ :	८८	०	२८	२ १ ह्व'अत	रहवाजजन्म०	११६	द्वि०	११
- क्रा	नेमक्रविका०	९०	०	६	- म्रु	क्रायायाम्	११६	०	२८
० ण	राजभोगीनम्	९१	०	१२	- तः	प्रतायाथ०	११७	प्र०	१
- ग	ततामत :	९२	प्र०	१८	त्या	पद्मात्यादीनां	११७	०	२४
- य	वामथ त्रि	९२	द्वि०	८	- र्घः	दीर्वाः	११८	०	२
ऽ ल्युट्	कर्तरि ल्युः	९५	प्र०	२२	- ङ्गा	यङ्गान्य	११८	०	१४
- ग्र	प्रदर्ग्य०	९५	द्वि०	२०	२ १ - । :	०नोत्तमपि : ।	११८	०	१७
- स्वऽपप	वापलस्वपरित्यज्य	९६	प्र०	२८	- वन्तो	कुर्वन्तौ	११९	०	२५
- श्र	पुरराष्ट्र	९८	द्वि०	१४	- त्या	त्यक्तो	११९	०	७२
- पु	राधेयःपु०	१०२	प्र०	१८	- प्या श्या	रुप्यश्रीतंकषायाक्तं	११९	द्वि०	१८
-स्यऽम्मृत	लोकेषु स्वाक्षय	१०२	द्वि०	२६	- ट	पाटप्याट्	१२०	०	१८

अशुद्धिलेखः	शुद्धिलेखः	पृष्ठाङ्कः	[illegible]	पङ्क्तिः
- त्य	त्वं त्काद्वित्वात्त्वम्	१२१	०	२२
- ति	दीमाचाराजा	१२४	प्र०	६
- री	गौरीचना०	१२५	०	१२
- क	कपविमोक्षमे	१२६	द्वि०	१३
- कप	वप्यं	१२६	०	१५
- म :	रोमे । म०	१२७	०	१०
- क्षि	क्षिक्षिरिष्टा०	१२८	०	८
- स्वे	रोमास्वे	१२८	०	११
० ट	वोट् । चि०	१२८	०	२७
- ष	हेमघर्षणे	१२९	प्र०	६
- मा - न	समापनकालः	१२९	द्वि०	८
- ष्टो	श्रेष्ठोषौ	१३०	०	५
० त्वा	वोत्पातादिना०	१३१	प्र०	४
० ला	कला : पं०	१३१	द्वि०	२
- ला	कला भोजने	१३१	०	३
- विमृषे	विमृषे	१३१	द्वि०	२६
- नं	रोहिण्य०	१३२	०	१०
- त्व	तत्त्वम्	१३२	०	१३
- र	रकारः	१३२	०	२८
न्द्र	वक्किर्र०	१३३	प्र०	१५
- भ०	भा०	१३३	०	१८
० पु०	लक्ष्मा । श्लो०	१३४	०	१५
- त्या	हृत्य०	१३४	द्वि०	१७
- त्य	वैकत्य०	१३४	०	२०
- त्या	हत्या०	१३५	प्र०	१
- त्या	हत्या०	१३५	०	३
- त्या	गुणहत्या०	१३५	०	८
- सु	मुत्योविना०	१३५	द्वि०	२०
- मे	चिके	१३६	प्र०	११
- च	चेति०	१३६	०	१४
- म	श्रीमुखं	१३६	०	१५
- वा	पानादित्वाच :	१३६	०	१६
- च	कृमयप्रद : । श्लो०	१३६	०	१८
- चर	नागपत्रम्	१३६	०	२५
- न्य	दुर्योधनकन्यायाम्	१३६	द्वि०	३
- त्व	सत्त्वगुणे	१३९		४
- य	तदाभिर्वोतित्वात्	१४०	०	७
- स	मनोसारं	१४१	प्र०	७
- छे	पुच्छे	१४१	०	१७
- प	दधिशाप्य०	१४१	द्वि०	८
- सु	सद्रुका :	१४१	०	१२
क्ष	पयोम्बोदक्षं	१४२	प्र०	४
- त्या	हत्या०	१४२	०	११
- गौ	सुपगैता०	१४३	०	१७
- मा	नक्षा०	१४४	०	१०
- भि	वक्रताभि :	१४५	द्वि०	१८
- त	हस्ताटे०	१४६	प्र०	१५
- स्य	मात्स्यघातो०	१४६	द्वि०	१३

अशुद्धिलेखः	शुद्धिलेखः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः
- कि	नेत्रादिक्रिया०	१४६	०	१८
- म्य	लिम्पन्ती०	१४६	०	२३
ईप्सि.ते	ईप्सि.ते	१४७	प्र०	१३
- मे	देवकुसुमे,	१४७	द्वि०	१३
- मा०	भा०	१४७	०	१५
- य - ।	स्वादुतरसारस्य।	१४८	प्र०	७
- य	विषये	१५०	द्वि०	१८
- त्व	सत्त्वगुणे	१५०	०	२५
- स्या : ऽ	कृत्यास्या :	१५१	०	२४
- कोमस	कौषादिकोसयः	१५२	०	२८
- क्ट	नैकट्यास्	१५३	प्र०	२४
- ग्न	सर्गोऽकेन्दु०	१५३	द्वि०	२३
- ष्ट	तिष्ठत	१५४	प्र०	६
-सा -र्च	ललामश्चे तिठक	१५४	०	१२
पकल्पसवि-तस्ये ति	पृषोदरादित्वात्	१५४	द्वि०	२३
- सु	मधुरेणभा०	२५५	प्र०	८
० षृ	धातु : । स्तो०	१५५	०	२०
- ज	लघगुर्वेति	१५५	०	२१
- क्ट	क्टकलार्दीत्	१५५	०	१६
- डि :	नेता, अं.श०	१५६	०	६
-भि - तं	प्रमाणलिपितं	१५६	०	२०
द्धि	सद्धिति०	१५६	०	२७
ई	लिङ्गादि नियोगे। ०	१५७	०	५
- ति	निमित्तन्तु०	५५७	द्वि०	२४

अशुद्धिलेखः	शुद्धिलेखः.	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः
- द	ऋदिकारादित्तिषो ष्	१५८	०	२२
- ग्धे	दिग्धे	१५८	०	२५
- लिह्	लौहश्लेषणी	१५८	०	२८
- त्या	प्रत्ययस्यपुट्	१५९	प्र०	१
- ङ्गा	न्यङ्क्वादित्वाद्गा	१६०	द्वि०	१६
- र्ये	लुभगार्थ्ये	१६१	०	७
- य	लुलयासावापय	१६१	०	१३
- य	लुलापकस्य : । पुं०	१६१	०	१७
- य	लुलापशान्तः स्त्री०	१६१	०	१८
- ल्पे	वाल्ये	१६१	०	२८
- या- न्तु	लतायास्तन्तुः	१६१	प्र०	१५
- ल्ये	चाल्येन	१६२	द्वि०	२०
- न्वे	हितान्वेषी	१६३	प्र०	५
- च्छ	छर्दने	१६३	०	१३
- खं	लेखं०	१६३	द्वि०	१
- ठ	कण्ठान्यत :	१६३	०	१७
- ल्पे	ताक्ष्ल्ये	१६४	०	१७
- क	आत्मलोकं०	१६५	०	१४
० । - ज	लोकधातु.।पुं०जम्बु	१६६	प्र०	१०
० पं०	लोकलोचनः । पुं	१६६	०	१८
- स्य	यस्येतिवा	१६७	०	२
- भिन	वसिमग्नित्यादिना०	१६८	द्वि०	२२
० भ्र - ह	लोभ्रकस्तः।पुं०	१६९	प्र०	९,
- ० ला	लोपः । पुं०	१६९	०	७

अशुद्धलिपिः	शुद्धलिपिः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः
पद्ग	सुप्त.१	१६८	०	२४
मि	सामगीये	१७०	०	२२
स्था	स्योत्पत्या.द्यो	१७२	०	१३
त्वा	द्वा	१७२	द्वि०	२३
ला	दत्वापरि०	१७२	०	२८
ष्टा	प्रतिष्ठा.या	१७५	प्र०	४
त्व	तत्त्व.मिति०	१७५	द्वि०	६
ट्र	ट्रामलङ्क्षिणे	१७६	०	१०
क्षौ	संज्ञको	१७८	प्र०	१६
सि	अगस्त्यप्रसङ्गे	१७८	०	२१
ल्पे	कुल्य.	१७८	द्वि०	१३
का:	वालुका:	१७८	०	२८
कु	कृप्या०	१७८	प्र०	१
अ	कुत्सपादेशीवा	१७८	द्वि०	१०
गा	महाराशी०	१७८	०	२८
ब	कुटिलाश्ववयवे	१८०	द्वि०	८
०वोक्ष	वक्रो । पुं०	१८०	०	१०
व	-नैवाऽऽन्वलाती मवान्	१८०	०	२०
ष	अशोकेन०	१८०	०	२४
क्कू	कृत्तिकायाम्	१८२	०	२
पृ	विशेष	१८३	०	१२
म	धात्राम्	१८४	प्र०	०
सो	स्नेमसौखित	१८४	द्वि०	१०
सु	सेः कलहर०	१८४	०	२५
स	सत्त्व.वर्जिता:	१८५	प्र०	२८
क्रोधा	क्रोधान्	१८५	द्वि०	१०
ष्य	घस्त्या०	१८६	प्र०	२
द्रो	प्रलद्विपस्या	१८६	०	२१
०म	।जामनम् न०	१८८	प्र०	४
स्न	वस्तु	१८८	द्वि०	८
पि	विशिपे	१८८	०	२८
ता	पूजिता:	१८८	प्र०	१०
ल्पं	अल्प गु.ता	१८०	द्वि०	५
२१ राधा	साधारा	१८०	०	२६
क्रा	आनुक्रोशि	१८१	०	२२
प	तंमयसि	१८१	०	२८
म्	गातरम्	१८२	प्र०	८
म्पा	अनुकम्पाया	१८२	द्वि०	१६
ना	[illegible]	१८३	०	२६
प्रा०	प्र०	१८४	प्र०	१६
य	लवंण्डायाम	१८४	०	२५
[illegible]	मिश्र्याम्	२००	०	१५
[illegible]	स्तूप	२००	०	२३
[illegible]	स्तूप	२००	द्वि०	१
०प०	वपुन: । पुं०	२००	०	११
टु	स्तूप	२०१	प्र०	१४
द्रं	अद्रि	२०१	०	२२
०पं	दय: । नृ-	२०१	द्वि०	१२

अशुद्धिलेखः	शुद्धिलेखः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः
-हा	वषोवाधिल्वाद वसि	२०२	प०	२
ऽ तिद्योगवि ऽ भागात्कः	सपौंतिकः	२०२	०	२१
-णौ	हनौ	२०३	द्वि०	२२
-सा	श्रुतिसुंखवणसर्वाङ्गी	२०५	प्र	२८
वराटका				
रजाः।	पुं० नागकेशरतुसे	२०६	द्वि०	१८
चि०	पि०	२०८	द्वि०	१
-क	वरणा०	२०८	प्र०	१६
-द्वो	पङ्क्तिपितम्न०	२०९	०	२३
-भ्यां	तृषुअभ्यां मूथम्	२०९	द्वि०	१५
-चि०	दूति	२११	प्र०	५
-ण:	वर्णसङ्कर:	२१४	०	२१
-ा	समय	२१६	०	११
-क्र	सङ्क०	२१६	०	२०
-त्ता	अप्रमत्ता	२१६	०	२८
-स्य	मात्रात्मयोन्	२१७	०	२८
-ष्ट	श्रेष्ठ	२२७	द्वि०	२८
-व	मन: पूत-	२१८	प्र०	२
ऽ संस्थान्	सप्त्या०	२१८	०	१२
-स०	प्रात: सूर्योदय:	२१८	०	१८
-स्रा	कमलाया च	२१८	द्वि०	७
-थ	प्रमोदार्थं	२१९	०	१०
-न०	मध्योग्रानं-	२१९	०	१८

अशुद्धिलेखः	शुद्धिलेखः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः
-त	भूमृता-	२१९	प्र०	१२
-मा	हर्म्याम्	२१९	०	२०
-क	सङ्ख्यामो-	२१९	द्वि०	१६
ऽ -वयाया	देवकाया प्रविशये	२१९	०	१८
-स्य	मर्यादार्थ	२२०	प्र०	८
-य०	स्वयं-	२२०	द्वि०	३
ऽ -स्वदद	तस्वदर्शिना	२२०	०	७
-ष्य	वाधिका	२२०	०	१४
-पं	समहार्पा	२२१	प्र०	२०
-व	प्रात्वेवं	२२२	द्वि०	७
-जा	भागजन:	२२२	प्र०	१
०न-	वर्णि: । पुं०	२२३	०	१०
त्य -स्य	प्रत्ययस्यादितील्वं।	२२३	०	१९
-षि -ति	नवतोतिवनृपोध्य:	२२५	०	२०
-टा	कोकुटा	२२५	द्वि०	५
-ते	हत्ते	२२५	०	७
-क्ष्ये	निवक्षदे	२२५	०	१२
२ १ -दक०य	ववक०	२२७	०	११
-यु	पूपविमोषे	२२७	०	१२
-यू	धारापूपकवत्-	२२७	०	१४
-।।-	।कतो ऽ	२२८	०	९
ऽ विद्वगौ:	पंविभाग्रवनिरौ	२२८	०	१०
भा -म	प्रथमं	२२८	०	२१
-मा	प्रमाणमनोवति०	२२८		१०

अशुद्धिलेखः	शुद्धिलेखः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः
- ष्या	मोष्ठादिः	२३०	प्र०	२५
ऽ -।ऽ ऽ ०	।ऽ०	२३०	द्वि०	२०
।स्ता-या	वस्ताकायाम्	२३०	०	२८
।-त्व	। म० त्वचे ।	२३१	प्र०	२२
-चौ	स्नापं तु०	२३१	द्वि०	८
- ष	टणे	२३२	प्र	१०
- णो	टणचौ	२३३	०	२१
- ष्याम्	वन्ध्यगवि	२३३	द्वि०	१८
- स्रु	अस्यद्वौ	२३४	०	१०
- म	गर्भापिप्यल्याम्	२३४	०	११
- व	यज्ञाभावेपि०	२३४	०	२४
ऽ -निवृत्ता	वसानिवाते	२३५	०	२
- स्	दोलायायास्	२३६	०	१२
- ।-क	।पं०कपिप्पल्याम्	२३९	प्र०	२
- सू	वास्तू मे	२३७	द्वि०	१
- च	ब्वन्तपिज्ञोगार्थ	२३८	०	१३
- ग्य	हिङ्ग्वः	२३९	०	२३
• ज	वस्त्ररञ्जनी । स्त्री०	२४०	०	१
- पृ	धापृवस्यज्यतिभ्योनः	२४०	०	१०
०क्र।म	वस्त्रनम् । न०	२४०	०	१२
- पृ	धापृवस्यज्यतिभ्योनः	२४०	०	१५
- ष्या। पु	ष्यष्य पण्डितचैतन्ये	२४१	०	७
•।-	बह्लोकः।पं-	२४२	प्र०	१७
०।-	वा। ष-	२४३	०प्र	१८
- ध्द	कुत्रयग्देतारे	२४३	द्वि०	२६
- नि	इति -	२४५	०	१९
- च्य	वाचयामि-	२४५	०	२०
•वा- क्र	वादृक्	२४६	०	८
- मी	परोधर्मी	२४६	०	१५
- न्त	कर्मशान्त	२४७	०	१८
- य	पू पविश्यपि	२४८	प्र०	२७
- वि	प्रलापकः	२४९	०	७
- र्ध	धौर्य०ख सद्ध्ये	२५०	द्वि०	७
- प्र दु	अलुटष-	२५०	०	१२
- ञि	स्त्रिञ्ज कायाम्	२५१	प्र०	१०
- त्ति	तुति स्थाने	२५१	०	१
- णो	तृणौ	२५१	०	१३
- ध	वाटधानः पुं०	२५१	०	१६
- घ	पधिरोधक०	२५१	०	२०
- ह	इत्कट कुचे	२५१	द्वि०	३
- वा	वहवाग्नौ	२५१	द्वि०	२२
- ह्न	वाहप्रयत्ने	२५२	प्र०	१०
- प्रा	प्रसादन्तया	२५२	द्वि०	२६
- धात्तु	स्त्रिग्धाहृ्या : सु. पूजिता:	२५३	०	२२
- वा	अपराजिता याम्	२५४	प्र०	३
- त्रा	स्वर्गोत्रौ	२५४	द्वि०	१०
- य- ट	उन्मत्तादृवनटघस्र-	२५५	प्र०	९
- चे	वृहसूत्र	२५५	०	१८
- ल	परसङ्गमे	२५६	०	१५

अशुद्धिलेखः	शुद्धिलेखः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः
० त	वातीङ्ग : । पुं०	२५६	द्वि०	२२
- स	वातीङ्ग :	२५६	०	२२
- र्	वृत्वचादारु०	२५७	०	३
- तथा	राजयक्ष्माणमौद-रम्	२५७	०	६
- म	भाण्टाकाम्	२५८	प्र०	२
- सहे	मोहताह्वते	२५८	०	१५
- : - [illegible]	पक्षान्यवोपपन्नः : पक्षप्रतिपक्षपरिग्रहीतार्द : [illegible]	२५८	द्वि०	१४
- म	भावनम्	२५८	द्वि०	१७
- ध्य : :	मध्यस्थ :	२६[illegible]	प्र०	१०
- ढ	दुर्दुरूढवादिनि	२६०	०	१३
- भ्या	योन्य याभास	२६३	द्वि०	७
- ल्य	भट्टार्ल्य	२६३	०	१६
- ण	क्रम्ब्ललावोज	२६४	प्र०	६
- भा	सम्भवात्	२६४	०	२७
० द	वादामम् । न०	२६४	०	४
- व	भूया दृष्टभ्यामनल्	[illegible]	द्वि०	१७
० नौ	महावनौ	२६४	प्र०	१५
- न्य	महोत्पन्नत्वलावणो	२६५	द्वि०	१२
- द्रं	तारिमन्द्रे, [illegible]	२६५	०	१५
- न्य :	[illegible]	२६६	प्र०	१६
- लौ	समुद्रौ ०	२६७	प्र०	१६
- प	चारान्श	२६७	०	१८
- ओ	प्रवच्छेदवादुर्यम	२६८	०	८
- गा - वा	गजरमावम्	२६८	०	१२
- कि - धि	तकिधिकर्तकिधिक०	२६८	०	१४
- क्ष	तक्ष.०	२६८	०	१५
२१ - नश	ठेषम	२६८	०	२३
- लू	भजभातालस्य	२६९	०	१५
- ये - श्रा	अयोदशाङ्.	२६९	०	१८
२१ - यवे	वावये	२७१	०	४
ऽ - यावे ॥	दीर्घिकाबाम् ॥	२७१	द्वि०	२९
ऽ - पप	परिमाषे	२७१	प्र०	३
पावावा	गुणनापि	२७२	०	८
- रा ति	कृद्विकारादिति०	२७२	०	२३
- मौ	वल्गौ	२७२	द्वि०	१३
- । षा	। म० वायसषम् ३	२७४	०	१९
- भा	पराति :	२७४	०	२६
- - स्य	शब्दस्य.शंगुणि	२७५	प्र०	१४
- मं	तस्यकर्मा०	२७५	०	२०
- मृ	मृषादे :	२७५	द्वि०	१४
- थे - च	स्तथैवच०	२७६	०	३
- स्व	स्वे	२७७	प्र०	१०
० यु	वायुः० स्पदम् । न०	२७७	द्वि०	६
० व	वारटा । स्त्री०	२७८	प्र०	८
- र	वाराणस्याम्	२७८	०	२२
- र्थ	पराहार्थे	२८०	द्वि०	१०
० वारि : स्त्री० शब्दोयंव्याख्यातत्वनमुद्रितम्		१६९	प्र०	५
- वौ	वारौ	२८१	प्र०	३

अशुद्धिलेखः	शुद्धिलेखः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः
-क्ष्	कुक्षिकायाम्	२८१	०	२१
-न्या	पर्णान्यस्याः	२८१	०	२५
-प्य	अप्पती	२८२	प्र	१६
-य	मुस्तायाम्	२८२	०	२२
-च	मिंच	२८२	०	२४
-वौ	तौष्	२८२	०	६
०व	वाकुडकिः । पुं०	२८२	द्वि०	१२
-म । ह	व्यासम्रकुल्यादिनिष्	२८२	०	१३
०व	वारुणकर्म०न	२८२	०	१८
-क्ता	सक्तायुक्ता	२८२	०	२८
-स	सामद्रावारुणो०	२८३	प्र०	६
-वा	वृन्दावनस्य०	२८३	०	१८
-प्या	निष्पादितांकुकार्य०	२८३	०	२४
० सु	मुदम्	२८३	प्र०	६
-नि-श	निःशङ्को०	२८३	०	१८
-वे	भाजते	२८३	०	२६
-षः	समूहे	२८४	प्र०	६
०गो	भाग्यदुर्गम् । न०	२८	०	८
०व	वार्तिकः । पुं०	२८४	द्वि०	१२
-क्य	मिरगाक्याम्	२८४	०	१८
-श	शुक्लप्रदा०	२८४	०	२५
-खं	लक्ष्म्यादिरूपात्मक्	२८५	प्र०	२०
-न्त	कार्यन्ते	२८५	०	२८
-वृद्ध	वृद्धएव	२८६	द्वि०	२२

अशुद्धिलेखः	शुद्धिलेखः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः
ऽयाद्म	[illegible]यायायीप	२८७	०	१
-द	वावदूक०	२८८	०	२५
तः	वारताः । त्रि०	२८८	०	२
-न्य	वाहन्यंसा	२८८	द्वि०	४
टाप्कः	कःटाप्	२८८	०	१२
०ष्टी	वाभिष्टो । स्त्री०	२८८	०	१२
ङ्गा	०ङ्गाङ्गिभ्यतरच्	२८८	०	२७
-श-को	वाशःकोपः पुं०	२८९	०	१
-त्सि	चिकित्सकाके	२९०	०	११
-भ	भाभ्यन्तर०	२९०	०	२४
-द	बहुलोवा	२९१	प्र०	१
-पा०	पट्टासादिचोटे	२९२	द्वि०	११
-धादेग	लक्षणस्वरथा	२९४	०	५
[illegible]	०तक्रमथस्तात्पश	२९४	०	६
-स्य	शयमाप्यते	२९४	०	२०
-स्ता	वास्ताव्यतोपि	२९५	०	२४
-गा	कुल्व०	२९६	प्र०	५
-गाद	रागादम्	२९६	द्वि०	११
-प	स्वयम्भा ०	२९८	प्र०	२१
-र्मी	सर्वाङ्गरेतमां	२९८	द्वि	१५
०व	वाह्निः । पुं०	२९९	प्र०	३
-म	वह्निकरेणेभवः	२९९	०	७
-स्य	मारभ्य०	२९९	०	१२
-न्य	भाषवन्मने	३००	०	१४

अशुद्धिलेख :	शुद्धिलेख :	पृष्ठाङ्क:	स्तम्भ:	पङ्क्ति:
- ल्य	भाविल्युट्	३००	द्वि०	१२
- म्य	कारम्यो	३००	०	२७
- ३ वि	[illegible]विचो पणि	३०३	०	८
- माने	क्षामानि	३०४	प्र०	२
- ऽ सम	आयसम्बन्ध्यानि	३०४	द्वि०	८
- क्षि :	हिन्दुगाता :	३०६	द्वि०	१०
० श्रा	[illegible] यशा: । श्रि०	३०६	०	२४
- म्य	विहायमीम्यद्गणे	३०७	प्र०	७
- ऽ [illegible]	[illegible] गत :	३०७	०	१४
- [illegible]	[illegible]	३०७	[illegible]	[illegible]
- ऽ [illegible]	[illegible] :	३०८	प्र०	[illegible]
- स्य	[illegible]	३०८	[illegible]	[illegible]
- गा	[illegible]	३१०	[illegible]	२०
- ण	[illegible]	३१३	०	२
- न्ना	[illegible]	३१४	०	२४
- म्द	[illegible]	३१३	०	[illegible]
क्ष	तक्षे	३१४	०	१
० श्रा	चिचिष्टनम् । न०	३१४	०	११
० छ	रिच्छिषि: । स्रो०	३१४	द्वि०	१
० चिछ	चिच्छित्वा यस्या । स्रो०	३१४	०	१८
- स्य	[illegible]	३१५	प्र०	१८
दि ग	[illegible]	३१५	द्वि०	२
- भो	[illegible]	३१६	प्र०	२८
ध	[illegible]	[illegible]	०	४

अशुद्धिलेख :	शुद्धिलेख :	पृष्ठाङ्क:	स्तम्भ:	पङ्क्ति:
- ०न०	दिक्तिलम् । श्रि०	३१८	०	८
- मा	कंटामस्याम्	३१८	०	१८
- स्थ	तत्त्वं	३१८	द्वि	२
- ऽ स्वस्व	स्वयस्वत्वागथनत्वत:	३१८	०	१०
- दा	बौद्धा	३१८	०	१८
- त	सिर्यङ्	३२०	०	६
- श	श्रादर्शे	३२१	प्र०	१६
- वरो	तोयम्यरो	३२१	द्वि०	१८
[illegible]	[illegible] प्रतारणा	३२१	०	२३
० वि	विडम्बित: । श्रि०	३२१	०	२७
- रपो	परपलो०	३२२	०	२८
- स्य	सुप्त: स्था०	३२३	०	११
- स्म	मदामसोवनी	३२४	प्र०	६
- धा	बौधपे	३२४	०	११
- द्व	मान्नादुद्वितीयमयन -	३२४	०	२५
- त	[illegible]तिमाधु :	३२४	द्वि०	२
- तीयं	मदाहितेद्रं०	३२६	०	१८
- । -रा	दिद्यामिमंगायां बा।	३२७	०	१७
- टुदुप माणे	। टुडुपवितापि।	३२७	०	२६
- स्वादिभ्य आति	स्वादयमोदितदमादितयेति	३२७	०	२६-
- नी	श्री नारदी	३२८	०	२५
- ऽ न्दफक	मन्दफलको	३२८	०	२१
ने पृ	यथाशिनपृथक्	३२८	०	२८
- स्व का	स्वपक्कायस्त्वं	३३०	प्र०	१४

पद्यादिमा :	पद्यादिलेख :	पृष्ठाङ्क:	स्तम्भ:	पङ्क्ति:
-वा	वाद्दिमोर्वादसंदेहे	२३१	द्वि०	२५
-त्वा। स्वा।	कत्वायतस्यातृतूर्यं०	२३२	०	[illegible]
पू ं ई -ता। सा। सा।	देवतासायास्कारा०	२३३	प्र०	७
-स्रा	साकाशाप :	२३४	०	१२
-ह	यथाशुद्धामकर्म या।	२३५	०	[illegible]
-ह	दृदिष्ठि	२३६	०	[illegible]
-वो	विपूर्वाद्धाओमनस्	२३६	[illegible]	५
-य	नियम :	२३७	[illegible]	[illegible]
-वि-त	नियिम्नयो	२३८	[illegible]	८
-यम०	यम०	२३८	०	१८
-त। दि	विनोमसामि	२३८	द्वि०	१४
-दि	निर्सूर्वसंस्तिग० ‐ षाद्	२४०	०	१३
-तं	सर्वविधत्ते	२४१	०	२
-य	यथाद्भत	२४१	०	६
-त्वे	द्धिकरणकस्य	२४१	०	८
-म। मस्य	ि०निवृत्तिरिति निरस्तो	२४२	प्र०	११
-स	तस्येत्	२४२	०	१०
स्रा-जी	स्रिवस्वापिजीव०	२४२	०	१८
-रि	०वेदिनव्ये	२४३	प्र०	[illegible]
-ञा	याति	२४४	द्वि०	[illegible]
-प	विपंचयति	२४५	प्र०	१
-य	यथा	२४५	०	२८
-ऽष्टे :	विशिष्टे	२४५	द्वि०	१८
-तं-सि	विकल्पितंबहिकता गमि	२४७	०	२५

पद्यादिमा :	पद्यादिलेख :	पृष्ठाङ्क:	स्तम्भ:	पङ्क्ति:
-क-य	तस्यक०यथा	२४८	०	७
त्व	कत्वा०	२४९	प्र०	६
-ऽर्व	पूर्वसूर्तिसर्वे०	२४९	०	१६
ऽऽ विदकमा	० ० ० ०	२५०	०	८
मु	मुनी	२५१	द्वि०	६
-ब	विशिवेष	२५१	०	८
-ऽस। र्य	विमिश्निते	२५१	०	८
-श्रि०	विमोत : पु०	२५१	०	२०
ऽ मम्न	कार्यानामेष्टिकस्यार्थ	२५२	०	२०
-ष	परिग्रहे	२५६	प्र०	८
-ग्रो	ग्रामायाम्	२५८	द्वि०	१४
[illegible]	[illegible] हितुषिव०	२६२	प्र०	१४
[illegible]	[illegible] इत्यशक्ति०	२६२	०	१६
-प	[illegible] यत्वे	२६२	०	१७
-ष्ट	निशिष्टे	२६२	०	२३
०ि	विकल्पम् म०	२६२	०	२४
ऽ नि	[illegible] निवमम्	२६३	द्वि०	२०
-न	मूपन :	२६४	प्र०	१
२ १ कुस	सुकुरा०	२६४	०	३
नि	[illegible] भिर्विभि :	२६४	०	१६
[illegible]	[illegible] चतःश्रिर्विव०	२६५	०	१६
यो	गिलवत्रो०	२६७	०	१७
त	वात:सुअयरी	२६८	०	११
त	वातकफापहम्	२६८	०	२०

अशुद्धिलेखः	शुद्धिलेखः	पृष्ठाङ्कः	[illegible]	पङ्क्तिः
-तं	सुक्तं०	२६८	द्वि०	२०
-मि·।।	पेमिका।।	८६८	•	२८
-च-य	यच्चयद्याहा	२६८	•	१४
-ती	अपावृतौ	२६८	०	१८
-न्द	आमन्द्र-	२७०	प्र०	३
-म	वंचनं	२७०	द्वि०	८
-व	निवद्ध	२७०	•	१०
-वे	विज्ञाश्वयोर्व्ये	२७१	०	६
-ली	क्लीविकरणं-	२७१	•	१२
-ष	येनाष्टं	२७२	प्र०	११
-पा	धारणा, दिङ्री-	२७२	प्र	२०
-ष	ष माश्रद :	२७२	•	२१
-य	[illegible]	२७२	•	२२
-म	[illegible]	२७३	द्वि०	६
-ण	मारणं	२७४	प्र०	१६
-शैल्य	अल्पे नरहितायाम्	२७४	•	२८
-तचो	[illegible]	२७५	०	४
-मायय	विमायय०	२७५	•	८
-।त	विमुडे	२७५	०	१८
-तमिम	तमिविधि०	२७५	द्वि०	२६
-तुमम	[illegible] तुमहाफला	२७५	०	१३
-धा	सर्वत्रला	२७६	प्र०	२३
-मि-त	मिन्नितयो०	२७६	०	२७
-अ.क.स	[illegible] प्रकृतिः [illegible] भव०	२७६	•	२८

अशुद्धिलेखः	शुद्धिलेखः	पृष्ठाङ्कः	[illegible]	पङ्क्तिः
-न्त	सुवन्तं	२७८	•	६
-न्या	चान्योन्य-	२७८	•	१८
-ष	[illegible]	२७८	•	२१
चारार्थः	विशेषादित्यर्थे	२७८	•	२५
-मा	[illegible] श्लो०	२७८	द्वि०	२६
-म	[illegible]	२७९	प्र०	१२
स्था	स्यामध्यद :	२७९	प्र०	२८
-क	[illegible]	२७९	द्वि०	५
-च	मोच-	२७९	०	६
-प	[illegible]मीयम्	२७९	•	८
-वि	[illegible]तिवच	२७९	द्वि०	२८
-सस	सत्यीन. श्लो०	२८०	•	२२
-त्य	[illegible]	२८२	•	१८
-ठ	[illegible]	२८६	•	४
ध्ये	[illegible]	२८७	०	२
-स	[illegible]	२८८	प्र०	१६
[illegible]	[illegible]	२८८	प्र०	२०
-षम्	[illegible]म्	२८९	द्वि०	५
-द्र	[illegible]	२८९	द्वि०	१२
-नि	[illegible]	२९०	प्र	१९
[illegible]	[illegible]	२९०	द्वि०	१२
-तनसो	[illegible]	२९१	•	१२
-ववत्वे	स्वभावत्वे नानु०	२९१	•	१८
यो	[illegible]	२९२	•	१९

अशुद्धिरेतत्:	शुद्धिरेषा	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः
-था	प्रासावरोयय्(ः)	२८४	०	१८
-ष	यस्मादिदम्.मिदं	२८६	प्र०	१०
-प	स्वरूप	२८६	द्वि०	२८
-.त्	० कन्.मत्परमो ०	२८७	प्र०	१४
-स्वा	विष्वग्देवयोर्वि-भाग०	२८८	द्वि०	२२
-भा-सो	विभावर्योयनमिदं	२८८	प्र०	२०
-क्ष	मन्निताक्षानो	४०१	०	२७
-ः म्यागेनापार्जितस्वधनादेः मत्पत्नी नियोगे ।		४०२	०	[illegible]
-न०-दात	न०म्यागेनापार्जितस्वधनादेः मत्पा	४०३	०	२५
	ा नियोगे दन			
-०।	विष्टाप्यक्षमान०	४०३	द्वि०	१६
-ष	विहृतं	४०४	प्र०	८
-पु	पक्तियुधूमीभ्या०	४०४	०	२८
-०	कोजनमा न०	४०५	द्वि०	२२
-स्य	स्युवंमस्ति	४०६	प्र०	१८
-र्.ति	वाद्यति	४०७	०	२५
-स-ष	कम्पणस्य०	४०८	०	८
०।-ऽ	वौतस्य्.षः। वि:	४०८	द्वि०	१०
-ा मप	ापम्नो	४१०	प्र०	[illegible]
-ा-म्रू०ऽ	ान०म्रूक्ष्याम्	४१०	०	१७
-ापुं०वो	ावोरयति	४१०	०	२१
-ये	तदुभय	४१०	द्वि०	२
-र्ग-त्ता	ध्वंसोरायांमध्ये	४१०	०	८
-ष	शुद्धस्थैः	४११	०	५
-षनः	वीरान्	४११	०	२१
-ा-वि ऽ	दुर्निकायाम् कादुम्बरिकायाम्	४११	द्वि०	२८
-रा ा श	वीराधाय स्यन्ते	४१२	प्र०	११
-०क्ष:	वीरांक्षाः पुं०	४१२	द्वि०	१२
०:-।ऽ	हक: पुं० कोषे ।	४१३	०	६
-शयति	दंशति	४१४	०	१३
-मो	गोमयेन	४१५	प्र०	३२
-स्य	वनस्यति:	४१६	०	७
-ब	वृथाद्दानं	४२१	०	२५
-ह	तदासां	४२४	०	३
-कं	मृस्नाक	४२४	०	८२
-०र्न:ऽ	वृन्दारनिस्वरःपुं०	४२४	द्वि०	१५
-ा र	तस्माद्दपव्यप	४२८	०	०
-षा	द्रव:पर्युनिमत	४२९	०	१५
-म	विचिमना:म०	४२९	०	१५
-स्य	वावस्यति:	४२५	प्र०	७
-द	कर्तां०	४२५	०	२०
-स्य	यकृती०	४२६	०	१२
मा(.)उ	देवासुप्रतिष्ठित०	४२७	०	६
०षा	वेदसोभया	४२७	द्वि०	४
०प्य	मिथ	४३७	प्र०	५
-प	वेदवपुं०	४३७	०	८
-द	पूर्वोद्दिष्टैरिन्	४३७	०	२१
वेदितव्य: चादिशो भासते पत्रे ा एनस्कूतम्		४३८	प्र०	२
०वेदिता। प्र० विदुरंक्षातवि ा२०वि० ऋ: एतस्क०		४५८	द्वि	४

अशुद्धिस्थलम् :	शुद्धिलेखः	पृष्ठम् :	स्तम्भः	पङ्क्तिः
-षे	षेविकर्षि	४८१	प०	२७
-ख्य	का.ख्य	४२८	द्वि०	१०
०।-	बोधित: । चि०	४२८	०	२०
-षडो	नन्नुबाहरू ड ।	४३८	प्र०	१६
-स	वेसनम्	४२८	द्वि०	१८
-व	षेनम ०	४३[illegible]	[illegible]	२३
-त	यथा	४२[illegible]	०	२७
-प	[illegible]धुरे	[illegible]	प०	११
०य	[illegible]	४४०	द्वि	७
-खा। स्र	[illegible]	४४[illegible]	[illegible]	८
-र्षे	[illegible]पांदुरं	४४१	०	[illegible]
-स	वे[illegible]रस्य	४४[illegible]	प्र०	[illegible]
०ल्प	[illegible]म् । म०	४४[illegible]	द्वि०	[illegible]
-य्य	[illegible]	४४४	०	[illegible]
-ध्या	म[illegible]म०	४[illegible]५	[illegible]	[illegible]५
-कृ-क्ष	[illegible]	४५	०	[illegible]
-शा	[illegible]	४४५	[illegible]	२६
-स्य	[illegible]	४४६		२७
-पाकृचि०	पाक्रिमं	४४८	०	[illegible]
-ते	[illegible]	४४९	०	३
-म-द्वा	[illegible]	४५	०	२७
-व	मन्येत[illegible]	४५३	द्वि	[illegible]
-ष्ये	[illegible]	४५[illegible]	प्र०	१७
-शा	पस्त्राचो	४५	द्वि०	[illegible]
-ह	विपर्दं[illegible]	४५[illegible]	०	२७

अशुद्धिस्थलम् :	शुद्धिलेखः	पृष्ठम् :	स्तम्भः	पङ्क्तिः
-य	[illegible]	४५६	प्र०	२७
-म	भूमिस्[illegible]	४५७	द्वि०	१८
-ठ	[illegible]	४५८	प्र०	१२
०व	[illegible]	४६०	प्र०	७
-ता म्	[illegible]	४६१	द्वि०	२
-ध्य	[illegible]	४६१	०	१२
-त्या	[illegible]	४६१	०	२२
-।-कि	[illegible]	४६२	प्र०	२
०ध	व्यञ्जक: । पुं०	४६२	द्वि०	१
-ध्य	[illegible]	४६३	प्र०	२३
०ध्य	[illegible]	४६३	द्वि०	१६
-गा	[illegible]	४६४	प्र०	१५
०प	[illegible]	४६५	०	२९
-[illegible]	[illegible]	४६६	०	२
-य	[illegible]	४६६	०	१५
-म्या	[illegible]	४६६	द्वि०	१७
-का	[illegible]	४६६	०	२८
-स	सोपमि	४६७	०	२
०स	[illegible]	४७०	प्र०	१४
-मि	प्रदानस्[illegible]	४७०	द्वि०	१२
-ष	[illegible]	४७२	प्र०	४
-ए	[illegible]	४७२	०	१८
-म्हा-व्	[illegible]	४७२	द्वि०	२४
-पि	[illegible]	४७५	प्र०	२२

अशुद्धिलेखः	शुद्धिलेखः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः
- म	मपाधिर्भवेत्	४७५	द्वि०	१
- षधि	मनधिकृत्येश	४७६	प्र०	२७
- स	संशययुक्तः	४७६	द्वि०	७
- प्रा	प्रतियोगित्वं	४७६	०	१८
० व	व्याम्हः त्रि०	४७७	प्र०	१०
-व्या-मी	व्याया मे०	४७७	०	२०
- वि	गोयङ्गे	४७७	द्वि०	२६
० व	व्यासगाहः । पुं०	४७८	प्र०	१४
- व्यवस्य	व्यस्यति	४७८	०	२४
- स	संस्कृते	४८०	द्वि०	१३
- त्ये-	कत्ये	४८०	०	२२
- पू-व	विपूर्वाद्वते०	४८२	प्र०	५
- व	सवर्ण०	४८२	०	३
- ष्या	गोजपर्य्याम्	४८३	०	४
- म	सुमिकाले०	४८३	द्वि०	१०
- म्र	याम्यान्	४८४	द्वि०	१२
- द्र	नावरेहाख्यः	४८४	०	१३
० म	वात्यस्तोमः । पुं०	४८४	०	१८
[illegible]	यवर्गः समासिङ्गतः			
०।-प०	ग्रष्टट प० पन्तः क्र रणि	४८६	प्र०	१५
- स्वरवि	कक्षस्वविशे	४८८	०	८
- र्म्	क्रमात्	४८८	०	११
- म	बोद्दनः	४८८	०	१६
- व	संयुक्तः	४८८	द्वि०	२५

अशुद्धिलेखः	शुद्धिलेखः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः
मा	साङ्कसाङ्के	४४८	०	२८
- ध्य	सद्वाक्य	४८८	प्र०	१०
- मिः	नरोभिरूपः	४८८	०	१८
- त्रः	पृतानपत्रः	४८८	०	२८
- त्ता	चादायविक्त	४८८	द्वि०	७
- क	छिक्करः	४८८	०	१८
- सो	ग्रोकवनभासो	४८८	०	२८
- म्य	पत्म्याम् ॥	४९०	०	५
- त्वो	पत्ताऽदूर्शनादित्य	४९०	०	२५
- रनौ	रत्यसौ	४९१	प्र०	१३
-तुंवानि	निस्सतुं निस्सारयितुं	४९१	०	१७
- य	तद्वच्च	४९२	द्वि०	५
- दं	वदन्त्येवं	४९२	०	२१
- धेः	स्मृतीबुधैः	४९३	प्र०	४
- क्	सम्यग्	४९३	०	१२
- या	सोपास्येति	४९३	०	२८
-हेनोप्य	हेनोप्यकर्मकृत्	४९३	द्वि०	७
- का	संहारकारकः	४९३	०	८
२१ देग	जगदेतच्चराचरम्	४९३	०	१७
- ष	कोषाम०	४९५	प्र०	१०
- र	परंज्योतिरोमिति	४९५	०	१९
- ति	सिद्धान्तगामिनी	४९५	०	२४
-ह्रो-च	व्यहोत्त्वनयानेय	४९६	०	१
- म	चर्जुनपादपे	४९६	०	११

अशुद्धिलेखः	शुद्धिलेखः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः
- ये	मक्तः पर्यायोक्ता	४९६	द्वि०	१०
ता	चापमयोमः	४९७	०	९
२ १ -हरि	महापत्रहरितमतरौ	४९८	प्र०	१
- च	अङ्गमस्येतिवा	४९९	द्वि०	२७
ऽ - बबति	चाष्टाज्जोवतिभैषज्य	५००	प्र०	९
- ष्ण	मुष्णा	५००	०	२८
- पुष्पा	युष्मामाम०	५००	द्वि०	२४
-मी	विचित्रगोरमतै •	५०१	०	७
ऽ -॥ मध	॥ मङ्गा :	५०१	०	१३
० चौ	मवि : । स्त्रो०	५०१	०	१९
- पे	मध्यस्थपुरुषे	५०२	प्र०	२१
- म	मागत्रे ॥	५०२	द्वि०	२३
- थं	प्राकाररचार्थं	५०३	०	३
- म	गलरोगविशेषे	५०३	०	२८
०न्द :	मतच्छदः । पुं०	५०४	प्र०	१
- बद	निर्मलदीपनं	५०४	०	१२
०) -	मतधा]प्र०	५०४	०	१६
- स्थो	पद्मस्थे	५०४	द्वि०	४
-क्ष्ण	लघुतीक्ष्णा	५०६	०	६
-जि-त्वा	रःजितत्वात्	५०७	प्र०	१८
- दे-च्छ	देवच्छन्दे	५०७	द्वि०	४
- न्या	पत्न्याश्चेति	५०७	०	१२
-द्र :	इन्द्र :	५०९	०	२
- स	निर्भर्त्सने	५१०	०	५

अशुद्धिलेखः	शुद्धिलेखः	पृष्ठाङ्कः	स्तम्भ	पङ्क्ति
- या य	नित्यत्वादुत्पत्तिः	५११	०	१४
- च	मांसवाक्ये	५१२	प्र०	२
-ति-क	स्तुतिवाक्यजनितं	५१२	०	७
क्षा	तत्वाहचर्या-	५१४	०	१४
- य	षष्ठ्यादिषु	५१४	द्वि०	३
- ष्टो	षष्ठो गुणक्रिया	५१४	द्वि०	४
- ब्द	शब्दानुशासन०	५१४	०	१४
- मी	गीते	५४१	०	२४
-ष्टा	निष्ठायाम्	५१५	०	४
- भ्य	माम्यति	५१६	०	१३
० क	मम्बकः । पुं०	५१७	०	३
- ण	कर्णस्त्रुता	५१८	०	२५
-न्त	स्रोपातके	[illegible]	०	२७
+ म्	- उमम्	५१९	द्वि०	१३
- प	युक्तादेश :	५१९	०	१७
-कल्	प्रातिकूल्यस्य	५२०	प्र०	२३
- रि	सम्प्रसारणिर्भ्योङः	५२२	०	१३
-स्या	मस्यादक्षिण०	५२२	द्वि०	१५
- य	मन्वयाश्च ष्टा०	५२३	प्र०	२४
-न्त	भेदाक्षरसिंहत्व०	५२३	द्वि०	२३
-। १-॥	॥ ११ ॥	५२३	०	२४
२ १ -रस	सरवत०	५२५	प्र०	५
२ १ -रपूं	कर्पूरमरिचे य	५२५	०	७
ऽ -तिक्ति ऽ ड-माषा	• ० • ०	५२६	०	२६ २

अशुद्धिलेखः	शुद्धिलेखः	पृष्ठाङ्कः	कुं	पङ्क्तिः
२१ चक्र	चक्रवर्त्तिन :	५२६	द्वि०	४
-।।- य	।। यर्वति । यवगतौ	५२७	०	१६
०.व.-पा	यवरपादप :। पुं-	५२७	०	२८
× मु	त्यसुन्	५२८	प्र०	१८
- खो	वमाखौ	५२८	०	२७
- दॆ	नरेन्द्रोयदिखात्	५२८	द्वि०	२६
- । त	यर्वति	५३०	०	२८
० स्रा	यस्ताङ्ग : । त्रि०	५३१	प्र०	१
- स्र	यस्तास्ते० हुभा-	५३१	०	५
ऽ -भेदेदा	भेदात्	५३१	०	२६
- भा	याक्रमाचे	५३२	०	२७
- ल	मूलं मूलक्रादे :	५३२	द्वि०	४
- र्वा	वर्चांसि	५३२	०	२१
२१ - रक	वर्णस्यक्षरणे०	५३३	प्र०	२७
- क	याक्रमीयं	५३३	द्वि०	२७
- स्पण	नाक्षण	५३४	प्र	१
२१ -वंन्य	गन्धर्वतन्त्रम्	५३५	द्वि०	१
दु - ख	दु खदात्व	५३५	०	१
- या	खगाखाश्रय०	५३६	प्र०	१३
- ह्मो	यह्नोता	५३६	०	१८
- ख	खरच्छद :	५३७	०	१०
- स्त	वस्त्र	५३८	०	३
०ताम	गातमानम् । त्रि०	५३८	०	१७
-स्या	खामाच्यात्	५४१	द्वि०	२०

अशुद्धिलेखः	शुद्धिलेखः	पृष्ठाङ्कः	कुं	पङ्क्तिः
ऽ -विविधा	साहिषा०	५४२	प्र०	६
- मा	काङ्क्षाधामिति	५४२	द्वि०	१
- र्गा	यावर्दोरोग०	५४२	०	२१
० म	यक्रूर : । पु०	५४३	प्र०	२०
-। पा	कालाट०	५४६	०	२२
- श्च	श्यति	५४६	द्वि०	४
- मृ-न्तु	पद्मतन्तु-	५४६	०	१८
ऽ -:ससर्व-स्वा	ऽ स्तयः सर्वमाप्त्वा । र्थं कामिदा:	५४६	०	२०
- स्र:	यालग्राम ०	५४६	०	२४
- हरा	हारवतो	५४६	०	२८
०ल्लि	गालाल्लि : । स्त्री-	५४८	प्र०	६
०।-वि	गालानो । स्त्री- विद्यार्थम् ।।	५४८	०	११
०।- मृ	यालामृग : । पुं- मृगालः।	५४८	०	१२
- ता	ताक्ताच्चवापिता:	५४८	०	७
य	यथा	५४८	०	२८
- ष	घाषाहन्ति	५४८	द्वि०	४
- ति	सूर्यद्युति:	५५०	०	१२
ऽ -करगि	मूर्कगिरया म् ।	५५१	प्र	२५
०लि :	गाल्कल : त्रि०	५५१	द्वि०	२१
- ह	बाहुलकात्	५५२	प्र०	२६
को	यासके	५५२	द्वि०	१
-र्षा	सर्वेषां	५५२	०	१२
- रेउ	घोरजझमामा०	५५३	प्र०	१०
- स्य	तस्यैव०	५५३	प्र०	१४

अशुद्धिलेशः	शुद्धिलेशः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः
-न :	काध्यतेजनै :	५५२	द्वि०	१५
-ख्रि	युवरूपिणा	५५५	प्र०	१
- सान्द	सन्दिग्ध।०	५५५	०	८
० ।-प	गा।स्तमत्वश्च :/चि० पर० ऽ	५५५	द्वि०	१
- संस्त्र	स्रं मतिस्मात्	५५६	प्र०	२८
-।प	आविनि	५५६	द्वि०	४
-श-ट	द्दष्टमिति शिरो०	५५७	०	२७
दे ऽ	रामा।लक्षयाम् ।	५५७	०	२८
·श्या।याम्	वेशपाश्याम्	५५८	प्र०	१७
क	काति।चै	५५८	०	१८
० घा	शिरुघागम् । न०	५६०	०	१४
- म	मा।लिपिष्टक०	५६०	द्वि०	१३
- स्त्र	लत्वस्य निपात्यते	५६१	प्र०	२१
-ष्ट	प्यवीगतम्	५६२	द्वि०	११
- ता	ना।न्याम्	५६३	प्र०	३
- श्न	शिम्रा।सुना।स्त्री ०	५६४	०	२
०ले	शिली।सप ·।पुं०	५६६	०	१०
- ये।	पर्यायौ	५६६	०	१८
- व।न	व।अपा।प	५६६	द्वि०	१९
- ष्ठ ऽ	गीष्ठ	५६७	०	१९
- पशक	-गाचकपष्ट्रम्	५६८	०	२०
-त्व	महापोठित०	५६८	०	२
- र्त	पद्मवेदिक्लिङ्ग	५६८	०	१०
- स्त	स्न वर्म्नि	५६९	प्र०	२५
-०म	शिवभट्टा।रकः।पुं ०	५६९	०	२९
-प	ऽमयाच्युताच०	५६९	द्वि०	२१
-।-च	।चचत्तुर्दश्या।मेव०	५७०	प्र०	१
ऽ ०शिवचा	शिवा।टिका स्त्री	५७०	द्वि०	२१
-य	याप्यवाने	५७१	प्र०	१७
।- शिवं	।संज्ञा।यां कन्।शिवं०	५७१	०	२०
- प्र·क्र०	तस्यपति।कृतिरिव	२५७	०	२३
- स्था। ऽ	उत्तानपा।दस्तस्य।०	५७३	०	८
- कारणि	अम्वकमेषु	५७५	०	१
-द-ण	विशेषणत्वाद०	५७५	०	९
- ग	शिघिश्राम्रा।षि	५७५	०	१४
- प	क रे०	५७५	द्वि०	६
- आ।प्र	यश्च पा।त्वच्	५७५	०	१२
- व	वा।युभक्ष्य :	५७६	प्र०	२७
० शो	शीतश्मका :।पुं०	५७६	द्वि०	३
- त	शीतार्ति।	५७७	प्र०	१
- न्द	इन्दौ	५७७	०	५
- ष्ट	वेष्टभ्यो	५७८	द्वि०	७
- व	द्रवा।वश्ययो:	५७९	०	१२
० ण ऽ	शणो म०	५७९	०	१९
·स्यता।म्	का।रूण्यम्	५८०	०	२७
-।·स	।शोलनम्	५८०	०	२९
- स्त	वस्ते	५८१	०	
- प्य	रूप्ये	५८२	०	१३

अशुद्धिलेशः	शुद्धिलेशः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः	अशुद्धिलेशः	शुद्धिलेशः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः
- सु	मुक्तोष्ण ०	५८३	०	२२	- त्व	संज्ञापूर्वकत्वासम्भवः	५८४	प्र०	६
० म	शुक्लकर्म्मा । वि०	५८४	प्र०	१०	०पुं०-शु०	शूकः । पुं०नपुंसके	५८४	०	१०
- न्ता	शुक्लसचान्ता :	५८४	०	२२	- पस्य	शूकरस्य च	५८४	द्वि०	१५
- क	तिथ्यात्मक	५८४	०	२४	- य०	कायस्थस्य च :	५८५	प्र०	२७
- श्व	श्वेतकुसुमयुक्त :	५८४	द्वि०	३	- त्व	जनयित्वा	५८६	द्वि०	१५
- व	सजातीयद्रव्ये	५८४	द्वि०	१४	ऽ ब्राह्मण्य	ब्राह्मण्या०	५८६	०	१५
- र	विशुद्धधोत्	५८५	०	१८	- मा	शूद्रस्यभार्यायाम्	५८६	०	१५
-ग	गायापत्य	५८५	०	२६	- म शू	भिन्नजातीयायाम-विशूद्र०	५८६	०	१७
- च	संपन्न	५८५	०	२८	ऽ - ज्ञ	ऊर्ज्जं	५८७	प्र०	२७
त्व	शुचित्वं	५८६	प्र०	४	- टे	तियोघटे	५८८	०	२
-घाकव-घाप	वैकसर्वेषांपिण्डकाभवेत्	५८७	प्र०	२	- न्ने ०	लम्ने ॥ एतेर्लिङ्गशून्य० गने	५८८	०	५
- शु	शुध्यति	५८८	०	१८	- त्रि	भोत्रोत्यर्थः	५८८	द्वि०	५
- न्त	असन्तोषः	५८७	०	१८	- य	शूर्यते	५८८	०	२०
० म	शुचिस्मू पक्षा स्तो ०	५८७	०	२६	- द	इन्द्रादुपचित्ति	५८८	०	२१
- शु	शूद्रः कुलोद्भतः	५८८	द्वि०	८	- स्य दा	अस्यनिदानादिकं	५८८	०	२१
- स	व्योमगङ्गा	५८८	०	१७	- य	जीयते	५८८	०	२३
- वे	भवेत्	५८८	०	२५	० क	शूलधृक्पुं ०	६००	द्वि०	६
- भा मि	पवंशुभमार्युम्	५८०	प्र०	२०	-त्रि० शू	त्रि० शूलास्त्रधारिणि स्त्री०	६०१	प्र०	४
- न	क्षेमङ्करे	५८०	द्वि०	४	- यां	दुर्गायाम्	६०१	०	८
- स्या	कस्यायाम्	५८१	१०	५	० ल	शूल्यचे	६०१	०	११
मि	श्रोतुमिच्छो	५८२	द्वि०	११	० पु	पुं ०	६०२	०	११
- न्द्रे	मनान्द्रेपिभिते	५८३	०	५	- श्व	शृणाति	६०२	द्वि०	१०
-त्रा-वनं	बालानांश्लदं वधु	५८३	०	१७	- रा	गगनमण्डले	६०३	प्र०	२१
० क	शुष्काङ्गः । पुं०	५८३	०	१८	स्य - भि	शृङ्गरोसस्याभिमवा	६०३	द्वि०	१८

अशुद्धिरेषा	शुद्धिरेषा :	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः
-क्षो	क्षतिरिक्षो	१०४	द्वि०	४
-तं	तमुच्चारतीति	१०५	०	१९
-म	शेषसंस्थिता	१०६	प्र०	२०
-६	१०६	१०६	द्वि०	८
-न	नानारूपत्वात्	१०८	०	९
-ऽनन। म्य	। नथादिभ्यश्चतिष्ठक	१०८	०	२५
-मे	योगविभागेन०	१०[illegible]	०	२७
० न०	पुं०	१०९	प्र०	५
-भु	भोक्ताभुक्०	१०९	०	२८
-प	दस्युपातेनराघव	११०	०	७
-ऽरुषेषां च	पुरुषर्षेश्चयतीति	११०	०	२० २१
-।मि	गुरुभिः	११०	०	२१
-म्य	मनुष्यमूर्त्ते	१११	०	१
-क्ष	लोहिताक्षे	१११	०	६
-ण	शोणृ वर्णगत्योः	१११	०	१६
० त	शोणिताङ्गम् न०	१११	द्वि०	१२
-थे	संयोगे मेत०	११२	०	६
-मे	शेषे०	११२	०	७
२ १ -नंन ऽ	रक्षापुनर्नवायाम्	११२	०	१०
भऽयमाके पुषे	ममनुष्यस्य रूपेति ८क	११२	०	११
-मा	शेफहारके	११२	०	१५
-तेरि ऽ	कर्मणिक्तः	११२	द्वि०	१३
-मादिदि ऽ	विष्कम्भादिषु०	११२	द्वि०	२६
रम०	सुधीरः०	११२	प्र०	१
ऽ -ध्यानास तव	मध्याप्यायनोर्ध्व सेति	११२	०	२८
-श्वः	रसाश्वाश्वैः	११३	द्वि०	३
-से	विफलाश्वेता	११३	०	२९
-मि	मारुतमिति	११४	प्र०	६
-त	क्लीतनके	११४	०	१४
०मी।	मीकम्। न०	११४	०	१८
-स्त	मुक्तायाम्	११४	०	२९
-मे	वासोऽजिन०	११४	द्वि०	१५
-भ्य	मृत्स्नाभ्यो	११४	०	२९
ऽ -यतः	चयकरं	११५	प्र०	११
-:- क्षो	कृष्णोपृक्टोपटि०	११५	द्वि०	२१
-तं	जायते	११६	०	१४
०क्लि	मौक्लिकः। पुं०	११७	प्र०	१०
-ल्क	शुल्कवहनं	११७	०	१२
-ना न:	मौर्विरोनामनामत:	११७	०	२७
-॥-सि	॥श्यामलत्वमस्यास्ति । सिता०	११८	द्वि०	१२
-क	कालिकायाम्	११८	०	२४
-ध	घनाघनम्	११९	प्र०	८
-वं	सङ्क्षास्यनपदान	११९	०	१०
-प्पा	कण्पाश्ने	११९	०	२२
-क्षा	वाक्षेरे	१२०	०	११
ऽ हवर्ण	तहवर्णयुक्ते	१२०	द्वि०	२५
-रा	शकारे	१२०	०	२७
-:- मा	म्लास्यांशुज	१२१	प्र०	५

अशुद्धिलेशः	शुद्धिलेशः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः	अशुद्धिलेशः	शुद्धिलेशः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः
-म्या।	हर्म्यां वैरगुभि	६६१	०	२५	-स्य	धम्मस्य ।	६३६	द्वि०	२४
-म	मण्डूकपर्णपत्त्रोर्णि	६२१	द्वि०	७	-ब्रि	बक्री मूर्द्धि०	६३८	०	१
-ति	पत्तिभ्यां	६२२	०	१०	-ड्रि	मूर्द्धि मस्तके	६३८	०	४
-त्स	शब्दतात्पर्यं०	२२	प्र०	२८	-घि	मौलीत्यजस्यर्धिनौ	६३८	०	१३
-क्ता	शुक्तादादस्यां	६२३	द्वि०	१६	-न	मममं	६३८	०	१७
-ष्य । ष्टवि	पतिशायनेनमविष्टमापि	६२४	प्र०	१०	-ट	प्रतिपादका	६३६	प्र०	१२
-ष्य-म्	अव्ययम् । न०	६२४	०	१५	-ध्मा	निघ्नमा०	६३६	प्र०	१८
-र्थं	तुरियार्थं	६२५	द्वि०	८	-त्मा	म.घाम्व०	६३६	द्वि०	१
-द्	आदर्थं	६२५	प्र०	२८	-ता	श्विरता०	६४०	प्र०	४
-नृस	कंचित्नमित्तमित्ति	६२६	०	२५	-ग्धं	स्निग्धमधुर०	६४०	०	८
-ष्य	प्रियमन्त्र०	६२६	द्वि०	२८	-म्वे	स्वेदापनां०	६४०	०	१५
-भू-यामाम	भूतायामविद्यायाम्	६२७	प्र०	२०	-कु	मकुःते	६४०	द्वि०	२८
-ष्टु	चन्दने	६२८		५	ग्रो	स्रास्त्रोष्यानपे०	६१४	द्वि०	८
-दृ	वृद्धाषा	६२८	०	१२	-श्र	दृगालय :	६४२	प्र०	८
-नि	अनपायिनो	६२८	द्वि०	८	ल्प	कल्पतक :	६४२	०	२०
-ऽ[illegible]	पूर्वशीनापि	६२८	०	२१	-स्य	वामेयस्या	६४२	०	२२
-म	कटफले	६२८	०	२८	-म	लम्बकर्णी	६४२	०	२४
-ष्ट	गम्भार्याम्	६२८	०	२	-ण-त्	कणावतर्द्गो०	६४२	द्वि०	१
-र्था	समर्था।	६३१	[illegible]	११	-त्य त	तस्यात्यभिषेया	६४२	प्र०	११
-न्	[illegible]	६३२	०	१६	-वे	स्वयन्त्रेति०	६४३	द्वि०	२५
-ग	गाङ्गलम्	६३३	०	१०	-न	मितिनिर्देशव०	६४४	प्र०	१५
-क्र	लिङ्गाम्रेड्रो०	६३३	०	२२	-त	घृतंतम०	६४५	०	८
-पुं	अनुयतिदुभि :	६३५	द्वि०	१६	-र्णम	०र्णसमधुस्रावा०	६४५	०	११
-मं।	०स्वभितिपत्रा।	६३६	प्र०	१६	-व	स्योमकुठार: पुं०	६४५	०	२०

अशुद्धिलेखः	शुद्धिलेखः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः	अशुद्धिलेखः	शुद्धिलेखः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः
-स्वा	श्वेतयावो०	६४६	०	८	-सम्भार्न-	याचामनम० शुद्धार्थ याचम	६५७	०	९
०म	श्वेतदूर्वा । स्त्री०	६४६	द्वि०	९१	-षि	त्रिव्यतिवा	६५७	०	२७
०द्वी	श्वेतद्विप : । पुं०	६४६	०	२७	-ना-स्व	देवसेनास्वधास्वाहा	६५८	०	१५
०वे-पुष्प	श्वेतपुष्पक : । पुं०	६४६	०	३	-त्वि	वोडशत्विंकुसाध्यै	६५८	०	१९
-का	सादोपथ-	६४८	प्र०	६	-ववव	वयववति	६५८	द्वि०	२१
-श्य	शृवेतेनोच्यते	६४८	०	१५	-॥ऽ पं-।	॥ ऽ	६५९	प्र०	२४
-द	च्छुद्रगर्ताख्याम्	६४८	०	२६	-न्या-र	अन्यो । रथो	६६०	द्वि०	२८
०र्ष	श्वेतसर्षप : । पुं०	६४८	द्वि०	१३	-क्षु	षाड्गुणाभाव :	६६०	०	२९
-वी	श्वेतदूर्वायाम्	६४९	प्र०	२	-त	कीर्तित :	६६१	०	४
-भा	त्रिभण्डायाम्	६४९	०	१०	-स-	संयोगदृष्यते	६६१	०	१०
-कृये	सख्योये	६५०	द्वि०	१५	+र-	तारकादित्वादितच	६६२	प्र०	१२
-वि	चतुर्विंशति	६५०	०	२०	-। कादित्वादितच् । । ००००		६६२	०	१४
-ट	षट्पदानि	६०५	०	२९	-श्वल्लु	श्वेतश्वल्लिटो	६६२	०	२७
-वा	मात्रापस्तोन्तरे	६५०	०	२९	-ग्नि	क्षसन्तीति -	६६३	०	१६
-र-	गदाधर :	६५३	प्र०	४	-या	कालात्मना-	६६३	०	२५
-कोकीति	लभीति -	६५३	०	१२	-:-।	: पदार्थ : ।	६६३	द्वि०	१५
-नि-य	पहिन्द्रियनियन्तरि०	६५३	०	१५	-त्य	संवर्गस्यविद्या-	६६३	०	२६
-स्वा	मासाद्यंतरस :	६५४	०	१४	-ग्रे	परमशं मेऽग्ने रवतारि	६६४	०	१
-सर्पनम्	० ० ० ०	६५५	प्र०	१०	-य	तीर्थविशेषि	६६४	प्र०	१३
०ष्टि :	षष्टि : । स्त्री०	६५५	०	१९	-प्व	समवाप्यन्तर्गत-	६६४	द्वि०	६
-म	मतपुष्पादीनाम्	६५५	द्वि०	२१	०वि	संवीत : । वि-	६६५	०	१०
-ष्ठि	षष्टिकु०	६५५	०	२४	-नि-र्त्ति	निवर्तिनो -	६६६	प्र०	२९
-षी	वाजपुरुषो०	६५६	०	४	-ति	उपपत्तिर्नामम्	६६७	०	१
०श,	षाड्गुण्यम् । न०	६५७	प्र०	६	-वि	पत्तिर्विदश०	६६७	०	०

अशुद्धिरेखा:	शुद्धिरेखा:	पृष्ठाङ्क:	पृष्ठ	पङ्क्ति:
-ऽरटणं	निर्घारणं	६६७	प्र०	१२
-स०	संशयो०	६६७	०	२३
-त्त	विशेषापेत्त:	६६७	०	२७
-म षा	आयमाने तेषाषा०	६६८	०	१८
-म	संस्मृत्यतैवा	६६८	०	१७
-म	सद्भिनि	६६८	द्वि०	६
-ऽहिसंसं	दु:खमूलं हि संसार:	६७०	प्र०	१४
-।-त्य	। सत्यत्याग:	६६०	०	१६
-खो	सखोकृतमष्टाविषम्	६७०	०	२०
-स्य	सङ्ख्यातस्या०	६७१	०	१६
-सा	संसरणम्	६७१	०	२३
-सं	सम्मोक्षितधने	६७१	०	२६
-व	शाखासंस्पृष्ट:	६७१	द्वि०	८
-त्य	एत्यगामि	६७१	०	२०
-र्यंतौ	सप्यन्तौमित्रारे	६७१	ऽ०	२३
-णा	उत्कृष्टगुणाधानि	६७२	प्र०	१४
-ऽस्मास्मा	०स्मातिक०	६७२	०	१८
र्ती -धा	शुद्ध्यादि०	६७२	०	२०
-ह	रिहा०	६७२	०	२७
-ष्ठ	पश्चाभियष्ठा	६७२	द्वि०	१८
-त्त	व्युत्पत्तौ	६७२	०	२५
-न्य	कश्चिद्गजन्य:	६७२	०	२८
-प्य	सगांग्र्यक्षिति	६७३	प्र०	६
-स्क	संस्कार:	६७३	०	११

अशुद्धिरेखा:	शुद्धिरेखा:	पृष्ठाङ्क:	पृष्ठ	पङ्क्ति:
-स्य	कश्चित्सम्हो०	६७३	०	१२
तेऽमेन।	संतिष्ठते ।	६७४	द्वि०	३
-पङ्	आतस्येतिक:	६७४	०	४
-षणी	दूषमर्णा०	६७५	०	१०
-स्य	स्पर्द्धायाम्	६७६	प्र०	१२
०दृ	संस्कृति: । स्रो०	६७६	द्वि०	१८
-प्य	पवस्य०	६७८	प्र०	१६
०पु०न०	सनव:पु०	६७८	०	२१
०त	पवदेत्तने	६७८	प्र०	२३
-श्र या	तेत्रामयापश्चा	६७८	द्वि०	५
-स्य	सम्पत्तिस्य०	६७६	प्र०	११
०पुं०	सगुण: । चि०	६८०	०	६
-न्य	सम्माजिन्या	६८०	द्वि०	८
-श्रा	अभियाभ्ति	६८०	०	२१
स्य	परमारमनु०	६८०	०	४
-ष्ट	हारं	६८१	प्र०	३
-म	धर्मंशि	६८२	०	१
-ष्णु	स्मृत्वा विष्णु	६८२	०	४
-त	भङ्गीतिंत:	६८३	०	१४
-ङि	कुचमङ्कौघने	६८३	०	२०
स्य	सम्पर्द्धं	६८४	०	५
-स्व	स्वर्गानकृत्वा०	६८५	०	८
-वुं	पशुंदमत्रं	६८६	०	११
-त्तां।म	त्यक्तांमृत्युमवते	६८६	द्वि०	१७

अशुद्धलिपिः	शुद्धिलेखः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः
- अ	परस्मिन्	६८८	प्र०	६
- इ-।	इति	६८७	०द्वि	७
- न्दा	दृश्यादृष्टा ०	६८८	०	११
० स-प	सङ्घदर्भाजनमान०	६८८	०	१८
०ष- घा।	सङ्ख्यामः।पुं०	६८८	०	२०
- म ऽ	भविष्यायाम्	६९०	द्वि०	२
०न्दल ल ऽ	नविद्यानन्दलक्षणम्	६९१	०	१२
-घषो:पु	पुंसोपुत्रे	६९१	०	२५
-।-ब	।समःमोक्षानोचः म- मा०	६९८	प्र०	१
- ल्या	कल्याणा ०	६९२	०	२६
- चा	व्यभिचरति	६१५		१७
- ट	घटःप्रमादेयः	६९५	द्वि०	६
-स्मितत्व	०स्मितत्वविद्धि	६९५	०	९
० पा	अविज्ञातो	६९५	०	४
- व	वंशे	६९६	प्र०	२७
स्त	समस्ताद्	६९९	०	४
- त	भूत यैवचने	६९९	प्र०	६
- त।तृय	नत्त यत्वकत्वासत्य०	६९९	०	१८
- प्य	मध्ये कल्पकम्।	६९९	द्वि०	९
- ि	महिचत्तगेत०	७००	प्र०	१२
- नां	चतुर्युगाणां०	७००	०	२३
० वं:	सत्यवचाः।पुं०	७०१	द्वि०	११
- म	सत्यवचने	७००	०	२८
०- कर्त	कं तत्त्वमिति०	७०१	प्र०	२५
- स-म	च स्थेति	७०१	द्वि०	२ च
- नो	एकाकिनि	७०२	०	५
- र	निर्विकारे	७०२	०	१६
- श्र	श्रावणत्वात्	७०३	०	१७
-। स्म	सर्वस्मिन्	७०४	प्र०	२१
स्था	प्रतीत्योपपामे	७०४	द्वि०	१५
- दे	कुन्दे	७०५	०	१७
+ त्व	त्यदादित्विकत्व्	७०६	०	७
- मे। स	पक्षथवे।संसासो०	७०७	०	१४
- नि	नकारलोपः	७०८	प्र०	२९
० त्क	समत्कुमारः।पुं०	७०८	द्वि०	९
- ग	गांक्षते	७०९	प्र०	१९
× ष्ट	पृषोदरादित्वा०	७०९	द्वि०	२९
- ब	सहनीकेनेति	७१०	प्र०	१४
- म्य	पारम्पर्ये	७१०	द्वि०	२
- तलुम ऽ	सम्तापितम्लमो	७१०	०	६
× म	इत्यये तिघञ्चा	७११	प्र०	१
- ब।	घोरादिषरे	७११	०	२
- ध	प्रसिद्धे	७११	०	२९
- ध-लु	कुतस्माद्धनलुब्धामा	७११	द्वि०	१०
- ष्यु	ष्युट्	७११	०	१५
० न्द	सन्दानितोक्षो०	७१२	प्र०	७
- ह	वाधिकंरति	७१२	द्वि०	२९
- क्या।	मोक्षशास्त्रमरायणः	७१४	प्र०	२

अशुद्धिलेशः	शुद्धिलेशः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः	अशुद्धिलेशः	शुद्धिलेशः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः
- स्र	मसृति	७१४	०	९	- ति	ममानापोति:	७२५	प्र०	२९
- यसस	मयसनुधामि	७१४	द्वि०	८	- ङ्गि	फुलिङ्गिनो०	७२५	द्वि०	१८
- लै	देशकालेदुःखायाङ्कि॥	७१४	०	२३	- नाभि	मातृपक्षे :	७२६	प्र	१६
- । -	।समृध्या।मस्यस्या:	७१४	०	२१	-प्र डत्	॥मध्यपुरुषोद्दट्॥	७२६	०	२१
०क :	सत्र्‌ चित: चि०	७१५	प्र०	१५	०यम	समद्रशोवयवस्र०	७२६	प्र०	२४
-ष्ट	सङ्गां०	७१५	०	२८	० स्व	कोस्वादृयौ०	७२६	द्वि०	४
- दृषि	षयुद्‌द्‌हिष्कायैः	७१६	०	२२	-स्वक्षपो	भिपस्वाभक्षपाणिच	७२६	०	१२
- लं	ततकाले०	७१६	द्वि०	१६	ऽ स्य मतथ मो	०पास्यस्यमतंमाभयेत्	७२७	प्र०	१६
०स्य	सस्यापुष्यो। स्यो०	७१७	प्र०	२८	- श्रि	सिग्ध्राव्य०	७२७	०	२५
- । -	॥ व्यठे ।	७१८	०	१९	-सा-क	रमाकृष्ण०	७२७	द्वि०	१५
-कर्मेणित्रा क :	भाविवान :	७१८	०	२२	: य :	घटमोया	७२८	प्र०	२०
- स्य	इयुग्म वर्ण०	७१९	०	७	- षि :	समार्षीपि	७३०	प्र०	८
ऽ ०म्रा म्रा	०म्राह्मण :	७२०	द्वि०	१३	- म्	स्वविषय:।	७३०	०	१०
- र्गे:	मान्यमार्गे :	७२१	प्र०	११	- त	स्तबेनोजव	७३०	द्वि०	१
- स्त्वे	कसीनास्यै च	७२१	०	१४	- म	भामानिक	७३१	प्र०	१२
ऽ - द्र ससं	भद्रे मंन्यामपहृण	७२१	०	१७	- येलुसु	समग्रेसुषद्रादे०	७३१	०	२३
- म	सन्न्यास :	७२१	द्वि०	२३	- मा	सपासुवाक :	७३१	द्वि०	२०
ऽ - वचव्य	स्वाकन्ये वव्यवस्थित:	७२२	प्र०	१२	- स	सः वे मर्थे	७३२	०	६
- चा०	तोटकाचार्ये :	७२२	द्वि०	५	- वे	वमा स्वत्	७३२	०	१०
ऽ - यद्दर	पवदग्रनामानि	७२२	०	६	- त	विधाता	७३२	०	२०
- त	धारणात्	७२३	प्र०	२	- द	कदव्यवचा	७३३	०	२९
- पु-द्र	पुराणादिपुषद्रष्टव्यम्	७२३	०	१८	-त्वं	सममति स्वे	७३४	प्र०	४
ऽ म्रव	ततोऽपवगमस्यम्	७२३	०	२०	- गं	-रागद्वेषादि	७३४	०	५
- या	पिपङ्गमम्	७२४	द्वि०	१०	- गोसु	समागेषु	७३४	०	९

अशुद्धिलेशः	शुद्धिलेशः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः	अशुद्धिलेशः	शुद्धिलेशः	पृष्ठाङ्कः	स्तम्भः	पङ्क्तिः
-प्र	समन्तात्	७३४	द्वि०	१६	×ति	पमीकाम्पतीकम्	७४८	०	१
-य	समति	७३५	०	५	मा।भा·मा	मीभमाभीमम्भोम:	७५१	प्र०	११
-त्या	दोषीत्पादे	७३६	०	१५	-थे -गु	क्रियेगुणक्रिया	७५१	०	१९
० सु	[illegible]	७३७	०	३	-ह्रे	स[illegible]मे	७५१	०	१८
-वे	[illegible]स्यैकेन	७३८	प्र०	१३	० त्य	समुत्थानम्। प्र०	७५१	द्वि०	२०
-ह्	मासमानकृति	७३८	०	२१	-ह्	उहसे	७५२	प्र०	११
-ना	[illegible]ण्वात्	७३८	०	२७	-वे	[illegible]	७५२	०	२७
-प	संश्रयिते	७३८	०	१८	-ध	उद्धृत :	७५३	०	२८
-न	नपुन :	७३८	०	१७	-नि ऽ	विरोधकारीति	७५४	०	१८
-म २१	ग्रहानुपपत्ते-	७३८	०	२४	-भ भ	अलायाम्	७५४	०	२४
-क्षिप	कार्यनु[illegible]विश्रये	७४०	०	६	-सं	साधं संविद्[illegible]	७५४	द्वि०	२५
-र	नलोदित :	७४०	०	२३	० म	समुद्रमिन्धुसङ्गम:। पं०	७५५	प्र०	६
-ह	एवंचिन्त्यपि-	७४१	प्र०	७	-द्रा	समुद्रान्ता-	७५५	०	१७
-नि	निरुद्दिरनाद्य-	७४१	०	१३	० न्	समुद्भुदु : । द्वि०	७५५	०	१०
-नि	पदेनापि	७४३	०	१७	-म्प	सम्पासे	७५५	०	२१
-कां।गां। व्यम्	[illegible]	७४४	०	२१	-क्य ऽ	गन्धाक्यो	७५६	प्र०	१७
-प	नियत०	७४४	द्वि०	२४	-००च	पाक्यमेवच	७५७	०	२१
० म	समासादित : द्वि०	७४६	०	२८	-स्य	मार्गोऽस्य०	७५७	द्वि०	४
भू २१	सहिज्जमानुभू०	७४७	प्र०	१७	-स	म।स।क्षपद०	७५७	०	१८
-चरेण ऽ	विरहेनकुल-	७४७	०	२४	० गो	गोकुले	७६०	प्र०	२२
-क्षह ऽ	समुदायकरणं	७४७	द्वि०	२	-श	सक्ती	७६०	द्वि०	१६
-नमव	त्रिभुवमचन्द्र०	७४७	०	५	-ष्टे	विशिष्टे	७६२	प्र०	४
-स क्ष	समाक्षिपति	७४७	०	२५	-ष	विषय०	७६२	प्र०	९
० म	समिति :। स्व	[illegible]	०	१	-भ	सम्यक्त्वाभ्यस्ते	७६३	०	७